THE

SIDDHÂNTA KAUMUDÎ

OF

SRI BHATTOJI DEEKSHITA

WITH THE COMMENTARY

SRÎ BÂLAMANORAMÂ

OF

SRI VASUDEVA DEEKSHITA.



UTTARÂRDHAM.



EDITED AND PUBLISHED

BY

S. CHANDRASEKHARA SASTRIGAL,

TEPPAKULAM.

Trichinopoly:

PRINTED BY BR. JOSEPH S.J., SUPDT.,

ST. JOSEPH'S INDUSTRIAL SCHOOL PRESS.

1911.

॥ श्रीरस्तु ॥

॥ सिद्धान्तकौमुदी ॥

श्रीमद्भट्टोजिदीक्षितविरचिता

॥ उत्तरार्धम् ॥

श्रीमद्वासुदेवदीक्षितप्रणीतया

श्रीबालमनोरमाख्यया

व्याख्यया समुल्लासिता ।



त्रिशिरःपुरवास्तव्येन

आदनूर शं. चन्द्रशेखरशास्त्रिणा

संशोध्य प्रकाशिता ।

१९११.

[एतद्ग्रन्थस्य मुद्रणाधिकारस्सर्वोऽपि प्रकाशकेन स्वायत्तीकृतः ।]

त्रिशिरःपुरविराजमाने
सैण्ट् जोसप्स् इण्डस्ट्रियल् स्कूल् मुद्रालये मुद्रिता सती
विजयतेतमाम् ।

॥ श्रीरस्तु ॥

॥ उपोद्घातः ॥

इह खलु निखिलकुवलयवलमानविद्वज्जनप्रथमपरिशीलितानां भाषावधूभावजिघ्राणां वाचां व्याकृतिमन्तरा तनुभृतामसुप्रतरविवरतया प्रथममस्याः परिशीलनमिति सर्वजनीनम् । तत्र च गताः काशिकावृत्तिप्रासादप्रक्रियाकौमुद्यादयो विरलविरलदृष्टाः । अत इदं त्रिमुनितन्त्रमध्यवसातुमध्वानमधिजिगमिषूणामयनमन्तरा सिद्धान्तकौमुद्या न किमपि । तच्च प्रौढमनोरमाशब्दरत्नशेखरकौस्तुभादिबहुविधकृतिकर्मपरिक्लमितमपि सौलभ्येन तदधिगमनमुपलिप्सूनामनतिप्रौढमनसामतिसुकुमारधियाञ्च अनायासमवबोधयितुमनलम् ॥

अलम्भविष्णू स्त इदानीं सरलतरे तन्त्रबोधिनीबालमनोरमे एव । ययोः किल प्राचीकटन प्रथमां प्रवचनलिखितपठितप्रचारितकादिभिः प्रथम एव नः प्रायोगिकाः प्राक्रियिकाः प्रवक्तारश्च । हन्त! बहुचिराध्युषिततया वृद्धपरिपाटीमाटीकमानामपि तामनन्यामिवानुलालयन्त एव ततोऽपि अतिसरलपदन्यासामभिव्यक्तमधुरवागाकृताम् अतिरुचिरवर्णाम् आहितसुविशदप्रक्रियाम् अधिकौमुदि अखिलमहृदयाह्लादिनीमिमां बालमनोरमाम् उत्सृष्टप्रायितवर्त्मनापि नाधिगमया बभूविरे शिव शिव! नश्शाद्विदकाः केऽपि । अहह! कालोऽयमगीर्वाणवाणीविलासीयः. अवसरोऽयमनतिकठिनग्रन्थनिर्मन्थनीयः, आस्थेदानीमधिजिगमिषूणामप्यनायासमापातः प्रतीतिसाधनीयैवेति । अस्मिन्महत्यवर्णनीये अनिर्वर्णनीये अनाकर्णनीये च दुरवधिनि दुःखतौर्यत्रिके देववाग्देवदारिकायाः प्रक्रियाः क, प्रकृतयः क, धातवः क, भावाः क, पदव्यवस्थाः केति सर्वतदिशथिलशिथिलेष्वितिवृत्तेषु, पठितृषु पाठयितृषु

परीक्षकेषु प्रतिभूषु च प्रथितमहागिरिगुरुबुद्धिषु प्रायशो महाशयेषु व्याख्यो-डुपं विना वाचमुत्तरीतुमनलम्भूष्णुषु, वर्णशः पदशो वाक्यशश्च व्याख्याना-न्यवश्यङ्करणीयानीति भवितव्यतायां च भुवनमनु भावितायां जगदुपकर्तु-मना मनोरमेयं बालानामिति स्वनिगदव्याख्यातस्वविभवां **बालमनोरमां वासुदेवाध्वरी** व्यररचत् । तदियं न केवलमारुरुक्षतामध्वानमाश्रम-समाम्नायिकमाम्नायभाषापदप्रक्रियाणामुपकारिका परमभ्यस्तभाष्यप्रदीपोद्योत-तविवरणमञ्जूषाभूषणसारवाक्यपदीयानामपि परमोपकारिणीति निश्चप्रचम् ॥

एष च वासुदेवाध्वरी तञ्जौरनगरमहाराष्ट्रमहीपतिमालभारभीशाहजी-प्रभृतिपञ्चपुरुषीपोष्यप्रवृत्तिरासीदधिश्रीवशवटारण्यगोविन्दपुरान्वाधिकरणमाध्व-नवतिपञ्चवत्सर इति कर्णाकर्णिकया तत्प्रबन्धपरिसमाप्तिपर्याप्तपरिचितप्रवाद-साधकतद्विरुदापदानवैखरीमौखरीतश्च सुविशदमधिगम्यते । सर्वथाप्येष दक्षिणा हि चिदम्बरादुत्तरा च तञ्जौरादास्त कश्चिद्दक्षिणतमो वार्मा वल्लभश्च पद-प्रमाणतन्त्रयोः क्रैस्तहायनीयाष्टादशशतकचरमपादकालिक इति चतुरश्रम् । अस्य च ग्रन्थस्य प्रचिचारयिषा परं प्रथितयशसां प्रभूणां प्रौढवचसां प्रकटनपराय-णानां पण्डितानाञ्च तत इतश्च मुहुर्मुहुरुदयमस्तमयञ्च लभमाना क्वचि-च्छिरोमात्रम्, क्वचिदुरोवधि, क्वचिदुदरान्तं च प्रदर्श्य प्रदर्श्य प्रणाशं प्रणाशं "प्रकटिता बालमनोरमा प्रकटिता बालमनोरमा" इति प्रघोषघण्टामात्रा प्रत्यक्षमध्यैक्ष्यत । तदियङ्कथञ्चिदखिलभुवनालोकनाय समग्रमधिर्मान्ध्र-सन्निधापयितव्येति श्रद्धाय परमहमसमृद्धोपकरणोऽपि बद्धादरमद्धात्र प्रातनम् । अहो ! बत ! बहोः कालादुपक्रान्तापि सेयं बालमनोरमा पिपीलिका-प्रौढशिखराधिरोहन्यायेन मन्दंमन्दमवसानवचनरचनावसम्पर्चनामधिरोहन्ती सन्तन्तनीति सन्तोषिणम्मामधुनैव संपरिणतफलं सस्यमिव संव्यवसायि-नम् । अत्र चेत्थमनुमोमुदति मुदितमनसः मानितपदनयप्रबन्धप्रकटनप्र-क्रियाः मान्यमानाद्यष्टादशाधिकशतप्रबन्धकृतोऽभिनवदवनपुरकुंभघोणाभिजनाः भट्टश्रीबालसरस्वतीनारायणशास्त्रिमहाशयाः ॥—तद्यथा

न हि शब्दरत्नकौस्तुभशेखरसुभगीकृतापि सा प्रौढा ।
कुरुते कौमुद्यामिह कुतुकं बाला मनोरमैकैव ॥

अत्र च एतत्प्रकटनसाध्यकर्तृणाम् अन्तरान्तरा मातृकाप्रदानलेखावधानप्रकटनाप्रख्यापनादिद्वारा भृशमुपकारिणाम् अनसूयूनाम् अनहंयूनाम् अनशुभंयूनाम् अवदातधियाम् अनुवारम् अनुसन्धेयम् अयुतशः प्रणामाः प्रतायन्ते प्रह्वशिरोवाङ्मनसेन मया ॥

अत्र च सर्वथा प्राधान्यं वहन्ति त्रिशिरःपुरस्थसैण्ट्जोसफाख्याङ्गलकलामहापाठालये गैर्वाण्यध्यापकपदमधितिष्ठन्तः सारस्वतसारज्ञाः श्रीमन्तः तट्टै वाधूलश्रीनिवाससूरयो महाभागाः । येषां च साहाय्येन मदीयमिदं बालमनोरमामुद्रणं प्रचलति स्मेति सतोषमभिधीयते । महेन्द्रमङ्गलम् आर्यब्रह्मश्रीमत्कृष्णशास्त्रिणां परिशोधनकर्मसहभावमतीव स्मरामि। परमत्र प्रख्यापनपथे सर्वथा समग्रमुव्यक्तलिपिसक्तमनोरमबालमनोरमामातृकाप्रेषकः परमरमणीयगुणाभोगराजमानः प्रसिद्धत औरनगरनिवासी आर्यश्रीत्यागराजस्वामी सर्वथा न विस्मरणीय इति तन्नाम नस्सौप्रभातिकमिति समञ्जसम् । अंशांशशश्च मातृका अस्मप्रा व्यक्ताव्यक्ताः खिलाखिला अपि साम्प्रपर्दीनेन सहृदयहृदयसाधारणेन संप्रेष्य यथाशक्ति साह्यं कृतवतां कार्यसंसिद्धिं च प्रतीक्षितवताम् अनृशंसमनसाम् आत्मवदपराणयानाम्, श्रीचिदम्बरम् आर्यब्रह्मश्रीमद्दण्डपाणिस्वामिदीक्षित, चिदम्बरम् आर्यब्रह्मश्रीमद्धरिहरशास्त्रि, तिरुवेन्दुरै आर्यब्रह्मश्रीमदखिलाण्डनारायणदीक्षित, तेरळन्दूर् आर्यब्रह्मश्रीमद्वेदसुब्रह्मण्यशास्त्रि, श्रीनिवासनल्लूर् आर्यब्रह्मश्रीमत्सुन्दरशास्त्रि, नल्लूर् आर्यब्रह्मश्रीमत्कल्याणसुन्दरशास्त्रि, नाकूर् आर्यब्रह्मश्रीमत्कुप्पुस्वामिशास्त्रि, कुम्भघोणं आर्यब्रह्मश्रीमत्सुन्दरशास्त्रिप्रभृतीनाम् अयन्तं अध्यन्तरङ्गं अनवरतं अस्मि स्मरन्नधिकमुपकारम् । इमं दुष्करमनादृशमहाकार्यनिर्वाहं प्रतिज्ञाय यथाप्रतिज्ञातमतीव स्नेहेन अनुरोधेन च निर्वर्तितवतः सैण्ट् जोसफस् इण्डस्ट्रियल् स्कूल् मुद्राशालाध्यक्षस्य महानुपकारः स्मरणीयः ॥

अन्ते च पञ्चनदस्थराजकीयसंस्कृतमहाकलाशालाप्रथमपण्डितानामभिनवभट्टबाणशब्दनकालङ्कारविशाभूषणविरुदभाजां वात्स्यचक्रवर्तिनां श्रीकृष्णमाचार्याणामपि कुदन्तप्रकरणादारभ्य परिशोधनोपकारं नाहं विस्मर्तुं प्रभवामि ॥

अयि विद्वन्मणयः अतिविस्तृतैतद्ग्रन्थमुद्रणस्य प्रथमप्रवृत्ततया दाक्षिणात्यानेकमहनीयकोशस्थपाठैः विद्वन्मणिसाहाय्येन यथामति सुरचितेऽपि परिशोधने मानुषमात्रसुलभात् दृष्टिदोषात् प्रमादात् बुद्धिभ्रमाद्वा समुपजातानां स्खलितानां प्रबोधनेनानुगृह्णन्तु सहृदयाः माम् । येनाहं यतिष्ये द्वितीयमुद्रणे तद्विशुद्धये इति सशिरःप्रणाममभ्यर्थये इति सर्वतः शिवम ॥

त्रिचिनाप्पल्लि,
तेप्पक्कुलम्,
७–८–१९११.

शं. चन्द्रशेखरशास्त्री.
एडिटर्.

॥ कौमुद्युत्तरार्धधातुवृत्त्यनुक्रमणिका ॥

प्रकरणम्	पार्श्वम्
१. तिङन्तभ्वादिप्रकरणम्	३
२. तिङन्तादादिप्रकरणम्	१८०
३. तिङन्तजुहोत्यादिप्रकरणम्	२२०
४. तिङन्तदिवादिप्रकरणम्	२३२
५. तिङन्तस्वादिप्रकरणम्	२४९
६. तिङन्ततुदादिप्रकरणम्	२५५
७. तिङन्तरुधादिप्रकरणम्	२६७
८. तिङन्ततनादिप्रकरणम्	२७२
९. तिङन्तक्रयादिप्रकरणम्	२७७
१०. तिङन्तचुरादिप्रकरणम्	२८४
११. तिङन्तणिच्प्रकरणम्	३११
१२. तिङन्तसन्प्रकरणम्	३२६
१३. तिङन्तयङ्प्रकरणम्	३४१
१४. तिङन्तयङ्लुक्प्रकरणम्	३४९
१५. तिङन्तनामधातुप्रकरणम्	३६८
१६. तिङन्तकण्ड्वादिप्रकरणम्	३९३
१७. तिङन्तप्रत्ययमालाप्रकरणम्	३९५
१८. तिङन्तात्मनेपदप्रकरणम्	३९७
१९. तिङन्तपरस्मैपदप्रकरणम्	४२४
२०. भावकर्मतिङ्प्रकरणम्	४२९
२१. कर्मकर्तृतिङ्प्रकरणम्	४४३
२२. लकारार्थप्रकरणम्	४५४
*२३. कृदन्तकृत्यप्रकरणम्	४७५
२४. पूर्वकृदन्तप्रकरणम्	४९५

*एतत्प्रकरणात्पूर्वमेव लकारार्थप्रक्रियायां ५६३ इत्येतदारभ्य ५८० इत्येतत्पर्यन्तषड्रूपाः ४६३—४८० इति मन्तव्याः ।

प्रकरणम्	पार्श्वम्
२५. उणादयः - - - -	- ५३४
२६. उत्तरकृदन्तप्रकरणम् - - - -	६६३
२७. वैदिकप्रकरणम् - - - -	- ७२१
२८. स्वरप्रकरणम् - - - -	७३४
२९. फिट्सूत्राणि - - - -	- ७४३
३०. लिङ्गानुशासनप्रकरणम् - - - -	७६१

सूचिकाः

१. पाणिनीयसूत्रसूचिकाः - - -	- ७७५
२. वार्तिकसूचिकाः - - - -	८०३
३. परिभाषासूचिकाः - - - -	- ८०७
४. उणादिसूत्रसूचिकाः - - - -	८०९
५. फिट्सूत्रसूचिकाः - - - -	- ८१८
६. धातुसूचिकाः - - - -	८२३
७. सौत्रधातुसूचिकाः - - -	- ८२३

॥ श्रीगुरुचरणारविन्दाभ्यां नमः ॥

सिद्धान्तकौमुदीसहिता

॥ बालमनोरमा ॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥ १ ॥
येन धौता गिरः पुंसां विमलैश्शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥ २ ॥
वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥ ३ ॥
श्रौत्राहन्तीचणैर्गुण्यैर्महर्षिभिरहर्दिवम् ।
तोष्टूयमानोऽप्यगुणो विभुर्विजयतेतराम् ॥ ४ ॥

अस्तु नमः पाणिनये भूयो मुनये तथास्तु वररुचये ।
किञ्चास्तु पतञ्जलये शब्दब्रह्मात्मने च धूर्जटये ॥ १ ॥
व्याख्याता बहुभिः प्रौढैरेषा सिद्धान्तकौमुदी ।
वासुदेवस्तु तद्व्याख्यां वष्टि बालमनोरमाम् ॥ २ ॥

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च मङ्गलयुक्तास्स्युरिति भाष्यप्रमाणकं ग्रन्थमध्ये विघ्नविघातादिप्रयोजनाय कृतं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति । **श्रौत्रेति** ॥ वेदाद्ध्येता श्रोत्रियः । श्रोत्रियञ्छन्दोऽधीत इति वेदपर्यायात् छन्दश्शब्दात् द्वितीयान्तादधीत इत्यर्थे घन्प्रत्ययः । प्रकृतेः श्रोत्रादेशश्च निपातितः । श्रोत्रियस्य भावः श्रौत्रम् । श्रोत्रियस्य यलोपश्चेत्यण् इकारादुत्तरस्य

पूर्वार्धे कथितास्तुर्यपञ्चमाद्ध्यायवर्तिनः ।
प्रत्यया अथ कथ्यन्ते तृतीयाद्ध्यायगोचराः ॥ ५ ॥

यकाराकारसंघातस्य लोपे इकारस्य यस्येतिचेति लोपः । अर्हति आर्यः प्रशस्यमानेषु वेदविहितकर्मसु योग्यो भवतीत्यर्हन् । अर्हः प्रशंसायामिति शतृप्रत्ययः । अर्हतो भाव आर्हन्ती अर्हतो नुम्चेति ष्यञि आदिवृद्धौ प्रकृतेर्नुमागमे [illegible] तस्येति यकारलोपे यस्येतिचेत्यकारलोपः । स्त्रीत्वं लोकात् । श्रौत्रश्च आर्हन्ती च श्रौत्रार्हन्त्यौ । ताभ्यां वित्ताः श्रौत्रार्हन्तीचणाः । तैरिति विग्रहः । तेन विस्मयचुञ्चुपचणपावीति चणप् । वेदाद्धेतृत्वेन वेदविहितकर्मयोग्यतया च प्रसिद्धैरिति यावत् । **गुण्यैरिति** ॥ [illegible] वस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमदमादिसम्पत्तिः, मुमुक्षुत्वं, इत्यादिप्रशस्यगुणयोगार्थ रित्यर्थः । रूपादाहतप्रशंसयोरिति सूत्रे अन्येभ्योऽपि दृश्यत इति वार्तिकेन यप् प्रत्ययः तद्ग्राह्ये गुण्या ब्राह्मणा इत्युदाहरणात् । **महर्षिभिरिति** ॥ महान्तश्च ते ऋषयश्च महर्षयः कर्मधारयः । आन्महत इत्यात्वम् । अतितपस्विभिरित्यर्थः । **अहर्दिवमिति** ॥ [illegible] दिवाचेति वीप्सायां अचतुरेत्यादिना द्वन्द्वो निपातितः । अहन्यहनीत्यर्थः । **तोष्टूयमानोऽपीति** ॥ ष्टुञ् स्तुतौ, सकर्मकः, गुणवत्त्वेनाभिधानं स्तुतिः । आनायाभावात् रूपितं कर्मत्वमादाय देवान् स्तौतीत्यादौ द्वितीया । न तु गुणाभिधानमेव स्तुतिः तथा सति गुणस्य धात्वर्थोपसंगृहीतत्वेनाकर्मकत्वापत्तेः । धात्वादेष्षस्य [illegible] सकारे षत्वनिवृत्तौ धातोरेकाच इति भृशार्थे यङि अकृत्सार्वधातुकयोरिति दीर्घे सनाद्यन्त द्वित्वे शर्पूर्वाः खय इति सकारस्याभ्यासगतस्य लोपे गुणे यङ्लुकोरित्यभ्यासोकारस्य गुणे परस्य सस्य आदेशप्रत्यययोरिति षत्वे ष्टुत्वेन तकारस्य टकारे तोष्टूयेति यङन्तात् शानचि इति धातुसंज्ञकात् कर्मणि लटश्शानचि आनेमुगिति मुगागमे सार्वधातुके यासुट् च । यङोऽकारस्य अतो लोप इति लोपे तोष्टूय्यमान इति रूपम् । भृशं स्तूयमानोऽपीत्यर्थः । अचिन्त्यजगद्रचनाद्यनन्तगुणसम्पन्नतया भृशं सङ्कीर्त्यमानोऽपीति यावत् । **अगुण इति** ॥ निर्गुण इत्यर्थः । साक्षी चेता केवलो निर्गुणश्चेत्यादिश्रुतेरिति भावः । निर्गुणस्य गुणवत्त्वेन कथनात्मिका स्तुतिर्विरुद्धेत्यापातप्रतिपन्नं विरोधमपिशब्दो द्योतयति । गुणानां व्यावहारिकत्वेऽपि पारमार्थिकत्वाभावान्न विरोध इत्युत्तरमीमांसायां स्पष्टम् । **विभुरिति** ॥ सर्वव्यापक परमेश्वर इत्यर्थः । **विजयतेतरामिति** ॥ जिजये अकर्मकः । उत्कर्षेण वर्तन जयः । विपराभ्याञ्जेरित्यात्मनेपदम् । तिङश्चेत्यतिशायने तरप् । किमेत्तिङव्ययेति तरबन्तान् स्वार्थे आम्प्रत्ययः । 'तद्धितश्चासर्वविभक्ति' रित्यत्र तसिलादिषु परिगणनादामन्तमव्ययम् । सर्वोत्कर्षेण वर्तत इत्यर्थः । न च विजयत इति समुदायस्यातिङन्तत्वात् कथन्ततस्तरबिति वाच्यम् । वि इति हि भिन्नं पदम् । तिङन्तोत्तरपदसमासस्य छन्दोमात्रविषयत्वात् । ततश्च जयत इत्यस्मादेव तरप् । न च जयत इत्यस्य विपराभ्याञ्जेरिति कृतात्मनेपदस्य विशब्दसापेक्षत्वादसामर्थ्यं शङ्क्यम् । वीत्युपसर्गस्य द्योतकत्वेन पृथगर्थविहीनतया तत्सापेक्षत्वाभावात् तिङन्तस्य प्रधानतया तस्य विशब्दापेक्षत्वेऽपि बाधकाभावाच्चेत्यलम् ॥

वृत्तकथनपूर्वकं वर्तिष्यमाणनिरूपणं प्रतिजानीते । **पूर्वार्ध इति** ॥ तुर्यश्चपञ्चमः । चतुर-

अथ तिङन्तभ्वादिप्रकरणम् ।

तत्रादौ दश लकाराः प्रदर्श्यन्ते । लट् । लिट् । लुट् । लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् । एषु पञ्चमो लकार-श्छन्दोमात्रगोचरः ।

२१५१ । वर्तमाने लट् । (३-२-१२३)

वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात् । अटाविटौ ।

२१५२ । लः कर्मणि च भावे चाकर्मकेभ्यः । (३-४-६९)

लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च ।

इह्यसाद्यायवयवोपधेति चतुरर्थाद्यायप्रत्ययः । प्रकृतेरकारागमस्य लोपश्च । पूर्वार्थे चतुर्थ्यन्तात्तृतीयान्तात् प्रत्ययाः कथिता इत्यन्वयः । स्मृशोऽनुदके किन्नित्यादितान्तीयीकरणविषयप्रत्ययोपलक्षणमस्तु प्रयोजकं इति भावः । **अथेति** ॥ चतुर्थ्यन्तमाद्यायवर्तिप्रत्ययनिरूपणानन्तरं तृतीयान्ताद्यायवर्तिनः प्रत्ययाः कथ्यन्त इत्यन्वयः । तृतीयाद्यायस्य गोचराः प्रतिपाद्यतया विषयाः तृतीयाद्यायवर्तिनः इति यावत् । कृत्यं पचः स्त्रियामक्तिन्नादितद्धितव्युत्पादनन्तु प्रागप्रिकामेभ्यः भावः ॥ १ ॥

तत्रेति ॥ निर्धारणसप्तम्यन्तान्वयः । तेषु तृतीयाद्यायवर्तिप्रत्ययेष्वित्यर्थः । **दशेति** ॥ अनुबन्धभेदादलकारभेद इति भावः । **पञ्चम इति** ॥ लिङित्यर्थः । **छन्दोमात्रेति** ॥ [illegible] इति पूर्वसूत्रात् छन्दसीत्यनुवर्तेरिति भावः । एतेन [illegible] इह न प्रदर्श्यन्त इति शङ्का निरस्ता । **वर्तमान इति** ॥ धातोरिति सूत्रमातृतीयाद्यायसामेरधिकृतम् । वर्तमान इति तत्रान्वेति । वर्तमानेऽर्थे विद्यमानाद्धातोः लडिति लभ्यते । फलितमाह । **वर्तमानक्रियावृत्तेरिति** ॥ भान्वर्थक्रियाया वर्तमानत्वन्तु अतीतानागतभिन्नकालवृत्तित्वम् । कालस्य तु वर्तमानत्वं अतीतानागतभिन्नकालत्वम् । भूतभविष्यतोः प्रतिद्वन्द्वी वर्तमानः काल इति भाष्यम् । वर्तमानत्वम् न प्रत्ययार्थभूतकर्त्रादिविशेषणम् । अतीतपाकादिक्रियेऽपि कर्तरि पचति इत्याद्यापत्तेः । किन्तु धात्वर्थविशेषणमेव वर्तमानत्वम् । लट् तु तस्य द्योतक एव । **अटाविटाविति** ॥ न च अकार उच्चारणार्थ एवास्त्विति वाच्यम् । लिङादिर्वलक्षण्याय तस्यावश्यकत्वात् । तथाच तस्य इत्संज्ञां विना निवृत्त्युपायाभावात् इत्संज्ञैवादर्तव्येति भावः । **लः कर्मणीति** ॥ वाक्यद्वयमिदं सूत्रम् । लः कर्मणि चेति प्रथमं वाक्यम् । ल इति प्रथमाबहुवचनान्तं । चकारेण कर्तरि कृदित्यतः कर्तरीत्यनुकृष्यते । धातोरित्यधिकृतम् । लकाराः कर्मणि कर्तरि च [illegible] इति लभ्यते । सकर्मकधातुविषयमेवेदम् । अकर्मकेषु कर्मणीत्यस्य बाधि-

२१५३ । लस्य । (३-४-७७)

अधिकारोऽयम् ।

२१५४ । तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिङ्वहि-महिङ् । (३-४-७८)

एतेऽष्टादश लादेशाः स्युः ।

२१५५ । लः परस्मैपदम् । (१-४-९९)

लादेशाः परस्मैपदसंज्ञाः स्युः ।

२१५६ । तङानावात्मनेपदम् । (१-४-१००)

तङ् प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः । पूर्वसंज्ञापवादः ।

तत्वात्। तदाह । **लकारास्सकर्मकेभ्यो धातुभ्यः कर्मणि कर्तरि च स्युरिति** ॥ एवञ्च सकर्मकेभ्यो भावे लकारा न भवन्ति । सकर्मकेभ्योऽपि भावलकारप्रवृत्तौ तु देवदत्तेन घटं क्रियत इत्यादौ भावलकारेण कर्मणोऽनभिहितत्वात् द्वितीया स्यादिति भावः । भावे चाकर्मकेभ्य इति द्वितीयं वाक्यम् । अत्रापि चकारेण कर्तैवानुकृष्यते। न तु कर्म। असम्भवात् । तदाह । **अकर्मकेभ्यो भावे कर्तरिचेति** ॥ अलाकर्मकग्रहणेन अविवक्षितकर्मका अपि गृह्यन्ते । तेन देवदत्तेन भुज्यत इत्यत्र सतोऽप्योदनरूपकर्मणः अविवक्षायां भावे लकारोऽस्त्येवेत्यन्यत्र विस्तरः । **लस्येति** ॥ धातोरित्यधिकृतम् । अकारो न विवक्षितः । तेन लिडादीनामपि संग्रहः । चूडाल इत्यादौ च नातिप्रसङ्गः । **तिप्तसिति** ॥ तिप्, तस्, झि, सिप्, थस्, थ, मिप्, वस, मस्, त, आताम्, झ, थास्, आथाम्, ध्वम्, इट्, वहि, महिङ् । एषां समाहारद्वन्द्वात् प्रथमैकवचनम् । लस्येति स्थानषष्ठ्यन्तमधिकृतम् । तेन आदेश इति लभ्यते। फलितमाह । **एत इति** ॥ तसादौ रुत्वाभाव आर्षः । तिबादौ पकारानुबन्धप्रयोजनन्तु द्वेष्टीत्यादौ सार्वधातुकमपिदिति ङित्वनिवृत्त्यर्थम् । तदुदाहरणेषु स्पष्टीभविष्यति । **ल इति** ॥ ल इति स्थानषष्ठी । आदेश इत्यद्ध्याहार्यम् । तदाह । **लादेशा इति । तङिति** ॥ तङ्च आनश्चेति द्वन्द्वः । **प्रत्याहार इति** ॥ त आतामिति तशब्दमारभ्य महिङिति ङकारेणेति शेषः । तदाह । **तादिनवकमिति** ॥ इह पूर्वसूत्राल्ल इत्यनुवर्तते । ततश्च आनग्रहणेन शानच्कानचावेव गृह्येते । न तु ताच्छील्यवयोवचनशक्तिषु चानशिति विहितश्चानशपि । तस्य लादेशत्वाभावात् । तेन परस्मैपदिभ्योऽपि चानश् सिद्ध्यति। निघ्नाना इत्यादौ । तदाह । **शानच् कानचौ चेति । एतत्संज्ञा इति** ॥ आत्मनेपदसंज्ञाका इत्यर्थः । **पूर्वसंज्ञेति** ॥ परस्मैपदसंज्ञापवाद इत्यर्थः । एवञ्च तिबादिनवके परस्मैपदसंज्ञा

२१५७। अनुदात्तङित आत्मनेपदम्। (१-३-१२)

अनुदात्तेत उपदेशे योङित्तदन्ताच्च धातोर्लस्य स्थान आत्मनेपदं स्यात्।

२१५८। स्वरितञितः कर्त्रभिप्राये क्रियाफले। (१-३-७८)

स्वारितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले।

२१५९। शेषात्कर्तरि परस्मैपदम्। (१-३-७९)

आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात्।

पर्यवस्यति। अथ कस्माद्धातोः परस्मैपदम् कस्मादात्मनेपदमित्याकांक्षायामाह। **अनुदात्तेति**॥ अनुदात्तश्च ङ्च अनुदात्तङौ। तावितौ यस्य सः अनुदात्तङित्। तस्मात् अनुदात्तङितः। द्वन्द्वान्ते श्रूयमाण इच्छब्दः प्रत्येकं सम्बद्ध्यते। अनुदात्तेतः ङितश्चेति लभ्यते। उपदेशेऽजनुनासिक इदित्यस्मात् मण्डूकप्लुत्या उपदेश इत्यनुवृत्तम् ङित इत्यनेन सम्बध्यते। नत्वनुदात्त इत्यनेन। उपदेशादन्यत्र अनुदात्तस्येत्संज्ञाया अप्रसक्तत्वेनाव्यभिचारात्। भूवादयो धातव इत्यस्मान्मण्डूकप्लुत्या धातव इत्यनुवृत्तम् पञ्चम्या विपरिणतम् अनुदात्तेता ङिता च विशेष्यते। तत्रानुदात्तेदंशे तदन्तविधेः प्रयोजनाभावात् ङिदंशे तदन्तविधिः। तदाह। **अनुदात्तेत इत्यादिना। लस्यस्थान इति**॥ आत्मनेपदग्रहणलभ्यमिदम्। तिङां लादेशत्वनियमात्। उपदेशे किम्। चुकुटिषति। अत्र गाङ्कुटादिभ्य इति सन आतिदेशिकमेव ङित्वम्। नत्वौपदेशिकम्। धातोः किम्। अदुद्रुवत्। अत्र णिश्रीति चङन्तान्नात्मनेपदम्। ङिदंशे तदन्तविद्ध्यभावे तु बोभूयत इत्यादौ सनाद्यन्ता इति धातुसंज्ञकात् यङन्तादात्मनेपदं न स्यात्। ङित इत्येवोक्तौ तु यङो ङित्वेऽपि तदन्तस्य धातोर्ङित्वाभावादात्मनेपदं न स्यात्। **स्वरितञित इति**॥ स्वरितश्च ञ् च स्वरितञौ तौ इतौ यस्य तस्मादिति बहुव्रीहिः। इच्छब्दः प्रत्येकं सम्बध्यते। तदाह। **स्वरितेतो ञितश्चेति**॥ धातोरित्यनन्तरं लस्य स्थान इति शेषः। कर्तारमभिप्रैति गच्छतीति कर्त्रभिप्रायम्। कर्मण्यण्। तदाह। **कर्तृगामिनीति**॥ एवञ्च होता याज्यया यजतीत्यादौ यागफलस्य स्वर्गस्य यजमानगामित्वेन होतृगामित्वाभावात् नात्मनेपदम्। तथा वेतनेन यज्ञदत्तभृतो देवदत्तः पचतीत्यत्रापि पाकफलस्य भोजनस्य पक्तृगामित्वाभावान्नात्मनेपदम्। दक्षिणादिलाभस्तु न फलम्। लोकतो वेदतो वा यदुद्देशेन क्रियाप्रवृत्तिः तस्यैवात्र क्रियाफलशब्देन विवक्षितत्वात्। कर्तृगामिफलकक्रियावृत्तेर्धातोरित्यर्थः। आत्मनेपदन्तु धात्वर्थफलस्य कर्तृगामित्वं द्योतयतीत्यलम्। **शेषात्कर्तरीति**॥ अनुदात्तङित इति स्वरितञित इति चोक्तात् आत्मनेपद विषयादन्यश्शेषः। तदाह। **आत्मनेपदनिमित्तहीनादिति**॥ अनेन भूधातोः कर्तरि लस्य परस्मैपदं सिद्धम्। तत्र तिबादिनवके युगपत् पर्यायेण एकद्वित्रादिकतिपयरूपेण वा प्राप्ते युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मद्ध्यमः। अस्मद्युत्तमः। शेषे प्रथमः। इति व्यवस्थां

२१६०। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः। (१-४-१०१)

तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः।

२१६१। तान्येकवचनद्विवचनबहुवचनान्येकशः। (१-४-१०२)

लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि वचनानि प्रत्येकमेकवचनादिसंज्ञानि स्युः।

२१६२। युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः। (१-४-१०५)

तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मद्ध्यमः स्यात्।

२१६३। प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च। (१-४-१०६)

वक्ष्यन् प्रथमादिसंज्ञां तावदाह। **तिङस्त्रीणीति**॥ तिङः षट् त्रिकाः संज्ञास्तु तिस्र इति यथासंख्यासम्भवादेकैकस्य त्रिकस्य तिसृषु संज्ञासु प्राप्तास्वाह। **तिङ उभयोः पदयोरिति**॥ लः परस्मैपदमित्यतः परस्मैपदमिति तङानावात्मनेपदमित्यत आत्मनेपदमिति चानुवृत्तम् षष्ठ्यन्ततया विपरिणम्यते। ततश्च परस्मैपदात्मनेपदयोरुभयोरपि प्रत्येकं त्रयस्त्रिकास्सन्तीति यथासंख्यम्प्रथमादिसंज्ञाः प्रवर्तन्त इति भावः। प्रथमादिषु पुरुषसंज्ञा तु प्राचीनाचार्यशास्त्रसिद्धेति बोद्धव्यम्। अथ प्रथमादिपुरुषेषु एकैकस्मिन् पुरुषे प्रत्ययत्रिकात्मके युगपत् पर्यायेण वा एकैकप्रत्यये प्राप्ते द्वयेकयोर्द्विवचनैकवचने। बहुषु बहुवचनमिति व्यवस्थार्थमेकवचनादिसंज्ञामाह। **तानीति**॥ तच्छब्देन पूर्वसूत्रोपात्तानि प्रथममद्ध्यमोत्तमाख्यानि तिङस्त्रीणि त्रीणि परामृश्यन्ते। तदाह। **लब्धप्रथमादिसंज्ञानीति**॥ एकश इत्यस्य विवरणं प्रत्येकमिति। संख्यैकवचनाच्च वीप्सायामिति शसिति भावः। **युष्मदीति**॥ उपोच्चारितम्पदमुपपदम्। युष्मदि समीपोच्चारिते सतीत्यर्थः। समानमेकमधिकरणं वाच्यं यस्येति विग्रहः। सामानाधिकरण्यञ्च युष्मदस्तिङः स्थानीभूतलकारेण विवक्षितम्। लः परस्मैपदमित्यतस्तदनुवृत्तेः। तथा च फलितमाह। **तिङ्वाच्यकारकवाचिनि युष्मदीति**॥ स्थानं प्रसङ्गः अस्यास्तीति स्थानी तस्मिन् प्रसक्ते सतीत्यर्थः। प्रसङ्गश्च तदर्थावगतौ सत्यां वक्त्रा अप्रयोग एव पर्यवस्यति। तथा च स्थानिनीत्यनेन उपपदभूते युष्मदि प्रयोगं विना स्वार्थम्बोधयति सतीत्यर्थः पर्यवस्यति। तदाह। **अप्रयुज्यमान इति**॥ स्थानिनीत्यनुक्तौ युष्मद्युपपदे प्रयुज्यमान एव मद्ध्यमस्स्यात्। ततश्च राम पाहीत्यादौ अव्याप्तिस्स्यात्। अपिना लब्धमाह। **प्रयुज्यमानेऽपीति**॥ युष्मद्युपपदे स्थानिनीत्येवोक्तौ राम त्वं पाहीत्यादौ युष्मत्प्रयोगे मद्ध्यमो न स्यात्। अतोऽपिग्रहणमिति भावः। अत्वं त्वं सम्पद्यत इत्यत्र तु न मद्ध्यमपुरुषः। तत्र युष्मच्छब्दस्य गौणत्वात्। भवानागच्छतीत्यादौ भवच्छब्दयोगे तु न मद्ध्यमपुरुषः। युष्मच्छब्दस्य सम्बोद्धव्यैकविषयत्वात्। भवच्छब्दस्य तु स्वभावेन सम्बोद्धव्यासम्बोद्धव्यसाधारणत्वादित्यलम्। **प्रहास इति**॥ वाक्यद्वयमिदं सूत्रम्। प्रहासे च मन्योपपदे इति प्रथमं वाक्यम्। मध्यम इत्यनुवर्तते। मनधातुः श्यन्विकरणः उपपदं यस्येति बहुव्रीहिः। मन्यपदश्रवणबलात्

मन्यधातुरुपपदं यस्य धातोस्तस्मिन्प्रकृतिभूते सति मद्ध्यमः स्यात्परिहासे गम्यमाने । मन्यतेस्तूत्तमः स्यात्स चैकार्थस्य वाचकः स्यात् ।

२१६४ । अस्मद्युत्तमः । (१-४-१०७)

तथाभूतेऽस्मद्युत्तमः स्यात् ।

२१६५ । शेषे प्रथमः । (१-४-१०८)

मद्ध्यमोत्तमयोरविषये प्रथमः स्यात् । 'भू १ सत्तायाम्' । कर्तृविवक्षायां भू ति इति स्थिते ।

२१६६ । तिङ्शित्सार्वधातुकम् । (३-४-११३)

तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः ।

२१६७ । कर्तरि शप् । (३-१-६८)

कर्त्रर्थे सार्वधातुके परे धातोः शप्स्यात् । शपावितौ ।

धाताविति विशेष्यं लभ्यते । तदाह । **मन्यधातुरित्यादिना** । **तस्मिन् प्रकृतिभूते सतीति** ॥ तस्माद्धातोर्लस्य स्थाने इत्यर्थः । **मद्ध्यमस्स्यादिति** ॥ अस्मद्युपपद इति शेषः । अस्मद्युत्तम इत्युत्तरसूत्रात्तदनुवृत्तेः । एवञ्च उत्तमपुरुषापवादोऽयं मद्ध्यमविधिः । **मन्यतेरुत्तम** एकवचेति द्वितीयं वाक्यम् । तद्व्याचष्टे । **मन्यतेस्तूत्तमस्स्यादिति** ॥ युष्मद्युपपद इति शेषः । पूर्वसूत्रात्तदनुवृत्तेः । **सचेति** ॥ सः मन्यतेरुत्तमपुरुषः द्वित्वबहुत्वयोरपि एकवचनं लभत इत्यर्थः । मद्ध्यमोत्तमयोर्व्यत्यासार्थमिदम् । एतत्सर्वमनुपदमेवोदाहरणे स्पष्टीभविष्यति । **अस्मद्युत्तम इति । तथाभूत इति** ॥ तिङ्वाच्यकारकवाचिनि प्रयुज्यमाने अप्रयुज्यमाने चेत्यर्थः । **शेष इति** ॥ उक्तान्मद्ध्यमोत्तमविषयादन्यश्शेषः । तदाह । मद्ध्यमोत्तमयोरविषय इति । त्वम् अहञ्च पचाव इत्यत्र तु परत्वादुत्तमपुरुष एव । न तु मद्ध्यमः । देवदत्तस्त्वञ्च पचथ इत्यत्रापि न प्रथमपुरुषः । युष्मदस्सत्वेन शेषत्वाभावादित्यलम् । **भूसत्तायामिति** ॥ वर्तत इति शेषः । भ्वादिगणे प्रथमो धातुरयम् । तत्र भू इत्येव गणे पाठः । अर्थनिर्देशस्त्वाधुनिक इति वक्ष्यते । यद्यपि सत्ता जातिः न क्रिया । तथापि आत्मधारणं सत्तेत्युच्यते । स्वरूपेणावस्थानमिति यावत् । **कर्तृविवक्षायामिति** ॥ वर्तमानसत्तावृत्तेर्भूधातोः कर्तरि लटि आत्मनेपदनिमित्तहीनतया परस्मैपदे तिबादिनवके तत्रापि युष्मदस्मत्सामानाधिकरण्याभावात् प्रथमपुरुषत्रिके तत्रापि कर्तुरेकत्वविवक्षायां तिपि सति भू ति इति स्थिते प्रक्रिया वक्ष्यत इत्यर्थः ॥ तत्र सार्वधातुककार्यं वक्ष्यन् सार्वधातुकसंज्ञामाह । **तिङ्शिदिति** ॥ धातोरित्यधिकृतम् । तदाह । **धात्वधिकारोक्ता इति** ॥ तेन हरीनित्यत्र शसस्सार्वधातुकत्वं न । अन्यथा तिङ्शित्सार्वधातुकमिति शसस्सार्वधातुकत्वात् सार्वधातुकमपिदिति ङित्वे घेर्ङितीति गुणः स्यात् । **कर्तरीति** ॥ सार्वधातुके यागित्यस्मात् सार्वधा-

२१६८ । सार्वधातुकार्धधातुकयोः । (७-३-८४)

अनयोः परयोरिहाङ्गस्य गुणः स्यात् । अवादेशः । भवति । भवतः ।

२१६९ । झोऽन्तः । (७-१-३)

प्रत्ययावयवस्य झस्यान्तादेशः स्यात् । 'अतो गुणे' (१९१) । भवन्ति । भवसि । भवथः भवथ ।

२१७० । अतो दीर्घो यञि । (७-३-१०१)

अतोऽङ्गस्य दीर्घः स्याद्यञादौ सार्वधातुके परे । भवामि । भवावः । भवामः । स भवति । तौ भवतः । ते भवन्ति । त्वं भवसि । युवां भवथः । यूयं भवथ ।

तुक इत्यनुवर्तते । धातोरेकाचो हलादेरित्यस्माद्धातोरिति । तदाह । **कर्त्रर्थ इत्यादिना**॥ तिङि परे धातोर्विहितानां प्रत्ययानां शबादीनां विकरणसंज्ञा प्राचीनाचार्यसिद्धा। **शपाविताविति**॥ शकारपकारौ लशक्वतद्धित इति हलन्त्यमिति चेत्संज्ञकाविति्यर्थः । ततश्च शपि शकारपकारयोः लोपे अकारमात्रं शिष्यत इत्यर्थः । भू अ ति इति स्थिते । **सार्वधातुक इति**॥ इको गुणवृद्धी इति परिभाषया इक इत्युपस्थितेन अङ्गस्येत्यधिकृतं विशेष्यते । तदन्तविधिः । मिदेर्गुण इत्यस्मात् गुण इत्यनुवर्तते तदाह । **अनयोरित्यादिना**॥ तथा च ऊकारस्य गुणः ओकारः । **अवादेश इति**॥ ओकारस्येति शेषः । तथा च परिनिष्ठितं रूपमाह । **भवतीति । भवत इति**॥ कर्तृद्वित्वविवक्षायां भू धातोर्लटः तसादेशे शपि गुणे अवादेशे सकारस्य रुत्वविसर्गाविति भावः । कर्तृबहुत्वविवक्षायां भूधातोर्लटः झि इत्यादेशे शपि गुणे अवादेशे च कृते । **झोन्त इति**॥ झः अन्तः इति छेदः । झ इति षष्ठ्यन्तम । आदेशे तकारात् अकार उच्चारणार्थः । आयनेयी इति सूत्रात् प्रत्ययग्रहणमनुवर्तते । नन्वादिग्रहणमपि । अस्वरितत्वात् । अनुवृत्तं च प्रत्ययग्रहणमवयवषष्ठ्यन्तमार्थायते । तदाह । प्रत्ययावयवस्येति । झस्य झकारस्येत्यर्थः । **अन्तादेशः स्यादिति**॥ अन्त् इत्ययमादेशः स्यादित्यर्थः । प्रत्ययावयवस्येति किम् । उज्झिता । अत्र धात्ववयवस्य झकारस्य न भवति । आदिग्रहणानुवृत्तौ तु शयान्तै इति न सिद्ध्यति । अन्तादेशात्प्रागेवान्तरङ्गत्वाल्लेटोऽडाटावित्याटिकृते झकारस्य प्रत्ययादित्वाभावात् इति भाष्ये स्पष्टम् । एवञ्च भव झि इत्यत्र झकारस्य अन्त् इत्यादेशे भव अन्ति इति स्थिते अतो गुण इति द्वयोरकारयोस्सवर्णदीर्घापवादे पररूपे कृते भवन्तीति रूपमित्यर्थः । अन्तादेशे प्रथमाकारोच्चारणन्तु लुग्विकरणे द्विषन्तीत्यादौ अकारश्रवणार्थम् । **भवसीति**॥ मद्ध्यमपुरुषैकवचने सिपि शपि गुणे अवादेशे रूपम् । **भवथ इति**॥ मध्यमपुरुषद्विवचने थसि शपि गुणे अवादेशे रुत्वविसर्गयोश्च रूपम् । न विभक्तौ तु स्मा इति सस्य नेत्वम्। **भवथेति**॥ मद्ध्यमपुरुषबहुवचने थादेशे शपि गुणे अवादेशे रूपम् । उत्तमपुरुषैकवचनेऽपि शपि गुणे अवादेशे भवमि इति स्थिते । **अतो दीर्घ इति**॥ अङ्गस्येत्यधिकृतम् अता विशेष्यते । तदन्तविधिः । तुरुस्तुशम्यम इत्यतस्सार्वधातुक इत्यनुवृत्तम् यञावित्यशेष्यते । तदादि विधिः । तदाह । अदन्तस्येत्यादिना ।

अहं भवामि। आवां भवावः। वयं भवामः। एहि मन्य ओदनं भोक्ष्यस इति भुक्तः सोऽतिथिभिः। एतमेत वा मन्ये ओदनं भोक्ष्येथे। भोक्ष्यध्वे। भोक्ष्ये। भोक्ष्यावहे। भोक्ष्यामहे। मन्यसे। मन्येथे। मन्यध्वे। इत्यादिरर्थः। 'युष्मद्युपपदे' (२१६२) इत्याद्यनुवर्तते तेनेह न। एतु भवान्मन्यते ओदनं भोक्ष्य इति। भुक्तः सोऽतिथिभिः। 'प्रहासे' किम्। यथार्थकथने मा भूत्। एहि मन्यस ओदनं भोक्ष्य इति भुक्तः सोऽतिथिभिरित्यादि।

२१७१। परोक्षे लिट्। (३-२-११५)

भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात्। लस्य तिबादयः।

२१७२। लिट् च। (३-४-११५)

भवामीति ॥ न च भूधातोर्विहितलादेशं प्रति भूधातुरेवाङ्गम्। न तु भवेति विकरणान्तमिति वाच्यम्। यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गमित्यत्र तदादिग्रहणेन विकरणविशिष्टस्यापि अङ्गत्वात्। **भवावो, भवाम इति** ॥ लस्य वसि मसि च शपि गुणे अवादेशे अतो दीर्घे रुत्वे विसर्गे च रूपे। न विभक्ताविति सस्य नेत्वम्। अथ प्रथममध्यमोत्तमपुरुषव्यवस्थामुक्तां स्मारयितुमाह। **स भवतीत्यादि** ॥ अथ प्रहासे चेति सूत्रस्योदाहरति। **एहीति** ॥ सर्वेषु भुक्तवत्सु भोक्तुमागतं जामातरं प्रति परिहासाय प्रवृत्तमिदं वाक्यम्। भो जामातः, एहि आगच्छ, ओदनं, भोक्ष्य, इति त्वम्मन्यसे, नैतद्युक्तमित्यर्थः। कुत इत्यत आह। **भुक्तस्सोऽतिथिभिरिति** ॥ स ओदनः अतिथिभिर्भक्षित इत्यर्थः। अत्र भुजेरुत्तमपुरुषे प्राप्ते मद्ध्यमः पुरुषः। मन्यतेस्तु मद्ध्यमपुरुषे प्राप्ते उत्तमः पुरुषः। **एतं, एतवेति** ॥ हे जामातरौ आगच्छतम्। ओदनं भोक्ष्यावह इति मन्येथे इत्यर्थः। भो जामातरः ओदनं भोक्ष्यामह इति मन्यध्वे इति चोभयत्रापि भुजेरुत्तमे प्राप्ते मद्ध्यमः। मन्यतेस्तु मद्ध्यमे प्राप्ते उत्तमः। द्वित्वबहुत्वयोरेकवचनञ्च। **इत्यादीति** ॥ एहि एतं एतवा मन्ये जलं पास्यावः पास्याम इत्यादि संग्रहः। मन्ये इत्युत्तमपुरुषैकवचनान्तम् व्याचष्टे मन्यस इत्यादिना। **अनुवर्तत इति** ॥ प्रहासेचेति सूत्र इति शेषः। **एतु भवानिति** ॥ युष्मद्भवतोः पर्यायत्वाभावस्यानुपदमेवोक्तत्वादिति भावः। इति लट्प्रक्रिया ॥ **परोक्षे लिडिति** ॥ अनद्यतने लङ्लिस्मादनद्यतन इत्यनुवर्तते। भूते इत्यधिकृतम्। परोक्षत्वं धात्वर्थविशेषणम्। तदाह। **भूतानद्यतनेत्यादिना** ॥ अतीतरात्रेरन्त्ययामेन आगामिरात्रेराद्ययामेन सहितो दिवसः अद्यतन इति लुङ्सूत्रभाष्ये कैय्यटे च स्थितम्। परोक्षत्वन्तु वर्षशतवृत्तत्वमित्येके। वर्षसहस्रवृत्तत्वमित्यपरे। द्व्यहवृत्तत्वं त्र्यहवृत्तत्वं चेत्यन्ये। कुड्यकटाद्यन्तरितत्वमितीतरे। एते पक्षा भाष्ये स्थिताः। तत्र प्रयोक्तुरिन्द्रियागोचरत्वं परोक्षत्वमित्येव सर्वसम्मतमित्यलम्। **लस्य तिबादय इति** ॥ तिबादिनवकमित्यर्थः। **लिट्चेति** ॥ लिडिति लुप्त-

लिडादेशस्तिङार्धधातुकसंज्ञ एव स्यान्न तु सार्वधातुकसंज्ञः। तेन शबादयो न।

२१७३। परस्मैपदानां णलतुसुस्थलथुसणल्वमाः। (३-४-८२)

लिटस्तिबादीनां नवानां णलादयो नव स्युः। 'भू' 'अ' इति स्थिते।

२१७४। भुवो वुग्लुङ्लिटोः। (६-४-८८)

भुवो वुगागमः स्यात्। लुङ्लिटोरचि। नित्यत्वाद् वुग्गुणवृद्धी बाधते।

२१७५। एकाचो द्वे प्रथमस्य। (६-१-१)

२१७६। अजादेर्द्वितीयस्य। (६-१-२)

इत्यधिकृत्य।

स्थानषष्ठयन्तम्। तिङ्शित्सार्वधातुकमित्यस्मात् तिङित्यनुवर्तते। आर्धधातुकं शेष इत्यस्मादार्धधातुकमिति। तदाह। **लडादेशस्तिङिति**॥ एकसंज्ञाधिकारबहिर्भूतत्वात् सार्वधातुकसंज्ञाया अपि समावेशे प्राप्ते आह। **आर्धधातुकसंज्ञ एवेति**॥ लङश्शाकटायनस्यैवेति सूत्रादेवकारानुवृत्तेरिति भावः। **तेनेति**॥ सार्वधातुकत्वाभावेन तन्निमित्ताः शप्श्यनादयो न भवन्तीत्यर्थः। **परस्मैपदानामिति**॥ लिटस्तझयोरित्यस्मात् लिट इत्यनुवृत्तिमभिप्रेत्याह। **लिटस्तिबादीनामिति**॥ **णलादय इति**॥ णल्, अतुस्, उस्, थल्, अथुस्, अ, णल्, व, म, इत्येते नव यथासंख्यं स्युरित्यर्थः। तत्र तिपो णल् सर्वादेशः। न च णकारलकारयोश्चुटू इति हलन्त्यमिति च इत्संज्ञकत्वाल्लोपे कथमनेकाल्त्वमिति वाच्यम्। सर्वादेशत्वात्प्राक् णलः प्रत्ययत्वाभावेन चुटू इत्यस्याप्रवृत्तेः। णित्वन्तु जुहावेत्यादौ वृद्ध्यर्थम्। लित्वं तु लित्स्वरार्थम्। ननु मद्ध्यमपुरुषबहुवचनथस्य विधीयमानः अकारः अलोन्त्यस्येत्यन्त्यस्य स्यात्। अकारस्य अकारविधिस्तु यथासंख्यापादनार्थ इति चेत्। सत्यम्। द्वयोरकारयोः पररूपेण अ इति सूत्रनिर्देशादनेकाल्त्वात् सर्वादेशत्वमिति भाष्ये स्पष्टम्। न च अतुसादीनामादेशत्वात् पूर्वं विभक्तित्वाभावेन न विभक्ताविति निषेधाभावात् सकारस्येत्वन्दुर्वारमिति वाच्यम्। सकारादुपरि सकारान्तरस्य संयोगान्तलोपेन लुप्ततया श्रूयमाणसकारस्योपदेशेऽन्त्यत्वाभावादित्यलम्। **भुवोवुगिति**। **अचीति**॥ अचिश्नुधातुभ्रुवांय्वोरियङुवङौ इत्यतस्तदनुवृत्तेरिति भावः। अचीति किम्। अभूत्। ननु णलि परत्वात् वुकं बाधित्वा अचोञ्णिती[ति] वृद्धिस्स्यात्। बभूविथेत्यत्र तु सार्वधातुकार्धधातुकयोरिति गुणस्स्यादित्यत आह। **नित्यत्वादिति**॥ कृतयोरपि गुणवृध्योरेकदेशविकृतन्यायात् वुक् प्रवर्तते। अकृतयोरपि प्रवर्तते। ततश्च कृताकृतप्रसङ्गी यो विधिस्सनित्य इति न्यायेन वुक् गुणवृद्धी बाधत इत्यर्थः। वुकि ककार इत् उकार उच्चारणार्थः। कित्वादन्तावयवः। भूव् अ इति स्थिते। **एकाच इति। अजादेरिति। इत्यधिकृत्येति**॥ षष्ठाद्ध्यायारम्भे द्वे इमे सूत्रे। ते च न विधायके। अतिप्रसङ्गात्। किन्तु

२१७७। लिटि धातोरनभ्यासस्य। (६-१-८)

लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्त आदिभूतादचः परस्य तु द्वितीयस्य। 'भूव्' 'भूव्' 'अ' इति स्थिते।

२१७८। पूर्वोऽभ्यासः। (६-१-४)

ष्यङस्सम्प्रसारणमित्यतः प्राक् अनुवर्त्येते एवेति भावः। **लिटि धातोरिति** ॥ एकाचो द्वे प्रथमस्येत्यधिकृतम्। धातोरित्यवयवषष्ठी। तदाह। **धात्ववयवस्येति** ॥ एकाच इति प्रथमस्येति च धात्ववयवस्य विशेषणम्। एकः अच् यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः। तथा च लिटि परे अभ्यासभिन्नस्यैकाच्कस्य प्रथमस्य धात्ववयवस्य द्वे उच्चारणे स्त इत्यर्थः। एकाच इत्यत्र कर्मधारयाश्रयणे तु पपाचेत्यादि न सिध्येदिति भाष्ये स्पष्टम्। अजादेर्द्वितीयस्येत्यप्यधिकृतम्। तत्राच्चासावादिश्च अजादिः तस्मादिति कर्मधारयात् पञ्चमी। तदाह। आदिभूतादचः परस्य तु द्वितीयस्येति। एकाच इति शेषः। अजादिधात्ववयवस्य एकाचश्चेत् द्वित्वम् तर्हि द्वितीयस्यैवैकाचो द्वित्वम्। न तु प्रथमस्येति यावत्। अत्र द्वे इत्यनन्तरमुच्चारणे इत्यध्याहृत्यैकाचः प्रथमस्येति कृत्वोगलक्षणषष्ठीञ्चाश्रित्य द्विः प्रयोग एवात्र विधीयते। न स्थानषष्ठीमाश्रित्यादेशपक्ष इति प्रकृतसूत्रभाष्ये प्रपञ्चितम्। आदेशप्रत्यययोरिति सूत्रभाष्येऽपि द्विः प्रयोगपक्ष एवोक्तः। तादिह विस्तरभयान्नलिखितम्। पपाच इयायेत्यादौ प्रथमत्वमेकाच्कत्वं द्वितीयत्वञ्च व्यपदेशिवत्वेन बोद्धव्यम्। अजादेरिति बहुव्रीह्याश्रयणे तु, इन्द्रमात्मन इच्छति इन्द्रीयति तमिच्छति इन्दिन्द्रीयिषतीत्यादौ नन्द्रास्संयोगादय इति दकारस्य द्वित्वनिषेधश्च स्यात्। तत्राजादेरित्यनुवृत्तेः। धातोरिति किम्। तदभावे हि लिटि परे यः प्रथमः एकाच् तस्य द्वे इत्यर्थः स्यात्। एवं सति पपाचेत्यादावेव स्यात्। न तु जजागारेत्यादाविति भाष्ये स्पष्टम्। न च पपाचेत्यादौ लिटि धातोरिति द्वित्वे कृते लक्ष्ये लक्षणस्येति न्यायेन पुनर्द्वित्वस्याप्रसक्तेरनभ्यासग्रहणं व्यर्थमिति वाच्यम्। यङन्तात् सन्यङोरिति यङ्निमित्तकद्वित्वविशिष्टात् सनि सन्निमित्तकद्वित्वनिवृत्तये सन्नन्तात् सन्यङोरिति कृतद्वित्वाण्णिचि लुङि चङि कृते चङीति द्वित्वनिवृत्तये चानभ्यासग्रहणस्यावश्यकत्वात्। भाष्ये तु कृष्णो नोनाव वृषभो यदीदमित्यादौ नुधातोर्यङन्तात् सन्यङोरिति कृतद्वित्वात् नोनूय इत्यस्मात् लिटि कास्प्रत्ययादाममन्त्रे लिटीति मन्त्रपर्युदासादामभावे यस्य हल इति यकारलोपे अतो लोपे तिपो णलि वृद्धावावादेशे नोनावेत्यत्र लिटि धातोरिति द्वित्वनिवृत्तये अनभ्यासग्रहणमित्युक्त्या अनभ्यासग्रहणमनर्थकम्। छन्दसि वा वचनादित्युक्तम्। यङन्तात् सनि सन्नन्ताण्णिचि चङ् लोके नास्त्येवेति तदाशय इति शब्देन्दुशेखरे स्पष्टम्। प्रकृते च भूव् अ इत्यत्र चत्वार एकाचः। तत्र भू इति प्रथमः। ऊव् इति द्वितीयः। ऊ इति व्यपदेशिवद्भावेन तृतीयैकाच्। भूव् इति समुदायस्तु चतुर्थः। तत्र समुदाये द्विरुच्यमाने सर्वे अवयवाः द्विरुच्यन्त इति भूव् इति समुदायस्यैव द्विर्वचनमिति भाष्ये स्पष्टम्। तदाह। **भूव् भूव् अ इति स्थित इति** ॥ अत्र भूव् इत्यस्य एकाचः धात्ववयवत्वं प्रथमत्वञ्च व्यपदेशिवत्वाद्बोध्यम्। **पूर्व इति** ॥ **अत्रेति** ॥ एकाचो द्वे प्रथमस्येति

अत्र ये द्वे विहिते तयोः पूर्वोऽभ्यासंज्ञः स्यात्।

२१७९ । हलादिः शेषः । (७-४-६०)

अभ्यासस्यादिर्हेल्शिष्यतेऽन्ये हलो लुप्यन्ते। इति वलोपः।

२१८० । ह्रस्वः । (७-४-५९)

अभ्यासस्याचो ह्रस्वः स्यात्।

२१८१ । भवतेरः । (७-४-७३)

भवतेरभ्यासोकारस्य 'अः' स्यालिटि।

२१८२ । अभ्यासे चर्च । (८-४-५४)

अभ्यासे झलां चरः स्युर्जशश्च। झशां जशः,। खयां चरः। तत्रापि प्रकृतिजशां प्रकृतिजशः प्रकृतिचरां प्रकृतिचर इति विवेकः। आन्तरतस्यात्।

षाष्ठद्वित्वप्रकरण इत्यर्थः। तेन सर्वस्य द्वे इत्यादिविहितस्य द्वित्वस्य न संग्रहः। कस्य पूर्व इत्याकांक्षायां द्वे इत्यनुवृत्तं षष्ठया विपरिणतं सम्बद्धयते। तदाह। **ये द्वे विहिते तयोरिति। हलादिरिति** ॥ अत्र लोपोऽभ्यासस्येत्यस्मादभ्यासस्येत्यनुवर्तते। शिष्यत इति शेषः कर्मणि घञ्। शिषधातुरितरनिवृत्तिपूर्वकावास्थितौ। तदाह। **अभ्यासस्येत्यादिना। इति वलोप इति** ॥ भूव् भूव् इत्यत्र अभ्यासवकारस्य लोप इत्यर्थः। भू भूव् अ इति स्थिते। **ह्रस्व इति** ॥ अत्र लोपोऽभ्यासस्येत्यतः अभ्यासस्येत्यनुवर्तते। ह्रस्वश्रवणादचश्चेति परिभाषया अच इत्युपस्थितम्। तदाह। **अभ्यासस्याच्च इति** ॥ भू भूव् अ इति स्थितम्। यद्यपि भवतेर इति वक्ष्यमाणाकारविधिनैव सिद्धमिदम्। तथापि लुलावेत्याद्यर्थमावश्यकमिदम् अतैव न्याय्यत्वादुपन्यस्तम्। **भवतेर इति**॥ भवतेः अ इति छेदः भवतेरिति श्तिपा निर्देशः। भूधातोरित्यर्थः। इक्श्तिपौ धातुनिर्देशे इत्युक्तेः। अत्र लोपोऽभ्यासस्येत्यस्मादभ्यासस्येत्यनुवर्तते। व्यथो लिटि दीर्घ इत्यस्मात् लिटीति भूधातोरभ्यासस्य भवन्नकारः अलोन्त्यस्येत्यन्त्यस्योकारस्य भवति। तदाह। **अभ्यासोकारस्येति** ॥ नानर्थकेऽलोन्त्यविधिरिति तु नेह प्रवर्तते। अनभ्यासविकार इत्युक्तेः। भ भू व् अ इति स्थिते। **अभ्यासे इति** ॥ झलाञ्जश्झशीत्यस्मात् झलामित्यनुवर्तते। चकारेण जश् समुच्चीयते। तदाह। **अभ्यासे झलामित्यादिना** ॥ झलश्चतुर्विंशतिः। तत्र शषसाः शरः। तेषामभ्यासे लोपो वक्ष्यते। शर्पूर्वाः खय इति हकारस्य त्वभ्यासे कुहोश्चुरिति श्चुत्वं वक्ष्यते। एवञ्च झल्षु झयो विंशतिरिहाभ्यासगताः स्थानिनो लभ्यन्ते। तेषां मद्धये कस्य चरः कस्य जशः इत्याकांक्षायामाह। **झशां जश इति** ॥ वर्गाणान्तृतीयचतुर्था झशः। तेषां जशः जबगडदा इत्यर्थः। यद्यद्वर्ग्याः स्थानिनः तत्तद्वर्ग्या आदेशा इत्यपि बोद्धयम्। **खयाश्चर इति** ॥ वर्गाणां प्रथमद्वितीयाः

२१८३ । असिद्धवदत्राभात्। (६-४-२२)

इत ऊर्ध्वमापादपरिसमाप्तेराभीयम् समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यात्। इति वुकोऽसिद्धत्वादुवङि प्राप्ते ।

खयः तेषां चरः चटतकपा इत्यर्थः । अत्रापि यद्यद्वर्ग्याः स्थानिनः तत्तद्वर्ग्या आदेशा इत्यपि बोद्धव्यम् । **तत्रापीति** ॥ तेष्वपि वर्ग्येषु प्रकृत्या स्वभावेन जशामेव सतां प्रकृत्या स्वभावेन जश एव सन्तस्तत्तद्वर्ग्या आदेशास्स्युः । एवं प्रकृत्या स्वभावेन चरामेव सतां प्रकृत्या स्वभावेन चर एव सन्तस्तत्तद्वर्ग्या आदेशास्स्युरित्यर्थः । पर्जन्यवल्लक्षणप्रवृत्तेरिति भावः । कुत इयं व्यवस्थेत्यत आह । **आन्तरतम्यादिति** ॥ झशां जशाञ्च घोषसंवारनादप्रयत्नसाम्यम् । खयां चराञ्च श्वासाघोषविवारप्रयत्नसाम्यम् । तत्तद्वर्ग्याणां तत्तद्वर्ग्या आदेशा इत्यत्र तु स्थानसाम्यनियामकं बोद्धव्यम् । तथा च प्रकृते अभ्यासभकारस्य बकारे सति बभूव् अ इति स्थिते अचिश्नुधात्वित्युवङादेशमाशङ्कितुमाह । **असिद्धवदिति** ॥ षष्ठस्य चतुर्थपादे इदं सूत्रम् । श्नान्नलोप इति सूत्रात् पूर्वं पठितम् । आभादित्यभिविधावाङ् भस्येत्याधिकारमभिव्याप्येत्यर्थः । भाधिकारश्च आपादपरिसमाप्तेरिति सिद्धान्तः । तथा च आपादपरिसमाप्तेरिति लभ्यते । विहितं कार्यमिति शेषः । किमारभ्येत्याकांक्षायामुपस्थितत्वादस्मादेवसूत्रादूर्ध्वमिति लभ्यते । ततश्च श्नान्नलोप इत्यारभ्यापादसमाप्तेः विहितं यदाभीयं कार्यं तदसिद्धवद्भवति । प्रवृत्तमप्यप्रवृत्तं भवतीत्यर्थः । अधिकारसूत्रमिदमुत्तरत्र श्नान्नलोप इत्यादौ प्रतिसूत्रमुपतिष्ठते । तथा च यद्यत्सूत्रे इदमनुवर्तते तत्तदाभीयकार्ये कर्तव्ये इति लभ्यते । एवञ्च श्नान्नलोप इत्यादितत्तदाभीयं कार्यं श्नान्नलोप इत्याद्याभीये कार्ये कर्तव्ये असिद्धवदित्यर्थः पर्यवस्यति । अत्रेत्यनेन निमित्तसप्तम्यन्तेनत्वसिद्धीभवतः कार्यस्य यन्निमित्तं तन्निमित्तके कार्ये कर्तव्ये सतीत्यर्थलाभात् समानाश्रये कार्ये कर्तव्ये सतीति लभ्यते । एतत्सर्वं भाष्ये स्थितम् । तदाह । **इत ऊर्ध्वमित्यादिना । तस्मिन्निति** ॥ आभीये कर्तव्ये सतीत्यर्थः । एधि शाधीत्युदाहारणम् । अत्र ध्वसोरेद्धावभ्यासलोपश्चेत्यस्तेरेत्वस्य शाहाविति शास्तेः शाभावस्य चाभीयत्वेनासिद्धत्वात् हुझल्भ्योहेर्धिरिति हेर्धित्वमाभीयं प्रवर्तते । तथा जंघहीत्याद्यप्युदाहरणम् । हनधातोर्यङ्लुगन्तात् लोण्मध्यमपुरुषैकवचने सिपो हिभावे अनुदात्तोपदेशेति नलोपस्याभीयस्यासिद्धत्वादतोहेरित्याभीयो लुङ्न भवति । समानाश्रय इति किम् । पपुष इत्यत्र पाधातोर्लिटः क्वसौ लिटिधातोरिति द्वित्वे अभ्यासह्रस्वे क्वस्वन्तात् द्वितीयाबहुवचने शसि वसोस्सम्प्रसारणमाभीयमातोलोप इटि चेत्याल्लोपे आभीये कर्तव्ये असिद्धन्न भवति । आल्लोपः क्वसौ, सम्प्रसारणन्तु शसीति भिन्नाश्रयत्वात् । आभीये कर्तव्ये इति किम् । अभाजि राग इत्यत्र भञ्जेश्चिणि रञ्जेर्घञि च कृते । रञ्जेश्च, घञि च भावकरणयोरिति नलोपस्याभीयस्यानाभीयायामुपधावृद्धौ कर्तव्यायान्नासिद्धत्वम् । आभादित्यभिविधिः किम् । भाधिकारात् प्रागित्युक्ते भूयानित्यत्र बहोर्लोपो भूच बहोरिति बहोर्भूभावस्य ओर्गुणे कर्तव्ये असिद्धत्वन्न स्यात् । भस्येति सूत्रादूर्ध्वभावित्वादित्यलम् । इति **वुकोऽसिद्धत्वादिति** ॥ वुक आभीयस्य अचि श्नुधात्वि

वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ । बभूव । बभवतुः ।बभूवुः ।

२१८४ । आर्धधातुकस्येड्वलादेः । (७-२-३५)

वलादेरार्धधातुकस्येडागमः स्यात् । बभूविथ । बभूवथुः । बभूव । बभूव । बभूविव । बभूविम ।

२१८५ । अनद्यतने लुट् । (३-३-१५)

भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् स्यात् ।

२१८६ । स्यतासी लृलुटोः । (३-१-३३)

'ल' इति लृङ्लुटोर्ग्रहणम् । धातोः स्यतासी एतौ प्रत्ययौ स्तो लृलुटोः परतः । शबाद्यपवादः ।

त्युवङि आभीये कर्तव्ये असिद्धतया ऊकारस्योवङि लघूपधगुणे बभोवेति प्राप्ते सर्वान्त्यर्थः । वुग्विधिस्तु गुणवृद्धिबाधकत्वेन चरितार्थ इति भावः । **वुग्युटावुवङ्यणोरिति** ॥ यथासंख्यमन्वयः । **बभूवेति** ॥ णलो णित्वन्तु जगादेत्यादौ वृद्ध्यर्थम् । **बभूवतुरिति** । तस अतुसादेशे वुगादि पूर्ववत् । सकारस्य रुत्वविसर्गौ । **बभूवुरिति** ॥ झेरुसादेशे वुगादि पूर्ववत् । सिपस्थलि बभू थ इति स्थिते । **आर्धधातुकस्येति** ॥ नेड्वशिकृतीत्यस्मादनुवृत्त्यैव सिद्धेरिहेड्ग्रहणन्नकार्यमिति नेड्वशीति सूत्रभाष्ये प्रत्याख्यातम् । आर्धधातुकस्येति किम् । जुगुप्सति । अत्र गुप्तिज् किद्भ्यः इति सनो धातोरित्यधिकृत्य विहितत्वाभावान्नार्धधातुकत्वं । **बभूविथेति** ॥ सिपस्थलि तस्य इडागमे वुगादि पूर्ववत् । **बभूवथुरिति** । थसः अथुसादेशे वुगादि पूर्ववत् । सकारस्य रुत्वविसर्गौ । **बभूवेति** ॥ मध्यमपुरुषबहुवचनस्य अकारस्सर्वादेश इति परस्मैपदानां णलतुसित्यत्रोक्तम् । वुगादि पूर्ववत् । **बभूवेति** ॥ मिपो णलि वुगादि पूर्ववत् । **बभूविवेति** ॥ वसो वादेशे वलादित्वादिडागमे वुगादि पूर्ववत् । नचात्र श्रयुकः किती तीडागमनिषेधश्शङ्क्यः । कृसृभृवृस्तुद्रुस्रुश्रुवो लिटीति क्रयादिनियमादिट्सिद्धेः । **बभूविमेति** ॥ मसो मादेशे इडागमे वुगादि पूर्ववत् ॥ इति लिट्प्रक्रिया ॥ **अनद्यतन इति** ॥ धातोरित्याधिकृतम् । भविष्यति गम्यादयः इत्यतः भविष्यतीत्यनुवर्तते । भविष्यत्यनद्यतन इति धात्वर्थेऽन्वेति । तदाह । **भविष्यत्यनद्यतन इति** ॥ अनद्यतनशब्दस्तु परोक्षे लिडित्यत्र व्याख्यातः । उटाविताौ । लुटस्तिबादयः । भू ति इति स्थिते कर्तरि शबिति शपि प्राप्ते । **स्यतासी इति**॥स्यश्च तासिश्चेति द्वन्द्वात् प्रथमाद्विवचनम् । तासेरिकार उच्चारणार्थः । लृ लुट् अनयोर्द्वन्द्वात् सप्तमीद्विवचनम् । **ग्रहणमिति** ॥ लृस्वरूपस्योभयत्राविशि-

२१८७। आर्धधातुकं शेषः। (३-४-११४)

तिङ्शिद्भ्योऽन्यो धात्वधिकारोक्तः प्रत्यय एतत्संज्ञः स्यात्। इट्।

२१८८। लुटः प्रथमस्य डारौरसः। (२-४-८५)

'डा' 'रौ' 'रस्' एते क्रमात्स्युः। डित्त्वसामर्थ्यादभस्यापि टेर्लोपः।

२१८९। पुगन्तलघूपधस्य च। (७-३-८६)

पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात्सार्वधातुकार्धधातुकयोः। येन नाव्यवधानं तेन व्यवहितेऽपि। वचनप्रामाण्यात्। तेन भिनत्तीत्यादावनेकव्यवहितस्येको न गुणः। 'भवित्' 'आ' अत्रेको गुणे प्राप्ते।

ष्टत्वादिति भावः। धातोरित्यधिकृतं तदाह। **धातोरिति** ॥ भू तास् ति इति स्थिते। **आर्धधातुकमिति** ॥ तिङ्शित्सार्वधातुकमिति पूर्वसूत्रोपात्ततिङ्शिदन्यश्शेषः तदाह। **तिङ्शिद्भ्योऽन्य इति। विहित इति** ॥ धातोरित्यधिकृतम् विहितविशेषणमाश्रीयत इति भावः। एवञ्च जुगुप्सतीत्यादौ गुप्तिज् किद्भ्य इत्यादि विहितसनादीनां धातोरित्युच्चार्य विहितत्वाभावेन आर्धधातुकत्वाभावादिडागमो न भवति। **एतत्संज्ञस्स्यादिति** ॥ आर्धधातुकसंज्ञक इत्यर्थः। **इडिति** ॥ तास् प्रत्ययस्योक्तसूत्रेणार्धधातुकत्वात् स्वतो वलादित्वाच्च आर्धधातुकस्येड्वलादेरितीडागम इत्यर्थः। भू इ तास् ति इति स्थिते। ऊकारस्य गुणे अवादेशे च भविता स् इति स्थिते। **लुटः प्रथमस्येति** ॥ डा रौ रस् एषां द्वन्द्वात् प्रथमाबहुवचनम्। लुट इति स्थानषष्ठी। लुडादेशस्य प्रथमपुरुषस्येत्यर्थः। **क्रमादिति** ॥ यथासंख्यलभ्यम्। ननु परस्मैपदस्य त्रयः प्रथमाः आत्मनेपदस्य च त्रयः प्रथमा इति स्थानिनः षट् आदेशास्तु त्रय इति कथं यथासंख्यमिति चेन्न। डाच रौच रस् चेति कृतद्वन्द्वानां डारौरसश्च डारौरसश्चेति एकशेषमाश्रित्य भाष्ये समाहितत्वात्। डाभावस्य चादेशत्वात् प्राक् प्रत्ययत्वाभावेन चुटू इत्यस्याप्रवृत्या सर्वादेशत्वम्। सति च तस्मिन् प्रत्ययत्वाच्चुटू इति टकारस्येत्संज्ञेति भाष्ये स्पष्टम्। एवंच भू ता स् आ इति स्थिते प्रक्रियां दर्शयति। **डित्वसामर्थ्यादिति** ॥ डाभावस्य कप्रत्ययावधिषु स्वादिष्वनन्तर्भूतत्वेन तस्मिन् परे भत्वाभावेऽपि डित्वसामर्थ्यात् टेरिति टिलोप इत्यर्थः। तथाच भवित् आ इति स्थिते। **पुगन्तेति** ॥ मिदेर्गुण इत्यतः गुण इत्यनुवर्तते। अङ्गस्येत्यधिकृतमवयवषष्ठ्यन्तमाश्रीयते। पुगन्तलघूपधस्येति तद्विशेषणम्। पुक् अन्तो यस्य तत् पुगन्तम्। लघ्वी उपधा यस्य तल्लघूपधम्। पुगन्तञ्च लघूपधञ्चेति समाहारद्वन्द्वात् षष्ठी। इको गुणवृद्धी इति परिभाषया इक इत्युपस्थितं स्थानषष्ठ्यन्तमाश्रीयते। तदाह। **पुगन्तस्येत्यादिना। अंगस्येक इति** ॥ अङ्गावयवस्येत्यर्थः। द्वेष्टि द्वेष्टा इत्याद्युदाहरणम्। नन्वत्राङ्गावयवस्येकः तदुपरितनहला व्यवधानात् सार्वधातुकपरत्वाभावात् कथमिह इको गुण

२१९०। दीधीवेवीटाम्। (१-१-६)

दीधीवेव्योरिटश्च गुणवृद्धी न स्तः। भविता।

२१९१। तासस्त्योर्लोपः। (७-४-५०)

तासेरस्तेश्च लोपः स्यात्सादौ प्रत्यये परे।

२१९२। रि च। (७-४-५१)

रादौ प्रत्यये प्राग्वत्। भवितारौ। भवितारः। भवितासि। भवितास्थः। भवि-

---

इत्यत आह। **येन नेति** ॥ येन स्थान्युत्तरवर्णेन परनिमित्तस्य नाव्यवधानं व्यवधानं अवर्जनीयमिति यावत्। तेन वर्णेन व्यवहितेऽपि परनिमित्तं कार्यं भवतीत्यर्थः। कुत इत्यत आह। **वचनप्रामाण्यादिति** ॥ तथाविधवर्णव्यवधाने कार्यप्रवृत्तौ वचनारम्भस्यैव प्रमाणत्वादित्यर्थः। लघूपधस्यहीको गुणो विधीयते। उपधात्वञ्चान्त्यादलः पूर्वस्यैव भवति। ततश्चैक उपर्यन्त्यस्य वर्णस्याभावे इक उपधात्वाभावाल्लघूपधस्याङ्गस्य गुणविधानं निर्विषयमेव स्यात्। अतस्तद्व्यवधानं सोढव्यमिति भावः। ननु व्यवहितस्यापीको गुणप्रवृत्यभ्युपगमे भिनत्ति च्छिनत्तीत्यादौ इकारस्यापि गुणस्स्यादित्यत आह। **तेनेति** ॥ अवर्जनीयव्यवधानस्यैवाश्रयणेनेत्यर्थः। उपधात्वस्यैकमेव वर्णमुपरितनमादाय सम्भवादनेकवर्णव्यवधानं नादर्तव्यमिति भावः। **गुणे प्राप्ते इति** ॥ भवित् आ इति स्थिते डाभावसम्पन्नस्याकारस्य स्थानिवत्त्वेन सार्वधातुकतया तस्मिन् परे भवित् इत्यङ्गावयवस्योपधाभूतस्येकारस्य गुणे प्राप्ते सतीत्यर्थः। न च भूधातोर्विहितं सार्वधातुकं प्रति भूधातुरेवाङ्गम्। न तु भवित् इति विकरणविशिष्टमिति वाच्यम्। अङ्गसंज्ञारम्भे तदादिग्रहणेन विकरणविशिष्टस्याप्यङ्गत्वात्। **दीधीव इति** ॥ दीधीङ् दीप्तिदेवनयोः। वेवीङ् वेतिना तुल्ये। दीधिश्च वेवीश्च इट्चेति द्वन्द्वात् षष्ठी। इको गुणवृद्धी इत्यतो गुणवृद्धी इति। न धातुलोप इत्यतो नेति चानुवर्तते। तदाह। **दीधीवेव्योरित्यादिना** ॥ अथ प्रथमपुरुषद्विवचने तासि परे शबपवादे तासि इडागमे ऊकारस्य गुणे अवादेशे तसो रौभावे भवितास् रौ इति स्थिते रिचेति सकारस्य लोपं वक्ष्यन् तत्रानुवृत्तिप्रतिपत्तये तत्पूर्वसूत्रमुपन्यस्यति। **तासस्त्योरिति** ॥ तास्चास्तिश्चेति द्वन्द्वात् षष्ठी। सस्यार्धधातुक इत्यतोऽनुवृत्तेन सीति सप्तम्यन्तेनाधिकृताङ्गाक्षिप्तप्रत्ययस्य विशेषणात् तदादिविधिः। तदाह। **तासेरित्यादि** ॥ अस्तेरिति इतिपा निर्देशः। अस् धातोरित्यर्थः। अलोऽन्त्यस्येत्यन्त्यस्य लोपः। भवितासीत्यनुपदमेवोदाहरणं वक्ष्यते। **रिचेति** ॥तासस्त्योर्लोप इति सूत्रं अस्ति वर्जमनुवर्तते। रीत्यनेनाङ्गाक्षिप्तप्रत्ययस्य विशेषणात्तदादिविधिः। तदाह। **रादाविति। प्राग्वदिति** ॥ तासेर्लोप इत्यर्थः। अस्तिस्तु नानुवर्तते। ततो रादिप्रत्ययस्यासम्भवात्। आर्धधातुके तस्य भूभावविधानात्। एवञ्च भवितास् रावित्यत्र सलोपे सति रूपमाह। **भवितारावि ति। भवितार इति** ॥ औ तासि इडागमे ऊकारस्य गुणे अवादेशे झेः रस् इत्यादेशे तासस्सकारस्य लोपे रसस्सकारस्य रुत्वविसर्गाविति भावः।

तास्थ । भवितास्मि । भवितास्वः । भवितास्मः ।

२१९३ । लृट् शेषे च । (३-३-१३)

भविष्यदर्थाद्धातोर्लृट् स्यात्क्रियार्थायां क्रियायामसत्यां सत्यां च । स्य इट् । भविष्यति । भविष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथः । भविष्यथ । भविष्यामि । भविष्यावः । भविष्यामः ।

२१९४ । लोट् च । (३-३-१६२)

विध्यादिष्वर्थेषु धातोर्लोट् स्यात ।

२१९५ । आशिषि लिङ्लोटौ । (३-३-१७३)

२१९६ । एरुः । (३-४-८६)

भवितासीति ॥ सिपि तासि इडागमे ऊकारस्य गुणे अवादेशे तासस्त्योरिति सकारस्य लोप इति भावः । **भवितास्थ इति** ॥ थसि तासि इडागमे गुणे अवादेशे थसः सस्य रुत्वविसर्गाविति भावः । **भवितास्थेति** । बहुवचने थे तासि इटि गुणावादेशौ । **भवितास्मीति** ॥ मिपि तासि इटि गुणावादेशौ । **भवितास्व इति** ॥ वसि तासि इटि गुणे अवादेशे रुत्वविसर्गौ । एवं मसि भवितास्म इति रूपम् । **इति लुट्प्रक्रिया** ॥ **लृडिति** ॥ धातोरित्यधिकृतम् । भविष्यति गम्यादयः इत्यतो भविष्यतीत्यनुवृत्तम् धात्वर्थेऽन्वेति । तदाह । **भविष्यदर्थाद्धातोः लृट् स्यादिति** ॥ तुमुन्ण्वुलौ क्रियायां क्रियार्थायामिति पूर्वसूत्रे क्रियार्थायां क्रियायामित्यर्थनिर्देशः स्थितः ततोऽन्यदशेषः । क्रियार्थायां क्रियायां असत्यामिति लभ्यते । चकारात् क्रियार्थायां क्रियायां सत्यामित्यपि लभ्यते । तदाह । **क्रियार्थायां क्रियायां असत्यां सत्याञ्चेति** ॥ ननु लृट् इत्येव सूत्रमस्तु । शेषे चेति मास्तु । भविष्यदर्थाद्धातोः लृट् इत्येतावतैव क्रियार्थायां क्रियायां असत्यां सत्याञ्च लृटो लाभ इति चेत् मैवम् । 'शयिष्यत इति स्थीयत' इत्यादौ भावकर्त्रोः तुमुन् ण्वुलभ्यां लृटो बाधाभावार्थत्वात् । न च वासरूपविधिना तत्सिद्धिरशङ्क्या । क्त्वल्युट् तुमुन् खलर्थेषु वा सरूपविधिर्नास्तीति तन्निषेधादित्यास्तां तावत् । **स्य इडिति** ॥ लृटस्तिपि स्यतासी लृलुटोरिति स्यप्रत्ययः । तस्य वलाद्यार्धधातुकत्वात् इडागम इत्यर्थः । भविष्यतीति स्य प्रत्ययस्य इटि ऊकारस्य गुणे अवादेशे प्रत्ययावयवत्वात् सकारस्य षत्वे भविष्यतीति रूपमित्यर्थः । तसादौ भविष्यत इत्याद्यप्येवं योज्यम् । भविष्यामीत्यादौ अतो दीर्घो यञीति दीर्घः ॥ **इति लृट् प्रक्रिया** ॥ **लोट्चेति** ॥ विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु इत्यनुवर्तते । तदाह । **विध्यादिष्विति** ॥ विध्यादिशब्दा अनुपदमेव लिङ्विधौ व्याख्यास्यन्ते । **आशिषीति** ॥ आशिष्यपीत्यर्थः । आशासनमाशीः इष्टप्राप्तीच्छा । लोटस्तिपि विशेषमाह । **एरुरिति** ॥ एः

लोट इकारस्य उः स्यात् । भवतु ।

२१९७ । तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् । (७-१-३५)

आशिषि तुह्योस्तातङ्वा स्यात् । अनेकाल्त्वात्सर्वादेशः । यद्यपि 'ङिच्च' (४३) इत्ययमपवादस्तथाप्यनन्यार्थङित्त्वेष्वनङादिषु चरितार्थ इति गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थतया सम्भवत्प्रयोजनङ्कारे तातङि मन्थरं प्रवृत्तः परेण बाध्यते । इहोत्सर्गापवादयोरपि समबलत्वात् । भवतात् ।

उः इति च्छेदः । एरिति षष्ठ्यन्तम् । इवर्णस्येति लभ्यते । लोटो लङ्वदित्यतो लोट इत्यनुवर्तते । तदाह । **लोट इति** । **भवत्विति** ॥ तिपि शपि गुणे अवादेशे तिप इकारस्य उकारः । अथाशिषि लोटो विशेषमाह । **तुह्योरिति** ॥ तुश्च हिश्च तुह्यौ तयोरिति विग्रहः । तातङि ङकार इत् । अकार उच्चारणार्थः । तादित्यादेशश्शिष्यते । ननु किमस्य अनेकाल्त्वात्सर्वादेशता उत ङित्त्वादन्तादेशतेत्यत आह । **अनेकाल्त्वात् सर्वादेश इति** ॥ ननु ङिच्चेत्यस्य सर्वादेशापवादतया अनङादेरिव तातङोऽप्यन्त्यादेशत्वमेवोचितमित्याशङ्कते । **यद्यपि ङिच्चेत्ययमपवाद इति** ॥ परिहरति । **तथापीति** ॥ परेण बाध्यते इत्यन्वयः । तातङादेशे ङिच्चेत्ययं विधिः अनेकाल् शित् सर्वस्येति परेण बाध्यत इत्यर्थः । ननु परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय इति परापेक्षया अपवादस्य प्रबलत्वात् ङिच्चेत्यन्तादेशत्वमेव तातङि युक्तमित्यत आह । **तातङि मन्थरं प्रवृत्त इति** ॥ ङिच्चेति विधिरिति शेषः । तातङ्विषये ङिच्चेति विधिर्मन्थरम्प्रवृत्त इति हेतोः परेण सर्वादेशविधिना बाध्यत इत्यर्थः । कुतो मन्दप्रवृत्तिकत्वमित्यत आह । **अनन्यार्थेत्यादिना** ॥ अन्तादेशत्वादन्योऽर्थो यस्य ङित्त्वस्य न विद्यते तदनन्यार्थम् । तथाविधं ङित्वं येषान्तेषु अनङादिषु ङिच्चेति विधिः चरितार्थः । लब्धप्रयोजनक इति कृत्वा मन्दम्प्रवृत्त इत्यर्थः । तातङो ङित्वन्तु अन्तादेशत्वापेक्षया अनन्यार्थं नेत्याह । **सम्भवत्प्रयोजनङ्कारे इति** ॥ सम्भवन्ति प्रयोजनानि अन्यानि यस्य सः सम्भवत्प्रयोजनः । तथाविधः ङकारः यस्य तथाविधे तातङीत्यर्थः । कथं सम्भवत्प्रयोजनकत्वमित्यत आह । **गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थतयेति** ॥ द्विष्टादित्यादौ लघूपधादिगुणनिषेधः । स्तुतात् युतादित्यादावुतोवृद्धिर्लुकि हलीति विहिताया वृद्धेर्निषेधः । वशकान्तौ उष्टादित्यत्र ग्रहिज्यावयीति सम्प्रसारणम् । आदिना ब्रूतादित्यत्र ब्रुव ईडितीटोऽभावस्य संग्रहः । ननु तातङ्विषये ङिच्चेति विधिर्मन्दम्प्रवर्ततां । अथापि परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय इति न्यायेन परस्यापि सर्वादेशविधेरपवादभूतेन ङिच्चेत्यनेन बाध एवोचित इत्यत आह । **इहेति** ॥ इह तातङ्विषये अनेकाल्शित्सर्वस्येति सामान्यशास्त्रस्य ङिच्चेति विशेषशास्त्रस्य च समबलत्वात् । सामान्यशास्त्रं विशेषशास्त्रेण न बाध्यत इत्यर्थः । अयं भावः । अपवादशास्त्रस्य परनित्यान्तरङ्गापेक्षया प्राबल्ये निरवकाशत्वमेव बीजम् । प्रकृते च ङिच्चेति विधिः अनङादिङित्वमन्तादेशत्वैकप्रयोजनकम् । प्रयोजनान्तरविरहेण निरवकाशत्वात् । झटिति परिगृह्णन् कृतार्थतामनुभवन् तातङो ङित्वम् प्रयोजनान्तरसत्त्वेन सावकाशत्वादुपेक्षत इति ।

२१९८ । लोटो लङ्वत् । (३-४-८५)

लोटो लङ इव कार्यं स्यात् । तेन तामादयः सलोपश्च । तथा हि ।

२१९९ । तस्थस्थमिपां तांतंतामः । (३-४-१०१)

ङितश्चतुर्णामेषां तामादयः क्रमात्स्युः ।

२२०० । नित्यं ङितः । (३-४-९९)

सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः स्यात् । 'अलोऽन्त्यस्य' (४२) इति **सस्य लोपः** । **भवताम्** । **भवन्तु** ।

२२०१ । सेर्ह्यपिच्च । (३-४-८७)

तदुक्तं भाष्ये । ङित्त्वस्य सावकाशत्वाद्विप्रतिषेधात्तातङ् सर्वादेश इत्यभिधाय विस्तरभिया विरम्यते । **भवतादिति** ॥ आशिषि लोटस्तिपि शपि गुणे अवादेशे उकारे तोस्तातङ् सर्वादेशः । ङकारइत् । द्वितीयतकारादकारउच्चारणार्थः । **लोटो लङ्वदिति** ॥ लङ इव लङ्वत् । तत्र तस्येवेति षष्ठ्यन्ताद्वतिः । तदाह । **लोटो लङ इवेति** ॥ ननु तर्हि लुङ् लङ् लृङ्क्ष्वडुदात्त इत्यडागमोऽपि स्यादित्यत आह । **तेनेति** ॥ लङ इति स्थानषष्ठ्यन्तात् वतिप्रत्ययाश्रयणेनेत्यर्थः । अडागमस्तु न लङो विधीयते । किन्तु लङि अङ्गस्येति भावः । केन तामादयः । केन वा सलोप इत्यत आह । **तथाहीति** ॥ तामादयस्सलोपश्च यथा ज्ञायन्ते तथा स्पष्टमुच्यन्त इत्यर्थः । **तस्थ इति** ॥ तस् थस् थ मिप्, एषां द्वन्द्वात् षष्ठीबहुवचनम् । ताम् तम् त अम्, एषां द्वन्द्वात् प्रथमाबहुवचनम् । नित्यं ङित इत्यस्मात् ङित इत्यनुवर्तते । तदाह । **ङितश्चतुर्णामिति** ॥ ङितो लकारस्य आदेशभूतानामित्यर्थः । **क्रमादिति** ॥ यथासंख्यसूत्रलभ्यमिदम् । **नित्यङ्ङित इति** ॥ उत्तमपुरुषएवास्य सूत्रस्य प्रयोजनं । प्रसङ्गादिहोपन्यस्तम् । स उत्तमस्येति सूत्रमनुवर्तते । तत्र स इति षष्ठ्यन्तम् । तेन उत्तमो विशेष्यते । तदन्तविधिः । इतश्च लोप इत्यतो लोप इत्यनुवर्तते । तदाह । **सकारान्तस्य ङिदुत्तमस्येति** ॥ ङितो लकारस्य य आदेशः उत्तमपुरुषः तस्येत्यर्थः । वैतोन्यत्रेत्यस्माद्व्याग्रहणानुवृत्तिनिवृत्तये नित्यग्रहणम् । अलोऽन्त्यस्येत्यन्त्यलोपः । **भवतामिति** ॥ लोटस्तस् । तस्य तामादेशः । शप् गुणावादेशौ । न च तामादेशस्य सर्वादेशत्वात् प्राक् विभक्तित्वाभावात्र विभक्तौ तु स्मा इति निषेधाभावात् मकारस्येत्संज्ञा शंक्या । संयोगान्तलोपेन मकारान्तरप्रश्लेषेण उपदेशेऽन्त्यत्वाभावात् । **भवन्त्विति** ॥ लोटो झेः अन्तादेशे शपि गुणे अवादेशे द्वयोरकारयोः पररूपे एरुरितीकारस्य उकारे भवन्त्विति रूपम् । अथ लोटः सिपि शपि गुणावादेशयोः भव सि इति स्थिते । **सेर्ह्यपीति** ॥ हि इति लुप्तप्रथमाकम् । लोटो लङ्वदित्यतो लोट इत्यनुवर्तते । तदाह ।

लोटः सेर्हिः स्यात्सोऽपिच्च ।

१२०२ । अतो हेः । (६-४-१०५)

अतः **परस्य हेर्लुक्स्यात्** । भव—भवतात् । भवतम् । भवत ।

२२०३ । मेर्निः । (३-४-८९)

लोटो मेर्निः स्यात् ।

२२०४ । आडुत्तमस्य पिच्च । (३-४-९२)

लोडुत्तमस्याडागमः स्यात्स पिच्च । हिन्योरुत्वं न । इकारोच्चारणसामर्थ्यात् । भवानि । भवाव । भवाम ।

२२०५ । अनद्यतने लङ् । (३-२-१११)

लोटस्सेरिति । स्तुहीत्यादौ सिप्स्थानिकस्य हेः पित्वात् सार्वधातुकमपिदिति ङिद्वत्वाभावात् । गुणे प्राप्ते अपिद्वचनम् एवञ्च ङिद्वत्वात् क्ङितिचेति गुणो न । सेर्हि ङिच्चेत्येव तु न सूत्रितम् । पितस्सिप अनुदात्तस्य स्थाने हेरप्यनुदात्तत्वापत्तेः । भव हि इति स्थिते । **अतो हेरिति** ॥ अत इति पञ्चमी । हेरिति षष्ठी । ङिणो ङुगिन्यतो ङुगिन्यनुवर्तते । तदाह । **अतः परस्येति । भवेति** ॥ हिविधानन्तु स्तुहीत्याद्यर्थमिति भावः । **भवतादिति** ॥ आशिषि लोटः सिपि तस्य सेर्ह्यपिच्चेति हिभावे शपि गुणावादेशयोः अतो हेरिति लुकम्परत्वान बाधित्वा तुह्योरिति पक्षे तातङिति भावः । **भवतमिति** ॥ थस्सि शपि गुणे अवादेशे च भव थस् इति स्थिते लोटो लङ्वदिति लङ्वत्वात्तस्थस्थमिपामिति थसः तमादेशे रूपम । एवं । **भवतेति** ॥ थस्य तादेश इति विशेषः । लोटो मिपि शपि गुणे अवादेशे मिपः तस्थस्थमिपामिन्यमादेशे प्राप्ते । **मेर्निरिति** ॥ लोटो लङ्वदित्यतः लोट इत्यनुवर्तते । तदाह । **लोटो मेरिति** ॥ भव नि इति स्थिते । **आडुत्तमस्येति** ॥ लोटो लङ्वदित्यतः लोट इत्यनुवर्तते । तदाह । **लोडुत्तमस्येति** ॥ स्तवानि स्तवावेत्यादौ सार्वधातुकमपिदिति ङित्त्वनिवृत्त्यर्थम् पिद्वचनं । यद्यपि मिपूस्थानिकस्य नेः पित्त्वात्तदागमस्यापि सिद्धं पित्त्वं तथापि वसमसोराडागमस्याङित्त्वार्थम पिदिति वचनम् । ननु स्तुहि भवानीत्यत्र एरुरित्युत्वं कुतो न स्यादित्यत आह । **हिन्योरुत्वनेति** । **सामर्थ्यादिति** ॥ अन्यथा हुनु इत्येव विदद्ध्यादिति भावः । **भवानीति** ॥ आडागमे सवर्णदीर्घः । नचात्र लङ्वद्भावादितश्चेति लोपशङ्क्यः । इकारोच्चारणसामर्थ्यात् । अन्यथा मोन इत्येव विदध्यात । एवं हेरपि बोध्यं । यद्यपि भवानीत्यादावतो दीर्घो यञि इत्येव दीर्घसिद्धेराडागमविधिः व्यर्थः । तथाऽपि स्तवानीत्याद्यर्थमावश्यकमिहापि न्याय्यत्वादुपन्यस्तम् । **भवावेति** ॥ लोटो वस् गुणावादेशौ आडागमः सवर्णदीर्घः । लङ्वद्भावात् नित्यं ङित इति सकारलोपः । एवं मसि भवामेति रूपं । **इति लोट् प्रक्रिया** ॥ **अनद्यतन इति** ॥ धातोरिति भूत

अनद्यतनभूतार्थवृत्तेर्धातोर्लङ्स्यात्।

२२०६। लुङ्लङ्लृङ्क्ष्वडुदात्तः (६-४-७१)

एषु परेष्वङ्गस्याडागमः स्यात् सचोदात्तः।

२२०७। इतश्च (३-४-१००)

ङितो लस्य परस्मैपदमिकारान्तं यत्तदन्तस्यलोपः स्यात्। अभवत्। अभवताम्। अभवन्। अभवः। अभवतम्। अभवत। अभवम्। अभवाव। अभवाम।

२२०८। विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्। (३-३-१६१)

एष्वर्थेषु द्योत्येषु वाच्येषु वा लिङ् स्यात्। विधिः प्रेरणम्, भृत्यादेर्निकृष्टस्य

इति चाधिकृतम्। भूत इति धात्वर्थे अन्वेति। तदाह। **अनद्यतनभूतार्थवृत्तेरिति** ॥ **लुङ्लङिति** ॥ अङ्गस्येत्यधिकृतम्। तदाह। **एषु परेषु अंगस्येति** ॥ अन्तरङ्गत्वात् नित्यत्वात्परत्वाच्च यथायथं तिपि शपि विकरणे गुणे अवादेशे विकरणविशिष्टस्याङ्गस्य अडागमः। लावस्थायामेवाडागम इति तु पक्षान्तरं भाष्ये स्थितम्। **इतश्चेति** ॥ लस्येत्यधिकृतम्। इतश्च लोप. परस्मैपदेष्वित्यस्मात् लोप इति परस्मैपदेष्विति चानुवर्तते। परस्मैपदेष्वित्येतत् षष्ठ्या विपरिणम्यते। तदाह। **ङितो लस्येत्यादिना** ॥ अलोऽन्त्यस्येत्यन्त्यस्य लोपः। तदाह। **अभवदिति। अभवतामिति** ॥ लङस्तसः तामादेशः शप् गुणावादेशौ अट्। **अभवन्निति** ॥ झेरन्तादेशः। शप् गुणावादेशौ। अट् इतश्चेति इकारलोपः। तकारस्य संयोगान्तलोपः। **अभव इति**। सिपि शपि गुणे अवादेशे अटि इकारलोपे रुत्वविसर्गौ। **अभवतमिति** ॥ थसस्तमादेशः। शप् गुणावादेशौ अट्। **अभवतेति** ॥ थस्य तादेशे शपि गुणे अवादेशे अटि। **अभवमिति** ॥ मिप अमादेशे शपि गुणे अवादेशे पूर्वरूपम्। **अभवावेति** ॥ वसि शपि गुणावादेशौ। अट् अतो दीर्घो यञीति दीर्घः। नित्यङ्ङित इति सकारलोपः। एवं मसि अभवामेति रूपम्। **इति लङ् प्रक्रिया** ॥ **विधिनिमन्त्रणेति** ॥ ननु विध्यादयो हि न लिङो वाच्याः। लः कर्मणि च भावे चेति सूत्रेण कर्तृकर्मभावानां लकारवाच्यत्वबोधनात्। नच लः कर्मणि चेति शास्त्रं लिङ्व्यतिरिक्तलकारविषयकमेवास्त्विति वाच्यम्। तथा सति यजेतेत्यादौ कर्तृवाचकत्वाभावेन शबाद्यनापत्तेरित्यत आह। **द्योत्येष्विति** ॥ लः कर्मणि चेति सूत्रं सामान्यविषयञ्चेदपि विधिनिमन्त्रणेति विशेषशास्त्रेण न बाध्यते। अविरोधात्। तथाच विध्यादिविशिष्टकर्त्रादिषु लिङिति फलतीति मत्वाह। **वाच्येषु वेति** ॥ पक्षद्वयमपीदं भाष्ये स्थितम्। विधिः प्रेरणमिति भाष्यम्। अर्थतस्संगृह्णाति। **विधिः प्रेरणमिति** ॥ ननु निमन्त्रणादीनामपि प्रेरणान्तर्भावात्पौनरुक्त्यमित्यतो व्याचष्टे। **भृत्यादेर्निकृष्टस्य प्रवर्तनमिति**। तद्यथा भृत्यं स्वामी वदति। भवान् वस्त्रं क्षाळयेदिति। आमन्त्रणात् भेदं दर्शयितुं

प्रवर्तनम् । निमन्त्रणं नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम् । आमन्त्रणं कामचारानुज्ञा । अधीष्टः सत्कारपूर्वको व्यापारः । 'प्रवर्तनायां लिङ्', इत्येव सुवचम् । चतुर्णां पृथगुपादानं प्रपञ्चार्थम् ।

२२०९ । यासुट् परस्मैपदेषूदात्तो ङिच्च । (३-४-१०३)

लिङः परस्मैपदानां यासुडागमस्स्यात्स चोदात्तो ङिच्च । ङित्वोक्तेर्ज्ञायते 'क्वचिदनुबन्धकार्येऽप्यनल्विधाविति प्रतिषेधः' इति । आदेशस्य शानचश्चिश्त्वमपीह लिङ्गम् ।

निमन्त्रणशब्दं व्याचष्टे । **निमन्त्रणं नियोगकरणमिति** ॥ नियोगशब्दस्य प्रेरणशब्दपर्यायत्वभ्रमं वारयति । **आवश्यके श्राद्धादौ दौहित्रादेः प्रवर्तनमिति** ॥ त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलः, इत्यादि वचनादिति भावः । तद्यथा दौहित्रादीन् प्रति इह श्राद्धे भवान् भुञ्जीतेति । **आमन्त्रणं कामचारानुज्ञेति** ॥ यथेच्छं क्रियतामित्यभ्यनुज्ञानमित्यर्थः । **अधीष्टः सत्कारपूर्वको व्यापार इति** ॥ भाष्यवाक्यमिदम् । सत्कृत्य प्रवर्तनमित्यर्थः । अधिपूर्वकस्येषधातोर्भावे क्तान्तस्योपसर्गवशादस्मिन्नर्थे वृत्तिः । अत एव भाष्यप्रयोगादधीष्टशब्दस्य पुंस्त्वम् । अधीष्टमित्येव क्वचित्पाठः । माणवकं भवानध्यापयेदित्युदाहरणम् । इदं कार्यं नवेति विचार्य निर्धारणम् सम्प्रश्नः । यथा । किम्भोः व्याकरणं भवानधीयीतेति । प्रार्थनं याच्ञा । यथा । भवानन्नं मे दद्यादिति । **सुवचमिति** ॥ प्रवर्तनात्वस्य विध्यादिचतुर्षु अनुस्यूतत्वादिति भावः । प्रवृत्त्यनुकूलव्यापारः प्रवर्तना । तत्र प्रवृत्तिः शिष्यादिनिष्ठा । तदनुकूलव्यापारस्तु प्रेरणात्मकः प्रवर्तयितृगुर्वादिनिष्ठः । विस्तरस्तु मञ्जूषायां द्रष्टव्यः । **चतुर्णामिति** ॥ विधिनिमन्त्रणामन्त्रणाधीष्टानामित्यर्थः । अथ लिङस्तिपि इतश्चेतीकारलोपे शपि गुणे अवादेशे भव त् इति स्थिते । **यासुडिति** ॥ लिङः सीयुडित्यतः लिङ इत्यनुवर्तते । षष्ठ्यर्थे सप्तमी । तदाह । **लिङः परस्मैपदानामिति** ॥ सीयुटोऽपवादः । यासुटि टकार इत् । उकार उच्चारणार्थः । टित्वात् तिबादीनामाद्यवयवः । अवयवे ङित्वञ्च आनर्थक्यात्तदङ्गन्यायेन समुदाये आगमविशिष्टतिबादौ विश्राम्यति । आगमा अनुदात्ता इति यासुटः अनुदात्तत्वे प्राप्ते उदात्तवचनं । इदमेव वचनमागमा अनुदात्ता इत्यत्र ज्ञापकमिति भाष्यम् । स्तुयात् स्तुयातामित्यादौ गुणादिनिषेधार्थं यासुटो ङित्ववचनम् । ननु यदागमा इति न्यायेन यासुडागमो लिङादेशपरस्मैपदावयवः । ततश्च स्थानिवत्वेनैव ङित्त्वसिद्धेः यासुटो ङित्वविधिर्व्यर्थः । न च स्थानिभूतलिङो ङकारस्याल इत्त्वेन गुणनिषेधविधावाश्रयणादनल्विधाविति निषेधश्शङ्क्यः । घुमास्थागापाजहातिसां हलीति क्ङिति विहितस्य ईत्वस्य नल्यपीति निषेधेन लिङ्गेनानुबन्धकार्ये अनल्विधाविति निषेधाभावज्ञापनादित्यत आह । **ङित्वोक्तेरिति** । **क्वचिदनुबन्धकार्येऽपि अनल्विधाविति निषेध इति** ॥ यासुटो ङित्वेन ज्ञायत इत्यन्वयः । तथा च एतदज्ञापनार्थ-

२२१० । सुट् तिथोः । (३-४-१०७)

लिङस्तकारथकारयोः सुट् स्यात् । सुटा यासुट् न बाध्यते । लिङो यासुट् तकारथकारयोः सुडिति विषयभेदात् ।

२२११ । लिङः सलोपोऽनन्त्यस्य । (७-२-७९)

सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः स्यात् । इति सकारद्वयस्यापि निवृत्तिः । सुटः श्रवणं त्वाशीर्लिङि । स्फुटतरं तु तत्रात्मनेपदे ।

मेव यासुटो ङित्वमिति भावः । ज्ञापनफलन्तु वक्ष्यमाणेत्यत्र ङीबभावः । अन्यथा लृडादेशस्य शानचः स्थानिवत्त्वेन टित्वात् ङीप् स्यात् । ननु क्वचिदनुबन्धकार्येऽप्यनल्विधाविति निषेध इत्यत्र यासुटो ङित्ववचनं न ज्ञापकम् । अनुबन्धकार्ये सर्वत्र अनल्विधाविति निषेधाभावे सत्यपि यासुटो ङित्वस्य तिप्सिप्मिबागमयासुटो ङित्त्वार्थमावश्यकत्वात् । नहि लिङादेशत्वेऽपि तिप्सिप्मिपां ङित्त्वं स्थानिवत्वलभ्यम् । हलदन्तश्शानज्ज्ञाविति सूत्रभाष्ये ङिच्च पित्र पिच्च ङित्रेति प्रपञ्चितत्वादित्यस्वरसादाह । **श्नश्शानचः शित्वमपीह लिंगमिति** ॥ इह अनुबन्धकार्येऽपि क्वचिदनल्विधाविति निषेधोऽस्तीत्यस्मिन्नर्थे श्नः श्नाप्रत्ययस्य यः शानजादेशः हलःश्नश्शानज्ज्ञाविति विहितः तस्य शित्वमपि लिङ्गम् । ज्ञापकमित्यर्थः । अन्यथा स्थानिवत्वेनैव तस्य शित्त्वसिद्धेस्तद्वचनं व्यर्थं स्यादिति भावः । अत्र च यद्वृत्तव्यन्तत् स्त्रीप्रत्ययनिरूपणे वक्ष्यमाणेत्यत्र प्रपञ्चितम् । तथा च प्रकृते भव यास् त् इति स्थिते । **सुडिति** ॥ लिङस्सीयुडित्यतः लिङ इत्यनुवर्तते । तिश्च थश्चेति द्वन्द्वात् षष्ठीद्विवचनम् । इकार उच्चारणार्थः । तदाह । **लिंङस्तकारेति** ॥ सुटि टकार इत् उकार उच्चारणार्थः । भव यास् स् त् इति स्थितम् । नन्विह परेण सुटा यासुटः कथन्न बाधः । भवेयुरित्यादौ परस्मैपदेषु यासुड्विधेः चरितार्थत्वादित्याशङ्क्य निराकरोति । **सुटा यासुट् न बाध्यत इति** ॥ तत् कुत इत्यत आह । **लिङो यासुट् इति** । लिङस्सीयुट् यासुडागमश्च । लिङादेशैकदेशस्य तकारस्य सुडागम इति विषयभेदादित्यर्थः । तथा च यौगपद्यासम्भवात् विप्रतिषेधाभावान्न परेणापि सुटा यासुटो बाध इति भावः । **लिङ इति** ॥ सेति लुप्तषष्ठीकं पदम् । रुदादिभ्यस्सार्वधातुक इत्यतस्सार्वधातुक इत्यनुवृत्तम् षष्ठ्या विपरिणम्यते । तदाह । **सार्वधातुकलिङ इति । सकारद्वयस्यापीति** ॥ अविशेषात् सकारद्वयस्यापि युगपल्लोपः प्रवर्तते । लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति तु पर्यायेण पुनः प्रवृत्तिनिवृत्तिपरमिति भावः । यद्यपि भव यास् स् त् इत्यत्र स्कोरित्येव सिद्ध्यति । तथापि भवेयुरित्याद्यर्थं सूत्रम् । ननु सुटो लोपे किमर्थस्सुड्विधिरित्यत आह । **सुटः श्रवणन्त्वाशीर्लिङीति** ॥ भूयास्तामित्यादौ लिङाशिषीत्यार्धधातुकत्वेन तत्र सकारलोपस्याप्रसक्तेरिति भावः । व्यञ्जनपरस्यैकस्यानेकस्य वोच्चारणे विशेषाभाव इति भाष्यादाह । **स्फुटतरन्त्विति** ॥ तत्रापि आशिषि लिङ्यपि एधिषीष्टेत्यादावात्मने पदे स्फुटतरं सकारद्वयस्य श्रवणमित्यर्थः । तत्र यासुटः अभावेन सलोपाभावेन च सुट एव सकारस्य पृथक् स्पष्टं श्रवण-

२२१२ । अतो येयः । (७-२-८०)

अतः परस्य सार्वधातुकावयवस्य 'या' इत्यस्य इय् स्यात् । गुणः । यलोपः । भवेत् । 'सार्वधातुक–' इति किम् । चिकीर्ष्यात् । मध्येऽपवादन्यायेन हि अतो लोप एव बाध्येत । भवेदित्यादौ तु परत्वाद्दीर्घः स्यात् । भवेताम् ।

सम्भवादिति भावः । तथाच भव यात् इति स्थिते । **अत इति** ॥ या इति लुप्तषष्ठीकं पदम् । अत इति पञ्चमी। परस्येत्यध्याहार्यम् । इय इत्यत्राकार उच्चारणार्थः । रुदादिभ्य इत्यस्मात् सार्वधातुक इत्यनुवृत्तम् अवयवषष्ठ्या विपरिणम्यते । तदाह । **अतः परस्येत्यादिना** ॥ भव इय् त् इति स्थितम् । **गुण इति** ॥ आद्गुण इत्यनेनेति शेषः । भवेथ त् इति स्थितम् । **यलोप इति** ॥ लोपो व्योरित्यनेनेति शेषः । **भवेदिति** ॥ यलोपात् प्राक् हलङ्यादिलोपस्संयोगान्तलोपश्च न शङ्क्यः । अन्तरङ्गत्वेन यलोपस्य पूर्वम्प्रवृत्तेः संयोगान्तलोपस्य त्रैपादिकत्वेनासिद्धत्वाच्चेति भावः । **सार्वधातुके किमिति** ॥ रुदादिभ्य इत्यतस्सार्वधातुक इत्यनुवृत्तिलभ्यं सार्वधातुकावयवस्येति किमर्थमित्यर्थः । भूयादित्यादावाशीर्लिङि आर्धधातुके अतः परत्वाभावादेव इयादेशाभावसिद्धेः सार्वधातुकग्रहणानुवृत्तिर्व्यर्थेत्याशयः । **चिकीर्ष्यादिति** ॥ कृञ्धातोस्सन्नन्तात् आशीर्लिङि तिबादौ चिकीर्ष यादिति स्थिते अतो लोप इत्यकारलोपे चिकीर्ष्यादिति रूपम् । तत्र अतो येय इत्यत्र सार्वधातुकग्रहणाननुवृत्तौ चिकीर्षयादिति स्थिते अतो येय इति इयादेशे आद्गुणे यलोपे चिकीर्ष्येदिति स्यात् । सार्वधातुकग्रहणानुवृत्तौ तु न दोषः । आशीर्लिङादेशस्य तिङः लिङाशिषाल्यार्धधातुकतायाः वक्ष्यमाणत्वादिति भावः । ननु आशिषि लिङि चिकीर्षयादिति स्थिते नित्यत्वात् अतो लोप इति अकारलोपे सति अतः परत्वाभावादेव अतो येय इत्यस्याप्रवृत्तेः तत्र सार्वधातुकग्रहणानुवृत्तिर्व्यर्थैवेत्यत आह । **मध्येऽपवादन्यायेन ह्यतो लोप एव बाध्येतेति** ॥ षष्ठस्य चतुर्थपादे अतो लोप इति सूत्रम् । सप्तमस्य द्वितीयपादे अतो येयेति सूत्रम । सप्तमस्य चतुर्थपादे तु अतो दीर्घो यञीति सूत्रमिति स्थितिः । तत्र आशीर्लिङि आर्धधातुके चिकीर्षयादित्यत्राल्लोपप्राप्त्या विधिलिङि तु भवयादित्यत्र अतो दीर्घप्राप्त्या च इयादेशस्य निरवकाशत्वेन बाध्यसामान्यचिन्तामाश्रित्यापवादतया तेन अन्यतरस्मिन् बाध्ये सति मद्ध्येऽपवादाः पूर्वान्विधीन् बाधन्ते नोत्तरानिति न्यायेनातो लोप एव बाधमर्हति । न तु अतो दीर्घ इत्यर्थः । एवञ्चार्धधातुके चिकीर्षयादिति स्थिते अतः परत्वादियादेशः प्रसज्येतेत्यतिव्याप्तिरस्यादिति स्थितम् । एवञ्चाव्याप्तिरपीत्याह । **भवेदित्यादाविति** ॥ अतः परस्य इयादेशविधौ सार्वधातुकग्रहणाननुवृत्तौ विधिलिङस्तिपि सार्वधातुके भव यादिति स्थिते इयादेशस्परत्वात् बाधित्वा अतो दीर्घो यञीति यञादौ सार्वधातुके परे अतो विधीयमानो दीर्घस्स्यात् । ततश्च अतः परत्वाभावादियादेशो न स्यादित्यव्याप्तिरस्यादित्यर्थः । नच इयादेशस्य निरवकाशत्वात् दीर्घबाधकत्वं शङ्क्यम् । चिकीर्ष्यादित्यार्धधातुके दीर्घप्राप्त्ययोग्ये इयादेशस्य सावकाशत्वादिति भावः । **भवेतामिति** ॥ तसस्तामादेशे शपि गुणे अवादेशे यासुडागमे सुटि सकारद्वयलोपे या

२२१३। झेर्जुस्। (३-४-१०८)

लिङो झेर्जुस् स्यात्। ज इत्।

२२१४। उस्यपदान्तात्। (६-१-९६)

अपदान्तादवर्णादुसि परे पररूपमेकादेशः स्यात्। इति प्राप्ते। परत्वान्नित्यत्वाच्च 'अतो येयः' (२२१२) इति प्राप्तः। यद्यप्यन्तरङ्गत्वात्पररूपं न्याय्यं। तथाति 'यास्' इत्येतस्य 'इय्' इति व्याख्येयम्। एवं च सलोपस्यापवाद

इत्यस्य इयादेशे आद्गुणे यलोपः। अथ लिङो झेर्झोन्त इति प्राप्ते। **झेर्जुसिति** ॥ लिङस्सीयुडित्यतो लिङ इत्यनुवर्तते। तदाह। **लिङो झेरिति** ॥ अनेकाल्त्वात्सर्वादेशः। **ज इदिति** ॥ जुसः स्थानिवत्त्वेन प्रत्ययत्वात् चुटू इति जकार इत्संज्ञक इत्यर्थः। उसि शपि गुणे अवादेशे यासुटि सकारलोपे भव या उसिति स्थिते इयादेशं बाधित्वा पररूप प्रवृत्तिं शङ्कितुमाह। **उसीति** ॥ एकः पूर्वपरयोरित्यधिकृतम्। आद्गुण इत्यस्मादादित्यनुवर्तते। एङि पररूपमित्यस्मात्पररूपमिति। तदाह। **अवर्णादुसीति** ॥ उसि यः अच् उकारः तस्मिन् परत इत्यर्थः। इको यणचीत्यतः अचीत्यनुवृत्तेः। यद्यपि उसः कृत्स्नस्याकारस्य च उसिलेकादेशेऽपि रूपन्तुल्यम्। तथापि अकस्सवर्णे दीर्घ इत्यादावुत्तरत्राचीत्यावश्यकमत्राप्यनुवर्तत इति बोद्धयम्। भिन्द्युरित्याद्युदाहरणम्। **इति प्राप्त इति** ॥ भव या उसित्यत्राकारस्योकारस्यचाद्गुणम्बाधित्वा एकस्मिन्नुकारे पररूपे प्राप्ते सतीत्यर्थः। सति च पररूपे पा इत्यस्याभावात् इय् न स्यादिति मन्यते। **परत्वादिति** ॥ पररूपापेक्षया इयादेशः परः नित्यश्च। अकृते कृते च पररूपे प्रवृत्तेः। कृते पररूपे य् इत्यस्यैकदेशविकृतन्यायेन एकादेशस्य पूर्वान्तवत्त्वेन वा इयादेशस्य निर्बाधत्वात्। ततश्च पररूपम्बाधित्वा इयादेशे भवेयुरिति रूपमिति प्राचीनाः मन्यन्त इत्यर्थः। ननु पररूपमङ्गाधिकारस्थत्वाभावात् अङ्गानपेक्षत्वात् अन्तरङ्गं। इयादेशस्तु आङ्गत्वात् प्रकृतिप्रत्ययोभयसापेक्षत्वात् बहिरङ्गम्। ततश्च परान्नित्यादपीयादेशात् पररूपस्यान्तरङ्गतया बलवत्त्वात् पररूपमेव इह स्यादिति शङ्कते। **यद्यपीति** ॥ परिहरति। **तथापीति** ॥ अतः यास् इयः इति पदच्छेदः। यासिति लुप्तषष्ठीकं पदम्। ततश्च अतः परस्य यासित्येतस्य इय् स्यादिति व्याख्येयमित्यर्थः। ननु लिङस्सलोपोऽनन्त्यस्येति सकारस्य लोपः इयादेशम्बाधित्वा नित्यत्वात् प्राप्नोतीति ततश्च यास् इत्यस्य इय् इति कथमित्यत आह। **एवञ्चेति** ॥ यासिति सकारान्तस्य इयादेशविधिसामर्थ्यादेव सकारलोपं बाधित्वा प्रागेव यासिति सकारान्तस्य इयादेशो भवतीत्यर्थः। तथा च सकारावस्थायां अवर्णात्परत्वाभावेन पररूपस्याप्रवृत्तिरिति भावः। ननु यदि या स् इयः इति च्छेदः, तदा सकारस्य रुत्वे, भोभगो इति यत्वे, लोपश्शाकल्यस्येति तस्य लोपे, अतो या इयः इति स्यात्। आद्गुणे कर्तव्ये यलोपस्यासिद्धत्वादित्यत आह।

इय्। 'अतो येयः' (२२१२) इत्यत्र तु सन्धिरार्षः। भवेयुः। भवेः। भवेतम्। भवेत। भवेयम्। भवेव। भवेम।

२२१५। लिङाशिषि। (३-४-११६)

आशिषि लिङस्तिङार्धधातुकसंज्ञः स्यात्।

२२१६। किदाशिषि। (३-४-१०४)

आशिषि लिङो यासुट् कित्स्यात्। 'स्कोः—' (३८०) इति सलोपः।

२२१७। कृति च। (१-१-५)

सन्धिरार्ष इति। आनेमुगिति सूत्रे भाष्ये तु अतो या इय इत्येव सूत्रपाठो लक्ष्यते। **भवेरिति**॥ सिपि, शपि, गुणः। अवादेशः। इतश्चेति इकारलोपः। यासुडागमः। सकारद्वयस्य लोपः। इयादेशः। आद्गुणः। यलोपः। रुत्वविसर्गौ। एवं थसः तमादेशे थस्य तादेशे च, भवेतम्। भवेतेति च रूपम्। **भवेयमिति**॥ मिपि अमादेशः। शप्। गुणः। अवादेशः। यासुट्। सलोपः। इयादेशः। आद्गुणः। **भवेवेति**॥ वस् शप् गुणावादेशौ। निलिङ्ङित इति सकारलोपः। यासुट्। सलोपः। इयादेशः। आद्गुणः यलोपः। एवं मसि भवेमेति रूपम्। **इति विधिलिङ् प्रक्रिया॥ अथाशीर्लिङि विशेषमाह। लिङाशिषीति**॥ लिङिति लुप्तषष्ठीकं पदम् तिङ्शित्सार्वधातुकमित्यतस्तिङित्यनुवर्तते। तदाह। **आशिषिलिङस्तिङिति**। सार्वधातुकसंज्ञापवादोऽयम्। ततश्च सार्वधातुकसंज्ञाकार्यं शबादि न भवति। **किदाशिषीति**॥ लिङस्सीयुडित्यतः लिङ इत्यनुवर्तते। यासुट् परस्मैपदेष्वित्यतः यासुडिति च। तदाह। **आशिषि लिङ इति**॥ यासुट् परस्मैपदेष्विति ङित्वस्यापवादः। यद्यपि ङित्त्वेनैव गुणनिषेधस्सिध्यति। तथापि इज्यादिलादौ वाचिस्वपियजादीनां किदीति सम्प्रसारणाद्यर्थं कित्वमावश्यकम् इह न्याय्यत्वादुपन्यस्तम्। अथ आशिषि लिङस्तिपि आर्धधातुकत्वात् शबभावे इतश्चेतीकारलोपे यासुडागमे अतः परत्वाभावात् सार्वधातुकत्वाभावाच्च इयादेशाभावे सुटि भूयास् स् त् इति स्थिते प्रक्रियामाह। **स्कोरिति। सलोप इति**॥ लिङस्सलोप इत्यस्य सार्वधातुकविषयत्वात् स्कोरिति सुटः पदान्तसंयोगादित्वात् लोपः। ततः यासुटस्सस्यापि पदान्तसंयोगादित्वादेव लोपः। न तु झल्परसंयोगादित्वेन यासुटस्सस्य लोपे सुटः सस्य पदान्तसंयोगादित्वाल्लोप इति युक्तम्। तथासति झल्परसंयोगादिलोपस्यासिद्धत्वेन संयोगान्तलोपापत्तेः। भ्रष्ट इत्यादौ सावकाशस्य झल्परसंयोगादिलोपस्य संयोगान्तलोपाबाधकत्वादिति शब्दरत्ने विस्तरः। एवं च भूयास् स् त् इति स्थिते सकारद्वयस्य निवृत्तौ भूयादिति रूपम्। तत्र सार्वधातुकार्धधातुकयोरिति गुणे प्राप्ते। **किङिति चेति**॥ गकङ् एषां समाहारद्वन्द्वः कात्पूर्वं गकारस्य चर्त्वेन निर्देशात् गकङ् च इत् यस्येति विग्रहः। द्वन्द्वान्ते श्रूयमाण इच्छब्दः प्रत्येकमन्वेति। तथा च गिति किति

गित्किन्ङिन्निमित्त इग्लक्षणे गुणवृद्धी न स्तः । भूयात् । भूयास्ताम् । भूयासुः । भूयाः । भूयास्तम् । भूयास्त । भूयासम् । भूयास्व । भूयास्म ।

२२१८ । लुङ् । (३-२-११०)

भूतार्थवृत्तेर्धातोर्लुङ् स्यात् ।

२२१९ । माङि लुङ् । (३-३-१७५)

सर्वलकारापवादः ।

ङिति चेति लभ्यते । निमित्तसप्तम्येषा । इको गुणवृद्धी इत्यनुवर्तते । चकार इत्यर्थे । इक इत्युच्चार्य विहिते इति लभ्यते । न धातुलोप आर्धधातुक इत्यतः नेत्यनुवर्तते । तदाह । **गित्किन्ङिन्निमित्ते इत्यादिना** ॥ गितीत्यनुक्तौ तु ग्लाजिस्थश्च ग्स्नुरिति ग्स्नुप्रत्यये जिष्णुरित्यत्र गुणनिषेधो न स्यात् । न च ग्स्नुप्रत्ययः किदेव कियतामिति वाच्यम् । तथा सति घुमास्थेति किति विहितस्य ईत्वस्य प्रसङ्गात् । यदितु गिति किति ङिति परतो गुणवृद्धी न स्तः इति व्याख्यायेत, तदा च्छिन्नं भिन्नमित्यत्र क्तप्रत्यये परे लघूपधगुणनिषेधो न स्यात् । स्थानिभूतस्येकः हला व्यवधानात् । नच येननाव्यवधानन्यायश्शङ्क्यः । चितंस्तुतमित्यादावव्यवहिते चरितार्थत्वात् । यदि च इको न गुणवृद्धी इत्येव व्याख्यायेत न त्विग्लक्षणे इति, तदा लिगोरपत्यं लैगवायनः, नडादित्वात् फक्, इह आदिवृद्धेरार्गुणस्य च वस्तुगत्या इक्स्थानिकत्वात् निषेधस्स्यादित्यलम् । **भूयादिति** ॥ इदार्धधातुकत्वाल्लिङस्सलोप इत्यस्याप्रवृत्तेः स्कोरिति सलोप इत्युक्तम् न विस्मर्तव्यम् । न चैवमपि संयोगादिलोपस्यासिद्धत्वाद्धलङ्यादिलोपः स्यादिति वाच्यम् । सुटि यासुटि च सति ताभ्यां विशिष्टस्यैव प्रत्ययत्वेनापृक्तत्वाभावादित्यलम् । **भूयास्तामिति** ॥ आशिषि लिङस्तसस्तामादेशे आर्धधातुकत्वात् शबभावे यासुडागमे अतः परत्वाभावादियादेशाभावे सुटि झल्परसंयोगादित्वेन यासुटस्सकारस्य लोपः गुणनिषेधश्च । **भूयासुरिति** ॥ झेर्जुसि यासुडागमे गुणनिषेधे रूपम् । **भूया इति** ॥ आशीर्लिङस्सिपि इतश्चेतीकारलोपः यासुटः स्कोरिति सलोपः, गुणनिषेधः, रुत्वविसर्गौ । **भूयास्तमिति** ॥ थसस्तमादेशे यासुटि गुणनिषेधः । एवं थस्य तादेशेऽपि भूयास्तेति रूपम् । **भूयासमिति** ॥ मिपः अमादेशे यासुटि गुणनिषेधः । **भूयास्वेति** ॥ लिङो वस् निवं ङित इति सकारलोपः । यासुट् । गुणनिषेधः । एवं मसि भूयास्मेति रूपम् । **इत्याशीर्लिङ् प्रक्रिया । लुङिति** ॥ धातोरिति भूत इति चाधिकृतम् । तदाह । **भूतार्थवृत्तेरिति । माङि लुङिति** ॥ माङि प्रयुज्यमाने धातोर्लुङ् स्यादित्यर्थः । ननु लुङ् इत्युदाहृतसूत्रेणैव सिद्धेः किमर्थमिदमित्यत आह । **सर्वलकारापवाद इति** ॥ मास्त्विल्यादौ तु मा इत्यव्ययान्तरं प्रतिषेधार्थकमित्याहुः । आङ् माङोश्चेति सूत्रभाष्ये तु ङितो माशब्दस्य निर्देशात् प्रमाच्छन्द इत्यत्र न भवतीत्युक्तम् । माशब्दस्याव्ययान्तरस्य सत्त्वे तु तदेवोदाहृतं । मास्त्वित्यत्र

२२२० । स्मोत्तरे लङ् च । (३-३-१७६)

स्मोत्तरे माङि लङ् स्याल्लुङ् च ।

२२२१ । च्लि लुङि (३-१-४३)

शबाद्यपवादः ।

२२२२ । च्लेः सिच् । (३-१-४४)

इचावितौ ।

२२२३ । गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु । (२-४-७७)

एभ्यः सिचो लुक्स्यात् । गापाविहेणादेशपिबती गृह्येते ।

२२२४ । भूसुवोस्तिङि । (७-३-८८)

'भू' 'सू' एतयोः सार्वधातुके तिङि परे गुणो न स्यात् ।

२२२५ । अस्तिसिचोऽपृक्ते । (७-३-९६)

तु अस्त्विति विभक्तिप्रतिरूपकमव्ययमित्यन्ये । **स्मोत्तर इति** ॥ चकारात् माङि लुङित्यनुकृष्यते । स्म इत्यव्ययं उत्तरं यस्मादिति विग्रहः । तदाह । **स्मोत्तरे माङीति** ॥ अयमपि सर्वलकारापवादः । **च्लिलुङीति** ॥ च्लि इति लुप्तप्रथमाकं लुङि परे धातोः च्लिप्रत्ययः स्यादित्यर्थः । **शबाद्यपवाद इति** ॥ आदिना श्यनादिविकरणसंग्रहः । **च्लेस्सिजिति । इताविति** ॥ चित् स्वरार्थित्वस्य प्रयोजनं । इदित्त्वस्य तु अमंस्तेत्यत्र अनिदितां हल उपधाया इत्युपधालोपस्याप्रवृत्तिः प्रयोजनम् । **गातिस्थेति** ॥ गाति स्था घु पा भू एषां द्वन्द्वात् षष्ठीबहुवचनम् । परस्मैपदेषु इति शेषः । सिच इति षष्ठी । गातीति श्तिपा निर्देशात् गाधातोर्ग्रहणम् । घु इत्यनेन दाधाघ्वदाबिति घुसंज्ञकयोः दाधातोर्धाधातोश्च ग्रहणम् । ण्यक्षत्रियार्षञितो यूनिलुगणिञोरित्यस्माद्गणबहिताद्पि लुगित्यनुवर्तते । जुहोत्यादिभ्यः श्लुरित्यव्यवहितमपि श्लुग्रहणं नानुवर्तते । व्याख्यानात् । तदाह । **एभ्यस्सिच इत्यादिना । गापाविहेति** ॥ इह गातिस्थेति सूत्रे गातीत्यनेन पाग्रहणेन च इणो गालुङीति लुग्विकरणस्येणो गादेशः शब्विकरणः पिबादेशयोग्यः पाधातुश्च गृह्येते इत्यर्थः । गापोर्ग्रहणे इण्पिबत्योर्ग्रहणमिति भाष्यादिति भावः । तथाच लुङस्तिबादेशे इतश्चेति इकारलोपे शबपवादे च्लिप्रत्यये तस्य सिचि तस्य लुकि अडागमे अभूत् इति स्थिते पित्त्वात् ङित्त्वाभावे सार्वधातुकार्धधातुकयोरिति गुणे प्राप्ते । **भूसुवोरिति** ॥ मिदेर्गुण इत्यतो गुण इति, नाभ्यस्तस्याचि पितीत्यतो नेति सार्वधातुक इति चानुवर्तते । तदाह । **एतयोरिति** ॥ भू सू इत्यनयोरित्यर्थः । इह षूङ् प्राणिगर्भविमोचन इति लुग्विकरणस्यैव ग्रहणम् । न तु सुवति सूयत्योरश्नविकरणश्यन्विकरणयोरपि । तत्र तिङो विकरणेन व्यवधानात् । अथ अभूत् इत्यत्र तकारस्येडागममाशङ्कितुमाह । **अस्ति सिच इति** ॥ अस्तिश्च सिचेति समाहारद्व-

'सिच् च 'अस्' चेति समाहारद्वन्द्वः । सिच्छब्दस्य सौत्रं भत्वम् । अस्तीत्यव्ययेन कर्मधारयः । ततः पञ्चम्याः सौत्रो लुक् । विद्यमानात्सिचोऽस्तेश्च परस्यापृक्तहल ईडागमः स्यात् । इति ईट् न। इह सिचो लुप्तत्वात् । अभूत् । 'हलः' किम् ऐधिषि । 'अपृक्तस्य' इति किम् । ऐधिष्ट । अभूताम् ।

२२२६ । सिजभ्यस्तविदिभ्यश्च । (३-४-१०९)

सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्संबन्धिनो झेर्जुस् स्यात् । इति प्राप्ते ।

२२२७ । आतः । (३-४-११०)

न्द्वात् पञ्चमी । द्रुव ईडित्यत ईडित्यनुवर्तते । तस्मादित्युत्तरस्येति परिभाषया पञ्चमी । अपृक्तस्येति षष्ठीं प्रकल्पयति । ततश्च अस्तेस्सिचश्च परस्यापृक्तस्य ईडागमस्स्यादिति प्राचीना व्याचक्षते । तथा सति लुङि अस्तेर्भूभावे अभूदिति न स्यात् । भूभावस्य स्थानिवत्त्वेन अस्तितया तत्रापृक्तस्य हल ईडागमस्य दुर्वारत्वात् । तथा अगात् अस्थात् अपादित्यादावपि गातिस्थेति सिचो लुक्यपि स्थानिवत्त्वेन सिचः परत्वादीडागमस्स्यात् । अतः प्रकारान्तरेण व्याचष्टे। **सिच्च अस् चेत्यादिना** ॥ ननु सिचस् शब्दे सिच्शब्दस्य पूर्वखण्डस्यान्तर्वर्तिविभक्त्या पदत्वाच्चोः कुरिति कुत्वप्रसङ्ग इत्यत आह । **सिच्शब्दस्य सौत्रं भत्वमिति** ॥ तथा च भत्त्वेन पदत्त्वस्य बाधान्नकुत्त्वमिति भावः । ननु सिचस्शब्दे अस् इत्यनेनैवास्तेलीभात् अस्तिग्रहणं किमर्थमित्यत आह । **अस्तीत्यव्ययेन कर्मधारय इति** ॥ अस्तीति विभक्तिप्रतिरूपकमव्ययं । लुप्तसुब्विभक्तिकं विद्यमानार्थकं । तेन सिचस्शब्दस्य कर्मधारय इत्यर्थः । तथा च अस्तिसिचस् इत्येकं पदमिति स्थितं । **ततः पञ्चम्यास्सौत्रो लुगिति** ॥ सुपां सुलुगित्यनेनेति शेषः । तथा च अस्ति सिच इति पदात् लब्धार्थमाह । **विद्यमानात्सिचोऽस्तेश्च परस्येति। हल इति** ॥ उतो वृद्धिर्लुकि हलीत्यतोऽनुवृत्तस्य हलीत्यस्य षष्ठ्या विपरिणाम इति भावः । **इतीट् नेहेति** ॥ अनेन सूत्रेण अभूत् इत्यत्र ईडागमो नेत्यर्थः । कुत इत्यत आह । **सिचो लुका लुप्तत्वादिति** ॥ विद्यमानत्वविशेषणेन लुप्तात्सिचः परस्य नेति भावः । एवञ्च । अगादित्यादावपि लुप्तात्सिचः परस्य अस्तेर्लुङि कृतभूभावात्परस्य च नेत्युक्तप्रायम् । **ऐधिषीति**॥ एधधातोर्लुङि उत्तमपुरुषैकवचनं । इट् । अत्र इकारस्य सिचः परत्वेऽपि हल्त्वाभावात् ईडागमो नेति भावः । **ऐधिष्टेति** ॥ एधधातोर्लुङि प्रथमपुरुषैकवचनम् । अत्र त इत्यस्य सिचः परत्वेऽपि एकाल्प्रत्ययत्वाभावेनापृक्तत्वाभावात् ईडागमो नेति भावः । **अभूतामिति**॥ लुङस्तसि तस्य तामादेशः । च्लेःसिच् । अट् । गुणनिषेधः । **सिजभ्यस्तेति** ॥ झेर्जुसिति सूत्रमनुवर्तते । नित्यङ्ङित इत्यतः ङित इति च । तदाह । **सिचोऽभ्यस्तादित्यादिना । इति प्राप्त इति** ॥ लिङो झेर्जुसिति शेषः । **आत इति** ॥ झेर्जुसिति सूत्रमनुवर्तते । आतस्सिज्लुगन्तादिति वक्तव्यमिति वार्तिकं भाष्ये पठितम् । ततश्च सिज्लुकि यदाकारान्तं तस्मात्परस्य झेर्जुसिति

सिज्लुक्यादन्तादेव झेर्जुस् स्यात् । अभूवन् । अभूः । अभूतम् । अभूत । अभूवम् । अभूव । अभूम ।

२२२८ । न माङ्योगे । (६-४-७४)

अडाटौ न स्तः । मा भवान् भूत् । मास्म भवन् भूद्वा ।

२२२९ । लिङ्निमित्ते लृङ् क्रियातिपत्तौ । (३-३-१३९)

हेतुहेतुमद्भावादिलिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात्क्रियाया अनिष्पत्तौ गम्यमानायाम् । अभविष्यत् । अभविष्यताम् । अभविष्यन् । अभविष्यः । अभविष्यतम् । अभविष्यत । अभविष्यम् । अभविष्याव । अभविष्याम ।

लभ्यते । सिजभ्यस्तेति पूर्वसूत्रेणैव सिद्धे नियमार्थमिदम् । तदाह । **सिज्लुक्यादन्तादेवेति । अभूवन्निति** ॥ झिः च्लिः सिच् लुक् अट् झोन्तः इतश्चेति इकारलोपः । तकारस्य संयोगान्तलोपः । भुवो वुग्लुङ्लिटोरिति वुक् । सिज्लुकि आतः परस्मैपदेति नियमात् सिजभ्यस्तेति न जुसिति भावः । **अभूरिति** ॥ सिप् च्लिः सिच् लुक् अट् रुत्वविसर्गौ । **अभूतमिति** ॥ थसस्तम् । च्लेस्सिजादेशः । सिज्लुक् । अट् । गुणनिषेधः । एवं थस्य तादेशे अभूतेति रूपम् । **अभूवमिति** ॥ मिप् अम् च्लिः सिच् लुक् अट् वुक् । **अभूवेति** ॥ वस् च्लिः सिच् लुक् अट् निलाङ्डित इति सकारलोपः गुणनिषेधः । एवं मसि अभूमेति रूपम् । अथ माङि लुङि विशेषमाह । **न माङ्योग इति** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **अडाटौ न स्त इति** ॥ लुङ् लङ् लृङ्क्ष्वडुदात्त इत्यतः, आडजादीनामित्यतश्च, तदनुवृत्तेरिति भावः । **मा भवान् भूदिति** ॥ माभूदित्यत्र अडागमे सति अर्साति च विशेषाभावात् भवत्पदस्य मध्ये प्रयोगः । अथ स्मोत्तरे लङ्चेत्यस्य उदाहरणति । **मास्मभवद्भूद्वेति** ॥ एवं बहुवचने मास्म भवन् मास्म भूवन्निति चोदाहरणम बोद्धयम । **इति लृङ् प्रक्रिया** ॥ **लिङ्निमित्त इति । हेतुहेतुमद्भावादीति** ॥ हेतुहेतुमतोर्लिङ् । इच्छार्थेषु लिङ्लोटावित्यादिलिङ्निमित्तं लकारार्थप्रक्रियायां स्पष्टीभविष्यति । **भविष्यदर्थ इति** ॥ भविष्यति मर्यादावचन इत्यतः तदनुवृत्तेरिति भावः । क्रियातिपत्तिपदं व्याचष्टे । **क्रियाया अनिष्पत्ताविति** ॥ सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत् । इत्युदाहरणम बोध्यम् । **अभविष्यदिति** ॥ लृङ् तिप् इतश्चेतीकारलोपः । स्यतासी लृलुटोरिति शबपवादः स्यप्रत्ययः । वलादिलक्षणः इट् । गुणावादेशौ । षत्वम् । **अभविष्यतामिति** ॥ तसस्तामादेशः । स्यः अट् इट् गुणावादेशौ षत्वम् । **अभविष्यन्निति** ॥ झिः स्यः अट् इट् गुणावादेशौ । झोऽन्तः इति झेरन्तादेशः इतश्चेतीकारलोपः । तकारस्य संयोगान्तलोपः । षत्वम् । **अभविष्य इति** ॥ सिप् स्यः अट् इट् गुणः अवादेशः इतश्चेतीकारलोपः षत्वम् । रुत्वविसर्गौ । **अभविष्यतमिति** ॥ थसस्तमादेशः स्यः अट् इट् गुणावौ षत्वम् । एवं थस्य तादेशादि पूर्ववत् । **अभविष्यमिति** । मिप् अम् स्यः अट् इट् गुणावौ इतश्चेतीकारलोपः ।

२२३०। ते प्राग्धातोः। (१-४-८०)

ते गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोक्तव्याः।

२२३१। आनि लोट्। (८-४-१६)

उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्यानीत्यस्य नस्य णः स्यात्। प्रभवाणि।

दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः।

दुःस्थितिः। दुर्भवानि।

अन्तः शब्दस्यांकिविधिणत्वेषूपसर्गत्वं वाच्यम्।

अन्तर्धा। अन्तर्धिः। अन्तर्भवाणि।

२२३२। शेषे विभाषाऽकखादावषान्त उपदेशे। (८-४-१८)

उपदेशे कादिखादिषान्तवर्जे गदनदादेरन्यस्मिन्धातौ पर उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा स्यात्। प्रणिभवति—प्रनिभवति। इहोपसर्गाणामसमस्तत्वेऽपि संहिता नित्या। तदुक्तम्—

षत्वम्। **अभविष्यावेति** ॥ वस् स्यः अट् इट् नित्यं ङित इति सकारलोपः। अतो दीर्घः। षत्वम्। एवं मसि अभविष्यामेति रूपम्। **इति लङ्प्रक्रिया** ॥ अथ प्रसङ्गादाह। **ते प्रागिति** ॥ ते इत्यस्य विवरणम्। **गत्युपसर्गसंज्ञा इति** ॥ उपसर्गाः क्रियायोगे गतिश्चेति प्रकृतत्वादिति भावः। **प्रागेवेति** ॥ न परतः नापि व्यवहिता इत्यर्थः। इह धातोः प्रागेव प्रयुज्यमाना गत्युपसर्गास्स्युरिति संज्ञानियमपक्षोऽपि भाष्ये स्थितः। **आनि लोडिति** ॥ लोडिति आनीति च लुप्तषष्ठीकम् पदम्। रषाभ्यां णो न इत्यनुवर्तते। उपसर्गादसमासेपीत्यतः उपसर्गादिति च। तदाह। **उपसर्गस्थान्निमित्तादिति** ॥ रेफषकारात्मकादित्यर्थः। असमानपदत्वार्थ आरम्भः। अट्कुप्वाङ्नुम्व्यवायेपीति सूत्रं णत्वप्रकरणे सर्वत्र भवतीति भाष्यम्। **दुरः षत्वेति**। षत्वणत्वयोः कर्तव्ययोः दुर उपसर्गत्वप्रतिषेध इत्यर्थः। **दुःस्थितिरिति**। अत्रोपसर्गात् सुनोतीति षत्वं न भवति। **दुर्भवानीति**। अत्रानि लोटि णत्वन्न भवति। **अन्तश्शब्दस्येति** ॥ अङ्विधौ किविधौ णत्वे च कर्तव्ये अन्तर् इत्यस्य उपसर्गत्वमित्यर्थः। प्रादित्वाभावादप्राप्ते वचनम्। **अन्तर्धेति** ॥ स्त्रियामित्यधिकारे धाधातोः आतश्चोपसर्गे इत्यङ्। टाप्। **अन्तर्धिरिति** ॥ उपसर्गे घोः किः। **अन्तर्भवाणीति** ॥ आनि लोडिति णत्वम्। **शेषे विभाषेति** ॥ अकखादाविति च्छेदः। नेर्गदनदेति पूर्वसूत्रोक्तधातुभ्योऽन्यश्शेषः। तदाह। **गदनदादेरन्यस्मिन्निति** ॥ ननु णत्वप्रकरणं संहिताधिकारस्थं ततश्चाविवक्षितायां संहितायां उपसर्गात्परत्वाभावात् णत्वाभावः। विवक्षितायान्तु णत्वमिति विकल्पसिद्धेः किमिह विभाषाग्रहणेनेत्यत आह। **इहोपसर्गाणामिति। उक्तमिति** ॥

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या ममासे वाक्ये तु सा विवक्षामपेक्षते ॥

इति । सत्ताद्यर्थनिर्देशश्चोपलक्षणम् । यागात्स्वर्गो भवतीत्यादावुत्पद्यत इत्याद्यर्थात् । उपसर्गास्त्वर्थविशेषस्य द्योतकाः । प्रभवति । पराभवति । सम्भवति । अनुभवति । अभिभवति । उद्भवति । परिभवतीत्यादौ विलक्षणार्थावगतेः । उक्तं च—

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥ इति ।

। 'एध २ वृद्धौ' । कत्थन्ताः षट्त्रिंशदनुदात्तेतः ।

२२३३ । टित आत्मनेपदानां टेरे । (३·४·७९)

टितो लस्यात्मनेपदानां टेरेत्वं स्यात् । एधते ।

हरिणेति शेषः । अत्र एकपद इत्यनेन अखण्डं पदं विवक्षितम् । नित्यसमास इति लिङ्गात् । अखण्डत्वञ्च पदभिन्नोत्तरखण्डत्वम् । तथा राजीयतीत्यादौ अतो गुण इति यणा पररूप एकादेशः पक्षे न स्यात् । **अर्थनिर्देशश्चेति** ॥ धातुपाठे भू सत्तायामित्यायर्थनिर्देश इत्यर्थः । **उपलक्षणमिति** ॥ प्रदर्शनमात्रमित्यर्थः । नन्वर्थान्तरपरिसङ्ख्या कुतो न स्यादित्यत आह । **यागादिति** ॥ ननु यागात् स्वर्गो भवतीत्यादौ उत्पत्यादौ लक्षणा कुतो न स्यादिति वाच्यम् । प्रयोगप्राचुर्यसत्वात् । पाणिनिर्हि धातुपाठे धातून् कांश्चिदर्थसहितान् कांश्चिदर्थरहितान् पठतीति चुटू इति सूत्रभाष्ये स्थितम् । न चातिप्रसङ्गदशायाम् । अनेकार्था अपि धातवो भवन्तीति भाष्ये अपिशब्देन प्रयोगानुसारित्वावगतेः । सर्वेषु धातुष्वर्थनिर्देशस्त्वाधुनिकः । एवञ्च सेधतेर्गताविति सूत्रे गतावित्युपादानात् पिधगत्यामित्यर्थनिर्देशः अप्राणिनीय एवेति दिक् । ननु भूधातोः केवलस्योत्पत्याद्यर्थकत्वे उद्भवतीत्यादौ उपसर्गो व्यर्थो इत्यत आह । **उपसर्गास्त्विति** ॥ उपसर्गं विनाऽपि भूधातोरुत्पत्याद्यर्थप्रतीतेः उद्भवतीत्यादौ प्रयुज्यमाना अप्युपसर्गा द्योतका एव न तु वाचका इति भावः । द्योतकत्वं वा तेषां किमर्थं स्वीकार्यमित्यत आह । **प्रभवतीत्यादि** ॥ प्रभवः प्रकाशः उत्पत्तिः शक्तिर्वा । सम्भवः सम्भावना । पराभवः पराजयः । अनुभवः उपभोगः । अभिभवः हिंसा । उद्भवः उत्पत्तिः । परिभवः तिरस्कारः । **उक्तञ्चेति** ॥ हरिणेति शेषः । प्रहारः कशाद्याघातः । आहारो भक्षणम् । संहारः वधः । विहारः क्रीडा । परिहारः परित्यागः । **इति भूधातुप्रक्रिया ॥**

एधवृद्धाविति ॥ जायते, अस्ति, विपरिणमते, वर्धते; अपक्षीयते, विनश्यतीति षट् भाववविकाराः । तत्र चतुर्थावस्था वृद्धिः उपचयः । **कत्थन्ता इति** ॥ कत्थ श्लाघायामित्यन्ता इत्यर्थः । **अनुदात्तेत इति** ॥ ततश्च एतेभ्य आत्मनेपदमेवेति भावः । तत्र एध् इत्यस्मात् कर्तरि लटि तस्यात्मनेपदप्रथमपुरुषैकवचने तादेशे शपि एधत इति स्थिते । **टित इति** ॥ टेः एरिति च्छेदः लस्येत्यधिकृतम् । तदाह । **टितो लस्येति** ॥

२२३४। सार्वधातुकमपित्। (१-२-४)

अपित्सार्वधातुकं ङिद्वत्स्यात्।

२२३५। आतो ङितः। (७-२-८१)

अतः परस्य ङितामाकारस्य इय् स्यात्। एधेते। एधन्ते।

२२३६। थासः से। (३-४-८०)

टितो लस्य थासः से स्यात्। एधसे। एधेथे। एधध्वे। 'अतो गुणे' (१९१) एधे। एधावहे। एधामहे।

२२३७। इजादेश्च गुरुमतोऽनृच्छः। (३-१-३६)

इजादिर्यो धातुर्गुरुमानृच्छत्यन्यस्तत आम्स्याल्लिटि। 'आमो मकारस्य नेत्त्वम्'। आस्कासोराम्विधानाज्ज्ञापकात्।

शेषः। अत्रात्मनेपदशब्देन तदेव गृह्यते नत्वानोऽपि। तेन पचमानो यजमान इत्यादावेत्वं नेति भाष्ये स्पष्टम्। **एधत इति**॥ अत्र तकारादकारस्य व्यपदेशिवद्भावेनान्त्यादित्वेन टित्वादेत्वम्। अथ लटः प्रथमपुरुषद्विवचने आतामित्यादेशे टित आत्मनेपदानामिति आम एत्वे शपि एध आते इति स्थिते ङित्कार्यं वक्ष्यन् ङित्त्वमाह। **सार्वधातुकमपिदिति**॥ गाङ्कुटादिभ्य इत्यतो ङिदित्यनुवर्तते। अङितो ङित्त्वं वास्तवं न सम्भवतीति ङिद्वदिति लभ्यते। तदाह। **ङिद्वदिति। आतो ङित इति**॥ ङित इत्यवयवषष्ठी। अतो येय इत्यस्मात् अत इति पञ्चम्यन्तं, इय इति प्रथमान्तं चानुवर्तते। यकारादकार उच्चारणार्थः। तदाह। **अतः परस्येति**॥ ङितामित्यनन्तरं अवयवस्येति शेषः। **एधेते इति**॥ एध आते इति स्थिते, आकारस्य इय्, आद्गुणः, लोपो व्योर्वलीति यकारलोपइति भावः। **एधन्त इति**॥ लटः प्रथमपुरुषबहुवचने झादेशे परे शपि झकारस्य अन्तादेशे पररूपे टेरेत्वमिति भावः। अथ लटो मध्यमपुरुषैकवचने थासादेशे कृते टितआत्मनेपदानामित्येत्वे प्राप्ते। **थासस्स इति**॥ से इति लुप्तप्रथमाकम्। **एधस्स इति**॥ थासि शपि थासः सेभावः। **एधेथ इति**॥ लटो मध्यमपुरुषद्विवचने आथामादेशे शपि आम एत्वे आकारस्य इयादेशे गुणे यलोपे इति भावः। **एधध्व इति**॥ लटो मध्यमपुरुषबहुवचने ध्वमादेशे शपि टेरेत्वे रूपम्। लट उत्तमपुरुषैकवचने इडादेशे एत्वे शपि एध ए इति स्थिते प्रक्रियां दर्शयति। **अतो गुणे इति**॥ अतो गुण इति पररूपे वृद्ध्यपवादे कृते सति एधे इति रूपमित्यर्थः। **एधावह इति**॥ लट उत्तमपुरुषद्विवचने वहि इत्यादेशे टेरेत्वे शपि अतो दीर्घः। **एधामह इति**॥ लट उत्तमपुरुषबहुवचने महि इत्यादेशे टेरेत्वे शपि अतो दीर्घः। महिङिति ङकारस्तङ्प्रत्याहारार्थः। **इति लटप्रक्रिया**॥ **इजादेरिति**॥ नञः ऋच्छ इत्यनेन समासे अनृच्छ इत्यस्मात् पञ्चमी। धातोरेकाच इत्यतो धातोरित्यनुवर्तते। कास्प्रत्ययादित्यतः आमिति लिटीति चानुवर्तते। तदाह। **इजादि-**

२२३८। आमः। (२-४-८१)

आमः परस्य लेर्लुक्स्यात्।

२२३९। कृञ्चानुप्रयुज्यते लिटि। (३-१-४०)

आमन्ताल्लिट्परा: कृभ्वस्तयोऽनुप्रयुज्यन्ते । 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' (२२४०) इति सूत्रे कृञ्ग्रहणसामर्थ्यादनुप्रयोगोऽन्यस्यापीति ज्ञायते । तेन 'कृभ्वस्तियोगे–' (२११७) इत्यतः 'कृञो द्वितीय–' (२१२५) इति ञकारेण प्रत्याहाराश्रयणात्कृभ्वस्तिलाभः । तेषां क्रियासामान्यवाचित्वादाम्प्रकृतीनां

रित्यादिना । आस्कासोरिति ॥ कास् प्रत्ययादाममन्त्रे लिटीति, दयायासश्रीति च, कास धातोः, आस्धातोश्च, लिटि आम् विहितः । तत्र मकारस्य इत्संज्ञकत्वे सिदचोऽन्त्यात् पर इति आकारादाकारान्तरं स्यात् । ततश्च सवर्णदीर्घे कृते कास आस इत्येव भवतीति आं विधिरनर्थकस्स्यात् । अत आमो मकारस्य नेत्संज्ञेति विज्ञायते इत्यर्थः । तथाच एष आम ल इति स्थिते । **आम इति** ॥ मन्त्रे घसह्वरित्यतः लेरिति, ण्यक्षत्रियार्षञित इत्यतः लुगिति चानुवर्तते । तदाह । **आमः परस्य लेरिति** ॥ अत्रेदमवधेयम । कृन्मेजन्त इत्यत्र कृद्यो मान्तस्तदन्तमव्ययमिति व्याख्याने एधामित्यादि नाऽव्ययं, लिट एव कृत्त्वात तस्य च मान्तत्वाभावात् । तथाच प्रत्ययलक्षणेन कृदन्तत्वात् प्रातिपदिकत्वे स्वाद्युत्पत्तौ आम इति लुक् । लेरिति तु नानुवर्तते । मान्तं कृदन्तमव्ययमिति व्याख्याने तु प्रत्ययलक्षणेन कृदन्तत्वात् एधामिति मान्तमव्ययम् । ततस्सुबुत्पत्तौ अव्ययादाप्सुप इति लुक् । आम इत्यनेन तु परिशेषाल्लेरेव लुक्सिद्धेर्लेरिति नानुवर्तनीयम् । आमः परस्य लेरिति विवरणवाक्ये तु लेरिति स्पष्टार्थमेव । एवञ्च एधामित्यव्ययं नवेति पक्षद्वयं । उभयथाऽपि सुबन्तं पदमिति भाष्ये स्पष्टम् । **कृञ्चेति** ॥ कास्प्रत्ययादामित्यतः आमित्यनुवृत्तं षष्ठ्या विपरिणम्यते । प्रत्ययग्रहणपरिभाषया तदन्तं गृह्यते । लिटि परे यः कृञ् सः अनुप्रयुज्यत इत्यन्वयः । फलितमाह । **आमन्ताल्लिट्परा इति** ॥ लिट्शिरस्का इत्यर्थः । **कृभ्वस्तय इति** ॥ कृञित्यनेन कृभ्वस्तीनां ग्रहणमिति भावः । **अनुप्रयुज्यन्त इति** ॥ प्रशब्दादनुशब्दाच्चाऽव्यवहिताः पश्चात्प्रयुज्यन्त इत्यर्थः । विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थं चेति वार्तिकात् भाष्याच्च । एवञ्च तं पातयाम्प्रथममास पपात पश्चात् । प्रभ्रंशयां यो नहुषं चकारेत्यादि प्रयोगाः प्रामादिका एव । धातोराम् स्यात् । कृञ्चानुप्रयुज्यत इत्युक्तसमुच्चयार्थश्चकारः । **ननु** कृञ एवानुप्रयोगश्रवणात् कथं भ्वस्त्योरप्यनुप्रयोग इत्यत आह । **आम्प्रत्ययवदित्यादिना** ॥ कृञ्चानुप्रयुज्यत इत्यत्र कृञ एकस्यैवानुप्रयोगविधौ सति आम्प्रत्ययवदिति सूत्रे अनुप्रयुज्यमानस्येत्यस्य कृञ इति विशेषणं व्यर्थं स्यात् । धात्वन्तरस्यानुप्रयोगाप्रसक्तेः । **ततश्च कृञ इति** विशेषणादन्यस्यापि अनुप्रयोगो विज्ञायत इत्यर्थः । ननु कृञोऽन्यस्याप्यनुप्रयोगो विज्ञायताम्। भ्वस्त्योरपीत्येव कुत आयातमित्यत आह । **तेनेति** ॥ कृञ्ग्रहणेनेत्यर्थः । **प्रत्याहाराश्र-**

विशेषवाचित्वात्तदर्थयोरभेदान्वयः। सम्पदिस्तु प्रत्याहारेऽन्तर्भूतोऽप्यनन्वितार्थत्वान्न प्रयुज्यते। कृञस्तु क्रियाफले परगामिनि परस्मैपदे प्राप्ते।

२२४० । आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य । (१-३-६३)

आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः। आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोऽप्यात्मनेपदं स्यात्। इह 'पूर्ववत्' इत्यनुवर्त्य वाक्यभेदेन सम्ब-

---

यणादिति ॥ एतच्च भाष्ये स्पष्टम्। नन्वनुप्रयुज्यमानानां कृभ्वस्तीनां आम्प्रकृतिभूतानां कथमन्वय इत्यत आह। **तेषामित्यारभ्याभेदेनान्वय इत्यन्तेन** ॥ सामान्यविशेषयोरभेदान्वयस्य न्याय्यत्वादिति भावः। कृञ इव भ्वस्त्योरपि क्रियासामान्यवाचित्वात्। धातूनामनेकार्थत्वात् ज्ञेयम्। ननु कृभ्वस्तियोग इत्यस्य कृञो द्वितीयेत्यस्य च सूत्रस्य मध्ये 'अभिविधौ सम्पदा च' इति पठितम्। एवञ्च कृञप्रत्याहारे सम्पदोऽपि कुतो न ग्रहणमित्यत आह। **सम्पदिस्त्विति। अनन्वितार्थत्वादिति** ॥ सिद्धस्य वस्तुनो रूपान्तरापत्तिस्सम्पदेरर्थः। एधादिधातोस्त्वाम्प्रकृतिभूतस्य वृध्यादिरर्थः। तयोरुभयोरपि विशेषरूपत्वेन सामान्यविशेषभावाभावेन अभेदान्वयासम्भवादित्यर्थः। अत एव कृभ्वस्तीनां ग्रहणमिति भाष्यं सङ्गच्छत इति भावः। ननु आम्प्रत्ययवदिति कृञ आत्मनेपदविधायकसूत्रं वक्ष्यमाणं व्यर्थम्। स्वरितञित इत्येव तत्सिद्धेरित्याशङ्क्याह। **कृभ्वस्तीति। आम्प्रत्ययवदिति** ॥ अनुदात्तङित इत्यत आत्मनेपदमित्यनुवर्तते। तत्राम्प्रत्ययस्यात्मनेपदाभावादाह। **आम् प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिरिति** ॥ तस्य अन्यपदार्थस्य गुणाः विशेषणानि वर्तिपदार्थरूपाणि तेषां संविज्ञानं क्रियान्वयितया ज्ञानं न विद्यते यस्य बहुव्रीहेः सः अतद्गुणसंविज्ञानः। यथा चित्रगुमानयेति। अत्र हि पुरुषस्यैवान्यपदार्थस्य क्रियान्वयः। न तु चित्राणां गवामपि। तथा च प्रकृते आम् प्रत्ययविनिर्मुक्तः आम्प्रत्ययप्रकृतिभूतः एधादिधातुरेव आम्प्रत्ययशब्देन लभ्यत इति भावः। **आम्प्रत्ययवदिति** ॥ तृतीयान्ताद्वतिः। अनुप्रयुज्यत इत्यनुप्रयोगः। कर्मणि घञ्। पञ्चम्यर्थे षष्ठी। तदाह। **आम् प्रकृत्येत्यादिना** ॥ आम्प्रकृतेर्भवितुं योग्यं यदात्मनेपदं तत् अनुप्रयुज्यमानात् कृञोऽपि स्यादिति यावत्। अत्र न प्रत्याहारग्रहणम्। अनुप्रयोगस्येत्येव सिद्धे कृञ्ग्रहणादिह न प्रत्याहारग्रहणमिति भाष्यम्। परगामिन्यपि क्रियाफले कृञ्धातोरात्मनेपदार्थोऽयमारम्भः। इन्दाञ्चकारेत्यादौ तु परगामिनि क्रियाफलेनानेनात्मनेपदम्। आम्प्रकृतेः 'इदि परमैश्वर्ये' इति धातोरात्मनेपदाभावात् तस्य परस्मैपदित्वात् एतदर्थमेव आम्प्रत्ययवदित्युपात्तम्। नन्विन्दाञ्चकारेत्यादौ मास्त्वनेन सूत्रेण परगामिनि क्रियाफले आत्मनेपदम्। आत्मगामिनि तु क्रियाफले स्वरितञित इत्यात्मनेपदं दुर्वारम्। अस्य सूत्रस्य एधाञ्चक्र इत्यादौ परगामिनि क्रियाफले आत्मनेपदस्याप्राप्तस्य विधान एव समर्थतया आत्मगामिनि क्रियाफले स्वरितञित इति प्राप्तस्यात्मनेपदस्य निवारणे सामर्थ्याभावादित्यत आह। **इहेति** ॥ इह आम्प्रत्ययवत् कृञोऽनुप्रयोगस्येति सूत्रे 'पूर्ववत् सनः' इति पूर्वसूत्रात् पूर्ववदित्यनुवर्त्य

द्ध्यते । पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति। तेन कर्तृगेऽपि फले इन्दांचकारेत्यादौ न तङ् ।

२२४१ । लिटस्तझयोरेशिरेच्। (३-४-८१)

लिडादेशयोस्तझयोः 'एश्' 'इरेच्' एतौ स्तः । एकारोच्चारणं ज्ञापकं 'तङानावात्मनेपदं' इत्यत्र तङानौ तङादेशानां टेरेत्वं न' इति । तेन डारौरसां न । 'कृ' 'ए' इति स्थिते ।

२२४२ । असंयोगाल्लिट्कित् । (१-२-५)

असंयोगात्परोऽपिल्लिट्किित्स्यात्। 'क्ङिति च' (२२१७) इति निषेधान् 'सार्वधातुकार्धधातुकयोः' (२१६८) इति गुणो न । द्वित्वात्परत्वाद्यणि प्राप्ते ।

२२४३ । द्विर्वचनेऽचि । (१-१-५९)

आम्प्रत्ययवत् कृञोऽनुप्रयोगस्येत्येकं वाक्यं, पूर्ववत् कृञोऽनुप्रयोगस्येति अन्यदाक्यमिति, वाक्यद्वयं सम्पाद्यम् । तत्र पूर्ववदिति तृतीयान्ताद्वतिः । पूर्वेण पूर्वप्रयुक्तेन एधादिधातुना तुल्यमित्यर्थः । तत्र वाक्यद्वयस्य समानार्थकत्वे वैयर्थ्यात् द्वितीयं वाक्यं नियमार्थं सम्पद्यते । पूर्ववदेव आत्मनेपदं न तु तद्विपरीतमिति । एवञ्च पूर्ववाक्येन एधाञ्चक्रे इत्यादौ कृतः परस्मैपदिन्यपि क्रियाफले आत्मनेपदविधिः । द्वितीयवाक्येन तु इन्दाञ्चकारेत्यादौ कर्तृगामिनि क्रियाफले स्वरितञित इत्यात्मनेपदस्य निवृत्तिः फलति। तदाह । **तेनेति** ॥ द्वितीयवाक्येनेत्यर्थः । **नतङिति**॥ न आत्मनेपदमित्यर्थः । एवञ्चानुप्रयुज्यमानात्कृञः लिटस्तिप् प्रथमपुरुषैकवचनेन तादेशे एधाम् कृ त इति स्थिते । **लिटस्तझयोरिति** ॥ ननु लिटस्तझयोरेशिरेच्सूत्रेऽन्त्येचरतु। आदेशयोरेकारोच्चारणं व्यर्थम् । टित आत्मनेपदानामित्येत्वेनैव सिद्धेरित्यत आह । **एकारोच्चारणमिति** ॥ ज्ञापनस्य फलमाह । **तेन डारौरसाम्नेति** ॥ डा रौ रस णां नकारादेशभूतात्मनेपदादेशानां टेरेत्वन्नेत्यर्थः । वस्तुतस्तु परत्वादेत्वे कृते पुनःप्रसङ्गविज्ञानेन सादिषु कृतेषु लक्ष्ये लक्षणस्येति न्यायात् । **एत्वं नेति** ॥ लुटः प्रथमस्येति सूत्रभाष्ये स्पष्टम् । **कृ ए इति स्थित इति**॥ तकाराकारसंघातस्य एकारश्शित्वात् सर्वादेश इति भावः । **असंयोगादिति । अपिदिति**॥ सार्वधातुकमपिदित्यतस्तदनुवृत्तेरिति भावः । **सार्वधातुकमपिदिति** ॥ ङित्वन्तु नात्र प्रवर्तते । लिडादेशानामार्धधातुकत्वादिति बोध्यम् । किन्वस्य फलमाह । **किङ्निचेति । द्वित्वादिति**॥ कृ ए इति स्थिते । लिटि धातोरिति द्वित्वात् परत्वात् इको यणचीति ऋकारस्य यणादेशे रेफे प्राप्ते सतीत्यर्थः । कृते तु यणि एकान्त्वाभावात् लिटि धातोरिति द्वित्वम् न स्यादिति भावः । **द्विर्वचन इति** ॥ द्विरुच्यते येन परनिमित्तेन तत् द्विर्वचनं द्वित्वनिमित्तमिति यावत् । अचीत्यस्य विशेषणमिदम् । अचः परस्मिन्नित्यतः **अच इति** स्थानिवदादेश इत्यतः आदेश इति न पदान्तेत्यतः नेति चानुवर्तते । **द्विर्वचन इत्यावर्तते । एवञ्च द्वित्वे**

द्वित्वनिमित्तेऽचि परे अच आदेशो न स्याद्द्वित्वे कर्तव्ये ।

२२४४ । उरत् । (७-४-६६)

अभ्यासऋवर्णस्यात्स्यात्प्रत्यये परे । रपरत्वम् । 'हलादिः शेषः' (२१७९) । 'प्रत्यये' किम् । वव्रश्च ।

२२४५ । कुहोश्चुः । (७-४-६२)

अभ्यासकवर्गहकारयोश्चवर्गादेशः स्यात् । एधाञ्चक्रे । एधाञ्चक्राते । एधाञ्चक्रिरे ।

कर्तव्ये सतीत्यपि लभ्यते । तदाह । **द्वित्वनिमित्ते अचीत्यादिना** ॥ द्वित्वे कर्तव्ये सतीत्युक्तेः कृते द्वित्वे चक्रे इत्यादौ यणादयो भवन्ति । अन्यथा तु न स्युः । द्वित्वनिमित्तस्य अचस्मत्त्वात् । द्वित्वनिमित्त इति किम् । दुद्यूषति । दिव् धातोः सनि द्वित्वात्परत्वात् ऊठि कृते द्वित्वात्प्राग्यण् भवत्येव । तथा द्यु इत्यस्य द्वित्वे दुद्यूषतीति सिध्यति । द्वित्वे कर्तव्ये यणो निषेधे तु दिद्यूषतीत्यभ्यासे इकार एव श्रूयेत । नतृकारः । द्वित्वनिमित्त इत्युक्तौ तु ऊठि परे द्वित्वात् प्राक् यणो न निषेधः । ऊठो द्वित्वनिमित्तत्वाभावात् । अर्चीति किम् । जेघ्रीयते । अत्र घ्राधातोर्यङि द्वित्वात् प्राक् 'ई घ्राध्मोः' इति ईकारादेशो न निषिध्यते । ईत्वस्य द्वित्वनिमित्तयङ्निमित्तकत्वेऽपि द्वित्वनिमित्तान्नयङ्निमित्तकत्वाभावात् । अचः किम् । असूषुपत । इह स्वापेश्चङि द्वित्वात् प्राक् स्वापेश्चङीति वकारस्य सम्प्रसारणं न निषिध्यते । तस्याजादेशत्वाभावात् । ततश्च कृते सम्प्रसारणे सुप् इत्यस्य द्वित्वे अभ्यासे उकारस्य श्रवणं सम्भवति । सम्प्रसारणे निषिद्धे तु स्वप् इत्यस्य द्वित्वे अभ्यासे उकारो न श्रूयेत । एवञ्च प्रकृते यणादेशात् प्राक् लिटिधातोरिति द्वित्वे कृ कृ ए इति स्थिते । **उरदिति** ॥ उः अत इति च्छेदः । ऋ इत्यस्य उरिति षष्ठ्येकवचनम् । अत्र लोपोऽभ्यासस्येत्यस्मादभ्यासस्येत्यनुवर्तते । अङ्गस्येत्यधिकृतम् । तदुशात् प्रत्यये परत इति लभ्यते । प्रत्यये परत एव अङ्गसंज्ञाविधानात् । तदाह । **अभ्यासऋवर्णस्येत्यादिना । रपरत्वमिति** ॥ अभ्यासऋवर्णादेशस्याकारस्योरणपर इति रपरत्वमित्यर्थः । तथाच कर् कृ ए इति स्थिते, हलादिश्शेष इति रेफस्य निवृत्तिरिति भावः । **प्रत्यये किमिति**॥ अङ्गेनैव प्रत्ययस्याक्षिप्तत्वात् प्रत्यये परत इति किमर्थमित्यर्थः । **वव्रश्चेति** ॥ ओ व्रश्चू च्छेदने, लिटि णल् द्वित्वं लिव्यभ्यासस्येति अभ्यासरेफस्य सम्प्रसारणम् । ऋकारः । उरत् । रपरत्वम् । हलादिश्शेषः । वव्रश्चेति रूपम् । अत्र अभ्यासऋवर्णस्य रेफस्थानिकस्य सम्प्रसारणस्य यः उरदत्वसम्पन्नः अकारः तस्य अचःपरस्मिन्निति स्थानिवत्त्वेन सम्प्रसारणतया तस्मिन् परे वकारस्य न सम्प्रसारणे सम्प्रसारणमिति निषेधान्न सम्प्रसारणमिति स्थितिः । उरदित्यत्र प्रत्यये परत इत्यनुक्तौ तु सम्प्रसारणभूतऋकारस्थानिकस्य अकारस्य परनिमित्तकत्वाभावेन स्थानिवत्वाप्रसक्तेः सम्प्रसारणत्वाभावात्तस्मिन परतो न सम्प्रसारणे सम्प्रसारणमिति निषेधो न स्यादिति भावः । एवञ्च क कृ ए इति स्थिते । **कुहोश्चुरिति** ॥ कु हु इत्यनयोर्द्वन्द्वात् षष्ठीद्विवचनम् । अत्र लोपोऽभ्यासस्येत्यतः अभ्यासस्येत्यनुवर्तते । तदाह । **अभ्यासेति** ॥ यद्यपि स्थानिनां कव-

२२४६ । एकाच उपदेशेऽनुदात्तात् । (७-२-१०)

उपदेशे यो धातुरेकाजनुदात्तश्च ततः परस्य वलादेरार्धधातुकस्येड् न स्यात् ;

र्गीयाणां हकारस्य च षट्त्वात् चवर्गीयाणां पञ्चत्वान्न यथासंख्यम्, नापि स्थानेन आन्तर्यम्, कण्ठताल्वस्थानभेदात् । आभ्यन्तरप्रयत्नसाम्यं तु कवर्गचवर्गयोरविशिष्टम् । हकारचवर्गयोस्तु नास्त्येव तत् । अतो बाह्यप्रयत्नत एवान्तर्यमिह व्यवस्थापकमाश्रयणीयम् । तत्र प्रथमस्य कवर्गीयस्य प्रथम एव चवर्गीयो भवति । अघोषश्वासविवारालपप्राणप्रयत्नसाम्यात् । ननु द्वितीयः । महाप्राणत्वात् । नापि तृतीयपञ्चमौ । घोषसंवारनादप्रयत्नत्वात् । नापि चतुर्थः । घोषसंवारनादमहाप्राणप्रयत्नत्वात् । तथा द्वितीयस्य कवर्गीयस्य द्वितीय एव चवर्गीयो भवति । अघोषश्वासविवारमहाप्राणप्रयत्नत्वात् । ननु प्रथमः । अल्पप्राणत्वात् । नापि तृतीयपञ्चमौ । घोषसंवारनादालपप्राणप्रयत्नत्वात् । नापि चतुर्थः । अघोषसंवारनादप्रयत्नत्वात् । तथा तृतीयस्य कवर्गस्य तृतीय एव चवर्गीयो भवति । घोषसंवारनादालपप्राणप्रयत्नत्वात् । न तु प्रथमः । अघोषश्वासविवारप्रयत्नत्वात् । अत एव न द्वितीयोऽपि । महाप्राणप्रयत्नत्वाच्च । नापि चतुर्थः । महाप्राणत्वात् । नापि पञ्चमः । घोषसंवारनादालपप्राणसाम्येऽपि अनुनासिकतया भेदात् । तथा चतुर्थस्य कवर्गीयस्य चतुर्थ एव चवर्गीयो भवति । घोषसंवारनादमहाप्राणप्रयत्नत्वात् । न तु प्रथमः । अघोषश्वासविवारालपप्राणप्रयत्नत्वात् । नापि द्वितीयः । अघोषविवारश्वास-प्रयत्नत्वात् । नापि तृतीयपञ्चमौ । अल्पप्राणत्वात् । पञ्चमस्य तु कवर्गीयस्य अनुनासिकत्वात् ञकार एव । हकारस्य तु घोषसंवारनादमहाप्राणवतः तादृशो वर्गचतुर्थ एव झकार इति विवेकः । प्रकृते तु कक्ऋ ए इति स्थिते अभ्यासककारस्य चकारे ऋकारस्य यणि रेफः । तदाह । **एधाञ्चक्र इति** ॥ एककर्तृका भूतानद्यतनपरोक्षा वृद्धिरूपा क्रियेत्यर्थः । **एधाञ्चक्रात इति** ॥ कृञो लिटः आतामि टेरेत्वम् । द्विर्वचनेऽचीति यणि निषिद्धे कृ इत्यस्य द्वित्वे उरदत्वम् । हलादिशेषः । चर्त्वम् । यण् । न च आतामित्यस्य द्वित्वनिमित्तत्वेऽपि आकारस्याचो द्वित्वनिमित्तत्वाभावात् कथमिह द्विर्वचनेऽचीति यण निषेध इति वाच्यम् । साक्षाद्वा समुदायघटकतया वा द्वित्वप्रयोजकस्यैव द्वित्वनिमित्तशब्देन विवक्षितत्वादिति भावः । **एधाञ्चक्रिर इति** ॥ झस्य इरेच् । कृ इत्यस्य द्वित्वादि पूर्ववत् । अथ लिटि थासस्सेभावे कृ इत्यस्य द्वित्वादौ एधाञ्चक्र से इति स्थिते आर्धधातुकस्येड्वलादेरिति इडागमे प्राप्ते । **एकाच उपदेश इति** ॥ ऋत इद्धातोरित्यतः धातोरित्यनुवर्तते । नेड्वशिकृतीत्यतः नेति च । तदाह । **उपदेशे यो धातुरेकाजिति** ॥ एकः अच् यस्येति बहुव्रीहिः । **आर्धधातुकस्येति** ॥ यद्यपीदं न श्रुतम् । नाप्यनुवृत्तिलभ्यम् । तथाप्यार्थिकमिदम् । आर्धधातुकस्यैवेटः प्राप्तेः । वृत्तिग्रन्थे तु आर्धधातुकस्येति नोपात्तम् । नन्वेकाच उपदेशेऽनुदात्तादित्यत्र यदि उपदेश इत्येतदेकाच इत्यत्रान्वेति तदा कर्तुमित्यत्र इण्निषेधो न स्यात् । कृञ्धातोरूदृदन्तैरित्यादिना अनुदात्तत्वस्य वक्ष्यमाणत्वेऽपि तुमुन्प्रत्यये कृते ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वात् । यदि तु उपदेश इत्येतत् अनु-

'उपदेशे' इत्युभयान्वयि। 'एकाचः' इति किम्। यङ्लुग्व्यावृत्तिर्यथा स्यात्। स्मरन्ति हि—

> रितपा शपाऽनुबन्धेन निर्दिष्टं यद्गणेन च।
> यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि॥ इति।

एतच्चैवैकाज्ग्रहणेन ज्ञाप्यते। 'अचः' इत्येवैकत्वविवक्षया तद्वतो ग्रहणे सिद्धे एकग्रहणसामर्थ्यादनेकाच्कोपदेशो व्यावर्त्यते। तेन वर्धेर्हन्त्युपदेशे एकाचोऽपि न निषेधः। आदेशोपदेशेऽनेकाच्कत्वात्। अनुदात्ताश्चानुपदमेव संग्रहीष्यन्ते। एधांचक्रुषे। एधांचक्राथे।

दात्तादित्यनेनान्वेति। तदा यद्यपि नायं दोषः। कृते तुमुन्प्रत्यये उदात्तत्वेऽपि धातूपदेशकाले अनुदात्तत्वेन तत्र इण्निषेधस्य निर्बाधत्वात्। तथाच एधाञ्चक्रुषे इत्यादौ इण्निषेधो न स्यात्। द्वित्वे कृते अनेकाच्त्वादित्यत आह। **उपदेश इत्युभयान्वयीति॥** उपदेश इत्येतत् एकाजित्यत्रानुदात्तादित्यत्र चान्वेति। मध्यमणिन्यायादिति भावः। ननु ऊदृदन्तैरित्यादिना परिगणितानामनुदात्तोपदेशधातूनामेकाच्त्वाव्यभिचारादेकाज्ग्रहणं मास्तु। उपदेशेऽनुदात्तादित्येवास्तु। एतावतैव कर्तुं चक्रुष इत्यादाविण्निषेधसिद्धेरिति पृच्छति। **एकाचः किमिति। यङ्लुग्व्यावृत्तिरिति॥** यङ्लुकि चर्करीतेत्यादौ इण्निषेधव्यावृत्तये एकाज्ग्रहणमित्यर्थः। ननु कृतेप्येकाज्ग्रहणे कथं यङ्लुग्व्यावृत्तिः। कृते द्वित्वे अनेकाच्त्वेपि धातूपदेशे एकाच्त्वादित्यत आह। **स्मरन्ति हीति॥** प्राचीनाचार्या निबध्नन्तीत्यर्थः। रितपा शपेत्यादेरुदाहरणानि यङ्लुङ्निरूपणे स्पष्टीभविष्यन्ति। नन्विह एकाज्ग्रहणाद्यङ्लुकि इण्निषेधस्य व्यावृत्तावपि रितवादिनिर्दिष्टानां यङ्लुग्व्यावृत्तिः प्राचीनाचार्यसम्मताऽपि पाणिनेरसम्मतैवेत्यत आह। **एतच्चेति॥** एतत् रितपा शपेति श्लोकसिद्धं सर्वमपि, इह सूत्रे एकाज्ग्रहणेनैव एकदेशानुमत्या ज्ञाप्यत इत्यर्थः। ननु हनोवधलुङीति हनधातोर्वधादेशे कृते अवधीदित्यत्र इडागमो न स्यात्। वधादेशे कृते अनेकाच्त्वेऽपि धातूपदेशे हन्तेरेकाच्त्वादित्यत आह। **अच इत्येकत्वेत्यादि व्यावर्त्यत इत्यन्तम्॥** एकाच उपदेशेऽनुदात्तादित्यत्र हि एकग्रहणमपनीयाचइत्युक्तेऽपि एकाच्कादिति लभ्यते। एकवचनोपात्तस्यैकत्वस्य त्यागे प्रमाणाभावात्। न चैवं सति एकत्वविशिष्टादचः परस्यैत्येव लभ्येत। नत्वेकाच्कादिति बहुव्रीह्यर्थ इति वाच्यम्। अनुदात्तोपदेशपरिगणने शक्लृ पचि मुच्यादीनां परिगणनसामर्थ्येन अच इत्यस्य मत्वर्थलक्षणामाश्रित्य एकाज्वतो ग्रहणसंभवात्। तदेवमच इत्यनेनैव एकाच्कादिति सिद्धे यदेकग्रहणं करोति तत्सामर्थ्यादुपदेशे सर्वत्र एकाजेव न तु कस्मिंश्चिदप्युपदेशे अनेकाजित्यर्थकल्पनया कदाचिदनेकाच्कोपदेशधातुर्व्यावर्तत इत्यर्थः। **तेनेति॥** उपदेशे सर्वत्र एकाजेवेत्यर्थलाभेन हन्त्युपदेशे हनित्यनुदात्तोपदेशे एकाचोऽपि सतो हनिति धातोरादेशस्य वधेः परस्य इण् निषेधो नेत्यर्थः। कुत इत्यत आह। **आदे-**

२२४७ । इणः षीध्वंलुङ्लिटां धोऽङ्गात् । (८-३-७८)

इण्णन्तादङ्गात्परेषां षीध्वंलुङ्लिटां धस्य मूर्धन्यः स्यात् । एधाञ्चक्रुढ्वे । एधांचक्रे । **एधाञ्चक्रुवहे** । एधाञ्चक्रुमहे । एधाम्बभूव । अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न । अन्यथा हि 'क्रस्चानुप्रयुज्यते' इति 'कृभु–' इति वा ब्रूयात् ।

२२४८ । अत आदेः । (७-४-७०)

अभ्यासस्यादेरतो दीर्घः स्यात् । पररूपापवादः । एधामास । एधामासतुरित्यादि । एधिता । एधितारौ । एधितारः । एधितासे । एधितासाथे ।

शोपदेश इति ॥ अवधीदित्यत्रातोहलादेर्लघोरिति वृद्धिनिवृत्तये हनो वधादेशस्य अदन्ततया भाष्ये उक्तत्वादिति भावः । ननु के ते अनुदात्ता धातव इत्यत आह । **अनुदात्तास्वनुपदमेवेति** ॥ पदस्य पश्चादनुपदम् पदमात्रे अर्तीत्यर्थः । अनन्तरमेवेति यावत् । **एधाञ्चक्रुषे इति** ॥ इडभावे प्रत्ययावयवत्वात् षत्वम् । **एधाञ्चक्राथ इति** ॥ थिवः आथामादेशः । टेरेत्वम् । द्वित्वादि पूर्ववत् । लिटो ध्वमष्टेरेत्वे द्वित्वादौ एधाञ्चक्रे इति स्थिते । **इणः षीध्वमिति** ॥ षीध्वं लुङ् लिट् एषां द्वन्द्वः धः इति षष्ठ्येकवचनम् । इण इत्यत्र विशेषणम् । तदन्तविधिः । अपदान्तस्य मूर्धन्य इत्यधिकृतम् । तदाह । **इण्णन्तादित्यादिना** ॥ धकारस्य ढकारो मूर्धन्यः । घोषसंवारनादमहाप्राणप्रयत्नसाम्यात् । तदाह । **एधाञ्चकृढ्व इति** ॥ उत्तमपुरुषैकवचने इटि एत्वे पूर्ववत् द्वित्वादौ कृते रूपमाह । **एधाञ्चक्र इति । एधाञ्चकृवह इति** ॥ लिटो वहिभावे एत्वे द्वित्वादि पूर्ववत् । एवं लिटो महिभावे द्वित्वादि पूर्ववत् । सर्वत्रासंयोगाल्लिट्किदिति कित्वाद्गुणाभावः । अथ भूधातोः लिङन्तस्यानुप्रयोगे उदाहरति । **एधाम्बभूवेति** ॥ एधाञ्चक्रुरित्यनेन समानार्थकम् । अनुप्रयुज्यमानस्य भूधातोः क्रियासामान्यार्थकत्वात् । नन्वस्तेरनुप्रयोगे लिट्यादेशस्यार्थधातुकत्वान्न अस्तेर्भूरित्यार्धधातुके विहितो भूभावः कुतो न स्यादित्यत आह । **अनुप्रयोगेति** ॥ कृञ्चानुप्रयुज्यत इत्यत्र प्रत्याहारमाश्रित्य कृञ्वस्तीनामनुप्रयोगविधिसामर्थ्यादस्धातोर्भूभावो नेत्यर्थः । तदेवोपपादयति । **अन्यथेति** ॥ अनुप्रयुज्यमानस्यास्तेर्भूभावाभ्युपगमे कृञ्चानुप्रयुज्यत इत्यनुप्रयोगविधौ क्रस्चानुप्रयुज्यत इति वा कृभ्वानुप्रयुज्यत इतिवा ब्रूयात् । तावता एधाम्बभूवेति सिद्धेरित्यर्थः । यद्यपि कृञ्चित्युक्तौ लाघवमस्ति । तथापि एकस्यैव भवतेरधिकस्य लाभाय कृञ्चिति प्रत्याहारक्लेशो न कर्तव्य इति भावः । अत एवात उत्सार्वधातुक इति सूत्रभाष्येऽनुप्रयोगे भूभावेन अस्तेरबाधनमिति भाष्यं सङ्गच्छते । ततश्च अनुप्रयुज्यमानादस्धातोर्लिटि भूभावनिवृत्तौ णलि एधां अस् अ इति स्थिते द्वित्वे हलादिशेषे अ अस् इति स्थिते सवर्णदीर्घस्वाधित्वा अतो गुण इति पररूपे प्राप्ते । **अत आदेरिति** ॥ अत्रलोप इत्यस्मादभ्यासस्येत्यनुवर्तते । व्यथो लिटीत्यतो दीर्घ इति । **तदाह । अभ्यासस्येति** ॥ अत्र यद्वृत्तव्यन्तन्नामधातुप्रक्रियायां अ इवाचरति अर्तीत्यादि ग्रन्थस्य व्याख्या-

२२४९ । धि च । (८-२-२५)

धादौ प्रत्यये परे सलोपः स्यात् । एधिताध्वे ।

२२५० । ह एति । (७-४-५२)

तासस्त्योः सस्य हः स्यादेति परे । एधिताहे । एधितास्वहे । एधितास्महे । एधिष्यते । एधिष्येते । एधिष्यन्ते । एधिष्यसे । एधिष्येथे । एधिष्यध्वे । एधिष्ये । एधिष्यावहे । एधिष्यामहे ।

नावसरे वक्ष्यते । **एधामासेति** ॥ नचात्रानुप्रयुज्यमानाभ्यामस्तिभूभ्यामाम्प्रत्ययविदित्यात्मनेपदं शङ्क्यम् । तत्र कृञ्ग्रहणेन प्रत्याहारग्रहणाभावस्य भाष्ये उक्तत्वात् । **एधामासतुरित्यादीति** ॥ एधामासुः । एधामासिथ । एधामासथुः । एधामास । एधामास । एधामासिव । एधामासिम । **इति लिट्प्रक्रिया** ॥ **एधितेति** ॥ लुटस्तादेशे एध् त इति स्थिते शबपवादस्तास् इट् लुटःप्रथमस्येति डा टिलोपः एधितेति रूपम् । दीधीवेवीटामिति लघूपधगुणो न । **एधितारावि ति** ॥ लुट आताम् तास् इट् आतामित्यस्य रौभावः । रिचेति सलोपः । **एधितार इति** ॥ झस्य रस् तास् इट् रिचेति सलोपः रुत्वविसर्गौ । **एधितास इति** ॥ थासस्से तास् इट् तासस्त्योरिति सलोपः । **एधितासाथ इति** ॥ आथाम् टेरेत्वं तास् इट् । अथ ध्वमि टेरेत्वे तासि इटि एधितास् ध्वे इति स्थिते । **धिचेति** ॥ सस्यार्धधातुक इत्यतस्सस्येत्यनुवर्तते । तासस्त्योरित्यतो लोप इति । अङ्गाक्षिप्तप्रत्ययो धात्वनेन विशेष्यते । तदादिविधिः । तदाह । **धादाविति** ॥ तासस्सलोपे एधिताध्वे इति रूपम् । अथ लुटः इडादेशे एत्वे तासि इटि एधितास् ए इति स्थिते । **हएतीति** ॥ ह इति प्रथमान्तम् । अकार उच्चारणार्थः । सस्यार्धधातुक इत्यतः सस्येति तासस्त्योर्लोप इत्यतः तासस्त्योरिति चानुवर्तते । तदाह । **तासस्त्योरिति** ॥ तासस्सस्य हकारे एधिताहे इति रूपम् । **एधितास्वहे इति** ॥ लुटो वहिभावः टेरेत्वम् तास् इट् । एवं एधितास्महे इति । तत्र महिभावो विशेषः ॥ **इति लुट्प्रक्रिया** ॥ **एधिष्यत इति** ॥ लृट्स्तादेशे टेरेत्वम् । स्यतासी इति शबपवादः स्यः इट् प्रत्ययावयवत्वात् षत्वम् । **एधिष्येते इति** ॥ आताम् टेरेत्वम् स्यः इट् आतो ङित इत्याकारस्य इय् । लोपो व्योरिति यलोपः आदृणः षत्वम् । **एधिष्यन्त इति** ॥ झस्य टेरेत्वं झकारस्य अन्तादेशः स्यः इट् परूपं षत्वम् । थासादावपि लटीव सुयोजमिति मत्वा रूपाणि न प्रदर्शितानि । तत्र थासस्से स्यः इट् षत्वम् एधिष्यस इति रूपम् । एधिष्येते इतिवदाथामि एधिष्येथे इति रूपम् । ध्वम एत्वे स्यः इट् षत्वम् एधिष्यध्वे इति रूपम् । इट एत्वे स्यः इडागमः षत्वम् अतो गुण इति पररूपम् । एधिष्ये इति रूपम् । वहिमहोष्टेरेत्वम् स्यः इट् अतो

२२५१ । आमेतः । (३-४-९०)

लोट एकारस्याम्स्यात् । एधताम् । एधेताम् । एधन्ताम ।

२२५२ । सवाभ्यां वामौ । (३-४-९१)

सवाभ्यां परस्य लोडेतः क्रमात् 'व' 'अम्' एतौ स्तः । एधस्व । एधेथाम । एधध्वम् ।

२२५३ । एत ऐ । (३-४-९३)

लोडुत्तमस्य एत ऐ स्यात् । आमोऽपवादः । एधै । एधावहै । एधामहै ।

२२५४ । आडजादीनाम् । (६-४-७२)

अजादीनामाट् स्याल्लुङादिषु । अटोऽपवादः । 'आटश्च' (६.१.९०) । ऐधत ।

दीर्घः एधिष्यावहे एधिष्यामह इति रूपे । **इति लृट्प्रक्रिया** ॥ **आमेत इति** ॥ आम एतः इति च्छेदः । लोटो लङ्वदित्यतो लोट इत्यनुवर्तते । तदाह । **लोट एकारस्येति** ॥ लोडादेशावयवस्य एकारस्येत्यर्थः । **एधतामिति** ॥ लोटस्तादेशे टेः एत्वे आमादेशे शपि रूपम् । **एधेतामिति** ॥ आताम् टेरेत्वं शप सार्वधातुकमपिदिति ङित्त्वादार्धधातु इत्याकारस्य इयङ् गुणः यकारलोपः आमेत इत्येकारस्य आम् । **एधन्तामिति** ॥ झस्य टेरेत्वे शपि झकारस्य अन्तादेशे एकारस्य आम् । अथ लोटस्थामस्येभावे शपि एधसे इति स्थिते । **सवाभ्यामिति** ॥ सश्च वश्च सवौ । ताभ्यामिति विग्रहः । अकारावुच्चारणार्थौ । वश्च अमश्च वामौ लोटो लङ्वदित्यस्मात् लोट इति आमेत इत्यस्मादेत इति चानुवर्तते । तदाह । **सकारेति** ॥ आमेत इत्यस्यापवादः । **एधस्वेति** ॥ एधसे इत्यत्र एकारस्य व इति वकारादेशः । **एधेथामिति** ॥ आथाम् टेरेत्वं शप् आतो ङित इत्याकारस्य इयङ् गुणः यलोपः आमेत इत्याम् । **एधध्वमिति** ॥ ध्वमि शप् टेरेत्वे कृते सवाभ्यामिति वकारात् परत्वादेकारस्य अम् । उत्तमपुरुषैकवचने इटि टेरेत्वे शपि आमेत इत्येकारस्य आमि प्राप्ते । **एत ऐ इति** ॥ ऐ इति लुप्तप्रथमाकम् । लोटो लङ्वदित्यस्माल्लोट इति आडुत्तमस्य पिबेत्यस्मादुत्तमस्येति आमेत इत्यस्मादेत इति चानुवर्तते । तदाह । **लोडुत्तमस्येति** । **एधै इति** ॥ एध ए इति स्थिते एकारस्य ऐत्वे आडुत्तमस्येत्याडागमे आटश्चेति वृद्धौ वृद्धिरचीति वृद्धिः । **एधावहै । एधामहै इति** ॥ वहिमह्योरेत्वे शपि एकारस्य ऐत्वे आटि सवर्णदीर्घः ॥ **इति लोट्प्रक्रिया** ॥ अथ एधधातोर्लङि लुङ्लङ्लृङ्क्ष्वडुदात्त इत्यडागमे वृद्धिम्बाधित्वा परत्वादतोगुण इति पररूपे प्राप्ते । **आडजादीनामिति । लुङादिष्विति** ॥ लुङ्लङ्लृङ्क्षित्यनुवृत्तेरिति भावः । **अटोऽपवाद इति** ॥ अटि सति

ऐधेताम्। ऐधन्त। ऐधथाः। ऐधेथाम्। ऐधध्वम्। ऐधे। ऐधावहि। ऐधामहि।

२२५५। लिङः सीयुट्। (३-४-१०२)

लिङात्मनेपदस्य सीयुडागमः स्यात्। सलोपः। एधेत। एधेयाताम्।

२२५६। झस्य रन्। (३-४-१०५)

लिङो झस्य रन्स्यात्। एधेरन्। एधेथाः। एधेयाथाम्। एधेध्वम्।

२२५७। इटोऽत्। (३-४-१०६)

लिङादेशस्येटोऽत्स्यात् एधेय। एधेवहि। एधेमहि। आशीर्लिङि आर्ध-

परस्मै स्यादिति भावः। आटश्चेत्यनन्तरं वृद्धिरिति शेषः। यद्यपि वृद्धिरेचीति एत्येधतीति वा वृद्धौ इदं सिध्यति। तथापि ऐक्षतेत्याद्यर्थम् सूत्रमिहापि न्याय्यत्वादुपन्यस्तम्। **ऐधेतेति**॥ लङस्तादेशे शपि आडागमे आटश्चेति वृद्धिः। लङादेशानां टिदादेशत्वाभावात् एत्वम् न भवति। आडजादीनामिति सूत्रं भाष्ये प्रत्याख्यातम्। **ऐधेतामिति**॥ आताम शपि आटि वृद्धिः। आतोऽटि इत्याकारस्य इय्। आद्गुणः यलोपः। **ऐधन्तेति**॥ झेरन्तादेशः शप आट वृद्धिः। **ऐधथा इति**॥ थास् शप् आट् वृद्धिः। **ऐधेथामिति**॥ आथाम् शप आट् वृद्धिः इय् आदगुणः यलोपः। **ऐधध्वमिति**॥ ध्वम् शप् आट् वृद्धिः। **ऐधे इति**॥ इट् शप् आदगुणः आटो वृद्धिः। **ऐधावहि। ऐधामहि इति**॥ वहिमह्योरशप आट् वृद्धिः अतो दीर्घः॥ **इति लङ्प्रक्रिया**॥ **लिङस्सीयुडिति**॥ स्पष्टम। परस्मैपदानां लिङादेशानां यासुडागमविधानादात्मनेपदविषयमिदम्। सीयुटि टकार इत्। उकार उच्चारणार्थः। **सलोप इति**॥ लिङस्सलोप इत्यनेनेति शेषः। **एधेतेति**॥ लिङस्तादेशः सीयुट् शप सलोपः आदगुणः यलोपः। **एधेयातामिति**॥ आताम सीयुट् शप सलोपः आदगुणः। **झस्य रन्निति**॥ लिङस्सीयुडित्यतो लिङ इत्यनुवर्तते। तदाह। **लिङो झस्येति**॥ लिङादेशस्य झस्येत्यर्थः। अनेकाल्त्वात्सर्वादेशः। **एधेरन्निति**॥ झस्य रन शप सीयुट् सलोपः आद्गुणः यलोपः। **एधेथा इति**॥ थास् सीयुट् शप सीयुटस्यस्य लोपः आदगुणः यलोपः थासस्सस्य रुत्वविसर्गौ। **एधेयाथामिति**॥ आथाम् सीयुट् सलोपः शप आदगुणः। **एधेध्वमिति**॥ ध्वं सीयुट् शप् सलोपः आद्गुणः यलोपः। **इटोऽदिति**॥ इटः अत् इति च्छेदः। लिङस्सीयुडित्यतो लिङ इत्यनुवर्तते। तदाह। **लिङादेशस्येति**॥ अत्र धेरित्यत्रैव आदेशे तकार उच्चारणार्थ एव नत्वित्संज्ञक इति शब्देन्दुशेखरे दिव औदित्यत्र प्रपञ्चितम्। इत्संज्ञक एवेत्यन्ये। न विभक्ताविति निषेधस्तु न। आदेशत्वात् प्राक् विभक्तित्वाभावात्। झस्य रन्नित्यत्र तु लक्ष्यानुरोधेन संयोगान्तलोपमाश्रित्य नकारान्तरप्रश्लेषादुपदेशे अन्त्यत्वाभावान्नकारस्य नेत्संज्ञेत्यलम्। **एधेयेति**॥ इट् तस्य अकारादेशः। सीयुट् शप् सलोपः आद्गुणः। **एधेवहि। एधेमहीति**॥ वहिमह्योस्सीयुट् सलोपः शप

धातुकत्वाल्लिङः सलोपो न। सीयुट्सुटोः प्रत्ययावयवत्वात्षत्वम्। एधिषीष्ट। एधिषीयास्ताम्। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थाम्। एधिषीध्वम्। एधिषीय। एधिषीवहि। एधिषीमहि। ऐधिष्ट। ऐधिषाताम्।

२२५८। आत्मनेपदेष्वनतः। (७-१-५)

अनकारात्परस्यात्मनेपदेषु झस्य 'अत्' इत्यादेशः स्यात्। ऐधिषत। ऐधिष्ठाः। ऐधिषाथाम्। 'इणःषीध्वं लुङ्लिटां धोऽङ्गात्' (२।३।७८)।

आद्गुणः यलोपः। **इति विधिलिङ्प्रक्रिया॥ आर्धधातुकत्वादिति** ॥ लिङाशिषीत्यनेनेति भावः। **सलोपो नेति** ॥ सार्वधातुकग्रहणस्य लिङस्सलोपः इत्यत्रानुवृत्तेरिति भावः। **सीयुट् सुटोरिति** ॥ लक्ष्यभेदात्पुनःप्रवृत्तिरिति भावः। युगपदेवोभयोः षत्वमित्यन्ये। **एधिषीष्टेति** ॥ आशिषि लिङः तादेशः। आर्धधातुकत्वात् न शप्। सीयुट् तकारस्य सुट् सीयुट्सकारात् प्रागिडागमः यलोपः सीयुटस्सुटश्च सकारस्य षत्वं तकारस्य ष्टुत्वेन टकारः। **एधिषीयास्तामिति** ॥ आताम् सीयुट् आकारादुपरि तकारात्प्राक् सुट्। सीयुटः प्रागिट्। तत उत्तरस्य सकारस्य षत्वम्। **एधिषीरन्निति** ॥ झस्य रन्। सीयुट् इडागमः यकारलोपः षत्वम्। **एधिषीष्ठा इति** ॥ थास् सीयुट् थकारस्य सुट् सीयुटः प्रागिट् सकारद्वयस्य षत्वम्। थकारस्य ष्टुत्वेन ठकारः। हल्विसर्गौ। **एधिषीयास्थामिति** ॥ आथाम् सीयुट्। आकारादुपरि थकारात् प्राक् सुट् सीयुटः प्रागिट्। तत उत्तरस्य सकारस्य षत्वम्। **एधिषीध्वमिति** ॥ ध्वम् सीयुट् यलोपः सीयुटः प्रागिट् षत्वम्। इणः परस्यैवेणन्तादङ्गात्परत्वन्नास्ति। इटः प्रत्ययभक्तत्वात्। ततश्च इणःषीध्वमिति ढत्वं न भवति। **एधिषीयेति** ॥ इटः अत् सीयुट् इट् षत्वम्। **एधिषीवहि। एधिषीमहीति** ॥ वहिमहोस्सीयुट् इट् षत्वम्। **इत्याशीर्लिङ्प्रक्रिया ॥ ऐधिष्टेति** ॥ लुङन्तादेशः च्लिः सिच् इट् धातोराट् वृद्धिः षत्वम् ष्टुत्वम्। **ऐधिषातामिति** ॥ आताम् च्लिः सिच् इट् आट् वृद्धिः षत्वम्। अथ झस्य आदेर्झकारस्य झोऽन्त इत्यन्तादेशे प्राप्ते। **आत्मनेपद इति** ॥ झोऽन्त इत्यतः झ इति षष्ठ्यन्तमनुवर्तते। आत्मनेपदेष्विति षष्ठ्यर्थे सप्तमी। आत्मनेपदावयवस्य झकारस्येति लभ्यते। अदभ्यस्तादित्यतः **आदित्यनुवर्तते**। न अत् अनत्। तस्मादिति विग्रहः। तदाह। **अनकारादित्यादिना। ऐधिषतेति** ॥ झावयवझकारस्य अत् इत्यादेशः च्लिः सिच् इट् आट् वृद्धिः षत्वम्। **ऐधिष्ठा इति** ॥ थास् च्लिः सिच् इट् आट् वृद्धिः षत्वं थकारस्य ष्टुत्वेन ठकारः हल्विसर्गौ। **ऐधिषाथामिति** ॥ आथाम् च्लिः सिच् इट् आट् वृद्धिः षत्वम्। **अथ धमो धस्य ढत्वम् स्मारयति। इणःषीध्वमिति। ऐधिढ्वमिति** ॥ धम् च्लिः सिच् इट् आट् वृद्धिः धिचेति सस्य लोपः। इणःषीध्वमिति धकारस्य ढत्वम्। **इटः ङ्णतिञ्भक्तत्वा णिजन्ता-न्तर्भूतत्वेन इडन्तस्य इण्णन्ताङ्गत्वादिति भावः। इड्भिन्न एवेति** ॥ **उत्तरसूत्रे निमोड इत्यत्र**

ऐधिढ्वम्। इड्भिन्न एव इणिह गृह्यत इति मते तु ऐधिध्वम् ढधयोर्वस्य मस्य च द्वित्वविकल्पात्षोडश रूपाणि। ऐधिषि। ऐधिष्वहि। ऐधिष्महि। ऐधिष्यत। ऐधिष्येताम्। ऐधिष्यन्त। ऐधिष्यथाः। ऐधिष्येथाम्। ऐधिष्यध्वम्। ऐधिष्ये। ऐधिष्यावहि। ऐधिष्यामहि। उदात्तत्वाद्वलादेरिट्। प्रसङ्गादनुदात्ताः संगृह्यन्ते।

ऊदृदन्तैर्यौतिरुक्षुशीस्नुनुक्षुश्विडीङ्श्रिभिः।
वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः॥

इड्ग्रहणात् पूर्वसूत्रे इणःषीध्वमित्यत्र इड्भिन्न एव इण् गृह्यत इति केचिदाहुः। तन्मतेतु प्रकृते इटः परत्वात् धकारस्य ढत्वाभावे ऐधिध्वमित्येव रूपमित्यर्थः। इदन्तु मतान्तरं भाष्यानारूढमिति सूचयितुं तुशब्दः। **ढधयोरिति** ॥ मतभेदमाश्रित्येदं। तत्र ढत्वाभावपक्षे धकारस्य अर्नाचेति द्वित्वविकल्पात् द्विधमेकधामिति रूपद्वयम्। एवं ढत्वे द्विढं एकढं इति रूपद्वयम्। रूपचतुष्टयेऽपि यणो मयो द्वे वाच्ये इत्यत्र मय इति पञ्चमीमाश्रित्य वकारस्य द्वित्वविकल्पादेकवकाराणि द्विवकाराणि च प्रागुक्तानि चत्वारि रूपाणि भवन्ति। तथाच अष्टौ रूपाणि सम्पन्नानि। मकारस्य द्वित्वविकल्पादेतान्यष्टौ रूपाणि एकमकाराणि द्विमकाराणि चेति षोडश रूपाणि सम्पन्नानीत्यर्थः। **ऐधिषीति** ॥ लुङः इडादेशः सिचः सिच इडागमः आट् वृद्धिः। वहिमह्योस्तु च्लेस्सिचि इडागमे आटि वृद्धौ ऐधिष्वहि ऐधिष्महीति रूपे। **इति लुङ्प्रक्रिया** ॥ **ऐधिष्यतेति** ॥ लृङः तादेशः स्यः इट् आट् वृद्धिः षत्वम्। **ऐधिष्येतामिति** ॥ आतां स्यः इट् आकारस्य इय् आद्गुणः यलोपः आट् वृद्धिः षत्वम्। **ऐधिष्यन्तेति** ॥ झावयवझकारस्यान्तादेशः स्यः इट् आट् वृद्धिः षत्वम्। **ऐधिष्यथा इति** ॥ थास् स्यः इट् आट् वृद्धिः रुत्वविसर्गौ। **ऐधिष्येथामिति** ॥ आथाम् स्यः इट् आकारस्य इय् आद्गुणः यलोपः आट् वृद्धिः षत्वम्। **ऐधिष्यध्वमिति** ॥ ध्वम् स्यः इट् आट् वृद्धिः षत्वम्। **ऐधिष्य इति** ॥ इडादेशः स्यः इडागमः षत्वम् आद्गुणः वहिमह्योस्तु स्यः इट् अतो दीर्घः आट् वृद्धिः षत्वम् ऐधिष्यावहि ऐधिष्यामहि इति रूपे। नन्वेधधातोरनुदात्तेत्कत्वात् एकाच उपदेशेऽनुदात्तादितीण्निषेधः कुतो न स्यादित्यत आह। **उदात्तत्वादिति** ॥ एधधातुर्यद्यपि अनुदात्तेत्। तथापि अनुदात्तस्येतः लोपे सति परिशिष्टो धातुर्नानुदात्त इति भावः। ननु कतिपये धातवः पाणिनिना अनुदात्ता उच्चरिता इति कथमिदानीन्तनैरवगन्तव्यमित्यत आह। **प्रसंगादिति** ॥ स्मृतस्योपेक्षानर्हत्वम्प्रसङ्गः। पाणिनिपठितानामनुदात्तधातूनान्तदानीन्तनशिष्यपरम्परया आनुनासिक्यवदिदानीं ज्ञानं सम्भवतीति भावः। **ऊदृदन्तैरिति** ॥ अजन्तेषु धातुषु ऊदन्तैः ऋदन्तैश्च धातुभिः विना यु रु क्षु शीङ् स्नु नु क्षु श्वि डीङ् श्रि

शक्लृपच्मुचिरिच्वच्विच्सिच्यच्छित्यज्निजिर्भजः ।
भञ्जभुज्भ्रस्ज्मस्जियज्युञ्ञ्रञ्ज्विजिरस्विञ्रमञ्जमृजः ॥

अद्क्षुद्खिद्छिद्तुदिनुदः पद्याभिद्विद्यतिर्विनद् ।
शद्सदी स्विद्यति स्कन्दिहदी क्रुध् क्षुधिबुध्यती ॥

बन्धिर्युधिरुधी राधिव्यध्शुधः साधिसिध्यती ।
मन्यहन्नाप्क्षिप् छुंपितप्तिपस्तृप्यतिदृप्यती ॥

लिप्लुप्वप्शप्स्वप्सृपियभ्रभ्लसृगमनमयमो रमिः ।

एतैश्च धातुभिर्विना वृङ् वृञ् आभ्याञ्च विना अन्ये एकाचः [illegible] स्मृताः । पाणिनिशिष्यपरम्परया ज्ञाता इत्यर्थः । अथ हलन्तेषु [illegible] ।

शक्लृ पच् मुचीति ॥ शक्लृ पच् मुच् रिच् वच् विच् [illegible] जिर् भज् एषां द्वन्द्वः । तत्र कान्तेषु शक्लृ इत्येकः । [illegible] पाठो दृश्यते । चान्तेषु पच् मुच् रिच् वच् विच् सिच् [illegible] ग्रहणं प्रसिद्धत्वात् । न तु पचि व्यक्तीकरणे इत्यभ्येत्याहुः । [illegible] न तु मुचि कल्कन इति भौवादिकस्य । अविशेषात्सर्वस्येत्यन्ये । [illegible] उच्चारणार्थः । णिजिरित्यत्र इर इत्संज्ञा वक्ष्यते । [illegible] पदम् । जान्तेषु ल्यज् निज् भज भञ्ज् भुज् भ्रस्ज् मस्ज् [illegible] विज् स्वञ्ज् सञ्ज् सृज् इति पञ्चदश । अद क्षुदित्यादि नुद [illegible] रिकार उच्चारणार्थः । पद्याभिदित्येकम्पदम् । समाहारद्वन्द्वः । [illegible] विद्यतिरिति श्यनानिर्देशः । विनदिति श्नमानिर्देशः । शदसदीत्यादि [illegible] समाहारद्वन्द्वः । सदिस्कन्दिहदिक्षुधि इति इका निर्देशः । [illegible] श्यन्विकरणयोर्निर्देशः । ततश्च दान्तेषु अद् क्षुद् खिद् छिद् तुद् नुद् [illegible] (विद् श्यन्विकरणः) (विनद् श्नम्विकरणः) शद सद् (स्विद् श्यन्विकरणः) स्कन्द् हद् इति पञ्चदश । बन्धिरिति इका निर्देशः । युधिरुधी इत्येकम्पदम् इका निर्देशः । साधि व्यध् शुधः इत्येकं पदम् । राधीति इका निर्देशः । साधिसिध्यती इति द्वन्द्वः । साधीति इका निर्देशः । ततश्च धान्तेषु क्रुध् क्षुध् बुध् श्यन्विकरणः बन्ध् युध् रुध् राध् व्यध् शुध् साध् सिध् श्यन्विकरणः इत्येकादश । मन्येत्यादि तिप इत्यन्तमेकम्पदम् । मन्येति श्यना निर्देशः । छुपीति इका निर्देशः । तृप्यतिदृप्यती इति द्वन्द्वः श्यना निर्देशः । लिपिलुपीत्यादि यम इत्यन्तमेकम्पदम् । सृपीति इका निदेशः । रमिरिति भिन्नम्पदम् । इका निर्देशः । तथा च नान्तेषु मन् हन्निति द्वौ । मनिः श्यन्विकरणः । पान्तेषु आप् क्षिप् छुप् तप् तिप् तृप् दृप् लिप् लुप् वप् शप् स्वप् सृप् इति त्रयोदश । भान्तेषु यभ् रभ् लभ् इति त्रयः । मान्तेषु गम् नम् यम् रम् इति चत्वारः ।

कुशिर्दंशिदिशी दृशॄशॄरिशॄरुशॄलिशॄविशॄस्पृशः कृषिः ॥
त्विष् तुष् द्विष् दुष् पुष्य पिष् विष् शिष् शुष् श्लिष्यतयो घसिः ।
वसतिर्दहदिहिदुहो नहमिहरुहलिहवहिस्तथा ॥
अनुदात्ता हलन्तेषु धातवो द्व्यधिकं शतम् ।
तुदादौ मतभेदेन स्थितौ यौ च चुरादिषु ॥
तृपदृपौ तौ वारयितुं श्यना निर्देश आहृतः ।

किं च ।

स्विदपद्यौ सिध्यबुध्यौ मन्यपुष्यश्लिषः श्यना ॥
वसिः शपा लुका यौतिर्निर्दिष्टोऽन्यनिवृत्तये ।
निजिर्विजिर्शकल इति सानुबन्धा अमी तथा ॥
विन्दतिश्चान्द्रदौर्गादिरिष्टो भाष्येऽपि दृश्यते ।
व्याघ्रभूत्यादयस्त्वेनं नेह पेठुरिति स्थितम् ॥

कुशिरित्यादि स्पृश इत्यन्तमेकम्पदम् । कुशिरिति दंशिरिति च इरितौ । दंशतीति इका निर्देशः । तथा च शान्तेषु कुश् दंश् दिश् दृश् मृश् रिश् रुश् लिश् विश् स्पृश् इत्येते दश । कृषिरिति पृथक्पदम् । इका निर्देशः । त्विषादि श्लिष्यतयइत्यन्तमेकम्पदम् । पुष्यतीति श्यना निर्देशः । शिष्यतीति श्यन्विकरणस्य इतपा निर्देशः । तथाच षान्तेषु कृष् त्विष् तुष् द्विष् दुष् (पुष् श्यन्विकरणः) पिष् विष् शिष् शुष् (श्लिष् श्यन्विकरणः।) इत्येकादश । वसतिरिति पृथक्पदम् । इका निर्देशः । वसतिरिति पृथक्पदं इतपा निर्देशः । सान्तेषु घस् वस् इति द्वौ । दह् दिह् दुह् इति द्वन्द्वः । दिहीति इका निर्देशः । नह मिह रुह लिह इति समाहारद्वन्द्वः । वहिः इति पृथक्पदं इका निर्देशः । तथेति चकारपर्यायः । हान्तेषु दह दिह दुह नह मिह रुह लिह वह इत्यष्टौ । **द्व्यधिकं शतमिति** ॥ भाष्ये मृषेष्यान्तेषु पाठस्तु लेखकप्रमादकृत इति भावः । अथ षान्तेषु द्वयोः श्यना निर्देशस्य फलमाह । **तुदादाविति** ॥ यौ तृपदृपौ तुदादौ चुरादौ च मतान्तरीयत्वेन धातुपाठे स्थितौ तौ अनुदात्तेभ्यो वारयितुं श्यना निर्देशः अभ्युपगत इत्यर्थः । अत एव शमुचादीनामिति सूत्रभाष्ये तृपिनो दृपिन इत्युदाहृतं सङ्गच्छत इति भावः । **किञ्चेति** ॥ अन्यदपि वक्ष्यत इत्यर्थः । **अन्यनिवृत्तय इति** ॥ विकरणान्तरनिवृत्तय इत्यर्थः । तत्राग्रे तदार्धधातुकनिरूपणे स्पष्टीभविष्यति । **अमी तथेति** ॥ उक्तानुबन्धरहितानां व्यावृत्तय इत्यर्थः । एतदपि तत्तदार्धधातुकनिरूपणे स्पष्टीभविष्यति । **विन्दतिरिति** ॥ विदॢ लाभे इति तौदादिकः । **चान्द्रदौर्गादिव्याकरणसम्मतः । भाष्येऽपि दृश्यते इति** ॥ विन्दिविद्यतीति तत्र पाठादिति भावः । **एनमिति** ॥ विन्दतिमित्यर्थः । **नेह पेठुरिति** ॥ तथापि भाष्यप्रामाण्यादस्यानि-

रञ्जिमस्जी अदिपदी तुद् क्षुध् शुषिपुषी शिषिः ।
भाष्यानुक्ता नवेहोक्ता व्याघ्रभूत्यादिसम्मतेः ॥

'स्पर्ध ३ संघर्षे' । संघर्षः पराभिभवेच्छा । धात्वर्थेनोपसंग्रहादकर्मकः । स्पर्धते ।

२२५९ । शर्पूर्वाः खयः । (७-४-६१)

अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते । 'हलादिः शेषः' (२१७५) इत्यस्यापवादः । पस्पर्धे । स्पर्धिता । स्पर्धिष्यते । स्पर्धताम् । अस्पर्धत । स्पर्धेत ।

ट्कत्वमिति भावः । रञ्जिमस्जी इत्येकम्पदम् । तुद्क्षुदिति पृथक्कृते पदे । शुषिपुषी इत्येकम्पदम् । शिषिरित्यनन्तरं इत्येते इति शेषः । **नवेहेति** ॥ नव धातवः भाष्यानुक्ता अपि इहानुदात्तेषु परिगणिता इत्यर्थः । कुत इत्यत आह । **व्याघ्रभूत्यादिसम्मतेरिति** ॥ भाष्येत्वेभ्यो नवभ्योऽन्येषां परिगणनं तु नवानामप्येषामुपलक्षणार्थमिति भावः । तेन रक्तं रागात् तदस्मिन्नस्तं प्रायेण, क्तोकृतमितप्रतिपन्नाः, शुष्कधृष्टौ, क्तेननस्त्विशिष्टेत्यादिसौत्रप्रयोगाः, तुन्नःमग्नः पुष्टः मङ्क्ता मङ्क्तव्यमित्यादिभाष्यप्रयोगाश्चात्र लिङ्गम । **इत्यनिट्कारिकाः** ॥ **स्पर्धसंघर्षे इति** ॥ वर्तते इति शेषः । **पराभिभवेति** ॥ परस्याभिभवः पराजयः । तद्विषयकेच्छेत्यर्थः । नन्वत्रेच्छायां पराभिभवस्य कर्मतया स्पर्धधातोस्सकर्मकत्वात् देवदत्तः यज्ञदत्तं स्पर्धयतीत्यादौ गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामित्यकर्मककार्यं कथमित्यत आह । **धात्वर्थेनोपसंग्रहादकर्मक इति** ॥ धात्वर्थबहिर्भूतकर्मकत्वमेव सकर्मकत्वमिति मृष आत्मनः क्याजिति सूत्रभाष्ये प्रपञ्चितत्वादिति भावः । नन्वेवं सति पदव्यवस्थायां स्पर्धायामाङ इत्यत्र कृष्णश्चाणूरमाह्वयते स्पर्धत इत्यर्थ इति मूलग्रन्थविरोध इति वाच्यम । तत्र स्पर्धेरभिभवपूर्वकाह्वाने वृत्तिरित्यलम् । **स्पर्धत इति** ॥ कथ्यन्ताः षट्त्रिंशदनुदात्तेत इत्युक्तेरात्मनेपदम् । एधधातुवत् लटि धातुरूपाणीति भावः । धातोरिजादित्वाभावादिजादेश्चेति लिट्याम् न । अत एव नानुप्रयोगोऽपि । किन्तु लिटस्तादेशे लिटस्तझयोरिति तस्यैशि लिटि धातोरिति द्वित्वे हलादिश्शेष इत्यभ्यासेप्रथमहल्व्यतिरिक्तहलां निवृत्तौ सस्पर्धे इति प्राप्ते । **शर्पूर्वा इति । अभ्यासस्येति** ॥ अत्रलोपोऽभ्यासस्येत्यतस्तदनुवृत्तेरिति भावः । शर्पूर्वाः खय इत्यत्र शर् पूर्वः येभ्य इत्यतद्गुणसंविज्ञानो बहुव्रीहिः । तेन शर् न शिष्यते । **शिष्यन्त इति** ॥ हलादिश्शेष इत्यतश्शेष इत्यनुवृत्तं कर्मणि घञन्तं बहुवचनान्ततया विपरिणम्यत इति भावः । तथाच प्रकृते अभ्यासे हल् पकारश्शिष्यते । नन्द्रास्संयोगादय इति रेफस्य द्वित्वनिषेधो न शंक्यः । द्वितीयैकाजवयवस्यैव तन्निषेधात् । तदाह । **पस्पर्ध इति** ॥ नच वत्रश्चेत्यत्राभ्यासे चकार एव शिष्येतेति वाच्यम् । हलादिश्शेष इत्यतोहि आदिरित्यप्यनुवर्तते । शर्प्यादि[illegible] धात्वादिभूता इत्यर्थः । पस्पर्धाते पस्पर्धिरे पस्पर्धिषे पस्पर्धाथे पस्पर्धिध्वे पस्पर्धे पस्पर्धिवहे पस्पर्धिमहे इति लिटि रूपाणि सुगमानि । **स्पर्धितेति** ॥ लुटि एधधातुवत् रूपाणि सुगमानीति भावः । **स्पर्धिष्यत इति** ॥ लृटि एधधातुवद्रूपाणीति भावः । नचेत्यादिना

स्पर्धिषीष्ट । अस्पर्धिष्ट । अस्पर्धिष्यत । 'गाधृ ४ प्रतिष्ठालिप्सयोर्ग्रन्थे च' । गाधते । जगाधे । 'बाधृ ५ लोडने' । लोडनं प्रतिघातः । बाधते । 'नाथृ ६ नाधृ ७ याच्ञोपतापैश्वर्याशीःषु' ।

आशिषि नाथ इति वाच्यम् ।

अस्याशिष्येवात्मनेपदं स्यात् । नाथते । अन्यत्र नाथति । नाधते । 'दध ८ धारणे' । दधते ।

२२६० । अत एकहल्मध्येऽनादेशादेर्लिटि । (६-४-१२०)

लिण्णिमित्तादेशादिकं न भवति यदङ्गं तदवयवस्यासंयुक्तहल्मध्यस्थस्याकारस्यैकारः स्यादभ्यासलोपश्च किति लिटि ।

लोटि एधिवद्रूपाणीति भावः । **अस्पर्धतेति** ॥ लङि एधिवद्रूपाणीति भावः । हलादित्वादडेव । नत्वाडिति विशेषः । **स्पर्धेतेति** ॥ विधिलिङि एधिवद्रूपाणि । **स्पर्धिषीष्टेति** ॥ आशिषि लिङि एधिवद्रूपाणि । **अस्पर्धिष्टेति** ॥ लुङि एधिवद्रूपाणि । अडागम इति विशेषः । नत्वाट् । **अस्पर्धिष्यतेति** ॥ लृङि एधिवद्रूपाणि । अडागमो विशेषः । नत्वाट् । **गाधृ प्रतिष्टेति** ॥ चतुर्थान्तो धातुः । ऋकारो नाग्लोपिशास्वृदितामिति निषेधार्थः । अजगाधत् । प्रतिष्ठा आधारे स्थितिः । ग्रन्थः ग्रथनं रचनम् । **जगाध इति** ॥ लिटि द्वित्वादि । अभ्यासस्य ह्रस्वः चुत्वं जश्त्वम् । **बाधृ इति** ॥ प्रतिघातः पीडनम् । **नाथृ, नाधृ इति** ॥ द्वितीयचतुर्थान्तौ धातू । उपतापः ज्वरप्रयुक्ता पीडा । आशीः आशासनम् । द्वितीयान्तस्य नाथधातोर्विशेषमाह । **आशिषि नाथ इति** ॥ अत्र नाथ इति षष्ठी । अनुदात्तङित इत्यतः आत्मनेपदमित्यनुवर्तते । अनुदात्तेत्त्वादेव सिद्धे नियमार्थमिदं वार्तिकम् । तदाह । **अस्याशिष्येवेति** ॥ आशासनार्थवृत्तेरेवनाथधातोरात्मनेपदम् । याच्ञाद्यर्थवृत्तेस्तु शेषात् कर्तरीति परस्मैपदमेवेत्यर्थः । **नाथत इति** ॥ आशास्ते इत्यर्थः । **अन्यत्रेति** ॥ याच्ञाद्यर्थे विद्यमानस्येत्यर्थः । अथ चतुर्थान्तस्य नाधधातोरुदाहरति । **नाधत इति । दधेति** ॥ चतुर्थान्तोऽयम् । तस्य लटि एधिवद्रूपाणि सिद्धवत्कृत्य लिटस्तादेशे तस्यैशि द्वित्वे दध् दध् ए इति स्थिते । **अत एकहल्मध्य इति** ॥ आदेशः आदिर्यस्येति बहुव्रीहिः । अङ्गस्येत्यधिकृतम् अन्यपदार्थः । लिटीति परनिमित्तकसप्तमी अनादेशादेरित्यस्यैकदेशे आदेशेऽन्वेति । लिटि परे निमित्ते य आदेशः सः आदिर्यस्य न भवति तथाविधस्याङ्गस्येति लभ्यते । अङ्गस्येत्यवयवषष्ठी । तथाच तथाविधाङ्गावयवस्यात इति लभ्यते । एकशब्दः असहायवाची । एके मुख्यान्यकेवला इत्यमरः । एकौ असंयुक्तौ हलौ एकहलौ तयोर्मध्यः एकहल्मध्यः तत्र तिष्ठतीत्येकहल्मध्यस्थः । तस्येति विग्रहः । अत इत्यस्यैव विशेषणमिदम् । ध्वसोरेद्धावित्यतः एदिति अभ्यासलोप इति चानुवर्तते । गमहनेत्यतः किदीत्यनुवर्तते नतु ङिदीति । लिङादेशानां ङित्त्वासम्भवात् । लिटीत्यत्वविधौ परनिमित्तञ्च । आवृत्या उभयार्थलाभः । तदाह । **लिण्णिमित्तेत्यादिना** ॥

२२६१ । थलि च सेटि । (६-४-१२१)

प्रागुक्तं स्यात् । आदेशश्चेह वैरूप्यसम्पादक एवाश्रीयते । शासिदद्योः प्रतिषेधवचनाज्ज्ञापकात् । तेन प्रकृतिजश्चरां तेषु सत्स्वपि एत्वाभ्यासलोपौ स्त एव । देधे । देधाते । देधिरे । 'अतः' किम् । दिदिवतुः । 'तपरः' किम् । ररासे । 'एक–' इत्यादि किम् । तत्सरतुः । 'अनादेशादेः' किम् । चकणतुः । लिट आदेशविशेषणादिह स्यादेव । नेमिथ । सेहे । 'स्कुदि ९ आप्रवणे' । आप्रवणमुत्प्लवनमुद्धरणं च ।

थलिचेति । **प्रागुक्तमिति** ॥ अत एकहल्मध्य इति यत् प्रागुक्तं एत्वादि तत् सेटि थलि च स्यादित्यर्थः । थलः कित्वाभावात् पूर्वसूत्रेणाप्राप्तौ वचनम् । ननु देधे पेततुरित्यादौ अभ्यासे चर्चेति जशां चराञ्च जशि चरिच लिण्णिमित्तादेशादित्वात् कथमेत्वाभ्यासलोपावित्यत आह । **आदेशश्चेति** ॥ इह अतएकहल्मध्य इति सूत्रे । आदेशशब्देन स्थान्यपेक्षया विरूप एवादेशो विवक्षितः । तथाच तथाविधादेशादेरेव एत्वाभ्यासलोपौ न भवतः । स्थानिसरूपादेशादेस्तु न पर्युदास इत्यर्थः । **शासिदद्योरिति** ॥ नशासददवादिगुणानामिति शासिदद्योरेत्वाभ्यासलोपयोः प्रतिषेध उच्यते । यदिह यथाकथञ्चिदादेशादेः पर्युदासस्स्यात् तर्हि शासिदद्योरभ्यासे शकारदकारयोश्चर्जशोः शकारदकारादेशे सति आदेशादित्वादेव एत्वाभ्यासलोपयोः अभावसिद्धौ न शसददवेति तत्प्रतिषेधोऽनर्थकस्स्यात् । अतः वैरूप्यसम्पादकादेशादेरेव पर्युदासो विज्ञायत इत्यर्थः । **तेनेति** ॥ स्थानिसरूपादेशादेः पर्युदासाभावादित्यनेनेत्यर्थः । **सत्स्वपीति** ॥ देधे पेततुः इत्यादौ दकाराद्यादेशेषु सत्स्वपीत्यर्थः । **देधे इति** ॥ दध दध् ए इति स्थिते दकारादकारस्य एत्वेऽभ्यासलोपे च रूपम् । असंयोगाल्लिट् कित्वमिह बोध्यम् । **देधिर इति** ॥ देधिषे देधाथे देधिध्वे देधे देधिवहे देधिमहे इति रूपाणि सम्भवन्तीति भावः । **दिदिवतुरिति** ॥ दिव्धातोरतुसि द्वित्वे हलोर्मध्ये अनोऽभावादेत्वाभ्यासलोपौ नेति भावः । **तपरः किमिति** ॥ अत इति तपरकरणं किमर्थमित्यर्थः । **ररासे इति** ॥ रासृ शब्दे भ्वादिरात्मनेपदी । अत्र हल्मध्यस्थावर्णस्य ह्रस्वत्वाभावादेत्वाभ्यासलोपौ नेति भावः । **एकेत्यादि किमिति** ॥ एकहल्मध्यस्थस्येति किमर्थमित्यर्थः । **तत्सरतुरिति** ॥ त्सरच्छद्मगतौ । लिटोऽतुसि द्वित्वे अभ्यासाकारस्य नासंयुक्तहल्मध्यस्थत्वमिति भावः । **चकणतुरिति** ॥ कण शब्दे । लिटोऽतुसि द्वित्वे अभ्यासेचर्चेति ककारस्य चुत्वेन चकारः । तथाच वैरूप्यसम्पादकादेशादित्वादेत्वाभ्यासलोपौ नेति भावः । अथ लिण्णिमित्तादेशादिकमित्यत्र लिण्णिमित्तेत्यस्य प्रयोजनमाह । **लिट इति** । **नेमिथेति** ॥ णमु प्रह्वत्वे शब्दे च । णोन इति नत्वं । थलि इटि द्वित्वे नत्वसम्पन्ननकारादेशादित्वेपि नत्वस्य लिण्णिमित्तकत्वाभावाल्लिण्णिमित्तकादेशादित्वाभावादेत्वाभ्यासलोपौ निर्बाधाविति भावः । **सेहे इति** ॥ षह मर्षणे । धात्वादेः षस्स इति षत्वे थलि इटि द्वित्वे सत्वसम्पन्नसकारादेशादित्वेऽपि सत्वस्य

२२६२। इदितो नुम्धातोः। (७-१-५८)

स्कुन्दते। चुस्कुन्दे। 'ष्विदि १० श्वैत्ये'। अकर्मकः। ष्विन्दते। शिष्विन्दे। 'वदि ११ अभिवादनस्तुत्योः'। वन्दते। ववन्दे। 'भदि १२ कल्याणे सुखे च'। भन्दते। बभन्दे। 'मदि १३ स्तुतिमोदमदस्वप्नकान्तिगतिषु'। मन्दते। ममन्दे। 'स्पदि १४ किञ्चिच्चलने'। स्पन्दते। पस्पन्दे। 'क्लिदि १५ परिदेवने'। शोक इत्यर्थः। सकर्मकः। क्लिन्दते चैत्रम्। चिक्लिन्दे। 'मुद १६ हर्षे'। मोदते। 'दद १७ दाने'। ददते।

लिण्णिमित्तकत्वाभावात् लिण्णिमित्तकादेशादित्वविरहादेत्वाभ्यासलोपौ निर्बाधाविति भावः। दाधिता। दधिष्यते। दधताम्। अदधत। दधेत। दधिषीष्ट। अदाधिष्ट। अदधिष्यत। **स्कुदीति** ॥ उत्प्लवनमुत्प्लुत्य गमनम्। **इदित इति** ॥ इत् ह्रस्व इकारः इत् इत्संज्ञकः यस्य सः इदित्, तस्येति विग्रहः। इत्संज्ञकेदन्तधातोरित्यर्थः। तेन चक्षिङादौ न दोषः। नुमि मकार इत्। उकार उच्चारणार्थः। मित्वादन्त्यादचः परः। **स्कुन्दत इति** ॥ नश्चापदान्तस्येत्यनुस्वारः परसवर्णः। **चुस्कुन्द इति** ॥ लिटि द्वित्वे शर्पूर्वाः खय इत्यभ्यासे ककारश्शिष्यते। कुहोश्चुरिति तस्य कुत्वेन चकारः। **ष्विदीति** ॥ श्वैत्यम् श्वैत्यकरणम्। **अकर्मक इति** ॥ श्वैत्यस्य धात्वर्थोपसङ्ग्रहादिति भावः। ततश्च श्विन्दयति देवदत्तं यज्ञदत्त इत्यादौ गतिबुद्धिप्रत्यवसानेत्यादिना अकर्मककार्यं द्वितीया भवति। श्वेतीभवनं वा श्वैत्यम्। **ष्विन्दत इति** ॥ श्वेतीभवतीत्यर्थः। इदित्वान्नुम्। अनुस्वारपरसवर्णौ। नुमिकृते गुरुमत्वेपि इजादित्वाभावादाम् नेति भावः। **वदीति** ॥ अभिवादनं आशीर्वादः, तत्कारणभूतो व्यापारः प्रणामादिरभिवादनम्। **वन्दत इति** ॥ इदित्वान्नुम्। **ववन्द इति** ॥ नुमि कृते अकारस्य संयुक्तहल्मध्यस्थत्वादेत्वाभ्यासलोपौ नेति भावः। **भदीति** ॥ कल्याणं शुभक्रिया, सुखं सुखीभावः। **भन्दत इति** ॥ इदित्वान्नुम्। **बभन्द इति** ॥ अभ्यासे भकारस्य जश्त्वेन बकारः। नुमि अकारस्य संयुक्तहल्मध्यस्थत्वादेत्वाभ्यासलोपौ नेति भावः। **मदीति** ॥ मोदः सन्तोषः। मदः गर्वः। **मन्दत इति** ॥ इदित्वान्नुम्। **ममन्द इति** ॥ नुमि सति संयुक्तहल्मध्यस्थत्वादेत्वाभ्यासलोपौ नेति भावः। **स्पदीति** ॥ अकर्मकः। **स्पन्दत इति** ॥ इदित्वान्नुम्। **पस्पन्द इति** ॥ शर्पूर्वाः खय इत्यभ्यासे पकारः शिष्यते। **क्लिदीति** ॥ परिवेदनशब्दं व्याचष्टे। **शोक इति** ॥ स्मृत्वा क्लेशः शोकः। तदाह। **सकर्मक इति। क्लिन्दते चैत्रमिति** ॥ अतीतञ्चैत्रं स्मृत्वा क्लिश्नातीत्यर्थः। इदित्वान्नुम्। **चिक्लिन्द इति** ॥ अभ्यासे ककारस्य चुत्वेन च इति भावः। **मुदेति** ॥ हर्षः तुष्टिः। **मोदत इति** ॥ शपि लघूपधगुणः। **मुमुद इति** ॥ असंयोगाल्लिट्कितीति कित्वान्न गुणः। **ददेति** ॥ न ममेति त्यागो दानं। न तु द्रव्यत्यागः। तथा सति धात्वर्थोपसङ्ग्रहादकर्मकत्वापत्तेः।

२२६३ । न शसददवादिगुणानाम् । (६-४-१२६)

शसेर्ददेर्वकारादीनां गुणशब्देन भावितस्य च योऽकारस्तस्यैत्वाभ्यासलोपौ न । ददे । ददाते । ददिरे । 'ष्वद १८ स्वर्द १९ आस्वादने' । अयमनुभवे सकर्मकः । रुचावकर्मकः ।

२२६४ । धात्वादेः षः सः । (६-१-६४)

धातोरादेः षस्य सः स्यात् । 'सात्पदाद्योः' (८।३।१११) इति षत्वनिषेधः । अनुस्वदते । सस्वदे । स्वर्दते । सस्वर्दे । 'उर्द २० माने क्रीडायां च' ।

२२६५ । उपधायां च । (८-२-७८)

धातोरुपधाभूतयो रेफवकारयोर्हल्परयोः परत इको दीर्घः स्यात् । ऊर्दते ।

न शसददेति ॥ शस दद वादिगुण एषान्द्वन्द्वः । अवयवषष्ठी । गुणशब्देन विहित एव गुणशब्देन विवक्षितः । अन्यथा शसिदादिग्रहणवैयर्थ्यात् । अत एकहल्मध्य इत्यस्मात् अत इति, ध्वसोरेद्धावित्यतः एदिति, अभ्यासलोपइति, चानुवर्तते । तदाह । **शसेरित्यादिना** ॥ गुणशब्देनेति किम् । पेचे, अत्र पचेरकारस्य गुणत्वेपि गुणशब्देन विहितत्वाभावान्नायमिषेधः । पृधातोः पपरतुरिति तु गुणस्योदाहरणम् । गुणशब्देन विहितः यः अर् तदवयवत्वादकारस्येति बोध्यम् । **ददद इति** ॥ ददेर्लिटस्तादेशस्य णशि द्वित्वे अत एकहल्मध्य इति प्राप्तावेत्वाभ्यासलोपौ न भवतः । **ष्वद स्वर्देति** ॥ आस्वादनं अनुभवः । प्रीतिविपर्याभावात्मिका रुचिर्वा । तदाह । **अयमिति** ॥ प्रत्येकाभिप्रायमेकवचनम् । **धात्वादेरिति** ॥ ष इति षष्ठ्यन्तम् । तदाह । **धातोरादेः षस्य सस्स्यादिति** ॥ षकारस्य सः स्यादित्यर्थः । धातुग्रहणङ्किं । षट् । अत्र धात्वादित्वाभावान्न सकारः । आदिग्रहणं किम् । **लषति** ॥ न चैवमपि षकारीयतीत्यादौ सुब्धात्वादेरपि षस्य सकारः स्यादिति वाच्यम् । आदेच उपदेशेऽशितीत्यतः उपदेश इत्यनुवृत्तेः । एवञ्च षडित्यादावपि उपदेशग्रहणानुवृत्त्यैव व्यावृत्तिसिद्धेर्धातुग्रहणं भाष्ये प्रत्याख्यातम् । ननु धातुपाठे स्वदस्वर्देत्येवं सकार एव उपदिश्यताम् । एवञ्च धात्वादेष्षस्स इत्यपि मास्तु इति चेन्मैवम् । ण्यन्तात् लुङि असिष्वददित्यत्र षकारश्रवणार्थकत्वात् । धातुपाठे सकारस्यैवोपदेशे तु असिष्वददित्यत्र सकारस्य आदेशसकारत्वाभावेन षत्वासम्भवात् । नन्वेवं सति अनुस्वदत इत्यत्रादेशसकारत्वात् षत्वापत्तिरित्यत आह । **सात्पदाद्योरिति । सस्वद इति** ॥ लिटि द्वित्वे संयुक्तहल्मध्यस्थत्वादेत्वाभ्यासलोपौ नेति भावः । **उर्देति** ॥ चकारादास्वादनेपीति केचित् । **उपधायाञ्चेति** ॥ सिपि धातोरित्यतः धातोरिति । वोरुपधाया इत्यतः वोरिक इति, हलिचेत्यतः हलीति, चानुवर्तते । उपधयोरित्यर्थे उपधायामित्यार्षम् । तदाह । **धातोरित्यादि । ऊर्दत इति** ॥ अत्र धातोः रेफवान्तत्वाभावात् वोरुपधाया इत्यस्य हलिचेत्यस्य चाप्राप्तौ उपधायाञ्चेत्यारम्भः । धातोरित्यभावे पदाधिकारस्थत्वात्

ऊर्दाञ्चक्रे । 'कुर्द २१ खुर्द २२ गुर्द २३ गुद २४ क्रीडायामेव' । कूर्दते । चुकूर्दे । खूर्दते । गूर्दते । गोदते । जुगुदे । 'षूद २५ क्षरणे' । सूदते । सुषूदे ।

सेक्सृप्सृस्तृसृजस्तॄस्त्यान्ये दन्त्याजन्तसादयः ।
एकाचः षोपदेशाः ष्वक्ष्विद्स्वद्स्वञ्जिस्वपस्मिङः ॥

पदस्य उपधाभूतयोरित्यर्थः स्यात् । ततश्च क्विबन्ते ऊर्द् इत्यत्रैव स्यात् । ऊर्दत इत्यादौ न स्यात् । रेफवकारयोः किम् । पुष्यति । हल्परयोः किम् । चिरिणोति । इकः किं । नर्दति । **ऊर्दाञ्चक्र इति** ॥ इजादित्वादाम् । कृञ्चानुप्रयुज्यत इत्यनुप्रयोगः । **कुर्देति** ॥ गुदेत्यपि पृथग्धातुः । क्रीडायामेवेत्यर्थनिर्देशः । एवकारस्तु इद्वोऽन्यत्र धात्वर्थनिर्देशस्य उपलक्षणत्वं ज्ञापयति । **कूर्दत इति** ॥ उपधायाश्चेति दीर्घः । **चुकूर्द इति** ॥ कुहोश्चुरिति चुत्वम् । **खूर्दत इति** ॥ उपधायाश्चेति दीर्घः । एवं गूर्दत इति । गोदत इति । शपि लघूपधगुणः । **जुगुद इति** ॥ असंयोगादिति कित्वान्नगुणः । **षूदेति** ॥ क्षरणं प्रस्रवणम् । **सूदत इति** ॥ प्रस्रवतीत्यर्थः । धात्वादेरिति षस्य सः । अलघूपधत्वान्न गुणः । **सुषूद इति** ॥ धात्वादेरिति षस्य सत्वे लिटि द्वित्वादौ इणः परस्यादेशसकारत्वात् षत्वम् । यदि धातुपाठे सकारस्यैव पाठः तर्हि इहादेशसकारत्वाभावात् षत्वं न स्यात् । षोपदेशे तु षस्य सत्वे सति आदेशसकारत्वात् षत्वं सूपपादमिति भावः । ननु धातुपाठे के धातवष्षादयः पठिताः, के वा सादयः । पाणिनिकृतषोपदेशपाठस्य इदानीम्परिभ्रष्टत्वादित्याशङ्क्य पाणिनीयपरम्परासिद्धान् षोपदेशान् पठति । सेगिति श्लोकेन । दंत्याजन्तसादय एकाचः षोपदेशास्स्युरित्यन्वयः । दंत्यश्च अच्च दंत्याचौ तौ अन्तौ अव्यवहितपरौ यस्य सः दंत्याजन्तः तथाविधः षः षकारः आदिर्येषान्ते दंत्याजन्तषादयः । दंत्यपरकः अच्परकश्च यः षकारः तदादय एकाचो धातवः इदानीं कृतसत्वास्सकारादित्वेन परिदृश्यमाना अपि षकारादित्वेन पाणिनिना उपदिष्टाः प्रत्येतव्या इत्यर्थः । सादय इति पाठेप्येवमेव व्याख्येयम् । अज्दंत्यपराः षादयष्षोपदेशा इति भाष्यम् । षूद क्षरणे इत्यादयः अच्परकषोपदेशाः । ष्टा गतिनिवृत्तावित्यादयस्तु दंत्यपरकषोपदेशाः । दंत्याजन्तेति किम् । स्कुदि आप्रवणे । चुस्कुन्दे । अत्र सकारो न दंत्यपरकः नाप्यच्परकः । एकाचः किम् । सोसूत्र्यते । सूत्र वेष्टने, चुरादिरजन्तः अनेकाच् । यद्यप्येकाच इति भाष्ये न दृश्यते । तथापि यङ्विधौ सोसूच्यत इति भाष्यन्तत्र मानामिति भावः । एवञ्च साध संसिद्धौ, इत्यादौ सकारपाठस्यैव दृश्यमानत्वेऽपि षोपदेशत्वमेव । ननु सेकृ गतौ, सृप्लृ गतौ, सृ गतौ, सृज विसर्गे, एते चत्वारः अच्परकसादयः, स्तृञ् आच्छादने, ऋदन्तः श्नुविकरणः । स्तृञ् आच्छादने ऋदन्तः श्नाविकरणः, स्त्यै शब्दसङ्घातयोः, एते त्रयः दंत्यपरकसादयः । एतेषां सप्तानामपि षोपदेशत्वं स्यादित्यतिव्याप्तिमाशङ्क्य तद्विनत्वं विशेषणमाह । **सेक् सृप् सृ स्तृ सृज स्तृ स्त्या न्ये इति** ॥ स्त्यै धातोः कृतात्वस्य निर्देशः श्लोके समावेशार्थः । स्त्यै इत्यैकारान्तस्य निर्देशे स्त्यायन्य इत्येकस्याक्षरस्याधिक्यापत्तेः । नन्वेवमपि ष्वक्ष गतौ, ष्विदा गात्रप्रस्रवणे, ष्वद आस्वादने, ष्वञ्ज परिष्वङ्गे, ष्विष्वप् शये, ष्मिङ् ईषद्धसने, इत्येतेषु सकारस्य दंत्यपरकत्वाभावात् अच्परकत्वाभावाच्च षोपदेशेष्वसङ्ग्रहः स्यादित्यव्याप्तिमाशङ्क्य तानपि संगृण्हाति । **ष्वक्क् ष्विद् ष्वद् स्वञ्जि स्वपि**

दन्त्यः केवलदन्त्यो न तु दन्तोष्ठजोऽपि। ष्वष्कादीनां पृथग्ग्रहणाज्ज्ञापकात्। 'ह्लाद २६ अव्यक्ते शब्दे'। ह्लादते। जह्लादे। 'ह्लादी २७ सुखे च'। चाद-व्यक्ते शब्दे। ह्लादते। 'स्वाद २८ आस्वादने'। 'पर्द २९ कुत्सिते शब्दे'। गुदरव इत्यर्थः। पर्दते। 'यती ३० प्रयत्ने'। यतते। येते। 'युतृ ३१ जुतृ ३२ भासने'। योतते। युयुते। जोतते। जुजुते 'विथृ ३३ वेथृ ३४ याचने'। विविथे। विवेथे। 'श्रथि ३५ शैथिल्ये'। श्रन्थते। ग्रथि ३६ कौटि-ल्ये'। ग्रन्थते। 'कत्थ ३७ श्लाघायाम्'। कत्थते। एधादयोऽनुदात्ततो गताः।

अथाष्टात्रिंशत्तवर्गीयान्ताः परस्मैपदिनः। 'अत ३८ सातत्यगमने'। अतति। 'अत आदेः' (२२४८)। आत। आततुः। आतुः। लुङि 'आतिस् 'ई' इति स्थिते।

स्सिङ इति ॥ अपीति शेषः। ननु स्तृ शब्दोपतापयोरित्यादीनामपि दन्त्यवकारपरकत्वात् षोप-देशत्वं स्यादित्यत आह। दन्त्यः **केवलदन्त्य इति** ॥ कुत इत्यत आह। **ष्वष्कादीना-मिति** ॥ अन्यथा दंत्यपरकत्वादेव सिद्धे ष्वष्कादिग्रहणं व्यर्थं स्यादिति भावः। यद्यपि ष्वष्क-तिरत्र भाष्ये न दृश्यते तथापि सुष्वातुष्टिवुष्वष्कतीनां षत्वप्रतिषेध इति वार्तिकात्तल्लाभ इति भावः। **ह्लादेति** ॥ रेफवानयम्। अव्यक्तशब्दः अमनुष्यवाक्। **जह्लाद इति** ॥ अभ्यासस्य ह्रस्वः चुत्वम्। **ह्लादीति** ॥ लकारवानयम्। श्वीदितोनिष्ठायामिति इण्णिषधार्थमात्वम्। **स्वादेति** ॥ केवलदंत्यपरकत्वाभावान्नायं षोपदेशः असिस्वदत्। **पर्देति** ॥ गुदरव इत्यर्थः। **यतीति** ॥ ईदित्वमिण्णिषेधार्थम्। **येते इति** ॥ अतएकहल्मध्य इत्येत्वाभ्यासलोपौ। युतृ जुतृ इति ऋदित्वम् नाग्लोपिशास्वृदितामित्यार्थम्। **योतत इति** ॥ शपि लघूपधगुणः। **युयुत इति** ॥ असंयोगादिति कित्वान्न गुणः। **विथृवेथृ इति** ॥ द्वितीयान्तावमौ। ननु विथृ इत्येवास्तु। लघूपधगुणे सति वेथत इत्यस्याविशिष्टत्वादित्यत आह। **विविथे, विवेथ इति** ॥ वेथृधातोर्विवेथ इति रूपम्। विथृधातोस्तु असंयोगादिति कित्वात् गुणाभावे विविथ इति रूपमिति भावः। **श्रथीति** ॥ द्वितीयान्तः शैथिल्यम् स्रंसनम्। श्रन्थत इति इदित्वान्नुम्। **ग्रथीति** ॥ द्वितीयान्तः। कौटिल्यम् वक्रीभवनम्। **ग्रन्थत इति** ॥ इदित्वान्नुम्। **कत्थेति** ॥ अविद्यमानगुणज्ञापनं श्लाघा। **अथाष्टात्रिंशदिति** ॥ अष्टौ च त्रिंशदिति द्वन्द्वः अष्टाधिकात्रिंशदिति वा। ब्यष्टनस्सङ्ख्यायामित्यात्वम् अष्टात्रिंशदिति पाठे तु अष्टेति पृथक्पदम्। **परस्मैपदिन इति** ॥ अनुदात्तस्वरितञित्वाभावात्तेषात् कर्तरीति परस्मैपदिन एवेति भावः। **अतेति** ॥ सातत्यगमनं सन्ततगमनम्। लिटि णलि द्वित्वे हलादिशेषे अ अत् अ इति स्थिते पररूपे प्राप्ते आह। **अत आदेरिति** ॥ इति दीर्घ इति शेषः। तथा च अभ्यासाका-रस्य दीर्घे सति सवर्णदीर्घः। तदाह। **आतेति** ॥ अकारस्य हल्मध्यस्थत्वाभावादेत्वाभ्या-सलोपौ न। **लुङीति** ॥ अतधातोर्लुङस्तिपि इतश्चेति इकारलोपे च्लेः सिचि तस्य इडागमे

२२६६ । इट ईटि । (८-२-२८)

इटः परस्य सस्य लोपः स्यादीटि परे ।
सिज्लोप एकादेशे सिद्धो वाच्यः ।
आतीत् । आतिष्टाम् । आतिषुः ।

२२३७ । वदव्रजहलन्तस्याचः । (७-२-३)

वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचः स्थाने वृद्धिः स्यात्सिचि परस्मैपदेषु । इति प्राप्ते ।

२२६८ । नेटि । (७-२-४)

इडादौ सिचि प्रागुक्तं न स्यात् । मा भवानतीत् । अतिष्टाम् । अतिषुः । 'चिती ३९ संज्ञाने' । चेतति । चिचेत । अचेतीत् । अचेतिष्टाम् । अचेतिषुः । 'च्युतिर् ४० आसेचने' । आसेचनमार्द्रीकरणम् । आङीषदर्थेऽभिव्याप्तौ च ।

अस्ति सिचोऽपृक्त इति ईडागमे आटि वृद्धौ आतिस् ई त् इति स्थिते सतीत्यर्थः । **इटईटीति** ॥ इट इति पञ्चमी रात्सस्येत्यतः सस्येति संयोगान्तस्येत्यतो लोप इति चानुवर्तते तदाह । **इटः परस्येति** ॥ एवञ्च आति स् ई त् इति स्थिते सकारस्य लोपे आति ई त् इति स्थिते सवर्णदीर्घे आतीदिति रूपम् वक्ष्यति । तत्र सलोपस्यासिद्धत्वात् कथं सवर्णदीर्घ इत्यत आह । **सिज्लोप एकादेशे सिद्धो वक्तव्य इति । आतिष्टामिति** ॥ लुङस्तस् । तस्य ताम् । च्लेः सिच् । तस्य इटि आटि वृद्धौ षत्वम् । अपृक्तत्वाभावेन ईडभावात् सलोपो न । **आतिषुरिति** ॥ लुङो झिः । च्लेः सिच् । जुस् इट् आट् वृद्धिः षत्वं रुत्वविसर्गौ । आतीः । आतिष्टम् । आतिष्ट । आतिषम् । आतिष्व । आतिष्म । अत्र वृद्धिमाशङ्कितुमाह । **वदव्रजेति** ॥ वद व्रज हलन्तः एषां समाहारद्वन्द्वात् षष्ठ्येकवचनम् । अङ्गस्येत्यधिकृतम् । सिचि वृद्धिः परस्मैपदेष्वित्यनुवर्त्तते । तदाह । **वदेत्यादिना** ॥ हलन्तत्वादेव सिद्धे वदव्रजग्रहणन्तु अवादीदव्राजीदित्यत्र अतोहलादेर्लघोरिति वृद्धिविकल्पबाधनार्थम् । **नेटीति । प्रागुक्तस्येति** ॥ वदव्रजहलन्तस्याच इत्युक्तं नेत्यर्थः । तत्र वदव्रजयोर्विशिष्य विधानात् हलन्तलक्षणाया एव वृद्धेर्निषेधोऽयम् । हलन्तलक्षणा वृद्धिस्तु अधाक्षीदित्यादावनिडादौ सिचि चरितार्था । नन्वातीदित्यादौ अकारस्य वृद्धौ सत्यामसत्याञ्च आटा एकादेशे सति रूपे विशेषाभावात् किन्तन्निषेधेनेत्याशङ्क्येत्याह । **माभवानतीदिति** ॥ माङ्योगे आडभावे सति वृद्धिनिषेधः सफल इति भावः । **चितीति** ॥ ईदित्वं श्वीदितो निष्ठायां इति इण्निषेधार्थम् । **चेततीति** ॥ शपि लघूपधगुणः । **चिचेतेति** ॥ तिबादेः शणलः पित्त्वेन असंयोगादिति कित्त्वस्याप्रवृत्तेः न गुणनिषेधः चिचितुरित्यादौ तु कित्त्वान्न गुणः । **अचेतीदिति** ॥ इट ईटीति सलोपः । **अचेतिष्टामिति** ॥ अपृक्तत्वाभावादीडभावान्नसिज्लोपः । नेटीति निषेधान्न हलन्तलक्षणा वृद्धिः । **च्युतिरिति** ॥ अत्र इकारस्य रेफस्य

इर इत्संज्ञा वाच्या ।

च्योतति । चुच्योत ।

२२६९ । इरितो वा । (३-१-५७)

इरितो धातोश्च्लेरङ् वा स्यात्परस्मैपदे परे । अच्युतत्—अच्योतीत् । 'च्युतिर् ४१ क्षरणे' । च्योतति । चुच्योत । अच्युतत्—अच्योतीत् । यकाररहितोऽप्ययम् । श्योतति । 'मन्थ ४२ विलोडने' । विलोडनं प्रतिघातः । मन्थति । ममन्थ । यासुटः 'किदाशिषि (२२१६) इति कित्त्वात् 'अनिदिताम्—' (४१५) इति नलोपः । मथ्यात् । 'कुथि ४३ पुथि ४४ लुथि ४५ मथि ४६ हिंसासंक्लेशनयोः' । इदित्त्वान्नलोपो न । कुन्थ्यात् । पुन्थ्यात्, लुन्थ्यात्, मन्थ्यात् 'षिधु ४७ गत्याम्' सेधति । सिषेध । सेधिता । असेधीत् । सात्पदाद्योः' (५१२३) इति षत्वनिषेधे प्राप्ते ।

च प्रत्येकमित्संज्ञायामिदित्वान्नुमि प्राप्ते आह । **इर इत्संज्ञेति** ॥ तथाच इर् इति समुदायस्य इत्संज्ञकत्वादिदित्वाभावान्ननुमिति भावः । **च्योततीति** ॥ लघूपधगुणः । **चुच्योतेति**॥ णलः पित्त्वेन कित्त्वाभावान्न गुणनिषेध इति भावः । चुच्युततुरित्यादौ तु कित्त्वान्न गुणः । लुङि च्लेः सिचि प्राप्ते । **इरितो वेति** ॥ धातोरेकाच इत्यतो धातोरिति च्लेः सिजित्यतः च्लेरिति अस्यति वक्तिख्यातिभ्य इत्यतः अङिति पुषादिद्युताद्रित्यतः परस्मैपदेष्विति चानुवर्तते । तदाह । **इरितो धातोरित्यादिना** । **अच्युतदिति** ॥ अङि सति डित्त्वान्नगुणः । अच्युतताम् अच्युतन् अच्युतः अच्युततम् अच्युतत अच्युतम् अच्युताव अच्युताम । अङभावे त्वाह । **अच्योतीदिति** ॥ इट ईटीति सिज्लोपः । **अच्योतिष्टामित्यादि** । **च्युतिरिति** ॥ च्युतिवद्रूपाणि । **चुच्योतेति** ॥ शर्पूर्वा इति चकारः शिष्यते । **यकाररहितोपीति** ॥ मधुश्चुतंघृतमिव सुपूतमित्यादौ दर्शनादिति भावः । **मन्थेति** ॥ विलोडनमास्फालनम् । **मन्थतीत्यादि** ॥ सुगमम् । आशीर्लिङि विशेषमाह । **यासुट इति** । **कुथीति** ॥ चत्वारोऽपि द्वितीयान्ताः । इदित्वान्नुमि कुन्थतीत्यादि सुगमम् । आशीर्लिङि यासुटः कित्त्वेऽपि इदित्त्वेन अनिदितामिति पर्युदासात् नलोपो नेत्याह । **इदित्त्वादिति** । **कुन्थ्यादिति** ॥ पुन्थ्यात् लुन्थ्यात् मन्थ्यात् । एतदर्थमेव मन्थधातोः पृथक् मथीति निर्देशः । **षिधगत्यामिति** ॥ अच्परकषकारादित्वात् षोपदेशोऽयम् । ततश्च धात्वादेरिति सः । तदाह । **सेधतीति** । **सिषेधेति** ॥ आदेशसकारत्वात् षत्वम् । अनिट्सु श्यन्विकरणस्यैव सिधेर्ग्रहणात् सेट्कोऽयम् । **असेधीदिति** ॥ इट ईटीति सिज्लोपः । नेटीति निषेधात् न हलन्तलक्षणा वृद्धिः । **असेधिष्टामित्यादि** ॥ अथ निषेधतीत्यादौ उपसर्गात्सुनोतीति षत्वं वक्ष्यति । तत्किमर्थं आदेशप्रत्यययोरित्येव सिद्धेरित्या

२२७० । उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनय-सेधसिचसञ्जस्वञ्जाम् । (८-३-६५)

उपसर्गस्थान्निमित्तादेषां सस्य षः स्यात् ।

२२७१ । सदिरप्रतेः । (८-३-६६)

प्रतिभिन्नादुपसर्गात्सदेः सस्य षः स्यात् ।

२२७२ । स्तन्भेः । (८-३-६७)

सौत्रस्य सस्य षः स्यात् । योगविभाग उत्तरार्थः । किंच 'अप्रतेः' इति नानुवर्तते । 'बाहुप्रतिष्टम्भविवृद्धमन्युः' इति ।

२२७३ । अवाच्चालम्बनाविदूर्ययोः । (८-३-६८)

अवात्स्तन्भेरेतयोरर्थयोः षत्वं स्यात् ।

शङ्कयाह । **सात्पदाद्योरिति** ॥ उपसर्गात्सुनोतीति । **उपसर्गस्थादिति** ॥ उपसर्गशब्द उपसर्गस्थे लाक्षणिक इति भावः । **निमित्तादिति** ॥ इण्रूपादित्यर्थः । इण्कोरित्यधिकारेऽपि कोरिति नात्र सम्बध्यते। असम्भवात् । **सस्येति** ॥ सहेः साढः स इत्यतः स इति षष्ठ्यन्तमनुवर्तत इति भावः । **षः स्यादिति** ॥ अपदान्तस्य मूर्धन्य इत्यधिकारादिति भावः । अत्र सुनोतीत्यादिरितिपानिर्देशो यङ्लुङ्लिनिवृत्त्यर्थ इति प्राञ्चः । स्पष्टार्थ इति प्रौढमनोरमायाम् । सेनयेति णिजन्तो नामधातुः। सेधतीति शपानिर्देशात् सिध्यतेर्न ग्रहणम् । अभिषुणोतीत्यादुदाहरणं । प्रकृते निषेधतीत्यादावर्थमिह सूत्रोपन्यासः। प्रसङ्गादाह । **सदिरप्रतेरिति** ॥ उपसर्गादिति ॥ उपसर्गस्थादिणःपरस्येत्यर्थः । **सदिरिति** ॥ षष्ठ्यर्थे प्रथमेत्यभिप्रेत्याह। **सदेस्सस्येति** ॥ निषीदतीत्युदाहरणम्। **स्तन्भेरिति** ॥ नकारोपधनिर्देशस्य प्रयोजनमाह । **सौत्रस्येति** ॥ स्तन्भु स्तुन्भु इति सूत्रनिर्दिष्टस्य नोपधस्येत्यर्थः । सहि प्रतिपदोक्तः । ष्टभि प्रतिबन्ध इत्यस्य तु धातोरिदित्वान्नुमि लाक्षणिकत्वान्न ग्रहणम् । तेन विस्तम्भत इत्यादौ न षत्वम् । उदस्थास्तम्भ्वोरिति सूत्रे तु मोपधग्रहणादुभयोरपि ग्रहणम् । मकारस्य उभयत्रापि लाक्षणिकत्वात् । ननु सदिस्तन्भ्योरप्रतेरित्येकमेव सूत्रं कुतो न कृतमित्यत आह । **योगविभाग उत्तरार्थ इति** ॥ अवाच्चालम्बनाविदूर्ययोरित्युत्तरसूत्रे सदेरननुवृत्त्यर्थ इत्यर्थः । ननु सदेरखरितत्वादालम्बनाविदूर्ययोर्वृत्त्यभावादेवच अनुवृत्त्यभावः सिद्ध इत्यस्वारस्यादाह । **किञ्चेति । नानुवर्तत इति** ॥ स्तन्भेरित्यत्र अप्रतेरित्यस्य अनुवृत्तिर्नेष्टा । एकसूत्रत्वे तु अप्रतेरित्यस्य स्तन्भिनाऽपि सम्बन्धः स्यादिति भावः । अप्रतेरित्यस्य स्तन्भावनन्वयो वृद्धप्रयोगानुगत इत्याह । **बाहुप्रतिष्टम्भेति । अवाच्चेति** ॥ आलम्बनञ्च आविदूर्यञ्चेति

२२७४ । वेश्च स्वनो भोजने । (८-३-६९)

व्यवाभ्यां स्वनतेः सस्य षः स्याद्भोजने ।

२२७५ । परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्रुञाम् । (८-३-७०)

परिनिविभ्यः परेषामेषां सस्य षः स्यात् । निषेधति ।

२२७६ । प्राक्सितादड्व्यवायेऽपि । (८-३-६३)

'–सेवसित–' (२२७५) इत्यत्र सितशब्दात्प्राक् ये सुनोत्यादयस्तेषामड्व्यवायेऽपि षत्वं स्यात् । न्यषेधत् न्यषेधीत् । न्यषेधिष्यत् ।

२२७७ । स्थादिष्वभ्यासेन चाभ्यासस्य । (८-३-६४)

प्राक्सितात्स्थादिष्वभ्यासेन व्यवायेऽपि षत्वं स्यात् । एषामेवचाभ्यासस्य न तु सुनोत्यादीनाम् । निषिषेध । निषिषिधतुः ।

द्वन्द्वात्सप्तमीद्विवचनम् । **एतयोरिति** ॥ आलम्बनाविदूर्ययोरर्थयोर्विद्यमानस्य अवात्परस्य स्तन्भेरित्यन्वयः । अपूर्वविधिरयम् । इणः परत्वाभावादप्राप्तेः । आलम्बने यथा । यष्टिमवष्टभ्य तिष्ठतीति । आश्रित्येत्यर्थः । आविदूर्यं सामीप्यम् । अवष्टब्धा गौः । निरुद्धा सती समीपे आस्त इत्यर्थः । **वेश्चेति** ॥ अवादित्यनुकर्षणार्थश्चकारः । तदाह । **व्यवाभ्यामिति** ॥ विष्वणति । अवष्वणति । सशब्दम्भुङ्क्ते इत्यर्थः । अट्कुप्वाङिति णत्वम् । **परिनिविभ्य इति** ॥ सेवेत्यकार उच्चारणार्थः । षेवृ सेवायामितिधातोर्ग्रहणम् । परिषेवते । निषेवते । विषेवते । सितेत्यनेन षिञ् बन्धन इति क्तान्तस्य ग्रहणम् । अस्यैव धातोः एरजन्तो वा पचाद्यजन्तो वा सयशब्दः । विषितः विषयः । षिवु तन्तुसन्ताने परिषीव्यति । षह मर्षणे परिषहते । सुडागमः । परिष्करोति । स्तुस्वञोरुपसर्गात् सुनोतीत्येव सिद्धे सिवादीनां वेति विकल्पार्थम्पुनर्वचनम् । **प्राक्सितादिति** ॥ **सुनोत्यादय इति** ॥ उपसर्गात्सुनोतीत्यादिसूत्रेोपात्ता इति शेषः । **तेषामिति** ॥ पञ्चदशानामित्यर्थः । **न्यषेधदिति** ॥ अकारेण व्यवहितत्वादिणः परत्वाभावादप्राप्तौ वचनम् । अभ्यषुणोदित्यप्युदाहार्यम् । **स्थादिष्विति** ॥ अभ्यासेनेति तृतीयान्तम् प्राक्सितादित्यनुवर्तते । तदाह । **प्राक्सितादिति** ॥ उपसर्गात्सुनोतीति सूत्रे स्थाधातुमारभ्य परिनिविभ्यःसेवसितेत्यत्र सितशब्दात्प्राक् ये धातव उपात्ताः तेषु दशस्वित्यर्थः । निषिषेधेत्यादौ अभ्यासात्परस्य सस्य अभ्यासव्यवहितत्वेन उपसर्गात्परत्वाभावादप्राप्तौ वचनम् । ननु निषिषेधेत्यादौ अभ्यासस्थसकारस्य उपसर्गात्सुनोतीत्यनेनैव सिद्धत्वादभ्यासस्येति व्यर्थमित्याशङ्क्य नियमार्थमित्याह । **एषामेवेति** ॥ यद्यभ्यासस्थसकारस्य चेत् षत्वं तर्हि स्थादिदशानामेवेत्यर्थः । एवञ्च षूप्रेरणे अभिसुसूषति । अत्राभ्यासस्य न षत्वम् । अभ्यासात्परस्य तु सस्य

२२७८। सेधतेर्गतौ। (८-३-११३)

गत्यर्थस्य सेधतेः न षत्वं स्यात्। गङ्गां विसेधति। 'षिधू ४८ शास्त्रे माङ्गल्ये च'। शास्त्रं शासनम्।

२२७९। स्वरतिसूतिसूयतिधूञूदितो वा। (७-२-४४)

स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्येड्वा स्यात्।

२२८०। झषस्तथोर्धोऽधः। (८-२-४०)

झषः परयोस्तथोर्धः स्यान्न तु दधातेः। जश्त्वम्। सिषेद्ध–सिषेधिथ। सेद्धा–सेधिता। सेत्स्यति–सेधिष्यति। असैत्सीत्।

स्तौतिण्योरेवेति नियमान्नषत्वम्। **सेधतेरिति। नषत्वमिति** ॥ नरपरेत्यतो नेत्यनुवृत्तेरिति भावः। गङ्गां विसेधतीति ॥ गच्छतीत्यर्थः। इह उपसर्गात्सुनोतीति षत्वन्न भवति। अनन्तरस्येति न्यायेन उपसर्गात्सुनोतीत्यस्यैवायन्निषेधः। नत्वादेशप्रत्यययोरित्यस्यापि। तेन सिषेधेत्यादौ आदेशप्रत्यययोरिति षत्वम्भवत्येव। षिधू इति ॥ ननु वाक्यसङ्गविशेषात्मकस्य शास्त्रस्य अक्रियारूपत्वात्कथं धात्वर्थत्वमित्यत आह। **शास्त्रं शासनमिति** ॥ माङ्गल्यन्तु शुभकर्म। षिधगत्यामितिवदस्यापि रूपाणि। तत्र वलादावार्धधातुके नित्यमिटि प्राप्ते। **स्वरतीति**॥ आर्धधातुकस्येड्वलादेरित्यनुवर्तते। स्वरति सूति सूयति धूञ् ऊदित् एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम्। फलितमाह। **स्वरत्यादेरिति** ॥ स्वरतीति स्वृधातोः शपा निर्देशः। सूतीति सूयतीति च लुग्विकरणस्य श्यन्विकरणस्यच सूधातोर्निर्देशः। एवञ्च षू प्रेरण इति तौदादिकस्य न ग्रहणम्। धूञ् कम्पने। स्वादिः क्र्यादिश्च। ञकारानुबन्धनिर्देशात्। धू विधूनन इत्यस्य न ग्रहणम्। इट्सनिवेत्यतो वेत्यनुवर्तमाने वा ग्रहणं लिङ्सिचोरात्मनेपदेष्विति विकल्पनिवृत्त्यर्थमिति भाष्यम्। एवञ्च थलि इडभावपक्षे द्वित्वादौ सिसेधू थ इति स्थिते। **झषस्तथोरिति** ॥ झष इति पञ्चमी। तश्च थ्चेति द्वन्द्वः। तकारादकार उच्चारणार्थः। तकारथकारयोरिति लभ्यते। धः इति प्रथमैकवचनम्। अकार उच्चारणार्थः। धकार इति लभ्यते। अध इति षष्ठ्यन्तम्। धाधातुभिन्नस्येति लभ्यते। तदाह। **झषः परयोरिति। जश्त्वमिति** ॥ सिसेध् ध इति स्थिते झलाञ्जश् झशीति प्रथमधकारस्य दकारे सिषेद्धेति रूपमित्यर्थः। सिषिधिव सिषिध्व सिषिधिम सिषिध्म। क्रादिनियमस्तु नेड्वशीति प्रक्रमान्नञ्प्रापितस्यैवाभावस्य निवर्तकः। ननु विभाषादिप्रापितस्यापि। अनन्तरस्येति न्यायात्। इट्पक्षे आह। **सिषेधिथेति। सेद्धेति** ॥ लुट् तास् इडभावः डाटिलोपः गुणः धत्वं। सेद्धारौ सेद्धार इत्यादि। **सेधितेति** ॥ इट्पक्षे रूपम्। सेत्स्यति सेधिष्यतीति॥ लृटि स्यः इड्विकल्पः। **असौत्सीदिति**॥ लुङस्तिप् इकारलोपः च्लिः सिच् इडभावः अस्तिसिच इति ईट् वदव्रजेति वृद्धिः धकारस्य चर्त्वम्। असैध् स् तामिति स्थिते। अपृक्त-

२२८१ । झलो झलि । (८-२-२६)

झलः परस्य सस्य लोपः स्याज्झलि । असैद्धाम् । असैत्सुः । असैत्सीः । असैद्धम् । असैद्ध । असैत्सम् । असैत्स्व । असैत्स्म । पक्षे असेधीत् । असेधिष्टामित्यादि । 'खाद ४९ भक्षणे' । ऋकार इत् । खादति । चखाद । 'खद ५० स्थैर्ये हिंसायां च' । चाद्भक्षणे । स्थैर्येऽकर्मकः । खदति ।

२२८२ । अत उपधायाः । (७-२-११६)

उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे । चखाद ।

२२८३ । णलुत्तमो वा । (७-१-९१)

उत्तमो णल्वा णित्स्यात् । चखाद—चखद ।

२२८४ । अतो हलादेर्लघोः । (७-२-७)

हलादेर्लघोरकारस्येडादौ परस्मैपदे परे सिचि वृद्धिर्वा स्यात् । अखादीत्—अखदीत् । 'बद ५१ स्थैर्ये' । पवर्गीयादिः । बदति । बबाद । बेदतुः । बेदिथ ।

त्वाभावादीडभावादिडभावाच्च, इट ईटीति सिचो लोपे अप्राप्ते । **झलोझलीति** ॥ झल इति पञ्चमी। संयोगान्तस्येत्यतो लोप इति, रात्सस्येत्यतः सस्येतिचानुवर्तते। तदाह । **झलः परस्य सस्य लोपः स्यादिति** । **असैद्धामिति** ॥ असैध् स् तामिति स्थिते सलोपे धत्वे जश्त्वे च रूपम् । **पक्ष इति** ॥ इट्पक्षे इत्यर्थः । **असेधीदिति** ॥ इट ईटीति सलोपः। नेटीति वृद्धिप्रतिषेधः। लघूपधगुणः। **खाद इति** ॥ अत्र ऋदित्वन्नाग्लोपीत्याद्यर्थमित्यभिप्रेत्याह । ऋकार इदिति ॥ **खदेति** ॥ स्थैर्यम् स्थिरीभवनम् । णलि अजन्तत्वाभावादचोञ् णितीति वृद्धेरप्राप्तौ । **अत उपधायाः इति । वृद्धिः स्यादिति** ॥ मृजेर्वृद्धिरित्यतः तदनुवृत्तेरिति भावः । **ञिति णिति चेति** ॥ अचोञ्णितीत्यतः तदनुवृत्तेरिति भावः । **चखादेति** ॥ एत्वाभ्यासलोपौ तु नात्र भवतः । पित्वे अकित्त्वात् आदेशादित्वात् तदपेक्षया वृद्धेः परत्वाच्च । **णलुत्तम इति । णित् स्यादिति** ॥ गोतोणिदित्यतस्तदनुवृत्तेरिति भावः । **चखाद चखदेति** ॥ णित्त्वे उपधावृद्धिः। तदभावे न । **अतो हलादेरि ति** ॥ सिचि वृद्धिः परस्मैपदेष्वित्यनुवर्तते । नेटीत्यस्मादिटीति ऊर्णोतेर्विभाषेत्यतो विभाषेति च । तदाह । **हलादेरिति** ॥ हलाद्यङ्गावयवस्येत्यर्थः । आदिग्रहणं स्पष्टार्थम् । हलः परस्येत्येव सिद्धेः । **अखादीदखदीत् इति** ॥ वृद्धौ तदभावे च इटईटीति सिज्लोपः । अखादिष्टामखदिष्टामित्यादि । **बदेति** ॥ स्थैर्यम् स्थिरीभवनम् । **पवर्गीयादिरिति** ॥ पवर्गतृतीयादिरित्यर्थः । नतु दंल्योष्ठ्यादिरिति भावः । **बबादेति** ॥ अत उपाधाया इति वृद्धिः । **बेदतुरिति** ॥ अभ्यासजश्त्वेन आदेशादित्वेऽपि जश्त्वस्य वैरूप्यापादकत्वाभावादेत्वाभ्यासलोपाविति भावः । **बबादेत्यत्र तु**

बबाद–बबद । अबादीत्–अबदीत् । 'गद ५२ व्यक्तायां वाचि' । गदति ।

२२८५ । नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिव-पतिवहतिशाम्यतिचिनोतिदेग्धिषु च । (८-४-१७)

उपसर्गस्थान्निमित्तात्परस्य नेर्णः स्याद्गदादिषु । प्रणिगदति । जगाद । 'रद ५३ विलेखने' । विलेखनं भेदनम् । रराद । रेदतुः । 'णद ५४ अव्यक्ते शब्दे ।

२२८६ । णो नः । (६-१-६५)

धातोरादेर्णस्य नः स्यात् । नदति ।

णोपदेशास्त्वनर्दीटिनाथ्नाध्नन्द्रक्कनृनृतः ।

नाटेर्दीर्घार्हस्य पर्युदासाद्धटादिर्णोपदेश एव । तवर्गचतुर्थान्तनाधतेर्नृनन्द्योश्च केचिण्णोपदेशतामाहुः ।

पित्वेन कित्वाभावादेत्वाभ्यासलोपौ न । **बेदिथेति** ॥ अकित्वेऽपि थलिचसेटीत्येत्वाभ्यासलोपौ । बेदथुः । बेद । अथ उत्तमपुरुषणलि णलुत्तमोवेति णित्वविकल्पादुपधावृद्धिविकल्प इत्याह । **बबाद बबदेति** ॥ बेदिव बेदिम । **अबादीत् अबदीत् इति** ॥ अतो हलादेरिति वृद्धिविकल्पः । **गदेति** ॥ व्यक्तवाक् मनुष्यकृतशब्दप्रयोगः । **जगादेति** ॥ चुत्वजश्त्वे । उपधावृद्धिः । वैरूप्यापादकादेशादित्वादेत्वाभ्यासलोपौ न । जगदतुः जगदुरित्यादि । **नेर्गदेति** ॥ षाभ्यां नोण इत्यनुवर्तते । उपसर्गादसमासेऽपीत्यत उपसर्गादिति च । तच्च उपसर्गस्थे लाक्षणिकम् । तदाह । **उपसर्गस्थादिति** ॥ श्तिपा शपाच निर्देशाः यङ् लुग्निवृत्त्यर्थाः । **प्रणिगदतीति** ॥ भिन्नपदस्थत्वादप्राप्तौ वचनम् । **रदेति** ॥ णलि उपधावृद्धिमभिप्रेत्याह । **रराद्देति** ॥ रेदतुरित्यादि । अरादीत् । अरदीत् । **णदेति** ॥ अव्यक्तशब्दः अमनुष्यपशुपक्ष्यादिकृतशब्दप्रयोगः । **णोन इति** ॥ णइति षष्ठ्यन्तम् । धात्वादेः षस्स इत्यतोऽनुवर्तनादाह । **धातोरादेरिति** ॥ तेन अणतीत्यादौ ननत्वम् । **नस्स्यादिति** ॥ नकारः स्यादित्यर्थः । **नदतीति** ॥ मेघादिरिति शेषः । णोन इति नत्वस्यानैमित्तकतया लिणिमित्तादेशादित्वाभावादेत्वाभ्यासलोपौ स्तएव । ननाद नेदतुरित्यादि । अथ नृत्तनर्दनन्दनक्कनाट्नाथृनाधृनृवर्जम् णोपदेशा इति भाष्यं श्लोकार्धेन सङ्गृह्णाति । **णोपदेशास्त्विति** ॥ नर्दशब्दे । नट अवस्पन्दने चुरादिः । नाथृ नाधृ याच्ञादौ । द्वितीयचतुर्थान्तौ । टुनदि समृद्धौ । नक्क नाशने नृ नये । नृती गात्रविक्षेपे । एभ्योऽष्टभ्योऽन्ये णकारादिधातवः इदानीं नकारादित्वेन दृश्यमाना अपि नत्वसम्पन्ननकारादितया णोपदेशाः प्रत्येतव्या इत्यर्थः । नाटीतिण्यन्तस्य प्रयोजनमाह । **नाटेरिति** ॥ **घटादिरिति** ॥ नट नृत्ताविति घटादिपठित इत्यर्थः । तत्फलं घटादौ वक्ष्यते । मतान्तरमाह । **तवर्गेति** ॥ तवर्गचतुर्थान्तनाधधातोः नृनन्द्योश्च णोपदेशेषु पर्युदासाभावमङ्गीकृत्य तेषामपि णोपदेशत्वमाहुरित्यर्थः । अत्र मते पञ्चभ्यो भिन्ना णोपदेशा इति फलितम् । भाष्यविरोधोऽत्रारुचिबीजम् । ननु

२२८७ । उपसर्गादसमासेऽपि णोपदेशस्य । (८-४-१४)

उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेऽसमासेऽपि । प्रणदति । प्रणिनदति । 'अर्द ५५ गतौ याचने च' 'अत आदेः' २२४८।

२२८८ । तस्मान्नुड्द्विहलः । (७-४-७१)

द्विहलो धातोर्दीर्घीभूतादकारात्परस्य नुट् स्यात् । आनर्द । आर्दीत् । 'नर्द ५६ गर्द ५७ शब्दे' । णोपदेशत्वाभावान्न णः । प्रनर्दति । गर्दति । जगर्द । 'तर्द ५८ हिंसायाम्' । तर्दति । 'कर्द ५९ कुत्सिते शब्दे' । कुत्सिते कौक्षे कर्दति । 'खर्द ६० दन्दशूके' । दंशनहिंसादिरूपायां दन्दशूककियायामित्यर्थः । खर्दति । चखर्द । 'अदि ६१ अदि ६२ बन्धने' । अन्तति । आनन्त । अन्दति । आनन्द । इदि ६३ परमैश्वर्ये' । इन्दति । इन्दाञ्चकार । 'बिदि ६४ अवयवे' । पवर्गतृतीयादिः । बिन्दति । अवयवं करोतीत्यर्थः । 'भिदि' इति

णकारमुपदिश्य तस्य किमर्थं नकारो विधीयते । नकारएवोपदिश्यतामित्याशङ्क्य तत्प्रयोजनमाह । **उपसर्गादिति** ॥ रषाभ्यां नोण इत्यधिकृतम् । तदाह । **उपसर्गस्थादिति** ॥ समासेऽङ्कुलेः सङ्ग इत्यतः समास इत्यनुवृत्तेरसमासे नस्यादित्यसमासग्रहणम् । तथा सति प्रणाम इत्यादौ समासे नस्यादित्यपिग्रहणम् । तदाह । **समासे असमासेऽपीति** ॥ णस्योपदेशो यस्मिन्निति विग्रहः । **प्रणदतीति** ॥ भिन्नपदत्वादप्राप्तिः । **प्रणिनदतीति** ॥ नेर्गदेति णत्वम् । नचात्र उपसर्गादसमास इति धातुनकारस्य णत्वं शङ्क्यम् । अट्कुप्वाङ्भिन्नेन व्यवधानात् । **अर्दति** ॥ उपधायाञ्चेत्यत्र इक इत्युपस्थानात् अर्दतीत्यादौ न दीर्घः । लिटि णलि द्वित्वे हलादिशेषे अतआदेरित्यभ्यासाकारस्य दीर्घे आ अर्देतिस्थिते । **तस्मान्नुडिति** ॥ द्वौ हलौ यस्य तस्येति विग्रहः । तच्छब्देन अत आदेरिति कृतदीर्घः परामृश्यते । तदाह । **दीर्घीभूतादिति** ॥ टकार इत् । उकार उच्चारणार्थः । टित्वादाद्यवयवः । तदाह । **आनर्देति** ॥ **आर्दीदिति** ॥ इटईटि इति सिज्लोपः । नर्देत्यादि स्पष्टम् । **कर्देति** ॥ कुत्सितशब्देन कुत्सितविशेषो विवक्षित इत्याह । **कुत्सिते कौक्ष इति** ॥ कुक्षिभवे इत्यर्थः । **खर्देति** ॥ दन्दशूकः दंशनस्वभावस्सर्पः । दन्दशूको बिलेशय इत्यमरः । ननु सर्पस्य क्रियात्वाभावात् कथन्धात्वर्थत्वमित्यत आह । **दंशनेति । अतिअदीति** ॥ इदित्वान्नुम् । तदाह । **अन्ततीति । आनन्तेति** ॥ अत आदेरिति दीर्घः । तस्मान्नुड्द्विहल इति नुट् । एवमन्दति । **आनन्देति** ॥ आन्दीत् । **इदीति** ॥ परमैश्वर्यम् परमेश्वरीभवनम् । **इन्दतीति** ॥ इदित्वान्नुम् । **इन्दांचकारेति** ॥ इजादेश्चेत्याम् । **बिदीति** ॥ इदित्वान्नुमित्याह । **बिन्दतीति** ॥ नन्ववयवस्य अक्रियारूपत्वात् कथन्धात्वर्थत्वमित्यत आह । **अवयवंकरोतीत्यर्थ इति** ॥ अबिन्दीत् अबिन्दिष्टामित्यादि ।

पाठान्तरम् । 'गडि ६५ वदनैकदेशे' गण्डति । 'अन्तत्यादयः पञ्चैते न तिङ्विषया' इति काश्यपः । अन्ये तु तिङमपीच्छन्ति । 'णिदि ६६ कुत्सायाम्' । निन्दति । प्रणिन्दति । 'टुनदि ६७ समृद्धौ' ।

२२८९ । आदिर्ञिटुडवः । (१-३-५)

उपदेशे धातोराद्या एते इतः स्युः । नन्दति । इदित्त्वान्नलोपो न । नन्द्यात् । 'चदि ६८ आह्लादे' चन्दति । चचन्द । 'त्रदि ६९ चेष्टायाम्' त्रन्दति । तत्रन्द । 'कदि ७० क्रदि ७१ क्लदि ७२ आह्वाने रोदने च' । चकन्द । चक्रन्द । चक्लन्द । 'क्ष्विदि ७३ परिदेवने' । चिक्ष्विन्द । 'शुन्ध ७४ शुद्धौ' शुन्धति । शुशुन्ध । नलोपः । शुध्यात् ।

अथ कवर्गीयान्ता अनुदात्ततो द्विचत्वारिंशत् । 'शीकृ ७५ सेचने' । तालव्यादिः । 'दन्त्यादिः' इत्येके । शीकते । शिशीके । 'लोकृ ७६ दर्शने' । लोकते । लुलोके । 'श्लोकृ ७७ संघाते' । संघातो ग्रन्थः । स चेह ग्रथ्यमा-

---

पाठान्तरमिति ॥ पवर्गीयचतुर्थादिरित्यर्थः । **गडीति** । **वदनैकदेश इति** ॥ तत्क्रियायामित्यर्थः । गण्डति अगण्डीत् । **अन्तत्यादय इति** ॥ अति आदि बन्धने । इदि परमैश्वर्ये । बिदि अवयवे । गडि वदनैकदेशे । इति पञ्च धातवः तिङ्प्रकृतयो न भवन्तीति काश्यपमतमित्यर्थः । **अन्य इति** ॥ काश्यपादन्ये मुनयः तिङमपि एभ्य इच्छन्तीत्यर्थः । **णिदीति** ॥ इदित्वान्नुम् । णोपदेशत्वात् णस्य नत्वम् । तदाह । **निन्दतीति । प्रणिन्दतीति** ॥ उपसर्गादसमासेऽपीति णत्वम् । **टुनदीति** ॥ समृद्धिः प्रजापश्वादिसम्पत्तिः । **आदिरिति** ॥ भूवादयो धातव इत्यस्मात् धातव इत्यनुवृत्तं षष्ठ्या विपरिणम्यते । उपदेशेऽजनुनासिक इत्यस्मात् उपदेश इति इदिति चानुवर्तते । आदिरिति इदिति च बहुत्वे एकवचनम् । तदाह । **उपदेश इति** ॥ ट्वित्करणं ट्वितोऽथुजित्येतदर्थम् । **नन्दतीति** ॥ इदित्वान्नुम् । **इदित्वादिति** ॥ आशीर्लिङि यासुटः कित्वेऽपि इदित्वात् अनिदितामिति नलोपो नेत्यर्थः । **नन्द्यादिति** ॥ अन्त्यादन्त्यादित्यस्याप्युपलक्षणम् । **चदीति** ॥ इदित्वान्नुमित्याह। **चन्दतीति** । **त्रदीति** ॥ अदुपधोऽयम् । इदित्वान्नुमित्याह । **त्रन्दतीति** ॥ **कदिक्लदीति** ॥ अदुपधौ । **क्ष्विदिर्परिदेवन इति** ॥ अनुदात्तेत्सु पठितस्येह पाठः परस्मैपदार्थः । **शुन्धशुद्धाविति** ॥ अकर्मकोऽयम् । **शुन्धतीति** ॥ शुचिर्भवतीत्यर्थः । ननु शुधीत्येवमिदिदेवायं कुतो न पठित इत्याह । **नलोप इति** ॥ आशीर्लिङि अनिदितामिति नलोपे शुध्यादिति रूपमिष्टम् । इदित्वेतु नलोपो न स्यादिति भावः । अथ कवर्गीयान्ता इत्यादि लोकृ इत्यन्तं स्पष्टम् । **श्लोकृ इति** ॥ सङ्घातशब्दं व्याचष्टे । **ग्रन्थ इति** ॥ ननु वाक्यसमुदायात्मकस्य ग्रन्थस्य अक्रियात्वात् कथन्धात्वर्थत्वमित्याशङ्क्याह । स चेहेति ॥ ग्रन्थनङ्ग्रन्थः सङ्घीभावः सङ्घीकरणं वा । तत्र सङ्घीभवनं सङ्घनिष्ठम् । सङ्घीकरणन्तु सङ्घीकर्तृनिष्ठम् । तत्र सङ्घीभवनार्थकत्वे

नस्य व्यापारो ग्रन्थितुर्वा । आद्येऽकर्मको द्वितीये सकर्मकः । श्लोकते । 'ष्ट्रेकृ ७८ ध्रेकृ ७९ शब्दनोत्साहयोः' । उत्साहो वृद्धिरौद्धत्यं च । एचइग्घ्रस्वादेशे इति ह्रस्वः । दिष्ट्रेके । दिध्रेके । 'रेकृ ८० शङ्कायाम्' । रेकते । 'सेकृ ८१ स्रेकृ ८२ स्रकि ८३ श्रकि ८४ श्लकि ८५ गतौ' । त्रयो दन्त्यादयः । द्वौ तालव्यादी । अषोपदेशत्वान्न षः । सिसेके । 'शकि ८६ शङ्कायाम्' । शङ्कते । शशङ्के । 'अकि ८७ लक्षणे' । अङ्कते । आनङ्के । 'वकि ८८ कौटिल्ये' । वङ्कते 'मकि ८९ मण्डने' । मङ्कते । 'कक ९० लौल्ये' लौल्यं गर्वश्चापल्यं च । ककते । चकके । 'कुक ९१ वृक ९२ आदाने' कोकते । चुकुके । वर्कते । ववृके ।

ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन ।

'चक ९३ तृप्तौ प्रतिघाते च' । चकते । चेके । 'ककि ९४ वकि ९५ श्वकि ९६ त्रकि ९७ ढौकृ ९८ त्रौकृ ९९ ष्वक्क १०० वस्क १०१ मस्क

अकर्मकः । सङ्कीकरणार्थत्वे सकर्मक इत्यर्थः । **श्लोकत इति** ॥ सङ्कीभवतीत्यर्थः । सङ्कीकरोतीति वा । **ष्ट्रेकृ ध्रेकृ इति** ॥ शब्दनम् शब्दः । **एच इति** ॥ लिटि एशि च द्वित्वे हलादिशेषे देष्ट्रेक् ए इति स्थिते अभ्यासे एकारस्य ह्रस्वो भवन् एच इग्घ्रस्वादेश इति इकारो भवतीत्यर्थः । **दिध्रेके इति** ॥ अभ्यासे धकारस्य जश्त्वेन दकारः । एकारस्य तु ह्रस्व इकारः । **रेकृ इति** ॥ शङ्का संशयः आक्षेपोवा । शीङ् सेचन इत्यारभ्य एतत्पर्यन्ता ऋदितः । **सेकृ इति** ॥ आद्यौ एकारमध्यौ ऋदितौ । इतरे त्रयः अदुपधाः इदितः । **त्रय इति** ॥ पञ्चसु आद्यास्त्रय इत्यर्थः । **अषोपदेशत्वादिति** ॥ सेकृधातोः पर्युदासान्नषोपदेशत्वम् । द्वितीयतृतीययोस्तु दंत्याच्परकसादित्वाभावान्न षोपदेशत्वम् । ततश्च सकारस्यादेशसकारत्वाभावान्न षत्वमिति भावः । एच इग्घ्रस्वादेश इत्यभिप्रेत्याह । **सिसेक इत्यादि** ॥ सिस्रङ्के इत्यादाविदित्वान्नुम् । **शकीति** ॥ इदित्वान्नुमित्याह । **शंकत इति । शशंक इति । अकीति** ॥ लक्षणञ्चिह्नीकरणम् । **अंकत इति** ॥ इदित्वान्नुम् । **आनंक इति** ॥ तस्मान्नुड्द्विहल इति नुट् । वकि कौटिल्ये इत्यादि स्पष्टम् । **कुकवृकेति** ॥ द्वितीयः ऋदुपधः । शपि लघूपधगुणं मत्वा आह । **कोकत इति । चुकुक इति** ॥ असंयोगादिति कित्वात् न लघूपधगुणः । अभ्यासे चुत्वम् । लघूपधगुणेरपरत्वं मत्वाऽऽह । **वर्कत इति** ॥ लिटि असंयोगादिति कित्वान्न गुण इति मत्वाऽऽह । **ववृके इति** ॥ उरदत्वं हलादिशेषः । ननु कित्वात् परत्वात् गुणः स्यात् । कृते गुणे रपरत्वे संयोगात्परत्वेन कित्वस्याप्रवृत्त्या अनित्यत्वादित्यत आह । **ऋदुपधेभ्यो लिटः कित्वं गुणात् पूर्वविप्रतिषेधेनेति । चकेति** ॥ तृप्तावकर्मकः । प्रतिघाते सकर्मकः । एत्वाभ्यासलोपौ मत्वाऽऽह । **चेक इति । ककीति** ॥ एते पञ्चदश धातवः । आद्याश्चत्वार इदितः । द्वितीयो वकारादिः । तृतीयस्तालव्यादिः । पञ्चमषष्ठौ, दशमाद्याश्चत्वारश्च, ऋदितः । दशमद्वादशौ इदुपधौ । रघिलघी-

९०२ टिकृ १०३ टीकृ १०४ तिकृ १०५ तीकृ १०६ रघि १०७ लघि १०८ गत्यर्थाः'। कङ्कते। डुढौके। तुत्रौके।

सुब्धातुष्टिवुष्वक्कतीनां सत्वप्रतिषेधो वक्तव्यः।

ष्वक्कते। षष्वक्के। अत्र तृतीयो दन्त्यादिः' इत्येके। टेकते। टीकते। एवं, तेकते। तीकते। लघिर्भोजननिवृत्तावपि। 'अधि १०९ वधि ११० मधि १११ गत्याक्षेपे'। आक्षेपो निन्दा। 'गतौ गत्यारम्भे च' इत्यन्ये। अङ्कते। आनङ्के। वङ्कते। मङ्कते। 'मधि' कैतवे च। 'राधृ ११२ लाधृ ११३ द्राधृ ११४ सामर्थ्ये'। राघते। लाघते। 'ध्राधृ' इत्यपि केचित्। 'द्राधृ' आयामे च। आयामो दैर्घ्यम्। द्राघते। 'श्लाधृ ११५ कत्थने'। श्लाघते।

अथ परस्मैपदिनः पञ्चाशत्। 'फक्क ११६ नीचैर्गतौ' नीचैर्गतिर्मन्दगमनमसद्व्यवहारश्च। फक्कति। पफक्क। 'तक ११७ हसने'। तकति। 'तकि ११८ कृच्छ्रजीवने'। तङ्कति। 'बुक्क ११९ भषणे'। भषणं श्वरवः। बुक्कति। कख १२० हसने'। प्रनिकखति। 'ओखृ १२१ राखृ १२२ लाखृ १२३ द्राखृ १२४ ध्राखृ १२५ शोषणालमर्थयोः'। ओखति। ओखांचकार। 'शाखृ १२६ श्लाखृ १२७ व्याप्तौ'। शाखति। 'उख १२८ उखि १२९ वख

इदितौ चतुर्थान्तौ। कङ्कत इत्यादाविदित्वान्नुम्। **डुढौके, तुत्रौक इति** ॥ अभ्यासे ढस्य जश्त्वेन डकारः। ओकारस्य ह्रस्व उकारः। अथ ष्वक्कधातोः षोपदेशपरिगणनात् धात्वादेरिति सत्वे प्राप्ते आह। **सुब्धात्विति। षष्वक्के इति** ॥ संयुक्तहल्मध्यस्थत्वादेत्वाभ्यासलोपौ न। संयोगात्परत्वेन लिटः कित्वाभावाच्च। **तृतीय इति** ॥ तथा च स्वक्कत इति रूपम्। केवलदन्त्यपरकसादित्वाभावेन षोपदेशत्वाभावः। **टेकते इति** ॥ लघूपधगुणः। **टीकत इति** ॥ दीर्घोपधत्वान्न गुणः। **एवन्तेकते, तीकत इति** ॥ रङ्कते, लङ्कते। इदित्वान्नुम्। **लघिर्भोजननिवृत्तावपीति** ॥ लङ्कते न भुङ्क्त इत्यर्थः। **अधीति** ॥ लयोऽपि चतुर्थान्ता इदितः। **आनंध इति** ॥ तस्मान्नुड्द्विहल इति नुट्। **वंघत इति** ॥ इदित्त्वान्नुम्। लिटि तु ववङ्के इति रूपम्। वादित्वात्संयुक्तहल्मध्यस्थत्वात्संयोगात्परत्वेन लिटः कित्वाभावाच्च एत्वाभ्यासलोपौ न। **मधि कैतवेचेति** ॥ कतैवं वञ्चना। **राधृ इति** ॥ त्रयोऽपि इदितः। सामर्थ्यं कार्यक्षमीभवनम्। **ध्राधृ इत्यपीति** ॥ चतुर्थादिमपि केचित् पठन्तीत्यर्थः। **द्राधृ इति** ॥ निवृत्तिः विमुखीभवनम्। आयामः दीर्घीभवनम्। **श्लाधृ कत्थन इति** ॥ कत्थनं स्तुतिः। शक्लृ इत्यादयो द्विचत्वारिंशदात्मनेपदिनो गताः। फक्कनीचैरित्यादि स्पष्टम्। **प्रनिकखतीति** ॥ शेषे विभाषेत्यत्र अकखादाविति पर्युदासान्नेर्णत्वं नेति भावः। **ओखृ इति** ॥ अलमर्थः भूषणक्रिया, पर्याप्तिः, वारणं वा। ओखति। ओखाञ्चकार। **शाखृश्लाखृ इति** ॥ श्लाधृ इति चतुर्थान्त आ

१३० वखि १३१ मख १३२ मखि १३३ णख १३४ णखि १३५ रख १३६ रखि १३७ लख १३८ लखि १३९ इख १४० इखि १४१ ईखि १४२ वल्ग १४३ रगि १४४ लगि १४५ अगि १४६ वगि १४७ मगि १४८ तगि १४९ त्वगि १५० श्रगि १५१ ऋगि १५२ इगि १५३ रिगि १५४ लिगि २५५ गत्यर्थाः' । कवर्गेद्वितीयान्ताः पञ्चदश । तृतीयान्तास्त्रयोदश । इह खान्तेषु 'रिख' 'त्रख' 'त्रिखि' 'शिखि, इत्यपि चतुरः केचित्पठन्ति ओखति ।

२२९० । अभ्यासस्यासवर्णे । (६-४-७८)

इवर्णोवर्णान्तस्य अभ्यासस्येयङुवङौ स्तोऽसवर्णेऽचि । उवोख । संनिपातपरिभाषया 'इजादेः—' (२२३७) इत्यात्र । ऊखतुः । ऊखुः । इह सवर्णदीर्घस्याभ्यासग्रहणेन ग्रहणाद्ह्रस्वः प्राप्तो न भवति। सकृत्प्रवृत्तत्वात् । आङ्गत्वाद्विपर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वे कृते ततो दीर्घः ।

त्मनेपदिषु गतः । **उख उखीति । पञ्चदशेति** ॥ ईखि इत्यन्ता इति शेषः । **त्रयोदशेति** ॥ वल्गादय इति शेषः । तत्र इदित्वान्नुम् । आशीर्लिङि नलोपाभावश्च । **पठन्तीति** ॥ तेषां मते खान्ता एकोनविंशतिरिति बोध्यम् । **ओखतीति** ॥ शपि लघूपधगुणः । लिटि णलः पित्त्वेन कित्त्वाभावात् प्राप्तस्यापि लघूपधगुणस्य द्वित्वेनऽर्चाति निषिद्धतया गुरुमत्वाभावादामभावे सति पूर्वन्द्वित्वे कृते हलादिः शेषे पश्चात् वार्णादाङ्गम्बलीय इति परिभाषया अन्तरङ्गमपि सवर्णदीर्घम्बाधित्वा लघूपधगुणे कृते उ ओख् अ इति स्थिते, उवर्णस्य यणि प्राप्ते । **अभ्यासस्येति** ॥ अचि श्नुधात्वित्यतः अचीति, ण्वोरियङुवङावितिं चानुवर्तते । इश्च उश्च ण्वौ तयोरिति विग्रहः । अभ्यासविशेषणमिदं तदन्तविधिः । तदाह । **इवर्णोवर्णान्तस्येति** ॥ ङित्वादन्तादेशौ । **उवोखेति** ॥ अचिश्नुधात्वित्यस्यतु नात्र प्राप्तिः । अजादौ प्रत्यये परत एव तत्प्रवृत्तेः । अभ्यासस्य अङ्गत्वाभावाच्च । ननु द्वित्वे कृते लघूपधगुणे सति इजादिगुरुमत्त्वादाम् स्यादित्यत आह । **सन्निपातेति** ॥ णलि परे विहितगुणसम्पन्नमिजादिगुरुमत्वमाश्रित्य प्रवृत्तमामं गुणो न प्रवर्त्तयति । आमि सति धातोर्णल्परकत्वव्याघातादिति भावः । **ऊखतुरिति** ॥ अपित्त्वेन कित्वात् लघूपधगुणाभावे द्वित्वे हलादिशेषे सवर्णपरकत्वादभ्यासस्यासवर्ण इति इयङभावे सवर्णदीर्घे रूपमिति भावः । ननु ऊखतुरित्यत्र ऊकारस्य सवर्णदीर्घसम्पन्नस्य एकादेशतया पूर्वान्तत्वेनाभ्याससम्बन्धित्वात् ह्रस्व इत्यभ्यासस्याचो विधीयमानो ह्रस्वः प्राप्नोतीत्याशङ्कते । **इह सवर्णदीर्घस्य अभ्यासग्रहणेन ग्रहणाद्ह्रस्वः प्राप्त इति** ॥ अथ परिहरति । **न भवतीति** ॥ कुत इत्यत आह । **सकृत्प्रवृत्तत्वादिति** ॥ तदेवोपपादयति । **आंगत्वादिति** ॥ उ उखतुरिति स्थिते पर्जन्यवल्लक्षणप्रवृत्त्या अभ्यासह्रस्वे सवर्णदीर्घे ऊखतुरिति स्थितिः । तत्र ऊकारस्य पुनरभ्यासह्रस्वो न भवति । लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति न्यायादित्यर्थः । हलादिशेषे ह्रस्वे च कृते पश्चात्प्रवर्तमानस्य

'वार्णादाङ्गं बलीयः' इति न्यायात्परत्वाच्च। उङ्क्षति। ववाख। ववखतुः। वङ्क्षति। मेखतुः। मङ्क्षति। ममङ्ख। नखति। नङ्क्षति। रखति। रेखतुः। रङ्क्षति। एखति। इङ्क्षति। ईङ्क्षति। वल्गति। रङ्गति। लङ्गति। अङ्गति। वङ्गति। मङ्गति। तङ्गति। त्वङ्गति। श्रङ्गति। ऋङ्गति। इङ्गति। रिङ्गति। लिङ्गति। रेखति। त्रखति। त्रिङ्क्षति। शिङ्क्षति। 'त्वगि' कम्पने च। 'युगि १५६ जुगि १५७ बुगि १५८ वर्जने'। युङ्गति। 'घघ १५९ हसने'। घघति। जघाघ। 'मघि १६० मण्डने'। मङ्घति। 'शिघि १६१ आघ्राणे'। शिङ्घति।

अथ चवर्गीयान्ताः। तत्रानुदात्तेत एकविंशतिः।। 'वर्च १६२ दीप्तौ'। वर्चते। 'षच १६३ सेचने, सेवने च'। सचते। सेचे। सचिता। 'लोचृ १६४

सवर्णदीर्घस्य पूर्वम्पूर्वमन्तरङ्गम्परम्परं बहिरङ्गमिति न्यायेन बहिरङ्गत्वादित्यलम्। **उंखतीति** ॥ इदित्वान्नुम्। **ववाखेति** ॥ वखधातोर्णलि उपधावृद्धिः। **ववखतुरिति** ॥ वादित्वादेत्वाभ्यासलोपौ न। **वंखतीति** ॥ वखिधातोरिदित्वान्नुम्। ववङ्ख। **मेखतुरिति** ॥ एत्वाभ्यासलोपौ। **मङ्खतीति** ॥ मखिधातोरिदित्वान्नुम्। **ममंखेति** ॥ संयुक्तहल्मध्यस्थत्वादेत्वाभ्यासलोपौ न। **नखति, नंखतीति** ॥ णोन इति नत्वम्। **रखतीति** ॥ णलि तु उपधावृद्धिः। ररास्व अतुसादावेत्वाभ्यासलोपौ। **रेखतुरित्यादि**। **रंखतीति** ॥ इदित्वान्नुम्। ररङ्ख। **एखतीति** ॥ इखधातोश्शपि लघूपधगुणः। इयेख। ईखतुः। **इंखतीति** ॥ इदित्वान्नुम्। इङ्खाञ्चकार। **ईंखतीति** ॥ अलघूपधत्वान्न गुणः। ईंखांचकार। **वल्गतीति** ॥ लिटि ववल्ग ववल्गतुः। **रंगति, लंगतीति** ॥ ररङ्गतुः। **अंगतीति** ॥ लिटि आनङ्ग। **वंगतीति** ॥ लिटि ववङ्ग ववङ्गतुः। **मंगतीति** ॥ लिटि ममङ्ग ममङ्गतुः। **तंगतीति** ॥ लिटि, ततङ्ग, ततङ्गतुः। **त्वंगतीति** ॥ लिटि तत्वङ्ग। तत्वङ्गतुः। **श्रंगतीति** ॥ लिटि शश्रङ्ग। शश्रङ्गतुः। **ऋंगतीति** ॥ लिटि शश्लङ्ग शश्लङ्गतुः। **इंगतीति** ॥ लिटि इङ्गांचकार। **रिंगतीति** ॥ लिटि रिरिङ्ग रिरिङ्गतुः। **लिंगतीति** ॥ लिटि लिलिङ्ग लिलिङ्गतुः। अथ खान्तेषु रिखादिचतुर्णां मतान्तरसिद्धानामुदाहरणमाह। **रेखतीति** ॥ शपि लघूपधगुणः। रिरेख रिरिखतुः। **त्रखतीति** ॥ लिटि तत्राख तत्रखतुः। **त्रिंखतीति** ॥ लिटि तित्रिङ्ख तित्रिङ्खतुः। **शिंखतीति** ॥ लिटि शिशिङ्ख शिशिङ्खतुः। **त्वगि कम्पने चेति** ॥ चाद्गतौ। त्वङ्गति तत्वङ्ग। **युगीति** ॥ त्रयोऽपि इदितः। युङ्गति बुङ्गति जुङ्गति। **घघ, हसने इति** ॥ घघति। णलि उपधावृद्धिः। जघाघ जघघतुः। लिण्णिमित्तादेशादित्वादेत्वाभ्यासलोपौ न। **मघिमण्डन इति** ॥ इदित्वान्नुमित्याह। **मंघतीति** ॥ ममङ्घ ममङ्घतुः। **शिघि आघ्राण इति** ॥ शिङ्घति शिशिङ्घ। फक्कादयः पञ्चाशद्गताः। **वर्च दीप्ताविति** ॥ दीप्तिः प्रकाशः। **षच, सेचन इति** ॥ अच्परकसादित्वात् षोपदेशोऽयम्। स्वरितेत्तु षच समवाय इति वक्ष्यते। **सेच इति** ॥ सत्वस्य लिण्णिमित्तत्वाभावादादेशादित्वेऽपि एत्वाभ्यासलोपौ। **दम्भः**

दर्शने'। लोचते। लुलोचे। 'शच १६५ व्यक्तायां वाचि' शेचे। 'श्वच १६६ श्वचि १६७ गतौ'। श्वचते। श्वच्चते। 'कच १६८ बन्धने'। कचते। 'कचि १६९ काचि १७० दीप्तिबन्धनयोः'। चकच्चे। चकाञ्चे। 'मच १७१ मुचि १७२ कल्कने' कल्कनं दम्भः, शाठ्यं च। 'कथनम्' इत्यन्ये। मेचे। मुमुञ्चे। 'मचि १७३ धारणोच्छ्रायपूजनेषु'। ममञ्चे। 'पचि १७४ व्यक्तीकरणे'। पञ्चते। 'ष्टुच १७५ प्रसादे'। स्तोचते। तुष्टुचे। 'ऋज १७६ गतिस्थानार्जनोपार्जनेषु'। अर्जते। नुड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते। तेन द्विहल्त्वान्नुट्। आनृजे। 'ऋजि १७७ भृजी १७८ भर्जने'। ऋञ्जते। 'उपसर्गादृति–' (७४) इति वृद्धिः। प्रार्ञ्जते। ऋञ्जांचक्रे। आर्ञ्जिष्ट। भर्जते। बभृजे। अभर्जिष्ट। 'एजृ १७९ भ्रेजृ १८० भ्राजृ १८१ दीप्तौ'। एजांचक्रे। 'ईज १८२ गतिकुत्सनयोः'। ईजांचक्रे।

शाठ्यंचेति ॥ परविस्रम्भार्थन्धर्माद्याचरणण्डम्भः। कापट्यापरपर्यायः। 'कपटोऽस्त्री व्याजदम्भोपधयः' इत्यमरः। शाठ्यङ्कुटिलीभावः। 'निकृतस्त्वनृजुः शठः' इत्यमरः। **पचि व्यक्तीकरण इति** ॥ पचि विस्तार इति चुरादौ वक्ष्यते। **ष्टुच प्रसाद इति** ॥ ष्टुत्वसम्पन्नः टकारः। ततश्च दन्त्यपरकसादित्वात् षोपदेशोऽयम्। **स्तोचत इति** ॥ पक्ष सत्वे सति ष्टुत्वं निवर्तत इति भावः। **तुष्टुचे इति** ॥ शर्पूर्वाः खय इति तकारशेषः। आदेशसकारत्वात् षत्वम्। **ऋज गतीति** ॥ आर्जनम् सम्पादनम्। उपार्जनम् सेवनम्। **अर्जत इति** ॥ शपि लघूपधगुणः। रपरत्वम्। **नुड्विधाविति** ॥ वार्तिकमिदम्। **आनृज इति** ॥ लिटः असंयोगादिति कित्वात् गुणाभावे द्वित्वे उरदत्वे रपरत्वे हलादिशेषे अत आदेरिति दीर्घे नुडिति भावः। **ऋजिभृजी इति** ॥ ऋदुपधौ द्वौ। आद्यः इदित्। द्वितीयस्य ईदित्वात् श्वीदितोनिष्ठायामिति नेट्। इदित्वान्नुम्। अनुस्वारपरसवर्णौ। **ऋञ्जाञ्चक्र इति** ॥ नुमि सति संयोगे गुर्विति ऋकारस्य गुरुत्वादिजादेश्चेत्याम्। ऋञ्जिता। ऋञ्जिष्यते। ऋञ्जताम्। आर्ञ्जत। ऋञ्जेत। ऋञ्जिषीष्ट। अथ लुङि रूपम् दर्शयति। **आर्ञ्जिष्टेति** ॥ लुङः तादेशः। च्लिः। सिच्। इट्। लघूपधत्वाभावान्न गुणः। आट्। वृद्धिः। षत्वं। ष्टुत्वं। लृङि, आर्ञ्जिष्यत। **भर्जत इति** ॥ शपि लघूपधगुणः। रपरत्वम् बभृजे। भर्जिता। भर्जिष्यते। भर्जताम्। अभर्जत। भर्जेत। भर्जिषीष्ट। लुङि रूपमाह। **अभार्ज्जिष्टेति** ॥ लृङस्तादेशः च्लिः सिच् इट् गुणः रपरत्वम् अडागमः षत्वं ष्टुत्वं। लृङि अभर्जिष्यत। **एजृभ्रेजृभ्राजृ इति** ॥ आद्ययोः ऋदित्वम् नाग्लोपीत्यर्थम्। तृतीयस्य तु अकारेत्कत्वेऽप्यात्मनेपदं सिध्यति। ऋदित्वस्य न किञ्चित्फलमस्ति। न च नाग्लोपीति चङ्परे णौ उपधाह्रस्वः फलम्भवितुमर्हति। भ्राजभासेत्यादिना तत्र उपधाह्रस्वविकल्पस्य वक्ष्यमाणत्वात्। **ईजगतीति** ॥ अलघूपधत्वान्नगुणः। ईजते। **ईजाञ्चक्र इति** ॥ इजादेश्चेत्याम्।

अथ द्विसप्ततिर्ञ्यन्ताः परस्मैपदिनः । 'शुच १८३ शोके' । शोचति । 'कुच १८४ शब्दे तारे' । कोचति । 'कुञ्च १८५ क्रुञ्च १८६ कौटिल्यात्पीभावयोः' । 'अनिदिताम्– '(४१५) इति न लोपः । कुच्यात् । कुञ्च्यात् । 'लुञ्च १८७ अपनयने । लुच्यात् । 'अञ्चु १८८ गतिपूजनयोः' । अच्यात् । गतौ न लोपः । पूजायां तु अञ्च्यात् । 'वञ्चु १८९ चञ्चु १९० तञ्चु १९१ त्वञ्चु १९२ म्रुञ्चु १९३ म्लुञ्चु १९४ म्रुचु १९५ म्लुचु १९६ गत्यर्थाः' । वच्यात् । चच्यात् । तच्यात् । त्वच्यात् । अम्रुञ्चीत् । अम्लुञ्चीत् ।

२२९१ । जृस्तम्भुम्रुचुम्लुचुम्रुचुग्लुचुग्लुञ्चुभ्यश्च । (३-१-५८)

एभ्यश्च्लेरङ् वा स्यात् । अम्रुचत् - अम्रोचीत् । अम्लुचत् - अम्लोचीत् । 'म्रुचु १९७ ग्लुचु १९८ कुजु १९९ खुजु २०० स्तेयकरणे' । जुम्रोच । अम्रुचत्-

---

वर्चादय एकविंशतिः वृत्ताः । **द्विसप्ततिरिति** ॥ चवर्गीयान्ता इति शेषः । **शुचं शोक इति** ॥ स्मृत्वा क्लेशः शोकः । **शोचतीति** ॥ वियुक्तं पित्रादिकं स्मृत्वा क्लिश्नातीत्यर्थः । **कुचशब्द इति** ॥ शब्दनं शब्दः । चुकोच । चुकुचतुः । अकोचीत् । **कुञ्च, क्रुञ्चेति** ॥ उभावपि चवर्गपञ्चमोपधौ । अनुस्वारपरसवर्णसम्पन्नस्य नकारस्थानिकञकारस्य धातुपाठे निर्देशः । धातुपाठे नकारजावनुस्वारपञ्चमावित्यभियुक्तवादात् । तदाह । **अनिदितामिति** ॥ अनुस्वारपरसवर्णयोरसिद्धतया नकारस्य सत्वेन आशीर्लिङि अनिदितामिति लोपे कुच्यादिति रूपमित्यर्थः । लिटि तु, चुक्रुञ्च चुक्रुञ्चतुरित्यादौ पित्वेन संयोगात्परत्वेन च, कित्वाभावान्नलोपो न भवति । कुञ्चधातुस्तु स्वाभाविकञकारोपध एव । नत्वनुस्वारपरसवर्णसम्पन्नञकारोपध इति परेश्वघाङ्कयोरिति सूत्रे भाष्यकैयटयोः स्थितम् । अतस्तस्याशीर्लिङि अनिदितामिति नलोपस्य न प्रसक्तिरित्यभिप्रेत्योदाहरति । **कुञ्च्यादिति** ॥ ञकाररहितपाठस्तु प्रामादिक इति शब्देन्दुशेखरे स्थितम् । **लुञ्चेति** ॥ अयमपि नोपधः । अनुस्वारपरसवर्णसम्पन्नस्य ञकारस्य निर्देशः । तथा च आशीर्लिङि अनिदितामिति नलोपः । तदाह । **लुच्यादिति** ॥ एवमञ्चुधातोरपि द्रष्टव्यम् । **पूजायान्त्विति** ॥ नाञ्चेः पूजायामिति निषेधादिति भावः । **वञ्चुचञ्चुतञ्चु इति** ॥ आद्याः षट् नोपधाः । अनुस्वारपरसवर्णाभ्यां ञकारानिर्देशः । तथा च तेषामाशीर्लिङि अनिदितामिति नलोपः । तदाह । **वच्यादिति** ॥ लुङि अम्रुञ्चीदम्लुञ्चीदिति नोपधयो रूपं । सिज्लोपः । **जृस्तंभ्विति** ॥ च्लेः सिजित्यतः च्लेरिति, अस्यतिवक्तिख्यातिभ्य इत्यतः अङिति, इरितोवेत्यतः वेतिचानुवर्तते । तदाह । **एभ्यश्च्लेरङ्वेति** ॥ जृष् वयोहानौ । स्तन्भु सौत्रो धातुः । म्रुचुम्लुचुगत्यर्थौ । ग्रुचु ग्लुचु स्तेयकरणे । ग्लुञ्चु गतौ । इत्येभ्य इत्यर्थः । **अम्रुचदिति** ॥ च्लेरङि सति ङित्वान्नलघूपधगुणः । **अम्रोचीदिति** ॥ अङभावे इटईटि इति सिज्लोपः । **म्रुचुग्लुचु इति** ॥ जृस्तन्भ्वित्यङ्वेत्याह । **अम्रुचदम्रोचीदिति** ॥ आद्यस्य रूपे । अथ द्वितीयस्य अङ्विकल्पमु-

अग्रोचीत्। जुग्लोच । अग्लुचत् - अग्लोचीत् । अकोजीत् । अखोजीत्। ग्लुञ्चु २०१ षस्ज २०२ गतौ'। लुङि अङ्वा। अग्लुचत् - अग्लुञ्चीत्। सस्य श्चुत्वेन शः, तस्य जश्त्वेन जः। सज्जति। अयमात्मनेपद्यपि । सज्जते । 'गुजि २०३ अव्यक्ते शब्दे' । गुज्जति गुज्जधात् । 'अर्च पूजायाम्' । आनर्च । म्लेच्छ २०५ अव्यक्ते शब्दे'। अस्फुटेऽपशब्देचेत्यर्थः। म्लेच्छति। मिम्लेच्छ। 'लछ २०६ लाछि २०७ लक्षणे'। ललच्छ ललाञ्छ। वाछि २०८ इच्छायाम्'। वाञ्छति। आछि २०९ आयामे' आञ्छति। 'अत आदेः' (२२४८) इत्यत्र तपरकरणं स्वाभाविकह्रस्वपरिग्रहार्थं । तेन दीर्घाभावान्न नुट्। आञ्छ। तपरकरणं मुखसुखार्थमिति मते तु नुट्। आनाञ्छ। 'ह्रीच्छ २१० लज्जायाम्' 'जिह्रीच्छ। 'हुर्च्छा २११ कौटिल्ये'। 'कौटिल्यमपसरणम्' इति मैत्रेयः। 'उपधायां च' (२२६५) इति दीर्घः। हूर्च्छति। 'मुर्छा २१२ मोहसमुच्छ्राययोः'। मूर्छति। 'स्फुर्छा २१३ विस्तृतौ'। स्फूर्छति। 'युच्छ २१४ प्रमादे'। युच्छति। 'उछि २१५ उञ्छे'। 'उञ्छः कणश आदानं कणिशाद्यर्जनं शिलम्' इति

दाहरति। **अग्लुचदग्लोचीदिति** ॥ अङि सति ङित्वान्नलघूपधगुणः। अङभावे सिज्लोपः। **ग्लुञ्चुषस्जेति** ॥ आद्यो नोपधः। द्वितीयस्तु षोपदेशः। अच्परकसादित्वात्। तत्र आद्यस्य लुङि विशेषमाह। **अङ्वेति** ॥ जृस्तनभ्वित्यनेनेति शेषः। ग्लुचुग्लुञ्चोः पृथक्ग्रहणसामर्थ्यात् नलोपो नेति वृत्तिकृत्। **सस्येति** ॥ धात्वादेः सत्वे सस्ज् इति स्थिते। द्वितीयस्य सकारस्य श्चुत्वेन शकारइत्यर्थः। **तस्येति** ॥ शकारस्य झलाञ्जशझशीति जकार इत्यर्थः। **गुजीति** ॥ इदित्वादाशीर्लिङि नलोपो नेत्याह। **गुञ्ज्यादिति। अर्चेति** ॥ लिटि तस्मान्नुड्द्विहल इति नुटं मत्वाऽऽह। **आनर्चेति** ॥ म्लेच्छेत्यादि स्पष्टम्। तुकि लच्छतीति रूपम्। ललच्छ ललच्छतुः। **आछीति** ॥ लिटि णलि द्वित्वे हलादिशेषे अभ्यासहूस्वे अ आञ्छ् अ इति स्थिते अत आदेरिति दीर्घः। तस्मान्नुड्द्विहल इति नुटमाशङ्क्याह। **अत आदेरिति** ॥ तत्र हि दीर्घस्याकारस्य दीर्घविधौ प्रयोजनाभावादेव ह्रस्वाकारस्य दीर्घ इति सिद्धौ अत इति तपरकरणं स्वाभाविकस्यैव ह्रस्वाकारस्य परिग्रहार्थमित्यर्थः। ततः किमित्यत आह। **तेनेति** ॥ अत आदेरिति दीर्घविधौ स्वाभाविकह्रस्वाकारस्यैव ग्रहणेन अत आदेरिति दीर्घस्याभावान्नुडित्यर्थः। **आञ्छेति** ॥ द्वित्वे हलादिशेषे अभ्यासह्रस्वे सवर्णदीर्घ इति भावः। **मुखसुखार्थमिति** ॥ तथाच। ह्रस्वस्थानिकदीर्घाकारादपि परस्य नुड् भवत्येवेति भावः। ह्रीच्छलज्जायामित्यादि स्पष्टम्। **युच्छप्रमाद इति** ॥ यकारादिरुदुपधोऽयम्। **युच्छतीति** ॥ अन्तरङ्गत्वात् छेचेति तुकि लघूपधत्वाभावात् न गुणः। युयुच्छ। युयुच्छतुः। **उछि उञ्छ इति** ॥ अयमप्युदुपधः।

यादवः। उञ्छति। उञ्छांचकार। 'उछी २१६ विवासे'। विवासः समाप्तिः। प्रायेणायं विपूर्वः। व्युच्छति। धृज २१७ धृजि २१८ ध्रज २१९ ध्रजि २२० ध्वज २२१ ध्वजि २२२ गतौ'। धर्जति। धृञ्जति। ध्रजति। ध्रञ्जति। ध्वजति। ध्वञ्जति। 'कूज। २२३ अव्यक्ते शब्दे'। चुकूज। 'अर्ज २२४ षर्ज २२५ अर्जने'। अर्जति। आनर्ज। सर्जति। ससर्ज। 'गर्ज २२६ शब्दे'। गर्जति। 'तर्ज २२७ भर्त्सने'। तर्जति। ततर्ज। 'कर्ज २२८ व्यथने'। चकर्ज। 'खर्ज २२९ पूजने च' चखर्ज। 'अज २३० गतिक्षेपणयोः'। अजति।

२२९२। अजेर्व्यघञपोः। (२-४-५६)

अजेर्वी इत्ययमादेशः स्यादार्धधातुकविषये घञमपं च वर्जयित्वा। 'वलादावार्धधातुके वेष्यते'। विवाय। विव्यतुः। विव्युः। अत्र वकारस्य हल्प-

---

उञ्छतीति ॥ इदित्वान्नुमि अलघूपधत्वान्नगुणः। **उञ्छाञ्चकारेति** ॥ नुमिकृते संयोगे गुर्विति सकारस्य गुरुत्वादिजादेश्चेल्यामिति भावः। **धृजेति** ॥ आद्यौ ऋदुपधौ। इतरे चत्वारः अदुपधाः। द्वितीयचतुर्थषष्ठाः इदितः। **धर्जतीति** ॥ शपि लघूपधगुणः। रपरत्वम्। दधर्ज। दधृजतुः। धृज्यात्। अधर्जीत्। **धृञ्जतीति** ॥ इदित्वान्नुम्। दधृञ्ज। इदित्वान्नलोपो न। धृञ्ज्यात्। अधृञ्जीत्। **ध्रजतीति** ॥ णलि दध्राज। दध्रजतुः। अध्राजीत्। अध्रजीत्। **ध्रञ्जतीति** ॥ अदुपधोऽयम्। दध्रञ्ज। इदित्वान्नलोपो न। दध्रञ्जतुः। **ध्वजतीति** ॥ दध्वाज। **ध्वञ्जतीति** ॥ दध्वञ्ज। **कूज अव्यक्त इति** ॥ स्पष्टम्। सर्जतीत्यत्र षोपदेशत्वात् सत्वम्। **अजगतीति** ॥ लटि अजतीत्यादि सिद्धवत्कृत्य लिटि विशेषमाह। **अजेर्व्यघञपोरिति** ॥ वी इति दीर्घान्तं लुप्तप्रथमाकम्। आर्धधातुक इत्यधिकृतम्। विषयसप्तम्येषा। नतु परसप्तमी। व्याख्यानात्। तदाह। **आर्धधातुकविषय इत्यादि** ॥ अजेरिति इका निर्देशः। अजधातोरित्यर्थः। आर्धधातुक इति परसप्तम्याश्रयणेतु वेवीयत इति न स्यात्। वीभावात्प्राक् हलादित्वाभावात् यङसम्भवात्। विषयसप्तम्याश्रयणेतु यङि विवक्षिते वीभावे सति हलादित्वाद्यङ्निर्बाधः। अघञपोः किम्। घञि समाजः। समुदोरजःपशुष्वित्यपि। समजः। अत्र अघञपोरिति न वक्तव्यम्। लिटिवेत्यतो वेत्यनुवर्त्तते। व्यवस्थितविभाषेयम्। घञि अपिच न भवति। ल्युटि वलादावार्धधातुके च विकल्पः। अन्यत्रतु आर्धधातुके नित्यमिति भाष्यकैय्यटयोः स्थितम्। तदाह। **वलादावार्धधातुके वेष्यत इति** ॥ उक्तव्यवस्थितविभाषोपलक्षणमिदम्। **विवायेति** ॥ लिटो णलि विवक्षिते वीभावे सति णलि द्वित्वे अभ्यासह्रस्वे अचोञ्णितीति वृद्धौ आयादेश इति भावः। **विव्यतुरिति** ॥ वीभावे सति अतुसि द्वित्वे अभ्यासह्रस्वे असंयोगादिति कित्वात् गुणाभावे इयङ्पवादे एरनेकाच इति यणि रूपम्। एवं उसि विव्युरिति रूपम्। ननु विव्यतुः विव्युरित्यत्र द्वितीयवकारस्य यकारात्मकहल्परकत्वादुपधायाश्चेति इकारस्य दीर्घः स्यादित्याशङ्क्यम्। ईकार-

रत्वात् 'उपधायां च' (२२६५) इति दीर्घे प्राप्ते 'अचः परस्मिन्–' (५०) इति स्थानिवद्भावेनाच्परकत्वम्। न च 'न पदान्त–(५१) इति निषेधः। 'स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवत्। इत्युक्तेः। थलि 'एकाचः–(२२४६) इतीण्निषेधे प्राप्ते।

२२९३। कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि। (७-२-१३)

एभ्यो लिट इण्णस्यात्। क्रादीनां चतुर्णां ग्रहणं नियमार्थम्। प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावानिण्निषेधः स लिटि चेत्तर्हि क्रादिभ्य एव नान्येभ्य इति। ततश्चतुर्णां थलि भारद्वाजनियमप्रापितस्य वमादिषु क्रादिनियमप्रापितस्यचेटो निषेधार्थम्।

स्थानिकस्य यकारस्य अचः परस्मिन्निति स्थानिवत्त्वेन द्वितीयवकारस्य हल्परकत्वाभावात् तस्मिन्वकारे परे इकारस्य न दीर्घ इति परिहरति। **अन्नवकारस्येत्याद्यच्परकत्वमित्यन्तम्**॥ ननु दीर्घविधौ नपदान्तेति निषेधात्कथमिह यकारस्य स्थानिवत्त्वमित्याशङ्क्य निराकरोति। नच्नपदान्तेति निषेध इति। शङ्क्य इति शेषः। कुत इत्यत आह। **स्वरदीर्घेति। इत्युक्तेरिति**॥ वार्त्तिककृतेति शेषः। **थलि एकाच इति**॥ अजधातोरनुदात्तोपदेशानन्तर्भावेऽपि वा इति तदादेशोऽनुदात्तः अजन्तेषु ऊदृदन्तादिचतुर्दशधातूनामनुदात्तत्वाभ्युपगमादिति भावः। **कृसृ इति**॥ कृ सृ भृ वृ स्तु द्रु स्रु श्रु इत्यष्टानां समाहारद्वन्द्वात्पञ्चमी। लिटीति षष्ठ्यर्थे सप्तमी। नेड्वशिकृतीत्यतो नेति इडितिचानुवर्तते। तदाह। **एभ्य इति**॥ नन्वेकाच उपदेशेऽनुदात्तादिति ङ्युकः कितीतिच सिद्धे किमर्थमिदं सूत्रमित्यत आह। **क्रादीनामिति**॥ कृ सृ भृ वृ इत्येतेषामित्यर्थः। नियमस्वरूपमाह। **प्रकृत्याश्रय इत्यादि**॥ कृसृभृवृ इत्येषां त्रयाणां अनुदात्तोपदेशान्तर्भूतानामेकाच उपदेश इति यः प्रकृत्याश्रयो निषेधः, यश्च वृधातोः ङ्युकः कितीति प्रत्ययाश्रयोनिषेधः' तदुभयमपि यदि लिटि स्यात् तर्हि कृसृभृवृ इत्येभ्य एव परस्य लिटो भवति। नतु तदन्येभ्यः परस्येत्यर्थः। तेन बिभिदिव बिभिदिमेत्यादौ एकाच उपदेश इति निषेधः। बभूवेत्यादौ ङ्युकः कितीति निषेधश्च न भवति। अथ स्तुद्रुस्रुश्रुवाङ्ग्रहणस्य प्रयोजनमाह। **तत इति**॥ अन्येषामिति शेषः। **चतुर्णामिति**॥ ग्रहणमिति शेषः। ततः तेभ्यः कृसृभृवृ इत्येभ्यः अन्येषां स्तुद्रुस्रुश्रुवाङ्ग्रहणं। थलि तुष्टोथ दुद्रोथ सुस्रोथ शुश्रोथ इत्यत्र ऋतो भारद्वाजस्येति वक्ष्यमाणेन ऋदन्तस्यैव थलि नेट्। अन्यस्य तु स्यादेवेति नियमेन प्राप्तस्य इण्निषेधार्थम्। तथा तुष्टुव तुष्टुमेत्यादौ कृसृभृवृ इत्युक्तेन क्रादिभ्य एव परस्य लिट इण्निषेधः। अन्येभ्यस्तु परस्य इट् स्यादेवेति नियमेन प्राप्तस्य इटो निषेधार्थश्चेत्यर्थः। तदेवमजेस्थलि वीभावे एकाच इति निषेधाभावादिडागमो निर्बाध इति स्थितम्। अथ तस्य थलि इडागमस्य भारद्वाजनियमाद्विकल्पं

२२९४ । अचस्तास्वत्थल्यनिटो नित्यम् । (७-२-६१)

उपदेशेऽजन्तो यो धातुस्तासौ नित्यानिट् ततः परस्य थल इण्णस्यात् ।

२२९५ । उपदेशेऽत्वतः । (७-२-६२)

उपदेशेऽकारवतस्तासौ नित्यानिटः परस्य थल इण्णस्यात् ।

२२९६ । ऋतो भारद्वाजस्य । (७-२-६३)

तासौ नित्यानिट ऋदन्तस्यैव थलो नेट् भारद्वाजस्य मतेन । तेनान्यस्य स्यादेव । अयमत्र संग्रहः—

वक्ष्यन् तदुपयोगित्वेन सूत्रद्वयमुपन्यस्यति । **अचस्तास्वदिति** ॥ अधातोस्थलभावाद्धातोरिति लभ्यते । अच इति तद्विशेषणम् । तदन्तविधिः । उपदेशेऽत्वत इत्युत्तरसूत्रादुपदेश इत्यपकृष्यत इति ऋतोभारद्वाजस्येति सूत्रभाष्ये स्थितम् । उपदेशे अजन्तादित्यन्वयः । अनिट इति बहुव्रीहेः पञ्चमी । नित्यमिड्विहीनादित्यन्वयः । तासि च क्लृप इत्यतस्तासीत्यनुवर्तते । तासौ नित्यमनिट इत्यन्वयः । थलीति षष्ठ्यर्थे सप्तमी । गमेरिट् परस्मैपदेष्वित्यतः इडिति, नॄन्ह्यश्चतुर्भ्य इत्यतो नेति चानुवर्तते । **उपदेशे योऽजन्त इत्यादि । इण्णस्यादिति** ॥ तास्वदिति शेषः । सप्तम्यन्ताद्धतिः । यथा तासि नेट् तथा थल्यपि नेट् इत्यर्थः । विचेथ, जुहोथेत्याद्युदाहरणम् । अत्र क्रादिनियमप्राप्त इण्णभवति । अजन्तात्किम् । बिभेदिथ । उपदेश इति किम् । हृञ् जहर्थ । इह गुणे रपरत्वे अजन्तत्वाभावादिण्निषेधो नस्यादित्युपदेशग्रहणम् । नित्यग्रहणङ्किम् । स्वृ गतौ, सस्वरिथ । स्वरतिसूतीति तासौ विकल्पितेट्कत्वान्न निषेधः । तासौ किम् । लुलुविथ । थलः किम् । पपिव । पपिम । इह तासीत्यनुवृत्त्यैव सिद्धेस्तास्वदिति नातीवोपयुज्यते इति केचित् । वस्तुतस्तु यस्तासौ विद्यते तस्मादेव परस्य थल इण्निषेधार्थन्तास्वदित्यावश्यकम् । तेन लिट्यन्यतरस्यामित्यतो घस्लृभावे जघासिथेत्यत्र न निषेधः । घसस्तासावभावादिति अद भक्षण इति धातौ मूल एव वक्ष्यते । यस्तासावस्ति अनिट्चेति भाष्यम् । **उपदेशेऽत्वतः इति** ॥ अत्वत इति छेदः । अत् दृश्याकारः सः अस्य अस्तीति अत्वान् । तसौ मत्वर्थ इति भत्त्वान्न जश्त्वम् । अच इति वर्जम् पूर्वसूत्रं, तत्र यदनुवृत्तन्तदप्यनुवर्तते । तदाह । **उपदेशे अकारवत इति ।** शक्लृ शशक्थ । पच् पपक्थेत्युदाहरणम् । अथ क्रादिनियमप्राप्त इण्णभवति । उपदेशे किम् । कृष विलेखने । चकर्षिथ । अत्वत इति किम् । बिभेदिथ । तपरःकिम् । रराधिथ । तासौ किम् । जगर्हिथ । जिघृक्षतीत्यादौ सनिग्रहगुहोश्चेति सनि नित्यमनिट् । ननु तासौ । नित्येति किम् । अञ्ज आनञ्जिथ । ऊदित्वात्तासौ वेडिति भाष्यम् । चक्रमिथेत्यप्युदाहरणम् । स्तुक्रमोरिति नियमेनात्मनेपदे तासावनिट्कत्वेऽपि परस्मैपदे सेट्कत्वात् । **ऋतो भारद्वाजस्येति** ॥ तासौ नित्यमनिट इति थलीति नेति इडिति चानुवर्तते । भारद्वाजस्य मते ऋदन्ताद्धातोः परस्य थलो नेडिति फलितम् । हृञ् धृजादौ अचस्तास्वदित्येव सिद्धम् । अतो नियमार्थमिदमित्याह । ऋदन्तादेव थलो नेडिति । अनृदन्तात्परस्य तु थल इट् स्यादेवेत्येवकारार्थः । तदाह । **अन्यस्य स्यादे-**

अजन्तोऽकारवान्वा यस्तास्यनिट् थलि वेडयम् ।
ऋदन्त ईदङ्गित्यानिट् क्राद्यन्यो लिटि सेड् भवेत् ॥

न च स्तुद्वादीनामपि थलि विकल्पः शङ्क्यः । 'अचस्तास्वत्–' (२२९४) **इति 'उपदेशेऽत्वतः'** (२२९५) **इति च योगद्वयप्रापितस्यैव हि प्रतिषेधस्य भारद्वाजनियमो निवर्तकः 'अनन्तरस्य–'** इति न्यायात् । विवयिथ–विवेथ

वेति ॥ ऋदन्तभिन्नात्परस्य थल इट् स्यादेवेत्यर्थः । तथा च ऋदन्तभिन्नाद्धातोः परस्य थलो नेण्निवृत्तिरिति भारद्वाजमते फलतीति न वैयर्थ्यमिति भावः । तथाच अनृदन्ताद्धातोः परस्य थलो भारद्वाजमते इट् । मतान्तरे तु अचस्तास्वदिति उपदेशेऽत्वत इति च तत्र नेडिति विकल्पः फलतीति भावः । तद्यथा । पपिथ । पपाथ । पेचिथ । पपक्थ । **अयमत्रेति** ॥ कृसृभृवृस्तुद्रुस्रुश्रुवो लिटीति, अचस्तास्वत्थल्यनिटो नित्यमिति, उपदेशेऽत्वत इति, ऋतो भारद्वाजस्येति च, सूत्रचतुष्टयस्य विषयाणां सङ्ग्रहो वक्ष्यत इत्यर्थः । **अजन्त इति** ॥ यः धातुः ऋदन्तभिन्नाजन्तः हूस्वाकारवान् वा तासौ नित्यानिट् सोऽयं थलि विकल्पितेट्क इति पूर्वार्धस्यार्थः । अत्र ईदृगित्यस्य तासौ नित्यानिडित्यर्थः । यः ऋदन्तस्तासौ नित्यानिट् सः थलि नित्यानिडित्यर्थः । अचस्तास्वदिति पाणिनिमते ऋतो भारद्वाजस्येति भारद्वाजमतेऽपि तस्य अनिट्कत्वादिति भावः । **क्राद्यन्य इति** ॥ क्राद्यष्टभ्योऽन्यो धातुः लिटि नित्यं सेडित्यर्थः । क्राद्यष्टभ्य एव परस्य लिटि नेडिति कृसृभृवृ इति सूत्रेण नियमितत्वादिति भावः । नन्वत्र क्राद्यन्य इत्युक्त्या क्रादीनां अष्टानां लिटि नित्यानिट्कत्वमवगतम् । तदनुपपन्नम् । स्तुद्रुस्रुश्रुवां ऋदन्तभिन्नत्वेन तेभ्यस्थलि अचस्तास्वदिति निषेधस्य भारद्वाजमते अप्रवृत्त्या इड्विकल्पस्य दुर्वारत्वात् । नचैवं सति कृसृभृवृ इति सूत्रे स्तुद्रुस्रुश्रुग्रहणमनर्थकामिति वाच्यम् । तुष्टुव तुष्टुमेत्यादौ वमादिषु क्रादिनियमप्राप्तस्य इटो निवृत्त्या चरितार्थत्वादित्याशङ्क्य निराकरोति । न च स्तुद्रुस्रुश्रुवामपि थलि विकल्पः शङ्क्य इति कुत इत्यत आह । अचस्तास्वदिति । ऋदन्तादेव परस्य थल इण्निषेधः । अनृदन्तात्परस्य तु थल इण्निषेधो नेति भारद्वाजं मतम् । अयञ्च इण्निषेधस्य निषेधः अचस्तास्वदिति उपदेशेऽत्वत इति च सूत्रद्वयप्राप्तस्यैव इण्निषेधस्य पक्षे निवर्तकः । न तु क्रादिसूत्रप्राप्तस्य इट्प्रतिषेधस्यापीत्यर्थः । कुत इत्यत आह । **अनन्तरस्येति** ॥ अचस्तास्वदिति उपदेशेऽत्वत इति ऋतो भारद्वाजस्येति च सूत्रक्रमः । कृसृभृवृ इति सूत्रन्तु ततः प्राग्बहुव्यवहितमिति भावः । किञ्च नेड्वशिकृतीत्यादिप्रतिषेधकाण्डोत्तरं आर्धधातुकस्येड्वलादेरिति विधिकाण्डारम्भसामर्थ्यादपि स्तुद्रुस्रुश्रुवामिण्निषेधो भारद्वाजनियमम्बाधत इति नेड्वशिकृतीत्यत्र वस्वेकाजाद्धसामित्यत्र च भाष्ये स्पष्टम् । ततश्च प्रकृते अजेस्थलि वीभावे तस्य अजन्तत्वात्तासौ नित्यानिट्त्वाच्च इड्विकल्प इति सिद्धम् । तदाह । **विवयिथ विवेथेति** ॥ सिबादेशस्य थलः पित्वादसंयोगादिति कित्वाभावाद्गुणः । **इट्पक्षे अवादेशः** ।

आजिथ । विव्यथुः । विव्य । विवाय–विवय । विव्यिव । विव्यिम । वेता–अजिता । वेष्यति–अजिष्यति । अजतु । आजत् । अजेत् । वीयात् ।

२२९७ । सिचि वृद्धिः परस्मैपदेषु । (७-२-१)

इगन्ताङ्गस्य वृद्धिः स्यात्परस्मैपदे परे सिचि । अवैषीत्–आजीत् । अवेष्यत्–आजिष्यत् । 'तेज २३१ पालने' । तेजति । 'खज २३२ मन्थे' । खजति । 'खजि २३३ गतिवैकल्ये' । खञ्जति । 'एजृ २३४ कम्पने' एजांचकार । 'टुओ स्फूर्जा २३५ वज्रनिर्घोषे' स्फूर्जति । पुस्फूर्ज । 'क्षि २३६ क्षये' । अकर्मकः । अन्तर्भावितण्यर्थस्तु सकर्मकः । क्षयति । चिक्षाय । चिक्षियतुः । चिक्षियुः । चिक्षयिथ–चिक्षेथ । चिक्षियिव । चिक्षियिम । क्षेता ।

आजिथेति ॥ वलादावार्धधातुके वेष्यत इति वीभावाभावपक्षे अजधातोरनुदात्तोपदेशबहिर्भूतत्वादिट् । द्वित्वम् । हलादिशेषः । अत आदेरिति सवर्णदीर्घः । **विव्यथुरिति** ॥ अथुसि वीभावे द्वित्वे अभ्यासह्रस्वे असंयोगादिति कित्वात् गुणाभावे इयङपवादे एरनेकाच इति यणि रूपम् । **विव्येति** ॥ थस्य अकारे वीभावादि । **विवाय विवयेति** ॥ णलुत्तमो वेति णित्वविकल्पाद्वृद्धिविकल्पः । **विव्यिव विव्यिमेति** ॥ क्ङिति लिटि सेट्भवेदिति नित्यमिटि यण् । **वेता अजितेति** ॥ लुटि तासि वीभावविकल्पः । **वेष्यति । अजिष्यतीति** ॥ लृटि स्ये वीभावविकल्पः । **वीयादिति** ॥ आशीर्लिङादेशस्य आर्धधातुकत्वात् वीभावः । अथ लुङि सिचि वीभावे सार्वधातुकार्धधातुकयोरिति गुणे प्राप्ते । **सिचि वृद्धिरिति** ॥ **इगन्तस्येति** ॥ वृद्धिश्रुत्या इक इत्युपस्थितमङ्गस्येत्यधिकृतस्य विशेषणम् । तदन्तविधिरिति भावः । एवं च अकोषीदित्यादौ व्यञ्जनस्य न वृद्धिः । **अवैषीदिति** ॥ लुङस्तिप् इकारलोपः सिचि वीभावः एकाच इति इण्निषेधः वृद्धिः अडागमः षत्वम् । **आजीदिति** ॥ सिज्लोपः । वदव्रजेति हलन्तलक्षणायां वृद्धौ नेटि इति निषिद्धायामडागमे आटश्चेति वृद्धिः । लृङि अवेष्यत् । आजिष्यत् । तेजपालन इत्यादि स्पष्टम् । **एजृ कम्पन इति** ॥ दीप्तौत्वात्मनेपदी गतः । **टुओ स्फूर्जेति** ॥ आदिर्ञिटुडव इति टुरित् । उपदेशेऽनुनासिकत्वादोकार आकारश्च इत् । ट्वितोऽथुच् ओदितश्चेति निष्ठानत्वम् । आदितश्चेति निष्ठायामिण्निषेधश्च । तत्फलानि उपधायाश्चेति दीर्घस्यानित्यत्वज्ञापनार्थमिह दीर्घ ऊकारः पाठितः । तेन हुर्छतीत्यादौ नदीर्घ इत्याहुः । **स्फूर्जतीति** ॥ लिटि पुस्फूर्ज अस्फूर्जीत् । **क्षि क्षय इति** ॥ क्षयो नाशः । अन्तर्भावितण्यर्थ इति नाशनार्थक इत्यर्थः । अजन्तेष्वेवास्य पाठो युक्तः । **क्षयतीति** ॥ नश्यतीत्यर्थः । नाशयतीति वा । शपि गुणे अयादेशः । **चिक्षायेति** ॥ णलि वृद्धिः अयादेशः । **चिक्षियतुरिति** ॥ असंयोगादिति कित्वान्न गुणः । इयङ् । **चिक्षयिथ चिक्षेथेति** ॥ पित्वेन कित्वाभावात्गुणः । अजन्तत्वात्तासौ नित्यानिट्त्वाच्च । भारद्वाजनियमात्थलि वेट् । इट्पक्षे अयादेशः । चिक्षियथुः । चिक्षिय । चिक्षाय । चिक्षय । वस्मसोस्तु क्रादिनियमात् नित्यमिट् । तदाह ।

२२९८ । अकृत्सार्वधातुकयोर्दीर्घः । (७-४२५)

अजन्तस्याङ्गस्य दीर्घः स्याद्यादौ प्रत्यये परे। नतु कृत्सार्वधातुकयोः। क्षीयात्। अक्षैषीत्। 'क्षिज २३७ अव्यक्ते शब्दे'। कूजिना सहायं पठितुं युक्तः। चिक्षेज। 'लज २३८ लजि २३९ भर्त्सने'। 'लाज २४० लाजि २४१ भर्जने च'। 'जज २४२ जजि २४३ युद्धे'। 'तुज २४४ हिंसायाम्'। तोजति। तुतोज। 'तुजि २४५ पालने'। 'गज २४६ गजि २४७ गृज २४८ गृजि २४९ मुज २५० मुजि २५१ शब्दार्थाः'। 'गज' मदने च। 'वज २५२ व्रज २५३ गतौ'। ववजतुः। 'वदव्रज–' (२२६७) इति वृद्धिः। अव्राजीत्।

अथ टवर्गीयान्ताः शाङ्न्ता अनुदात्तेतः षट्त्रिंशत्। 'अट्ट २५४ अतिक्रमहिंसयोः'। दोपधोऽयम् 'तोपधः' इत्यन्ये। अट्टते। आनट्टे। 'वेष्ट २५५

चिक्षियिव चिक्षियिमेति ॥ क्षेता। क्षेष्यति। क्षयतु। अक्षयत्। क्षयेत्। आशीर्लिङि विशेषमाह। **अकृत्सार्वधातुकयोरिति** ॥ अङ्गस्येत्यधिकृतम्। अयङ्यिक्ङिति लोपः यीतिसप्तम्यन्तमनुवृत्तमङ्गाक्षिप्तप्रत्ययाविशेषणम्। तदादिविधिः। दीर्घश्रुत्या अच इत्युपस्थितमङ्गाविशेषणम्। तदन्तविधिः। तदाह। **अजन्तस्येत्यादिना** ॥ अकृत्सार्वधातुकयोरिति किं। प्रकृत्या तुक्सम्बाधित्वा परत्वाद्दीर्घो न। चिनुयात्। सार्वधातुकत्वान्नदीर्घः। **क्षिजेति** ॥ इदुपधः। **कूजिनेति** ॥ कूज अव्यक्ते शब्दे इत्यनुपदमेव पठितम्। तत्रैव कूज क्षिज अव्यक्ते शब्दे इति पठितुं युक्तमित्यर्थः। अर्थैक्यादिति भावः। **लजलजि भर्त्सन इति** ॥ "भर्त्सनं त्वपवादगीः" इत्यमरः। द्वितीय इदित्। आशीर्लिङि लज्यात्। लज्ज्यात्। **लाजलाजि भर्जन इति** ॥ आदुपधौ। द्वितीय इदित्। जजजजीत्यादि स्पष्टम्। **वजव्रजेति** ॥ आद्यस्य असंयुक्तहलमध्यस्थाकारवत्वेऽपि नशसददवादिगुणानामित्येत्वाभ्यासलोपौ नेत्याह। **ववजतुरिति** ॥ अवाजीत् अवजीत्। द्वितीयस्य तु संयुक्तहलमध्यस्थाकारवत्वादेवैत्वाभ्यासलोपयोर्न प्रसक्तिः। अव्राजीदित्यत्र अतो हलादेरिति वृद्धिविकल्पमाशङ्क्याह। **वदव्रजेति वृद्धिरिति** ॥ हलन्तत्वादेव सिद्धे व्रजग्रहणस्य अतो हलादेरिति विकल्पनिरासार्थत्वादिति भावः। शुचादयोर्द्युसमर्तिवृत्ताः। **शाङ्न्ता इति** ॥ शाङ् श्लाघायामित्यन्ता इत्यर्थः। शाड्यन्ता इति क्वचित्पाठः। **अट्टेति** ॥ तवर्गतृतीयोपधोऽयम्। चर्त्वष्टुत्वाभ्यां टोपधनिर्देशः। तदाह। **दोपधोऽयमिति** ॥ तथा च अट्टधातोः सनि इटि अट्टि स इति स्थिते। ष्टुत्वचर्त्वयोरसिद्धत्वादजादेर्द्वितीयस्येति प्रवर्तमानं द्वित्वम् नन्द्रास्संयोगादय इति दकारं विहाय टिस् इत्यस्य भवति। ततो हलादिशेषे दकारस्य ष्टुत्वचर्त्वयोः अट्टिटिषत इतीष्टं सिध्यति। स्वाभाविकमूर्धन्योपधत्वे नन्द्रा इति निषेधाभावात् टकारद्वयसहितस्यैव द्वित्वे हलादिशेषेण द्वितीयटकारस्य निवृत्तौ अटिट्टिषत इत्यनिष्टं प्रसज्येतेति भावः। **तोपध इति। अन्य इति** ॥ ष्टुत्वेन तोपधनिर्देश

वेष्टने'। विवेष्टे। 'चेष्ट २५६ चेष्टायाम्'। अचेष्टिष्ट। 'गोष्ट २५७ लोष्ट २५८ संघाते'। जुगोष्टे। लुलोष्टे। 'घट्ट २५९ चलने'। जघट्टे। 'स्फुट २६० विकसने'। स्पोटते। पुस्फुटे। 'अठि २६१ गतौ'। अण्ठते। आनण्ठे। 'वठि २६२ एकचर्यायाम्'। ववण्ठे। 'मठि २६३ कठि २६४ शोके'। शोक इह आध्यानम्। मण्ठते। कण्ठते। 'मुठि २६५ पालने'। मुण्ठते 'हेठ २६६ विबाधायाम्'। विबाधा शाठ्यम्। जिहेठे। 'एठ २६७ च'। एठांचक्रे। 'हिडि २६८ गत्यनादरयोः। हिण्डते। जिहिण्डे।' हुडि २६९ संघाते'। जुहुण्डे। 'कुडि २७० दाहे'। चुकुण्डे। 'वडि २७१ विभाजने'। 'मडि २७२ च'। ववण्डे। 'भडि २७३ परिभाषणे'। परिहासः सनिन्दोपालम्भश्च परिभाषणम्। बभण्डे। 'पिडि २७४ संघाते'। पिपिण्डे। 'मुडि २७५ मार्जने'। मार्जनं शुद्धिर्न्यग्भावश्च। मुण्डते। 'तुडि २७६ तोडने'। तोडनं दारणं हिंसनं च। तुण्डते। 'हुडि २७७ वरणे'। वरणं स्वीकारः। 'हरणे इत्येके। हुण्डते। 'चडि २७८ कोपे'। चण्डते। 'शडि २७९ रुजायां संघाते च'। शण्डते। 'तडि २८० ताडने। तण्डते। 'पडि २८१ गतौ'। पण्डते। 'कडि २८२ मदे'। कण्डते। 'खडि २८३ मन्थे'। 'हेडृ २८४ होडृ २८५ अनादरे'। जिहेडे। जुहोडे' 'वाडृ २८६ आप्ताव्ये'। बशादिः। आप्ताव्यमाप्तवः। बाडते। 'द्राडृ २८७ ध्राडृ २८८ विशरणे'। द्राडते। ध्राडते। 'शाडृ २८९ श्लाघायाम्। शाडते।

अथ गड्यन्ताः परस्मैपदिनः। 'शौटृ २९० गर्वे'। शौटति। शुशौट। 'यौटृ २९१ बन्धे'। यौटति। 'म्लेटृ २९२ म्रेडृ २९३ उन्मादे'। द्वितीयो डान्तः।

इति भावः। अस्मिन्पक्षे सनि द्वित्वे कर्तव्ये ष्टुत्वस्य सिद्धत्वेऽपि नन्द्रा इति निषेधाभावात्तत्कारविशिष्टस्याट्टि स इत्यस्य द्वित्वे हलादिशेषेण टकारस्य निवृत्या अतिट्टिषत इति रूपमिति भावः। **आनट्ट इति॥** इह नन्द्रा इति निषेधो न। तत्र द्वितीयस्यैकाच इत्यनुवृत्तेः। **घट्ट चलन इति॥** अयञ्चुरादावपि। **स्फुट विकसन इति॥** अयङ्कुटादावपि। **अठि गताविति॥** लिटि नुमि द्वित्वे हलादिशेषे अत आदेरिति दीर्घे तस्मान्नुड्द्विहल इति नुडिति मत्वाऽऽह। **आनण्ठ इति। वठि एकचर्यायामिति॥** असहायचर्यायामित्यर्थः। **मडिचेति॥** विभाजन इत्यनुषज्यते। मडि भूषायामिति परस्मैपदिषु वक्ष्यते। **शाडृश्लाघायामिति॥** डलयोरैक्यात्। शालत इति काश्यपः। इत्यष्टादयः षट्त्रिंशद्गताः। **अथ गड्यन्ता इति॥** गडि वदनैकदेश इत्यन्ता इत्यर्थः। **म्लेटृम्रेडृ इति॥** एदुपधौ। **द्वितीयोऽन्त इति॥**

टान्तमध्ये पाठस्त्वर्थसाम्यान्नाथतिवत् । म्लेटति । म्रेडति । 'कटे २९४ वर्षावरणयोः' । 'चटे' इत्येके । चकाट । सिचि 'अतो हलादेर्लघोः' (२२८४) इति वृद्धौ प्राप्तायाम् ।

२२९९ । ह्मन्क्षणश्वसजागृणिश्व्येदिताम् । (७-२-५)

हमयान्तस्य क्षणादेर्ण्यन्तस्य श्वयतेरेदितश्च वृद्धिर्नेत्यादिडादौ सिचि । अकटीत् । 'अट २९५ पट २९६ गतौ' । आट । आटतुः । आटुः । पपाट । पेटतुः । पेटुः । 'रट परिभाषणे' । रराट । 'लट २९८ बाल्ये' । ललाट । 'शट २९९ रुजाविशरणगत्यवसादनेषु' । शशाट । 'वट ३०० वेष्टने' । ववाट । ववटतुः । ववटुः । ववटिथ । 'किट ३०१ खिट ३०२ त्रासे' । केटति । खेटति । 'शिट ३०३ षिट ३०४ अनादरे' । शेटति । शिशेट । सेटति । सिषेट । 'जट ३०५ झट ३०६ संघाते' । 'भट ३०७ भृतौ' । 'तट ३०८ उच्छ्राये' । 'खट ३०९

टवर्गतृतीयान्त इत्यर्थः । ननु टान्तेष्वस्य कथम्पाठः । चुड्भावकरण इत्यारभ्यानुक्रम्यमाणेष्वेवास्य पठितुं युक्तत्वादित्यत आह । **टान्त मध्येति** । **नाथतिवदिति** ॥ एधवृद्धावित्यारभ्यानुक्रान्तेषु तवर्गचतुर्थान्तेषु यथा नाथृनाधृयाच्त्रेति तवर्गद्वितीयान्तस्यापि अर्थसाम्यात्पाठस्तद्वदित्यर्थः । **कटे इति** ॥ कण्ठ्यादिः । **चटे इति** ॥ तालव्यादिः आद्यस्य लिटि अभ्यासस्य चुत्वमित्याह । **चकाटेति** ॥ चकटतुः । द्वितीयस्य चेटतुः वैरूप्यापादकादेशादित्वाभावादेत्वाभ्यासलोपौ । **प्राप्तायामिति** ॥ हलन्तलक्षणाया नित्यवृद्धेर्नेटीति निषेधम्बाधित्वा अतोहलादेरिति वैकल्पिकवृद्धौ प्राप्तायामित्यर्थः । **ह्मयन्तेति** ॥ ह्मयन्त क्षण श्वस जागृ णि श्वि एदित् एषान्द्वन्द्वात्षष्ठी । ह् म् य् इत्येते वर्णा येषामन्ते ते ह्मयन्ताः । तदाह । **हमयान्तस्येति** । **क्षणादेरिति** ॥ आदिना श्वसजागृ इत्यनयोर्ग्रहणं । **ण्यन्तस्येति** ॥ प्रत्ययग्रहणपरिभाषया णिग्रहणेन तदन्तग्रहणमिति भावः । **श्वयतेरिति** ॥ श्विधातोरित्यर्थः । **एदित इति** ॥ एत् इत् यस्येति विग्रहः । **वृद्धिर्न स्यादिति** ॥ सिचि वृद्धिरित्यतो नेटीत्यतश्च तदनुवृत्तेरिति भावः । **इडादौ सिचीति** ॥ सिचि वृद्धिरित्यतः सिचीति नेटीत्यत इटीति चानुवर्तत इति भावः । **अकटीदिति** ॥ एदित्वान्न वृद्धिः । **अटपटेति** ॥ अत आदेरिति दीर्घे मत्वा आह । **आटेति । पेटतुरिति** ॥ एत्वाभ्यासलोपौ । वट वेष्टने । **ववटतुरिति** ॥ नशसददवादिगुणानामिति निषेधः । **ववटिथेति** ॥ अत्र थलि च सेटीति प्राप्तस्य नशसददेति निषेधः । **किटखिट त्रास इति** ॥ यद्यपि इटकिटकटीगताविति अग्रे किटधातुः पठ्यते । तथाप्यर्थभेदात् पुनरिह पाठः । खिटत्रासे किट गतौ चेति पठितुं युक्तम् । **शिटषिटेति** ॥ आद्यस्तालव्यादिः । द्वितीयस्तु षोपदेशः । **जट झटेति** ॥ आद्यस्य अवै-

काङ्क्षायाम्' । 'णट ३१० नृत्तौ' । 'पिट ३११ शब्दसंघातयोः' । 'हट दीप्तौ' । 'षट ३१३ अवयवे' । 'लुट ३१४ विलोडने' । 'डान्तोयम्' इत्येके 'चिट ३१५ परप्रेष्ये' । विट ३१६ शब्दे' । 'बिट ३२७ आक्रोशे' । बशादिः । 'हिट' इत्येके । 'इट ३१८ किट ३१९ कटी ३२० गतौ' । एटति । केटति । कटति । ईकारः 'श्वीदितो निष्ठायाम्' (३०३९) इतीण्निषेधार्थः । केचित्तु इदितं मत्वा नुमि कृते कण्टतीत्यादि वदन्ति । अन्येतु 'इ' 'ई' इति प्रश्लिष्य, अयति । इयाय । इयतुः । इयुः । इयथिथ–इयेथ । ईय–इयाय–इयय । दीर्घस्य तु 'इजादेश्च–' (२२३७) इत्यामि अयांचकारेत्यादि उदाहरन्ति । 'मडि ३२१ भूषायाम्' । 'कुडि ३२२ वै-

---

रूप्यापादकादेशादित्वादेत्वाभ्यासलोपौ । द्वितीयस्य तु न । जेटतुः । जञ्झटतुः । **नट नृत्ताविति** ॥ णोपदेशः । चुरादेरेव नाटेः पर्युदासादयं णोपदेश एव । प्रणटति । **इटकिटकटीगताविति** ॥ कटे वर्षावरणयोरिति कटिः पूर्वमेदित्पठितः । इह ईदित्पठ्यते । एदित्वाभावात् ह्रयन्तेति वृद्धिनिषेधो नभवति । अकटीत् । अकाटीत् । ननु तर्हि कटेत्येव कुतो न पठ्यत इत्यत आह । **ईकार इति । केचित्त्विति** ॥ कटि इति ह्रस्वान्तपाठं मत्वा इदित्वान्नुमि कृते अनुस्वारे परसवर्णे च कण्टतीति वदन्तीत्यर्थः । **अन्येत्विति** ॥ उदाहरन्तीत्यन्वयः । **प्रश्लिष्येति** ॥ कटि इत्यनन्तरम् इ ई इति धातुद्वयं सवर्णदीर्घेण प्रश्लिष्य निर्दिष्टमिति भावः । **अयतीति** ॥ इधातोर्लटि शपि गुणे अयादेशः । **इयायेति** ॥ णलि द्वित्वे वृद्धौ आयादेशे अभ्यासस्याऽसवर्ण इति इयङ् । **इयतुरिति** ॥ इकारोऽत्र ह्रस्वः । तथाहि इ अतुसिति स्थिते कित्वाद्गुणाभावे द्विर्वचनेऽचीति निषेधाद्यणभावे इ इत्यस्य द्वित्वे इ इ अतुसिति स्थिते सवर्णपरकत्वादभ्यासस्य इयङभावे सति वार्णादाङ्ङम्बलीय इति सवर्णदीर्घम्बाधित्वा एरनेकाच इत्युत्तरखण्डस्य यणि इयतुरिति रूपम् । इधातोर्भारद्वाजनियमात्थलि वेट् । तत्र इट्पक्षे रूपमाह । **इयथिथेति** ॥ थलि द्वित्वे इटि पित्वेन कित्वाभावात् गुणे अयादेशे अभ्यासस्य इयङ् । नचाचः परस्मिन्निति गुणस्य स्थानिवत्त्वेन असवर्णपरत्वाभावात् कथमभ्यासस्य इयङिति वाच्यम् । असवर्णग्रहणसामर्थ्यादेव स्थानिवत्त्वाप्रसक्तेः । एवं णलि इयायेत्यत्रापि वृद्धेर्नस्थानिवत्त्वम् । थलि इडभावपक्षे रूपमाह । **इयेथेति** ॥ थलि द्वित्वे गुणे अभ्यासस्येयङ् । अथुसि इयथुः । **इयेति** ॥ थस्य अकारादेशे द्वित्वे उत्तरखण्डस्य एरनेकाच इति यणि रूपम् । णलुत्तमोवेति णित्वपक्षे आह । **इयायेति** ॥ द्वित्वे पित्वेन कित्वाभावात् वृद्धौ आयादेशे अभ्यासस्य इयङ् । णित्वाभावे आह । **इययेति** ॥ द्वित्वे पित्वेन कित्वाभावात् गुणे अयादेशे अभ्यासस्य इयङ् । वसि मसि च क्रादिनियमान्नित्यमिटि द्वित्वे उत्तरखण्डस्य एरनेकाच इति यणि इयिव इयिमेति रूपम् । एता एष्यति अयतु ऐत् अयेत् । आशीर्लिङि तु अकृत्सार्वधातुकयोरिति दीर्घात् ईयात् । सिचि वृद्धिः । ऐषीत् । ऐष्यत् । **दीर्घस्य त्विति** ॥ दीर्घस्य ईधातोरित्यर्थः । तस्य लिटं वर्जयित्वा लडादिषु पूर्ववत् । लिटि विशेषमाह । **अयाञ्चकारेति** ॥

कल्ये'। कुण्डति। कुण्डत इति तु दाहे गतम्। 'मुड ३२३ मुड ३२४ मर्दने'। 'चुडि ३२५ अल्पीभावे'। 'मुडि ३२६ खण्डने'। मुण्डति। 'पुडि च' इत्येके। पुण्डति। 'रुटि ३२७ लुटि ३२८ स्तेये'। रुण्टति। लुण्टति। 'रुठि लुठि' इत्येके। 'रुडि लुडि' इत्यपरे। 'स्फुटिर् ३२९ विशरणे। इरित्त्वादङ्। अस्फुटत्--अस्फोटीत्। 'स्फुटि' इत्यपि केचित्। इदित्त्वान्नुम्। स्फुण्टति। 'पठ ३३० व्यक्तायां वाचि'। पेठतुः। पेठिथ। अपठीत्--अपाठीत्। 'वठ ३३१ स्थौल्ये'। ववठतुः। ववठिथ। 'मठ ३३२ मदनिवासयोः'। 'कठ ३३३ कृच्छ्रजीवने'। 'रट ३३४ परिभाषणे'। 'रठ' इत्येके। 'हठ ३३५ धृतिशठत्वयोः'। 'बलात्कारे' इत्येके। हठति। जहाठ। 'रुठ ३३६ लुठ ३३७ उठ ३३८ उपघाते'। ओठति। 'ऊठ' इत्येके। ऊठति। ऊठांचकार। 'पिठ ३३९ हिंसासंक्लेशनयोः'। 'शठ ३४० कैतवे च'। 'शुठ ३४१ प्रतिघाते'। शोठति। 'शुठि' इति स्वामी। शुण्ठति। 'कुठि ३४२ च'। कुण्ठति। 'लुठि ३४३ आलस्ये प्रतिघाते च'। 'शुठि ३४४ शोषणे'। रुठि ३४५ लुठि ३४६ गतौ'। 'चुडु ३४७ भावकरणे'। भावकरणमभिप्रायसूचनम्। चुडुति। चुचुडु। 'अडु ३४८ अभियोगे'। अडुति। आनडु। 'कडु ३४९ कार्कश्ये'। कडुति। चुडुादयस्त्रयो दोपधाः। तेन किपि। चुत्। अत्। कत्। इत्यादि। 'क्रीडृ ३५० विहारे'। चिक्रीड। 'तुडृ ३५१ तोडने'। तोडति। तुतोड। 'तूडृ' इत्येके। 'हुडृ ३५२ हूडृ ३५३ होडृ ३५४ गतौ'। हुड्यात्—हूड्यात्—होड्यात्। 'रौडृ ३५५ अनादरे'। 'रोडृ ३५६ लोडृ ३५७ उन्मादे'। 'अड ३५८ उद्यमे'। अडति। आड। आडतुः। आडुः।

ईधातोरामि गुणे अयादेशः अनुप्रयोगश्च। **कुडि वैकल्य इति** ॥ वैकल्यम् अविवेक इत्याहुः। अपूर्णभावो वा। **मुडमुड मर्दन इत्यादि** ॥ स्पष्टम्। पठधातोर्लिटि अनुसादौ किति एत्वाभ्यासलोपौ। तदाह। **पेठतुरिति। पेठिथेति** ॥ पित्वे अकित्वेऽपि थलिचसेटीत्येत्वाभ्यासलोपौ। **अपठीत्। अपाठीदिति** ॥ अतो हलादेर्लघोरिति वृद्धिविकल्पः। **वठ स्थौल्य इति** ॥ स्थौल्यं स्थूलीभवनम्। नशसददवादिगुणानामित्येत्वाभ्यासलोपनिषेध इति मत्वा आह। **ववठतुः। ववठिथेति। दोपधा इति** ॥ ष्टुत्वेन डोपधनिर्देश इति भावः। **चुदिति** ॥ चुडधातोः किपि हल्ङ्यादिना सुलोपे द्वितीयस्य डस्य संयोगान्तलोपे ष्टुत्वनिवृत्तौ वावसान इति चर्त्वे चुत् इति रूपम्। **अदिति** ॥ अडधातोः किपि पूर्ववत् रूपम्। **कदिति** ॥ कडधातोः किपि रूपम्। **इत्यादीति** ॥ आदिना जश्त्वेन चुदित्यादिसङ्ग्रहः।

'लड ३५९ विलासे'। लडति। डलयोर्लरयोश्चैकत्वस्मरणाल्ललतीति स्वाम्यादयः। 'कड ३६० मदे'। कडति। 'कडि' इत्येके। कण्डति। 'गडि ३६१ वदनैकदेशे'। गण्डति। इति टवर्गीयान्ताः।

अथ पवर्गीयान्ताः। तत्रानुदात्तेतः स्तोभत्यन्ताश्चतुस्त्रिंशत्। 'तिपृ ३६२ तेपृ ३६३ ष्टिपृ ३६४ ष्टेपृ ३६५ क्षरणार्थाः'। आद्योऽनुदात्तः। क्षीरस्वामी त्वयं सेडिति बभ्राम। तेपते। तितिपे। क्रादिनियमादिट्। तितिपिषे। तेप्ता। तेप्स्यते।

२३०० । लिङ्सिचावात्मनेपदेषु। (१-२-११)

इक्समीपाद्धलः परौ झलादी लिङात्मनेपदपरः सिच्चेत्येतौ कितौ स्तः। कित्त्वान्न गुणः। तिप्सीष्ट। तिप्सीयास्ताम्। तिप्सीरन्। लुङि 'झलो झलि' (२२८१) इति सलोपः। अतिप्त। अतिप्साताम्। अतिप्सत। तेपते। तितेपे। तेपिता। तिष्टिपे। तिष्टिपाते। तिष्टिपिरे। तिष्टेपे। तिष्टेपाते। तिष्टेपिरे।

एकत्वस्मरणादिति ॥ शीक्षादाविति शेषः। **गडि वदनेति** ॥ तवर्गान्तेषु गदीति गतम्। परस्मैपदिनः शौटृ गर्व इत्यादयो गताः। **तिपृ इति** ॥ प्रथमत्रयाविदुपधौ। द्वितीयचतुर्थौ एदुपधौ। तृतीयचतुर्थौ षोपदेशौ च। तकारस्य ष्टुत्वेन दकारस्य निर्दिष्टतया दन्त्यपरकसादित्वात्। **आद्य इति** ॥ तिपृ धातुरित्यर्थः। भाष्यादौ अनुदात्तोपदेशेष्वस्य पाठादिति भावः। **बभ्रामेति** ॥ भाष्यविरुद्धत्वादिति भावः। आद्यस्योदाहरति। **तेपत इति** ॥ शपि लघूपधगुणः। **तितिप इति** ॥ असंयोगादिति कित्त्वान्न गुणः। अथ तितिपिष इत्यत्र एकाच उपदेश इति निषेधमाशङ्क्याह। **क्रादिनियमादिति**। **तेप्स्यत इति** ॥ लोडादौ तु, तेपताम्। अतेपत। तेपेत। अथाशीर्लिङि सीयुटि सुटि तिप्सीष्टेति रूपं वक्ष्यति। तत्र लघूपधगुणे प्राप्ते। **लिङिति** ॥ इको झलिति हलन्ताच्चेति च, सूत्रमनुवर्त्तते। असंयोगादित्यतः किदिति। इक इति सामीप्ये षष्ठी। हलि अन्वेति। तदाह। **इक्समीपादित्यादिना** ॥ आत्मनेपदपरकत्वं सिच एव विशेषणम्। नतु लिङः। लिङादेशस्यात्मनेपदस्य लिङः परत्वाभावात्। इकः किं। वह् वक्षीष्ट। सति तु कित्त्वे वचिस्वपीति सम्प्रसारणं स्यात्। आत्मनेपदेषु किम्। अद्राक्षीत्। इह कित्त्वे सति सृजिदृशोर्झल्यमकितीत्यम्न स्यात्। **अतिप्तेति** ॥ लुङस्तादेशे, च्लिः, सिच्। झलोझलीति लोपः। आत्मनेपदपरकत्वेन सिचः कित्वात् न लघूपधगुणः। अथ तेपृधातोरेदुपधत्वस्य प्रयोजनमाह। **तितेपे इति** ॥ इदुदुपधत्वेतु कित्त्वाद्गुणो न स्यादिति भावः। सेट्कोऽयमिति सूचयति। **तेपिषीष्टेति** ॥ तेपिषीष्ट। अतेपिष्ट। ष्टिपृ धातोस्तु धात्वादेः षस्स इति सत्वे ष्टुत्वनिवृत्त्या लटि स्तेपत इति रूपं सिद्धवत्कृत्य लिटि रूपमाह। **तिष्टिप इति** ॥ शर्पूर्वाः खय इति तकारः शिष्यते। षकारस्य निवृत्तौ ष्टुत्वनिवृत्तेः कित्वान्न गुणः। **तिष्टेप इति** ॥

'तेपृ' कम्पने च। 'ग्लेपृ ३६६ दैन्ये' ग्लेपते। 'टु वेपृ ३६७ कम्पने'। वेपते। 'केपृ ३६८ गेपृ ३६९ ग्लेपृ ३७० च'। चात्कम्पने गतौ च। सूत्रविभागादिति स्वामी। मैत्रेयस्तु चकारमन्तरेण पठित्वा कम्पन इत्यपेक्षत इत्याह। ग्लेपेरर्थभेदात्पुनः पाठः। 'मेपृ ३७१ रेपृ ३७२ लेपृ ३७३ गतौ'। 'त्रपूष् ३७४ लज्जायाम्'। त्रपते।

२३०१। तृफलभजत्रपश्च। (६-४-१२२)

एषामत एकारोऽभ्यासलोपश्च स्यात्किति लिटि सेटि थलि च। त्रेपे। त्रेपाते। त्रेपिरे। ऊदित्त्वादिड्वा। त्रपिता—त्रप्ता। त्रपिषीष्ट—त्रप्सीष्ट। 'कपि ३७५ चलने' कम्पते। चकम्पे। 'रबि ३७६ लबि ३७७ अबि ३७८ शब्दे'। ररम्बे। ललम्बे। आनम्बे। 'लबि ३७९ अवस्रंसने च'। 'कबृ ३८० वर्णे'। चकबे। 'क्लीबृ ३८१ अधार्ष्ट्ये'। चिक्लीबे। 'क्षीबृ ३८२ मदे'। क्षीबते। 'शीभृ ३८३ कत्थने'। शीभते। 'चीभृ ३८४ च'। 'रेभृ ३८५ शब्दे'। रिरेभे। 'अभिरभी' कचित्पठ्येते। अम्भते। रम्भते। 'ष्टभि ३८६ स्कभि ३८७ प्रतिबन्धे'। स्तम्भते। उत्तम्भते। नुम्यनुस्वारः। 'उदः स्थास्तम्भ्वोः—' (११८) इति पूर्वसवर्णः। विस्तम्भते। 'स्तन्भेः' (२२७२) इति षत्वं तु न भवति।

ष्टेभृधातोः रूपम्। **तेपृ कम्पने चेति** ॥ चात्क्षरणे। वस्तुतस्तु चकारेण क्षरणार्थस्य लाभात्। पूर्वत्रास्य पाठस्त्यक्तुं शक्यः। केचित्तु, देपृ इति वर्गतृतीयादिं पठन्ति। **चात्कम्पने गतौ चेति** ॥ अनुक्तसमुच्चयार्थ इति भावः। एतच्च टुवेपृकेपृगेपृग्लेपृकम्पन इत्येव सिद्धे पृथक्पाठाल्लभ्यते। **अर्थभेदादिति** ॥ ग्लेपृ दैन्य इति पूर्वं पठितम्। इह तु अर्थभेदात् पुनः पाठः। अन्यथा ग्लेपृ दैन्ये कम्पने गतौचेति गौरवं स्यादिति भावः। **त्रपूषिति** ॥ ऊकारष्वकारश्च इत्। अदुपधः। असंयुक्तहल्मध्यस्थत्वादेत्वाभ्यासलोपयोरप्राप्तावाह। **तृफलेति**। अत एकहल्मध्ये इत्यतः अत इति लिटीति चानुवर्तते। ध्वसोरित्यतः एदिति अभ्यासलोपश्चेतिच। गमहनेत्यस्मात् कितीति। थलिच सेटीति सूत्रच्च। तदाह। **एषामिति** ॥ गुणशब्देन भावितात्कारवत्त्वाद्विरूपादेशाद्द्वित्वादेकहल्मध्यस्थत्वाभावाच्च प्राप्ते विधिरयम्। **आनम्ब इति** ॥ द्विहल्त्वान्नुट्। **ष्टभिस्कभीति** ॥ आद्यः षोपदेशः। ष्टुत्वेन तकारस्य टकारनिर्देशेन दंत्यपरकसादित्वात् ततः षस्य सत्वे ष्टुत्वस्य निवृत्तिः। तदाह। **उत्तम्भत इति**। **नुम्यनुस्वार इति** ॥ इदित्वान्नुमि नश्चापदान्तस्येति तस्यानुस्वारः। अनुस्वारस्य ययीति तस्य परसवर्णः मकारः। ष्टम्भ इत्येव पाठे तु आशीर्लिङि अनिदितामिति नलोपः स्यादिति भावः। **पूर्वसवर्ण इति** ॥ सकारस्य थकारः। तस्य खरिचेति चर्त्वे तकार इत्यर्थः। अत्र यद्वक्तव्यं तत् उदस्थास्तम्भ्वोरित्यत्र हल्सन्धौ प्रपञ्चितम्।

इनुविधौ निर्दिष्टस्य सौत्रस्यैव तत्र ग्रहणात्। तद्बीजं तु '—स्थास्तम्भ्वोः-' (११८) इति पवर्गीयोपधपाठः 'स्तन्भेः' (२२७२) इति तवर्गीयोपधपाठश्चेति माधवः। केचिदस्य टकार औपदेशिक इत्याहुः। तन्मते विष्टम्भते। ष्टम्भते। टष्टम्भे। 'जभी ३८८ जृभि ३८९ गात्रविनामे'।

२३०२। रधिजभोरचि। (७-१-६१)

एतयोर्नुमागमः स्यादचि। जम्भते। जजम्भे। जम्भिता। अजम्भिष्ट। जृम्भते। जजृम्भे। 'शल्भ ३९० कत्थने'। शशल्भे। 'वल्भ ३९१ भोजने'। दन्त्योष्ठ्यादिः। ववल्भे। 'गल्भ ३९२ धाष्ट्यें'। गल्भते। 'श्रम्भु ३९३ प्रमादे'। तालव्यादिर्दन्त्यादिश्च। श्रम्भते। स्रम्भते वा। 'ष्टुभु ३९४ स्तम्भे। स्तोभते। विष्टोभते। तुष्टुभे। व्यष्टोभिष्ट।

अथ परस्मैपदिनः। 'गुपू ३९५' रक्षणे।

विस्तम्भत इति ॥ सात्पदाद्योरिति षत्वनिषेध इति भावः। **नन्वेवमपि स्तन्भेरिति** षत्वङ्कुतो न स्यादित्यत आह। **स्तन्भेरिति** ॥ षत्वन्तु न भवति। कुत इत्यत आह। **इनुविधाविति** ॥ स्तन्भु स्तुन्भु स्कन्भु स्कुन्भु स्कुञ्भ्यश्चनुश्चेति सूत्रे निर्दिष्टस्यैव प्रातिपदोक्तषत्वविधौ ग्रहणादित्यर्थः। नन्वेवं सति उदस्थास्तम्भ्वोरिति पूर्वसवर्णविधावपि सौत्रस्यैव ग्रहणं स्यादित्यत आह। **तद्बीजन्त्विति** ॥ षत्वविधौ सौत्रस्यैव ग्रहणं पूर्वसवर्णविधौ तु तदन्यस्येत्यत्र प्रमाणमित्यर्थः। ननु पूर्वसवर्णविधौ मोपधस्य। षत्वविधौ तु नोपधस्य पाठ इत्यत्र किं प्रमाणमित्यत आह। **इति माधव इति** ॥ पाणिनिशिष्यपरम्परैव तत्र प्रमाणमिति भावः। लिटि शर्पूर्वाः खय इति षकारस्य निवृत्तौ ष्टुत्वनिवृत्त्या तकारः शिष्यते। तस्तम्भे। टकार औपदेशिक इति स्वाभाविक एव टकारो नतु ष्टुत्वसम्पन्न इत्यर्थः। **तन्मते विष्टम्भत इति** ॥ तथा च। षकारस्यापि स्वाभाविकत्वात् षत्वविधौ स्तन्भेरेव ग्रहणे षकारो निर्बाध इति भावः। **टष्टम्भ इति** ॥ शर्पूर्वा इति टकार एव शिष्यत इति भावः। **जभी जृभि गात्रविनाम इति** ॥ गात्रस्य विनामः वक्रभावः। आद्य ईदित्। द्वितीय इदित्। आद्यस्य ईदित्वं श्वीदितो निष्ठायामिति इण्णिषेधार्थम्। **रधिजभोरिति** ॥ रध हिंसायामिति श्यन्विकरणस्य चतुर्थान्तस्य इका निर्देशः। इदितो नुम् धातोरित्यतः नुमित्यनुवर्तते। तदाह। **एतयोरिति** ॥ अनिदित्वात् नुम्विधिः। **जम्भत इति** ॥ शपि नुम्। जम्भितेत्यादाविटि अच्परकत्वान्नुम्। आचि किम्। रद्धा। जब्धा। **श्रम्भु इति** ॥ अकारमध्यः। **ष्टुभुस्तम्भ इति** ॥ ष्टुत्वेन तकारस्य टः षोपदेशोऽयम्। **विष्टोभत इति** ॥ उपसर्गात्सुनोतीति षत्वम्। **व्यष्टोभिष्टेति** ॥ प्राक्सितादड्व्यवायेऽपीति षत्वम्। तिपृ इत्यादयः स्तोभत्यन्ता अनुदात्तेतो गताः। **गुपू रक्षण इति** ॥ ऊदिदयम्। **गुपूधूपेति।**

२३०३ । गुपूधूपविच्छिपणिपनिभ्य आयः । (३-१-२८)

एभ्य आयप्रत्ययः स्यात्स्वार्थे । 'पुगन्त–' (२१८९) इति गुणः ।

२३०४ । सनाद्यन्ता धातवः । (३-१-३२)

सनादयः कर्मेर्णिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञाः स्युः । धातुत्वाल्लडादयः । गोपायति ।

२३०५ । आयादय आर्धधातुके वा । (३-१-३१)

आर्धधातुकविवक्षायामायादयो वा स्युः ।

२३०६ । कास्प्रत्ययादाममन्ते लिटि । (३-१-३५)

कास्धातोः प्रत्ययान्तेभ्यश्चाम्स्याल्लिटि न तु मन्त्रे ।

कास्यनेकाज्ग्रहणं कर्तव्यम् ।

एभ्य इति ॥ गुपू धूप विच्छि पणि पनि इत्येभ्य इत्यर्थः । अर्थनिर्देशाभावादाह । **स्वार्थे इति** ॥ आयप्रत्ययः अकारान्तः । तत्फलन्तु गोपायतन्नमुमनस्यमान इत्यत्र गोपायेत्यस्य धातुस्वरेणान्तोदात्तस्य शबकारेण एकादेशस्यापि, एकादेश उदात्तेनोदात्त इत्युदात्तत्वे, तमित्यस्य अदुपदेशात्परसार्वधातुकत्वेन अनुदात्तस्य 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरितत्वमिति बोध्यम् । धातोरेकाच इत्यतो धातोरित्यनुवृत्या धातोरिति विहितत्वादायप्रत्ययस्यार्धधातुकत्वात् तत्कार्यं गुणादि भवति । तदाह । **पुगन्तेति । गुण इति** ॥ नन्वायप्रत्ययान्तस्य भ्वादिषु पाठाभावेन धातुत्वाभावात् कथमस्माल्लडादय इत्यत आह । **सनाद्यन्ता इति** ॥ गुप्तिज्किद्भ्यः सनित्यारभ्य कर्मेर्णिङित्यन्तैः सूत्रैः सनादिप्रत्ययान्विधाय सूत्रमिदं पठितम् । सन् आदिर्येषां ते सनादयः णिङ्प्रत्ययपर्यन्ताः, ते अन्ते येषां ते सनाद्यन्ता इति विग्रहः । तदाह । **सनादयः कर्मेर्णिङन्ता इति** ॥ सन्क्यच् काम्यच् क्यङ् क्यषोऽथाचारक्विब्णिज्यङौ तथा । यगायईयङ् णिङ्चेति द्वादशामी सनादयः । इति सङ्ग्रहः । संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणप्रतिषेधादिह तदन्तग्रहणम् । **धातुत्वादिति** ॥ आयप्रत्ययान्तस्येत्यर्थः । **गोपायतीति** ॥ शपि अतो गुण इति पररूपम् । **आयादय इति** ॥ आयः आदिः येषां ते आयादयः । आय ईयङ् णिङ्चेति त्रय आयादयो मताः । गुपूधूपविच्छिपणिपनिभ्य आयः, ऋतेरीयङ्, कर्मेर्णिङित्युत्तरमस्य सूत्रस्य पाठात् । **विवक्षायामिति** ॥ आर्धधातुक इति विषयसप्तमीति भावः । परसप्तमीत्वेतु गोपायितेत्यत्र अतो लोपो न स्यात् । आर्धधातुकोपदेशकाले अदन्तत्वाभावादिति भावः । तथा च लिटि आयप्रत्ययस्य विकल्पः स्थितः । तत्र आयप्रत्ययपक्षे आह । **कास्प्रत्ययादिति** ॥ आम् अमन्त्रे इति च्छेदः । चकासृ दीप्तौ, जागृ निद्राक्षये, इत्यादिभ्योऽपि लिटि आमिष्यते । तदर्थमाह । **कास्यनेकाजिति** ॥ ननु यद्यस्मिन् वार्तिके, सूत्रस्थं प्रत्ययग्रहणमपि सम्बध्यते । तदा कासृधातोश्च

सूत्रे प्रत्ययग्रहणमपनीय तत्स्थानेऽनेकाच इति वाच्यमित्यर्थः ।

२३०७ । आर्धधातुके । (६-४-४६)

इत्यधिकृत्य ।

२३०८ । अतो लोपः । (६-४-४८)

आर्धधातुकोपदेशकाले यदकारान्तं तस्याकारस्य लोपः स्यादार्धधातुके परे । गोपायांचकार । गोपायांबभूव । गोपायामास । जुगोप । जुगुपतुः । ऊदित्त्वाद्वेट् । जुगोपिथ—जुगोप्थ । गोपायिता—गोपिता—गोप्ता । गोपाय्यात्—गुप्यात् । अगोपायीत्—अगोपीत्—अगौप्सीत् । 'धूप ३९६ संतापे' । धूपायति ।

अनेकाचश्च प्रत्ययान्ताच्चेति । ततश्च अ इवाचरति अति क्विबन्ताल्लडादयः । लिटि औ अतुरित्यादीष्टत्र सिध्येत् । प्रत्ययान्तत्वेन आमः प्रसङ्गात् । यदि तु कासधातोश्च अनेकाचः प्रत्ययान्ताच्चेति व्याख्यायेत, तदा चकास् जाग्रादिभ्यो नस्यादित्यत आह । **प्रत्ययग्रहणमपनीयेति** ॥ तथाच कास्धातोरनेकाचश्च आमित्येतावतैव लभ्यत इति नोक्तदोषद्वयमितीति भावः । वस्तुतस्तु अ इवाचरति अतीत्यादि नास्त्येवेति सुब्धातुनिरूपणे वक्ष्यते । तथा च गोपाय आमिति स्थितम् । **अतो लोप इति** ॥ अनुदात्तोपदेशवनतीत्यतः उपदेशग्रहणमित्यनुवर्तते । आर्धधातुक इत्यधिकृतम् । तदिह आवर्तते । एकमुपदेशे अन्वेति । द्वितीयन्तु लोपे परानिमित्तम् । तदाह । **आर्धधातुकोपदेश इत्यादिना** ॥ आर्धधातुकोपदेश इति किम् । अयपय गतौ । आभ्यां क्विपि, लोपो व्योरिति लोपे, ह्रस्वस्य पितीति तुकि, अपृक्तलोपे, अत् पत्, इतीष्यते । अत्र यलोपे सति अतो लोपो न भवति । आर्धधातुकोपदेशकाले धातुत्वाद्यकारान्तत्वात् । आर्धधातुकोपदेश इत्यत्र आर्धधातुकग्रहणाभावे चिकीर्षितमित्यत्र अल्लोपो न स्यात् । सन उपदेशकाले नकारान्तत्वात् । आर्धधातुकग्रहणेतु न दोषः । अनुबन्धविनिर्मुक्तात् सन्प्रत्ययादेव क्तप्रत्ययस्य आर्धधातुकस्योत्पत्तेः । आर्धधातुके पर इति किम् । कथयति । चुरादावदन्तोऽयम् । अत्र उपधावृद्धिर्न भवति । अचःपरस्मिन्नित्यल्लोपस्य स्थानिवत्त्वात् । आर्धधातुके पर इत्यनुक्तौ तु अल्लोपस्य परानिमित्तकत्वाभावात् स्थानिवत्त्वं नस्यात् । तथाच प्रकृते गोपाय आमिति स्थिते अतो लोपे गोपायामिति सिध्यति । यद्यपि सवर्णदीर्घेणाप्येतत्सिद्धम् । तथापि न्याय्यत्वादतो लोप उपन्यस्तः । आयप्रत्ययाभावपक्षे आह । **जुगोपेति** ॥ पित्त्वेन कित्त्वाभावाल्लघूपधगुणः । **जुगुपतुरिति** ॥ कित्त्वान्न गुणः । **ऊदित्त्वाद्वेडिति** ॥ थलादाविति शेषः । जुगुपिव । जुगुप्व । जुगुपिम । जुगुप्म । क्रादिनियमस्तु नञ्प्राप्तस्यैवाभावस्य । नतु विभाषादिलभ्यस्येति षिधू शास्त्र इत्यत्रोक्तम् । **गोपायितेति** ॥ लुटि आम्प्रत्ययपक्षे नित्यमिट् । आयप्रत्ययाभावपक्षे इड्विकल्पः । ऊदित्त्वस्य केवले चरितार्थत्वात् । तदाह । **गोपिता, गोप्तेति** ॥ गोपायिष्यति । गोपिष्यति । गोप्स्यति । गोपायतु । अगोपायत् । गोपायेत् । आशीर्लिङि आयप्रत्ययपक्षे अतो लोपे रूपमाह । **गोपाय्यादिति** ॥ आयप्रत्ययाभावे आह । **गुप्यादिति** ॥ लुङि सिचि आयप्रत्ययपक्षे आह । **अगोपायीदिति** ॥ आयप्रत्य-

धूपायाञ्चकार। दुधूप्। धूपायितासि। धूपितासि। 'जप ३९७ जल्प ३९८ व्यक्तायां वाचि'। 'जप' मानसे च। 'चप ३९९ सान्त्वने'। 'षप ४०० समवाये'। समवायः संबन्धः, सम्यगवबोधो वा। सपति। 'रप ४०१ लप ४०२ व्यक्तायां वाचि'। 'चुप ४०३ मन्दायां गतौ'। चोपति। चुचोप। चोपिता। 'तुप ४०४ तुम्प ४०५ त्रुप ४०६ त्रुम्प ४०७ तुफ ४०८ तुम्फ ४०९ त्रुफ ४१० त्रुम्फ ४११ हिंसार्थाः'। तोपति। तुतोप। तुम्पति। तुतुम्प। तुतुम्पतुः। संयोगात्परस्य लिटः कित्वाभावान्नलोपो न। 'किदाशिषि' (२२१६) इति कित्त्वान्नलोपः। तुप्यात्। 'प्रात्तुम्पतौ गवि कर्तरि' इति पारस्करादिगणे पाठात्सुट्। प्रस्तुम्पति गौः। श्तिपा निर्देशाद्यङ्लुकि न। प्रतोतुम्पीति। त्रोपति। त्रुम्पति। तोफति। तुम्फति। त्रोफति। त्रुम्फति। इहाद्यौ द्वौ पञ्चमषष्ठौ च नीरेफाः। अन्ये सरेफाः। आद्याश्चत्वारः प्रथमान्ताः। ततो द्वितीयान्ताः। अष्टावप्युकारवन्तः। 'पर्प ४१२ रफ ४१३ रफि ४१४ अर्ब ४१५ पर्ब ४१६ लर्ब ४१७ बर्ब ४१८ मर्ब ४१९ कर्ब ४२० खर्ब ४२१ गर्ब ४२२ शर्ब ४२३ षर्ब ४२४ चर्ब ४२५ गतौ'। आद्यः प्रथमान्तः। ततो द्वौ द्वितीयान्तौ। तत एकादश तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। पर्पति। पपर्प। रफति। रम्फति। अर्बति। आनर्ब। पर्बति। लर्बति। बर्बति। पवर्गीयादिरयम्। मर्बति। कर्बति। खर्बति। गर्बति। शर्बति। सर्बति। चर्बति। 'कुबि ४२६ आच्छादने'। कुम्बति। 'लुबि ४२७ तुबि ४२८ अर्दने'। लुम्बति। तुम्बति। 'चुबि ४२९ वक्त्रसंयोगे'। चुम्बति। 'पृभु ४३० पृम्भु ४३१

याभावपक्षे इटि रूपमाह। **अगोपीदिति** ॥ इट ईटीति सिज्लोपः। नेटीति हलन्तलक्षणवृद्धेर्निषेधः। इडभावेतु इटः परत्वाभावात् नसिज्लोप इत्याह। **अगौप्सीदिति** ॥ वदव्रजेति वृद्धिः। अगोपायिष्यत्। अगोपिष्यत्। अगोप्स्यत्। **धूप सन्ताप इति** ॥ गुपूधूप इत्यायः। आर्धधातुके तद्विकल्पः। **षप समवाय इति** ॥ षोपदेशोऽयम्। **चुप मन्दायामिति** ॥ चवर्गप्रथमादिरयं। चवर्गादिस्त्वनिट्कः। **तुपतुम्पेति** ॥ अष्टावप्युदुपधाः तृतीयचतुर्थौ सप्तमाष्टमौ च रेफवन्तः इति मूले स्पष्टीभविष्यति। तुतुम्पतुरित्यत्र नलोपमाशङ्क्याह। **संयोगादिति** ॥ आशीर्लिङि विशेषमाह। **किदाशिषीति। प्राक्तुम्पताविति** ॥ श्तिपा निर्देशोऽयम्। तुम्पधातौ परे सुट् स्यात् गविकर्तरि सतीत्यर्थः। आदेः परस्येति तुम्पधातोः सुट् आद्यवयवः सुड्विधावस्मिन् तुम्पताविति श्तिपानिर्देशस्य प्रयोजनमाह। **श्तिपानिर्देशाद्यङ् लुकि नेति** ॥ श्तिपा शपाऽनुबन्धेनेत्युक्तेरिति भावः। **पृभुषृम्भु इति** ॥ ऋदुपधौ षोपदेशौ। **सृभ्यादिति** ॥ आशी-

हिंसार्थौ'। सर्भति। ससर्भ। सर्भिता। सृम्भति। ससृम्भ। सृभ्यात्। 'षिभु षिभि' इत्येके। सेभति। सिम्भति। 'शुभ ४३२ शुम्भ ४३३ भाषणे'। 'भासने' इत्येके। 'हिंसायाम्' इत्यन्ये।

अथानुनासिकान्ताः। तत्र कम्यन्ता अनुदात्तेतो दश। 'घिणि ४३४ घुणि ४३५ घृणि ४३६ ग्रहणे'। नुम्। ष्टुत्वम्। घिण्णते। जिघिण्णे। घुण्णते। जुघुण्णे। घृण्णते। जघृण्णे। 'घुण ४३७ घूर्ण ४३८ भ्रमणे'। घोणते। घूर्णते। इमौ तुदादौ परस्मैपदिनौ। 'पण ४३९ व्यवहारे स्तुतौ च'। पन ४४० च, स्तुताविति संबद्ध्यते पृथङ्निर्देशात्। पनिसाहचर्यात्पणेरपि स्तुतावेवायप्रत्ययः। व्यवहारे तु, पणते। पेणे। पणितेत्यादि। स्तुतावनुबन्धस्य केवले चरितार्थत्वादायप्रत्ययान्तान्नात्मनेपदम्। पणायति। पणायां चकार। पेणे। पणायितासि। पणितासे। पणाय्यात्। पणिषीष्ट। पनायति। पनायां चकार। पेने। 'भाम ४४१ क्रोधे'। भामते। बभामे। 'क्षमूष् ४४२ सहने'। क्षमते। चक्षमे। चक्षमिषे। चक्षंसे। चक्षमिध्वे। चक्षंध्वे। चक्षमिवहे।

लिंङि अनिदित्वान्न लोपः। **षिभु षिभि इत्येक इति** ॥ इदुपधौ द्वितीय इदित्। **शुभ शुम्भेति** ॥ द्वितीयस्य आशीर्लिंङि अनिदित्वान्न लोपः। इति गुपू इत्यादयः पवर्गान्ताः परस्मैपदिनो गताः। **कम्यन्ता इति** ॥ कमु कान्तौ इत्येतत्पर्यन्ता इत्यर्थः। **घुण घूर्णेति** ॥ द्वितीयस्य दीर्घपाठः स्पष्टार्थः। उपधायाश्चेत्येव दीर्घसिद्धेः। केचित्तु। घुर्णेति ह्रस्वमेव पठन्ति। **स्तुतावित्येवेति** ॥ न तु व्यवहार इत्येवकारार्थः। **पृथङ्निर्देशादिति** ॥ अन्यथा पणपन व्यवहारेस्तुतौचेत्येव निर्देशादिति भावः। यद्यपि पृथङ्निर्देशो यथासङ्ख्यनिवृत्त्यर्थ इत्यपि वक्तुं शङ्क्यम्। तथापि सम्प्रदायानुरोधादेवमुक्तम्। **पनि साहचर्यादिति** ॥ पनधातुः स्तुतावेव वर्तते। तत्साहचर्यात् गुपूधूपविच्छेत्यत्र पणधातुरपि स्तुत्यर्थक एव गृह्यते। ननु व्यवहारार्थकः। अतः स्तुतावेव पणधातोरायप्रत्ययः। न तु व्यवहारे इत्यर्थः। क्रेतव्यद्रव्यस्य मूल्यनिर्धारणाय प्रश्नप्रतिवचनात्मको व्यवहारः। ननु स्तुतौ पणायतीति रूपं वक्ष्यमाणमनुपपन्नम्। पणधातोरनुदात्तेत्वेनात्मनेपदापत्तेः। न च आयप्रत्ययान्तस्यानुदात्तेत्वन्नेति शङ्क्यम्। पणधातौ श्रुतस्यानुदात्तेत्वस्य आनर्थक्यात्तदङ्गन्यायेन आयप्रत्ययान्ते अन्वयोपपत्तेरित्यत आह। **स्तुताविति** ॥ अनुबन्धस्य अनुदात्तात्मकस्य। इतः आर्धधातुकविषये कदाचिदायप्रत्ययविनिर्मुक्ते चरितार्थत्वादायप्रत्ययान्तादात्मनेपदमेत्यर्थः। एवञ्च तुल्यन्यायत्वादेकाच उपदेश इति निषेधोऽपि नेति सूचितम्। **क्षमूष् सहन इति** ॥ षिद्भिदादिभ्योऽङित्यार्धर्थं षित्वम्। ऊदित्वादिट्विकल्पं मत्वाऽऽह। **चक्षमिषे। चक्षंस इति** ॥ इडभावपक्षे अनुनासिकस्य क्झलोरिति दीर्घस्तु न भवति। क्सिसाहचर्येण तिङ्भिन्नस्यैव झलादेस्तत्र ग्रहणात्। वहिमह्यो-

२३०९। म्वोश्च। (८-२-६५)

मान्तस्य धातोर्मस्य नकारादेशः स्यान्मकारे वकारे च परे। णत्वम्। चक्षमिवहे--चक्षण्वहे। चक्षमिमहे--चक्षण्महे। क्षमिष्यते--क्षंस्यते। क्षमेत। आशिषि, क्षमिषीष्ट--क्षंसीष्ट। अक्षमिष्ट--अक्षंस्त। 'कमु ४४३ कान्तौ'। कान्तिरिच्छा।

२३१०। कमेर्णिङ्। (३-१-३०)

स्वार्थे। ङित्वात्तङ्। कामयते।

२३११। अयामन्ताल्वाय्येत्न्विष्णुषु। (६-४-५५)

'आम्' 'अन्त' 'आलु' 'आय्य' इत्नु' 'इष्णु' एषु णेरयादेशः स्यात्। वक्ष्यमाणलोपापवादः। कामयाञ्चक्रे। 'आयादय आर्धधातुके वा' (२३०५)। चकमे। कामयिता--कमिता। कामयिष्यते--कमिष्यते।

रिङभावपक्षे विशेषमाह। **म्वोश्चेति** ॥ मोनोधातोरित्यनुवर्तते। तदाह। मान्तस्येति। **णत्वमिति** ॥ षात्परत्वात् अट्कुप्वाङिति नकारस्य णत्वमित्यर्थः। **कमु कान्ताविति** ॥ उदितोवेति क्त्वायां इड्विकल्पार्थमुदित्वम्। कान्तिशब्दस्य प्रभापरत्वभ्रमं वारयति। **कान्तिरिच्छेति** ॥ स्वर्गकाम इत्यादौ कमेरिच्छायां प्रयोगबाहुल्यदर्शनादिति भावः। कामोऽभिलाषस्तर्षश्चेत्यमरः। **कमेर्णिङिति**। शेषपूरणेन सूत्रं व्याचष्टे। **स्वार्थे इति** ॥ अर्थविशेषानिर्देशादिति भावः। णङावितौ। आयादय आर्धधातुके वेत्यत्र णिचो ग्रहणव्यावृत्तये ङित्करणम्। **ङित्वात्तङिति** ॥ नत्वनुदात्तेत्त्वात्तङ्। शब्दपराविप्रतिषेधादिति भावः। **कामयत इति** ॥ णिङि अत उपधाया इति वृद्धौ कामि इति णिङन्तम्। किङिति चेति निषेधस्तु न। अनिग्लक्षणत्वात्। णिङन्तस्य धातुत्वात् लडादयः। तत्र लटि शपि गुणे अयादेशे कामयत इति रूपम्। कामयेते इत्यादि सुगमम्। लिटि कास्यनेकाच इत्यामि आम इति लिटो लोपे, कामि आम् इति स्थिते, सार्वधातुकेति गुणम्बाधित्वा णेरनिटि इति वक्ष्यमाणे णिलोपे प्राप्ते। **अयामन्तेति** ॥ अय् इति छेदः। णेरनिटीत्यतो णेरित्यनुवर्तते। तदाह। **णेरयादेशः स्यादिति** ॥ तथा च कामयामित्यामन्तं स्थितम्। ततः कृञ्चानुप्रयुज्यत इत्यनुप्रयोगाल्लिडिति मत्वाऽऽह। **कामयाञ्चक्र इति** ॥ णिङ आयादिष्वन्तर्भावाल्लिडादावार्धधातुके तद्विकल्पमुक्तं स्मारयति। **आयादय इति। चकम इति** ॥ सेट्कोऽयम्। चकमिषे। चकमिध्वे। चकमिवहे। चकमिमहे। **कामयितेति** ॥ लुटि णिङ्पक्षे तासि इटि वृद्धौ गुणे अयादेशे रूपम्। कमिता। कामयिष्यते। कामयताम्। अकामयत। कामयेत। कामयिषीष्ट। अथ णिङन्तात् कामि इत्यस्माल्लुङः

२३१२ । णिश्रिद्रुस्रुभ्यः कर्तरि चङ् । (३-१-४८)

ण्यन्तात् श्र्यादिभ्यश्च च्लेश्चङ् स्यात्कर्त्रर्थे लुङि परे । 'अकाम्' 'इ' 'अत' इति स्थिते ।

२३१३ । णेरनिटि । (६-४-५१)

अनिडादावार्धधातुके परे णेर्लोपः स्यात् । परत्वात् 'एरनेकाचः–' (२७२) इति यणि प्राप्ते ।

'ण्यल्लोपाविय्ङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन ।'

इति वार्तिकम् । णिलोपस्य तु पाचयतेः पाक्तिरित्यादि क्तिजन्तमवकाश इति भावः । वस्तुतस्तु 'अनिटि' इति वचनसामर्थ्यादार्धधातुकमात्रस्य वि-

---

तादेशे च्लेः सिजादेशे प्राप्ते । **णिश्रीति** ॥ णि श्रि द्रु स्रु एषां द्वन्द्वः । प्रत्ययग्रहणपरिभाषया णीति तदन्तस्य ग्रहणम् । च्लिलुङीत्यतो लुङीति, च्लेः सिजित्यतः च्लेरिति चानुवर्तते । तदाह । **ण्यन्तादित्यादिना** ॥ चङाविती । **णेरनिटीति** ॥ आर्धधातुक इत्यधिकृतम् । अतो लोप इत्यस्मात् लोप इत्यनुवर्तते । अनिटीत्यस्य आर्धधातुकविशेणत्वात् तदादिविधिः । तदाह । **अनिडादाविति** ॥ तथाच णिलोपे काम् अ त इति स्थिते । **परत्वादिति** ॥ एरनेकाच इत्यस्य णेरनिटीत्यपेक्षया परत्वाण्णिलोपं बाधित्वा यणि प्राप्ते सतीत्यर्थः । कृते तु यणि लोपो दुर्लभः णेरभावात् । स्थानिवत्त्वेऽपि यणा बाधितस्य पुनरुन्मेषो दुर्लभः । वस्तुतस्तु स्थानिवत्त्वमेवेह दुर्लभम् । यण्स्थानिनमिकारं अल्धर्मणित्वरूपेणाश्रित्य प्रवर्तमानस्य णिलोपस्याल्विधित्वेन तत्र स्थानिवत्त्वासम्भवात् । स्पष्टा चेयं रीतिः भोभगो इति सूत्रभाष्ये इति शब्देन्दुशेखरे विस्तरः । **ण्यल्लोपाविति** ॥ णिलोपः इयङ्यण्गुणवृद्धिदीर्घाः एभ्यः, अल्लोपस्तु वृद्धिदीर्घाभ्यां पूर्वविप्रतिषेधेनेति विवेकः । तथा च पूर्वविप्रतिषेधादिह यणं बाधित्वा णिलोपो भवतीति स्थितम् । ननु अततक्षत्, आटिटत्, कारणा, कारकः, कार्यते, इति वक्ष्यमाणेषु वार्त्तिकोदाहरणेषु क्रमेण इयङ् यण् गुण वृद्धिदीर्घाणामवश्यं प्राप्तेर्णिलोपस्य निरवकाशत्वादेव इयङादिबाधकत्वसम्भवादिदं वार्त्तिकं व्यर्थम् । सुधियौ, प्रध्यौ, कर्ता, चकार, इत्यादौ इयङ्यण्गुणवृद्धिदीर्घाणां सावकाशत्वादित्यत आह । **णिलोपस्यत्विति** ॥ पचधातोर्णिचि उपधावृद्धौ, पाचि इति ण्यन्तात्, स्त्रियां क्तिनिति क्तिनि, तितुत्रतथसिसुसरकसेषु च इति इण्निषेधे णेरनिटीति णिलोपे कुत्वे पाक्तिरिति स्थितिः । क्तिजन्तमिति पाठेतु, क्तिच् क्तौच संज्ञायामिति बोध्यः । पाक्तिरिति कस्यचित्संज्ञा । अत्र इयङादीनां अप्रसक्तेर्णिलोपस्यापि सावकाशत्वं तुल्यम् । तत्र अततक्षदित्यादौ परत्वादियङादिप्राप्तौ तन्निवृत्त्यर्थं वार्त्तिकमिदमारम्भणीयमिति भावः । वार्त्तिकं व्यर्थमेवेत्याह । **वस्तुतस्त्विति** । **आर्धधातुकमात्रमिति** ॥ कृत्स्नमनिडाद्यार्धधातुकमस्य णिलोपस्य विषय इत्यर्थः । तथाहि । अततक्षदित्यादौ परानपि इयङादीन् णिलोपः अपवादत्वात् बाधते । परापेक्षया अपवादस्य प्रबलत्वात् ।

षयः । तथाचेयङादेरपवाद एवायम् । इयङ् । अततक्षत् । यण् । आटिटत् । गुणः । कारणा । वृद्धिः । कारकः । दीर्घः । कार्यते ।

२३१४ । णौ चङ्युपधाया ह्रस्वः । (७-४-१)

चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वः स्यात् ।

२३१५ । चङि । (६-१-११)

चङि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तोऽजादेस्तु द्वितीयस्य ।

परत्वादियङादीनां णिलोपबाधकत्वाभ्युपगमे हि णेरनिटीत्यत्र अनिटीति व्यर्थम् । कारयितेत्यादाविडाद्यार्धधातुके गुणेनैव णिलोपस्य बाधसिद्धेः । ततश्च अनिटीति वचनसामर्थ्यादनिडादावार्धधातुके सर्वस्मिन्परे णिलोप इति विज्ञायते । एवञ्च अततक्षदित्यादावियङादिप्रवृत्तियोग्येऽप्यार्धधातुके सर्वत्र णिलोप इत्यस्य निरवकाशत्वादपवादत्वादेव णिलोपेन इयङादिबाधसिद्धेर्वार्त्तिकमिदं व्यर्थमिति भावः । **अपवाद एवायमिति** ॥ णिलोप इत्यर्थः । अतो लोपस्तु चिकीर्षक इत्यत्र वृद्धिं, चिकीर्ष्यादित्यत्र अकृत्सार्वधातुकयोरिति दीर्घञ्च, बाधित्वा पूर्वविप्रतिषेधाद्भवति । नह्यतो लोपो वृद्धिदीर्घयोरपवादः । गोपायितेत्यादौ वृद्धिदीर्घयोरप्राप्तयोरप्यतोलोपस्यारम्भादित्यलम् । **इयङिति** ॥ उदाहरणसूचनमिदम् । **अततक्षदिति** ॥ तक्षधातोर्ण्यन्तात्लुङस्तिपि इकारलोपे चङि द्वित्वे संयोगपूर्वकत्वादेरनेकाच इति यणभावे इयङि प्राप्ते पूर्वविप्रतिषेधात् णिलोपे हलादिशेषे अडागमे अततक्षदिति रूपम् । यणित्युदाहरणसूचनम् । **आटिटदिति** ॥ अटधातोर्ण्यन्तात् आटि इत्यस्मात् लुङि तिपि इकारलोपे चङि टि इत्यस्य द्वित्वे एरनेकाच इति यणं बाधित्वा पूर्वविप्रतिषेधाण्णिलोपे आटि वृद्धौ रूपम् । गुण इत्युदाहरणसूचनम् । **कारणेति** ॥ स्त्रियामित्यधिकारे कृञ्धातोर्ण्यन्तात् कारि इत्यस्मात् ण्यासश्रन्थोर्युजिति युचि अनादेशे सार्वधातुकार्धधातुकयोरिति गुणं बाधित्वा पूर्वविप्रतिषेधाण्णिलोपे स्त्रीत्वाट्टापि कारणेति रूपम् । वृद्धिरित्युदाहरणसूचनम् । **कारक इति** ॥ कृञ्धातोर्ण्यन्तात्कारि इत्यस्माण्ण्वुलि अकादेशे वृद्धिं बाधित्वा पूर्वविप्रतिषेधाण्णिलोपे रूपम् । दीर्घ इत्युदाहरणसूचनम् । **कार्यत इति** ॥ कृञ्धातोर्ण्यन्तात्कारि इत्यस्मात् कर्मणि लटि यकि अकृत्सार्वधातुकयोरिति दीर्घं बाधित्वा पूर्वविप्रतिषेधाण्णिलोपः । तथाच प्रकृते काम् इ अ त इत्यत्र एरनेकाच इति यणं बाधित्वा णिलोपे काम् अ त इति स्थितम् । **णौचङीति** ॥ अङ्गाधिकारादाह । **यदंगमिति** ॥ उपधायाः किम् । अचकांक्षत् । चङि किम् । कारयति । णौ किम् । चङ्युपधाया ह्रस्व इत्युच्यमाने अदीदपदित्यत्र दाधातोः ण्यन्तात् लुङि चङि दा इ अ त् इति स्थिते आकारस्य ह्रस्वे सति पुक् न स्यात् । णावित्युक्तौ तु आकारस्य णौ परत उपधात्वाभावान्न ह्रस्वः । तथाच प्रकृते कम् अ त इति स्थितम् । **चङीति** ॥ एकाचो द्वे प्रथमस्येति अजादेर्द्वितीयस्येति चाधिकृतम् । लिटिधातोरनभ्यासस्येति सूत्रं लिटि इति वर्जमनुवर्तते । तदाह । **चङि परे इत्यादिना** ॥ द्विर्वचनेऽचीति निषेधस्तु न शङ्क्यः । द्वित्वनिमित्तचङः उपधया व्यवहितत्वात् ।

२३१६ । सन्वल्लघुनि चङ्परेऽनग्लोपे । (७-४-९३)

'चङ्परे' इति बहुव्रीहिः । अन्यपदार्थो णिः । स च 'अङ्गस्य' इति च द्वयमप्यावर्तते । अङ्गसंज्ञानिमित्तं यच्चङ्परं णिरिति यावत् तत्परं यल्लघु तत्परो योऽङ्गस्याभ्यासस्तस्य सनीव कार्यं स्याण्णावग्लोपेऽसति । अथवा 'अङ्गस्य' इति नावर्तते । चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरस्तस्येत्यादि प्राग्वत् ।

२३१७ । सन्यतः । (७-४-७९)

तथाच कम् इत्यस्य द्वित्वे हलादिशेषे ककम् अ त इति स्थितम् । **सन्वल्लघुनीति** ॥ अनग्लोप इति च्छेदः । **बहुव्रीहिरिति** ॥ चङ् परो यस्मादिति विग्रह इति भावः । कर्मधारयमाश्रित्य चङि परे इति नार्थः । परग्रहणवैयर्थ्यात् । ननु बहुव्रीह्याश्रयणेऽपि अत्र लोपोऽभ्यासस्येत्यतः अभ्यासस्येत्यनुवृत्तौ चङ्परके लघुनि परे अभ्यासः सन्वदित्यर्थो लभ्यते । तथा सति अण्यन्तेभ्यः श्रिद्रुस्रुभ्यश्चङि द्वित्वे अशिश्रियत् । अदुद्रवत् । असुस्रवदित्यत्रापि सन्वत्त्वं स्यात् । ततश्च दीर्घो लघोरिति सन्वद्भावविषये अभ्यासस्य वक्ष्यमाणो दीर्घः स्यादित्यत आह । **अन्यपदार्थो णिरिति** ॥ तथाच चङ्परे णौ इति लभ्यते । अशिश्रियदित्यादौ च णेरभावात् न सन्वत्त्वमिति भावः । **सचांगस्येति चेति** ॥ बहुव्रीहिगम्यो णिः अङ्गस्येत्यनुवृत्तं चेत्यर्थः । तत्र णावित्यावृत्तौ एकं लघुनीत्यत्रान्वेति । तथाच चङ्परे णौ यल्लघु तस्मिन्परत इति लभ्यते । द्वितीयन्तु अनग्लोपे इत्यत्रान्वेति । तथाच, णौ परतः यः अग्लोपः तस्याभावे सतीति लभ्यते । अङ्गस्येत्यावृत्तौ एकश्चङ्परे इत्यत्रान्वेति । निमित्तनिमित्तिभावे षष्ठी । तथाच अङ्गसंज्ञानिमित्तभूते चङ्परके वर्णे परे इति लभ्यते । चङ्परकश्च वर्णः अर्थात् णेरिकार एव । न तु श्रिद्रुस्रुवामन्त्यवर्णः । तस्य अप्रत्ययत्वेन अङ्गसंज्ञाप्रापकत्वाभावात् । एतदर्थमेव अङ्गस्येत्यस्य निमित्तषष्ठ्यन्तताामाश्रित्य चङ्पर इत्यनेनान्वयोऽभ्युपगतः । चङ्पर इत्येतावतैव तु णाविति लभ्यते । श्रिद्रुस्रुष्वव्यभिचारात् । द्वितीयं त्वङ्गस्येत्येतत् अभ्यासस्येत्यनुवृत्तेन अन्वेति । सन्वदिति सप्तम्यन्ताद्वतिः । तदाह । **अंगसंज्ञानिमित्तमित्यादिना । अथवेति** ॥ अस्मिन्व्याख्याने चङ्परे इत्येतत् अङ्गस्येत्यत्रान्वेति । न तु लघुनि । अङ्गस्य च प्रत्ययनिमित्तत्वादेव णेरन्यपदार्थस्य लाभः । लघुनीति तु अभ्यासस्येत्यत्रैवान्वेति । तदाह । **चङ्परे णौ-यदंगमित्यादिना । प्राग्वदिति** ॥ सनीवकार्यं स्याण्णावग्लोपे असतीत्यर्थः । अत्र प्रथमपक्ष एव भाष्यसम्मतः । अजजागरदित्यत्र चङ्परे णौ यल्लघु तदभ्यासव्यवहितमिति न सन्वत्त्वमिति भाष्योक्तेः । एवञ्च । प्रथमपक्षे उदेर्ण्यन्ताच्चङि द्वित्वे उदिदि अ त इत्यत्र अभ्यासोत्तरखण्डे चङ्परे णौ लघोरभावेनाभ्यासस्य तथाविधलघुपरकत्वविरहात् सन्वत्त्वाभावान्नाभ्यासदीर्घः । द्वितीयपक्षे तु चङ्परे णौ यदङ्गं उद् इत्येतत् तदीयोऽभ्यासश्चङमादाय लुप्तं णिमादाय वा लघुपर इति सन्वत्त्वसत्त्वादभ्यासदीर्घ इति भेदः । एवञ्च प्रकृते ककम् अ त इत्यत्र व्याख्याद्वयेऽपि सन्वत्त्वं स्थितम् । **सन्यत इति** ॥ सनि अतः इति

अभ्यासस्यात इकारः स्यात्सनि ।

२३१८। दीर्घो लघोः (७-४-९४)

अभ्यासस्य लघोः दीर्घः स्यात्सन्वद्भावविषये । अचीकमत । णिङभावपक्षे । कमेश्च्लेश्चङ्वक्तव्यः ।

णेरभावान्न दीर्घसन्वद्भावौ । अचकमत ।

संज्ञायाः कार्यकालत्वादङ्गं यत्र द्विरुच्यते ।

तत्रैव दीर्घः सन्वच्च नानेकाद्विति माधवः ॥

च्छेदः । अत्र लोप इत्यतः अभ्यासस्येत्यनुवर्तते । भृञामित्यस्मात् इदिति । तदाह । **अभ्यासस्येति** ॥ किकम् अ त इति स्थितम् । **दीर्घो लघोरिति** ॥ अत्र लोपोऽभ्यासस्येत्यतः अभ्यासस्येत्यनुवर्तते । तदाह । **अभ्यासस्य लघोर्दीर्घ इति** ॥ अभ्यासावयवस्य लघोरित्यर्थः । सन्वल्लघुनिचङ्पर इति सूत्रं सन्वच्छब्दवर्जमनुवर्तते । तच्च प्राग्वदेव द्वेधा व्याख्येयम् । तथाच फलितमाह । **सन्वद्भावविषय इति** ॥ सन्यत इत्यत्र तपरत्वं स्पष्टार्थमिति दीर्घोऽकित इति सूत्रे भाष्ये स्पष्टम् । तथाच कि कम् अ तेत्यत्र अभ्यासेकारस्य दीर्घे अभ्यासचुत्वे अडागमे परिनिष्ठितं रूपमाह । **अचीकमतेति** ॥ अत्र लघोर्णिपरत्वं येननाव्यवधानन्यायाद्बोध्यम् । **णिङभावपक्षेत्विति** ॥ आयादय आर्धधातुकेवेति णिङो वैकल्पिकत्वादिति भावः । **कमेश्च्लेश्चङ्वक्तव्य इति** ॥ अण्यन्तत्वादप्राप्तौ वचनम् । **णेरभावादिति** ॥ णिङभावपक्षे कमिधातोरनुदात्तेत्त्वात्तङि प्रथमपुरुषैकवचने च्लेश्चङि द्वित्वे हलादिशेषे अभ्यासचुत्वे अडागमे अचकमतेति रूपं वक्ष्यते । तत्र णेरभावात् दीर्घो लघोरित्यभ्यासलघोर्दीर्घो न भवति । तत्र लघुनि चङ्परेऽनग्लोप इत्यनुवर्त्य चङ्परे णावेव तद्विधानोक्तेः । अत एव सन्वत्त्वाभावात्सन्यत इत्यभ्यासाकारस्य इत्त्वञ्च न भवतीत्यर्थः । दीर्घो लघोरिति दीर्घविधौ सन्वत्त्वं न निमित्तम् । किन्तु लघुनि चङ्पर इत्यस्य तत्रानुवृत्या सन्वद्भावविषये तत्प्रवृत्तिः । अतः दीर्घसन्वद्भावाविति पृथगुक्तिः । अथ पञ्चभिः श्लोकैः सन्वद्भावसूत्रं दीर्घोलघोरिति सूत्रञ्च विशदयति । **संज्ञाया इत्यादिना** ॥ अस्मिन् शास्त्रे कार्यकालं संज्ञापरिभाषमित्येकः पक्षः । कार्यकालमित्यस्य कार्यप्रदेशकमित्यर्थः । अस्मिन्पक्षे तत्तत्कार्यविधिप्रदेशेषु संज्ञाशास्त्रस्य परिभाषाशास्त्रस्य च उपस्थितिः । यथोद्देशं संज्ञापरिभाषमिति पक्षान्तरम् । उद्देशाः संज्ञापरिभाषाशास्त्राम्नानप्रदेशाः । तान् अनतिक्रम्य यथोद्देशं। संज्ञाशास्त्रं परिभाषाशास्त्रञ्च स्वप्रदेशे स्थितमेव तत्तद्विध्यपेक्षितं स्वंस्वमर्थं समर्थयतीति यावत् । अस्मिन्पक्षे कार्यप्रदेशेषु संज्ञापरिभाषाभ्यान्तदर्थस्यैवोपस्थितिः । न तु संज्ञापरिभाषाशास्त्रयोरिति स्थितिः। सन्वल्लघुनीति सूत्रे, दीर्घो लघोरिति सूत्रे च, अङ्गस्येति, अभ्यासस्येति, चानुवृत्तम् । तत्र कार्यकालपक्षे पूर्वोऽभ्यास इति सूत्रं सन्निहितम् । ततश्च अङ्गस्य ये द्वे उच्चारणे तयोः पूर्वः अभ्याससंज्ञः स सन्वद्भवतीति फलितम् । तत्र कृदन्तोच्चारणशब्दयोगादङ्गस्येति कर्मणि षष्ठी । नंत्ववयवषष्ठी । कारकषष्ठ्या बलवत्त्वात् । अङ्गञ्च प्रत्यये

चकास्त्यर्थापयत्यूर्णोत्यादौ नाङ्गं द्विरुच्यते ।
किं त्वस्यावयवः कश्चित्तस्मादेकाक्त्विदं द्वयम् ॥
वस्तुतोऽङ्गस्यावयवो योऽभ्यास इति वर्णनात् ।
ऊर्णौ दीर्घोऽर्थापयतौ द्वयं स्यादिति मन्महे ॥
चकास्तौ तूभयमिदं न स्यात्स्याच्च व्यवस्थया ।
णेर्विशेष्यं सन्निहितं लघुनीत्यङ्गमेव वा ॥

परतः कृत्स्नमेव प्रकृतिरूपम् । न तु तदेकदेशः । ततश्च कृत्स्नमङ्गं यत्र द्विरुच्यते न तु तदेकदेशमात्रं तत्रैव दीर्घो लघोरिति दीर्घः, सन्वल्लघुनीति सन्वद्भावश्च, भवति । एवञ्च अङ्गस्य एकाच्कत्वे सत्येव तयोः प्रवृत्तिः । तत्र कृत्स्नस्याङ्गस्य द्विरुक्तेः । अनेकाच्केषु तु अङ्गेषु न तयोः प्रवृत्तिः । तत्र एकस्यैव एकाचः अङ्गैकदेशस्य द्विरुक्तेरिति माधवो मन्यत इति प्रथमश्लोकस्यार्थः । नानेकाक्त्वित्युक्तं विशदयति । चकास्तीति श्लोकेन । चकास् दीप्तौ । अर्थमाचष्टे इत्यर्थे णिचि अर्थवेदयोरिति प्रकृतेरापुगागमे अर्थापिधातुः । ऊर्णुञ् आच्छादने । एते त्रयः अनेकाच्का धातवः । आदिना जागृनिद्राक्षय इत्यादिसङ्ग्रहः । एभ्यो ण्यन्तेभ्यश्चङि अङ्गं कृत्स्नं न द्विरुच्यते । किंतु अङ्गस्य कश्चिदेकाजवयव एव द्विरुच्यते । तस्मात् अनेकाच्केषु कृत्स्नस्याङ्गस्य द्विरुक्त्यभावात् एकाच्केष्वेवाङ्गेषु दीर्घो लघोरिति दीर्घः, सन्वल्लघुनीति सन्वद्भावश्चेत्येतद्द्वयं भवति। नत्वनेकाच्काङ्गेष्वित्यर्थः। नन्वेवं सति दिदरिद्रासति इत्यादौ हलादिः शेष इत्याद्यभ्यासकार्यमनेकाच्कादङ्गान्नस्यात् । कृत्स्नाङ्गस्य द्विरुक्त्यभावात् । किञ्च अजजागरदित्यत्र सन्वत्त्वमाशङ्क्य णिपरकलघोर्गकाराकारस्य जा इत्यनेन व्यवहितत्वादभ्यासस्य न सन्वत्त्वमिति समाहितं भाष्ये । तदेतत् अनेकाच्काङ्गेषु सन्वत्त्वस्याप्रवृत्तौ विरुद्ध्येत । कृत्स्नस्याङ्गस्य द्विरुक्त्यभावादेव तत्र सन्वत्त्वस्याप्राप्तौ तच्छङ्काया एवानुन्मेषादित्यस्वारस्याद्यथोद्देशपक्षमालंब्याह । **वस्तुत इति** ॥ अङ्गस्येत्यवयवषष्ठी । अङ्गावयवस्याभ्यासस्येति लभ्यते । ततश्च ऊर्णुञि ण्यन्ते चङि नु इत्येकदेशस्य द्वित्वेऽपि और्णूनुवदित्यत्र दीर्घो लघोरित्यभ्यासलघुर्दीर्घीभवति । सन्वत्त्वन्तु प्रयोजनाभावादुपेक्षितम् । अभ्यासे अकाराभावेन सन्यत इत्यस्यासम्भवात् । अर्थमाचष्टे इत्यर्थे णिचि प्रकृतेरापुकि अर्थापिधातोश्चङि णिलोपे उपधाह्रस्वे थप् इत्यस्य द्वित्वेऽपि आर्तथपदित्यत्र सन्वद्भावात् सन्यत इत्यभ्यासस्य इत्त्वं अभ्यासदीर्घश्चेति द्वयं भवतीति जानमि इति तृतीयश्लोकार्थः । अङ्गस्यावयव इति पक्षेऽपि चकास्तौ विशेषमाह। **चकास्तौत्विति** ॥ चतुर्थश्लोकोऽयम् । अवस्था वस्तुस्थितिः। व्यवस्थया पक्षद्वयेनेति यावत्। चङ्परे इत्यनेन अन्यपदार्थतया लब्धस्य णावित्यस्य सन्निहितं लघुनीत्येतत् विशेष्यम्। तथाच चङ्परे णौ यल्लघु इति प्रथमव्याख्यानं फलितम्। अङ्गमेव वा णेर्विशेष्यम्। तथाच चङ्परे णौ यदङ्गमिति द्वितीयं व्याख्यानं फलितम्। इति व्यवस्थया पक्षद्वयेन सन्वत्त्वं दीर्घश्चेत्युभयमिदञ्चकासधातौ ण्यन्ते चङि णिलोपे द्वित्वे अचचकासत् इत्यत्र न स्यात्, स्याच्चेत्यन्वयः । तत्र चङ्परे णौ यल्लघ्विति व्याख्याने सति नैव उभयं स्यात्। चङ्परस्य णेः कास् इत्यनेन व्यवहितत्वात् । अचीकमतेत्यादौ त्वेकव्यवधानन्तु येन नाव्यव-

इति व्याख्याविकल्पस्य कैयटेनैव वर्णनात् ।
णेरग्लोपेऽपि संबन्धस्त्वगितामपि सिद्धये ॥

अथ क्रम्यन्तास्त्रिंशत्परस्मैपदिनः । 'अण ४४४ रण ४४५ वण ४४६ भण ४४७ मण ४४८ कण ४४९ क्रण ४५० व्रण ४५१ भ्रण ४५२ ध्वण ४५३ शब्दार्थाः' । अणति । रणति । वणति । वकारादित्वादेत्वाभ्यासलोपौ न । ववणतुः । ववणिथ । 'धणिः' अपि कैश्चित्पठ्यते । धणति । 'ओणृ ४५४ अपनयने' । ओणति । ओणांचकार । 'शोणृ ४५५ वर्णगत्योः' । शोणति । शुशोण । श्रोणृ ४५६ संघाते' । श्रोणति । 'श्लोणृ ४५७ च' । शोणादयस्त्रयोमी तालव्योष्मादयः । 'पैणृ ४५८ गतिप्रेरणश्लेषणेषु' । 'प्रैणृ' इति क्वचित्पठ्यते । पिप्रैण । 'ध्रण ४५९ शब्दे' । उपदेशे नान्तोयम् । 'रषाभ्याम्—' (२३५) इति णत्वम् । ध्रणति । णोपदेशफलं यङ्लुकि । दन्ध्रन्ति । 'वण इत्यपि केचित् । बेणतुः । बेणिथ । 'कन ४६० दीप्तिकान्तिगतिषु' । चकान । 'ष्टन

धानन्यायात्सोढव्यमेव । चङ्परे णौ यदङ्गमिति व्यख्याने तु अचीचकासादित्यत्र उभयं स्यादेव । अङ्गस्य णिपरकत्वसत्त्वादिति योज्यम् । ननु चङ्परे णौ यल्लघ्विति चङ्परे णौ यदङ्गमिति च व्याख्याभेदे किं प्रमाणमित्यत आह । **इति व्याख्याविकल्पस्य कैयटेनैव वर्णनादिति** ॥ आदर्तव्येतेति शेषः । ननु णौ इत्यस्यावृत्तिमभ्युपगम्य अग्लोपेऽपि तदन्वयः किमर्थइत्यत आह । **णेरग्लोपेऽपीति** । **अगितामिति** ॥ कमु कान्ताविल्यादीनामपीत्यर्थः । **सिद्धय इति** ॥ दीर्घसन्वत्त्वसिद्ध्यर्थमित्यर्थः । अन्यथा कमुप्रभृतीनामुकारादनुबन्धलोपमादाय अग्लोपित्वात् दीर्घसन्वद्भावौ न स्यातामित्यर्थः । इति णिणिप्रभृतयः कम्यन्ता दश गताः । **क्रम्यन्ता इति** ॥ क्रमु पादविक्षेपे इत्येतत्पर्यन्ता इत्यर्थः । अनुनासिकान्ता इति शेषः । **अणरणेति** ॥ इतःप्रभृति कनदीप्तावित्यतः प्राक् मूर्द्धन्यान्तः । **ओणृ इति** ॥ ऋदित्त्वं नाग्लोपीति निषेधार्थम् । **ध्रणशब्द इति** ॥ अदुपधोऽयम् । **उपदेश इति** ॥ धातूपदेशे अकारान्तोऽयम् । अकारस्य उच्चारणार्थस्य निवृत्तौ तवर्गपञ्चमान्त इत्यर्थः । तर्हि णकारस्य कथं श्रवणमित्यत आह । **रषाभ्यामिति । णत्वमिति** ॥ ननु स्वाभाविक एव णकार इत्यस्तु । किन्नकारस्य कृतणत्वस्य निर्देश इति कल्पनयेत्यत आह । **णोपदेशेति** ॥ नकारस्थानिकणोपदेशस्य नश्चेत्यनुस्वारात्मकं फलं यङ्लुकि प्रत्येतव्यमित्यर्थः । **दन्ध्रन्तीति** ॥ ध्रणधातोर्यङ्लुकि द्वित्वे हलादिशेषे नुगतोऽनुनासिकान्तस्येत्यभ्यासस्य नुकि उत्तरखण्डे णकारस्यासिद्धत्वे अनुस्वारे परसवर्णे तस्यासिद्धत्वात् णत्वाभावे नकारस्यैव श्रवणम् । स्वाभाविकणकारोपदेशे तु उत्तरखण्डे णकार एव श्रूयेत इति भावः । **बणेत्यपीति** ॥ पवर्गतृतीयादिरिति भावः । कनदीप्तीत्यारभ्य अमगत्यादिष्वित्यतः प्राक् तवर्गपञ्चमान्ताः । **ष्टनवनेति** ॥ आद्यः षोपदेशः । ष्टुत्वसम्पन्नः

४६१ वन ४६२ शब्दे'। स्तनति। वनति। 'वन ४६३ षण ४६४ संभक्तौ'। वनेरर्थभेदात्पुनः पाठः। सनति। ससान। सेनतुः।

२३१९। ये विभाषा। (६-४-४३)

जनसनखनामात्त्वं वा स्याद्यादौ क्ङिति। सायात्–सन्यात्। 'अम ४६५ गत्यादिषु'। 'कनदीप्तिकान्तिगति–' इत्यत्र गतेः परयोः शब्दसंभक्त्योरादिशब्देन ग्रहः। अमति। आम। 'द्रम ४६६ हम्म ४६७ मीमृ ४६८ गतौ'। द्रमति। दद्राम। 'ह्मधन्त–' (२२९९) इति न वृद्धिः। अद्रमीत्। हम्मति। जहम्म। मीमति। मिमीम। अयं शब्दे च। 'चमु ४६९ छमु ४७० जमु ४७१ झमु ४७२ अदने'।

२३२०। ष्ठिवुक्लमुचमां शिति। (७-३-७५)

एषामचो दीर्घः स्याच्छिति।

आङि चम इति वक्तव्यम्।

आचामति। 'आङि' किम्। चमति विचमति। अचमीत्। जिमिं केचित्पठन्ति। जेमति। 'क्रमु ४७३ पादविक्षेपे'।

टकारः। तदाह। **स्तनतीति**। **वनषणेति**॥ द्वितीयः षोपदेशः। ननु ष्टनवनशब्द इति, वनेः पठितस्य पुनः पाठो व्यर्थ इत्यत आह। **अर्थभेदादिति**॥ वनेः शब्दे सम्भक्तौच वृत्तिरिष्टा। ष्टनेस्तु शब्द एव वृत्तिरिष्टा। तत्र ष्टन वन षण शब्दे सम्भक्तौ चेत्युक्तौ ष्टनेरपि सम्भक्तौ वृत्तिः स्यात्। ष्टन शब्द इत्युक्त्वा षण सम्भक्तौचेति पाठे तु गौरवमिति भावः। आशीर्लिङि विशेषमाह। **ये विभाषेति**॥ जन सन खनां सन् झलोरित्यतः जनसनखनामित्यनुवर्तते। अनुदात्तोपदेशेत्यतः क्ङितीति। ये इति तद्विशेषणम्। अकार उच्चारणार्थः। तदादिविधिः। विङ्वनोरनुनासिकस्यादित्यतः आदित्यनुवर्तते। तदाह। **जनसनखनामित्यादिना। सायादिति**॥ नकारस्य आत्वे सवर्णदीर्घः। **द्रम हम्म मीमृ गताविति**॥ आद्योऽदुपधः। **न वृद्धिरिति**॥ अद्रमीदित्यत्र हलन्तलक्षणायां वृद्धौ नेटीति निषिद्धायां ह्मयन्तेत्यतो अतोहलादेरिति वृद्धिर्नेत्यर्थः। **जहम्मेति**॥ अभ्यासचुत्वेन हस्य झः। तस्य अभ्यासेचर्चेत्यनेन जः। **मिमीमेति**॥ मीमृधातोर्णलि द्वित्वे अभ्यासह्रस्वः। **अयंशब्दे चेति**। मीमृधातुरित्यर्थः। **ष्ठिवुक्लम्विति**॥ शमामष्टानां दीर्घः श्यनीत्यतः दीर्घ इत्यनुवर्तते। दीर्घश्चुत्या अच इत्युपस्थितम्। तदाह। **एषामचो दीर्घ इति**॥ ष्ठिवु क्लमु आचम् एषां द्वन्द्वः। आचम् इत्यनेन आङ्पूर्वकस्य चमेर्ग्रहणम्। **अचमीदिति**॥ ह्मयन्तेति न वृद्धिः। **क्रमु पादेति**॥ उदित्वमुदितो वेति विकल्पा-

२३२१ । वा भ्राशम्लाशपलाशक्लाशकृशोदितो णिलोपश्च । (३-१-७०)

एभ्यः श्यन्वा स्यात्कर्त्रर्थे सार्वधातुके परे ।

२३२२ । क्रमः परस्मैपदेषु । (७-३-७६)

क्रमेर्दीर्घः स्यात्परस्मैपदे परे शिति । क्राम्यति—क्रामति । चक्राम । क्राम्यतु—क्रामतु ।

२३२३ । स्नुक्रमोरनात्मनेपदनिमित्ते । (७-२-३६)

अत्रैवेट् । अक्रमीत् ।

अथ रेवत्यन्ता अनुदात्तेतः । 'अय ४७४ वय ४७५ पय ४७६ मय ४७७ चय ४७८ तय ४७९ णय ४८० गतौ' । अयते ।

२३२४ । दयायासश्च । (३-१-३७)

र्थम् । **वा भ्राशेति** ॥ दिवादिभ्यश्श्यनित्यतः श्यन्निति, कर्तरिशबित्यतः कर्त्तरीति, सार्वधातुके यगित्यतः सार्वधातुक इति, चानुवर्त्तते । तदाह । **एभ्यः श्यन्वेत्यादि** ॥ **क्रम इति । दीर्घः स्यादिति** ॥ शमामष्टानामित्यतः तदनुवृत्तेरिति भावः । **शितीति** ॥ ष्ठिवुक्रम्वाचमामित्यत स्तदनुवृत्तेरिति भावः । **क्रामत्विति** ॥ मध्यमपुरुषैकवचने क्रामेत्यत्र तु क्रमः परस्मैपदेष्विति दीर्घो भवत्येव । नच दीर्घस्याङ्गाधिकारस्थत्वात् नलुमतेति निषेधः शङ्क्यः । लुमता लुप्ते प्रत्यये यदङ्ग तस्य कार्य एव तस्य प्रवृत्तेः । शितिपरतः क्रमेरङ्गस्य दीर्घस्तु न लुप्तप्रत्यये परस्मैपदे परे अङ्गस्य कार्यम् किन्तु शिति परे अङ्गस्य कार्यमिति बोध्यम् । **स्नुक्रमोरिति** ॥ पञ्चम्यर्थे षष्ठी आत्मनेपदनिमित्तस्याभावः अनात्मनेपदनिमित्तम् । अर्थाभावे अव्ययीभावेन सह नञ्तत्पुरुषो विकल्पत इत्युक्तेः समासः । आत्मनेपदनिमित्ताभावे सति स्नुक्रम्भ्यां परस्य वलादार्धधातुकस्य इट् स्यादित्यर्थः । स्नुक्रमोरनुदात्तोपदेशानन्तर्भावादिति सिद्धे वचनमिदं नियमार्थमित्याह । **अत्रैवेडिति** ॥ एवञ्च भावकर्मलकारेषु इण्ण भवति । उपक्लोष्यते जलेन । भावलकारोऽयम् । उपक्रम्यते । कर्मणि लट् । यक् । प्रस्तुतमित्यत्र तु श्युकः कितीति निषेधान्नेट् । आर्धधातुकस्येड्वलादेरिति इड्विधेः पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात् । स्नुक्रमोरनात्मनेपद इति तु न सूत्रितम् । आत्मनेपदाभिन्ने परस्मैपदे परे इत्यर्थे विक्रमिष्यतीत्यसिद्धेः । स्येन व्यवधानात् । आत्मनेपदे परे नेडित्यर्थे तु प्राविक्रंसिष्यत इत्यसिद्धिः । अतो निमित्तग्रहणमित्यलम् । **अक्रमीदिति** ॥ श्यन्तेति न वृद्धिः । इति क्रम्यन्ताः परस्मैपदिनो गताः । **रेवत्यन्ता इति** ॥ रेवृ प्लवगतावित्येतत्पर्यन्ता इत्यर्थः । अयपयेत्यारभ्य शलचलने इत्यतः प्राक् यकारान्ताः । **दयायासश्चेति** ॥ दय अय् आस् एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम् । [illegible]

'दय' 'अय' 'आस्' एभ्य आम् स्याल्लिटि। अयाञ्चक्रे। अयिता। अयिषीष्ट।

२३२५। विभाषेटः। (८-३-७९)

इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा मूर्धन्यः स्यात्। अयिषीढ्वम्—अयिषीध्वम्। आयिष्ट। आयिढ्वम्—आयिध्वम्।

२३२६। उपसर्गस्यायतौ। (८-२-१९)

अयतिपरस्योपसर्गस्य यो रेफस्तस्य लत्वं स्यात्। प्लायते—पलायते। निस्दुसो रुत्वस्यासिद्धत्वान्न लत्वम्। निरयते। दुरयते। निर्दुरोस्तु निलयते। दुलयते। 'प्रत्ययः' इति त्विणो रूपम्। अथ कथम् 'उदयति विततोर्ध्वरश्मिरर्कः' इति माघः। 'इट' 'किट' 'कटी' इत्यत्र प्रश्लिष्टस्य एर्भविष्यति। यद्वा 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् (प ९७)। चक्षिङो डित्करणाज्ज्ञापकात्। वादित्वात् ववये। पेये। मेये। चेये। तेये। प्रणयते। नेये। 'दय

प्रत्ययादित्यतः आम् लिटीत्यनुवर्तते। तदाह। **एभ्य आम् स्याल्लिटि इति**। **विभाषेटः**॥ 'इणः षीध्वं लुङ् लिटान्धः' इत्यनुवर्तते। अपदान्तस्येत्यतो मूर्धन्य इति च। तदाह। **इणः परो य इडित्यादि**॥ इण्णन्तादङ्गादित्यर्थः। **अयिषीढ्वमिति**॥ आशीर्लिङो ध्वमः सीयुट्। यलोपः। आर्धधातुकत्वान्न सलोपः। इट्। यकारादिणः परो य इट् ततः परत्वात् धस्य मूर्धन्यो ढः। इटः परभक्तत्वाद्यकारान्तादङ्गात् परस्य इषीध्वमः इण्णन्तादङ्गात्परत्वान्नित्ये प्राप्ते विकल्पोऽयम्। **आयिढ्वमिति**॥ लुङो ध्वमि च्लेः सिचि आटि वृद्धौ सिच इटि धि चेति सलोपः। ध्वम इवर्णान्तादङ्गात्परत्वान्नित्ये प्राप्ते विकल्पः। अङ्गादिति निवृत्तमिति केचित्। **उपसर्गस्यायतौ**॥ अयताविति श्तिपा निर्देशः। 'कृपोरोल' इत्यतः रोल इत्यनुवर्तते। तदाह। **अयतिपरस्येत्यादिना। प्लायत इति**॥ प्र इत्युपसर्गः। **पलायत इति**॥ परा इत्याकारान्त उपसर्गः। ननु निरयते दुरयत इत्यत्रापि लत्वं स्यादित्यत आह। **निस् दुसोरिति**॥ तर्हि निलयते दुलयत इति कथमित्यत आह। **निर्दुरोस्त्विति**॥ एतदर्थमेव प्रादिषु सान्तयोरेफान्तयोश्च निर्देश इति भावः। तर्हि प्रत्यय इत्यत्रापि प्रतेरयतिपरत्वात् रस्य लत्वं स्यादित्यत आह। **प्रत्यय इति त्विति**॥ प्रतिपूर्वकादिण्धातोरच्प्रत्यये प्रत्यय इति रूपम्। अयतिपरत्वाभावान्नलत्वमित्यर्थः। अयधातुमादाय प्रत्यय इति न। अनभिधानादिति कैयटः। **कथमुदयतीति**॥ उत्पूर्वकादयधातोः शत्रन्तात्सप्तम्यन्तामिति मत्वा आक्षेपः। अनुदात्तेत्त्वेन लटश्शानच्प्रसङ्गादिति भावः। **प्रश्लिष्टस्येति**॥ इधातोरिति शेषः। तस्य अनुदात्तेत्त्वाभावाच्छतृप्रत्ययो निर्बाध इति भावः। **ज्ञापकादिति**॥ चक्षिङ्धातौ इकारस्य अनुदात्ततया अनुदात्तेत्त्वादेव आत्मनेपदसिद्धौ डित्करणं अनुदात्तेत्त्वप्रयुक्तात्मनेपदस्य अनित्यतां ज्ञापयति। तस्य अनित्यत्वेतु नित्यात्मनेपदार्थं डित्करणमर्थवदिति भावः।

४८१ दानगतिरक्षणहिंसादानेषु'। आदानं ग्रहणम्। दयाञ्चक्रे। 'रय ४८२ गतौ'। 'ऊयी ४८३ तन्तुसन्ताने'। ऊयाञ्चक्रे। 'पूयी ४८४ विशरणे दुर्गन्धे च'। पूयते। पुपूये। 'क्नूयी ४८५ शब्दे उन्दने च'। चुक्नूये। 'क्ष्मायी ४८६ विधूनने'। चक्ष्माये। 'स्फायी ४८७ ओप्यायी ४८८ वृद्धौ'। स्फायते। पस्फाये। प्यायते।

२३२७। लिड्यङोश्च। (६-१-२९)

लिटि यङि च प्यायः पीभावः स्यात्। पुनःप्रसङ्गविज्ञानात् पीशब्दस्य द्वित्वम्। 'एरनेकाचः—' (सू २७२) इति यण्। पिप्ये। पिप्याते। पिप्यिरे।

२३२८। दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्। (३-१-६१)

एभ्यश्च्लेश्चिण्वा स्यादेकवचने तशब्दे परे।

२३२९। चिणो लुक्। (६-४-१०४)

चिणः परस्य तशब्दस्य लुक्स्यात्। अप्यायि—अप्यायिष्ट। 'तायृ ४८९ सन्तानपालनयोः'। सन्तानः प्रबन्धः। तायते। ततायें। अनायि—अतायिष्ट।

इदन्तु भाष्ये न दृश्यते। **वादित्वादिति** ॥ वयधातोर्लिटि वादित्वादेत्वाभ्यासलोपयोरभावे सति ववये इति रूपमित्यर्थः। णयधातुर्णोपदेश इति मत्वा आह। **प्रणयत इति** ॥ उपसर्गादसमासेऽपीति णत्वमिति भावः। **दयाञ्चक्र इति** ॥ 'दयायासश्च' इत्याम्। **ऊयाञ्चक्र इति** ॥ इजादित्वादाम्। **उन्दने चेति** ॥ क्लेदने चेत्यर्थः। **स्फायी ओ प्यायीति** ॥ ओदित्त्वं 'ओदितश्च' इति निष्ठानत्वार्थम्। ईदित्वन्तु श्वीदितो निष्ठायामिति इड्विकल्पार्थम्। **लिड्यङोश्च** ॥ लिट्च यङ्चेति द्वन्द्वात्सप्तमी। 'प्यायः पी' इति सूत्रमनुवर्तते। तदाह। **लिटि यङि चेति** ॥ ननु प्यायेर्लिटि द्वित्वं बाधित्वा परत्वात् पीभावे 'द्वित्वे एरनेकाचः' इति यणि पिप्ये इति रूपमिष्यते। तत्र द्वित्वम्बाधित्वा परत्वात् पीभावे कृते पुनर्द्वित्वं न सम्भवति। 'विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायादित्यत आह। **पुनःप्रसङ्गेति** ॥ 'पुनःप्रसङ्गविज्ञानात् सिद्धम्' इति परिभाषा। विप्रतिषेधे बाधितस्यापि पुनःप्रवृत्तेरभ्युपगमात्कृतेऽपि पीभावे द्वित्वादिकं सिद्धमिति तदर्थः। **दीपजन** ॥ 'च्लेः सिच्' इत्यतः च्लेरिति, 'चिण् ते पदः' इत्यस्मात् चिण् ते इति चानुवर्तते। तदाह। **एभ्यश्च्लेरिति। एकवचन इति** ॥ दीपादीनामात्मनेपदित्वेन तेभ्यस्तशब्दस्य एकवचनत्वनियमादिति भावः। **चिणो लुक्** ॥ चिण इति पञ्चमी। तदाह। **चिणः परस्येति** ॥ चिणः परश्च अर्थात् तशब्द एव भवति। चिणभावे च्लेः सिचि रूपमाह। **अप्यायिष्टेति। तायृ सन्तान इति** ॥ 'लुङि दीपजन' इति च्लेश्चिणि तलोपे रूपमाह। **अतायीति** ॥ चिणभावे सिचि अतायिष्टेति रूपम्।

'शल ४९० चलनसंवरणयोः'। 'वल ४९१ वल्ल ४९२ संवरणे सञ्चरणे च'। ववले। ववल्ले। 'मल ४९३ मल्ल ४९४ धारणे'। मेले ममल्ले। 'भल ४९५ भल्ल ४९६ परिभाषणहिंसादानेषु'। बभले। बभल्ले। 'कल ४९७ शब्दसङ्ख्यानयोः'। कलते। चकले। 'कल्ल ४९८ अव्यक्ते शब्दे'। कल्लते। 'अशब्दे' इति स्वामी। अशब्दस्तूष्णींभाव इति च। 'तेवृ ४९९ देवृ ५०० देवने'। तितेवे। दिदेवे। 'षेवृ ५०१ गेवृ ५०२ ग्लेवृ ५०३ पेवृ ५०४ 'मेवृ ५०५ म्लेवृ ५०६ सेवने'। 'परिनिविभ्यः—' (सू २२७५) इति षत्वम्। परिषेवते। सिषेवे। अयं सोपदेशोऽपीति न्यासकारादयः। तद्भाष्य-विरुद्धम्। गेवते। जिगेवे। जिग्लेवे। पिपेवे। मेवते। म्लेवते। 'शेवृ' 'खेवृ' 'क्लेवृ' इत्यप्येके। 'रेवृ ५०७ प्लवगतौ'। प्लवगतिः प्लुतगतिः। रेवते।

अथावत्यन्ताः परस्मैपदिनः। 'मव्य ५०८ बन्धने'। ममव्य। सूर्ख्य ५०९ ईर्ख्य ५१० ईर्ष्य ५११ ईर्ष्यार्थाः'। 'हय ५१२ गतौ'। अहयीत्। यान्त-त्वान्न वृद्धिः। 'शुच्य ५१३ अभिषवे। अवयवानां शिथिलीकरणं सुरायाः सन्धानं वा अभिषवः। स्नानं च। शुशुच्य। 'चुच्य' इत्येके। 'हर्य ५१४ गति-कान्त्योः'। जहर्य। 'अल ५१५ भूषणपर्याप्तिवारणेषु'। अलति। आल।

२३३०। अतो ल्रान्तस्य। (७-२-२)

'ल्र' इति लुप्तषष्ठीकम्। अतः समीपौ यौ ल्रौ तदन्तस्याङ्गस्यातो वृद्धिः स्यात्परस्मैपदपरे सिचि। 'नेटि' (सू २२६८) इति निषेधस्य 'अतो

शलचलेत्यारभ्य तेवृ इत्यतः प्राक् लान्ताः। तेवृ इत्यारभ्य रेवृत्यन्ता वकारान्ताः। षेवृधातोः षोपदेशत्वात्सत्वे सेवत इत्यादि रूपम्। परिषेवत इत्यत्र 'सात्पदाद्योः' इति निषेधे प्राप्ते आह। **परि निविभ्य इति। सिषेवे इति॥** आदेशसकारत्वात् षत्वमिति भावः। **अयं सोपदेशोऽपीति॥** षेवृधातुरित्यर्थः। **तद्भाष्यविरुद्धमिति॥** सेक् सृप् सृ स्तृ सृजस्तृस्त्यानामेव भाष्ये षोपदेशपर्युदासादिति भावः। **रेवृ प्लवगताविति॥** ल्रेवृ इति न धात्वन्तरमिति सूचयन्नाह। **प्लवगतिः प्लुतगतिरिति॥** अयपयेत्यादिरेवृत्यन्ता गताः। **अवत्यन्ता इति॥** अव रक्षणे इत्येतत्पर्यन्ता इत्यर्थः। मव्येत्यारभ्य अल भूषणेत्यतः प्राक् यकारान्ताः। अल भूषणेत्यारभ्य खोर् प्रतीघात इत्यतः प्राक् लकारान्ताः। **अतोल्रान्त-स्य॥** 'सिचि वृद्धिः परस्मैपदेषु' इत्यनुवृत्तम्। अङ्गस्येत्यधिकृतम्। तद्विशेषणत्वात्तदन्त-विधिनैव सिद्धे अन्तग्रहणं व्यर्थम्। तत्राह। **ल्रेतिलुप्तषष्ठीकमिति॥** ल्र अन्तस्य इति छेदः। ल् च र्श्चेति समाहारद्वन्द्वात् षष्ठ्येकवचनं लुप्तम्। ल्रस्यान्तस्येति सामानाधिकरण्येनान्वयः।

हलादेः' (सू २२८४) इति विकल्पस्य चापवादः । मा भवान्ललीत् । अयं स्वरितेदित्येके । तन्मते अलते इत्याद्यपि । 'ञि फला ५१६) विशरणे' । 'तृफल—' (सू २३०१) इत्येत्वम् । फेलतुः फेलुः । अफालीत् । 'मील ५१७ ष्मील ५१८ स्मील ५१९ ष्मील ५२० निमेषणे' । निमेषणं सङ्कोचः । द्वितीयस्तालव्यादिः । तृतीयो दन्त्यादिः । 'पील ५२१ प्रतिष्टम्भे' प्रतिष्टम्भो रोधनम् । 'णील ५२२ वर्णे' । निनील । 'शील ५२३ समाधौ' । शीलति । 'कील ५२४ बन्धने' । 'कूल ५२५ आवरणे' । 'शूल ५२६ रुजायां सङ्क्लेषे च' । तूल ५२७ निष्कर्षे' । निष्कर्षो निष्कोषणम । तच्चान्तर्गतस्य बहिर्निस्सारणम् । तुतूल । 'पूल ५२८ सङ्गते' । मूल ५२९ प्रतिष्ठायाम् । 'फल ५३० निष्पत्तौ' । फेलतुः । फेलुः । 'चुल ५३१ भावकरणे' । भावकरणमभिप्रायाविष्कारः । 'फुल ५३२ विकसने' । 'चिल ५३३ शैथिल्ये भावकरणे च' । 'तिल ५३४ गतौ' । तेलति । 'तिल्ल' इत्येके । तिल्लति । 'वेल ५३५ चेल ५३६ केल ५३७ खेल ५३८ क्ष्वेल ५३९ वेल्ल ५४० चलने' । पञ्च ऋदितः । षष्ठो लोपधः । 'पेल ५४१ फेल ५४२ शेल ५४३ गतौ' । 'षेल' इत्येके । 'स्खल ५४४ सञ्चलने' । चस्खाल । अस्खालीत् । 'खल ५४५ सञ्चये' । 'गल ५४६ अदने' । गलति । अगालीत् । 'षल ५४७ गतौ' । सलति । 'दल ५४८ विशरणे' । 'श्वल ५४९ श्वल्ल ५५०

अत इति व्यधिकरणषष्ठ्यन्तम् अन्तस्येत्यत्रान्वेति । अन्तशब्दः समीपवर्तिवाची । तथाच अतः समीपवर्तिनो लस्येति लभ्यते । लस्येत्यङ्गविशेषणत्वात्तदन्तविधिः । ततश्च अन्त्समीपवर्तिरेफलकारान्तस्य अङ्गस्य सिचि वृद्धिरिति लभ्यते । अत इत्यावृत्तं वृद्धौ स्थानिन्येनान्वेति । तदाह । **अतस्समीपावित्यादिना** ॥ अतः समीप इति किम् । अखोरीत् । अर्मालत् । लरान्तस्येति किम् । मा भवानतीत् । अतो वृद्धिरित्युक्ता अतः समीपावित्यनुक्तौ तु अवभ्रीत् अश्वल्लीदित्यत्रातिव्याप्तिः । अत्र अङ्गस्यान्तौ रेफलकारौ नातः समीपाविति न वृद्धिः । नचात्र अतः भकारेण लकारेण च व्यवहितत्वादेव न वृद्धिः । आर्लादित्यादौ एकव्यवधाने चरितार्थत्वादिति वाच्यम् । सिचि परे यदङ्गन्तदकारस्य वृद्धिरित्यर्थाश्रयणे अतिव्याप्तिवारणार्थत्वात् । **ञि फलेति** ॥ विदारणं शिथिलीभावः । 'आदिर्ञिटुडवः' इति ञिरित् । 'ञितः क्तः' इति प्रयोजनम् । 'आदितश्च' इति इड्विकल्पार्थमादित्वम् । लिण्णिमित्तादेशादित्वादप्राप्ते आह । **तृफलेति । मील ष्मीलेति** ॥ निमेषणं नेत्रसङ्कोचः । सङ्कोच इति पाठेऽप्ययमेवार्थः । **नील-वर्ण इति** ॥ वर्णक्रियायामित्यर्थः । **फल निष्पत्ताविति** ॥ ञि फलेति पूर्वं पठितम् । अनु-

आशुगमने'। शश्वाल। अश्वालीत्। शश्वल्। अश्वल्लीत्। 'खोल् ५५१ खोर्क् ५५२ गतिप्रतिघाते'। खोलति। खोरति। 'धोर्क् ५५३ गतिचातुर्ये'। धोरति। 'त्सर ५५४ छद्मगतौ'। तत्सार। अत्सारीत्। 'क्मर ५५५ हूर्च्छने'। चक्मार। 'अभ्र ५५६ वभ्र ५५७ मभ्र ५५८ चर ५५९ गत्यर्थाः'। चरतिर्भक्षणेऽपि। अभ्रति। आनभ्र। मा भवानभ्रीत्। अङ्गान्त्यरेफस्यातः समीपत्वाभावान्न वृद्धिः। 'ष्ठिवु ५६० निरसने'। 'ष्ठिवुक्लमु–' (सू २३२०) इति दीर्घः। ष्ठीवति। अस्य द्वितीयो वर्णष्ठकारो वेति वृत्तिः। तिष्ठेव। तिष्ठिवतुः। तिष्ठिवुः। टिष्ठेव। टिष्ठिवतुः। टिष्ठिवुः। 'हलि च' (सू ३५४) इति दीर्घः। ष्ठीव्यात्। 'जि ५६१ जये'। अयमजन्तेषु पठितुं युक्तः। जयः उत्कर्षप्राप्तिः। अकर्मकोऽयम्। जयति।

२३३१। सन्लिटोर्जेः। (७-३-५७)

जयतेः सन्लिण्णिमित्तो योऽभ्यासस्ततः परस्य कुत्वं स्यात्। जिगाय। जिग्यतुः जिग्युः। जिगयिथ–जिगेथ। जिगाय–जिगय। जिग्यिव। जिग्यिम।

बन्धभेदात्पुनः पाठः। **खोल् खोर्क् इति** ॥ द्वितीयो रेफान्तः। ऋदित्। इत आरभ्य ष्ठिवेः प्राक् रेफान्ताः। **धोर्क् गतिचातुर्य इति** ॥ अश्वगतिविशेष इत्यर्थः। रेफान्तोऽयम्। ऋदित्। **त्सर छद्मगताविति** ॥ कपटगतावित्यर्थः। **क्मर हूर्छने इति** ॥ कुटिलीभवन इत्यर्थः। **ष्ठिवु निरसन इति** ॥ इदुपधः। उदित्। इत आरभ्य ऊष्मान्तेभ्यः प्राक् वकारान्ताः। तिपि शपि लघूपधगुणे प्राप्ते आह। **ष्ठिवुक्लम्वितीति** ॥ ल्युटि तु शित्परकत्वाभावात् दीर्घाभावे लघूपधगुणः। ष्ठीवनमिति तु पृषोदरादित्वात् समाधेयम्। **अस्येति** ॥ ष्ठिवुधातोः द्वितीयो वर्णः थकार इत्यर्थः। कृतष्टुत्वस्य निर्देश इति भावः। षोपदेशोऽयम्। केवलदन्त्यथकारपरकसादित्वात्षोपदेशत्वेऽपि न सत्वम्। 'सुब्धातुष्ठिवु' इति निषेधात्। लिटि तु 'शर्पूर्वाः खयः' इति षकारवकारयोर्निवृत्त्या षत्वनिवृत्तौ रूपमाह। **तिष्ठेवेति** ॥ ठकारस्य स्वाभाविकत्वे तु टिष्ठेवेति रूपम्। **जि जय इति** ॥ जिधातुरनिट्कः। **सन्लिटोर्जेः** ॥ 'अभ्यासाच्च' इति सूत्रात् अभ्यासादित्यनुवर्तते। 'चजोः कुघिण्यतोः' इत्यस्मात् कु इति च। सन्लिटोरिति निमित्तसप्तमी अभ्यासे अन्वेति। तदाह–**सन्लिण्णिमित्तो योऽभ्यास इत्यादि** ॥ सनि लिटि च अभ्यासात् परस्य कुत्वमिति व्याख्याने तु यङ्लुगन्तात् सनि जेजयिषति इत्यत्र कुत्वं स्यात्। अतः सन्लिण्णिमित्तो योऽभ्यास इति व्याख्येयमिति माधवः। **जिगायेति** ॥ णलि द्वित्वे वृद्धौ उत्तरखण्डे जस्य कुत्वेन गः। **जिग्यतुरिति** ॥ कित्त्वाद्गुणाभावः। लिटि एकाच इति इण्णिषेधं बाधित्वा क्रादिनियमादिटि प्राप्ते थलि 'अचस्तास्वत्' इति तन्निषेधस्य भारद्वाजनियमाद्विकल्पः। तदाह। **जिगयिथ। जिगेथेति** ॥ जिग्यथुः।

जेता। जीयात्। अजैषीत्। 'जीव ५६२ प्राणधारणे'। जिजीव। 'पीव ५६३ मीव ५६४ तीव ५६५ णीव ५६६ स्थौल्ये'। पिपीव। मिमीव। तितीव। निनीव। 'क्षीवु ५६७ क्ष्वेवु ५६८ निरसने'। 'उर्वी ५६९ तुर्वी ५७० थुर्वी ५७१ दुर्वी ५७२ धुर्वी ५७३ हिंसार्थाः'। ऊर्वाञ्चकार। 'उपधायां च' (सू २२६५) इति दीर्घः। तुतूर्व। 'गुर्वी ५७४ उद्यमने'। गूर्वति। जुगूर्व। 'मुर्वी ५७५ बन्धने'। 'पुर्व ५७६ पर्व ५७७ मर्व ५७८ पूरणे'। 'चर्व ५७९ अदने'। 'भर्व ५८० हिंसायाम्'। 'कर्व ५८१ खर्व ५८२ गर्व ५८३ दर्पे'। 'अर्व ५८४ शर्व ५८५ पर्व ५८६ हिंसायाम्'। आनर्व। शर्वति। सर्वति। 'इवि ५८७ व्याप्तौ'। इन्वति। इन्वां चकार। 'पिवि ५८८ मिवि ५८९ णिवि ५९० सेचने'। तृतीयो मूर्धन्योष्मादिरित्येके। 'सेवने' इति तरङ्गिण्याम्। पिन्वति। पिपिन्व। 'हिवि ५९१ दिवि ५९२ धिवि ५९३ जिवि ५९४ प्रीणनार्थाः'। हिन्वति दिन्वति।

२३३२। धिन्विकृण्व्योर च। (३-१-८०)

अनयोरकारोऽन्तादेशः स्यादुप्रत्ययश्च शब्विषये। 'अतो लोपः' (सू २३०८)। तस्य स्थानिवद्भावाल्लघूपधगुणो न। उप्रत्ययस्य पित्सु गुणः। धिनोति। धिनुतः। धिन्वन्ति।

जिग्य। 'णलुत्तमो वा' इति मत्वा आह। **जिगाय। जिगयेति**॥ कादिनियमादिटं मत्वा आह। **जिग्यिव। जिग्यिमेति। जेतेति**॥ जेष्यति। जयतु। अजयत्। आशीर्लिङि 'अकृत्सार्वधातुकयोः' इति दीर्घं मत्वा आह। **जीयादिति। अजैषीदिति**॥ 'सिचि वृद्धिः' इति वृद्धिरिति भावः। अजेष्यत्। षर्वधातुष्वोपदेशः। इविधातोरिदित्त्वान्नुम्। तदाह। **इन्वतीति। इन्वाञ्चकारेति**॥ नुमि इजादिगुरुमत्त्वादामिति भावः। पिविमिर्वान्यादय इदितः। **धिन्विकृण्व्योः**॥ अ इति लुप्तप्रथमाकम्। धिविकृव्योः कृतनुमोः धिन्विकृण्वीति निर्देशः। 'तनादिकृञ्भ्य उः' इत्यतः उरिति चकारादनुकृष्यते। 'कर्त्तरि कृत्' इत्यतः कर्त्तरीति, सार्वधातुके यगित्यतः सार्वधातुक इति च। तदाह। **अनयोरित्यादिना**॥ वकारस्याकारः धिन उ ति इति स्थितम्। **अतो लोप इति**॥ युगपत्सन्नियोगशिष्टतया उप्रत्ययाकारयोरार्धधातुकयोरुपदेशकाले धिन इत्यस्यादन्तत्वमिति भावः। नन्वत्र वकारस्य लोप एव विधीयतां, किमकारविधिनेत्यत आह। **तस्येति**॥ वकारस्य लोपविधौ तु अजादेशत्वाभावात् स्थानिवत्त्वं न स्यादिति भावः। तथा च, धिनु ति इति स्थिते आह। **उप्रत्ययस्येति। धिनुत इति**॥ धिविधातोर्नुमि तसि उप्रत्यये वकारस्य अकारादेशे अतो लोपे तसो डित्त्वादुकारस्य न गुणः। **धिन्वन्तीति**॥ धिन्व इत्य-

२३३३। लोपश्चास्यान्यतरस्यां म्वोः। (६-४-१०७)

असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तस्याङ्गस्य लोपो वा स्यात् म्वोः परयोः। धिन्वः–धिनुवः। धिन्मः–धिनुमः। मिपि तु परत्वाद्गुणः। धिनोमि।

२३३४। उतश्च प्रत्ययादसंयोगपूर्वात्। (६-४-१०६)

असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तादङ्गात्परस्य हेर्लुक्स्यात्। धिनु। नित्यत्वादुकारलोपात्पूर्वमाट्। धिनवाव। धिनवाम। जिन्वतीत्यादि। 'रिवि ५९५ रवि ५९६ धवि ५९७ गत्यर्थाः'। रिण्वति। रण्वति। धन्वति। 'कृवि ५९८ हिंसाकरणयोश्च'। चकाराद्गतौ। 'कृणोति' इत्यादि धिनोतिवत्। अयं स्वादौ च। 'मव ५९९ बन्धने'। मवति। मेवतुः। मेवुः। अमवीत्–अमावीत्। 'अव ६०० रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु'। अवति। आव। मा

स्मात् झिः। झोऽन्तः। उ प्रत्ययः। वकारस्य अकारः। अतो लोपः। उकारस्य यणिति भावः। अत्र वकारस्य स्थानिवत्त्वेन आर्धधातुकत्वेऽपि नेट्। उकारवृत्त्यार्धधातुकत्वस्य अल्पर्मत्वेन अनाल्विधाविति निषेधात्। तदिदम्भो भगो इति सूत्रभाष्ये स्पष्टम्। धिनोषि। धिनुथः। धिनुथ। धिनोमि। **लोपश्च** ॥ 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति पूर्वसूत्रोक्त उकारः अस्येत्यनेन परामृश्यते। प्रत्ययशब्दः प्रत्ययसम्बन्धिनि वर्तते। असंयोगपूर्वात् प्रत्ययादिति च उकारे अन्वेति। स च अङ्गस्य विशेषणम्। तदन्तविधिः। तदाह। **असंयोगेति। प्रत्ययोकार इति** ॥ प्रत्ययसम्बन्धी उकार इत्यर्थः। प्रत्यय उकार इति व्याख्याने तु सुनुवः सुनुमः इत्यत्र न स्यात्। तत्र श्नोरेव प्रत्ययत्वात्। प्रत्ययेति किम्। युवः। युमः। असंयोगपूर्वादिति किम्। शक्नुवः। शक्नुमः। **धिन्वः, धिनुवः, इति** ॥ अत्र उप्रत्ययस्य उकारान्तत्वं व्यपदेशिवत्त्वेन बोध्यम्। नन्वेवं धिनोमीत्यत्र मिपि धिनु मि इति स्थिते उकारस्य लोपः स्यादित्यत आह। **मिपित्विति** ॥ दिधिन्व। धिन्विता। धिन्विष्यति। धिनोतु। **उतश्च। हेर्लुक्स्यादिति** ॥ चिणो लुगित्यतः अतोहेरित्यतश्च तदनुवृत्तेरिति भावः। लोटो मिपि उप्रत्यये वकारस्य अकारे अतो लोपे धिनु मि इति स्थिते मेर्निभावे लोडुत्तमस्येत्यडागमश्च बाधित्वा परत्वादुकारस्य 'लोपश्चास्यान्यतरस्याम्' इति लोपमाशङ्क्याह। **नित्यत्वादुकारलोपात् पूर्वमाडिति** ॥ निभावस्याप्युपलक्षणम्। उकारलोपे कृते अकृते च निभावस्य आडागमस्य च प्रवृत्त्या नित्यत्वादुकारलोपात्पूर्वमेव निभावाडागमयोः कृतयोः उकारलोपस्य प्रसक्तौ आटः पित्त्वेन ङित्त्वाभावादुकारस्य गुणे अवादेशे च धिनवानीति रूपमिति भावः। अधिनोत्। धिनुयात्। धिन्व्यात्। अधिन्वीत्। अधिन्विष्यत्। **कृणोतीत्यादीति** ॥ धिविवद्रूपाणीति भावः। **अयं स्वादौ चेति** ॥ कृविरित्यर्थः। **अव रक्षणेति** ॥ स्वाम्यर्थः ऐश्वर्यम्। **मा भवानवीदिति**॥

भवानवीत्। धावु '६०१ गतिशुद्ध्योः'। स्वरितेन। धावति—धावते। दधाव—दधावे।

अथोष्मान्ता आत्मनेपदिनः। 'धुक्ष ६०२ धिक्ष' ६०३ सन्दीपनक्लेशनजीवनेषु। धुक्षते। दुधुक्षे। धिक्षते। दिधिक्षे। 'वृक्ष ६०४ वरणे'। वृक्षते। ववृक्षे। 'शिक्ष ६०५ विद्योपादाने'। शिक्षते। 'भिक्ष ६०६ भिक्षायामलाभे लाभे च'। भिक्षते। 'क्लेश ६०७ अव्यक्तायां वाचि'। 'बाधने' इति दुर्गः। क्लेशते। चिक्लेशे। 'दक्ष ६०८ वृद्धौ शीघ्रार्थे च'। दक्षते। ददक्षे। 'दीक्ष ६०९ मौण्ड्येज्योपनयननियमव्रतादेशेषु'। दीक्षते। दिदीक्षे। 'ईक्ष ६१० दर्शने'। ईक्षाञ्चक्रे। 'ईष ६११ गतिहिंसादर्शनेषु'। ईषाञ्चक्रे। 'भाष ६१२ व्यक्तायां वाचि'। भाषते। 'वर्ष ६१३ स्नेहने'। दन्त्योष्ठ्यादिः। ववर्षे। 'गेषृ ६१४ अन्विच्छायाम्'। 'ग्लेषृ' इत्येके। अन्विच्छा अन्वेषणम्। जिगेषे। 'पेषृ ६१५ प्रयत्ने'। पेषते। 'जेषृ ६१६ णेषृ ६१७ एषृ ६१८ प्रेषृ ३१९ गतौ'। जेषते। नेषते। एषाञ्चक्रे। पिप्रेषे। 'रेषृ ६२० हेषृ ६२१ ह्वेषृ ६२२ अव्यक्ते शब्दे'। आद्यो वृकशब्दे, ततो द्वौ अश्वशब्दे। रेषते। हेषते। ह्वेषते। 'कासृ ६२३ शब्दकुत्सायाम्'। कासाञ्चक्रे। 'भासृ ६२४ दीप्तौ'। बभासे। 'णासृ ६२५ रासृ ६२६ शब्दे'। नासते। प्रणासते। 'णस ६२७ कौटिल्ये'। नसते। 'भ्यस ६२८ भये'। भ्यसते। बभ्यसे। 'आङः शसि ६२९ इच्छायाम्'। आशंसते। आशशंसे। 'ग्रसु ६३० ग्लसु ६३१ अदने'। जग्रसे। जग्लसे। 'ईह ६३२ चेष्टायाम्'। ईहाञ्चक्रे। 'वहि ६३३ महि ६३४ वृद्धौ'। वंहते। ववंहे। मंहते। 'अहि ६३५ गतौ'। अंहते। आनंहे। 'गर्ह ६३६ गल्ह ६३७ कुत्सायाम्'। जगर्हे। जगल्हे। 'बर्ह ६३८ बल्ह ६३९ प्राधान्ये'। ओष्ठ्यादी। 'वर्ह

नेटीति न वृद्धिः। मन्यादयोऽवत्यन्ताः परस्मैपदिनो गताः। **धावुगतीनि** ॥ उदित्वम्। **स्वरितेदिति** ॥ ततश्च कर्तृगामिनि फले आत्मनेपदम्। अन्यथा परस्मैपदमिति भावः। **अथोष्मान्ता इति** ॥ तत्र धुक्षेत्यारभ्य कासृधातोः प्राक् षकारान्ताः। तत्र क्लेशधातुरेकः शकारान्तः। **दीक्ष मौण्ड्येति** ॥ पञ्चार्थाः। णेषृधातुर्णोपदेशः। कासृधातुमारभ्य ईहधातोः प्राक् सकारान्ताः। **कासाञ्चक्र इति** ॥ कास्प्रत्ययादित्वम्। णासृधातुर्णसधातुश्च णोपदेशः। **आङः शसीति** ॥ आङः परः शसिधातुरिच्छायामित्यर्थः। **ईहेत्यारभ्य कासृधातुवर्जं**

६४० वल्ह ६४१ परिभाषणहिंसाच्छादनेषु'। दन्त्योष्ठ्यादी। केचित्तु पूर्वयोर्दन्त्योष्ठ्यादितामनयोरोष्ठ्यादितां चाहुः। 'प्लिह ६४२ गतौ'। पिप्लिहे। 'वेह ६४३ जेह ६४४ वाह ६४५ प्रयत्ने'। आद्यो दन्त्योष्ठ्यादिः। अन्त्यः केवलोष्ठ्यादिः। 'उभावप्योष्ठ्यादी' इत्येके। 'दन्त्योष्ठ्यादी' इत्यपरे। जेहतिर्गत्यथोऽपि बवाहे। 'द्राह ६४६ निद्राक्षये,। 'निक्षेपे'। इत्येके। 'काश्रृ ६४७ दीप्तौ'। चकाशे। 'ऊह ६४८ वितर्के' ऊहाञ्चक्रे'। 'गाहू ६४९ विलोडने'। गाहते। जगाहे। जगाहिषे। जघाक्षे। जगाहिढ्वे—जगाहिध्वे—जघाढ्वे। गाहिता।

२३३५। ढो ढे लोपः। (८-३-१३)

ढस्य लोपः स्याद्ढे परे। गाढा। गाहिष्यते—घाक्ष्यते। गाहिषीष्ट—घाक्षीष्ट। अगाहिष्ट—अगाढ। अघाक्षाताम्। अघाक्षत। अगाढाः। अघाढ्वम्।

घृषिकान्तीत्यतः प्राक् हकारान्ताः। काश्रृधातुस्तु शकारान्तः। प्लिहधातुरिदुपधः। **ऊह वितर्के इति** ॥ युक्त्या अर्थनिर्णयो वितर्कः। 'अनुक्तमप्यूहति पण्डितो जनः।' इत्यत्र तु अनुदात्तेत्त्वलक्षणात्मनेपदमनित्यमिति बोध्यम्। गाहूधातुरूदित्त्वाद्वेट्। तदाह। **जगाहिषे। जघाक्षे इति** ॥ इडभावे जगाह् से इति स्थिते होढः एकाच इति भष्भावेन गस्य घः षढोरिति ढस्य कः सस्य षः। **जगाहिढ्वे, जगाहिध्वे इति** ॥ इट्पक्षे 'विभाषेटः' इति ढत्वविकल्पः। इडभावे त्वाह। **जघाढ्वे इति** ॥ जगाह् ध्वे इति स्थिते हस्य ढः धस्य ष्टुत्वेन ढः गस्य भष्घकारः पूर्वस्य ढस्य 'ढो ढे लोपः' इति वक्ष्यमाणो लोपः। ढ्रलोप इति सूत्रं त्विहैव पठितुं युक्तम्। **गाहितेति** ॥ इट्पक्षे रूपम्। इडभावे तु गाह् ता इति स्थिते हस्य ढत्वे 'झषस्तथोर्धोऽधः' इति तकारस्य धत्वे ष्टुत्वेन धस्य ढत्वे गाद् ढा इति स्थिते। **ढोढे** ॥ ढः इति षष्ठ्यन्तम्। तदाह। **ढस्येति** ॥ ढकारस्येत्यर्थः। इति पूर्वस्य ढकारस्य लोपे गाढा इति रूपम्। ढलोपे ष्टुत्वस्यासिद्धत्वन्तु न। तथा सति ढलोपविधिवैयर्थ्यात्। **घाक्ष्यते इति** ॥ इडभावे हस्य ढः गस्य भष्घकारः ढस्य कः सस्य ष इति भावः। **घाक्षीष्टेति** ॥ आशीर्लिङि सीयुटि इडभावपक्षे हस्य ढः गस्य भष् घकारः ढस्य कः सस्य ष इति भावः। **अगाहिष्टेति** ॥ सिच इट्। सस्य षः तकारस्य ष्टुत्वेन टः। इडभावे त्वाह। **अगाढेति** ॥ अगाह् स् त इति स्थिते सिच इडभावे झलो झलीति लोपः ढत्वधत्वष्टुत्वढलोपाः। सलोपात्पूर्वं भष्भावस्तु न। भष्भावस्यासिद्धतया झलो झलीति सलोपस्य पूर्वं प्रवृत्तेः। न च कृतेऽपि सलोपे प्रत्ययलक्षणेन सकारपरकत्वात् भष्दुर्वार इति शङ्क्यम्। वर्णाश्रये प्रत्ययलक्षणाभावादिति भावः। **अघाक्षातामिति** ॥ इडभावपक्षे ढघकषाः। **अघाक्षतेति। अगाढा इति** ॥ थास् सिच् इडभावे सलोपः ढत्वधत्वष्टुत्वढलोपाः। **अघाढ्वमिति** ॥ ध्वमि

अघाक्षि । 'गृहू ६५० ग्रहणे' । गर्हते । जगृहे । 'ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन' (वा ५९३) । जगृहिषे—जघृक्षे । जघृढ्वे । गर्हिता—गर्द्धा । गर्हिष्यते—घर्क्ष्यते । गर्हिषीष्ट—घृक्षीष्ट । लुङि । अगर्हिष्ट । इडभावे ।

२३३६ । शल इगुपधादनिटः क्सः । (३-१-४५)

इगुपधो यः शलन्तस्तस्मादनिटश्च्लेः क्सादेशः स्यात् । अघृक्षत ।

२३३७ । क्सस्याचि । (७-३-७२)

अजादौ तङि क्सस्य लोपः स्यात् । 'अलोऽन्त्यस्य' (सू ४२) । अघृक्षाताम् । अघृक्षन्त । 'ग्लह ६५१ च' । ग्लहते । 'घृषि ६५२ कान्तिकरणे' । घृंषते । जुघृंषे । केचित् 'घप' इत्यदुपधं पठन्ति ।

इडभावपक्षे सलोपः । ढत्वघत्वष्टुत्वढलोपाः । ध्वममाश्रित्य ढलोपात्पूर्वं भष्भावः । **अघाक्षीति** ॥ इडभावे हस्य ढः । भष्भावः ढस्य कः सस्य षत्वमिति भावः । अघाक्ष्वहि । अगाहिष्यत । अघाक्ष्यत । गृहूधातुः ऊदित् । ऋदुपधः । **गर्हते इति** ॥ लटस्तिपि लघूपधगुणे शपि रपरत्वम् । **जगृहे इति** ॥ असंयोगादिति कित्त्वाद्गुणाभावः । न च कित्त्वात् परत्वाद्गुणः शङ्क्यः 'ऋदुपधेभ्यो लिटः कित्त्वं गुणात् पूर्वविप्रतिषेधेन' इति वार्तिकादिति भावः । ऊदित्त्वादिड्विकल्पं मत्वा आह । **जगृहिषे । जघृक्षे इति** ॥ अभ्यासे उरदत्वं हलादिशेषः जश्त्वम् इट् षत्वम् । इडभावे तु ढत्वभष्भावकत्वषत्वानि । ध्वमि जगृहिध्वे इति सिद्धवत्कृत्य इडभावे आह । **जघृढ्वे इति** ॥ हस्य ढः भष्भावः ढलोपः । **गर्द्धेति** ॥ इडभावे गुणे रपरत्वे ढत्वधत्वष्टुत्वढलोपाः । **घर्क्ष्यते इति** ॥ गुणः रपरत्वं हस्य ढः भष्भावः ढस्य कः षत्वम् । **घृक्षीष्टेति** ॥ आशीर्लिङः सीयुटि इडभावे लिङ्सिचाविति कित्त्वाद्गुणाभावे हस्य ढः भष्भावः ढस्य कः षत्वम् । **अगर्हिष्टेति** ॥ सिच इटि गुणे रपरत्वे षत्वे रूपम् । **शल इगुपधा** ॥ **शलन्त इति** ॥ 'धातोरेकाचः' इत्यतोऽनुवृत्तधातुविशेषणत्वात्तदन्तविधिरिति भावः । सिचोऽपवादः क्सादेशः अदन्तः । ककार इत् । **अघृक्षतेति** ॥ च्लेः क्सः । तस्य कित्त्वाद्गुणाभावे हस्य ढः भष्भावः ढस्य कः षत्वमिति भावः । 'अघृक्ष आताम्' इति स्थिते 'आतो ङितः' इति इयादेशे प्राप्ते । **क्सस्य** ॥ अचीत्यस्याङ्गाक्षिप्तप्रत्ययविशेषणत्वात् तदन्तविधिः । 'घोर्लोपो लेटि वा' इत्यतः लोप इत्यनुवर्तते । तदाह । **अजादाविति । अलोऽन्त्यस्येति** ॥ अन्त्यस्याकारस्य लोप इति भावः । 'वस्तुतस्तु लुग्वा दुहदिह' इत्युत्तरसूत्रादात्मनेपदे इत्यनुवृत्तेस्तद्विशेषणत्वादचीति तदादिविधिः । तेन दृशेः क्सप्रत्यये तादक्ष इत्यादौ नायं लोपः । अजादौ तङीत्येव क्वचित्पाठो दृश्यते । **अघृक्षातामिति** ॥ 'अघृक्ष आताम्' इति स्थिते क्साकारस्य लोपे अतः परत्वाभावात् 'आतो ङितः' इति इय् नेति भावः । **अघृक्षन्तेति** ॥ क्षस्य अजादित्वाभावात्तस्मिन्परे क्सस्य अकारलोपाभावादतः परत्वादात्मनेपदेष्वनत इत्यदादेशो न । कृते तु क्षोऽन्ता-

अथार्हत्यन्ताः परस्मैपदिनः। 'घुषिर् ६५३ अविशब्दने' विशब्दनं प्रतिज्ञानं, ततोऽन्यस्मिन्नर्थ इत्येके। 'शब्दे' इत्यन्ये पेठुः। घोषति। जुघोष। घोषिता। इरित्त्वादङ्वा। अघुषत्—अघोषीत्। 'अक्षू ६५४ व्याप्तौ'।

२३३८। अक्षोऽन्यतरस्याम्। (३-१-७५)

अक्षो वा श्नुप्रत्ययः स्यात्कर्त्रर्थे सार्वधातुके परे। पक्षे शप्। अक्ष्णोति। अक्ष्णुतः। अक्ष्णुवन्ति। अक्षति। अक्षतः। अक्षन्ति। आनक्ष। आनक्षिथ—आनष्ठ। अक्षिता—अष्टा। अक्षिष्यति। 'स्कोः' (सू ३८०) इति कलोपः। 'षढोः कः सि' (सू २९५)। अक्ष्यति। अक्ष्णोतु। अक्ष्णुहि। अक्ष्णवानि। आक्ष्णोत्। आक्ष्णवम्। अक्ष्णुयात्। अक्ष्णुयुः। अक्ष्यात्।

देशे क्सस्याकारलोपः पररूपं वा। **ग्लह चेति** ॥ ग्लहधातुरपि ग्रहणे वर्तत इत्यर्थः। अदुपधोऽयम्। **घुषि कान्तीति** ॥ उदुपधोऽयम्। इदित्त्वान्नुम्। नश्चेत्यनुस्वारः। यय्परकत्वाभावान्न परसवर्णः। तदाह। **घुंषत इति** ॥ सेट्कोऽयम्। अदुपधपक्षे तु घषते। जघषे। ऊष्मान्ता आत्मनेपदिनो गताः। **अथार्हत्यन्ताः परस्मैपदिन इति** ॥ ऊष्मान्ता इति शेषः। तत्र तुस हसेत्यतः प्राक् षान्ताः। **घुषिर् इति** ॥ इर् इत्। **प्रतिज्ञानमिति** ॥ वेदाः प्रमाणमित्याद्यभ्युपगम इत्यर्थः। **ततोऽन्यस्मिन्निति** ॥ विशब्दनात् अन्यत् अविशब्दनं तस्मिन्नित्यर्थः। **इरित्त्वादङ्वेति** ॥ इरितो वेत्यनेनेति शेषः। **अघुषदिति** ॥ अङो ङित्त्वान्न लघूपधगुणः। **अघोषीदिति** ॥ अङभावपक्षे लघूपधगुणे 'इट ईटि' इति सिज्लोपः। हलन्तलक्षणवृद्धेः 'नेटि' इति निषेधः। अक्षधातुः ऊदित्त्वाद्वेट्कः। **अक्षोऽन्यतरस्याम्** ॥ अक्ष इति पञ्चमी। स्वादिभ्यः श्नुरित्यतः श्नुरिति, कर्तरि शबित्यतः कर्तरीति, सार्वधातुके यगित्यतः सार्वधातुक इति, चानुवर्त्तते। तदाह। **अक्षो वेति** ॥ श्नुप्रत्ययस्य शित्त्वं सार्वधातुकत्वार्थम्। तत्फलन्तु 'स्वादिभ्यः श्नुः' इत्यत्र वक्ष्यते। **अक्ष्णोतीति** ॥ तिपि श्नुः तस्य तिपः पित्त्वेन ङित्त्वाभावात् सार्वधातुकेति श्नो गुणः णत्वम्। **अक्ष्णुत इति** ॥ तसः आपित्त्वेन ङित्त्वात् श्नो न गुणः। **अक्ष्णुवन्तीति** ॥ ङित्त्वाद्गुणाभावे उवङ्। अक्ष्णोषि। अक्ष्णुथः। अक्ष्णुथ। अक्ष्णोमि। अक्ष्णुवः। अक्ष्णुमः। अक्षतीति शप्पक्षे रूपम्। **आनक्षेति** ॥ णलि द्विहल्त्वान्नुट्। आनक्षतुः। आनक्षुः। ऊदित्त्वादिट्पक्षे आह। **आनक्षिथेति** ॥ इडभावे आह। **आनष्टेति** ॥ आनक्ष् थ् इति स्थिते स्कोरिति कलोपः थस्य ष्टुत्वेन टः। **अष्टेति** ॥ लुटि तासि इडभावपक्षे स्कोरिति कलोपे तकारस्य ष्टुत्वेन टः। अक्ष् स्य इति स्थिते प्रक्रियान्दर्शयति। **स्कोरिति कलोपः। षढोः कस्सीति** ॥ कात्परत्वात् सस्य षत्वञ्च। **अक्ष्णोत्विति** ॥ अक्ष्णोतु। अक्ष्णुतात्। अक्ष्णुताम् अक्ष्णुवन्तु। **अक्ष्णुहीति** ॥ संयोगपूर्वत्वादुतश्चेति हेर्लुक् न। हेरपित्त्वेन ङित्त्वात् श्नोर्न गुणः। अक्ष्णुतात्। अक्ष्णुतम्। अक्ष्णुत। **अक्ष्णवानीति** ॥ आटः पित्त्वेन ङित्त्वाभावान्न गुणनिषेधः।

ऊदित्त्वाद्वेट्। 'नेटि' (सू २२६८)। मा भवानक्षीत्। अक्षिष्टाम्। अक्षिषुः। इडभावे तु मा भवानाक्षीत्। आष्टाम्। आक्षुः। 'तक्षू ६५५ त्वक्षू ६५६ तनूकरणे'।

२३३९। तनूकरणे तक्षः। (३-१-७६)

श्नुः स्याद्वा शब्विषये। तक्ष्णोति—तक्षति वा काष्ठम्। ततक्षिथ—ततष्ठ। अतक्षीत्। अतक्षिष्टाम्। अताक्षीत्। अताष्टाम्। 'तनूकरणे' किम्। वाग्भिः संतक्षति। भर्त्सयतीत्यर्थः। 'उक्ष ६५७ सेचने'। उक्षां चकार। 'रक्ष ६५८

गुणे अवादेशः। अक्ष्णवाव। अक्ष्णवाम। शपि तु अक्षत्वित्यादि। **आक्ष्णोदिति** ॥ लङस्तिप् श्नोर्गुणः आट् वृद्धिः। आक्ष्णुताम्। आक्ष्णुवन्। आक्ष्णोः। आक्ष्णुतम्। आक्ष्णुत। **आक्ष्णवमिति** ॥ मिपः अम् श्नोर्गुणः अवादेशः। आक्ष्णुव। आक्ष्णुम। **अक्ष्णुयादिति** ॥ विधिलिङि यासुटो ङित्त्वात् श्नोर्न गुणः। **अक्ष्णुयुरिति** ॥ अक्ष्णुयाः। अक्ष्णुयातम्। अक्ष्णुयात। अक्ष्णुयाम्। अक्ष्णुयाव। अक्ष्णुयाम। शप्पक्षे आक्षदित्यादि। **अक्ष्यादिति** ॥ आशीर्लिङः आर्धधातुकत्वान्न श्नुः, नापि शप्। लुङि सिचि विशेषमाह। **ऊदित्त्वाद्वेडिति** ॥ तत्र इट्पक्षे आह। **नेटीति** ॥ हलन्तलक्षणा वृद्धिर्नेत्यर्थः। नच अभैत्सीदित्यादावेकेन हला व्यवधाने हलन्तलक्षणवृद्धेश्चरितार्थत्वादत्र न तत्प्रसक्तिरिति शङ्क्यम्। रञ्जेः अरांक्षीदित्यत्र वृद्धिसिद्धये अनेकाल्व्यवधानेऽपि हलन्तलक्षणवृद्धिप्रवृत्तेर्भाष्यादौ प्रपञ्चितत्वादिति भावः। **मा भवानक्षीदिति** ॥ आटि सति हलन्तलक्षणवृद्धौ सत्यामसत्यामत्र रूपे भेदाभावात् मा भवानित्युपात्तम्। **अक्षिष्टाम्। अक्षिषुरिति** ॥ अत्रापि मा भवानिति सम्बध्यते। **इडभावे त्विति** ॥ लुङस्तिपि अक्ष् स् ईदिति स्थिते इडभावान्नेटीति निषेधाप्रसक्त्या हलन्तलक्षणवृद्धौ झलो झलीति सिज्लोपे स्कोरिति कलोपे तकारस्य ष्टुत्वम्। **आक्षुरिति** ॥ अक्ष् स् उस् इति स्थिते हलन्तलक्षणवृद्धौ स्कोरिति कलोपे षस्य कत्वे सस्य षत्वमिति भावः। आक्षीः। आष्टम्। आष्ट। आक्षम्। आक्ष्व। आक्ष्म। आक्षिष्यत्। आक्ष्यत्। आक्ष्यताम्। आक्ष्यन्। आक्ष्यः। आक्ष्यतम्। आक्ष्यत। आक्ष्यम्। आक्ष्याव। आक्ष्याम। **तक्षू त्वक्षू इति** ॥ स्थूलस्य काष्ठादेः कतिपयावयवापनयनेन सूक्ष्मीकरणन्तनूकरणम्। **तनूकरणे** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **श्नुः स्याद्वा शब्विषये इति** ॥ स्वादिभ्यः श्नुरित्यतः श्नुरिति, कर्तरि शबित्यतः कर्तरीति, सार्वधातुके यगित्यतः सार्वधातुक, इति चानुवर्तते। तनूकरणेऽर्थे विद्यमानात् तक्षधातोः श्नुः स्यात्कर्त्रर्थे सार्वधातुके इति फलितम्। नच तक्षूधातोस्तनूकरणार्थकत्वाव्याभिचारात् श्नुविधौ तनूकरणग्रहणं व्यर्थमिति वाच्यम्। अतएव धातुपाठे अर्थनिर्देशस्य उपलक्षणत्वावगमात्। [illegible] ॥ अक्षूवद्रूपाणि। लुङि सिचि इट्पक्षे नेटीति वृद्धिनिषेधे अतक्षीदिति रूपम्। **इडभावे तु अताक्षीदिति च**

पालने । 'णिक्ष ६५९ चुम्बने' । प्रणिक्षति । 'त्रक्ष ६६० ष्ट्रक्ष ६६१ णक्ष ६६२ गतौ' । त्रक्षति । स्त्रक्षति । नक्षति । 'वक्ष ६६३ रोषे' । 'सङ्घाते' इत्येके । 'मृक्ष ६६४ सङ्घाते' । 'म्रक्ष' इत्येके । 'तक्ष ६६५ त्वचने' । त्वचनं संवरणं त्वचो ग्रहणं च । 'पक्ष परिग्रहे' इत्येके । 'सूर्क्ष ६६६ आदरे' । सुषूर्क्ष । 'अनादरे' इति तु काचित्कोऽपपाठः । 'अवज्ञावहेळनमसूर्क्षणम्' इत्यमरः । 'काक्षि ६६७ वाक्षि ६६८ माक्षि ६६९ काङ्क्षायाम्' । 'द्राक्षि ६७० ध्राक्षि ६७१ ध्वाक्षि ६७२ घोरवाशिते च' । 'चूष ६७३ पाने' । चुचूष । 'तूष ६७४ तुष्टौ' । 'पूष ६७५ वृद्धौ' । 'मूष ६७६ स्तेये' । लूष ६७७ रूष ६७८ भूषायाम्' । 'शूष ६७९ प्रसवे' । प्रसवोऽभ्यनुज्ञानम् । तालव्योष्मादिः । 'यूष ६८० हिंसायाम्' । 'जूष ६८१ च' 'भूष ६८२ अलङ्कारे' । भूषति । 'ऊष ६८३ रुजायाम्' । ऊषां चकार 'ईष ६८४ उञ्छे' । 'कष ६८५ खष ६८६ शिष ६८७ जष ३८८ झष ६८९ शष ६९० वष ६९१ मष ६९२ रुष ६९३ रिष ६९४ हिंसार्थाः' । तृतीयषष्ठौ तालव्योस्मादी । सप्तमो दन्त्योष्ठ्यादिः । चकाष । चखाष । शिशेष । शिशेषिथ । शेष्टा । क्सः अशिक्षत् । अशेक्ष्यत् । जेषतुः । जक्षषतुः । शेषतुः । ववषतुः । मेषतुः ।

अक्षूवत् । एवं त्वक्षूधातुरपि । णिक्षधातुर्णोपदेशः । **प्रणिक्षतीति** ॥ 'उपसर्गादसमासेऽपि' इति णत्वम् । **त्रक्ष ष्ट्रक्ष णक्ष गताविति** ॥ त्रयोऽप्यकारमध्याः । द्वितीयष्षोपदेशः । तदाह । **त्रक्षतीति** ॥ षस्य सत्वे ष्टुत्वनिवृत्तिरिति भावः । णक्षधातुर्णोपदेशः । सिचि नेटीति हलन्तलक्षणवृद्धिनिषेधः । **वक्ष रोष इति** ॥ दन्त्योष्ठ्यादिः । म्रक्षधातुरकारमध्यः । संवरणशब्दस्य विवरणं त्वचो ग्रहणमिति । सूर्क्षधातुः रेफमध्यः । अपपाठत्वे हेतुमाह । **अवज्ञेति** । सूर्क्षधातोरनादरार्थकत्वे असूर्क्षणमित्यस्य आदरार्थकत्वापत्त्या अमरकोशे अवज्ञापर्यायत्वावगमविरोध इति भावः । **घोरवाशिते चेति** ॥ चात् कांक्षायामपि । घोरवाशितंक्रूरशब्दः । चूषेत्यारभ्य ऊष रुजायामिति यावदूदुपधाः । **ईष उञ्छ इति** ॥ ईदुपधः । कषेत्यारभ्य दश धातवः । तत्र तृतीयो दशमश्च इदुपधः । शिषधातुरनिट्कः । क्रादिनियमात्थलि वसि मसि च नित्यमिट् । अजन्ताकारवत्त्वाभावेन थलि सेट्कत्वाभावात् शिशेषिथ । शिशिषिव । शिशिषिम । **अशिक्षदिति** ॥ 'शल इगुपधात्' इति च्लेः क्सादेशे कित्त्वाल्लघूपधगुणनिषेधे षस्य कत्वे सस्य षत्वमिति भावः । **ववषतुरिति** ॥ 'न शसदद' इति निषेधादेत्वाभ्यासलोपौ न । रुषधातुस्सेट्कः । रोषति । रुरोष । रुरुषतुः । रुरुषुः । रुरोषिथ । रुरुषथुः । रुरुष । रुरोष । रुरुषिव । रुरुषिम ।

२३४० । तीषसहलुभरुषरिषः । (७-२-४८)

इच्छत्यादेः परस्य तादेरार्धधातुकस्येड्वा स्यात् । रोषिता—रोष्टा । रोषिष्यति । रेषिता—रेष्टा । रेषिष्यति 'भष । ६९५ भर्त्सने' । इह भर्त्सनं शब्दः । भषति । बभाष । 'उष ६९६ दाहे' । ओषति ।

२३४१ । उषविदजागृभ्योऽन्यतरस्याम् । (३-१-३८)

एभ्यो लिट्याम्वा स्यात् । ओषां चकार । उवोष । ऊषतुः । उवोषिथ । 'जिषु ६९७ विषु ६९८ मिषु ६९९ सेचने' । जिजेष । क्रादिनियमादिट् । विवेषिथ । विविषिव । वेष्टा । वेक्ष्यति । अविक्षत् । 'पुष ७०० पुष्टौ' । पोषति । पोषिता । पोषिष्यति । अपोषीत् । अनिट्केषु 'पुष्य' इति श्यना निर्देशादयं सेट् अतो न क्सः । अङ्विधौ दैवादिकस्य ग्रहणान्नाङ् । 'श्रिषु ७०१ श्रिषु ७०२ म्रुषु ७०३ प्लुषु ७०४ दाहे' । श्रेषति । शिश्रेष । श्रेषिता । श्लेषति । शिश्लेष । श्लेषिता । अयमपि सेट् । 'अनिट्सु दैवादिकस्यैव ग्रहणम्' इति कैयटादयः ।

तीषस॥ आर्धधातुकस्येत्यतः इडित्यनुवर्तते । 'स्वरतिसूति' इत्यतो वेति च । नातिसप्तम्युपादानात्तदादिविधिः । इष सह लुभ रुष रिष एषान्द्वन्द्वात्पञ्चम्येकवचनम् । तदाह । **इच्छत्यादेरिति** ॥ इच्छतीति इषेः तिपा निर्देशः । इषधातुर्विवक्षितः । इषु इच्छायां तुदादिरशविकरणः । इष गतौ दिवादिः श्यन्विकरणः । इष आभीक्ष्ण्ये क्र्यादिः श्नाविकरणः । तत्र 'इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः' इति वार्तिकात् श्यन्विकरणस्य न ग्रहणम् । **रोषिता, रोष्टेति** ॥ इडभावे ष्टुत्वेन तकारस्य टकारः । रिषेस्तादाविड्विकल्पमभ्युपेत्य आह । **रेषिता, रेष्टेति** ॥ **उष दाह इति** ॥ सेट्कोऽयम् उखधातुवत् । **उषविद** ॥ कासप्रत्ययादित्यतः आम् लिटीत्यनुवर्तते । तदाह । **एभ्यो लिटीति** ॥ आमभावपक्षे आह । **उवोषेति** ॥ 'अभ्यासस्यासवर्णे' इति उवङादेशः । **जिषु विषु मिषु सेचन इति** ॥ द्वितीयो दन्त्योष्मादिः । थलि वसि मसि च विशेषमाह । **क्रादिनियमादिडिति । विवेषिथेति** ॥ अजन्ताकारवत्त्वाभावेन भारद्वाजनियमाप्रवृत्तेस्थल्यपि क्रादिनियमाच्चित्यमिट् । **वेष्टेति** ॥ तासि ष्टुत्वेन तकारस्य टः । **वेक्ष्यतीति** ॥ षढोरिति षस्य कः सस्य षः । **अविक्षदिति** ॥ 'शल इगुपधात्' इति क्सः । षस्य कः सस्य षः कित्त्वान्नगुणः । पुषधातुः सेडिति मत्वा आह । **पोषितेति । अपोषीदिति** ॥ नेटीति वृद्धिनिषेधः । नन्वनिट्सु पुषेः पाठात् कथं सेट्कत्वमित्यत आह । **अनिट्केष्विति । अत इति** ॥ सेट्कत्वात् क्सो नेत्यर्थः । ननु पुषादित्वलक्षणः अङ् कुतो नेत्यत आह । **अङ्विधाविति** ॥ एतच्चानुपदमेव पुषादिसूत्रव्याख्यावसरे स्पष्टीभविष्यति । **अयमपीति** ॥ पुषधातुवत् श्लिषधातुरपि भौवादिकः सेडित्यर्थः । **कैयटादय इति** ॥ 'श्लिष आलिङ्गने' इति सूत्रे कैयटहरदत्तादिभिस्तथा प्रपञ्चितत्वादिति भावः ।

यत्त्वनिट्कारिकान्यासे द्वयोर्ग्रहणमित्युक्तं, तत्स्वोक्तिविरोधाद्ग्रन्थान्तरविरोधाच्चोपेक्ष्यम्। पुप्रोष। पुप्लोष। 'पृषु ७०५ वृषु ७०६ मृषु ७०७ सेचने'। 'मृषु' सहने च। इतरौ हिंसासंक्लेशनयोश्च। पर्षति। पपर्ष। पृष्यात्। 'घृषु ७०८ सङ्घर्षे'। 'ह्रषु ७०९ अळीके'। 'तुस ७१० ह्रस ७११ ह्लस ७१२ रस ७१३ शब्दे'। तुतोस। जह्रास। जह्लास। ररास। 'लस ७१४ श्लेषणक्रीडनयोः' 'घस्लृ ७१५ अदने'। अयं न सार्वत्रिकः। 'लिट्यन्यतरस्याम्' (सू २४२४) इत्यदेर्घस्लादेशविधानात्। ततश्च यत्र लिङ्गं वचनं वास्ति तत्रैवास्य प्रयोगः। अत्रैव पाठः शपि परस्मैपदे लिङ्गम्। लृदित्करणमङि। अनिट्कारिकासु पाठो वलाद्यार्धधातुके। क्मरचि तु विशिष्योपादानम्। घसति। घस्ता।

२३४२। सः स्यार्धधातुके। (७-४-४९)

सस्य तः स्यात्सादावार्धधातुके। घत्स्यति। घसतु। अधसत्। घसेत्। लिङ्गाद्यभावादाशिष्यस्याप्रयोगः।

द्वयोर्ग्रहणमिति ॥ भौवादिकदैवादिकयोरित्यर्थः। **स्वोक्तीति** ॥ 'श्लिष आलिङ्गने' इति सूत्रे दैवादिकश्लिषेरनिट्केषु ग्रहणमिति न्यासकृता कैयटादिभिश्चोक्तत्वादिति भावः। पृषु वृषु इत्यारभ्य ह्रषुपर्यन्ता ऋदुपधाः। अलीकं मिथ्याभवनं मिथ्योक्तिर्वा। तुसह्रसेत्यारभ्य णशगतावित्यतः प्राक् सकारान्ताः। घस्लृधातुरनिट्कः। **अयमिति** ॥ घस्लृधातुः सर्वेषु न प्रयोज्य इत्यर्थः। कुत इत्यत आह। **लिटीति** ॥ यद्ययं सार्वत्रिकस्स्यात् तदा लिट्यपि प्रयुज्येत। ततश्च 'अद भक्षणे' इति धातोर्लिट्यन्यतरस्यामिति घस्लृभावविधिर्व्यर्थः स्यादिति भावः। असार्वत्रिकत्वे सति क्व प्रयोगः क्व नेत्यत आह। **ततश्चेति** ॥ यत्र घस्लृधातोः प्रयोगे ज्ञापकं प्रत्यक्षवचनं वास्ति तत्रैवास्य प्रयोग इत्यर्थः। तत्र तावल्लिङ्गन्दर्शयति। **अत्रैवेति** ॥ भ्वादिगणे अत्रैव क्रमेः परस्मैपदे अस्य पाठश्शपि प्रयोगे लिङ्गमित्यर्थः। नच धातुसंज्ञार्थः पाठ इति शङ्क्यम्। युतदीप्तावित्युक्तरीत्याऽस्य पाठेनैव सिद्धे अत्र क्रमे तत्पाठवैयर्थ्यादिति भावः। **लृदित्करणमङीति** ॥ प्रयोगे लिङ्गमिति शेषः। **अनिट्कारिकास्विति** ॥ अनुदात्तोपदेशेषु घस्लृधातोः पाठः वलाद्यार्धधातुके प्रयोगे लिङ्गमित्यर्थः। अथ क्वचिदस्य प्रयोगे प्रत्यक्षवचनन्दर्शयति। **क्मरचीति** ॥ 'सृघस्यदः क्मरच्', इत्यत्र विशिष्य घसेरुपादानात्क्मरचि प्रयोगे प्रमाणमित्यर्थः। **घसतीति** ॥ लुटि तसाद्युपलक्षणमिदम्। लिटि अस्य प्रयोगाभावाल्लुट्युदाहरति। **घस्तेति**। **सस्सि** ॥ सः इति छेदः। सः इति षष्ठ्यन्तम्। सि इति सप्तम्यन्तम् आर्धधातुकविशेषणम्। तदादिविधिः। 'अच उपसर्गात्तः' इत्यतः त इत्यनुवर्तते। अकार उच्चारणार्थः। तदाह। **सस्य तः स्यादिति** ॥ आदेशे अकारस्य उच्चारणार्थत्वात्तकारः

२३४३ । पुषादिद्युताद्ऌदितः परस्मैपदेषु । (३-१-५५)

इयन्विकरणपुषादेर्द्युतादेर्ऌदितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु । अघसत् । 'जर्ज ७१६ चर्च ७१७ झर्झ ७१८ परिभाषणहिंसातर्जनेषु' । 'पिसृ ७१९ पेसृ ७२० गतौ' । पिपिसतुः । पिपेसतुः । 'हसे ७२१ हसने' । एदिस्वान्न वृद्धिः । अहसीत् । 'णिश ७२२ समाधौ' तालव्योष्मान्तः । प्रणेशति । 'मिश ७५३ मश ७२४ शब्दे रोषकृते च' । तालव्योष्मान्तौ । 'शव ७२५ गतौ' दन्त्योष्ठ्यान्तस्तालव्योष्मादिः । शवति । अशवीत्—अशावीत् । 'शश ७२६ प्लुतगतौ' । तालव्योष्याद्यन्तः । शशाश । शेशतुः । शेशुः । शेशिथ । 'शसु ७२७ हिंसायाम्' । दन्त्योष्मान्तः । 'न शसदद—' (सू २२६३) इत्येत्त्वं न । शशसतुः । शशसुः । शशसिथ । 'शंसु ७२८ स्तुतौ' । अयं दुर्गनावपीति दुर्गः । 'नृशंसो घातुकः क्रूरः' इत्यमरः । शशंस । आशिषि नलोपः शस्यात् । 'चह ७२९ परिकल्कने' । कल्कनं शाठ्यम् । अचहीत् । 'मह ७३० पूजायाम्' । अमहीत् । 'रह ७३१ त्यागे' । 'रहि ७३२ गतौ' । रंहति । रंह्यात् । 'दृह ७३३ दृहि ७३४ बृह ७३५ बृहि ७३६ वृद्धौ' । दर्हति । ददर्ह । दृहतुः । दृंहति । बर्हति । बृंहति । 'बृहि' शब्दे च । 'बृंहितं करिगर्जितम्' इत्यमरः । 'बृहिर्' इत्येके ।

स्यादित्यर्थः । लुङि च्लेः सिचि प्राप्ते । **पुषादि** ॥ 'च्लेः सिच्' इत्यतः च्लेरिति 'अस्यतिवक्तिख्यातिभ्यः' इत्यतः अँडिति चानुवर्तते । पुषादिद्युदादिलादित एषां समाहारद्वन्द्वात्पञ्चमी । तत्र पुषधातुस्तु भ्वादौ क्रयादौ चुरादौ दिवादौ चास्ति । तत्र यदि भ्वादिकः पुषादिगणो गृह्येत । तर्हि द्युतादिग्रहणमनर्थकं स्यात् । पुषादिगणोत्तरमेवात्र द्युतादिगणपाठात् । नापि क्रयाद्यन्तर्गणः । 'मुष स्तेये' 'खच भूतप्रादुर्भावे' 'हेठ च' 'ग्रह उपादाने' इति च त्वार एव पठ्यन्ते । यदि त एवात्र पुषादयो विवक्षितास्युः तर्हि लाघवात् लृदित एव ते क्रियेरन् । नाप्यत्र चौरादिकपुषादिर्गृह्यते । णिचा च्लेर्व्यवहितत्वात् । अतः परिशेषात् दिवादय एव गृह्यन्ते । तदाह । **इयन्विकरणेति** । **जर्ज चर्च झर्झेति** ॥ एतेषां चवर्गीयान्तेष्वेव पाठ उचितः । **हसे हसन इति** ॥ एदिदयम् । **न वृद्धिरिति** ॥ ह्रयन्तेत्यनेनेति शेषः । **णिश समाधाविति** ॥ णोपदेशत्वादुपसर्गादसमासेऽपीति नस्य णत्वम् । तदाह । **प्रणेशतीति** ॥ 'शसु हिंसायाम्' इत्यतः प्राक् शकारान्ताः । शवतिस्तु वान्तः । **शंस्विति** ॥ नो विकृतानुस्वारस्य निर्देशः । **'चह परिकल्कने'** इत्यारभ्य अर्हतिपर्यन्ता हकारान्ताः । **रह त्यागे इति** ॥ नायमिदित् । **रहि गताविति** ॥ अय-

अबृहत्—अबर्हीत्। तुहिर् ७३७ दुहिर् ७३८ उहिर् ७३९ अर्दने। तोहति। तुतोह। अतुहत्-अतोहीत्। दोहति। अदुहत्। अदोहीत्। अनिट्कारिकास्वस्य दुहेर्ग्रहणं नेच्छन्ति। ओहति। उवोह। ऊहतुः। ओहिता। मा भवानुहत्। औहीत्। अर्ह ७४० पूजायाम्। आनर्ह।

अथ कृपूपर्यन्ता अनुदात्तेतः। 'द्युत ७४१ दीप्तौ'। द्योतते।

२३४४। द्युतिस्वाप्योः सम्प्रसारणम्। (७-४-६७)

अनयोरभ्यासस्य सम्प्रसारणं स्यात्। दिद्युते। दिद्युताते। द्योतिता।

२३४५। द्युद्भ्यो लुङि। (१-३-९१)

द्युतादिभ्यो लुङः परस्मैपदं वा स्यात्। पुषादिसूत्रेण परस्मैपदे अङ्। अद्युतत्—अद्योतिष्ट। श्विता ७४२ वर्णे। श्वेतते। शिश्विते। अश्वितत्—अश्वेतिष्ट। ञि मिदा ७४३ स्नेहने। मेदते।

२३४६। मिदेर्गुणः। (७-३-८२)

मिदित्। **दृहदहीति** ॥ ऋदुपधा एते। द्वितीयचतुर्थाविदितौ। **अबृहत्। अबर्हीदिति** ॥ इरित्त्वादङ्विकल्प इति भावः। **उवोहेति** ॥ उहिर्धातोर्लिटि द्वित्वे हलादिशेषे पुगन्तलक्षणे गुणे 'अभ्यासस्यासवर्णे' इत्युवङ्। **मा भवानुहदिति** ॥ इरित्त्वादङि रूपम्। **औहीदिति** ॥ अङभावपक्षे च्लेस्सिचि तस्य इटि 'अस्तिसिचः' इति तकारस्य ईटि 'इट ईटि' इति सिचो लोपे 'आडजादीनाम्' इति आटि वृद्धिः। माङ्योगे तु मा भवानुहीत्। **आनर्हेति** ॥ 'अत आदेः' इति दीर्घे नुट्। **कृपूपर्यन्ता अनुदात्तेत इति** ॥ द्युतेरारभ्य कृपूपर्यन्ता इत्यर्थः। **द्युतिस्वाप्योः। अभ्यासस्येति** ॥ 'अत्र लोपोऽभ्यासस्य' इत्यतः तदनुवृत्तेरिति भावः। **दिद्युते इति** ॥ द्वित्वे 'हलादिः शेषः' इत्यनेन यकारस्य लोपे प्राप्ते तदपवादत्वेन 'द्युतिस्वाप्योः' इति सम्प्रसारणे, 'सम्प्रसारणाच्च' इति उकारस्य पूर्वरूपे रूपम्। **द्युद्भ्यो लुङि** ॥ बहुवचनात् द्युतादिभ्य इति गम्यते। दिग्योगे पञ्चमी। 'तस्मादित्युत्तरस्य' इति परिभाषया परस्येत्युपतिष्ठते। 'शेषात्कर्तरि' इत्यतः परस्मैपदमित्यनुवर्तते। तदाह—**द्युतादिभ्यः इति। परस्मैपदे अङिति** ॥ आत्मनेपदपक्षे सिजेव नत्वङ्। पुषादिसूत्रे परस्मैपदग्रहणादिति भावः। तदाह। **अद्योतिष्टेति। श्विता वर्णे इति** ॥ श्वेतवर्णकरणे श्वेतीभवने वेत्यर्थः। **अश्वितदिति।** द्युतादित्वादङ्। अश्वेतिष्टेत्यात्मनेपदपक्षे रूपम्। एवमग्रेऽपि। द्युतादौ लुङि रूपभेदो ज्ञेयः। **ञि मिदा स्नेहने इति** ॥ ञिरित् 'ञीतः क्तः' इत्येतदर्थः। **मिमिदे** इत्यत्र लिटः असंयोगादिति कित्त्वेऽपि गुणं शङ्कितुमाह। **मिदेर्गुणः** ॥ मिदेरित्यवयवषष्ठी। गुणश्रुत्या 'इको गुणवृद्धी' इति परिभाषया इक इत्युपतिष्ठते। 'ष्ठिवुक्लमुचमां शिति' इत्यतः

मिदेरिको गुणः स्यादित्संज्ञकशकारादौ। एशः आदिशित्त्वाभावान्नानेन गुणः। मिमिदे। अमिदत्—अमेदिष्ट। 'ञि ष्विदा ७४४ स्नेहनमोचनयोः'। मोहनयोः' इत्येके। स्वेदते। सिष्विदे। अस्विदत्—अस्वेदिष्ट। ञि क्ष्विदा च'। इत्येके। अक्ष्विदत्—अक्ष्वेदिष्ट। 'रुच ७४५ दीप्तावभिप्रीतौ च'। रोचते सूर्यः। 'हरये रोचते भक्तिः'। अरुचत्—अरोचिष्ट। घुट ७४६ परिवर्तने। घोटते। जुघुटे। अघुटत्—अघोटिष्ट। रुट ७४७ लुट ७४८ लुठ ७४९ प्रतिघाते। अरुटत्—अरोटिष्ट। शुभ ७५० दीप्तौ। क्षुभ ७५१ सञ्चलने। णभ ७५२ तुभ ७५३ हिंसायाम्। आद्योऽभावे च। 'नभन्तामन्यके समे'। 'मा भूवन्नन्यके सर्वे' इति निरुक्तम्। अनभत्—अनभिष्ट। अतुभत्—अतोभिष्ट। इमौ दिवादी क्रयादी च। स्रंसु ७५४ ध्वंसु ७५५ भ्रंसु ७५६ अवस्रंसने। 'ध्वंसु गतौ च। अङि न लोपः। अस्रसत्—असंसिष्ट। 'नास्रसत्करिणां ग्रैवम्' इति रघुवंशे। 'भ्रंशु' इत्यपि केचित्पेठुः। अत्र तृतीय एव तालव्यान्त इत्यन्ये। 'भ्रशु भ्रंशु अधःपतने' इति दिवादौ। स्रम्भु ६५७

शीत्यनुवर्तते। श्चासाविच्चेति कर्मधारयः। तेन च अधिकृताङ्गाक्षिप्तः प्रत्ययो विशेष्यते। तदादिविधिः। इत्संज्ञकशकारादौ प्रत्यये परे इति लभ्यते। तदाह। **मिदेरित्यादिना**॥ दैवादिकमिदेः श्यनि मेद्यते इत्याद्युदाहरणम्। श् इत् यस्येति बहुव्रीहिमाश्रित्य शिति प्रत्यये परे मिदेरिकोगुण इत्येव कृतो न व्याख्यायत इत्याशङ्क्य मिमिदे इत्यत्र गुणाभावार्थमित्संज्ञकशकारादाविति व्याख्येयमित्यभिप्रेत्याह। **एशः आदिशित्त्वाभावादिति। ञि ष्विदेति**॥ षोपदेशोऽयम्। अनिट्सु स्विद्येति श्यन्विकरणस्यैव ग्रहणादयं सेट्। **रुच दीप्तावभिप्रीतौ चेति**॥ अभिप्रीतिः प्रीतिविषयीभवनम्। दीप्तौ उदाहरति। **रोचते सूर्यः इति**॥ प्रकाशत इत्यर्थः। अभिप्रीतौ उदाहरति। **हरये रोचते भक्तिरिति**॥ भक्तिः हर्य्याश्रितप्रीतिविषयो भवतीत्यर्थः। 'रुच्यर्थानाम्' इति सम्प्रदानत्वाच्चतुर्थी। **क्षुभ सञ्चलने इति**॥ क्षोभते क्षुभ्यतीति दिवादौ। क्षुभ्नातीति क्रयादौ। णभधातुः णोपदेशः। नभते। **आद्योऽभावे चेति**॥ चात्सञ्चलनेऽपि। तत्र अभावार्थकस्य प्रयोगन्दर्शयति। **नभन्तामन्यके समे इति**॥ मन्त्रोऽयम्। नन्वत्र मन्त्रे णभेर्हिंसार्थकत्वमेव कुतो न स्यादित्यत आह। **मा भूवन्नन्यके सर्वे इति**॥ नभन्तामित्यस्य विवरणं मा भूवन्निति। न भवन्तीत्यर्थः। समे इत्यस्य विवरणं सर्वे इति। **निरुक्तमिति**॥ वेदव्याख्यानात्मको यास्कप्रणीतो ग्रन्थविशेषो निरुक्तम्। **स्रंसुध्वंसुभ्रंसु इति**॥ त्रयो नोपधाः कृतानुस्वारनिर्देशाः। **ध्वंसु गतौ चेति**॥ चादवस्रंसनेऽपि। **अस्रसदिति**॥ द्युतादित्वात्परस्मैपदे अङि नलोप इति भावः। **नास्रसदिति**॥ नास्रंसदित्यपपाठः। नचास्रंसदिति लङो

विश्वासे। अस्रभत्–अस्रम्भिष्ट। दन्त्यादिरयम्। तालव्यादिस्तु प्रमादे गतः। वृतु ७५८ वर्तने। वर्तते। ववृते।

२३४७। वृङ्ग्यः स्यसनोः। (१-३-९२)

वृतादिभ्यः परस्मैपदं वा स्यात्स्ये सनि च।

२३४८। न वृङ्ग्यश्चतुर्भ्यः। (७-१-५९)

एभ्यः सकारादेरार्धधातुकस्येण्न स्यात्तङानयोरभावे। वर्त्स्यति। वर्तिष्यते। अवृतत्। अवर्तिष्ट। अवर्त्स्यत्। अवर्तिष्यत। वृधु ७५९ वृद्धौ। शृधु ७६० शब्दकुत्सायाम्। इमौ वृतुवत्। स्यन्दू ७६१ प्रस्रवणे। स्यन्दते। सस्यन्दे। सस्यन्दिषे–सस्यन्त्से। सस्यन्दिध्वे–सस्यन्द्ध्वे। स्यन्दिता-स्यन्ता।

रूपमिति भ्रमितव्यम्। तत्र परस्मैपदासम्भवात्। सम्भुधातुरकारमध्यः। **वृतु वर्तने इति**॥ उदित् ऋदुपधः सेट्कः। **वर्तते इति**॥ शपि गुणे रपरत्वम्। **ववृते इति**॥ असंयोगादिति कित्त्वाद्गुणाभावे द्वित्वे उरदत्त्वे रपरत्वे हलादिशेषे रूपम्। लुटि वर्तिता। **वृङ्ग्यः**॥ बहुवचनाद्वृतादिभ्य इति गम्यते। शेषात्कर्तरीत्यतः परस्मैपदमित्यनुवर्तते। तदाह। **वृतादिभ्य इति। न वृङ्ग्यः**॥ सेऽसिचीति सूत्रात् से इति आर्धधातुकस्येडिति चानुवर्तते। तदाह। **एभ्यः सकारादेरिति। तङानयोरभावे इति**॥ गमेरिडित्यतः परस्मैपदेष्वित्यनुवृत्तम्। तेन च तङानयोरभावो लक्ष्यते। व्याख्यानादिति भावः। तेन जिगमिषिता इत्यत्र गमेस्तृचि इट् सिध्यति। वृतेस्सन्नन्तात् हेर्लुकि विवृत्सेत्यत्र इण्निषेधश्च सिध्यति। **वर्त्स्यतीति**॥ लृटि स्यः। 'वृङ्ग्यः स्यसनोः' इति परस्मैपदविकल्पः। 'न वृङ्ग्यः' इति इण्निषेधः। गुणः रपरत्वं चर्त्वम्। परस्मैपदाभावेत्वाह। **वर्तिष्यते इति**॥ तङानयोरभावे इत्युक्तेः न वृङ्ग्य इति इण्निषेधो न। **अवर्तिष्टेति**॥ परस्मैपदस्य अङश्चाभावे रूपम्। **अवर्त्स्यदिति**॥ लृङि स्यः। 'वृङ्ग्यः स्यसनोः' इति परस्मैपदम्। 'न वृङ्ग्यः' इति इण्निषेधः। गुणः। रपरत्वमिति भावः। **अवर्तिष्यतेति**॥ परस्मैपदस्याभावे न वृङ्ग्य इति इण्निषेधोऽपि नेति भावः। वृधु शृधु इति द्वौ ऋदुपधौ। तत्रापि 'युङ्ग्यो लुङि' इति परस्मैपदपक्षे द्युतादिलक्षणः अङ्। लृट्लृङोः 'वृङ्ग्यः स्यसनोः' इति परस्मैपदपक्षे 'न वृङ्ग्यः' इति इण्निषेधश्च। तदाह। **इमौ वृतुवदिति**॥ वर्त्स्यति। वर्धिष्यते। अवृधत्। अवर्धिष्ट। अवर्त्स्यत्। अवर्धिष्यत। शर्त्स्यति। शर्धिष्यते। अशृधत्। अशर्धिष्ट। अशर्त्स्यत्। अशर्धिष्यत। स्यन्दूधातुः ऊदित् नकारोपधः कृतानुस्वारपरसवर्णनिर्देशः। **सस्यन्दिषे, सस्यन्त्से इति**॥ इडभावे दस्य चर्त्वेन तः। **सस्यन्दिद्ध्वे, सस्यन्द्ध्वे इति**॥ इडभावे धकारात् प्राक् दकारः। खर्परकत्वाभावान्नचर्त्वम्। **स्यन्दिता, स्यन्तेति**॥ इडभावे दस्य चर्त्वम्। ननु लृटि स्ये सति 'वृङ्ग्यः स्यसनोः' इति परस्मैपदपक्षे परत्वादूदिल्लक्षणमिड्विकल्पम्बाधित्वा 'न वृङ्ग्यश्चतुर्भ्यः' इति

'वृद्भ्यः स्यसनोः' (सू २३४७) इति परस्मैपदे कृते ऊदिल्लक्षणमन्तरङ्गमपि विकल्पं बाधित्वा चतुर्ग्रहणसामर्थ्यात् 'न वृद्भ्यः—' (सू २३४८) इति निषेधः। स्यन्त्स्यति—स्यन्दिष्यते—स्यन्त्स्यते। स्यन्दिषीष्ट—स्यन्त्सीष्ट। 'द्युद्भ्यो लुङि' (सू २३४५) इति परस्मैपदपक्षे अङ्। नलोपः। अस्यदत्। अस्यन्दिष्ट—अस्यन्त। अस्यन्त्साताम्। अस्यन्त्सत। अस्यन्त्स्यत्। अस्यन्दिष्यत—अस्यन्त्स्यत।

२३४९। अनुविपर्याभिनिभ्यः स्यन्दतेरप्राणिषु। (८-३-७२)

एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा स्यात्। अनुष्यन्दते—अनुस्यन्दते वा जलम्। 'अप्राणिषु' किम्। अनुस्यन्दते हस्ती। 'अप्राणिषु'

इण्निषेधे स्यन्त्स्यतीत्येव रूपमिष्यते। नतु स्यन्दिष्यत इति। तदयुक्तम्—अन्तरङ्गतया ऊदिल्लक्षणस्यैव इड्विकल्पस्य उचितत्वात् सकारादिविशेषापेक्षतया तङानाभावनिमित्तापेक्षतया च 'न वृद्भ्यः' इति निषेधस्य बहिरङ्गत्वादित्याशङ्क्य निराकरोति। **वृद्भ्य इति**। 'वृद्भ्यस्स्यसनोः' इति परस्मैपदे कृते अन्तरङ्गमपि विकल्पं बाधित्वा न वृद्भ्य इति निषेध इत्यन्वयः कुत इत्यत आह। **चतुर्ग्रहणसामर्थ्यादिति**॥ यदित्यत्र ऊदिल्लक्षण इड्विकल्प एव स्यात् नतु 'न वृद्भ्यश्चतुर्भ्यः' इति निषेधः तर्हि चतुर्भ्यः इति व्यर्थं स्यात्। नच कृपूव्यावृत्तिस्तत्फलमिति शङ्क्यम्। 'तासि च क्लृप' इति चकारेण सकारायार्धधातुकेऽपि नित्यमिण्निषेधप्रवृत्तेर्वक्ष्यमाणत्वात्। भाष्ये तु 'निषेधाश्च बलीयांसः' इति न्यायेन अन्तरङ्गस्यापि ऊदिल्लक्षणेड्विकल्पस्य 'न वृद्भ्यः' इति निषेधेन बाधसिद्धेश्चतुर्ग्रहणं प्रत्याख्यातम्। तथा च लृटि परस्मैपदपक्षे ऊदिल्लक्षणमिड्विकल्पं बाधित्वा 'न वृद्भ्यः' इति नित्यमिण्निषेधे स्यन्त्स्यतीत्येकमेव रूपमिति स्थितम्। आत्मनेपदपक्षे तु ऊदित्त्वादिड्विकल्पं मत्वा आह। **स्यन्दिष्यते, स्यन्त्स्यते इति**॥ इडभावे दस्य चर्त्वम्। आशीर्लिङि सीयुटि ऊदित्त्वादिड्विकल्पं मत्वा आह। **स्यन्दिषीष्ट, स्यन्त्सीष्टेति**॥ 'न वृद्भ्य' इति निषेधस्तु न। तङानयोरभाव एव तत्प्रवृत्तेरिति भावः। लुङि विशेषमाह। **द्युद्भ्यो लुङीत्यादिना। अङिति**॥ द्युतादिलक्षण इति शेषः। **नलोप इति**॥ अनिदितामित्यनेनेति शेषः। आत्मनेपदपक्षे तु अङभावादूदिल्लक्षणमिड्विकल्पं मत्वा आह। **अस्यन्दिष्ट, अस्यन्तेति**॥ तत्र इडभावपक्षे अस्यन्द् स् त इतिस्थिते 'झलो झलि' इति सलोपे दस्य चर्त्वम्। नचापित्त्वेन ङित्त्वात् 'अनिदिताम्' इति नलोपः शङ्क्यः। सिज्लोपस्यासिद्धत्वेनानुपधात्वादिति भावः। **अस्यन्त्साताम्। अस्यन्त्सतेति**॥ अस्यन्थाः। अस्यन्त्साथाम्। अस्यन्द्ध्वम्। अस्यन्त्स। अस्यन्त्स्वहि। अस्यन्त्स्महि। अस्यन्त्स्यत्। अस्यन्त्स्यत। अस्यन्दिष्यत। **अनुविपर्याभिनि। एभ्य इति**॥ अनु परि अभि नि वि इत्येतेभ्य इत्यर्थः। **सस्येति**॥ 'सहेः साढस्सः' इत्यतः स इति षष्ठ्यन्तस्यानुवृत्तेरिति भावः। **षो वा स्यादिति**॥ 'अपदान्तस्य मूर्धन्यः' इत्यधिकारादिति भावः। ननु मत्स्योदके अनुष्यन्देते इत्यत्र कथं षत्वं प्राणिकर्तृकत्वस्यापि सत्त्वादित्यत

इति पर्युदासात् 'मत्स्योदकं अनुष्यन्देते' इत्यत्रापि पक्षे षत्वं भवत्येव। 'प्राणिषु न' इत्युक्तौ तु न स्यात्। कृपू ७६२ सामर्थ्ये।

२३५०। कृपो रो लः। (८-२-१८)

कृप उः रः लः इति छेदः। 'कृप इति लुप्तषष्ठीकम्। तच्चावर्तते। कृपो यो रेफस्तस्य लः स्यात्। कृपेर्ऋकारस्यावयवो यो रो रेफसदृशस्तस्य च लकारसदृशः स्यात्। कल्पते। चक्लृपे। चक्लृपिषे—चक्लृप्से। इत्यादि स्यन्दिवत्।

२३५१। लुटि च क्लृपः। (१-३-८३)

आह। **अप्राणिष्विति। पर्युदासादिति**॥ प्राणिकर्तृकस्य नेति न प्रतिषेधः येनात्र प्राणिकर्तृकत्वस्यापि सत्त्वात् षत्वं न स्यात्। किन्तु प्राणिभिन्नकर्तृकस्येति पर्युदास आश्रीयते। एवञ्च प्राण्यप्राणिकर्तृकस्यापि अप्राणिकर्तृकत्वानपायादिह षत्वं निर्बाधमिति भावः। **कृपू सामर्थ्ये इति**॥ सामर्थ्यङ्कार्यक्षमीभवनम्। ऊदित्त्वाद्वेट्कोऽयम्। ऋदुपधः। तङि प्रथमपुरुषैकवचनस्य टेरेत्वे शपि लघूपधगुणे रपरत्वे कर्पते इति स्थिते। **कृपो रो लः**॥ कृप इति लुप्तविभक्तिकम्। षष्ठ्येकवचने उः इति ऋकारस्य रूपम्। अवयवषष्ठी। कृप उरिति स्थिते आद्गुणे कृपोरिति भवति। रः इति षष्ठ्यन्तम्। कृपोर् रः इति स्थिते 'रो रि' इति रेफलोपे कृपोरः इति भवति। लः इति प्रथमान्तम्। अकार उच्चारणार्थः। तदाह। **कृप उः रः लः इति छेदः इति**॥ एतच्च ऋलृक्सूत्रभाष्ये स्थितम्। ननु कृपेत्यत्र का विभक्तिर्लुप्तेत्यत आह। **कृप इति लुप्तषष्ठीकमिति**॥ पकारादकार उच्चारणार्थः। कृप्धातोरिति लभ्यते। **तच्चावर्तते इति**॥ कृपः रः लः इति पदत्रयमावर्तते इत्यर्थः। तथाच। वाक्यद्वयं सम्पद्यते। कृपः रः लः इत्येकं वाक्यम्। तदाह। **कृपो यो रेफस्तस्य लः स्यादिति**॥ तथाच कल्पते इति भवति। कृपः उः रः लः इति द्वितीयं वाक्यम्। तत्र कृपेत्यवयवषष्ठ्यन्तम्। उरित्यत्रान्वेति। उरित्यवयवषष्ठ्यन्तं रेफे अन्वेति। तथाच कृप्धातोरवयवः यः ऋकारः। तस्य यो रेफः तस्य लकारस्स्यादिति लभ्यते। तत्र ऋकारावयवत्वं रेफस्य न सम्भवतीति रेफशब्दो रेफसदृशे ऋकारांशे लाक्षणिकः। ल इत्यपि लकारसदृशे लृकारांशे लाक्षणिकः। तदाह। **कृपेर्ऋकारस्यावयव इत्यादिना**॥ एवञ्च लिटि चकृप् ए इति स्थिते कित्त्वाद्गुणाभावे ऋकारैकदेशस्य रेफसदृशस्य लकारसदृशे सति चक्लृपे इति रूपम्। कृपः रः लः इति छेदमभ्युपगम्य कृपधातोः रेफस्य लकार इति व्याख्याने तु चक्लृपे इति न सिध्येत्। तदर्थमावृत्तिराश्रितेत्यभिप्रेत्याह। **कल्पते। चक्लृपे इति**॥ ऊदित्त्वादिट्त्विकल्पं मत्वा आह। **चक्लृपिषे, चक्लृप्से इति। स्यन्दिवदिति**॥ चक्लृपाथे चक्लृपिध्वे चक्लृप्ध्वे। चक्लृपे चक्लृपिवहे चक्लृप्वहे चक्लृपिमहे चक्लृप्महे। **लुटि च क्लृपः**॥ चकारात् 'वृञ्यः स्यसनोः' इत्यतः स्यसनोरित्यनुकृष्यते। 'शेषात्कर्तरि'

लुटि स्यसनोश्च क्लृपेः परस्मैपदं वा स्यात् ।

२३५२ । तासि च क्लृपः । (७-२-३०)

क्लृपेः परस्य तासेः सकारादेरार्धधातुकस्य चेण्न स्यात्तङानयोरभावे कल्प्तासि । कल्प्तास्थ । कल्पितासे । कल्प्तासे । कल्प्स्यति । कल्पिष्यते । कल्प्स्यते । कल्पिषीष्ट—क्लृप्सीष्ट । अक्लृपत् । अकल्पिष्ट—अक्लृप्त । अकल्प्स्यत् । अकल्पिष्यत—अकल्प्स्यत । वृत् । वृत्तः सम्पूर्णो द्युतादिर्वृतादिश्चेत्यर्थः ।

अथ त्वरत्यन्तास्त्रयोदशानुदात्तेतः षितश्च । घट ७६३ चेष्टायाम् । घटते । जघटे । 'घटादयो मितः' इति वक्ष्यमाणेन मित्संज्ञा । तत्फलन्तु णौ 'मितां ह्रस्वः' (सू १५६८) इति 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (सू २७६२)

इत्यतः परस्मैपदमिति । 'वा क्यषः' इत्यतो वेति च । तदाह । **लुटि स्यसनोरित्यादिना** ॥ **तासि च** ॥ चकारात्सकारादार्धधातुकं गृह्यते । 'सेऽसिचि कृत' इत्यतः से इति 'आर्धधातुकस्य' इत्यतः आर्धधातुकस्येडिति चानुवर्त्तते । 'न वृद्भ्यश्चतुर्भ्यः' इत्यतो नेति च । गमेरिडित्यतः परस्मैपदमिति च । तदाह । **क्लृपेः परस्येत्यादिना । कल्प्तासीति** ॥ 'लुटि च क्लृपः' इति परस्मैपदपक्षे ऊदिङ्लक्षणमिड्विकल्पम्बाधित्वा 'तासि च क्लृप' इति इण्निषेधे गुणे रपरत्वे लत्वे रूपम् । परस्मैपदाभावपक्षे तु ऊदिङ्लक्षणमिड्विकल्प मत्वा आह । **कल्पितासे, कल्प्तासे इति** ॥ लुटि तु 'लुटि च क्लृपः' इति परस्मैपदपक्षे ऊदिङ्लक्षणमिड्विकल्पम्बाधित्वा 'तासि च क्लृपः' इति इण्निषेधं मत्वा आह । **कल्प्स्यतीति** ॥ परस्मैपदाभावे तु ऊदित्त्वादिड्विकल्पं मत्वा आह । **कल्पिष्यते इति** ॥ कल्पताम् । अकल्पत । कल्पेत । आशीर्लिङि ऊदिङ्लक्षणमिड्विकल्पं मत्वा आह । **कल्पिषीष्टेति । कल्प्सीष्टेति च** ॥ इडभावे 'लिङ्सिचावात्मनेपदेषु' इति कित्त्वान्न गुणः । **अक्लृपदिति** ॥ 'वृद्भ्यो लुङि' इति परस्मैपदपक्षे द्युतादिलक्षणे अङि सति डित्त्वान्न गुणः । अङभावे तु ऊदिङ्लक्षणमिड्विकल्पं मत्वा आह । **अकल्पिष्टेति, अक्लृप्तेति च । अकल्प्स्यदिति** ॥ लुङि स्ये 'लुटि च क्लृपः' इति परस्मैपदपक्षे ऊदिङ्लक्षणमिड्विकल्पं बाधित्वा 'तासि च क्लृपः' इति इण्निषेध इति भावः । परस्मैपदाभावपक्षे तु ऊदिङ्लक्षणमिड्विकल्पं मत्वा आह । **अकल्पिष्यत, अकल्प्स्यतेति । वृदिति** ॥ वृतेः समाप्त्यर्थकात् कर्तरि क्विप् । तदाह । **वृत्तः इति** ॥ 'गत्यर्थाकर्मक' इति कर्तरि क्तः । वृत्तशब्दस्य विवरणं **सम्पूर्णः इति** ॥ द्युतादयः कृपूपर्यन्ता अनुदात्तेतो गताः । **अथ त्वरत्यन्ताः इति** ॥ 'ञि त्वरा सम्भ्रमे' इत्यन्ता इत्यर्थः । **षितश्चेति** ॥ षित्संज्ञका इत्यर्थः । षित्कार्यभाज इति वा । 'ञि त्वरा सम्भ्रमे' इत्युक्ता 'घटादयः षित' इति वक्ष्यमाणत्वादिति भावः । षितफलन्तु स्त्रियामित्यधिकारे 'षिद्भिदादिभ्यः' इत्यङ् । घटा व्यथा, इत्यादि रूपम् । **घटते इति** ॥ चेष्टते इत्यर्थः । **तत्फलन्त्विति** ॥ मित्त्वफलन्तु 'मितां ह्रस्वः' इति णौ ह्रस्वः । 'चिण्णमुलोर्दीर्घः' इति दीर्घश्च वक्ष्यते । धातुपाठे अर्थनिर्देशः उपलक्षणमि-

इति च वक्ष्यते। घटयति। विघटयति। कथं तर्हि 'कमलवनोद्घाटनं कुर्वते ये' 'प्रविघाटयिता समुत्पतन्हरिदश्वः कमलाकरानिव' इत्यादि। शृणु। 'घट सङ्घाते' इति चौरादिकस्येदम्। न च तस्यैवार्थविशेषे मित्त्वार्थमनुवादोऽयमिति वाच्यम्। 'नान्ये मितोऽहेतौ' इति निषेधात्। अहेतौ स्वार्थे णिचि ज्ञपादिपञ्चकव्यतिरिक्ताश्चुरादयो मितो नेत्यर्थः। व्यथ ७६४ भयसञ्चलनयोः। व्यथते।

त्युक्तम्। ततश्चार्थान्तरवृत्तेरपि घटधातोर्घटादिकार्यम्भवत्येव। तदाह। **घटयति। विघटयतीति॥** संश्लेषयति विश्लेषयतीत्यर्थः। णौ ह्रस्वोदाहरणमिदम्। अघटि अघाटीति, चिण्युदाहरणम्। घाटं घाटम्। घटं घटमिति ण्यन्ताण्णमुलि दीर्घविकल्पस्योदाहरणम्। 'नित्यवीप्सयोः' इति द्विर्वचनम्। ननु यद्यर्थान्तरवृत्तेरपि घट धातोर्मित्त्वन्तदा उद्घाटनं प्रविघाटयितेत्यत्र विकसनार्थकस्यापि घट धातोर्णौ मित्त्वाद्ध्रस्वः स्यादित्याक्षिपति। **कथन्तर्हीति। शृण्विति॥** समाधानमिति शेषः। **चौरादिकस्येति॥** चुरादौ 'घट सङ्घाते' इति पठितम्। तदिदङ्घाटादिकात् घटधातोर्धात्वन्तरमेव। तस्य णौ मित्त्वाभावात्। ह्रस्वाभावे उद्घाटनं प्रविघाटयितेति निर्बाधमेव। अर्थनिर्देशस्योपलक्षणतया सङ्घातादन्यत्र विकसनेऽपि चौरादिकस्य वृत्तिसम्भवादिति भावः। ननु घटादिगणादन्यत्र अर्थान्तरे पठितानान्धातूनामिह घटादिगणे पाठः घटादिगणनिर्दिष्ट एवार्थे मित्त्वार्थोऽनुवाद एव नतु धातुभेदः। अन्यथा घटादिकत्वं गणान्तरस्थत्वं चादाय मित्त्वतदभावयोर्विकल्पापत्तेः। ये तु धातवो घटादिगण एव पूर्वं पठिताः नतु गणान्तरे तेषान्त्वर्थान्तरवृत्तावपि मित्त्वमिति धातुवृत्त्यादिग्रन्थेषु सिद्धान्तः। घटधातुस्तु घट सङ्घाते इति चुरादौ पठितः। अतस्तस्यैवात्र गणे चेष्टायामर्थे मित्त्वार्थोऽनुवाद इति लब्धम्। एवञ्च विघटयति इत्यादावर्थान्तरवृत्तौ ण्यन्तस्य मित्त्वमित्याशङ्क्य निराकरोति। **नचेति॥** तस्यैव चौरादिकस्यैव घटधातोः चेष्टात्मके अर्थविशेषे वृत्तौ मित्त्वार्थोऽनुवादः स्यादिति न वाच्यमित्यर्थः। कुत इत्यत आह। **नान्ये मितोऽहेताविति॥** चुराद्यन्तर्गणसूत्रमिदम्। तत्र हि 'ज्ञप मित्च' 'यम च परिवेषणे' 'चह परिकल्कने' 'रह त्यागे' 'बल प्राणने'। 'चिञ् चयने' इति पञ्च धातून् पठित्वा 'नाऽन्ये मितोऽहेतौ' इति पठितम्। तत्र चह परिकल्कने इत्यस्य स्थाने चपेति केचित् पठन्ति। तथाच पञ्चत्वस्य न विरोधः। एषु पञ्चस्वपि मिदित्यनुवर्तते। अहेताविति च्छेदः। कस्मादन्ये इत्यपेक्षायां सन्निहितत्वात् ज्ञपादिपञ्चभ्य इति लभ्यते। हेतुशब्देन 'हेतुमति च' इति सूत्रविहितो णिच् लभ्यते। तद्भिन्नो णिच् स्वार्थिकः अहेतुः तदाह। **अहेतौ स्वार्थे णिचीति॥** ज्ञपः आदिर्येषामिति अतद्गुणसंविज्ञानो बहुव्रीहिः। ज्ञपधातोस्तदुत्तरेभ्यश्च पञ्चभ्य इत्येवं षड्भ्योऽन्ये ये चुरादयः ते मितो नेति फलितम्। एवञ्च चुरादौ ज्ञपादिपञ्चकव्यतिरिक्तानां मित्त्वाभावात् 'घट चेष्टायाम्' इति निर्देशश्चौरादिकस्य 'घट सङ्घाते' इत्यस्य चेष्टायां वृत्तौ मित्त्वार्थोऽनुवाद इति न युज्यते।

२३५३ । व्यथो लिटि । (७-३-६८)

व्यथोऽभ्यासस्य सम्प्रसारणं स्याल्लिटि । हलादिशेषापवादः । थस्य हलादिशेषेण निवृत्तिः । विव्यथे । प्रथ ७६५ प्रख्याने । पप्रथे । प्रस ७६६ विस्तारे । पप्रसे । मृद ७६७ मर्दने । स्वद ७३८ स्वदने । स्वदनं स्विद्रावणम् । क्षजि ७३९ गतिदानयोः । मित्त्वसामर्थ्यादनुपधात्वेऽपि 'चिण्णमुलोः–' (सू २७६२) इति दीर्घविकल्पः । अक्षक्षि–अक्षाक्षि । क्षक्षं क्षक्षम् । क्षाक्षं क्षाक्षम् । दक्ष ७७० गतिहिंसनयोः । योऽयं वृद्धिशैघ्र्ययोरनुदात्तेत्सु पठितस्तस्येहार्थविशेषे मित्त्वार्थोऽनुवादः । ऋप ७७१ कृपायां गतौ च । कदि ७७२ क्रदि ७७३ क्लदि ७७४ वैक्लव्ये । 'वैकल्ये इत्येके । 'त्रयोऽप्यनिदितः' इति नन्दी । 'इदितः' इति स्वामी । 'कदि क्रदी' इदितौ 'क्रद क्लद' इति चानिदिताविति मैत्रेयः । 'कदि क्रदि क्लदीनामाह्वानरोदनयोः' परस्मैपदिषूक्तानां

किन्तु इहैव घटादिगणे 'घट चेष्टायाम्' इत्यपूर्वोऽयन्धातुः तस्य चार्थान्तरवृत्तावपि मित्त्वमस्त्येवेति विघटयतीत्यादौ मित्त्वाद्ह्रस्वो निर्बाधः । व्यथधातुर्द्वितीयान्तः । **व्यथो लिटि** ॥ 'अत्र लोपः' इत्यतः अभ्यासस्येति 'द्युतिस्वाप्योः' इत्यतः सम्प्रसारणमिति चानुवर्तते । तदाह **व्यथोऽभ्यासस्येत्यादिना । हलादिशेषापवाद इति** ॥ व्यथ् व्यथ् ए इति स्थिते हलादिशेषलभ्यं यकारस्य लोपम्बाधित्वा सम्प्रसारणमित्यर्थः । तथाच यकारस्य इकारे पूर्वरूपे विव्यथे इति रूपम् । वकारस्य तु न सम्प्रसारणम् । 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधात् । ननु सम्प्रसारणेन हलादिशेषबाधे थकारस्यापि निवृत्तिर्नस्यादित्यत आह । **थस्येति** ॥ यकारलोपस्य बाधं विना सम्प्रसारणस्य प्रवृत्त्यनुपपत्तेस्तेन तद्बाधेऽपि थकारलोपस्य बाधे प्रमाणाभावादिति भावः । **मृद मर्दने इति** ॥ ऋदुपधोऽयम् । मर्दते । ममृदे । क्षजिधातुरिदित् । क्षजते । चक्षजे । ननु घटादिगणे अस्य पाठो व्यर्थः । क्षज्यतीत्यत्र णौ नुमि कृते अकारस्यानुपधात्वे उपधादीर्घस्याप्रसक्त्या 'मितां ह्रस्वः' इत्यस्याप्रवृत्तावपि विशेषाभावात् अनुपधात्वेन 'मितां ह्रस्वः' इत्यस्य प्रसक्त्यभावाच्च । अतएव अक्षक्षि क्षक्षंक्षक्षमित्यत्रापि 'चिण्णमुलोः' इति दीर्घविकल्पस्यापि न प्रसक्तिरित्यत आह । **मित्त्वसामर्थ्यादिति । दक्ष गतीति** ॥ ननु 'दक्ष वृद्धौ शीघ्रार्थे च' इत्यनुदात्तेत्सु पाठादेव सिद्धे किमर्थमिह पाठः । अर्थनिर्देशस्योपलक्षणत्वादेव गति हिंसार्थकत्वस्यापि सम्भवादित्यत आह । **वृद्धिशैघ्र्ययोरिति** ॥ मित्त्वसामर्थ्यादनुपधात्वेऽपि चिण्णमुलोर्दीर्घविकल्पः । अदक्षि अदाक्षि । दक्षन्दक्षम् । दाक्षन्दाक्षम् । **ऋप कृपायाङ्गताविति** ॥ अदुपधोऽयम् । कृपायां गतौ वेत्यर्थः । कदि क्रदि क्लदेति नान्दिमते । क्षीरस्वामिमते च त्रय एव धातवः । मैत्रेयमते चत्वार इति बोध्यम् । तत्र इदितान्त्रयाणां

पुनरिह पाठो मित्त्वार्थ आत्मनेपदार्थश्च। त्रि त्वरा ७७५ सम्भ्रमे। 'घटादयः षितः' (ग सू १८६)। षित्त्वादङ् कृत्सु वक्ष्यते।

अथ फणान्ताः परस्मैपदिनः। ज्वर ७७६ रोगे। ज्वरति। जज्वार। गड ७७७ सेचने। गडति। जगाड। हेड ७७८ वेष्टने। 'हेडृ अनादरे' इत्यात्मनेपदिषु गतः। स एवोत्सृष्टानुबन्धोऽनूद्यते अर्थविशेषे मित्त्वार्थम्। परस्मैपदिभ्यो ज्वरादिभ्यः प्रागेवानुवादे कर्तव्ये तन्मद्ध्येऽनुवादसामर्थ्यात्परस्मैपदम्। हेडति। जिहेड। हिडयति। अहिडि—अहीडि। अनादरे तु हेडयति। वट ७७९ भट ७८० परिभाषणे। 'वट वेष्टने' 'भट भृतौ' इति पठितयोः परिभाषणे मित्त्वार्थोऽनुवादः। णट ७८१ नृत्तौ। इत्थमेव पूर्वमपि पठितम्। तत्रायं विवेकः। पूर्वं पठितस्य नाट्यमर्थः। यत्कारिषु नटव्यपदेशः।

पौनरुक्त्यं परिहरति। **कदि क्रदि क्लदीनामित्यादिना। त्रि त्वरेति॥** त्रिरित्। 'क्तेः क्तः' इति प्रयोजनम्। आदित्वन्तु 'आदितश्च' इति निष्ठायामिण्निषेधार्थम्। वस्तुतस्तु आदित्त्वं व्यर्थम्। ह्रस्वेऽप्यात्मनेपदसिद्धेः 'रुग्यमत्वरसंघुषास्वनाम्' इति निष्ठायामिड्विकल्पसिद्धेश्च। **घटादयः षित इति॥** त्वरत्यन्ता इति शेषः। गणसूत्रमिदम्। तत्प्रयोजनमाह। **षित्त्वादिति। वक्ष्यते इति॥** 'षिद्भिदादिभ्योऽङ्' इत्यनेनेति शेषः। घटादिषु त्रयोदशानुदात्तेतो गताः। 'वृत दीप्तौ' इत्यतः प्राक् घटादिसमाप्तिरिति वक्ष्यते। **अथ फणान्ता इति॥** फण गताविल्येतत्पर्यन्ता इत्यर्थः। **ज्वर रोगे इति॥** णौ ज्वरयति। चिणि तु अज्वरि अज्वारि। णमुलि तु ज्वरं ज्वरम्, ज्वारं ज्वारम्। एवमग्रेऽपि ज्ञेयम्। **हेड वेष्टने इति॥** डकारादकार उच्चारणार्थः। ततश्च 'नाग्लोपिशास्वृदिताम्' इति निषेधो न भवति। **स एवेति॥** हेडृधातुरेव ऋकारानुबन्धमुत्सृज्य वेष्टनरूपे अर्थविशेषे मित्त्वार्थमनूद्यते इत्यर्थः। धात्वन्तरत्वे तु मित्त्वतदभावयोर्विकल्पः स्यादिति भावः। नन्वात्मनेपदिन एवात्रानुवादे परस्मैपदन्न स्यादित्यत आह। **परस्मैपदिभ्य इति॥** यदित्वात्मनेपदमिष्टं तर्हि घटादिषु त्वरत्यन्तेष्वेवानुदात्तेत्सु पठ्येतेति भावः। **हेडतीति॥** वेष्टते इत्यर्थः। **हिडयतीति॥** वेष्टयतीत्यर्थः। 'हेतुमति' इति णिचि 'मितां ह्रस्वः' इति ह्रस्व इति भावः। **अहिडि अहीडीति॥** 'चिण्णमुलोः' इति दीर्घविकल्पः। **अनादरे तु हेडयतीति॥** वेष्टनरूपार्थ एव मित्त्वान्न ह्रस्व इति भावः। 'वट परिभाषणे' इति नापूर्वो धातुरित्याह। **वट वेष्टने इत्यादि। अनुवाद इति॥** धात्वन्तरत्वे तु मित्त्वतदभावयोर्विकल्पः स्यादिति भावः। 'णट नृत्तौ' इत्यस्य पौनरुक्त्यमाक्षिपति। **इत्थमेव पूर्वमपि पठितमिति॥** टवर्गान्तेष्विति शेषः। तथा च उभयोरप्यर्थैक्येन अर्थविशेषे मित्त्वार्थमिहानूद्यते इति परिहारस्य सम्भवान्नपौनरुक्त्यमिति भावः। परिहर्तुमुपक्षिपति। **तत्रायं विवेक इति॥** तत्र तयोः धात्वोः अयं वक्ष्यमाणः विवेकः अर्थभेदः प्रत्येतव्य इत्यर्थः। **पूर्वम्पठितस्येति॥**

वाक्यार्थाभिनयो नाट्यम् । घटादौ तु नृत्तं नृत्यं चार्थः । यत्कारिषु नर्तक-व्यपदेशः । पदार्थाभिनयो नृत्यम् । गात्रविक्षेपमात्रं नृत्तम् । केचित्तु घटादौ 'णट नतौ' इति पठन्ति । 'गतौ' इत्यन्ये । णोपदेशपर्युदासवाक्ये भाष्यकृता 'नाटि' इति दीर्घपाठाद्धटादिर्णोपदेश एव । ष्टक ७८२ प्रतीघाते । स्तकति । चक ७८३ तृप्तौ । तृप्तिप्रतीघातयोः पूर्वं पठितस्य तृप्तिमात्रे मित्त्वार्थोऽनुवादः । आत्मनेपदिषु पठितस्य परस्मैपदिष्वनुवादात्परस्मैपदम् । कस्व ७८४ हसने । एदित्त्वान्न वृद्धिः । अकखीत् । रगे ७८५ शङ्कायाम् । लगे ७८६ सङ्गे । ह्वगे ७८७ ह्वगे ७८८ षगे ७८९ ष्टगे ७९० संवरणे । कगे ७९१ नोच्यते । 'अस्यायमर्थः' इति विशिष्य नोच्यते । क्रियासामान्यार्थवाचित्वात् । अनेकार्थत्वादित्यन्ये । अक ७९२ अग ७९३ कुटिलायां गतौ । कण ७९४ रण ७९५ गतौ । चकाण । रराण । चण ७९६ शण ७९७ श्रण ७९८ दाने च । 'शण गतौ' इत्यन्ये । श्रथ ७९९ क्रथ ८०० क्रथ ८०१ क्लथ

टवर्गान्तेषु पठितस्येत्यर्थः । **यत्कारिष्विति** ॥ यस्य कर्तृषु नटव्यवहारः तन्नाट्यं पूर्व-म्पठितस्य नटधातोरर्थ इत्यर्थः । किन्तन्नाट्यमित्यत आह । **वाक्यार्थेति । घटादौ त्विति** ॥ यस्य कर्तृषु नर्तकव्यपदेशः तत् नृत्यं नृत्तञ्च घटादौ पठितस्य नटेरर्थ इत्यर्थः । नृत्यनृत्तयोः को भेद इत्यत आह । **पदार्थेति** ॥ एवञ्च टवर्गान्तेषु पठितस्य घटादिगतस्य चार्थभेदसत्त्वादर्थविशेषे मित्त्वार्थोऽनुवाद इति युज्यत इति भावः । हेत्व-न्तरत्वे तु मित्त्वतदभावयोर्विकल्पः स्यात् । अथ नटधातोरस्य णोपदेशपर्युदासश्रमं वारयति । **णोपदेशेति** ॥ अनर्दनाटीत्यादिपर्युदासवाक्ये नाटीति णिजलक्षणवृद्धिनिर्देशेन 'नट अवस्प-न्दने' इति चौरादिकस्यैव ग्रहणादयं णोपदेश एवेत्यर्थः । ष्टकधातुर्णोपदेशः । कृतष्टुत्वस्य निर्देशः । **स्तकतीति** ॥ 'धात्वादेः' इति षस्य सत्वे ष्टुत्वनिवृत्तिः । **चक तृप्तौ । तृप्तीति** ॥ 'चक तृप्तौ प्रतीघाते च' इत्यात्मनेपदिषु पठितस्य तृप्तावर्थे मित्त्वार्थोऽत्रानुवाद इत्यर्थः । एवञ्च धात्वन्तरत्वाभावान्नमित्त्वतदभावविकल्पः । ननु आत्मनेपदिषु पठितस्यानुवादादात्मनेपदं स्यादित्यत आह । **आत्मनेपदेष्विति । षगे ष्टगे इति** ॥ णोपदेशौ । ष्टगे इति कृतष्टुत्वनिर्देशः । **कगे नोच्यते इति** ॥ ननु कगे इत्यनेन यदि किमपि नोच्येत, तर्हि कथमस्य धातुत्वमित्यत आह । **अस्यायमिति** ॥ क्रियाविशेषो नास्यार्थ इति भावः । ननु यदि न कोपि क्रियाविशेषोऽस्यार्थः तर्हि कथमयं धातुरित्यत आह । **क्रियासामान्यार्थवा-चित्वादिति** ॥ धातुपाठपठितस्य क्रियाविशेषार्थकत्वाभावे सति क्रियासामान्यवाचित्वम्परिशे-षलभ्यमिति भावः । **अनेकेति** ॥ कलिः कामधेनुरिति न्यायेन कलधातुवदपरिमितार्थ-कत्वमिति भावः । **'श्रथ क्रथ क्रथ क्लथ' इति** ॥ चत्वारोऽपि द्वितीयान्ताः । आद्यतृतीयौ रेफमध्यौ । द्वितीयो नकारमध्यः । चतुर्थस्तु लकारमध्यः । आद्यस्तु शकारादिः । इतरे

८०२ हिंसार्थाः। 'जासिनिप्रहण—' (सू ६१७) इति सूत्रे क्राथेति मित्त्वेऽपि वृद्धिर्निपात्यते। क्राथयति। मित्त्वन्तु निपातनात्परत्वात् 'चिण्णमुलोः' (सू २७६२) इति दीर्घे चरितार्थम्। अक्रथि–अक्राथि। क्रथं क्रथम्। क्राथं क्राथम्। वन ८०३ च। हिंसायामिति शेषः। वनु च नोच्यते। 'वनु' इत्यपूर्व एवायं धातुर्न तु तानादिकस्यानुवादः। उदित्करणसामर्थ्यात्। तेन क्रियासामान्ये वनतीत्यादि। प्रवनयति। अनुपसृष्टस्य तु मित्त्वविकल्पो वक्ष्यते। ज्वल ८०४ दीप्तौ। णप्रत्ययार्थं पठिष्यमाण एवायं मित्त्वार्थमनूद्यते। प्रज्वलयति। ह्वल ८०५ ह्वाल ८०६ चलने। प्रह्वलयति। प्रह्वालयति।

ककारादयः। ननु क्रथधातोर्घटादित्वेन मित्त्वात् णौ उपधावृद्धिसम्पन्नस्य आकारस्य 'मितां ह्रस्वः' इति ह्रस्वत्वे क्रथयतीति स्यात्, नतु क्राथयतीति। तत्राह। **जासिनीति** ॥ 'जासिनिप्रहणनाटक्राथपिषां हिंसायां' इति षष्ठीविधौ णौ मित्त्वेऽपि क्राथेति वृद्धिर्निपात्यत इत्यर्थः। **नन्वेवं सति** घटादौ क्रथधातोः पाठो व्यर्थ इत्यत आह। **मित्त्वं त्विति** ॥ चिण्णमुलोर्दीर्घपक्षे चरितार्थमित्यन्वयः। ननु तत्रापि क्राथेति निपातनाद्वृद्धिरित्यत आह। **निपातनात्परत्वादिति** ॥ क्राथेति निपातनापेक्षया चिण्णमुलोरित्यस्य परत्वादित्यर्थः। यद्यपि 'मितां ह्रस्वः' इत्यपि परम्। तथापि पुरस्तादपवादन्यायेन क्राथेति वृद्धिनिपातनं 'मितां ह्रस्वः' इत्यस्यैवाव्यवहितस्य बाधकं, नतु चिण्णमुलोरित्यस्यापि। तस्य व्यवहितत्वादिति योज्यम्। **अक्रथि–अक्राथीति** ॥ कथेर्ण्यन्ताच्चिणि दीर्घविकल्पः। **क्रथं क्रथम्। क्राथं क्राथमिति** ॥ णमुलि दीर्घविकल्पः। **वन चेति** ॥ चकारो हिंसानुकर्षकः। तदाह। **हिंसायामितीति। शेष इति** ॥ वन शब्दे, वन सम्भक्ताविति पठितस्य हिंसायां मित्त्वार्थोऽत्रानुवादः। वनति। णौ तु वनयति। णमुलि तु वनं वनम्। वानं वानम्। **वनु च नोच्यते इति** ॥ कर्गे नोच्यते इति वद्व्याख्येयम्। नन्वन्यत्र पठितस्य घटादौ मित्त्वार्थोऽनुवाद इति सिद्धान्तात्तत्रादौ 'वनु याचने' इति पठितस्य अनुदात्ततोऽत्रानुवादात् क्रियासामान्येऽर्थे वनुते इत्यात्मनेपदम् उप्रत्ययश्च स्यादित्यत आह। **अपूर्व एवायमिति। उदित्करणेति** ॥ यदि तानादिकस्यैव अत्रानुवादः स्यात्, तर्हि तनादिगणे वनु इति कृतेन उदित्करणेनैव 'उदितो वा' इत्यादुदित्कार्यस्य सिद्धेरिह गणे पुनरुदित्करणमनर्थकं स्यात्। अतस्तानादिकस्य नात्रानुवादः। किंत्वपूर्व एवायं वनुधातुः। तथा च वनतीति परस्मैपदं शब्विकरणश्चेत्याह। **तेन क्रियासामान्ये वनतीत्यादीति** ॥ आदिना वनतः वनन्तीत्यादिसङ्ग्रहः। **प्रवनयतीति** ॥ घटादिकस्य क्रियासामान्यवाचिनो णिचि मित्त्वाद्ह्रस्वः। **वक्ष्यते इति** ॥ 'ग्लास्लावनुवमाञ्च' इत्यनेनेति शेषः। तानादिकात्तु वनु याचने इत्यस्माण्णिचि उपधादीर्घे वानयतीत्येव भवति। **ज्वल दीप्तौ। णप्रत्ययार्थमिति** ॥ 'ज्वलितिकसन्तेभ्यो णः' इति णप्रत्ययार्थञ्ज्वलादिगणे पठिष्यमाणस्य इह मित्त्वार्थोऽनुवाद इत्यर्थः। ज्वलतीत्यादि सिद्धवत्कृत्य मित्त्वस्य णौ ह्रस्वम्प्रयोजनमाह। **प्रज्वलयति इति** ॥ धात्वन्तरत्वे तु मित्त्वतदभावयोर्विकल्पः स्यादिति

स्मृ ८०७ आद्ध्याने । चिन्तायां पठिष्यमाणस्य आद्ध्याने मित्त्वार्थोऽनुवादः । आद्ध्यानमुत्कण्ठापूर्वकं स्मरणम् । दृ ८०८ भये । 'दृ विदारणे' इति क्र्यादेरयं मित्त्वार्थोऽनुवादः । दृणन्तं प्रेरयति दरयति । भयादन्यत्र दारयति । धात्वन्तरमेवेदमिति मते तु दरतीत्यादि । केचिद्भटादौ 'अत्स्मृदृत्वर—'(सू २५६६) इति सूत्रे च 'दृ' इति दीर्घस्थाने ह्रस्वं पठन्ति । तन्नेति माधवः । नृ ८०९ नये । क्र्यादिषु पठिष्यमाणस्यानुवादः । नयादन्यत्र नारयति । श्रा ८१० पाके । श्रै इति कृतात्वस्य श्रा इत्यादादिकस्य च सामान्येनानुकरणम् । 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य' (प ९१) लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्'

बोध्यम् । **स्मृ आद्ध्याने । चिन्तायामिति** ॥ स्मृ चिन्तायामिति पठिष्यमाणस्य आद्ध्याने मित्त्वार्थोऽनुवाद इत्यर्थः । चिन्तायां आद्ध्यानमन्यदिति दर्शयितुमाह । **आद्ध्यानमुत्कण्ठेति । दृ भये इति** ॥ अस्य दृणातीति रूपं नतु शप् । तदाह । **क्र्यादेरयं मित्त्वार्थोऽनुवाद इति** ॥ भयेऽर्थे मित्त्वार्थमिति शेषः । अर्थनिर्देशस्य उपलक्षणत्वात् भये वृत्तिः । तथाच क्र्यादित्वात् श्नाविकरण एवायमिति भावः । मित्त्वप्रयोजनन्दर्शयति । **दृणन्तम्प्रेरयति दरयतीति** ॥ भीषयतीत्यर्थः । **भयादन्यत्र दारयतीति** ॥ भेदयतीत्यर्थः । **धात्वन्तरमेवेति** ॥ नतु क्र्यादेरनुवाद इत्यर्थः । अस्मिन्मते भौवादिकत्वात् शबेवेत्याह । **दरतीत्यादीति । सूत्रे चेति** ॥ 'अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्' इति अत्वविधावित्यर्थः । **ह्रस्वम्पठन्तीति** ॥ तन्मते क्र्यादेरनुवादप्रसक्तिरेव नास्तीति भावः । **तन्नेतीति** ॥ यदि ह्ययङ्भटादौ ह्रस्वान्तः क्र्यादौ तु दीर्घान्तो भवेत् तर्हि 'शृदृप्रां ह्रस्वो वा' इत्यत्र दृग्रहणमनर्थकं स्यात् । ह्रस्वदीर्घान्तधातुभ्यामेव तत्फलसिद्धेरिति भावः । **नृ नये इति** ॥ नयः नयनम् । **क्र्यादिष्विति** ॥ नृ नये इत्येव क्र्यादिषु पठ्यते । तत्रार्थनिर्देशो न विवक्षितः । क्र्यादिषु पठिष्यमाणस्य नृधातोर्नयादन्यत्र विद्यमानस्य नयेऽर्थे मित्त्वार्थोऽनुवाद इत्यर्थः । तथाच श्नाविकरण एवायम । नृणातेर्धात्वन्तरत्वाभावान्नमित्त्वतदभावौ । अपि तु नित्यमेव मित्त्वम् । **श्रा पाके इति** ॥ नन्वत्र भ्वादौ पठ्यमानाच्छ्रायतेः, उत्तरत्र अदादौ पठिष्यमाणाच्च श्रातेरन्य एव यदि कथन स्वतन्त्रो धातुर्भटादौ निर्दिश्येत तदा प्रकृते लटि शपि श्रातीति रूपसम्पत्त्या लुग्विकरणस्थेन श्रापाके इत्यनेन पौनरुक्त्यमित्यत आह । **श्रै इतीति** ॥ अग्रे भ्वादिगणे श्रै पाके इति पठिष्यते । तस्य कृतात्वस्यानुकरणमित्यन्वयः । तथाच तस्यैव श्रैधातोरनेकार्थकतया पाके वृत्तस्य मित्त्वार्थोऽत्रानुवादात् । शपि श्रायतीत्यादि रूपम् । एतच्च 'श्रृतम्पाके' इति सूत्रे भाष्यकैयटयोः स्थितम् । एवञ्च सति सम्भवे अन्यत्र पठितानामिह मित्त्वार्थोऽनुवाद इति सिद्धान्तादग्रे भ्वादौ श्रै पाके इत्यस्य पौनरुक्त्यं न शङ्क्यम् । नन्वेवं सति 'श्रै पाके' इत्येवात्र कुतो न पठितमित्यत आह । **श्रा इत्यादादिकस्य चेति** ॥ ननु लाक्षणिकत्वात् 'श्रै पाके' इति भौवादिकस्य कृतात्वस्याप्यनुवाद इति न युज्यते इत्यत आह । **लुग्विकरणेत्यादि । परि-**

(प ११४) इति परिभाषाभ्याम्। श्रपयति विक्लेदयतीत्यर्थः। पाकादन्यत्र श्रापयति। स्वेदयतीत्यर्थः। मारणतोषणनिशामनेषु ज्ञा ८११। 'निशामनं' चाक्षुषज्ञानम्' इति माधवः। ज्ञापनमात्रम् इत्यन्ये। 'निशानेषु' इति पाठान्तरम्। निशानं तीक्ष्णीकरणम्। एष्वेवार्थेषु जानातिर्मित्। 'ज्ञप मिच्च' इति चुरादौ। ज्ञापनं मारणादिकं च तस्यार्थः। कथं 'विज्ञापना भर्तृषु सिद्धिमेति' इति 'तज्ज्ञापयत्याचार्यः' इति च। शृणु। माधवमते अचाक्षुषज्ञाने मित्त्वाभावात्। ज्ञापनमात्रे मित्त्वमिति मते तु 'ज्ञा नियोगे' इति चौरादिकस्य। धातूनामनेकार्थत्वात्।

भाषाभ्यामित्यन्तम् ॥ परिभाषाभ्यामुभयोरनुकरणमित्यन्वयः। **श्रपयतीति** ॥ श्रै धातोर्णौचि 'आदेच उपदेशे' इत्यात्वे 'अर्तिह्री' इति पुकि भितां ह्रस्वः। श्रा धातोस्तु स्वत एवाऽऽदन्तत्वाण्णौचि पुकि ह्रस्वः। **पाकादन्यत्रेति** ॥ अर्थनिर्देशस्योपलक्षणत्वादिति भावः 'स्वरति सूति सूयति' इति सूत्रे सू इति पठितेऽपि द्वयोर्ग्रहणे सिद्धे सूतिसूयत्योः पृथग्ग्रहणं 'लुग्विकरण' इति परिभाषां ज्ञापयतीत्याहुः। प्रतिपदोक्तपरिभाषा तु न्यायसिद्धेत्युक्तमेव। **मारणेति** ॥ मारणे तोषणे निशामने च ज्ञा धातुर्वर्तत इत्यर्थः। अक्षतस्य मारणे सम्पूर्वकस्यैव ज्ञाधातोः प्रयोगः। **चाक्षुषज्ञानमिति** ॥ निपूर्वकात् 'शम आलोचने' इत्यस्मात् चौरादिकण्यन्तात् ल्युटि निशामनशब्दस्य निष्पत्तेरिति भावः। **ज्ञापनमात्रमिति** ॥ उपसर्गवशादिह ज्ञापने वृत्तिः। चाक्षुषत्वञ्च ज्ञानस्य न विवक्षितमिति भावः। **निशानेष्वितीति** ॥ 'मारणतोषणनिशानेषु ज्ञा' इति पाठान्तरमित्यर्थः। ननु ज्ञाधातोरस्माल्लडादौ शपि 'ज्ञाजनोर्जा' इति जादेशे जाति जातः इत्यादि स्यादित्यत आह। **एष्वेवेति** ॥ ज्ञा अवबोधने इति श्नाविकरणस्यैव मारणादिष्वर्थेषु णौ मित्त्वार्थमिहानुवादात् श्नाविकरण एवायमिति भावः। जानातेः मित्त्वफलन्तु णौ ह्रस्वः। पशुं संज्ञपयति अक्षत मारयतीत्यर्थः। हरिं ज्ञपयति। सन्तोषयतीत्यर्थः। रूपं ज्ञपयति माधवमते दर्शयतीत्यर्थः। मतान्तरे तु बोधयतीत्यर्थः। शरं ज्ञपयति तीक्ष्णीकरोतीत्यर्थः। ननु माधवमते बोधयतीत्यर्थे ज्ञपयतीति कथं मित्त्वम्। तन्मते चाक्षुषज्ञानस्यैव निशामनशब्दार्थत्वादित्यत आह। **ज्ञप मिच्चेति चुरादाविति** ॥ एवञ्च चौरादिकं ज्ञाधातुमादाय बोधनेऽप्यर्थे ज्ञपयतीति ह्रस्वस्सङ्गच्छते इति भावः। ननु चौरादिकस्यापि ज्ञपेर्मारणतोषणनिशामनेष्वेवार्थेषु मित्त्वमस्तु। तत्रार्थान्तरनिर्देशाभावात्। तथाच माधवमते कथं बोधनेऽर्थे मित्त्वामित्यत आह। **ज्ञापनं मारणादिकञ्च तस्यार्थ इति** ॥ ज्ञापनं मारणं तोषणं निशामनञ्च तस्य चौरादिकस्य ज्ञपधातोरर्थो माधवमते इत्यर्थः। **कथमिति** ॥ ज्ञाधातोर्ज्ञपधातोश्च णौ मित्त्वाह्रस्वप्रसङ्गादिति भावः। **शृण्विति** ॥ उत्तरमिति शेषः। **मित्त्वाभावादिति** ॥ ह्रस्वो नेति शेषः। विज्ञापनेत्यत्र तत् ज्ञापयतीत्यत्र च अचाक्षुषमेवाऽऽत्मज्ञानं विवक्षितमिति भावः। ननु ज्ञापनमात्रे मित्त्वमिति मते विज्ञापनेत्यत्र तत् ज्ञापयतीत्यत्र च मित्त्वं दुर्वारमित्यत आह। **ज्ञापनमात्रे इति। चौरादिकस्येति** ॥

निशानेष्विति पठतां हरदत्तादीनां मते तु न काप्यनुपपत्तिः। कम्पने चलिः ८१२। चल कम्पने इति ज्वलादिः। चलयति शाखाम्। कम्पनादन्यत्र तु शीलं चालयति। अन्यथा करोतीत्यर्थः। 'हरतीत्यर्थः' इति स्वामी। सूत्रं चालयति। क्षिपतीत्यर्थः। छदिर् ८१३ ऊर्जने। 'छद अपवारणे' इति चौरादिकस्य स्वार्थे णिजभावे मित्त्वार्थोऽयमनुवादः। अनेकार्थत्वादूर्जेरर्थे वृत्तिः। छदन्तं प्रयुङ्क्ते छदयति। बलवन्तं प्राणवन्तं वा करोतीत्यर्थः। अन्यत्र छादयति। अपवारयन्तं प्रयुङ्क्ते इत्यर्थः। स्वार्थे णिचि तु छादयति। बलीभवति प्राणीभवति अपवारयति वेत्यर्थः। जिह्वोन्मथने लडिः ८१४। 'लड विलासे' इति पठितस्य मित्त्वार्थोऽनुवादः। उन्मथनं क्षोभणम्। जिह्वाशब्देन षष्ठीतत्पुरुषः। लडयति जिह्वाम्।

विज्ञापनेति, ज्ञापयतीति च रूपमिति शेषः। 'नान्ये मितोऽहेतौ' इति निषेधान्न तस्य मित्त्वमिति भावः। ननु नियोगार्थस्य तस्य कथं ज्ञापने वृत्तिरित्यत आह। **धातूनामिति। न कापीति॥** विज्ञापनेत्यत्र ज्ञापयतीत्यत्र च ज्ञापनार्थवृत्तित्वात् ज्ञापनस्य च मारणतोषणतीक्ष्णीकरणान्यत्वान्न तस्मिन्नर्थे ज्ञाधातोर्मित्त्वप्रसक्तिरिति भावः। एवञ्च माधवमते बोधने ज्ञाधातोः ज्ञापयतीत्युपधादीर्घः। ज्ञपधातोस्तु ज्ञपयतीत्युपधाह्रस्व इति रूपद्वयमपि साध्विति स्थितम्। **कम्पने चलिरिति॥** इका निर्देशोऽयम्। 'चलधातुः कम्पने' मिदित्यर्थः। **ज्वलादिरिति॥** तस्य चलेः कम्पने मित्त्वार्थोऽत्रानुवाद इति भावः। **शीलञ्चालयतीति॥** अत्र कम्पनार्थकत्वाभावान्न मित्त्वमिति भावः। तदाह। **अन्यथा करोतीत्यर्थ इति॥** धातूनामनेकार्थत्वादिति भावः। **छदिर् ऊर्जने इति॥** इका निर्देशोऽयम् 'छद धातुरूर्जने' मिदित्यर्थः। ऊर्जनं बलवत्करणं प्राणनं वा। ऊर्ज बलप्राणनयोरित्युक्तेः। अन्यत्र पठितस्यात्रार्थविशेषे णौ मित्त्वार्थोऽनुवाद इति सिद्धान्तः। छदधातुस्त्वयञ्चुरादावन्तर्गणे युजादौ पठितः। तस्यात्रानुवादो व्यर्थः। नान्ये मितोऽहेताविति ज्ञपादिपञ्चकव्यतिरिक्तस्य चुरादौ मित्त्वनिषेधादित्यत आह। **छद अपवारणे इति॥** चुरादन्तर्गणयुजादिपठितस्य 'आ धृषाद्वा' इति स्वार्थिकणिजभावपक्षे ऊर्जनेऽर्थे मित्त्वार्थोऽनुवाद इत्यर्थः। स्वार्थिकणिचि सत्येव नान्ये मित इति निषेधप्रवृत्तेरिति भावः। नन्वपवारणार्थकस्य छदेः कथमूर्जने वृत्तिरित्यत आह। **अनेकार्थत्वादिति॥** ननु स्वार्थणिजभावे सति मित्त्वाङ्गमर्थमित्यत आह। **छदन्तं प्रयुङ्क्ते छदयतीति॥** अत्र हेतुमण्णिचि ह्रस्वः। नान्ये मित इति निषेधस्य हेतुमाण्णिचि निषेधः स्यादिति भावः। **अन्यत्रेति॥** ऊर्जनादन्यत्र अपवारणे इत्यर्थः। **स्वार्थे णिचि त्विति॥** 'नान्ये मितः' इति निषेधस्य तत्र प्रवृत्तेरिति भावः। **जिह्वोन्मथने लडिरिति॥** इका निर्देशोऽयम्। लडधातुर्जिह्वोन्मथने मिदित्यर्थः। **लडेति॥** 'लड विलासे' इति टवर्गान्तेषु भ्वादौ पठितस्य जिह्वोन्मथनेऽर्थे मित्त्वार्थोऽनुवाद इत्यर्थः। एवञ्च धातुभेदाभावात् सर्वथैव मित्त्वकार्यमफलति। गणभेदाद्धातुभेदे मित्त्वतदभावयोर्विकल्पः स्यादिति भावः। **लडयति**

तृतीयातत्पुरुषो वा। लडयति जिह्वया। अन्ये तु जिह्वाशब्देन तद्व्यापारो लक्ष्यते। समाहारद्वन्द्वोऽयम्। लडयति शत्रुम्। लडयति दधि। अन्यत्र लाडयति पुत्रम्। मदी ८१५ हर्षग्लेपनयोः। ग्लेपनं दैन्यम्। दैवादिकस्य मित्त्वार्थोऽयमनुवादः। मदयति हर्षयति ग्लेपयति वेत्यर्थः। अन्यत्र मादयति चित्तविकारमुत्पादयतीत्यर्थः। ध्वन ८१६ शब्दे। भाव्ययं मित्त्वार्थमनूद्यते। ध्वनयति घण्टाम्। अन्यत्र ध्वानयति। अस्पष्टाक्षरमुच्चारयतीत्यर्थः। अत्र भोजः 'दलिवलिस्खलिरणिध्वनित्रपिक्षपयश्च' इति पपाठ। तत्र 'ध्वनिरणी' उदाहृतौ। 'दल विशरणे'। 'वल संवरणे' 'स्खल सञ्चलने' 'त्रपूष् लज्जायाम्' इति गताः। तेषां णौ दलयति। वलयति। स्खलयति। त्रपयति। 'क्षौ क्षये' इति वक्ष्यमाणस्य कृतात्वस्य पुका निर्देशः। क्षपयति। स्वन ८१७ अवतंसने। शब्दे इति पठिष्यमाणस्यानुवादः। स्वनयति। अन्यत्र स्वानयति। 'घटादयो

जिह्वामिति॥ रसनां रसान् ज्ञापयतीत्यर्थः। 'गतिबुद्धि' इति द्विकर्मकोऽयम्। **लडयति जिह्वयेति**॥ देवदत्तो रसान् जानाति तज्जिह्वया ज्ञापयतीत्यर्थः। **तद्व्यापार इति**॥ शब्दप्रयोगादिजिह्वाव्यापार इत्यर्थः। **समाहारेति**॥ जिह्वाच उन्मथनञ्चेति समाहारद्वन्द्वः। जिह्वाव्यापारे उदाहरति। **लडयति शत्रुमिति**॥ गेहे शूर इत्यादिशब्दप्रयोगेण गर्हत इत्यर्थः। उन्मथनं लोडनं इत्यभिप्रेत्योदाहरति। **लडयति दधीति**॥ विलोडयतीत्यर्थः। **अन्यत्रेति**॥ जिह्वोन्मथनादन्यत्रेत्यर्थः। **लाडयति पुत्रमिति**॥ क्रीडयतीत्यर्थः। **ग्लेपनन्दैन्यमिति**॥ दीनीभवनमित्यर्थः। ननु लडादौ शपि मदतीत्यादि स्यादित्यत आह। **दैवादिकस्येति**॥ तथाच श्यन्विकरण एवायमिति भावः। **ध्वन शब्दे इति**॥ पूर्वमनुनासिकान्तेषु अणरणेत्यत्र ध्वणधातुर्मूर्धन्यान्तः पठितः। अयन्तु दन्त्यान्त इति भेदः। **भावीति**॥ ज्वलादौ 'ध्वन शब्दे' इति पठिष्यमाण एवात्र ध्वन्यात्मके अनुच्चारणजन्ये शब्दने मित्त्वार्थमनूद्यते इत्यर्थः। धातुभेदे तु मित्त्वतदभावौ स्याताामिति भावः। **ध्वनयति घण्टामिति**॥ शब्दायमानाङ्करोतीत्यर्थः। **अन्यत्रेति**॥ अस्पष्टोच्चारणात्मके शब्दने इत्यर्थः। **अत्रेति**॥ घटादाविल्यर्थः। **तत्रेति**॥ दलिवल्यादिष्विल्यर्थः। **उदाहृताविति**॥ घटादाविति शेषः। तत्र ध्वनिरनुपदमेवोदाहृतः। कणिस्तु कणरणगताविल्यत्रेति बोध्यम्। भोजमते प्रागनयोः पाठो नेति न पौनरुक्त्यम्। **गता इति**॥ भ्वादौ पठिता इत्यर्थः। इह मित्त्वार्थमनूद्यन्त इति शेषः। धात्वन्तरत्वे मित्त्वतदभावौ स्याताामिति भावः। ननु क्षपेरत्र पाठान्मित्त्वे णौ ह्रस्वे क्षपयतीति वक्ष्यति। अस्त्वेवम्। तथापि क्षै क्षये इति भ्वादौ पठिष्यमाणस्य णौ आत्वे पुकि क्षापयतीत्यपि स्यात्। क्षै धातोः क्षपीत्यनुवादासम्भवात्। तत्राह। **क्षै इत्यादि**॥ णौ आत्वे पुकि मित्त्वाद्ह्रस्वे सति क्षपीति क्षै इत्यस्यानुवादसम्भव इति भावः। **स्वन अवतंसने इति**॥ अवतंसनं अलङ्कृतिः। **पठिष्यमाणस्येति**॥ घटादिगणादूर्ध्वं स्वनशब्दे

मितः' (ग सू १८७) मित्संज्ञका इत्यर्थः । 'जनीजृष्क्नसुरञ्जोऽमन्ताश्च' (ग सू १८८) 'मितः' इत्यनुवर्तते । 'जृष्' इति षित्त्वनिर्देशाज्जीर्यतेर्ग्रहणम् । जृणातेस्तु जारयति । केचित्तु 'जनी जृ ष्णसु—' इति पठित्वा 'ष्णसु निरसने' इति दैवादिकमुदाहरन्ति । 'ज्वलह्वलह्मलनमामनुपसर्गाद्वा' (ग सू १८९) एषां मित्त्वं वा । प्राप्तविभाषेयम् । ज्वलयति—ज्वालयति । उपसृष्टे तु नित्यं मित्त्वम् । प्रज्वलयति । कथं तर्हि प्रज्वालयति उन्नामयतीति । घञन्तात् 'तत्करोति—' इति णौ । कथं संक्रामयतीति । 'मितां ह्रस्वः' (सू २५६८) इति सूत्रे 'वा चित्तविरागे' (सू २६०५) इत्यतो 'वा' इत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादिति वृत्तिकृत् । एतेन 'रजो विश्रामयन् राज्ञां' 'धुर्यान्विश्रामयेति

इति पठिष्यमाणस्य स्वनेरवतंसनेऽर्थे णौ मित्त्वार्थोऽत्रानुवाद इत्यर्थः । धात्वन्तरत्वे तु मित्त्वतदभावौ स्यातामिति भावः । **स्वनयतीति** ॥ भूषयतीत्यर्थः । **अन्यत्रेति** ॥ अवतंसनादन्यत्र शब्देऽर्थे णौ मित्त्वाभावान्न ह्रस्व इति भावः । **घटादयो मित इति** ॥ गणसूत्रम् । ननु घटादिषु मकारानुबन्धादर्शनात्कथं मितस्ते स्युरित्यत आह । **मित्संज्ञका इति** ॥ मित्कार्यभाज इत्यर्थः । **जनीजृषिति** ॥ गणसूत्रम् । जनी जृष क्नसु रञ्ज् एषान्द्वात्प्रथमाबहुवचनम् । अम् अन्ते येषान्ते अमन्ताः । क्रमिगम्यादयः । एते अघटादित्वेऽपि मित इत्यर्थः । **जीर्यतेरिति** ॥ 'जृष् वयोहानौ' इति श्यन्विकरणस्येत्यर्थः । **जृणातेस्त्विति** ॥ 'जॄ वयोहानौ' इति श्नाविकरणस्य षित्त्वाभावेनात्र ग्रहणाभावान्न मित्त्वमिति भावः । **उदाहरन्तीति** ॥ तन्मते जृणातेरपि मित्त्वमिति भावः । **ज्वलह्वल** ॥ इत्यपि गणसूत्रम् । **प्राप्तविभाषेयमिति** ॥ ज्वलह्वलह्मलाङ्घटादित्वान्नमेर्मान्तत्वाच्च मित्त्वस्य प्राप्तेरिति भावः । **उपसृष्टे त्विति** ॥ सोपसर्गे त्वित्यर्थः । **कथं तर्हीति** ॥ अनुपसर्गादिति विशेषणे सति ज्वलेर्नमेश्च णौ मित्त्वविकल्पाभावाज्जनीजृषिति मित्त्वाद्ध्रस्वो नित्यः स्यादित्याक्षेपः । **समाधत्ते । घञन्तादिति । तत्करोतीति** ॥ णावित्यनन्तरं समाधेयमिति शेषः । प्रज्वलनं प्रज्वालः । उन्नमनम् उन्नामः । भावे घञ् । उपधावृद्धिः । प्रज्वालङ्करोतीति उन्नामङ्करोतीति चार्थे 'तत्करोति तदाचष्टे' इति णिचि 'णाविष्ठवत्' इति इष्ठवत्त्वात् टिलोपे सति तस्य स्थानिवत्त्वात् मित्त्वप्रयुक्तह्रस्वाभावे प्रज्वालि उन्नामि इत्याभ्यां लटि तिपि शपि गुणे अयादेशे प्रज्वालयति उन्नामयतीति रूपे इति भावः । ननु सम्पूर्वात् क्रमेर्णौ सङ्क्रामयतीति रूपमिष्यते । तत्र अमन्तत्वे मित्त्वाद्ध्रस्वप्रसङ्गः । नच क्रमणङ्क्राम इति घञन्तात्तत्करोतीति णावुक्तरीत्या ह्रस्वाभाव इति समाधानं सम्भवति । क्रमेर्घञिहि 'नोदात्तोपदेशस्य' इति वृद्धिप्रतिषेधे सति क्रम इत्येव भवति । ननु काम इति कृत्वा उक्तसमाधानासम्भवादित्यभिप्रेत्याक्षिपति । **कथमिति** ॥ समाधत्ते । **मितामिति** ॥ 'मितां ह्रस्वः' इति सूत्रे वेत्यनुवर्त्य मित्त्वाभावे संक्रामयतीति रूपमित्यन्वयः । ननु कदाचिद्ध्रस्वो दुर्वार इत्यत आह । **व्यवस्थितेति** ॥ तथाचात्र ह्रस्वाभाव एवाश्रीयत इति

स:' इत्यादि व्याख्यातम्। 'ग्लाऱ्लावनुवमां च' (ग सू १९०)। अनुपसर्गादेषां मित्त्वं वा स्यात्। आद्ययोरप्राप्ते इतरयोः प्राप्ते विभाषा। 'न कम्यमिचमाम्' (ग सू १९१)। अमन्तत्वात्प्राप्तं मित्त्वमेषां न स्यात्। कामयते। आमयति। चामयति। शमो ८१८ दर्शने (ग सू १९२)। शाम्यतिर्दर्शने मित्र स्यात्। निशामयति रूपम्। अन्यत्र तु 'प्रणयिनो. निशमय्य वधूकथाः' कथं तर्हि 'निशामय तदुत्पत्तिं विस्तराद्वदतो मम' इति। 'शम आलोचने' इति चौरादिकस्य। धातूनामनेकार्थत्वाच्छ्रवणे वृत्तिः। शाम्यतिवत्। यमो ८१९ उपरिवेषणे (ग सू १९३)। यच्छतिर्भोजनतोऽन्यत्र मित्र स्यात्। आयामयति। द्राघयति, व्यापारयति वेत्यर्थः। परिवेषणे तु यमयति ब्राह्मणान्। भोजय-

---

भावः। **वृत्तिकृदिति** ॥ भाष्ये तु नैतदृश्यत इति भावः। **एतेनेति** ॥ व्यवस्थितविभाषाश्रयणेनेत्यर्थः। 'ग्लाऱ्लावनुवमाञ्च' इत्यपि गणसूत्रम्। प्रथमार्थे षष्ठी। अनुपसर्गादिति मित इति वेति चानुवर्तते। फलितमाह। **अनुपसर्गादिति। आद्ययोरिति** ॥ ग्लाऱ्ला इत्यनयोरघटादित्वादप्राप्ते मित्त्वे इतरयोर्वनुवमोः प्राप्ते मित्त्वे विभाषेत्यर्थः। तत्र 'वनु च नोच्यते' इति घटादौ पाठाद्वमेस्त्वमन्तत्वान्मित्त्वप्राप्तिरिति बोध्यम्। 'न कम्यमिचमाम्' इति शमो दर्शने इति च गणसूत्रम्। दर्शनं चाक्षुषज्ञानम्। 'शम उपशमे' इति दैवादिकः श्यन्विकरण एवात्र गृह्यते। नतु 'शम आलोचने' इति चौरादिकः। नान्ये मितोऽहेताविति तस्य मित्त्वनिषेधात्। तदाह। **शाम्यतिरिति। निशामयति रूपमिति** ॥ पश्यतीत्यर्थः। उपशमार्थकस्यापि अनेकार्थकत्वात् दर्शने वृत्तिः। **अन्यत्रेति** ॥ दर्शनादन्यत्रेत्यर्थः। **निशमय्येति** ॥ श्रावयित्वेत्यर्थः। शमेर्ण्यन्तात् क्त्वो ल्यपि कृते 'ल्यपि लघुपूर्वात्' इति णेरयादेशः। **कथमिति** ॥ तर्हि दर्शनार्थकस्यैव शमेर्मित्त्वनिषेधे सति शृणु इत्यर्थे मित्त्वाद्ध्रस्वप्रसङ्गान्निशामयेति कथमित्याक्षेपः। समाधत्ते। **शम आलोचने इति चौरादिकस्येति** ॥ निशामयेति रूपमिति शेषः। नान्ये मितोऽहेताविति तस्य मित्त्वनिषेधात् नह्रस्व इति भावः। ननु चौरादिकस्य शमेरालोचनार्थकत्वात् कथं श्रवणे वृत्तिरित्यत आह। **धातूनामिति। शाम्यतिवदिति** ॥ श्यन्विकरणस्य शमेरुपशमार्थकस्य यथा दर्शने वृत्तिस्तद्वदित्यर्थः। 'यमोऽपरिवेषणे' इत्यपि गणसूत्रम्। भोजनपात्रे ओदनापूपादिभोज्यद्रव्याणां स्थापनम्परिवेषणम्। तदाह। **भोजनतोऽन्यत्रेति** ॥ भुक्त्यनुकूलपरिवेषणादन्यत्रेत्यर्थः। 'यम उपरमे' इत्यस्य उपसर्गवशात् परिवेषणे ततोऽन्यस्मिन्नप्यर्थे वृत्तिः सम्भवति। तत्र अपरिवेषणे वृत्तौ मित्त्वन्नेत्यर्थः। **आयामयतीति** ॥ अत्रापरिवेषणे वृत्तेर्नमित्त्वमिति भावः। तदाह। **द्राघयतीति** ॥ दीर्घीकरोतीत्यर्थः। **व्यापारयतीति** ॥ प्रवर्तयतीत्यर्थः। **यमयति ब्राह्मणानिति** ॥ परिवेषणार्थकत्वान्मित्त्वमिति भावः। तदाह। **भोजयतीति** ॥ भुञ्जते ब्राह्मणाः तान्परिवेषणेन प्रवर्तयतीत्यर्थः। ननु पर्यवसितं नियमयन्नित्यत्र अपरिवेषणार्थकतया मित्त्वाभावात्कथं

तीत्यर्थः। 'पर्यवसितं नियमयन्' इत्यादि तु नियमवच्छब्दात्तत्करोतीति णौ बोद्ध्यम्। स्खदिर् ८२० अवपरिभ्यां च' (ग सू १९४)। मित्नेत्येव। अवस्खादयति। परिस्खादयति। 'अपावपरिभ्यः' इति न्यासकारः। स्वामी तु 'न कमि–इति नञ्मुत्तरसूत्र्यामननुवर्त्य 'शमः अदर्शने' इति च्छेद। यमस्तु 'अपरिवेषणे' मित्त्वमाह। तन्मते 'पर्यवसितं नियमयन्' इत्यादि सम्यगेव। 'उपसृष्टस्य स्खदेश्चेदवादिपूर्वस्य' इति नियमात्प्रस्खादयतीत्याह। तस्मात्सूत्रद्वये उदाहरणप्रत्युदाहरणयोर्व्यत्यासः फलितः। इदञ्च

ह्रस्व इत्यत आह। **पर्यवसितमित्यादि** ॥ नियमनन्नियमः। 'यमः समुपनिविषु च' इति भावे कप्रत्ययः। तस्मान्मतुप्। नियमवच्छब्दात्तत्करोतीति णिचि 'विन्मतोर्लुक्' इति मतुपो लुकि ण्यन्ताल्लटश्शतरि गुणायादेशयोर्नियमयच्छब्द इति भावः। वस्तुतस्तु मतुपो लुकि टिलोपस्याप्राप्त्या 'अचो ञ्णिति' इति वृद्धौ पुगागमापत्तिः। ततश्च नियमवदित्यर्थकात् अर्श आद्यजन्तात् नियमशब्दात् 'तत्करोति' इति णिचि इष्टवत्त्वाट्टिलोपे तस्य स्थानिवत्त्वादुपधावृद्ध्यभावे नियमयन्निति समर्थनीयमिति शब्देन्दुशेखरे स्थितम्। 'स्खदिरवपरिभ्याञ्च' इत्यपि गणसूत्रम्। स्खदिरिति इका निर्देशः। अव परि आभ्याम्परः स्खदधातुर्मित्नेत्यर्थः। 'स्खद स्खदने' इति घटादौ पाठान्मित्त्वप्राप्तिः। **परिस्खादयतीति** ॥ अषोपदेशत्वेन आदेश सकारत्वाभावान्न ष इति भावः। **अपावेति** ॥ 'स्खदिरपावपरिभ्यः' इति न्यासकारः। पपाठेत्यर्थः। तन्मते अपस्खादयतीत्यत्रापि मित्त्वाभावान्न ह्रस्वः। **स्वामी त्विति** ॥ 'न कम्यमिचमाम्' इत्यत्र श्रुतः नञ् 'शमो दर्शने' 'यमोऽपरिवेषणे' 'स्खदिरवपरिभ्याञ्च' इति त्रिषु सूत्रेषु नानुवर्तते। शमः अदर्शने इति च्छेदः। शमधातुः अदर्शने मित्स्यादित्यर्थः। अमन्तत्वादेव सिद्धे नियमार्थमिदम्। अदर्शन एव शमधातुर्मित्स्यात् नतु दर्शने इति स्वामिमतम्। इदञ्च पर्यवसानगत्या पूर्वमतान्नातिरिच्यते। **यमस्त्विति** ॥ यमधातोस्तु अपरिवेषण एव मित्त्वमाहेत्यर्थः। अमन्तत्वादेव सिद्धेरपरिवेषण एव यमधातुर्मित् नतु परिवेषण इति फलति। एवञ्च व्रीहयति व्यापारयति वेत्यर्थे मित्त्वाद्ह्रस्वे आयमयतीत्येव रूपम्। परिवेषणे तु मित्त्वाभावाद्ह्रस्वाभावे यामयति ब्राह्मणानिति भवतीति पूर्वमताद्विपरीतम्फलति। एवञ्च पर्यवसितन्नियमयन्नित्यत्र यमेरपरिवेषणार्थत्वान्मित्त्वे ह्रस्वो निर्बाधः। तदाह। **तन्मते इति** ॥ स्खदेर्घटादित्वादेव मित्त्वसिद्धेः स्खदिरवपरिभ्याञ्चेति सूत्रमपि नियमार्थम्। सोपसर्गस्य चेत् स्खदेर्मित्त्वं तर्हि अवपरिभ्यां परस्यैव मित्त्वं न तूपसर्गान्तरादिति। एवञ्च प्रस्खादयतीत्यत्र मित्त्वाभावान्न ह्रस्वः। अवस्खदयति परिस्खदयति इत्यत्र तु मित्त्वाद्ह्रस्व इति फलति। तदाह। **उपसृष्टस्येति** ॥ सोपसर्गस्येत्यर्थः। पूर्वमते तु अवपरिभ्याम्परस्य मित्त्वनिषेधादवस्खादयति परिस्खादयतीति न ह्रस्वः। प्रस्खदयतीत्यत्र तु अवपरिपूर्वकत्वाभावेन मित्त्वनिषेधाभावाद्ह्रस्व इति विपरीतम्। **तस्मादिति** ॥ यमोऽपरि-

मतं वृत्तिन्यासादिविरोधादुपेक्ष्यम्। फण ८२१ गतौ। 'न' इति निवृत्तमसम्भवात्। निषेधात्पूर्वमसौ न पठितः। फणादिकार्यानुरोधात्।

२३५४। फणां च सप्तानाम्। (६-४-१२५)

एषां वा एत्त्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च। फेणतुः। फेणुः। पफणतुः। पफणुः। फेणिथ। पफणिथ। फणयति। 'वृत्' घटादिः समाप्तः। फणेः प्रागेव वृदित्येके। तन्मते फाणयतीत्येव। राजृ ८२२ दीप्तौ। 'स्वरितेत्'। राजति—राजते। रेजतुः—रराजतुः। रेजे—रराजे। 'अतः' इत्यनुवृत्तावपि विधानसामर्थ्यादात एत्त्वम्। टु भ्राजृ ८२३ टु भ्राशृ ८२४ टु भ्लाशृ ८२५ दीप्तौ। अनुदात्तेतः। भ्राजतेरिह पाठः फणादिकार्यार्थः। पूर्वं पाठस्तु ब्रश्चा-

---

वेषणे। स्खदिरवपरिभ्याञ्चेति सूत्रद्वये उक्तरीत्या मित्त्वनियमविज्ञाश्रयणादुदाहरणप्रत्युदाहरणयोरुक्तरीत्या व्यत्यासः फलित इत्यर्थः। **उपेक्ष्यमिति**॥ 'न पादमाङ्' इति सूत्रव्याख्यावसरे यमोऽपरिवेषणे इति मित्त्वम्प्रतिषिध्यत इति वृत्तिन्यासयोरुक्तत्वादिति भावः। केचित्तु स्वामिमते पर्यवसितन्नियमयन्नित्यादिसामञ्जस्यात्तावेवोपेक्ष्यावित्याहुः। **फण गतावि**ति॥ ननु घटादित्वेऽपि नायं मित्। इतः प्राक् 'स्वन अवतंसने' इति उत्तरमेव घटादयो मित इत्युक्तेः। तत्राह। **न इति निवृत्तमसम्भवादिति**॥ प्राप्तिं विना मित्त्वस्य निषेधासम्भवादिह नेति नानुवर्तते, किन्तु मिदिल्येवानुवर्तत इत्यर्थः। ननु फण गतावित्यत्र मिन्नेति यदि नानुवर्तते तर्हि 'न कम्यमिचमाम्' इति निषेधकाण्डात् प्रागेवायङ्कृतो न पठितः। तदाह। **निषेधात्पूर्वमसौ न पठित इति**॥ कुत इत्यत आह। **फणादिकार्यानुरोधादिति**॥ निषेधकाण्डात्प्रागेव फणेः पाठे कम्यमिचमीनामपि फणादिष्वन्तर्भावः स्यादिति भावः। **फणाश्च**॥ 'अत एकहल्मध्ये' इत्यतो लिटीति 'थलिच सेटि' इति चानुवर्तते। 'ध्वसोः' इत्यतः एदिति, गमहनेत्यतः कितीति 'वा जृभ्रमुत्रसाम्' इत्यतो वेति च। तदाह। **एषामिति**॥ फणादीनामित्यर्थः। फणामिति बहुवचनात् तदादिलाभः। 'फण गतौ' इत्यत्र मिदिल्येवानुवर्तते नेति तु नानुवर्तते इत्यस्य प्रयोजनमाह। **फणयतीति। वृदिति**॥ कर्तरि क्विबन्तम्। वृतुधातुरिह समाप्त्यर्थकः। तदाह। **घटादिः समाप्त इति। फणेः प्रागेवेति**॥ एवं सति फणेरघटादित्वान्न मित्त्वमिति भावः। तदाह। **तन्मते फणयतीत्येवेति**॥ इति घटादयः। **राजृ दीप्ताविति**॥ इत आरभ्य षण्णामेत्त्वाभ्यासलोपौ फणादित्वात्पक्षे भवतः। तदाह। **रेजतुरित्यादि**॥ ननु 'फणाश्च सप्तानाम्' इत्यत्र अत इत्यनुवृत्तेः कथमिह एत्त्वाभ्यासलोपावित्यत आह। **अत इत्यनुवृत्तावपीति**॥ अत इति नानुवर्तते। तदनुवृत्तावपि फणादिसप्तानामपि वचनसामर्थ्यात् राजृधातोराकारस्याप्येत्त्वाभ्यासलोपस्य विकल्पः स्यादेवेत्यर्थः। अत इति राजादिधातौ न सम्बध्यते, असम्भवादिति यावत्। **टु भ्राजृ टु भ्राशृ टु भ्लाशृ दीप्ताविति**॥ टुरित्। ट्वितोऽथुजित्येतदर्थः। **अनुदात्तेत इति**॥ एते त्रय इति शेषः। ननु टु भ्राजृ इत्येव सिद्धौ पूर्वञ्चवर्गान्तेष्वनुदात्तेत्सु

दिषत्वाभावार्थः । तत्र हि राजिसाहचर्यात्फणादेरेव ग्रहणम् । भ्रेजे—बभ्राजे । 'वा भ्राश—' (२३२१) इति श्यन्वा । भ्राश्यते—भ्राशते । भ्रेशे—बभ्राशे । भ्लाशते भ्लाश्यते । भ्लेशे—बभ्लाशे । द्वावपीमौ तालव्यान्तौ । स्यमु ८२६ स्वन ८२७ ध्वन ८२८ शब्दे । स्यमादयः क्षरत्यन्ताः परस्मैपदिनः । स्येमतुः—सस्यमतुः । अस्यमीत् । स्वेनतुः—सस्वनतुः । सस्वनुः । अस्वनीत्—अस्वानीत् । विष्वणति । अवष्वणति । सशब्दं भुङ्क्त इत्यर्थः । वेश्च स्वनः—' (सू २२७४) इति षत्वम् । फणादयो गताः । दध्वनतुः । षम ७२९ ष्टम ८३० अवैकल्ये । ससाम । तस्ताम । ज्वल ८३१ दीप्तौ 'अतो ल्रान्तस्य' (सू-२३३०) । अज्वालीत् । चल ८३२ कम्पने । जल ८३३ घातने । घातनं तैक्ष्ण्यम् । टल ८३४ ट्वल ८३५ वैक्लव्ये । ष्ठल ८३६ स्थाने । हल ८३७ विलेखने । णल ८३८ गन्धे । 'बन्धने' इत्येके । पल ८३९ गतौ । पलति । बल ८४० प्राणने, धान्यावरोधने च । बलति । बेलतुः । बेलुः । 'पुल ८४१ महत्त्वे । पोलति । कुल ८४२ संस्त्याने बन्धुषु च । संस्त्यानं सङ्घातः । बन्धुशब्देन तद्व्यापारो गृह्यते । कोलति । चुकोल । शल ८४३ हुल ८४४ पल्ल ८४५ गतौ । शशाल । जुहोल । पपात । पेततुः । पतिता ।

२३५५ । पतः पुम् । (७-४-१९)

'एजृ भ्रेजृ भ्राजृ दीप्तौ' इति भ्राजेः पाठो व्यर्थ इत्यत आह । **भ्राजतेरिति । षत्वाभावार्थ इति ॥** व्रश्चभ्रस्जेति षत्वविधौ भ्राजेर्ग्रहणाभावार्थ इत्यर्थः । ननु पूर्वं पठितस्यापि षत्वविधौ कुतो न ग्रहणमित्यत आह । **तत्र हीति ॥** षत्वविधौ हीत्यर्थः । एत्वाभ्यासलोपयोः पाक्षिकत्वादाह । **भ्रेजे बभ्राजे इति । द्वावपीमाविति ॥** द्वितीयतृतीयाविति यर्थः । ननु विष्वणतीत्यत्र कथं षत्वम् । केवलदन्त्याजन्तसादित्वाभावेन अषोपदेशतया आदेशसकारत्वाभावात् । तथा अवष्वणतीत्यत्र इण्कवर्गाभ्याम्परत्वाभावान्न षत्वस्य प्रसक्तिः । सात्पदाद्योरिति निषेधाच्चेत्यत आह । **वेश्च स्वन इतीति ॥** तत्र चकारेण अवाच्चेत्यपि लभ्यत इति भावः । **फणादयो गता इति ॥** ध्वनतेः प्रागिति शेषः । ततश्च ध्वनेर्न फणादिकार्यमिति भावः । तदाह । **दध्वनतुरिति । षम ष्टमेति ॥** षोपदेशौ । **तस्तामेति ॥** सत्वे सति ष्टुत्वनिवृत्तिरिति भावः । **तैक्ष्ण्यमिति ॥** तीक्ष्णीभवनमित्यर्थः । **ट्वल ट्वल वैक्लव्ये इति ॥** वैक्लव्यम्भयादिजनितो व्यग्रीभावः । **णल गन्धे इति ॥** णोपदेशोऽयम् । गन्धः गन्धक्रिया । **तद्व्यापार इति ॥** बन्धुतानुकूलो विवाहादिव्यापार इत्यर्थः । पल्लधातुस्तवर्गप्रथमान्तः सेट्कः । लुङि ल्रदित्वात् च्लेरङि कृते अपत् अ त् इति स्थिते । **पतः पुम् ॥** शेषपूरणेन

अङि परे। अपप्तत्। 'नेर्गद—' (सू २२८५) इति णत्वम्। प्रण्यपप्तत्। कथे ८४६ निष्पाके। कथति। चकाथ। अकथीत्। पथे ८४७ गतौ। अपथीत्। मथे ८४८ विलोडने। मेथतुः। अमथीत्। टु वम् ८४९ उद्गिरणे। इहैव निपातनात् ऋतः इत्त्वमिति सुधाकरः। ववाम। ववमतुः। वादित्वादेत्त्वाभ्यासलोपौ न। भागवृत्तौ तु वेमतुरित्याद्युदाहृतम्। तद्भाष्यादौ न दृष्टम्। भ्रमु ८५० चलने। 'वा भ्राश—' (सू २६२१) इति श्यन्वा भ्रम्यति। भ्रमति। भ्राम्यति इति तु दिवादौ वक्ष्यते।

२३५६ वा जृभ्रमुत्रसाम्। (६-४-१२४)

एषामेत्त्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च। भ्रेमतुः—बभ्रमतुः। अभ्रमीत्। क्षर ८५१ संचलने। अक्षारीत्।

अथ द्वावनुदात्तेतौ। षह ८५२ मर्षणे। 'परिनिविभ्यः—' (सू-२२७५) इति षत्वम्। परिषहते। सेहे। सहिता। 'तीषसह—'(सू २३४०) इति वा इट्। इडभावे ढत्वधत्वष्टुत्वढलोपाः।

२३५७। सहिवहोरोदवर्णस्य। (६-३-११५)

अनयोरवर्णस्य ओत्स्याड्ढलोपे सति।

सूत्रं व्याचष्टे। **अङि परे इति**॥ 'ऋदशोऽङि' इत्यतः तदनुवृत्तेरिति भावः। पतेः पुम् स्यादङि परे इति फलितम्। पुमि मकार इत् उकार उच्चारणार्थः मित्त्वादन्त्यादचः परः। तदाह। **अपप्तदिति। कथे निष्पाके इति**॥ जलक्षीरश्रृतादीनाम्पादभागादिशोषणपर्यन्तः पाको निष्पाकः। **अकथीदिति**॥ एदित्त्वान्न वृद्धिः। एवं अमथीत्। **टु वम् उद्गिरणे इति**॥ टुरित्। नायमुदित्। तेन 'उदितो वा' इति क्त्वायामिड्विकल्पो न। 'गृ निगरणे' इति दीर्घान्तोऽयम्। नन्वस्माद्धातोर्ल्युटि 'ऋत इद्धातोः' इति इत्त्वम्बाधित्वा परत्वात् 'सार्वधातुक' इति गुणे सति उद्गरण इत्येव निर्देशो युज्यत इत्यत आह। **इहैवेति**॥ उद्गिरण इत्यर्थनिर्देशः पाणिनीय इति सुधाकरो मन्यते। **भ्रमु चलने इति**॥ वक्रमार्गसञ्चारे इत्यर्थः। अयथार्थज्ञानेऽप्ययम्। उदितो वेति क्त्वायामिड्विकल्पार्थमुदित्त्वम्। **वा जृभ्रमु**॥ 'अत एकहल्मध्ये' इत्यतो लिटि इति 'थलि च सेटि' इति चानुवर्तते। 'ध्वसोरद्धौ' इत्यतः एदिति 'गमहनेत्यतः' किताति च। तदाह। **एषामिति। अभ्रमीदिति**॥ ह्यधन्तेति न वृद्धिः। **अक्षारीदिति**॥ 'अतो लरान्तस्य' इति वृद्धिः। **षह मर्षणे इति**॥ अपराधे सत्यपि कोपानाविष्करणं मर्षणम्। **इडभावे इति**॥ सह् ता इति स्थिते होढ इति ढत्वं 'झषस्तथोः' इति तकारस्य धत्वम्। धस्य ष्टुत्वेन ढः। 'ढोढे लोपः' इति पूर्वस्य ढस्य लोप इत्यर्थः। सढा इति स्थितम्। **सहिवहोः। ढलोपे इति**॥ ढ्लोप इत्यतः तदनुवृत्तेरिति भावः। रलोप इति तु नानुवर्तते।

२३५८ । सोढः । (८-३-११५)

सोढ्रूपस्य सहेः सस्य षत्वं न स्यात् । परिसोढा ।

२३५९ । सिवादीनां वाड्व्यवायेऽपि । (८-३-७१)

परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यादड्व्यवायेऽपि । पर्यषहत । पर्यसहत । रमु ८५३ क्रीडायाम् । रेमे । रेमिषे । रन्ता । रंस्यते । रंसीष्ट । अरंस्त ।

अथ कसन्ताः परस्मैपदिनः । षदॢ ८५४ विशरणगत्यवसादनेषु ।

२३६० । प्राघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः । (७-३-७८)

पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे । सीदति । ससाद । सेदतुः । सेदिथ—ससत्थ । सत्ता । सत्स्यति । ऌदित्त्वादङ् । असदत् । 'सदिरप्रतेः' (सू २२७१) निषीदति । न्यषीदत् ।

असम्भवात् । तथाच सकारादाकारस्य ओत्वे सोढेति रूपम् । परिसोढेत्यत्र परिनिविभ्य इति षत्वे प्राप्ते । **सोढः** ॥ 'सोढ इति सहेरोत्वसम्पन्नस्य षष्ठ्यन्तत्वम् । 'सहेः साढस्सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते । 'न रपर' इत्यतो नेति । मूर्धन्य इत्यधिकृतम् । तदाह । **सोढ्रूपस्येत्यादिना । सिवादीनाम्** ॥ 'परिनिविभ्यः' इति सूत्रादुत्तरमिदं सूत्रम् । तदाह । **परिनिविभ्यः परेषामिति** ॥ सिवुसहसुट्स्तुस्वञ्जामिति शपः । **रमु क्रीडायामिति** ॥ नायमुदिदिति माधवः । केचित्तु उदितं मत्वा 'उदितो वा' इति क्त्वायामिड्विकल्पमिच्छन्ति । अनिट्कोऽयम् । लिटि क्रादिनियमादिट् । तदाह । **रेमिषे इति । अथ कसन्ता इति** ॥ 'कस गतौ' इत्येतत्पर्यन्ता इत्यर्थः । षदॢधातुः पोपदेशः अनिट्कश्च । लटि शर्पि सद् अ इति स्थिते । **पाघ्राध्मा** ॥ पा घ्रा ध्मा स्था म्ना दाण् दृशि अर्ति सर्ति शद् सद् एषाद्वन्द्वात् षष्ठीबहुवचनम् । पिब जिघ्र धम तिष्ठ मन यच्छ पश्य ऋच्छ धौ शीय सीद एषान्द्वन्द्वात् प्रथमाबहुवचनम् । यथासङ्ख्यमादेशाः । ष्ठिवुक्लमु इत्यतः शितीत्यनुवर्तते । शृचासौ इच्चेति कर्मधारयः । अज्ञाक्षिप्तप्रत्ययाविशेषणत्वात् तदादिविधिः । तदाह । **इत्संज्ञकेति । ससादेति** ॥ इत्संज्ञकशकारादिप्रत्ययाभावात् न सीदादेशः । श् इत् यस्यसः शित् शितीति बहुव्रीह्याश्रयणे तु पाधातोः कर्मणि लिटि एशि आल्लोपे पपे इत्यत्रापि पिबादेशः स्यादिति बोध्यम् । थलि क्रादिनियमप्राप्तस्य इटः 'उपदेशे अत्वतः' इति निषेधेऽपि भारद्वाजनियमाद्वेट् । तत्र इट्पक्षे थलि च सेटीत्येत्वाभ्यासलोपौ । तदाह । **सेदिथ, ससत्थेति** ॥ सेदिव । सेदिम । क्रादिनियमादिट् । **न्यषीददिति** ॥ 'प्राक्सितादड्व्यवायेऽपि' इति षत्वम् । निषसादेत्यत्र अभ्यासात्

२३६१। सदेः परस्य लिटि। (८-६-११८)

सदेरभ्यासात्परस्य षत्वं न स्याल्लिटि। निषसाद। निषेदतुः। शद्लृ ८५५ शातने। विशीर्णतायामयम्। शातनं तु विषयतया निर्दिश्यते।

२३६२। शदेः शितः। (१-३-६०)

शिद्भाविनोऽस्मादात्मनेपदं स्यात्। शीयते। शशाद। शेदतुः। शेदिथ। शशत्थ। शत्ता। अशदत्। क्रुश ८५६ आह्वाने रोदने च। क्रोशति। क्रोष्टा। क्लेः क्सः। अक्रुक्षत्। कुच ८५७ सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु। कोचति। चुकोच। बुध ८५८ अवगमने। बोधति। बोधिता। बोधिष्यति।

परस्य 'स्थादिष्वभ्यासेन' इति षत्वे प्राप्ते। **सदेः परस्य** ॥ 'न रपर' इत्यतः नेत्यनुवर्तते। मूर्धन्य इत्यधिकृतम्। सदेरित्यवयवषष्ठी। परशब्द उत्तरखण्डपरः। सदेरुत्तरखण्डस्य षत्वन्नेति लभ्यते। फलितमाह। **सदेरभ्यासात्परस्येति। शदॢ शातने इति** ॥ ननु शद्धातोरस्मात् हेतुमण्ण्यन्तात् ल्युटि 'शदेरगतौ तः' इति दकारस्य तकारे शातनशब्दः। तथाच शातनं शीर्णतानुकूलक्रियेति फलति। एवञ्च सकर्मकत्वापत्तौ विशीर्यतीत्यर्थे शीर्यत इति वक्ष्यमाणमुदाहरणं कथमित्यत आह। **विशीर्णतायामिति** ॥ विशरणे इत्यर्थः। तर्हि कथं शातनमिति हेतुमण्णिजित्यत आह। **शातनन्तु विषयतयेति** ॥ विपूर्वात् 'षिञ् बन्धने' इत्यस्मात् विषयशब्दः। अविनाभावेनेत्यर्थः। प्रयोजकव्यापारं विना विशरणस्यासम्भवात् शातननिर्देशः। ण्यर्थस्याविवक्षितत्वात् विशरणमेव शद्लृधात्वर्थ इति यावत्। **शदेः शितः** ॥ 'अनुदात्तङितः' इत्यस्मादात्मनेपदमित्यनुवर्तते। श् इत् यस्य सः शित्। शप् विवक्षितः। शिति विवक्षिते सतीत्यर्थः। तिङुत्पत्तेः पूर्वं सार्वधातुकाश्रयस्य शपोऽसम्भवात्। तदाह। **शिद्भाविन इति** ॥ शिद्भावी भविष्यन् यस्मात्स शिद्भावी तस्मादित्यर्थः। **शीयते इति** ॥ शपि सदेः शीयादेशः। विशीर्यतीत्यर्थः। शीयेते। शीयन्ते। इत्यादि। शिद्विषयादित्युक्तेर्लिटि नात्मनेपदम्। इत्संज्ञकशकारादावित्युक्तेर्न शीयादेशः। तदाह। **शशादेति** ॥ अनिट्कोऽयम्। क्रादिनियमप्राप्तस्य इटः 'उपदेशेऽत्वतः' इति नियमात्थलि भारद्वाजनियमात् वेट्। तदाह। **शेदिथ। शशत्थेति च** ॥ इट्पक्षे 'थलि च सेटि' इत्येत्वाभ्यासलोपाविति भावः। शेदिव। शेदिम। क्रादिनियमादिट्। **अशददिति** ॥ लृदित्वादङिति भावः। क्रुश धातुरनिट्कः। चुक्रोशिथ। क्रादिनियमात्थलि नित्यमिट्। अजन्ताकारवत्वाभावान्न भारद्वाजनियमः। चुक्रुशिव। चुक्रुशिम। **क्रोष्टेति** ॥ व्रश्चादिना शस्य षत्वे ष्टुत्वेन तकारस्य टः। **क्लेः क्स इति** ॥ इगुपधशलन्तत्वादिति भावः। **अक्रुक्षदिति** ॥ व्रश्चादिना शस्य षः। 'षढोः' इति षस्य कः। सस्य षत्वम्। कित्त्वान्न गुणः। नापि हलन्तलक्षणा वृद्धिः। **कुच सम्पर्चने इति** ॥ 'कुच शब्दे' इति पठितस्य पुनरिह पाठः सम्पर्चनादावेव ज्वलादिकार्यणप्रत्ययार्थः। अर्थनिर्देशः क्वचित्पाणिनीय इति भूधातौ प्रपञ्चितम्। **बुध**

रुह ८५९ बीजजन्मनि प्रादुर्भावे च। रोहति। रुरोह। रुरोहिथ। रोढा। रोक्ष्यति। अरुक्षत्। कस ८६० गतौ। अकासीत्—अकसीत्। वृत्। ज्वलादिगणः समाप्तः।

अथ गूहत्यन्ताः स्वरितेतः। हिक्क ८६१ अव्यक्ते शब्दे। हिक्कति—हिक्कते। अच्चु ८६२ गतौ याचने च। अच्चति—अच्चते। अचु इत्येके। अचि इत्यपरे। टु याचृ ८६३ याच्ञायाम्। याचति—याचते। रेटृ ८३४ परिभाषणे। रेटति। रेटते। चते ८६५ चदे ८६६ याचने। चचात। चेते। अचतीत्। चचाद। चेदे। अचदीत्। प्रोथृ ८३७ पर्याप्तौ। पुप्रोथ। पुप्रोथे। मिदृ ८६८ मेदृ ८६९ मेधाहिंसनयोः। मिमेद। मिमेदे। 'थान्ताविमौ' इति स्वामी। मिमेथ। 'धान्तौ' इति न्यासः। मेधृ ८७० सङ्गमे च। मेधति मिमेधे। णिदृ ८७१ णेदृ ८७२ कुत्सासन्निकर्षयोः। निनेद। निनिदतुः। निनेदे। शृधु ८७३ मृधु ८७४ उन्दने। उन्दनं क्लेदनम्। शर्धति—शर्धते। शर्धीता। मर्धति—मर्धते। बुधिर् ८७५ अवबोधने। बोधति—बोधते। इरित्त्वादड्वा। अबुधत्—अबोधीत्—अबोधिष्ट। 'दीपजन—' (सू २३२८) इति चिण्तु न भवति। पूर्वोत्तरसाहचर्येण दैवादिकस्यैव तत्र ग्रहणात्। उ बुन्दिर् ८७६ निशामने। निशामनं ज्ञानम्। बुबुन्दे। अबुदत्।

अवगमने इति ॥ सेट्कोऽयम्। अनिट्सु श्यन्विकरणस्यैव बुधेर्ग्रहणात्। तदाह। **बोधितेति** ॥ अबोधीत्। रुहधातुरनिट्कः। क्रादिनियमात्थल्यपि नित्यमिट्। अजन्ताकारवत्त्वाभावात् न भारद्वाजनियमः। **रोढेति** ॥ लुटि तासि ढत्व धत्व ष्टुत्व ढलोपाः। **रोक्ष्यतीति** ॥ लृटि स्ये ढकषाः। **अरुक्षदिति** ॥ इगुपधशलन्तत्वात् ढकषाः। कित्त्वान्न वृद्धिगुणौ। **वृदिति** ॥ 'ज्वलितिकसन्तेभ्यः' इति उत्तरावधेरिति कसेर्ग्रहणादेव सिद्धेः वृत्करणं स्पष्टार्थमित्याहुः। इति ज्वलादयः। **गूहत्यन्ता इति** ॥ 'गुहू संवरणे' इत्येतत्पर्यन्ता इत्यर्थः। चते चदे याचने। **अचतीदिति** ॥ एदित्वान्न वृद्धिः। एवमचदीत्। **बुधिर् अवबोधने इति** ॥ 'बुध अवगमने' इति केवलपरस्मैपदी गतः। स तु ज्वलादिकार्यार्थः। अयन्तु इरित् स्वरितेत्। अनिट्सु श्यन्विकरणस्यैव पाठादयं सेट्। **अबुधदिति** ॥ इरित्त्वेऽपि तदवयवस्य इकारस्य प्रत्येकं मित्त्वाभावान्न नुम्। स्वरितेत्त्वप्रयुक्तमात्मनेपदन्तु भवत्येव। स्वरितेत्सु पाठसामर्थ्यात्। वस्तुतस्तु इकारस्य प्रत्येकमित्त्वेऽपि न नुम्। इदितो नुमित्यत्र कर्मधारयमाश्रित्य इत्संज्ञकेकारान्तस्यैव नुम्विधेः। **उ बौन्तरेति** ॥ जनपूरिसाहचर्येणेत्यर्थः। **उ बुन्दिरिति** ॥ आद्य उकार इत्। उदितो वेति क्त्वायामिड्विकल्पार्थः। **अबुददिति** ॥ इरित्त्वादङि आनिदितामिति नलोपः। इर इकारस्य प्रत्येकमित्संज्ञाविरहात्।

अबुन्दीत्। वेणृ ८७७ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु। वेणति–वेणते। नान्तोऽप्ययम्। खनु ८७८ अवदारणे। खनति–खनते।

२३६३। गमहनजनखनघसां लोपः क्ङित्यनङि। (६-४-९८)

एषामुपधाया लोपः स्यादजादौ क्ङिति न त्वङि। चख्नतुः। 'ये विभाषा' (सू २३१९)। खायात्–खन्यात्। चीवृ ८७९ आदानसंवरणयोः। चिचीव–चिचीवे। चायृ ८८० पूजानिशामनयोः। व्यय ८८१ गतौ। अव्ययीत्। दाशृ ८८२ दाने। ददाश–ददाशे। भेषृ ८८३ भये। 'गतौ' इत्येके। भेषति–भेषते। भ्रेषृ ८८४ भ्लेषृ ८८५ गतौ। अस ८८६ गतिदीप्त्यादानेषु। असति–असते। आस–आसे। अयं षान्तोऽपि। स्पश ८८७ बाधनस्पर्शनयोः। स्पर्शनं ग्रथनम्। स्पशति–स्पशते। लष ८८८ कान्तौ। 'वा भ्राश—' (सू २३२१) इति श्यन्वा। लष्यति–लषति। लेषे। चष ८८९ भक्षणे। छष ८९० हिंसायाम्। चच्छषतुः। चच्छषे। झष ८९१ आदानसंवरणयोः। भ्रक्ष ८९२ भ्लक्ष ८९३ अदने। 'भक्ष' इति मैत्रेयः। दासृ ८९४ दाने। माहृ ८९५ माने। गुहू ८९६ संवरणे।

२३६४। ऊदुपधाया गोहः। (६-४-८९)

गुह उपधाया ऊत्स्याद्गुणहेतावजादौ प्रत्यये। गूहति–गूहते। ऊदित्त्वा-

---

अनिदितामित्यस्य इत्संज्ञकेकारान्तभिन्नानामित्यर्थाश्रयणाच्चेति शब्देन्दुशेखरे स्थितम्। **वेणृ-गतीति**॥ वाद्यभाण्डस्य वादनार्थङ्ग्रहणं वादित्रग्रहणम्। खनुधातुरुदित्। क्त्वायामिड्विकल्पः। **गमहन। उपधाया इति**॥ 'ऊदुपधायाः' इत्यतः तदनुवृत्तेरिति भावः। **अजादाविति**॥ अचि श्नुधात्वित्यतः अनुवृत्तस्य अचि इत्यस्य अङ्गाक्षिप्तप्रत्ययविशेषणतया तदादिविधिलाभ इति भावः। क्ङितीत्युक्तेः चखानेत्यत्र नोपधालोपः। अनङीति किम्। अगमत्। चख्ने चख्नाते इत्यादि। **व्यय गताविति**॥ अयं वित्तत्यागेऽपि। अर्थनिर्देशस्योपलक्षणत्वात्। **अव्ययीदिति**॥ ह्रयन्तेति न वृद्धिः। **चष भक्षणे इति**॥ चचाष। चेषतुः। **छष हिंसायामिति**॥ वैरूप्यसम्पादकादेशादित्वादेत्त्वाभ्यासलोपौ न। तदाह। **चच्छषतुः इति। गुहू संवरणे इति**॥ उदुपधोऽयम्। ऊदित्। **ऊदुपधायाः**॥ गोह इति कृतलघूपध-गुणस्य गुहेर्निर्देशः। ततश्च गुणविषय एवेदम्भवति। अचि श्नुधात्वित्यतः अनुवृत्तस्य अची-त्यस्य अङ्गाक्षिप्तप्रत्ययविशेषणत्वात्तदादिविधिः। तदाह। **गुह उपधायाः इत्यादिना। गुणहेताविति**॥ गुणम्प्रति परनिमित्तभूत इत्यर्थः। गुणापवादः। जुगूह। गुणहेताविति किम्। जुगुहतुः। जुगुहुः। जुगुहे। जुगुहाते। जुगुहिरे। जुगूहिथ। जुगोढ। ढत्वधत्व

दिड्वा । गूहिता—गोढा । गूहिष्यति—घोक्ष्यति । गूहेत् । गुह्यात् । अगूहीत् । इडभावे क्सः । अघुक्षत् ।

२३६५ । लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये । (७-३-७३)

एषां क्सस्य लुग्वा स्याद्दन्त्ये तङि । ढत्वधत्वष्टुत्वढलोपदीर्घाः । अगूढ । अघुक्षत । 'क्सस्याचि' (सू २३३७) इत्यन्तलोपः । अघुक्षाताम् । अघुक्षन्त । अगुह्महि—अघुक्षावहि । अघुक्षामहि ।

अथाजन्ता उभयपदिनः । श्रिञ् ८९७ सेवायाम् । श्रयति—श्रयते । शिश्रियतुः । श्रयिता । 'णिश्रि—' (सू २३१२) इति चङ् । अशिश्रियत् ।

ष्टुत्वढलोपाः । जुगुहथुः । जुगुह । जुगुहिषे । जुघुक्षे । ढत्वभष्भावकत्वषत्वानि । जुगुहाथे । जुगुहिध्वे । जुघुढ्वे । जुगूह । जुगुहिव । जुगुह्व । जुगुहिम । जुगुह्म । जुगुहे । जुगुहिवहे । जुगुह्महे । जुगुहिमहे । जुगुह्महे । इति लिटि रूपाणि सिद्धवत्कृत्य लुटि इट्पक्षे ऊत्वे रूपमाह । **गूहितेति** ॥ इडभावे अजादिप्रत्ययाभावात् ऊत्त्वाभावे गुणे ढत्वधत्वष्टुत्वढलोपेषु रूपमाह । **गोढेति** ॥ लृटि स्ये इट्पक्षे ऊत्त्वे रूपमाह । **गूहिष्यतीति** ॥ इडभावे तु गुणढत्वभष्भावकत्वषत्वेषु रूपमाह । **घोक्ष्यतीति** ॥ गूहिष्यते, घोक्ष्यते, इत्यप्युदाहार्यम् । गूहतु । गूहताम् । अगूहत् । अगूहत । **गूहेदिति** ॥ गूहेतेत्यपि ज्ञेयम् । **गुह्यादिति** ॥ आशीर्लिङि अजादिप्रत्ययाभावादूत्त्वन्न । कित्त्वान्न गुणः । लुङि इट्पक्षे सिज्लोपे ऊत्त्वे रूपमाह । **अगूहीदिति** ॥ अगूहिष्टाम् । अगूहिषुरित्यादि । **इडभावे क्सः इति** ॥ इगुपधशलन्तादिति भावः । **अघुक्षदिति** ॥ ढत्वभष्भावकत्वषत्वानि । अघुक्षताम् । अघुक्षन्नित्यादि । लुङस्तङि विशेषमाह । **लुग्वादुह । दन्त्ये तङीति** ॥ दन्त्यादौ तङीत्यर्थः । प्रत्ययादर्शनात्सर्वादेशोऽयं लुक् । **अगूढेति** ॥ अगुह् स त इति स्थिते क्सस्य कित्त्वेन गुणहेतुत्वाभावादजादित्वाभावाच्च ऊत्त्वाभावे क्सलुकि अगुह् त इति स्थिते प्रक्रियान्दर्शयति । **ढत्वधत्वष्टुत्वढलोपदीर्घाः इति । अघुक्षतेति** ॥ क्सलुगभावे ढत्वभष्भावकत्वषत्वानीति भावः । **अघुक्षातामिति** ॥ च्लेः क्सादेशे क्सस्य कित्त्वेन गुणहेतुत्वाभावादूत्त्वाभावे ढत्वभष्भावकत्वषत्वेषु कृतेषु क्सस्याचीत्यन्त्यलोपे अतः परत्वाभावादातो ङित इति न भवतीति भावः । **अघुक्षन्तेति** ॥ झस्य अजादित्वाभावात्तस्मिन्परे क्सस्य अन्त्यलोपाभावादतः परत्वाभावादात्मनेपदेष्वनत इत्यदादेशो न भवति । कृते तु झोऽन्तादेशे क्सस्यान्तलोप इति भावः । अघुक्षथाः । अघुक्षाथाम् । अघुक्षध्वम् । अघुक्षि । इति रूपाणि सिद्धवत्कृत्याह । **अगुह्महीति** ॥ दन्त्यादिप्रत्ययपरत्वात् क्सस्य लुकि अजादिप्रत्ययाभावात् ऊत्त्वाभावे रूपम् । **अघुक्षावहीति** ॥ क्सलुगभावे ढत्वभष्भावकत्वषत्वानि । अतो दीर्घश्च । **अघुक्षामहीति** ॥ दन्त्यादिप्रत्ययपरत्वाभावान्न क्सलुक् । इति गूहत्यन्ताः स्वरितेतः । **उभयपदिनः इति** ॥ ञित्त्वादिति भावः । श्रिञ् धातुः सेट् । **शिश्रियतुरिति** ॥ कित्त्वान्न गुणः । इयङ् ।

भृञ् ८९८ भरणे । भरति । बभार । बभ्रतुः । बभर्थ । बभूव । बभृषे । भर्ता ।

२३६६ । ऋद्धनोः स्ये । (७-२-७०)

ऋतो हन्तेश्च स्यस्य इट् स्यात् । भरिष्यति ।

२३६७ । रिङ् शयग्लिङ्क्षु । (७-४-२८)

शे यकि यादावार्धधातुके लिङि च ऋतो रिङादेशः स्यात् । रीङि प्रकृते रिङ्विधिसामर्थ्याद्दीर्घो न । भ्रियात् ।

शिश्रियुः । शिश्रयिथ । शिश्रियथुः । शिश्रिय । शिश्राय । शिश्रय । शिश्रियिव । शिश्रियिम । शिश्रिये । शिश्रियाते । शिश्रियिरे । शिश्रियिषे । शिश्रियाथे । शिश्रियिढ्वे । शिश्रियिध्वे । शिश्रिये । शिश्रियिवहे । शिश्रियिमहे । **श्रयितेति** ॥ श्रयिष्यति । श्रयिष्यते । श्रयतु । श्रयताम् । अश्रयत् । अश्रयत । श्रयेत् । श्रयेत । श्रीयात् । श्रयिषीष्ट । लुङि विशेषमाह । **णिश्रीति । अशिश्रियदिति** ॥ चङीति द्वित्वम् । अशिश्रियत । अश्रयिष्यत् । अश्रयिष्यत । भृञ्धातुरनिट् । **भरतीति** ॥ भरते इत्यपि ज्ञेयम् । **बभ्रतुरिति** ॥ कित्त्वान्न गुणः । यण् । बभ्रुः । थलादौ 'एकाचः' इति नेट् । कृसृभृवृस्तुद्रुस्रुश्रुषु लिट्यपि तन्निषेधस्य प्रवृत्तेः । थलि अचस्तास्वदिति निषेधाच्च । ऋदन्तत्वेन भारद्वाजमतेऽपि थलि निषेधाच्च । तदाह । **बभर्थेति** ॥ बभ्रथुः । बभ्र । बभार । बभर । इति सिद्धवत्कृत्याह । **बभूवेति** ॥ बभूम । बभ्रे । बभ्राते । बभ्रिरे । इति सिद्धवत्कृत्याह । **बभृषे इति** ॥ बभ्राथे । बभृढ्वे । बभ्रे । बभृवहे । बभृमहे । लृटि स्ये इण्निषेधे प्राप्ते । **ऋद्धनोः** ॥ ऋत् हन् अनयोर्द्वन्द्वात् पञ्चम्यर्थे षष्ठीद्विवचनम् । स्ये इति षष्ठ्यर्थे सप्तमी । आर्धधातुकस्येडित्यतः इडित्यनुवर्तते । तदाह । **ऋत इत्यादिना** ॥ एकाच इति इण्निषेधस्यापवादः । **भरिष्यतीति** ॥ भरिष्यते । भरतु । भरताम् । अभरत् । अभरत । भरेत् । भरेत । आशीर्लिङि परस्मैपदे भृ यात् इति स्थिते । **रिङ् शय** ॥ श यक् लिङ् एषां द्वन्द्वात्सप्तमीबहुवचनम् । अयङ् यि क्ङितीत्यतो यीति सप्तम्यन्तमनुवृत्तं लिङो विशेषणम् । तदादिविधिः । शे तु यीति नान्वेति । असम्भवात् । नापि यकि अव्यभिचारात् । अत एव अकृत्सार्वधातुकयोरित्यनुवृत्तमपि लिङ एव विशेषणम् । तदाह । **शे यकीत्यादिना । ऋत इति** ॥ 'रीङृत' इत्यतः तदनुवृत्तेरिति भावः । अङ्गस्येत्यधिकृतम् । ऋत इति तद्विशेषणम् । तदन्तविधिः । ऋदन्तस्याङ्गस्येति लभ्यते । आदेशे ङकार इत् । ङित्त्वात् अन्तादेशः । निर्दिश्यमानपरिभाषयैव सिद्धे ङकारोच्चारणं, इडागमेनैव सिद्धे रेफोच्चारणञ्च स्पष्टार्थम् । ननु भ्रियादिति वक्ष्यमाणमुदाहरणमयुक्तम् । कृते रिङि अकृत्सार्वधातुकयोरिति दीर्घप्रसङ्गादित्यत आह । **रीङि प्रकृते इति** ॥ कृते रिङि यदि दीर्घः स्यात्तर्हि रिङ्विधिर्व्यर्थः स्यात् । रीङृत इत्येव सिद्धेः । अतो रिङि कृते सति न दीर्घ इत्यर्थः । **भ्रियादिति** ॥ भ्रियास्तामित्यादि सुगमम् । आशीर्लिङि भृषीष्टेत्यत्र

२३६८ । उश्च । (१-२-१२)

ऋवर्णात्परौ झलादी लिङ् तङ्परः सिच्येतौ कितौ स्तः । भृषीष्ट । भृषीयास्ताम् । अभार्षीत् । अभार्ष्टाम् । अभार्षुः ।

२३६९ । ह्रस्वादङ्गात् । (८-२-२७)

सिचो लोपः स्याज्झलि । अभृत । अभृषाताम् । अभरिष्यत् । हृञ् ८९९ हरणे । हरणं प्रापणं स्वीकारः स्तेयं नाशनं च । जहर्थ । जह्रिव । जह्रिषे । हर्ता । हरिष्यति । धृञ् ९०० धारणे । धरति । अधार्षीत् । अधृत । णीञ् ९०१ प्रापणे । निनयिथ । निनेथ । निन्यिषे ।

अथाजन्ताः परस्मैपदिनः । धेट् ९०२ पाने । धयति ।

गुणे प्राप्ते । **उश्च** ॥ 'लिङ्सिचावात्मनेपदेषु' इति सूत्रमनुवर्तते । 'इको झल्' इत्यतो झलिति च । तदाह । **ऋवर्णादिति** । **भृषीष्टेति** ॥ किच्चान्न गुणः । **अभार्षीदिति** ॥ परस्मैपदे सिचि वृद्धौ रपरत्वम् । तङि तु अभृ स् त इति स्थिते । **ह्रस्वादङ्गात्** ॥ ह्रस्वान्तादित्यर्थः । सिच इति भाष्यम् । 'झलो झलि' इत्यतो झलीति 'संयोगान्तस्य लोपः' इत्यतो लोप इति चानुवर्तते इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे । **सिचो लोपः स्याज्झलीति** ॥ ह्रस्वात्किम् । अच्योष्ट । अङ्गात्किम् । अलाविष्टाम् । सिचः किम् । द्विष्टराम् । द्विष्टमाम् । सुजन्तात्तरप्तमपौ । **अभृतेति** ॥ 'उश्च' इति सिचः किच्चान्न गुणः । झलीत्युक्तेः अभृषाताम् । अभृषतेत्यत्र न सिज्लोपः । अनतः परत्वात् झस्य अदादेशः । अभृथाः । अभृषाथाम् । अभृढ्वम् । अभृषि । अभृष्वहि । अभृष्महि । हृधातुरनिट् । हरणमनुविधमित्याह । **प्रापणमित्यादि** ॥ तद्यथा—भारं हरति । प्रापयतीत्यर्थः । अंशं हरति । स्वीकरोतीत्यर्थः । परस्वं हरति । चोरयतीत्यर्थः । पापं हरति हरते वा । नाशयतीत्यर्थः । जहार । जह्रतुः । जह्रुः । 'एकाचः' इति इण्निषेधस्य क्रादिष्वेव लिटि नियमितत्वादिह थलि इटि प्राप्ते 'अचस्तास्वत्' इति तन्निषेधः । ऋदन्तत्वेन भारद्वाजमतेऽपि इण्निषेध एव । तदाह । **जहर्थेति** ॥ जह्रथुः । जह्र । जहार । जहर । इति सिद्धवत्कृत्याह । **जह्रिवेति** ॥ क्रादिनियमादिट् । जह्रिम । जह्रिषे । क्रादिनियमादिट् । जह्राथे । जह्रिढ्वे । जह्रिध्वे । जह्रे । जह्रिवहे । जह्रिमहे । लुङादिषु भृञ इव रूपाणि । धृञ् धातुरनिट् । हृञ इव रूपाणि । णीञ् धातुरनिट् णोपदेशः । नयति । नयते । निनाय । निन्यतुः । निन्युः । क्रादिनियमाल्लिटि इट् । थलि तु 'अचस्तास्वत्' इति इण्निषेधस्य भारद्वाजनियमादिटमभिप्रेत्याह । निन्यिषे निन्याथे निन्यिढ्वे निन्यिध्वे । निन्ये । निन्यिवहे । निन्यिमहे । नेता । नेष्यति । नेष्यते । नयतु । नयताम् । अनयत् । अनयत । नयेत् । नयेत । नीयात् । नेषीष्ट । अनैषीत् । अनेष्ट । अनेष्यत् अनेष्यत । इत्यजन्ता उभयपदिनो गताः । **परस्मैपदिन इति** ॥ 'जि, ज्रि' अभिभवे । इत्येतत्पर्यन्ता इति शेषः । **धेट् पाने इति** ॥ स्तनन्धर्यात्यादौ डीबर्थं

२३७०। आदेच उपदेशेऽशिति। (६-१-४९)

उपदेशे एजन्तस्य धातोरात्त्वं स्यान्न तु शिति।

२३७१। आत औ णलः। (७-१-३४)

आदन्ताद्धातोर्णल औकारादेशः स्यात्। दधौ।

२३७२। आतो लोप इटि च। (६-४-६४)

अजाद्योरार्धधातुकयोः क्ङिदिटोः परयोरातो लोपः स्यात्। द्वित्वा-

---

टित्त्वम्। अवयवे टित्त्वस्य व्यर्थतया समुदायार्थत्वादिति हरदत्तः। **आदेचः**। **एजन्तस्य धातोरिति**॥ 'लिटि धातोः' इत्यतः धातोरित्यनुवृत्तं एचा विशेष्यते। तदन्तविधिरिति भावः। **न तु शितीति**॥ श् चासौ इच्चेति कर्मधारयात्सप्तमी। प्रत्ययविशेषणत्वात्तदादिविधिः। इत्संज्ञकशकारादौ प्रत्यये परे इति लभ्यते। 'ल्यपि च' 'न व्यो लिटि' इत्यादिपूर्वोत्तरसूत्राणाम्प्रत्ययेष्वेव प्रवृत्त्या प्रत्यये इति विशेष्यलाभः। अशितीति न पर्युदासः। तथा सति शिद्भिन्ने प्रत्यये परे इत्यर्थः। ततश्च सुग्लः इत्यत्र ग्लैधातोः 'आतश्चोपसर्गे' इति कप्रत्ययो न स्यात्। कप्रत्ययनिमित्तमात्त्वम् आदन्ताप्रत्यय इत्यन्योन्याश्रयात्। शिति नेति प्रसज्यप्रतिषेधे तु आत्त्वस्य अनैमित्तिकतया कप्रत्ययनिमित्तकत्वाभावात् प्रथममात्त्वे कृते कप्रत्ययः सूपपादः। शितीति बहुव्रीह्याश्रयणे ग्लैधातोर्भावे लिटि 'भावकर्मणोः' इति तङि एशि आत्त्वे आतो लोपे जग्ले इति न सिध्येत्। एशश्शित्त्वेन तस्मिन्परे आत्त्वस्य निषेधात्। अतः कर्मधारयमाश्रित्य इत्संज्ञकशकारादौ प्रत्यये परे नेत्यर्थ आश्रितः। एवञ्च पर्युदासेऽपि न क्षतिः। इत्संज्ञकशकारादिप्रत्यये विवक्षिते इत्याश्रयणेन सुग्ल इत्यत्र कप्रत्ययात्प्रागेव आत्त्वोपपत्तेः। उपदेशे किम्। चेता, स्तोता। धातोः किम्। गोभ्याम्। 'गमेर्डोः' इति डोप्रत्ययोपदेशादप्राप्तिः। उपदेशे यः एच् तदन्तत्वाभावाद्गमेः। न च मेङादीनामुपदेशे एजन्तत्वाभावात् कथमात्त्वमिति न शङ्क्यम्। 'उदीचाम्माङः' इति निर्देशेन नानुबन्धकृतमनेजन्तत्वमिति ज्ञापनादित्यास्तान्तावत्। तथाच प्रकृते लिटि द्वित्वादौ दधा अ इति स्थिते। **आत औ**॥ औ इति लुप्तप्रथमाकम्। अङ्गस्येत्यधिकृतम्पञ्चम्या विपरिणम्यते। आत इति तद्विशेषणम्। तदन्तविधिः। तदाह। **आदन्ताद्धातोरिति**॥ णल्प्रकृतिश्च धातुरेवेति धातुग्रहणम्। तथाच णल औत्वे वृद्धौ रूपमाह। **दधाविति**॥ दधा अतुसिति स्थिते। **आतो लोपः**॥ आर्धधातुके इत्यधिकृतम्। दीङो युडित्यतः अचि क्ङितीतिचानुवर्तते। अचीत्यार्धधातुकविशेषणत्वात्तदादिविधिः। क्ङिति अजाद्यार्धधातुके इटि च आतो लोपः इति लभ्यते। फलितमाह। **अजाद्योरिति**॥ इटः आर्धधातुकत्वन्तु तदवयवत्वाद्बोध्यम्। क्ङितीति च इटो न विशेषणम्। इड्ग्रहणसामर्थ्यात्। इडित्यनेन उत्तमपुरुषैकवचनम् इडागमश्च गृह्यते। अजाद्योः किम्। ग्लैधातोः कर्मणि लटि यकि ग्लायते। आर्धधातुकयोः किम्। यान्ति। वान्ति। दधौ इत्यत्र तु क्ङित्वाभावान्नाल्लोपः।

त्परत्वाल्लोपे प्राप्ते 'द्विर्वचनेऽचि' (सू २२४३) इति निषेधः । द्वित्वे कृते आलोपः । दधतुः । दधुः । दधिथ—दधाथ । दधिव । दधिम । धाता ।

२३७३ । दाधा घ्वदाप् । (१-१-२०)

दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ विना ।

२३७४ । एर्लिङि । (६-४-६७)

घुसंज्ञानां मास्थादीनां चैत्वं स्यादार्धधातुके किति लिङि । धेयात् । धेयास्ताम् । धेयासुः ।

२३७५ । विभाषा धेट्श्व्योः । (३-१-४९)

आभ्यां च्लेश्चङ्वा स्यात्कर्तृवाचिनि लुङि परे । 'चङि' (सू २३१५) इति द्वित्वम् । अदधत् । अदधताम् ।

२३७६ । विभाषा घ्राधेट्शाच्छासः । (२-४-७८)

सति तस्मिन् औत्वन्न स्यात् । ननु धा अतुस् इति स्थिते द्वित्वात्परत्वादाल्लोपे सति एकाच्त्वाभावात् द्वित्वन्न स्यादित्याशङ्क्य परिहरति । **द्वित्वादित्यादिना** ॥ धेट्धातुरनिट् । भारद्वाजनियमात् थलि वेडित्याह । **दधिथ । दधाथेति** ॥ इट्पक्षे आल्लोपः । दधथुः । दध । दधौ इति सिद्धवत्कृत्याह । **दधिवेति** ॥ वसि आत्त्वे क्रादिनियमादिटि आल्लोप इति भावः । दधिमेत्यपि ज्ञेयम् । **धातेति** ॥ लुटि आत्त्वे ता इति भावः । धास्यति । धयतु । अधयत् । धयेत् । आशीर्लिङि घुसंज्ञाकार्यं वक्ष्यन् घुसंज्ञां दर्शयति । **दाधाघ्वदाप्** ॥ दा धा घु एषां समाहारद्वन्द्वात्प्रथमैकवचनम् । दाधेत्यनेन स्वाभाविकाकारान्तयोः 'दाण् दाने' 'डुधाञ् धारणपोषणयोः' इत्यनयोः कृतात्त्वानाञ्च दोदेद्धेटां लाक्षणिकानामपि ग्रहणम् । 'गामादाग्रहणेष्वविशेषः' इति परिभाषाबलात् । तत्र दाग्रहणेन धारूपस्यापि ग्रहणात् । अतएव 'दो दद् घोः' इत्यत्र धेण्निवृत्त्यर्थन्दाग्रहणमर्थवत् । दधातेर्हिभावविधानादेव निवृत्तिसिद्धेः । तदाह । **दारूपाः धारूपाश्चेति** ॥ शब्दा इति शेषः । **एर्लिङि** ॥ एरिति प्रथमान्तम् । आर्धधातुके इत्यधिकृतम् । तदाह । **घुसंज्ञानां मास्थादीनामिति** ॥ मा स्था जहाति सा एषान्द्वन्द्वात् षष्ठीबहुवचनम् । **किति लिङीति** ॥ दीङो युडित्यतः कितीत्यनुवृत्तेरिति भावः । ङितीति नानुवर्तते । लिङार्धधातुकस्य ङित्त्वासम्भवात् । लुङि च्लेः सिचि प्राप्ते । **विभाषा धेट्** ॥ च्लि लुङीत्यनुवर्तते । 'णिश्रिद्रुस्रुभ्यः' इत्यतः कर्तरि चङिति च । तदाह । **आभ्यामिति** ॥ धेट् श्वि आभ्यामित्यर्थः । **अदधदिति** ॥ चङि द्वित्वे आल्लोप इति भावः । अदधताम् । अदधन् । अदधः । अदधतम् । अदधत । अदधम् । अदधाव । अदधाम । चङभावपक्षे विशेषमाह । **विभाषा घ्रा** ॥ 'ण्यक्षत्रियार्ष' इत्यतः

एभ्यः सिचो लुग्वा स्यात्परस्मैपदे परे। अधात्। अधाताम्। अधुः।

२३७७। यमरमनमातां सक्च। (७-२-७३)

एषां सक्स्यादेभ्यः सिच इट् च परस्मैपदेषु। अधासीत्। अधासिष्टाम्। अधासिषुः। ग्लै ९०३ म्लै ९०४ हर्षक्षये। हर्षक्षयो धातुक्षयः। ग्लायति। जग्लौ। जग्लिथ—जग्लाथ।

२३७८। वाऽन्यस्य संयोगादेः। (६-४-६८)

लुङित्यनुवर्त्तते। 'गातिस्था' इत्यतः सिचः परस्मैपदेष्विति। तदाह। **एभ्यः इति**॥ 'धेट् पाने' 'घ्रा गन्धोपादाने' 'शो तनूकरणे' 'छो छेदने' 'षो अन्तकर्मणि' एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम्। शोप्रभृतीनाङ्कृतात्वानां निर्देशः। धेटः 'गातिस्थाघुपा' इति नित्यं प्राप्ते अन्येषामप्राप्ते वचनम्। **अधुरिति**॥ 'उस्यपदान्तात्' इति पररूपम्। अधाः। अधातम्। अधात। अधाम्। अधाव। अधाम। सिचो लुगभावपक्षे आह। **यमरम**॥ यम, रम, नम, आत्, एषां समाहारद्वन्द्वात्षष्ठीबहुवचनम्। आदित्यनेन आदन्तङ्गृह्यते। तदाह। **एषां सक् स्यादिति**॥ सकि ककार इत् अकार उच्चारणार्थः। कित्त्वादन्तावयवः। चकारेण 'इडत्त्यर्ति' इत्यतः इडिति स्तुसुधूञ्भ्यः इत्यतः परस्मैपदेष्विति चानुकृष्यते। अञ्जेस्सिचीत्यतः सिचीति च। तच्च षष्ठ्या विपरिणम्यते। तदाह। **एभ्यस्सिचः इट् चेति। अधासीदिति**॥ धातोस्सगागमः। सिच इट्। 'इट ईटि' इति सिज्लोपः। **अधासिष्टामिति**॥ अपृक्तत्वाभावादीडभावान्न सिज्लोपः। सस्य षत्वे तकारस्य ष्टुत्वेन टः। **अधासिषुरिति**॥ अधासीः। अधासिष्टम्। अधासिष्ट। अधासिषम्। अधासिष्व। अधासिष्म। यद्यपि अधासीदित्यत्र सगिटोर्विधिर्व्यर्थ एव। तथापि अधासिष्टामित्याद्यर्थं आतः सगिद्विधानम्। यमादीनान्तु अयंसीदित्यादौ हलन्तलक्षणवृद्धेरभावार्थम् अयंसिष्टामित्याद्यर्थञ्च। तदेतत् तत्तद्धातुषु स्पष्टीभविष्यति। अधास्यत्। 'ग्लै म्लै हर्षक्षये' **धातुक्षयः इति**॥ बलक्षय इत्यर्थः। अनिटाविमौ। ग्लायतीति शपि आयादेशः। शिद्विषयत्वादात्त्वन्न। **जग्लाविति**॥ णलि आत्त्वे 'आत औ णलः' इति औभावे वृद्धिरिति भावः। अतुसादौ द्वित्वे कृते आतो लोपः। जग्लतुः। जग्लुः। भारद्वाजनियमात्थलि वेडित्याह। **जग्लिथ। जग्लाथेति**॥ इट्पक्षे आल्लोपः। जग्लथुः। जग्ल। जग्लौ। जग्लिव। जग्लिम। ग्लाता। ग्लास्यति। ग्लायपु। अग्लायत्। ग्लायेत्। आशीर्लिङि आत्त्वे कृते ग्ला यात् इति स्थिते। **वाऽन्यस्य**॥ आर्धधातुक इत्यधिकृतम्। 'ऐर्लिङि' इत्यनुवर्त्तते। एरिति प्रथमान्तम्। 'आतो लोप इटि च' इत्यतः आत इत्यनुवर्तते कस्मादन्यस्येत्यपेक्षायां घुमास्थागापाजहातिसां हलीति प्रकृतत्वाल्ल-

घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्त्वं वा स्यादार्धधातुके किति लिङि। ग्लायात्—ग्लेयात्। अग्लासीत्। म्लायति। ष्ण्यै ९०५ न्यक्करणे। न्यक्करणं तिरस्कारः। ष्ण्यै ९०६ स्वप्ने। ध्यै ९०७ तृप्तौ। ध्यै ९०८ चिन्तायाम्। रै ९०९ शब्दे। स्त्यै ९१० ष्ट्यै ९११ शब्दसङ्घातयोः। स्त्यायति। षोपदेशस्यापि सत्वे कृते रूपं तुल्यम्। षोपदेशफलं तु तिष्ठ्यासति अतिष्ठ्यपदित्यत्र षत्वम्। खै ९१२ खेदने। क्षै ९१३ जै ९१४। षै ९१५ क्षये। क्षायति जजौ। ससौ। साता। 'घुमास्था—' (सू २४६२) इत्यत्र 'विभाषा घ्राधेट्—' (सू २३७६) इत्यत्र च स्यतेरेव ग्रहणं न त्वस्य।

भ्यते। तदाह। **घुमास्थादेरित्यादिना**। **कितीति** ॥ अनुदात्तोपदेशवनतीत्यतः तदनुवृत्तेरिति भावः। ङितीति तु नानुवर्तते। लिङार्धधातुकस्य ङित्त्वासम्भवात्। **अग्लासीदिति** ॥ यमरमेत्यादन्तत्वात् सगिटौ। अग्लासिष्टाम्। अग्लासिषुरित्यादि। अग्लास्यत्। **म्लायतीति** ॥ ग्लैधातोरिव रूपाणीति भावः। **ष्ण्यै न्यक्करणे इति** ॥ यकारमध्योऽयम्। इत आरभ्य ऐकारान्तानां संयोगादीनां ग्लैवदेव रूपाणि प्रत्येतव्यानि। 'रै शब्दे' इत्यादीनान्तु असंयोगादीनाम् आशीर्लिङि 'वाऽन्यस्य संयोगादेः' इत्येत्त्वं न भवति। रायादित्यादिरूपमिति विशेषः। **स्त्यै ष्ट्यै इति** ॥ षोपदेशेषु स्त्याधातोः पर्युदासादाद्यो न षोपदेशः। द्वितीयस्तु षोपदेशः। तकारस्य ष्टुत्वसम्पन्नटकारनिर्देशः। **सत्वे कृते इति** ॥ धात्वादेरिति षस्य सकारे सति निमित्तापायात् ष्टुत्वनिवृत्तिरिति भावः। **तिष्ठ्यासतीति** ॥ ष्ठ्यैधातोः कृतसत्वात् सनि आत्वे स्या स इति सन्नन्ताल्लटि तिपि शपि 'सन्यङोः' इति द्वित्वे 'शर्पूर्वाः खयः' इति सकारयकारनिवृत्तौ तास्त्यासति इति स्थिते अभ्यासहृस्वे सन्यत इति इत्वे सकारस्य इणः परत्वादादेशसकारत्वाच्च षत्वे तिष्ठ्यासतीति रूपम्। स्वाभाविकसकारादित्वे त्वादेशसकारादित्वाभावात् षत्वं न स्यादिति भावः। **अतिष्ठ्यपदिति** ॥ ष्ठ्यैधातोः कृतसत्वात् णौ आत्वे 'आर्तिह्री' इति पुकि स्त्यापि इति ण्यन्तात् लुङि अडागमे तिपि इतश्च इति इकारलोपे 'णिश्रिद्रुस्रुभ्यः' इति 'च्लेश्चङि' 'णेरनिटि' इति णिलोपे 'णौ चङ्युपधायाः' इति ह्रस्वे 'चङि' इति स्त्यप् इत्यस्य द्वित्वे शर्पूर्वा इति सकारयकारपकाराणां निवृत्तौ सत्यां 'सन्यतः' इति इत्वे इणः परत्वादादेशसकारत्वाच्च सस्य षत्वे तस्य ष्टुत्वे अतिष्ठ्यपदिति रूपम्। स्वाभाविकसकारत्वे त्वादेशसकारत्वाभावात् षत्वन्न स्यादिति भावः। **जजौ। ससाविति** ॥ जैधातोः षैधातोश्च णलि आत्वे द्वित्वादौ वृद्धिरिति भावः। ननु 'एर्लिङि' इत्यत्र 'घुमास्थागापाजहातिसाम्' इत्यनुवृत्त्या सैधातोराशीर्लिङि सायादित्यत्र एत्त्वं स्यात्। तथा लुङि सगिटोः असासीत् असासिष्टामित्येव इष्यते। तत्र 'विभाषा घ्राधेट्शाच्छासः' इति सिचः पक्षिके लुकि असात् असातामित्यपि प्रसज्येतेत्यत आह। **घुमास्थेत्यत्रेत्यादि। स्यतेरिति** ॥ षो अन्तकर्मणि

तेन एत्त्वसिज्लुकौ न। सायात्। असासीत्। कै ९१६ गै ९१७ शब्दे। गेयात्। अगासीत्। शै ९१८ श्रै ९१९ पाके। पै ९२० ओ वै ९२१ शोषणे। पायात्। अपासीत्। 'घुमास्था—' (सू २४६२) इतीत्त्वं, तदपवाद 'एर्लिङि' (सू २३७४) 'इत्येत्त्वं' 'गाति स्था—' (सू २२२३) इति सिज्लुक् च, न। पारूपस्य लाक्षणिकत्वात्। ष्टै ९२२ वेष्टने। स्तायति। ष्णै ९२३ वेष्टने। 'शोभायां च' इत्येके। स्नायति। दैप् ९२४ शोधने। दायति। अघुत्वादेत्त्वसिज्लुकौ न। दायात्। अदासीत्। पा ९२५ पाने। 'पाघ्राध्मा—' (सू २३६०) इति पिबादेशः। तस्यादन्तत्वान्नोपधागुणः। पिबति। पेयात्। अपात्। घ्रा ९१६ गन्धोपादाने। जिघ्रति। घ्रायात्–घ्रेयात्। अघ्रासीत्।

इति श्यन्विकरणस्येत्यर्थः। अत्र व्याख्यानमेव शरणम्। 'विभाषा घ्राधेट्' इत्यत्र श्यन्विकरणाभ्यां साहचर्याच्च। 'पै ओ वै शोषणे'। पायति। वायति। 'ओदितश्च' इति निष्ठानत्वार्थमोदित्त्वम्। ननु पैधातोः कर्मणि लटि यकि आत्त्वे पायते इत्यत्र 'घुमास्थागापाजहातिसां हलि' इति ईत्त्वं स्यात्। तथा आशीर्लिङि पायात् इत्यत्र 'एर्लिङि' इति एत्त्वं स्यात्। तत्रापि 'घुमास्थागापाजहातिसाम्' इत्यनुवृत्तेः। तथा लुङि अपासीदित्यत्र 'गातिस्था' इति सिचो लुकि 'यमरम' इति इटः अभावात्तत्सन्नियोगाशिष्टस्सगपि न स्यादित्यत आह। **घुमास्थेतीत्त्वमित्यादिना। पारूपस्येति** ॥ उदाहृतसूत्रत्रयेषु लक्षणप्रतिपदोक्तपरिभाषया आदन्तत्वेन उपदिष्टस्यैव पाधातोर्ग्रहणम्। ननु पैधातोः कृतात्वस्येति भावः। एवञ्च प्रकृते पैधातोराशीर्लिङि पायादित्येव रूपम्। लुङि सगिटोः अपासीत्, अपासिष्टामित्येव रूपम्। **ष्टै वेष्टने इति** ॥ षोपदेशोऽयम्। कृतष्टुत्वनिर्देशः। सत्वे कृते ष्टुत्वनिवृत्तिः। तदाह। **स्तायतीति** ॥ ष्णैधातुरपि षोपदेशः कृतष्टुत्वनिर्देशः। सत्वे कृते ष्टुत्वनिवृत्तिः। तदाह। **स्नायतीति** ॥ दैप् शोधने। **अघुत्वादिति** ॥ घुसंज्ञाविधौ दाब्दैपौ विनेत्युक्तेरिति भावः। 'पा पाने' **पिबादेश इति**। शिद्विषये इति शेषः। पिबादेशस्य अदन्तत्वात् न लघूपधगुण इति भाष्ये स्पष्टम्। अनिडयम्। पपौ। पपतुः। पपुः। भारद्वाजनियमात् थलि वेट्। पपिथ—पपाथ। पपथुः। पप। पपौ। पपिव। पपिम। क्रादिनियमादिट्। पाता। पास्यति। पिबतु। अपिबत्। पिबेत्। आशीर्लिङि 'एर्लिङि' इत्येत्त्वमभिप्रेत्याह। **पेयादिति** ॥ 'गातिस्था' इति सिचो लुगित्यभिप्रेत्याह। **अपादिति** ॥ अपाताम्। अपुः। अपाः। अपातम्। अपात। अपाम्। अपाव। अपाम। अपास्यत्। **घ्रा गन्धोपादाने** ॥ 'पाघ्राध्मा' इति शिद्विषये जिघ्रादेशः। तदाह। **जिघ्रतीति** ॥ अनिडयम्। जघ्रौ। जघ्रतुः। जघ्रुः। भारद्वाजनियमात् थलि वेट्। जघ्रिथ–जघ्राथ। जघ्रथुः। जघ्र। जघ्रौ। जघ्रिव। जघ्रिम। क्रादिनियमादिट्। घ्राता। घ्रास्यति। जिघ्रतु। अजिघ्रत्। जिघ्रेत्। आशीर्लिङि 'वाऽन्यस्य संयोगादेः' इत्येत्त्वविकल्पं मत्वा आह। **घ्रायात्–घ्रेयादिति** ॥ 'विभाषा घ्राधेट्' इति सिचो वा लुक्। लुगभावपक्षे आदन्तत्वात्सगिटौ। तदाह। **अघ्रासीदिति** ॥ ध्माधातुरनिट्। 'पाघ्राध्मा' इति शिद्विषये

अघ्रात्। ध्मा ९२७ शब्दाग्निसंयोगयोः। धमति। ष्ठा ९२८ गतिनिवृत्तौ। तिष्ठति। स्थादिष्वभ्यासेन—' (सू २२७७) इति षत्वम्। अधितष्ठौ। 'उपसर्गात्—' (सू २२७०) इति षत्वम्। अधिष्ठाता। स्थेयात्। म्ना ९२९ अभ्यासे। मनति। दाण् ९३० दाने। प्रणियच्छति। देयात्। अदात्। हृ ९३१ कौटिल्ये। ह्वरति।

२३७९। ऋतश्च संयोगादेर्गुणः। (७-४-१०)

ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्यात्लिटि। किदर्थमपीदं परत्वाण्णल्यपि भवति। रपरत्वम्। उपधावृद्धिः। जह्वार। जह्वरतुः। जह्वरुः। जह्वर्थ। ह्वर्ता। 'ऋद्धनोः स्ये' (सू २३६६) ह्वरिष्यति।

धमादेशः। तदाह। **धमतीति**॥ दध्मौ। दध्मतुः। दध्मुः। दध्मिथ—दध्माथ। दध्मथुः। दध्म। दध्मौ। दध्मिव। दध्मिम। ध्माता। ध्मास्यति। धमतु। अधमत्। धमेत्। ध्मायात्—ध्मेयात्। अध्मासीत्। अध्मास्यत्। ष्ठाधातुः षोपदेशः। कृतष्टुत्वनिर्देशः। शिद्विषये 'पाघ्रा' इति तिष्ठादेशः। तदाह। **तिष्ठतीति**॥ तस्थौ, अधितष्ठावित्यत्र इणकवर्गाभ्यां परत्वाभावेऽपि षत्वमाह। **स्थादिष्विति**॥ तस्थतुः। तस्थुः। तस्थिथ। तस्थाथ। तस्थथुः। तस्थ। तस्थौ। तस्थिव। तस्थिम। स्थाता। अधिष्ठातेत्यत्र 'सात्पदाद्योः' इति षत्वनिषेधमाशङ्क्याह। **उपसर्गादिति। षत्वमिति**॥ स्थास्यति। तिष्ठतु। अतिष्ठत्। तिष्ठेत्। आशीर्लिङि संयोगादित्वेऽपि घुमास्थादेरन्यत्वाभावादेत्त्वविकल्पो न। किन्तु 'एर्लिङि' इति नित्यमेव एत्त्वम्। तदाह। **स्थेयादिति**॥ 'गातिस्था' इति सिचो लुक्। अस्थात्। अस्थास्यत्। **म्ना अभ्यासे इति**॥ अयमप्यनिट्। 'पाघ्रा' इति शिद्विषये मनादेशः। तदाह। **मनतीति**॥ मम्नौ। मम्नतुः। मम्नुः। मम्निथ—मम्नाथ। मम्नथुः। मम्न। मम्नौ। मम्निव। मम्निम। म्नाता। म्नास्यति। मनतु। अमनत्। मनेत्। म्नायात्—म्नेयात्। अम्नासीत्। अम्नास्यत्। **दाण् दाने इति**॥ अयमप्यनिट्। 'पाघ्रा' इति शिद्विषये यच्छादेशः। **प्रणियच्छतीति**॥ 'नेर्गद' इति णत्वम्। ददौ। ददतुः। ददुः। ददिथ—ददाथ। ददथुः। दद। ददौ। ददिव। ददिम। दाता। दास्यति। यच्छतु। अयच्छत्। यच्छेत्। आशीर्लिङि 'एर्लिङि' इत्येत्त्वम् मत्वा आह। **देयादिति**॥ 'गातिस्था' इति सिचो लुकं मत्वा आह। **अदादिति। ह्वृ कौटिल्ये इति**॥ अयमप्यनिट्। **ह्वरतीति**॥ शपि गुणे रपरत्वम्। **ऋतश्च। लिटीति**॥ 'दयतेर्दिगि लिटि' इत्यतः तदनुवृत्तेरिति भावः। ननु तिप्सिप्मिप्सु अकृत्सार्वधातुकयोरित्येव गुणे सिद्धे किमर्थमिदमित्यत आह। **किदर्थमपीदमिति**॥ अतुसादिकिदर्थं णलाद्यकिदर्थञ्चेत्यर्थः। ननु अस्य गुणस्य अतुसादिषु चरितार्थत्वात् णलि 'अचो ञ्णिति' इति वृद्धिप्रसङ्गात्कथम् णलि अयं गुण इत्यत आह। **परत्वाण्णल्यपि भवतीति**॥ 'अचो ञ्णिति' इति वृद्ध्यपेक्षया अस्य गुणस्य परत्वादित्यर्थः। तर्हि जह्वार इति कथमित्यत

२३८०। गुणोऽर्तिसंयोगाद्योः। (७-४२९)

अर्तेः संयोगादेर्ऋदन्तस्य च गुणः स्याद्यकि यादावार्धधातुके लिङि च। ह्वर्यात्। अह्वार्षीत्। अह्वार्ष्टाम्। स्वृ ९३२ शब्दोपतापयोः। 'स्वरति-सूति—' (२२७९) इति वेट्। सस्वरिथ–सस्वर्थ। वमयोस्तु

२३८१। श्नुकः किति। (७-२-११)

श्निञ एकाच उगन्ताच्च परयोर्गित्कितोरिण्नस्यात्। परमपि स्वरत्यादि विकल्पम्बाधित्वा पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादनेन निषेधे प्राप्ते क्रादिनि-

---

आह। **उपधावृद्धिरिति**॥ 'अत उपधायाः' इत्यनेनेति शेषः। **जह्वर्थेति**॥ क्रादिनियमप्राप्तस्य इटः 'अचस्तास्वत्' इति 'ऋतो भारद्वाजस्य' इति च निषेधादिति भावः। जह्वरथुः। जह्वर। जह्वार–जह्वर। जह्वरिव। जह्वरिम। क्रादिनियमादिट्। ह्वरतु। अह्वरत्। ह्वरेत्। आशीर्लिङि हृग्रहोर्भश्छन्दसि इति हृग्रहोर्भः। हृयात् इति स्थिते कित्त्वाद्गुणनिषेधे प्राप्ते। **गुणोऽर्ति**॥ भौवादिकः जौहोत्यादिकश्च ऋधातुः अर्तीत्यनेन गृह्यते। लुका निर्देशस्तु न विवक्षितः। अङ्गस्येत्यधिकृतम्। 'रीङृतः' इत्यतः ऋत इत्यनुवर्तते। तच्च अङ्गविशेषणं तदन्तविधिः ऋदन्तस्याङ्गस्येति लभ्यते। संयोगादेरित्यपि तद्विशेषणम्। 'अकृत्सार्वधातुकयोः' इत्यतः असार्वधातुकग्रहणमनुवर्तते। आर्धधातुके इति लभ्यते। 'रिङ् शयग्लिङ्क्षु' इत्यतः यकि लिङीति च लभ्यते। 'अयङि य्वि किङति' इत्यतः र्यातीति सप्तम्यन्तमनुवर्तते। आर्धधातुकविशेषणत्वात्तदादिविधिः। तदाह। **अर्तेरित्यादिना**॥ तथाच हृग्रह यात् इति स्थिते गुणे रपरत्वे रूपमाह। **ह्वर्यादिति। अह्वार्षीदिति**॥ सिचि वृद्धिः रपरत्वं षत्वम्। अह्वरिष्यत्। **स्वृ शब्दोपतापयोरिति**॥ अयमप्यनिट्। स्वरति। लिटि तु किल्यपि गुणः। णलि तु कृते गुणे रपरत्वे उपधावृद्धिः। सस्वार। सस्वरतुः। सस्वरुः। थलि तु क्रादिनियमप्राप्तस्य इटः 'अचस्तास्वत्' इति 'ऋतो भारद्वाजस्य' इति च नित्यनिषेधे प्राप्ते आह। **स्वरतिसूतीति–वेडिति। सस्वरिथ–सस्वर्थेति**॥ सस्वरथुः। सस्वर। सस्वार–सस्वर। इत्यपि ज्ञेयम्। **वमयोस्त्विति**॥ क्रादिनियमान्नित्यमिडित्यन्वयः। अत्र इण्निषेधं शङ्कितुमाह। **श्नुकः किति**॥ श्निञ्श्च उकश्चेति समाहारद्वन्द्वात् षष्ठी। उक् प्रत्याहारः। अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणतम् ऋता विशेष्यते। तदन्तविधिः। 'एकाच उपदेशे' इत्यतः एकाच इत्यनुवृत्तं इगन्तेऽन्वेति। 'नेड्वशिकृति' इत्यतो नेडिति। किङतीति सप्तमी षष्ठ्यर्थे। ग्च क्च क्वौ तौ इतौ यस्येति विग्रहः। गकारस्य चर्त्वेन निर्देशः। तदाह। **श्निञ एकाचः इत्यादिना**॥ गकारप्रश्लेषः किम्। भूष्णुः। 'ग्लाजिस्थश्च गस्नुः' इति चकाराद्भूधातोः गस्नुः। तस्य गित्त्वादीन्न। कित्त्वे तु स्थास्नुरित्यत्र 'घुमास्था' इति ईत् स्यात्। इण्नस्यादित्यनन्तरं अनेन निषेधे प्राप्ते इत्यन्वयः। नन्वियं शङ्का न युज्यते। 'श्नुकः किति' इति निषेधम्बाधित्वा परत्वात् 'स्वरतिसूतीति' विकल्पस्य प्राप्तेरित्यत आह। **परमपीत्यादिसामर्थ्यादित्यन्तम्**॥ पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात्परमपि स्वरत्यादिविकल्पम्बाधित्वा अनेन

यमान्नित्यमिट्। सस्वरिव। सस्वरिम। परत्वात् 'ऋद्धनोः स्ये' (सू २३६६) इति नित्यमिट्। स्वरिष्यति। स्वर्यात्। अस्वारीत्। अस्वारिष्टाम्। अस्वार्षीत्। अस्वार्ष्टाम्। स्मृ ९३३ चिन्तायाम्। हृ ९३४ संवरणे। सृ ९३५ गतौ। क्रादित्वान्नेट्। ससर्थ। ससृव। रिङ्। स्रियात्। असार्षीत्। असार्ष्टाम्।

२३८२। सर्तिशास्त्यर्तिभ्यश्च। (३-१-५६)

एभ्यश्च्लेरङ् स्यात्कर्तरि लुङि। इह लुप्तशपा शासिना साहचर्यात् 'सर्त्यर्ती' जौहोत्यादिकावेव गृह्येते। तेन भ्वाद्योर्नाङ्। शीघ्रगतौ तु

निषेधे प्राप्ते इत्यन्वयः। आर्धधातुकस्येडित्यादिविधिकाण्डात्प्रागेव 'नेड्वशि कृति' इत्यादिप्रतिषेधकाण्डारम्भसामर्थ्यात् 'स्वरति' इति विकल्पोऽप्यनेन बाध्यते इत्यर्थः। परमपीत्यादिः प्राप्ते इत्यन्तः शङ्काग्रन्थः। परिहरति। **क्रादिनियमान्नित्यमिडिति** ॥ प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावान् इण्निषेधः स लिटि चेत् तर्हि क्रादिभ्य एवेत्युक्तत्वादिति भावः। लुटि स्वरिता–स्वर्ता। लृटि स्ये 'स्वरति इति विकल्पन्निरस्यति। **परत्वादिति** ॥ स्वरतु। अस्वरत्। स्वरेत्। **स्वर्यादिति** ॥ आशीर्लिङि 'गुणोऽर्तिसंयोगाद्योः' इति गुणः। **अस्वारीदिति** ॥ 'स्वरति' इति इट्पक्षे अतो ल्रान्तेति वृद्धिरिति भावः। **अस्वार्षीदिति** ॥ इडभावे 'सिचि वृद्धिः' इति सिचि वृद्धिभावः। **स्मृ चिन्तायामिति** ॥ अयमप्यनिट्। स्मरति। लिटि 'ऋतश्च' इति कित्यपि गुणः। णलि तु गुणे उपधावृद्धिः। सस्मार। सस्मरतुः। सस्मरुः। ऋदन्तत्वाद्भारद्वाजमतेऽपि क्रादिनियमप्राप्तस्य इटः थलि नित्यनिषेधः। सस्मर्थ। सस्मरथुः। सस्मर। सस्मार–सस्मर। सस्मरिव। सस्मरिम। स्मर्ता। लृटि स्ये 'ऋद्धनोः' इति इट्। स्मरिष्यति। स्मरतु। अस्मरत्। स्मरेत्। आशीर्लिङि 'गुणोऽर्ति' इति गुणः। स्मर्यात्। सिचि वृद्धौ रपरत्वम्। अस्मार्षीत्। अस्मरिष्यत्। **हृ संवरणे इति** ॥ अयमपि स्मृधातुवत्। **सृ गताविति** ॥ ऋदन्तोऽयमनिट्। सरति। लिटि संयोगादित्वाभावात् ऋतश्चेति गुणो न। ससार। सस्रतुः। सस्रुः। **क्रादित्वान्नेडिति** ॥ सृधातोः क्रादिस्थत्वादिति भावः। **ससर्थेति** ॥ क्रादित्वात्थल्यपि नित्यं निषेध इति भावः। सस्रथुः। सस्र। ससार–ससर। सस्रव। सस्रम। इत्यपि ज्ञेयम्। सर्ता। लृटि 'ऋद्धनोः' इति इट् सरिष्यति। सरतु। असरत्। सरेत्। आशीर्लिङि संयोगादित्वाभावात् 'गुणोऽर्ति' इति न गुणः। 'रिङ् शयग्लिङ्क्षु' इति रिङित्याह। **रिङिति। स्रियादिति** ॥ रीङि प्रकृते रिङ्विधिसामर्थ्यान्नदीर्घ इति भावः। **असार्षीदिति** ॥ सिचि वृद्धौ रपरत्वम्। अत्र च्लेरङ्माशङ्क्यितुमाह। **सर्ति** ॥ च्लिलुङीत्यनुवर्तते। 'णिश्रिद्रुस्रुभ्यः' इत्यतः कर्तरि चङिति। तदाह। **एभ्यः इति** ॥ ततश्च प्रकृते असार्षीदित्यत्र अङ् स्यादिति शङ्का सूचिता। ताम्परिहरति। **इह लुप्तेत्यादिना** ॥ इह अङ्विधौ शास्तीत्यनेन लुप्तविकरणः शासिर्गृह्यते इति निर्विवादम्। तस्य विकरणान्तराभावात्। एवञ्च

'पाघ्राध्मा' (सू २३६०) इति शिति धौरादेशः। धावति। ऋ ९३६ गतिप्रापणयोः। ऋच्छति।

२३८३। ऋच्छत्यृताम्। (७-४-११)

तौदादिकस्य ऋच्छतेः ऋधातोः ऋतां च गुणः स्याल्लिटि। णलि प्राग्वदुपधावृद्धिः। आर। आरतुः। आरुः।

२३८४। इडत्त्यर्तिव्ययतीनाम्। (७-२-६६)

'अद्' 'ऋ' 'व्येञ्' एभ्यस्थलो नित्यमिट् स्यात्। आरिथ।

तत्साहचर्यात् सृधातुः ऋधातुश्च जौहोत्यादिकौ श्लुविकरणावेव गृह्येते इत्यर्थः। लुप्तविकरणत्वसाम्यादिति भावः। **तेनेति**॥ लुप्तविकरणयोरेव ग्रहणेन भ्वादिगणस्थयोः सृधातुऋधात्वोरङ् नेत्यर्थः। तदेवं सृधातोर्गतिसामान्यवृत्तेरुक्तानि रूपाणि। यदि शीघ्रगतौ सृधातुः तदा तस्य विशेषमाह। **शीघ्रगतौ त्विति। धौरादेश इति**॥ धौशब्दस्य धौरिति प्रथमान्तम्। धौ इत्यौकारान्त आदेश इत्यर्थः। 'पाघ्रा' इति सूत्रे सर्तीति श्तिपा निर्देशः। लुग्विकरणनिर्देशस्तु अविवक्षित इति भावः। 'सर्तेर्वेगितायाङ्गतौ धावादेशः' इति वार्तिकमभिप्रेत्येदम्। **धावतीति**॥ शपि सृधातोर्धौभावे आवादेशः। धावतु। अधावत्। धावेत्। **ऋ गतिप्रापणयोः**॥ अनिट्। 'पाघ्राध्मा' इति शिद्विषये ऋच्छादेशः। तदाह। **ऋच्छतीति**॥ ननु ऋ अतुस् इति स्थिते द्वित्वे उरदत्त्वे रपरत्वे हलादिशेषे 'अत आदेः' इति दीर्घे आ ऋ अतुस् इति स्थिते 'असंयोगात्' इति कित्त्वादुत्तरखण्डस्य गुणाभावे यणम्बाधित्वा परत्वादाद्गुणे अरतुरिति स्यादित्यतस्तत्र गुणविधानमाह। **ऋच्छत्यृताम्**॥ 'दयतेर्दिगि लिटि' इत्यतो लिटीति 'ऋतश्च संयोगादेर्गुण' इत्यतो गुण इति चानुवर्तते। ऋच्छति ऋ ऋत् एषान्द्वन्द्वाद्बहुवचनम्। बहुवचनादेव ऋकारप्रश्लेषो गम्यते। प्रश्लिष्टेन च ऋकारेण ऋधातुरेव गृह्यते। ऋवर्णान्तधातुग्रहणे 'ऋतश्च संयोगादेर्गुणः' इत्यस्य वैयर्थ्यात्। 'ऋच्छ गतीन्द्रियप्रळयमूर्तिभावेषु' इति तौदादिकस्य ऋच्छतीति श्तिपा निर्देशः। भौवादिकस्य धातोस्तु ऋग्रहणेनैव सिद्धेः। तदाह। **तौदादिकस्य ऋच्छतेरित्यादिना**॥ किदर्थमपीदं सूत्रम्। **णलि प्राग्वदिति**॥ 'हृञ् कौटिल्ये' इत्यत्र उक्तया रीत्या कित्सु चरितार्थोऽप्ययङ्गुणः 'अचो ञ्णिति' इति वृद्ध्यपेक्षया परत्वात् णल्यपि भवति। ततो रपरत्वे उपधावृद्धिरित्यर्थः। **आरेति**॥ ऋधातोर्लिटि तिपो णलि द्वित्वे उरदत्त्वे हलादिशेषे 'अत आदेः' इति दीर्घे उत्तरखण्डस्य वृद्धौ रपरत्वे सवर्णदीर्घ इति भावः। **आरतुरिति**॥ पूर्ववत् द्वित्वादौ आ ऋ अतुसिति स्थिते कित्त्वाद्गुणनिषेधे प्राप्ते 'ऋच्छत्यृताम्' इति गुणे रपरत्वे सवर्णदीर्घ इति भावः। आरुरित्यप्येवम्। थलि तु क्रादिनियमप्राप्तस्य इटः 'अचस्तास्वत्' इति निषेधे ऋदन्तत्वात् भारद्वाजमतेऽपि प्राप्ते आह। **इडत्त्यर्ति**॥ पञ्चम्यर्थे षष्ठी। 'अचस्तास्वत्' इत्यतः थलीत्यनुवर्तते। 'विभाषा सृजिदृशोः' इति पूर्वसूत्राद्विभाषाग्रहणमस्वरितत्वान्नानुवर्तते। **तदाह। अद् ऋ इत्यादिना**॥ आर्धधातुकस्ये-

अर्ता । अरिष्यति । अर्यात् । आर्षीत् । आर्ष्टाम् । गृ ९३७ घृ ९३८ सेचने । गरति । जगार । जगर्थ । जग्रिव । रिङ् । ग्रियात् । अगार्षीत् । ध्वृ ९३९ हूर्च्छने । स्रु ९४० गतौ । सुस्रोथ । सुस्रुव । स्रूयात् । 'णिश्रि—' (सू २३१२) इति चङ् । लघूपधगुणादन्तरङ्गत्वादुवङ् । असुस्रुवन् । षु ९४१ प्रसवैश्वर्ययोः । प्रसवोऽभ्यनुज्ञानम् । सुषोथ–सुषविथ । सुषुविव । सोता ।

डित्यनुवृत्तौ पुनरिङ्ग्रहणन्तु 'न वृङ्भ्यश्चतुर्भ्यः' इत्यतो नेत्यनुवृत्तिनिवृत्तये इत्याहुः । **आरिरथेति ॥** आरथुः । आरुः । आर । आरिव । आरिम । क्रादिनियमादिट् । **अरिष्यतीति ॥** 'ऋद्धनोः' इति इट् । ऋच्छतु । आर्छत् । **अर्यादिति ॥** 'गुणोऽर्ति' इति गुणे रपरत्वमिति भावः । **आर्षीदिति ॥** सिचि वृद्धिः । 'सर्तिशास्त्यर्तिभ्यश्च' इति अङ् तु न । तत्र भौवादिकस्य ऋधांतोर्न ग्रहणमित्यनुपदमेवोक्तेरिति भावः । आरिष्यत् । 'ऋद्धनोः स्ये' इति इट् । 'गृ घृ सेचने' । अनिटौ । **गरतीति ॥** जगार । असंयोगादित्वात् 'ऋतश्च' इति गुणो न । जग्रतुः । जग्रुः । क्रादिनियमेन इटि प्राप्ते अचस्तास्वदिति नेट् । ऋदन्तत्वाद्भारद्वाजमतेऽपि नेट् । तदाह । **जगर्थेति ॥** जग्रथुः । जग्र । जगार । जगर । **जग्रिवेति ॥** क्रादिनियमादिट् । जग्रिम । गर्ता । गरिष्यति । 'ऋद्धनोः' इति इट् । गरतु । अगरत् । गरेत् । **रिङीति ॥** आशीर्लिङि असंयोगादित्वात् 'गुणोर्ति' इति गुणाभावे 'रिङ् शयग्लिङ्क्षु' इति रिङित्यर्थः । **ग्रियादिति ॥** रीङि प्रकृते रिङ्विधेर्न दीर्घः । **अगार्षीदिति ॥** सिचि वृद्धौ रपरत्वम् । अगार्ष्टाम् । अगरिष्यत् । 'ऋद्धनोः' इति इट् । घृधातोस्तु भौवादिकस्य घृतं, घर्मः, घृणा, इत्यत्रैव प्रयोगः, नान्यत्रेति 'तृज्वत्क्रोष्टुः' इति सूत्रे भाष्ये स्पष्टम् । **ध्वृ हूर्च्छने इति ॥** हूर्च्छनङ्कुटिलीभवनम् । ध्वरति । दध्वार । 'ऋतश्च' इति गुणः । दध्वरतुः । दध्वरुः । थलि 'अचस्तास्वत्' इति क्रादिनियमप्राप्त इट् न । ऋदन्तत्वाच्च भारद्वाजमतेऽपि नेट् । दध्वर्थ । दध्वरथुः । दध्वर । दध्वार–दध्वर । दध्वरिव । दध्वरिम । क्रादिनियमादिट् । ध्वर्ता । 'ऋद्धनोः' इति इट् । ध्वरिष्यति । ध्वरतु । अध्वरत् । ध्वरेत् । आशीर्लिङि 'गुणोऽर्ति' इति गुणः । ध्वर्यात् । अध्वार्षीत् । अध्वरिष्यत् । 'स्रु गतौ' । अनिट् । स्रवति । सुस्राव । अतुसादौ कित्त्वात् गुणाभावे उवङ् । सुस्रुवतुः । सुस्रुवुः । क्रादित्वान्नेट् । तदाह । **सुस्रोथेति ॥** सुस्रुवथुः । सुस्रुव । सुस्राव–सुस्रव । **सुस्रुवेति ॥** क्रादित्वान्नेट् । सुस्रुमेत्यपि ज्ञेयम् । स्रोता । स्रोष्यति । स्रवतु । अस्रवत् । स्रवेत् । **स्रूयादिति ॥** 'अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः । लुङि विशेषमाह । **णिश्रीति चङीति ॥** 'चङि' इति द्वित्वमित्यपि द्रष्टव्यम् । नन्वसुस्रु अ त् इति स्थिते रेफादुत्तरस्य उकारस्य सार्वधातुकार्धधातुकयोरिति गुणस्य चङ्निमित्तकस्य ङित्त्वान्निषेधेऽपि उवङपेक्षया परत्वात् तिपन्निमित्तीकृत्य रेफादुकारस्य लघूपधगुणः स्यादित्यत आह । **लघूपधगुणादन्तरङ्गत्वादुवङीति ॥** बहिर्भूततिबपेक्षत्वाल्लघूपधगुणः बहिरङ्गः । अन्तर्गतचङपेक्षत्वादुवङन्तरङ्गः । अतः उवङेव भवति । परादन्तरङ्गस्य बलवत्त्वादिति भावः । **असुस्रुवदिति ॥** अस्रोष्यत् । **षु प्रसवेति ॥** अत्र

२३८५। स्तुसुधूञ्भ्यः परस्मैपदेषु। (७-२-७२)

एभ्यः सिच इट् स्यात्परस्मैपदेषु। असावीत्। पूर्वोत्तराभ्यां त्रिङ्ङ्थां साहचर्यात्सुनोतेरेव ग्रहणमिति पक्षे असौषीत्। श्रु ९४२ श्रवणे।

२३८६। श्रुवः श्रृ च। (३-१-७४)

श्रुवः श्रृ इत्यादेशः स्यात् श्नुप्रत्ययश्च। शपोऽपवादः। श्नोर्ङित्त्वाद्धातोर्गुणो न। शृणोति। शृण्वतः।

२३८७। हुश्नुवोः सार्वधातुके। (६-४-८७)

जुहोतेः श्नुप्रत्ययान्तस्यानेकाचोऽङ्गस्य चासंयोगपूर्वोवर्णस्य यण्स्यादजादौ सार्वधातुके। उवङोऽपवादः। शृण्वन्ति। शृणोमि। शृण्वः—शृणुवः।

प्रसवशब्दस्य गर्भमोचनपरत्वभ्रमं वारयति। **प्रसवोऽभ्यनुज्ञानमिति** ॥ 'ओं प्रणयेति ब्रह्मा प्रसौति' इत्यादौ तथा दर्शनादिति भावः। षोपदेशोऽयम्। शपि उवङम्बाधित्वा परत्वात्सार्वधातुकार्धधातुकयोरिति गुणः। सवति। सुषाव। अनुसादौ। कित्त्वाद्गुणाभावे उवङ्। सुषुवतुः। सुषुवुः। भारद्वाजनियमात्थलि वेट्। तदाह। **सुषविथ-सुषोथेति** ॥ अकित्त्वाद्गुण इति भावः। सुषुवथुः। सुषुव। सुषाव-सुषव। वमयोस्तु क्रादिनियमान्नित्यमिट्। तदाह। **सुषुविवेति** ॥ कित्त्वाद्गुणाभावे उवङ्। **सोतेति** ॥ सोष्यति। सवतु। असवत्। सवेत्। सूयात्। लुङि असौषीदिति प्राप्ते। **स्तुसुधूञ्भ्यः** ॥ 'इङित्यर्ति' इत्यतः इडित्यनुवर्तते। 'अञ्जेः सिचि' इत्यतः सिचीत्यनुवृत्तं षष्ठ्या विपरिणम्यते। तदाह। **एभ्यः सिचः इति। असावीदिति** ॥ सिचि वृद्धौ 'इट ईटि' इति सिज्लोपः। **पूर्वोत्तराभ्यामिति** ॥ स्तुञ्धूञ्भ्यामित्यर्थः। **सुनोतेरिति** ॥ 'षुञ् अभिषवे' इति श्नुविकरणस्येत्यर्थः। **असौषीदिति** ॥ इडभावे 'सिचि वृद्धिः' इति भावः। असोष्यत्। **श्रु श्रवणे इति** ॥ उदन्तोऽयमनिट्। **श्रुवः श्रृ च** ॥ श्रृ इति लुप्तप्रथमाकम्। चकारेण 'स्वादिभ्यः श्नुः' इति सूत्रस्थः श्नुः समुच्चीयते। तदाह। **श्रुवः श्रृ इत्यादेशः स्यात् श्नुप्रत्ययश्चेति** ॥ **शपोऽपवादः इति** ॥ अनेन शब्विषये कर्त्रर्थसार्वधातुक एवास्य प्रवृत्तिः सूचिता। **श्नोर्ङित्त्वादिति** ॥ सार्वधातुकमपीदित्यनेनेति भावः। **शृणोतीति** ॥ तिपमाश्रित्य श्नोर्गुणः। तसादीनां ङित्त्वात् श्नोर्न गुणः। तदाह। **शृण्वतः इति** ॥ शृण्व अन्तीति स्थिते अन्तेः ङित्त्वात् श्नोर्गुणनिषेधे सति उवङि प्राप्ते। **हुश्नुवोः** ॥ श्नोः प्रत्ययत्वात्तदन्तग्रहणम्। 'इणो यण्' इत्यतः यण् इत्यनुवर्तते। 'अचि श्नु' इत्यतः अचीति सार्वधातुकविशेषणत्वात्तदादिविधिः। 'एरनेकाचः' इति सूत्रं एरितिवर्जमनुवर्तते। 'ओः सुपि' इत्यतः ओरिति च षष्ठ्यन्तम्। तदाह। **जुहोतेरित्यादिना** ॥ असंयोगपूर्वस्येति तु उकारस्य विशेषणं नतु श्नुविशेषणम्। तेन आप्नुवन्तीत्यत्र यण् न। हुश्नुवोः

शृण्मः—शृणुमः । शुश्रोथ । शुश्रुव । शृणु । शृणवानि । शृणुयात् । श्रूयात् । अश्रौषीत् । ध्रु ९४३ **स्थैर्ये** । ध्रवति । अयं कुटादौ गत्यर्थोऽपि । दु ९४४ द्रु ९४५ **गतौ** । दुद्रोथ—दुद्रविथ । दुद्रुविव । दुद्रोथ । दुद्रुव । '**णिश्रि—**' (सू २३१२) इति चङ् । अदुद्रुवत् । जि ९४६ ज्रि ९४७ **अभिभवे** । अभिभवो न्यूनीकरणं न्यूनीभवनं च । आद्ये सकर्मकः । **शत्रून् जयति** ।

किम् । योयुवति । अत्र युधातोर्यङ्लुकि अदभ्यस्तादिति झेरदादेशे योयु अति इति स्थिते अनेकाजङ्गावयवस्य असंयोगपूर्वस्य उकारस्य यण् न भवति । अत्र भाष्ये 'बहुलं छन्दसि' इत्यनुवृत्तौ 'यङोऽचि च' इति विहितस्य यङ्लुकश्छान्दसत्वात् । 'छन्दस्युभयथा, इत्यार्धधातुकत्वाश्रयणादेव योयुवतीत्यत्र यणभावसिद्धेः हुश्नुग्रहणम्भाषायामपि क्वाचित्-यङ्लुकं ज्ञापयतीत्युक्तम् । तथाच भाषायामपि अनेकाचः असंयोगपूर्वकोकारान्ताद्योयुवतीत्यादौ युङ्लुक्सिद्धेः तत्र यणभावार्थं हुश्नुग्रहणमिति फलति । ज्ञापकस्य सामान्यापेक्षत्वादुदाहृतोवर्णान्तादन्यत्रापि क्वचिद्यङ्लुक् सिद्ध्यति । एतदेवाभिप्रेत्य भाष्ये 'हुश्नुग्रहणं ज्ञापयति भाषायामपि यङ्लुक् भवतीत्युक्ता किमेतस्य ज्ञापने प्रयोजनं, वेभिदीति चेच्छिदीति इत्येतत्सिद्धम्भवति' इत्युक्तम् । अत्र भिदिच्छिद्योरेव ग्रहणादुदाहृतोकारान्तादन्यत्र भवन् यङ्लुक् आभ्यामेव भवति, नत्वन्यत्रेत्याहुः । भिदिच्छिद्योर्ग्रहणम्प्रदर्शनमात्रमित्यन्ये । **शृण्वन्तीति** ॥ शृणुथः । शृणुथेत्यपि ज्ञेयम् । 'लोपश्चास्यान्यतरस्यां म्वोः' इत्यभिप्रेत्याह । **शृण्वः इत्यादि** ॥ शुश्राव । शुश्रुवतुः । शुश्रुवुः । थलि वमयोश्च क्रादित्वान्नित्यमिण्निषेधः । तदाह । **शुश्रोथ । शुश्रुवेति** ॥ शुश्रुमेत्यपि ज्ञेयम् । श्रोता । श्रोष्यति । शृणोतु-शृणुतात् । शृणुताम् । शृण्वन्तु । 'उतश्च प्रत्ययादसंयोगपूर्वात्" इति हेर्लुक मत्वा आह । **शृण्विति** ॥ शृणुतात् । शृणुतम् । शृणुत । **शृणवानीति** ॥ आटः पित्त्वेन ङित्त्वाभावाद्गुण इति भावः । ध्रु **स्थैर्ये इति** ॥ अनिट् । ध्रवति । दुध्राव । दुध्रुवतुः । दुध्रुवुः । भारद्वाजनियमात्थलि वेट् । दुध्रविथ—दुध्रोथ । दुध्रुवथुः । दुध्रुव । दुध्राव—दुध्रव । दुध्रुविव । दुध्रुविम । क्रादिनियमादिट् । ध्रोता । ध्रोष्यति । ध्रवतु । अध्रवत् । ध्रवेत् । ध्रूयात् । अध्रौषीत् । अध्रोष्यत् । **द्रु द्रु गताविति** ॥ अनिटौ । द्रवति । द्रवति । दुद्राव । दुद्रुवतुः । दुद्रुवुः । दुद्राव । दुद्रुवतुः । दुद्रुवुः । अस्य भारद्वाजनियमात्थलि वेडित्याह । **दुद्रोथ-दुद्रविथेति** ॥ दुद्रुवथुः । दुद्रुव । दुद्राव-दुद्रव । वमयोः क्रादिनियमादिडित्याह । **दुद्रुविवेति** ॥ द्वितीयस्य क्रादित्वात्थलि नित्यं नेट् । तदाह । **दुद्रोथेति** ॥ दुद्रुवथुः । दुद्रुव । दुद्राव—दुद्रव । वमयोः क्रादित्वान्नेट् । तदाह । **दुद्रुवेति** ॥ द्रोता । द्रोता । द्रोष्यति । द्रोष्यति । द्रवतु । द्रवतु । अद्रवत् । अद्रवत् । द्रवेत् । द्रवेत् । द्रूयात् । द्रूयात् । अद्रौषीत् । **चङीति** ॥ द्रुधातोरिति भावः । **अदुद्रुवदिति** ॥ चङीति द्वित्वम् । ङित्त्वाद्गुणनिषेधे उवङिति भावः । अद्रोष्यत् । अद्रोष्यत् । **जि ज्रि अभिभवे इति** ॥ अनिट् । **न्यूनीकरणमिति** ॥ नीचीकरणमित्यर्थः । **न्यूनीभवनमिति** ॥ क्षीणबलीभवनमित्यर्थः । **शत्रून् जयतीति** ॥ नीचीकरोतीत्यर्थः । ननु

द्वितीये त्वकर्मकः। 'अद्ध्ययनात्पराजयते'। अद्ध्येतुं ग्लायतीत्यर्थः। 'विपराभ्यां जेः' (सू २६८५) इति तङ्। 'पराजेरसोढः'। (सू ५८९) इत्यपादानत्वम्।

अथ डीङन्ता ङितः। ष्मिङ् ९४८ ईषद्धसने। स्मयते। सिष्मिये। सिष्मियिढ्वे। सिष्मियिध्वे। गुङ् ९४९ अव्यक्ते शब्दे। गवते जुगुवे। गाङ् ९५० गतौ। गाते। गाते। गाते। इट एत्त्वे कृते वृद्धिः। गै। लङ इटि। अगे। गेत। गेयाताम्। गेरन। गासीष्ट। 'गाङ्कुटादिभ्यः—'

जिधातोः परस्मैपदित्वात् पराजयत इति कथमात्मनेपदमित्यत आह। **विपराभ्यामिति**॥ ननु पराजयस्य अद्ध्ययनेन संश्लेषविश्लेषयोरभावात् कथम्पराजयम्प्रत्यध्ययनस्यापादानत्वमित्यत आह। **पराजेरिति**॥ जयति। लिटि 'सन्लिटोर्जेः' इति कुत्वम्। जिगाय। जिग्यतुः। जिग्युः। भारद्वाजनियमात्थलि वेट्। जिगयिथ-जिगेथ। जिग्यथुः। जिग्य। जिगाय-जिगय। वमयोः क्रादिनियमादिट्। जिग्यिव। जिग्यिम। जेता। जेष्यति। जयतु। अजयत्। जयेत्। जीयात्। अजैषीत्। अजैष्टाम्। अजैषुः। अजैषीः। अजैष्टम्। अजैष्ट। अजैषम्। अजैष्व। अजैष्म। अजेष्यत्। इति घेडादयोऽजन्ताः परस्मैपदिनः। **अथ डीङन्ता ङितः इति**॥ 'डीङ् विहायसा गतौ' इत्येतत्पर्यन्ताः ङित्त्वादात्मनेपदिन इत्यर्थः। ष्मिङ् ईषद्धसने। षोपदेशोऽयम्। **स्मयते इति**॥ धात्वादेरिति षस्य सः। **सिष्मिये इति**॥ कित्त्वाद्गुणाभावे इयङ्। आदेशसकारत्वादुत्तरखण्डे सस्य षः। सिष्मियाते। सिष्मियिरे। क्रादिनियमादिट्। सिष्मियिषे। सिष्मियाथे। 'विभाषेटः' इति मत्वा आह। **सिष्मियिढ्वे-सिष्मियिध्वे इति**॥ स्मेता। स्मेष्यते। स्मयताम्। अस्मयत। स्मयेत। स्मेषीष्ट। अस्मेष्ट। अस्मेष्यत। गुङ्धातुरनिट्। गुणः ओकारः अवादेश इति विशेषः। गाङ्धातुरनिट्। **गाते इति**॥ लटस्तादेशे शपि सवर्णदीर्घे टेरेत्त्वमिति भावः। आतामि तथैव रूपमाह। **गाते इति**॥ गा अ आतामिति स्थिते परत्वात् सवर्णदीर्घे अतः परस्य दीर्घाकारस्याभावात् 'आतो ङितः' इति इय् न भवति। झार्वापि तथैव रूपमाह। **गाते इति**॥ शपा सह आकारस्य सवर्णदीर्घे 'आत्मनेपदेष्वनतः' इति झेः अदादेशे टेरेत्वमिति भावः। गासे। गाथे। गाध्वे। लट उत्तमपुरुषैकवचने विशेषमाह। **इट इति**॥ गा अ इ इति स्थिते सवर्णदीर्घे सति इट एत्वे कृते 'वृद्धिरेचि' इति वृद्धौ गै इति रूपमित्यर्थः। गावहे। गामहे। लिटि अजादौ आल्लोपः। जगे। जगाते। जगिरे। क्रादिनियमादिट्। जगिषे। जगाथे। जगिध्वे। जगे। जगिवहे। जगिमहे। गाता। गास्यते। गाताम्। गाताम्। गाताम्। गास्व। गाथाम्। गाध्वम्। गै। गावहै। गामहै। अगात। अगाताम्। अगात। अगाथाः। अगाथाम्। अगाध्वम्। **लङ इटीति**॥ अगा अ इ इति स्थिते टिदादेशत्वाभावादेत्वाभावे सवर्णदीर्घे आद्गुणे अगे इति रूपमित्यर्थः। अगावहि। अगामहि। **गेतेति**॥ लिङस्तादेशे शपि गा अ त इति स्थिते सवर्णदीर्घे सीयुटि सलोपे यलोपे 'आद्गुण' इति भावः। **गेयातामिति**॥ गा अ आतामिति स्थिते सवर्णदीर्घे

(सू २४६१) इति सूत्रे इङादेशस्यैव गाङो ग्रहणं न त्वस्य । तेनाङित्त्वात् 'घुमास्था—' (२४६२) इतीत्त्वं न। अगास्त । आदादिकोऽयमिति हरदत्तादयः । फले तु न भेदः । कुङ् ९५१ घुङ् ९५२ उङ् ९५३ डुङ् ९५४ शब्दे । अन्ये तु 'उङ् कुङ् खुङ् गुङ् घुङ् डुङ्' इत्याहुः । कवते । चुकुवे । घवते । अवते । ऊवे । वार्णादाङ्गं बलीयः (प ५६) इत्युवङ्। ततः सवर्णदीर्घः । ओता । ओष्यते । ओपीष्ट । औष्ट । ङवते । जुडुवे । ङोता । च्युङ् ९५५ ज्युङ् ९५६ प्रुङ् ९५७ प्लुङ् ९५८ गतौ ।

सियुटि सलोपे 'आद्गुण' इति भावः। **गेरन्निति** ॥ झस्य रन्भावे गा अ रन् इति स्थिते सवर्णदीर्घे सियुटि सलोपे यलोपे 'आद्गुण' इति भावः । गेथाः । गेयाथाम् । गेध्वम् । गेय । गेवहि गेमहि । आशीर्लिङि आह । **गासीष्टेति** ॥ गासीरन् । गासीष्ठाः । गासीयास्थाम् । गासीध्वम् । गासीय । गासीवहि । गासीमहि । ननु गासीष्टेत्यादौ 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति ञ्णिद्भिन्नप्रत्ययस्य ङित्त्वविधानेन सीयुडागमविशिष्टप्रत्ययस्य ङित्त्वात् 'घुमास्थागापाजहातिसां हलि' इति हलादौ क्ङिति विहितमीत्त्वं स्यादित्यत आह। **गाङ्कुटादिभ्यः इति सूत्रे इति** ॥ इङ इत्यनुवृत्तौ 'गाङ् लिटि' इति विहितस्य गाङादेशस्यैव गाङ्कुटादिसूत्रे ग्रहणं, नत्वस्य गाधातोरित्यर्थः । एतच्च 'गाङ् लिटि' इति सूत्रे भाष्ये स्पष्टम् । **तेनेति** ॥ गाङ्कुटादिसूत्रे प्रकृतस्य गाधातोरग्रहणेनेत्यर्थः । लुङ्याह । **अगास्तेति** ॥ अगासाताम् । अगासत । अगास्थाः । अगासाथाम् । अगाध्वम् । अगासि । अगास्वहि । अगास्महि । अगास्यत । **आदादिकोऽयमिति** ॥ ततश्च 'अदिप्रभृतिभ्यः शपः' इति शपो लुगिति भावः। **फले तु न भेदः इति** ॥ शपो लुकि सति, गाते, इत्यादेव रूपम् । तस्मिन्नसत्यपि गा अ ते इत्यादौ सवर्णदीर्घे सति तदेव रूपमिति न रूपभेद इत्यर्थः । **कुङ् घुङ् उङ् डुङ् शब्दे इति** ॥ चत्वारोऽपि ङितः । आद्यद्वितीयचतुर्थाः कवर्गप्रथमचतुर्थपञ्चमाद्याः । तृतीयस्तु केवलोवर्णः । **अन्ये त्विति** ॥ आद्यः केवलोवर्णो ङित् । इतरे तु पञ्च क्रमेण कवर्गाद्याः । तत्र कुङ्धातोरुदाहरति । **कवते इति** ॥ लिटि अजादौ कित्त्वाद्गुणाभावे उवङ् । तदाह । **चुकुवे इति** ॥ चुकुवाते । चुकुविरे । क्रादिनियमादिट् । चुकुविषे । चुकुवाथे । चुकुविध्वे । चुकुवे । चुकुविवहे । चुकुविमहे । कोता । कोष्यते । कवताम् । अकवत । कवेत । कोषीष्ट । अकोष्ट । अकोष्यत । एवं खवते इत्यादि । उङ्धातोराह । **अवते इति । ऊवे इति** ॥ उ उ ए इति स्थिते द्वितीयस्य उवर्णस्य उवङि कृते सवर्णदीर्घ इति भावः । ननु उवङः बहिर्भूतप्रत्ययापेक्षतया बहिरङ्गत्वादन्तरङ्गे सवर्णदीर्घे कृते ऊ ए इति स्थिते उवङि उवे इत्येवोचितमित्यत आह । **वार्णादिति** ॥ ऊवाते । ऊविरे । क्रादिनियमादिट् । ऊविषे । ऊवाथे । ऊविध्वे । ऊवे । ऊविवहे । ऊविमहे । **ओता, ओष्यते इति** ॥ आवत । अवेत । ओषीष्ट । औष्ट । औष्यत । इत्यपि ज्ञेयम् । डुङ्धातोर्लटि, ङवते, इति रूपमुक्तम् । सम्प्रति लिटि रूपमाह। **जुडुवे इति** ॥ 'कुहोश्चुः' इति ङकारस्य स्थानिनश्चुर्भवन् स्थानसाम्यस्य

'क्लुङ्' इत्येके । रुङ् ९५९ गतिरेषणयोः । रेषणं हिंसा । रुरुवे । रवितासे । धृङ् ९६० अवध्वंसने । धरते । दध्रे । मेङ् ९६१ प्रणिदाने । प्रणिदानं, विनिमयः प्रत्यर्पणं च । प्रणिमयते । 'नेर्गद—' (सू २२८५) इति णत्वम् । तत्र घुप्रकृतिमाङिति पठित्वा ङितो माप्रकृतेरपि ग्रहणस्येष्टत्वात् । देङ् ९६२ रक्षणे । दयते ।

२३८८ । दयतेर्दिगि लिटि । (७-४-९)

'दिग्यादेशेन द्वित्वबाधनमिष्यते' इति वृत्तिः । दिग्ये ।

पञ्चस्वभावादाभ्यन्तरप्रयत्नसाम्यस्य पञ्चस्वप्यविशिष्टत्वादल्पप्राणानुनासिक्यसाम्यात् ञकारः । प्रथमतृतीयौ तु न भवतः आनुनासिक्याभावात् । च्युङादयोऽप्युवर्णान्ता अनिटः कुङ्धातुवत् ज्ञेयाः । **रुङ् गतीति** ॥ सेट्कोऽयम् । 'ऊदृदन्तैर्यौतिरुक्षु' इत्यनिट्सु पर्युदासात् । तदाह । **रवितासे इति** ॥ धृङ्धातुरनिट् । **दध्रे इति** ॥ कित्त्वाद्गुणनिषेधे ऋकारस्य यण् । दध्राते । दध्रिरे । क्रादिनियमादिट् । दध्रिषे । दध्राथे । दध्रिध्वे । दध्रे । दध्रिवहे । दध्रिमहे । धर्ता । लृटि स्ये 'ऋद्धनोः' इति इटि धरिष्यते । धरताम् । अधरत । धरेत । आशीर्लिङि सीयुटि 'उश्च' इति कित्त्वान्न गुणः । धृषीष्ट । 'हूस्वादङ्गात्' इति सिचो लुक् । अधृत । अधृषाताम् । अधृषत । अधरिष्यत । मेङ् प्रणिदाने । **णत्वमिति** ॥ प्रणिदानशब्दे प्रणिमयते इत्यत्र च 'नेर्गद' इति णत्वमित्यर्थः । ननु प्रणिमयत इत्यत्र णत्वमिदन्न सम्भवति । शिद्विषये आत्वाभावेन, मारूपाभावात् । तथा प्रणिदानशब्देऽपि णत्वं न सम्भवति । तत्र देङः कृतात्वस्य लाक्षणिकदारूपत्वात् । 'गामादाग्रहणेष्वविशेषः' इत्याश्रित्य मेङोऽपि कृतात्वस्य णत्वविधौ ग्रहणे तु मीनातिमिनोत्योरात्त्वे प्रनिमाता प्रनिमास्यति इत्यत्रापि नेर्णत्वापत्तिरित्यत आह । **तत्रेति** ॥ तत्र 'नेर्गद' इति णत्वविधौ । घुमेत्यस्य स्थाने घुप्रकृतिमाङिति पठित्वा तत्र प्रकृतिशब्दस्य घुमाङ्प्रकृतिपरत्वमाश्रित्य घौ माङ्धातौ घुमाप्रकृतौ च परत इति पर्यवसानमाश्रित्य माप्रकृतेर्ङितो मेङ्धातोः कृतात्वस्यापि ग्रहणस्य भाष्यकृता इष्टत्वात् । (अभ्युपगतत्वादित्यर्थः) एवञ्च प्रणिमयते प्रणिदानमित्यत्र नाव्याप्तिः । मेङः कृतात्वस्य माप्रकृतित्वे सति ङित्त्वात् । नापि मीनातिमिनोत्योरात्त्वे प्रनिमाता प्रनिमास्यतीत्यत्र अतिव्याप्तिः । मारूपस्य ङित्त्वाभावादिति भावः । एतच्च घुसंज्ञासूत्रे भाष्ये स्थितम् । ममे । ममाते । ममिरे । क्रादिनियमादिट् । ममिषे । ममाथे । ममिध्वे । ममे । ममिवहे । ममिमहे । माता । मास्यते । मयताम् । अमयत । मयेत । मासीष्ट । अमास्त । अमास्यत । देङ्धातुर्मेङ्वत् । **दयतेर्दिगि** ॥ दिगीति लुप्तप्रथमाकम् । देङ्धातोः दिगि इत्यादेशः स्यात्लिटीत्यर्थः । ननु लिट एशादौ दिग्यादेशे कृते द्वित्वे सति दिदिग्ये इत्यादि स्यादित्यत आह । **दिग्यादेशेनेति** ॥ एतच्च भाष्ये स्पष्टम् । **वृत्तिरिति** ॥ भाष्यस्याप्युपलक्षणम् । क्रादिनियमादिट् । दिग्यिषे । दिग्याथे । दिग्यिध्वे । दिग्ये ।

२३८९ । स्थाघ्वोरिच्च । (१-२-१७)

अनयोरिदादेशः स्यात् सिच्च कित्स्यात् । अदित । अदिथाः । अदिषि । ष्यैङ् ९६३ गतौ । श्यायते । शश्ये । प्यैङ् ९६४ वृद्धौ । प्यायते । पप्ये । प्याता । त्रैङ् ९६५ पालने । त्रायते । तत्रे । पूङ् ९६६ पवने । पवते । पुपुवे । पविता । मूङ् ९६७ बन्धने । मवते । डीङ् ९६८ विहायसा गतौ । डयते । डिड्ये । डयिता । तॄ ९६९ प्लवनतरणयोः ।

२३९० । ऋत इद्धातोः (७-१-१००)

दिग्यिवहे । दिग्यिमहे । दाता । दास्यते । दयताम् । अदयत । दयेत । दासीष्ट । लुङि सिचि अदास् त इति स्थिते । **स्थाघ्वोरिच्च** ॥ 'असंयोगाल्लिट्' इत्यतः किदिति 'हनस्सिच्' इत्यतस्सिजिति चानुवर्तते । तदाह । **अनयोरित्यादिना** ॥ परस्मैपदेषु नेदं प्रवर्तते । तत्र 'गातिस्था' इति सिचो लुका लुप्तत्वात् । अत एव लिङ्सिचौ' इति सूत्रादात्मनेपदेष्विति नानुवर्तितम् । व्यावर्त्याभावात् । **अदितेति** ॥ इत्वे कृते 'हूस्वादङ्गात्' इति सिचो लुक् । त इत्यस्य डित्त्वादिकारस्य न गुणः । आतामादौ तु इत्वे कृतेऽपि सिचो न लुक् । झलि परत एव लुग्विधेः । सिचः कित्त्वादिकारस्य न गुणः । अदिषाताम् । अदिषत । अदिथाः । अदिषाथाम् । अदिढ्वम् **अदिषीति** ॥ अदिष्वहि । अदिष्महि । अदास्यत । इत्यपि ज्ञेयम् । **ष्यैङ् गतौ** ॥ **श्यायते इति** ॥ शपि आयादेशः । शिद्विषयत्वादात्वेनेति भावः । **शश्ये इति** ॥ एशि आत्वे आतो लोपः । शिश्याते । शिश्यिरे । क्रादिनियमादिट् । शिश्यिषे । शिश्याथे । शिश्यिध्वे । शिश्ये । शिश्यिवहे । शिश्यिमहे । श्याता । श्यास्यते । श्यायताम् । अश्यायत । श्यायेत । श्यासीष्ट । अश्यास्त । अश्यास्यत । प्यैङ्धातुरप्येवम् । त्रैङप्येवम् । **पूङ् पवने इति** ॥ सेट् । ऊदन्तानामनिट्सु पर्युदासात् । **पवते इति** ॥ शपि गुणः अवादेशः । **पुपुवे इति** ॥ कित्त्वाद्गुणाभावे उवङ् । पुपुवाते । पुपुविरे । पुपुविषे । पुपुवाथे । पुपुविध्वे । पुपुवे । पुपुविवहे । पुपुविमहे । पविता । पविष्यते । पवताम् । अपवत । पवेत । पविषीष्ट । अपविष्ट । अपविष्यत । मूङ्धातुरप्येवम् । **डीङ् विहायसा गताविति** ॥ आकाशेन गमने इत्यर्थः । सेडयम् । अनिट्सु डीङः पर्युदासात् । **डयते इति** ॥ शपि ईकारस्य गुणे अयादेश इति भावः । **डिड्ये इति** ॥ कित्त्वाद्गुणाभावे ईकारस्य यणिति भावः । डिड्याते । डिड्यिरे । डिड्यिषे । डिड्याथे । डिड्यिध्वे । डिड्ये । डिड्यिवहे । डिड्यिमहे । डयिता । डयिष्यते । डयताम् । अडयत । डयेत । डयिषीष्ट । डयिषीयास्ताम् । डयिषीरन् । डयिषीष्ठाः । डयिषीयास्थाम् । डयिषीढ्वम्—डयिषीध्वम् । डयिषीय । डयिषीवहि । डयिषीमहि । अडयिष्ट । अडयिष्यत । इति स्मिङादयो डीङन्ता ङितः । तॄधातुः सेट् परस्मैपदी । अनिट्सु ऋदन्तपर्युदासात्सेट् । **ऋत इद्धातोः** ॥ ऋत इति धातोर्विशेषणम् । तदन्त-

• ऋदन्तस्य धातोरङ्गस्य इत्स्यात्। 'इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेन' (वा ४३७३)। तरति। 'ऋच्छत्यृताम्' (सू २३८३) इति गुणः। 'तृफल—' (सू २३०१) इत्येत्त्वम्। तेरतुः। तेरुः।

२३९१। वृतो वा। (७-२-३८)

वृङ्वृञ्भ्यामृदन्ताच्चेटो दीर्घो वा स्यान्न तु लिटि। तरिता—तरीता। 'अलिटि' इति किम्। तेरिथ। 'हलि च' (सू ३५४) इति दीर्घः। तीर्यात्।

२३९२। सिचि च परस्मैपदेषु। (७-२-४०)

अत्र वृत इटो दीर्घो न। अतारिष्टाम्।

अथाष्टावनुदात्तेतः। गुप ९७० गोपने। तिज ९७१ निशाने। मान ९७२ पूजायाम्। बध ९७३ बन्धने।

विधिः। अङ्गस्येत्यधिकृतम्। तदाह। **ऋदन्तस्येति**॥ धातोः किम्। मातॄणां। तथाच तरति, पिपर्ति, ततार, पपार, इत्यादौ ऋकारस्य परे शपि गुणवृद्धी बाधित्वा अन्तरङ्गत्वात् उत्वं स्यादिति शङ्का प्राप्ता। तां परिहर्तुमाह। **इत्वोत्वाभ्यामिति**॥ त्यब्लोपे पञ्चमीद्विवचनम्। 'ऋत इद्धातोः' इति इत्त्वं 'उदोष्ठ्यपूर्वस्य' इति उत्वमन्तरङ्गमपि बाधित्वा गुणवृद्धी विप्रतिषेधसूत्रेण परत्वात् स्याताामिति भावः। **तरतीति**॥ णलि ततार। अतुसादौ कित्त्वाद्गुणनिषेधमाशङ्क्याह। **ऋच्छत्यृतामिति**॥ ततर् अतुस् इति स्थिते अकारस्य गुणशब्देन भावितत्वात् 'न शसददवादिगुणानाम्' इति निषेधमाशङ्क्याह। **तृफलेति। तेरतुः, तेरुः, इति**॥ तेरिथ। तेरथुः। तेर। ततार—ततर। तेरिव। तेरिम। **वृतो वा**॥ वृ ऋ इत्यनयोः समाहारद्वन्द्वात्पञ्चम्येकवचनम्। वृ इति वृङ्वृञोर्ग्रहणम्। 'आर्धधातुकस्येट्' इत्यत इडित्यनुवृत्तं षष्ठ्या विपरिणम्यते। 'ग्रहोऽलिटि दीर्घः' इत्यतः अलिटि दीर्घ इत्यनुवर्तते। तदाह। **वृङ्वृञ्भ्यामित्यादि। तरिता—तरीतेति**॥ इटो दीर्घविकल्पः। गुणे रपरत्वम्। तरिष्यति। तरतु। अतरत्। तरेत्। **हलि चेति**॥ आशीर्लिङि डित्त्वाट्टकारस्य गुणनिषेधे, इत्त्वे, रपरत्वे, 'हलि च' इति दीर्घे तीर्यात् इति रूपमित्यर्थः। अतारीत्, अतारिष्टाम्, इत्यादौ 'वृतो वा' इति दीर्घे प्राप्ते। **सिचि च। अत्रेति**॥ परस्मैपदपरके सिचि वृङ्वृञ्भ्याम् ऋदन्ताच्च परस्य इटो दीर्घो नेत्यर्थः 'न लिङि' इत्यतो नेत्यनुवर्तते। **अतारिष्टामिति**॥ अतारिषुः। अतारिषम्। अतारिष्व। अतारिष्म। अतरिष्यत्। **गुप गोपने इति**॥ गोपनं रक्षणम्। **तिज निशाने इति**॥ निशानन्तीक्ष्णीकरणम्। **मान पूजायाम्। बध**

२३९३ । गुप्तिज्किद्भ्यः सन् । (३-१-५)

२३९४ । मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य । (३-१-६)

सूत्रद्वयोक्तेभ्यः सन्स्यात् । मानादीनामाभ्यासस्येकारस्य दीर्घश्च । 'गुपेर्निन्दायाम्' (वा १६८७) । 'तिजेः क्षमायाम्' (वा १६८८) । 'कितेर्व्याधिप्रतीकारे' (वा १६८९) 'निग्रहे' 'अपनयने' 'नाशने' 'संशये च' 'मानेर्जिज्ञासायाम्' (वा १६९२) 'बधेश्चित्तविकारे' (वा १६९३) । 'दानेरार्जवे' (वा १६९४) । 'शानेर्निशाने' (वा १६९५) । 'सनाद्यन्ताः—' (सू २३०४) इति धातुत्वम् ।

२३९५ । सन्यङोः । (६-१-९)

सन्नन्तस्य यङन्तस्य च प्रथमैकाचो द्वे स्तोऽजादेस्तु द्वितीयस्य । अभ्यासकार्यम् । गुपिप्रभृतयः किद्भिन्ना निन्दाद्यर्थका एवानुदात्तेतः । दानशानौ

बन्धने इति ॥ एते चत्वारोऽनुदात्तेत इति स्थितिः । **गुप्तिज्किद्भ्यः** । **मान्बध** ॥ गुप्तिजी इह पठितौ । 'कित निवासे' इत्यनुपदमेव परस्मैपदिषु पठिष्यते । एभ्यस्त्रिभ्यो धातुभ्यः सन्प्रत्ययः स्यादिति प्रथमसूत्रार्थः । मानधातुर्बधधातुश्च इह पठितौ । दान खण्डने । शान तेजने इत्यनुपदमेव स्वरितेत्सु पठिष्यते । एभ्यश्चतुर्भ्यः सन् स्यादिति द्वितीयसूत्रे प्रथमखण्डस्यार्थः । आभ्यासस्येति च्छेदः । अभ्यासस्य विकारः आभ्यासः स च 'सन्यतः' इति इत्त्वमेव नतु ह्रस्व इति 'गुणो यङ्लुकोः' इति सूत्रे भाष्ये स्पष्टम् । ततश्च मान्बधदान्शानामभ्यासावयवस्य इकारस्य सनसन्नियोगशिष्टो दीर्घश्च स्यादिति द्वितीयसूत्रे द्वितीयखण्डस्यार्थः इत्यभिप्रेत्य सूत्रद्वयस्य फलितमर्थमाह । **सूत्रद्वयेति** ॥ अथ उक्तसनो वृत्तिकृताभ्युपनिबद्धान् अर्थविशेषानाह । **गुपेर्निन्दायामित्यादिना शानेर्निशाने इत्यन्तेन** ॥ अत्र गोपनाद्यर्थकानां निन्दादौ वृत्तिस्त्वर्थनिर्देशस्योपलक्षणत्वाद्वोह्या । जिज्ञासाशब्देन जिज्ञासाप्रयोज्यो विचारो लक्ष्यते । मानेर्विचारे इत्येव वृत्तिकृत् । सन्नन्तस्य धातुकार्यप्राप्त्यर्थमाह । **सनाद्यन्ताः इति** । **सन्यङोः** ॥ अवयवषष्ठ्येषा । प्रत्ययत्वात्तदन्तग्रहणम् । 'एकाचो द्वे प्रथमस्य' इति 'अजादेर्द्वितीयस्य' इति चाधिकृतम् । तदाह । **सन्नन्तस्येत्यादिना** ॥ सनि यङि च परे इति तु न व्याख्येयम् । तथा सति प्रतिपूर्वादिणः सनि अटधातोर्यङि च प्रतीषिषति, अटाट्यते, इत्यत्र प्रत्ययसहितस्य द्वित्वानापत्तेः । **अभ्यासकार्यमिति** ॥ हलादिशेषादिकमित्यर्थः । **गुपिप्रभृतयः इति** ॥ कितधातुभिन्नाः गुप्तिजमानबधाश्चत्वारः गुपेर्निन्दायामित्यादिनिबद्धनिन्दाद्यर्थका एव अनुदात्तेतः सन्भाज इत्यर्थः । कितधातुस्तु परस्मैपदिषु पठिष्यमाणत्वादनुदात्तेदेव सन् व्याधिप्रतीकारादिपञ्चस्वेवार्थेषु सन्भागिति भावः । **दानशानौ त्विति** ॥ दान खण्डने, शान तेजने, इति धातू स्वरितेतावेव सन्तौ आर्जवे निशाने चार्थे सन्भाजाविति्यर्थः । तयोरनुपदमेव

तु स्वरितेतौ । एते नित्यं सन्नन्ताः । अर्थान्तरेषु त्वननुबन्धकाश्चुरादयः । अनुबन्धस्य केवलेऽचरितार्थत्वात्सन्नन्तात्तङ् । धातोरित्यविहितत्वात्सनोऽत्र नार्धधातुकत्वम् । तेनेड्गुणौ न । जुगुप्सते । जुगुप्साञ्चक्रे । तितिक्षते । मीमांसते । भष्भावः । चर्त्वम् । बीभत्सते । रभ १७४ राभस्ये । आरभते ।

स्वरितेत्सु पाठादिति भावः । **एते नित्यं सन्नन्ता इति** ॥ एते गुप्तिजादयः सप्त धातवः गुपेर्निन्दायामित्यादिनिबद्धेष्वर्थेषु नित्यं सन्नन्ताः । निन्दाद्यर्थकत्वे सनं विना एषाम्प्रयोगो नास्तीत्यर्थः । **अर्थान्तरेषु त्विति** ॥ निन्दादिभ्योऽन्येषु धातुपाठनिर्दिष्टेषु तदन्येषु चार्थेषु अनुदात्तानुबन्धरहिता स्सन्तश्चौरादिका एव भवन्ति, न तु भौवादिका इत्यर्थः । चुरादिष्वेतेषामनुदात्तानुबन्धकत्वे अनुबन्धकरणस्य केवलेष्वचरितार्थतया ण्यन्तात्कर्तृगेऽपि फले तङ् स्यादिति भावः । नन्वेवं सति भ्वादिगणे गुपादेरनुदात्तानुबन्धकरणं व्यर्थम् । उक्तरीत्या गोपनाद्यर्थकानामेषामनुबन्धरहितचौरादिकत्वनियमेन निन्दाद्यर्थेषु सन्नन्तनियमेन च ततोऽन्यत्र प्रयोगाभावादित्यत आह । **अनुबन्धस्येति** ॥ गुपादिषु केवलेष्वनुबन्धनिर्देशस्य निष्फलतया अनुबन्धनिर्देशस्य सन्नन्तार्थत्वं विज्ञायत इति कृत्वा सन्नन्तात्तङित्यर्थः । नचैवमपि भ्वादिगणे एषाङ्गोपनाद्यर्थनिर्देशो व्यर्थ एवेति वाच्यम् । भ्वादौ तदर्थनिर्देशस्य अपाणिनीयत्वादिति भावः । तदुक्तम्भाष्ये । 'गुपादिष्वनुबन्धकरणसामर्थ्यात्सन्नन्तादात्मनेपदम्' इति । अत्र सन्नन्तादात्मनेपदमित्युक्त्या केवलानामेषां शब्विकरणानां नास्ति प्रयोग इति सूचितम् । तथा चुरादिष्वेषामनुदात्तानुबन्धराहित्यमित्यपि सूचितम् । अन्यथा अनुबन्धकरणस्य केवलेष्वचरितार्थत्वात् सन्नन्तादिव ण्यन्तादपि कर्तृगे फले आत्मनेपदार्थत्वापातात्सन्नन्तादात्मनेपदमित्युक्तिरसङ्गता स्यादित्यन्यत्र विस्तरः । **धातोरितीति** ॥ 'आर्धधातुकं शेषः' इत्यत्र धातोर्विहितः प्रत्यय इति विहितविशेषणाश्रयणात् सनश्चास्य धात्वधिकारविहितत्वाभावान्नार्धधातुकत्वमित्यर्थः । **तेनेति** ॥ सन आर्धधातुकत्वाभावेनेत्यर्थः । **जुगुप्सते इति** ॥ निन्दतीत्यर्थः । गुपेः सनि अनार्धधातुकत्वादिड्गुणयोरभावे 'सन्यङोः' इति द्वित्वे हलादिशेषे अभ्यासकुत्वे जश्त्वे इति भावः । **जुगुप्साञ्चक्रे इति** ॥ कास्प्रत्ययादित्याम् । जुगुप्सिता । जुगुप्सिष्यते । जुगुप्सनाम् । अजुगुप्सत । जुगुप्सेत । जुगुप्सिषीष्ट । अजुगुप्सिष्ट । अजुगुप्सिष्यत । **तितिक्षते इति** ॥ तीक्ष्णीकरोतीत्यर्थः । तिजेः सनि द्वित्वादि । जस्य कुत्वेन गः तस्य चर्त्वेन कः सस्य षत्वमिति विशेषः । **मीमांसते इति** ॥ विचारयतीत्यर्थः । मान्धातोः सनि द्वित्वे हलादिशेषे अभ्यासहूस्वे 'सन्यतः' इति इत्त्वे मान्बधेत्यभ्यासदीर्घे, नश्चेत्यनुस्वारे, मीमांसधातोर्लडादीति भावः । बधधातोः सनि विशेषमाह । **भष्भावः इति** ॥ बकारस्य भकार इत्यर्थः । **चर्त्वमिति** ॥ धस्य तकार इत्यर्थः । तथाच भत्सेति सन्नन्तं सम्पन्नम् । **बीभत्सते इति** ॥ भष्त्वचर्त्वयोरसिद्धत्वात् बध् इत्यस्य द्वित्वे हलादिशेषे 'सन्यतः' इति इत्त्वे 'मान्बध' इति दीर्घे बीभत्सधातोर्लडादीति भावः । तदेवङ्गुपादिषु सप्तसु सन्नन्तेषु अत्र क्रमे धातुपाठे निबद्धाश्चत्वार उदाहृताः । कितमानज्ञानधातवस्तु अनुपदमेव धातुपाठक्रमे पठिष्यमाणास्तत्रतत्रोदाहरिष्यन्ते । **रभ**

आरेभे। रब्धा। रप्स्यते। डु लभष् ९७५ प्राप्तौ। लभते। ष्वञ्ज ९७६ परिष्वङ्गे।

२३९६। दंशसञ्जस्वञ्जां शपि। (६-४-२५)

२३९७। रञ्जेश्च। (६-४-२६)

एषां शपि नलोपः। स्वजते। परिष्वजते। 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वा' इति व्याकरणान्तरम्। 'देभतुः' 'सस्वजे'-इति भाष्योदाहरणादेकदेशानुमत्या इहाप्याश्रीयते। 'सदेः परस्य लिटि' (सू २३६१) इति सूत्रे 'स्वञ्जेरुपसंख्यानम्' (वा ४९६८)। अतोऽभ्यासात्परस्य षत्वं न। परिषस्वजे—परिषस्वञ्जे। सस्वजिषे—सस्वञ्जिषे। स्वङ्क्ता। स्वङ्क्ष्यते। स्वजेत। स्वङ्क्षीष्ट। अस्वङ्क्त। प्रत्यष्वङ्क्त। 'प्राक्सितात्—' (सू २२७६)

राभस्ये इति ॥ अनिडयम्। राभस्यं शीघ्रीभावः। आङ्पूर्वकस्तु प्रारम्भार्थकः। तदाह। **आरभते इति। रब्धेति** ॥ झषस्तथोरिति धत्वम्। भस्य जश्त्वम्। **रप्स्यत इति** ॥ रभताम्। अरभत। रभेत। रप्सीष्ट। अरब्ध। अरप्स्यत। **डु लभषिति** ॥ डुरित्। षकारश्च 'ङ्ङितः क्तिः। षिद्भिदादिभ्योऽङ्' इति प्रयोजनम्। अनिट्। रभधातुवद्रूपाणि। **ष्वञ्ज परिष्वङ्गे इति** ॥ षोपदेशोऽयमनिट्। **दंशसञ्ज। रञ्जेश्च** ॥ व्याख्यासौकर्याय सूत्रद्वयमुपात्तम्। **नलोपः इति** ॥ नकारस्य लोप इत्यर्थः। 'श्नान्नलोपः' इत्यतः तदनुवृत्तेरिति भावः। **परिष्वजे इति** ॥ 'परिनिविभ्यः' इति षत्वमिति भावः। संयोगात्परत्वाल्लिटः कित्त्वे अप्राप्ते आह। **श्रन्थीति** ॥ व्याकरणान्तरमिदं पाणिनीयैरपि ग्राह्यमित्याह। **देभतुरिति** ॥ 'अत एकहल्मध्ये' इति सूत्रभाष्ये देभतुः इत्युदाहृतम्। 'सदेः परस्य लिटि' इति सूत्रभाष्ये सस्वजे इत्युदाहृतम्। ततश्च एकदेशानुमत्या श्रन्थिग्रन्थीत्यादिवाक्यं कृत्स्नं व्याकरणान्तरस्थम्भाष्यानुमतमिति विज्ञायते इत्यर्थः। **सदेरिति** ॥ 'सदेः परस्य लिटि' इति षत्वनिषेधसूत्रे स्वञ्जेरपि ग्रहणमित्यर्थः। ततश्च स्वदिस्वञ्ज्योरुत्तरखण्डस्य सस्य षत्वन्न स्यादिति लब्धम्। तदाह। **अतोऽभ्यासात् परस्येति। परिषस्वजे। परिषस्वञ्जे इति** ॥ परस्येत्युक्तेरुत्तरखण्डस्यैव षत्वनिषेधः, नत्वभ्यासस्य किन्त्वपक्षे नलोपः। सस्वञ्जाते। सस्वजाते। सस्वञ्जिरे। सस्वजिरे। क्रादिनियमादिडित्याह। **सस्वजिषे। सस्वञ्जिषे। इति** ॥ सस्वञ्जाथे। सस्वजाथे। सस्वञ्जिध्वे। सस्वजिध्वे। सस्वञ्जे। सस्वजे। सस्वञ्जिवहे। सस्वजिवहे। सस्वञ्जिमहे। सस्वजिमहे। **स्वङ्क्तेति** ॥ स्वञ् ज् ता इति स्थिते जकारस्य कुत्वेन गकारे सति श्चुत्वसम्पन्नचकारस्य निवृत्तौ नकारस्यानुस्वारे तस्य परसवर्णेन ङकारे गकारस्य चर्त्वे रूपम्। एवमग्रेऽपि। **स्वजेतेति** ॥ 'दंशसञ्ज' इति शपि नलोप इति भावः। **स्वङ्क्षीष्ट। अस्वङ्क्तेति** ॥ लुङि अस्वञ् ज् स् त इति स्थिते "झलो झलि" इति सिज्लोपे कुत्वादि पूर्ववदिति भावः। ननु प्रत्यष्वङ्क्त इत्यत्र अटा व्यवधानादुपसर्गस्थादिणः परत्वाभावात् कथम् 'उपसर्गात्सुनोति' इति षत्वमित्यत आह। **प्राक् सितादिति। परि-**

इति षत्वम्। परिनिविभ्यस्तु 'सिवादीनां वा—' (सू २३५९) इति विकल्पः। एतदर्थमेव 'उपसर्गात्सुनोति—' (सू २२७०) इत्येव सिद्धे स्तुस्वञ्ज्योः 'परिनिवि—' (सू २२७५) इत्यत्र पुनरुपादानम्। पर्यष्वङ्क्—पर्यस्वङ्क्। 'हद ९७७ पुरीषोत्सर्गे। हदते। जहदे। हत्ता। हत्स्यते। हदेत। हत्सीष्ट। अहत्त।

अथ परस्मैपदिनः। ञि ष्विदा ९७८ अव्यक्ते शब्दे। स्कन्दिर् ९७९ गतिशोषणयोः। चस्कन्दिथ—चस्कन्थ। स्कन्ता। स्कन्त्स्यति। नलोपः। स्कद्यात्। इरित्त्वादङ्। अस्कदत्—अस्कान्त्सीत्। अस्कान्ताम्। अस्कान्त्सुः।

निविभ्यस्त्विति ॥ परस्य स्वञ्जेः इति शेषः। ननु परिनिविभ्यः परस्यापि स्वञ्जेः 'परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्' इति नित्यमेव षत्वमुचितम्। 'प्राक्सितादड्व्यवायेऽपि' इत्यटा व्यवधानेऽपि तस्य प्रवृत्तेः। 'उपसर्गात्सुनोति' इत्यादिसूत्रे स्वञ्जेः पठितत्वेन स्वञ्जेः 'प्राक्सितात्' इति सूत्रविषयत्वादित्यत आह। **एतदर्थमेवेत्यादि। परिनिवि इति** ॥ नित्यषत्वविधौ स्वञ्जिरप्युपात्तः ततः 'उपसर्गात्सुनोति' इत्येव तस्य षत्वे सिद्धे पुनरुपादानं 'सिवादीनां वाड्व्यवायेऽपि' इत्युत्तरसूत्रे षत्वविकल्पविधौ अनुवृत्त्यर्थमेव सम्पद्यते। परिनिविभ्यः परस्य स्वञ्जेः 'सिवादीनां वा' इति षत्वविकल्पार्थं पूर्वसूत्रे 'परिनिविभ्यः सेव' इत्यत्र स्वञ्जिग्रहणमिति पर्यवस्यतीत्यर्थः। **हद पुरीषोत्सर्गे** ॥ अनिडयम्। क्रादिनियमादिट्। जहदिषे। जहदिध्वे। जहदिवहे। जहदिमहे। **हत्तेति** ॥ लुटि तासि दस्य चर्त्वम्। **अहत्तेति** ॥ 'झलो झलि' इति सिज्लोपः। गुपादयोऽष्टावनुदात्तेतो गताः। **अथ परस्मैपदिनः इति** ॥ 'कित निवासे' इत्यन्ता इति शेषः। **ञि ष्विदेति** ॥ ञिः आकारश्च इत्। सेट्। स्वेदति। सिष्वेद। सिष्विदतुः। सिष्विदुः। सिष्वेदिथ। सिष्विदथुः। सिष्विद। सिष्वेद। सिष्विदिव। सिष्विदिम। स्वेदिता। स्वेदिष्यति। स्वेदतु। अस्वेदत्। स्वेदेत्। स्विद्यात्। अस्वेदीत्। अस्वेदिष्यत्। स्कन्दिरिरित्। अनिट्। भारद्वाजनियमात्थलि वेडित्याह। **चस्कन्दिथ—चस्कन्थेति** ॥ अनिट्पक्षे चस्कन् द् थ इति स्थिते 'खरि च' इति दकारस्य तकारः। चस्कन्दिव। चस्कन्दिम। **स्कन्तेति** ॥ लुटि तासि चर्त्वेन दस्य तः। **स्कन्त्स्यतीति** ॥ स्ये दस्य चर्त्वम्। स्कन्दतु। अस्कन्दत्। स्कन्देत्। आशीर्लिङि विशेषमाह। **नलोपः इति** ॥ इरः समुदायस्य इत्त्वेन धातोरनिदित्त्वादाशीर्लिङि नकारस्य लोप इत्यर्थः। **अस्कदादिति** ॥ लुङि अङि सति डित्त्वान्नलोप इति भावः। अडभावे आह। **अस्कान्त्सीदिति** ॥ अनेकहल्व्यवधानेऽपि हलन्तलक्षणा वृद्धिः प्रवर्तत इति निरूपितमक्षूधातौ। अतोऽत्र वृद्धौ दस्य चर्त्वेन तः। **अस्कान्तामिति** ॥ हलन्तलक्षणवृद्धौ 'झलो झलि' इति सिज्लोपे दस्य चर्त्वम्। **अस्कान्त्सुरिति** ॥ उसि सिचि वृद्धौ दस्य चर्त्वम्। अस्कान्त्सीः। अस्कान्तम्। अस्कान्त।

२३९८ । वेः स्कन्देरनिष्ठायाम् । (८-३-७३)

षत्वं वा स्यात् । कृत्येवेदम् 'अनिष्ठायाम्' इति पर्युदासात् । विष्कन्ता–विस्कन्ता । निष्ठायां तु विस्कन्नः ।

२३९९ । परेश्च । (८-३-७४)

अस्मात्परस्य स्कन्देः सस्य षो वा । योगविभागात् 'अनिष्ठायाम्' इति न संबद्ध्यते । परिष्कन्दति–परिस्कन्दति । परिस्कन्नः–परिष्कण्णः । षत्वपक्षे णत्वम् । नच पदद्वयाश्रयतया बहिरङ्गत्वात्षत्वस्यासिद्धत्वम् । 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इत्यभ्युपगमात् । 'पूर्वं धातुरुपसर्गेण युज्यते ततः साधनेन' इति भाष्यम् । 'पूर्वं साधनेन—' इति मतान्तरे तु न णत्वम् ।

अस्कान्तसम् । अस्कान्तस्व । अस्कान्तस्म । अस्कन्तस्यत् । **वेः स्कन्देः** ॥ शेषपूरणेन सूत्रं व्याचष्टे । **षत्वं वा स्यादिति** ॥ 'अपदान्तस्य मूर्धन्यः' इत्यधिकारात् 'सिवादीनां वा' इत्यतो वेत्यनुवृत्तेश्चेति भावः । वेः परस्य स्कन्देः सस्य षो वा स्यात् । अनिष्ठायां परत इति फलितम् । ननु विस्कन्दतीत्यादौ कुतो न षत्वविकल्प इत्यत आह । **कृत्येवेदमिति** ॥ पर्युदासस्य अब्राह्मणमानयेत्यादाविव सजातीयापेक्षत्वादिति भावः । **विष्कन्ता–विस्कन्तेति** ॥ तृचि रूपे । अषोपदेशत्वादप्राप्ते विभाषेयम् । **परेश्च** ॥ ननु विपरिभ्यां स्कन्देरनिष्ठायामित्येव सिद्धे सूत्रभेदो व्यर्थ इत्यत आह । **योगेति । षत्वपक्षे इति** ॥ परिष्कन् द् त इति स्थिते अनिदितामिति नलोपे 'रदाभ्याम्' इति निष्ठातकारस्य तत्पूर्वदकारस्य च नत्वे सस्यानेन षत्वपक्षे प्रथमनकारस्य रेफापेक्षया भिन्नपदस्थत्वेऽपि षात् परत्वात् णत्वे द्वितीयनकारस्य ष्टुत्वेन णत्वे परिष्कण्ण इति रूपमित्यर्थः । ननु दकारस्थानिकनकारस्य षकारनिमित्तकं णत्वमन्तरङ्गम् । निमित्तनिमित्तिनोरेकपदस्थत्वात् । षत्वन्तु परि इत्युपसर्गात्मकपदान्तरस्थमिणन्निमित्तीकृत्य प्रवर्तमानम्बहिरङ्गम् । ततश्च णत्वे कर्तव्ये बहिरङ्गस्य षत्वस्यासिद्धत्वात् षात्परत्वाभावात् कथं णत्वमित्याशङ्क्य निराकरोति । **नचेति** ॥ पदद्वयाश्रयतया बहिरङ्गस्य षत्वस्यासिद्धत्वं यत्प्रसक्तन्तन्न शङ्क्यमित्यन्वयः । कुत इत्यत आह । **धातूपसर्गयोरिति । पूर्वं धातुरिति** ॥ धातुरुपसर्गेण सह युज्यते सन्ध्यादिकार्यं लभते । पश्चात् धातूपसर्गकार्यप्रवृत्त्यनन्तरं साधनेन युज्यते । साधनशब्दः कारकवाची । इह तु तद्वाचकः प्रत्ययो लक्ष्यते । प्रत्ययेनेति यावत् । इदञ्च 'सम्प्रसारणाच्च' इत्यादिसूत्रभाष्ये स्पष्टम् । तदाह । **भाष्यमिति । मतान्तरे त्विति** ॥ 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' इति पक्षे तु षत्वस्य बहिरङ्गतया असिद्धत्वान्न णत्वमित्यर्थः । यभधातुरनिट् । यभति । ययाभ । येभतुः । थलि तु भारद्वाजनियमादिट्पक्षे पित्त्वेना-

यभ ९८० मैथुने। येभिथ–ययब्ध। यब्धा। यप्स्यति। अयाप्सीत्। णम ९८१ प्रह्वत्वे शब्दे च। नेमिथ—ननन्थ। नन्ता। अनंसीत्। अनंसिष्टाम्। गंम्लृ ९८२ सृप्लृ ९८३ गतौ।

२४००। इषुगमियमां छः। (७-३-७७)

एषां छः स्याच्छिति परे। गच्छति। जगाम। जग्मतुः। जग्मुः। जगमिथ–जगन्थ। गन्ता।

२४०१। गमेरिट् परस्मैपदेषु। (७-२-५८)

कित्त्वेऽपि 'थलि च सेटि' इत्येत्त्वाभ्यासलोपं मत्वा आह। **येभिथेति। ययब्धेति॥** थलि इडभावपक्षे पित्त्वेनाकित्त्वादेत्त्वाभ्यासलोपाभावे ययभ् थ इति स्थिते 'झषस्तथोः' इति थस्य धत्वे भस्य जश्त्वेन बकार इति भावः। येभथुः। येभ। ययाभ–ययभ। क्रादिनियमादिट्। येभिव। येभिम। **यब्धेति॥** लुटि तासि तकारस्य 'झषस्तथोः' इति धत्वम्। भकारस्य जश्त्वेन बकार इति भावः। **यप्स्यतीति॥** स्ये भस्य चर्त्वेन पः। यभतु। अयभत्। यभेत्। यभ्यात्। **अयाप्सीदिति॥** हलन्तलक्षणा वृद्धिरिति भावः। अयप्स्यत्। **णम प्रह्वत्वे इति॥** अनिडयं णोपदेशश्च। केचित्त्विमं धातुमुदितं पठन्ति। तत्तु प्रामादिकम्। तथा सति 'उदितो वा' इति क्त्वायामिड्विकल्पस्य 'यस्य विभाषा' इति निष्ठायामिटश्चाप्तेः। नमति। ननाम। नेमतुः। नेमुः। थलि तु भारद्वाजनियमादिट्पक्षे पित्त्वेनाकित्त्वेऽपि 'थलि च सेटि' इत्येत्त्वाभ्यासलोपं मत्वा आह। **नेमिथ–ननन्थेति॥** इडभावपक्षे पित्त्वेन अकित्त्वादेत्त्वाभ्यासलोपाभावे रूपम्। नेमथुः। नेम। ननाम–ननम। नेमिव। नेमिम। क्रादिनियमादिट्। **नन्तेति॥** मस्यानुस्वारपरसवर्णौ। नंस्यति। नमतु। अनंमत्। नमेत्। नम्यात्। **अनंसीदिति॥** 'यमरम' इति सगिति भावः। अनंस्यत्। **गम्लृ सृप्लृ गताविति॥** अनिटौ। सृपिरषोपदेशः। **इषुगमि। शितीति॥** 'छ्विडुक्रमुचमाम्' इत्यतः तदनुवृत्तेरिति भावः। उदित्निर्देशात्तौदादिकस्य इषेर्ग्रहणम्। अत्राचीत्यनुवर्त्य अजादौ शितीत्याश्रित्य इष्यति, इष्णाति, इत्यत्र छत्वं नेति भाष्ये स्थितम्। एवञ्चात्र सूत्रे तुदादौ च उदित्पाठः अनार्ष इति शब्देन्दुशेखरे स्थितम्। **गच्छतीति॥** शपि मकारस्य छकारः। **जग्मतुरिति॥** 'गमहन' इत्युपधालोपः। एवं जग्मुः। भारद्वाजनियमात्थलि वेट्। तदाह। **जगमिथ–जगन्थेति॥** जग्मथुः। जग्म। जगाम–जगम। जग्मिव। जग्मिम। क्रादिनियमादिट्। **गमेरिट्॥** गमेरिति पञ्चमी 'सेऽसिचि' इत्यतः से इत्यनुवृत्तेन आर्धधातुकस्येत्यनुवृत्तं विशेष्यते।

गमेः परस्य सकारादेरिट् स्यात्। गमिष्यति। लृदित्त्वादङ्। 'अनङि' इति पर्युदासान्नोपधालोपः। अगमत्। सर्पति। ससर्प।

२४०२। अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्। (६-१-५९)

उपदेशेऽनुदात्तो य ऋदुपधस्तस्याम्वा स्याज्झलादावकिति परे। स्रप्ता—सर्प्ता। स्रप्स्यति—सर्प्स्यति। असृपत्। यम ९८४ उपरमे। यच्छति। येमिथ—ययन्थ। यन्ता। अयंसीत्। अयंसिष्टाम्। तप ९८५ सन्तापे। तप्ता। अताप्सीत्।

२४०३। निसस्तपतावनासेवने। (८-३-१०२)

तदादिविधिः। तदाह। **गमेः परस्येत्यादिना**॥ परस्मैपदेष्वित्यस्य आत्मनेपदाभावे इत्यर्थः। एवञ्च सञ्जिगमिषितेति तृचि इट् सिद्ध्यति। **गमिष्यतीति**॥ गच्छतु। अगच्छत्। गच्छेत्। गम्यात्। लुङि विशेषमाह। **लृदित्त्वादङिति**॥ 'गमहन' इति उपधालोपो नेत्याह। **अनङि इति पर्युदासादिति। अगमदिति**॥ लृङि अगमिष्यत्। **सर्पतीति**॥ शपि ऋकारस्य लघूपधगुणः रपरत्वम्। **ससर्पेति**॥ सस्रपतुः। सस्रपुः। थलि क्रादिनियमान्नित्यमिट्। अजन्तत्वाभावादकारान्तत्वाभावाच्च नेण्निषेधः। ससर्पिथ। सस्रपथुः। सस्रप। ससर्प। सस्रपिव। सस्रपिम। लुटि तासि लघूपधगुणे रपरे प्राप्ते। **अनुदात्तस्य च**॥ 'सृजिदृशोः' इत्यतः झल्यमकितीति 'आदेच' इत्यतः उपदेश इति चानुवर्तते। तदाह। **उपदेशेऽनुदात्तः इत्यादिना**॥ मित्त्वादन्त्यादचः परः। उपदेशे किम्। स्रप्तुम्। तुमुनि परे ञ्नित्यादिर्नित्यम्' इत्युदात्तोऽयम्। अथापि उपदेशे अनुदात्तत्वादम्भवत्येव। अकितीति किम्। क्तप्रत्यये स्रप्तः। **स्रप्तेति**॥ स्रप्धातोर्लुटि तासि अमागमे ऋकारस्य यणिति भावः। **सर्प्तेति**॥ अमभावे लघूपधगुणे रपरत्वमिति भावः। एवं स्रप्स्यति—सर्प्स्यतीति। सर्पतु। असर्पत्। सर्पेत्। सृप्यात्। **असृपदिति**॥ लृदित्वात् च्लेरङि सति कित्त्वान्न गुण इति भावः। अस्रप्स्यत्—असर्प्स्यत्। **यम उपरमे इति**॥ उपरमो विरमणम्। अनिडयम्। **यच्छतीति**॥ 'इषुगमियमाम्' इति शपि छः। ययाम। येमतुः। येमुः। थलि भारद्वाजनियमादिट्पक्षे 'थलि च सेटि' इत्येत्त्वाभ्यासलोपौ। तदाह। **येमिथ—ययन्थेति**॥ इडभावे रूपम्। येमथुः। येम। ययाम—ययम। येमिव। येमिम। क्रादिनियमादिट्। **यन्तेति**॥ यंस्यति। यच्छतु। अयच्छत्। यच्छेत्। यम्यात्। अयंसीत्। यमरमेति इट्सकौ। इट ईटीति सिज्लोपः। नेटीति निषेधान्न हलन्तलक्षणा वृद्धिरिति भावः। अयंस्यत्। **तप सन्तापे इति**॥ अनिडयम्। तपति। ततापः। तेपतुः। तेपुः। तेपिथ—ततप्थ। तेपथुः। तेप। ततापः—ततप। तेपिव। तेपिम। **तप्तेति**॥ तप्स्यति। तपतु। अतपत्। तपेत्। तप्यात्। **अताप्सीदिति**॥ हलन्तलक्षणा वृद्धिरिति भावः। अतप्स्यत्। **निसस्तपतौ**॥ शेषपूरणेन सूत्रं व्याचष्टे। **षः स्यादिति**॥ अपदान्तस्य मूर्धन्य

षः स्यात्। आसेवनं पौनःपुन्यं ततोऽन्यस्मिन्विषये। निष्टपति। त्यज ९८६ हानौ। तत्यजिथ–तत्यक्थ। त्यक्ता। अत्याक्षीत्। षञ्ज ९८७ सङ्गे। 'दंशसञ्जस्वञ्जां शपि' (सू २३९६) इति नलोपः। सजति। सङ्क्ता। दृशिर् ९८८ प्रेक्षणे। पश्यति।

२४०४। विभाषा सृजिदृशोः। (७-२-६५)

आभ्यां थल इड्वा।

२४०५। सृजिदृशोर्झल्यमकिति। (६-१-५८)

इत्यधिकारादिति भावः। निसः सकारस्य षः स्यात् तपधातौ परत इति यावत्। अनासेवने इत्येतद्व्याख्यास्यन् आसेवनशब्दं व्याचष्टे। **पौनःपुन्यमिति**॥ आसेवनशब्देन सह नञ्समास इत्यभिप्रेत्याह। **ततोऽन्यस्मिन्विषये इति**॥ आदेशत्वाभावात् पदान्तत्वाच्च अप्राप्ते वचनम्। **निष्टपतीति**॥ निष्कृष्य तपतीत्यर्थः। निसस्सस्य षत्वे तकारस्य ष्टुत्वेन टः। आसेवने तु न षत्वम्। **त्यज हानाविति**॥ हानिरुत्सर्गः। अयमनिट्। त्यजति। तत्याज। तत्यजतुः। तत्यजुः। संयुक्तहल्मध्यस्थत्वादेत्त्वाभ्यासलोपौ न। थलि तु भारद्वाजनियमाद्वेट्। तदाह। **तत्यजिथ–तत्यक्थेति**॥ इडभावे चोः कुरिति भावः। **त्यक्तेति**॥ त्यक्ष्यति। त्यजतु। अत्यजत्। त्यजेत्। त्यज्यात्। **अत्याक्षीदिति**॥ हलन्तलक्षणा वृद्धिरिति भावः। अत्यक्ष्यत्। **षञ्ज सङ्गे इति**॥ षोपदेशोऽयमनिट् नोपधश्च। कृतानुस्वारपरसवर्णस्य निर्देशः। शपः पित्त्वेन कित्त्वाभावात्तस्मिन्परे 'अनिदिताम्' इति नलोपाप्रवृत्तेराह। **दंशसञ्जेति। नलोपः इति**॥ अनुस्वारपरसवर्णयोरसिद्धत्वादिति भावः। **सजतीति**॥ लिटि तु ससञ्ज। अतुसादौ तु कित्त्वान्न लोपः। ससजतुः। ससजुः। थलि भारद्वाजनियमाद्वेट्। ससञ्जिथ–ससङ्क्थ। इडभावे जस्य कुत्वेन गकारे तस्य चर्त्वे सति अनुस्वारपरसवर्णसम्पन्नस्य चवर्गपञ्चमस्य निवृत्तौ ककारे परे नकारस्य परसवर्णो ङकारः। ससजथुः। ससज। ससञ्ज। ससजिव। ससजिम। क्रादिनियमादिट्। **सङ्क्तेति**॥ तासि जस्य कुत्वेन गकारे तस्य चर्त्वे सति जस्य निवृत्तौ नस्य ङकार इति भावः। सङ्क्ष्यति॥ सजतु। असजत्। सजेत्। सज्यात्। असाङ्क्षीत्। हलन्तत्वाद्वृद्धिः। असङ्क्ष्यत्। **दृशिर् प्रेक्षणे इति**॥ इरित्। अनिट् च। **पश्यतीति**॥ शिति 'पाघ्राध्मा' इति पश्यादेश इति भावः। ददर्श। ददृशतुः। ददृशुः। थलि तु क्रादिनियमान्नित्यमिट् प्राप्तः। अजन्ताकारवत्त्वाभावात् 'अचस्तास्वत्' इति 'उपदेशे अत्वत' इति निषेधस्य चाप्राप्तेः ऋदन्तत्वाभावेन भारद्वाजनियमस्याप्रसक्तेः। तत्राह। **विभाषा सृजि**॥ पञ्चम्यर्थे षष्ठी। 'गमेरिट्' इत्यतः इडिति 'अचस्तास्वत्' इत्यतः थलीति चानुवर्तते। तदाह। **आभ्यामिति**॥ इडभावपक्षे 'अनुदात्तस्य' इति अमागमविकल्पे प्राप्ते। **सृजिदृशोः**॥ अम् अकिति इति च्छेदः। नित्यार्थमिदम्।

अनयोरमागमः स्याज्झलादावकिति। ददृष्ट—ददर्शिथ। द्रष्टा। द्रक्ष्यति। दृश्यात्। इरित्त्वादङ् वा।

२४०६। ऋदृशोऽङि गुणः। (७-४-१६)

ऋवर्णान्तानां दृशेश्च गुणः स्यादङि। अदर्शत्। अङभावे।

२४०७। न दृशः। (३-१-४७)

दृशश्च्लेः क्सो न। अद्राक्षीत्। दंश ९८९ दशने। दशनं दंष्ट्राव्यापारः। पृषोदरादित्वादनुनासिकलोपः। अत एव निपातनादित्येके। तेषामप्येवं तात्पर्यम्। अर्थनिर्देशस्याधुनिकत्वात्। 'दंशसञ्ज—' (सू २३९६) इति

ददृष्टेति ॥ ददृश् थ इति स्थिते इडभावपक्षे अमागमे ऋकारस्य यणि व्रश्चादिना शस्य षत्वे थस्य ष्टुत्वेन ठ इति भावः। इट्पक्षे त्वाह। **ददर्शिथेति** ॥ अञ्झलादित्वादम् नेति भावः। **द्रष्टेति** ॥ तासि अमागमे शस्य षत्वे तकारस्य ष्टुत्वेन टकार इति भावः। **द्रक्ष्यतीति** ॥ अमागमे शस्य षत्वे षढोरिति कत्वे सस्य प इति भावः। पश्यतु। अपश्यत्। पश्येत्। आशीर्लिङि आह। **दृश्यादिति** ॥ अञ्झलादित्वादम् नेति भावः। लुङि विशेषमाह। **इरित्त्वादङ् वेति** ॥ अत्र अङ्पक्षे गुणनिषेधे प्राप्ते। **ऋदृशोऽङि** ॥ ऋ इत्यङ्गविशेषणत्वात् तदन्तविधिः। तदाह। **ऋवर्णान्तानामिति**। **अङभावे इति** ॥ अङभावपक्षे 'शल इगुपधात्' इति क्सादेशे प्राप्ते सतीत्यर्थः। **न दृशः** ॥ 'च्लेः सिच्' इत्यतः च्लेरिति 'शल इगुपधात्' इत्यतः क्स इति चानुवर्तते। तदाह। **दृशश्च्लेः क्सो नेति** ॥ क्सादेशे तु अदृक्षदिति स्यादिति भावः। **अद्राक्षीदिति** ॥ सिचि अमागमे ऋकारस्य यणि अकारस्य हलन्तलक्षणवृद्धौ शस्य षत्वे तस्य कत्वे सस्य षत्वमिति भावः। अदक्ष्यत्। **दंश दशने इति** ॥ अयमनिट् नोपधश्च कृतानुस्वारनिर्देशः। **दंष्ट्राव्यापारः इति** ॥ हनुमूलगताः स्थूलदन्ताः दंष्ट्राः तद्व्यापारः क्षतक्रियादिरूप इत्यर्थः। ननु दंशधातोर्ल्युटि दशनशब्दः तत्र 'अनिदिताम्' इति नकारस्य लोपो न सम्भवति ल्युटः किदित्त्वाभावात्। दंशसञ्जेत्यपि नस्य लोपो न सम्भवति। तस्य शप्येव प्रवृत्तेः। तथाच दशन इत्यर्थनिर्देशः कथमित्यत आह। **पृषोदरादित्वादिति**। **अत एवेति** ॥ दशनशब्दनिर्देशादेव नकारस्य लोप इत्यन्ये मन्यन्त इत्यर्थः। **तेषामपीति** ॥ निपातनान्नकारलोप इति वदतामपि पृषोदरादिषु निपातनादित्यर्थ एव तात्पर्यं न तु धातुपाठे दंश दशने इत्यर्थनिर्देशे। विनिगमनाविरहमाशङ्क्याह। **अर्थनिर्देशस्याधुनिकत्वादिति** ॥ सर्वधातुष्वर्थनिर्देशस्य अपाणिनीयत्वादित्यर्थः। क्वचिदेव धातुष्वर्थनिर्देशः पाणिनीय इति भूधातौ निरूपितम्। अथ दशतीत्यादौ शपः पित्त्वेन अकित्त्वात् 'अनिदिताम्' इति नलोपाप्रवृत्तेराह। **दंशसञ्जेति। नलोपः**

नलोपः। दशति। ददंशिथ–ददंष्ठ। दंष्टा। दङ्क्ष्यति। दश्यात्। अदाङ्क्षीत्। कृष ९९० विलेखने। विलेखनमाकर्षणम्। क्रष्टा–कर्ष्टा। क्रक्ष्यति–कर्क्ष्यति। 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः' (वा १८२६)। अक्राक्षीत्। अक्राष्टाम्। अकार्क्षीत्। अकार्ष्टाम्। अकार्क्षुः। पक्षे क्सः। अकृक्षत्। अकृक्षताम्। अकृक्षन्। दह ९९१ भस्मीकरणे। देहिथ–ददग्ध। दग्धा। धक्ष्यति। अधाक्षीत्। अदाग्धाम्। अधाक्षुः। मिह ९९२ सेचने। मिमेह। मिमे-

---

इति। दशतीति ॥ अनुस्वारस्यासिद्धत्वादिति भावः। दंशसञ्जेत्यत्र शपीत्युक्तेरार्धधातुके नलोपो न। संयोगात्परत्वेन लिटः कित्त्वाभावादनिदितामित्यपि न। ददंश। ददंशतुः। ददंशुः। भारद्वाजनियमात्थलि वेट्। तदाह। **ददंशिथ–ददंष्टेति** ॥ अनिट्पक्षे व्रश्चादिना शस्य षः थस्य ष्टुत्वेन ठ इति भावः। तासि व्रश्चादिना शस्य षत्वे तकारस्य ष्टुत्वमिति भावः। **दङ्क्ष्यतीति** ॥ व्रश्चादिना शस्य षत्वे तस्य कत्वे अनुस्वारस्य परसवर्णे ङकारे सस्य षत्वमिति भावः। दशतु। अदशत्। दशेत्। **दश्यादिति** ॥ आशीर्लिङि 'अनिदिताम्' इति नलोप इति भावः। **अदाङ्क्षीदिति** ॥ सिचि शस्य षः तस्य कः अनुस्वारस्य परसवर्णेन ङः सस्य षत्वमिति भावः। अदङ्क्ष्यत्। **कृष विलेखने इति।** अनिडयम्। कर्षति। चकर्ष। चकृषतुः। चकृषुः। थलि अजन्ताकारवत्त्वाभावात् क्रादिनियमान्नित्यमिट्। चकर्षिथ। चकृषथुः। चकृष। चकर्ष। चकृषिव। चकृषिम। इति सिद्धवत्कृत्याह। **क्रष्टा–कर्ष्टेति** ॥ 'अनुदात्तस्य च' इत्येव विकल्पः। तकारस्य ष्टुत्वम्। **क्रक्ष्यति–कर्क्ष्यतीति** ॥ षस्य कत्वे सस्य षः। कर्षतु। अकर्षत्। कर्षेत्। कृष्यात्। 'शल इगुपधात्' इति च्लेः क्सादेशे प्राप्ते आह। **स्पृशमृशेति** ॥ **अक्राक्षीदिति** ॥ च्लेः क्सादेशाभावे सिचि 'अनुदात्तस्य चर्दुपधस्य' इत्यमि ऋकारस्य यणि हलन्तलक्षणवृद्धौ 'षढोः कस्सि' इत्यनेन षस्य कत्वे सस्य षत्वमिति भावः। **अकार्क्षीदिति** ॥ अमभावे सिचि वृद्धौ रूपम्। **पक्षे क्सः इति** ॥ च्लेः सिजभावपक्षे 'शल इगुपधात्' इति क्स इत्यर्थः। **अकृक्षदिति** ॥ क्से सति कित्त्वाद्गुणाभावे षस्य कः सस्य ष इति भावः। अक्रक्ष्यत्–अकर्क्ष्यत्। **दह भस्मीकरणे इति** ॥ अनिट्। दहति। ददाह। देहतुः। देहुः। थलि तु भारद्वाजनियमाद्वेडित्याह। **देहिथ–ददग्ध इति** ॥ इट्पक्षे 'थलि च सेटि' इत्येत्त्वाभ्यासलोपौ। अनिट्पक्षे तु 'दादेः' इति हस्य घः 'झषस्तथोः' इति थस्य धः घस्य जश्त्वेन ग इति भावः। देहथुः देह। ददाह–ददह। देहिव। देहिम। **दग्धेति** ॥ तासि हस्य घः तकारस्य धः घस्य गः इति भावः। **धक्ष्यतीति** ॥ हस्य घः दस्य भष् घस्य गः तस्य चर्त्वेन कः सस्य ष इति भावः। दहतु। अदहत्। दहेत्। दह्यात्। **अधाक्षीदिति** ॥ सिचि हलन्तलक्षणा वृद्धिः। हस्य घः दस्य भष् घस्य गः तस्य कः सस्य षः इति भावः। **अदाग्धामिति** ॥ सिचि वृद्धिः। हस्य घः 'झलो झलि' इति सलोपः। 'झषस्तथोः' इति तकारस्य धः। घस्य गः इति भावः। **अधाक्षुरिति** ॥ सिचि वृद्धिः हस्य घः दस्य भष् घस्य गः तस्य कः

हिथ । मेढा । मेक्ष्यति । अमिक्षत् । कित ९९३ निवासे रोगापनयने च । चिकित्सति । संशये प्रायेण विपूर्वः । 'विचिकित्सा तु संशयः' इत्यमरः । अस्यानुदात्तेत्त्वमाश्रित्य 'चिकित्सते' इत्यादि कश्चिदुदाजहार । निवासे तु केतयति ।

दान ९९४ खण्डने । शान ९९५ तेजने । इतो वहत्यन्ताः स्वरितेतः । दीदांसति—दीदांसते । शीशांसति—शीशांसते । अर्थविशेषे सन् । अन्यत्र दानयति । शानयति । डु पचष् ९९६ पाके । पचति—पचते । पेचिथ—पपक्थ ।

सस्य षः इति भावः । अधाक्षीः । अदाग्धम् । अदाग्ध । अधाक्षम् । अधाक्ष्व । अधाक्ष्म । अधक्ष्यत् । **मिह सेचने इति** ॥ अनिट् । मेहति । मिमेह । मिमिहतुः । मिमिहुः । अजन्ताकारवत्त्वाभावात् क्रादिनियमान्नित्यमिट् । तदाह । **मिमेहिथेति** ॥ मिमिहथुः । मिमिह । मिमेह । मिमिहिव । मिमिहिम । **मेढेति** ॥ तासि ढत्वधत्वष्टुत्वढलोपाः । **मेक्ष्यतीति** ॥ हस्य ढः तस्य कः सस्य षः । मेहतु । अमेहत् । मेहेत् । मिह्यात् । लुङि 'शल इगुपधात्' इति क्सः । कित्त्वान्न गुणः । हस्य ढः तस्य कः सस्य षः । तदाह । **अमिक्षदिति** ॥ अमेक्ष्यत् । **कित निवासे रोगापनयने चेति** ॥ परस्मैपदिषु पाठात् अयं परस्मैपदी । अर्थद्वयमात्रमत्र निर्दिष्टम् । अर्थनिर्देशस्य उपलक्षणत्वात् अर्थान्तरेषु वृत्तिः । तत्र 'कितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशये च' इति निबन्धेष्वर्थेषु 'गुप्तिज्किद्भ्यः सन्' इति सन्विहितः । तदाह । **चिकित्सति इति** ॥ 'सन्यत' इति इत्वे हलादिशेषे अभ्यासचुत्वे चिकित्सेति सन्नन्तं तस्माल्लटि शपि चिकित्सतीति रूपम् । अस्य सनः 'धातोः' इति विहितत्वाभावादनार्धधातुकत्वान्न लघूपधगुणः नापि इडागम इति प्रागुक्तम् । 'चिकित्साञ्चकार' इत्यादि सुगमं जुगुप्सतिवत् । संशये इत्यादि व्यक्तम् । **निवासे त्विति** ॥ व्याधिप्रतीकाराद्यर्थपञ्चकादर्थान्तरे चुरादित्वस्योक्तत्वादिति भावः । **दान खण्डने । शान तेजने इति** ॥ तेजनम् तीक्ष्णीकरणम् । **इतः इति** ॥ 'दान खण्डने' इत्यारभ्य 'वह प्रापणे' इत्येतत्पर्यन्ताः स्वरितेत इत्यर्थः । तत्र धातुपाठे अर्थनिर्देशस्य उपलक्षणत्वाद्यदा दानधातुरार्जवे शानधातुस्तु निशाने वर्तते तदा 'मान् बध दान् शान्' इति सनि 'सन्यङोः' इति द्वित्वे अभ्यासदृस्वे तस्य 'सन्यतः' इति इत्वे तस्य 'मान् बध' इति दीर्घे सति नकारस्यानुस्वारे दीदांसशीशांसाभ्यां लटि स्वरितानुबन्धस्य केवलयोरचरितार्थत्वात् कर्तृगे फले तङि शपि दीदांसते शीशांसते इति रूपम् । परगामिनि तु फले परस्मैपदे तिपि शपि दीदांसति इति रूपम् । एवं शीशांसतीति । तीक्ष्णीकरोतीत्यर्थः । तदाह । **दीदांसते इत्यादि** ॥ **अर्थविशेषे इति** ॥ आर्जवे निशाने चार्थे सनित्यर्थः । **अन्यत्रेति** ॥ आर्जवनिशानाभ्यामन्यत्र णिजन्तात्परस्मैपदमेवेत्यर्थः । अर्थान्तरे अननुबन्धकाश्चुरादयः इत्युक्तेरिति भावः । **डु पचष् पाके इति** ॥ डुः षकारः चकारादकारश्च इत् । स्वरितेत्त्वादुभयपदी । तदाह । **पचति-पचते इति** ॥ पपाच । पेचतुः । पेचुः । भारद्वाजनियमात्थलि वेट् । तदाह । **पेचिथ—पपक्थेति** ॥ इट्पक्षे 'थलि च सेटि' इत्येत्त्वाभ्यास

पेचे। पक्ता। पक्षीष्ट। षच ९९७ समवाये। सचति। सचते। भज ९९८ सेवायाम्। बभाज। भेजतुः। भेजुः। भेजिथ–बभक्थ। भक्ता। भक्ष्यति–भक्ष्यते। अभाक्षीत्। अभक्त। रञ्ज ९९९ रागे। नलोपः। रजति–रजते। रज्यात्। रङ्क्षीष्ट। अराङ्क्षीत्। अराङ्क्ताम्। अरङ्क्त। शप १००० आक्रोशे। आक्रोशो विरुद्धानुद्ध्यानम्। शशाप–शेपे। अशाप्सीत्–अशप्त। त्विष १००१ दीप्तौ। त्वेषति–त्वेषते। तित्विषे। त्वेष्टा। त्वेक्ष्यति–त्वेक्ष्यते।

लोपौ। अनिट्पक्षे तु 'चोः कुः' इति भावः। पेचथुः। पेच। पपाच–पपच। पेचिव। पेचिम। कादिनियमादिट्। **पेचे इति** ॥ पेचाते। पेचिरे। पेचिषे। पेचाथे। पेचिध्वे। पेचे। पेचिवहे। पेचिमहे। कादिनियमादिट्। **पक्तेति** ॥ तासि 'चोः कुः' पक्ष्यति। पक्ष्यते। पचतु। पचताम्। अपचत्। अपचत। पचेत्। **पक्षीष्टेति** ॥ आशीर्लिङि तङि सीयुटि 'चोः कुः' षत्वम्। अपाक्षीत्। अपक्त। अपक्षाताम्। अपक्ष्यत्। अपक्ष्यत। षच-धातुः षोपदेशः। तदाह। **सचति–सचते इति** ॥ सेऽयम्। ससाच। सेचतुः। सेचुः। सेचिथ। सेचथुः। सेच। ससाच–ससच। सेचिव। सेचिम। सेचे। सेचिषे। सेचिवहे। सेचिमहे। सच्यात्। सचिषीष्ट। असाचीत्–असचीत्। असचिष्ट। भजधातुरनिट्। भजति। किति लिटि वैरूप्यापादकादेशादित्वात् 'अत एक हल्मध्ये' इत्यप्राप्तौ 'तृ फल' इत्येत्त्वाभ्यास-लोपौ। तदाह। **भेजतुरिति** ॥ भारद्वाजनियमात्थलि वेट्। तदाह। **भेजिथ–बभक्थेति** ॥ इट्पक्षे 'थलि च सेटि' इत्येत्त्वाभ्यासलोपौ इति भावः। भेजिव। भेजिम। कादिनियमादिट्। भेजे। भेजिषे। भेजिवहे। भक्तेत्यादि सुगमम्। **रञ्ज रागे इति** ॥ नोपधोऽयम्। कृतानुस्वारपर-सवर्णनिर्देशः। अनिडयम्। शपः पित्त्वेन ङित्त्वाभावात् 'अनिदिताम्' इत्यप्राप्तावपि 'रञ्जेश्च' इति शपि नलोपः। तदाह। **रजति–रजते इति** ॥ संयोगात्परत्वाल्लिटो न कित्त्वम्। ररज्ज। ररज्जतुः। भारद्वाजनियमात्थलि वेट्। ररञ्जिथ–ररङ्क्थ। अनिट्पक्षे जस्य कुत्वेन गः। ततो-ऽनुस्वारपरसवर्णञकारनिवृत्तौ गस्य चर्त्वेन कः। नस्यानुस्वारे तस्य परसवर्णो ङकार इति भावः। ररञ्जिव। ररञ्जिम। कादिनियमादिट्। रङ्क्ता। रङ्क्ष्यति। रङ्क्ष्यते। रजतु। रज-ताम्। अरजत्। अरजत। रजेत्। आशीर्लिङि यासुटः कित्त्वात् 'अनिदिताम्' इति नलोपः। तदाह। **रज्यादिति। रङ्क्षीष्टेति** ॥ आत्मनेपदे लिङः सीयुटि जस्य कुत्वेन गः ततः परसवर्णसम्प-न्नञकारनिवृत्तिः गस्य कः नस्य परसवर्णेन ङः षत्वमिति भावः। **अराङ्क्षीदिति** ॥ सिचि हलन्तलक्षणवृद्धौ कुत्वादि पूर्ववत्। अनेकहल्व्यवधानेऽपि हलन्तलक्षणा वृद्धिः प्रवर्तते इति भाष्ये स्पष्टम्। **अराङ्क्तामिति** ॥ 'झलो झलि' इति सलोपः। कुत्वादि पूर्ववत्। **अरङ्क्तेति** ॥ लुङस्तङि प्रथमपुरुषैकवचने 'झलो झलि' इति सलोपे कुत्वादि। **शप आक्रोशे इति** ॥ अनि-डयम्। भारद्वाजनियमात्थलि वेट्। वमादौ तु कादिनियमादिट्। **अशाप्सीदिति** ॥ हलन्तलक्षणा वृद्धिः। **अशप्तेति** ॥ 'झलो झलि' इति सलोपः। अशप्साताम्। त्विषधातुर-निट्। शपि लघूपधगुणः। तदाह। **त्वेषति–त्वेषते इति** ॥ तित्वेष। तित्विषतुः। तित्विषुः।

त्विष्यात्। त्विक्षीष्ट। अत्विक्षत्। अत्विक्षत। अत्विक्षाताम्। अत्विक्षन्त। यज १००२ देवपूजासङ्गतिकरणदानेषु। यजति–यजते।

२४०८। लिट्यभ्यासस्योभयेषाम्। (६-१-१७)

वच्यादीनां ग्रह्यादीनां चाभ्यासस्य सम्प्रसारणं स्याल्लिटि। इयाज।

२४०९। वचिस्वपियजादीनां किति। (६-१-१५)

वचिस्वप्योर्यजादीनां च सम्प्रसारणं स्यात्किति। पुनःप्रसङ्गविज्ञाना-

---

तित्वेषिथ। तित्विषथुः। तित्विष। तित्वेष। तित्विषिव। तित्विषिम। क्रादिनियमादिट्। **तित्विषे इति**॥ तित्विषाते। तित्विषिरे। तित्विषिषे। तित्विषाथे। तित्विषिध्वे। तित्विषे। तित्विषिवहे। तित्विषिमहे। **त्वेष्टेति**॥ तासि तकारस्य ष्टुत्वम्। **त्वेक्ष्यते। त्वेक्ष्यते इति**॥ स्ये कुत्वषत्वे। त्वेषतु। त्वेषताम्। अत्वेषत्। अत्वेषत। त्वेषेत्। त्वेषेत। **त्विष्यादिति**॥ यासुटः आशीर्लिङि कित्त्वान्न लघूपधगुणः। **त्विक्षीष्टेति**॥ 'लिङ् सिचावात्मनेपदेषु' इति कित्त्वान्न गुणः। लुङि परस्मैपदे 'शल इगुपधात्' इति च्लेः क्सः। कित्त्वान्न गुणः। तदाह। **अत्विक्षदित्यादि**॥ लुङि आत्मनेपदे च्लेः क्सादेशं मत्वा आह। **अत्विक्षतेति। अत्विक्षन्तेति**॥ अत्विक्ष झ इति स्थिते 'क्सस्याचि' इत्यन्त्यलोपासम्भवादतःपरत्वात् 'आत्मनेपदेष्वनतः' इत्यदादेशासम्भवादन्तादेशे क्सस्यान्त्यलोपे पररूपे वा रूपमिति भावः। **यज देवपूजेति**॥ अनिडयम्। **यजति–यजते इति**॥ देवान् पूजयति सङ्गमयति ददाति वेत्यर्थः। णलि द्वित्वादौ तु ययाज इति स्थिते 'लिट्यभ्यासस्योभयेषाम्' 'ष्यङः सम्प्रसारणम्' इत्यतः सम्प्रसारणमित्यनुवर्तते। 'वचिस्वपियजादीनाम्' इति सूत्रोपात्ताः 'ग्रहिज्यावयि'इति सूत्रोपात्ताश्च उभयशब्देन गृह्यन्ते। तदाह। **वच्यादीनां ग्रह्यादीनाञ्चेति**॥ अत्र वच्यादीनामित्यनेन वचिः स्वपिः यजादयश्च विवक्षिताः। 'यज देवपूजा' इत्यारभ्य 'टुओ श्वि गतिवृद्ध्योः' इत्येतत्पर्यन्ताः यजादयः। तदुक्तम् 'यजिर्वपिर्वहिश्चैव वसिर्वेञ्येञ इत्यपि। ह्वेञ् वदिः श्वयतिश्चैव यजाद्यास्स्युरिमे नव' इति तेष्वनन्तर्भावाद्वचिस्वप्योः पृथग्ग्रहणम्। ग्रह्यादीनामित्यनेन तु ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतयो विवक्षिताः। **इयाजेति**॥ अभ्यासयकारस्य सम्प्रसारणे 'सम्प्रसारणाच्च' इति पूर्वरूपमिति भावः। यज् अतुस् इति स्थिते द्वित्वे अभ्यासयकारस्य सम्प्रसारणे पूर्वरूपे च इयजतुरिति प्राप्ते। **वचिस्वपि**॥ वचिस्वपीति इका निर्देशः। सौत्रः सम्प्रसारणाभावः। आदिशब्दो यजिनैव सम्बध्यते, न तु वचिस्वपिभ्याम्, तथा सति हि वच्यादेः स्वप्यादेर्यजादेश्चेत्यर्थः स्यात्। तथा सति पृथक्स्वपिग्रहणं व्यर्थं स्यात्। अदादिगणे लुग्विकरणे 'वच परिभाषणे' इत्यारभ्य षष्ठस्य 'ञि ष्वप् शये' इत्यस्य वच्यादिग्रहणेनैव सिद्धेः। तदाह। **वचिस्वप्योर्यजादीनाञ्चेति**॥ ननु यज् अतुस् इति स्थिते द्वित्वात्परत्वात्सम्प्रसारणे कृते 'विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायेन द्वित्वस्य कथं प्राप्तिरित्याशङ्क्याह। **पुनःप्रसङ्गेति। ईजतुरिति**॥ यज् अतुस् इति

द्वित्वम्। ईजतुः। ईजुः। इयजिथ–इयष्ठ। ईजे। यष्टा। यक्ष्यति। यक्ष्यते। इज्यात्। यक्षीष्ट। अयाक्षीत्। अयष्ट। डु वप् १००३ बीजसन्ताने। बीजसन्तानं क्षेत्रे विकिरणं गर्भाधानं च। अयं छेदनेऽपि। केशान्वपति। उवाप–ऊपे। वप्ता। उप्यात्। वप्सीष्ट। प्रण्यवाप्सीत्–अवप्त। वह १००४ प्रापणे।

स्थिते सम्प्रसारणे पूर्वरूपे च कृते द्वित्वे सवर्णदीर्घ इति भावः। एवञ्चात्र लिटि किति 'वचिस्वपि' इति सूत्रम्। अकिति लिटि तु 'लिट्यभ्यासस्य' इति सूत्रमिति स्थितिः। भारद्वाजनियमात्थलि वेट्। कृते द्वित्वे अकित्त्वाद्वचिस्वपीत्यप्रवृत्तौ 'लिट्यभ्यासस्य' इत्यभ्यासयकारस्य सम्प्रसारणम्। तदाह। **इयजिथ–इयष्ठेति** ॥ अनिट्पक्षे व्रश्चादिना जस्य षत्वे ष्टुत्वेन थस्य ठः। ईजथुः। ईज। इयाज–इयज। ईजिव। ईजिम। **ईजे इति** ॥ 'असंयोगात्' इति कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणे कृते द्वित्वे सवर्णदीर्घ इति भावः। ईजाते। ईजिरे। क्रादिनियमादिट्। ईजिषे। ईजाथे। ईजिध्वे। ईजे। ईजिवहे। ईजिमहे। **यष्टेति** ॥ तासि व्रश्चादिना जस्य षत्वे ष्टुत्वेन तकारस्य टः। **यक्ष्यति–यक्ष्यते इति** ॥ व्रश्चादिना जस्य षत्वे 'षढोः' इति षस्य कत्वे सस्य षत्वमिति भावः। यजतु। यजताम्। अयजत्। अयजत। यजेत्। यजेत। आशीर्लिङि आह। **इज्यादिति** ॥ यासुटः कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणमिति भावः। **यक्षीष्टेति** ॥ आशीर्लिङि आत्मनेपदे प्रथमैकवचने सीयुटि जस्य षत्वे तस्य कत्वे सस्य षत्वमिति भावः। **अयाक्षीदिति** ॥ सिचि हलन्तलक्षणा वृद्धिः। जस्य षः तस्य कः सस्य ष इति भावः। **अयष्टेति** ॥ अयज् स् त इति स्थिते 'झलो झलि' इति सलोपे जस्य षः ष्टुत्वेन तकारस्य ट इति भावः। अयक्षाताम्। अयक्षत। अयक्ष्यत्। अयक्ष्यत। **डु वप् बीजसन्ताने इति** ॥ प्ररोहार्थबीजानां क्षेत्रेषु प्रक्षेपणे इत्यर्थः। तदाह। **क्षेत्रे विकिरणमिति** ॥ वपिः प्रकिरणार्थ इति 'सन्यङोः' इत्यत्र भाष्यम्। **गर्भाधानञ्चेति** ॥ "अप्रमत्ता रक्षत तन्तुमेतं मा वः क्षेत्रे परबीजानि वाप्सुः" इत्यादौ तथा दर्शनादिति भावः। **अयं छेदनेऽपीति** ॥ वर्तते इति शेषः। **केशान् वपतीति** ॥ छिनत्तीत्यर्थः। अनिडयम्। **उवापेति** ॥ 'लिट्यभ्यासस्य' इत्यकित्यभ्यासस्य सम्प्रसारणमिति भावः। किति तु 'वचिस्वपि' इति द्वित्वात्प्राक्सम्प्रसारणे कृते द्वित्वम्। ऊपतुः। ऊपुः। उवपिथ। उवप्थ। **ऊपथुः**। ऊप। उवाप–उवप। ऊपिव। ऊपिम। **ऊपे इति** ॥ ऊपाते। ऊपिरे। ऊपिषे। **ऊपाथे**। ऊपिध्वे। ऊपे। ऊपिवहे। ऊपिमहे। **वप्तेति** ॥ वप्स्यति। वप्स्यते। वपतु। **वपताम्**। अवपत्। अवपत। वपेत्। वपेत। **उप्यादिति** ॥ आशिषि यासुटः कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणम्। **वप्सीष्टेति** ॥ सीयुटि रूपम्। **प्रण्यवाप्सीदिति** ॥ लुङि **परस्मैपदे** सिचि हलन्तलक्षणा वृद्धिः। 'नेर्गद' इति णत्वम्। अवाप्साम्। अवाप्सुः। **अवप्तेति**॥ आत्मनेपदे लुङि 'झलो झलि' इति सलोपः। अवप्साताम्। **वह प्रापणे इति** ॥ अयमनिट्। वहति–वहते। **उवाहेति** ॥ 'लिट्यभ्यासस्य' इति किति अभ्यासस्य सम्प्रसारणमिति भावः। किति 'वचिस्वपि' इति सम्प्रसारणे कृते द्वित्वम्। ऊहतुः। ऊहुः। भारद्वाजनियमा

उवाह । उवहिथ । 'सहिवहोरोदवर्णस्य' (सू २३५७) । उवोढ । ऊहे । वोढा । वक्ष्यति–वक्ष्यते । अवाक्षीत् । अवोढाम । अवाक्षुः । अवोढ । अवक्षाताम् । अवक्षत । अवोढाः । अवोढ्वम् । वस्म १००५ निवासे । परस्मैपदी । वसति । उवास ।

२४१० । शासिवसिघसीनाञ्च । (८-३-६०)

इण्कुभ्यां परस्यैषां सस्य षः स्यात् । ऊषतुः । ऊषुः । उवसिथ–उवस्थ । वस्ता । 'सः स्यार्धधातुके' (सू २३४२) वत्स्यति । उष्यात् । अवात्सीत् । अवात्ताम् । वेञ् १००६ तन्तुसन्ताने । वयति–वयते ।

त्थलि वेट् । तदाह । **उवहिथेति** ॥ 'न शसदद' इति निषेधात् । 'थलि च सेटि' इति न भवति । अथ थलि अनिट्पक्षे आह । **सहिवहोरोदवर्णस्येति** ॥ सहिवहोरवर्णस्य ओत्स्याद्ढूलोपे परत इत्यर्थः । ढूलोप इति दीर्घम्बाधित्वा ओत्त्वमिति भावः । **उवोढेति** ॥ उवह् थ इति स्थिते ढत्वधत्वष्टुत्वढलोपाः ओत्त्वञ्चेति भावः । ऊहथुः । ऊह । उवाह–उवह । ऊहिव । ऊहिम । क्रादिनियमादिट् । **ऊहे इति** ॥ ऊहाते । ऊहिरे । ऊहिषे । ऊहाथे । ऊहिध्वे । ऊहे । ऊहिवहे । ऊहिमहे । **वोढेति** ॥ तासि ढत्वधत्वष्टुत्वढलोपाः ओत्त्वम् । लृटि स्ये हस्य ढः तस्य कः षत्वम् । तदाह । **वक्ष्यति–वक्ष्यते इति** ॥ वहतु । वहताम् । अवहत् । अवहत । वहेत् । उह्यात् । **अवाक्षीदिति** ॥ हलन्तलक्षणवृद्धौ ढकषाः प्राग्वत् । **अवोढामिति** ॥ 'झलो झलि' इति सलोपे ढत्वधत्वष्टुत्वढलोपाः ओत्त्वमिति भावः । **अवाक्षुरिति** ॥ उसि सिचि वृद्धौ ढकषाः । अवाक्षीः । अवोढम् । अवोढ । अवाक्षम् । अवाक्ष्व । अवाक्ष्म । **अवोढेति** ॥ लुङि आत्मनेपदे प्रथमपुरुषैकवचने अवह् स् त इति स्थिते सलोपः ढत्वधत्वष्टुत्वढलोपाः ओत्त्वञ्च । **अवक्षातामिति** ॥ आतामि सिचि ढकषा इति भावः । **अवक्षतेति** ॥ 'आत्मनेपदेष्वनतः' इत्यदादेशः । **अवोढ्वमिति** ॥ अवक्षि । अवक्ष्वहि । अवक्ष्महि । अवक्ष्यत् । अवक्ष्यत । इति वहत्यन्ताः स्वरितेतो गताः । वसधातुरनिट् । आकिति लिटि परे 'लिट्यभ्यासस्य' इत्यभ्यासस्य सम्प्रसारणम् । तदाह । **उवासेति** ॥ किति तु 'वचिस्वपि' इति सम्प्रसारणे कृते ऊस् अतुस् इति स्थिते सकारस्य आदेशप्रत्ययावयवत्वाभावादप्राप्ते षत्वे । **शासिवसि** ॥ 'सहेस्साडस्सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते । 'इण्कोः' इति 'अपदान्तस्य मूर्धन्यः' इति चाधिकृतम् । तदाह । **इण्कवर्गाभ्यामिति** ॥ भारद्वाजनियमात्थलि वेट् इति मत्वा आह । **उवसिथ-उवस्थेति** ॥ 'न शसदद' इति निषेधात् 'थलि च सेटि' इति न भवति । ऊषथुः । ऊष । उवास–उवस । ऊषिव । ऊषिम । क्रादिनियमादिट् । वस् स्यतीति स्थिते आह । **सस्स्यार्धधातुके इति** ॥ अनेन सकारस्य तकार इति भावः । वसतु । अवसत् । **वसेत् । उष्यादिति** ॥ आशीर्लिङि यासुटः कित्त्वात् वस्य सम्प्रसारणे 'शासिवसि' इति षत्वमिति भावः । **अवात्सीदिति** ॥ सिचि

२४११। वेञो वयिः। (२-४-४१)

वा स्यार्लिटि। इकार उच्चारणार्थः। उवाय।

२४१२। ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चति-पृच्छतिभृज्जतीनां ङिति च। (६-१-१६)

एषां किति ङिति च सम्प्रसारणं स्यात्। यकारस्य प्राप्ते।

२४१३। लिटि वयो यः। (६-१-३८)

वयो यस्य सम्प्रसारणं न स्यार्लिटि। ऊयतुः। ऊयुः।

२४१४। वश्चास्यान्यतरस्यां किति। (६-१-३९)

वयो यस्य वो वा स्यात्किति लिटि। ऊवतुः। ऊवुः। वयेस्तासावभा-

हलन्तलक्षणवृद्धौ सस्य तकारः। **अवात्ताम्मिति** ॥ अवस् स् ताम्मिति स्थिते वृद्धौ 'झलो झलि' इति सलोपे प्रत्ययलक्षणमाश्रित्य सकारादार्धधातुकपरत्वात् धातुसकारस्य 'सस्सि' इति तकारः। वस्तुतस्तु सिज्लोपस्यासिद्धत्वात् 'सस्सि' इति 'तकारे सिज्लोप इति बोध्यम्। अवात्सुः। अवात्सीः। अवात्तम्। अवात्त। अवात्सम्। अवात्स्व। अवात्स्म। अवत्स्यत्। वेञ्धातुरनिट्। अत्त्वादुभयपदी। तन्तुसन्तानः पटनिर्माणार्थन्तन्तूनान्तिर्यगतिर्यक्प्रसारणविशेषः। **वयति-वयते इति** ॥ शपि गुणायादेशौ। **वेञो वयिः** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **वा स्यार्लिटीति** ॥ 'लिट्यन्यतरस्याम्' इत्यतः अन्यतरस्यामित्यनुवृत्तेरिति भावः। **उच्चारणार्थः इति** ॥ इकारस्य इत्संज्ञकत्वे तु नुम् स्यादिति भावः। **उवायेति** ॥ णलि वयादेशे यजादित्वादकिति लिटि परे 'लिट्यभ्यासस्य' इति वकारस्य सम्प्रसारणे उपधावृद्धिरिति भावः। अत्र यकारस्य तु न सम्प्रसारणम्। 'लिटि वयो यः' इति तन्निषेधस्यानुपदमेव वक्ष्यमाणत्वादिति भावः। यद्यपि णलि वयादेशाभावेऽपि द्वित्वे अभ्यासस्य सम्प्रसारणे 'अचो ञ्णिति' इति वृद्धौ आयादेशे उवायेति सिद्ध्यति। तथापि ऊयतुरित्याद्यर्थं वयादेशस्य आवश्यकत्वादिहापि वयादेशो न्याय्यत्वादुपन्यस्तः। वे अतुस् इति स्थिते वयादेशे कृते। **ग्रहिज्या** ॥ चकारेण 'वचिस्वपियजादीनाम्' इत्यतः किंतीति समुच्चीयते। ग्र्यङस्सम्प्रसारणमित्यतः सम्प्रसारणमित्यनुवर्तते। तदाह। **एषामित्यादि** ॥ अत्र परस्मैपदिग्रह्यादिसाहचर्यात् 'अयवयपय' इति पठितस्यात्मनेपदिनो वयेर्न ग्रहणम्। यजादित्वादेव वयेः सम्प्रसारणे सिद्धे अत्र वयग्रहणं स्पष्टार्थमिति भाष्ये स्पष्टम्। **इति यकारस्य प्राप्ते इति** ॥ 'न सम्प्रसारणे सम्प्रसारणम्' इति लिङ्गादन्त्यस्य यणः पूर्वं सम्प्रसारणमिति विज्ञानाद्यकारस्य सम्प्रसारणे प्राप्ते सतीत्यर्थः। **लिटि वयो** ॥ **सम्प्रसारणन्नेति** ॥ 'न सम्प्रसारणे सम्प्रसारणम्' इत्यतः तदनुवृत्तेरिति भावः। तथा च यकारस्य सम्प्रसारणनिषेधे वकारस्य सम्प्रसारणमिति भावः। तदाह। **ऊयतुरिति** ॥ **वश्चास्य** ॥ 'लिटि वयो यः' इत्यनुवर्तते। तदाह। **वयो यस्येत्यादि।**

वात्थलि नित्यमिट्। उवयिथ । स्थानिवद्भावेन ञित्त्वात्तङ् । ऊये । ऊवे। वयादेशाभावे ।

२४१५ । वेञः । (६-१-४०)

वेञो न सम्प्रसारणं स्यालिटि। ववौ । ववतुः । वतुः। वविथ–ववाथ। ववे । वाता । ऊयात् । वासीष्ट । अवासीत् । व्येञ् १००७ संवरणे। व्ययति । व्ययते ।

उवयिथेति ॥ अकित्त्वान्न वः । अजन्तत्वादकारवत्त्वाच्च थलि इण्निषेधमाशङ्क्याह । **वयेस्तासावभावात्थलि नित्यमिडिति** ॥ वयेर्लिट्येव विहितत्वेन तासावभावात् 'अचस्तास्वत्' इति 'उपदेशेऽत्वतः' इति च इण्निषेधाप्रसक्त्या क्रादिनियमान्नित्यमिडित्यर्थः । 'यस्तासावस्ति नित्यानिट् च' इति भाष्यम् । ऊयथुः-ऊवथुः । ऊय-ऊव । उवाय–उवय। ऊयिव–ऊविव । उयिम–ऊविम । ननु वयेरङित्त्वात् कथमुभयपदित्वमित्यत आह । **स्थानिवद्भावेनेति। ऊये-ऊवे इति** ॥ 'वश्चास्यान्यतरस्याम्' इति वत्वविकल्पः। वत्वाभावे 'लिटि वयो यः' इति यकारस्य सम्प्रसारणनिषेधः । वकारस्य 'ग्रहिज्या' इति 'वचिस्वपि' इति वा सम्प्रसारणम्। ऊयाते । ऊयिरे । ऊयिषे । ऊयाथे । ऊयिध्वे । ऊये । उयिवहे । ऊयिमहे । क्रादिनियमादिट् । एवं ऊवाते । ऊविरे । इत्यादि । **वयादेशाभावे इति** ॥ यजादित्वात् 'लिट्यभ्यासस्य' इति 'वचिस्वपि' इति च सम्प्रसारणे सतीति शेषः । **वेञः** ॥ 'लिटि वयो यः' इत्यतो लिटीति 'न सम्प्रसारणे सम्प्रसारणम्' इत्यतो न सम्प्रसारणमिति चानुवर्तते । तदाह । **वेञो नेति** ॥ अत्र किमिति नानुवर्तते । तदाह । **ववाविति** ॥ णलि सम्प्रसारणनिषेधे 'आदे च उपदेशे' इत्यात्त्वे 'आत औ णलः' इत्यौभावे 'वृद्धिरेचि' इति वृद्धौ रूपम् । **ववतुरिति** ॥ 'आदेचः' इत्यात्त्वे 'आतो लोपः'। एवं वतुः । भारद्वाजनियमात्थलि वेट् । वेञस्तासावनिट्कत्वात् । तदाह । **वविथ-ववाथेति**॥ इट्पक्षे अकित्त्वेऽपि इट्परत्वादाल्लोप इति भावः । ववथुः । वव । ववौ । ववि व । ववि म । क्रादिनियमादिट् । **वव इति** ॥ ववाते । ववि रे । ववि षे । ववाथे । ववि ध्वे । वव े । ववि वहे । ववि महे । **वातेति** ॥ लुटि तासि आत्वम् । वास्यति । वास्यते । वयतु । वयताम् । अवयत् । अवयत । वयेत् । वयेत । **ऊयादिति** ॥ आशीर्लिङि यासुटि आत्वे कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणे पूर्वरूपे 'अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः । **वासीष्टेति** ॥ आशीर्लिङि आत्मनेपदे सीयुटि आत्वे रूपम् । वासीयास्ताम् । **अवासीदिति** ॥ आत्वे कृते इट् सकौ । अवास् इ स् ईदिति स्थिते 'इट ईटि' इति सिज्लोपः । अवासिष्टामित्यादि । आत्मनेपदे, अवास्त । अवासाताम्, इत्यादि । अवास्यत्। अवास्यत । **व्येञ्। संवरणे इति** ॥ ञित्वादुभयपदी । अनिट् । **व्ययति–व्ययते इति** ॥ शपि गुणाया-

२४१६। न व्यो लिटि। (६-१-४६)

व्येञ आत्त्वं न स्याल्लिटि। वृद्धिः। परमपि हलादिशेषं बाधित्वा यस्य सम्प्रसारणम्। उभयेषां ग्रहणसामर्थ्यात्। अन्यथा वच्यादीनां ग्रह्यादीनां चानुवृत्त्यैव सिद्धे किं तेन। विव्याय। विव्यतुः। विव्युः। 'इडत्त्यर्ति—' (सू २३८४) इति नित्यमिट्। विव्यायिथ। विव्याय–विव्यय। विव्ये। व्याता। वीयात्। व्यासीष्ट। अव्यासीत्। अव्यास्त। ह्वेञ् १००८ स्पर्धायां शब्दे च। ह्वयति। ह्वयते।

देशौ। णलादौ तु आत्वे विव्यौ विव्यतुरित्यादि प्राप्तम्। तत्राह। **न व्यो लिटि** ॥ व्ये इत्यस्य कृतात्त्वस्य षष्ठ्यन्तस्य व्यः इति निर्देशः। **आत्त्वमिति** ॥ 'आदेच उपदेशे' इत्यतः तदनुवृत्तेरिति भावः। **वृद्धिरिति** ॥ णलि व्ये अ इति स्थिते 'अचो ञ्णिति' इति वृद्धिरित्यर्थः। तथाच व्यै अ इति स्थितम्। ननु तत्र द्वित्वे 'लिट्यभ्यासस्य' इत्यभ्यासे यकारस्य सम्प्रसारणे पूर्वरूपे उत्तरखण्डस्य आयादेशे विव्याय इति रूपं वक्ष्यति। तदयुक्तम्। सम्प्रसारणात्प्राक् परत्वात् हलादिशेषेण यकारस्य निवृत्तौ वकारस्य सम्प्रसारणे उकारे सति उव्यायेत्यापत्तेरित्यत आह। **परमपीति** ॥ **उभयेषामिति** ॥ 'लिट्यभ्यासस्य' इति सूत्रे उभयेषामिति ग्रहणसामर्थ्यादित्यर्थः। तदेवोपपादयति। **अन्यथेति** ॥ 'वचिस्वपियजादीनाम्' इत्यस्य 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतिनाम्' इत्यस्य च स्वरितत्वादेवात्रानुवृत्त्यैव सिद्धे पुनर्लिट्यभ्यासस्य इत्यत्र उभयेषां ग्रहणं पुनर्विधानार्थम्। तथाच वच्यादीनां ग्रह्यादीनाञ्चाभ्यासस्य सम्प्रसारणं स्याल्लिटीति द्विर्विधानं लब्धम्। तत्र द्वितीयं विधानं नियमार्थम्। उभयेषामभ्यासस्य सम्प्रसारणमेव स्यान्नेतरदिति। तेनाभ्यासे एतत्सम्प्रसारणविषये कार्यान्तरनिवृत्तिस्सिद्धेत्यर्थः। तथाच प्रकृते अभ्यासयकारस्य सम्प्रसारणे सिद्धं रूपमाह। **विव्यायेति। विव्यतुः। विव्युः इति** ॥ 'वचिस्वपि' इति सम्प्रसारणे द्वित्वे यणिति भावः। थलि भारद्वाजनियमादिड्विकल्पमाशङ्क्याह। **इडत्त्यर्तीति** ॥ **विव्ययिथेति** ॥ अकित्त्वादभ्यासस्य सम्प्रसारणमिति भावः। विव्यथुः। विव्य। **विव्याय-विव्ययेति** ॥ अकित्त्वादभ्यासस्य सम्प्रसारणे णित्त्वविकल्पाद्वृद्धिविकल्प इति भावः। विव्यिव। विव्यिम। **विव्ये इति** ॥ कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणे पूर्वरूपे वि इत्यस्य द्वित्वे यणिति भावः। विव्याते। विव्यिरे। विव्यिषे। विव्याथे। विव्यिध्वे। विव्ये। विव्यिवहे। विव्यिमहे। **व्यातेति** ॥ तासि एकारस्य आत्वम्। व्यास्यति। व्ययतु। व्ययताम्। अव्ययत्। अव्ययत। व्ययेत्। **वीयादिति** ॥ कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणे पूर्वरूपे 'अकृत्सार्वधातुकयोः' इति दीर्घः। वीयास्ताम्। **व्यासीष्टेति** ॥ आशीर्लिङि सीयुटि आत्वम्। **अव्यासीदिति** ॥ लुङि सिचि आत्वे इट्सकोः सिज्लोपः। अव्यासिष्टामित्यादि। **अव्यास्तेति** ॥ लुङि आत्मनेपदे अव्ये स् त इति स्थिते आत्वमिति भावः। अव्यासाताम्मित्यादि। अव्यास्यत्। अव्यास्यत। ह्वेञ् धातुरनिट्। ञित्त्वादुभयपदी। **शब्दे चेति** ॥

२४१७ । अभ्यस्तस्य च । (६-१-३३)

अभ्यस्तीभविष्यतो ह्वेञः सम्प्रसारणं स्यात् । ततो द्वित्वम् । जुहाव । जुहुवतुः । जुहुवुः । जुहोथ–जुहविथ । जुहुवे । ह्वाता । हूयात् । ह्वासीष्ट ।

२४१८ । लिपिसिचिह्वश्च । (३-१-५३)

एभ्यश्च्लेरङ् स्यात् ।

२४१९ । आत्मनेपदेष्वन्यतरस्याम् । (३-२-५४)

'आतो लोपः' (सू २३७२) । अह्वत् । अह्वताम् । अह्वन । अह्वत । अह्वास्त ।

आकारणार्थः आगच्छेत्यादिशब्दोऽत्र विवक्षितः । **ह्वयति–ह्वयते इति** ॥ शपि गुणायादेशौ । णलादौ अकिति 'लिट्यभ्यासस्य' इति अभ्यासस्यैव सम्प्रसारणे प्राप्ते । **अभ्यस्तस्य च** ॥ 'ह्वः सम्प्रसारणम्' इत्यनुवर्तते । ह्व इति कृतात्वस्य ह्वे इत्यस्य षष्ठ्यन्तम् । तथाच अभ्यस्तीभूतस्य ह्वेञः सम्प्रसारणमिति लभ्यते । तथा सति णलि ह्वे अ इति स्थिते द्वित्वे कृते 'उभे अभ्यस्तम्' इत्यभ्यस्तसंज्ञायामुत्तरखण्डस्य सम्प्रसारणे कृते पूर्वखण्डस्याभ्यासस्य 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधः स्यादित्यत आह । **अभ्यस्तीभविष्यतः इति** ॥ ननु यद्यभ्यस्तीभविष्यतो ह्वेञः सम्प्रसारणं तर्हि द्वित्वं बाधित्वा परत्वात्सम्प्रसारणे सति 'विप्रतिषेधे यद्बाधितन्तद्बाधितम्' इति न्यायात् द्वित्वन्न स्यादित्यत आह । **ततो द्वित्वमिति** ॥ सम्प्रसारणानन्तरं द्वित्वमित्यर्थः । 'पुनः प्रसङ्गविज्ञानात्' इति भावः । तथाच णलि आत्वे कृते सम्प्रसारणे पररूपे हु इत्यस्य द्वित्वे 'कुहोश्चुः' इति श्चुत्वे तस्य जश्त्वे 'अचो ञ्णिति' इति वृद्धौ आवादेशे परिनिष्ठितं रूपमाह । **जुहावेति । जुहुवतुरिति** ॥ अनुसि आत्वे आल्लोपम्बाधित्वा अन्तरङ्गत्वात् 'अभ्यस्तस्य च' इत्यनेन सम्प्रसारणे 'वार्णादाङ्ग्म्बलीयः' इत्यस्यानित्यतया अन्तरङ्गात्पूर्वरूपे कृते द्वित्वे उवङिति भावः । यद्यपि किति 'वचिस्वपि' इति सम्प्रसारणेऽपि सिद्धमिदम् । तथापि अकिति आवश्यकमभ्यस्तस्यचेत्येतत् न्याय्यत्वादिहापि भवतीति बोध्यम् । एवं जुहुवुः । भारद्वाजनियमात्थलि वेट् । तदाह । **जुहोथ–जुहविथेति** ॥ जुहुवथुः । जुहुव । जुहाव–जुहव । जुहुविव । जुहुविम । क्रादिनियमादिट् । जुहुवे । जुहुवाते । जुहुविरे । जुहुविषे । जुहुवाथे । जुहुविध्वे । जुहुवे । जुहुविवहे । जुहुविमहे । **ह्वातेति** ॥ तासि आत्वम् । ह्वास्यति । ह्वास्यते । ह्वयतु । ह्वयताम् । अह्वयत् । अह्वयत । ह्वयेत् । ह्वयेत । **हूयादिति** ॥ आशीर्लिङि आत्वे यासुटि कित्वात् 'वचिस्वपि' इति सम्प्रसारणे पूर्वरूपे 'अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः । **ह्वासीष्टेति** ॥ आशीर्लिङि सीयुटि रूपम् । लुङि विशेषमाह । **लिपिसिचि** ॥ लिपि सिचि ह्वा एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम् । 'च्लेः सिच्' इत्यतः च्लेरिति 'अस्यतिवक्तिख्यातिभ्यः' इत्यतः अङिति चानुवर्तते । तदाह । **एभ्यः इति** ॥ इदम्परस्मैपदविषयम् । आत्मनेपदे विकल्पविधानात् । तदाह । **आत्मनेपदेषु । आतो लोपः इति** ॥ अह्वा अ त् इति स्थिते 'आतो लोप इटि च' इत्याल्लोप इत्यर्थः । **अह्वदिति** ॥ अह्वताम् ।

अथ द्वौ परस्मैपदिनौ। वद १००९ व्यक्तायां वाचि। अच्छ वदति। उवाद। ऊदतुः। उवादिथ। वदिता। उद्यात्। 'वदव्रज—' (सू २२६७) इति वृद्धिः। अवादीत्। टु ओ श्वि १०१० गतिवृद्ध्योः। श्वयति।

२४२०। विभाषा श्वेः। (६-१-३०)

श्वयतेः सम्प्रसारणं वा स्यालिटि यङि च। शुशाव। शुशुवतुः। 'श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः' (वा ३४६२)। तेन 'लिट्यभ्यासस्य—'

अह्वन्नित्यादि। अह्वतेति॥ लुङि आत्मनेपदे अङि रूपम्। अह्वेताम्। अह्वन्तेत्यादि। अङभावपक्षे त्वाह। **अह्वास्तेति॥** अह्वासाताम्। अह्वासत इत्यादि। अह्वास्यत्। अह्वास्यत। **वद व्यक्तायां वाचीति॥** अज्झल्विभागेन स्पष्टोच्चारणे इत्यर्थः। सेऽयम्। अच्छ वदति। अच्छेत्यव्ययमाभिमुख्ये। अभिमुखं वदतीत्यर्थः। 'अच्छ गत्यर्थवदेषु' इति गतित्वादच्छेत्यस्य धातोः प्रागेव प्रयोग इति भावः। अकिति लिटि द्वित्वे 'लिट्यभ्यासस्य' इति सम्प्रसारणमिति मत्वा आह। **उवादेति॥** किति लिटि तु 'वचिस्वपियजादीनाम्' इति द्वित्वात्प्राक् सम्प्रसारणे कृते द्वित्वे सवर्णदीर्घ इति भावः। **ऊदतुरिति। उवदिथेति॥** द्वित्वे अभ्यासस्य सम्प्रसारणमिति भावः। ऊदथुः। ऊद। उवाद–उवद। ऊदिव। ऊदिम। **वदितेति॥** तासि इट्। वदिष्यति। वदतु। अवदत्। वदेत्। **उद्यादिति॥** आशीर्लिङि यासुटः कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणमिति भावः। अवादीत् इत्यत्र हलन्तलक्षणवृद्धेः 'नेटि' इति निषेधेऽपि 'अतो हलादेः' इति वृद्धिविकल्पमाशङ्क्य वदधातोः पृथक् ग्रहणाद्वृद्धिरित्यभिप्रेत्याह। **वदव्रजेति वृद्धिरिति॥** एतदर्थमेव 'वदव्रजहलन्तस्य' इत्यत्र वदधातोः पृथक् ग्रहणमिति भावः। **टु ओ श्वि इति॥** टुरोकारश्चेत्। **श्वयतीति॥** शपि गुणायादेशौ। लिटि तु अकिति णलादौ 'लिट्यभ्यासस्य' इत्यभ्यासस्य नित्यं सम्प्रसारणे प्राप्ते किति तु अतुसादौ द्वित्वात्प्राक् 'वचिस्वपि' इति नित्यं सम्प्रसारणे प्राप्ते आह। **विभाषा श्वेः॥ सम्प्रसारणमिति॥** 'व्यङस्सम्प्रसारणम्' इत्यतस्तदनुवृत्तेरिति भावः। **लिटि यङि चेति॥** 'लिट्यङोः' इत्यनुवृत्तेरिति भावः। **शुशावेति॥** णलि अभ्याससम्प्रसारणं बाधित्वा द्वित्वात्प्रागेव परत्वादनेन सम्प्रसारणे कृते ततो द्वित्वे वृद्ध्यावादेशाविति भावः। अकित्त्वाद्वचिस्वपीत्यस्य नात्र प्राप्तिः। तथाच लिङुत्स्वेकवचनेषु द्वित्वात् प्रागप्राप्तस्य सम्प्रसारणस्य विकल्पविधिः। **शुशुवतुरिति॥** लिटि तु द्विवचनबहुवचनेषु द्वित्वात्प्राक् वचिस्वपीति सम्प्रसारणस्य विकल्पविधिः। तथाच उभयत्र विभाषेयम्। यङश्चेत्वप्राप्तविभाषैवेयम्। शोशूयते। शेश्वीयते। तत्र णलि एतत्सम्प्रसारणाभावपक्षे श्वि इत्यस्य द्वित्वानन्तरमभ्याससम्प्रसारणे शुश्वाय इति प्राप्ते आह। **श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः इति॥** लिट्यभ्याससम्प्रसारणस्यं प्रतिषेधो वक्तव्य इत्यर्थः। तथाच श्वि इत्यभ्यासस्य सम्प्रसारणाभावादभ्यासे इकार एव श्रूयते इत्याह। **तेनेति॥ शूयादिति॥** आशीर्लिङि यासुटः

(सू २४०८) इति सम्प्रसारणं न । शिश्वाय । शिश्वियतुः । श्वयिता । श्वयेत् । शूयात् । 'जृस्तम्भु—' (सू २२९१) इत्यङ् वा ।

२४२१ । श्वयतेरः । (७-४-१८)

श्वयतेरिकारस्याकारः स्यादङि । पररूपम् । अश्वत् । अश्वताम् । अश्वन् । 'विभाषा धेट्श्व्योः' (सू २३७५) इति चङ् । इयङ् । अशिश्वियत् । 'ह्यन्त—' (सू २२९९) इति न वृद्धिः । अश्वयीत् । वृत् । यजादयो वृत्ताः । भ्वादिस्त्वाकृतिगणः । तेन चुलुम्पतीत्यादिसङ्ग्रहः । इति भ्वादयः ।

२४२२ । ऋतेरीयङ् । (३-१-२९)

ऋतिः सौत्रस्तस्मादीयङ् स्यात्स्वार्थे । 'जुगुप्सायामयं धातुः' इति

कित्त्वाद्वचिस्वपीति सम्प्रसारणे पूर्वरूपे 'अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः । लुङि विशेषमाह । **जृस्तम्भ्विति** ॥ तथाच अश्वि अ त् इति स्थिते इयङि प्राप्ते । **श्वयतेरः** ॥ श्वयतेः अः इति च्छेदः । श्वयतेरिति श्तिपा निर्देशः । श्विधातोरित्यर्थः । 'अलोऽन्त्यस्य' इत्यन्त्यस्य इकारस्येति लभ्यते । 'ऋदशोऽङि' इत्यतः अङीत्यनुवर्तते । तदाह । **श्वयतेरिकारस्येति** ॥ अश्व अ त् इति स्थिते सवर्णदीर्घमाशङ्क्याह । **पररूपमिति** ॥ आर्धधातुकोपदेश अदन्तत्वाभावात् न अल्लोपः । **अश्वन्निति** ॥ अश्वः । अश्वतम् । अश्वत । अश्वम् । अश्वाव । अश्वाम । अङभावपक्षे त्वाह । **विभाषेति** ॥ **इयङिति** ॥ 'चङि' इति द्वित्वमित्यपि ज्ञेयम् । तदाह । **अशिश्वियदिति** ॥ अङश्चङश्चाभावे तु अश्वि ईत् इति स्थिते इकारस्य सिचि वृद्धौ सत्यां आयादेशे अश्वायीदिति प्राप्ते आह । **ह्यन्तेति न वृद्धिरिति** ॥ श्विग्रहणादिति भावः । नच 'नेटि' इत्येव सिचि वृद्धेः निषेधसिद्धेः पृथक् श्विग्रहणं व्यर्थमिति वाच्यम् । 'नेटि' इति निषेधस्य हलन्तलक्षणवृद्धिमात्रविषयत्वात् । नच अश्वि ईत् इति स्थिते सिचि वृद्ध्यपेक्षया परत्वादन्तरङ्गत्वाच्च इकारस्य गुणे एकारे कृते इगन्तत्वाभावेन सिचि वृद्ध्यप्राप्त्या अयादेशे कृते यान्तत्वादेव हलन्तलक्षणवृद्धेर्निषेधसिद्धेः 'ह्यन्त' इत्यत्र श्विग्रहणं व्यर्थमिति वाच्यम् । अनवकाशतया अपवादत्वेन गुणम्बाधित्वा सिचि वृद्धेः प्राप्तौ तन्निषेधार्थत्वादित्यलम् । वृदित्यस्य व्याख्यानं यजादयो वृत्ता इति । ननु भ्वादयो वृत्ता इति कुतो न व्याख्यायते इत्यत आह । **भ्वादिस्त्वाकृतिगणः इति** ॥ **चुलुम्पतीति** ॥ चुलुम्पधातुर्लोपार्थकः तस्यापि भ्वादिगणे पाठात् शब्विकरणत्वमिति भावः । **इति भ्वादयः इति** ॥ नचैवं सति 'अद भक्षणे' इत्यादीनां वक्ष्यमाणानां धातुत्वं कथमित्याशङ्क्य शब्विकरणाः भ्वादयस्समाम्ना इत्यर्थात् । **ऋतेरीयङ्** ॥ ऋतेर्धातुपाठे अदर्शनादाह । **ऋतिः सौत्रः इति** ॥ **स्वार्थे इति** ॥ अर्थविशेषस्यानिर्देशादिति भावः । तकारान्तो धातुरयमिका निर्दिष्टः न त्विकारान्तः । इदन्तत्वे हि सवर्णदीर्घेणैव सिद्धे ईकारोच्चारणवैयर्थ्यात् । नच

बहवः। 'कृपायां च' इत्येके। 'सनाद्यन्ताः–' (सू २३०४) इति धातुत्वम्। ऋतीयते। ऋतीयाञ्चक्रे। आर्धधातुकविवक्षायां तु 'आयादय आर्धधातुके वा' (सू २३०५) इतीयङभावे 'शेषात्कर्तरि–' (सू २१५९) इति परस्मैपदम्। आनर्त। अर्तिष्यति। आर्तीत्।

। इति तिङन्तभ्वादिप्रकरणम्।

इदन्तत्वे सति 'एरनेकाचः' इति यण् स्यादिति वाच्यम्। एवमपि ऋतेर्ङ्यः इति ङ्यप्रत्यये कृते 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घेणैव सिद्धे ईयङ्विधिवैयर्थ्यात्। **एके इति** ॥ अन्ये इत्यर्थः। ऋतीयते इति। ईयङोऽदन्तत्वात् शपि पररूपम्। **ऋतीयाञ्चक्रे इति** ॥ 'कास्प्रत्ययात्' इत्याम्। ऋतीयिता। ऋतीयिष्यते। ऋतीयताम्। आर्तीयत। ऋतीयेत। ऋतीयिषीष्ट। आर्तीयिष्ट। आर्तीयिष्यत। **आनर्तेति** ॥ ऋत् इति तकारान्तात् लिटि णलि द्वित्वे उरदत्त्वे रपरत्वे हलादिशेषे 'अत आदेः' इत्यभ्यासस्य दीर्घे 'तस्मान्नुड्द्विहलः' इति नुट्। नुड्विधौ ऋकारैकदेशो रेफो हल्त्वेन गृह्यते इति उक्तेरिति भावः। आनृततुः। आनृतुः। अनिट्सु अस्यापाठात् थलि नित्यमिट्। आनर्तिथ। आनृतथुः। आनृत। आनर्त। आनृतिव। आनृतिम। अर्तिता। अर्तिष्यति। ऋत्यात्। **आर्तीदिति** ॥ 'इट ईटि' इति सिज्लोपः। आडागमः। आर्तिष्यत् ॥

इति श्रीसिद्धान्तकौमुदीव्याख्यायां
वासुदेवदीक्षितविरचितायां बालमनोरमायां
॥ शब्विकरणनिरूपणम् ॥



। श्रीरस्तु ।

॥ अथ तिङन्तादादिप्रकरणम् ॥

अद १०११ भक्षणे । द्वौ परस्मैपदिनौ ।

२४२३ । अदिप्रभृतिभ्यः शपः । (२-४-७२)

लुक्स्यात् । अत्ति । अत्तः । अदन्ति ।

२४२४ । लिट्यन्यतरस्याम् । (२-४-४०)

अदो घस्लृ वा स्याल्लिटि । जघास ।* गमहन–' (सू २३६३) इत्युपधालोपः । तस्य चर्विधिं प्रति स्थानिवद्भावनिषेधाद्धस्य चर्त्वम् । 'शासिवसि–' (सू २४१०) इति षत्वम् । जक्षतुः । जक्षुः । घसेस्तासावभावात्थलि नित्य-

---

अथ लुग्विकरणान् धातून्निरूपयितुमुपक्रमते । **अद भक्षणे इति** ॥ अनिडयम् । **अदिप्रभृतिभ्यः** ॥ 'प्यक्षत्रियार्षञितः' इत्यतो लुगित्यनुवर्तते इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे । **लुक् स्यादिति** ॥ अदिप्रभृतिभ्यः परस्य शपो लुगिति फलितम् । **अत्तीति** ॥ शपो लुकि दस्य चर्त्वेन तकारः । एवमत्त इत्यपि । **अदन्तीति** ॥ एतदर्थमेव 'झोऽन्तः' इत्यत्र अकारादिरादेश आश्रितः । अत्सि । अत्थः । अत्थ । अद्मि । अद्वः । अद्मः । **लिट्यन्यतरस्याम्** ॥ 'अदो जग्धिः' इत्यतः अद इति 'लुङ्सनोर्घस्लृ' इत्यतो घस्लृ इति चानुवर्तते । तदाह । **अदः इति** ॥ आदेशे लकार इत् । घसादेशः अनिट् । **जघासेति** ॥ अकित्त्वात् 'गमहन' इत्युपधालोपो नेति भावः । जघस् अतुसिति स्थिते आह । **गमहनेत्युपधालोपः इति** ॥ 'असंयोगात्' इति कित्त्वादिति भावः । जघ्स् अतुसिति स्थिते घकारस्य चर्त्वं वक्ष्यन् उपधालोपस्य स्थानिवत्त्वमाशङ्क्याह । **तस्येति** ॥ उपधालोपस्येत्यर्थः। जघ्स् अतुसिति स्थिते सकारस्य आदेशप्रत्यावयवत्वाभावादाह । **शासीति** ॥ थलि तु क्रादिनियमान्नित्यमिट् । 'उपदेशेऽत्वतः' इति निषेधस्य तासौ नित्यानिड्विषयत्वात् । घस् तु तासौ न विद्यत एव कुतस्तस्य तासावनिट्कत्वम् । 'यस्तासावस्ति अनिट्च' इति हि भाष्यम् । तदाह । **घसेस्तासाविति** । **जघसिथेति** ॥ जक्षथुः । जक्ष । जघास–जघस । जक्षिव ।

मिट्। जघसिथ। आद। आदतुः। 'इडत्यर्ति–' (सू २३८४) इति नित्यमिट्। आदिथ। अत्ता। अत्स्यति।

२४२५। हुझल्भ्यो हेर्धिः। (६-४-१०१)

होर्झलन्तेभ्यश्च हेर्धिः स्यात्। अद्धि। अत्तात्। अदानि।

२४२६। अदः सर्वेषाम्। (७-३-१००)

अदः परस्यापृक्तसार्वधातुकस्याडागमः स्यात्सर्वमतेन। आदत्। आत्ताम्। आदन्। आदः। आत्तम्। आत्त। आदम्। आद्व। आद्म। अद्यात्। अद्याताम्। अद्युः। अद्यास्ताम्। अद्यासुः।

२४२७। लुङ्सनोर्घस्लृ। (२-४-३७)

अदो घस्लृ स्याल्लुङि सनि च। लृदित्त्वादङ्। अघसत्। हन १०१२ हिंसागत्योः। प्रणिहन्ति।

जक्षिम। घसादेशाभावपक्षे त्वाह। **आदेति** ॥ थलि भारद्वाजनियमादिड्विकल्पे प्राप्ते आह। **इडत्यर्तीति**। **आदिथेति** ॥ आदथुः। आद। आद। आदिव। आदिम। अत्ता। **अत्स्यतीति** ॥ अनिट्। दस्य तः। अत्तु–अत्तात्। अत्ताम्। अदन्तु। अद् हि इति स्थिते 'झयो होऽन्यतरस्याम्' इति हकारस्य पूर्वसवर्णविकल्पेन धकारविकल्पे प्राप्ते। **हुझल्भ्यो हेर्धिः** ॥ **झलन्तेभ्य इति** ॥ अङ्गविशेषणत्वात् तदन्तविधिरिति भावः। अनेकाल्त्वात् सर्वादेशः। रुदिहीत्यत्र तु न। निर्दिश्यमानहेरिटा व्यवहितत्वात्। इट्सहितस्य त्वनिर्दिश्यमानत्वादिति भाष्ये स्पष्टम्। **अत्तादिति** ॥ धित्वात् परत्वात्तातङ्। तस्य स्थानिवत्त्वेन हित्वेऽपि न पुनर्धित्वम्। 'विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायात्। अत्तम्। अत्त। **अदानीति** ॥ 'आडुत्तमस्य' इत्याडागमः। एतदर्थमेव आडागमे दीर्घोच्चारणमिति भावः। अदाव। अदाम। लङि आद् त् इति स्थिते। **अदः सर्वेषाम्** ॥ अद इति पञ्चमी। 'तस्मादित्युत्तरस्य इति परिभाषया परस्येति लभ्यते। 'गुणोऽपृक्ते' इत्यतः अपृक्ते इति 'तुरुस्तु शम्यमः' इत्यतस्सार्वधातुके इति चानुवर्तते। सप्तमीद्वयञ्च षष्ठ्या विपरिणम्यते। 'अङ् गार्ग्यगालवयोः' इत्यतः अङित्यनुवर्तते। गार्ग्यगालवयोरित्यस्यानुवृत्तिनिवृत्तये सर्वेषामिति। तदाह। **अदः परस्येत्यादिना** ॥ टित्त्वादाद्यवयवः। तदाह। **आददिति** ॥ **आत्तामिति** ॥ अपृक्तग्रहणान्नाडागम इति भावः। विधिलिङि रूपमाह। **अद्यादिति** ॥ शपो लुकि अतः परत्वाभावात् 'अतो येयः' इति नेति भावः। मिपः अमि यासुटि सलोपे सवर्णदीर्घे अद्याम्। अद्याव। अद्याम। आशीर्लिङि अद्यादिति सिद्धवत्कृत्याह। **अद्यास्तामिति** ॥ लुङि अद् स् त् इति स्थिते। **लुङ्सनोर्घस्लृ** ॥ 'अदो जग्धिः' इत्यतः अद इत्यनुवर्तते। तदाह। **अदेरिति**॥ लृदित्त्वस्य प्रयोजनमाह। **लृदित्त्वादिति** ॥ हनधातुरनिट्। **प्रणिहन्तीति** ॥ शपो लुक्।

२४२८। अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति। (६-४-३७)

'अनुनासिक—' इति लुप्तषष्ठीकं पदं वनतीतरेषां विशेषणम्। अनुनासिकान्तानामेषां वनतेश्च लोपः स्याज्झलादौ क्ङिति परे। यमिरमिनमिगमिहनिमन्यतयोऽनुदात्तोपदेशाः। तनुक्षणुक्षिणुऋणुतृणुघृणुवनुमनु तनोत्यादयः। हतः। घ्नन्ति।

२४२९। वमोर्वा। (८-४-२३)

उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा स्याद्वमयोः परयोः।

नस्यानुस्वारपरसवर्णौ। 'नेर्गद' इति णत्वम्। **अनुदात्तोपदेश** ॥ ऊदृदन्तैरित्यादिभिस्सङ्गृहीता अनुदात्तोपदेशाः वनतिर्भौवादिकः तनोत्यादयस्तु 'तनु विस्तारे' इत्यादिना पठिष्यन्ते। एतेषामनुनासिकस्य लोपः स्यात् झलादौ क्ङिति इति प्रतीयमानार्थः। एवं सति मुक्तमित्यादौ मुचादीनामपि मकारादिलोपः स्यात्। तत्राह। **अनुनासिकः इति लुप्तषष्ठीकं पदमिति** ॥ एवमप्युक्तातिप्रसङ्गतादवस्थ्यादाह। **वनतीतरेषां विशेषणमिति** ॥ अनुदात्तोपदेशानां तनोत्यादीनाञ्चेत्यर्थः। तथाच विशेषणत्वान्तदन्तविधौ अनुनासिकान्तानामनुदात्तोपदेशानान्तनोत्यादीनां वनतेश्चेत्येषामन्तस्य लोपः स्यादित्यर्थलाभान्मुक्तमित्यादौ नातिप्रसङ्गः। तदाह। **अनुनासिकान्तानामित्यादिना** ॥ वनधातोस्तु अनुनासिकान्तत्वान्न विशेषणम्। अव्यभिचारादिति भावः। अत्रानुदात्तोपदेशान् अनुनासिकान्तान् दर्शयति। **यमिरमीति** ॥ अनुदात्तोपदेशेषु एतेषामेव षण्णामनुनासिकान्तत्वादिति भावः। अथ तनोतीत्यादीननुनासिकान्तान् दर्शयति। **तनुक्षणुक्षिणोति** ॥ मनु इत्यन्तं समाहारद्वन्द्वात् प्रथमैकवचनम्। एतेऽष्टौ तनोत्यादयोऽनुनासिकान्ता इत्यर्थः। 'तनु विस्तारे' इत्यारभ्य 'डु कृञ् करणे' इत्यन्ता दश धातवस्तनोत्यादयः। तत्र करोतिरनुनासिकान्तत्वाभावादिह न गृह्यते। 'जनसनखनां सञ्झलोः' इति सनोतेरात्त्वस्य वक्ष्यमाणत्वात् सोऽप्यत्र न गृहीतः। 'वनु याचने' इति तनादौ पठितम्। तस्य उविकरणतया उदित्त्वेन च वनतिग्रहणेनाग्रहणात् तनादौ पठितस्यापि पृथग्ग्रहणम्। तत्र तानादिकस्य वनेरुदित्त्वात् 'उदितो वा' इति क्त्वायामिड्विकल्पात् 'यस्य विभाषा' इति निष्ठायामिडभावपक्षे, वतः, वतवान्, इत्युदाहरणम्। वनतेस्तु भौवादिकस्य उदित्त्वाभावान्निष्ठायां सेट्कत्वेऽपि क्तिनि वतिरित्युदाहरणम्। 'तितुत्रतथसिसुसरकसेषु च' इति इण्निषेधादित्यलम्। **हतः इति** ॥ तसि अनुदात्तोपदेशानुनासिकान्तत्वान्नकारलोपः। 'सार्वधातुकमपित्' इति तसो ङित्त्वात्। **घ्नन्तीति** ॥ अजादिङित्परकत्वात् 'गमहन' इत्युपधालोपे 'हो हन्तेः' इति कुत्वेन हस्य घः। हंसि। हथः। हथ। **वमोर्वा** ॥ 'उपसर्गादसमासेऽपि' इत्यतः उपसर्गादित्यनुवर्तते। 'रषाभ्यान्नो णः' इति सूत्रमनुवर्तते। 'हन्तेरत्पूर्वस्य' इत्यतो हन्तेरिति। तदाह। **उपसर्गस्थान्निमित्तादिति** ॥ णलि जहा-

प्रहण्मि—प्रहन्मि। प्रहण्वः—प्रहन्वः। 'हो हन्तेः'—' (सू ३५८) इति कुत्वम्। जघान। जघ्नतुः। जघ्नुः।

२४३०। अभ्यासाच्च। (७-३-५५)

अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात्। जघनिथ—जघन्थ। हन्ता। 'ऋद्धनोः—' (सू २३६६) इतीट्। हनिष्यति। हन्तु। हतात्। घ्नन्तु।

२४३१। हन्तेर्जः। (६-४-३६)

हौ परे आभीयतया जस्यासिद्धत्वाद्धेर्न लुक्। जहि। हनानि। हनाव। हनाम। अहन्। अहताम्। अघ्नन्। अहनम्।

२४३२। आर्धधातुके। (२-४-३५)

इत्यधिकृत्य।

२४३३। हनो वध लिङि। (२-४-४२)

२४३४। लुङि च। (२-४-४३)

नेति स्थिते आह। **हो हन्तेरिति** ॥ 'अभ्यासाच्च' इत्यपेक्षया अस्यान्तरङ्गत्वेन न्याय्यत्वादिति भावः। **जघ्नतुरिति** ॥ 'गमहन' इत्युपधालोपे 'हो हन्तेः' इति कुत्वम्। थलि भारद्वाजनियमादिड्विकल्पे जहनिथ। जहन् थ, इति स्थिते ङिणत्प्रत्ययपरत्वाभावान्नकारपरत्वाभावाच्च 'हो हन्तेः' इति कुत्वाप्राप्तौ। **अभ्यासाच्च** ॥ 'हो हन्तेः' इत्यनुवर्तते। 'चजोःकुघिण्ण्यतोः' इत्यतः कुग्रहणञ्च। तदाह। **अभ्यासात् परस्येत्यादिना। जघनिथ—जघन्थेति** ॥ इडभावे नस्यानुस्वारपरसवर्णौ। जघ्नथुः। जघ्न। जघान—जघन। जघ्निव। जघ्निम। लटि स्ये इण्निषेधमाशङ्क्याह। **ऋद्धनोरिति** ॥ हन् हि इति स्थिते 'हुझल्भ्यः' इति धित्वे प्राप्ते। **हन्तेर्जः** ॥ 'शा हौ' इत्यतः हौ इत्यनुवृत्तिमभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे। **हौ परे इति** ॥ कृते जादेशे 'अतो हेः' इति हेर्लुकमाशङ्क्य आह। **आभीयतयेति। जहीति** ॥ हतात्। हतम्। हत। **हनानीति** ॥ आटः पित्त्वेन ङित्त्वाभावान्नोपधालोप इति भावः। **अहन्निति** ॥ लङस्तिपि 'इतश्च' इति इकारलोपे 'संयोगान्तस्य' इति तकारलोपः। न्याय्यत्वाद्धलन्त्यादिलोपो वा। **अहनमिति** ॥ अहन्व। अहन्म। झलादिपरकत्वाभावान्नोपधादीर्घः। विधिलिङि हन्यात्। हन्याताम् इत्यादि। आशीर्लिङि वधादेशं वक्ष्यन्नाह। **आर्धधातुके इत्यधिकृत्येति** ॥ 'अदो जग्धिः' इत्यादिविधयो वक्ष्यन्ते इति शेषः। तदधिकारस्थं सूत्रमाह। **हनो वध** ॥ वधेति लुप्तप्रथमाकम्। हनो वधादेशः स्यादार्धधातुके लिङीत्यर्थः। **लुङि च** ॥

वधादेशोऽदन्तः । 'आर्धधातुके' (सू २३०७) इति विषयसप्तमी । तेनार्धधातुकोपदेशेऽकारान्तत्वात् 'अतो लोपः' (सू २३०८) । वध्यात् । वध्यास्ताम् । 'आर्धधातुके' किम् । विध्यादौ हन्यात् । 'हन्तेः—' (सू ३५९) इति णत्वम् । प्रहण्यात् । अवधीत् ।

अथ चत्वारः स्वरितेतः । द्विष १०१३ अप्रीतौ । द्वेष्टि—द्विष्टे । द्वेष्टा । द्वेक्ष्यति । द्वेक्ष्यते । द्वेष्टु—द्विष्टात् । द्विड्ढि । द्वेषाणि । द्वेषै । द्वेषावहै । अद्वेट् ।

२४३५ । द्विषश्च । (३-४-११२)

लङो झेर्जुस् वा स्यात् । अद्विषुः । अद्विषन् । अद्वेषम् । द्विष्यात् । द्विषीत । द्विक्षीष्ट । अद्विक्षत् । दुह १०१४ प्रपूरणे । प्रपूरणं पूरणा-

---

हनो वधादेशः स्याल्लुङीत्यर्थः स्पष्टः । **वधादेशोऽदन्तः इति** ॥ धकारादकारो न सुखोच्चारणार्थ इति भावः । तत्प्रयोजनन्तु अनुपदमेव अवधीत् इत्यत्र वक्ष्यते । ननु आशीर्लिङि हन् यादिति स्थिते आर्धधातुके परे कृतस्य वधादेशस्य आर्धधातुकोपदेशे अकारान्तत्वाभावात् कथं वध्यादित्यत्र अल्लोप इत्यत आह । **विषयसप्तमीति** ॥ तथाच आर्धधातुके विवक्षिते तत्प्रवृत्तेः प्रागेव वधादेशे कृते आर्धधातुकप्रवृत्तिरिति फलितम् । ततश्च आर्धधातुकोपदेशे वधादेशस्य अकारान्तत्वादल्लोपो निर्बाधः । तस्य । **तेनेति** ॥ **अवधीदिति** ॥ सिचि अल्लोपे कृते वधादेशस्य धकारान्ततया एकाच्त्वेऽप्यादेशोपदेशे अनेकाच्त्वेन 'एकाच उपदेशे' इति निषेधाभावात् सिच इट् । अतो हलादेः' इति वृद्धिस्तु न भवति । 'अचः परस्मिन्' इत्यल्लोपस्य स्थानिवत्त्वात् । एतदर्थमेव हि वधादेशस्य अदन्तत्वमाश्रितम् । **स्वरितेतः इति** ॥ उभयपदिन इति फलितम् । **द्विष अप्रीताविति** ॥ अनिट् । **द्वेष्टीति** ॥ पित्त्वेन ङित्त्वाभावाल्लघूपधगुण इति भावः । द्विष्टः । द्विषन्ति । द्वेक्षि । द्विष्टः । द्विष्ट । द्वेष्मि । द्विष्वः । द्विष्मः । तङि उदाहरति । **द्विष्टे इति** ॥ ङित्त्वान्न गुणः । द्विषाते । द्विषते । द्विक्षे । द्विषाथे । द्विड्ढ्वे । द्विषे । द्विष्वहे । द्विष्महे । षढोरिति षस्य कत्वम्मत्वा आह । **द्वेक्ष्यतीति । द्विड्ढीति** ॥ हेर्धिः षस्य जश्त्वेन डः । द्विष्टात् । द्विष्टम् । द्विष्ट । **द्वेषाणीति** ॥ आटः पित्त्वेन ङित्त्वाभावात् गुणः षात्परत्वाण्णत्वम् । द्वेषाव । द्वेषाम । द्विष्टाम् । द्विषाताम् । द्विषताम् । द्विक्ष्व । द्विषाथाम् । द्विड्ढ्वम् । **द्वेषै इति** ॥ आटः पित्त्वेन ङित्त्वाभावात् गुण इति भावः । **अद्वेडिति** ॥ लङस्तिप् गुणः इकारलोपः 'वाऽवसाने' इति चर्त्वजश्त्वे इति भावः । अद्विष्टाम् । **द्विषश्च** ॥ 'झेर्जुस्' इति 'लङश्शाकटायनस्य' इति चानुवर्तते इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे । **लङो झेरिति । अद्विषन्निति** ॥ अद्वेट् । अद्विष्टम् । अद्विष्ट । अद्वेषम् । अद्विष्व । अद्विष्म । विधिलिङि परस्मैपदे आह । **द्विष्यादिति** ॥ द्विष्याताम्, द्विष्युः, इत्यादि । तङि आह । **द्विषीतेति** ॥ द्विषीयाताम् । द्विषीरन् इत्यादि । आशीर्लिङि द्विष्यास्ताम् इत्यादि । तङ्याह । **द्विक्षीष्टेति** ॥ 'लिङ्सिचोरात्मनेपदेषु' इति कित्त्वान्न गुणः । द्विक्षीयास्तामित्यादि । लुङि परस्मैपदे आह ।

भावः। धात्वर्थम्बाधते कश्चित्। दोग्धि। दुग्धः। धोक्षि। दुग्धे। धुक्षे। धुग्ध्वे। दोग्धु। दुग्धि। दोहानि। धुक्ष्व। धुग्ध्वम्। दोहै। अधोक्। अदोहम्। अदुग्ध। अधुग्ध्वम्। अधुक्षत्। अधुक्षत। 'लुग्वा दुह—' (सू २३६५) इति लुक्पक्षे तथास्ध्वम्वहिषु लङ्वदपि। दिह १०१५ उपचये। उपचयो

अद्विक्षदिति ॥ 'शल इगुपधात्'इति क्सः। अद्विक्षताम्। अद्विक्षन् इत्यादि। तङि अद्विक्षत। अद्विक्षाताम्। अद्विक्षन्त इत्यादि। अद्वेक्ष्यत्। अद्वेक्ष्यत। **दुह प्रपूरणे इति** ॥ अयमनिट्। 'पयो दोग्धि' इत्यादौ प्रकृष्टपूरणस्यार्थस्यानवगमादाह। **प्रपूरणं पूरणाभावः इति**॥ ऊधः पूरणप्रतिकूलीभाव इत्यर्थः। ऊधसः सकाशात् क्षारणे इति यावत्। ननु प्रपूरणशब्दस्य कृतोऽयमर्थ इत्यत आह। **धात्वर्थम्बाधते कश्चिदिति** ॥ प्रसिद्धं धात्वर्थं कश्चिदुपसर्गो बाधित्वा अर्थान्तरं नयतीत्यर्थः। **दोग्धीति** ॥ 'दादेः' इति हस्य घः 'झषस्तथोः' इति तकारस्य धकारः घस्य जश्त्वेन गः। एवं दुग्धः इत्यपि। दुहन्ति। **धोक्षीति** ॥ हस्य घः चर्त्वेन कः षत्वमिति भावः। दुग्धः। दुग्ध। दोह्मि। दुह्वः। दुह्मः। लटि आत्मनेपदे आह। **दुग्धे इति** ॥ घधगाः। दुहाते। दुहते। **धुक्षे इति** ॥ हस्य घः दस्य भष् धकारः घस्य कः षत्वम्। दुहाथे। **धुग्ध्वे इति** ॥ हस्य घः भष् घस्य गः। दुह्वहे। दुह्महे। दुदोह। दुदुहतुः। दुदुहुः। अजन्ताकारवत्त्वाभावात् क्रादिनियमान्नित्यमिट्। दुदोहिथ। दुदुहथुः। दुदुह। दुदोह। दुदुहिव। दुदुहिम। दुदुहे। दुदुहाते। दुदुहिरे। दुदुहिषे। दुदुहाथे। दुदुहिढ्वे–दुदुहिध्वे। दुदुहे। दुदुहिवहे। दोग्धा। धोक्ष्यति। धोक्ष्यते। **दोग्ध्वति** ॥ दुग्धात्। दुग्धाम्। दुहन्तु। **दुग्धीति** ॥ हेर्धिः घत्वजश्त्वे। दुग्धात्। दुग्धम्। दुग्ध। **दोहानीति** ॥ आटः पित्त्वादङित्त्वाद्गुणः। दोहाव। दोहाम। दुग्धाम्। दुहाताम्। दुहताम्। **धुक्ष्वेति** ॥ घत्वं भष् जश्त्वचर्त्वे षत्वम्। दुहाथाम्। **धुग्ध्वमिति**॥ हस्य घः भष् घस्य जश्त्वम्। **दोहै इति** ॥ आटः पित्त्वादकित्त्वाद्गुण इति भावः। दोहावहै। दोहामहै। लङि परस्मैपदे आह। **अधोगिति** ॥ तिप् इकारलोपः हल्ङ्यादिलोपः हस्य घः दस्य भष् घस्य चर्त्वविकल्पः। अदुग्धाम्। अदुहन्। अधोक्। अदुग्धम्। अदुग्ध। **अदोहमिति** ॥ अदुह्व। अदुह्म। लङस्तङ्याह। **अदुग्धेति** ॥ हस्य घः तकारस्य धः घस्य गः। अदुहाताम्। अदुहत। अदुग्धाः। अदुहाथाम्। **अधुग्ध्वमिति** ॥ हस्य घः दस्य भष् घस्य गः। अदुहि। अदुह्वहि। लुङि परस्मैपदे आह। **अधुक्षदिति** ॥ 'शल इगुपधात्' इति क्सः। हस्य घः दस्य भष् घस्य चर्त्वम्। अधुक्षताम्। अधुक्षन् इत्यादि। लुङस्तङ्याह। **अधुक्षतेति** ॥ 'क्सस्याचि' अधुक्षाताम्। अधुक्षन्त। अधुक्षथाः। अधुक्षाथाम्। अधुक्षध्वम्। अधुक्षि। अधुक्षावहि। अधुक्षामहि। **लुग्वेति** ॥ त थास् ध्वम् वहि एषु चतुर्षु दन्त्यादिषु परेषु 'लुग्वा दुह' इति क्सस्य लुक्पक्षे लङीव रूपाणीत्यर्थः। तथाच अदुग्ध। अदुग्धाः। अधुग्ध्वम्। अदुह्वहि इत्यपि रूपाणीति फलितम्। अधोक्ष्यत्। अधोक्ष्यत। **दिह उपचये इति** ॥ उपचयो वृद्धिः। अनिट्। **प्रणिदेग्धीति** ॥ 'नेर्गद' इति णत्वम्।

वृद्धिः। प्रणिदेग्धि। लिह १०१६ आस्वादने। लेढि। लीढः। लिहन्ति। लेक्षि। लीढे। लिक्षे। लीढ्वे। लेढु। लीढाम्। लीढि। लेहानि। अलेट्। अलिक्षत्। अलिक्षत। अलिक्षताम्। अलीढ। अलिक्षावहि। अलिह्वहि। अलेक्ष्यत्। अलेक्ष्यत। चक्षिङ् १०१७ व्यक्तायां वाचि। अयं दर्शनेऽपि। इकारोऽनुदात्तो युजर्थः। 'विचक्षणः प्रथयन्'। नुम् तु न। 'अन्ते इदितः' इति व्याख्यानात्। ङकारस्तु 'अनुदा-

---

दुहधातुवद्रूपाणि। **लिह आस्वादने इति** ॥ अनिट्। **लेढीति** ॥ शपो लुकि ढत्वधत्वष्टुत्वढलोपाः। **लेक्षीति** ॥ सिपि हस्य ढः 'षढोः' इति ढस्य कः इति भावः। लीढः। लीढ। लेह्मि। लिह्वः। लिह्मः। लटि तङ्याह। **लीढे इति** ॥ लिहाते। लिहते। **लिक्षे इति** ॥ ढकषाः। लिहाथे इति सुगमम्। **लीढ्वे इति** ॥ ढत्वधत्वष्टुत्वढलोपदीर्घाः। लिहे। लिह्वहे। लिह्महे। लेढा। लेक्ष्यति। लेक्ष्यते। **लेढ्विति** ॥ लीढात्। लीढाम्। लिहन्तु। **लीढीति** ॥ हेर्धिः ढत्वधत्वष्टुत्वढलोपदीर्घाः। लीढात्। लीढम्। लीढ। **लेहानीति** ॥ आटः पित्त्वेन ङित्त्वाभावाद्गुण इति भावः। लेहाव। लेहाम। लीढाम्। लिहाताम्। लिहताम्। लिक्ष्व। लिहाथाम्। लीढ्वम्। लेहै। लेहावहै। लेहामहै। **अलेढिति** ॥ लङि तिपि शपो लुकि इकारलोपे हल्ङ्यादिलोपे हस्य ढः चर्त्वविकल्प इति भावः। अलीढाम्। अलिहन्। अलेट्। अलीढम्। अलीढ। अलेहम्। अलिह्व। अलिह्म। अलीढ। अलिहाताम्। अलिहत। अलीढाः। अलिहाथाम्। अलीढ्वम्। अलिहि। अलिह्वहि। अलिह्महि। **अलिक्षदिति** ॥ लुङि क्सः। अलिक्षताम्। अलिक्षन्। अलिक्षः इत्यादि। तङि आह। **अलिक्षतेति। अलीढेति** ॥ 'लुग्वा दुह' इति क्सलोपपक्षे रूपम्। अलिक्षाताम्। अलिक्षन्त। अलिक्षथाः—अलीढाः। अलिक्षाथाम्। अलिक्षध्वम्—अलीढ्वम्। अलिक्षि। 'लुग्वा दुह' इति लुग्विकल्पप्मत्वा आह। **अलिक्षावहि। अलिह्वहीति** ॥ **अलेक्ष्यत्। अलेक्ष्यतेति** ॥ द्विषादयश्चत्वारः स्वरितेतो गताः। **चक्षिङ् व्यक्तायां वाचीति** ॥ गूढार्थस्य स्पष्टप्रतिपत्त्यर्थे विवरणे इत्यर्थः। **अयं दर्शनेऽपीति** ॥ श्रुतौ "पूर्वापरश्चरतो माययैतौ। शिशू क्रीडन्तौ परियातो अध्वरम्। विश्वान्यन्यो भुवनाभिचक्षे। ऋतूनन्यो विदधज्जायते पुनः" इत्यादौ तथा दर्शनादिति भावः। ननु चक्षिङित्यत्र इकारोच्चारणं व्यर्थं न च सुखोच्चारणन्तदिति वाच्यम्। अकारोच्चारणेनैव तत्सिद्धेः। नाप्यनुदात्तेत्त्वप्रयुक्तात्मनेपदार्थं तादिति शक्यं वक्तुम्। ङित्त्वादेव तत्सिद्धेरित्यत आह। **इकारोऽनुदात्तो युजर्थः इति** ॥ 'अनुदात्तेतश्च हलादेः' इति ल्युडपवादयुच्प्रत्ययार्थ इत्यर्थः। अकारमुच्चार्य इकारोच्चारणन्तु उच्चारणार्थत्वाभावप्रतिपत्त्यर्थमिति भावः। "विचक्षणः प्रथयन्" इति मन्त्रः। अत्र लित्स्वरनिवृत्तये युच्प्रत्यय इति भावः। ननु युच्प्रत्ययार्थमिकारस्य इत्संज्ञावश्यकत्वे नुमागमः स्यादित्यत आह। **नुम् तु नेति** ॥ कुत इत्यत आह। **अन्ते इदितः इति** ॥ 'इदितो नुम् धातोः' इत्यत्र 'गोः पदान्ते' इत्यस्मादन्ते इत्यनुवृत्तेरिति भावः। नन्विकारे युजर्थम् अनुदात्तत्वस्य इत्संज्ञकत्वस्य च आवश्यकत्वे तत एवात्मनेपदसम्भवात् ङकारोच्चारणं व्यर्थमित्याशङ्क्य आह। **ङकारस्त्विति** ॥

त्तेत्त्वप्रयुक्तमात्मनेपदमनित्यम्' (प ९७) इति ज्ञापनार्थः। तेन 'स्फायन्निर्मोकसन्धि—' इत्यादि सिद्ध्यति। चष्टे। चक्षाते। 'आर्धधातुके' (सू २३७७) इत्यधिकृत्य।

२४३६। चक्षिङः ख्याञ्। (२-४-५४)

२४३७। वा लिटि। (२-४-५५)

अत्र भाष्ये ख्शादिरयमादेशः। असिद्धकाण्डे 'शस्य यो वा' (वा १५८६) इति स्थितम्। ञित्त्वात्पदद्वयम्। चख्यौ—चख्ये। चक्शौ—चक्शे। 'चयो द्वितीयाः—' (वा ५०२३) इति तु न। चर्त्वस्यासिद्धत्वात्। चचक्षे। ख्याता—क्शाता। ख्यास्यति—ख्यास्यते। क्शास्यति—क्शास्यते। अचष्ट।

ङकारः नित्यात्मनेपदार्थः। अनुदात्तेत्त्वप्रयुक्तं त्वात्मनेपदङ्कदाचिन्न स्यात्। अतो ङकारोच्चारणम्। अत एव 'अनुदात्तेत्त्वप्रयुक्तात्मनेपदमनित्यम्' इति विज्ञायते इत्यर्थः। **स्फायन्निति** ॥ स्फायी वृद्धावित्यनुदात्तेतोऽपि लटः शत्रादेशः। न त्वात्मनेपदं शानजिति भावः। वस्तुतस्तु अन्त्येत्कत्वव्याघातेन चरितार्थत्वात् ङकारोच्चारणमुक्तार्थं कथं ज्ञापकम्, भाष्ये तथा अनुक्तत्वाच्च। अतः पृषोदरादित्वकल्पनया स्फायन्निति कथञ्चित्साध्यमित्याहुः। **चष्टे इति** ॥ 'स्कोः' इति कलोपः ष्टुत्वञ्चेति भावः। **चक्षाते इति** ॥ चक्षते। थासः सेभावे 'स्कोः' इति कलोपे 'षढोः' इति षस्य कत्वे षत्वे च कृते चक्षे। चक्षाथे। ध्वमि 'स्कोः' इति कलोपे षस्य जश्त्वेन डकारे चड्ढ्वे। चक्षे। चक्ष्वहे। चक्ष्महे। आर्धधातुके इत्यनन्तरम् इत्यनुवर्तमाने इति शेषः। **चक्षिङः ख्याञ्** ॥ चक्षिङः ख्याञ् स्यादार्धधातुके परे इत्यर्थः। **वा लिटि** ॥ 'चक्षिङः ख्याञ्' वा स्याल्लिटीत्यर्थः। **अत्रेति** ॥ 'चक्षिङः ख्याञ्' इति सूत्रभाष्ये ख्शादिरयमादेश इति 'पूर्वत्रासिद्धम्' इत्यधिकारे 'ख्शाजः शस्य यो वा वक्तव्यः' इति च स्थितमित्यर्थः। तेन पुङ्क्त्वानमित्यत्र यत्वस्यासिद्धत्वात् 'पुमः खय्यम्परे' इति रुत्वन्नेति हल्सन्धिनिरूपणे प्रपञ्चितम्। **ञित्त्वात्पदद्वयमिति** ॥ परस्मैपदमात्मनेपदञ्चेत्यर्थः। **चख्यौ इति** ॥ ख्शादेशस्य शस्य यत्वपक्षे 'आत औ णलः' इति भावः। चख्यतुः। चख्युः। भारद्वाजनियमात्थलिवेट्। चख्थिथ—चख्याथ। चख्यथुः। चख्य। चख्यौ। चख्यिव। चख्यिम। क्रादिनियमादिट्। लिटि तङि ख्याजादेशस्य शस्य यत्वपक्षे आह। **चख्ये इति** ॥ चख्याते। चख्यिरे। चख्यिषे। चख्याथे। चख्यिध्वे। चख्ये। चख्यिवहे। चख्यिमहे। शस्य यत्वाभावपक्षे त्वाह। **चक्शौ—चक्शे इति** ॥ खस्य चर्त्वेन क इति भावः। कृते चर्त्वे तस्य 'चयो द्वितीयाः शरि' इति खकारमाशङ्क्य निराकरोति। **चय इति** ॥ अथ ख्याजादेशाभावपक्षे आह। **चचक्षे इति** ॥ चचक्षिषे। चचक्षिध्वे। चचक्षिवहे। **ख्यास्यते इति** ॥ चष्टाम्। चक्षाताम्। चक्षताम्। चक्ष्व। चक्षाथाम्। चड्ढ्वम्। चक्षै। चक्षावहै। चक्षामहै। लङ्याह। **अचष्टेति** ॥ अचक्षाताम्। अचक्षत। अचष्ठाः। अचक्षाथाम्। अचड्ढ्वम्। अचक्षि। अच-

चक्षीत । ख्यायात्—ख्येयात् । कशायात्—कशेयात् ।

२४३८ । अस्यतिवक्तिख्यातिभ्योऽङ् । (३-१-५२)

एभ्यश्च्लेरङ् । अख्यत्—अख्यत । अकशासीत्—अकशास्त । 'वर्जने कशाञ् नेष्टः' (वा १५९२) । समचक्षिष्ट इत्यादि ।

अथ पृच्यन्ता अनुदात्तेतः । ईर १०१८ गतौ कम्पने च । ईर्ते । ईराञ्चक्रे । ईरिता । ईरिष्यते । ईर्ताम् । ईर्ध्वे । ईर्ध्वम् । ऐरिष्ट । ईड १०१९ स्तुतौ । ईट्टे ।

२४३९ । ईशः से । (७-२-७७)

२४४० । ईडजनोर्ध्वे च । (७-२-७८)

ईशीडजनां 'से—' 'ध्वे—' शब्दयोः सार्वधातुकयोरिट् स्यात् ।

क्ष्महि । विधिलिङ्याह । **चक्षीतेति** ॥ आशीर्लिङि ख्शादेशस्य शस्य यत्वपक्षे आह । **ख्यायात्—ख्येयादिति** ॥ 'वाऽन्यस्य' इत्येत्त्वविकल्पः । शस्य यत्वाभावपक्षे आह । **कशायात्—कशेयादिति** ॥ लुङि च्लेः सिचि प्राप्ते । **अस्यतिवक्ति** ॥ 'च्लेः सिच्' इत्यतः च्लेरित्यनुवर्तते । तदाह । **एभ्यश्च्लेरिति । अख्यत्—अख्यतेति** ॥ यत्वपक्षे रूपम् । आह्लोपः ञित्त्वादुभयपदित्वादात्मनेपदे रूपम् । ख्शादेशपक्षे परस्मैपदपक्षे तु आह । **अकशासीदिति** ॥ अङ्विधौ ख्यातीति यकारनिर्देशात् यत्वाभावपक्षे अङ् न भवति । किन्तु आदन्तत्वलक्षणौ सगिटौ । अकशासिष्टाम् इत्यादि । **अकशास्तेति** ॥ आत्मनेपदे लुङि रूपम् । अकशासातां इत्यादि । अख्यास्यत् । अख्यास्यत । अकशास्यत् । अकशास्यत । **वर्जने कशाञ् नेष्टः इति** ॥ वार्तिकमिदम् । **समचक्षिष्टेति** ॥ अवर्जयदित्यर्थः । लुङि रूपम् । **अथ पृच्यन्ताः इति** ॥ 'पृची सम्पर्चने' इत्येतत्पर्यन्ता इत्यर्थः । **ईर गताविति** ॥ सेट् । **ईर्ते इति** ॥ ईराते । ईरते । ईर्षे । ईराथे । ईर्ध्वे । ईरे । ईर्वहे । ईर्महे । **ईराञ्चक्रे इति** ॥ 'इजादेश्च' इत्याम् । **ईरितेति** ॥ ईरिष्यते । इत्यपि ज्ञेयम् । **ईर्तामिति** ॥ ईराताम् । ईरताम् । **ईर्ध्वेति** ॥ ईराथाम् इत्यपि ज्ञेयम् । **ईर्ध्वमिति** ॥ ईरै । ईरावहै । ईरामहै । ऐर्त । ऐराताम् । ऐरत । ऐर्थाः । ऐराथाम् । ऐर्ढ्वम् । ऐरि । ऐर्वहि । ऐर्महि । ईरीत । ईरिषीष्ट । ऐरिष्ट । ऐरिष्यत । **ईड स्तुतौ । ईट्टे इति** ॥ तकारस्य ष्टुत्वेन टः डस्य चर्त्वेन ट इति भावः । ईडाते । ईडते । ईड् से इति स्थिते सार्वधातुकत्वादिडागमे अप्राप्ते । **ईशः से । ईडजनोर्ध्वे च** ॥ 'इङ्त्यर्ति' इत्यतः इडिति 'रुदादिभ्यः' इत्यतः सार्वधातुक इति चानुवर्तते । से ध्वे इति लुप्तषष्ठीके इत्यभिप्रेत्य सूत्रद्वयं युगपद्व्याचष्टे । **ईशीडजनामिति** ॥ ध्वे इत्यस्य पूर्वत्रापकर्षः । से इत्यस्य उत्तरत्रानुवृत्तिरिति भावः । प्रत्येकं व्याख्याने तु ईशो ध्वे शब्दे परे न स्यात् । ईडजनोः सेशब्दे परे न स्यादिति भावः । ननु तर्हि 'ईशीडजनाम्' से

योगविभागो वैचित्र्यार्थः। ईडिषे। ईडिध्वे। 'एकदेशविकृतस्यानन्यत्वात्' (प ३८)। ईडिष्व। ईड्ढ्वम्। 'विकृतिग्रहणेन प्रकृतेरग्रहणात्'। ऐड्ढ्वम्। ईश १०२० ऐश्वर्ये। ईष्टे। ईशिषे। ईशिध्वे। आस १०२१ उपवेशने। आस्ते। 'दयायासश्च'। (सू २३२४)। आसाञ्चक्रे। आस्स्व। आध्वम्। आसिष्ट। आङ्पूर्वस्तु १०२२ इच्छायाम्। आशास्ते। आशासाते। आङ्पूर्वत्वं प्रायिकम्। तेन 'नमोवाकं प्रशास्महे' इति सिद्धम्। वस १०२३ आच्छादने। वस्ते। वस्से। वध्वे। ववसे। वसिता। कसि १०२४ गतिशासनयोः।

ध्वयोः इत्येकमेव सूत्रं कुतो न कृतमित्यत आह। **योगविभागो वैचित्र्यार्थः इति** ॥ से इत्यस्य उत्तरत्रानुवृत्तिः ध्वे इत्यस्य पूर्वत्रापकर्ष इति वैचित्र्यद्योतनार्थ इत्यर्थः। स्वतन्त्रेच्छस्य महर्षेर्नियन्तुमशक्यत्वादिति भावः। **ईडिषे इति** ॥ ईडे। ईड्वहे। ईण्महे। लिटि तु ईडाञ्चक्रे इत्यादि। ईडिता। ईडिष्यते। ईड्ढाम्। ननु ईडिध्वेत्यत्र कथमिट् सेशब्दाभावात्। तत्राह। **एकदेशेति** ॥ एकदेशविकृतत्वात् स्वशब्दस्य इटि ईडिष्व इति रूपमित्यर्थः। ननु तर्हि ईड्ढ्वम् इत्यत्र कथं नेट् ध्वेस्वरूपापेक्षया ध्वमित्यस्य एकदेशविकृतत्वादित्यत आह। **विकृतीति** ॥ प्रकृतिग्रहणे तदेकदेशविकृतविकृतस्य ग्रहणम्। न तु विकृतिग्रहणे तदेकदेशविकृताया अपि प्रकृतेर्ग्रहणम्। पुरुषमानयेत्युक्ते हि अन्धोऽनन्धो वा पुरुष आनीयते। अन्धमानय इत्यत्र तु अन्ध एवानीयते न त्वनन्धः। तथाच ध्वम एत्वे कृते ध्वेशब्दः, तेन च विकृतेन ध्वमित्यस्य तत्प्रकृतिभूतस्य न ग्रहणमिति नेडिति भावः। ईडै। ईडावहै। ईडामहै। ऐष्ट। ऐडाताम्। ऐडत। ऐष्ठाः। ऐडाथाम्। ऐड्ढ्वम्। ऐडि। ऐड्वहि। ऐण्महि। ईडीत। ईडिषीष्ट। ऐडिष्ट। ऐडिष्यत। ईशधातुरीडिवत्। ईष्टे इत्यादि। शस्य त्रश्चादिना षत्वे ष्टुत्वमिति विशेषः। **आस उपवेशने। आस्ते इति** ॥ आसाते। आसते। आस्से। आसाथे। 'धि च' इति सलोपः। आध्वे। आसे। आस्वहे। आस्महे। इजादित्वाद्यभावादाह। **दयायासश्चेति** ॥ आसिता। आसिष्यते। आस्ताम्। आसाताम्। **आस्स्वेति** ॥ सकारद्वयमत्रबोध्यम्। आसाथाम्। **आध्वमिति** ॥ 'धि च' इति सलोपः। आसै। आसावहै। आसामहै। आस्त। आसाताम्। आसत। आस्थाः। आसाथाम्। आध्वम्। आसि। आस्वहि। आस्महि। आसीत। आसीयाताम्। आसिषीष्ट। आसिषीयास्ताम्। **आसिष्टेति** ॥ आसिषातामित्यादि। आसिष्यत। **आङश्शासु इच्छायामिति** ॥ आङः परश्शासधातुरिच्छायामित्यर्थः। **नमोवाकमिति** ॥ वचेर्घञि वाकः नमश्शब्दस्य वचनङ्कर्महे इत्यर्थः। धातूनामनेकार्थत्वात् आसिवद्रूपाणि। **वस आच्छादने इति** ॥ परिधाने इत्यर्थः। **वध्वे इति** ॥ 'धि च' इति सलोपः। **ववसे इति** ॥ वादित्वादेत्त्वाभ्यासलोपौ नेति भावः। **वसितेति** ॥ अनिट्सु शब्विकरणस्यैव वसेर्ग्रहणमिति भावः। वसिष्यते। वस्ताम्। अवस्त। वसीत। वसिषीष्ट। अवसिष्ट। अवसिष्यत। **कसि गतीति** ॥ वसधातुवत्। इदित्वान्नुमिति

कंस्ते । कंसाते । कंसते । 'अयमनिदित् इत्येके' कस्ते । तालव्यान्तोऽप्यनिदित् । कष्टे । कशाते । कक्षे । कड्ढ्वे । णिसि १०२५ चुम्बने । निंस्ते । दन्त्यान्तोऽयम् । आभरणकारस्तु तालव्यान्त इति बभ्राम । निंस्से । णिजि १०२६ शुद्धौ । निञ्क्ते । निञ्क्षे । निञ्जिता । शिजि १०२७ अव्यक्ते शब्दे । शिञ्क्ते । पिजि १०२८ वर्णे । 'सम्पर्चने इत्येके' । उभयत्रेत्यन्ये 'अवयवे इत्यपरे' । 'अव्यक्ते शब्दे' इतीतरे । पिञ्क्ते । 'पृजि' इत्येके । पृञ्क्ते । वृजी १०२९ वर्जने । दन्त्योष्ठ्यादिः । ईदित् । वृक्ते । वृजाते । वृक्षे । 'इदित्' इत्यन्ये । वृङ्क्ते । पृची १०३० सम्पर्चने । पृक्ते ।

षूङ् १०३१ प्राणिगर्भविमोचने । सूते । सुषुवे । सुषुविषे । सोता—सविता । 'भूसुवोः—' (सू २२२४) इति गुणनिषेधः । सुवै । सविषीष्ट । असविष्ट—असोष्ट । शीङ् १०३२ स्वप्ने ।

विशेषः । **तालव्यान्तः इति** ॥ तालव्योष्मान्त इत्यर्थः । **कष्टे इति** ॥ व्रश्चेति शस्य षः ष्टुत्वम् । **कक्षे इति** ॥ शस्य षः षस्य 'षढोः' इति कः षत्वम् । **कड्ढ्वे इति** ॥ शस्य षः तस्य जश्त्वेन डः धस्य ष्टुत्वेन ढः । **णिसि चुम्बने इति** ॥ णोपदेशोऽयम् । नुमि 'नश्च' इत्यनुस्वारः निंस्ते इत्यादि । **निंस्से इति** ॥ नुमोऽनुस्वारः थासः सेभावः । **दन्त्यान्तोऽयमिति** ॥ दन्त्योष्मान्तोऽयमित्यर्थः । **बभ्रामेति** ॥ 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति सूत्रे वृत्त्यादौ तालव्योष्मान्तत्वोक्तेरिति भावः । **णिजि शुद्धाविति** ॥ णोपदेशोऽयम् । अनिट्सु इरित एव ग्रहणादयं सेट् । **निञ्क्ते इति** ॥ नुमि निन्ज् ते इति स्थिते जस्य कुत्वेन गः तस्य चर्त्वेन कः नस्य परसवर्णो ञकारः । निञ्जाते । निङ्क्षे । निञ्जाथे । निङ्ग्ध्वे । निञ्जे । निञ्ज्वहे । निञ्ज्महे । लिटि संयोगात्परत्वात् क्ङित्त्वाभावान्नलोपो न । निनिञ्जे । निनिञ्जाते इत्यादि । निञ्जिता । निञ्जिष्यते । निङ्क्ताम् । अनिङ्क्त । निञ्जीत । निञ्जिषीष्ट । अनिञ्जिष्ट । अनिञ्जिष्यत । शिजिपिजी अप्येवम् । **पृजि इत्येके इति** ॥ ऋदुपधोऽयम् । वृजीधातुः ऋदुपधः ईदित् अतो नुम् नेति भावः । **पृची सम्पर्चने इति** ॥ ऋदुपधोऽयम् । पपृचे इत्यादि । ईरादयः पृच्यन्ता अनुदात्तेतो गताः । षूङ्धातुः षोपदेशः सेट् ङित्त्वात्तङ् । **सूते इति** ॥ सुवाते । सुवते । सूषे । सुवाथे । सूध्वे । सुवे । सूवहे । सूमहे । **सुषुविषे इति** ॥ स्वरतीति इड्विकल्पं बाधित्वा 'श्र्युकः किति' इति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट् 'स्वरति सूति' इति इड्विकल्पम्मत्वा आह । **सोता-सवितेति** ॥ तिङस्तासा व्यवधानात् 'भूसुवोः' इति न गुणनिषेध इति भावः । सोष्यते—सविष्यते । सूताम् । सुवाताम् । सूष्व । सूध्वम् । आटः पित्त्वाद्गुणे प्राप्ते आह । **भूसुवोरिति । सुवै इति** ॥ सुवावहै । सुवामहै । असूत ।

२४४१। शीङः सार्वधातुके गुणः। (७-४-२१)

'क्ङिति च' (सू २२१७)इत्यस्यापवादः। शेते। शयाते।

२४४२। शीङो रुट्। (७-१-६)

शीङः परस्य झादेशस्यातो रुडागमः स्यात्। शेरते। शेषे। शेध्वे। शये। शेवहे। शिश्ये। शयिता। अशयिष्ट।

अथ स्तौत्यन्ताः परस्मैपदिनः। ऊर्णुस्तूभयपदी। यु १०३३ मिश्रणे अमिश्रणे च।

२४४३। उतो वृद्धिर्लुकि हलि। (७-३-८९)

लुग्विषये उकारस्य वृद्धिः स्यात्पिति हलादौ सार्वधातुके। न त्वभ्यस्तस्य। यौति। युतः। युवन्ति। युयाव। यविता। युयात्। इह 'उतो वृ-

---

सुवीत। सविषीष्ट इत्यादि स्पष्टम्। 'शीङ् स्वप्ने' सेट् ङित्वात्तङ्। **शीङः सार्वधातुके** ॥ स्पष्टम्। 'सार्वधातुकार्धधातुकयोः' इत्येव सिद्धे किमर्थमिदमित्यत आह। **क्ङिति चेत्यस्यापवादः इति** ॥ झस्य अदादेशे सति शे अते इति स्थिते। **शीङो रुट्** ॥ 'झोऽन्तः' इत्यतो झ इत्यनुवर्तते 'अदभ्यस्तात्' इत्यतः अदित्यनुवृत्तं षष्ठ्या विपरिणम्यते। तदाह। **शीङः परस्य झादेशस्येति** ॥ रुटि उकार उच्चारणार्थः। टित्त्वादाद्यवयवः। **शेध्वे इति** ॥ 'षीध्वंलुङ्लिटाम्' इत्युक्तेर्न ढः। **शिश्ये इति** ॥ शिश्यिषे। शिश्यिढ्वे–शिश्यिध्वे। **शयितेति** ॥ शयिष्यते। शेताम्। शयाताम्। शेष्व। शयाथाम्। शेध्वम्। शयै। शयावहै। शयामहै। अशेत। अशयाताम्। अशेरत। अशेथाः। अशयाथाम्। अशेध्वम्। अशयि। अशेवहि। अशेमहि। शयीत। शयिषीष्ट। **अशयिष्टेति** ॥ अशयिष्यत इत्यपि ज्ञेयम्। **स्तौत्यन्ताः इति** ॥ ष्टुञ् स्तुतावित्यतः प्राक्तना इत्यर्थः। **ऊर्णुस्तूभयपदीति** ॥ ञित्त्वादिति भावः। **यु मिश्रणे अमिश्रणे चेति** ॥ अमिश्रणम्पृथग्भावः सेऽयम्। **उतो वृद्धिर्लुकि हलि** ॥ 'नाभ्यस्तस्याचिपिति सार्वधातुके' इति अचिवर्जमनुवर्तते। लुकीति विषयसप्तमी। दर्शनाभावस्य लुकः परत्वासम्भवात्। तदाह। **लुग्विषय इत्यादिना**। **यौतीति** ॥ गुणं बाधित्वा वृद्धिः। **युतः इति** ॥ अपित्त्वान्न वृद्धिः। **युवन्तीति** ॥ अपित्त्वाद्ध्यभावे ङित्त्वाद्गुणाभावे उवङिति भावः। यौषि। युथः। युथः। यौमि। युवः। युमः। **युयावेति** ॥ युयुवतुः। युयुवुः। युयविथ। युयुवथुः। युयुव। युयाव–युयव। युयुविव। युयुविम। **यवितेति** ॥ उवङं बाधित्वा परत्वाद्गुणः। यविष्यति। यौतु–युतात्। युताम्। युवन्तु। हौ अपित्त्वान्न वृद्धिः। युहि–युतात्। युतम्। युत। आटि पित्त्वेऽपि हलादित्वाभावान्न वृद्धिः। पित्त्वेन ङित्त्वाभावाद्गुणः। यवानि। यवाव। यवाम। अयौत्। अयुताम्। अयुवन्। अयौः। अयुतम्। अयुत। अयवम्। अयुव। अयुम। विधिलिङ्याह। **युयादिति** ॥ अत्र यासुडागमसहितस्य तिपः पित्त्वादुतो वृद्धिमाशङ्क्याह। **इह उतो वृद्धिर्नेति** ॥ कुत

द्धिः—' न । भाष्ये 'पिच्च डिन्न' 'ङिच्च पिन्न' इति व्याख्यानात् । विशेष-विहितेन ङित्त्वेन पित्त्वस्य बाधात् । यूयात् । अयावीत् । रु १०३४ शब्दे ।

२४४६ । तुरुस्तुशम्यमः सार्वधातुके । (७-३-९५)

एभ्यः परस्य सार्वधातुकस्य हलादेस्तिङ ईड्वा स्यात् । 'नाभ्यस्तस्य—' (सू २५०३) इत्यतोऽनुवृत्तिसम्भवे पुनः सार्वधातुकग्रहणमपिदर्थम् । रवीति—रौति । रुवीतः—रुतः । 'हलादेः' किम् । रुवन्ति । 'तिङः' किम् । शाम्यति । 'सार्वधातुके' किम् । आशिषि रूयात् । विद्ध्यादौ तु रुयात्—रुवीयात् । अरावीत् । अरविष्यत् । 'तु' इति सौत्रो धातुर्गतिवृद्धिहिंसासु । 'अयश्च लुग्विकरणः' इति स्मरन्ति । तवीति—तौति । तुवीतः—तुतः । तोता ।

इत्यत आह । **भाष्ये इति** । व्याख्यानादिति ॥ 'हलःश्नश्शानज्झौ' इति सूत्रव्याख्यावसरे वचनादित्यर्थः। ननु यासुडागमसहितस्य तिपः पित्त्वात् 'पिच्च डिन्न' इत्युक्तवचनेन 'यासुट् परस्मैपदेषु' इति ङित्त्वस्याप्यभावात् 'ङिति च' इति गुणनिषेधाभावात् गुणस्स्यादित्यत आह । **विशेषविहितेनेत्यादि बाधादित्यन्तम्** ॥ 'यासुट् परस्मैपदेषु' इति विशेषविहितेन यासुटो ङित्त्वेन तत्सहितस्य तिपो 'ङिच्च पिन्न' इति पित्त्वप्रयुक्तङित्त्वनिषेधस्य बाधात् ङित्त्वाद्गुण-निषेधो निर्बाध इत्यर्थः । आशीर्लिङ्याह । **यूयादिति** ॥ आर्धधातुकत्वान्न वृद्धिः । 'अकृत्सार्वधातुकयोः' इति दीर्घः । यूयास्ताम् इत्यादि । लुङ्याह । **अयावीदिति** ॥ सिचि वृद्धिः । 'इट ईटि' इति सिज्लोपः । अयाविष्टाम् इत्यादि । अयविष्यत् । **तुरुस्तु** ॥ तु रु स्तु शमि अम् एषां समाहारद्वन्द्वात् पञ्चम्येकवचनम् । 'उतो वृद्धिः' इत्यतो हलीति 'भूसुवोः' इत्यतस्तिङीति 'ध्रुव ईट्' इत्यतः ईडिति 'यङो वा' इति चानुवर्तते । तदाह । **एभ्यः इत्यादिना । नाभ्यस्तस्येति**॥ 'नाभ्यस्तस्याचि पिति सार्वधातुके' इत्यतःसार्वधातुके इत्यनुवृत्तिसम्भवे पुनः सार्वधातुकग्रहणं पिति इत्यस्यानुवृत्तिर्माभूदित्येतदर्थमित्यर्थः । **रवीतीति** ॥ ईट्पक्षे हलादित्वाभावात् उतो वृद्धिर्नेति भावः । **रौतीति** ॥ ईडभावे 'उतो वृद्धिः' इति भावः । **रुवीतः—रुतः इति** ॥ अपित्त्वेऽपि ईड्विकल्प इति भावः । **रुवन्तीति** ॥ अन्तादेशे कृते हलादित्वाभावादीडभावे उवङिति भावः । **शाम्यतीति** ॥ श्यनस्तिङ्त्वाभावादीट् नेति भावः । **आशिषि रूयादिति**॥ आर्धधातुकत्वादीडभावे 'अकृत्सार्वधातुकयोः' इति दीर्घः । **विद्ध्यादौ त्विति** ॥ आदिना निमन्त्रणादिसङ्ग्रहः । **रुयात्—रुवीयादिति** ॥ हलादिसार्वधातुकत्वात् ईड्विकल्प इति भावः । ईडभावपक्षे हलादौ पिति सार्वधातुके 'उतो वृद्धिः' इति बोध्यम् । ननु धातुपाठे तुधातोरदर्शनात् धातुत्वाभावात्कथन्ततः सार्वधातुकस्य ईड्विधिरित्यत आह । **तु इति सौत्रो धातुरिति । गतिवृद्धिहिंसास्विति** ॥ अत्र व्याख्यानमेव शरणम् । ननु शपा व्यवधानादस्य सार्वधातुकपरत्वं कथमित्यत आह । **अयश्च लुग्विकरणः इति स्मरन्तीति** ॥ 'अव्यव-

तोष्यति। णु १०३५ स्तुतौ। नौति। नविता। टुक्षु १०३६ शब्दे। क्षौति। क्षविता। क्ष्णु १०३७ तेजने। क्ष्णौति। क्ष्णविता। ष्णु १०३८ प्रस्रवणे। स्नौति। सुष्णाव। स्नविता। स्नूयात्। ऊर्णुञ् १०३९ आच्छादने।

२४४५। ऊर्णोतेर्विभाषा। (७-६-९०)

वा वृद्धिः स्याद्ध्लादौ पिति सार्वधातुके। ऊर्णौति—ऊर्णोति। ऊर्णुतः। ऊर्णुवन्ति। ऊर्णुते। ऊर्णुवाते। ऊर्णुवते। 'ऊर्णोतेराम्नेति वाच्यम्' (वा १८०२)

२४४६। नन्द्राः संयोगादयः। (६-१-३)

अचः पराः संयोगादयो नदराः द्विर्न भवन्ति। नुशब्दस्य द्वित्वम्। णत्वस्यासिद्धत्वात्। 'पूर्वत्रासिद्धीयमद्विर्वचने' (प १२७) इति त्वनित्यम्। 'उभौ साभ्यासस्य' (सू २६०६) इति लिङ्गात्। ऊर्णुनाव। ऊर्णुनुवतुः। ऊर्णुनुवुः।

हितातिङः ईड्विधानमेवात्र बीजम्। शम्यमोस्तु, शमीध्वम्। अभ्यमीति। इति वेदे शपो लुकि बोध्यम्। अयमनिट्। हलादौ सार्वधातुके रुधातुवत्। आर्धधातुके तु नेट्। तदाह। **तोतेति। णु स्तुताविति॥** णोपदेशोऽयं सेट्। युधातुवद्रूपाणि। क्षुक्ष्णुस्नुधातवः सेटः। युधातुवद्रूपाणि। चुक्षाव। चुक्ष्णाव। **सुष्णाव इति॥** षोपदेशोऽयमिति भावः। ऊर्णुञ् धातुरुभयपदी। सेट्। उतो वृद्धेर्नित्यं प्राप्तौ। **ऊर्णोतेर्विभाषा॥** 'उतो वृद्धिः' इत्यतो वृद्धिरिति, हलीति, चानुवर्तते। 'नाभ्यस्तस्य' इत्यतः पिति सार्वधातुके इति च इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे। **वृद्धिः स्यादित्यादिना॥** लिटि 'इजादेः' इति 'कास्यनेकाच्' इति च आमि प्राप्ते आह। **ऊर्णोतेराम् नेति॥** ऊर्णोतेर्नुवद्भावस्य वक्ष्यमाणतया इजादित्वस्य अनेकाच्त्वस्य चाभावादिति भावः। णलि ऊर्णु अ इति स्थिते 'अजादेर्द्वितीयस्य' इति नु इति रेफसहितस्य द्वित्वे हलादिशेषे नकारस्य निवृत्तौ ऊरुनावेति प्राप्ते। **नन्द्राः संयोगादयः॥** 'एकाचो द्वे प्रथमस्य' इत्यतो द्वे इत्यनुवर्तते। 'अजादेर्द्वितीयस्य' इत्यतः अजादेरिति। अच्चासौ आदिश्चेति कर्मधारयात्पञ्चमी। न्, द्, र्, एषां द्वन्द्वः। तदाह। **अचः पराः इति॥** ननु णु इत्यस्य द्वित्वे खण्डद्वयेऽपि णकारः श्रूयेतेत्यत आह। **नुशब्दस्य द्वित्वमिति॥ णत्वस्येति॥** धातुपाठे ऊर्णु इति नकारस्य कृतणत्वस्य निर्देशः। द्वित्वे कर्तव्ये तस्य णत्वस्यासिद्धत्वादित्यर्थः। **लिङ्गादिति॥** 'उभौ साभ्यासस्य' इत्यस्यायमर्थः। साभ्यासस्यानितेरुपसर्गस्थान्निमित्तात्परौ खण्डद्वयगतौ नकारौ णत्वमाप्नुत इति प्राणिणत् इत्युदाहरणम्। अत्र अनितेः इति णत्वे कृते 'पूर्वत्रासिद्धीयमद्विर्वचने' इति णत्वस्यासिद्धत्वाभावमाश्रित्य णि इत्यस्य द्वित्वादेव खण्डद्वये णकारश्रवणसिद्धेः 'उभौ साभ्यासस्य' इति वचनं 'पूर्वत्रासिद्धीयमद्विर्वचने' इत्यस्यानित्यताज्ञमयतीत्यर्थः। **ऊर्णुनावेति॥** नुशब्दस्य द्वित्वे पूर्वनकारस्य 'रषाभ्याम्'

२४४७ । विभाषोर्णोः । (१-२-३)

इडादिप्रत्ययो वा ङित्स्यात् । ऊर्णुनुविथ–ऊर्णुनविथ । ऊर्णुविता–ऊर्णविता । ऊर्णौतु–ऊर्णोतु । ऊर्णवानि । ऊर्णवै ।

२४४८ । गुणोऽपृक्ते । (७-३-९१)

ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति सार्वधातुके । वृद्ध्यपवादः । और्णोत् । और्णोः । ऊर्णुयात् । ऊर्णुयाः । इह वृद्धिर्न । 'ङिच्च पिन्न' इति भाष्यात् । ऊर्णूयात् । ऊर्णविषीष्ट–ऊर्णुविषीष्ट । और्णुवीत् । और्णुविष्टाम् ।

२४४९ । उर्णोतेर्विभाषा । (७-२-६)

इडादौ सिचि परस्मैपदे परे वा वृद्धिः स्यात् । पक्षे गुणः । और्णावीत् । और्णाविष्टाम् । और्णाविषुः । और्णवीत् । द्यु १०४० अभिगमने ।

इति णत्वम् । द्वितीयस्य तु 'अट्कुप्वाङ्' इति न णत्वम्, 'उभौ साभ्यासस्य' इति लिङ्गादेव । **विभाषोर्णोः** ॥ 'गाङ् कुटादिभ्यः' इत्यतो ङिदित्यनुवर्तते 'विज इट्' इत्यतः इडिति इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे । **इडादीति** ॥ **ऊर्णुनुविथेति** ॥ ङित्त्वपक्षे गुणाभावादुवङ् । **ऊर्णुनविथेति** ॥ ङित्त्वाभावपक्षे गुणः । ऊर्णुनुवथुः । ऊर्णुनुव । ऊर्णुनाव–ऊर्णुनव । लुटि तासि इटि ङित्त्वविकल्पं मत्वा आह । **ऊर्णविता–ऊर्णुवितेति** ॥ ऊर्णविष्यति–ऊर्णुविष्यति । ऊर्णविष्यते–ऊर्णुविष्यते । लङि और्णुं न् इति स्थिते 'ऊर्णोतेर्विभाषा' इति वृद्धिविकल्पे गुणे च प्राप्ते । **गुणोऽपृक्ते** ॥ 'ऊर्णोतेर्विभाषा' इत्यतः ऊर्णोतेरिति 'नाभ्यस्तस्य' इत्यतः पिति सार्वधातुके इति 'उतो वृद्धिः' इत्यतो हलीति चानुवर्तते । तदाह । **ऊर्णोतेरित्यादि । वृद्ध्यपवादः इति** ॥ 'ऊर्णोतेर्विभाषा' इति वृद्धिविकल्पस्यापवाद इत्यर्थः । ऊर्णुयात् इत्यत्र 'विभाषोर्णोः' इति वृद्धिविकल्पमाशङ्क्याह । **इह वृद्धिर्नेति । भाष्यादिति** ॥ तथा च यासुटो ङित्त्वेन पित्त्वाभावान्न वृद्धिविकल्प इति भावः । नचैवं सति गुणनिषेधोऽपि न स्यादिति शङ्क्यम् । विशेषविहितेन यासुटो ङित्त्वेन ङिच्च पिन्नेति पित्त्वप्रयुक्तङित्त्वनिषेधस्य बाध इति 'यु मिश्रणे' इति धातावेवोक्त्वादिति भावः । **परस्मैपदे** आशीर्लिङ्याह । **ऊर्णूयादिति** ॥ अकृत्सार्वधातुकयोरिति दीर्घः । ऊर्णूयास्तामित्यादि । आत्मनेपदे लिङ्याह । **ऊर्णविषीष्ट–ऊर्णुविषीष्टेति** ॥ 'विभाषोर्णोः' इति ङित्त्वविकल्प इति भावः । लुङि परस्मैपदे और्णुं ईत् इति स्थिते 'विभाषोर्णोः' इति ङित्त्वपक्षे गुणाभावे उवङि रूपमाह । **और्णुवीदिति** ॥ ङित्त्वाभावपक्षे गुणे नित्यं प्राप्ते । **ऊर्णोतेर्विभाषा** ॥ 'सिचि वृद्धिः परस्मैपदेषु' इत्यनुवर्तते, 'नेटि' इत्यतः इटीति च । तदाह । **इडादाविति** ॥ आत्मनेपदे तु लुङि और्णुविष्ट–और्णविष्ट । और्णविष्यत्–और्णुविष्यत् । और्णविष्यत–और्णुविष्यत । **द्यु अभिगमने इति** ॥ अनिट् । **द्यौतीति** ॥

द्यौति। द्योता। षु १०४१ प्रसवैश्वर्ययोः। प्रसवोऽभ्यनुज्ञानम्। सोता। असौषीत्। कु १०४२ शब्दे। कोता। ष्टुञ् १०४३ स्तुतौ। स्तौति–स्तवीति। स्तुतः–स्तुवीतः। स्तुते–स्तुवीते। 'स्तुसुधूञ्भ्यः—' (सू २३८५) इतीट्। अस्तावीत्। 'प्राक्सितात्—' (सू २२७६) इति षत्वम्। अभ्यष्टौत्। 'सिवादीनां वा—' (सू २३५९)। पर्यष्टौत्–पर्यस्तौत्। ब्रूञ् १०४४ व्यक्तायां वाचि।

२४५०। ब्रुवः पञ्चानामादित आहो ब्रुवः। (३-४-८४)

ब्रुवो लटः परस्मैपदानामादितः पञ्चानां णलादयः पञ्च वा स्युर्ब्रुवश्चाहादेशः। अकार उच्चारणार्थः। आह। आहतुः। आहुः।

उतो वृद्धिः। सार्वधातुके लिटि च युधातुवत्। **द्योतेति** ॥ द्योष्यति। अद्यौषीत्। **षु प्रसवेति** ॥ षोपदेशोऽयम्। अनिट्। सौतीत्यादि युधातुवत्। एवं कु शब्दे इत्यपि। **ष्टुञ् स्तुताविति** ॥ उभयपदी अनिट्। 'तुरुस्तुशम्यमः' इति ईड्विकल्पं, ईडभावपक्षे तु उतो वृद्धिं च मत्वा आह ॥ **स्तौति–स्तवीतीति** ॥ स्तुवन्ति। स्तौषि–स्तवीषि। स्तुथः–स्तुवीथः। स्तुथ–स्तुवीथ। स्तौमि–स्तवीमि। स्तुवः–स्तुवीवः। स्तुमः–स्तुवीमः। आत्मनेपदे लटि ईड्विकल्पं मत्वा आह। **स्तुते–स्तुवीते इति** ॥ स्तुवाते। स्तुवते। स्तुषे–स्तुवीषे। स्तुवाथे। स्तुध्वे–स्तुवीध्वे। स्तुवे। स्तुवहे–स्तुवीवहे। स्तुमहे–स्तवीमहे। लिटि तुष्टाव। तुष्टुवतुः। तुष्टुवुः। क्रादित्वात्थल्यपि नेट् भवति। तुष्टोथ। तुष्टुवथुः। तुष्टुव। तुष्टाव–तुष्टव। तुष्टुव। तुष्टुम। तुष्टुवे इत्यादि। स्तोता। स्तोष्यति। स्तोष्यते। स्तौतु–स्तवीतु। स्तुतात्–स्तुवीतात्। स्तुताम्–स्तुवीताम्। स्तुवन्तु। स्तुहि–स्तुवीहि। स्तुतात्–स्तुवीतात्। स्तुतम्–स्तवीतम्। स्तुत–स्तुवीत। स्तवानि। स्तवाव। स्तवाम। स्तुष्व–स्तुवीष्व। स्तुवाथाम्। स्तुध्वम्–स्तुवीध्वम्। स्तवै। स्तवावहै। स्तवामहै। लङि अस्तौत्–अस्तवीत्। अस्तुताम्–अस्तुवीताम्। अस्तुवन्। अस्तौः–अस्तवीः। अस्तुतम्–अस्तुवीतम्। अस्तुत–अस्तुवीत। अस्तवम्। अस्तुव–अस्तुवीव। अस्तुम–अस्तुवीम। अस्तुत—अस्तुवीत। अस्तुवाताम् इत्यादि। विधिलिङि स्तुयात्–स्तुवीयात् इत्यादि। स्तोषीष्टेत्यादि। लुङि सिचि इडभावे प्राप्ते आह। **स्तुसुधूञ्भ्यः इति** ॥ तथाच 'इट ईटि' इति सिज्लोपे सिचि वृद्धौ अस्तावीदिति फलति। अस्ताविष्टामित्यादि। 'स्तुसुधूञ्भ्यः' इत्यत्र परस्मैपदेष्वित्यनुवृत्तेरात्मनेपदे इट् न। अस्तोष्ट। अस्तोषाताम् इत्यादि। **ब्रूञ् व्यक्तायां वाचीति** ॥ उभयपदी। **ब्रुवः पञ्चानाम्** ॥ 'परस्मैपदानां णलतुस्' इत्यतः उत्तरसूत्रमिदम्। 'विदो लटो वा' इत्यतः लटो वेत्यनुवर्तते। तदाह। **ब्रुवो लटः इति** ॥ **आदितः पञ्चानामिति** ॥ तिप् तस् झि सिप् थस् इत्येषामित्यर्थः। **णलादयः पञ्चेति** ॥ णल् अतुस् उस् थल् अथुस् इत्येते पञ्चेत्यर्थः। **उच्चारणार्थः इति** ॥ तत्प्रयोजनमात्थेत्यत्रानुपदमेव

२४५१ । आहस्थः । (८-२-३५)

झलि परे चर्त्वम् । आत्थ । आहथुः ।

२४५२ । ब्रुव ईट् । (७-३-९३)

ब्रुवः परस्य हलादेः पित ईट् स्यात् । 'आत्थ' इत्यत्र स्थानिवद्भावात्प्राप्तोऽयं झलिति थत्वविधानान्न भवति । ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रूते । आर्धधातुकाधिकारे ।

२४५३ । ब्रुवो वचिः । (२-४-५३)

उवाच । ऊचतुः । ऊचुः । उवाचिथ–उवक्थ । ऊचे । वक्ता ।

व्यक्तं भविष्यति । **आहेति** ॥ ब्रूधातोर्लटस्तिपो णलि प्रकृतेराहादेशः । सिपस्थलि प्रकृतेराहादेशे आह् थ इति स्थिते हस्य ढत्वे प्राप्ते ॥ **आहस्थः** ॥ आह इति षष्ठ्यन्तम् । 'झलो झलि' इत्यतो झलीत्यनुवर्तते इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे । **झलि परे इति** ॥ आह् इत्यस्य थकारः स्यात् झलीति फलितम् । अलोऽन्त्यस्य इत्यन्त्यस्य भवति । **चर्त्वमिति** ॥ आथ् थ इति स्थिते प्रथमथकारस्य खरि चेति चर्त्वे आत्थ इति रूपमित्यर्थः । नच आहादेशस्य अकारान्तत्वे तु हकारादकारस्य थकारादेशे हस्य ढत्वे चर्त्वे आदत्थ इति स्यादिति बोध्यम् । पञ्चानां णलाद्यभावपक्षे आह । **ब्रुव ईट्** ॥ 'नाभ्यस्तस्य' इत्यतः पितीति 'उतो वृद्धिः' इत्यतो हलीति चानुवर्तते । तदाह । **ब्रुवः परस्येत्यादिना** ॥ ननु आत्थेत्यत्र आहादेशस्य स्थानिवत्त्वेन ब्रूत्वात्ततः परस्य थस्य ईडागमः स्यादित्यत आह । **आत्थेत्यत्रेति** ॥ स्थानिवद्भावात् प्राप्तोऽयमीडागमः न भवतीत्यन्वयः । कुत इत्यत आह । **झलि थत्वविधानादिति** । 'आहस्थ' इति झलि परतः आहादेशस्य थत्वं विधीयते । ईटि तु सति झलादित्वाभावात्तन्निर्विषयं स्यात् । अतः आत्थेत्यत्र ईट् नेति विज्ञायते इत्यर्थः । **ब्रुवन्तीति** ॥ ब्रवीषि । ब्रूथः । ब्रूथ । ब्रवीमि । ब्रूवः । ब्रूमः । लट आत्मनेपदे आह । **ब्रूते इति** ॥ 'ब्रुवः पञ्चानाम्' इत्यत्र परस्मैपदानामित्यनुवृत्तेराहादेशो न । ब्रुवाते । ब्रुवते । ब्रूषे । ब्रुवाथे । ब्रूध्वे । ब्रुवे । ब्रूवहे । ब्रूमहे । **ब्रुवो वचिः** ॥ ब्रुवो वचिरादेशः स्यादार्धधातुके इत्यर्थः । इकार उच्चारणार्थः । **उवाचेति** ॥ अकिति द्वित्वे कृते 'लिट्यभ्यासस्य' इति सम्प्रसारणमिति भावः । **ऊचतुरिति** ॥ किति द्वित्वात्प्राक् 'वचिस्वपियजादीनाम्' इति सम्प्रसारणे द्वित्वे कृते हलादिशेषे सवर्णपरत्वात् 'अभ्यासस्यासवर्णे' इत्युवङभावे सवर्णदीर्घ इति भावः । वचिरनिट्सु परिगणितः । तस्य भारद्वाजनियमात्थलि वेट् । तदाह । **उवचिथ–उवक्थेति** । इडभावे 'चोः कुः' 'ब्रुव ईट्' इत्यत्र 'नाभ्यस्तस्य' इत्यतः सार्वधातुकग्रहणस्याप्यनुवृत्तेरीड् न । ऊचथुः । ऊच । उवाच–उवच । ऊचिव । ऊचिम । क्रादिनियमादिट् । **ऊचे इति** ॥ ऊचाते । ऊचिरे । ऊचिषे । ऊचाथे । ऊचिध्वे । ऊचे । ऊचिवहे । ऊचिमहे । **वक्तेति** ॥ वच्यादेशे इण्निषेधः । वक्ष्यति ।

ब्रवीतु–ब्रूतात्। 'ङिच्च पिन्न' इत्यपित्त्वादीण्न। ब्रवाणि। ब्रवै। ब्रूयात्। उच्यात्। 'अस्यतिवक्ति—' (सू २४३८) इत्यङ्।

२४५४। वच उम्। (७-४-२०)

अङि परे। अवोचत्। अवोचत।

अथ शास्यन्ताः परस्मैपदिनः। इङ् त्वात्मनेपदी। इण् १०४५ गतौ। एति। इतः।

२४५५। इणो यण्। (६-४-८१)

अजादौ प्रत्यये परे। इयङोऽपवादः। यन्ति। इयाय।

२४५६। दीर्घ इणः किति। (७-४-६९)

वक्ष्यते। **ब्रवीतु—ब्रूतादिति** ॥ ननु तिबादेशस्य तातङः पित्त्वात् 'ब्रूव ईट्' इति ईडागमः स्यादित्यत आह। **ङिच्चेति** ॥ ब्रूताम्। ब्रुवन्तु। ब्रूहि। ब्रूतात्। ब्रूतम्। ब्रूत। **ब्रवाणीति** ॥ आटः पित्त्वेन ङित्त्वाभावात् न गुणनिषेध इति भावः। ब्रवाव। ब्रवाम। ब्रूताम्। ब्रूष्व। ब्रुवाथाम्। ब्रूध्वमिति सिद्धवत्कृत्य आह। **ब्रवै इति** ॥ आटः पित्त्वेन ङित्त्वाभावाद्गुणः। ब्रवावहै। ब्रवामहै। लङि अब्रवीत्। अब्रूताम्। अब्रुवन्। अब्रवीः। अब्रूतम्। अब्रूत। अब्रवम्। अब्रूव। अब्रूम। विधिलिङ्याह। **ब्रूयादिति** ॥ ब्रूयातामित्यादि। आशीर्लिङ्याह। **उच्यादिति** ॥ वच्यादेशे 'वचिस्वपि' इति सम्प्रसारणमिति भावः। उच्यास्ताम् इत्यादि। आत्मनेपदे आशीर्लिङि वक्षीष्ट। वक्षीयास्ताम् इत्यादि। अकित्त्वान्न सम्प्रसारणम्। लुङि सिचि वच्यादेशे अवच् स् त् इति स्थिते आह। **अस्यतीति** ॥ अवच् अ त् इति स्थिते। **वच उम्** ॥ शेषपूरणेन सूत्रं व्याचष्टे। **अङि परे इति** ॥ 'ऋदृशो ङि' इत्यतस्तदनुवृत्तेरिति भावः। मित्त्वादन्त्यादचः परः। आद्गुणः। तदाह। **अवोचदिति** ॥ अवक्ष्यत्। अवक्ष्यत। **इङ्त्विति** ॥ 'इङ् अध्ययने' इति धातुस्तु ङित्त्वादात्मनेपदीत्यर्थः। **इण् गताविति** ॥ 'इणो यण्' इत्यादौ विशेषणार्थो णकारः। **एतीति** ॥ 'शपो लुकि तिपः पित्त्वेन ङित्त्वाभावाद्गुणः। **इतः इति** ॥ अपित्त्वेन ङित्त्वान्न गुणः। इ अन्तीत्यत्र ङित्त्वाद्गुणाभावे इयङि प्राप्ते। **इणो यण्** ॥ 'अचि श्नुधातु' इत्यतः अचीत्यनुवृत्तस्य अङ्गाधिकारलब्धाङ्गाक्षिप्तप्रत्ययविशेषणत्वात्तदादिविधिरित्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे। **अजादौ प्रत्यये परे इति। इयङोऽपवादः इति** ॥ इयङि प्राप्ते एव तदारम्भादिति भावः। गुणवृद्धौ तु परत्वादस्य बाधकौ। यथा अयनम्, आयकः। **यन्तीति** ॥ एषि। इथः। इथ। एमि। इवः। इमः। **इयायेति** ॥ द्वित्वे सति उत्तरखण्डवृद्धौ आयादेशे 'अभ्यासस्यासवर्णे' इति इयङ्। अतुसि तु द्वित्वे कित्त्वाद्गुणाभावे इ इ अतुस् इति स्थिते 'इणो यण्' इत्युत्तरखण्डस्य यणि इयतुरितिस्थिते। **दीर्घ इणः** ॥ 'अत लोपः' इत्यतः अभ्यासस्येति 'व्यथो लिटि' इत्यतो लिटीति चानुवर्तते। तदाह।

इणोऽभ्यासस्य दीर्घः स्यात्किति लिटि। ईयतुः। ईयुः। इयथिथ–इयेथ। ऐत्। ऐताम्। आयन्। इयात्। ईयात्।

२४५७। एतेर्लिङि। (७-४-२४)

उपसर्गात्परस्य इणोऽणो ह्रस्वः स्यादार्धधातुके किति लिङि। निरियात्। 'उभयत आश्रये नान्तादिवत्—'। अभीयात्। 'अणः किम्'। समेयात्। 'समीयात्' इति प्रयोगस्तु भौवादिकस्य।

२४५८। इणो गा लुङि। (२-४-४५)

इणोऽभ्यासस्य दीर्घस्यात् किति लिटि। ईयतुरिति ॥ भारद्वाजनियमात्थलि वेडिति मत्वा आह। **इयथिथ–इयेथेति** ॥ ईयथुः। ईय। इयाय–इयय। ईयिव। ईयिम। एता। एष्यति। एतु–इतात्। इताम्। यन्तु। इहि–इतात्। इतम्। इत। अयानि। अयाव। अयाम। **ऐदिति** ॥ लङि तिप इकारलोपे इकारस्य गुणे आटो वृद्धिः। **आयन्निति** ॥ झेरन्तादेशे इकारलोपे आ इ अन इति स्थिते 'इणो यण्' इति यणि कृते तस्याभीयत्वेनासिद्धत्वादाडिति भावः। ऐः। ऐतम्। ऐत। आयम्। ऐव। ऐम। विधिलिङ्याह। **इयादिति** ॥ इयाताम्। इयुरित्यादि। आशीर्लिङ्याह। **ईयादिति** ॥ 'अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः। ईयास्तामित्यादि। **एतेर्लिङि** ॥ 'उपसर्गाद्ध्रस्व ऊहतेः' इत्यतः उपसर्गाद्ध्रस्व इति 'केऽणः' इत्यतः अण इति 'अयङ् यिङिङति' इत्यतः कितीति चानुवर्तते। तदाह। **उपसर्गात्परस्येत्यादि** ॥ इह आर्धधातुके इति प्रामादिकम्। पूर्वसूत्रेषु तदभावादनुवृत्तेरसम्भवात्, किति लिङीत्येव सिद्धेश्च। ङितीति तु नानुवर्तते। इण आर्धधातुकलिङो ङित्त्वाभावात्। नन्वभीयादित्यत्रापि ह्रस्वः स्यादित्यत आह। **उभयतः इति** ॥ अत्र एकादेशस्य ईकारस्य पूर्वान्तत्वे उपसर्गानुप्रवेशादिण्धातुत्वन्न सम्भवति। परादित्वेन इण्धातुत्वाश्रयणे तु नोपसर्गात्परत्वम्। उपसर्गैकदेशस्य ईकारस्य ईकारात्मना सत्त्वेन अभ् इत्यस्य उपसर्गत्वाभावात्। एकादेशस्य आदिवत्त्वमाश्रित्य इण्धातुत्वम्, अन्तवत्त्वमाश्रित्य तस्य उपसर्गानुप्रवेशश्चेत्यपि न सम्भवति। पूर्वपरशब्दाभ्यां अन्तादिशब्दाभ्याञ्च विरोधस्य पुरस्स्फूर्तिकतया विरुद्धातिदेशद्वयस्य युगपदसम्भवादित्यर्थः। इदञ्च अन्तादिवत्सूत्रे भाष्ये स्पष्टम्। न च अभ् इति भान्तस्य एकदेशविकृतन्यायेन उपसर्गत्वात् ईकारस्य परादिवत्त्वे ह्रस्वो दुर्वार इति वाच्यम्। लक्ष्यानुसारेण क्वचित् एकदेशविकृतन्यायानाश्रयणादिति शब्देन्दुशेखरे विस्तरः। **समेयादिति** ॥ आ इयात् एयात्। समेयादित्यत्र एकारस्य अनण्त्वान्न ह्रस्वः। ग्रहणकसूत्रादन्यत्र पूर्वेणैव णकारेण प्रत्याहाराश्रयणादिति भावः। तर्हि क्वचित् समीयादिति प्रयोगः कथमित्याशङ्क्याह। **समीयादिति प्रयोगस्तु भौवादिकस्येति** ॥ 'इट किट कटी गतौ' इति प्रश्लिष्टस्य इधातोराशीर्लिङि 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घो बोध्य इति भावः। लुङि विशेषमाह। **इणो गा लुङि** ॥

'गातिस्था—' (२२२३) इति सिचो लुक्। अगात्। अगाताम्। अगुः। इङ् १०४६ अध्ययने। नित्यमधिपूर्वः। अधीते। अधीयाते। अधीयते।

२४५९। गाङ् लिटि। (२-४-४९)

इङो गाङ् स्याल्लिटि लावस्थायां, विवक्षिते वा। अधिजगे। अधिजगाते। अधिजगिरे। अध्येता। अध्येष्यते। अध्ययै। गुणायादेशयोः कृतयोरुपसर्गस्य यण्। 'पूर्वं धातुरुपसर्गेण—' इति दर्शनेऽन्तरङ्गत्वाद्गुणात्पूर्वं सवर्णदीर्घः

इण्धातोः गा इत्यादेशस्स्याल्लुङीति सूत्रार्थः स्पष्टः। अगा स् त् इति स्थिते आह। **गातिस्थेतीति** ॥ लृङि ऐष्यत्। **इङ् अध्ययने इति** ॥ अधिरुपरिभावे। उपरिभावश्च पठने नियमपूर्वकत्वमिति भूवादिसूत्रे भाष्ये स्पष्टम्। **नित्यमधिपूर्वः इति** ॥ धातुपाठे वचनमिदम्। अधीते इत्यत्र धातुरुपसर्गं न व्यभिचरतीति भूवादिसूत्रे भाष्ये। **अधीते इति** ॥ 'सार्वधातुकमपित्' इति ङित्त्वात् गुणनिषेधे सवर्णदीर्घः। तदाह। **अधीयाते। अधीयते इति** ॥ अधीषे। अधीयाथे। अधीध्वे। अधीये। अधीवहे। अधीमहे। **गाङ् लिटि। इङ इति** ॥ 'इङश्च' इत्यतस्तदनुवृत्तेरिति भावः। स्थानिवत्त्वादेव ङित्त्वे सिद्धे ङित्करणं 'गाङ्कुटादिभ्यः' इत्यत्र 'इणो गा लुङि' इत्यस्य ग्रहणाभावार्थमिति भाष्यम्। ननु कृते गाङादेशे द्वित्वे अभ्यासजश्त्वे आल्लोपे अधिजगे इति रूपं वक्ष्यति। तदयुक्तम्। 'द्विर्वचनेऽचि' इति गाङादेशनिषेधात् गाङादेशात् प्रागेव द्वित्वे सति उत्तरखण्डस्य गादेशे अधीगे इति रूपापत्तेरित्यत आह। **लावस्थायां, विवक्षिते वेति** ॥ तत्र लावस्थायामिति वार्तिकमते एकादेशात् प्रागेव 'द्विर्वचनेऽचि' इति सूत्रं न प्रवर्तते। द्वित्वनिमित्ताचोऽभावात्। विवक्षिते इति भाष्यमते तु सुतरां 'द्विर्वचनेऽचि' इति न प्रवर्तते। अनैमित्तिकत्वादिति भावः। **अधिजगिरे इति** ॥ अधिजगिषे। अधिजगाथे। अधिजगिध्वे। अधिजगे। अधिजगिवहे। अधिजगिमहे। लोटि अधीताम्। अधीयाताम्। अधीयताम्। अधीष्व। अधीयाथाम्। अधीध्वम् इति सिद्धवत्कृत्य आह। **अध्ययै इति** ॥ तत्र प्रक्रियां दर्शयति। **गुणायादेशयोरिति** ॥ 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' इति 'सुट्कात्पूर्वः' इति सूत्रसिद्धान्तादिति भावः। तथाच इट एत्त्वे आटि वृद्धौ अधि इ ऐ इति स्थिते गुणे अयादेशे यणिति फलितम्। ननु 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन' इत्यपि पक्षः 'सुट्कात्पूर्वः' इति सूत्रभाष्ये स्थितः। तथाच अधि इ ऐ इति स्थिते पूर्वं सवर्णदीर्घे सति गुणायादेशयोः कृतयोः अधयै इति स्यादित्याशङ्क्य निराकरोति। **पूर्वन्धातुरिति** ॥ साधनेनेत्यस्य कारकबोधकेनेत्यर्थः। प्रत्ययेनेति यावत्। दर्शन इत्येतस्य मते इत्यर्थः। 'पूर्वन्धातुरुपसर्गेण युज्यते पश्चात्साधनेन' इति पक्षे पूर्वप्रवृत्तिकत्वेन अन्तरङ्गत्वात् 'सार्व-

प्राप्तः । 'णेरध्ययने वृत्तम्' (सू ३०६६) इति निर्देशान्न भवति । अध्यैत । परत्वादियङ् । तत आट् वृद्धिः । अध्यैयाताम् । अध्यैयत । अध्यैयि । अध्यैवहि । अध्यैमहि । अधीयीत । अधीयीयाताम् । अधीयीध्वम् । अधीयीय । अध्येषीष्ट ।

२४६० । विभाषा लुङ्लृङोः । (२-४-५०)

इङो गाङ् वा स्यात् ।

२४६१ । गाङ्कुटादिभ्योऽञ्णिन्ङित् । (१-२-१)

धातुकार्धधातुकयोः' इति गुणस्याधित्वा सवर्णदीर्घः प्राप्तो न भवतीत्यन्वयः । कुत इत्यत आह । **णेरध्ययने वृत्तमिति निर्देशादिति** ॥ अन्यथा ल्युटि अनादेशे अधि इ अन इति स्थिते पूर्वं सवर्णदीर्घे ततो गुणायादेशयोः कृतयोः अधयनमिति प्रसङ्गादिति भावः । वस्तुतस्तु पूर्वं धातुः साधनेन युज्यते इत्येव भाष्यसम्मतम् । पूर्वं धातुरुपसर्गेण, नैतत्सारामिति भाष्योक्तेरित्यन्यत्र विस्तरः । अध्ययावहै । अध्ययामहै । लङ्याह । **अध्यैतेति** ॥ अधि आ इ त इति स्थिते 'आटश्च' इति वृद्धौ यणिति भावः । अधि इ आतामिति स्थिते आटि वृद्धौ यणि अध्यैतामिति प्राप्ते आह । **परत्वादियङिति** ॥ आटः प्रागेव परत्वादिकारस्य इयङि तत आटि वृद्धौ यणि अध्यैयातामिति रूपमित्यर्थः । **अध्यैयतेति** ॥ 'आत्मनेपदेष्वनतः' इत्यदादेशः । अध्यैथाः । अध्यैयाथाम् । अध्यैध्वम् इति सिद्धवत्कृत्याह । **अध्यैयि । अध्यैवहि । अध्यैमहीति** ॥ विधिलिङ्याह । **अधीयीतेति** ॥ अधि इत इति स्थिते सीयुटि सुटि सलोपे यलोपे अधि इ ईत इति स्थिते धातुभूतस्य इकारस्य इयङि सवर्णदीर्घ इति भावः । **अधीयीयातामिति** ॥ अधि इ आतामिति स्थिते सीयुटि सुटि सलोपे अधि इ ईयातामिति स्थिते धातुभूतइकारस्य इयङि सवर्णदीर्घ इति भावः । झस्य रन्भावे सीयुटि सकारयकारलोपे अधि इ ई रन् इति स्थिते धातुभूतस्य इकारस्य इयङि सवर्णदीर्घे अधीयीरन्, अधीयीथाः, अधीयीयाथाम्, इति सिद्धवत्कृत्य आह । **अधीयीध्वमिति** ॥ ध्वमि'सीयुटि सलोपे यलोपे अधि इ ई ध्वमिति स्थिते इङ इयङि सवर्णदीर्घ इति भावः । **अधीयीयेति** ॥ इटोऽत् सीयुट् सलोपः । अधि इ ईय इति स्थिते इङ इयङि सवर्णदीर्घ इति भावः । अधीयीवहि । अधीयीमहि । आशीर्लिङ्याह । **अध्येषीष्टेति** ॥ सीयुटि गुणः यण् षत्वम् । अध्येषीयास्ताम् । अध्येषीरन् । अध्येषीष्ठाः । अध्येषीयास्थाम् । अध्येषीढ्वम् । अध्येषीय । अध्येषीवहि । अध्येषीमहि । लुङि आटि अधि आ इ त इति स्थिते । **विभाषा लुङ्लृङोः** ॥ शेषम्पूरयति । **इङो गाङ् वा स्यादिति** ॥ 'इङश्च' इत्यतो 'गाङ् लिटि' इत्यतश्च तदनुवृत्तेरिति भावः । सिचि अधि अ गा स् त इति स्थिते । **गाङ्कुटादिभ्यो** ॥ ञ्च ण्च ञ्णौ तौ इतौ यस्य सः ञ्णित् सः न भवतीत्यञ्णित् गाङ् च कुटादयश्चेति द्वन्द्वात्पञ्चमी । गाङिति ङकारानुबन्धात् 'इणो गा लुङि'

गाङादेशात्कुटादिभ्यश्च परेऽञ्णित: प्रत्यया ङित: स्यु: ।

२४६२ । घुमास्थागापाजहातिसां हलि । (६-४-६६)

एषामात ईत्स्यात् हलादौ क्ङित्यार्धधातुके । अध्यगीष्ट–अध्यैष्ट । अध्यगीष्यत–अध्यैष्यत । इक् १०४७ स्मरणे । अयमप्यधिपूर्व: । 'अधीगर्थ-दयेशाम्—' (सू ६१६) इति लिङ्गात् । अन्यथा हि 'इगर्थ—' इत्येव ब्रूयात् । 'इण्वदिक इति वक्तव्यम्' (वा १५७७) । अधियन्ति । अध्यगात् ।

इत्यस्य न ग्रहणमित्युक्तम् । नापि 'गाङ् गतौ' इत्यस्यात्र ग्रहणम् । तत्र ङकारस्यात्मनेपद-प्रापणेन चरितार्थत्वात् । इङादेशस्य गाङो ङकारो नात्मनेपदप्रापणेन चरितार्थः । स्थानिवत्त्वेनैव तत्सिद्धेः । तदाह । **गाङादेशादिति** ॥ एवञ्च सिचः ङित्त्वे आह । **घुमास्था** ॥ 'षो अन्तकर्मणि' इत्यस्य कृतात्त्वस्य निर्देशः । घु मा स्था गा पा जहाति सा एषान्द्वन्द्वात्षष्ठी । 'आर्धधातुके' इत्यधिकृतम् 'आतो लोप इटि च' इत्यतः आत इति 'ईद्यति' इत्यतः ईदिति 'अनुदात्तोपदेश' इत्यतः ङिदिति चानुवर्तते । तदाह । **एषामित्यादिना । अध्यगीष्टेति** ॥ अधि अ गा स् त इत्यत्र आकारस्य ईकारे यणि सिचष्षत्वे तकारस्य ष्टुत्वेन ट इति भावः । 'गातिस्था' इति न सिज्लोपः । परस्मैपदाभावात् । अध्यगीषाताम् । अध्यगीषत । अध्यगीष्ठाः । अध्यगीषाथाम् । अध्यगीढ्वम् । अध्यगीषि । अध्यगीष्वहि । अध्यगीष्महि । गाङभावपक्षे आह । **अध्यैष्टेति** ॥ अधि आ इस् त इति स्थिते इकारस्य गुणे आटो वृद्धौ यणि षत्वष्टुत्वे इति भावः । अध्यैषाताम् । अध्यैषत । अध्यैष्ठाः । अध्यैषाथाम् । अध्यैड्ढ्वम् । 'धि च' इति सलोपः । अध्यैषि । अध्यैष्वहि । अध्यैष्महि । लृङ्याह । **अध्यगीष्यतेति** ॥ 'विभाषा लुङ्लृङोः' इति गाङादेशे स्ये तस्य 'गाङ्कुटादिभ्यः' इति ङित्त्वे 'घुमास्था' इति ईत्त्वे अटि यणि षत्वमिति भावः । अध्यगीष्येतामित्यादि । गाङभावपक्षे आह । **अध्यैष्यतेति** ॥ अध्यैष्येतामित्यादि । इक् स्मरणे । **अयमपीति** ॥ इङ्धातुवदयमपि धातुर्नित्यमधिपूर्वक इत्यर्थः । ननु धातुपाठे इङमधिकृत्य नित्यमधिपूर्व इति वचनात्, भूवादिसूत्रभाष्याच्च इङो नित्यमधिपूर्वकत्वं युक्तम् । अस्य तु तथात्वे किम्प्रमाणमित्यत आह । **अधीगर्थेति** ॥ तत्र हि अधीगर्थेत्यनेन स्मरणार्थकधातुर्विवक्षितः । इग्धातोरधिपूर्वकत्वाभावेऽपि स्मरणार्थ-कत्वे इगर्थेत्येतावतैव स्मरणार्थकधातुलाभात् तत्र अधीति व्यर्थं स्यात् । अत इग्धातुरयं नित्यमधिपूर्वक एव स्मरणार्थक इति विज्ञायते इत्यर्थः । **इण्वदिकः इति** ॥ षष्ठ्यन्ताद्वतिः इणः यत् कार्यं 'इणो यण्' इत्यादि तत् इको भवतीत्यर्थः। अध्येति, अधीतः, इति सिद्धवत्कृत्य आह । **अधियन्तीति** ॥ अन्तादेशे इयङपवादः 'इणो यण्' इति यणिति भावः । अध्येषि । अधीथः । अधीथ । अध्येमि । अधीवः । अधीमः । अधीयाय । अतुसि तु द्वित्वे कृते अधि इ इ अतुसिति स्थिते 'इणो यण्' इति द्वितीयस्य इकारस्य यणि प्रथमस्य इकार-स्य 'दीर्घ इणः किति' इति दीर्घे सवर्णदीर्घे, अधीयतुः । अधीयुः । अधीययिथ—अधीयेथ । अधीयथुः । अधीय । अधीयाय–अधीयय । अधीयिव । अधीयिम । अध्येता ।

केचित्तु आर्धधातुकाधिकारोक्तस्यैवातिदेशमाहुः । तन्मते यण्न । तथा च भट्टिः—'ससीतयो राघवयोरधीयन्' इति । वी १०४८ गतिव्याप्तिप्रजनकान्त्यसनखादनेषु । प्रजनं गर्भग्रहणम् । असनं क्षेपणं । वेति । वीतः । वियन्ति । वेषि । वेमि । वीहि । अवेत् । अवीताम् । अवियन । अडागमे सत्यनेकाच्त्वाद्यणिति केचित् । अव्यन् । अत्र ईकारोऽपि धात्वन्तरं प्रक्षिप्यते । एति । ईतः । इयन्ति । ईयात् । ऐषीत् । या १०४९ प्रापणे । प्रापणमिह गतिः । प्रणियाति । यातः । यान्ति ।

२४६३ । लङः शाकटायनस्यैव । (३-४-१११)

अध्येष्यति । अध्येतु–अधीतात् । अधीताम् । अधियन्तु । अधीहि–अधीतात् । अधीतम् । अधीत । अध्ययानि । अध्ययाव । अध्ययाम । अध्यैत् । अध्यैताम् । अध्यायन् । अध्यैः । अध्यैतम् । अध्यैत । अध्यायम् । अध्यैव । अध्यैम । इति सिद्धवत्कृत्य लङ्याह । **अध्यगादिति** ॥ इण्वत्त्वात् 'इणो गा लुङि' इति गादेशे 'गातिस्था' इति सिचो लुका लुप्तत्वात् 'घुमास्था' इति ईत्त्वन्न । अध्यगाताम् । अध्यगाम । अध्यगाव । अध्यैष्यत । **केचित्त्विति** ॥ आर्धधातुके इत्यधिकारे 'इणो गा लुङि' इति सूत्रे एतद्वार्तिकपाठस्य भाष्ये दर्शनात्तदधिकारोक्तानामेव कार्याणामुपस्थितत्वादिति भावः । **तन्मते यण् नेति** ॥ 'इणो यण्' इत्यस्य आर्धधातुकाधिकारस्थत्वाभावान्नातिदेश इत्यर्थः । तेन झोऽन्तादेशे इयङि सवर्णदीर्घे अधीयन्तीत्यादूह्यम् । **राघवयोरधीयन्निति** ॥ 'अधीगर्थ' इति षष्ठी । राघवौ स्मरन्नित्यर्थः । अधिपूर्वात् इग्धातोर्लटः शतरि शपो लुकि इकारस्य इयङि सवर्णदीर्घे अधीयन्निति शतन्तात् सुबुत्पत्तौ सौ रूपम् । **वी गतीति** ॥ 'अजेर्व्यघञपोः' इति सूत्रभाष्यर्रात्या अस्य आर्धधातुके नास्ति प्रयोग इति शब्देन्दुशेखरे स्थितम् । **वियन्तीति** ॥ एकाच्त्वाद्यणभावादियङिति भावः । लोटि वेतु–वीतात् । वीताम् । वियन्तु । वीतम् । वीतेति सिद्धवत्कृत्य आह । **वीहीति** ॥ हेरपित्त्वेन ङित्त्वान्न गुण इति भावः । वयानि । वयाव । वयाम । लङ्याह । **अवेदिति** ॥ **अवियन्निति** ॥ वी अन्निति स्थिते परत्वादडागमात् प्रागियङि कृते अडागम इति भावः । मतान्तरमाह । **अडागमे सतीति** ॥ लावस्थायामडिति पक्षे इयङम्बाधित्वा अनेकाच्त्वात् यणि अव्यन्निति केचिदाहुरित्यर्थः । केचिदित्यस्वरसं सूचयति । तद्वीजन्तु कृतेऽप्यटि यणि कर्तव्ये आभीयतया अटः असिद्धत्वादनेकाच्त्वाभावाद्यणभावादियङेवोचित इति शब्देन्दुशेखरे विस्तरः । **अत्रेति** ॥ वी ई इति सवर्णदीर्घे वी गतीति निर्देश इति भावः । **ईयादिति** ॥ विधिलिङि आशीर्लिङि च रूपमिदं समानम् । 'स्कोः' इति सलोपः । तत्र विधिलिङि ईयातामित्यादि । आशिषि तु ईयास्तामित्यादि इति विशेषः । **ऐषीदिति** ॥ सिचि वृद्धिः । **या प्रापणे इति** ॥ ननु गच्छतीत्यर्थे यातीति कथमित्यत आह । **प्रापणमिह गतिरिति** ॥ णिजर्थस्त्वविवक्षित इति भावः । **प्रणियातीति** ॥ 'नेर्गद' इति णत्वम् । ययौ । याता । यास्यति । यातु । अयात् । अयाताम् । **लङः शाकटायनस्यैव** ॥ 'झेर्जुस्'

आदन्तात्परस्य लङो झेर्जुस् वा स्यात् । अयुः—अयान् । यायात् । यायाताम् । यायास्ताम् । अयासीत् । वा १०५० गतिगन्धनयोः । गन्धनं सूचनम् । भा १०५१ दीप्तौ । ष्णा १०५२ शौचे । श्रा १०५३ पाके । द्रा १०५४ कुत्सायाम् गतौ । प्सा १०५५ भक्षणे । पा १०५६ रक्षणे । पायास्ताम् । अपासीत् । रा १०५७ दाने । ला १०५८ आदाने । 'द्वावपि दाने' इति चन्द्रः । दाप् १०५९ लवने । प्रणिदाति—प्रनिदाति । दायास्ताम् । अदासीत् । ख्या १०६० प्रकथने । अयं सार्वधातुकमात्रविषयः । सस्थानत्वं नमः ख्यात्रे (वा १५९१) इति वार्तिकं तद्भाष्यञ्चेह लिङ्गम् । 'सस्थानो जिह्वामूलीयः । स नेति ख्याऽऽदेशस्य ख्शादित्वे प्रयोजनमित्यर्थः ।

इति अत इति चानुवर्तते। तदाह। **आदन्तादिति** ॥ **जुस् वेति** ॥ शाकटायनग्रहणाद्विकल्पलाभ इति भावः। एवकारस्तु 'लिट् च' 'लिङाशिषि' इत्युत्तरार्थ इति भाष्ये स्पष्टम्। नच 'लोटो लङ्वत्' इत्यतिदेशात् यान्तु इत्यत्रापि जुस्विकल्पः शङ्क्यः। 'नित्यं ङितः' इत्यतो ङित इत्यनुवृत्त्यैव सिद्धेर्लङ्ग्रहणस्य लङ्द्भावमादाय प्रवृत्तिनिवारणार्थत्वात्। इदमपि भाष्ये स्पष्टम्। **अयानिति** ॥ जुसभावे रूपम्। अयासीत्। ष्णाधातुः षोपदेशः। नस्य ष्टुत्वे णत्वनिर्देशः। स्नाति। स्नायात्—स्नेयात्। पा रक्षणे। 'एर्लिङि' इति सूत्रे, गातिस्था इत्यत्र च पिबतेरेव ग्रहणादेत्त्वसिज्लुकौ न। तदाह। **पायास्ताम्। अपासीत् इति** ॥ दाप् लवने। घुत्वाभावात् 'शेषे विभाषा' इति णत्वविकल्पमभ्मत्वा आह। **प्रणिदाति—प्रनिदातीति** ॥ घुत्वाभावादाशीर्लिङि लुङि च 'घुमास्था' इति ईत्त्वमेति मत्वा आह। **दायास्तामिति। अदासीदिति च** ॥ ख्या प्रकथने। **अयं सार्वधातुकमात्रविषयः इति** ॥ मात्रशब्दोऽवधारणे। सार्वधातुक एवास्य ख्याधातोः प्रयोगः न त्वार्धधातुके इत्यर्थः। कुत इत्यत आह। **सस्थानत्वमिति** ॥ चक्षिङः ख्याञिति सूत्रे ख्यास्थाने 'ख्शाञ्' इति वक्तव्यम्। अस्य शकारस्य पूर्वत्रासिद्धमित्यधिकारे यकारो वक्तव्य इत्युक्त्वा प्रयोजनं सौप्रख्ये वुञ्विधिरित्युपक्रम्य सस्थानत्वं नमः ख्यात्रे इत्युक्तं वार्तिके। तत्र नञमध्याहृत्य नमः ख्यात्रे इति सस्थानत्वं न भवतीति व्याख्यातं भाष्ये। तादिदं वार्तिकं भाष्यञ्च ख्याधातोरस्य सार्वधातुके एव प्रयोग इत्यत्र ज्ञापकमित्यर्थः। तत्र सस्थानपदं व्याचष्टे। **सस्थानो जिह्वामूलीयः इति** ॥ प्राचीनाचार्यसमयादिति भावः। **स नेति** ॥ सः जिह्वामूलीयः नमः ख्यात्रे इत्यत्र न भवतीत्येतत् ख्याऽऽदेशस्य ख्शादित्वविधौ शस्य यत्वविधौ च प्रयोजनमित्यर्थः। **ख्शादित्वे इति** ॥ यत्वविधावित्यस्याप्युपलक्षणम्। शकारस्थानिकयत्वस्यासिद्धत्वात् 'शर्परे विसर्जनीयः' इति विसर्जनीय इष्टस्सिध्यति। जिह्वामूलीयस्त्वनिष्टो न भवतीति भाष्यवार्तिकहृदयम्। ख्याधातोरस्यार्धधातुकेऽपि प्रयोगसत्वे तु तृजन्ते ख्यातृशब्दे यकारस्य शकारस्थानिकत्वाभावात् असिद्धत्वाभावात् 'शर्परे विसर्जनीयः' इत्यस्याप्रवृत्तौ 'कुप्वोः' इति जिह्वामूलीयो दुर्वारस्स्यात्। ततश्चार्धधातुके सर्वत्र न ख्याधातोः प्रयोग इति विज्ञायते। ज्ञापकस्य सामान्यापेक्षत्वादिति भावः। **सम्पूर्वस्येति** ॥

'सम्पूर्वस्य ख्यातेः प्रयोगो न' इति न्यासकारः। प्रा १०६१ पूरणे। 'मा १०६२ माने। अकर्मकः। तनौ ममुस्तत्र न कैटभद्विषः' इति माघः। उपसर्गवशेनार्थान्तरे तु सकर्मकः। 'उदरं परिमाति मुष्टिना'। 'नेर्गद–' (सू २२८५) इत्यत्र नास्य ग्रहणम्। प्रणिमाति–प्रनिमाति। वच १०६३ परिभाषणे। वक्ति। वक्तः। अयमन्तिपरो न प्रयुज्यते। 'बहुवचनपरः' इत्यन्ये। 'झिपरः' इत्यपरे। वग्धि। वच्यात्। उच्यात्। अवोचत्। विद १०६४ ज्ञाने।

२४६४। विदो लटो वा। (३-४-८३)

वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः। वेद। विदतुः। विदुः। वेत्थ। विदथुः। विद। वेद। विद्व। विद्म। पक्षे वेत्ति। वित्तः इत्यादि।

सार्वधातुकेऽपीति भावः। अत्र व्याख्यानमेव शरणम्। एवञ्च सङ्ख्याति इत्यादि नास्तीति फलितम्। संख्यादिशब्दास्तु ख्याञादेशस्येति बोध्यम्। **मा माने इति**॥ मानं परिमितिरिति भावः। तदाह। **अकर्मक इति**॥ माति घृतं पात्रेऽस्मिन्निति भावः। परिमितंभवतीत्यर्थः। सङ्गृहीतं भवतीति यावत्। अत्रार्थे शिष्टप्रयोगसंवादं दर्शयति। **तनौ ममुस्तत्रेति**॥ 'तनौ ममुस्तत्र न कैटभद्विषः तपोधनाभ्यागमसम्भवा मुदः' इति माघकाव्ये। तपोधनस्य नारदस्य अभ्यागमेन आगमनेन सम्भवाः मुदः सन्तोषाः कैटभद्विषः श्रीकृष्णस्य तनौ शरीरे न ममुः परिमिता न बभूवुः आधिक्यान्न सङ्गृहीता बभूवुरिति यावत्। **अर्थान्तरे त्विति**॥ परिच्छेदे त्वित्यर्थः। **उदरमिति**॥ उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु। इति नैषधकाव्ये। कोऽपि कुतुकी दमस्वसुः दमयन्त्याः उदरं मुष्टिना परिमाति किमु परिगृह्णातीत्यर्थः। **नास्य ग्रहणमिति**॥ घुप्रकृतिमाङिति भाष्यादिति भावः। एवञ्च 'शेषे विभाषाऽकखादौ' इति णत्वविकल्प इति मत्वा आह। **प्रणिमाति–प्रनिमातीति**॥ ममौ। ममिथ–ममाथ। ममिव। माता। मास्यति। मातु। अमात्। अमार्सात्। अमास्यत्। वच परिभाषणे। अनिट्। **अयमन्तीति**॥ लटि प्रथमपुरुषबहुवचनं नास्तीत्यर्थः। **बहुवचनपरः इति**॥ न प्रयुज्यत इति शेषः। अस्मिन् पक्षे पुरुषत्रये बहुवचनं नास्ति। **झिपर इति**॥ न प्रयुज्यत इति शेषः। अस्मिन् पक्षे लिङादिष्वपि बहुवचनं नास्तीति भावः। तत्र लिटि अकिति लिड्यभ्यासस्य' इति सम्प्रसारणम्। उवाच। किति तु 'वचिस्वपि' इति सम्प्रसारणम्। ऊचतुः। उवाचिथ–उवक्थ। ऊचिव। वक्ता। वक्ष्यति। वक्तु। अवचत्। **वच्यादिति**॥ विधिलिङि रूपम्। आशीर्लिङि 'वचिस्वपि' इति सम्प्रसारणं मत्वा आह। **उच्यादिति**॥ लुङि 'अस्यति वक्ति' इति च्लेरङि 'वच उम्' इति भावः। **विद ज्ञाने इति**॥ अनिट्सु लुग्विकरणस्याग्रहणात् अयं सेट्। **विदो लटो वा**॥ परस्मैपदानां णलतुस्' इत्यादिसूत्रमनुवर्तते। विद इति पञ्चमी। तदाह। **वेत्तेर्लटः इति**॥ विन्दतिविद्यत्योस्तु शेन श्यना च

विवेद। विविदतुः। 'उषविद्–' (सू २३४१) इत्याम्पक्षे 'विद्' इत्यकारान्तनिपातनान्न लघूपधगुणः। विदाञ्चकार। वेदिता।

२४६५। विदांकुर्वन्त्वित्यन्यतरस्याम्। (३-१-४१)

वेत्तेर्लोट्याम् गुणाभावो लोटो लुक् लोडन्तकरोत्यनुप्रयोगश्च वा निपात्यते। पुरुषवचने न विवक्षिते। इतिशब्दात्।

२४६६। तनादिकृञ्भ्य उः। (३-१-७९)

तनादेः कृञश्च 'उ' प्रत्ययः स्यात्। शपोऽपवादः। तनादित्वादेव सिद्धे कृञ्ग्रहणं 'गणकार्यस्यानित्यत्वे' लिङ्गम्। तेन 'न विश्वसेदविश्वस्तम्' इत्यादि सिद्धम्। विदाङ्करोतु।

व्यवधानात् नैते आदेशाः। **इत्यादीति** ॥ विदन्ति। वेत्सि। वित्थः। वित्थ। वेद्मि। विद्वः। विद्मः। **विविदतुरिति** ॥ विविदुः। विवेदिथ। विविदथुः। विविद। विवेद। विविदिव। विविदिम। **आम् पक्षे इति** ॥ न लघूपधगुण इत्यन्वयः। कुत इत्यत आह। **अकारान्तनिपातनादिति** ॥ 'उषविद्' इति सूत्रे विदेत्यकारान्तत्वं आम्सन्नियोगेन निपात्यत इत्यर्थः। आमि अतो लोपः। तस्य स्थानिवत्त्वात् न लघूपधगुण इति भावः। **वेदितेति** ॥ वेदिष्यतीत्यपि ज्ञेयम्। **विदांकुर्वन्त्वित्यन्यतरस्याम्** ॥ 'कृञ् चानुप्रयुज्यते लिटि' इत्युत्तरमिदं सूत्रम्। इतिशब्दः प्रकारे। एवञ्जातीयकं वैकल्प्येन प्रत्येतव्यमित्यर्थः। **वेत्तेरिति** ॥ लुग्विकरणात् विदधातोः लोटि परे आम्प्रत्ययो निपात्यत इत्यर्थः। **लोडन्तेति** ॥ आमन्ताद्विदेः लोडन्तकृञ्धातोः अनुप्रयोगश्च निपात्यत इत्यर्थः। ननु 'विदाङ्कुर्वन्तु' इति लोटि प्रथमपुरुषबहुवचनस्यैव सूत्रे निर्देशात् कथं लोडन्तसामान्यानुप्रयोग इत्याह। **पुरुषेति** ॥ कुर्वन्त्विति प्रथमपुरुषो बहुवचनञ्च न विवक्षितमित्यर्थः। तयोस्तु नान्तरीयकमुच्चारणमिति भावः। **इतिशब्दादिति** ॥ तस्य प्रकारवचनस्य लोकप्रयोगानुसारित्वादिति भावः। **तनादिकृञ्भ्य उः। शपोऽपवादः इति** ॥ अनेन शब्विषय एवास्य प्रवृत्तिरिति सूचितम्। 'सार्वधातुके यक्' इयतः सार्वधातुकग्रहणस्य 'कर्तरि शप्' इयतः कर्तरीत्यस्य चानुवृत्तेरिति भावः। **तेनेति** ॥ गणकार्यस्यानित्यतया 'श्वसेत्' इत्यत्र अदादिगणकार्यं शपो लुङ्न भवतीत्यर्थः। वस्तुतस्तु कृञ्ग्रसणस्यात्र भाष्ये प्रत्याख्यातत्वात् उक्तज्ञापनाभावात् विश्वसेदित्यसिद्धमेवेत्याहुः। विश्वस्तमित्यत्र तु आगमशास्त्रस्यानित्यत्वात् नेडित्याहुः। **विदाङ्करोत्विति** ॥ अत्र विदेर्लोटि आमि लोटो लुकि आमन्ताद्विदेः कृञो लोडन्तस्यानुप्रयोगः। तत्र लोटस्तिपि 'एरुः' इत्युत्वे शपम्बाधित्वा उप्रत्यये ऋकारस्य गुणे रपरत्वे उकारस्य तिब्निमित्तो गुणः। तातङि तु ऋकारस्य गुणे रपरे तातङो ङित्त्वात् उकारस्य गुणाभावे विदाङ्कुरुतात्

२४६७ । अत उत्सार्वधातुके । (६-४-११०)

उप्रत्ययान्तस्य कृञोऽकारस्य उत्स्यात्सार्वधातुके ङिति । उदिति तपरसामर्थ्यान्न गुणः । विदांकुरुतात् । विदांकुरुताम् । 'उतश्च—' (सू २३३४) इति हेर्लुक् । आभीयत्वेन लुकोऽसिद्धत्वादुत्वम् । विदांकुरु । विदाङ्करवाणि । अवेत् । अवित्ताम् । 'सिजभ्यस्त—' (सू २२२६) इति झेर्जुस् । अविदुः ।

२४६८ । दश्च । ८-२-७५)

धातोर्दान्तस्य पदस्य सिपि परे रुः स्याद्वा । अवेः—अवेत् । अस १०६५ भुवि । अस्ति ।

२४६९ । श्नसोरल्लोपः । (६-४-१११)

श्नस्यास्तेश्चाकारस्य लोपः स्यात्सार्वधातुके ङिति । स्तः । सन्ति । 'तासस्त्योः—' (सू २१९१) इति सलोपः । असि । स्थः । स्थ । अस्मि । स्वः । स्मः । आर्धधातुके' (सू २४३२) इत्यधिकृत्य ।

इति स्थिते । **अत उत्** । **उप्रत्ययान्तस्येति** ॥ 'उतश्च प्रत्ययात्' इत्यतः तदनुवृत्तेरिति भावः । **कृञोऽकारस्य उदिति** ॥ 'नित्यं करोतेः' इत्यतः तदनुवृत्तेरिति भावः । **ङिङ्तीति** ॥ 'गमहन' इत्यतः तदनुवृत्तेरिति भावः । अकारस्य उत्त्वे कृते तस्य लघूपधगुणमाशङ्क्य आह । **तपरेति** ॥ इदं स्थानिवत्सूत्रे भाष्ये स्पष्टम् । **विदांकुरुतामिति** ॥ विदाङ्कुर्वन्त्वित्यपि ज्ञेयम् । 'न भकुर्छुराम्' इति निषेधात् 'हलि च' इति दीर्घो न । **हेर्लुगिति** ॥ विदाङ्करु हि इति स्थिते 'अत उत्सार्वधातुके' इत्युत्त्वमपरमपि बाधित्वा नित्यत्वात् 'उतश्च प्रत्ययात्' इति हेर्लुगित्यर्थः । तर्हि सार्वधातुकाभावात् कथमुत्त्वमित्यत्र आह । **आभीयत्वेनेति** ॥ **विदांकुर्विति** ॥ विदाङ्कुरुतात् । विदाङ्कुरुतम् । विदाङ्कुरुत । **विदाङ्करवाणीति** ॥ आटः पित्त्वेन ङित्त्वाभावादुकारस्य गुण इति भावः । विदाङ्करवाव । विदाङ्करवाम । लङ्याह । **अवेदिति** ॥ हलङ्यादिना सिपो लोपे विशेषमाह । **दश्च** ॥ 'सिपि धातोरुर्वा' इत्यनुवृत्तम् । द इति षष्ठ्यन्तेन धातुर्विशेष्यते । तदन्तविधिः । पदस्येत्यधिकृतम् । तदाह । **धातोर्दान्तस्य पदस्येति** ॥ अलोऽन्त्यस्येत्यन्त्यस्य ज्ञेयम् । **अवेदिति** ॥ सिपो हलङ्यादिलोपे दकारस्य रुत्वविकल्पः । अवित्तम् । अवित्त । अवेदम् । अविद्व । अविद्म । विद्यात् । विद्याताम् । विद्यात् । विद्यास्ताम् । अवेदीत् । अवेदिष्यत् । **अस भुवीति** ॥ भवनं भूः । सत्तायामित्यर्थः । **अस्तीति** ॥ सस्य चर्त्वेऽपि सकार एव भवति नतु तकारः, अल्पप्राणतया प्रयत्नभेदात् । **श्नसोरल्लोपः** ॥ अत् इति लुप्तषष्ठीकम्पदम् । श्न अस् अनयोर्द्वन्द्वात्षष्ठीद्विवचनम् । शकन्ध्वादित्वात् पररूपम् । इनेति श्नम्प्रत्ययैकदेशनिर्देशः । 'अत उत्सार्वधातुके' इत्यतः सार्वधातुके इत्यनुवर्तते, 'गमहन' इत्यतः ङिङ्तीति । तदाह । **श्नस्येत्यादिना । अस्तेर्भूः** ॥ अस-

२४७०। अस्तेर्भूः। (२-४-५२)

बभूव। भविता। अस्तु। स्तात्। स्ताम्। सन्तु।

२४७१। घ्वसोरेद्धावभ्यासलोपश्च। (६-४-११९)

घोरस्तेश्चैत्त्वं स्याद्धौ परेऽभ्यासलोपश्च। आभीयत्वेनैत्त्वस्यासिद्धत्वाद्धेर्धिः। 'श्नसोः—' (सू २४६९) इत्यल्लोपः। एधि। तातङ्पक्षे एत्त्वं न। परेण तातङा बाधात्। 'सकृद्गतौ—' (प ४१) इति न्यायात्। स्तात्। स्तम्। स्त। असानि। असाव। असाम। 'अस्तिसिचः—' (सू २२२५) इतीट्। आसीत्। 'श्नसोर—' (सू २४६९) ल्लोपस्याभीयत्वेनासिद्धत्वादाट्। आस्ताम्। आसन्। स्यात्। भूयात्। अभूत्। सिचोऽस्तेश्च विद्यमानत्वेन विशेषणादीण्न।

२४७२। उपसर्गप्रादुर्भ्यामस्तिर्यच्परः। (८-३-८७)

धातोर्भूभावः स्यात् आर्धधातुके परे इत्यर्थः। अस् हि इति स्थिते। **घ्वसोरेद्धावभ्यासलोपश्च** ॥ घु अस् अनयोर्द्वन्द्वः। एत् हौ इति च्छेदः। ननु अस् हि इति स्थिते 'हुझल्भ्यो हेर्धिः' इति धित्वम्परत्वात् बाधित्वा 'घ्वसोः' इति सकारस्य एत्त्वे कृते हुझल्भ्यः परत्वाभावात् कथन्धिभाव इत्यत आह। **आभीयत्वेनेति** ॥ तथाच अ एधीति स्थिते आह। **श्नसोरिति** ॥ नन्वाशिषि अस् हि इति स्थिते तातङं बाधित्वा परत्वादेत्त्वम्प्राप्नोतीत्यत आह। **तातङ्पक्षे एत्त्वन्नेति** ॥ कृत इत्यत आह। **परेणेति** ॥ ननु कृते तातङि तस्य स्थानिवत्त्वेन हित्त्वात्तस्मिन्परे 'घ्वसोः' इत्येत्त्वङ्कृतो नेत्यत आह। **सकृद्गताविति** ॥ सकृत् एकवारं गतौ प्रवृत्तौ विप्रतिषेधे विरोधे सति यद्बाधितन्तद्बाधितमेव भवति, ननु पुनः प्रवर्तते इति तदर्थः। लङस्तिपि विशेषमाह। **अस्तिसिचः इति** ॥ इकारलोपे आटि वृद्धौ अस्तिसिचः इति ईडागम इत्यर्थः। ननु तसादौ ङिति परत्वादाडागमात्प्राक् 'श्नसोः' इत्यल्लोपे सति अजादित्वाभावात् कथमाडित्यत आह। **श्नसोरल्लोपस्याभीयत्वेनेति। आस्तामिति** ॥ अत्र कृते आडागमे तस्य लोपनिवृत्त्यर्थं 'श्नसोरल्लोपः' इति तपरकरणम्। वस्तुतस्तु आट आभीयत्वेनासिद्धत्वादेव लोपो न भवतीति 'श्नसोरल्लोपः' इत्यत्र तपरकरणं व्यर्थमिति भाष्ये स्पष्टम्। **आसन्निति** ॥ आसीः। आस्तम्। आस्त। आसम्। आस्व। आस्म। विधिलिङ्याह। **स्यादिति** ॥ स्याताम्। स्युरित्यादि। आशीर्लिङि आर्धधातुकत्वात् भूभावम्मत्वा आह। **भूयादिति** ॥ लुङि तु सिचि भूभावे 'गातिस्था' इति सिचो लुकम्मत्वा आह। **अभूदिति** ॥ तत्र 'अस्तिसिचोऽपृक्ते' इति ईडागममाशङ्क्य आह। **सिचोऽस्तेश्चेति** ॥ इह भूभावे सति अस्तेरश्रूयमाणत्वात् ईण्नेति भावः। **उपसर्गप्रादुर्भ्याम्** ॥ उपसर्गः प्रादुस् अनयोर्द्वन्द्वः। इण्कोरित्यधिकृतम्। तत्र इण इत्युपसर्गेण सम्बद्ध्यते न तु प्रादुसि। ततः परस्य अस्तेः

उपसर्गेणः प्रादुसश्च परस्यास्तेः सस्य षः स्याद्यकारेऽचि च परे। निष्यात्। प्रादुःष्यात्। निषन्ति। प्रादुःषन्ति। 'यञ्परः' किम्। अभिस्तः। मृजूष् १०६६ शुद्धौ।

२४७३। मृजेर्वृद्धिः। (७-२-११४)

मृजेरिको वृद्धिः स्याद्धातुप्रत्यये परे। 'क्ङित्यजादौ वेष्यते*—' (वा ५०५७)। 'व्रश्च—' (सू २९४) इति षः। मार्ष्टि। मृष्टः। मृजन्ति—मार्जन्ति।

संस्यं इणः परत्वासम्भवात्। कोरित्यपि असम्भवान्न सम्बध्यते। अस्तिरिति षष्ठ्यर्थे प्रथमा। 'सहेस्साढस्सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते, मूर्द्धन्य इत्यधिकृतम्। य् अच् अनयोर्द्वन्द्वः। यचौ परौ यस्मादिति विग्रहः। यकारे अकारे च परे इति लभ्यते। तदाह। **उपसर्गेणः इति**॥ उपसर्गस्थादिण इत्यर्थः। **परस्येति**॥ अस्तेः सस्य विशेषणमिदम्। न त्वस्तेः। तेन प्रादुरासीदित्यत्र न षत्वम्। यकारपरकत्वे उदाहरति। **निष्यात्–प्रादुःष्यादिति**॥ प्रादुस् इति सान्तमव्ययम्। सस्य षत्वे पूर्वस्य सस्य ष्टुत्वेन षः। षान्तत्वे तु प्रादुर्भ्यामिति रुत्वनिर्देशो नोपपद्यते। अच्परकत्वे उदाहरति। **निषन्ति। प्रादुःषन्तीति। मृजूष् शुद्धाविति**॥ ऊदित्त्वमिड्विकल्पार्थम्। 'षिद्भिदादिभ्योऽङ्' इत्यङर्थं षित्त्वम्। वस्तुतस्तु भिदादिगणे मृजाशब्दपाठादेव सिद्धेरिह षित्करणमनार्षमित्याहुः। **मृजेर्वृद्धिः**॥ 'इको गुणवृद्धी' इति परिभाषया इक इत्युपस्थितम्। मृजेरित्यवयवषष्ठ्या। तदाह। **मृजेरिको वृद्धिः स्यादिति**॥ 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' इति परिभाषामभिप्रेत्य आह। **धातुप्रत्यये परे इति**॥ धातोर्विहिते प्रत्यये इत्यर्थः। तेन परिमृड्भ्यामित्यत्र न वृद्धिरिति भावः। गुणापवादोऽयम्। **क्ङित्यजादौ वेष्यते इति**॥ मृजेर्वृद्धिरिति शेषः। 'इको गुणवृद्धी' इति सूत्रभाष्ये इदम्पठितम्। **व्रश्चेति षः इति**॥ मृज् ति इति स्थिते ऋकारस्य वृद्धौ रपरत्वे जकारस्य व्रश्चेति षत्वे तकारस्य ष्टुत्वेन टकारे मार्ष्टीति रूपमित्यर्थः। **मृष्टः इति**॥ ङित्त्वान्न वृद्धिः नापि गुण इति भावः। **मृजन्ति–मार्जन्ति इति**॥ क्ङित्यजादाविति वृद्धिविकल्प इति भावः। मार्क्षि। मृष्टः। मृष्ट। मार्ज्मि। मृज्वः। **ममार्जेति**॥ णलि मृजेर्वृद्धिरिति भावः। अतुसादावजादौ किति वृद्धिविकल्पं मत्वा आह। **ममार्जतुः–ममृजतुरिति**॥ ममार्जुः–ममृजुः इत्यपि ज्ञेयम्। ऊदित्त्वादिड्विकल्पं मृजेर्वृद्धिञ्च मत्वा आह। **ममार्जिथ–ममार्ष्ठेति**॥ इडभावे जस्य व्रश्चेति षः। थस्य ष्टुत्वेन ठ इति भावः। ममार्जथुः–ममृजथुः। ममार्ज–ममृज। ममार्जिव–ममृजिव–ममृज्व। ममार्जिम–ममृजिम–ममृज्म। लुट्याह। **मार्जिता–मार्ष्टेति**॥ ऊदि-

---

* अत्र 'इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमारभन्ते। तदिहापि साध्यम्' इति 'इको गुण'–इति सूत्रस्थं भाष्यं मानम्।

ममार्ज। ममार्जतुः—ममृजतुः। ममार्जिथ—ममार्ष्ठ। मार्जिता—मार्ष्टा। मृड्ढि। अमार्ट्। अमार्जम्। अमार्जीत्—अमार्क्षीत्। रुदिर् १०६७ अश्रुविमोचने।

२४७४। रुदादिभ्यः सार्वधातुके। (७-२-७६)

'रुद्' 'स्वप्' 'श्वस्' 'अन्' 'जक्ष्' एभ्यो वलादेः सार्वधातुकस्येट् स्यात्। रोदिति। रुदितः। हौ परत्वादिटि धित्वं न। रुदिहि।

२४७५। रुदश्च पञ्चभ्यः। (७-३-९८)

हलादेः पितः सार्वधातुकस्यापृक्तस्य ईट् स्यात्।

२४७६। अङ्गार्ग्यगालवयोः। (७-३-९९)

अरोदीत्—अरोदत्। अरुदिताम्। अरुदन्। अरोदीः—अरोदः। अरोदम्। प्रकृतिप्रत्ययविशेषापेक्षाभ्यामडीड्भ्यामन्तरङ्गत्वाद्यासुट्। रुद्यात्।

त्त्वादिटि तदभावे च 'मृजेर्वृद्धिः' इति भावः। मार्जिष्यति। मार्क्ष्यति। मार्ष्टु—मृष्टात्। मृष्टाम्। मार्जन्तु—मृजन्तु। **मृड्ढीति** ॥ हेरपित्त्वेन ङित्त्वान्न वृद्धिः। व्रश्चादिना जस्य षः। हेर्धिः षस्य जश्त्वेन डः धस्य ष्टुत्वेन ढः। मृष्टात्। मृष्टम्। मृष्ट। मार्जानि। मार्जाव। मार्जाम। लङ्याह। **अमार्ट् इति** ॥ तिप इकारलोपे वृद्धौ रपरत्वे हल्ङ्यादिना तकारलोपे व्रश्चादिना जस्य षः तस्य जश्त्वचर्त्वे इति भावः। अमृष्टाम्। अमार्जन्—अमृजन्। अमार्ट्। अमृष्टम्। अमृष्ट। **अमार्जमिति** ॥ अमृज्व। अमृज्म। मृज्यात्। मृज्याताम्। मृज्यास्ताम्। **अमार्जीत्—अमार्क्षीदिति** ॥ ऊदित्त्वादिड्विकल्प इति भावः। इट्पक्षे अमार्जिष्टाम्। अमार्जिषुरित्यादि सुगमम्। इडभावे अमार्ष्टाम्। अमार्क्षुः। अमार्क्षीः। अमार्ष्टम्। अमार्ष्ट। अमार्क्षम्। अमार्क्ष्व। अमार्क्ष्म। अमार्जिष्यत्। अमार्क्ष्यत्। रुदिर्धातुरिरित् सेट्। **रुदादिभ्यः** ॥ इङ्वलादेरित्यनुवृत्तिम्मत्वा आह। **वलादेरिति। रुदितः इति** ॥ ङित्त्वान्न गुणः। रुदन्ति। रोदिषि। रुदिथः। रुदिथ। रोदिमि। रुदिवः। रुदिमः। रुरोद। रुरुदतुः। रुरोदिथ। रुरुदिव। रुरुदिम। रोदिता। रोदिष्यति। रोदितु। रुदितात्—रुदिताम्। रुदन्तु। रुदिहि इति स्थिते 'हुझल्भ्यः' इति धित्वमाशङ्क्य आह। **हौ परत्वादिति। रुदिहीति** ॥ हेरपित्त्वेन ङित्त्वान्न लघूपधगुण इति भावः। रुदितात्। रुदितम्। रुदित। रोदानि। रोदाव। रोदाम। **रुदश्च पञ्चभ्यः** ॥ 'नाभ्यस्तस्य' इत्यतः पिति सार्वधातुके इति 'उतो वृद्धिः' इत्यतो हलीति 'गुणोऽपृक्ते' इत्यतः अपृक्ते इति 'ब्रुव ईट्' इत्यत ईडिति चानुवर्त्तते। रुद इति पञ्चमी। रुदादिभ्य इति विवक्षितं इत्यभिप्रेत्य सूत्रशेषं पूरयति। **हलादेरित्यादिना। अङ्गार्ग्यगालवयोः** ॥ अनयोर्मते रुदादिभ्यः पञ्चभ्यः परस्य हलादेः पितः सार्वधातुकस्य अडागमः स्यादिति स्पष्टोऽर्थः। **अरोदीरिति** ॥ अरुदितम्। अरुदित इत्यपि ज्ञेयम्। **अरोदमिति** ॥ अरुदिव। अरुदिम इत्यपि ज्ञेयम्। ननु लिङस्तिपि

अरुदत्—अरोदीत्। ञि ष्वप् १०६८ शये। स्वपिति। स्वपितः। सुष्वाप। सुषुपतुः। सुषुपुः। सुष्वपिथ—सुष्वप्थ।

२४७७। सुविनिर्दुर्भ्यः सुपिसूतिसमाः। (८-३-८८)

एभ्यः सुप्यादेः सस्य षः स्यात्। 'पूर्वं धातुरुपसर्गेण युज्यते'।

यासुटम्बाधित्वा परत्वात् 'अङ्गार्ग्यगालवयोः' इति 'रुदश्च पञ्चभ्यः' इति च अडीटौ स्याताामित्यत आह। **प्रकृतिप्रत्ययेति** ॥ हलादिपित्सार्वधातुकापृक्तापेक्षत्वाच्चेत्यपि ज्ञेयम्। लुङि 'इरितो वा' इत्यङ्पक्षे आह। **अरुददिति** ॥ अङभावपक्षे त्वाह। **अरोदीदिति** ॥ 'अस्ति सिचः' इति ईट् 'रुदश्च पञ्चभ्यः' इति तु नेह प्रवर्तते। सिचा व्यवहितत्वात्। **ञि ष्वप् शये इति** ॥ षोपदेशोऽयम्। आर्धधातुके अनिट्। **स्वपितीति** ॥ 'रुदादिभ्यः' इति इट्। **स्वपितः इति** ॥ स्वपन्ति। स्वपिषि। स्वपिथः। स्वपिथ। स्वपिमि। स्वपिवः। स्वपिमः। **सुष्वापेति** ॥ द्वित्वे 'लिट्यभ्यासस्य' इति सम्प्रसारणे पूर्वरूपे आदेशसकारत्वात् षत्वमिति भावः। **सुषुपतुरिति** ॥ 'वचिस्वपि' इति सम्प्रसारणे कृते द्वित्वादीति भावः। सुषुपुरित्यपि ज्ञेयम्। **सुष्वपिथ-सुष्वप्थेति** ॥ भारद्वाजनियमात्थलि वेडिति भावः। सुषुपथुः। सुषुप। सुष्वाप—सुष्वप। सुषुपिव। सुषुपिम। **सुविनिर्दुर्भ्यः** ॥ कृतसम्प्रसारणस्य स्वप्धातोः स्वपीत्यनेन ग्रहणम्। सूतीत्यनेन सूतिशब्दः कृदन्तो गृह्यते। समेत्यनेनापि समशब्दस्य ग्रहणम्। षष्ठ्यर्थे प्रथमा। 'सहेस्साढस्स' इत्यतः सः इति षष्ठ्यन्तमनुवर्तते। मूर्धन्य इत्यधिकृतम्। तदाह। **एभ्यः सुप्यादेरिति** ॥ सुषुप्तिः, सुषूतिः, सुषुमः, इत्युदाहरणानि। अत्र कृतसम्प्रसारणस्य स्वप्धातोर्ग्रहणात् सुस्वप्न इत्यत्र न षत्वमिति भाष्यम्। नन्वेवं सति सु षुषुपतुरित्यत्र सुपूर्वस्य स्वप्धातोः कथं षत्वम्। कृतसम्प्रसारणस्य हि स्वप्धातोः षत्वम्। तत्र यदि स्वप् अतुस् इति स्थिते पूर्वं द्वित्वे कृते पश्चात् 'वचिस्वपि' इति सम्प्रसारणं तदा हलादिशेषे उत्तरखण्डस्यैव 'वचिस्वपि' इति सम्प्रसारणं न त्वभ्यासस्य। अतुसः कितः उत्तरखण्डव्यवहितत्वात्, 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधाच्च। ततश्च सु सस्वप् अतुसित्यत्र पूर्वखण्डस्य कृतसम्प्रसारणत्वाभावात् कथं षत्वम्। उत्तरखण्डस्य च सु इत्युपसर्गादव्यवहितपरत्वाभावात्कथमनेन षत्वम्। इण्कवर्गाभ्याम्परत्वाभावेन आदेशप्रत्यययोः इत्यस्याप्युत्तरखण्डे अप्रवृत्तेः। यदि तु परत्वात्पूर्वं सम्प्रसारणे कृते पश्चात् द्वित्वं तर्हि सुप् इत्यस्य द्वित्वप्रवृत्तेः प्रागेव षत्वमिति वक्तव्यम्। तत्तु न युज्यते। 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' इति परिभाषया सु इत्युपसर्गसम्बन्धस्य द्वित्वात्प्रागप्रवृत्तेः। तथाच कृतसम्प्रसारणस्य अकृतषत्वस्य सुप् इत्यस्य द्वित्वे उत्तरखण्डस्यैव 'आदेशप्रत्यययोः' इति षत्वं स्यात्। न तु पूर्वखण्डस्य 'सात्पदाद्योः' इति निषेधात्। कृते हलादिशेषे सु इति पूर्वखण्डस्य सुब्रूपत्वाभावेन 'सुविनिर्दुर्भ्यः' इत्यस्याप्यप्रवृत्तेः। नच एकदेशविकृतविकृतस्यानन्यत्वं शङ्क्यम्। एवमप्यभ्यासस्यानर्थकत्वेन अर्थवद्ग्रहणपरिभाषया षत्वस्य तत्राप्राप्तेः। तस्मादिह सुषुषुपतुरित्यत्र पूर्वखण्डे षत्वं दुरुपपादमित्याशङ्क्य आह। **पूर्वं धातुरित्यादिना** ॥ लक्ष्यानुरोधादिह 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन' इत्याश्री-

किति लिटि परत्वात्सम्प्रसारणे षत्वे च कृते द्वित्वम्। 'पूर्वत्रासिद्धीयमद्विर्वचने' (प १२७)। सुषुषुपतुः। सुषुषुपुः। पिति तु द्वित्वेऽभ्यासस्य सम्प्रसारणम्। षत्वस्यासिद्धत्वात्ततः पूर्वं 'हलादिः शेषः' (सू २१७९)। नित्यत्वाच्च। ततः सुपिरूपाभावान्न षः। सुसुष्वाप। सुस्वप्ना। अस्वपीत्–अस्वपत्। स्वप्यात्। सुप्यात्। सुषुप्यात्। अस्वाप्सीत्। श्वस १०६९ प्राणने। श्वसिति। श्वसिता। अश्वसीत्–अश्वसत्। श्वस्याताम्। श्वस्यास्ताम्। 'ह्यन्तक्षण—' (सू २२९९) इति न वृद्धिः। अश्वसीत्। अन १०७० च। अनिति। आन। अनिता। आनीत्–आनत्।

२४७८। अनितेः। (८-४-१९)

यते ततश्च द्वित्वात्प्रागेव परत्वात्सम्प्रसारणे सति सुप् इत्यस्य सु इत्युपसर्गपूर्वकत्वमादाय षत्वे च कृते सति पुनः प्रसङ्गविज्ञानात् षुप् इत्यस्य कृतषत्वस्य द्वित्वे सति खण्डद्वयेऽपि षकारश्रवणं निर्बाधमित्यर्थः। तदुक्तम्भाष्ये "षुपि भूते द्विरुच्यते" इति। ननु कृतषत्वस्य कथं द्वित्वं द्वित्वे कर्तव्ये षत्वस्यासिद्धत्वादित्यत आह। **पूर्वत्रासिद्धीयमिति** ॥ ननु तर्हि सुसुष्वापेत्यत्रापि पूर्वखण्डे षत्वं श्रूयेतेत्यत आह। **पिति त्विति** ॥ पिति णलि कित्त्वाभावात् 'वचिस्वपि' इत्यस्याप्रवृत्तौ कृते द्वित्वे 'लिट्यभ्यासस्य' इति पूर्वखण्डस्य सम्प्रसारणम्। सु सुप् स्वप अ इति स्थिते 'सुविनिर्दुर्भ्यः' इति षत्वस्यासिद्धत्वात् हलादिशेष इत्यर्थः। **नित्यत्वाच्चेति** ॥ कृते अकृते च षत्वे हलादिशेषस्य प्राप्तेरिति भावः। **ततः इति** ॥ हलादिशेषोत्तरं सु इत्यस्यैव स्थित्या सुप् इति रूपस्याभावान्न ष इत्यर्थः। एकदेशविकृतत्वादनन्यत्वेऽपि अभ्यासस्यार्थवत्त्वाभावान्न ष इति द्रष्टव्यम्। स्वप्ना। स्वप्स्यति। स्वपितु–स्वपितात्। स्वपिताम्। स्वपन्तु। स्वपिहि–स्वपितात्। स्वपितम्। स्वपित। स्वपानि। स्वपाव। स्वपाम। लङ्याह। **अस्वपीत्–अस्वपदिति** ॥ 'रुदश्च पञ्चभ्यः' इति ईटि 'अड् गार्ग्यगालवयोः' इत्यटि च रूपे। अन्यानि रुदिवद्रूपाणि। लिङ्याह। **सुप्यादिति** ॥ 'वचिस्वपि' इति सम्प्रसारणमिति भावः 'सुविनिर्दुर्भ्यः' इति षत्वम्मत्वा आह। **सुषुप्यादिति। अस्वाप्सीदिति** ॥ अनिट्कत्वान्न सिज्लोप इति भावः। **श्वस प्राणने इति** ॥ वलाद्यार्धधातुके सेडयम्। सार्वधातुके तु वलादौ 'रुदादिभ्यः' इति इट्। लङस्तिपि 'रुदश्च' इति ईटं अड् गार्ग्येत्यटञ्च मत्वा आह। **अश्वसीत्–अश्वसदिति** ॥ विध्याशीर्लिङोः श्वस्यादिति सिद्धवत्कृत्य आह। **श्वस्याताम्। श्वस्यास्तामिति। अन चेति** ॥ अनधातुरपि प्राणने वर्तते इत्यर्थः। सेडयम्। सार्वधातुकेऽपि वलादौ 'रुदादिभ्यः' इति इट्। लङि ईडटौ मत्वा आह। **आनीत्–आनदिति। अनितेः** ॥ 'रषाभ्यां नो णः' इत्यनुवर्तते। 'उपसर्गादसमासेऽपि' इत्यतः उप-

उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात्। प्राणिति। जक्ष १० ७१ भक्षहसनयोः। जक्षिति। जक्षितः।

२४७९। अदभ्यस्तात्। (७-१-४)

झस्य अत्स्यात्। अन्तापवादः। जक्षति। 'सिजभ्यस्त—' (सू २२ २६ इति झेर्जुस्। अजक्षुः। अयमन्तस्स्थादिरित्युज्ज्वलदत्तो बभ्राम। रुदादयः पञ्च गताः।

जागृ १०७२ निद्राक्षये। जागर्ति। जागृतः। जाग्रति। 'उषविद्—' (सू २३४१) इत्याम्वा। जागराञ्चकार—जजागार।

२४८०। जाग्रोऽविचिण्णल्ङित्सु। (७-३-८५)

जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन्वृद्धिविषये प्रतिषेधविषये च। जजागरतुः। अजागः। अजागृताम्। अभ्यस्तत्वाज्जुस्।

सर्गादिति। तदाह। **उपसर्गस्थादिति** ॥ भिन्नपदस्थत्वादप्राप्तौ वचनम्। जक्षधातुः सेट्। बलादौ सार्वधातुकेऽपि 'रुदादिभ्यः' इति सेट्। **अदभ्यस्तात्** ॥ **झस्येति** ॥ झोऽन्त इत्यतस्तदनुवृत्तेरिति भावः। **जक्षतीति** ॥ 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञेति भावः। लङस्तिपि ईडटोः अजक्षीत्, अजक्षत् इति सिद्धवत्कृत्य आह। **सिजभ्यस्तेति** ॥ अदादेशापवादो जुस्। **अन्तस्स्थादिरिति** ॥ तालव्योष्मादिरित्यर्थः। **बभ्रामेति** ॥ जक्षन् क्रीडन् रममाणः इत्युपनिषदि चवर्गतृतीयादित्वस्य निर्विवादत्वादिति भावः। जागृधातुः ऋकारान्तः सेट्। **जागर्तीति** ॥ तिपि शपो लुकि ऋकारस्य गुणे रपरत्वम्। **जागृतः इति** ॥ ङित्त्वान्न गुणः। **जाग्रतीति** ॥ 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञायाम् 'अदभ्यस्तात्' इति झेरदादेशः। ङित्त्वाद्गुणनिषेधे ऋकारस्य यणिति भावः। जागर्षि। जागृथः। जागृथ। जागर्मि। जागृवः। जागृमः। लिटि 'कास्यनेकाच्' इति नित्यमामि प्राप्ते आह। **उषविदेत्याम् वेति। जागरामिति** ॥ आमि ऋकारस्य गुणो रपरत्वञ्चेति भावः। आमभावे आह। **जजागारेति** ॥ अतुसादौ कित्त्वाद्गुणनिषेधे प्राप्ते। **जाग्रोऽवि** ॥ जाग्र इति षष्ठी। मिदेर्गुणः इत्यतः गुण इत्यनुवर्तते। तदाह। **जागर्तेर्गुणः स्यादिति** ॥ अविचिण्णल्ङित्स्विति च्छेदः। वि चिण् णल् ङित् एषां द्वन्द्वे नञ्समासः। तदाह। **विचिण्णल्ङिद्भ्योऽन्यस्मिन्निति** ॥ चिण्णल्पर्युदासात् वृद्धिविषयेऽप्यस्य प्रवृत्तिः। ङित्पर्युदासात् गुणप्रतिषेधविषयेऽप्यस्य प्रवृत्तिः। तदाह। **वृद्धिविषये प्रतिषेधविषये चेति** ॥ **जजागरतुरिति** ॥ अत्र कित्त्वेऽपि गुणः। जजागरुः। जजागरिथ। जजागरथुः। जजागर। जजागार—जजागर। जजागरिव। जजागरिम। विचिण्णल्ङित्सु तु न गुणः। वि जागृविः। चिण् अजागारि। णल् जजागार। ङित्

२४८१। जुसि च। (७-३-८३)

अजादौ जुसीगन्ताङ्गस्य गुणः स्यात्। अजागरुः। 'अजादौ' किम् जागृयुः। आशिषि तु जागर्यात्। जागर्यास्ताम्। जागर्यासुः। लुङि अजागरीत्। 'जागृ इस्' इत्यत्र यण्प्राप्तः, तं सार्वधातुकगुणो बाधते, तं सिचि वृद्धिः, तां जागर्तिगुणः, तत्र कृते हलन्तलक्षणा वृद्धिः प्राप्ता, 'नेटि' (सू २२६८) इति निषिद्धा, ततः 'अतो हलादेः—' (सू २२८४) इति बाधित्वा 'अतो' ल्रान्तस्य' (सू २३३०) इति वृद्धिः प्राप्ता, 'ह्म्यन्त—' (सू २२९९) इति निषिद्ध्यते। तदाहुः—

'गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम्।
पुनर्वृद्धिर्निषेधोऽतो यण्पूर्वाः प्राप्तयो नव॥' इति।

दरिद्रा १०७३ दुर्गतौ। दरिद्राति।

२४८२। इदरिद्रस्य। (६-४-११४)

जागृतः। वृद्धिविषये यथा ण्वुलि जागरकः। प्रतिषेधविषये यथा जजागरतुः। कित्त्वेऽपि गुणः इत्याद्यूह्यम्। जागरिता। जागरिष्यति। जागर्तु–जागृतात्। जागृताम्। जाग्रतु। जागृहि–जागृतात्। जागृतम्। जागृत। जागराणि। जागराव। जागराम। लङ्याह। **अजागरिति**॥ तिपि इकारलोपे हल्ङ्यादिना तकारलोपे रेफस्य विसर्ग इति भावः। अभ्यस्तत्वाल्लङो झेरदादेशे प्राप्ते आह। **अभ्यस्तत्वाज्जुसिति**॥ 'सिजभ्यस्तविदिभ्यश्च' इत्यनेनेति भावः। जक्षित्यादित्वादभ्यस्तत्वम्। अजागृ उस् इति स्थिते 'सार्वधातुकमपित्'इति ङित्त्वादविचिण्णल्ङित्स्विति पर्युदासादप्राप्ते गुणे आह। **जुसि च**॥ अङ्गस्येत्यधिकृतम्। मिदेर्गुण इत्यतः गुण इत्यनुवर्तते। 'इको गुणवृद्धी' इति परिभाषया इक इत्युपस्थितेन अङ्गस्य विशेषणात्तदन्तविधिः। 'क्ङस्याचि' इत्यतोऽनुवृत्तेन अचीत्यनेन जुसीत्यस्य विशेषणात्तदादिविधिः। तदाह। **अजादावित्यादिना। अजागरुरिति**॥अजागः। अजागृतम्। अजागृत। अजागरम्। अजागृव। अजागृम। विधिलिङि यासुटो ङित्त्वान्न गुणः। जागृयात्। जागृयाताम्। **जागृयुरिति**॥ जुसिचेत्यत्र अजादावित्युक्तेर्न गुण इति भावः। **आशिषि तु जागर्यादिति**॥ किदाशिषि इति यासुटः कित्त्वात् 'जाग्रोऽविचिण्णल्ङित्सु' इति गुण इति भावः। जागृधातोर्लुङि सिचि इटि यणादिप्राप्तिक्रमं दर्शयति। **जागृ इस् इत्यवेति। तत्र कृते इति**॥ 'जाग्रोऽविचिण्णल्' इति गुणे रपरत्वे कृते अजागर् ईदिति स्थिते सतीत्यर्थः। **तदाहुरिति**॥ वृद्धा इति शेषः। अजागरिष्टाम्। अजागरिषुः इत्यादि सुगमम्। दरिद्राधातुरादन्तः सेट्। दुर्गतिः धनहीनीभवनम्। **दरिद्रातीति**॥ धनहीनीभवतीत्यर्थः। **इदरिद्रस्य**॥ सौत्रो ह्रस्वः। 'गमहन' इत्यतः क्ङितीत्यनुवर्तते।

दरिद्रातेरिकारः स्याद्धलादौ क्ङिति सार्वधातुके । दरिद्रितः ।

२४८३ । श्नाभ्यस्तयोरातः । (६-४-११३)

अनयोरातो लोपः स्यात्क्ङिति सार्वधातुके । दरिद्रति । अनेकाच्त्वादाम् । दरिद्राञ्चकार । 'आत औ णलः' (सू २३७१) इत्यत्र 'ओ, इत्येव सिद्धे औकारविधानं दरिद्रातेरालोपे कृते श्रवणार्थम् । अत एव ज्ञापकादाम्नेत्येके । ददरिद्रौ । ददरिद्रतुरित्यादि । यत्तु णलि ददरिद्रेति तन्निर्मूलमेव । 'दरिद्रातेरार्धधातुके विवक्षिते आलोपो वाच्यः' (वा ४१४६) । 'लुङि वा' (वा

'ई हल्यघोः' इत्यतः हलि इति 'अत उत्' इत्यतः सार्वधातुके इति । तदाह । **दरिद्रातेरिति** ॥ 'श्नाभ्यस्तयोः' इत्यालोपापवादः । अलोऽन्त्यस्येत्यन्त्यस्य इकारः । **दरिद्रितः इति** ॥ 'सार्वधातुकमपित्' इति तसो ङित्त्वादाकारस्य इकारः । **श्नाभ्यस्तयोरातः** ॥ 'गमहन' इत्यतः लोपः क्ङितीत्यनुवर्तते । 'अत उत्' इत्यतः सार्वधातुके इति । तदाह । **अनयोरिति** ॥ श्नाप्रत्ययस्य अभ्यस्तस्य चेत्यर्थः । **दरिद्रतीति** ॥ जक्षित्यादित्वादभ्यस्तत्वाददभ्यस्तादिति झस्य अदादेशे आकारलोपः । दरिद्रासि । दरिद्रिथः । दरिद्रिथ । दरिद्रामि । दरिद्रिवः । दरिद्रिमः । लिङ्याह । **अनेकाच्त्वादामिति** ॥ इदञ्च 'कास्प्रत्ययात्' इति सूत्रभाष्ये स्पष्टम् । **दरिद्राञ्चकारेति** ॥ आमि सवर्णदीर्घः । कैयटमतमाह । **आतः इति** ॥ 'आत औ णलः' इत्यत्र प्रथमातिक्रमे कारणाभावात् ओकार एव विधातुमुचितः । वृद्धौ सत्यान्तावतैव यथा इत्यादिसिद्धेः । तस्मादौकारविधानं दरिद्राधातोर्णलि 'दरिद्रातेरार्धधातुके लोपो वक्तव्यः' इत्यालोपे ददरिद्रौ इत्यौकारश्रवणार्थं सम्पद्यते । ओकारविधाने तु आलोपे सति वृद्धेरसम्भवात् ददरिद्रो इत्योकार एव श्रूयेतेत्यर्थः । **अत एवेति** ॥ अस्मादेव दरिद्रातेः औकारश्रयणार्थात् औकारविधानाद्दरिद्रातेर्लिटि आम् नेति विज्ञायते । आमि सति णल एवाप्रसक्तेरित्यर्थः । इदञ्च 'वस्वेकाजाद्धसाम्' इति सूत्रभाष्ये ध्वनितं कैयटेन स्पष्टीकृतम् । **तन्निर्मूलमेवेति** ॥ 'कास्प्रत्ययात्' इति 'वस्वेकाच्' इति सूत्रस्यभाष्यकैयटाविरोधादिति भावः । ददरिद्रतुः । ददरिद्रुः । ददरिद्रिथ । ददरिद्रथुः । ददरिद्र । ददरिद्रौ । ददरिद्रिव । ददरिद्रिम । **आर्धधातुके विवक्षिते इति** ॥ 'आतो लोप इटि च' इत्यालोपो दरिद्रातेर्भवन् क्ङिति अक्ङिति च अजादावार्धधातुके भवति । स च आर्धधातुके विवक्षिते ततः प्रागेव भवतीति वक्तव्यमित्यर्थः । तेन दरिद्रातीति दरिद्रः आलोपे कृते पचाद्यच् सिध्यति । आर्धधातुके परे आलोपप्रवृत्तौ तु 'स्याद्व्यधा' इत्यादन्तलक्षणो णप्रत्ययः स्यात् । ततश्च कृते णप्रत्यये आलोपं बाधित्वा 'आतो युक् चिण्कृतोः' इति युकि दरिद्राय इति स्यात् । आर्धधातुके विवक्षिते ततः प्रागेव आलोपे तु कृते आदन्तत्वाभावात् णप्रत्ययाभावे पचाद्यच्प्रत्ययो निर्बाधः । तदिदं भाष्ये स्पष्टम् । **लुङि वेति** ॥ लुङि आलोपो वा वक्तव्य इत्यर्थः । 'अद्यतन्यां वेति वक्तव्यम्' इति वार्तिकार्थसङ्ग्रहोऽयम् । अद्यतन्यामित्यनेन अद्यतनभूतार्थकधातुविहितलुङ्भक्तिर्विवक्षिता । भाष्ये तस्या एवोदाहरणात् ।

४१४२)। 'सनि ण्वुलि ल्युटि च न' (वा ५०५८)। दरिद्रिता। अदरिद्रात्। अदरिद्रिताम्। अदरिद्रुः। दरिद्रियात्। दरिद्र्यात्। अदरिद्रीत्। इट्सकौ अदरिद्रासीत्। चकासृ १०७४ दीप्तौ। झस्य अत्। चकासति। चकासाञ्चकार। 'धि च' (सू २२४९) इति सलोपः सिच एवेत्येके। चकाद्धि। 'चकाधि' इत्येव भाष्यम्।

२४८४। तिप्यनस्तेः। (८-२-७३)

सनि ण्वुलि ल्युटि च नेति ॥ एतेषु दरिद्रातेराल्लोपो नेति वक्तव्यमित्यर्थः। ण्वुलि यथा दरिद्रायकः आतो युक्। ल्युटि यथा दरिद्राणः। अनादेशे कृते आल्लोपाभावात् सवर्णदीर्घः। सनि यथा दिदरिद्रासति। अनन्तरस्येति न्यायादस्य वार्तिकप्राप्तस्यैव लोपस्यायन्निषेधः। तेन 'तनिपतिदरिद्राणामुपसङ्ख्यानम्' इति दरिद्रातेस्सनः इट्पक्षे 'आतो लोप इटि च' इत्यालोपो भवत्येव। दिदरिद्रिषति। तदुक्तं भाष्ये। "न दरिद्रायके लोपो दरिद्राणे च नेष्यते। दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा॥" इति। **दरिद्रितेति** ॥ तासि इटि उदाहृतवार्तिकेन आल्लोपः। 'आतो लोप इटि च' इत्यस्य सम्भवेऽपि न्याय्यत्वादत्र वार्तिकोपन्यासः। दरिद्रिष्यति। दरिद्रातु–दरिद्रितात्। दरिद्रिताम्। दरिद्रतु। दरिद्रिहि–दरिद्रितात्। दरिद्रितम्। दरिद्रित। दरिद्राणि। दरिद्राव। दरिद्राम। लङ्याह। **अदरिद्रादिति** ॥ इत्त्वम्मत्वा आह। **अदरिद्रितामिति** ॥ **अदरिद्रुरिति** ॥ जक्षित्यादित्वेन अभ्यस्तत्वाज्जुसिति भावः। अदरिद्राः। अदरिद्रितम्। अदरिद्रित। अदरिद्राम्। अदरिद्रिव। अदरिद्रिम। **दरिद्रियादिति** ॥ विधिलिङि सार्वधातुकत्वादित्त्वमिति भावः। आशीर्लिङ्याह। **दरिद्र्यादिति** ॥ 'आतो लोपः' इति भावः। लुङि आतो लोपपक्षे आह। **अदरिद्रीदिति** ॥ अदरिद्रिष्टामित्यादि। आल्लोपाभावपक्षे त्वाह। **इट्सकाविति** ॥ अदरिद्रिष्यत्। **चकासृदीप्ताविति** ॥ ऋदित् सेट्। चकास्ति। चकास्तः इति सिद्धवत्कृत्य आह। **झस्य अदिति** ॥ जक्षित्यादित्वेन अभ्यस्तत्वादिति भावः। **चकासतीति** ॥ चकास्सि। चकास्थः। चकास्थ। चकास्मि। चकास्वः। चकास्मः। **चकासाञ्चकारेति** ॥ अनेकाच्त्वादामिति भावः। चकासिता। चकासिष्यति। चकास्तु। चकास्ताम्। चकासतु। हेर्धिभावे चकास् धि इति स्थिते धि च इति सलोप इति मतान्तरमाह। **सिच एवेत्येके इति** ॥ 'धि च' इति लोपः सिच एवेत्येके मन्यन्ते इत्यर्थः। 'धिसकारे सिचो लोपः' चकाद्धि इति प्रयोजनम्' इति वार्तिकादिति तदाशयः। अस्मिन्पक्षे सकारस्य जश्त्वेन दकारः। तदाह। **चकाद्धीति** ॥ एक इत्यस्वरसोद्भावनम्। तद्वीजन्तु 'धिसकारे सिचो लोपः' इति वार्त्तिकं प्रत्याख्याय सकारमात्रस्य 'धि च' इति लोपस्याभ्युगमः। तदाह। **चकाधीत्येव भाष्यमिति** ॥ चकास्तात्। चकास्तम्। चकास्त। चकासानि। चकासाव। चकासाम। लङि अ चकास् त् इति स्थिते। **तिप्यनस्तेः** ॥ न अस्तिः अनस्तिः तस्येति विग्रहः। पदस्येत्यधिकृतम्। 'झलाञ्जशोऽन्ते' इत्यतः अन्ते

पदान्तस्य सस्य दः स्यात्तिपि न त्वस्तेः । [ससजुषोरित्यस्यापवादः] अचकात्–अचकाद् । अचकासुः ।

२४८५ । सिपि धातो रुर्वा । (८-२-७४)

पदान्तस्य धातोः सस्य रुः स्याद्वा । पक्षे [जश्त्वेन] दः । अचकाः–अचकात् । शासु १०७५ अनुशिष्टौ । शास्ति ।

२४८६ । शास इदङ्हलोः । (६-४-३४)

शास उपधाया इत्यस्यादङि हलादौ क्ङिति च । 'शासिवसि—'(सू २४१०) इति षः । शिष्टः । शासति । शशास । शशासतुः । शास्तु–शिष्टात् । शिष्टाम् । शासतु ।

२४८७ । शा हौ । (६-४-३५)

शास्तेः शादेशः स्याद्धौ परे । तस्याभीयत्वेनासिद्धत्वाद्धेर्धिः । शाधि । अशात् । अशिष्टाम् । अशासुः । अशात्–अशाः । शिष्यात् । 'सर्तिशास्ति—'

इत्यनुवर्तते । 'ससजुषोः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते । 'वसुस्रंसुध्वंस्वनडुहां दः' इत्यतः द इति । तदाह । **पदान्तस्येत्यादिना** ॥ अनस्तेः किम् । 'सलिलं सर्वमा इदम्' आः इत्यसधातोर्लङस्तिपि इकारलोपे 'बहुलं छन्दसि' इति 'अस्ति सिचः' इति ईडभावे हल्ङ्यादिलोपे रूपम् । प्रकृते तु चकासेर्लङस्तिपो हल्ङ्यादिलोपे सकारस्य दत्वे 'वाऽवसाने' इति चर्त्वजश्त्वे इत्यभिप्रेत्याह । **अचकात्–अचकादिति** ॥ **अचकासुरिति** ॥ सिजभ्यस्तेति जुसिति भावः । **सिपि धातो रुर्वा** ॥ पदस्येत्यधिकृतम् । 'झलाञ्जशोऽन्ते' इत्यतः अन्ते इत्यनुवृत्तम् 'ससजुषोः' इत्यतः स इति लुप्तषष्ठीकमनुवर्तते । तदाह । **पदान्तस्येति । पक्षे इति** ॥ वसुस्रंस्वित्यतः तदनुवृत्तेरिति भावः । सिपि धातुत्वस्य अव्यभिचाराद्धातोरित्युत्तरार्थम् । अचकासीत् । अचकासिष्यत् । शासुधातुरुदित् सेट् । **शास इदङ्हलोः** ॥ 'अनिदितां हलः' इत्यतः उपधायाः क्ङिति इत्यनुवर्तते । तदाह । **शास उपधायाः इति । शासतीति** ॥ जक्षादित्वेन अभ्यस्तत्वाददादेश इति भावः । शास्सि । शिष्टः । शास्मि । शिष्वः । शिष्मः । आशासते इत्यत्र तु नेत्त्वम् । अङ्योग्यस्य परस्मैपदिन एव ग्रहणादिति भाष्ये स्पष्टम् । **शशासेति** ॥ शशासिथ । शासिता । शासिष्यति । शास् हि इति स्थिते आह । **शा हौ** ॥ शा इति लुप्तप्रथमाकम् । 'शास इदङ्' इत्यतः शास इत्यनुवर्तते । तदाह । **शास्तेरिति** ॥ इत्त्वापवादः । ननु शासेरशादेशाभावे सति झल्परत्वाभावात्कथं हेर्धिरित्यत आह । **तस्याभीयत्वेनेति** ॥ यद्यपि 'धि च' इति सलोपे शाधीति सिद्धम् । तथापि सलोपस्यासिद्धत्वात् 'शास इत्' इति इत्त्वं स्यात् । तन्निवृत्तये शादिधानमित्याहुः । लङ्याह । **अशादिति** ॥ 'तिप्यनस्तेः' इति दत्वे चर्त्वविकल्प इति भावः । **अशा-**

(सू २३८२) इत्यङ्। अशिषत्। अशासिष्यत्।

दीधीङ् १०७६ दीप्तिदेवनयोः। एतदादयः पञ्च धातवश्छान्दसाः। दीधीते। 'एरनेकाचः—' (सू २७२) इति यण्। दीध्याते।

२४८८। यीवर्णयोर्दीधीवेव्योः। (७-४-५३)

एतयोरन्त्यस्य लोपः स्याद्यकारे इवर्णे च परे। इति लोपं बाधित्वा नित्यत्वाट्टेरेत्त्वम्। दीध्ये। 'दीधीवेवीटाम्' (सू २१९०) इति गुणनिषेधः। दीध्याञ्चक्रे। दीधिता। दीधिष्यते। वेवीङ् १०७७ वेतिना तुल्ये। वी गतीत्यनेन तुल्येऽर्थे वर्तत इत्यर्थः।

अथ त्रयः परस्मैपदिनः। षस १०७८ षस्ति १०७९ स्वप्ने। सस्ति। सस्तः। ससन्ति। ससास। सेसतुः। सस्तु। सधि। 'पूर्वत्रासिद्धम्' (सू

सुरिति॥ अभ्यस्तत्वाज्जुसिति भावः। **अशाः-अशादिति**॥ 'सिपि धातोः' इति रुत्वात् दत्वविकल्प इति भावः। अशिष्टम्। अशिष्ट। अशासम्। अशिष्व। अशिष्म। **शिष्यादिति**॥ 'शास इत्' इति इत्त्वे 'शासिवासि' इति ष इति भावः। **आशिषदिति**॥ अङि इत्त्वमिति भावः। दीधीङ्धातुरीकारान्तः ङित्त्वादात्मनेपदी। **एतदादयः पञ्चेति**॥ इदञ्च माधवानुरोधेन। तत्वन्त्वग्रे वक्ष्यते। जक्षित्यादित्वादभ्यस्तत्वाज्झस्य अदादेशः। दीध्यते। दीधिषे। दीध्याथे। दीधिध्वे। लट इडादेशे आह। **यीवर्णयोर्दीधीवेव्योः**॥ यिश्च इवर्णश्चेति द्वन्द्वात्सप्तमी। यि इत्यत्र इकार उच्चारणार्थः। 'तासस्त्योः' इत्यतो लोप इत्यनुवर्तते 'अलोऽन्त्यस्य' इत्यन्त्यस्य लोपः। तदाह। **एतयोरित्यादि**॥ आदीध्य गतः। आवेव्य गतः। अत्र ल्यपि ईकारस्य लोपः। इवर्णे उदाहरणं वक्ष्यते। **इति लोपमिति**॥ लट इडादेशे दीधी इ इत्यत्र 'यीवर्णयोः' इति इवर्णपरत्वात्प्राप्तं लोपं परमपि बाधित्वा नित्यत्वाट्टेरेत्त्वमित्यर्थः। कृते अकृते च लोपे प्रवृत्तेरेत्त्वनित्यम्। तस्मिन्कृते यीवर्णपरकत्वाभावान्न लोप इति भावः। **गुणनिषेधः इति**॥ दीधी आमिति स्थिते 'सार्वधातुकार्धधातुकयोः' इति प्राप्तस्य गुणस्य निषेध इत्यर्थः। **दीधितेति**॥ इटि कृते इवर्णपरकत्वादीकारस्य लोप इति भावः। दीधीताम्। दीध्याताम्। दीध्यताम्। दीधीष्व। दीध्याथाम्। दीधीध्वम्। दीध्यै। दीध्यावहै। दीध्यामहै। अदीधीत। अदीध्याताम्। अदीध्यत। अदीधीथाः। अदीध्याथाम्। अदीधीध्वम्। अदीधि। अदीधीवहि। अदीधीमहि। दीधीत। दीधीयाताम्। दीधिषीष्ट। दीधिषीयास्ताम्। दीधिषीरन्। अदीधिष्ट। अदीधिष्यत। वस्तुतस्तु छन्दसि दृष्टानुविधित्वादेषां पञ्चानां लोकानुसारेण रूपवर्णनमनुचितम्। **वेवीङ् वेतिना तुल्ये इति**॥ दीधीवद्रूपाणि। इति जक्षित्यादयः। **षस षस्ति स्वप्ने इति**॥ षोपदेशावेतौ। द्वितीय इदित्। तत्र षसधातोरुदाहरति। **सस्तीति। ससन्तीति**॥ अनभ्यस्तत्वादन्तादेश एवेति भावः। एत्त्वाभ्यासलोपौ मत्वा आह। **सेसतुरिति**॥ सेसुः। सेसिथ। सेसथुः।

१२) इति सलोपस्यासिद्धत्वात् 'अतो हेः' (सू २२०२) इति न लुक्। असत्। असस्ताम्। असः—असत्। सस्यात्। असासीत्—असंसीत्। सन्ति। इदित्त्वान्नुमि कृते 'संस्त् तस्' इति स्थिते 'स्कोः—' (सू ३८०) इति सलोपे 'झरो झरि सवर्णे' (सू ७१) इति तकारस्य वा लोपः। सन्तः। संस्तन्ति। 'बहूनां समवाये द्वयोः संयोगसंज्ञा नेत्याश्रित्य 'स्कोः—' (सू ३८०) इति लोपाभावात्। संस्ति। संस्तः। संस्तन्ति। इत्येके। वश १०८० कान्तौ। कान्तिरिच्छा। वष्टि। उष्टः। उशन्ति। वक्षि। उष्ठः। उवाश। ऊशतुः।

सेस। ससास—सस। सेसिव। सेसिम। ससिता। ससिष्यति। सस्तु—सस्तात्। सस्ताम्। ससन्तु। सस् हि इति स्थिते हेर्धिभावे 'धि च' इति सलोपं मत्वा आह। **सधीति**॥ तत्र धि इत्यस्य स्थानिवत्त्वेन हित्वात् 'अतो हेः' इति लुकमाशङ्क्य आह। **पूर्ववेति**॥ सस्तात्। सस्तम्। सस्त। ससानि। ससाव। ससाम। लङ्याह। **असदिति**॥ असस् त् इति स्थिते हल्ङ्यादिना तकारलोपे 'तिप्यनस्तेः' इति सस्य दत्वमिति भावः। **असस्तामिति**॥ अससन् इत्यपि ज्ञेयम्। लङः सिपि तु असस् स् इति स्थिते 'सिपि धातोः' इति रुर्वा, पक्षे दः, हल्ङ्यादिलोपः। तदाह। **असः—असदिति**॥ असस्तम्। असस्त। अससम्। असस्व। असस्म। लिङ्याह। **सस्यादिति**॥ सस्याताम्। सस्यास्ताम् इत्यादि। लुङ्याह। **असासीदिति**॥ 'अतो हलादेः' इति वृद्धिविकल्प इति भावः। असंसिष्यत्। अथ षस्तिधातोरुदाहरति। **सन्तीति**॥ इदित्त्वान्नुम्। 'नश्च' इत्यनुस्वारे संस् त् ति इति स्थिते 'स्कोः' इति सलोपे परसवर्णे 'झरो झरि' इति प्रथमतकारस्य लोपविकल्पे एकतं द्वितं वा रूपमिति भावः। **संस्तन्तीति**॥ अनभ्यस्तत्वादन्तादेश एवेति भावः। सिपि संस्त् सि इति स्थिते 'स्कोः' इति सलोपे अनुस्वारस्य परसवर्णो नकारः। सवर्णपरत्वाभावात् 'झरो झरि' इति तकारलोपो न। सन्त्सि। सन्थः। सन्थ। संस्मि। संस्वः। संस्मः। ससंस्त। ससंस्ततुः। ससंस्तिथ। ससंस्तिव। ससंस्तिम। संस्तिष्यति। सन्तु—सन्तात्। सन्ताम्। संस्तन्तु। संस्त् हि इति स्थिते हेर्धिभावे 'स्कोः' इति सलोपे परसवर्णे सन्त् धि इति स्थिते 'झरो झरि' इति तकारस्य लोपः। सन्धि। लोपाभावे तकारस्य जश्त्वे सन्द्धि—सन्तात्। सन्तम्। सन्त। संस्तानि। संस्ताव। संस्ताम। लङस्तिपि असंस्त् त् इति स्थिते हल्ङ्यादिलोपे संयोगादिलोपे संयोगान्तस्य लोपे असन्। असन्ताम्। असंस्तन्। असन्। असन्तम्। असन्त। असंस्तम्। असंस्त्व। असंस्त्म। संस्त्यात्। असंस्तीत्। असंस्तिष्यत्। मतान्तरमाह। **बहूनामिति। इत्याश्रित्येति**॥ तथाच प्रकृते लुङस्तिपि संस्त् ति इति स्थिते झलि परे अनुस्वारसकारतकाराणान्त्रयाणां समवायात् स् त् इत्यनयोः संयोगसंज्ञाविरहात् 'स्कोः' इति लोपाभावात् संस्तीत्यादूह्यमित्यर्थः। **वश कान्ताविति**॥ कान्तिरिच्छा। सेट्। **वष्टीति**॥ 'व्रश्च' इति शस्य षत्वे तकारस्य ष्टुत्वेन टः। **उष्टः इति**॥ ङिति 'ग्रहिज्या' इति सम्प्रसारणे रूपमिति भावः। **उवाशेति**॥ लिटि

वशिता। वष्टु–उष्टात्। उष्टाम्। उड्ढि। अवट्। औष्टाम्। औशन्। अवशम्। उश्याताम्। उश्यास्ताम्। 'चर्करीतं च' (ग सू १९५)। **यङ्लुगन्तमदादौ बोध्यम्। ह्रुङ् १०८२ अपनयने। ह्रुते। जुह्रुवे। ह्रुवीत। ह्रोषीष्ट। अह्रोष्ट।**

इति तिङन्तादादिप्रकरणम्।

अकिति 'लिट्यभ्यासस्य' इति सम्प्रसारणमिति भावः। **ऊशतुरिति** ॥ परत्वाद्ग्रहिज्येति सम्प्रसारणे कृते द्वित्वे हलादिशेषे सवर्णदीर्घ इति भावः। उवशिथ। ऊशथुः। ऊश। उवाश–उवश। ऊशिव। ऊशिम। **वशितेति** ॥ अनेन सेट्त्वन्द्योतितम्। वशिष्यति। **उष्टामिति** ॥ उशन्त्विलपि ज्ञेयम्। **उड्ढीति** ॥ वश् हि इति स्थिते धिभावे अपित्त्वेन ङित्त्वात् ग्रहिज्येति सम्प्रसारणे शस्य षत्वे धस्य ष्टुत्वेन ढकारे षस्य जश्त्वेन ड इति भावः। वशानि। वशाव। वशाम। लङ्याह। **अवडिति** ॥ हल्ङ्यादिलोपे शस्य षः षस्य डः तस्य चर्त्वविकल्प इति भावः। **औशन्निति** ॥ अवट्। औष्टम्। औष्ट। **अवशमिति** ॥ पित्त्वान्न सम्प्रसारणमिति भावः। औश्व। औश्म। विध्याशीर्लिङोः उश्यादिति सिद्धवत्कृत्य आह। **उश्याताम्। उश्यास्तामिति** ॥ अवशीत्–अवाशीत्। अवशिष्यत्। तदेवं दीधीङ वेवीङ् षस षस्ति वश एते पञ्चधातवः छान्दसा एवेति माधवादयः। तत्र 'दीधीवेवीटाम्' इति सूत्रे दीधीवेव्योः छन्दोविषयत्वादिति भाष्यम्। 'जक्षित्यादयः षट्' इति सूत्रे षसिवशी छान्दसाविति भाष्यम्। एतद्भाष्यादेव षस्तिधातोर्नात्र पाठ इति प्रतीयते। अत एव 'षस-शास्ति स्वप्ने' इति पाठमभ्युपगम्य श्तिपा निर्देशेन शास एवार्थभेदात् पुनः पाठ इति कैयट आह। अत्र शासधातोरपि छान्दसवचनं प्रायिकम्। वष्टि भागुरिरल्लोपम्। 'जयाय सेनान्य-मुशन्ति देवाः इत्यादि प्रयोगदर्शनादित्यास्तान्तावत्। **चर्करीतञ्चेति** ॥ धातुपाठे गणसूत्र-मिदम्। 'चर्करीतम्' इति यङ्लुगन्तस्य संज्ञा पूर्वाचार्यसिद्धा। तदाह। **यङ्लुगन्तमदा-दाविति** ॥ तेन यङ्लुगन्ताच्छबेव विकरणः तस्य लुक् न तु श्यनादि विकरणान्तरम्। परस्मैपदिन इत्युपक्रमाद्यङ्लुगन्तस्य परस्मैपदित्वमेव। ह्रुङ् **अपनयने इति** ॥ अनिड्यम्। **ह्रुते इति** ॥ ह्रुवाते। ह्रुवते। इत्यादि। **जुह्रुवे इति** ॥ जुह्रुवाते। जुह्रुविरे। क्रादिनिय-मादिट्। जुह्रुविषे। जुह्रुविवहे। होता। होष्यते। ह्रुताम्। ह्रुष्व। ह्रुवै। ह्रुवावहै। अह्रुत। इति सिद्धवत्कृत्यविधिलिङ्याह। **ह्रुवीतेति** ॥ आशीर्लिङ्याह। **ह्रोषीष्टेति** ॥ लुङ्याह। **अह्रोष्टेति** ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदी-व्याख्यायां बालमनोरमायां लुग्विकरणं समाप्तम्।

॥ श्रीरस्तु ॥

॥ अथ तिङन्तजुहोत्यादिप्रक्रियाः ॥

हु १०८३ दानादनयोः । 'आदाने च' इत्येके । 'प्रीणनेऽपि' इति भाष्यम् । दानं चेह प्रक्षेपः । स च वैधे आधारे हविषश्चेति स्वभावाल्लभ्यते । इतश्चत्वारः परस्मैपदिनः ।

२४८९ । जुहोत्यादिभ्यः श्लुः । (२-४-७५)

शपः श्लुः स्यात् ।

२४९० । श्लौ । (६-१-१०)

धातोर्द्वे स्तः । जुहोति । जुहुतः । 'अदभ्यस्तात्' (सू २४७९) इत्यत् । 'हुश्नुवोः—' (सू २३८७) इति यण् । जुह्वति ।

२४९१ । भृञ्हीभ्रुहुवां श्लुवच्च । (३-१-३९)

एतेभ्यो लिट्याम्वा स्यात् आमि श्लाविव कार्यं च । जुहवाञ्चकार । जुहाव ।

अथ श्लुविकरणा धातवो निरूप्यन्ते । **हु दानादनयोरिति** ॥ दाने अदने चेत्यर्थः । **भाष्यमिति** ॥ 'तृतीया च होश्छन्दसि' इति सूत्रस्थमिति शेषः । ननु यदि दानमिह प्रसिद्धं विवक्षितं तर्हि ब्राह्मणाय गां ददातीत्यत्र जुहोतीत्यपि प्रयोगः स्यादित्यत आह । **दानं चेह प्रक्षेपः इति** ॥ नन्वेवमपि कूपे घटम्प्रक्षिपति आहवनीये जलम्प्रक्षिपतीत्यत्रापि जुहोतीति प्रयोगः स्यादित्यत आह । **स चेति** ॥ सः प्रक्षेपः विधिबोधिते आधारे आहवनीयादौ पुरोडाशादिहविष इति लभ्यते इत्यन्वयः । कुत इत्यत आह । **स्वभावादिति** ॥ अनादिसिद्धलोकव्यवहारादित्यर्थः । तथाच विधिबोधिते आधारे विधिबोधितस्य हविषो देवतायै त्यज्यमानस्य हविषः प्रक्षेपे हुधातुर्वर्तते इति फलितम् । एतच्च पूर्वमीमांसायां तृतीये "सर्वप्रदानं हविषस्तदर्थत्वात्" इत्यधिकरणे अध्वरमीमांसाकुतूहलवृत्तौ प्रपञ्चितमस्माभिः । **जुहोत्यादिभ्यः श्लुः** ॥ **शपः इति** ॥ 'अदिप्रभृतिभ्यः' इत्यतस्तदनुवृत्तेरिति भावः । हु अ इति स्थिते शपः श्लौ कृते हु ति इति स्थिते । **श्लौ** ॥ शेषम्पूरयति । **धातोर्द्वे स्तः इति** ॥ 'एकाचो द्वे' इत्यतः 'लिटि धातोः' इत्यतश्च तदनुवृत्तेरिति भावः । द्वित्वे कृते अभ्यासकार्यमभिप्रेत्य आह । जुहोतीत्यते । **यणिति** ॥ उवङपवाद इत्यर्थः । **भृञ्हीभ्रु** ॥ भृ ह्री भ्रू हु

होता। होष्यति। जुहोतु–जुहुतात्। हेर्धिः। जुहुधि। आटि परत्वाद्गुणः। जुहवानि। परत्वात् 'जुसि च' (सू २४८१) इति गुणः। अजुहवुः। जुहुयात्। हूयात्। अहौषीत्। ञि भी १०८४ भये। बिभेति।

२४९२। भियोऽन्यतरस्याम्। (६-४-११५)

इकारः स्याद्धलादौ क्ङिति सार्वधातुके। बिभितः–बिभीतः। बिभ्यति। बिभयाञ्चकार। बिभाय। भेता। ह्री १०८५ लज्जायाम्। जिह्रेति। जिह्रीतः। जिह्रियति। जिह्रयाञ्चकार–जिह्राय। पॄ १०८६ पालनपूरणयोः।

एषान्द्वन्द्वात्पञ्चम्यर्थे षष्ठी। 'कास्प्रत्ययात्' इत्यतः आम् लिटीत्यनुवर्तते। तदाह। **एतेभ्यः इति**॥ श्लुवदिति सप्तम्यन्ताद्वतिरित्यभिप्रेत्य आह। **आमि श्लाविव कार्यश्चेति। जुहवामिति**॥ आमि श्लाविव द्वित्वे गुण इति भावः। **जुहावेति**॥ जुहुवतुः। जुहुविथ–जुहोथ। जुहुविव। **हेर्धिरिति**॥ 'हुझल्भ्यो हेर्धिः' इत्यनेनेति भावः। जुहवानीत्यत्र आटः पित्त्वेन अङित्त्वात् गुणे प्राप्ते तम्बाधित्वा 'हुश्नुवोः' इति यणि प्राप्ते आह। **आटि परत्वादिति**॥ 'हुश्नुवोः' इत्यपेक्षया गुणः परत्वाद्भवतीत्यर्थः। लङि अजुहोत्, अजुहुतां, इति सिद्धवत्कृत्य 'सिजभ्यस्त' इति जुसि 'हुश्नुवोः' इति यणमाशङ्क्य आह। **परत्वाज्जुसि चेति गुणः इति। अजुहवुरिति**॥ अजुहोः। अजुहुतम्। अजुहुत। अजुहवम्। अजुहुव। अजुहुम। **अहौषीदिति**॥ सिचि वृद्धिः। अहौष्टामित्यादि। अहोष्यत्। **ञि भी भये इति**॥ अनिट् ईदन्तः। शपः श्लौ द्वित्वादि मत्वा आह। **बिभेतीति**॥ **भियोऽन्यतरस्याम्**॥ 'इदरिद्रस्य' इत्यतः इदिति 'गमहन' इत्यतः क्ङितीति 'ई हल्यघोः' इत्यतः हलीति 'अत उत्' इत्यतः सार्वधातुके इति चानुवर्तते इत्यभिप्रेत्य शेषं पूरयति। **इकारः स्यादित्यादिना। बिभ्यतीति**॥ 'अदभ्यस्तात्' इत्यत्। **बिभयामिति**॥ 'भीह्रीभृहुवां श्लुवच्च' इति श्लुवत्त्वात् द्वित्वादीति भावः। **बिभायेति**॥ बिभ्यतुः। बिभयिथ–बिभेथ। बिभ्यिव। बिभ्यिम। **भेतेति**॥ भेष्यति। बिभेतु–बिभितात्–बिभीतात्। बिभिताम्–बिभीताम्। बिभ्यतु। बिभिहि–बिभीहि। बिभितात्–बिभीतात्। बिभितम्–बिभीतम्। बिभित–बिभीत। बिभयानि। बिभयाव। बिभयाम। अबिभेत्। अबिभिताम्–अबिभीताम्। अबिभयुः। अबिभेः। अबिभितम्–अबिभीतम्। अबिभयम्। अबिभिव–अबिभीव। बिभियात्–बिभीयात्। इत्यादि आशीर्लिङि बिभीयास्ताम्। अभैषीत्। अभेष्यत्। **ह्री लज्जायामिति**॥ अनिट्। **जिह्रियतीति**॥ 'अदभ्यस्तात्' इत्यत्। इयङ्। **जिह्रयामिति**॥ 'भीह्रीभृहुवाम्' इत्याम्। श्लुवत्त्वात् द्वित्वादीति भावः। **जिह्रायेति**॥ जिह्रयिथ–जिह्रेथ। जिह्रियिव। ह्रेता। ह्रेष्यति जिह्रेतु–जिह्रीतात्। जिह्रीहि। जिह्रयाणि। अजिह्रेत्। जिह्रीयात्। ह्रीयात्। अह्रैषीत्।

२४९३ । अर्तिपिपर्त्योश्च । (७-४-७७)

अभ्यासस्येकारोऽन्तादेशः स्यात् ऋौ ।

२४९४ । उदोष्ठ्यपूर्वस्य । (७-१-१०२)

अङ्गावयवौष्ठ्यपूर्वो य ऋत् तदन्तस्याङ्गस्य उत्स्यात् । गुणवृद्धी परत्वादिमं बाधेते । पिपर्ति । उत्त्वं । रपरत्वं । 'हलि च' (सू ३५४) इति दीर्घः । पिपूर्तः । पिपुरति । पपार । किति लिटि 'ऋच्छत्यृताम्' । (सू २३८३) इति गुणे प्राप्ते ।

२४९५ । शृदृप्रां ह्रस्वो वा । (७-४-१२)

एषां किति लिटि ह्रस्वो वा स्यात् । पक्षे गुणः । पप्रतुः । पप्रुः ।

अर्हिष्यत् । पृधातुः सेट् । लटस्तिपि शपः श्लौ द्वित्वे पृ पृ इति स्थिते । **अर्तिपिपर्त्योश्च** ॥ 'अत्र लोपः' इत्यस्मादभ्यासस्येति 'भृञामित्' इत्यस्मात् इदिति 'निजान्त्रयाणाम्' इत्यतः श्लाविति चानुवर्तते इत्यभिप्रेत्य शेषमपूरयति । **अभ्यासस्येत्यादिना** ॥ तथाच अभ्यासेऋकारस्य इत्त्वे रपरत्वे हलादिशेषे उत्तरखण्डस्य गुणे रपरत्वे पिपर्तीति वक्ष्यति । तत्र उत्तरखण्डे ऋकारस्य उत्त्वं शङ्कितुमाह । **उदोष्ठ्य** ॥ 'ऋत इद्धातोः' इत्यतः ऋत इत्यनुवर्तते । अङ्गस्येत्यधिकृतामिहानुवृत्तमावर्तते । एकमवयवषष्ठ्यन्तं ओष्ठ्यस्य विशेषणम् । अपरन्तु ऋता विशेष्यते । तदन्तविधिः । तदाह । **अङ्गावयवौष्ठ्य इत्यादिना** ॥ अङ्गावयवेति किम् । समीर्णः । 'ऋ गतौ' क्र्यादिः तस्मात्सम्पूर्वात् क्तप्रत्यये 'ऋत इद्धातोः' इति इत्त्वे रपरत्वे 'हलि च' इति दीर्घे 'श्र्युकः किति' इति इण्निषेधे 'रदाभ्याम्' इति निष्ठानत्वे तस्य णत्वे समीर्ण इति रूपम् । तत्र मकारात्मकौष्ठ्यपूर्वत्वादित्त्वं बाधित्वा उत्त्वं स्यात् । अङ्गावयवेत्युक्तौ तु मकारस्य ओष्ठ्यस्य अङ्गावयवत्वाभावादुत्त्वन्न भवति । तथाच प्रकृतेऽपि पूर्तीत्यत्र इदमुत्त्वं स्यादिति शङ्का प्राप्ता ताम्परिहरति । **गुणवृद्धी इति** ॥ **इमिति** ॥ उत्त्वविधिमित्यर्थः । **पिपर्तीति** ॥ उत्त्वात्परत्वाद्गुण इति भावः । पिपृ तस् इति स्थिते आह । **उत्त्वमिति** ॥ ङित्त्वेन गुणाभावात् उदोष्ठ्येत्युत्त्वमिति भावः । **पिपुरतीति** ॥ अभ्यस्तत्वाददादेशे ङित्त्वाद्गुणाभावादुत्त्वमिति भावः । पिपर्षि । पिपूर्थः । पिपर्मि । पिपूर्वः । पिपूर्मः । लिटि णल्याह । **पपारेति** ॥ उत्त्वात्परत्वाद्वृद्धिरिति भावः । 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्य नेत्त्वम् । तत्र श्लावित्यनुवृत्तेः । **प्राप्ते इति** ॥ गुणे नित्यम्प्राप्ते इत्यर्थः । **शृदृप्राम्** ॥ शृ दृ पृ एषान्द्वन्द्वः । **लिटीति** ॥ 'दयतेर्दिगि लिटि' इत्यतः तदनुवृत्तेरिति भावः । यद्यपि पूर्वसूत्रेषु क्वापि किताति न दृष्टं तथापि अस्य 'ऋच्छत्यृताम्' इति गुणापवादत्वात् गुणस्य च तस्य किदर्थत्वात्किताति उक्तम् । **पप्रतुरिति** ॥ पपृ अतुस् इति स्थिते ऋकारस्य ह्रस्वे तस्य यणिति भावः । गुणपक्षे आह । **पपरतुरिति** ॥ गुण एव तु न विकल्पितः । गुणाभावे 'वार्णादाङ्गं बलीयः' इति यणम्बाधित्वा 'उदोष्ठ्य' इत्युत्त्वप्रसङ्गात् । पपरिथ ।

पपरतुः। पपरुः। परिता–परीता। अपिपः। अपिपूर्ताम्। अपिपरुः। पिपूर्यात्। पूर्यात्। अपारीत्। अपारिष्टाम्। 'ह्रस्वान्तोऽयम्'इति केचित्। पिपर्तिं। पिपृतः। पिप्रति। पिपृयात्। आशिषि। प्रियात्। अपार्षीत्। पाणिनीयमते तु 'तं रोदसी पिपृतम्'.इत्यादौ छान्दसत्वं शरणम्। डुभृञ् १०८७ धारणपोषणयोः।

२४९६। भृञामित्। (७-४-७६)

'भृञ्' 'माङ्' 'ओ हाङ्' एषां त्रयाणामभ्यासस्य इत्स्यात् श्लौ। बिर्भर्ति। बिभृतः। बिभ्रति। बिभृध्वे। श्लुवद्भावात् द्वित्वेत्त्वे। बिभरामास। बभार। बभर्थ। बभृव। बिभृहि। बिभराणि। अबिभः। अबिभृताम्।

पप्रथुः–पपरथुः। पप्र–पपर। पपार–पपर। पप्रिव–पपरिव। 'वृतो वा' इति दीर्घविकल्पम्मत्वा आह। **परिता–परीतेति** ॥ परिष्यति परीष्यति। पिपर्तु–पिपूर्तात्। पिपूर्ताम्। पिपुरतु। पिपूर्हि–पिपूर्तात्। पिपूर्तम्। पिपूर्त। पिपराणि। पिपराव। पिपराम। लङ्याह। **अपिपरिति** ॥ अपि पृ त् इति स्थिते गुणे रपरत्वे हल्ङ्यादिना तकारलोपे रेफस्य विसर्गः। **अपिपरुरिति** ॥ अभ्यस्तत्वात् जुस्। कृते 'जुसि च' इति गुणे रपरत्वम्। अपिपः। अपिपूर्तम्। अपिपूर्त। अपिपरम्। अपिपूर्व। अपिपूर्म। **केचिदिति** ॥ अन्ये आचार्या इत्यर्थः। ह्रस्वान्तत्वपक्षे 'उदोष्ठ्य' इत्युत्त्वन्नेति मत्वा आह। **पिपृतः इति** ॥ ह्रस्वान्तस्य अनिट्त्वाल्लुङादौ पर्तेत्यादि। पिपृहि। **अपार्षीदिति** ॥ ह्रस्वान्तस्य अनिट्त्वान्न सिज्लोप इति भावः। नन्वाचार्यान्तरसम्मतं ह्रस्वान्तत्वङ्कुतोऽस्माभिरादर्तव्यम् इत्यत आह। **पाणिनीयेति** ॥ पाणिनिसम्मतदीर्घान्तत्वस्यैवाश्रयणे 'तं रोदसी पिपृतं' इत्यादौ 'उदोष्ठ्य' इत्युत्त्वापत्त्या ऋकारस्य ह्रस्वस्य श्रवणानापत्त्या तद्विषये छान्दसत्वमेव शरणमनुसरणीयं स्यादित्यर्थः। **डुभृञ्**इति ॥ अनिडयं ञित्त्वादुभयपदी। श्लौ सति द्वित्वादौ बिभर्तीत्यादि स्थितम्। **भृञामित्** ॥ भृञामिति बहुवचनाद्भृञादीनामिति लभ्यते। 'अत लोपः' इत्यतः अभ्यासस्येति 'निजान्त्रयाणाङ्गुणः श्लौ' इत्यतः त्रयाणां श्लाविति चानुवर्तते। तदाह। **भृञ् माङित्यादिना** ॥ **बिभ्रतीति** ॥ अभ्यस्तत्वाददादेशे यण्। बिभर्षि। बिभृथः। बिभृथ। बिभर्मि। बिभृवः। बिभृमः। बिभृते। बिभ्राते। बिभ्रते। बिभृषे। बिभ्राथे। इति सिद्धवत्कृत्य आह। **बिभृध्वे इति** ॥ बिभ्रे। बिभृवहे। बिभृमहे। **श्लुवद्भावादिति** ॥ 'भीह्रीभृहुवाम्' इत्येनेन इति भावः। **बिभरामासेति** ॥ अनुप्रयोगसामर्थ्यादस्तेः भूभावो नेति भावः। **बभारेति** ॥ श्लावित्यनुवृत्तेर्भृञामिदिति नेत्त्वम्। बभ्रतुः। बभ्रुः। इत्यपि ज्ञेयम्। 'कृसृभृवृ' इति लिटि इण्निषेधः। थल्यपि 'अचस्तास्वत्' इति नित्यमिण्निषेधः। ऋदन्तत्वेन भारद्वाजमतेऽपि निषेधात्। तदाह। **बभर्थेति** ॥ बभ्रथुः। बभ्र। बभार–बभर इति सिद्धवत्कृत्य आह। **बभूवेति** ॥ क्रादित्वादिण्निषेध इति भावः। बभ्रे। बभ्राते। बभ्रिरे। बभृषे।

अबिभरुः । बिभृयात् । भ्रियात् । भृषीष्ट । अभार्षीत् । अभृत । माङ् १०८८ माने शब्दे च ।

२४९७ । ई हल्यघोः । (६-४-११३)

आभ्यस्तयोरात ईत्स्यात्सार्वधातुके क्ङिति हलि न तु घुसंज्ञकस्य । मिमीते । 'आभ्यस्तयोः—' (सू २४८३) इत्याल्लोपः । मिमाते । मिमते । प्रण्यमास्त । ओ हाङ् २०८९ गतौ । जिहीते । जिहाते । जिहते । जहे । हाता । हास्यते । ओ हाक् १०८९ त्यागे । परस्मैपदी । जहाति ।

बभ्राथे । बभृढ्वे । बभ्रे । बभृवहे । बभृमहे । भर्ता । भरिष्यति । भरिष्यते । बिभर्तु–बिभृतात् । बिभृताम् । बिभ्रतु । इति सिद्धवत्कृत्य आह । **बिभृहीति** ॥ हेरपित्त्वेन ङित्त्वाद्गुणनिषेध इति भावः । बिभृतात् । बिभृतम् । बिभृत इति सिद्धवत्कृत्य आह । **बिभराणीति** ॥ आटः पित्त्वेन ङित्त्वाभावान्न गुणनिषेध इति भावः । बिभराव । बिभराम । लङ्याह । **अबिभरिति** ॥ अबिभृ त् इति स्थिते गुणे रपरत्वे हल्ङ्यादिलोपे रेफस्य विसर्ग इति भावः । **अबिभरुरिति** ॥ अभ्यस्तत्वात् झेर्जुस् 'जुसि च' इति गुणः । अबिभः । अबिभृतम् । अबिभृत । अबिभरम् । अबिभृव । अबिभृम । अबिभृत । अबिभ्राताम् । अबिभ्रत । अबिभृथाः । अबिभ्राथाम् । अबिभृध्वम् । अबिभ्रि । अबिभृवहि । अबिभृमहि । आशीर्लिङ्याह । **भ्रियादिति** ॥ 'रिङ्शयग्लिङ्क्षु' इति रिङ् । आत्मनेपदे आशीर्लिङ्याह । **भृषीष्टेति** ॥ 'उश्च' इति कित्त्वान्न गुणः । **अभार्षीदिति** ॥ अनिट्त्वान्न सिज्लोपः । सिचि वृद्धिः । रपरत्वमिति भावः । अभार्ष्टामित्यादि । आत्मनेपदे लुङ्याह । **अभृतेति** ॥ 'हृस्वादङ्गात्' इति सिचो लुक् । अभृषाताामित्यादि । **माङ् माने इति** ॥ अनिट् । ङित्त्वादात्मनेपदी । श्लौ द्वित्वे 'भृञामित्' इति अभ्यासस्य इत्त्वे मि मा ते इति स्थिते । **ई हल्यघोः** ॥ ई इति लुप्तप्रथमाकम् । 'आभ्यस्तयोरातः' इत्यनुवर्तते । 'गमहन' इत्यतः क्ङितीति 'अत उत्सार्वधातुके' इत्यतः सार्वधातुके इति चानुवर्तते । तदाह । **आभ्यस्तयोरित्यादिना । आल्लोपः इति** ॥ अजादौ क्ङिति सार्वधातुके इति शेषः । **मिमते इति** ॥ अभ्यस्तत्वाददादेशः । मिमीषे । मिमाथे । मिमीध्वे । मिमे । मिमीवहे । मिमीमहे । ममे । ममाते । ममिरे । ममिषे । ममाथे । ममिध्वे । मम्मे । ममिवहे । ममिमहे । माता । मास्यते । मिमीताम् । मिमीष्व । मिमाथाम् । मिमीध्वम् । मिमै । मिमावहै । मिमामहै । अमिमीत । अमिमाताम् । अमिमत । अमिमीथाः । अमिमाथाम् । अमिमीध्वम् । अमिमि । अमिमीवहि । अमिमीमहि । मिमीत । मिमीयाताम् । मिमीरन् । मिमीथाः । मिमीयाथाम् । मिमीध्वम् । मिमीय । मिमीवहि । मिमीमहि । मासीष्ट । अमास्त । अमासाताम् । अमासत । अमास्थाः । अमासाथाम् । अमाध्वम् । अमासि । अमास्वहि । अमास्महि । अमास्यत । **ओ हाङ् गतावितीति** ॥ अनिट् । ङित्त्वादात्मनेपदी । 'भृञामित्' इति इत्त्वम् । माङ्धातुवद्रूपाणि । अभ्यासे चुत्वं

२४९८। जहातेश्च। (६-४-११६)

इत्स्याद्वा हलादौ क्ङिति सार्वधातुके। पक्षे ईत्त्वम्। जहितः–जहीतः। जहति। जहौ। जहितात्।

२४९९। आ च हौ (६-४-११७)

जहातेर्हौ परे आ स्याच्चादिदीतौ। जहाहि–जहिहि–जहीहि। अजहात्। अजहुः। अजहाः।

२५००। लोपो यि। (६-४-११८)

जहातेरालोपः स्याद्यादौ सार्वधातुके। जह्यात्। 'एर्लिङि' (सू २३७४) हेयात्। अहासीत्। डु दाञ् १०९१ दाने। प्रणिददाति। दत्तः। ददति। दत्ते। ददौ। 'ध्वसोः—' (२४७१) इत्येत्त्वाभ्यासलोपौ। देहि।

विशेषः। तदाह। **जिहीते इत्यादि** ॥ इति भृञादयस्त्रयो गताः। **ओ हाक् त्यागे इति** ॥ अनिट्। ओकारः ककारश्च इत्। **जहातीति** ॥ श्लौ द्वित्वे अभ्यासचुत्वमिति भावः। तसादौ 'श्नाभ्यस्तयोरातः' इति नित्यमीत्त्वे प्राप्ते। **जहातेश्च** ॥ 'इद्रिद्रस्य' इत्यतः इदिति 'भियोऽन्यतरस्याम्' इत्यतः अन्यतरस्यामिति चानुवर्तते। 'गमहन' इत्यतः क्ङितीति, 'ई हल्यघोः' इत्यतः हलीति च। इत्यभिप्रेत्य शेषं पूरयति। **इत्स्याद्वेति**। **जहतीति** ॥ अभ्यस्तत्वाददादेशे 'श्नाभ्यस्तयोः' इत्यालोपः। **जहाविति** ॥ जहतुः। जहुः। जहिथ–जहाथ। जहथुः। जह। जहौ। जहिव। जहिम। हाता। हास्यति। **जहितादिति** ॥ जहिताम्–जहीताम्। जहतु। **आ च हौ** ॥ आ इति लुप्तप्रथमाकम्। **जहातेरिति** ॥ 'जहातेश्च' इत्यतः तदनुवृत्तेरिति भावः। **चादिदीताविति** ॥ 'इद्रिद्रस्य' इत्यतः 'ई हल्यघोः' इत्यतश्च तयोरिह चकारेणानुकर्षादिति भावः। जहितात्–जहीतात्। जहितम्–जहीतम्। जहित–जहीत। जहानि। जहाव। जहाम। लङ्याह। **अजहादिति** ॥ अजहिताम्–अजहीताम्। अजहुः। **अजहाः इति** ॥ अजहितम्–अजहीतम्। अजहित–अजहीत। अजहाम्। अजहिव–अजहीव। अजहिम–अजहीम। **लोपो यि** ॥ 'जहातेश्च' इत्यतो जहातेरिति 'श्नाभ्यस्तयोरातः' इत्यतः आत इति, 'अत उत्सार्वधातुके' इत्यतः सार्वधातुके इति चानुवर्तते। यि इति सप्तम्यन्तं सार्वधातुकविशेषणम्। तदादिविधिः। तदाह। **जहातेरित्यादिना** ॥ 'जहातेश्च' इत्यस्यापवादः। आशीर्लिङ्याह। **एर्लिङीति**। **अहासीदिति** ॥ 'यमरम' इति सगिटौ। अहास्यत्। डु दाञ् उभयपदी। अनिट्। **प्रणिददातीति** ॥ 'नेर्गद' इति णत्वत्। **दत्तः इति** ॥ ददा तस् इति स्थिते अघोरिति पर्युदासादित्त्वाभावे 'श्नाभ्यस्तयोः' इत्यालोपः। **ददतीति** ॥ अभ्यस्तत्वाददादेशे 'श्नाभ्यस्तयोः' इत्यालोप इति भावः। ददासि। दत्थः। दत्थ। ददामि। दद्वः। दद्मः। **दत्ते इति** ॥ ददाते। ददते। दत्से। ददाथे। दद्ध्वे। ददे। दद्वहे। दद्महे। **ददौ इति** ॥

अददात्। अदत्ताम्। अददुः। दद्यात्। देयात्। अदात्। अदाताम्। अदुः। अदित। डु धाञ् १०९५ धारणपोषणयोः 'दानेऽपि' इत्येके। प्रणिदधाति।

२५०१। दधस्तथोश्च। (८-२-३८)

द्विरुक्तस्य झषन्तस्य धाधातोर्बशो भष् स्यात्तथयोः परयोः स्ध्वोश्च परतः। 'वचनसामर्थ्यादालोपो न स्थानिवत्' इति वामनमाधवौ। वस्तुतस्तु 'पूर्वत्रासिद्धे न स्थानिवत्' धत्तः। दधति। धत्थः। धत्थ। दध्वः। दध्मः। धत्ते। धत्से। धद्ध्वे। धेहि। अधित।

ददतुः। ददुः। ददिथ-ददाथ। ददथुः। दद। ददौ। ददिव। ददिम। ददे। ददाते। ददिरे। ददिषे। ददाथे। ददिध्वे। ददे। ददिवहे। ददिमहे। दाता। दास्यति। दास्यते। ददातु-दत्तात्। दत्ताम्। ददतु। इति सिद्धवत्कृत्य देहि इत्यत्र आह। **ध्वसोरिति**॥ दत्तात्। दत्तम्। दत्त। ददानि। ददाव। ददाम। दत्ताम्। ददाताम्। ददताम्। दत्स्व। ददाथाम्। दद्ध्वम्। ददै। ददावहै। ददामहै। लङ्याह। **अददादिति। अददुरिति**॥ अभ्यस्तत्वात् जुस्। अददाः। अदत्तम्। अदत्त। अददाम्। अदद्व। अदद्म। विधिलिङ्याह। **दद्यादिति**॥ 'श्नाभ्यस्तयोः' इत्यात्लोपः। आशीर्लिङि तु 'एर्लिङि' इत्येत्त्वमभिप्रेत्य आह। **देयादिति**॥ दासीष्ट। लुङ्याह। **अदादिति**॥ 'गातिस्था' इति सिचो लुगिति भावः। अदाः। अदातम्। अदात। अदाम्। अदाव। अदाम। लुङ्यात्मनेपदे आह। **अदितेति**॥ अदा स् त इति स्थिते 'स्थाध्वोरिच्च' इति दाधातोरन्त्यस्य इकारः सिचः कित्त्वञ्च। कित्त्वान्न गुणः। 'हूस्वादङ्गात्' इति सिचो लुगिति भावः। अदिषाताम्। अदिषत। अदिथाः। अदिषाथाम्। अदिढ्वम्। अदिषि। अदिष्वहि। अदिष्महि। अदास्यत्। अदास्यत। डु धाञ्। ञित्त्वादुभयपदी। अनिट्। **प्रणिदधातीति**॥ 'नेर्गद' इति णत्वम्। तसि श्लौ द्वित्वे अभ्यासजश्त्वे 'श्नाभ्यस्तयोः' इत्यात्लोपे दध् तस् इति स्थिते। **दधस्तथोश्च**॥ धाधातोः कृतद्वित्वस्य दधा इत्यस्य दधः इति षष्ठ्यन्तम्। 'एकाचो बशः' इत्यतः झषन्तस्य बशो भष् इत्यनुवर्तते। त थ् अनयोर्द्वन्द्वात् सप्तमीद्विवचनम्। तकारादकार उच्चारणार्थः। तकारथकारयोरिति लभ्यते। चकारात् स्ध्वोरिति समुच्चीयते। सकारे ध्वशब्दे चेति लभ्यते। तदाह। **द्विरुक्तस्येत्यादिना**॥ तथाच अभ्यासे दकारस्य धकारः। तकारपरकत्वात्। न तु 'श्नाभ्यस्तयोरात्लोपस्य 'अचः परस्मिन्' इति स्थानिवत्त्वान्न तकारपरकत्वं, नापि झषन्तत्वमित्यत आह। **वचनसामर्थ्यादिति**॥ **वस्तुतस्त्विति**॥ भष्भावस्य पूर्वत्रासिद्धीयत्वादेव तस्मिन् कर्तव्ये आत्लोपस्य स्थानिवत्त्वाप्रसक्तेर्वचनसामर्थ्याश्रयणक्लेशो वृथेति भावः। **धत्तः इति**॥ धस्य चर्त्वेन त इति भावः। **दधतीति**॥ 'अदभ्यस्तात्' इत्यदादेशे 'श्नाभ्यस्तयोः' इत्यात्लोपः। **धत्थः इति**॥ थकारपरकत्वात् भष्। धत्थ। दधामि। **दध्वः इति**॥ परनिमित्ताभावान्न भष्। दध्मः। **धत्ते इति**॥ दधाते। दधते। **धत्से इति**॥ सकारपरकत्वाद्धषिति भावः। दधाथे। **धद्ध्वे इति**॥ दद् ध्वे इति स्थिते ध्वशब्दपरकत्वाद्धषिति भावः॥

अथ त्रयः स्वरितेतः। णिजिर् १०९६ शौचपोषणयोः।

२५०२। निजां त्रयाणां गुणः श्लौ। (७-४-७५)

णिजिर् विजिर् विष्लृ एषामभ्यासस्य गुणः स्याच्छ्लौ। नेनेक्ति। नेनिक्तः। नेनिजति। नेक्ता। नेक्ष्यति। नेनेक्तु। नेनिग्धि।

२५०३। नाभ्यस्तस्याचि पिति सार्वधातुके। (७-३-८७)

लघूपधगुणो न स्यात्। नेनिजानि। अनेनेक्। अनेनिक्ताम्। अनेनिजुः। नेनिज्यात्। निज्यात्। अनिजत्–अनैक्षीत्। अनिक्त। विजिर् १०९४

दधे। दध्वहे। दध्महे। दधौ। दधे। धाता। धास्यति। धास्यते। दधातु–धत्तात्। धत्ताम्। दधतु। **धेहीति** ॥ 'ध्वसोः' इत्येत्त्वाभ्यासलोपाविति भावः। धत्तात्। धत्तम्। धत्त। दधानि। दधाव। दधाम। धत्ताम्। दधाताम्। दधताम्। धत्स्व। दधाथाम्। धद्ध्वम्। दधै। दधावहै। दधामहै। अधात्। अधत्त। दध्यात्। धासीष्ट। अधासीत्। **अधितेति** ॥ 'स्थाघ्वोरिच्च' इति इत्त्वे 'दूस्वादङ्गात्' इति सिचो लुगिति भावः। अधास्यत्। अधास्यत। णिजिर् धातुः अनिडयं णोपदेशः इरित्। इकारस्य प्रत्येकमित्त्वाभावान्न नुम्। इकारस्य स्वरितत्वप्रतिज्ञाबलादात्मगे फले आत्मनेपदम्भवत्येव। तस्मादयमप्युभयपदी। एवं विजिरपि ज्ञेयः। **निजां त्रयाणाम्**। निजामिति बहुवचनात्तदादीनाङ्ग्रहणम्। 'अत्र लोपः' इत्यतः अभ्यासस्येत्यनुवर्तते। तदाह। **णिजिर् इत्यादिना। नेनेक्तीति** ॥ श्लौ द्वित्वे हलादिशेषे उत्तरखण्डस्य तिपमाश्रित्य गुणे पूर्वखण्डस्यानेन गुणे चोः कुत्वमिति भावः। अभ्यस्तत्वाददादेशं मत्वा आह। **नेनिजतीति** ॥ नेनेक्षि। नेनिक्थः। नेनिक्थ। नेनेज्मि। नेनिज्वः। नेनिज्मः। नेनिक्ते। नेनिजाते। नेनिजते। नेनिक्षे। नेनिजाथे। नेनिग्ध्वे। निनिजे। नेनिज्वहे। नेनिज्महे। निनेज। निनिजतुः। निनेजिथ–निनेक्थ। निनिजथुः। निनिज। निनेज। निनिजिव। निनिजिम। निनिजे। निनिजाते। निनिजिरे। निनिजिषे। निनिजाथे। निनिजिध्वे। निनिजे। निनिजिवहे। नेक्ता। नेक्ष्यति। नेनेक्तु–नेनिक्तात्। नेनिक्ताम्। नेनिजतु। **नेनिग्धीति** ॥ अपित्त्वेन ङित्त्वान्न गुणः। हेर्धिः। नेनिक्तात्। नेनिक्तम्। नेनिक्त। 'आडुत्तमस्य' इति पित्त्वेन अङित्त्वाल्लघूपधगुणे प्राप्ते। **नाभ्यस्तस्याचि** ॥ 'मिदेर्गुणः' इत्यतो गुण इति 'पुगन्त' इत्यतो लघूपधस्येति चानुवर्तते इत्यभिप्रेत्य शेषम्पूरयति। **लघूपधगुणो न स्यादिति। नेनिजानीति** ॥ नेनिजाव। नेनिजाम। नेनिक्ताम्। नेनिजाताम्। नेनिजताम्। नेनिक्ष्व। नेनिजाथाम्। नेनिग्ध्वम्। नेनिजै। नेनिजावहै। नेनिजामहै। लङि परस्मैपदे आह। **अनेनेगिति** ॥ **अनेनिजुरिति** ॥ अभ्यस्तत्वाज्जुसिति भावः। अनेनेक्। अनेनिक्ताम्। अनेनिक्त। अनेनिजम्। 'नाभ्यस्तस्य' इति न गुणः। अनेनिज्व। अनेनिज्म। निक्षीष्ट। लुङ्याह। **अनिजदिति** ॥ इरित्त्वादङिति भावः। **अनिक्तेति** ॥ 'झलो झलि' इति सिज्लोपः।

पृथग्भावे। वेवेक्ति–वेविक्ते। विवेजिथ। अत्र 'विज इट्' (सू २५३६) इति डित्त्वं न 'ओ विजी' इत्यस्यैव तत्र ग्रहणात्। 'णिजिविजी' रुधादावपि। विष्ल्ऌ १०९५ व्याप्तौ। वेवेष्टि–वेविष्टे। ऌदित्त्वादङ्। अविषत्। तङि क्सः। अजादौ 'क्सस्याचि' (सू २३३७) इत्यल्लोपः। अविक्षत। अविक्षाताम्। अविक्षन्त।

अथ आगणान्तात्परस्मैपदिनश्छान्दसाश्च। घृ १०९६ क्षरणदीप्त्योः। 'जिघर्म्यग्निं हविषा घृतेन'। 'भृज्ञामित्' (सू २४९६)। बहुलं छन्दसि' (सू (३५९८) इतीत्त्वम्। हृ १०९७ प्रसह्यकरणे। अयं स्रुवोऽभिजिहर्ति होमान्। ऋ १०९८ सृ १०९९ गतौ। बहुलं छन्दसि (३५९८) इत्येव सिद्धे 'अर्तिपिपर्त्योश्च' (सू २४९३) इतीत्त्वविधानादयं भाषायामपि। 'अभ्यास-

---

अनिक्षाताम् इत्यादि। विजिरपि णिजिर्वत्। **अत्रेति** ॥ थलि इट्पक्षे 'विज इट्' इति विहितं डित्त्वं नेत्यर्थः। अतो न गुणनिषेध इति भावः। **ओ विजी इत्यस्यैवेति** ॥ व्याख्यानादिति भावः। **रुधादावपीति** ॥ ततश्च 'रुधादिभ्यः श्नम्' इति श्नम्विकरणावपि ताविति भावः। **विष्ल्ऌ व्याप्तौ इति** ॥ ऌदित् उभयपदी अनिट्। णिजेरिव रूपाणि। **वेवेष्ट्रीति** ॥ ष्टुत्वेन तकारस्य टः। सिपि 'षढोः' इति षस्य कत्वम्। वेवेक्षि। वेविष्टः। वेविड्ढि। **अविषदिति** ॥ ऌदित्त्वादङिति भावः। **तङि क्सः इति** ॥ 'शल इगुपधात्' इत्यनेनेति भावः। **आगणान्तादिति** ॥ जुहोत्यादिगणसमाप्तिपर्यन्तमित्यर्थः। घृधातुरनिट्। तिपि श्लौ द्वित्वे अभ्यासकार्ये गुणे रपरत्वे जघर्ति। जघृतः। जघ्रति। 'जिघर्म्यग्निं हविषा घृतेन' इति बह्वृचमन्त्रपाठः। 'जिघर्म्यग्निं मनसा घृतेन' इति तैत्तिरीयपाठः। अत्र इत्त्वमभ्यासस्य आह। **भृज्ञामिदिति** ॥ ननु तत्र त्रयाणामेव ग्रहणमित्यत आह। **बहुळमिति** ॥ इत्त्वं छान्दसमिति भावः। जघार। जघ्रतुः। जघर्थ। जघ्र। जघ्रिव। घरिष्यति। जघर्तु–जघृतात्। जघ्रतु। जघृहि। जघराणि। अजघः। अजघृताम्। अजघरुः। अजघरम्। अजघृव। जघृयात्। घ्रियात्। अघार्षीत्। अघरिष्यत्। **हृ प्रसह्यकरणे इति** ॥ घृधातुवद्रूपाणि। **अयं स्रुवो अभिजिहर्ति होमानिति** ॥ स्रुवे साद्यमाने याजमानो मन्त्रः। अत्रापि अभ्यासस्य इत्त्वं छान्दसमिति भावः। **ऋ सृ गताविति** ॥ इमावनिटौ। तत्र ऋधातोः छान्दसत्वेऽपि लोकेऽपि क्वचित् प्रयोगं समर्थयति। **बहुळमिति** ॥ 'भृज्ञामित्'। 'अर्तिपिपर्त्योश्च' 'बहुलं छन्दसि' इति सूत्रस्थितिः। तत्र बहुलञ्छन्दसीत्येव ऋधातोरित्त्वसिद्धेः 'अर्तिपिपर्त्योश्च' इत्यर्तिग्रहणात् लोकेऽपि ऋधातोः श्लुविकरणस्य प्रयोगो विज्ञायते इत्यर्थः। एतच्चातैव सूत्रे भाष्ये स्पष्टम्। अत एव भाष्यात् श्लुविकरणस्यैव ऋधातोः 'अर्तिपिपर्त्योश्च' इत्यत्र ग्रहणम्। पिपर्तिसाहचर्याच्च, श्लाविल्यस्य अभ्यासग्रहणस्य चानुवृत्तेश्चेत्यलम्। **अभ्यासस्यासवर्णे इति** ॥ शपः श्लौ ऋ ति इति स्थिते द्वित्वे उरदत्त्वम्बाधित्वा 'अर्तिपिपर्त्योश्च' इत्यभ्या-

स्यासवर्णे (सू २२९०) इतीयङ्। इयर्ति। इयृतः। इयृति। आर। आरतुः। 'इडत्यर्ति—' (सू २३८४) इति नित्यमिट्। आरिथ। अर्ता। अरिष्यति। इयराणि। ऐयः। ऐयृताम्। ऐयरुः। इयृयात्। अर्यात्। आरत्। ससर्ति। भस ११०० भर्त्सनदीप्त्योः। बभस्ति। 'घसिभसोर्हलि—' (सू ३५५०) इत्युपधालोपः। 'झलो झलि' (सू २२८१) इति सलोपः। बब्धः। बप्सति।

सऋकारस्य इत्त्वे रपरत्वे हलादिशेषे उत्तरखण्डस्य ऋकारस्य गुणे रपरत्वे इ अर् ति इति स्थिते 'अभ्यासस्यासवर्णे' इति इयङि इयर्ति इति रूपमित्यर्थः। **इयृतः इति** ॥ पूर्ववदेव द्वित्वादि। तसः अपित्त्वेन ङित्त्वाद्गुणनिषेध इति भावः। **इयृतीति** ॥ पूर्ववदेव द्वित्वादि। अभ्यस्तत्वाददादेशः। ङित्त्वान्न गुणः। उत्तरखण्डस्य ऋकारस्य यण् रेफ इति भावः। इयर्षि। इयृथः। इयर्मि। इयृवः। इयृमः। लिट्याह। **आरेति** ॥ थलि 'अचस्तास्वत्' इति 'ऋतो भारद्वाजस्य' इति नित्यमिण्निषेधे प्राप्ते आह। **इडत्यर्तीति। नित्यमिडिति** ॥ आरिथ। आरिम। **अर्तेति** ॥ अनिट्त्वादिति भावः। **अरिष्यतीति** ॥ 'ऋद्धनोः स्ये' इति इडिति भावः। इयर्तु-इयृतात्। इयृताम्। इयृतु। इयृहि-इयृतात्। इयृतम्। इयृत। **इयराणीति** ॥ आटः पित्त्वेन अङित्त्वान्न गुणनिषेध इति भावः। इयराव। इयराम। लङ्याह। **ऐयः इति** ॥ श्लौ ऋ त् इति स्थिते द्वित्वे अभ्यासस्य इत्त्वे रपरत्वे हलादिशेषे इयङि उत्तरखण्डस्य गुणे रपरत्वे च हलङ्यादिलोपे रेफस्य विसर्गे इयः इति स्थिते आटि वृद्धौ ऐयः इति रूपमिति भावः। नच लावस्थायामडिति पक्षे वृद्धौ रपरत्वे आर् त् इति स्थिते द्वित्वे हलादिशेषे सवर्णदीर्घे हलङ्यादिलोपे रेफस्य विसर्गे आः इति स्यादिति शङ्क्यम्। बहुलं छन्दस्यमाङ्योगेऽपि' इति बहुलग्रहणेनात्र लावस्थायामाङित्यस्यानाश्रयणादित्याहुः। **ऐयरुरिति** ॥ ऐयः। ऐयृतम्। ऐयृत। ऐयरम्। ऐयृव। ऐयृम। विधिलिङ्याह। **इयृयादिति** ॥ यासुटो ङित्त्वाद्गुणनिषेध इति भावः। इयृयाताम् इत्यादि। आशीर्लिङ्याह। **अर्यादिति** ॥ 'अकृत्सार्वधातुकयोः' इति दीर्घः प्राप्तः। तं बाधित्वा 'रिङ् शयग्लिङ्क्षु' इति रिङ् प्राप्तः। तम्बाधित्वा 'गुणोऽर्तिसंयोगाद्योः' इति गुण इति भावः। लुङ्याह। **आरदिति** ॥ 'सर्तिशास्त्यर्तिभ्यश्च' इत्यङि 'ऋदृशोऽङि' इति गुण इति भावः। आरिष्यत्। तदेवं ऋधातुं निरूप्य सृधातुं निरूपयति। **ससर्तीति** ॥ सस्रतः। सस्रति। इत्यादि सुगमम्। ससार। ससर्थ। सस्रव। सर्ता। सरिष्यति। ससर्तु। अससः। अससृताम्। अससरुः। सस्रयात्। स्रियात्। असरत्। **भस भर्त्सने इति** ॥ अयं सेट्। **बभस्तीति** ॥ श्लौ भस् ति इति स्थिते द्वित्वे अभ्यासजश्त्वमिति भावः। बभस् तस् इति स्थिते आह। **घसिभसोरिति** ॥ 'घसिभसोर्हलि च' इत्यस्यायमर्थः। छन्दसि अनयोरुपधाया लोपः स्यात्, हलादावजादौ च ङिति परे इति। तथाच बभस् तस् इत्यत्र उपधालोपे 'झलो झलि' इति सकारलोपे तकारस्य 'झषस्तथोः' इति धत्वे भकारस्य जश्त्वमिति भावः। **बप्सतीति** ॥ अभ्यस्तत्वाददादेशे बभस् अति इति स्थिते 'घसिभसोः' इत्युपधालोपे भकारस्य चर्त्वमिति भावः।

कि ११०१ ज्ञाने । चिकेति । तुर ११०२ त्वरणे । तुतोर्ति । तुतूर्तः तुतुरति । धिष ११०३ शब्दे । दिधेष्टि । दिधिष्टः । धन ११०४ धान्ये । दधन्ति । दधन्तः । दधनति । जन ११०५ जनने । जजन्ति ।

२५०४ । जनसनखनां सञ्झलोः । (६-४-४२)

बभस्सि । बब्धः । बब्ध । बभस्मि । बप्स्वः । बप्स्मः । बभास । बप्सतुः । बप्सुः । बभसिथ । बप्सथुः । बप्स । बभास–बभस । बप्सिव । बप्सिम । भसिता । भसिष्यति । बभस्तु–बब्धात् । बब्धाम् । बप्सतु । बाब्धि–बब्धात् । बब्धम् । बब्ध । बभसानि । बभसाव । बभसाम । अबभः । अबब्धाम् । अबप्सुः । अबभः । अबब्धम् । अबब्ध । अबप्सम् । अबप्स्व । बप्स्यात् । भस्यात् । अभासीत्–अभसीत् । अभसिष्यत् । **कि ज्ञाने । चिकेतीति ॥** किधातोस्तिपि श्लौ द्वित्वे अभ्यासकुत्वे उत्तरखण्डस्य गुण इति भावः । चिकितः । चिक्यति । चिकेषि । चिकिथः । चिकिथ । चिकेमि । चिकिवः । चिकाय । चिक्यतुः । चिकयिथ–चिकेथ । चिक्यिव । केता । केष्यति । चिकेतु–चिकितात् । चिकिताम् । चिक्यतु । चिकिहि । चिकयानि । अचिकेत् । अचिकिताम् । अचिकयुः । अचिकेः । अचिकयम् । अचिकिव । चिकियात् । कीयात् । अकैषीत् । अकेष्यत् । **तुर त्वरणे इति ॥ तुतूर्तः इति ॥** 'हलि च' इति दीर्घः । तुतोर्षि । तुतूर्थः । तुतूर्थ । तुतोर्मि । तुतूर्वः । तुतोर । तुतुरथुः । तुतोरिथ । तुतुरिव । तोरिता । तोरिष्यति । तुतोर्तु–तुतूर्तात् । तुतूर्ताम् । तुतुरतु । तुतूर्हि । तुतोराणि । अतुतोः । अतुतूर्ताम् । अतुतुरुः । अतुतोः । अतुतोरम् । अतुतूर्व । तुतूर्यात् । तूर्यात् । अतोरीत् । अतोरिष्यत् । **धिष शब्दे सेट् । दिधेष्टीति ॥** श्लौ द्वित्वादौ लघूपधगुणे तकारस्य ष्टुत्वमिति भावः । दिधिषति । दिधेक्षि । दिधिष्टः । दिधेष्मि । दिधिष्वः । दिधेष । दिधिषतुः । दिधेषिथ । दिधिषिव । धेषिता । धेषिष्यति । दिधेष्टु–दिधिष्टात् । दिधिषतु । दिधिड्ढि । दिधेषाणि । अदिधेट् । अदिधिष्टाम् । अदिधिषुः । अदिधेषम् । अदिधिष्व । दिधिष्यात् । अधैषीत् । अधेषिष्यत् । **धन धान्ये इति ॥** धान्यार्जने इत्यर्थः । **दधन्तीति ॥** क्षमूष् सहने इति धातोः चक्षंसे इतिवदनुनासिकस्य क्वीति न दीर्घः । दधंसि । दधन्थ । दधन्मि । दधन्वः । दधन्मः । दधान । दधनतुः । दधनिथ । दधनिव । धनिता । धनिष्यति । दधन्तु–दधन्तात् । दधन्ताम् । दधनतु । दधन्हि । दधनानि । अदधन् । अदधन्ताम् । अदधनुः । अदधन् । अदधन्तम् । अदधन्त । अदधनम् । अदधन्व । अदधन्म । दधन्यात् । धन्यात् । अधानीत्–अधनीत् । अधनिष्यत् । **जन जनने इति ॥** उत्पत्तौ अकर्मकः । उत्पादने सकर्मकः । **जनसन ॥** 'विड्वनोः' इत्यतः आदित्यनुवर्तते । तदाह । **एषामाकारोऽन्तादेशः इति ॥** सन् झल् इत्यनयोः द्वन्द्वात् सप्तमीद्विवचनम् । सनि झलि चेति लभ्यते । 'अनुदात्तोपदेश' इत्यतः झलि क्ङितीत्यनुवर्तते । तत्र झलीत्यनुवृत्तेन सन् विशेष्यते । तदादिविधिः । झलादौ सनीति लभ्यते । क्ङितीत्यनुवृत्तं तु एतत्सूत्रस्थेन झला विशेष्यते । तदादिविधिः । झलादौ क्ङितीति लभ्यते । तथाच झलादौ सनीति झलादौ क्ङितीति च परनिमित्तद्वयं लब्धम् । तदाह ।

एषामाकारोऽन्तादेशः स्याज्झलादौ सनि झलादौ क्ङिति च। जजातः। जज्ञति। जजंसि। जजान। जजायात्–जजन्यात्। जायात्–जन्यात्। गा ११०६ स्तुतौ। देवाञ्जिगाति सुम्नयुः। जिगीतः। जिगति।

इति तिङन्तजुहोत्यादिप्रकरणम्।

झलादौ सनि झलादौ क्ङिति चेति ॥ सन्विशेषणञ्झलादाविति किम्। जिजनिषति। सिसनिषति। चिकनिषति। अथ क्ङितोर्झल्विशेषणस्य प्रयोजनमाह। **जज्ञतीति** ॥ जजन् अति इति स्थिते अतेर्ङित्त्वे झलादित्वाभावादात्वाभावे 'गमहन' इत्युपधालोपे नकारस्य श्चुत्वेन ञकार इति भावः। 'जनसनखनां सन्' इत्याश्रित्य योगविभागेन उक्तार्थसिद्धिञ्चाश्रित्य झल्ग्रहणन्वत्र सूत्रे प्रत्याख्यातम् भाष्ये। **जजंसीति** ॥ 'नश्च' इत्यनुस्वारः। जजाथः। जजाथ। जजन्मि। जजन्वः। जजन्मः। **जजानेति** ॥ जज्ञतुः। सेऽयम्। जजनिथ। जज्ञथुः। जज्ञिव। जनिता। जनिष्यति। जजन्तु–जजाताम्। जजाहि। जजनानि। अजजन्। अजजाताम्। अजज्ञुः। अजजनम्। अजजन्व। विधिलिङि 'ये विभाषा' इति मत्त्वा आह। **जजायात्–जजन्यात् इति** ॥ अजनीत्–अजानीत्। अजनिष्यत्। **गा स्तुतौ। देवाञ्जिगातीति** ॥ 'भृञामित्' इत्यत्र 'बहुलञ्छन्दसि' इति वचनादभ्यासस्य इत्त्वमिति भावः। **जिगीतः इति** ॥ 'ई हल्यघोः' इति ईत्त्वम्। **जिगतीति** ॥ अभ्यस्तत्वाददादेशे 'श्नाभ्यस्तयोः' इत्यात्लोपः। जिगासि। जिगीथः। जिगीथ। जिगामि। जिगीवः। जगौ। जगतुः। जगिथ–जगाथ। जगिव। गाता। गास्यति। जिगातु–जिगीतात्। जिगीताम्। जिगतु। जिगीहि। जिगानि। अजिगात्। अजिगीताम्। अजिगुः। अजिगाः। अजिगाम्। अजिगीव। जिगीयात्। आशिषि गायात्। अगासीत्। अगास्यत्।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदी-
व्याख्यायां बालमनोरमायां श्लुविकरणं समाप्तम्।

। श्रीरस्तु ।

॥ अथ तिङन्तदिवादिप्रक्रिया ॥

दिवु ११०७ क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु । झषन्ताः परस्मैपदिनः ।

२५०५ । दिवादिभ्यः श्यन् । (३-१-६९)

शपोऽपवादः 'हलि च' (सू ३५४) इति दीर्घः । दीव्यति । दिदेव । देविता । देविष्यति । दीव्यतु । अदीव्यत् । दीव्येत् । दीव्यात् । अदेवीत् । अदेविष्यत् । षिवु ११०८ तन्तुसन्ताने । परिषीव्यति । परिषिषेव । न्यषेवीत्–न्यसेवीत् । स्रिवु ११०९ गतिशोषणयोः । ष्ठिवु १११० निरसने । केचिदिहेमं न पठन्ति । ष्णुसु ११११ अदने । 'आदाने' इत्येके । 'अदर्शने' इत्यपरे । सुष्णोस । ष्णसु १११२ निरसने । स्नस्यति । सस्नास । क्रसु १११३ ह्वरणदीप्त्योः । ह्वरणं कौटिल्यम् । चक्रास । व्युष १११४ दाहे । वुव्योष । प्लुष १११५ च । नृती १११६ गात्रविक्षेपे । नृत्यति । ननर्त ।

अथ श्यन्विकरणधातवो निरूप्यन्ते । **दिवु क्रीडेति** ॥ उदिदयम् । तेन क्त्वा-यामिड्विकल्पः। निष्ठायाञ्च सेट्। **झषन्ताः इति** ॥ जृष् झृष् वयोहानौ इत्येतत्पर्यन्ता इत्यर्थः । **दिवादिभ्यः श्यन्** ॥ 'कर्तरि शप्' इत्यतः कर्तरीति 'सार्वधातुके यक्' इत्यतः सार्वधातुके इति चानुवर्तते इत्यभिप्रेत्य आह । **शपोऽपवादः इति** ॥ शकारनकारावितौ । दिव् य ति इति स्थिते आह । **हलि चेति दीर्घः इति** ॥ श्यनः अपित्त्वेन ङित्त्वान्न गुण इति भावः । दीव्यतः। दीव्यन्ति। इत्यादि सुगमम्। **दिदेवेति** ॥ दिदिवतुः। दिदेविथ । दिदिविव । सेट्त्वं सूचयति । **देवितेति** ॥ षिवु धातुरपि सेट् षोपदेशः दिवुधातुवत् । **परिषीव्यतीति** ॥ 'परिनिविभ्यस्सेव' इति षत्वमिति भावः । **परिषिषेवेति** ॥ स्थादिष्वेवाभ्यासस्य इति नियमस्तु न । तत्र प्राक्सितादित्यनुवृत्तेरिति भावः । 'सिवादीनां वाड्व्यवायेऽपि' इति मत्वा आह । **न्यषेवीत्–न्यसेवीदिति** ॥ स्रिवु धातुस्तु रेफवान् । **ष्ठिवु निरसने इति** ॥ 'सुब्धातुष्वक्ष्ठीवाम्' इति न सत्वम् । ष्ठीव्यति इत्यादि सुगमम् । आर्धधातुकेषु तु शब्विकरणस्थष्ठिवुधातुवद्रूपाणि । ष्णसु धातुश्च षोपदेशः । **नृती गात्रेति** ॥ 'श्वीदितः'

२५०६। सेऽसिचि कृतचृतछृदतृदनृतः। (७-२-५७)

एभ्यः परस्य सिज्भिन्नस्य सादेरार्धधातुकस्य इड्वा स्यात्। नर्तिष्यति—नर्त्स्यति। नृत्येत्। नृत्यात्। अनर्तीत्। त्रसी १११७ उद्वेगे। 'वा भ्राश—' (सू २३२१) इति श्यन्वा। त्रस्यति—त्रसति। त्रेसतुः—तत्रसतुः। कुथ १११८ पूतीभावे। पूतीभावो दौर्गन्ध्यम्। पुथ १११९ हिंसायाम्। गुध १११० परिवेष्टने। क्षिप ११२१ प्रेरणे। क्षिप्यति। क्षेप्ता। पुष्प ११२२ विकसने। पुष्प्यति। पुपुष्प। तिम ११२३ ष्टिम ११२४ ष्टीम ११२५ आर्द्रीभावे। तिम्यति। स्तिम्यति। स्तीम्यति। व्रीड ११२६ चोदने लज्जायां च। व्रीड्यति। इष ११२७ गतौ। इष्यति। षह ११२८ षुह ११२९ चक्यर्थे। चक्यर्थस्तृप्तिः। सह्यति। सुह्यति। जृष् ११३० झृष् ११३१ वयोहानौ। जीर्यति। जजरतुः—जेरतुः। जरिता—जरीता। जीर्येत्। जीर्यात्। 'जृस्तम्भु—' (सू २२९१) इत्यङ्वा। 'ऋदृशोऽङि गुणः' (सू २४०६)। अजरत्—अजारीत्। अजारिष्टाम्। झीर्यति। जझरतुः। अझारीत्। षूङ् ११३२ प्राणिप्रसवे। सूयते। सुषुवे। 'स्वरतिसूति—' (सू २२७९) इति विकल्पं बाधित्वा 'श्र्युकः किति' (सू २३८१) इति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्। सुषुविषे। सुषुविवहे। सोता—सविता।

इत्यावर्धमीत्त्वम्। सेडयम्। **सेऽसिचि** ॥ से असिचि इति छेदः। सप्तमी षष्ठ्यर्थे। कृत चृत छृद तृद नृत् एषां समाहारद्वन्द्वात् पञ्चमी। 'उदितो वा' इत्यतो वेति आर्धधातुकस्येडिति चानुवर्तते। तदाह। **एभ्यः इत्यादिना** ॥ नित्यमिटि प्राप्ते विकल्पार्थमिदं वचनम्। **अनर्तीदिति** ॥ 'सेऽसिचि' इत्यत्र असिचि इत्युक्तेर्नित्यमिडिति भावः। **त्रसी उद्वेगे** ॥ 'वा जृभ्रमुत्रसाम्' इत्येत्त्वाभ्यासविकल्पौ मत्वा आह। **त्रेसतुः—तत्रसतुरिति। कुथ पूतीभावे इति** ॥ पवित्रीभवने इत्यर्थः। दुर्गन्धकरणे इति वा। (पूतिगन्धस्तु दुर्गन्धः) इत्यमरः। **तिम ष्टिम ष्टीमेति** ॥ द्वितीयतृतीयौ षोपदेशौ। द्वितीय इदुपधः। तृतीयस्तु ईदुपधः। षहषुहेति षोपदेशौ। **चक्यर्थस्तृप्तिरिति** ॥ यद्यपि 'चक तृप्तौ प्रतिघाते च' इत्युक्तम्। तथापि तृप्तिरेवेह विवक्षिता व्याख्यानात्। षुहेः 'नपुंसके भावे क्तः' इति क्तप्रत्यये सुहितशब्दः। सुहितस्तृप्तिरिति 'पूरणगुण' इति सूत्रे कैयटः। जृष् झृष् वयोहानाविति सेट्कौ। **जीर्यतीति** ॥ 'ऋत इद्धातोः' इति इत्त्वे 'हलि च' इति दीर्घ इति भावः। अतुसादौ 'ऋच्छत्यृताम्' इति गुणे रपरत्वे 'वा जृभ्रमुत्रसाम्' इत्येत्त्वाभ्यासलोपविकल्प इति भावः। जजरिथ। 'वृतो वा' इति मत्वा आह। **जरिता—जरीतेति** ॥ **षूङ् प्राणिप्रसवे इति** ॥ प्रसवः उत्पादनं षोपदेशोऽयम्। **विकल्पमिति** ॥ परमपीति शेषः। **निषेधे प्राप्ते इति** ॥ पुरस्तात्प्रति-

दूङ् ११३३ परितापे । दूयते । दीङ् ११३४ क्षये । दीयते ।

२५०७ । दीङो युडचि क्ङिति । (६-४-६३)

दीङः परस्याजादेः क्ङिति आर्धधातुकस्य युट् स्यात् । 'वुग्युटावुव-ङ्यणोः सिद्धौ वक्तव्यौ' (वा ४०६२) दिदीये ।

२५०८ । मीनातिमिनोतिदीङां ल्यपि च । (६-१-५०)

एषामात्त्वं स्याल्ल्यपि चकारादशित्येञ्निमित्ते । दाता । दास्यते । अदास्त । अदास्थाः । डीङ् ११३५ विहायसा गतौ । डीयते । धीङ् ११३६ आधारे । धीयते । दिध्ये । धेता । मीङ् १२३७ हिंसायाम् । हिंसा अत्र प्राण-वियोगः । मीयते । रीङ् ११३८ श्रवणे । रीयते । लीङ् ११३९ श्लेषणे ।

२५०९ । विभाषा लीयतेः । (६-१-५१)

लीयतेरिति यका निर्देशो न तु श्यना । लीलीङोरात्त्वं वा स्यादेञ्विषये ल्यपि च । लेता—लाता । लेष्यते—लास्यते । 'एञ्विषये' किम् । लीयते ।

षेधकाण्डारम्भसामर्थ्यादिति भावः । **दूङ् परितापे इति** ॥ पीडने पीडितीभवने वेत्यर्थः। आद्ये सकर्मकः । द्वितीये अकर्मकः । **दीङ् क्षये इति** ॥ क्षयो ह्रस्वः नाशो वा । **दीङो युडचि** ॥ 'आर्धधातुके' इत्यधिकृतम् अचा विशेष्यते । तदादिविधिः । दीङ इति पञ्चमी । सप्तमी षष्ठ्यर्थे । तदाह । **दीङः परस्येत्यादिना** ॥ दिदी ए इति स्थिते पर-त्वात् 'एरनेकाचः' इति यणि प्राप्ते नित्यत्वात् युट् । टकार इत् । उकार उच्चारणार्थः । टित्त्वादाद्यवयवः । दीदीये इति रूपमिति भावः । ननु युटि कृतेऽपि तस्यासिद्धत्वाद्यण् दुर्वारः। तथाच दिद्ग्ये इति स्यात् । इकारो न श्रूयेत यकारद्वयं श्रूयेत । इत्यत आह । **वुग्युटा-वितिं** ॥ **मीनातिमिनोति** ॥ 'आदेच उपदेशेऽशिति' इत्यतः आदित्यनुवर्तते । तदाह । **एषामात्त्वं स्यात् ल्यपीति** ॥ चकारात् एचः अशितीति परनिमित्तं समुच्चीयते । तत्र एच इत्यनन्तरं निमित्ते इति शेषः । एजनिमित्ते आशिति प्रत्यये च परे इति फलितम् । तदाह । **चकारादशित्येञ्निमित्ते इति** ॥ समुच्चीयत इति शेषः । लुङ्याह । **अदास्तेति** ॥ इह आत्त्वे कृते ङित्त्वे सत्यपि 'स्थाध्वोरिच्च' इति न भवति । स्थाध्वोरित्त्वे 'दीङः प्रतिषेधः' इति घुसंज्ञासूत्रस्थभाष्यपठितवार्तिकादिति भावः । **धीङ् आधारे इति** ॥ आधा-रः आधारणम् । स्थापनमिति यावत् । **लीङ् श्लेषणे इति** ॥ लीयते । लिल्ये । लिल्यिषे । **विभाषा लीयतेः** ॥ ननु लीयतेरिति श्यना निर्देशात् 'लीङ् श्लेषणे' इति श्राविकरणस्य ग्रहणं न स्यादित्यत आह । **यका निर्देशः इति** ॥ 'सार्वधातुके यक्' इति विहितयका लीयतेरिति निर्देशः सच श्यन्श्नान्तसाधारणः । यक उभयत्रापि साधारण्यादिति भावः । 'मीनातिमिनोति' इत्यतः ल्यपीति 'आदेचः' इत्यतः आदिति एच इति च । तदाह । **लीलीङोरित्यादिना** ।

लिल्ये। व्रीङ् ११४० वृणोत्यर्थे। व्रीयते। विव्रिये। 'स्वादय ओदितः (ग सू २९६)। तत्फलं तु निष्ठानत्वम्। पीङ् ११४१ पाने। पीयते। माङ् ११४२ माने। मायते। ममे। ईङ् ११४३ गतौ। ईयते। अयां चक्रे। प्रीङ् ११४४ प्रीतौ। सकर्मकः। प्रीयते। पिप्रिये।

अथ चत्वारः परस्मैपदिनः। शो ११४५ तनूकरणे।

२५१० । ओतः श्यनि । (७-३-७१)

लोपः स्याच्छ्यनि। श्यति। श्यतः। श्यन्ति। शशौ। शशतुः। शाता। शास्यति। 'विभाषा घ्राधेट्—' (सू २३७६) इति सिचो वा लुक्। लुगभावे 'यमरम—' (सू २३७७) इतीट्सकौ। अशात्। अशाताम्। अशुः। अशासीत्। अशासिष्टाम्। छो ११४६ छेदने। छ्यति। षो ११४७ अन्तकर्मणि। स्यति। ससौ। अभिष्यति। अभ्यष्यत्। अभिससौ। दो ११४८ अवखण्डने। द्यति। ददौ। प्रणिदाता। देयात्। अदात्।

अथात्मनेपदिनः पञ्चदश। जनी ११४९ प्रादुर्भावे।

स्वादय ओदितः इति॥ धातुपाठपठितङ्णसूत्रमिदम्। 'षूङ् प्राणिप्रसवे' इत्यारभ्य व्रीङन्ता ओदित्कार्यभाज इत्यर्थः। **निष्ठानत्वमिति॥** 'ओदितश्च' इत्यनेनेति भावः। **प्रीङ् प्रीताविति॥** प्रीतिस्तुष्टिः। (मुत्प्रीतिः प्रमदो हर्षः) इत्यमरः। एवं सत्यकर्मकः। यथा फलमूलादिना हरिः प्रीयते। हृष्यतीत्यर्थः। यदा तु प्रीतिः तर्पणं 'प्रीञ् तर्पणे' इति क्रैयादिकात् क्तिनि प्रीतिशब्दनिष्पत्तिः तदा तु सकर्मकः। तदाह। **सकर्मकः इति। प्रीयते इति॥** तर्पयतीत्यर्थः। **अथ चत्वारः परस्मैपदिनः इति॥** 'दो अवखण्डने' इत्यन्ता इति भावः। शो तनूकरणे। अनिट्। **ओतः श्यनि॥** 'घोर्लोपो लेटि वा' इत्यतो लोप इत्यनुवर्तते इत्यभिप्रेत्य शेषं पूरयति। **लोपः स्यादिति। शशाविति॥** 'आदेच' इत्यात्त्वे णलिति भावः। **शशतुरिति॥** शशिथ–शशाथ। शशिव। **शास्यतीति॥** श्यतु। अश्यत्। श्येत्। शायात्। छुङि सिचि विशेषमाह। **विभाषा घ्रेति॥** सिचो लुक्पक्षे आह। **अशादिति॥** 'आत' इति जुसिति मत्वा आह। **अशुरिति॥** सिचो लुगभावे सगिटौ मत्वा आह। **अशासीदिति॥** छोधातुरपि शोधातुवत्। **षो अन्तकर्मणीति॥** समापने विनाशने वेत्यर्थः। शोधातुवद्रूपाणि। षोपदेशोऽयम्। **स्यतीति॥** 'ओतः श्यनि' इति लोपः। **अभिष्यतीति। अभ्यष्यदिति॥** 'प्राक्सितात्' इति षत्वम्। **अभिससाविति॥** स्थादिष्विति नियमात् न षः। दो अवखण्डने। **प्रणिदातेति॥** 'नेर्गद' इति णत्वम्। **देयादिति॥** आशीर्लिङि एर्लिङीत्येत्त्वम्। **अदादिति॥** 'गातिस्था' इति सिचो लुक्। **अथात्मनेपदिनः इति॥** वाङ् शब्दे इत्यन्ता इत्यर्थः। **जनी प्रादुर्भावे इति॥** श्वीदितो निष्ठा-

२५११ । ज्ञाजनोर्जा । (७-३-७९)

अनयोर्जादेशः स्याच्छिति । जायते । जज्ञे । जज्ञाते । जज्ञिरे । जनिता । जनिष्यते । 'दीपजन—' (२३२८) इति वा चिण् ।

२५१२ । जनीवध्योश्च । (७-३-३५)

अनयोरुपधाया वृद्धिर्न स्याच्चिणि ञ्णिति कृति च । अजनि—अजनिष्ट । दीपी ११५० दीप्तौ । दीप्यते । दिदीपे । अदीपि—अदीपिष्ट । पूरी ११५१ आप्यायने । पूर्यते । अपूरि—अपूरिष्ट । तूरी ११५२ गतित्वरणहिंसनयोः । तूर्यते । तुतूरे । धूरी ११५३ गूरी ११५४ हिंसागत्योः । धूर्यते । दुधूरे । गूर्यते । जुगूरे । घूरी ११५५ जूरी ११५६ हिंसावयोहान्योः । शूरी ११५७ हिंसास्तम्भनयोः । चूरी ११५८ दाहे । तप ११५९ ऐश्वर्ये वा । अयं धातुरैश्वर्ये वा श्यनन्तङ्श्च लभते । अन्यदा तु शब्विकरणः परस्मैपदीत्यर्थः । केचित्तु वाग्रहणं वृतुधातोराद्यवयवमिच्छन्ति । तप्यते । तप्ता । तप्स्यते । 'पत' इति व्यत्यासेन पाठान्तरम् । 'द्युत द्यामानि युतः पत्यमानः' ।

याम्' इत्याद्यर्थमीदित्त्वम् । **ज्ञाजनोर्जा** ॥ **शितीति** ॥ श्ठिवुक्लम्वाचमामित्यतस्तदनुवृत्तेरिनि भावः । **जायते इति** ॥ ज्ञाधातोस्तु श्नाविकरणत्वात् जानातीत्युदाहरणम् । उभयत्रापि जादेशस्य ह्रस्वान्तत्वे 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्' इति परिभाषया 'अतो दीर्घो यञि' इत्यप्राप्तौ जादेशस्य दीर्घान्तत्वमाश्रितम् । **जज्ञे इति** ॥ 'गमहन' इत्युपधालोपे नस्य श्चुत्वेन ञः । जायेत । जनिषीष्ट । लुङि अजन् स् त इति स्थिते आह । **दीपेति । वा चिणिति** ॥ सिच इति शेषः । अजन् इ त इति स्थिते उपधावृद्धौ प्राप्तायाम् । **जनीवध्योश्च** ॥ 'अत उपधाया' इत्यतः उपधाया इति 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति 'नोदात्तोपदेशस्य' इत्यतो नेति 'आतो युक्' इत्यतः चिण्कृतोरिति 'अचोञ्णिति' इत्यतः ञ्णितीति चानुवर्तते । तदाह । **अनयोरिति** ॥ दीपीधातुरीदित् । 'दीपजन' इति सिचः चिण्विकल्पं मत्वा आह । **अदीपि–अदीपिष्टेति** ॥ पूरीधातुरपि ईदित् । 'दीपजन' इति चिण्विकल्पं मत्वा आह । **अपूरि–अपूरिष्टेति** ॥ तूरी इत्यादयोऽपि 'चूरी दाहे' इत्यन्ता ईदित एव । **तप ऐश्वर्येवेति** ॥ श्यन् आत्मनेपदञ्चेति शेषः । उभयोः प्रकृतत्वादित्याभिप्रेत्य शेषं पूरयति । **श्यनं तङञ्चेति** ॥ **अन्यदा त्विति** ॥ ऐश्वर्यादन्यत्रार्थे वृत्तिदशायामित्यर्थः । **केचित्त्विति** ॥ 'तप ऐश्वर्ये वा' 'वृतु वरणे' इति धातुपाठे स्थितम् । तत्र 'वावृतु वरणे' इत्येव वाशब्दं वृतु इत्यस्य आद्यवयवमिच्छन्तीत्यर्थः । एवञ्च तप ऐश्वर्ये इत्येव स्थितम् । अस्मिन्पक्षे तपधातोः नित्यमेव श्यन् तङ् चेति भावः । **तप्यते इति** ॥ ईष्टे इत्यर्थः । प्रथमपक्षे ऐश्वर्ये तपतीत्यपि भवति ॥ **पत इतीति** ॥ तपधातोस्तकारपकारयोः क्रमव्यत्यासेन 'पत ऐश्वर्ये वा' इति पाठान्तरमित्यर्थः । एवं व्यत्यासेन पाठे

वृतु ११६० वरणे। वृत्यते। पक्षान्तरे। वावृत्यते। 'ततो वावृत्यमाना सा रामशालां न्यविक्षत।' इति भट्टिः। क्लिश ११६१ उपतापे। क्लिश्यते। क्लेशिता। काशृ ११६२ दीप्तौ। काश्यते। वाशृ ११६३ शब्दे। वाश्यते। ववाशे।

अथ पञ्च स्वरितेतः। मृष ११६४ तितिक्षायाम्। मृष्यति–मृष्यते। ममर्ष–ममृषे। शुचिर् ११६५ पूतीभावे। पूतीभावः क्लेदः। शुच्यति–शुच्यते। शुशोच–शुशुचे। अशुचत्–अशोचीत्–अशोचिष्ट। णह ११६६ बन्धने। नह्यति–नह्यते। ननाह। नेहिथ–ननद्ध। नेहे। नद्धा। नत्स्यति। अनात्सीत्। रञ्ज ११६७ रागे। रज्यति–रज्यते। शप ११६९ आक्रोशे। शप्यति–शप्यते।

अथैकादशानुदात्तेतः। पद ११७० गतौ। पद्यते। पेदे। पत्ता। पद्येत। पत्सीष्ट।

२५१३। चिण् ते पदः। (३-१-६०)

पदश्च्लेश्चिण्स्यात्तशब्दे परे। प्रण्यपादि। अपत्साताम्। अपत्सत। खिद ११७१ दैन्ये। खिद्यते। चिखिदे। खेत्ता। अखित्त। विद ११७२

प्रयोगं दर्शयति। द्युत द्यामानि **द्युतः पत्यमानः इति** ॥ "प्रवायुमच्छा बृहतीत्यृचः" एकदेशोऽयम्। पत्यमान इत्यस्य ईशान इत्यर्थः। अत्र लटश्शानच् आत्मनेपदं श्यन् च। **पक्षान्तरे इति** ॥ वावृतु इति पाठपक्षे इत्यर्थः। **वावृत्यते इति** ॥ वृणोतीत्यर्थः। अपेक्षते इति यावत्। वावृतुधातोः प्रयोगं दर्शयति। **ततो वावृत्यमानेति** ॥ अपेक्षमाणेत्यर्थः। **न्यविक्षतेति** ॥ 'नेर्विशः' इत्यात्मनेपदम्। 'शल इगुपधात्' इति क्सः। **अथ पञ्च स्वरितेतः इति** ॥ 'शप आक्रोशे' इत्यन्ता इत्यर्थः। **शुच्यतीति** ॥ क्लिन्नम्भवतीत्यर्थः। **अशुचदिति** ॥ इरित्त्वादङिति भावः। **णह बन्धने इति** ॥ णोपदेशोऽयम्। अनिट्। **ननाहेति** ॥ नेहतुः। भारद्वाजनियमात्थलि वेट् इति मत्वा आह। **नेहिथ–ननद्धेति** ॥ इट्पक्षे 'थलि च सेटि' इत्येत्त्वाभ्यासलोपौ। इडभावे तु 'नहो धः' इति हस्य ध इति भावः। 'रञ्ज रागे' अनिट्। **रज्यतीति** ॥ 'अनिदिताम्' इति नलोप इति भावः। ररञ्ज। रेजतुः। नलोपे एत्त्वाभ्यासलोपौ। रराञ्जिथ–ररङ्क्थ। रेजिव। रङ्क्ता इत्यादि। **अथैकादशेति** ॥ 'लिश अल्पीभावे' इत्यन्ता इत्यर्थः। 'पद गतौ' अनिट्। **चिण् ते पदः। पदश्च्लेरिति** ॥ 'च्लेस्सिच्' इत्यतः च्लेरित्यनुवर्तते इति भावः। **तशब्दे इति** ॥ आत्मनेपदप्रथमैकवचने इत्यर्थः।इदञ्च भाष्ये स्पष्टम्। **प्रण्यपादीति**॥ सिचश्चिणि उपधावृद्धौ'चिणो

सत्तायाम् । विद्यते । वेत्ता । बुध ११७३ अवगमने । बुध्यते । बुबुधे । बोद्धा । भोत्स्यते । भुत्सीष्ट । अबोधि–अबुद्ध । अभुत्साताम् । युध ११७४ सम्प्रहारे । युध्यते । युयुधे । योद्धा । अयुद्ध । कथं 'युध्यति' इति युधमिच्छतीति क्यच् । 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्' (प ९७) इति वा । अनो रुध ११७५ कामे । अनुरुध्यते । अण ११७६ प्राणने । अण्यते । आणे । अणिता । 'अन' इति दन्त्यान्तोऽयमित्येके । मन ११७७ ज्ञाने । मन्यते । मेने । मन्ता । युज ११७८ समाधौ । समाधिश्चित्तवृत्तिनिरोधः । अकर्मकः । युज्यते । योक्ता । सृज ११७९ विसर्गे । अकर्मकः । संसृज्यते सरसिजैररुणांशुभिन्नैः । ससृजिषे । स्रष्टा । स्रक्ष्यते । 'लिङ्सिचौ—' (सू २३००) इति कित्त्वान्न गुणो नाप्यम् । सृक्षीष्ट । असृष्ट ।

लुक्' इति तशब्दस्य लोपः । 'नेर्गद' इति णत्वमिति भावः । 'विद सत्तायाम्' **वेत्तेति** ॥ अनिडिति भावः । लिटि क्रादिनियमादिट् । एवं बुधधातुरपि । बोद्धेति ॥ तासि 'झषस्तथोः' इति तकारस्य धकारः । **भोत्स्यते इति** ॥ 'एकाचः' इति भष् । **भुत्सीष्टेति** ॥ 'लिङ्सिचौ' इति कित्त्वम् । 'दीपजन' इति चिण्विकल्पं मत्वा आह । **अबोधि–अबुद्धेति । कथं युद्धतीति** ॥ आत्मनेपदित्वादिति भावः । समाधत्ते । **युधमिति** ॥ युध्शब्दः भावक्विबन्तः । युधमिच्छतीत्यर्थे 'सुप आत्मनः' इति क्यजन्तात् परस्मैपदमित्यर्थः । अनुदात्तेत्त्वप्रयुक्तमात्मनेपदमनित्यमिति समाधानं त्वनुचितम् । तस्य भाष्यादृष्टत्वेन अप्रामाणिकत्वात् । अत एव 'व्यत्ययो बहुलम्' इति सूत्रभाष्ये प्रतीपमन्य ऊर्मिर्युज्यतीत्यत्र व्यत्ययेन परस्मैपदमित्येव समाहितम् । **अनो रुध कामे इति** ॥ अनु इत्युपसर्गात्परः रुधधातुः कामे वर्तते इत्यर्थः । युज समाधौ । अनिट् । **अकर्मकः इति** ॥ चित्तवृत्तेर्धात्वर्थान्तर्भावादिति भावः । अर्थान्तरे तु सकर्मकोऽपि भवति । सृजियुज्योः सकर्मकयोः कर्मवद्भाव इति कर्मवत्सूत्रवार्तिकात् । एतच्च कर्मकर्तृप्रक्रियायां स्पष्टीभविष्यति । **सृज विसर्गे इति** ॥ अनिट् । विसर्गस्सम्बन्धः । उपसर्गवशात् । तदाह । **अकर्मकः इति । संसृज्यते इति** ॥ अरुणांशुभिन्नैः अरुणकिरणविकसितैः सरसिजैः कमलैः संसृज्यते सम्बध्नातीत्यर्थः । कमलिनीति शेषः । कर्तरि लकारोऽयम्, न त्वयङ्कर्मणि लकारः, अकर्मकत्वात् । अर्थान्तरे तु सकर्मकोऽयमिति कर्मकर्तृप्रक्रियायां वक्ष्यते । लिट्याह । **ससृजिषे इति** ॥ क्रादिनियमादिडिति भावः । **स्रष्टेति** ॥ 'सृजिदृशोर्झल्यमकिति' इत्यमागमे ऋकारस्य यणि व्रश्चादिना जस्य षः । ष्टुत्वेन तकारस्य ट इति भावः । **स्रक्ष्यते इति** ॥ पूर्ववदमि जस्य षत्वे 'षढोः' इति षस्य कत्वे, सस्य षत्व-

असृक्षाताम्। लिश ११८० अल्पीभावे। लिश्यते। लेष्टा। लेक्ष्यते। लिक्षीष्ट। अलिक्षत। अलिक्षाताम्।

अथागणान्तात्परस्मैपदिनः। राधः ११८१ अकर्मकाद्वृद्धावेव। एवकारो भिन्नक्रमः। राधोऽकर्मकादेव श्यन्। उदाहरणमाह। वृद्धाविति। यन्मह्यमपराध्यति। द्रुह्यतीत्यर्थः। विराध्यन्तं क्षमेत कः। द्रुह्यन्तमित्यर्थः। राध्यत्योदनः। सिध्यतीत्यर्थः। कृष्णाय राध्यति। दैवं पर्यालोचयतीत्यर्थः। दैवस्य धात्वर्थेऽन्तर्भावाज्जीवत्यादिवदकर्मकत्वम्। रराध। रराधतुः। रराधिथ। 'राधो हिंसायाम्' (सू २५३२) इत्येत्त्वाभ्यासलोपाविह न।

मिति भावः। आशीर्लिङि आह। **सृक्षीष्टेति** ॥ अत्र लघूपधगुणमाशङ्क्य आह। **लिङ्सिचाविति। नाप्यमिति** ॥ 'सृजिदृशोर्झल्यम्' इत्यमपि नास्तीत्यर्थः। अकित्येव तद्विधानादिति भावः। लुङ्याह। **असृष्टेति** ॥ 'झलो झलि' इति सिचो लोपः। 'लिङ्सिचावात्मनेपदेषु' इति सिचः कित्त्वान्न गुणः नाप्यमिति भावः। लिश अल्पीभावे। **लिक्षीष्टेति** ॥ 'लिङ्सिचौ' इति कित्त्वान्न गुणः। **अलिक्षतेति** ॥ 'शल इगुपधात्' इति क्सः। **आ गणान्तादिति** ॥ दिवादिगणसमाप्तिपर्यन्तमित्यर्थः। **राधोऽकर्मकाद्वृद्धावेवेति** ॥ श्यनिति शेषः। राधधातोरकर्मकाद्वृद्धावेवार्थे श्यनिति प्रतीयमानोऽर्थः। एवं सति अकर्मकादिति व्यर्थम्। राधेरर्थान्तरे च श्यन् न स्यात्। इष्यते हि अपराध्यतीत्यादौ द्रोहाद्यर्थेऽपि श्यन्। तत्राह। **एवकारो भिन्नक्रमः इति** ॥ यस्मिन् क्रमे वृद्धावित्यत ऊर्ध्वं एवकारः पठितः ततोऽन्यः क्रमो यस्य स भिन्नक्रम इत्यर्थः। वृद्धावित्यत ऊर्ध्वं पठित एवकारः अन्यत्र निवेशनीय इति यावत्। तदेवं दर्शयति। **राधोऽकर्मकादेव श्यनिति** ॥ एवञ्चार्थान्तरेऽपि श्यन् सिध्यति। शत्रुं हिनस्तीत्यर्थे शत्रुमपराध्नोतीत्यत्र सकर्मकत्वात् न श्यनिति भावः। तर्हि वृद्धावित्यस्य किं प्रयोजनमित्याशङ्क्य अकर्मकक्रिया एवंविधेति प्रदर्शनार्थन्तत् नतु परिसङ्ख्यानार्थमित्याह। **उदाहरणमाह। वृद्धावितीति** ॥ एवञ्च वृद्धिग्रहणमकर्मकक्रियामात्रोपलक्षणमिति भावः। तथाविधार्थान्तराण्युदाहरति। **यन्मह्यमित्यादिना** ॥ 'क्रुधद्रुह' इति सम्प्रदानत्वम्। **कृष्णाय राध्यतीति** ॥ 'राधीक्ष्योर्यस्य विप्रश्नः' इति सम्प्रदानत्वम्। **दैवमिति** ॥ कृष्णस्य किमिदानीं शुभमशुभं वेति पृष्टो दैवज्ञः तस्य शुभाशुभसूचकादित्यादिग्रहस्थितिं ज्योतिश्शास्त्रतः परीक्षते इति यावत्। ननु पर्यालोचने दैवस्य कर्मत्वात्कथमिह अकर्मकेत्यत आह। **दैवस्येति** ॥ ननु 'राधोऽकर्मकाद्वृद्धावेव' इत्यत्र वृद्धिग्रहणस्य उपलक्षणतया हिंसार्थकस्यापि राधेर्दैवादिकत्वात् रराधतुः इत्यादौ 'राधो हिंसायाम्' इति वक्ष्यमाणावेत्त्वाभ्यासलोपौ स्यातामित्यत आह। **राधः इति** ॥ **इह नेति** ॥ रराधतुः इत्यादौ राधेर्हिंसार्थकत्वे 'राधो हिंसायाम्' इति वक्ष्यमाणावेत्त्वाभ्यासलोपौ न स्त इत्यर्थः। कुत इत्यत

हिंसार्थस्य सकर्मकतया दैवादिकत्वायोगात्। राद्धा। रात्स्यति। अयं स्वादिश्चुरादिश्च। व्यध ११८२ ताडने। 'ग्रहिज्या—' (सू २४१२) इति सम्प्रसारणम्। विध्यति। विव्याध। विविधतुः। विव्यधिथ–विव्यद्ध। व्यद्धा। व्यत्स्यति। विध्येत्। विध्यात्। अव्यात्सीत्। पुष ११८३ पुष्टौ। पुष्यति। पुपोष। पुपोषिथ। पोष्टा। पोक्ष्यति। 'पुषादि—' (सू २३४३) इत्यङ्। अपुषत्। शुष ११८४ शोषणे। अशुषत्। तुष ११८५ प्रीतौ। दुष ११८६ वैकृत्ये। श्लिष ११८७ आलिङ्गने। श्लिष्यति। शिश्लेष। श्लेष्टा। श्लेक्ष्यति।

२५१४। श्लिषः—

अस्मात्परस्यानिटश्च्लेः क्सः स्यात्। पुषाद्यङोऽपवादो न तु चिणः। पुरस्तादपवादन्यायात्।

आह। **हिंसार्थस्येति**॥ नोन्मिषत्येवैषा शङ्का। राधेरकर्मकस्यैव दैवादिकत्ववचनात्। हिंसार्थकस्य च राधेः सकर्मकतया दैवादिकत्वाभावादुक्तशङ्काया अनुन्मेषादित्यर्थः। ननु राध्नोति, राधयति, इति कथमित्यत आह। **अयं स्वादिश्चुरादिश्चेति**॥ रराधिथ। क्रादिनियमात् नित्यमिट्। दीर्घाकारवत्त्वेन 'उपदेशेऽत्वतः' इत्यस्याप्रवृत्तेः। अजन्तोऽकारवानित्यत्र च ह्रस्वाकारस्यैव विवक्षितत्वात्। राद्धा। अरात्सीत्। **व्यध ताडने इति**॥ चतुर्थान्तोऽयम्। अनिट्। 'ग्रहिज्या' इति श्यनो ङित्त्वात् 'लिट्यभ्यासस्य' इति यकारस्य सम्प्रसारणे पूर्वरूपे विध्यतीति रूपमित्यर्थः। वकारस्य तु न सम्प्रसारणम्। 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधात्। **विव्याधेति**॥ द्वित्वे कृते अभ्यासस्य 'लिट्यभ्यासस्य' इति सम्प्रसारणमिति भावः। **विविधतुरिति**॥ परत्वात् 'ग्रहिज्या' इति सम्प्रसारणे कृते द्वित्वमिति भावः। भारद्वाजनियमात्थलि वेडित्यत आह। **विव्यधिथ–विव्यद्धेति**॥ 'लिट्यभ्यासस्य' इति सम्प्रसारणम्। अनिट्पक्षे 'झषस्तथोः' इति धः। **अव्यात्सीदिति**॥ हलन्तलक्षणा वृद्धिः। पुषपुष्टौ। अनिट्। **पुपोषिथेति**॥ अजन्ताकारवत्त्वाभावात् क्रादिनियमान्नित्यमिट्। **अपुषदिति**॥ पुषाद्यङ्। ङित्त्वान्न गुणः। शुषधातुरनिट्। **अशुषदिति**॥ पुषाद्यङिति भावः। एवमग्रेऽपि। तुष् दुष् श्लिष् एते अनिटः। लुङि श्लिषः च्लेस्सिजादेशे प्राप्ते। **श्लिषः**॥ च्लेरिति 'शल इगुपधात्' इत्यतः अनिटः क्स इति चानुवर्तते। तदाह। **अस्मात्परस्येत्यादिना**॥ ननु 'शल इगुपधात्' इत्येव क्से सिद्धे किमर्थमिदमित्यत आह। **पुषाद्यङोऽपवादः इति**॥ 'शल इगुपधात्' इति क्सं बाधित्वा परत्वात् पुषाद्यङ् स्यात् तन्निवृत्तये पुनः क्सविधिरित्यर्थः। ननु श्लिष इति क्सः यथा परमपि पुषाद्यङम्बाधते तथा 'चिण्भावकर्मणोः' इति चिणमपि परं बाधेत एवं सति 'उपाश्लेषि कन्या देवदत्तेन' इत्यत्र कर्मणि लुङि 'चिण्भावकर्मणोः' इति च्लेश्चिण् न स्यादित्यत आह। **ननु चिणः इति**॥ 'श्लिषः' इति क्सविधिः 'चिण् भाव-

—आलिङ्गने। (३-१-४६)

श्लिषश्चलेरालिङ्गने एव क्सो नान्यत्र। योगविभागसामर्थ्यात् 'शल इगुपधात्—' (सू २३३६) इत्यस्याप्ययं नियमः 'अश्लिक्षत्कन्यां देवदत्तः'। 'आलिङ्गन एव' इति किम्। समाश्लिषज्जतुकाष्ठम्। आङ्। प्रत्यासक्ताविह श्लिषिः। कर्मण्यनालिङ्गने सिजेव न तु क्सः। एकवचने

कर्मणोः' इति चिण्विधेर्न बाधक इत्यर्थः। कुत इत्यत आह। **पुरस्तादिति**॥ 'शल इगुपधादनिटः क्सः' 'श्लिषः' 'पुषादिद्युताद्यृलृदितः परस्मैपदेषु' 'चिण् भावकर्मणोः' इति सूत्रक्रम इति भावः। आलिङ्गने श्लिषः इति पूर्वसूत्रे यदनुवृत्तन्तत्सर्वमिहानुवर्तते, श्लिष इति च। तथाच आलिङ्गने विद्यमानात् श्लिषेः परस्य च्लेः क्सः स्यादिति लभ्यते। 'श्लिषः' इति पूर्वसूत्रेणैव सिद्धे नियमार्थमिदम्। तदाह। **श्लिषश्चलेरालिङ्गने एव क्सो नान्यत्रेति**॥ नन्वयन्नियमः "अनन्तरस्य" इति न्यायात् श्लिष इति सूत्रप्राप्तस्यैव स्यात्, नतु 'शल इगुपधात्' इत्यस्यापीत्यत आह। **शल इगुपधादित्यस्याप्ययं नियमः इति**॥ कुत इत्यत आह। **योगविभागसामर्थ्यादिति**॥ यदि श्लिष इति प्राप्त एव क्स एव आलिङ्गन एव इति नियम्येत तर्हि योगविभागो व्यर्थः स्यात्। 'श्लिष आलिङ्गने' इत्येकसूत्रत्वे सत्यपि अनालिङ्गने क्सो नेत्यस्यार्थस्य सिद्धत्वात्। अतः 'शल इगुपधात्' इति क्सोऽपि श्लिषेरालिङ्गने एव न त्वनालिङ्गनेऽपि इति नियमो विज्ञायते इत्यर्थः। **अश्लिक्षत् कन्यां देवदत्तः इति**॥ आलिङ्गदित्यर्थः। अत्र पुषाद्यङम्बाधित्वा अनेन क्सः। **समाश्लिषज्जतुकाष्ठमिति**॥ जतु लाक्षा। साच काष्ठलग्नैवोत्पद्यते इति स्थितिः। जतु काष्ठञ्चेति समाहारद्वन्द्वः। (समाश्लिषज्जतुकाष्ठञ्च) इत्येव भाष्यम्। अत्र श्लिषेरालिङ्गनार्थकत्वाभावान्न क्सः। किन्तु पुषाद्यङेवेति भावः। नन्वजादित्वाभावेन आडागमस्यासम्भवात् समाश्लिषदित्ययुक्तमित्यत आह। **आङ्इति**॥ समाश्लिषत् इत्यत्र श्लिषेः प्राक् आङ्उपसर्ग एव, न त्वाडागम इति भ्रमितव्यमित्यर्थः। नन्वालिङ्गनं समाश्लेषणं तथाच समाश्लिषज्जतुकाष्ठम् इत्यत्रापि श्लिषेरालिङ्गनार्थकत्वात् क्सो दुर्वार इत्यत आह। **प्रत्यासक्ताविहेति**॥ इह समाश्लिषज्जतुकाष्ठम् इत्यत्र। श्लिषिः प्रत्यासक्तौ संयोगे वर्तते नतु बाह्वादिना संवलनात्मकसम्बन्धविशेषरूपे आलिङ्गने इत्यर्थः। नन्वालिङ्गने एव श्लिषश्चलेः क्सः न त्वनालिङ्गने इति नियमात् अनालिङ्गने 'शल इगुपधात्' इत्यपि क्सो न भवतीत्युक्तमयुक्तम्। समाश्लिषज्जतुकाष्ठमित्यत्रानालिङ्गने 'शल इगुपधात्' इति क्सम्बाधित्वा परत्वात् पुषाद्यङ एव प्राप्त्या क्सस्याप्रसक्तेरित्यत आह। **कर्मणीति**॥ अनालिङ्गनवृत्तेः श्लिषधातोः कर्मणि लुङि च्लेस्सिजेव भवति, न तु पुषाद्यङ्, तस्य परस्मैपदविषयत्वात्। कर्मणि लुङश्च 'भावकर्मणोः' इत्यात्मनेपदनियमात्। तस्य च सिचः 'शल इगुपधात्' इति प्राप्तः क्सः उक्तेन नियमेन अनालिङ्गनेऽपि वार्यते इति युक्तमित्यर्थः। यदुक्तं आलिङ्गने श्लिषश्चलेः क्सः पुषाद्यङ एवापवादः नतु चिणः इति। तस्य

चिण् । अश्लेषि । अश्लिक्षाताम् । अश्विक्षत । अश्लिष्टाः । अश्लिड्ढ्वम् । शक ११८८ विभाषितोऽमर्षणे । विभाषित इत्युभयपदीत्यर्थः । शक्यति–शक्यते वा हरिं द्रष्टुं भक्तः । शशाक । शेकिथ–शशक्थ । शेके । शक्ता । शक्ष्यति–शक्ष्यते । अशकत्–अशक्त । सेट्कोऽयमित्येके । तन्मतेनानिट्कारिकासु लृदित्पठितः । शकिता । शकिष्यति । ष्विदा ११८९ गात्रप्रक्षरणे । घर्मस्विताविति्यर्थः । अयं ञीदिति न्यासकारादयः । नेति हरदत्तादयः । स्विद्यति । सिष्वेद । सिष्वेदिथ । स्वेत्ता । अस्विदत् । क्रुध ११९० क्रोधे । क्रोद्धा । क्रोत्स्यति । क्षुध ११९१ बुभुक्षायां । क्षोद्धा । कथं क्षुधित इति । सम्पदादिक्किबन्तात्तारकादित्वादितजिति माधवः । वस्तुतस्तु 'वसतिक्षुधोः—'

प्रयोजनमाह । **एकवचने चिणिति** ॥ तदेवोदाहृत्य दर्शयति । **अश्लेषीति** ॥ आलिङ्गिता कन्या देवदत्तेनेत्यर्थः । श्लिषेरालिङ्गनार्थकात् कर्मणि लुङि प्रथमैकवचने तशब्दे परे 'चिण् भावकर्मणोः' इति च्लेश्चिणि कृते 'चिणो लुक्' इति तशब्दस्य लुक् । अत्र श्लिष इति क्सस्य पुषादिद्युताद्यृदित्परस्मैपदेष्वात्मनेपदेषु च सिचि कृते

(सू ३०४६) इतीट् वक्ष्यते। शुध ११९२ शौचे। शुध्यति। शुशोध। शोद्धा। षिधु ११९३ संराद्धौ। ऊदित्पाठः प्रामादिकः। सिध्यति। सेद्धा। सेत्स्यति। असिधत्। रध ११९४ हिंसासंराद्धयोः। संराद्धिर्निष्पत्तिः। रध्यति। 'रधिजभोरचि' (सू २३०२) इति नुम्। ररन्ध। ररन्धतुः।

२५१५। रधादिभ्यश्च। (७-२-४५)

'रध्' 'नश्' 'तृप्' 'दृप्' 'द्रुह्' 'मुह्' 'ष्णुह्' 'ष्णिह्' एभ्यो वलाद्यार्धधातुकस्य वेट् स्यात्। ररन्धिथ—रद्ध। ररन्धिव—रेध्व।

२५१६। नेट्यलिटि रधेः। (७-१-६२)

लिङ्वर्जे इटि रधेर्नुम् न स्यात्। रधिता—रद्धा। रधिष्यति—रत्स्यति। अङि तु नुम्। 'अनिदिताम्—' (सू ४१५) इति नलोपः। अरधत्। णश ११९५ अदर्शने। नश्यति। ननाश। नेशतुः। नेशिथ।

२५१७। मस्जिनशोर्झलि। (७-१-६०)

नुम् स्यात्। ननंष्ठ। नेशिव—नेश्व। नेशिम—नेश्म। नशिता—नंष्टा। नशिष्यति—नङ्क्ष्यति। नश्येत्। नश्यात्। अनशत्। प्रणश्यति।

२५१८। नशेः षान्तस्य। (८-४-३६)

वसतिक्षुधोः इति ॥ वसेः क्षुधेश्च क्तानिष्ठयोरिडागमः स्यादिति तदर्थः। **वक्ष्यते इति** ॥ कृत्स्विति शेषः। **षिधु संराद्धाविति** ॥ निष्पत्तावित्यर्थः। **प्रामादिकः इति** ॥ साधवादिसम्मतत्वादिति भावः। **रध हिंसेति** ॥ सेट्। चतुर्थान्तोऽयम्। **ररन्धतुरिति** ॥ एत्त्वाभ्यासलोपौ बाधित्वा परत्वान्नुमि संयोगात्परत्वेन अकित्त्वान्नलोपो नेति भावः। **रधादिभ्यश्च** ॥ 'आर्धधातुकस्येड्वलादेः' इत्यनुवर्तते। 'स्वरतिसूति' इत्यतो वेति इत्यभिप्रेत्य शेषं पूरयति। **वलाद्यार्धधातुकस्य वेडिति** ॥ 'आर्धधातुकस्य' इति नित्ये प्राप्ते विकल्पोऽयम्। लुटि तासि इटि 'रधिजभोरचि' इति नुमि प्राप्ते। **नेट्यलिटि रधेः** ॥ 'इदितो नुम् धातोः' इत्यतो नुमित्यनुवर्तते। तदाह। **लिङ्वर्जे इटीति। अङि त्विति** ॥ पुषाद्यङि कृते सतीत्यर्थः। **अरधदिति** ॥ "मो अहं द्विषतेऽरधम्"। **णश अदर्शने इति** ॥ णोपदेशोऽयं सेट्। 'रधादिभ्यश्च' इति वेट्। तत्र इट्पक्षे आह। **नेशिथेति** ॥ 'थलि च सेटि' इत्येत्त्वाभ्यासलोपाविति भावः। इडभावपक्षे ननश्थ इति स्थिते। **मस्जिनशोर्झलि** ॥ **नुम् स्यादिति** ॥ 'इदितो नुम्' इत्यतस्तदनुवृत्तेरिति भावः। **ननंष्ठेति** ॥ ब्रश्चादिषत्वम्। ष्टुत्वम्। **प्रणश्यतीति** ॥ 'उपसर्गादसमासे' इति णत्वम्। **नशेः षान्तस्य** ॥ 'रषाभ्यां नः' इत्यतो ण

णत्वं न स्यात्। प्रनंष्टा। अन्तग्रहणं भूतपूर्वप्रतिपत्त्यर्थम्। प्रनङ्क्ष्यति–नशिष्यति। तृप ११९६ प्रीणने। प्रीणनं तृप्तिस्तर्पणं च 'नाग्निस्तृप्यति काष्ठानाम्' 'पितृनतार्प्सीत्' इति भट्टिः। इत्युभयत्र दर्शनात्। ततर्पिथ–ततर्थ–तत्रप्थ। तर्पिता–तर्प्ता–तप्ता। 'कृशमृशस्पृश—' इति सिज्वा। अतर्पीत्–अतार्प्सीत्–अत्राप्सीत्–अतृपत्। दृप ११९७ हर्षमोहनयोः। मोहनं गर्वः। दृप्यतीत्यादि।

'रधादित्वादिमौ वेट्कावमर्थमनुदात्तता'

द्रुह ११९८ जिघांसायाम्। 'वा द्रुहमुह' (सू ३२७) इति वा घः। पक्षे ढः। दुद्रोहिथ–दुद्रोग्ध–दुद्रोढ। द्रोहिता–द्रोग्धा–द्रोढा। द्रोहिष्यति–ध्रोक्ष्यति। ढत्वधत्वयोस्तुल्यं रूपम्। अद्रुहत्। मुह ११९९ वैचित्त्ये। वैचित्त्यमविवेकः। मुह्यति। मुमोहिथ–मुमोग्ध–मुमोढ। मोहिता–मोग्धा–मोढा। मोहिष्यति–मोक्ष्यति। अमुहत्। ष्णुह १२०० उद्गिरणे। स्नुह्यति। सुष्णोह।

इति 'न भाभूपू' इत्यतः नेति चानुवर्तते इत्यभिप्रेत्य शेषमपूरयति। **णत्वं न स्यादिति॥** षान्तस्येति किम्। प्रणश्यति। **भूतपूर्वेति॥** पूर्वं पकारस्य सत इदानीमादेशवशेन षान्तत्वाभावेऽपि णत्वनिषेधप्राप्त्यर्थमन्तग्रहणमित्यर्थः। **प्रनङ्क्ष्यतीति॥** अत्र पस्य कत्वे कृतेऽपि भूतपूर्वगत्या षान्तत्वान्न णत्वमिति भावः। **तृप प्रीणने। तृप्तिस्तर्पणञ्चेति॥** आद्ये अकर्मकः। द्वितीये सकर्मकः। रधादित्वाद्वेडिति मत्वा आह। **ततर्पिथ–ततर्थेति–तत्रप्थेति च॥** 'अनुदात्तस्य चर्दुपधस्य' इत्यामिति भावः। ततृपिव–तत्रप्व। **सिज्वेति॥** पक्षे पुषाद्यङिति भावः। रधादित्वादिड्विकल्पः। तत्र सिचि इट्पक्षे आह। **अतर्पीदिति॥** इडभावपक्षे आह। **अताप्सीदिति॥** हलन्तलक्षणा वृद्धिरिति भावः। 'अनुदात्तस्य च' इत्यम्पक्षे आह। **अत्राप्सीदिति॥** पुषाद्यङ्पक्षे आह। **अतृपदिति॥** ङित्त्वान्न गुण इति भावः। **दृप हर्षेति॥** तृपधातुवत्। ननु रधादित्वादेव वेट्कत्वादनिट्कारिकासु तृप्यतिदृप्यत्योः पाठो व्यर्थ इत्यत आह। **'रधादित्वादिमौ वेट्कावमर्थमनुदात्तता' इति॥** द्रुह जिघांसायाम्। अनुदात्तत्वाभावेऽपि रधादित्वाद्वेट्। तत्र इडभावे आह। **वा द्रुहमुह इतीति। ध्रोक्ष्यतीति॥** 'वा द्रुह' इति घत्वपक्षे दकारस्य भषि घस्य चर्त्वे सस्य षत्वे रूपम्। ढत्वपक्षेऽपि 'षढोः' इति कत्वे एतदेव रूपम्। तदाह। **ढत्वधत्वयोस्तुल्यं रूपमिति। अद्रुहदिति॥** पुषादित्वादङिति भावः। मुहधातुरनुदात्तत्वाभावेऽपि रधादित्वात् वेट्। **मुमोहिथेति॥** इट्पक्षे रूपम्। अनिट्पक्षे तु 'वा द्रुहमुह' इति घत्वं मत्वा आह। **मुमोग्धेति॥** ढत्वपक्षे आह। **मुमोढेति। मोक्ष्यतीति॥** घत्वढत्वयोस्तुल्यं रूपम्। ष्णुह णिहेति षोपदेशौ। तदाह। **सुष्णोह। सिष्णेहेति॥** थलादावनिट्पक्षे 'वा द्रुह'

सुष्णोहिथ–सूष्णोग्ध–सुष्णोढ । सुष्णुहिव–सुष्णुह्व । स्नोहिता–स्नोग्धा–स्नोढा । स्नोहिष्यति–स्नोक्ष्यति । अस्नुहत् । ष्णिह १२०१ प्रीतौ । स्निह्यति । स्निष्णेह । वृत् । रधादयः समाप्ताः । पुषादयस्तु आ गणान्तादिति सिद्धान्तः । शमु १२०२ उपशमे ।

२५१९ । शमामष्टानां दीर्घः श्यनि । (७-३-७४)

शमादीनामित्यर्थः । प्रणिशाम्यति । शेमतुः । शेमिथ । शमिता । अशमत् । तमु १२०३ काङ्क्षायाम् । ताम्यति । तमिता । अतमत् । दमु १२०४ उपशमे । उपशम इति ण्यन्तस्य । तेन सकर्मकोऽयम् । न तु शमिवदकर्मकः । अदमत् । श्रमु १२०५ तपसि खेदे च । श्राम्यति । अश्रमत् । भ्रमु १२०६ अनवस्थाने । 'वा भ्राश—' (सू २३२१) इति श्यन्वा । तत्र कृते 'शमामष्टानाम्—' (२५१९) इति दीर्घः । भ्राम्यति । लुङ्यङ् । अभ्रमत् । शेषं भ्वादिवत् । क्षमू १२०७ सहने । क्षाम्यति । चक्षमिथ–चक्षंथ । चक्षमिव–चक्षण्व । चक्षमिम–चक्षण्म । क्षमिता–क्षन्ता । अयमषित् । भ्वादिस्तु षित् ।

'अषितः क्षाम्यतेः क्षान्तिः क्षमूषः क्षमतेः क्षमा' ।

इति घत्वविकल्पः । पक्षे ढः । इति रधादयः । **आ गणान्तादिति** ॥ दिवादिगणसमाप्तिपर्यन्ताः पुषादय इत्यर्थः । **सिद्धान्तः इति** ॥ माधवादिभिस्तथाऽभ्युपगमादिति भावः । **उपशमे इति** ॥ उपशमो नाशः इन्द्रियनिग्रहश्च । **शमामष्टानाम्** ॥ स्पष्टम् । बहुवचनात् शमादिग्रहणम् । तदाह । **शमादीनामिति** ॥ "शमस्तमुर्दमुरथ श्रमुर्भ्रमुरपि क्षमुः । क्लमुर्मदी चेत्येतेऽष्टौ शमादयः" इति स्थितिः । **दमु उपशमे इति** ॥ ननु शमु दमु उपशमे इत्येव पठितुं युक्तमित्यत आह । **उपशम इति ण्यन्तस्येति** ॥ शमधातोर्हेतुमण्ण्यन्तात् घञि 'नोदात्तोपदेशस्य' इति वृद्ध्यभाव इत्यर्थः । ततः किमित्यत आह । **तेनेति** ॥ ततश्च दाम्यतीत्यस्य शमयतीत्यर्थः । **शेषं भ्वादिवदिति** ॥ आर्धधातुकेषु शप्पक्षे च भ्वादिवदित्यर्थः । क्षमू सहने । ऊदित्त्वात् थलि वमादौ च इड्विकल्पः । तदाह । **चक्षमिथेत्यादि** ॥ षित्त्वाषित्त्वयोः फलभेदं श्लोकार्धेन सङ्गृह्णाति । **अषितः इति** ॥ अषितः क्षाम्यतेः श्यन्विकरणपठितस्य क्षमधातोः क्तिनि क्षान्तिः इति रूपम् । अषित्त्वात् 'षिद्भिदादिभ्यः' इत्यङ् न । क्षमूषस्तु भौवादिकात् षितः आत्मनेपदे शपि क्षमते इति रूपम् । क्तिनं बाधित्वा षित्त्वादङि क्षमेति रूपमेवेत्यर्थः । क्लमु ग्लानौ । नन्वस्य शमादिगणात् बहिरेव दिवादिगणे पाठोऽस्तु । नच 'शमामष्टानाम्' इति दीर्घार्थं शमादिगणे अस्य पाठ इति वाच्यम् । 'ष्ठिवुक्लम्वाचमां शिति' इत्येव शपि परे इव श्यनि परेऽपि दीर्घसिद्धेः । नच 'ष्ठिवुक्लम्वाचमां शिति' इत्यत्रैव क्लमुग्रहणं त्यज्यतामिति वाच्यम् । शपि

क्रमु १२०८ ग्लानौ । क्राम्यति--क्रामति । शपीव श्यन्यपि 'ष्ठिवुक्रमु—' (सू २३२०) इत्येव दीर्घे सिद्धे शमादिपाठो घिनुणर्थः । अङ् । अक्रमत् । मदी १२०९ हर्षे । माद्यति । अमदत् । शमादयोऽष्टौ गताः ।

असु १२१० क्षेपणे । अस्यति । आस । असिता ।

२५२० । अस्यतेस्थुक् । (७-४-१७)

अङि परे । आस्थत् । अस्य पुषादित्वादङि सिद्धे 'अस्यतिवक्ति--' (सू २४३८) इति वचनं तङर्थम् । तङ् तु, 'उपसर्गादस्यत्यूह्योः' इति वक्ष्यते । पर्यास्थत । यसु १२११ प्रयत्ने ।

२५२१ । यसोऽनुपसर्गात् । (३-१-७१)

२५२२ । संयसश्च । (३-१-७२)

श्यन्वा स्यात् । यस्यति–यसति । संयस्यति--संयसति । 'अनुपसर्गात्' किम् । प्रयस्यति । जसु १२१२ मोक्षणे । जस्यति । तसु १२१३ उपक्षये । दसु १२१४ च । तस्यति । अतसत् । दस्यति । अदसत् । वसु १२१५ स्तम्भे । वस्यति । ववास । ववसतुः । 'न शसदद—' (सू २२६३) इति निषेधः । बशादिरयमिति मते तु, वेसतुः । वेसुः । व्युष १२१६ विभागे ।

दीर्घान्तस्यावश्यकत्वादित्याशङ्क्य परिहरति । **शपीव श्यन्यपीत्यादि घिनुणर्थः इत्यन्तम्** ॥ 'शमित्यष्टाभ्यो घिनुण्' इति विधानादिति भावः । **शमादयः इति** ॥ 'शमु उपशमे' इत्यारभ्य 'मदी हर्षे' इत्यन्ता अष्टौ शमादयो वृत्ता इत्यर्थः । असु क्षेपणे । **अस्यतेस्थुक्** ॥ शेषं पूरयति । **अङि परे इति** ॥ 'ऋदृशोऽङि' इत्यतस्तदनुवृत्तेरिति भावः । थुकि ककार इत् उकार उच्चारणार्थः कित्त्वादसधातोरन्त्यावयवः । ननु पुषादित्वादेवास्यतेश्च्लेरङि सिद्धे 'अस्यतिवक्तिख्यातिभ्योऽङ्' इत्यत्र अस्यतिग्रहणं व्यर्थमित्याशङ्क्य निराकरोति । **अस्य पुषादित्वादिति** ॥ **तङर्थमिति** ॥ पर्यास्थतेत्यत्र आत्मनेपदे अङर्थमस्यतिवक्तीत्यत्र अस्यतिग्रहणमित्यर्थः । पुषाद्यङः परस्मैपदमात्रविषयतया आत्मनेपदे अप्रसक्तेरिति भावः । नन्वस्यतेः केवलपरस्मैपदित्वादात्मनेपदं दुर्लभमित्यत आह । **तङ् तु उपसर्गादिति** ॥ **वक्ष्यते इति** ॥ पदव्यवस्थायामिति शेषः । यसु प्रयत्ने । **यसोऽनुपसर्गात्। संयसश्च** ॥ सूत्रद्वयमिदम् । **श्यन् वा स्यादिति** ॥ शेषपूरणम् । 'दिवादिभ्यः श्यन्' इत्यतः 'वा भ्राश' इत्यतश्च तदनुवृत्तेरिति भावः । अनुपसर्गाद्यसः श्यन् वा स्यादिति प्रथमसूत्रार्थः । सोपसर्गात्तु नित्य एव श्यन् अनुपसर्गादिति पर्युदासात् । सम्पूर्वात् यसेर्नित्यमेव

अयं दाहे पठितः। अर्थभेदेन त्वङर्थं पुनः पठ्यते। अव्युषत्। ओष्ठ्यादिर्दन्त्यान्त्योऽयम् 'व्युसति' इत्यन्ये। अयकारः 'बुस' इत्यपरे। प्लुष १२१७ दाहे। अप्लुषत्। पूर्वत्र पाठः सिजर्थ इत्याहुः। तद्ग्रहादिपाठेन गतार्थमिति सुवचम्। विस १२१८ प्रेरणे। विस्यति। अविसत्। कुस १२१९ संश्लेषणे। अकुसत्। वुस १२२० उत्सर्गे। मुस १२२१ खण्डने। मसी १२२२ परिणामे। परिणामो विकारः। 'समी' इत्येके। लुठ १२२३ विलोडने। उच १२२४ समवाये। उच्यति। उवोच। ऊचतुः। मा भवानुचत्। भृशु १२२५ भ्रंशु १२२६ अधःपतने। बभर्श। अभृशत्। अनिदिताम्--' (सू ४८५) इति नलोपः। भ्रश्यति। अभ्रशत्। वृश १२२७ वरणे। वृश्यति। अवृशत्। कृश १२२८ तनूकरणे। कृश्यति। ञि तृषा १२२९ पिपासायाम्। हृष १२३० तुष्टौ। श्यन्नङौ भौवादिकाद्विशेषः। रुष १२३१ रिष १२३२ हिंसायाम्। 'तीषसह--' (सू २३४०) इति वेट्। रोषिता--रोष्टा। रेषिता--रेष्टा। डिप १२३३ क्षेपे। कुप १२३४ क्रोधे। गुप १२३५ व्याकुलत्वे। युप १२३६ रुप १२३७ लुप १२३८ विमोहने। युप्यति। रुप्यति। लु-

---

श्यनः प्राप्तौ द्वितीयसूत्रम्। व्युष विभागे। **अयमिति** ॥ दिवादिगण एव पुषादिभ्यः प्रागयं धातुः पठित इत्यर्थः। पौनरुक्त्यमाशङ्क्य आह। **अर्थभेदेन त्वङर्थं पुनः पठ्यते इति** ॥ विभागात्मके अर्थविशेषे एव पुषाद्यङर्थमिह पुनः पाठ इत्यर्थः। **अव्युषदिति** ॥ 'व्युष दाहे' इति पूर्वं पठितस्य तु सिजेव। अव्योषीत्। **ओष्ठ्यादिरिति** ॥ दन्त्योष्ठ्यादिर्दन्त्योष्मान्तोऽयमिति केचिन्मन्यन्ते इत्यर्थः। **अयकारः इति** ॥ दन्तोष्ठ्यादिर्दन्त्योष्मान्तो यो धातुरुक्तः स एवायं यकाररहित इत्यन्ये मन्यन्ते इत्यर्थः। अयकारमिति पाठे क्रियाविशेषणम्। प्लुष दाहे। ननु दिवादिगणे परस्मैपदिषु पुषादिभ्यः प्राक् अस्य पाठः क्वचिद्दृश्यते। तत्र पौनरुक्त्यशङ्कां परिहरति। **पूर्वत्र पाठस्सिजर्थः इति** ॥ पुषादावेव पाठे सति अडेव श्रूयेत नतु सिच्। पुषादेः प्रागपि पाठे तु तस्य अडभावात् सिच् श्रूयेत। तथाच सिचः कदा चित् श्रवणार्थः पूर्वं पाठ इत्यर्थः। आहुरित्यस्वरसोद्भावनम्। तद्ग्रहणं दर्शयति। **तद्ग्रहादीति** ॥ तत् दिवादिगणे पुषादिभ्यः पूर्वमस्य पठनं भ्वादिपाठेनैव सम्पन्नप्रयोजकमिति सुष्ठु वक्तुं शक्यमित्यर्थः। एवञ्च भ्वादिपाठात् शब्विकरणः लुङि सिचः श्रवणञ्च सिद्ध्यति। पुषादौ पाठात्तु श्यन्विकरणः अङ् च सिध्यति। अतः दिवादिगणे पुषादिभ्यः प्रागस्य पाठो व्यर्थ एवेति भावः। एतदेवाभिप्रेत्य मूले दिवादिगणे पुषादिगणात् प्राक् प्लुष दाहे इति न पठितमिति बोध्यम्। **मसी परिणामे इति** ॥ ईदित्त्वं 'श्वीदितः' इत्येतदर्थम्। मस्यति। **समी इत्येके इति** ॥ सम्यति। भृशु भ्रंशु अधःपतने। द्वितीयधातोराह। **अनिदितामिति** ॥ **युप रुप लुप विमोहने इति** ॥ धातुवृत्त्यादिविरोधा-

प्यति । लोपिता । लुप्यतिः सेट्कः । अनिट्कारिकासु लिपिसाहचर्यात्तौदादिकस्यैव ग्रहणात् । लुभ १२३९ गार्ध्ये । गार्ध्यमाकाङ्क्षा । 'तीषसह--' (सू २३४०) इति वेट् । लोभिता--लोब्धा । लोभिष्यति । लुभ्येत् । लुभ्यात् । अलुभत् । भ्वादेरवृत्कृतत्वाल्लोभतीत्यपीत्याहुः । क्षुभ १२४० सञ्चलने । क्षुभ्यति । णभ १२४१ तुभ २२४२ हिंसायाम् । क्षुभिनभितुभयो द्युतादौ क्र्यादौ च पठ्यन्ते । तेषां द्युतादित्वाद्ङ् सिद्धः । क्र्यादित्वात्पक्षे सिज्भवत्येव । इह पाठस्तु श्यन्नर्थः । क्ष्विदू १२४३ आर्द्रीभावे । क्ष्विद्यति । चिक्ष्वेदिथ--चिक्ष्वेत्थ । चिक्ष्विदिव--चिक्ष्विद्व । चिक्ष्विदिम--चिक्ष्विद्म । क्ष्वेदिता--क्ष्वेत्ता । ञि मिदा १२४४ स्नेहने । 'मिदेर्गुणः' (सू २३४६) । मेद्यति । अमिदत् । द्युतादिपाठादेव अमिदत् अमेदिष्टेति सिद्धे इह पाठः अमेदीदिति मा भूदिति । द्युतादिभ्यो बहिरेवात्मनेपदिषु पाठस्तूचितः । ञि क्ष्विदा १२४५ स्नेहनमोचनयोः । ऋधु १२४६ वृद्धौ । आनर्ध । आर्धत् । गृधु १२४७ अभिकाङ्क्षायाम् । अगृधत् । वृत् । पुषादयो दिवादयश्च वृत्ताः । केचित्तु पुषादिसमाप्त्यर्थमेव वृत्करणम् । दिवादिस्तु भ्वादिवदाकृतिगणः । तेन क्षीयते मृग्यतीत्यादि सिद्धिरित्याहुः ।

इति तिङन्तदिवादिप्रकरणम् ।

दुदित्पाठो लेखकप्रमादादायातः । **इह पाठस्त्विति** ॥ क्षुभिनभितुभीनां इह दिवादिगणे पाठस्य श्यनेव प्रयोजनमित्यर्थः । वस्तुतस्तु पुषादेः प्रागेव एषान्त्रयाणम्पाठो युक्तमिति भावः । ञि मिदा स्नेहने । **अमिददिति** ॥ ननु भ्वाद्यन्तर्गणे द्युतादौ 'ञि मिदा स्नेहने' इत्यात्मनेपदिषु पठितो लुङि तु 'द्युद्भ्यो लुङि' इत्यत्र परस्मैपदविकल्पः उक्तः । द्युताद्यङ् तु परस्मैपद एव न तु तङि । एवञ्च द्युतादिपाठादेव परस्मैपदपक्षे अङि अमिददिति तङि तु अङभावे अमेदिष्टेति सिद्धम् । तथाच पुषादावस्य पाठो व्यर्थः । तद्वहिर्दिवादौ पाठादेव श्यन्सिद्धेरित्याशङ्क्यते । **द्युतादिपाठादेवेत्यादि सिद्धे इत्यन्तेन** ॥ तामिमां शङ्काम्परिहरति । **इह पाठः अमेदीदिति मा भूदितीति** ॥ पुषादावस्य पाठः अमेदीदिति व्यावृत्त्यर्थ इत्यर्थः । पुषादिभ्यः प्रागेव दिवादावस्य पाठे तु तस्माल्लुङि अङसम्भवादमेदीदिति स्यादिति भावः । नन्वेवं सति भ्वाद्यन्तर्गणे द्युतादावस्य पाठो व्यर्थः । द्युतादिभ्यो बहिरेवात्मनेपदिषु पठ्यताम् । एवञ्च अमेदिष्टेति सिद्धम् । इह पुषादौ पाठात्तु अमिददिति सिद्धमित्याशङ्क्येष्टापत्त्या परिहरति । **द्युतादिभ्यो बहिरेवात्मनेपदेषु पाठस्तूचितः इति** ॥ सूचितः इति पाठे तु सुतरामुचित इति व्याख्येयम् । क्ष्विदेत्यादि व्यक्तम् ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायां श्यन्विकरणं समाप्तम् ।

॥ अथ तिङन्तस्वादिप्रकरणम् ॥

पुञ् १२४८ अभिषवे । अभिषवः स्नपनं पीडनं स्नानं सुरासन्धानं च । तत्र स्नाने अकर्मकः ।

२५२३ । स्वादिभ्यः श्नुः । (३-१-७३)

सुनोति । सुनुतः । 'हुश्नुवोः—' (सू २३८७) इति यण् । सुन्वन्ति । सुन्वः–सुनुवः । सुन्वहे–सुनुवहे । सुषाव । सुषुवे । सोता । सुनु । सुनवानि । सुनवै । सुनुयात् । सूयात् । 'स्तुसुधूञ्भ्यः—' (सू २३८५) इतीट् ।

अथ श्नुविकरणा धातवो निरूप्यन्ते । षुञ्धातुष्षोपदेशः । अनिट् । इत आरभ्य ञित्त्वादुभयपदिनः । **सुरासन्धानमिति** ॥ सुरोत्पादनमित्यर्थः । **स्वादिभ्यः श्नुः** ॥ कर्त्रर्थे सार्वधातुके स्वादिभ्यः श्नुः स्यादित्यर्थः । शपोऽपवादः । **सुनोतीति** ॥ लटस्तिपि श्नुः शकार इत् शित्त्वेन सार्वधातुकत्वात् 'सार्वधातुकमपित्' इति ङित्त्वात्तस्मिन् परे धातोर्न गुणः । श्नोस्तु तिपमाश्रित्य गुण इति भावः । **सुनुतः इति** ॥ तसो ङित्त्वात् श्नोर्न गुण इति भावः । सुनु अन्ति इति स्थिते 'अचि श्नुधातु' इति उवङमाशङ्क्य आह । **हुश्नुवो-रिति** ॥ सुनोषि । सुनुथः । सुनुथ । सुनोमि । वसि मसि च 'लोपश्चास्यान्यतरस्यां म्वोः' इत्युकारलोपविकल्पं मत्वा आह । **सुन्वः–सुनुवः इति** ॥ सुन्मः–सुनुमः इत्यपि ज्ञेयम् । अथ लटस्तङि सुनुते । सुन्वाते । सुन्वते । सुनुषे । सुन्वाथे । सुनुध्वे । सुन्वे । इति सिद्धवत्कृत्य आह । **सुन्वहे–सुनुवहे इति** ॥ 'लोपश्चास्य' इत्युकारलोपविकल्प इति भावः । सुन्महे–सुनुमहे इत्यपि ज्ञेयम् । **सुषावेति** ॥ सुषुवतुः । सुषुवुः । सुषविथ–सुषोथ । सुषुवथुः । सुषुव । सुषाव–सुष्व । सुषुविव । सुषुविम । अथ लिटस्तङ्याह । **सुषुवे इति** ॥ सुषुवाते । सुषुविरे । सुषुविषे । सुषुवाथे । सुषुविध्वे । सुषुवे । सुषुविवहे । सुषुविमहे । **सोतेति** ॥ अनिट्त्वसूचनमिदम् । सोष्यति । सोष्यते । सुनोतु–सुनुतात् । सुनुताम् । सुन्वन्तु । इति सिद्धवत्कृत्य आह । **सुनु इति** ॥ 'उतश्च प्रत्ययात्' इति हेर्लुक् । सुनुतात् । सुनुतम् । सुनुत । **सुनवानीति** ॥ 'हुश्नुवोः' इति यणम्बाधित्वा परत्वाद्गुणः । आटः पित्त्वेन अङित्त्वादिति भावः । सुनवाव । सुनवाम । लोटस्तङि सुनुताम् । सुन्वाताम् । सुन्वताम् । सुनुष्व । सुन्वाथाम् । सुनुध्वम् । इति सिद्धवत्कृत्य आह । **सुनवै इति** ॥ 'हुश्नुवोः' इति यणम्बाधित्वा परत्वात् गुणः । आटः पित्त्वेन ङित्त्वाभावादिति भावः । सुनवावहै । सुनवामहै । असुनोत् । असुनुताम् । असुन्वन् । असुनोः । असुनवम् । असुनुव । असुन्व । असुनुत । असुन्वाताम् । असुन्वत । इत्याद्यूह्यम् । विधिलिङ्याह । **सुनुयादिति** ॥ यासुटो ङित्त्वात् श्नोर्न गुण इति

असावीत्। असोष्ट । अभिषुणोति । अभ्यषुणोत् । अभिसुषाव ।

२५२४ । सुनोतेः स्यसनोः । (८-३-११७)

स्ये सनि च परे सुञः षो न स्यात् । विसोष्यति । षिञ् १२४९ बन्धने । सिनोति । विसिनोति । सिषाय । सिष्ये । सेता । शिञ् १२५० निशाने । तालव्यादिः । शेता । डु मिञ् १२५१ प्रक्षेपणे । 'मीनातिमिनोति—' (सू २५०८) इत्यात्त्वम् । ममौ । ममिथ--ममाथ । मिम्ये ।

भावः । **सूयादिति** ॥ आशीर्लिङि 'अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः । सोषीष्ट । लुङि परस्मैपदे सिचः इण्निषेधे प्राप्ते आह । **स्तुसुधूञ्भ्यः इति इडिति** ॥ असाविष्टामित्यादि । लुङस्तङ्याह । **असोष्टेति** ॥ असोषातामित्यादि । असोष्यत् । असोष्यत । 'उपसर्गात् सुनोति' इति षत्वम्मत्वा आह । **अभिषुणोतीति** ॥ षात्परत्वाण्णत्वम् । **अभ्यषुणोदिति** ॥ 'प्राक् सितादड्व्यवायेऽपि' इति षत्वम् । **अभिसुषावेति** ॥ 'स्थादिष्वभ्यासेन' इत्युत्तरखण्डस्य षः । **सुनोतेः स्यसनोः** ॥ 'अपदान्तस्य मूर्द्धन्यः' इत्यधिकृतम् । 'न रपर' इत्यतो नेत्यनुवर्तते । तदाह । **षो न स्यादिति** ॥ स्ये उदाहरति । **विसोष्यतीति** ॥ अत्र 'उपसर्गात् सुनोति' इति प्राप्तः षो न भवति । सनि तु अभिसुसूषतीत्युदाहरणम् । षुञः सनि द्वित्वे अभिसुसुस इति सनन्तात् क्विप अतो लोपे अभिसुसुस् इत्यस्मात् सोर्हल्ङ्यादिलोपे सस्य रुत्वे 'वोरुपधायाः' इति दीर्घे रेफस्य विसर्गः । सुसूषते इति तु नोदाहरणम् । 'स्तौतिण्योरेव षण्यभ्यासात्' इति नियमादेव षत्वाभावसिद्धेरित्यलम् । **षिञ् बन्धने इति** ॥ षोपदेशः अनिट् च । षुञ इव रूपाणि । **विसिनोतीति** ॥ 'सात्पदाद्योः' इति षत्वनिषेधः । 'उपसर्गात्सुनोति' इति तु न षः । सुनोत्यादिष्वनन्तर्भावादिति भावः । **सिषायेति** ॥ णलि वृद्धौ आयादेशः । अतुसादौ 'एरनेकाचः' इति यण् । सिष्यतुरित्यादि । लिटस्तङ्याह । **सिष्ये इति** ॥ सिषि ए इति स्थिते 'एरनेकाचः' इति यणिति भावः । सिष्याते । सिष्यिरे । इत्यादि । असैषीत् । **शिञ् निशाने इति** ॥ षिञ्वत् । **डु मिञ् प्रक्षेपणे इति** ॥ मिनोति । उपदेशे एजन्तत्वाभावादात्त्वे अप्राप्ते आह । **मीनातिमिनोतीत्यात्त्वमिति** ॥ एञ्विषये अशितीति शेषः । **ममाविति** ॥ आत्त्वे कृते णलः औत्वमिति भावः । अतुसादावेञ्विषयत्वाभावान्नात्त्वम् । 'एरनेकाचः' इति यण् । मिम्यतुः । मिम्युः । भारद्वाजनियमात्थलि वेडिति मत्वा आह । **ममिथ--ममाथेति** ॥ थलः पित्त्वेन अकित्त्वादेञ्विषयत्वम् । इट्पक्षे 'आतो लोपः' इति भावः । मिम्यथुः । मिम्य । ममौ । मिम्यिव । मिम्यिम । लिटस्तङ्याह । **मिम्ये इति** ॥ एश आदिशित्त्वाभावात् कित्त्वेन एञ्विषयत्वाभावाच्च नात्त्वमिति भावः । मिम्याते । मिम्यिरे । मिम्यिषे । मिम्याथे । मिम्यिध्वे । मिम्ये । मिम्यिवहे । मिम्यिमहे । **मातेति** ॥ एञ्विषयत्वादशित्त्वाच्च आत्त्वमिति भावः । मास्यति । मास्यते । सार्वधातुकेषु षुञ्वत् । **मीयादिति** ॥ आशीर्लिङि परस्मैपदे यासुटः

माता । मीयात् । मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त । चिञ् १२५२ चयने । प्रणिचिनोति ।

२५२५ । विभाषा चेः । (७-३-५८)

अभ्यासात्परस्य चिञः कुत्वं वा स्यात्सनि लिटि च । प्रणिचिकाय–चिचाय । चिक्ये–चिच्ये । अचैषीत् । अचेष्ट । स्तृञ् १२५३ आच्छादने । स्तृणोति । स्तृणुते । 'गुणोऽर्ति—' (सू २३८०) इति गुणः । स्तर्यात् ।

२५२६ । ऋतश्च संयोगादेः । (७-२-४३)

ऋदन्तात्संयोगादेः परयोर्लिङ्सिचोरिड्वास्यात्तङि । स्तरिषीष्ट–स्तृषीष्ट । अस्तरिष्ट–अस्तृत । कृञ् १२५४ हिंसायाम् । कृणोति । कृणुते । चकार । चकर्थ । चक्रे । क्रियात् । कृषीष्ट । अकार्षीत् । अकृत । वृञ् १२५५ वरणे ।

कित्त्वादेर्ञ्विषयत्वाभावादात्त्वाभावे 'अकृत्सार्व' इति दीर्घ इति भावः । आशीर्लिङि तङि आह । **मासीष्टेति** ॥ ञ्विषयत्वादात्त्वमिति भावः । लुङि परस्मैपदे सिचि आत्त्वे 'यमरम' इति सगिटौ मत्वा आह । **अमासीदिति** ॥ सकि सिच इटि सिज्लोपः । **अमास्तेति** ॥ लुङि तङि सिचि आत्त्वमिति भावः । अमासाताम् । अमासत इत्यादि । **चिञ् चयने इति** ॥ चयनं रचना । अनिट् । सार्वधातुके घुञ्वद्भूपाणि । **प्रणिचिनोतीति** ॥ 'नेर्गद' इति णत्वमिति भावः । **विभाषा चेः** ॥ 'चजोः कु घिण्ण्यतोः' इत्यतः कुग्रहणमनुवर्तते । 'अभ्यासाच्च' इत्यतः अभ्यासादिति । 'सन्लिटोर्जेः' इत्यतः सन्लिटोरिति च । तदाह । **अभ्यासादित्यादिना । स्तृञ् आच्छादने इति** ॥ अनिट् । लिटि तस्तार । अतुसादौ 'ऋतश्च संयोगादेर्गुणः' इति गुणः । वृद्धिविषये तु नास्य प्रवृत्तिः । तस्तरतुः । ऋदन्तत्वात्थल्यपि नित्यं नेट् । तस्तर्थ । तस्तरिव । तस्तरे । तस्तराते । तस्तरिरे । तस्तरिषे । तस्तरिवहे । स्तर्ता । 'ऋद्धनोः स्ये' स्तरिष्यति । आशीर्लिङि परस्मैपदे यासुटः कित्त्वाद्गुणनिषेधे प्राप्ते आह । **गुणोऽर्तीति गुणः इति** ॥ तङि आशीर्लिङि स्तृ षीष्ट इति स्थिते । **ऋतश्च संयोगादेः** ॥ 'लिङ्सिचोरात्मनेपदेषु' इत्यनुवर्तते । 'इट् सनि वा' इत्यतः इड्वेति । तदाह । **ऋदन्तादित्यादिना** ॥ लुङि परस्मैपदे अस्तार्षीत् । लुङस्तङि त्वाह । **अस्तरिष्ट–अस्तृतेति** ॥ 'ऋतश्च संयोगादेः' इति इट्पक्षे गुणः । इडभावपक्षे तु 'हूस्वादङ्गात्' इति सिचो लोपः । कृञ् हिंसायाम् । **चकर्थेति** ॥ 'कृसृभृवृ' इति थल्यपि नित्यमिण्निषेधः । चकृव । **क्रियादिति** ॥ आशीर्लिङि 'रिङ् शयग्लिङ्क्षु' इति रिङ् । **कृषीष्टेति** ॥ 'उश्च' इति कित्त्वान्न गुणः । **अकार्षीदिति** ॥ सिचि वृद्धिः रपरत्वम् । **अकृतेति** ॥ 'हूस्वादङ्गात्' इति सिचो लोपः । वृञ् वरणे । सेट् ।

२५२७ । बभूथाततन्थजगृभ्मववर्थेति निगमे । (७-२-६४)

एषां वेदे इडभावो निपात्यते । तेन भाषायां थलीट् । ववरिथ । वबृव । वबृवहे । वरिता–वरीता ।

२५२८ । लिङ्सिचोरात्मनेपदेषु । (७-२-४२)

वृङ्वृञ्भ्यामृदन्ताच्च परयोर्लिङ्सिचोरिड्वा स्यात्तङि ।

२५२९ । न लिङि । (७-२-३९)

वृतो लिङ इटो दीर्घो न स्यात् । वरिषीष्ट–वृषीष्ट । अवारीत् । अवरिष्ट–अवरीष्ट–अवृत । धुञ् १२५६ कम्पने । धुनोति । धुनुते । अधौषीत् । अधोष्यत् । दीर्घान्तोऽप्ययम् । धूनोति । धूनुते । 'स्वरतिसूति—' (सू २२७९) इति वेट् । दुधविथ–दुधोथ । किति लिटि तु 'श्र्युकः—' (सू २३८१) इति निषेधं बाधित्वा क्रादिनियमान्नित्यमिट् । दुधुविव । 'स्तुसुधूञ्भ्यः—' (सू २३८५) इति नित्यमिट् । अधावीत् । अधविष्ट–अधोष्ट ।

अथ परस्मैपदिनः । टु दु १२५७ उपतापे । दुनोति । हि १२५८ गतौ वृद्धौ च ।

ववार । वव्रुः । **बभूथाततन्थ** ॥ निगमो वेदः । तदाह । **एषां वेदे इति** ॥ ननु 'कृसृभृवृ' इति निषेधादेव थलि ववर्थेति सिद्धे किमर्थं ववर्थग्रहणमित्यत आह । **तेन भाषायां थलीडिति** ॥ निगम एव वृणोतेस्थलि इण्निषेध इति नियमलाभादिति भावः । वव्रे । वव्राते । वव्रृषे । 'वृतो वा' इति मत्वा आह । **वरिता–वरीतेति** ॥ **लिङ्सिचोः** ॥ 'इट् सनि वा' इत्यतः इड्वा इत्यनुवर्तते । 'वृतो वा' इत्यतो वृत इति । तदाह । **वृङ्वृञ्भ्यामित्यादिना** ॥ **न लिङि** ॥ 'वृतो वा' इत्यतो वृत इत्यनुवर्तते । लिङीति षष्ठ्यर्थे सप्तमी । 'आर्धधातुकस्येट्' इत्यतः इडित्यनुवृत्तं षष्ठ्या विपरिणम्यते । 'ग्रहोऽलिटि' इत्यतो दीर्घ इत्यनुवर्तते । तदाह । **वृतः इति** ॥ वृङ्वृञ्भ्यामृकाराच्चेत्यर्थः । **वरिषीष्टेति** ॥ इट्पक्षे 'वृतो वा' इति प्राप्तो दीर्घो न भवति । **वृषीष्टेति** ॥ इडभावपक्षे 'उश्च' इति कित्त्वान्न गुणः । **अवारीदिति** ॥ लुङि परस्मैपदे सिचि वृद्धिः । अवारिष्टाम् । अवारिषुः । 'सिचि च परस्मैपदेषु' इति निषेधादिह 'वृतो वा' इति न दीर्घः । लुङस्तङि सिचि 'लिङ्सिचोः' इति इट्पक्षे 'वृतो वा' इति दीर्घविकल्पं मत्वा आह । **अवरिष्ट–अवरीष्टेति । अवृतेति** ॥ इडभावपक्षे 'हूस्वादङ्गात्' इति सिचो लोपः । **धुञ् कम्पने इति** ॥ हूस्वान्तोऽयमनिट् । धुञ इव रूपाणि । दीर्घान्तोऽप्ययमित्यादि व्यक्तम् । **अथ परस्मैपदिनः इति** ॥ राध साध संसिद्धावित्येतत्पर्यन्ता इत्यर्थः । 'टु दु उपतापे' इत्यारभ्य 'स्मृ इत्येके' इत्येतत्पर्यन्ता धातवो हूस्वान्ताः । **हि गताविति** ॥ प्रहिणोतीत्यत्र भिन्नपदत्वात् णत्वे प्राप्ते आह । **हिनु-**

२५३० । हिनुमीना । (८-४-१५)

उपसर्गस्थान्निमित्तात्परस्य एतयोर्नस्य णः स्यात् । प्रहिणोति ।

२५३१ । हेरचङि । (७-३-५६)

अभ्यासात्परस्य हिनोतेर्हस्य कुत्वं स्यान्न तु चङि । जिघाय । पॄ १२५९ प्रीतौ । पृणोति । पर्ता । स्पृ १२६० प्रीतिपालनयोः । 'प्रीतिचलनयोः' इत्यन्ये । 'चलनं जीवनम्' । इति स्वामी । स्पृणोति । पस्पार । 'स्मृ' इत्येके । स्मृणोति । पृणोत्यादयस्त्रयोऽपि छान्दसा इत्याहुः । आप्ऌ १२६१ व्याप्तौ । आप्नोति । आप्नुतः । आप्नुवन्ति । आप्नुवः । आप्ना । आप्नुहि । ऌदित्त्वादङ् । आपत् । शक्ऌ १२६२ शक्तौ । अशकन् । राध १२६३ साध १२६४ संसिद्धौ । राध्नोति ।

२५३२ । राधो हिंसायाम् । (६-४-१२३)

एत्त्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च । अपरेधतुः । रेधुः । रेधिथ । राद्धा । साध्नोति । साद्धा । असात्सीत् । असाद्धाम् ।

अथ द्वावनुदात्तेतौ । अशूं १२६५ व्याप्तौ सङ्घाते च । अश्नुते ।

मीना ॥ हिनु मीना अनयोर्द्वन्द्वात्परष्ठीद्विवचनस्य आर्षो लुक् । 'रषाभ्यान्नो णः' इत्यनुवर्तते । 'उपसर्गादसमासेऽपि' इत्यत उपसर्गादिति च । तदाह । **उपसर्गस्थादिति** ॥ **हेरचङि** ॥ 'चजोः' इति सूत्रात् कुग्रहणमनुवर्तते । 'अभ्यासाच्च' इत्यतः । **अभ्यासादिति** ॥ 'हो हन्तेः' इत्यतः ह इति षष्ठ्यन्तमनुवर्तते । तदाह । **अभ्यासात्परस्येति** ॥ **जिघायेति** ॥ जिघ्यतुः । जिघयिथ-जिघेथ । जिघ्यिव । आप्ऌ व्याप्तौ । अनिट् । **आप्नुवन्तीति** ॥ संयोगपूर्वकत्वात् 'हुश्नुवोः' इति न यण् । **आप्नुवः इति** ॥ संयोगपूर्वकत्वात् 'उतश्च-प्रत्ययात्' इति नोकारलोपाभावकल्पः । **आप्नुहीति** ॥ संयोगपूर्वकत्वादेव 'उतश्च प्रत्ययात्' इति हेर्न लुक् । **शक्ऌ शक्ताविति** ॥ शक्नोति । शशाक । शेकतुः । शशक्थ-शेकिथ । शेकिव । शक्ता । शक्ष्यति । **अशकदिति** ॥ ऌदित्त्वादङ् । राध साध संसिद्धौ । अनिटौ । दीर्घाकारवत्त्वात् 'अत एकहल्' इत्यप्राप्तावाह । **राधो हिंसायाम्** ॥ 'ध्वसोः' इत्यतः एदिति अभ्यासलोप इति च अनुवर्तते । 'गमहन' इत्यतः कितीति । 'अत एकहल्मध्ये' इत्यतः लिटीति 'थलि च सेटि' इति च सूत्रमनुवर्तते । तदाह । **एत्त्वेत्यादिना । अपरेधतुरिति** ॥ उपसर्गवशादिह हिंसायां वृत्तिः । अन्यत्र रराधतुः । थल्यपि क्रादिनियमान्नित्यमिट् । 'उपदेशेऽत्वतः' इत्यत्र तपरकरणादिह नेण्निषेधः । तदाह । **रेधिथेति । राद्धेति** ॥ 'झषस्तथोः' इति धः । **अशूं व्याप्तावि**ति ॥ ऊदित्त्वाद्वेट् । **अश्नुते इति** ॥ अश्नुवाते ।

२५३३ । अश्नोतेश्च । (७-४-७२)

दीर्घादभ्यासादवर्णात्परस्य नुट् स्यात् । आनशे । अशिता—अष्टा । अशिष्यते—अक्ष्यते । अश्नुवीत । अक्षीष्ट—अशिषीष्ट । आशिष्ट—आष्ट । आक्षाताम् । ष्टिघ १२६६ आस्कन्दने । स्तिघ्नुते । तिष्टिघे । स्तेघिता ।

अथ आ गणान्तात्परस्मैपदिनः । तिक १२६७ तिग १२६८ गतौ च । चादास्कन्दने । तिक्नोति । तिग्नोति । षघ १२६९ हिंसायाम् । सघ्नोति । ञि धृषा १२७० प्रागल्भ्ये । धृष्णोति । दधर्ष । धर्षिता । दम्भु १२७१ दम्भने । दम्भनं दम्भः । दभ्नोति । ददम्भ । 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वा' इति व्याकरणान्तरमिहाप्याश्रीयत इत्युक्तम् । 'अनिदिताम्—' (सू ४१५) इति नलोपः । तस्याभीयत्वादसिद्धत्वेन एत्त्वाभ्यासलोपयोरप्राप्तौ 'दम्भेश्च एत्त्वाभ्यासलोपौ वक्तव्यौ' (वा ४१५३) देभतुः । ददम्भतुः । इदं कित्त्वं पिदपिद्विषयकमिति सुधाकरादयः । तन्मते तिप्सिप्मिप्सु । देभ । देभिथ । 'देभ' इति रूपान्तरं बोध्यम् । अपिद्विषयकमिति न्यासकारादिमते तु, ददम्भ । ददम्भिथ । ददम्भेत्येव । दभ्यात् । ऋधु १२७२ वृद्धौ । 'तृप प्रीणने' इत्येके । क्षुभ्नादित्वाण्णत्वं न । तृप्नोति । 'छन्दसि' (गण १९७) आगणान्तादधिकारोऽयम् । अह १२७३ व्याप्तौ । अह्नोति । दध १२७४ घातने पालने च । दध्नोति । चमु १२७५ भक्षणे ।

अश्नुवते । संयोगपूर्वकत्वात् 'हुश्नुवोः' इति न यण् । **अश्नोतेश्च** ॥ 'अत्र लोपः' इत्यतः अभ्यासस्येत्यनुवर्तते । 'तस्मान्नुट्' इति च । तच्छब्देन 'अत आदेः' इति कृतदीर्घ आकारः परामृश्यते । तदाह । **दीर्घादिति । आनशे इति** ॥ आनशिषे । आनक्षे । आनशिवहे । आनश्वहे । **अष्टेति** ॥ व्रश्चादिना शस्य षत्वे ष्टुत्वम् । विधिलिङ्याह । **अश्नुवीतेति** ॥ आशीर्लिङि ऊदित्त्वादिट्त्विकल्पं मत्वा आह । **अक्षीष्ट-अशिषीष्टेति** ॥ लुङि सिच इट्पक्षे आह । **आशिष्टेति** ॥ अनिट्पक्षे 'झलो झलि' इति सिचो लोपं मत्वा आह । **आष्टेति** ॥ ष्टिघधातुष्वोपदेशः । सेट् । **आ गणान्तादिति** ॥ स्वादिगणसमाप्तिपर्यन्तमित्यर्थः । **इत्युक्तमिति** ॥ कित्त्वपक्षे आह । **अनिदितामिति नलोपः इति** ॥ नन्वनिदितामिति नलोपे सति 'अत एकहल्मध्ये' इत्येत्त्वसिद्धेः 'दम्भेश्च' इति व्यर्थमित्यत आह । **तस्याभीयत्वादिति** ॥ नलोपस्येत्यर्थः । **दभ्यादिति** ॥ आशीर्लिङि 'अनिदिताम्' इति न लोपः । **छन्दसीति** ॥ गणसूत्रम् । तद्व्याचष्टे । **आगणान्तादिति । रि क्षि इति** ॥ रि क्षि चिरि जिरि दाश ह इति षट्

चन्नोति । रि १२७६ क्षि १२७७ चिरि १२७८ जिरि १२७९ दाश १२८० दृ १२८१ हिंसायाम् । रिणोति । क्षिणोति । अयं भाषायामपीत्येके । "न तद्यशः शस्त्रभृतां क्षिणोति" ऋक्षीत्येक एवाजादिरित्यन्ये । ऋक्षिणोति । चिरिणोति । जिरिणोति । दाश्नोति । दृणोति । वृत् ।

इति तिङन्तस्वादिप्रकरणम् ।

॥ अथ तिङन्ततुदादिप्रकरणम् ॥

तुद १२८२ व्यथने । इतः षट् स्वरितेतः ।

२५३४ । तुदादिभ्यः शः । (३-१-७७)

तुदति । तुदते । तुतोद । तुतोदिथ । तुतुदे । तोत्ता । अतौत्सीत् । अतुत्त । णुद १२८३ प्रेरणे । नुदति । नुदते । नुनोद । नुनुदे । नोत्ता । दिश १२८४ अतिसर्जने । अतिसर्जनं दानम् । देष्टा । दिक्षीष्ट । अदिक्षत् ।

धातवः आद्यद्वितीयावेकाक्षरौ । तदाह । **रिणोति । क्षिणोतीति । अयम्भाषायामपीति ॥** क्षिधातुरित्यर्थः । तत्र प्रयोगं दर्शयति । **न तद्यशः इति । वृदिति ॥** स्वादयो वृत्ता इत्यर्थः ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदी-
व्याख्यायां बालमनोरमायां श्नुविकरणं समाप्तम् ।

अथ शविकरणा धातवो निरूप्यन्ते । **इतष्षडिति ॥** 'ऋषी गतौ' इत्यतः प्राग्-इत्यर्थः । **तुदादिभ्यश्शः ॥** कर्त्रर्थे सार्वधातुके परे तुदादिभ्यश्शः स्यात् । स्वार्थे इत्यर्थः । शबपवादः । **तुदतीति ॥** लघूपधगुणं बाधित्वा नित्यत्वात् शे कृते तस्य अपित्त्वात् 'सार्वधातुकमपित्' इति ङित्त्वान्न गुण इति भावः । अजन्ताकारवत्त्वाभावात् क्रादिनियमाल्लिटि थल्यपि नित्यमिट् । तदाह । **तुतोदिथेति । तोत्तेति ॥** अनिडिति भावः । **अतौत्सीदिति ॥** हलन्तलक्षणा वृद्धिः । णुदधातुर्णोपदेशः । अनिट् । दिशधातुरप्यनिट् । **देष्टेति ॥** ब्रश्चेति षत्वे ष्टुत्वम् । स्येतु 'षढोः' इति षस्य कत्वञ्च । देक्ष्यति । **दिक्षीष्टेति ॥** 'लिङ्सिचौ' इति कित्त्वान्न गुणः । 'शल इगुपधात्' इति क्सं मत्वा आह । **अदिक्षत् । अदिक्षतेति ॥** 'भ्रस्ज

अदिक्षत । भ्रस्ज १२८५ पाके । 'ग्रहिज्या—' (सू २४१२) इति सम्प्रसारणम् । सस्य श्चुत्वेन शः । शस्य श्चुत्वेन जः । भृज्जति—भृज्जते ।

२५३५ । भ्रस्जो रोपधयो रमन्यतरस्याम् । (६-४-४७)

भ्रस्जे रेफस्योपधायाश्च स्थाने रमागमो वा स्यादार्धधातुके । मित्त्वादन्त्यादचः परः । स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः । बभर्ज । बभर्जतुः । बभर्जिथ—बभर्ष्ठ । बभर्जे । रमभावे, बभ्रज्ज । बभ्रज्जतुः । बभ्रज्जिथ । 'स्कोः—' (सू ३८०) इति सलोपः । 'ब्रश्च—' (सू २९४) इति षः । बभ्रष्ठ । बभ्रज्ज । भ्रष्टा—भर्ष्टा । भ्रक्ष्यति—भर्क्ष्यति । ङिति रमागमं बाधि-

---

पाके' अनिट् । भ्रस्ज् अ ति इति स्थिते आह । **ग्रहिज्येति** ॥ ङित्त्वाद्रेफस्य सम्प्रसारणमृकारः पूर्वरूपञ्चेति भावः । भ्रस्ज् अ ति इति स्थिते आह । **सस्येत्यादि** ॥ णलि भ्रस्ज् अ इति स्थिते । **भ्रस्जो रोपधयोः** ॥ भ्रस्ज इत्यवयवषष्ठी । रोपधयोरिति स्थानषष्ठी । रश्च उपधा च तयोरिति विग्रहः । रेफादकार उच्चारणार्थः । रेफस्य उपधायाश्च स्थाने इति लभ्यते । 'आर्धधातुके' इत्यधिकृतम् । तदाह । **भ्रस्जे रेफस्येत्यादिना** ॥ रमि मकार इत् अकार उच्चारणार्थः । तदाह । **मित्त्वादन्त्यादचः परः इति** ॥ तथाच रेफाकारादुपरि सकारात् प्राक् रेफ आगम इति फलितम् । भ्र र् ग् ज् अ इति स्थितम् । ननु रम आगमत्वे रोपधयोरिति कथं स्थानषष्ठीनिर्देश इत्यत आह । **स्थानेति** ॥ स्थानं प्रसङ्गः । रेफस्य उपधायाश्च उच्चारणप्रसङ्गे सति अकारादुपरि रेफः प्रयोज्यः । भकारादुपरि रेफः जकारात्प्राक्सकारश्च न प्रयोज्याविति लब्धम् । तथाच तयोर्निवृत्तिः फलितेति भावः । एवञ्च भर्ज् अ इति स्थिते द्वित्वादौ रूपमाह । **बभर्जेति** ॥ अतुसादावपि संयोगात्परत्वात्किित्त्वाभावात् 'ग्रहिज्या' इति सम्प्रसारणन्न भवति । भारद्वाजनियमात्थलि वेडिति मत्वा आह । **बभर्जिथ—बभर्ष्ठेति** ॥ इडभावपक्षे बभर्ज् थ इति स्थिते 'ब्रश्च' इति जस्य षः । ष्टुत्वेन थस्य ठ इति भावः । बभर्जिव । लिटस्तङ्याह । **बभर्जे इति** ॥ बभर्जाते इत्यादि सुगमम् । रमभावे आह । **बभ्रज्जेति** ॥ णलि भ्रस्ज् अ इति स्थिते द्वित्वे हलादिशेषे अभ्यासजश्त्वे बभ्रस्ज् अ इति स्थिते सस्य श्चुत्वेन शकारे शस्य जश्त्वेन जकार इति भावः । 'लिट्यभ्यासस्य' इति सम्प्रसारणस्य न प्रसक्तिः । अभ्यासे हलादिशेषेण रेफाभावात् । **बभ्रज्जतुरिति** ॥ संयोगात्परत्वादकित्त्वात् 'ग्रहिज्या' इति न सम्प्रसारणमिति भावः । **बभ्रज्जिथेति** ॥ थलि भारद्वाजनियमादिट्पक्षे रमभावपक्षे रूपम् । तत्र इडभावपक्षे बभ्रस्ज् थ इति स्थिते आह । **स्कोरिति** ॥ **ब्रश्चेति षः इति** ॥ जस्येति शेषः । रमभावपक्षे लिटस्तङ्याह । **बभ्रज्जेति** ॥ बभ्रज्जाते । बभ्रज्जिषे । इत्यादि सुगमम् । **भ्रष्टेति** ॥ रमभावपक्षे रूपम् । **भर्ष्टेति** ॥ रमागमे भर्ज् ता इति स्थिते जस्य श्चुत्वेन शः शस्य 'ब्रश्च' इति षः ष्टुत्वेन तकारस्य ट इति भावः । एवं **भ्रक्ष्यति—भर्क्ष्यतीति** ॥ 'षढोः' इति कत्वे सस्य षत्वमिति विशेषः । भृज्जतु । अभृज्जत् ।

त्वा सम्प्रसारणं पूर्वविप्रतिषेधेन' (वा ४०७८)। भृज्ज्यात्। भृज्ज्यास्ताम्। भर्क्षीष्ट–भ्रक्षीष्ट। अभार्क्षीत्–अभ्राक्षीत्। अभर्ष्ट–अभ्रष्ट। क्षिप १२८६ प्रेरणे। क्षिपति। क्षिपते। क्षेप्ता। अक्षैप्सीत्। अक्षिप्त। कृष १२८७ विलेखने। कृषति। कृषते। क्रष्टा–कर्ष्टा। कृष्यात्। कृक्षीष्ट। 'स्पृशमृश–' (वा १८२३) इति सिज्वा। पक्षे क्सः। सिचि अम्वा। अक्राक्षीत्–अकार्क्षीत्–अकृक्षत्। तङि 'लिङ्सिचौ—' (सू २३००) इति कित्त्वादम्न। अकृष्ट। अकृक्षाताम्। अकृक्षत। अकृक्षत। अकृक्षाताम्। अकृक्षन्त। ऋषी १२८८ गतौ। परस्मैपदी। ऋषति। आनर्ष। जुषी १२८९ प्रीतिसेवनयोः। आत्मनेपदिनश्चत्वारः। जुषते। ओ विजी १२९० भयचलनयोः। प्रायेणायमुत्पूर्वः। उद्विजते।

भृज्जेत्। ननु आशीर्लिङि भ्रस्ज् यात् इति स्थिते यासुटः कित्त्वात् 'ग्रहिज्या' इति सम्प्रसारणे पूर्वरूपे सकारस्य श्चुत्वेन शकारे शस्य जश्त्वेन जकारे भृज्ज्यात् इति रूपं वक्ष्यति। तदयुक्तं सम्प्रसारणं बाधित्वा परत्वात् रमागमे कृते भर्ज्ज्यात् इति प्रसङ्गादित्यत आह। **किङति रमागममिति** ॥ आशीर्लिङस्तङि सीयुटि रमागमपक्षे आह। **भर्क्षीष्टेति** ॥ रमभावे तु अकित्त्वात्सम्प्रसारणाभावादाह। **भ्रक्षीष्टेति** ॥ लुङि परस्मैपदे रमागमविकल्पं मत्वा आह। **अभार्क्षीत्–अभ्राक्षीदिति** ॥ आत्मनेपदे सिचि रमागमविकल्पं मत्वा आह। **अभर्ष्ट–अभ्रष्टेति** ॥ 'झलो झलि' इति सिज्लोपः। **क्षिप प्रेरणे इति** ॥ अनिट्। अजन्ताकारवत्त्वाभावात् क्रादिनियमात्थलि नित्यमिट्। चिक्षेपिथ। एवं कृषधातुरपि। चकर्षिथ। लुटि तासि 'अनुदात्तस्य चर्दुपधस्य' इत्यमागमविकल्पः। अमागमाभावे गुणे रपरत्वम्। तदाह। **क्रष्टा–कर्ष्टेति** ॥ आशीर्लिङि परस्मैपदे आह। **कृष्यादिति** ॥ कित्त्वात् झलादित्वाभावाच्च अमागमो गुणश्च नेति भावः। आशीर्लिङस्तङ्याह। **कृक्षीष्टेति** ॥ 'लिङ्सिचौ' इति कित्त्वादमागमो गुणश्च नेति भावः। लुङि परस्मैपदे आह। **स्पृशमृशेति सिज्वेति। पक्षे इति** ॥ सिजभावपक्षे 'शलः' इति क्स इत्यर्थः। **सिचि अम्वेति** ॥ सिच्पक्षे 'अनुदात्तस्य च' इत्यमागमविकल्प इत्यर्थः। क्से तु कित्त्वादमागमो नेति भावः। **अक्राक्षीदिति** ॥ सिचि अमागमे रूपम्। **अकार्क्षीदिति**॥ सिचि अमभावपक्षे हलन्तलक्षणा वृद्धिरिति भावः। क्सादेशपक्षे आह। **अकृक्षदिति** ॥ कित्त्वादमागमो गुणश्च नेति भावः। **तङीति** ॥ तङि सिच्पक्षे अकृष् स् त इति स्थिते 'लिङ्सिचौ' इति कित्त्वादम् नेत्यर्थः। गुणोऽपि नेति ज्ञेयम्। **अकृष्टेति** ॥ 'झलो झलि' इति सिज्लोप इति भावः। **अकृक्षतेति** ॥ सिच्पक्षे अनतः परत्वाददादेश इति भावः। क्सादेशपक्षे आह। **अकृक्षतेति** ॥ कित्त्वादम् नेति भावः। **अकृक्षन्तेति** ॥ क्सादेशपक्षे अ कृक्ष झ इति स्थिते अच्परकत्वाभावात् 'क्सस्याचि' इत्यकारलोपाभावादतः परत्वाददादेशाभावे अन्तादेश इति भावः। **ऋषी गताविति** ॥ सेट्। आनर्षिथ। आनर्षिव। **अर्षिता। आर्षीत्। ओ विजी भयेति** ॥ सेट्।

२५३६ । विज इट् । (१-२-२)

विजेः पर इडादिः प्रत्ययो ङिद्वत् । उद्विजिता । उद्विजिष्यते । ओ लजी १२९१ ओ लस्जी १२९२ व्रीडायाम् । लजते । लेजे । लज्जते । ललज्जे

अथ परस्मैपदिनः । ओ व्रश्चू १२९३ छेदने । 'ग्रहिज्या—' (सू २४१२) वृश्चति । वव्रश्च । वव्रश्चतुः । वव्रश्चिथ–वव्रष्ठ । 'लिट्यभ्यासस्य—' (सू २४०८) इति सम्प्रसारणम् रेफस्य ऋकारः । 'उरत्' (सू २२४४ । तस्य च 'अचः परस्मिन्—' (सू ५०) इति स्थानिवद्भावात् 'न सम्प्रसारणे—' (सू ३६३) इति वस्योत्वं न । व्रश्चिता–व्रष्टा । व्रश्चिष्यति–व्रक्ष्यति । वृश्च्यात् । अव्रश्चीत्–अव्राक्षीत् ।

उद्विजितेत्यादौ लघूपधगुणे प्राप्ते । **विज इट्** ॥ 'गाङ्कुटादिभ्यः' इत्यतः ङिदित्यनुवर्तते । तदाह । **विजेः परः इत्यादि** ॥ उद्विजिता । उद्विजिषीष्ट । उदविजिष्ट । व्रश्चधातुरूदित्त्वाद्वेट् । **ग्रहिज्येति** ॥ लटि व्रश्च् अ ति इति स्थिते शस्यापित्त्वेन ङित्त्वात् 'ग्रहिज्या' इति रेफस्य सम्प्रसारणमृकारः पूर्वरूपश्चेति भावः । तदाह । **वृश्चतीति** ॥ वृश्चतः । वृश्चन्तीत्यादि । **वव्रश्चेति** ॥ णलि रूपमिदम् । थलि च प्रक्रिया अनुपदं वक्ष्यते । अतुसादौ संयोगात्परत्वेन कित्त्वाभावात् 'ग्रहिज्या' इति न सम्प्रसारणम् । तदाह । **वव्रश्चतुरिति** ॥ ऊदित्त्वात्थलादौ वेट् । तदाह । **वव्रश्चिथ–वव्रष्ठेति** ॥ धातुपाठे व्रश्चू इत्यत्र व्रस्च् इति स्थिते सस्य श्चुत्वेन शकारनिर्देशः । तथाच वव्रश्च् थ इति स्थिते श्चुत्वस्यासिद्धत्वात् 'स्कोः' इति सकारलोपे, चस्य 'व्रश्च' इति षत्वे ष्टुत्वेन थस्य ठत्वे वव्रष्ठेति रूपम् । वव्रश्चिव । ननु णलि थलि च अकिति द्वित्वे कृते 'लिट्यभ्यासस्य' इत्यभ्यासावयवयोर्वकाररेफयोर्द्वयोरपि सम्प्रसारणं स्यात् । नच 'न सम्प्रसारणे सम्प्रसारणम्' इति वकारस्य सम्प्रसारणनिषेधः शङ्क्यः । पूर्वं वकारस्य सम्प्रसारणसम्भवादित्यत आह । **लिट्यभ्यासेति** ॥ 'न सम्प्रसारणे' इति निषेधादेव ज्ञापकात् प्रथमं रेफस्य ऋकारस्सम्प्रसारणमित्यर्थः । तस्य सम्प्रसारणसम्पन्नस्य ऋकारस्य अकारविधिं स्मारयति । **उरदिति** ॥ ननु ऋकारस्य अकारे कृते वकारस्य सम्प्रसारणं स्यात् । सम्प्रसारणपरकत्वविरहेण 'न सम्प्रसारणे' इति निषेधाप्रवृत्तेरित्यत आह । **तस्य चेति** ॥ अकारस्येत्यर्थः । नच उरदत्त्वस्य परनिमित्तकत्वाश्रवणात् कथं स्थानिवत्त्वमिति वाच्यम् । आपादपरिसमाप्तेरङ्गाधिकारः इत्यभ्युपगम्य अङ्गाक्षिप्तप्रत्ययनिमित्तकत्वाभ्युपगमात् । "लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः" इति न्यायस्तु 'न सम्प्रसारणे' इति निषेधादेव न स्थानिभेदे प्रवर्तते इति ज्ञायते । अत एव सुद्धशुपास्य इत्यादौ धकारस्य द्वित्वे कृते पूर्वं धकारस्य जश्त्वेन दकारे तस्य द्वित्वमित्यास्तान्तावत् । आशीर्लिङ्याह । **वृश्च्यादिति** ॥ कित्त्वात् सम्प्रसारणमिति भावः । **अव्रश्चीदिति** ॥ ऊदित्त्वादिट्पक्षे 'नेटि' इति हलन्तलक्षणवृद्धिनिषेधः । इडभावं मत्वा आह ।

व्यच १२९४ व्याजीकरणे। विचति। विव्याच। विविचतुः। व्यचिता। व्यचिष्यति। विच्यात्। अव्याचीत्–अव्यचीत्। 'व्यचेः कुटादित्वमनसि' (वा ३४५६) इति तु नेह प्रवर्तते। 'अनसि' इति पर्युदासेन कृन्मात्रविषयत्वात्। उछि १२९५ उञ्छे। उञ्छति। उछी १२९६ विवासे। उच्छति। ऋच्छ १२९७ गतीन्द्रियप्रलयमूर्तिभावेषु। 'ऋच्छत्यृताम्' (सू २३८३) इति गुणः। द्विहल्ग्रहणस्यानेकहल्लुपलक्षणत्वान्नुट्। आनर्छ। आनर्छतुः। ऋच्छिता। मिच्छ १२९८ उत्क्लेशे। उत्क्लेशः पीडा। मिमिच्छ। अमिच्छीत्। जर्ज १२९९ चर्च १३०० झर्झ १३०१ परिभाषणभर्त्सनयोः। त्वच १३०२ संवरणे। तत्वाच। ऋच १३०३ स्तुतौ। आनर्च। उज्ज १३०४ आर्जवे। उज्झ १३०५ उत्सर्गे। लुभ १३०६ विमोहने। विमोहनमाकुलीकरणम्। लुभति। लोभिता–लोब्धा। लोभिष्यति। रिफ १३०७ कत्थनयुद्धनिन्दाहिंसादानेषु। रिफति। रिरेफ। 'रिह' इत्येके। 'शिशुं न विप्रा मतिभी रिहन्ति'। तृप १३०८ तृम्फ १३०९ तृप्तौ।

अव्राक्षीदिति॥ अव्रश्चू सीत् इति स्थिते हलन्तलक्षणा वृद्धिः। श्चुत्वस्यासिद्धत्वात् 'स्कोः' इति सलोपः। 'व्रश्च' इति चस्य षः तस्य 'षढोः'इति कः सस्य ष इति भावः। "नकारजावनुस्वारपञ्चमौ झलि धातुषु। सकारजश्शकारश्चेत् षाट्टवर्गस्तबर्गजः" इत्याहुः। व्यच व्याजीकरणे। सेट्। शे 'ग्रहिज्या' इति सम्प्रसारणं मत्वा आह। **विचतीति**॥ **विव्याचेति**॥ 'लिट्यभ्यासस्य' इत्यभ्यासयकारस्य सम्प्रसारणम्। 'न सम्प्रसारणे' इति न वकारस्य। **विविचतुरिति**॥ कित्त्वात् 'ग्रहिज्या' इति सम्प्रसारणे कृते द्वित्वादीति भावः। विव्यचिथ। विव्यचिव। **विच्यादिति**॥ आशीर्लिङि कित्त्वाद्यकारस्य सम्प्रसारणम्। 'अतो हलादेः' इति वृद्धिविकल्पं मत्वा आह। **अव्याचीत्–अव्यचीदिति**॥ ननु 'व्यचेः कुटादित्वमनसि' इति व्यचेः कुटादित्ववचनात् व्यचिता, व्यचिष्यति, इत्यादावपि 'गाङ्कुटादिभ्यः' इति ङित्त्वात् सम्प्रसारणं स्यादित्यत आह। **व्यचेरिति**॥ **कृन्मात्रेति**॥ अवधारणे मात्रशब्दः। 'उछि उञ्छे' 'उछी विवासे' इति भ्वादौ पठितौ। इह तयोः पाठस्तु शविकरणार्थः। तेन उञ्छती–उञ्छन्ती। उच्छती। उच्छन्ती। इति 'आच्छीनद्योः' इति नुम्विकल्पस्सिद्ध्यति। भ्वादौ पाठस्तु पित्स्वरार्थ इत्यन्यत्र विस्तरः। **ऋच्छ गतीति**॥ 'छे च' इति तुकि तस्य श्चुत्वेन चकारनिर्देशः। ऋच्छति। णलि लघूपधत्वाभावाद्गुणे अप्राप्ते आह। **ऋच्छत्यृतामिति**॥ द्वित्वे उरदत्त्वे हलादिशेषे 'अत आदेः' इति दीर्घे आ अर्च्छ इति स्थिते बहुहल्त्वात् द्विहल्त्वाभावान्नुटि अप्राप्ते आह। **द्विहल्ग्रहणस्येति**॥ **आनर्च्छेति**॥ 'इजादेः' इत्यत्र अनृच्छः इति पर्युदासादाम् न। **ऋच्छिते-ति**॥ 'ऋच्छत्यृताम्' इत्यत्र लिटीत्यनुवृत्तेर्न गुण इति भावः। लुभधातुस्सेट। 'तीषसह' इति वेडिति मत्वा आह। **लोभिता–लोब्धेति**॥ **शिशुन्नेति**॥ नशब्द इवार्थे। विप्राः

आद्यः प्रथमान्तः । द्वितीयो द्वितीयान्तः । द्वावपि द्वितीयान्तावित्यन्ये । तृपति । ततर्प । तर्पिता । 'स्पृशमृश—' इति सिज्विकल्पः पौषादिकस्यैव । अङ्पवादत्वात् । तेनात्र नित्यं सिच् । अतर्पीत् । तृम्फति । शस्य ङित्त्वात् 'अनिदिताम्—' (सू ४१५) इति नलोपे 'शे तृम्फादीनां नुम् वाच्यः' (वा ४३२३) आदिशब्दः प्रकारे । तेन येऽत्र नकारानुषक्तास्ते तृम्फादयः । तृम्फन्ति । ततृम्फ । तृफ्यात् । तुप १३१० तुम्प १३११ तुफ १३१२ तुम्फ १३१३ हिंसायाम् । तुपति । तुम्पति । तुफति । तुम्फति । दृप १३१४ दृम्फ १३१५ उत्क्लेशे । प्रथमः प्रथमान्तः । द्वितीयो द्वितायान्तः । प्रथमो द्वितीयान्त इत्येके । दृपति । दृफति । दृम्फति । ऋफ १३१६ ऋम्फ १३१७ हिंसायाम् । ऋफति । आनर्फ । ऋम्फति । ऋम्फाञ्चकार । गुफ १३१८ गुम्फ १३१९ ग्रन्थे । गुफति । जुगोफ । गुम्फति । जुगुम्फ । उभ १३२० उम्भ १३२१ पूरणे । उभति । उबोभ । उम्भति । 'उम्भाञ्चकार' । शुभ १३२२ शुम्भ १३२३ शोभार्थे । शुभति । शुम्भति । दृभी १३२४ ग्रन्थे । दृभति । चृती १३२५ हिंसाश्रन्थनयोः । चर्तिता । 'सेऽसिचि—' (सू २५०६) इति वेट् । चर्तिष्यति–चर्त्स्यति । अचर्तीत् । विध १३२६ विधाने । विधति । वेधिता । जुड १३२७ गतौ । तवर्गपञ्चमान्त इत्येके । जुडति । 'मरुतो जुनन्ति' मृड १३२८ सुखने । मृडति । मर्डिता । पृड १३२९ च । पृडति । पृण १३३० प्रीणने । पृणति । पपृर्ण । वृण १३३१ च । वृणति । मृण १३३२ हिंसायाम् । तुण १३३३ कौटिल्ये–तुणोण । पुण १३३४ कर्मणि शुभे । पुणति । मुण १३३५ प्रतिज्ञाने । कुण १३३६ शब्दोपकरणयोः । शुन १३३७ गतौ । दुण १३३८ हिंसागतिकौटिल्येषु । घुर्ण १३३९ घूर्ण १३४० भ्रमणे । घुर १३४१ ऐश्वर्यदीप्त्योः । सुरति । सुषार । आशिषि सूर्यात् । कुर १३४२ शब्दे । कुरति । कुर्यात् । अत्र 'अकर्तुरिच्छायाम्' (सू १६२९) इति निषेधो न । कर्मण्येव तत्र ग्रहणादित्याहुः । क्षुर १३४३ छेदने । मुर १३४४ संवेष्टने ।

आद्यमिव मूर्तिभिः स्थिताति हिंसन्ति इत्यर्थः । तृफादयस्त्वन्विकरण एवानिट् । अङ्पवादत्वादिति ॥ अपवादस्य उत्सर्गव्याप्यत्वादिति भावः । चृती हिंसाश्रन्थनयोरिति ॥ श्रन्थनं विस्रसनम् । चततीत्यादि सुगमम् । "अथास्य योगं विचक्षते" इत्याश्वलायनः ।

क्षुर १३४५ विलेखने। घुर १३४६ भीमार्थशब्दयोः। पुर १३४७ अग्रगमने। वृहू १३४८ उद्यमने। दन्त्योष्ठ्यादिः। पवर्गादिरित्यन्ये। तृहू १३४९। स्तृहू १३५० तृंहू १३५१ हिंसार्थाः। तृहति। ततर्ह। स्तृहति। तस्तर्ह। तर्हिता—तर्ढा। स्तर्हिता—स्तर्ढा। अतृंहीत्—अताङ्क्षीत्। अतार्ढाम्। इषु १३५२ इच्छायाम्। 'इषुगमि—' (सू २४००) इति छः। इच्छति। एषिता—एष्टा। एषिष्यति। इष्यात्। ऐषीत्। मिष १३५३ स्पर्धायाम्। मिषति। मेषिता। किल २३५४ श्वैत्यक्रीडनयोः। तिल १३५५ स्नेहे। चिल १३५६ वसने। चल १३५७ विलसने। इल १३५८ स्वप्नक्षेपणयोः। विल १३५९ संवरणे। दन्त्योष्ठ्यादिः। बिल १३६० भेदने। ओष्ठ्यादिः। णिल १३६१ गहने। हिल १३६२ भावकरणे। शिल १३६३ षिल १३६४ उञ्छे। मिल १३६५ श्लेषणे। लिख १३६६ अक्षरविन्यासे। लिलेख। कुट १३६७ कौटिल्ये। 'गाङ्कुटादिभ्यः—' (सू २४६१) इति ङित्त्वं। चुकुटिथ। अङ्णित इति किम्। चुकोट। कुटिता। पुट १३६८ संश्लेषणे। कुच १३६९ सङ्कोचने। गुज १३७० शब्दे। गुड १३७१ रक्षायाम्। डिप १३७२ क्षेपे। छुर १३७३ छेदने। 'न भकुर्छुराम्' (सू १३२९) इति न दीर्घः। छुर्यात्। स्फुट १३७४ विकसने। स्फुटति। पुस्फोट। मुट १३७५ आक्षेपमर्दनयोः। त्रुट १३७६ छेदने। 'वा भ्राश—' (सू २३२१) इति श्यन्वा। त्रुट्यति—त्रुटति। तुत्रोट। त्रुटिता। तुट १३७७ कलहकर्मणि। तुटति। तुतोट। तुटिता। चुट १३७८ छुट १३७९ छेदने। जुट १३८० बन्धने। कड १३८१ मदे। लुट १३८२ संश्लेषणे। कृड १३८३ घनत्वे। घनत्वं सान्द्रता। चकर्ड। कृडिता। कुड १३८४ बाल्ये। पुड १३८५

विस्रंसयेदित्यर्थः। उपसर्गवशात् "यजमानो मेखलां विचृतते" इत्यापस्तम्बसूत्रे तु तङ् आर्षः। घुधातुष्वोपदेशः। कुर शब्दे। करोतेरेवेति व्याख्यानमेवात्र शरणम्। वृहूधातुः ऋदुपधः। ऊदित्वाद्वेट्कः। **पवर्गादिरिति** ॥ पवर्गतृतीयादिरित्यर्थः। **तृहू स्तृहू तृंहू इति** ॥ त्रयोऽपि ऋकारवन्तः। तृतीयोऽनुस्वारवान्। ऊदित्वाद्वेट्। **तर्ढेति** ॥ तृहेस्तासि ढत्वधत्वष्टुत्वढलोपाः। एवं स्तर्ढा। तृण्ढा। अतर्हीत्—अताक्षीत्। अस्तर्हीत्—अस्ताक्षीत्। इति सिद्धवत्कृत्य आह। **अतृंहीत्—अताङ्क्षीदिति** ॥ तृंहेरिडभावपक्षे हलन्तलक्षणवृद्धौ रपरत्वम्। हस्य ढः ढस्य कः षत्वं। अनुस्वारस्य परसवर्णो ङकार इति भावः। **अतार्ढामिति** ॥ तृहेस्तसस्तामि सिच इडभावपक्षे लोपे हलन्तलक्षणवृद्धौ ढत्वधत्वष्टुत्वढलोपा इति भावः।

उत्सर्गे । घुट १३८६ प्रतिघाते । तुड १३८७ तोडने । तोडनं भेदः । थुड १३८८ स्थुड १३८९ संवरणे । थुडति । तुथोड । तुस्थोड । 'खुड' 'छुड' इत्येके । स्फुर १३९० फुल १३९१ सञ्चलने । 'स्फुर स्फुरणे । 'स्फुल सञ्चलने' इत्येके ।

२५३७ । स्फुरतिस्फुलत्योर्निर्निविभ्यः । (८-३-७६)

षत्वं वा स्यात् । निष्फुरति—निःस्फुरति । 'स्फर' इत्यकारोपधं केचित्पठन्ति । पस्फार । 'स्फुड १३९२ चुड १३९३ क्रुड १३९४ संवरणे' 'क्रुड १३९५ भृड १३९६ निमज्जने' इत्येके । 'गुरी १३९७ उद्यमने' अनुदात्तेत् । गुरते । जुगुरे । गुरिता । 'णू १३९८ स्तवने' । दीर्घान्तः । 'परिणूतगुणोदयः' । इतश्चत्वारः परस्मैपदिनः । नुवति । अनुवीत् । 'धू १३९९ विधूनने' । धुवति । 'गु १४०० पुरीषोत्सर्गे' । जुगुविथ—जुगुथ । गुता । गुष्यति । अगुषीत् । 'ह्रस्वादङ्गात्' (सू २३६९) । अगुताम् । अगुषुः । 'ध्रु १४०१ गतिस्थैर्ययोः' । 'ध्रुव' इति पाठान्तरम् । आद्यस्य ध्रुवतीत्यादि गुवतिवत् । द्वितीयस्तु सेट् । दुध्रुविथ । ध्रुविता । ध्रुविष्यति । ध्रुव्यात् । अध्रुवीत् । अध्रुविष्टाम् । 'कुङ् १४०२ शब्दे' । दीर्घान्तः इति कैयटादयः । कुविता । अकुविष्ट । 'ह्रस्वान्तः' इति न्यासकारः । कुता । अकुत । वृत् । कुटादयो वृत्ताः ।

'पृङ् १४०३ व्यायामे' । प्रायेण व्याङ्पूर्वः । रिङ् । इयङ् । व्याप्रियते । व्यापप्रे । व्यापप्राते । व्यापरिष्यते । व्याप्रुत । व्याप्रुषाताम् । 'मृङ् १४०४ प्राणत्यागे ।

२५३८ । म्रियतेर्लुङ्लिङोश्च । (१-३-६१)

एवं अस्तार्ढाम् । अतार्ढाम् । स्फुर स्फुरणे । **स्फुरतिस्फुलत्योः** ॥ मूर्द्धन्य इत्यधिकृतम् । 'सिवादीनां वा' इत्यतो वेत्यनुवर्तते । तदाह । **षत्वं वा स्यादिति** ॥ शेषपूरणम् । **णू स्तवने इति** । णोपदेशः । **परिणूतेति** ॥ 'श्रुकः किति' इति नेट् । कुङ् शब्दे । **दीर्घान्तः इति** ॥ ततश्चायं सेट् । **पृङ् व्यायामे इति** ॥ ह्रस्वान्तोऽयमनिट् । 'ऋद्धनोः स्ये' इति इटं मत्वा आह । **व्यापरिष्यते इति** ॥ मृङ्धातुरनिट् । **म्रियतेः** ॥ 'अनुदात्तङितः' इत्यतः आत्मनेपदमित्यनुवर्तते । चकारेण 'शदेशितः' इत्यतः शित इत्यनुकृष्यते ।

लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र। ङित्त्वं स्वरार्थम्। म्रियते। ममार। ममर्थ। मम्रिव। मर्तासि। मरिष्यति। मृषीष्ट। अमृत।

अथ परस्मैपदिनः सप्त। रि १४०५ पि १४०६ गतौ। लघूपधगुणादन्तरङ्गत्वादियङ्। रियति। पियति। रेता। पेता। धि १४०७ धारणे। क्षि १४०८ निवासगत्योः। षू १४०९ प्रेरणे। सुवति। सविता। कॄ १४१० विक्षेपे। किरति। किरतः। चकार। चकरतुः। करिता–करीता। कीर्यात्। अकारीत्।

२५३९। किरतौ लवने। (६-१-१४०)

उपात्किरतेः सुडागमः स्याच्छेदेऽर्थे। उपस्किरति। 'अडभ्यासव्यवायेऽपि सुट् कात्पूर्व इति वक्तव्यम्' (वा ३६९९) । उपास्किरत्। उपचस्कार।

२५४०। हिंसायां प्रतेश्च। (६-१-१४१)

उपात्प्रतेश्च किरतेः सुट् स्याद्धिंसायाम्। उपस्किरति। प्रतिस्किरति। गॄ १४११ निगरणे।

२५४१। अचि विभाषा। (८-२-२१)

प्रकृतिभूतादित्यध्याहार्यम्। तदाह। **लुङ्लिङोरिति** ॥ **तङ् स्यादिति** ॥ आत्मनेपदं स्यादित्यर्थः। म्रियमाणः इत्यत्र आनस्यापि इष्टत्वात्। ननु ङित्त्वादेव सिद्धे किमर्थमिदमित्याशङ्क्य नियमार्थमित्याह। **नान्यत्रेति** ॥ तर्हि ङित्त्वं व्यर्थमित्यत आह। **ङित्त्वं स्वरार्थमिति** ॥ 'तास्यनुदात्तेन्ङिदुपदेशाल्लसार्वधातुकमनुदात्तम्' इत्येतदर्थमित्यर्थः। **म्रियते इति** ॥ शे कृते रिङियङाविति भावः। ऋदन्तत्वात् भारद्वाजमतेऽपि नेङित्याह। **ममर्थेति। मम्रिवेति** ॥ कादिनियमादिट्। मर्ता। 'ऋद्धनोः स्ये' इति इटं मत्वा आह। **मरिष्यतीति** ॥ **रि पि गताविति** ॥ द्वाविमावनिटौ। ननु शे कृते तिपमाश्रित्य इकारस्य परत्वाल्लघूपधगुणः स्यादित्यत आह। **अन्तरङ्गत्वादियङिति** ॥ **कॄ विक्षेपे इति** ॥ दीर्घान्तोऽयं सेट्। **किरतीति** ॥ 'ऋत इद्धातोः' इति इत्त्वं रपरत्वम्। **चकरतुरिति** ॥ कित्त्वेऽपि 'ऋच्छत्यृताम्' इति गुण इति भावः। 'वृतो वा' इति मत्वा आह। **करिता–करीतेति** ॥ **किरतौ लवने** ॥ **उपादिति** ॥ 'उपात् प्रतियत्ने' इत्यतस्तदनुवृत्तेरिति भावः। **सुडागमः इति** ॥ 'सुट् कात्पूर्वः' इत्यतस्तदनुवृत्तेरिति भावः। 'अभ्यासव्यवायेऽपि' इति वार्तिकम्। 'सुट् कात्पूर्वः' इत्यनुवृत्तिलभ्यम्। **हिंसायां प्रतेश्च** ॥ चकारादुपादिति समुच्चीयते। तदाह। **उपादिति। गॄ निगरणे इति** ॥ निगरणं भक्षणम्। सेट्। **अचि विभाषा** ॥ 'ग्रो यङि' इत्यतः

गिरतेः रेफस्य लत्वं वा स्यादजादौ । गिरति–गिलति । जगार–जगाल । जगरिथ–जगलिथ । गरिता–गलिता । दृङ् १४१२ आदरे । आद्रियते । आद्रियेते । आदृद्रे । अदर्द्रिषे । आदर्ता । आदरिष्यते । आदृषीष्ट । आदृत । आदृषाताम् । धृङ् १४१३ अवस्थाने । ध्रियते ।

अथ परस्मैपदिनः षोडश । प्रच्छ १४१४ ज्ञीप्सायाम् । पृच्छति । पप्रच्छ । पप्रच्छतुः । पप्रच्छिथ–पप्रष्ठ । प्रष्टा । प्रक्ष्यति । अप्राक्षीत् । वृत् । किरादयो वृत्ताः । सृज १४१५ विसर्गे । 'विभाषा सृजिदृशोः' (सू २४०४) । ससर्जिथ–ससृष्ठ । स्रष्टा । स्रक्ष्यति । 'सृजिदृशोर्झल्यमकिति' (सू २४०५) इत्यमागमः । सृजेत् । सृज्यात् । असृाक्षीत् । टु मस्जो १४१६ शुद्धौ । मज्जति । ममज्ज । मस्जिनशोर्झलि' (सू २५१७) इति नुम् । 'मस्जेरन्त्यात्पूर्वो नुम् वाच्यः (वा ३२१) । संयोगादिलोपः । ममङ्क्थ । ममज्जिथ ।

प्रः इत्यनुवर्तते । 'कृपो रो लः' इत्यतः रो ल इति । तदाह । **गिरतेरिति** ॥ **अजादाविति** ॥ "धातोः कार्यमुच्यमानं तत्प्रत्यये भवति" इति परिभाषालब्धस्य प्रत्ययस्य अचा विशेषणात्तदादिविधिः । तेन गिराविल्यादौ नेति 'मृजेर्वृद्धिः' इति सूत्रभाष्ये स्पष्टम् । **दृङ् आदरे इति** ॥ ह्रस्वान्तोऽयम् । अनिट् । **आद्रियते इति** ॥ रिङ् इयङ् । 'ऋद्धनोः स्ये' इति इटं मत्वा आह । **आदरिष्यते इति । आदृषीष्टेति** ॥ 'उश्च' इति कित्त्वान्न गुणः । **आदृतेति** ॥ 'ह्रस्वादङ्गात्' इति सलोपः । **प्रच्छ ज्ञीप्सायामिति** ॥ ज्ञातुमिच्छा ज्ञीप्सा । अनिडयम् । **पृच्छतीति** ॥ शस्य ङित्त्वात् 'ग्रहिज्या' इति रेफस्य सम्प्रसारणं ऋकारः पूर्वरूपश्चेति भावः । **पप्रच्छतुरिति** ॥ संयोगात् परत्वेन कित्त्वाभावान्न सम्प्रसारणमिति भावः । भारद्वाजनियमात्थलि वेडिति मत्वा आह । **पप्रच्छिथ–पप्रष्ठेति** ॥ इडभावपक्षे व्रश्चादिना छस्य षः थस्य ष्टुत्वेन ठ इति भावः । पप्रच्छिव । **प्रष्टेति** ॥ छस्य व्रश्चेति षः तकारस्य ष्टुत्वेन टः । नच षत्वस्यासिद्धत्वात् पूर्वं तुकि ततः छस्य षत्वे ष्टुत्वयोः प्रट्ष्टेति स्यादिति वाच्यम् । व्रश्चेतिसूत्रे सतुक्कस्य छस्य ग्रहणात् । **किरादयो वृत्ताः इति** ॥ नचैवं सति 'किरश्च पञ्चभ्यः' इत्यत्र पञ्चग्रहणं व्यर्थं । किरादीनाम्पञ्चत्वादिति वाच्यम् । तस्य 'रुदादिभ्यस्सार्वधातुके' इत्युत्तरार्थत्वात् । सृज विसर्गे । अनिट् । सृजति । ससर्ज । सस्रजतुः । अजन्ताकारवत्त्वाभावेऽपि 'विभाषा सृजिदृशोः' इति थलि वेद इति मत्वा आह । **ससर्जिथ–ससृष्ठेति** ॥ इडभावे 'व्रश्च' इति जस्य षः थस्य ष्टुत्वेन ठः पित्त्वेन अकित्त्वात् 'सृजिदृशोः' इत्यमागम इति भावः । सस्रजिव । टु मस्जो शुद्धौ । **मज्जतीति** ॥ सस्य श्चुत्वेन शः तस्य जश्त्वेन ज इति भावः । **ममङ्क्थेति** ॥ मस्जेर्द्वित्वे हलादिशेषे ममस्ज् थ इति स्थिते 'स्कोः' इति सकारलोपे ममज् थ इति स्थिते जस्य कुत्वेन गकारे 'मस्जनशोः' इति नुमि तस्यानुस्वारे तस्य परसवर्णो ङकारः गस्य चर्त्वेन कः इति बोध्यम् । यद्यपि अकारात् परत्र नुमि सत्यपि इदं

मङ्क्ता। मङ्क्ष्यति। अमाङ्क्षीत्। अमाङ्क्ताम्। अमाङ्क्षुः। रुजो १४१७ भङ्गे। रोक्ता। रोक्ष्यति। अरौक्षीत्। अरौक्ताम्। भुजो १४१८ कौटिल्ये। रुजिवत्। छुप १४१९ स्पर्शे। छोप्ता। अच्छौप्सीत्। रुश १४२० रिश १४२१ हिंसायाम्। तालव्यान्तौ। रोष्टा। रोक्ष्यति। रेष्टा। रेक्ष्यति। लिश १४२२ गतौ। अलिक्षत्। स्पृश १४२३ संस्पर्शने। स्प्रष्टा—स्पर्ष्टा। स्प्रक्ष्यति—स्पर्क्ष्यति। अस्प्राक्षीत्—अस्पार्क्षीत्—अस्पृक्षत्। विच्छ १४२४ गतौ। गुपूधूप—' (सू २३०३) इत्यायः। आर्धधातुके वा। विच्छायति। विच्छायाञ्चकार—विविच्छ। विश १४२५ प्रवेशने। विशति। वेष्टा। मृश १४२६ आमर्शने। आमर्शनं स्पर्शः। अम्राक्षीत्—अमार्क्षीत्—अमृक्षत्। णुद १४२७ प्रेरणे। कर्त्रभिप्रायेऽपि फले परस्मैपदार्थः पुनः पाठः। षदॢ १४२८ विशरणगत्यवसादनेषु। 'सीदति' इत्यादि भौवादिकवत्। इह पाठो नुम्विकल्पार्थः। सीदती—सीदन्ती। ज्वलादौ पाठस्तु णार्थः। सादः। स्वरार्थश्च। शबनुदात्तः। शस्तूदात्तः। शदॢ १४२९ शातने। स्वरार्थ एव पुनः पाठः। शता तु नास्ति। 'शदेः शितः' (सू २३६२) इत्यात्मनेपदोक्तेः।

सिध्यति। तथापि अन्त्यात् पूर्वो नुमित्यस्य मध्य इत्यादौ नलोपः फलम्। अन्यथा उपधात्वाभावान्नस्य लोपो न स्यादिति भावः। एवं **मङ्क्तेति** ॥ मङ्क्षयति इत्यत्र तु सस्य षत्वं विशेषः। 'रुजो भङ्गे' इत्यारभ्य 'विच्छ गतौ' इत्यतः प्रागनिटः। 'अनुदात्तस्य चर्दुपधस्य' इत्यम्विकल्पं मत्वा आह। **स्प्रष्टा-स्पर्ष्टेति** ॥ णुद प्रेरणे। णोपदेशोऽयम्। 'विश प्रवेशने' इत्यारभ्य 'शदॢ शातने' इत्यन्ताः अनिटः। तत्र अदुपधस्य थलि वेट्। अन्यस्य तु नित्यं नेट्। मृशेः 'अनुदात्तस्य च' इत्यम्विकल्पः। तदाह। **अम्राक्षीत्-अमार्क्षीदिति** ॥ 'स्पृशमृशे' इति सिज्वेति भावः। सिजभावे 'शलइगुपधात्' इति क्सं मत्वा आह। **अमृक्षदिति** ॥ णुदधातुर्णोपदेशः। ननु तनादिगण एवास्मिन् स्वरितेत्सु पठितस्य किमर्थमिह पाठ इत्यत आह। **कर्त्रभिप्रायेऽपीति** ॥ षदॢधातोर्भ्वादौ पठितादेव सीदति इत्यादि सिद्धेः इह पाठो व्यर्थ इत्यत आह। **इह पाठः इति** ॥ सीदन्ती इति शत्रन्तात् शविकरणात् ङीपि 'आच्छीनद्योः' इति नुम् विकल्पार्थ इह पाठ इत्यर्थः। भ्वादावेव पाठे तु 'शप्श्यनोर्नित्यम्' इति नित्यो नुम् स्यादिति भावः। तर्हि भ्वाद्यन्तर्गणे ज्वलादावस्य पाठो व्यर्थ इत्यत आह। **ज्वलादाविति** ॥ 'ज्वलितिकसन्तेभ्यः' इति कर्तरि णप्रत्ययार्थ इति भावः। तदुदाहृत्य दर्शयति। **सादः इति** ॥ उभयत्र पाठस्य फलान्तरमाह। **स्वरार्थश्चेति** ॥ तदेव विशदयति। **शबनुदात्तः इति** ॥ 'अनुदात्तौ सुप्पितौ' इति पित्स्वरेणेति भावः। **शस्तूदात्तः इति** ॥ 'प्रत्यय आद्युदात्तश्च' इत्यनेनेति भावः। ननु 'शदॢ शातने' इत्यस्य भ्वादौ पाठादेव सिद्धे इह पाठो व्यर्थ इत्यत आह। **स्वरार्थ एवेति** ॥ प्रागुक्तपित्त्वापित्त्वकृतस्वरभेदार्थ एवेत्यर्थः। **ननु शत्रन्तात् ङीपि उक्तरीत्या नुम्विकल्पार्थोऽपि कृतो न स्यादित्यत आह। शता तु**

अथ षट् स्वरितेतः । मिल १४३० सङ्गमे । 'मिल संश्लेषणे' इति पठितस्य पुनः पाठः कर्त्रभिप्राये तङर्थः । मिलति । मिलते । मिमेल । मिमिले । मुच्लृ १४३१ मोक्षणे ।

२५४२ । शे मुचादीनाम् । (७-१-५९)

नुम् स्यात् । मुञ्चति । मुञ्चते । मोक्ता । मुच्यात् । मुक्षीष्ट । अमुचत् । अमुक्त । अमुक्षाताम् । लुप्लृ १४३२ छेदने । लुम्पति । लुम्पते । अलुपत् । अलुप्त । विद्लृ १४३३ लाभे । विन्दति । विन्दते । विवेद । विविदे । व्याघ्रभूत्यादिमते सेट्कोऽयम् । वेदिता । भाष्यादिमतेऽनिट्कः । वेत्ता । परिवेत्ता । परिर्वर्जने । ज्येष्ठं परित्यज्य दारानग्नींश्च लब्धवानित्यर्थः । तृन्तृचौ । लिप १४३४ उपदेहे । उपदेहो वृद्धिः । लिम्पति । लिम्पते । लेप्ता । 'लिपिसिचि—' (सू २४१८) इत्यङ् । तङि तु वा । अलिपत् । अलिपत—अलिप्त । षिच १४३५ क्षरणे । सिञ्चति । सिञ्चते । असिचत् । असिचत—असिक्त । अभिषिञ्चति । अभ्यषिञ्चत् । अभिषिषेच ।

अथ त्रयः परस्मैपदिनः । कृती १४३६ छेदने । कृन्तति । चकर्थ । कर्तिता । कर्तिष्यति—कर्त्स्यति । अकर्तीत् । खिद १४३७ परिघाते । खिन्दति । चिखेद । खेत्ता । अयं दैन्ये दिवादौ रुधादौ च । पिशि १४३८ अवयवे । पिंशति । पेशिता । अयं दीपनायामपि । 'त्वष्टा रूपाणि पिंशतु' वृत् । मुचादयस्तुदायश्च । । इति तिङन्ततुदादिप्रकरणम् ।

नास्तीति ॥ शदेर्लटश्शानजेव नतु शत्रादेश इत्यर्थः । कुत इत्यत आह । **शदेरिशतः इतीति** ॥ मिल सङ्गमे । **पठितस्येति** ॥ अस्मिन्नेव तुदादिगणे परस्मैपदिषु पठितस्येत्यर्थः । **तङर्थः इति** ॥ पूर्वत्र पाठस्तु कर्त्रभिप्रायेऽपि परस्मैपदार्थ इत्यर्थः । 'मुच्लृ मोक्षणे' । **शे मुचादीनाम्** ॥ **नुम् स्यादिति** ॥ शेषपूरणम् । 'इदितो नुम्' इत्यतस्तदनुवृत्तेरिति भावः । **मुक्षीष्टेति** ॥ 'लिङ्सिचौ' इति कित्त्वान्न गुण इति भावः । **अमुचदिति** ॥ लृदित्त्वादङिति भावः । लुङि तङि आह । **अमुक्तेति** ॥ 'झलो झलि' इति सिज्लोप इति भावः । लिप उपदेहे । **तङि तु वेति** ॥ 'आत्मनेपदेष्वन्यतरस्याम्' इत्यनेनेति शेषः । 'षिच क्षरणे' । **अभिषिञ्चतीति** ॥ 'उपसर्गात्सुनोति' इति षः । **अभ्यषिञ्चदिति** ॥ 'प्राक्सितादड्व्यवायेऽपि' इति षत्वम् । **अभिषिषेचेति** ॥ 'स्थादिष्वभ्यासेन' इति षः । **कृती छेदने इति** ॥ ईदित्त्वं 'श्रीदितः' इत्येतदर्थम् । 'सेऽसिचि' इति वेडिति मत्वा आह । **कर्तिष्यति—कर्त्स्यतीति** । **पिशि अवयवे इति** ॥ अवयवक्रियायामित्यर्थः । **रूपाणि पिंशत्विति** ॥ प्रकाशयत्वित्यर्थः ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदी-
व्याख्यायां बालमनोरमायां शविकरणं समाप्तम् ।

। श्रीरस्तु ।

॥ अथ तिङन्तरुधादिप्रकरणम् ॥

रुधिर् १४३९ आवरणे । नव स्वरितेतः इरितश्च ।

२५४३ । रुधादिभ्यः श्नम् । (३-१-७८)

शपोऽपवादः । मित्त्वादन्त्यादचः परः । नित्यत्वाद्गुणं बाधते । रुणद्धि । 'श्नसोरल्लोपः' (सू २४६९) । णत्वस्यासिद्धत्वादनुस्वारः परसवर्णः । तस्यासिद्धत्वाण्णत्वं न । 'न पदान्त—' (सू ५१) इति सूत्रेणानुस्वारपरसवर्णयोरल्लोपो न स्थानिवत् । रुन्धः । रुन्धन्ति । रुन्धे । रोद्धा । रोत्स्यति । रोत्स्यते । रुणद्धु । रुन्धात् । रुन्धि । रुणधानि । रुणधै । अरुणत् । अरुन्धाम् । अरुणत्—अरुणः । अरुणधम् । अरुधत्—अरौत्सीत् । अरुद्ध । भिदिर् १४४०

अथ श्नम्विकरणा धातवो निरूप्यन्ते । **रुधिरित्यादिना । रुधादिभ्यः श्नम् ॥** कर्त्रर्थे सार्वधातुके परे रुधादिभ्यः श्नम्प्रत्ययस्स्यात् स्वार्थे इत्यर्थः । तदाह । **शपोऽपवादः इति ॥** श्नमि शंमावितौ । मित्त्वस्य फलमाह । **मित्त्वादन्त्यादचः परः इति ॥** प्रत्ययत्वात् शकारस्येत्संज्ञा । शकारनिर्देशस्य 'श्नसोरल्लोपः' 'श्नान्न लोपः' इत्यत्र विशेषणार्थः । नतु सार्वधातुकसञ्ज्ञार्थः । फलाभावात् । नच 'सार्वधातुकमपित्' इति कित्त्वे गुणनिषेधः फलमिति शङ्क्यम् । श्नमः पूर्वस्य इगन्तस्य अङ्गत्वाभावादेव गुणाप्रसक्तेः । ननु श्नमः प्राक् परत्वाल्लघूपधगुणे कृते पश्चात् श्नमि रोणन्धि इति स्यादित्यत आह । **नित्यत्वाद्गुणं बाधते इति ॥** कृते अकृते च गुणे प्रवृत्तेः श्नम् नित्यः । तस्मिन् सति लघूपधत्वाभावान्न गुण इति भावः । **रुणद्धीति ॥** रुनध् ति इति स्थिते 'झषस्तथोः' इति धत्वे णत्वमिति भावः । रुनध् तस् इति स्थिते प्रक्रियां दर्शयति । **श्नसोरल्लोपः इति ॥** ङिति सार्वधातुके तद्विधेरिति भावः । रुन्ध् तस् इति स्थिते नस्य णत्वमाशङ्क्य आह । **णत्वस्यासिद्धत्वादिति ॥** ननु कृते परसवर्णे तस्य नस्य णत्वमस्त्वित्यत आह । **तस्यासिद्धत्वादिति ॥** परसवर्णसम्पन्ननस्येत्यर्थः । नन्विह अल्लोपस्य 'अचः परस्मिन्' इति स्थानिवत्त्वात् कथमनुस्वारपरसवर्णावित्यत आह । **न पदान्तेति । रुन्धः इति ॥** 'झषस्तथोः' इति धः । **रुन्धन्तीति ॥** रुणत्सि । रुन्धः । रुन्ध । रुणद्धि । रुन्ध्वः । रुन्ध्मः । **रुन्धे इति ॥** रुन्धाते । रुन्धते । रुन्त्से । रुन्धाथे । रुन्द्धे । रुन्धे । रुन्ध्वहे । रुन्ध्महे । रुरोध । रुरोधिथ । **अरुणदिति ॥** लङि हल्ङ्यादिना तिपो लोपः । धस्य चर्त्वविकल्पः । सिपि तु हल्ङ्यादिना लुप्ते 'दश्च' इति रुत्वविकल्पं मत्वा आह । **अरुणत्-अरुणः इति ॥** रुन्ध्यात् । रुन्धीत । रुत्सीष्ट । इरित्त्वादङ्विकल्पं मत्वा आह । **अरुधत्-अरौत्सीदिति ॥** अङभावे सिचि हलन्तलक्षणा वृद्धिः । लुङस्तङ्याह । **अरुद्धेति ॥**

विदारणे । भिनत्ति । भिन्ते । भेत्ता । भेत्स्यति । अभिनत्--अभिनः । अभिनदम् । अभिन्त । अभिदत्--अभैत्सीत् । अभित्त । छिदिर् १४४१ द्वैधीकरणे । अच्छिदत्--अच्छैत्सीत् । अच्छित्त । रिचिर् १४४२ विरेचने । रिणक्ति । रिङ्क्ते । रिरेच । रिरिचे । रेक्ता । अरिणक् । अरिचत्--अरैक्षीत् । अरिक्त । विचिर् १४४३ पृथग्भावे । विनक्ति । विङ्क्ते । क्षुदिर् १४४४ सम्पेषणे । क्षुणत्ति । क्षुन्ते । क्षोत्ता । अक्षुदत्--अक्षौत्सीत् । अक्षुत्त । युजिर् १४४५ योगे । योक्ता । उ छृदिर् १४४६ दीप्तिदेवनयोः । छृणत्ति । छृन्ते । चच्छर्द । 'सेऽसिचि—' (सू २५०६) इति वेट् । चच्छृदिषे--चच्छृत्से । छर्दिता । छर्दिष्यति--छर्त्स्यति । अच्छृदत्--अच्छर्दित् । अच्छर्दिष्ट । उ तृदिर् १४४७ हिंसानादरयोः । तृणत्तीत्यादि । कृती १४४८ वेष्टने । परस्मैपदी । कृणत्ति । आर्धधातुके तौदादिकवत् । ञि इन्धी १४४९ दीप्तौ । त्रय आत्मनेपदिनः ।

२५४४ । श्नान्न लोपः । (६-४-२३)

श्नमः परस्य नस्य लोपः स्यात् । श्नसोरल्लोपः । (सू २४६९) । इन्धे । इन्त्से । इन्धिता । इनद्धै । ऐन्ध । ऐन्धाः । खिद १४५० दैन्ये ।

'झलो झलि' इति सिज्लोपः । **भिनत्तीति** ॥ भिन्तः । भिन्दन्ति । भिनत्सि । भिन्थः । भिनद्मि । भिन्द्वः । भिन्द्मः । **भिन्ते इति** ॥ भिन्दाते । भिन्दते । भिन्त्से । भिन्दाथे । भिन्ध्वे । भिन्दे । भिन्द्वहे । बिभेद । बिभेदिथ । बिभिदिव । बिभिदे । बिभिदिषे । **अभिन्तेति** ॥ लङि तङि रूपम् । **अभिनत्-अभिनः इति** ॥ 'दश्च' इति रुर्वेति भावः । लुङः परस्मैपदे आह । **अभिदत्-अभैत्सीदिति** ॥ इरित्त्वादङ् वेति भावः । लुङि तङ्याह । **अभित्तेति** ॥ 'झलो झलि' इति सिज्लोपः । अभित्साताम्इत्यादि । **उ छृदिरिति** ॥ उकार इत् । 'उदितो वा' इति क्त्वायामिड्विकल्पार्थः । ञि इन्धी दीप्तौ । ईदित्त्वं 'श्रीदितः' इत्येतदर्थम् । श्नमि कृते इन न् ध् ते इति स्थिते । **श्नान्न लोपः** ॥ श्नम्प्रत्ययैकदेशस्य श्न इत्यस्य श्नादिति पञ्चमी । नेति लुप्तषष्ठीकम् । तदाह । **श्नमः परस्य नस्येति** ॥ नकारस्येत्यर्थः । अकार उच्चारणार्थः । तथाच इन ध् ते इति स्थिते आह । **श्नसोरल्लोपः इति** ॥ तथाच इन्ध् ते इति स्थिते 'झषस्तथोः' इति तकारस्य धत्वे पूर्वधस्य जश्त्वे परिनिष्ठितमाह । **इन्धे इति** ॥ यद्यपि 'अनिदिताम्' इत्येवात्र नलोपः सिद्ध्यति । तथापि अनक्ति इत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तमिति भावः । इन्धते । इन्ध्वे । इन्धाम् । इन्त्स्व । इन्ध्वम् । **इनद्धै इति** ॥ श्नमि उत्तमस्य इटः एत्वे आटि वृद्धौ इन न् ध् ऐ इति स्थिते श्नान्नलोपे आटः पित्त्वेन ङित्त्वाभावात् 'श्नसोरल्लोपः' इत्यभावे रूपमिति भावः । अत्र नलोपार्थमपि श्नान्न

खिन्ते । खेत्ता । विद १४५१ विचारणे । विन्ते । वेत्ता ।

अथ परस्मैपदिनः । शिष्ल १४५२ विशेषणे । शिनष्टि । शिंष्टः । शिंषन्ति । शिशेषिथ । शेष्टा । शेक्ष्यति । हेर्धिः । जश्त्वम् । ष्टुत्वं 'झरो झरि—' (सू ७१) इति वा डलोपः । अनुस्वारपरसवर्णौ शिण्ढि—शिण्ड्ढि । शिनषाणि । अशिनट् । लदित्त्वादङ् । अशिषत् । पिष्ल १४५३ संचूर्णने । शिषिवत् । पिनष्टि । भञ्जो १४५४ आमर्दने । भनक्ति । बभञ्जिथ । बभङ्क्थ । भङ्क्ता । भुज १४५५ पालनाभ्यवहारयोः । भुनक्ति । भोक्ता । भोक्ष्यति । अभुनक् । तृह १४५६ हिंसि १४५७ हिंसायाम् ।

लोप इत्यावश्यकम् । आटः पित्त्वेन ङित्त्वाभावात् 'अनिदिताम्' इत्यस्याप्रवृत्तेः । इनधावहै । लङ्याह । **ऐन्धेति । ऐन्धाः इति** ॥ 'झषस्तथोः' इति थस्य धः । इन्धीत । लुङि ऐन्धिष्ट । शिष्ल विशेषणे । अनिट् । **शिशेषिथेति** ॥ अजन्ताकारवत्त्वाभावात् क्रादिनियमान्नित्यमिट् । शि न ष् हि इति स्थिते अल्लोपे शि न् ष् हि इति स्थिते आह । **हेर्धिरिति** ॥ शिन् ष् धि इति स्थिते आह । **जश्त्वमिति** ॥ 'झलां जश् झशि' इति षस्य ड इति भावः । **ष्टुत्वमिति** ॥ धस्य ढ इति भावः । यद्यपि जश्त्वस्यासिद्धत्वात्ततः प्रागेव ष्टुत्वस्य उपन्यासो युक्तः । तथापि जश्त्वं ष्टुत्वमिति प्रक्रियाप्रदर्शनमात्रपरं क्रमस्तु न विवक्षितः । **झरः इति** ॥ जश्त्वसम्पन्नस्य डस्य लोपविकल्प इत्यर्थः । **अनुस्वारपरसवर्णाविति** ॥ नकारस्य 'नश्च' इत्यनुस्वारे सति तस्य परसवर्णो णकार इत्यर्थः । 'न पदान्त' इति निषेधान्नाल्लोपः स्थानिवत् । ढस्य लोपपक्षे उदाहरति । **शिण्ढीति** ॥ ढस्य लोपाभावे उदाहरति । **शिण्ड्ढीति** ॥ वस्तुतस्तु सानुस्वार एव पाठ उचितः 'दीर्घादाचार्याणाम्' इत्युत्तरं 'अनुस्वारस्य ययि परसवर्णः' 'वा पदान्तस्य' 'तोर्लि' 'उदः स्थास्तम्भ्वोः पूर्वस्य' ज्ञेयो होऽन्यतरस्याम् । 'शश्छोटि' इति षट्सूत्रपाठोत्तरं 'झलाञ्जश्झशि' 'अभ्यासे चर्च' 'खरि च' 'वावसाने' 'अणोऽप्रगृह्यस्यानुनासिकः' इति पञ्चसूत्रपाठ इति भाष्यसम्मताष्टाध्यायीपाठे परसवर्णदृष्ट्या 'झलाञ्जश्झशि' इत्यस्य 'झरो झरि' इत्यस्य चासिद्धत्वेन यय्परत्वाभावे परसवर्णाप्राप्तेरिति शब्देन्दुशेखरे स्थितम् । शिंष्टात् । शिंष्टम् । शिंष्ट । **शिनषाणीति** ॥ आटः पित्त्वेन ङित्त्वाभावात् 'श्नसोः' इत्यल्लोपो नेति भावः । **अशिनडिति** ॥ लङस्तिपो हल्ङ्यादिलोपे षस्य जश्त्वमिति भावः । अशिंष्टाम् । अशिंषन् । अशिनट् । अशिंष्टम् । अशिंष्ट । अशिनषम् । अशिंष्व । अशिंष्म । भञ्जो आमर्दने । **भनक्तीति** ॥ श्नमि भ न न् ज् ति इति स्थिते 'श्नान्न लोपः' इति नलोप इति भावः । भङ्क्तः । भञ्जन्तीत्यादूह्यम् । भारद्वाजनियमात्थलि वेडिति मत्वा आह । **बभञ्जिथ-बभङ्क्थेति** ॥ **भङ्क्तेति** ॥ अनिडिति भावः । **भुज पालनेति** ॥ 'भुजोऽनवने' इति तङ् वक्ष्यते । भुङ्क्ते । भुञ्जाते इत्यादि । तृह, हिंसि, हिंसायाम् । ऋदुपधः ।

२५४५ । तृणह् इम् । (७-३-९२)

तृहः श्नमि कृते इमागमः स्याद्धलादौ पिति । तृणेढि । तृण्ढः । ततर्ह । तर्हिता । अतृणेट् । हिनस्ति । जिहिंस । हिंसिता । उन्दी १४५८ क्लेदने । उनत्ति । उन्तः । उन्दन्ति । उन्दाञ्चकार । औनत् । औन्ताम् । औन्दन् । औनः—औनत् । औनदम् । अञ्जू १४५९ व्यक्तिमर्षणकान्तिगतिषु । अनक्ति । अङ्क्तः । अञ्जन्ति । आनञ्ज । आनञ्जिथ—आनङ्क्थ । अङ्क्ता । अञ्जिता । अङ्ग्धि । अनजानि । आनक् ।

सेट् । श्नमि कृते णत्वे तृणह् ति इति स्थिते । **तृणह इम्** ॥ तृणह इति षष्ठी । कृतश्नमः तृहधातोर्निर्देशः । 'नाभ्यस्तस्य' इत्यतः पितीति 'उतो वृद्धिः' इत्यतः हलीति चानुवर्तते । फलितमाह । **तृहः श्नमि कृते इति** ॥ मित्त्वादचः परः । श्नमि कृते इत्यनुक्तौ तु येन नाप्राप्तिन्यायेन इमागमेन श्नम् बाध्येत । "सत्यपि सम्भवे बाधनम्भवति" इति न्यायात् । अन्यथा "ब्राह्मणेभ्यो दधि दीयताम् । तक्रं कौण्डिन्याय" इत्यत्र तक्रेण दधि न बाध्येत । श्नमा शप्च न बाध्येत । देशभेदेन उभयसम्भवादिति भावः । **तृणेढीति** ॥ तृणह् ति इति स्थिते इमागमे आद्गुणे तृणे ह् ति इति स्थिते । ढत्वधत्वष्टुत्वढलोपा इति भावः । **तृण्ढः इति** ॥ तसि श्नमि कृते तृणह् तस् इति स्थिते तसः अपित्त्वादिमागमाभावे श्नसोः' इत्यल्लोपे ढत्वधत्वष्टुत्वढलोपा इति भावः । तृंहन्ति । तृणेक्षि । तृण्ढः । तृण्ढ । तृणेह्मि । तृंह्वः । तृंह्मः । **ततर्हेति** ॥ ततृहतुः । ततर्हिथ । ततृहिव । **तर्हितेति** ॥ सेडिति भावः । तर्हिष्यति । तृणेढ्—तृण्ढात् । तृण्ढाम् । तृंहन्तु । तृण्ढि—तृण्ड्ढि । तृण्ढात् । तृण्डम् । तृण्ढ । तृणहानि । तृणहाव । तृणहाम । **अतृणेडिति** ॥ लङस्तिप श्नमि इम् हल्ङ्यादिलोपः ढत्वजश्त्वे इति भावः । अतृण्ढाम् । अतृंहन् । अतृणेट् । अतृण्ढम् । अतृण्ढ । अतृणहम् । अतृंह्व । अतृंह्म । तृंह्यात् । तृह्यात् । अतर्हीत् । अतर्हिष्यत् । हिसिधातोरुदाहरति । **हिनस्तीति** ॥ इह श्नमि इदित्त्वान्नुमि च कृते 'श्नान्नलोपः' इति नुमो लोप इति भावः । हिंस्तः । हिंसन्ति । हिनस्सि । हिंस्थः । हिंस्थ । हिनस्मि । हिंस्वः । हिंस्मः । **जिहिंसेति** ॥ किति इदित्त्वान्नलोपो न । जिहिंसतुः । जिहिंसिथ । **हिंसितेति** ॥ सेडिति भावः । हिंसिष्यति । हिनस्तु । हिंस्ताम् । हौ श्नमि नुमि कृते 'श्नान्नलोपः' इति नुमो लोपे हेरपित्त्वेन ङित्त्वात् 'श्नसोः' इत्यल्लोपे 'धि च' इति सलोपे, हिन्धि इति रूपम् । हिंस्तात् । हिनसानि । अहिनत् । अहिंस्ताम् । अहिंसन् । सिपि रुर्वा । अहिनः—अहिनत् । अहिंस्तम् । अहिनसम् । अहिंस्व । हिंस्यात् । हिंस्याताम् । आशीर्लिङि श्नमभावान्नुमेव । इदित्त्वान्नलोपो न । हिंस्यादित्येव । हिंस्यास्ताम् । अहिंसीत् । अहिंसिष्यत् । उन्दी क्लेदने । **उन्दन्तीति** ॥ उनत्सि । उन्थः । उनद्मि । उन्द्वः । **उन्दामिति** ॥ इजादेश्चेत्याम् । उन्दिता । उन्दिष्यति । उनत्तु—उन्तात् । उन्धि । उनदानि । लङ्याह । **औनदिति** ॥ औन्ताम् । औन्दन् । औनः—औनत् । औनदम् । औन्द्व । उन्द्यात् । उद्यात् । अञ्जूधातुः

२५४६। अञ्जेः सिचि। (७-२-७१)

अञ्जेः सिचो नित्यमिट् स्यात्। आञ्जीत्। तञ्चू १४६० सङ्कोचने। तङ्क्ता—तञ्चिता। ओ विजी १४६१ भयचलनयोः। विनक्ति। विङ्क्तः। 'विज इट्' (सू २५३६) इति डित्त्वम्। विविजिथ। विजिता। अविनक्। अविजीत्। वृजी १४६२ वर्जने। वृणक्ति। वर्जिता। पृची १४६३ सम्पर्के। पृणक्ति। पपर्च।

इति तिङन्तरुधादिप्रकरणम्।

नोपधः। कृतपरसवर्णनिर्देशः। ऊदित्त्वाद्वेट्। **अनक्तीति** ॥ श्नमि कृते परसवर्णस्यासिद्धत्वात् 'श्नान्न लोपः' इति नकारलोपे जस्य कुत्वेन गः तस्य चर्त्वेन कः इति भावः। **अङ्क्तः इति** ॥ नलोपे अल्लोपे जस्य कुत्वेन गः गस्य चर्त्वेन कः श्नमो नस्य परसवर्णो ङ इति भावः। **अञ्जन्तीति** ॥ नलोपाल्लोपौ। श्नमो नस्य परसवर्णो ञ इति भावः। अनङ्क्षि। अङ्क्थः। अनञ्ज्मि। अञ्ज्वः। **अङ्ग्धीति** ॥ हौ श्नमि धिभावे नलोपाल्लोपौ। जस्य कुत्वेन गकारः नस्य परसवर्णो ङकार इति भावः। **अनजानीति** ॥ श्नान्नलोपः। आटः पित्त्वादल्लोपो न। लङ्याह। **आनगिति** ॥ आङ्क्ताम्। आञ्जन्। अञ्ज्यात्। अज्यात्। **अञ्जेरिस्सिचि** ॥ 'इडत्यर्ति' इत्यतः इडित्यनुवर्तते। ऊदित्त्वादेव सिद्धे नित्यार्थमिदम्। तदाह। **अञ्जेरित्यादिना** ॥ तञ्चू सङ्कोचने। नोपधः कृतपरसवर्णनिर्देशः। अञ्जूवद्रूपाणि। यथायोग्यमूह्यानि। **ओ विजीति** ॥ ओकार इत्। अनिट्सु इरितो ग्रहणादयं सेट् ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदी-
व्याख्यायां बालमनोरमायां श्नम्विकरणं समाप्तम्।



। श्रीरस्तु ।

॥ अथ तिङन्ततनादिप्रकरणम् ॥

अथ सप्त स्वरितेतः । तनु १४६४ विस्तारे । 'तनादिकृञ्भ्य उः' (सू २४६६) । तनोति । तन्वः–तनुवः । तनुते । ततान । तेने । तनु । अतनीत्–अतानीत् ।

२५४७ । तनादिभ्यस्तथासोः । (२-४-७९)

तनादेः सिचो वा लुक्स्यात्तथासोः । थासा साहचर्यादेकवचनतश्-ब्दो गृह्यते । तेनेह न । यूयमतनिष्ट–अतानिष्ट । 'अनुदात्तोपदेश—'

अथ उविकरणधातवो निरूप्यन्ते । तनुधातुरुदित् । 'उदितो वा' इति प्रयोजनम् । **तनादिकृञ्भ्य उः** ॥ कर्त्रर्थे सार्वधातुके तनादिभ्यः कृञश्च उप्रत्ययः स्यात् स्मार्थे इत्यर्थः । शपोऽपवादः । **तनोतीति** ॥ उप्रत्ययस्य तिपमाश्रित्य गुणः । तसादौ तु ङित्त्वान्न गुणः । तनुतः । झोऽन्तादेशे कृते उवङम्बाधित्वा 'हुश्नुवोः' इति यण् । तन्वन्ति । तनोषि । तनुथः । तनुथ । तनोमि । 'लोपश्चास्यान्यतरस्याम्' इत्युकारलोपविकल्पमभिप्रेत्याह । **तन्वः–तनुवः इति** ॥ तङ्याह । **तनुते इति** ॥ तन्वाते । तन्वते । तनुषे । तन्वाथे । तनुध्वे । तन्वे । तनुवहे । तन्वहे । तनुमहे । तन्महे । **ततानेति** ॥ तेनतुः । तेनिथ । तेन । तेनिव । तङ्याह । **तेने इति** ॥ तेनाते । तेनिरे । तेनिषे । तेनाथे । तेनिध्वे । तेने । तेनिवहे । तेनिमहे । तनिता । तनिष्यति । तनिष्यते । तनोतु–तनुतात् । तनुताम् । तन्वन्तु । 'उतश्च प्रत्ययात्' इति हेर्लुकं मत्वा आह । **तन्विति** ॥ तनुतात् । तनुतम् । तनुत । तनवानि । तनवाव । तनवाम । अतनोत् । अतनुताम् । अतन्वन् । अतनोः । अतनवम् । अतन्व । अतनुव । तनुयात् । तन्वीत । तनिषीष्ट । अतो हलादेरिति वृद्धिविकल्पं मत्वा आह । **अतनीत्–अतानीदिति** ॥ अतनिष्टाम् । अतनिषुः । अतनीः । अतनिष्टम् । अतनिष्ट । अतनिषम् । अतनिष्व । अतनिष्म । वृद्धिपक्षे अतानिष्टामित्यादि । अतनिष्यत् । लुङः प्रथमैकवचने मध्यमपुरुषैकवचने च विशेषमाह । **तनादिभ्यस्तथासोः**॥ 'गातिस्था'इत्यतस्सिच इति'ण्यक्षत्रियार्ष'इत्यतो लुङीति 'विभाषा घ्राधेट्' इत्यतो वेति चानुवर्तते । तदाह । **तनादेरित्यादिना** ॥ **एकवचनतशब्दो गृह्यते इति** ॥ ननु लुङादेशपरस्मैपदमध्यमपुरुषबहुवचनतादेशोऽपीत्यर्थः । **यूयमिति** ॥ लुङि मध्यमपुरुषबहुवचने सिचि वृद्धिविकल्पे सति अतनिष्ट, अतानिष्टेत्यत्र सिचो नायं लुग्विकल्प इत्यर्थः । तदेवं प्रत्युदाहरणमुक्त्वा सूत्रस्योदाहरणं वक्ष्यन् प्रक्रियां दर्शयति । **अनुदात्तोपदेशेत्यत्र नासिकलोपः । तङीति** ॥ तङि प्रथमैकवचने तशब्दे मध्यमपुरुषैकवचने थासि च सिचो लुकि 'अनुदात्तोपदेश' इति नकारस्य लोप इत्यर्थः । तदाह । **अतत**

(सू २४२८) इत्यनुनासिकलोपः । तङि । अतत–अतनिष्ट । अतथाः–अतनिष्ठाः । षणु १४६५ दाने । सनोति । सनुते । 'ये विभाषा' (सू २३१९) । सायात्–सन्यात् । 'जनसन—' (२५०४) इत्यात्त्वम् । असात–असनिष्ट । असाथाः–असनिष्ठाः । क्षणु १४६६ हिंसायाम् । क्षणोति । क्षणुते । 'ह्मयन्त—' (सू २२९९) इति न वृद्धिः । अक्षणीत् । अक्षत–अक्षणिष्ट । अक्षथाः–अक्षणिष्ठाः । क्षिणु १४६७ च । उप्रत्ययनिमित्तो लघूपधगुणः । 'संज्ञापूर्वको विधिरनित्यः' (९४) इति न भवतीत्यत्रेयादयः । भवत्येवेत्यन्ये । क्षिणोति–क्षेणोति । क्षेणितासि । क्षेणितासे । अक्षेणीत् । अक्षित–अक्षेणिष्ट । ऋणु १४६८ गतौ । ऋणोति–अर्णोति । अर्णुतः । अर्णुवन्ति । आनर्ण । आनृणे । अर्णितासि । आर्णीत् । आर्त–आर्णिष्ट । आर्थाः–आर्णिष्ठाः । तृणु १४६९ अदने । तृणोति–तर्णोति । तृणुते–तर्णुते । घृणु १४७० दीप्तौ । जघर्ण । जघृणे ।

अथ द्वावनुदात्तेतौ । वनु १४७१ याचने । वनुते । ववने । चान्द्रमते परस्मैपदी । वनोति । ववान । मनु १४७२ अवबोधने । मनुते । मेने । डु कृञ् १४७३ करणे । करोति । 'अत उत्सार्वधातुके' (सू २४६७) कुरुतः । यण् 'न भकुर्छुराम्' (सू १६२९) इति न दीर्घः । कुर्वन्ति ।

२५४८ । नित्यं करोतेः । (६-४-१०८)

अतनिष्टेति ॥ **अतथाः–अतनिष्ठाः इति च** ॥ अतनिषाथामित्यादि सुगमम् । 'षणु दाने' । षोपदेशोऽयम् । तनुवद्रूपाणि । **असातेति** ॥ सिचो लुक्पक्षे रूपम् । **असनिष्टेति** ॥ इट् । झलादिपरकत्वाभावादात्त्वनेति भावः । क्षणुधातुरदुपधः । "वज्रेऽध्वर्युः क्षण्वीत" इति तैत्तिरीये । **क्षिणु चेति** ॥ इदुपधः । अयमपि हिंसायामित्यर्थः । "वज्रेऽध्वर्युः क्षिण्वीत" इति शाखान्तरं शाबरभाष्ये उदाहृतम् । ननु क्षिणोतीत्यत्र उप्रत्ययमाश्रित्य इकारस्य लघूपधगुणः कस्मान्नेत्यत आह । **उप्रत्ययनिमित्तः इति** ॥ 'ऋणु गतौ' । अत्रापि क्षणुवत् । मतभेदाल्लघूपधगुणतदभावौ । तदाह । **ऋणोति–अर्णोतीति** ॥ एवमग्रेऽपि । **अर्णुवन्तीति** ॥ संयोगपूर्वकत्वात् 'हुश्नुवोः' इति न यणिति भावः । डु कृञ् करणे । **करोतीति** ॥ उप्रत्ययमाश्रित्य ऋकारस्य गुणः रपरत्वम् । उकारस्य तु तिपमाश्रित्य गुणः । **कुरुतः इति** ॥ तसो ङित्त्वादुकारस्य न गुणः । कुरु अन्ति इति स्थिते उवङमाशङ्क्य आह । **यणिति** ॥ 'हुश्नुवोः' इत्यनेनेति शेषः। उकारस्य यणि कुर्व् अन्ति इति स्थिते 'हलि च' इति दीर्घमाशङ्क्य आह । **नभेति** ॥ वसि मसि च 'लोपश्चास्यान्यतरस्याम्' इत्युकारलोपविकल्पे प्राप्ते । **नित्यं करोतेः** ॥ 'उतश्च प्रत्य-

करोतेः प्रत्ययोकारस्य नित्यं लोपः स्याद्ध्वयोः परयोः । कुर्वः । कुर्मः । चकर्थ । चकृव । कर्ता । करिष्यति ।

२५४९ । ये च (६-४-१०९)

कृञ उलोपः स्याद्यादौ प्रत्यये परे । कुर्यात् । आशिषि क्रियात् । कृषीष्ट । अकार्षीत् । 'तनादिभ्यः—' (सू २५४७) इति लुकोऽभावे 'ह्रस्वादङ्गात्' (सू २३६९) इति सिचो लोपः । अकृत । अकृथाः ।

२५५० । संपरिभ्यां करोतौ भूषणे । (६-१-१३७)

२५५१ । समवाये च । (६-१-१३८)

सम्परिपूर्वस्य करोतेः सुट् स्याद्भूषणे सङ्घाते चार्थे । संस्करोति । अलङ्करोतीत्यर्थः । संस्कुर्वन्ति । सङ्घीभवन्तीत्यर्थः । संपूर्वस्य क्वचिदभूषणेऽपि सुट् । 'संस्कृतं भक्षाः' (सू १२१७) इति ज्ञापकात् । 'परिनिविभ्यः—' (सू २२७५) इति षः । परिष्करोति । 'सिवादीनां वा—' (सू २३५९) । पर्यष्कार्षीत्—पर्यस्कार्षीत् ।

२५५२ । उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च । (६-१-१३९)

उपात्कृञः सुट् स्यादेष्वर्थेषु । चात्प्रागुक्तयोरर्थयोः । प्रतियत्नो गुणाधानम् । विकृतमेव वैकृतं विकारः । वाक्यस्याध्याहारः आकाङ्क्षितैकदेशपूरणम् ।

यात्' इत्यनुवर्तते । 'लोपश्चास्यान्यतरस्याम्' इत्यतः लोपः म्वोरिति च । तदाह । **करोतेरिति** ॥ **चकर्थेति** ॥ 'कृसृभृवृ' इति नेडिति भावः । अजन्तत्वेऽपि ऋदन्तत्वात् भारद्वाजमतेऽपि नेट् । **करिष्यतीति** ॥ करोतु–कुरुतात् । कुरु । करवाणि । कुरुताम् । कुर्वाताम् । करवै । करवावहै । करवामहै । अकरोत् । अकुरुताम् । अकुरुत । अकुर्वाताम् । बिधिलिङि कुरु यात् इति स्थिते । **ये च** ॥ 'लोपश्चास्यान्यतरस्याम्' इत्यतो लोप इति अस्येति चानुवर्तते । अस्येत्यनेन पर्वसूत्रे उत इत्युपात्तः उत्परामृश्यते । 'नित्यङ्करोतेः' इत्यतः करोतेरित्यनुवर्तते । अङ्गाक्षिप्तः प्रत्ययो यकारेण विशेष्यते तदादिविधिः । तदाह । **कृञः उलोपः इति । आशिषि क्रियादिति** ॥ 'रिङ् शयग्लिङ्क्षु' इति रिङिति भावः । **कृषीष्टेति** ॥ 'उश्च' इति कित्त्वान्न गुण इति भावः । **अकार्षीदिति** ॥ सिचि वृद्धौ रपरत्वमिति भावः । ननु लुङस्तङि अकृ स् त इति स्थिते 'तनादिभ्यस्तथासोः' इति सिचो लुकि अकृतेतीष्टं सिद्ध्यति । सिचो लुगभावे तु सकारः श्रूयेतेत्यत आह । **तनादिभ्यः इत्यादि** ॥ **संपरिभ्याम् । समवाये च** ॥ **सुट् स्यादिति** ॥ 'सुट् कात्पूर्वः' इत्यतः 'नित्यं करोतेः' इत्यतश्च तदनुवृत्तेरिति भावः । **प्रागुक्तयोरिति** ॥ भूषणसमवाययोरित्यर्थः । ननु 'संपरिभ्याम्' इति सुट् पदद्वयापेक्षत्वात्

उपस्कृता कन्या। अलङ्कृतेत्यर्थः। उपस्कृताः ब्राह्मणाः। समुदिता इत्यर्थः। एधो दकस्योपस्कुरुते। गुणाधानं करोतीत्यर्थः। उपस्कृतं भुङ्क्ते। विकृतमित्यर्थः। उपस्कृतं ब्रूते। वाक्याद्ध्याहारेण ब्रूते इत्यर्थः।

२५५३। सुट्कात्पूर्वः। (६-१-१३५)

'अडभ्यासव्यवायेऽपि' इत्युक्तम्। सञ्चस्कार। 'कात्पूर्वः' इत्यादि भाष्ये प्रत्याख्यातम्। तथा हि 'पूर्वं धातुरुपसर्गेण युज्यते'। अन्तरङ्गत्वात्सुट्। ततो द्वित्वम्। एवं च 'ऋतश्च संयोगादेर्गुणः' (सू २३८९) सञ्चस्करतुः। 'कृसृभृवृ–' (सू २२९३) सूत्रे 'ऋतो भारद्वाजस्य' (सू २२९६)

बहिरङ्गः। 'लिटि धातोः' इति द्वित्वन्तु प्रकृतिप्रत्ययमात्रापेक्षत्वादन्तरङ्गम्। ततश्च सञ्चस्कार इत्यत्र परमपि सुटं बाधित्वा द्वित्वे कृते अभ्यासात्प्रागेव सुटि प्राप्ते। **सुट्कात्पूर्वः**॥ षष्ठस्याद्यपादे इदं सूत्रम्। 'सम्परिभ्याङ्करोतौ भूषणे' 'समवाये च' 'उपात्प्रतियत्न' इत्यारभ्य 'अनुदात्तं पदमेकवर्जम्' इत्यतः प्रागिदमधिकृतं वेदितव्यमित्यर्थः। एवञ्च पूर्वं इत्युक्तेरभ्यासात् प्राक् न सुडिति भावः। नन्वभ्यासेन व्यवधानात्कथमिह उत्तरखण्डस्य सुट्। संस्करीतीत्यादौ अव्यवहिते सुट्विधेश्चरितार्थत्वात्। किञ्च समस्करात् इत्यत्र अटा व्यवधानात् कथं सुट्। नह्यडागमः कृञ्भक्तः। अङ्गभक्तत्वात्। विकरणान्तस्येवाङ्गत्वादित्यत आह। **अडभ्यासव्यवायेऽपीत्युक्तमिति**॥ वार्तिकमिति शेषः। अटा अभ्यासेन च व्यवधानेऽपि सम्पर्यादिभ्यः परस्मात् कात्पूर्वस्सुडित्यर्थः। **इत्यादीति**॥ सुट् इत्येवाधिकृतमस्तु 'कात्पूर्वः' इति 'अडभ्यासव्यवायेऽपि' इति मास्त्वित्यत्र भाष्ये प्रत्याख्यातमित्यर्थः। तदेवापपादयितु प्रतिजानीते। **तथा हीति**॥ **पूर्वं धातुरुपसर्गेण युज्यते इति**॥ पश्चात्साधनेनेति शेषः। ततश्च पूर्वोपनिपतितधातूपसर्गसम्बन्धनिमित्तकङ्कार्यं पश्चादनुपतिष्यद्धातुप्रत्ययसम्बन्धनिमित्तकात्कार्यादन्तरङ्गम्। प्रथमोपनिपतितत्वात्। तदुक्तं भाष्ये। "पूर्वं धातुरुपसर्गेणेति कृत्वा धातूपसर्गयोः कार्यमन्तरङ्गम्" इति। तदाह। **अन्तरङ्गत्वात्सुट्। ततो द्वित्वमिति**॥ तथा सुटि कृते स्कृ इत्यस्य द्वित्वे उरदत्त्वे रपरत्वे 'शर्पूर्वाः खयः' इति रेफसकारयोर्निवृत्तौ अभ्यासचुत्वे सञ्चस्करेति रूपसिद्धेः 'कात्पूर्वः' इति अडभ्यासव्यवायेऽपि, इति च न कर्तव्यमिति भावः। एवं समस्करोदित्यत्रापि विकरणान्ताङ्गभक्ताडागमापेक्षया अन्तरङ्गत्वात् प्रथमं सुट् भविष्यतीति कृत्वा अङ्व्यवायेऽपीत्यंशो न कर्तव्य इत्यूह्यम्। पूर्वं धातुरुपसर्गेणेत्याश्रयणे फलान्तरमप्याह। **एवञ्चेति**॥ उक्तरीत्या अन्तरङ्गत्वात् सुटि कृते संस्कृ इत्यस्माल्लिटः अतुसि 'ऋतश्च संयोगादेर्गुणः' इति गुणे सञ्चस्करतुरिति सिद्ध्यति। "पूर्वं धातुस्साधनेन युज्यते" इत्याश्रयणे तु चकरतुरिति परिनिष्ठितस्य समित्युपसर्गसंयोगासिद्धेरिति भावः। ननु सञ्चस्करिव, सञ्चस्करिम, इत्यत्र च 'कृसृभृवृ' इति 'ऋतो भारद्वाजस्य' इति च ईण्निषेधः स्यादित्यत आह। **कृसृभृवृसूत्रे इत्यादि**॥ नन्वाशीर्लिङि संस्किषीष्टेत्यत्र 'गुणोऽर्तिसंयोगाद्योः' इति गुणः कुतो नेत्यत

इति सूत्रे च 'कृञोऽसुट इति वक्तव्यम्' (वा ४४०१) 'तेन ससुट्कात्पर-स्येट्'। सञ्चस्करिथ। सञ्चस्करिव। 'गुणोऽर्ति–' (सू २३८०) इति सूत्रे 'नित्यं छंदसि' (सू ३५८७) इति सूत्रात् 'नित्यम्' इत्यनुवर्तते। 'नित्यं यः संयोगादिस्तस्य' इत्यर्थात् सुटि गुणो न। संस्क्रियात्। 'ऋतश्च संयोगादेः' (सू २५२६) इति लिङ्सिचोर्नेट्। 'एकाच उपदेशे–' (सू २२७६) इति सूत्रात् 'उपदेशे' इत्यनुवर्त्य 'उपदेशे यः संयोगादिः' इति व्याख्यानात्। संस्कृषीष्ट। समस्कृत। समस्कृषाताम्।

इति तिङन्ततनादिप्रकरणम्।

आह। **गुणोऽर्तीत्यादि** ॥ ननु तङि संस्कृषीष्ट, इति लिङि समस्कृत, समस्कृषाताम्, इति लुङि च 'ऋतश्च संयोगादेः' इति इट् कुतो नेत्यत आह। **ऋतश्चेत्यादि** ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां उविकरणनिरूपणं समाप्तम्।



। श्रीरस्तु ।

॥ अथ तिङन्तक्र्यादिप्रकरणम् ॥

डु क्रीञ् १४७४ द्रव्यविनिमये ।

२५५४ । क्र्यादिभ्यः श्ना । (३-१-८१)

क्रीणाति । 'ई हल्यघोः' (सू २४९७) । क्रीणीतः । ईत्वात्पूर्वं झेरन्तादेशः । परत्वान्नित्यत्वादन्तरङ्गत्वाच्च । एवं झस्य अद्भावः । ततः 'श्नाभ्यस्तयोः–' (सू २४८३) इत्यात्लोपः । क्रीणन्ति । क्रीणीते । क्रीणाते । क्रीणते । चिक्राय । चिक्रियतुः । चिक्रयिथ–चिक्रेथ । चिक्रियिव । चिक्रियिषे । क्रेता । क्रेष्यति । क्रीयात् । क्रेषीष्ट । अक्रैषीत् । अक्रेष्ट । प्रीञ् १४७५ तर्पणे कान्तौ च । कान्तिः कामना । प्रीणाति । प्रीणीते । श्रीञ् १४७६ पाके । मीञ १४७७ हिंसायाम् । 'हिनुमीना' (सू २५३०) । प्रमीणाति । प्रमीणीतः । 'मीनातिमिनोति–' (सू २५०८) इत्येज्विषये आत्त्वम् । ममौ । मिम्यतुः । ममिथ–ममाथ । मिम्ये । माता । मास्यति । मीयात् । मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त । षिञ् १४७८ वन्धने । सिनाति । सिनीते । सिषाय । सिष्ये । सेता । स्कुञ् १४७९ आप्रवणे ।

अथ श्नाविकरणधातवो निरूप्यन्ते । **डु क्रीञिति** ॥ **क्र्यादिभ्यः श्ना** ॥ कर्त्रर्थे सार्वधातुके परे क्र्यादिभ्यः श्नाप्रत्ययः स्यात् । स्वार्थे ञित्यर्थः । शपोऽपवादः । **क्रीणातीति** ॥ श्नाप्रत्ययस्य अपित्सार्वधातुकत्वेन ङित्त्वादीकारस्य न गुण इति भावः । **ई हल्यघोरिति** ॥ हलादौ ङिति सार्वधातुके ईत्वमिति भावः । क्री णा झि इति स्थिते 'ई हल्यघोः' इति ईत्वमाशङ्क्य आह । **ईत्वात्पूर्वमिति । नित्यत्वादिति** ॥ अकृते कृते च ईत्वे अन्तादेशस्य प्रवृत्तेरिति भावः । **एवं झस्येति** ॥ क्री णा झ इति स्थिते 'आत्मनेपदेष्वनतः' इत्यदादेशोऽपि ईत्वात्पूर्वमित्यर्थः । **ततः इति** ॥ अन्तादेशाददादेशाच्च पश्चादित्यर्थः । अजादौ ङिति सार्वधातुके श्नाप्रत्ययस्य आत्लोपः । भारद्वाजनियमात्थलि वेडिति मत्वा आह । **चिक्रयिथ–चिक्रेथेति । चिक्रियिवेति** ॥ क्रादिनियमादिडिति भावः । क्रीणातु । क्रीणीहि । अक्रीणात् । अक्रीणीत । क्रीणीयात् ।

२५५५ । स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च । (३-१-८२)

चात् श्ना । स्कुनोति । स्कुनुते । स्कुनाति । स्कुनीते । चुस्काव । चुस्कुवे । स्कोता । अस्कौषीत् । अस्कोष्ट । 'स्तन्भ्वादयश्चत्वारः सौत्राः' । सर्वे रोधनार्था इत्येके । माधवस्तु प्रथमतृतीयौ स्तम्भार्थौ । द्वितीयो निष्कोषणार्थश्चतुर्थो धारणार्थ इत्याह । सर्वे परस्मैपदिनः । नलोपः । विष्टभ्नोति—विष्टभ्नाति । अवष्टभ्नोति—अवष्टभ्नाति । अवतष्टम्भ । 'जृस्तन्भु—' (सू २२९१) इत्यङ् वा । व्यष्टभत् । व्यष्टम्भीत् । स्तुभ्नोति । स्तुभ्नाति ।

२५५६ । वेः स्कभ्नातेर्नित्यम् । (८-३-७७)

वेः परस्य स्कभ्नातेः सस्य षः स्यात् । विष्कभ्नोति—विष्कभ्नाति । स्कुभ्नोति । स्कुभ्नाति ।

२५५७ । हलः श्नः शानज्झौ । (३-१-८३)

हलः परस्य श्नः शानजादेशः स्याद्धौ परे । स्तभान । स्तुभान । स्कभान । स्कुभान । पक्षे 'स्तभ्नुहि' इत्यादि । युञ् १४८० बन्धने । युनाति । युनीते । योता । क्नूञ् १४८१ शब्दे । क्नूनाति । क्नूनीते । क्नविता । द्रूञ् १४८२ हिंसायाम् । द्रूणाति । द्रूणीते । पूञ् १४८३ पवने ।

२५५८ । प्वादीनां ह्रस्वः । (७-३-८०)

शिति परे । पुनाति । पुनीते । पविता । लूञ् १४८४ छेदने । लुनाति । लुनीते । स्तॄञ् १४८५ आच्छादने । स्तृणाति । स्तृणीते । तस्तार । तस्तरतुः । स्तरिता—स्तरीता । स्तृणीयात् । स्तृणीत । आशिषि स्तीर्यात् । 'लिङ्सिचोः—'

क्रीणीत। **सौत्राः इति** ॥ नोपधा इत्यपि ज्ञेयम्। **नलोपः इति** ॥ 'अनिदिताम्' इत्यनेनेति भावः। **विष्टभ्नोतीति** ॥ 'स्तन्भेः' इति षत्वम्। **अवष्टभ्नोतीति** ॥ 'अवाच्चालम्बनाविदूर्ययोः' इति षत्वम्। **अवतष्टम्भेति** ॥ 'स्थादिष्वभ्यासेन' इति षत्वम्। **व्यष्टभदिति** ॥ 'प्राक्सितात्' इति षत्वम्। **स्तभानेति** ॥ श्नाप्रत्ययस्य शानजादेशे कृते 'अतो हेः' इति लुक्। **प्वादीनां ह्रस्वः** ॥ 'ष्ठिवुक्लम्वाचमाम्' इत्यतश्शितीत्यनुवर्तत इत्यभिप्रेत्य शेषमित्यूरयति। **शिति परे इति। पवितेति** ॥ ऊकारान्तत्वात् सेडिति भावः। स्तृञ् आच्छादने। सेट्। **तस्तरतुरिति** ॥ किन्त्वेऽपि 'ऋच्छत्यृताम्' इति गुणः। **स्तरिता-स्तरीतेति** ॥ 'वृतो वा' इति दीर्घविकल्पः। **आशिषि स्तीर्यादिति** ॥ 'ऋत इद्धातोः' इति इत्त्वे रपरत्वे 'हलि च' इति दीर्घः। स्तृ षीष्ट इति स्थिते आह। **लिङ्सिचोरिति वेडिति** ॥ 'वृतो वा' इति दीर्घविकल्पनिषेधसूत्रं

(सू २५२८) इति वेट्। 'न लिङि' (सू २५२९) इति वृत इटो लिङि दीर्घो न स्यात्। स्तरिषीष्ट। 'उश्च' (सू २३६८) इति कित्त्वम्। स्तीर्षीष्ट। 'सिचि च परस्मैपदेषु' (सू २३९२) इति न दीर्घः। अस्तारीत्। अस्तारिष्टाम्। अस्तरीष्ट--अस्तरिष्ट--अस्तीर्ष्ट। कॄञ् १४८६ हिंसायाम्। कृणाति। कृणीते। चकार। चकरे। वृञ् १४८७ वरणे। वृणाति। वृणीते। ववार। ववरे। वरिता--वरीता। आशिषि 'उदोष्ठ्यपूर्वस्य' (सू २४९४)। वूर्यात्। वरिषीष्ट--वूर्षीष्ट। अवारीत्। अवारिष्टाम्। अवरिष्ट--अवरीष्ट--अवूर्ष्ट। धूञ् १४८८ कम्पने। धुनाति। धुनीते। दुधविथ--दुधोथ। दुधुविव। धविता--धोता। 'स्तुसुधूञ्भ्यः--' (सू २३८५)। इतीट्। अधावीत्। अधविष्ट--अधोष्ट।

अथ बभ्राट्यन्ताः परस्मैपदिनः। शॄ १४८९ हिंसायाम्। शृदृप्रां ह्रस्वो वा' (२४९५) इति ह्रस्वपक्षे यण्। अन्यदा 'ऋच्छत्यृताम्'। (सू २३८३) इति गुणः। शश्रतुः--शशरतुः। 'श्रयुकः किति' (२३८१) इति निषेधस्य क्रादिनियमेन बाधः। शशरिव--शश्रिव। शरिता--शरीता। शृणीहि। शीर्यात्। अशारिष्टाम्। पॄ १४९० पालनपूरणयोः। पप्रतुः--पपरतुः। आशिषि पूर्यात्। वॄ १४९१ वरणे। 'भरणे' इत्येके। भॄ १४९२ भर्त्सने।

स्मारयति। **न लिङीति** ॥ वृत इटो दीर्घो नेत्यर्थः। इडभावपक्षे स्तॄषीष्ट इत्यत्र गुणमाशङ्क्य आह। **उश्चेति कित्त्वमिति** ॥ लुङि परस्मैपदे सिचि 'लिङ्सिचोः' इति इडभावपक्षे अस्तारिष्टाम् इत्यत्र 'वृतो वा' इति इटो दीर्घविकल्पे प्राप्ते आह। **सिचि चेति** ॥ **अस्तरीष्ट-अस्तरिष्टेति** ॥ 'वृतो वा' इति दीर्घः। **अस्तीर्ष्टेति** ॥ 'लिङ्सिचोः' इति इडभावपक्षे ऋत इत्त्वे 'हलि च' इति दीर्घ इति भावः। 'कॄञ् हिंसायाम्'। **चकरे इति** ॥ 'ऋच्छत्यृताम्' इति गुणः। **वृञ् वरणे इति** ॥ **आशिषीति** ॥ वृ यात् इति स्थिते 'उदोष्ठ्यपूर्वस्य' इति ऋकारस्य उत्त्वमित्यर्थः। तत्र दन्त्योष्ठ्यपूर्वस्यापि ग्रहणादिति भावः। ऋत उत्त्वे रपरत्वे 'हलि च' इति दीर्घ इति बोध्यम्। **वरिषीष्ट-वूर्षीष्टेति** ॥ 'लिङ्सिचोः' इति वेट्। इडभावे 'उश्च' इति कित्त्वाद्गुणाभावे उत्त्वे रपरत्वे 'हलि च' इति दीर्घ इति भावः। **अवारिष्टामिति** ॥ 'सिचि च' इति इटो न दीर्घ इति भावः। **अवरिष्ट-अवरीष्टेति** ॥ 'वृतो वा' इ सिच इटो दीर्घविकल्प इति भावः। **दुधविथ-दुधोथेति** ॥ 'स्वरतिसूतिसूयतिधूञूदितः' इति वेडिति भावः। 'शॄ हिंसायाम्'। सेट्। णलि शशार। शश्रतुस् इत्यत्र कित्त्वेऽपि 'ऋच्छत्यृताम्' इति नित्ये गुणे प्राप्ते आह। **शृदृप्रामिति** ॥ गुणापवादे पाक्षिके ह्रस्वे कृते ऋकारस्य यणि रेफ इत्यर्थः। शशरिथ। पृधातुरपि शृधातुवत्। **आशिषि पूर्यादिति** ॥ 'उदोष्ठ्यपूर्वस्य' इत्युत्त्वमिति भावः। 'दॄ

भरणेऽप्येके । मृ १४९३ हिंसायाम् । मृणाति । ममार । दृ १४९४ विदारणे । ददरतुः-दद्रतुः । दद्रुः । जॄ १४९५ वयोहानौ । 'झॄ' इत्येके । 'धॄ' इत्यन्ये । नॄ १४९६ नये । कॄ १४९७ हिंसायाम् । ऋ १४९८ गतौ । ऋणाति । अराञ्चकार । अरिता-अरीता । आर्णात् । आर्णीताम् । ईर्यात् । आरीत् । आरिष्टाम् । गॄ १४९९ शब्दे । ज्या १५०० वयोहानौ । 'ग्रहिज्या-' (सू २४१२) ।

२५५९ । हलः । (६-४-२)

अङ्गावयवाद्धलः परं यत्सम्प्रसारणं तदन्ताङ्गस्य दीर्घः स्यात् । इति दीर्घे कृते । 'प्वादीनां ह्रस्वः' (सू २५५८) । जिनाति । जिज्यौ । जिज्यतुः । री १५०१ गतिरेषणयोः । रेषणं वृकशब्दः । ली १५०२ श्लेषणे । 'विभाषा लीयतेः' (सू २५०९) इत्येज्विषये आत्त्वं वा । ललौ-लिलाय । लाता-लेता । व्ली १५०३ वरणे । व्लिनाति । प्ली १५०४ गतौ । वृत् । ल्वादयो वृत्ताः । प्वादयोऽपीत्येके । व्री १५०५ वरणे । भ्री १५०६ भये । 'भरे' इत्येके । क्षीष् १५०७ हिंसायाम् । एषां त्रयाणां ह्रस्वः । केषाञ्चिन्मते तु न । ज्ञा १५०८ अवबोधने । 'ज्ञाजनोर्जा' (सू २५११) । जानाति । दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः । बन्ध १५०९ बन्धने । बध्नाति । बबन्धिथ-बबन्ध ।

विदारणे' । 'शॄदॄभ्राम्' इति ह्रस्वविकल्पम्मत्वा आह । **ददरतुः-दद्रतुरिति** ॥ 'ऋ गतौ' । **अराञ्चकारेति** ॥ व्यपदेशिवत्त्वे गुरुमत्त्वादाम् । लङ्याह । **आर्णादिति** ॥ 'ज्या वयोहानौ' । अनिट् । ज्या ना ति इति स्थिते 'ग्रहिज्या' इति सम्प्रसारणे पूर्वरूपे च जिनातीति स्थिते । **हलः** ॥ दिग्योगे पञ्चम्येषा । हलः परस्येति लभ्यते । 'सम्प्रसारणस्य' इति सूत्रमनुवर्तते । अङ्गस्येत्यधिकृतमिहानुवृत्तमावर्तते । एकमवयवषष्ठ्यन्तं हल इत्यत्रान्वेति । अङ्गावयवाद्धल इति लभ्यते । द्वितीयन्तु स्थानषष्ठ्यन्तं सम्प्रसारणेन विशेष्यते । तदन्तविधिः । 'ढ्रलोपे' इत्यतो दीर्घ इत्यनुवर्तते । तदाह । **अङ्गावयवादित्यादिना** ॥ उदाहरणन्तु । संवीतः । शूनः । जीनः । हल इति किम् । उतः । उतवान् । **एषामिति** ॥ व्रीभ्रीक्षीषामित्यर्थः । ह्रस्वा ल्वादय एव वृत्ताः, न तु प्वादय इति मते इति भावः । अङ्गावयवात् किम् । निरुतम् । तदन्ताङ्गस्येति किम् । विध्यति । 'ज्ञा अवबोधने' । शिति जादेशं स्मारयति । **ज्ञाजनोर्जेति** ॥ **दीर्घनिर्देशेति** ॥ प्वादित्वेऽपि आकारोच्चारणसामर्थ्यान्न ह्रस्व इति भावः । 'बन्ध बन्धने' । अनिट् । नापधः । **बध्नातीति** । 'अनिदिताम्' इति नलोप इति भावः । भारद्वाजनियमात्थलि वेडिति मत्वा आह । **बबन्धिथ-बबन्धेति** ॥ अकित्त्वान्नलोपो न ।

बन्धा। बन्धारौ। भन्त्स्यति। बधान। अभान्त्सीत्। 'पूर्वत्रासिद्धम्' (सू १२) इति भष्भावात्पूर्वं 'झलो झलि' (सू २२८१) इति सिज्लोपः। प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न। प्रत्ययलक्षणं प्रति सिज्लोपस्यासिद्धत्वात्। अबान्धाम्। अभान्त्सुः। वृङ् १५१० सम्भक्तौ। वृणीते। वत्रे। ववृषे। ववृढ्वे। वरिता—वरीता। अवरिष्ट—अवरीष्ट—अवृत। श्रन्थ १५११ विमोचनप्रतिहर्षयोः। इतः परस्मैपदिनः। श्रथ्नाति। 'श्रन्थिग्रन्थि—' इत्यादिना कित्त्वपक्षे एत्त्वाभ्यासलोपावप्यत्र वक्तव्यौ इति हरदत्तादयः। श्रेथतुः—श्रेथुः। इदं कित्त्वं पितामपीति सुधाकरमते श्रेथिथ। अस्मिन्नपि पक्षे णलि शश्राथ। उत्तमे तु शश्राथ—शश्रथेति माधवः। तत्र मूलं मृग्यम्। मन्थ १५१२ विलोडने। श्रन्थ १५१३ ग्रन्थ १५१४ सन्दर्भे। अर्थभेदाच्छ्रन्थेः पुनः पाठः। रूपं तूक्तम्। कुन्थ १५२५ संश्लेषणे। 'संक्लेशे' इत्येके। कुथ्नाति। चुकुन्थ। 'कुथ' इति दुर्गः। चुकोथ। मृद १५१६ क्षोदे। मृद्नाति। मृदान। मृड १५१७ च। अयं सुखेऽपि। ष्टुत्वम्। मृड्णाति। गुध १५१८ रोषे। गुध्नाति। कुष १५१९ निष्कर्षे। कुष्णाति। कोषिता।

२५६०। निरः कुषः। (७-२-४६)

निरः परात्कुषो वलादेरार्धधातुकस्य इड्वा स्यात्। निष्कोषिता—निष्कोष्टा। निरकोषीत्—निरकुक्षत्। क्षुभ १५२० सञ्चलने। 'क्षुभ्नादिषु च'

अनिट्पक्षे तु 'झषस्तथोः इति थस्य धः। **बन्धेति** ॥ तासि 'झषस्तथोः' इति तकारस्य धः। **भन्त्स्यतीति** ॥ 'एकाचः' इति बस्य भष् धस्य चर्त्वेन तः। **बधानेति** ॥ 'हलः श्नःशानज्झौ' इति शानच्। **अभान्त्सीदिति** ॥ हलन्तलक्षणा वृद्धिः भष्भावः। अबान्धामित्यत्र सकारपरकत्वात् भष्भावमाशङ्क्य आह। **पूर्वत्रेत्यादि** ॥ ननु कृते सिज्लोपे प्रत्ययलक्षणमाश्रित्य सकारपरकत्वात् भष् दुर्वार इत्यत आह। **प्रत्ययलक्षणेनेति** ॥ **अबान्धामिति** ॥ 'झषस्तथोः' इति तस्य धः। 'श्रन्थ विमोचने'। **श्रन्थिग्रन्थीत्यादिनेति** ॥ 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वा' इति व्याकरणान्तरेणेत्यर्थः। **अस्मिन्नपि पक्षे इति** ॥ पितामपीदङ्कित्त्वमिति सुधाकरमते प्रथमपुरुषणलि शश्राथ। उत्तमपुरुषणलि तु शश्राथ—शश्रथ इति माधवः आहेत्यर्थः। **तत्र मूलमिति** ॥ कित्त्वपक्षे एत्त्वाभ्यासलोपाविल्यारभ्य माधव इत्यन्तसन्दर्भे मूलं नास्तीत्यर्थः। संयुक्तहल्मध्यस्थत्वादेवंविधवार्तिकादर्शनाच्चेति भावः। '**कुष निष्कर्षे**'। **निरः कुषः** ॥ 'आर्धधातुकस्येड्वलादेः' इत्यनुवर्तते। 'स्वरतिसूति' इत्यतो

(सू ७९२)। क्षुभ्नाति। क्षुभ्नीतः। क्षोभिता। क्षुभान। णभ १५२१ तुभ १५२२ हिंसायाम्। नभ्नाति। तुभ्नाति। 'नभते' 'तोभते' इति शपि। 'नभ्यति' 'तुभ्यति' इति श्यनि। क्लिशू १५२३ विबाधने। 'शात्' (सू ११२) इति श्चुत्वनिषेधः। क्लिश्नाति। क्लेशिता—क्लेष्टा। अक्लेशीत्—अक्लिक्षत्। अश १५२४ भोजने। अश्नाति। आश। उ ध्रस १५२५ उञ्छे। उकार इत्। ध्रस्नाति। उकारो धात्ववयव इत्येके। उध्रसाञ्चकार। इष १५२६ आभीक्ष्ण्ये। पौनःपुन्यं भृशार्थो वा आभीक्ष्ण्यम्। इष्णाति। 'तीषसह—' (सू २३४०) इत्यत्र सहिना साहचर्यादकारविकरणस्य तौदादिकस्यैव इषेर्ग्रहणं न तु इष्यतीष्णात्योरित्याहुः। एषिता। वस्तुतस्तु इष्णातेरपि इड्विकल्प उचितः। तथा च वार्तिकम्—'इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः' (वा ४४३५) इति। विष १५२७ विप्रयोगे। विष्णाति। वेष्टा। प्लूष १५२८ प्लुष १५२९ स्नेहनसेवनपूरणेषु। प्लूष्णाति। प्लुष्णाति। पुष १५३० पुष्टौ। पोषिता। मुष १५३६ स्तेये। मोषिता। ख च १५३२ भूतप्रादुर्भावे। भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः। खच्नाति। वान्तोऽयमित्येके।

२५६१। च्छ्वोः शूडनुनासिके च। (६-४-१९)

वेति च। तदाह। **निरः परादिति। निरकुक्षदिति** ॥ इडभावपक्षे 'शल' इति क्स इति भावः। 'अश भोजने'। **आशेति** ॥ द्विहल्त्वाभावान्न नुडिति भावः। इष आभीक्ष्ण्ये। तासि 'तीषसह' इति इड्विकल्पमाशङ्क्य आह। **तीषसहेत्यत्रेति** ॥ सहेति शपा निर्देशबलेन भौवादिक एव सहधातुरत्र निर्दिष्टः। तत्साहचर्यात् तौदादिकस्यैव इषेर्ग्रहणम्। अकारविकरणत्वसामान्यादिति भावः। **इषेस्तकारे श्यन्प्रत्ययादिति** ॥ श्यन् प्रत्ययो यस्मादिति बहुव्रीहिः। श्यन्विकरणपठितादिषेस्तकारे परे 'तीषसह' इति विधिर्नेत्यर्थः। इष्णातेस्तकारे इड्विकल्पः फलित इति भावः। **प्लूष प्लुषेति** ॥ आद्यो दीर्घोपधः। 'पुष पुष्टौ'। **पोषितेति** ॥ अनिट्सु श्यन्विकरणस्यैव पुषेर्ग्रहणादयं सेडिति भावः। पुषादिद्युतादित्यत्र श्यन्विकरणपुषादेरेव ग्रहणादङ् न। 'ख च भूतप्रादुर्भावे'। **अतिक्रान्तोत्पत्तिरिति** ॥ दशममासादौ उत्पत्तियोग्यस्य एकादशादिमासादिषूत्पत्तिरित्यर्थः। **खच्नातीति** ॥ नस्य श्चुत्वे न ञ इति भावः। **वान्तोऽयमिति**॥ 'खव भूतप्रादुर्भावे' इत्येवं दन्त्योष्ठ्यान्तमेके पठन्तीत्यर्थः। **च्छ्वोः शूडनुनासिके च** ॥ च्छ् व् अनयोर्द्वन्द्वात् षष्ठीद्विवचनम्। छकारात्प्राक् तुकः श्चुत्वेन चकारस्य निर्देशः। शूठ् इति छेदः। श् ऊठ् अनयोस्समाहारद्वन्द्वात् प्रथमा। चकारेण क्ङिझलोः क्ङितीत्यनुवर्तते। तदाह। **सतुकस्य इत्यादि** ॥ यथा विश्नः। प्रश्नः। विच्छधातोः प्रच्छधातोश्च ण्यादिके नङ्प्रत्यये अन्तरङ्गत्वात् 'छे च' इति तुकि कृते सति सतुकस्य छस्य शकार आदेशः।

सतुक्कस्य छस्य वस्य च क्रमात् 'श्' 'ऊठ्' एतावादेशौ स्तोऽनुनासिके कौ झ झादौ च क्ङिति। खौनाति। चखाव। खविता। शानचः परत्वादूठि कृते हलन्तत्वाभावान्न शानच्। खौनीहि। हेठ १५३३ च। ष्टुत्वम्। हेठ्णाति। ग्रह १५३४ उपादाने। स्वरितेत्। 'ग्रहिज्या—' (सू २४१२)। गृह्णाति। गृह्णीते।

१५६२। ग्रहोऽलिटि दीर्घः। (७-२-३७)

एकाचो ग्रहेर्विहितस्येटो दीर्घः स्यान्न तु लिटि। ग्रहीता। लिटि तु जग्रहिथ। गृह्यात्। ग्रहीषीष्ट। 'ह्म्यन्त—' (सू २२९९) इति न वृद्धिः। अग्रहीष्टाम्। अग्रहीष्ट। अग्रहीषाताम्। अग्रहीषत।

इति तिङन्तक्रयादिप्रकरणम्।

वकारस्य ऊठमुदाहरति। **खौनातीति**॥ खव् ना ति इति स्थिते वकारस्य ऊठ् ठकार इत् 'एत्येधत्यूठ्सु' इति वृद्धिरिति भावः। खौनीतः। खौनन्तीत्यादि। खव् ना हि इति स्थिते 'हलः श्नश्शानज्झौ' इति शानजादेशमाशङ्क्य आह। **शानचः परत्वादिति। हेठ चेति**॥ हेठधातुरपि भूतप्रादुर्भावे वर्तत इत्यर्थः। **ग्रह उपादाने इति**॥ अदुपधः। स्वरितेत्त्वादुभयपदी। किति ङिति च सम्प्रसारणं स्मारयति। **ग्रहिज्येति**॥ **गृह्णाति। गृह्णीते इति**॥ श्नाप्रत्ययस्य ङित्त्वाद्रेफस्य सम्प्रसारणे पूर्वरूपमिति भावः। णलि द्वित्वे कृते 'लिट्यभ्यासस्य' इति सम्प्रसारणे उरदत्वे रपरत्वे हलादिशेषे अभ्यासचुत्वे उपधावृद्धिः। जग्राह। अतुसादौ ङिति परत्वात् 'ग्रहिज्या' इति सम्प्रसारणे कृते द्वित्वादि। जगृहतुः। जगृहुः। जग्रहिथ। जगृहथुः। जगृह। जग्राह—जग्रह। जगृहिव। जगृहिम। जगृहे। जगृहाते। जगृहिरे। जगृहिषे। जगृहाथे। जगृहिढ्वे—जगृहिध्वे। जगृहे। जगृहिवहे। जगृहिमहे। **ग्रहोऽलिटि दीर्घः**॥ ग्रह इति दिग्योग पञ्चमी। 'आर्धधातुकस्येट्' इत्यतः इडित्यनुवृत्तं षष्ठ्यन्त विपरिणम्यते। 'एकाच उपदेशऽनुदात्तात्' इत्यतः एकाच इति च। तदाह। **एकाचः इत्यादि**॥ एकाचः किम्। यङ्लुकि माभूत्। जाग्रहिता। विहितस्येति किम्। ग्राहितम्। णिलोपे कृते ग्रहधातोः परत्वेऽपि विहितत्वाभावादिटो न दीर्घः। नच णिलोपस्य स्थानिवत्त्वात् न ग्रहधातोः पर इडिति वाच्यम्। दीर्घविधौ स्थानिवत्त्वनिषेधात्। अलिटि इत्यस्य फलमाह। **लिटि तु जग्रहिथेति**॥ **गृह्यादिति**॥ आशीर्लिङि यासुटः कित्त्वात्सम्प्रसारणमिति भावः। लिङस्तङाह। **ग्रहीषीष्टेति**॥ ग्रहोऽलिटीति दीर्घः। 'न लिङि' इति इटो दीर्घनिषेधस्तु न। तत्र वृत इत्यनुवर्तते। **अग्रहीष्टामिति**॥ 'ग्रहोऽलिटि' इति दीर्घः। अग्रहीषुः। अग्रहीरित्यादि। लुङस्तङाह। **अग्रहीष्टेति**॥ 'ग्रहोऽलिटि' इति दीर्घः। **अग्रहीषतेति**॥ अग्रहीष्ठाः। इत्यादि सुगमम्॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां भ्वादिकरणनिरूपणं समाप्तम्॥

। श्रीरस्तु ।

॥ अथ तिङन्तचुरादिप्रकरणम् ॥

चुर १५३५ स्तेये ।

२५६३ । सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वच-वर्मवर्णचूर्णचुरादिभ्यो णिच् । (३-१-२५)

एभ्यो णिच् स्यात् । चूर्णान्तेभ्यः 'प्रातिपदिकाद्धात्वर्थे—' (ग सू २०३) इत्येव सिद्धे तेषामिह ग्रहणं प्रपञ्चार्थम् । चुरादिभ्यस्तु स्वार्थे । 'पुगन्त—' (सू २१८९) इति गुणः । 'सनाद्यन्ताः—' (सू २३०४) इति धातुत्वं तिप्शबादि गुणायादेशौ । चोरयति ।

२५६४ । णिचश्च । (१-३-७४)

अथ स्वार्थिकणिजन्ताः चुरादिधातवो निरूप्यन्ते । **चुर स्तेये इति** ॥ रेफादकार उच्चारणार्थः, न त्वित्संज्ञकः । प्रयोजनाभावात् । 'णिचश्च' इति पदव्यवस्थायां वक्ष्यमाणत्वाच्च । एवमग्रेऽपि । **सत्याप** ॥ सत्याप पाश रूप वीणा तूल श्लोक सेना लोमन् त्वच वर्मन् वर्ण चूर्ण चुरादि एषान्द्वन्द्वात्पञ्चमी । तदाह । **एभ्यो णिच् स्यादिति** ॥ कस्मिन्नर्थे इत्याकांक्षायामाह । **चूर्णान्तेभ्यः इति** ॥ सत्यादिभ्यः चूर्णान्तेभ्यो द्वादशभ्यः करोत्याचष्टे इत्याद्यर्थे 'प्रातिपदिकाद्धात्वर्थे बहुलम्' इति वक्ष्यमाणेन सिद्धमेवार्थनिर्देशनमिह निपातितमित्यर्थः । ननु तेनैव सिद्धत्वादिह चूर्णान्तानुक्रमणं व्यर्थमित्यत आह । **तेषामिह ग्रहणं प्रपञ्चार्थमिति** ॥ नच तेभ्यः स्वार्थ एव णिज्विधिरस्त्विति वाच्यम् । "सत्यस्य तु कृञ्यापुक् निपात्यते। सत्यङ्करोति। सत्यापयति" इत्यादिभाष्यविरोधादिति भावः । नामधातुप्रकरणे सत्यादिचूर्णान्तानामुदाहरणानि मूल एव स्फुटीभविष्यन्ति । **चुरादिभ्यस्तु स्वार्थे इति** ॥ अर्थान्तरस्यानिर्देशादिति भावः । अत्र 'धातोरेकाचः' इत्यतो धातोरित्यनुवर्तते । चुरादिभ्यो धातुभ्यः णिजिति फलितम् । ततश्च णिच आर्धधातुकत्वं सिद्ध्यति । अन्यथा धातोरिति विहितत्वाभावादार्धधातुकत्वं न स्यादिति बोध्यम् । तदाह । **पुगन्तेति गुणः इति** ॥ णिचि कृते चुर् इ इति स्थिते णिच आर्धधातुकत्वात्तस्मिन् चकारादुकारस्य 'पुगन्तलघूपधस्य' इति गुण इत्यर्थः । **णिचश्च** ॥ 'अनुदात्तङितः' इत्यत आत्मनेपदमिति 'स्वरितञितः' इत्यतः कर्त्रभिप्राये क्रियाफले इति चानुवर्तते । प्रत्ययग्रहणपरिभाषया णिजन्तादिति

णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले । चोरयति । चोरयते । चोरयामास । चोरयिता । चोर्यात् । चोरयिषीष्ट । 'णिश्रि—' (सू २३१२) इति चङ् । 'णौ चङि—' (सू २३१४) इति ह्रस्वः । द्वित्वम् । हलादिःशेषः । (सू २१७९) दीर्घो लघोः (सू २३१८) इत्यभ्यासदीर्घः । अचूचुरत्—अचूचुरत । चिति १५३६ स्मृत्याम् । चिन्तयति । अचिचिन्तत् । 'चिन्त' इति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिङ्गम् । तेन 'चिन्त्यात्' 'चिन्त्यते' इत्यादौ नलोपो न । चिन्तति । चिन्तेत् । एतच्च ज्ञापकं सामान्यापेक्षमित्येके । 'अत एकहल्—'(२२६०) इत्यत्र वृत्तिकृता 'जगाण' 'जगणतुः' इत्युदाहृतत्वात् । विशेषापेक्षमित्यपरे । अत एव 'आ धृषाद्वा' [ग सू २०२] इत्यस्य न वैयर्थ्यम् । यत्रि १५३७ सङ्कोचे । यन्त्रयति 'यन्त्र' इति पठितुं

लभ्यते । तदाह । **णिजन्तादित्यादिना** ॥ **चोरयतीति** ॥ चोरयिष्यति । चोरयिष्यते । चोरयतु । चोरयताम् । अचोरयत् । अचोरयत । चोरयेत् । चोरयेत । आशीर्लिङि परस्मैपदे आह । **चोर्यादिति** ॥ 'णेरनिटि' इति णिलोप इति भावः । आशीर्लिङि आत्मनेपदे आह । **चोरयिषीष्टेति** ॥ लुङ्याह । **णिश्रीत्यादि** ॥ **दीर्घो लघोरिति** ॥ 'सन्वल्लघुनि' इति सन्वद्भावविषयत्वादिति भावः । 'चिति स्मृत्याम्' । **चिन्तयतीति** ॥ इदित्त्वान्नुमि णिजन्तात्तिङ उत्पत्तिरिति भावः । ननु इदित्करणं मास्तु प्रक्रियालाघवात् 'चिन्त स्मृत्याम्' इत्येवोच्यताम् । नच नलोपनिवृत्त्यर्थमिदित्त्वमिति वाच्यम् । चिन्तयन्ति, चिन्तयाञ्चकार, इत्यादौ णिचः क्ङित्त्वाभावादेव नलोपस्याप्रसक्तेः । नच णिजभावे आशीर्लिङि चिन्त्यादिति कर्मलकारे यकि चिन्त्यते इत्यत्र च नलोपनिवृत्त्यर्थमिदित्त्वमिति शङ्क्यम् । चुरादिणिचो नित्यत्वेन णिचं विना केवलात् चिन्त्यात्, चिन्त्यते, इति प्रयोगस्य शशश्वद्भायमाणत्वादित्यत आह । **चिन्तेत्यादि । तेनेति** ॥ पाक्षिकत्वेनेत्यर्थः । तथाच कदाचित् चिन्त्यात्, चिन्त्यते, इति प्रयोगस्य सत्त्वात्, तत्र नलोपनिवृत्त्यर्थमिदित्करणमिति भावः । ननु तथापि यत्र नलोपप्रसक्तिस्तत्रैव चिन्त्यात्, चिन्त्यते, इत्यत्र णिज्विकल्पः स्यात्, नतु चिन्ततीत्यादौ । शपा व्यवधानेन तत्र नलोपस्याप्रसक्तेरित्याशङ्क्य ज्ञापकमिदं चिन्तधातुसामान्यापेक्षमित्यभिप्रेत्योदाहरति । **चिन्ततिचिन्तेदिति** ॥ ज्ञापकमिदञ्चुरादित्वसामान्यापेक्षमिति मतान्तरमाह । **एतच्चेति** ॥ ज्ञापकस्य चुरादित्वसामान्यापेक्षत्वे वृद्धसम्मतिमाह । **अत एकेति** ॥ ज्ञापकस्य चितिधातुमात्रविषयकत्वे गणधातोः चौरादिकस्य जगणतुरित्युदाहरणानुपपत्तिः स्पष्टैवेति भावः । **विशेषापेक्षमिति** ॥ चितिधातुमात्रविषयमित्यर्थः । इदमेव मतं युक्तमित्यत आह । **अत एवेति** ॥ सर्वस्यापि चुरादेर्णिज्विकल्पे सति 'आ धृषाद्वा' इति कतिपयचुरादन्तर्गणपठितानां णिज्विकल्पविधिवैयर्थ्यमिति भावः । 'यत्रि सङ्कोचे' । **यन्त्रयतीति** ॥ अकारस्य उपधात्वाभावान्न वृद्धिः । **अययन्त्रदिति** ॥ अकारस्य गुरुत्वादलघुत्वाल्लघुपरकत्वाभावात् सन्वद्भावाभावात् इत्त्वदीर्घौ न । एवमग्रेऽपि संयोगान्तधातूनां ज्ञेयम् । **पठितुं**

शक्यम्। यत्तु इदित्करणाद्यन्त्रतीति माधवेनोक्तं तच्चिन्त्यम्। एवं कुद्रित्रिमित्रिषु। स्फुडि १५३८ परिहासे। स्फुण्डयति। इदित्करणात्स्फुण्डति। 'स्फुटि' इति पाठान्तरम्। स्फुण्टयति। लक्ष १२३९ दर्शनाङ्कनयोः। कुद्रि १५४० अनृतभाषणे। कुन्द्रयति। लड १५४१ उपसेवायाम्। लाडयति। मिदि १५४२ स्नेहने। मिन्दयति--मिन्दति। ओ लडि १५४३ उत्क्षेपणे। ओलण्डयति--ओलण्डति। ओकार इदित्येके। लण्डयति--लण्डति। उकारादिरयमित्यन्ये। उलण्डयति। जल १५४४ अपवारणे। 'लज' इत्येके। पीड १५४५ अवगाहने। पीडयति।

२५६५। भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्। (७-४-३)

एषामुपधाया ह्रस्वो वा स्याच्चङ्परे णौ। अपीपिडत्--अपिपीडत्। नट १५४६ अवस्पन्दने। अवस्पन्दनं नाट्यम्। श्रथ १५४७ प्रयत्ने। 'प्रस्थाने' इत्येके। बध १५४८ संयमने। बाधयति। 'बन्ध' इति चान्द्रः। पॄ १२४९ पूरणे। पारयनि। दीर्घोच्चारणं णिचः पाक्षिकत्वे लिङ्गम्। तद्धि से-

---

शक्यमिति ॥ नलोपाभावस्तु इदित्त्वस्य न फलम्। नकारस्य उपधात्वाभावादेव नलोपस्याप्रसक्तेरिति भावः। **तच्चिन्त्यमिति** ॥ यन्त्रयात् इत्यणिजन्ते असत्यपि नकारस्य अनुपधात्वादेव लोपाप्रसक्त्या इत्त्वस्य प्रयोजनाभावादिति भावः। एवं 'कुद्रि अनृतभाषणे' 'तत्रि कुटुम्बधारणे' 'मत्रि गुप्तभाषणे' इति चुरादौ पठिष्यमाणेष्वपि इदित्त्वन्त्यक्तुं शक्यमित्यर्थः। 'लड उपसेवायाम्'। **लाडयतीति** ॥ णिचि अत उपधावृद्धिः। एवमग्रेऽपि ज्ञेयम्। अलीलडत्। 'पीड अवगाहने'। **भ्राजभास** ॥ 'णौ चङ्युपधाया ह्रस्वः' इत्यनुवर्तते। तदाह। **एषामिति** ॥ नित्ये उपधाह्रस्वे प्राप्ते विकल्पोऽयम्। ह्रस्वपक्षे लघुपरकत्वात्सन्वत्त्वादभ्यासदीर्घ इत्यभिप्रेत्य आह। **अपीपिडदिति** ॥ अत्र उत्तरखण्डे ह्रस्वः, पूर्वखण्डे तु दीर्घः। ह्रस्वाभावपक्षे तु, लघुपरकत्वाभावात् सन्वत्त्वविरहान्नाभ्यासदीर्घ इति मत्वा आह। **अपिपीडदिति** ॥ अत्र उत्तरखण्डे दीर्घः पूर्वखण्डे ह्रस्वः। 'नट अवस्पन्दने'। अवस्पन्दनं नाट्यम्। नाटयति। अनीनटत्। 'श्रथ प्रयत्ने'। श्राथयति। अशिश्रथत्। सन्वत्त्वविधौ अनेकहल्व्यवधानेऽपि लघुपरत्वं न विरुध्यते। 'अत्स्मृदृत्वर' इति इत्त्वापवादस्य अत्त्वस्य विधानाल्लिङ्गात्। अन्यथा अपप्रथदित्यादौ अनेकहल्व्यवधानात् लघुपरत्वाभावादेव इत्त्वाप्रसक्त्या किन्तेन। 'पॄ पूरणे'। ननु ह्रस्वान्त एवायं धातुर्निर्दिश्यतां। तावतैव पारयतीत्यादिसिद्धेः। नच णिजभावपक्षे परिता, परिष्यतीत्यत्र इडर्थं दीर्घोच्चारणम्। ऋदन्तत्वे अनिट्कत्वप्रसङ्गादिति वाच्यम्। चुरादिणिचो नित्यत्वेन ततो णिजभावस्य शशश्वच्छायमाणत्वादित्यत आह। **दीर्घोच्चारणं णिचः पाक्षिकत्वे लिङ्गमिति** ॥ पॄधातोरिति शेषः। णिचः

ट्कृत्वाय। एवञ्च पृणातिपिपर्तिभ्यां 'परिता' इत्यादिसिद्धावपि पारयति परति, परत इत्यादिसिद्धिः फलम्। ऊर्ज १५५० बलप्राणनयोः। पक्ष १५५१ परिग्रहे। वर्ण १५५२ चूर्ण १५५३ प्रेरणे। 'वर्ण वर्णने इत्येके। प्रथ १५५४ प्रख्याने। प्राथयति। 'नान्ये मितोऽहेतौ' इति वक्ष्यमाणत्वान्नास्य मित्त्वम्।

२५६६। अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्। (७-४-९५)

एषामभ्यासस्याकारोऽन्तादेशः स्याच्चङ्परे णौ। इत्त्वापवादः। अपप्रथत्। पृथ १५५५ प्रक्षेपे। पर्थयति

२५६७। उर्ऋत्। (७-४-७)

पाक्षिकत्वे तु परितेत्यादौ पर्तेत्यादिवारणाय दीर्घोच्चारणमर्थवदिति भावः। ननु ह्रस्वान्तत्वेऽपि परितेत्यादौ इट् कुतो न स्यादित्यत आह। **तद्धि सेट्कत्वायेति**॥ हि यतः तत् दीर्घोच्चारणं परितेत्यादौ सेट्कत्वार्थम्। ऋदन्तत्वे तु इण्ण स्यात्। 'ऊदृदन्तैः' इत्यनिट्कारिकासु ऋदन्तस्य पर्युदासेन ऋदन्तस्यानिट्कत्वावगमादिति भावः। ननु पृधातोः णिचः पाक्षिकत्वज्ञापकस्य किं फलम्। श्नाविकरणश्नुविकरणपठिताभ्यामेव पृधातुभ्यां परितेत्यादिसिद्धेरित्यत आह। **एवञ्चेति**॥ उक्तरीत्या पृधातोः णिचः पाक्षिकत्वे ज्ञापिते सतीत्यर्थः। **पारयति-परतीति**॥ 'उदोष्ठ्यपूर्वस्य' इत्युत्त्वन्तु न भवति। पराभ्याङ्पूर्वृद्भ्यां बाधादिति भावः। **ऊर्ज बलेति**॥ 'सन्वल्लघुनि' इति सूत्रं द्वेधा व्याख्यातं प्राक्। तत्र चङि 'नन्द्राः' इति निषेधात्, जि इति णिजन्तस्य द्वित्वे उत्तरखण्डे चङ्परे णौ लघोरभावात् प्रथमव्याख्याने अभ्यासस्य तथाविधलघुपरकत्वविरहात् सन्वत्त्वविरहान्नाभ्यासदीर्घः। और्जिजत्। द्वितीयव्याख्याने तु चङ्परे णौ यदङ्गं ऊर्ज् इत्येतत्। तदीयस्याभ्यासस्य चङमादाय वा णिचं लुप्तमादाय वा लघुपरकत्वादभ्यासस्य दीर्घः। और्जीजत्। एवमेव एवञ्जातीयकेषु द्रष्टव्यम्। 'प्रथ प्रख्याने'। **प्राथयतीति**॥ णिचि उपधावृद्धिरिति भावः। नन्वस्य घाटादिकत्वेन मित्त्वाद्ध्रस्वः स्यादित्यत आह। **नान्ये इति**॥ ज्ञपादिपञ्चकव्यतिरिक्तचुरादिषु मित्त्वनिषेधादिति भावः। घाटादिकस्य तु मित्त्वाद्धेतुमण्णिचि प्रथयतीत्येव भवति। नच चौरादिकस्यैव मित्त्वार्थं घटादावनुवादः किन्न स्यादिति वाच्यम्। 'नान्ये मितोऽहेतौ' इति निषेधादित्यलम्। **अत्स्मृ**॥ **अभ्यासस्येति**॥ 'अत्र लोपोऽभ्यासस्य' इत्यतस्तदनुवृत्तेरिति भावः। **चङ्परे णाविति**॥ 'सन्वल्लघुनि' इत्यतः चङ्परे इत्यनुवर्तते। चङ् परो यस्मादिति बहुव्रीहिः। अन्यपदार्थस्त्वर्थाण्णिरेवेति भावः। **इत्त्वेति**॥ 'सन्यतः' इति इत्वस्यापवाद इत्यर्थः। **अपप्रथदिति**॥ अत्र अत्त्वविधानादेव सन्वत्त्वविधौ अनेकहल्व्यवधानेऽपि लघुपरकत्वमिति विज्ञायते। अन्यथा येन नाव्यवधानन्यायात् एकहल्व्यवधानस्यैवाश्रयात् अत्र सन्वत्त्वविरहादेव इत्त्वाप्रवृत्त्या किन्तेन। संयोगे परे गुरुत्वान्नाभ्यासदीर्घः। 'पृथ प्रक्षेपे'। ऋदुपधः। **पर्थयतीति**॥ णिचि लघूपधगुणः रपरत्वम्। **उर्ऋत्**॥ ऋ इत्यस्य उरिति षष्ठ्यन्तं रूपम्।

उपधाया ऋवर्णस्य स्थाने ऋत्याद्वा चङ्परे णौ । इररारामपवादः । अपीपृथत्–अपपर्थत् । 'पथ' इत्येके । पाथयति । षम्ब १५५६ सम्बन्धने । सम्बयति । अससम्बत् । शम्ब १५५७ च । अशशम्बत् । 'साम्ब' इत्येके । भक्ष १५५८ अदने । कुट्ट १५५९ छेदनभर्त्सनयोः । 'पूरणे' इत्येके । कुट्टयति । पुट्ट १५६० चुट्ट १५६१ अल्पीभावे । अट्ट १५६२ घुट्ट १५६३ अनादरे । अट्टयति । अयं दोपधः । ष्टुत्वस्यासिद्धत्वात् 'नन्द्राः—' (सू २४४६) इति निषेधः । आट्टिटत् । लुण्ठ १५६४ स्तेये । लुण्ठयति । 'लुण्ठति' इति । 'लुटि स्तेये' इति भौवादिकस्य । शट १५६५ श्वट १५६६ असंस्कारगत्योः । 'श्वठि' इत्येके । तुजि १५६७ पिजि १५६८ हिंसाबलादाननिकेतनेषु । तुञ्जयति । पिञ्जयति । इदित्करणात् तुञ्जति । पिञ्जति । 'तुज' 'पिज' इति केचित् । 'लजि' 'लुजि' इत्येके । पिस १५६९ गतौ । पेसयति । 'पेसति' इति तु शपि गतम् । षान्त्व १५७० सामप्रयोगे । श्वल्क १५७१ वल्क १५७२ परिभाषणे । ष्णिह् १५७३ स्नेहने । 'स्फिट' इत्येके । स्मिट १५७४ अनादरे । अषोपदेशत्वान्न षः । असिस्मिटत् । 'ष्मिङ्

'णौ चङ्युपधायाः' इत्यनुवर्तते । 'जिघ्रतेर्वा' इत्यतो वेति । तदाह । **उपधायाः इति** ॥ ननु ऋकारस्य ऋकारविधिर्व्यर्थ इत्यत आह । **इररारामपवादः इति** ॥ 'कृत संशब्दने' । अचीकृतत् इत्यादौ 'उपधायाश्च' इति इत्त्वे रपरत्वे इर् प्राप्तः । अमीमृजदित्यत्र तु 'मृजेर्वृद्धिः' इत्यार् प्राप्तः । प्रकृतपृथधातौ तु चङि णिलोपे प्रत्ययलक्षणेन णिचमाश्रित्य लघूपधगुणे रपरत्वे अर् प्राप्तः । तेषामपवाद इत्यर्थः । **अपीपृथदिति** ॥ णिचमाश्रित्य प्राप्तङ्गुणम्बाधित्वा ऋकारे, द्वित्त्वे, उरदत्त्वे, हलादिशेषे, सन्वत्त्वादित्वे, दीर्घे, रूपमिति भावः । **अपपर्थदिति** ॥ ऋत्वाभावपक्षे द्विर्वचनेऽचीति निषेधात् गुणात्प्राक् द्वित्वे उरदत्वे हलादिशेषे ऋकारस्य णिचमाश्रित्य गुणे रपरत्वे अपपर्थदित्यत्र लघुपरकत्वाभावेन सन्वत्त्वविरहादित्त्वदीर्घौ नेति भावः । 'अट्ट घुट्ट अनादरे' । **अयं दोपधः इति** ॥ अट्टधातुरित्यर्थः । दकारस्य ष्टुत्वचर्त्वाभ्यान्निर्देश इति भावः । दोपधत्वस्य प्रयोजनमाह । **ष्टुत्वस्येति** ॥ तथा च दकारं विहाय टि इत्यस्य द्वित्वे आद् टिटत् इति स्थिते दस्य ष्टुत्वे चर्त्वे च आट्टिटत् इति रूपमिष्टं सिद्ध्यति । स्वाभाविकटोपधत्वे तु 'नन्द्राः' इति निषेधाभावात् टकारद्वयसहितस्य ण्यन्तस्य द्वित्वे हलादिशेषणाभ्यासे प्रथमटकारस्य अनिवृत्तौ आट्टिटदिति अनिष्टं रूपं स्यादिति भावः । 'ष्मिङ् अनादरे' । ननु णिचश्चेत्यात्मनेपदसिद्धेः किमर्थं डित्करणमित्यत आह । **णिजन्तात्तङिति** ॥ तङेवेत्यर्थः । अकर्त्रभिप्रायेऽपि फले णिजन्तादात्मनेपदार्थं डित्करणमिति यावत् । ननु कृतेऽपि डित्करणे णिजन्तस्य डित्त्वाभावात् कथमुक्तप्रयोजन-

अनादरे' इत्येके । ङित्त्वस्यावयवेऽचरितार्थत्वाण्णिजन्तात्तङ् । स्माययते । श्लिष १५७५ श्लेषणे । पथि १५७६ गतौ । पन्थयति—पन्थति । पिच्छ १५७७ कुट्टने । छदि १५७८ संवरणे । छन्दयति—छन्दति । श्रण १५७९ दाने । प्रायेणायं विपूर्वः । विश्राणयति । तड १५८० आघाते । ताडयति । खड १५८१ खडि १५८२ कडि १५८३ भेदने । खाडयति । खण्डयति । कण्डयति । कुडि १५८४ रक्षणे । गुडि १५८५ वेष्टने । 'रक्षणे' इत्येके । 'कुठि' इत्यन्ये । अवकुण्ठयति—अवकुण्ठति । 'गुठि' इत्यपरे । खुडि १५८६ खण्डने । वटि १५८७ विभाजने । 'वडि' इत्येके । मडि १५८८ भूषायां हर्षे च । भडि १५८९ कल्याणे । छर्द १५९० वमने । पुस्त १५९१ बुस्त १५९२ आदरानादरयोः । चुद १५९३ सञ्चोदने । नक्क १५९४ धक्क १५९५ नाशने । णोपदेशलक्षणे पर्युदस्तोऽयम् । प्रनक्कयति । चक्क १५९६ चुक्क १५९७ व्यथने । क्षल १५९८ शौचकर्मणि । तल १५९९ प्रतिष्ठायाम् । तुल १६०० उन्माने । तोलयति । अतूतुलत् । कथं 'तुलयति तुलना' इत्यादि । '—अतुलोपमाभ्यां—' (सू ६३०) इति निपातनादादन्तस्य तुलाशब्दस्य सिद्धौ ततो णिच् । दुल १६०१ उत्क्षेपे । पुल १६०२ महत्त्वे । चुल १६०३ समुच्छ्राये । मूल १६०४ रोहणे । कल १६०५ बिल १६०६ क्षेपे । बिल १६०७ भेदने । तिल १६०८ स्नेहने । चल १६०९ भृतौ । पाल १६१० रक्षणे । लूष १६११ हिंसायाम् । शुल्क १६१२ माने । शूर्प १६१३ च । चुट १६१४ छेदने । मुट १६१५ संचूर्णने । पडि १६१६ पसि १६१७ नाशने । पण्डयति—पण्डति । पंसयति—पंसति । वज १६१८ मार्गसंस्कारगत्योः । शुल्क १६१९ अतिस्पर्शने । चपि १६२० गत्याम् । चम्पयति—चम्पति ।

लाभ इत्यत आह । **ङित्त्वस्य अवयवे अचरितार्थत्वादिति** ॥ ण्यन्तावयवे ष्मिङ् धातौ ङित्त्वं व्यर्थम् । तस्य णिचं विना प्रयोगाभावात् । ततश्चावयवे श्रुतं ङित्त्वं ण्यन्तादेव कार्यं साधयतीत्यर्थः । **स्माययते इति** ॥ णिचि वृद्धौ आयादेशे स्मायि इति ण्यन्ताल्लटस्तिपि शपि गुणायादेशाविति भावः । असिष्मियत् । तुल उन्माने । **कथमिति** ॥ लघूपधगुणप्रसङ्गादिति भावः । **तुलनेति** ॥ 'ण्यासश्रन्थो युच्' इति भावः । समाधत्ते । **अतुलोपमाभ्यामिति । आदन्तस्येति** ॥ तुलधातोर्ण्यन्तात्पचाद्यचि निपातनात् गुणाभावे स्त्रीत्वे तुलाशब्दः आदन्तः । ततस्तत्करोति तदाचष्टे इति इष्टवत्त्वात् टिलोपे तुलि इति ण्यन्ताल्लटस्तिपि

क्षपि १६२१ क्षान्त्याम् । क्षम्पयति–क्षम्पति । छजि १६२२ कुच्छ्रजीवने । श्वर्त १६२३ गत्याम् । श्वभ्र १६२४ च । ज्ञप १६२५ मिच्च । अयं ज्ञाने ज्ञापने च वर्तते ।

२५६८ । मितां ह्रस्वः । (६-४-९२) ।

मितामुपधायाः ह्रस्वः स्याण्णौ परे । ज्ञपयति । यम १६२६ च परिवेषणे । चान्मित् । परिवेषणमिह वेष्टनम् । न तु भोजनं नापि वेष्टनं । यमयति चन्द्रम् । परिवेष्टत इत्यर्थः । चह १६२७ परिकल्पने । चहयति । अचीचहत् । कथादौ वक्ष्यमाणस्य तु अदन्तत्वेनाग्लोपित्वाद्दीर्घसन्वद्भावौ न ।

युचि च तुलयतीति तुलनेति च रूपम् । आकारलोपस्य 'अचः परस्मिन्' इति स्थानिवत्त्वान्नगुण इति भावः । **वज मार्गेति** ॥ वाजयति । मार्गयति । यद्वा मार्गेति न धात्वन्तरम् । वजधातुर्मार्गसंस्कारे गतौ चेत्यर्थः । **ज्ञप मिच्चेति** ॥ ज्ञपधातुर्णिचं लभते, मित्संज्ञश्चेत्यर्थः । मित्त्वकार्यभागिति वा । धातुपाठे अर्थनिर्देशाभावादाह । **अयमिति** ॥ प्रच्छ ज्ञीप्सायामित्यत्र ज्ञाने 'श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः' इत्यत्र ज्ञापने च प्रयोगदर्शनादिति भावः । **मितां ह्रस्वः** ॥ 'ऊदुपधाया गोहः' इत्यतः उपधाया इति 'दोषो णौ' इत्यतः णाविति चानुवर्तते । तदाह । **मितामुपधाया इत्यादिना** ॥ **ज्ञपयतीति** ॥ णिचि उपधावृद्धौ ह्रस्व इति भावः । 'यम च परिवेषणे' । **चान्मिदिति** ॥ अनुकृष्यते इति शेषः । यमधातुः परिवेषणे णिचं लभते, मित्कार्यभाक् चेत्यर्थः । मित्संज्ञक इति वा । **परिवेषणमिह वेष्टनमिति** ॥ 'परिवेषस्तु परिधिः' इति कोशादिति भावः । **न तु भोजनमिति** ॥ भुजेर्हेतुमण्ण्यन्तात् स्त्रियामित्यधिकारे 'ण्यासश्रन्थो युच्' क्लीबत्वं लोकात् । भोजनेत्येव क्वचित्पाठः । भोक्तुः पात्रे भोज्यद्रव्योपकल्पनमिह न परिवेषणमित्यर्थः । भोजनायां यमेर्हेतुमण्ण्यन्तस्य अमन्तत्वादेव मित्त्वासिद्धेरिति भावः । **परिवेष्टत इत्यर्थः इति** ॥ अनेन परिविषेरण्ण्यन्ताल्ल्युटि परिवेषणशब्द इति सूचितम् । नच वेष्टनेऽप्यर्थे यमेरमन्तत्वादेव सिद्धे मित्त्वविधिर्व्यर्थ इति वाच्यम् । 'न कम्यमिचमाम्' इति मित्त्वप्रतिषेधप्रकरणस्थे 'यमोऽपरिवेषणे' इति घटाद्यन्तर्गणसूत्रे अपरिवेषणे इति पर्युदासेन भोजनतोऽन्यत्र वेष्टनेऽर्थे मित्त्वनिषेधस्य प्राप्तौ मित्त्वप्रापणार्थत्वात् । 'यमोऽपरिवेषणे' इत्यत्र परिवेषणशब्देन भोजनाया एव विवक्षितत्वेन वेष्टने यमेर्मित्त्वनिषेधस्य प्रसङ्गात् । अत एव यमिर्भोजनातोऽन्यत्र न मिदिति व्याख्यातम् । मूलकृता भोजनायान्तु 'यमोऽपरिवेषणे' इति मित्त्वनिषेधविधौ भोजनायाः पर्युदासादेव तत्र मित्त्वनिषेधाभावादमन्तत्वादेव मित्त्वप्राप्तेरिह चुरादौ परिवेषणशब्देन वेष्टनमेव विवक्षितं नतु भोजनेत्यास्तान्तावत् । **चह परिकल्पने इति** ॥ इत आरभ्य 'चिञ् चयने' इत्येतत्पर्यन्तं चेत्यनुवर्तते । अतस्तेषां मित्त्वात् णिचि ह्रस्वः । तदाह । **चहयतीति** ॥ नन्वनेनैव सिद्धे अग्रे चुरादन्तर्गणे कथादावस्य पाठो व्यर्थ इत्यत आह । **कथादाविति** ॥ कथादयः अदन्ता इति वक्ष्यन्ते । तस्माण्णिचि अल्लोपे कथयती-

अचचहत्। 'चप' इत्येके। चपयति। रह १६२८ त्यागे इत्येके। अरीरहत्। कथादेस्तु अररहत्। बल १६२९ प्राणने। बलयति। चिञ् १६३० चयने।

२५६९। चिस्फुरोर्णौ। (६-१-५४)।

आत्त्वं वा स्यात्।

२५७०। अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुण्णौ। (७-३-३६)।

एषां पुक् स्याण्णौ। चपयति–चययति। ञित्करणसामर्थ्यादस्य णिञ्विकल्पः। चयते। प्रणिचयति–प्रनिचयति। नान्ये मितोऽहेतौ (ग सू १९८)। अहेतौ स्वार्थे णिचि ज्ञपादिभ्योऽन्ये मितो न स्युः। तेन शमादीनाममन्तत्वप्रयुक्तं

त्यादौ अल्लोपस्य स्थानिवत्त्वाद्वृद्ध्यभावे च मित्त्वाद्ह्रस्वे च न विशेषः। तथापि अदन्तात् चङि णौ अल्लोपे सति अग्लोपितया सन्वत्त्वदीर्घयोरभावे अचचहदिति रूपमस्ति फलमित्यर्थः। **चप इत्येके इति** ॥ 'चह परिकल्पने' इत्यस्य स्थाने 'चप' इत्येके पठन्तीत्यर्थः। 'रह त्यागे' इत्येके इत्यपि तथैव व्याख्येयम्। एवञ्च ज्ञपादिषु पञ्चसु चहधातुः चपधातुः रहधातुर्वा अन्यतमस्तृतीयः, बलधातुश्चतुर्थः, चिञ्धातुः पञ्चमः, इति कृत्वा ज्ञपादिपञ्चानां मतत्रयेऽपि पञ्चत्वात् ज्ञपादिपञ्चकत्वस्य न विरोधः। 'रह त्यागे' इत्यस्यापि कथादिपाठफलमाह। **कथादेस्तु अररहदिति** ॥ अदन्तत्वेन अग्लोपित्वान्न दीर्घसन्वत्त्वे इति भावः। 'बल प्राणने च' इत्यनुवृत्त्या मित्त्वस्यानुकर्षणाद्ह्रस्वं मत्वा आह। **बलयतीति** ॥ **चिस्फुरोर्णौ** ॥ 'आदेच उपदेशे' इत्यतः आदिति 'विभाषा लीयतेः' इत्यतः विभाषेति चानुवर्तते इति मत्वा शेषं पूरयति। **आत्त्वं वा स्यादिति** ॥ चिञो णिचि आत्त्वे चा इ इति स्थिते। **अर्तिह्री** ॥ अर्ति ह्री व्ली री क्नूयी क्ष्मायी आत् एषान्द्वन्द्वात् षष्ठी। पुक् णौ इति छेदः। तदाह। **एषां पुक् स्याण्णौ इति** ॥ पुकि ककार इत्, उकार उच्चारणार्थः कित्त्वादन्तावयवः। चाप् इ इति स्थिते चेत्यनुवर्त्य मित्त्वस्यानुकर्षणेन मित्त्वाद्ह्रस्वे चपि इत्यस्मात्तिबादौ परिनिष्ठितमाह। **चपयतीति** ॥ आत्त्वाभावपक्षे त्वाह। **चययतीति** ॥ चेर्णौचि वृद्धौ आयादेशे मित्त्वादुपधाह्रस्व इति भावः। ननु चिञ्धातोरिह ञित्करणं व्यर्थम्। ण्यन्तात् णिचश्चेत्येव उभयपदसिद्धेः। चौरादिकस्यास्य नित्यं ण्यन्तत्वेन चयति चयते इति केवलस्याण्यन्तस्य शशश्च्झायमाणत्वादित्यत आह। **ञित्करणसामर्थ्यादिति** ॥ एवञ्च णिजभावपक्षे उभयपदार्थमिह ञित्करणमर्थवदिति भावः। 'शेषे विभाषाकखादौ' इति णत्वविकल्पं मत्वा आह। **प्रणिचयति–प्रनिचयति इति** ॥ 'नान्ये मितोऽहेतौ' इति चुरादिगणसूत्रम्। अहेताविति च्छेदः। 'हेतुमति च' इति सूत्रेण विहितो णिच् हेतुशब्देन विवक्षितः। स न भवतीत्यहेतुः स्वार्थणिच्। तास्मिन्परे इति लभ्यते। किमपेक्षया अन्ये इत्याकांक्षायां इतः प्राक्पठितज्ञपादिचिञन्तेभ्य इति लभ्यते। तदाह। **अहेतौ स्वार्थे णिचीत्यादिना** ॥

मित्त्वं न। घट्ट १६३१ चलने। मुस्त १६३२ सङ्घाते। खट्ट १६३३ संवरणे। षट्ट १६३४ स्फिट्ट १६३५ चुबि १६३६ हिंसायाम्। पुल १६३७ सङ्घाते। 'पूर्ण' इत्येके। 'पुण' इत्यन्ये। पुंस १६३८ अभिवर्धने। टकि १६३९ बन्धने। टङ्कयति–टङ्कति। धूस १६४० कान्तिकरणे। धूसयति। दन्त्यान्तः। 'मूर्धन्यान्तः' इत्येके। 'तालव्यान्तः' इत्यपरे। कीट १६४१ वर्णे। चूर्ण १६४२ सङ्कोचने। पूज १६४३ पूजायाम्। अर्क १६४४ स्तवने। 'तपने' इत्येके। शुठ १६४५ आलस्ये। शुठि १६४६ शोषणे। शुण्ठयति–शुण्ठति। जुड १६४७ प्रेरणे गज १६४८ मार्ज १६४९ शब्दार्थौ। गाजयति। मार्जयति। मर्च १६५० च। मर्चयति। घृ १६५१ प्रस्रवणे। 'स्रावणे' इत्येके। पचि १६५२ विस्तारवचने। पञ्चयति। 'पञ्चते' इति व्यक्तार्थस्य शपि गतम्। तिज १६५३ निशाने। तेजयति। कृत १६५४ संशब्दने।

१५७१। उपधायाश्च। (७-१-१०१)

धातोरुपधाभूतस्य ऋत इत्स्यात्। रपरत्वम्। 'उपधायां च' (२२६५) इति दीर्घः। कीर्तयति। 'उर्ऋत्' (२५६७)। अचीकृतत्–अचिकीर्तत्। वर्ध १६५५ छेदनपूरणयोः। कुबि १६५६ आच्छादने। कुम्बयति। 'कुभि' इत्येके। लुबि १६५७ तुबि १६५८ अदर्शने। 'अर्दने' इत्येके। ह्रप १६५९ व्यक्तायां वाचि। 'क्रप' इत्येके। चुटि १६६० छेदने। इल १६६१ प्रेरणे। एलयति। ऐलिलत्। म्रक्ष १६६२ म्लेच्छने। म्लेच्छ १६६३ अव्यक्तायां वाचि। ब्रूस १६६४ बर्ह १६६५ हिंसायाम्। केचिदिह गर्ज गर्द शब्दे गर्ध अभिकाङ्क्षायां इति पठन्ति। गुर्द १६६६ पूर्वनिकेतने। जसि १६६७

अहेतावित्यस्य व्याख्यानं स्वार्थे णिचीति। **तेनेति** ॥ झपादिचिन्तव्यतिरिक्तचुरादीनां मित्त्वनिषेधो नेत्यर्थः। **शमादीनामिति** ॥ 'शम आलोचने'। 'अम रोगे' इत्यादीनामग्रे चुरादौ पठिष्यमाणानामित्यर्थः। **अमन्तत्वेति** ॥ जनीजृष्क्नसुरञ्जोऽमन्ताश्च' इत्यमन्तत्वनिमित्तकमित्यर्थः। कृत संशब्दने। **उपधायाश्च** ॥ 'ऋत इद्धातोः' इत्यनुवर्तते। तदाह। **धातोरित्यादिना** ॥ चक्रि 'उर् ऋत्' इत्युपधाया ऋत्त्वपक्षे आह। **अचीकृतदिति** ॥ उपधाया ऋत्त्वे कृत् इत्यस्य द्वित्वे उरदत्त्वे लघुपरतया सन्वत्त्वादित्त्वे 'दीर्घो लघोः' इति दीर्घ इति भावः। ऋत्त्वाभावपक्षे आह। **अचिकीर्तदिति** ॥ ऋत इत्त्वे रपरत्वे 'उपधा-

रक्षणे। 'मोक्षणे' इति केचित्। जंसयति–जंसति। ईड १६६८ स्तुतौ। जसु १६६९ हिंसायाम्। पिडि १६७० सङ्घाते। रुष १६७१ रोषे। 'रुट' इत्येके। डिप १६७२ क्षेपे। ष्टुप १६७३ समुच्छ्राये।

आ कुस्मादात्मनेपदिनः। 'कुस्मनान्नो वा' इति वक्ष्यते। तमभिव्याप्येत्यर्थः। अकर्तृगामिफलार्थमिदम्। चित १६७४ सञ्चेतने। चेतयते। अचीचितत। दशि १६७५ दंशने। दंशयते। अददंशत। इदित्त्वाण्णिजभावे दंशति। आकुस्मीयमात्मनेपदं णिच्सन्नियोगेनैवेति व्याख्यातारः। नलोपे सञ्जिसाहचर्याद्धादेरेव ग्रहणम्। दसि १६७६ दर्शनदंशनयोः। दंसयते–दंसति। 'दस' इत्यप्येके। डप १६७७ डिप १६७८ सङ्घाते। तत्रि १६७९ कुटुम्बधारणे। तन्त्रयते। चान्द्रा धातुद्वयमिति मत्वा 'कुटुम्बयते' इत्युदाहरन्ति। मत्रि १६८० गुप्तपरिभाषणे। स्पश १६८१ ग्रहणसंश्लेषणयोः। तर्ज १६८२ भर्त्स १६८३ तर्जने। बस्त १६८४ गन्ध १६८५ अर्दने। बस्तयते। गन्धयते। विष्क १६८६ हिंसायाम्। 'हिष्क' इत्येके। निष्क १६८७ परिमाणे। लल १६८८ ईप्सायाम्। कूण १६८९ सङ्कोचे। तूण १६९० पूरणे। भ्रूण १६९१ आशाविशङ्कयोः। शठ १६९२ श्लाघायाम्। यक्ष १६९३ पूजायाम्। स्यम १६९४ वितर्के। गूर १६९५ उद्यमने। शम १६९६ लक्ष १६९७ आलोचने। 'नान्ये मितः–' इति मित्त्वनिषेधः। शामयते। कुत्स १६९८ अवक्षेपणे। त्रुट १६९९ छेदने। 'कुट' इत्येके। गल १७०० स्रवणे। भल १७०१ आभण्डने। कूट १७०२ आप्रदाने। 'अवसादने' इत्येके। कुट्ट १७०३ प्रतापने। वञ्चु १७०४ प्रलम्भने। वृष १७०५ शक्तिबन्धने। शक्तिबन्धनं प्रजननसामर्थ्यं, शक्ति-

---

याञ्च' इति दीर्घे कीर्त् इत्यस्य द्वित्वे हलादिशेषे अभ्यासह्रस्वे कुत्वे इति भावः। लघुपरकत्वाभावेन सन्वद्भावविषयत्वाभावान्नाभ्यासदीर्घः। आकुस्मादित्यत्र आङभिविधाविति मत्वा आह। **तमभिव्याप्येति** ॥ ननु 'णिचश्च' इति सिद्धे आत्मनेपदविधानं व्यर्थमित्यत आह। **अकर्तृगामीति** ॥ ननु 'दशि दंशने' णिजभावे दंशति इति कथम्। आकुस्मीयत्वेन णिजभावेऽपि तङो दुर्वारत्वादित्यत आह। **आकुस्मीयमिति** ॥ 'दंशसञ्जस्वञ्जां शपि' इति नलोपमाशङ्क्य आह। **नलोपे सञ्जीति** ॥ **स्पश ग्रहणेति** ॥ अपस्पशत 'अत्स्मृदृत्वर' इति अभ्यासस्य अत्त्वं इत्त्वापवादः। गूर उद्यमने। अयन्दीर्घोपधः। गूरयते। तुदादौ तु 'गुरी उद्यमने' इति ह्रस्वोपधः। दीर्घादौ तु 'घूरी, गुरी हिंसागत्योः' इति दीर्घोपध एवेति

सम्बन्धश्च। वर्षयते। मद १७०६ तृप्तियोगे। मादयते। दिवु १७०७ परिकूजने। गृ १७०८ विज्ञाने। गारयते। विद १७०९ चेतनाख्यानविवासेषु। वेदयते।

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात्॥

मान १७१० स्तम्भे। मानयते। यु १७११ जुगुप्सायाम्। यावयते। कुस्म १७१२ नाम्नो वा (ग सू १९९) 'कुस्म' इति धातुः कुत्सितस्मयने वर्तते। कुस्मयते। अचुकुस्मत। अथवा 'कुस्म' इति प्रातिपदिकम्। ततो धात्वर्थे णिच्। इत्याकुस्मीयाः।

चर्च १७१३ अध्ययने। वुक्क १७१४ भाषणे। शब्द १७१५ उपसर्गादाविष्कारे च। चाद्भाषणे। प्रतिशब्दयति। प्रतिश्रुतमाविष्करोतीत्यर्थः। 'अनुपसर्गाच्च'। 'आविष्कारे' इत्येव। शब्दयति। कण १७१६ निमीलने। काणयति। 'णौ चङ्युपधाया ह्रस्वः' (सू १३२४)। 'काण्यादीनां वा'

केचित्। ह्रस्वोपध इत्यन्ये। विदधातोरर्थभेदे विकरणभेदं सङ्गृह्णाति। **सत्तायां विद्यते इत्यादिश्लोकेन॥** 'कुस्म नाम्नो वा' गणसूत्रम्। कुस्मेति पृथक्पदं अविभक्तिकम्। तदाह। **कुस्म इति धातुरिति॥** कुत्सितस्मयने वर्तते इति शेषपूरणं, व्याख्यानादिति भावः। **कुस्मयते इति॥** आकुस्मीयत्वादकर्तृगेऽपि फले आत्मनेपदम्। आकुस्मादात्मनेपदिन इत्यत्र आङभिविधावित्याश्रयणादिति भावः। **अचुकुस्मतेति॥** उकारस्य गुरुतया अभ्यासस्य लघुपरकत्वाभावान्न सन्वत्त्वमिति भावः। नाम्नो वेत्यंशं व्याचष्टे। **अथवेति॥** नाम प्रातिपदिकं तस्माद्वा णिज्भवतीत्यर्थः। तच्च प्रातिपदिकङ्कुस्मशब्दात्मकमेव गृह्यते प्रत्यासत्त्या। तथाच कुस्मेति धातोः कुस्मेति प्रातिपदिकाद्वा णिजिति फलितम्। तत्र धातोः णिचः स्वार्थिकत्वमभिप्रेत्य प्रातिपदिकात् णिचि विशेषमाह। **ततः इति॥** तस्मात् प्रातिपदिकादित्यर्थः। **धात्वर्थे इति॥** करोतीत्यर्थे आचष्टे इत्यर्थे वेत्यर्थः। नच 'तत्करोति तदाचष्टे' इत्येव प्रातिपदिकात् णिच् सिद्ध इति वाच्यम्। 'आकुस्मादात्मनेपदिनः' इत्यात्मनेपदनियमार्थत्वात्। इत्याकुस्मीयाः। **शब्द उपसर्गादिति॥** उपसर्गात्परः शब्दधातुः आविष्कारे वर्तते इत्यर्थः। **अनुपसर्गाच्चेति॥** अनुपसर्गात्परोऽपि शब्दधातुः णिचं लभते इत्यर्थः। आविष्कारे इत्यस्यैवानुवृत्त्यर्थं पृथगुक्तिः। शब्द आविष्कारे चेत्येतावत्येवोक्ते अनुपसर्गाद्भाषणेऽपि स्यात्। तदाह। **आविष्कारे इत्येवेति। काण्यादीनामिति॥** इदं वार्तिकं 'भ्राजभासभाष' इति सूत्रे भाष्ये

(वा ४६१३) इति विकल्प्यते। अचीकणत्–अचकाणत्। जभि १७१७ नाशने। जम्भयति–जम्भति। षूद १७१८ क्षरणे। सूदयति। असूषुदत्। जसु १७१९ ताडने। जासयति–जसति। पश १७२० बन्धने। पाशयति। अम १७२१ रोगे। आमयति। 'नान्ये मितः–' इति निषेधः। 'अम' गत्यादौ शपि गतः। तस्माद्धेतुमण्णौ 'न कम्यमिचमाम्' इति निषेधः। आमयति। चट १७२२ स्फुट १७२३ भेदने। विकासे शशपोः 'स्फुटति–स्फोटते' इत्युक्तम्। घट १७२४ सङ्घाते। घाटयति। 'हन्त्यर्थाश्च' (ग सू २००) नवगण्यामुक्ता अपि हन्त्यर्थाः स्वार्थे णिचं लभन्ते इत्यर्थः। दिवु १७२५ मर्दने। उदित्त्वाद्देवतीत्यपि। अर्ज १७२६ प्रतियत्ने। अयमर्थान्तरेऽपि। द्रव्यमर्जयति। घुषिर् १७२७ विशब्दने। घोषयति। 'घुषिरविशब्दने'। (सू ३०६३) इति सूत्रे 'अविशब्दने' इति निषेधाल्लिङ्गादनित्योऽस्य णिच्। घोषति। इरित्त्वादङ्। अघुषत्–अघोषीत्। ण्यन्तस्य तु अजू-

---

पठितम्। 'काणि राणि श्राणि भाणि हेठि लोपयः षट् काण्यादयः' इति भाष्यम्। **अचीकणदिति** ॥ ह्रस्वत्वपक्षे लघुपरत्वादभ्यासस्य सन्वत्त्वमिति भावः। **शशपोरिति** ॥ शविकरणे शव्विकरणे चेत्यर्थः। **हन्त्यर्थाश्चेति** ॥ गणसूत्रमिदं। हन हिंसागत्योरिति हनधातोर्हिंसा गमनञ्चार्थः। एतदर्थकाः ये धातवः भ्वादिषु नवसु गणेषु पठिताः ते सर्वेऽपि चुरादौ पठिताः प्रत्येतव्या इत्यर्थः। ततश्च तेभ्यः स्वार्थे णिजपि पक्षे भवतीति फलितम्। तदाह। **नवगण्यामित्यादि** ॥ 'दिवु मर्दने'। **उदित्त्वादिति** ॥ उदित्करणम् 'उदितो वा' इति क्त्वायामिड्विकल्पार्थम्। द्यूत्वा–देवित्वा। इडभावे ऊठ्। इटि तु 'नक्त्वा सेट्' इति कित्त्वनिषेधात् गुण इति स्थितिः। अस्य नित्यण्यन्तत्वे सति णिचा व्यवहितत्वेन क्त्वायामिड्विकल्पस्य अप्रसक्तेरुदित्करणं व्यर्थं सत् ज्ञापयति अस्य दिवुधातोः णिज्विकल्प इतीति भावः। 'घुषिर् विशब्दने'। विशब्दनं शब्देन स्वाभिप्रायाविष्करणं प्रतिज्ञानञ्च। भ्वादौ त्वयं धातुरविशब्दनार्थकः पठितः। **घोषयतीति** ॥ शब्देन स्वाभिप्रायमाविष्करोतीत्यर्थः। प्रतिजानीते इति वा। **लिङ्गादिति** ॥ इण्निषेधप्रकरणे 'घुषिर् अविशब्दने' इति सूत्रम्। अविशब्दनार्थकात् घुषधातोर्निष्ठायां इण्नस्यादित्यर्थः। यथा–घुष्टा रज्जुः। प्रसारितेत्यर्थः। अविशब्दने इति किम्। अवघुषितं वाक्यम्। प्रतिज्ञातमित्यर्थः। अत्र विशब्दनार्थकत्वान्नेण्निषेधः इति स्थितिः। तत्र विशब्दनार्थकस्य घुषधातोः चौरादिकत्वेन ण्यन्तत्वनियमाण्णिचा व्यवधानात्ततः परा निष्ठा नास्त्येवेति इण्निषेधे विशब्दनपर्युदासो व्यर्थस्सन् चौरादिकस्यास्य विशब्दनार्थकस्य घुषेः णिचि विकल्पङ्गमयति। एवञ्च अवघुष्टं वाक्यमित्यत्र चौरादिकघुषेर्विशब्दनार्थकस्य निष्ठायामितीण्निषेधो निर्बाधः इति भाष्ये स्पष्टम्। **इरित्त्वादङ् वेति** ॥ णिजभावपक्षे इति शेषः। ननु इरित्त्वादेव णिज्विकल्पे सिद्धे 'घुषिरविशब्दने' इति इण्निषेधसूत्रे अविशब्दने

घुषत् । आङः क्रन्द १७२८ सातत्ये । भौवादिकः क्रन्दधातुराह्वानाद्यर्थ उक्तः । स एवाङ्पूर्वो णिचं लभते सातत्ये । आक्रन्दयति । अन्ये तु 'आङ्पूर्वो घुषिः क्रन्दसातत्ये' इत्याहुः । आघोषयति । लस १७२९ शिल्पयोगे । तसि १७३० भूष १७३१ अलङ्करणे । अवतंसयति–अवतंसति । भूषयति । अर्ह १७३२ पूजायाम् । ज्ञा १७३३ नियोगे । आज्ञापयति । भज १७३४ विश्राणने । शृधु १७३५ प्रसहने । 'अशशर्धत्–अशीशृधत्' । यत १७३६ निकारोपस्कारयोः । रक १७३७ लग १७३८ आस्वादने । 'रघ' इत्येके । 'रग' इत्यन्ये । अञ्चु १७३९ विशेषणे । अञ्चयति । उदित्त्वमिड्विकल्पार्थम् । अत एव विभाषितो णिच् । अञ्चति । एवं शृधुजसुप्रभृतीनामपि बोध्यम् । लिगि १७४० चित्रीकरणे । लिङ्गयति–लिङ्गति । मुद १७४१ संसर्गे । मोदयति सक्तून्घृतेन । त्रस १७४२ धारणे । 'ग्रहणे' इत्येके । 'वारणे' इत्यन्ये । उध्रस १७४३ उञ्छे । उकारो धात्ववयव इत्येके । नेत्यन्ये । ध्रासयति । उध्रासयति । मुच १७४४ प्रमोचने, मोदने च । वस १७४५ स्नेहच्छेदापहरणेषु । चर १७४६ संशये । च्यु १७४७ सहने । 'हसने च' इत्येके । च्यावयति । 'च्युस' इत्येके । च्योसयति । भुवोऽवकल्कने १७४८ । अवकल्कनं मिश्रीकरणमित्येके । चिन्तनमित्यन्ये । भावयति । कृपेश्च १७४९ । कल्पयति ।

इति पर्युदासस्य णिज्विकल्पज्ञापकत्वाश्रयणक्लेशो भाष्ये व्यर्थ इति चेन्न । अत एव भाष्यादिरित्त्वाभावविज्ञानात् । एवञ्च 'घुषिरविशब्दने' इत्यत्र घुषिरित्यस्य इका निर्देशमाश्रित्य प्रथमान्तत्वमेवाश्रयणीयम् । इरित्त्वादङ्वेति मूलन्तु भाष्यविरोधादुपेक्ष्यमेवेत्यास्तान्तावत् । **आङः क्रन्द सातत्ये इति** ॥ आङः परः क्रन्दधातुः आह्वानसातत्येऽर्थे णिचं लभते इत्यर्थः । यद्वा आङ इत्यनन्तरं घुषिरित्यनुवर्तते । क्रन्दसातत्ये इत्यर्थनिर्देशः । तदाह । **अन्ये त्विति । लसशिल्पयोगे इति** ॥ कौशले इत्यर्थः । **तसि भूषेति** ॥ अत्र तसिः प्रायेण अवपूर्वः । तदाह । **अवतंसयतीति । ज्ञा नियोगे इति** ॥ आङ्पूर्वः । तदाह । **आज्ञापयतीति** ॥ आदन्तत्वात् पुक् । अजिज्ञपत् । **यत निकारेति** ॥ ताल्व्यान्तस्थादिः । यत्तो वा प्रैषो वा निकारः । यातयति । अयीयतत् । **अञ्चु विशेषणे इति** व्यावर्तने इत्यर्थः । **उदित्त्वमिति** ॥ 'उदितो वा' इत्यण्यन्तात् क्त्वायामिड्विकल्पार्थमित्यर्थः । ण्यन्तात्तु णिचा व्यवधानात् इड्विकल्पस्य न प्रसक्तिरिति भावः । नन्वस्य नित्यण्यन्तत्वादण्यन्तत्वं असिद्धमित्यत आह । **अत एवेति** ॥ **च्यु सहने इति** ॥ च्यावयति । अचुच्यवत् । **भुवोऽवकल्कने इति** । अवकल्कनवृत्तेर्भूधातोर्णिच् स्यादित्यर्थः । **कृपेश्चेति** ॥ अवकल्कनवृत्तेः कृपेः

'आ स्वदः सकर्मकात्' (ग सू २०१)। स्वदिमभिव्याप्य सम्भवत्कर्मभ्य एव णिच्। ग्रस १७५० ग्रहणे। ग्रासयति फलम्। पुष १७५१ धारणे पोषयत्याभरणम्। दल १७५२ विदारणे। दालयति। पट १७५३ पुट १७५४ लुट १७५५ तुजि १७५६ मिजि १७५७ पिजि १७५८ लुजि १७५९ भजि १७६० लघि १७६१ त्रसि १७६२ पिसि १७६३ कुसि १७६४ दशि १७६५ कुशि १७६६ घट १७६७ घटि १७६८ बृहि १७६९ बर्ह १७७० बल्ह १७७१ गुप १७७२ धूप १७७३ विच्छ १७७४ चीव १७७५ पुथ १७७६ लोकृ १७७७ लोचृ १७७८ णद १७७९ कुप १७८० तर्क १७८१ वृतु १७८२ वृधु १७८३ भाषार्थाः। पाटयति। पोटयति। लोटयति। तुञ्जयति। तुञ्जति। एवं परेषाम्। घाटयति। घण्टयति।

२५७२। नाग्लोपिशास्वृदिताम्। (७-४-२)

णिच्यग्लोपिनः शास्तेः ऋदितां चोपधाया ह्रस्वो न स्याच्चङ्परे णौ। अलुलोकत्। अलुलोचत्। वर्तयति। वर्धयति। उदित्त्वात् वर्तति। वर्धति। रुट १७८४ लजि १७८५ अजि १७८६ दसि १७८७ भृशि १७८८ रुशि १७८९ शीक १७९० रुसि १७९१ नट १७९२ पुटि १७९३ जि १७९४ चि १७९५ रघि १७९६ लघि १७९७ अहि १७९८ रहि १७९९ महि १८०० च। लडि १८०१ तड १८०२ नल १८०३ च। पूरी १८०४ आप्यायने। ईदित्त्वं निष्ठायामिण्निषेधाय। अत एव णिज्वा। पूरयति–पूरति।

णिच् स्यादित्यर्थः। **कल्पयतीति** ॥ 'कृपो रो लः' इति लत्वम्। कृपेश्चेति पाठान्तरम्। **आस्वदस्सकर्मका दिति** ॥ आङभिविधौ। तदाह। **स्वदिमभिव्याप्येति** ॥ तत्र 'ष्वद आस्वादने' इत्यस्य अकर्मकत्वादाह। **सम्भवत्कर्मभ्यः इति** ॥ इत आरभ्य आस्वदीयास्सकर्मकाः। स्वदिस्त्वकर्मकः। **पट पुटेति** ॥ एकत्रिंशत् धातवः। आद्यास्त्रयष्टान्ताः। आद्यद्वितीयौ पवर्गप्रथमादी। चतुर्थाद्या एकादश इदितः। ञिसिपिसी इदुपधौ। अदुपधौ इत्येके। षोडशसप्तदशाविदितौ। अलुलोकत्–अलुलोचत्, इत्यत्र उपधाह्रस्वे प्राप्ते। **नाग्लोपि** ॥ 'णौ चङ्युपधायाः' इत्यनुवर्तते। णावित्यावर्तते। एकमग्लोपिन इत्यत्रान्वेति। द्वितीयन्तु निषेधे परनिमित्तम्। तदाह। **णिच्यग्लोपिनः इत्यादि** ॥ ऋदित्त्वान्नाग्लोपीति निषेधेन उपधाह्रस्वाभावे सति लघुपरकत्वाभावान्नाभ्यासदीर्घ इति भावः। **उदित्त्वादिति** ॥ 'वृतु वृधु' इत्युदित्त्वं 'उदितो वा' इत्यप्यन्तात् क्त्वायामिड्विकल्पार्थम्। ण्यन्तात्तु णिचा व्यवधानात् नेड्विकल्पप्रसक्तिः। अतो णिज्विकल्पो विज्ञायते इति भावः। पूरी आप्यायने। **इण्निषे-**

रुज १८०५ हिंसायाम् । ष्वद १८०६ आस्वादने । 'स्वाद' इत्येके । असिष्वदत् । दीर्घस्य त्वषोपदेशत्वात् असिस्वदत् ।

'आ धृषाद्वा' (ग सू २०२) । इत ऊर्ध्वं विभाषितणिचो धृषधातुमभिव्याप्य । युज १८०७ पृच १८०८ संयमने । योजयति–योजति । अयौक्षीत् । पर्चयति–पर्चति । पार्चिता । अपर्चीत् । अर्च १८०९ पूजायाम् । षह १८१० मर्षणे । साहयति 'स एवायं नागः सहति कलभेभ्यः परिभवम्' ईर १८११ क्षेपे । ली १८१२ द्रवीकरणे । लाययति–लयति । लेता । वृजी १८१३ वर्जने । वर्जयति–वर्जति । वृञ् १८१४ आवरणे । वारयति–वरति–वरते । वरिता–वरीता । जॄ १८१५ वयोहानौ । जारयति–जरति । जरिता जरीता । ञि १८१६ च । ञ्जाययति–ञ्जयति । ञ्जेता । रिच १८१७ वियोजनसम्पर्चनयोः । रेचयति–रेचति । रेक्ता । शिष १८१८ असर्वोपयोगे । शेष्यति–शेषति । शेष्टा । अशिक्षत् । अयं विपूर्वोऽतिशये । तप १८१९ दाहे । तापयति–तपति । तप्ता । तृप १८२० तृप्तौ । 'सन्दीपने' इत्येके ।

धायेति ॥ अण्यन्तात् क्त्वायामिण्निषेधार्थमीदित्त्वम् । ण्यन्तात्तु णिचा व्यवधानादप्रसक्तेः । अतो णिञ्चिकल्पो विज्ञायते इत्यर्थः । स्वदधातुः षोपदेशः । तदाह । **असिष्वददिति** ॥ आदेशसकारत्वात्षः । अभ्यासेकारस्य संयोगपरकत्वेन गुरुत्वान्नाभ्यासदीर्घः । **दीर्घस्य त्विति** ॥ दीर्घमध्यस्य त्वित्यर्थः । **अषोपदेशत्वादिति** ॥ ह्रस्वमध्यस्यैव स्वदेः षोपदेशेषु परिगणनादिति भावः । इत्यास्वदीयाः । **आधृषाद्वेति** ॥ गणसूत्रम् । **विभाषितणिचः इति** ॥ विकल्पितणिच्काः प्रत्येतव्या इत्यर्थः । आङभिव्याप्ताविति मत्वा आह । **धृषधातुमभिव्याप्येति** ॥ णिजभावपक्षे आह । **अयौक्षीदिति । अर्च पूजायामिति** ॥ अयमनुदात्तेदिति शाकटायनः । अर्चयते । अर्चते । अस्य भ्वादौ पाठः अनार्षः । अनेनैव सिद्धेः । नच परस्मैपदार्थं भ्वादावर्चेः पाठ इति वाच्यम् । भ्वादौ तस्याप्यात्मनेपदीयतायाश्शाकटायनसम्मतत्वेन माधवोक्तेः । एवमत्रत्यानामार्षधातूनां भ्वादौ परस्मैपदिषु पाठः प्रामादिक एवेत्याहुः । ली द्रवीकरणे । **लाययतीति** ॥ लीलोरिति नुक् तु न । लासाहचर्यात् हेतुमण्णावेवास्य प्रवृत्तेः । **लेतेति** ॥ विभाषा लीयतेः इत्यात्वन्तु न । तत्र श्नाश्यन्विकरणयोरेव यका निर्देश इति भाष्यात् । वृञ् आवरणे । **वरिता–वरीतेति** ॥ 'वृतो वा' इति दीर्घः । आशीर्लिङि वियात् । आत्मनेपदे तु 'लिङ्सिचोः' इति वेट् । वृषीष्ट–वरिषीष्ट । इडभावपक्षे उश्चेति कित्त्वान्न गुणः । 'न लिङि' इति इटो न दीर्घः । अवृत । **ञि चेति** ॥ ह्रस्वान्तोऽयम् । **रिच वियोजने इति** ॥ अनिडयम् । ततश्च णिजभावपक्षे नेट् । तदाह । **रेक्तेति । शिष असर्वेति** ॥ अयमप्यनिट् । तदाह । **शेष्टेति । अशिक्षदिति** ॥ शल इगुपधादिति क्सः । **अयं विपूर्वो अतिशये इति** ॥ वर्तत इति शेषः । अयमस्माद्विशिष्ट इत्यत्र अधिक इति गम्यते । **तृप तृप्ताविति** ॥ अनिट्सु

तर्पयति–तर्पति। तर्पिता। छृदी १८२१ संदीपने। छर्दयति–छर्दति। छर्दिता। छर्दिष्यति। 'सेऽसिचि–' (सू २५०३) इति विकल्पो न। साहचर्यात्तत्र रौधादिकस्यैव ग्रहणात्। 'चृप छृप दृप सन्दीपने' इत्येके। चर्पयति। छर्पयति। दृभी १८२२ भये। दर्भयति। दर्भति। दर्भिता। दृभ १८२३ संदर्भे। अयं तुदादावीदित्। श्रथ १८२४ मोक्षणे। 'हिंसायां' इत्येके। मी १८२५ गतौ। मायर्यति–मयति। मेता। ग्रन्थ १८२६ बन्धने। ग्रन्थयति–ग्रन्थति। शीक १८२७ आमर्षणे। चीक १८२८ च। अर्द १८२९ हिंसायाम्। स्वरितेत्। अर्दयति–अर्दति–अर्दते। हिसि १८३० हिंसायाम्। हिंसयति–हिंसति। 'हिनस्ति' इति श्नमि गतम्। अर्ह १८३१ पूजायाम्। आङः षद १८३२ पद्यर्थे। आसादयति–आसीदति। 'पाघ्रा–' (सू २३३०) इति सीदादेशः। आसत्ता। आसात्सीत्। शुन्ध १८३३ शौचकर्मणि। शुन्धिता। अशुन्धीत्। अशुन्धिष्टाम्। छद १८३४ अपवारणे। स्वरितेत्। जुष १८३५ परितर्कणे। परितर्कणमूहो हिंसा वा। 'परितर्पणे' इत्यन्ये। परितर्पणं परितृप्तिक्रिया। जोषयति–जोषति। प्रीतिसेवनयोर्जुषत इति तुदादौ। धूञ् १८३६ कम्पने। णावित्यधिकृत्य 'धूञ्प्रीञोर्नुग्वक्तव्यः' (वा ४५१९)। धूनयति–धवति–धवते। केचित्तु 'धूञ्प्रीणोः–' इति पठित्वा प्रीणातिसाहचर्याद्धुनोतेरेव नुकमाहुः। धावयति। अयं स्वादौ क्रयादौ तुदादौ च, स्वादौ ह्रस्वश्च। तथा च कविरहस्ये—

'धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तम्।
वायुर्विधूनयति चम्पकपुष्परेणून्यत्कानने धवति चन्दनमञ्जरीश्च॥'

प्रीञ् १८३७ तर्पणे। प्रीणयति। 'धूञ्प्रीणोः—' इति हरदत्तोक्तपाठे तु प्रायर्यति–प्रयति–प्रयते। श्रन्थ १८३८ ग्रन्थ १८३९ सन्दर्भे। आप्ल १८४० लम्भने। आपयति–आपति। आपत्। आप्ता। स्वरितेदयमित्येके। आपते। तनु १८४१ श्रद्धोपकरणयोः 'उपसर्गाच्च दैर्घ्ये'। तानयति–वितानयति–तनति–

श्यना निर्देशादयं सेट्। तदाह। **तर्पितेति। छृदी सन्दीपने इति॥** ईदित्त्वान्निष्ठायामिण्निषेधार्थम्। **धुवति स्फुटितेति॥** शविकरणस्य रूपम्। शस्य ङित्त्वाद्गुणाभावे उवङ्। प्रीञ् तर्पणे। **प्रीणयतीति॥** 'धूञ्प्रीञोः' इति वार्तिकान्नुगिति भावः। **हरदत्तेति॥** अनेन भाष्यासम्मतत्वं सूचितम्। **उपसर्गाच्चेति॥** दैर्घ्ये तु उपसर्गादनुपसर्गाच्च परस्तनु-

वितनति। 'चन श्रद्धोपहननयोः' इत्येके। चानयति--चनति। वद १८४२ सन्देशवचने। वादयति। स्वरितेत्। वदति--वदते। अनुदात्तेदित्येके। ववदतुः। ववदिथ। ववदे। वद्यात्। वच १८४३ परिभाषणे। वाचयति--वचति। वक्ता। अवाक्षीत्। मान १८४४ पूजायाम्। मानयति--मानति। मानिता। विचारणे तु भौवादिको नित्यसन्नन्तः। स्तम्भे तु 'मानयते' (इत्याकुस्मीयाः।) 'मन्यते' इति दिवादौ। 'मनुते' इति तनादौ च। भू १८४५ प्राप्तावात्मनेपदी। भावयते--भवते। णिच्सन्नियोगेनैवात्मनेपदमित्येके। भवति। गर्ह १८४६ विनिन्दने। मार्ग १८४७ अन्वेषणे। कठि १८४८ शोके। उत्पूर्वोऽयमुत्कण्ठायाम्। 'कण्ठते इत्यात्मनेपदी गतः। मृजू १८४९ शौचालङ्कारयोः। मार्जयति--मार्जति। मार्जिता--मार्ष्टा। मृष १८५० तितिक्षायाम्। स्वरितेत्। मर्षयति--मर्षति--मर्षते। मृष्यति--मृष्यते इति दिवादौ। सेचने शपि मर्षति। धृष १८५१ प्रसहने। धर्षयति--धर्षति। इत्याधृषीयाः।

अथादन्ताः। कथ १८५२ वाक्यप्रबन्धे। अल्लोपस्य स्थानिवद्भावान्न वृद्धिः। कथयति। अग्लोपित्वान्न दीर्घसन्वद्भावौ। अचकथत्। वर १८५३ ईप्सायाम्। वरयति। वारयतीति गतम्। गण १८५४ सङ्ख्याने। गणयति।

धातुराधृषीयो वेदितव्य इत्यर्थः। श्रद्धोपकरणयोस्त्वनुपसर्गादेवेति भावः। 'वच परिभाषणे'। **अवाक्षीदिति** ॥ अस्यतिवक्तीति लुका निर्देशादङ् नेति भावः। वचिस्वपीति सम्प्रसारणम्। उच्यात्। इत्याधृषीयाः। **अथादन्ता इति** ॥ वक्ष्यन्ते इति शेषः। अन्ते अकारो नेत्संज्ञकः नाप्युच्चारणार्थ इति भावः। तत्र कथधातोर्णिचि अतो लोपे कथि इत्यस्मात् तिपि शपि गुणे अयादेशे कथयतीति रूपं वक्ष्यति। तत्र णिचमाश्रित्य उपधावृद्धिमाशङ्क्याह। **अल्लोपस्य स्थानिवद्भावादिति** ॥ अचः परस्मिन्नित्यनेनेति भावः। अत्रेदमवधेयम्। स्थानिनि सति शास्त्रीयं यत्कार्यं तदेव स्थानिवदादेशोऽनल्विधावित्यत्रातिदिश्यते। यत्तु स्थानिनि सति निमित्तव्याघातान्न भवति तस्य भावस्य अशास्त्रीयत्वान्नातिदेशः। अन्यथा नायक इत्यत्र ईकारस्थानिकस्य ऐकारस्य आयादेशानापत्तेः। ईकारे स्थानिनि सति आयभावस्य दृष्टत्वेन तस्याप्यैकारे अतिदेशप्रसङ्गात्। 'अचः परस्मिन्' इत्यत्र तु स्थानिनि सति यत् शास्त्रीयकार्यं प्रसज्यते तस्य तदभावस्य चाशास्त्रीयस्याप्यतिदेश इति भाष्ये स्पष्टम्। अतोऽत्र धकारादकारे सति प्रसक्तस्य उपधावृद्ध्यभावस्य अशास्त्रीयत्वेऽप्यतिदेश इति सिद्धम्। लुङि चङि अचकथत् इत्यत्र सन्वत्त्वमाशङ्क्याह। **अग्लोपित्वादिति** ॥ सन्वत्त्वविषये जायमानोऽभ्यासदीर्घः सन्वत्त्वनापेक्षत इति पृथगुक्तिः। एवङ्कथादौ सर्वत्र ज्ञेयम्। गण सङ्ख्याने। चङि अल्लोपस्य स्थानि-

२५७३। ई च गणः। (७-४-९७)

गणेरभ्यासस्य ईत्स्याच्चङ्परे णौ। चादत्। अजगणत्--अजीगणत्। शठ १८५५ श्वठ १८५६ सम्यगवभाषणे। पट १८५७ वट १८५८ ग्रन्थे। रह १८५९ त्यागे। अररहत्। स्तन १८६० गदी १८६१ देवशब्दे। स्तनयति। गदयति। अजगदत्। पत १८६२ गतौ वा। वा णिजन्तः। वा अदन्त इत्येके। आद्ये पतयति--पतति। पताञ्चकार। अपतीत्। द्वितीये पातयति। अपीपतत्। पष १८६३ अनुपसर्गात्। गताविस्येव। पषयति। स्वर १८६४ आक्षेपे। स्वरयति। रच १८६५ प्रतियत्ने। रचयति। कल १८६६ गतौ संख्याने च। चह १८६७ परिकल्कने। परिकल्कनं दम्भः शाठ्यं च। मह १८६८ पूजायाम्। महयति। महति इति शपि गतम्। सार १८६९ कृप १८७० श्रथ १८७१ दौर्बल्ये। सारयति। कृपयति। श्रथयति। स्पृह १८७२ ईप्सायाम्। भाम १८७३ क्रोधे। अबभामत्। सूच १८७४ पैशुन्ये। सूचयति। अषोपदेशत्वान्न षः। असूसुचत्। खेट १८७५ भक्षणे। तृतीयान्त इत्येके। 'खोट' इत्यन्ये। क्षोट १८७६ क्षेपे। गोम १८७७ उपलेपने। अजुगोमत्। कुमार १८७८ क्रीडायाम्। अचुकुमारत्। शील १८७९ उपधारणे।

वत्त्वात् दीर्घसन्वद्भावयोरभावे अजगणदित्येव प्राप्ते आह। **ई च गणः**॥ 'सन्वल्लघुनि' इत्यतश्चङ्परे इति, अत्र लोप इत्यतः अभ्यासस्येति, चानुवर्तते। तदाह। **गणेरभ्यासस्येति**॥ 'अत्स्मृदृत्वर' इति पूर्वसूत्रादद्रहणञ्चकारादनुकृष्यते। तदाह। **चाददिति। स्तनगदीदेवशब्दे इति**॥ पर्जन्यगर्जने इत्यर्थः। स्तनश्च गदिश्चेति द्वन्द्वः। गदीति इका निर्देशः। गदेत्यकारान्तात् इकि अल्लोपे गदीति निर्देशः। एवञ्च प्राकरणिकमदन्तत्वन्नव्याहन्यते। **पत गतौ वेति**॥ गतावर्थे पतधातुः णिचं वा लभत इत्यर्थः। तदाह। **वा णिजन्त इति**॥ आधृषीयत्वाभावात् विकल्पविधिः। यद्वा वाशब्दस्य अदन्तत्व एवान्वयः। णिच् तु नित्य एव। तदाह। **वा अदन्त इत्येके इति**॥ प्रथमपक्षे तु अदन्तत्वमेव। तदाह। **आद्ये पतयतीति**॥ अल्लोपस्य स्थानिवत्वान्न वृद्धिः। **पताञ्चकारेति**॥ णिजभावेऽप्यदन्तत्वात् कास्यनेकाच् इत्यामिति भावः। चङि अपपतत्। अग्लोपित्वान्न दीर्घसन्वत्त्वे। **द्वितीये पातयतीति**॥ तकारादकारस्य उच्चारणार्थत्वादुपधावृद्धिरिति भावः। **अपीपतदिति**॥ अग्लोपित्वाभावाद्दीर्घसन्वत्त्वे इति भावः। **कृपयतीति**॥ अजन्तत्वस्य धात्वन्तरत्वात् 'कृपो रो लः' इति न भवति। 'स्पृह ईप्सायाम्।' आप्तुमिच्छा ईप्सा। **अबभामदिति**॥ चङि अल्लोपस्य स्थानिवत्वान्नोपधाह्रस्वः। सूच पैशुन्ये। **अषोपदेशत्वादिति**॥ अनेकाच्त्वादिति भावः। खेट भक्षणे। **तृतीयान्त इति**॥ टवर्गतृतीयान्त इत्यर्थः। साम सान्त्वप्रयोगे। सान्त्वप्रयोगः अकटुभाषणम्।

उपधारणमभ्यासः । साम १८८० सान्त्वप्रयोगे । अससामत् । 'साम सान्त्वने' इत्यतीतस्य तु असीषमत् । वेल १८८१ कालोपदेशे । वेलयति । 'काल' इति पृथग्धातुरित्येके । कालयति । पल्पूल १८८२ लवनपवनयोः । वात १८८३ सुखसेवनयोः । 'गतिसुखसेवनेषु' इत्येके । वातयति । अववातत् । गवेष १८८४ मार्गणे । अजगवेषत् । वास १८८५ उपसेवायाम् । निवास १८८६ 'आच्छादने' । अनिनिवासत् । भाज १८८७ पृथक्कर्मणि । सभाज १८८८ प्रीतिदर्शनयोः । प्रीतिसेवनयोः' इत्यन्ये । सभाजयति । ऊन १८८९ परिहाणे । ऊनयति । 'ओः पुयण्जि—' (सू २५७७) इति सूत्रे 'पययोः' इति वक्तव्ये वर्गप्रत्याहारजकारग्रहो लिङ्गं 'णिचि अच आदेशो न

अससामदिति ॥ अल्लोपस्य स्थानिवत्त्वान्नोपधाह्रस्वः । ननु साम सान्त्वने इति कथादेः प्राक् चुरादौ पाठो व्यर्थः अनेनैव सिद्धेः इत्यत आह । **साम सान्त्वने इत्यतीतस्य तु असीषमदिति** ॥ पूर्वपठिते सामधातौ मकारादकारस्य उच्चारणार्थतया च उपधाह्रस्वः दीर्घसन्वत्त्वे चेत्यर्थः । यद्यपि साम सान्त्वप्रयोगे इत्येव प्राक् चुरादौ पठितम् । तथापि सान्त्वनस्य सामप्रयोगादनन्यत्वात्तथोक्तिरिति भावः । गवेष मार्गणे । मार्गणं अन्वेषणम् । चङि अल्लोपस्य स्थानिवत्त्वान्नोपधाह्रस्वः । तदाह । **अजगवेषदिति** ॥ 'निवास आच्छादने' । अनिनिवासत् । 'ऊन परिहाणे' परिहाणन्न्यूनीभावः । **ऊनयतीति** ॥ णावतो लोप इति भावः । ननु लुङि चङि ऊन इ अत् इ इति स्थिते णिलोपे 'चङि' इत्यजादेर्द्वितीयस्य नशब्दस्य द्वित्वे अतो लोपे अग्लोपित्वेन सन्वत्त्वाभावादभ्यासे इत्त्वदीर्घयोरभावे आटो वृद्धौ औननदिति रूपं वक्ष्यति । तदनुपपन्नम् । द्वित्वात्प्रागेव परत्वादतो लोपे कृते निशब्दस्य द्वित्वे औनिनदित्येवमभ्यासे इकारश्रवणप्रसङ्गात् । नच द्वित्वे कार्ये अतो लोपस्य द्विर्वचनेऽचीति निषेधः शङ्क्यः । अल्लोपनिमित्तस्य णिचो द्वित्वनिमित्तत्वाभावात् इत्यत आह । **ओः पुयण्जीत्यादि** ॥ ओःपुयण्ज्यपरे इति सूत्रे ओः पययोरपरयोरित्येव वक्तव्ये पु इति पवर्गस्य यणिति प्रत्याहारस्य जकारस्य च ग्रहणं लिङ्गमित्यन्वयः । कुत्र लिङ्गमित्यत आह । **णिचीत्यादि** ॥ द्वित्वे कार्ये णिज्निमित्तकः अच आदेशो न स्यादित्यत्र लिङ्गमिति पूर्वेणान्वयः । तथाहि । ओः पुयण् ज्वपर इति सूत्रम् । सनि परे यदङ्गन्तदवयवाभ्यासोवर्णस्य इकारस्स्यात् अवर्णपरकेषु पवर्गयण्जकारेषु परत इति तदर्थः । पूङ् पिपावयिषति । भू बिभावयिषति । यु यियावयिषति । रु रिरावयिषति । लूल् लिलावयिषति । जु जिजावयिषति । इत्युदाहरणानि । अत्र द्वित्वम्प्रत्यनिमित्ते णिचि 'द्विर्वचनेऽचि' इति निषेधाप्रवृत्त्या द्वित्वात् प्रागेव परत्वाद्वृद्ध्यावादेशयोः कृतयोः अभ्यासेष्वाकारस्य ह्रस्वे सति 'सन्यतः' इत्येव इत्वसिद्धेः पवर्गयण्प्रत्याहारजकारग्रहणं व्यर्थम् । ओः पययोरपरयोः इत्येव सूत्रमस्तु । पकारयकारग्रहणन्तु न व्यर्थम् । पिपावयिषति यियावयिषतीत्यत्र उक्तरीत्या 'सन्यतः' इति इत्वसिद्धावपि पिपविषते यियविषतीत्यत्र पूङ्धातोर्युधातोश्च अण्यन्तात् 'सनि अभ्यासे' इत्वार्थं तदावश्यकत्वात् । तत्र हि

स्याद्वित्वे कार्ये' इति। 'यत्र द्विरुक्तावभ्यासोत्तरखण्डस्याद्योऽच्प्रक्रियायां परिनिष्ठिते रुपे वावर्णो लभ्यते, तत्रैवायं निषेधः'। ज्ञापकस्य सजातीयापेक्षत्वात्। तेन 'अचिकीर्तत् इति सिद्धम्। प्रकृते तु 'न' शब्दस्य द्वित्वम्। तत उत्तर-

---

इको झलिति सनः कित्त्वात् श्नुकः कितीति प्राप्तमिण्निषेधम्बाधित्वा 'स्मिपूङ्रञ्ज्वशां सनि' इति सनीवन्तर्द्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनामिति च सूत्राभ्यामिटि कृते इडादेस्सनो द्वित्वनिमित्तत्वेन इटोऽपि द्वित्वनिमित्ततया 'द्विर्वचनेऽचि' इति गुणावादेशयोर्निषेधे सति पू यु इत्यनयोर्द्वित्वे अभ्यासे अकाराभावेन 'सन्यतः' इत्यस्याप्रवृत्त्या तत्र इत्वार्थं पययोरित्यावश्यकम्। वर्गप्रत्याहारजकारग्रहणन्तु द्वित्वे कार्ये णावच आदेशो नेत्यनाश्रयणे व्यर्थमेव। तदाश्रयणे तु बिभावयिषतीत्यादिषु णिचि लुप्ते सति 'चङि' इति द्वित्वे कार्ये प्रत्ययलक्षणमाश्रित्य णिचि गुणावादेशयोः प्रतिषेधे सति उवर्णान्तानान्द्वित्वे अभ्यासे अकाराभावेन 'सन्यतः' इत्यस्याप्रवृत्त्या वर्गप्रत्याहारजकारग्रहणमर्थवत्। अतः द्वित्वे कार्ये णावच आदेशो नेति विज्ञायते इत्यर्थः। ननु 'कृत संशब्दने' अस्मात् णौ 'उपधायाश्च' इति ऋत इत्वे रपरत्वे किरत् इत्यस्मात् लुङि चङि णिलोपे द्वित्वे अभ्यासे उरदत्वे हलादिशेषे कस्य चुत्वे उत्तरखण्डे इकारस्य 'उपधायाश्च' इति दीर्घे अचिकीर्तदिति रूपमिष्यते। तन्न युज्यते। द्वित्वे कर्तव्ये णावच आदेशस्य निषिद्धतया इत्त्वात्प्रागेव कृत् इत्यस्य द्वित्वे, उरदत्वे, रपरत्वे, हलादिशेषे, कस्य चुत्वे, उत्तरखण्डे ऋत इत्त्वे रपरत्वे, उपधादीर्घे, अचिकीर्तदित्यापत्तेरित्यत आह। **यत्र द्विरुक्तावित्यादि**॥ यत्र धातौ चङि द्विर्वचने कृते अभ्यासोत्तरखण्डस्य आद्योऽच् अवर्णो लभ्यते तत्रैव द्वित्वे कार्ये णावच आदेशो नेत्ययं निषेध इत्यन्वयः। यद्यपि धातोरवयवस्य एकाचो द्वित्वे कृते अभ्यासोत्तरखण्डे द्वितीयस्याचोऽभावादाद्योऽजिति व्यर्थमेव। तथापि स्पष्टार्थन्तदित्याहुः। नन्वभ्यासोत्तरखण्डस्याद्योऽजवर्णो लभ्यते इत्यत्र किं वर्णः द्वित्वप्रवृत्तिवेलायां विवक्षितः उत परिनिष्ठिते रूपे विवक्षितः। नाद्यः। क्षुधातोर्ण्यन्तात् सनि चुक्षावयिषतीत्यत्र क्षु इत्यस्य द्वित्वे कृते अभ्यासोत्तरखण्डे प्राक्रियादशायामवर्णाभावेन वृद्ध्यावादेशयोर्निषेधाप्रवृत्त्या द्वित्वात् प्रागेव परत्वाद्वृद्ध्यावादेशयोः क्षाव् इत्यस्य द्वित्वे चिक्षावयिषतीत्यापत्तेः। न द्वितीयः। ऊन इ अ त् इति स्थिते सति न इत्यस्य द्वित्वे अभ्यासोत्तरखण्डे अल्लोपे सत्यवर्णाभावेन णौ अल्लोपस्य निषेधाप्रवृत्त्या द्वित्वात् प्रागेव परत्वादतो लोपे सति नि इत्यस्य द्वित्वे औनिनदित्यापत्तेरित्यत आह। **प्रक्रियायां परिनिष्ठिते रूपे वेति**॥ न त्वमुकत्रैवेत्याग्रह इति भावः। सजातीये पुयण्जां अभ्यासोत्तरखण्डे अवर्णपरत्वनियमादिति भावः। **सिद्धमिति**॥ प्रक्रियायां परिनिष्ठिते वा उत्तरखण्डे अवर्णाभावादृत इत्वस्य न निषेध इति भावः। एवं च चुक्षावयिषति इत्यत्र क्षु इत्यस्य द्वित्वे प्रक्रियादशायामभ्यासोत्तरखण्डे अवर्णाभावेऽपि परिनिष्ठिते रूपे तत्सत्त्वात् णौ गुणावादेशयोर्भवत्येव द्वित्वे कार्ये निषेधः। औननदित्यत्रापि णौ भवत्येवाल्लोपस्य निषेध इत्याह। **प्रकृते त्विति**॥ औननदित्यत्रेत्यर्थः। **नशब्दस्येति**॥ अल्लोपात्प्रागेव नशब्दस्य द्वित्वाश्रयणे प्रक्रियादशायामुत्तरखण्डे अवर्णलाभादल्लोपस्य निषेधे सति नशब्दस्यैव

खण्डेऽल्लोपः। औननत्। मा भवानूननत्। ध्वन १८९० शब्दे। अदध्वनत्। कूट १८९१ परितापे। 'परिदाहे' इत्यन्ये। सङ्केत १८९२ ग्राम १८९३ कुण १८९४ गुण १८९५ चामन्त्रणे। चात्कूटोऽपि। कूटयति। सङ्केतयति। ग्रामयति। कुणयति। गुणयति। पाठान्तरम्। केत १८९६ श्रावणे निमन्त्रणे च। केतयति। निकेतयति। 'कुण गुण चामन्त्रणे'। चकारात्केतने। कूण १८९७ सङ्कोचनेऽपि। स्तेन १८९८ चौर्ये। अतिस्तेनत्।

आ गर्वादात्मनेपदिनः। पद १८९९ गतौ। पदयते। अपपदत। गृह १९०० ग्रहणे। गृहयते। मृग १९०१ अन्वेषणे। मृगयते। 'मृग्यति' इति कण्ड्वादिः। कुह १९०२ विस्मापने। शूर १९०३ वीर १९०४ विक्रान्तौ। स्थूल १९०५ परिबृंहणे। स्थूलयते। अतुस्थूलत। अर्थ १९०६ उपयाच्ञायाम्। अर्थयते। आर्तथत। सत्र १९०७ सन्तानक्रियायाम्। असस्त्रत। अनेकाच्त्वान्न षोपदेशः। सिसत्रयिषते। गर्व १९०८ माने। गर्वयते। अदन्तत्वसामर्थ्यान्णिाज्विकल्पः। 'धातोरन्त उदात्तः' लिटि 'आम्' च फलम्। एवमग्रेऽपि। इत्यागर्वीयाः।

द्वित्वं न तु निशब्दस्येति भावः। **ततः इति** ॥ नशब्दस्य द्वित्वानन्तरमुत्तरखण्डे अल्लोप इति भावः। अत्र नशब्दद्वित्वार्थमेव ऊनधातोरदन्तत्वं स्थितम्। फलान्तरं सूचयन्नाह। **मा भवान् ऊननदिति** ॥ अग्लोपित्वान्नोपधाह्रस्व इति भावः। **पाठान्तरमिति** ॥ केत श्रावणे इत्यादि ज्ञेयमित्यर्थः। चकारात्केतेति समुच्चीयते इति शेषः। **सङ्कोचनेऽपीति** ॥ इतिशब्दः पाठान्तरसमाप्तौ 'स्तेन चौर्ये' अनेकाच्त्वान्न षोपदेशोऽयमिति मत्वा आह। **अतिस्तेनदिति** ॥ गृह ग्रहणे। ऋदुपधोऽयम्। **गृहयते इति** ॥ अल्लोपस्य स्थानिवत्त्वान्न गुण इति भावः। लुङि अजगृहत। अग्लोपित्वान्न सन्वत्त्वम्। मृग अन्वेषणे। **मृगयते इति** ॥ इहाप्यल्लोपस्य स्थानिवत्त्वान्न गुणः। 'मार्ग अन्वेषणे' इत्याधृषीयस्य तु मार्गयति–मार्गति इति च गतम्। अर्थ उपयाच्ञायाम्। **अर्थयते इति** ॥ अर्थ इ इति स्थिते अतो लोपः। न तु 'अचो ञ्णिति' इति वृद्धिः। वृद्धेर्लोपो बलीयानिति न्यायात्। अर्थवेदयोरित्यापुक्तु न। तत्र प्रातिपदिकस्य ग्रहणात्। गर्व माने। अभिमाने इत्यर्थः। ननु कथादावस्य पाठो व्यर्थः। अदन्तत्वे फलाभावात्। नच सन्वत्त्वनिवृत्तये अग्लोपित्वाय अदन्तत्वमिति शङ्क्यम्। लघुपरकत्वाभावादेव तदप्रसक्तेः। नाप्यल्लोपस्य स्थानिवद्भावात् उपधावृद्धिनिवृत्त्यर्थमदन्तत्वमिति शङ्क्यम्। गकारादकारस्यानुपधात्वादेव तदप्रसक्तेरित्यत आह। **अदन्तत्वसामर्थ्यान्णिाज्विकल्पः इति** ॥ ननु गर्वते इत्यत्र णिजभावेऽप्यदन्तत्वं निष्फलमिति कथन्तस्य विकल्पज्ञापकतेत्यत आह। **धातोरन्त उदात्तः इति** ॥ तेन गर्वते इत्यत्र वकारादकार उदात्तः फलति। अदन्तत्वाभावे तु गकारादकार उदात्तः

सूत्र १९०९ वेष्टने। सूत्रयति। असुसूत्रत्। मूत्र १९१० प्रस्रवणे। मूत्रयति–मूत्रति। रूक्ष १९११ पारुष्ये। पार १९१२ तीर १९१३ कर्मसमाप्तौ। अपपारत्। अतितीरत्। पुट १९१४ संसर्गे। पुटयति। धेक १९१५ दर्शने इत्येके। अदिधेकत्। कत्र १९१६ शैथिल्ये। कत्रयति–कत्रति। 'कर्त' इत्यप्येके। कर्तयति–कर्तति। 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (ग सू २०३) प्रातिपदिकाद्धात्वर्थे णिच्स्यात्, इष्टे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुव्लोपयणादिलोपप्रस्थस्फाद्यादेशभसंज्ञास्तद्वण्णावपि स्युः। पटुमाचष्टे पटयति। परत्वाद्वृद्धौ सत्यां टिलोपः। अपीपटत्। 'णौ चङि–' (सू २३१४) इत्यत्र भाष्ये तु 'वृद्धेर्लोपो बलीयान्' इति स्थितम्।

स्यादिति भावः। **लिट्यां चेति**॥ गर्वाञ्चके इत्यत्र 'कास्यनेकाचः' इत्याम्प्रत्ययोऽप्यदन्तत्वस्य फलमित्यर्थः। अन्यथा अनेकाच्त्वाभावादाम् न स्यादिति भावः। **एवमत्रेऽपीति**॥ 'मूत्र प्रस्रवणे' इत्यादावित्यर्थः। इत्यागर्वीयाः। सूत्र वेष्टने। अनेकाच्त्वादषोपदेशत्वार्थमस्य अदन्तत्वमिति न ततोऽस्य णिज्विकल्पः। 'कत्र शैथिल्ये'। **कर्त इत्यपीति**॥ अदन्तत्वसामर्थ्यादस्य णिज्विकल्प इति मत्वा आह। **कर्तयति। कर्ततीति**॥ 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' चुरादिगणसूत्रमिदम्। **इष्ठवदिति**॥ सप्तम्यन्ताद्वतिः। तेन भुवमाचष्टे भावयतीत्यत्र 'इष्ठस्य यिट् च' इति यिडागमो न भवति। तदाह। **इष्टे यथेति**॥ अत्र धात्वर्थे इत्यनेन करणम्। आख्यानं दर्शनं वचनं श्रवणं इत्यादि गृह्यते। **पुंवद्भावेति**॥ अतिशयेन पट्वी पटिष्ठेत्यत्र भस्याढे इति पुंवत्वम्। द्रढिष्ठ इत्यत्र 'र ऋतो हलादेर्लघोः' इति रभावः। अतिशयेन साधुस्साधिष्ठः इत्यत्र टिलोपः। अतिशयेन स्रग्वी स्रजिष्ठः इत्यत्र 'विन्मतोर्लुक्' इति विनो लुक्। अतिशयेन गोमान् गविष्ठः इत्यत्र मतुपो लुक्। अतिशयेन स्थूलः स्थविष्ठः इत्यादौ 'स्थूलदूरयुव' इत्यादिना यणादिलोपः पूर्वस्य च गुणः। अतिशयेन प्रियः प्रेष्ठः इत्यादौ प्रियस्थिरेत्यादिना प्रस्थाद्यादेशः। अतिशयेन स्रग्वी स्रजिष्ठः इत्यत्र भत्वान्न कुत्वम्। एते इष्ठ इव णावपि परतः स्युरित्यर्थः। **पटयतीति**॥ पटुमाचष्टे इत्याद्यर्थे णिच्। इष्ठवत्त्वात् टेरिति टिलोप इति भावः। ननु उकारस्य टेर्लोपे सति अग्लोपित्वात् सन्वत्त्वन्न स्यादित्यत आह। **परत्वाद्वृद्धौ सत्यां टिलोपः इति**॥ 'अचो ञ्णिति' इति उकारस्य वृद्धौ कृतायां औकारस्य टेर्लोपः। अकृतायान्तु वृद्धौ उकारस्य टेर्लोपः। ततश्च "शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः" इति न्यायेन टिलोपः अनित्यः। वृद्धिस्तु टिलोपे कृते सति नैव भवतीति साप्यनित्या। एवञ्च वृद्धिटिलोपयोरुभयोर्मध्ये परत्वात् उकारस्य वृद्धिः औकारः तस्यावादेशात्प्रागेव परत्वात् वार्णादाङ्गस्य बलीयस्त्वाच्च औकारस्य टेर्लोप इत्यर्थः। एवञ्च अनग्लोपित्वात् सन्वत्त्वमिति मत्वा आह। **अपीपटदिति**॥ एतच्च 'मुण्डमिश्र' इति सूत्रे भाष्यकैयटयोः स्पष्टम्। **स्थितमिति**॥ तथाच वृद्धेः प्रागुकारस्य लोपे अग्लोपित्वान्न सन्वत्त्वमित्यर्थः। भाष्ये उभयथा दर्शनाद्रूपद्वयमपि साध्विति बोध्यम्। शब्देन्दुशेखरे तु "वृद्धेः लोपो बलीयान्" इति 'णौ चङि' इति सूत्रभाष्यमेव प्रमाणम्। 'मुण्डमिश्र'

अपपटत्। 'तत्करोति तदाचष्टे' (ग सू २०४)। पूर्वस्यैव प्रपञ्चः। करोत्याचष्टे इति धात्वर्थमात्रं णिजर्थः। लडर्थस्त्वविवक्षितः। 'तेनातिक्रामति' (ग सू २०५)। अश्वेनातिक्रामति अश्वयति। हस्तिनातिक्रामति हस्तयति। 'धातुरूपं च' (ग सू २०६)। णिच्प्रकृतिर्धातुरूपं प्रतिपद्यते। चशब्दोऽनुक्तसमुच्चयार्थः। 'तथा च वार्तिकम्—'आख्यानात्कृतस्तदाचष्टे कृल्लुक्प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्' (वा १७६६) इति। कंसवधमाचष्टे कंसं घातयति। इह 'कंसं हन्' इ इति स्थिते।

इति सूत्रभाष्यं त्वेकदेश्युक्तिरिति प्रपञ्चितम्। अत्र पुंवद्भावादिकमुदाह्रियते। एनीमाचष्टे एतयति। पुंवद्भावात् ङीब्नकारयोर्निवृत्तिः। दृढमाचष्टे द्रढयति 'र ऋतः' इति रभावः। स्रग्विणमाचष्टे स्रजयति। विन्मतोरिति विनो लुक्। गोमन्तमाचष्टे गवयति। मतुपो लुक्। अङ्गवृत्तपरिभाषया न वृद्धिः। प्रियमाचष्टे प्राययति। स्थिरमाचष्टे स्थापयति, इत्यादिषु यणादिलोपप्रस्थस्फायादेशाः। अत्र वृद्धिर्भवत्येव। द्वयोरिति निर्देशेन अङ्गवृत्तपरिभाषाया अनित्यत्वाश्रयणात्। स्रग्विणमाचष्टे स्रजयति। सुबन्तात् विहितस्य विनो लुकि अन्तर्वर्तिविभक्त्या पदत्वात् प्राप्तङ्कुत्वं भत्वान्न भवति। तत्करोति तदाचष्टे। इदमपि चुरादिगणसूत्रम्। प्रातिपदिकादित्यनुवर्तते। तत्करोति तदाचष्टे इति चार्थे प्रातिपदिकाण्णिच् स्यादित्यर्थः। आचारक्विबिव प्रातिपदिकादेवेदम्। ननु 'प्रातिपदिकाद्धात्वर्थे' इत्येव सिद्धे किमर्थमिदमित्यत आह। **पूर्वस्यैव प्रपञ्च इति** ॥ ननु करोति आचष्टे इति वर्तमाननिर्देशादकरोदित्याद्यर्थेषु न स्यादित्यत आह। **करोत्याचष्टे इत्यादि** ॥ लडर्थ इत्युपलक्षणं भूते भविष्यति द्वित्वे बहुत्वे च प्रत्ययो भवत्येव। तेनातिक्रामति। इदमपि गणसूत्रम्। 'प्रातिपदिकाद्धात्वर्थे' इत्यस्यैव प्रपञ्चः। वाचा अतिक्रामति वाचयति इत्यत्र कुत्वन्तु न शङ्क्यम्। असुबन्तादेव प्रातिपदिकात् प्रत्ययोत्पत्तेः। **धातुरूपञ्चेति** ॥ इदमपि गणसूत्रम्। णिच्प्रकृतिरिति प्रतिपद्यते इति चाध्याहृत्य व्याचष्टे। **णिच्प्रकृतिर्धातुरूपम्प्रतिपद्यते इति** ॥ ननु प्रातिपादिकात् धात्वर्थे णिच् भवति णिच्प्रकृतिर्धातुरूपञ्च प्रतिपद्यते इति प्रतीयमानार्थाश्रयणे भुक्तमाचष्टे भुक्तयतीति न स्यात्। भुक्तशब्दस्य भुजधातुरादेशः स्यादित्यत आह। **चशब्दोऽनुक्तसमुच्चयार्थः इति** ॥ किमनुक्तं समुच्चीयते इत्यत आह। **तथाच वार्तिकमिति** ॥ **आख्यानात् कृत इति** ॥ 'हेतुमति च' इति सूत्रे इदं वार्तिकं स्थितम्। आख्यानं वृत्तकथाप्रबन्धः। तद्वाचिनः कृदन्तात् कंसवधादिशब्दात् तदाचष्टे इत्यर्थे णिचि कृते णिच्प्रकृत्यवयवभूतस्य कृतः लुक् तस्यैव कृतः या प्रकृतिः हनादिधातुरूपा तस्याः प्रत्यापत्तिः आदेशादिविकारपरित्यागेन स्वरूपेणावस्थानम्भवतीत्यर्थः। प्रकृतिवच्च कारकम् इत्यंशस्तु मूल एव व्याख्यास्यते। कंसवधमाचष्टे कंसं घातयतीत्युदाहरणम्। हननं वधः 'हनश्च वधः' इति भावे हनधातोः अप्प्रत्ययः प्रकृतेः वधादेशश्च। कंसस्य वधः कंसवधः तदन्वाख्यानपरवाक्यसन्दर्भो विवक्षितः। तमाचष्टे इत्यर्थे णिच्। अप्प्रत्ययस्य कृतो लुक्प्रकृतिभूतस्य हनधातोर्वधादेशस्य च निवृत्तिः। तथाच फलितं दर्शयति। **इह कंसं हन् इ इति स्थिते इति** ॥

२५७४। हनस्तोऽचिण्णलोः। (७-३-३२)

हन्तेस्तकारोऽन्तादेशः स्याच्चिण्णल्वर्जे ञिति णिति। नन्वङ्गसंज्ञा धातुसंज्ञा च कंसविशिष्टस्य प्राप्ता। ततश्चाङ्द्वित्वयोर्दोषः। किञ्च कुत्वतत्वे न स्याताम्। धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्। सत्यम् 'प्रकृतिवच्च' इति चकारो भिन्नक्रमः। कारकं च चात्कार्यम्। हेतुमण्णिचः प्रकृतेर्हन्यादेर्हेतुमण्णौ यादृशं कारकं धातावनन्तर्भूतं द्वितीयान्तं यादृशं च

हनस्तोऽचिण्णलोः ॥ हन इति षष्ठी। त इत्यत्र अकार उच्चारणार्थः। तदाह। **हन्तेस्तकार इति** ॥ अन्तादेश इत्यलोऽन्त्यपरिभाषया सिद्धम्। **ञिति णिति चेति** ॥ 'अचो ञ्णिति' इत्यतस्तदनुवृत्तेरिति भावः। तथाच हनो नकारस्य तत्वे 'हो हन्तेः' इति कुत्वेन हस्य घकारे घातीति ण्यन्तं फलितम्। ततो लटि घातयति इति रूपं स्थितम्। कृतो लुकि समासनिवृत्तौ सुब्लुकोऽपि निवृत्तौ कंघामिति च स्थितम्। 'आख्यानात् कृतः' इति वार्तिकस्थं प्रकृतिवच्च कारकमित्यंशं शङ्कोत्तरत्वेन योजयिष्यन् शङ्कामवतारयति। **नन्विति। कंसविशिष्टस्येति** ॥ कंसवधशब्दस्यैवेत्यर्थः। तस्मादेव णिचो विधानादिति भावः। ननु कंसवधशब्दस्य अङ्गत्वे का हानिरित्यत आह। **ततश्चेति** ॥ कंसवधशब्दस्याङ्गत्वात् अङ्द्वित्वयोर्विषये दोषः स्यात्। कंसशब्दात्पूर्वमडागमः स्यात्। कंस इत्यस्य द्विर्वचनं स्यात्। इष्यते तु कंसमजीघतत् इत्येवं हनधातोरेवोभयमित्यर्थः। **किञ्चेति** ॥ कंसङ्घातयतीति कुत्वतत्वं न स्यातामित्यर्थः। कुत इत्यत आह। **धातोरिति** ॥ धातोर्हन् इत्यादि तत्तत्स्वरूपेण ग्रहणे सति तत्प्रत्यये धातोर्विहितप्रत्यये कार्यविज्ञानमिति परिभाषयेत्यर्थः। तेन वार्त्रघ्नमित्यत्र 'हनस्तोऽचिण्णलोः' इति तत्वन्न भवतीति 'हनस्तोऽचिण्णलोः' इति सूत्रे भाष्ये स्पष्टम्। तथाच प्रकृते कंसं घातयतीत्यत्र 'हो हन्तेः' इति कुत्वं 'हनस्तोऽचिण्णलोः' इति तत्वञ्च न स्याताम्। अत्र णिचः प्रातिपदिकाद्विहितत्वेन धातोर्विहितत्वाभावादित्यर्थः। अत्र प्रत्ययलक्षणेन कृदन्ततया कृत्प्रकृत्यर्थस्य कर्मत्वेन कंसस्येति षष्ठी स्यादित्याक्षेपो बोध्यः। तत्परिहारस्यापि वक्ष्यमाणत्वात्। तामिमां शङ्कामधोङ्गीकारेण परिहरति। **सत्यमिति** ॥ कंसवधशब्दस्यैवाङ्गत्वमित्याद्यङ्गीक्रियते दोषापादनन्तु नाङ्गीक्रियत इत्यर्थः। **प्रकृतिवच्चेतीति** ॥ 'आख्यानात् कृतः' इति वार्तिके प्रकृतिवच्चेति चकारः भिन्नक्रमः। प्रकृतिवदित्यनन्तरपठितः चकारः कारकमित्यस्मादूर्ध्वं निवेशनीय इति भावः। तदेवाभिनीय दर्शयति। **कारकञ्चेति** ॥ चकारोऽयमनुक्तसङ्ग्रहार्थ इत्याह। **चात्कार्यमिति** ॥ समुच्चीयते इति शेषः। तथाच कारकङ्कार्यञ्च प्रकृतिवदिति फलितम्। अत्र प्रकृतिशब्देन हेतुमण्णिचः प्रकृतिर्विवक्षिता। व्याख्यानात्। प्रकृताविव प्रकृतिवत् सप्तम्यन्ताद्वतिः। तदाह। **प्रकृतेर्हन्यादेर्हेतुमण्णाविति** ॥ प्रयुज्यमाने सतीति शेषः। कारकमित्यस्य विवरणन्द्वितीयान्तामिति। द्वितीयातृतीयादिकारकविभक्त्यन्तमित्यर्थः। हन्ति कंसं कृष्णः तं प्रेरयतीत्यर्थे कंसङ्घातयति। कंसमजीघतदित्यादौ हेतुमण्यन्ते प्रयुज्यमाने यत् द्वितीयादिकारकविभक्त्यन्तं यच्च कार्यङ्कुत्वतत्वाङ्द्वित्वादि तत्सर्वं आख्यानात् कृत इत्यस्योदाहरणे कंसवधमाचष्टे कंसङ्घातयति कंसवधमाचष्ट कंसमजी-

कार्यं कुत्वतत्वादि तदिहापीत्यर्थः । कंसमजीघतत् । 'कर्तृकरणाद्धात्वर्थे' । (ग सू २०७) । कर्तुर्व्यापारार्थं यत्करणं न तु चक्षुरादिमात्रमित्यर्थः । असिना हन्ति । असयति । वल्क १९१७ दर्शने । चित्र १९१८ चित्रीकरणे । 'आलेख्यकरणे' इत्यर्थः । कदाचिद्दर्शने । 'चित्र' इत्ययमद्भुतदर्शने णिचं लभते । चित्रयति । अंस १९१९ समाघाते । वट १९२० विभाजने । लज १९२१ प्रकाशने । 'वटि' 'लजि' इत्येके । वण्टयति । लञ्जयति । अदन्तेषु पाठबलाददन्तत्वे वृद्धिरित्यन्ये । वण्टापयति । लञ्जापयति । शाकटायनस्तु कथादीनां सर्वेषां पुकमाह । तन्मते 'कथापयति' 'गणापयति' इत्यादि । मिश्र १९२२ सम्पर्के । संग्राम १९२३ युद्धे । अयमनुदात्तेत् । अकारप्रश्लेषात् ।

घतदित्यादावपि भवतीति फलितम् । तत्र कारकमित्यनेन कंसात् षष्ठी निरस्ता । उदाहृतहेतुमण्ण्यन्तस्थले कृद्योगाभावेन कर्मणि द्वितीयाया एव सत्त्वात् । कार्यमित्यनेन तु कुत्वतत्वे कंसस्य अड्द्वित्वनिरासश्चेति बोध्यम् । आख्यानशब्दश्च कथञ्चिद्वृत्तानुवादपरः, न तु भारतादिप्रसिद्धकंसवधादिकथापरः । तेन राजागमनमाचष्टे राजानमागमयतीत्यादि सिद्ध्यति । द्वितीयान्तमित्यत्र द्वितीयाग्रहणमुपलक्षणम् । तेन पुष्ययोगमाचष्टे पुष्येण योजयतीति सिद्ध्यतीति भाष्ये स्पष्टम् । 'कर्तृकरणाद्धात्वर्थे' इदमपि गणसूत्रम् । प्रातिपदिकाद्धात्वर्थे इत्यस्यैव प्रपञ्चः । कर्तुः करणं कर्तृकरणं, न तु कर्ता च करणञ्च इति द्वन्द्वः। व्याख्यानात् । तदाह । **कर्तुर्व्यापारार्थमिति** ॥ अभिमतफलोत्पादनार्थमित्यर्थः । साधकतमामिति यावत् । नन्वेवं सति करणाद्धात्वर्थे इत्येव सिद्धे कर्तृग्रहणं व्यर्थमित्यत आह । **न तु चक्षुरादिमात्रमिति** ॥ कर्तृग्रहणं विहाय करणादित्येवोक्तौ चक्षुरादीन्द्रियमेव सुप्रसिद्धत्वात् करणादिशब्देन गम्येत । अतः कर्तृग्रहणमित्याहुः । वस्तुतस्तु 'साधकतमङ्करणम्' इति शास्त्रप्रसिद्धकरणस्य ग्रहणौचित्यात् कर्तृग्रहणं स्पष्टार्थमेव । केचित्तु कर्तृकरणादिति द्वन्द्वमाश्रित्य देवदत्तेन वाचयति देवदत्तयतीति कर्तुरुदाजहृः । **कदाचिद्दर्शने इति** ॥ चित्रेत्यनुवर्तते । तदाह । **चित्र इत्ययमिति** ॥ कदाचिद्दर्शने इत्यस्य विवरणमद्भुतदर्शने इति । चित्र चित्रकरणे । कदाचिद्दर्शनयोरित्येव सुवचम् । **वटि लजि इत्येके इति** ॥ ननु कथादावनयोः पाठो व्यर्थः । इदितोरनयोः टकारान्तयोरदन्तत्वस्याप्रसक्तेः फलाभावाच्चेत्यत आह । **अदन्तेष्विति** ॥ अदन्तेषु पाठबलात् वण्टलञ्जेति कदाचिददन्तमप्यनयोर्विज्ञायते । अदन्तत्वस्य च फलाभावादतो लोपम्बाधित्वा 'अचो ञ्णिति' इति वृद्धौ 'अर्तिह्री' इति पुगित्यर्थः । फलितमाह । **वण्टापयतीति** ॥ **शाकटायनस्त्विति** ॥ ऋषिविशेषोऽयम् । 'सङ्ग्राम युद्धे' गणसूत्रमिदम् । युद्धवाचिसङ्ग्रामेति प्रातिपदिकं करोत्यर्थे णिचं लभते इत्यर्थः । ननु 'प्रातिपदिकाद्धात्वर्थे' इत्येव सिद्धे किमर्थमिदमित्यत आह । **अनुदात्तेदिति** ॥ एतदात्मनेपदार्थमिति भावः । ननु सङ्ग्रामशब्दस्य प्रातिपदिकस्य अकारान्तत्वात् कथमनुदात्तेत्त्वमित्यत आह । **अकारप्रश्लेषादिति** ॥ सङ्ग्रामशब्दादनुदात्तानुनासिकं पररूपेण प्रश्लिष्य निर्देशादिति भावः । **असस-**

असस्ङ्क्रामत। स्तोम १९२४ श्लाघायाम्। अतुस्तोमत्। छिद्र १९२५ कर्णभेदने। 'करणभेदने' इत्यन्ये। 'कर्ण' इति धात्वन्तरमित्यन्ये। अन्ध १९२६ दृष्टयुपघाते। 'उपसंहारे' इत्यन्ये। आन्दधत्। दण्ड १९२७ दण्डनिपातने। अङ्क १९२८ पदे, लक्षणे च। आञ्चकत्। अङ्ग १९२९ च। आञ्जगत्। सुख १९३० दुःख १९३१ तत्क्रियायाम्। रस १९३२ आस्वादनस्नेहनयोः। व्यय १९३३ वित्तसमुत्सर्गे। अवव्ययत्। रूप १९३४ रूपक्रियायाम्। रूपस्य दर्शनं करणं वा रूपक्रिया। छेद १९३५ द्वैधीकरणे। अचिच्छेदत्। छद १९३६ अपवारणे इत्येके। छदयति। लाभ १९३७ प्रेरणे। व्रण १९३८ गात्रविचूर्णने। वर्ण १९३९ वर्णक्रियाविस्तारगुणवचनेषु। वर्णक्रिया वर्णकरणम्। सुवर्ण वर्णयति। कथां वर्णयति। विस्तृणातीत्यर्थः। हरिं वर्णयति। स्तौतीत्यर्थः। 'बहुलमेतन्निदर्शनम्'। (ग सू २०८)। अदन्तधातुनिदर्शनमित्यर्थः। बाहुळकादन्येऽपि बोध्याः। तद्यथा। पर्ण १९४० हरितभावे। अपपर्णत्। विष्क १९४१ दर्शने। क्षप १९४२ प्रेरणे। वस १९४३ निवासे। तुत्थ १९४४ आवरणे। एवमान्दोलयति। प्रेङ्खोलयति। विडम्बयति। अवधीरयति इत्यादि। अन्ये तु दशगणीपाठो 'बहुलम्' इत्याहुः। तेनापठिता अपि सौत्रलौकिकवैदिका बोध्याः। अपरे तु नवगणीपाठो 'बहुळम्' इत्याहुः। तेनापठितेभ्योऽपि क्वचित्स्वार्थे णिच्। 'रामो राज्यमचीकरत्' इति यथेत्याहुः। चुरादिभ्य एव बहुलं णिजित्यर्थ इत्यन्ये। सर्वे पक्षाः प्राचां

ङ्क्रामतेति ॥ लुङि चङि सङ्क्रामशब्दस्य प्यन्तस्य अङ्गत्वात् ततः प्रागडिति भावः। एतच्च भृशादिसूत्रे कैयटे स्पष्टम्। अग्लोपित्वान्नोपधाह्रस्वः। सुखदुःख तत्क्रियायाम्। सुखानुकूले दुःखानुकूले च व्यापारे इत्यर्थः। सुखदुःखेति प्रातिपदिकाभ्यान्तत्करोतीत्यर्थे णिच् स्यादिति यावत्। 'प्रातिपदिकाद्धात्वर्थे' इत्येव आभ्यां णिजित्याहुः। 'बहुलमेतन्निदर्शनम्' गणसूत्रमिदम्। एतेषां कथादीनां अदन्तानान्निदर्शनं पाठ इत्यर्थः। तदाह। **अदन्तेति** ॥ बहुलग्रहणस्य फलमाह। **बाहुळकादिति**। **अपपर्णादिति** ॥ अग्लोपित्वान्न सन्वत्त्वमिति भावः। 'क्षिप प्रेरणे' क्षिपयति। अग्लोपस्य स्थानिवत्त्वान्न गुणः। एवमप्रेऽपि। 'वस निवासे' अदन्तत्वान्नोपधावृद्धिः। आन्दोलयतीत्यादौ अदन्तत्वेन अग्लोपित्वान्नोपधाह्रस्वः। तदेवं 'बहुलमेतन्निदर्शनम्' इत्यस्य कथाद्यदन्ताविषयत्वमुक्त्वा मतान्तरमाह। **अन्ये त्विति** ॥ भ्वादिः, अदादिः, जुहोत्यादिः, दिवादिः, स्वादिः, तुदादिः, रुधादिः, तनादिः, क्र्यादिः, चुरादिरिति दशगणी, तद्बहिर्भूता अपि सौत्राः जुघ्रभृतयः लौकिकाः। प्रेङ्खोलादयः वैदिकाः। 'तद्रक्षांसि रात्रिभिरसुभ्नन्' इत्यादौ सुभादयश्च सङ्गृहीता भवन्तीत्यर्थः। मतान्तरमाह। **अपरे त्विति** ॥ चुरादिभिन्ना उदाहृताः ये नव गणाः तेभ्योऽपि क्वचित् स्वार्थे णिच्

ग्रन्थे स्थिताः । 'णिङङ्गान्निरसने' (ग सू २०९) । अङ्गवाचिनः प्रातिपदिकान्निरसनेऽर्थे णिङ् स्यात् । हस्तौ निरस्यति । हस्तयते । पादयते । 'श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च' (ग सू २१०) । श्वेताश्वादीनां चतुर्णामश्वादयो लुप्यन्ते, णिङ् च धात्वर्थे । श्वेताश्वमाचष्टे, तेनातिक्रामति, वा श्वेतयते । अश्वतरमाचष्टे अश्वयते । गालोडितं वाचां विमर्शः । तत्करोति गालोडयते । आह्वरयते । केचित्तु णिचमेवानुवर्तयन्ति तन्मते परस्मैपदमपि । 'पुच्छादिषु धात्वर्थे इत्येव सिद्धम्' (ग सू २११) । णिजन्तादेव बहुलवचनादात्मनेपदमस्तु । मास्तु 'पुच्छभाण्ड–' (सू २६७६) इति णिङ्विधिः । सिद्धशब्दो ग्रन्थान्ते मङ्गलार्थः ।

इति तिङन्तचुरादिप्रकरणम् ।

बहुळग्रहणादस्माल्लभ्यत इत्यर्थः । मतान्तरमाह । **चुरादिभ्य एवेति** ॥ वस्तुतस्तु भूवादिसूत्रे पाठेन धातुसंज्ञेति भाष्यप्रतीकमुपादाय स पाठो नोपलक्षणार्थः किन्तु इयत्ताप्रतिपादनार्थ इति कैयट आह । एवञ्च 'बहुळमेतन्निदर्शनम्' इति गणसूत्रमनार्षमिति शब्देन्दुशेखरे स्थितम् । **'णिङङ्गान्निरसने' इति** ॥ गणसूत्रम् । स्पष्टम् । ङित्त्वान्नित्यमात्मनेपदम् । **श्वेताश्वाश्वतरगालोडिताह्वरकाणामश्वतरेतकलोपश्च** ॥ इदमपि गणसूत्रम् । **श्वेताश्वादीनामिति** ॥ श्वेताश्व अश्वतर गालोडित आह्वरक एषामित्यर्थः । **अश्वादय इति** ॥ श्वेताश्वशब्दे अश्वशब्दः, अश्वतरशब्दे तरशब्दः, गालोडितशब्दे इतशब्दः, आह्वरकशब्दे कशब्दश्च लुप्यन्ते इत्यर्थः । **णिङ् चेति** ॥ चकारलभ्यमिदम् । **धात्वर्थे इति** ॥ 'प्रातिपदिकाद्धात्वर्थे' इत्यतस्तदनुवर्तते । निरसने इति निवृत्तमिति भावः । **विमर्श इति** ॥ विवेचनमित्यर्थः । **केचित्त्विति** ॥ श्वेताश्वेत्यादिसूत्रे णिचमेवानुवर्तयन्ति न तु णिङमित्यर्थः । णिच्णिङोः फलभेदं दर्शयति । **तन्मते इति** ॥ **पुच्छादिषु धात्वर्थे इत्येव सिद्धमिति** ॥ धातुपाठं रचयितुर्भीमसेनस्य वाक्यमिदमित्याहुः । 'प्रातिपदिकाद्धात्वर्थे' इति णिचि सिद्धे 'पुच्छभाण्डचीवराण्णिङ्' इति न कर्तव्यमित्यर्थः । ननु नित्यात्मनेपदार्थं 'पुच्छ भाण्ड' इति णिङ्विधिरावश्यक इत्यत आह । **णिजन्तादेव बहुळवचनादिति** ॥ बहुळमेतन्निदर्शनम्' इति बहुळग्रहणादित्यर्थः । ननु पुच्छादिषु धात्वर्थ इत्येव णिजित्येव सिद्धे सिद्धशब्दो व्यर्थ इत्यत आह । **सिद्धशब्द इति** ॥ धातुपाठात्मकग्रन्थसमाप्तौ सिद्धशब्दप्रयोगो मङ्गलार्थ इत्यर्थः । पस्पशाह्निकभाष्ये हि सिद्धे शब्दार्थसम्बन्धे इति वार्तिकग्रन्थस्यादिमवार्तिकव्याख्यावसरे सिद्धशब्दोपादानं मङ्गळार्थमित्युक्तम् । मङ्गळादीनि मङ्गळमध्यानि मङ्गळान्तानि च शास्त्राणि प्रथन्ते इति भूवादिसूत्रस्थभाष्याद्ग्रन्थान्तेऽपि मङ्गळस्य कर्तव्यतासिद्धिः ॥

इति श्रीवासुदेवदीक्षितविरचितायां बालमनोरमायां
चुरादिनिरूपणं समाप्तम् ।

। श्रीरस्तु ।

॥ अथ तिङन्तणिच्प्रकरणम् ॥

२५७५ । तत्प्रयोजको हेतुश्च । (१-४-५५)

कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात् ।

२५७६ । हेतुमति च । (३-१-२६)

प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच्स्यात् । भवन्तं प्रेरयति भावयति । 'णिचश्च' (सू २५६४) इति कर्तृगे फले आत्मनेपदम् । भावयते । भावयाम्बभूवे ।

अथ 'हेतुमति च' इति णिज्विधिं वक्ष्यन् हेतुसंज्ञां आह । **तत्प्रयोजको हेतुश्च** ॥ 'स्वतन्त्रः कर्ता' इति पूर्वसूत्रोपात्तः कर्ता तच्छब्देन परामृश्यते । तस्य कर्तुः प्रयोजकः प्रवर्तयिता तत्प्रयोजकः । तदाह । **कर्तुः प्रयोजको हेतुसंज्ञ इति** ॥ चकारः पूर्वसूत्रोपात्तां कर्तृसंज्ञां समुच्चिनोति । तदाह । **कर्तृसंज्ञश्चेति** ॥ देवदत्तः पचति तं प्रेरयति यज्ञदत्तः इत्यत्र देवदत्तस्यैव पाकानुकूलव्यापारात्मकपचधात्वर्थाश्रयत्वरूपकर्तृत्वसत्त्वात् प्रयोजकस्य तदभावादिह कर्तृसंज्ञाविधिः। प्रयोजकस्य प्रयोज्यकर्त्रा अन्यथा सिद्धत्वाद्धेतुत्वाप्राप्तौ हेतुसंज्ञाविधिः। **हेतुमति च** ॥ 'सत्यापपाश' इत्यतो णिजित्यनुवर्तते । हेतुः प्रयोजकः आधारतया अस्यास्तीति हेतुमान् प्रयोजकनिष्ठः प्रेषणादिव्यापारः तस्मिन् वाच्ये णिच् स्यादित्यर्थः । 'धातोरेकाचो हलादेः' इत्यतो धातोरित्यनुवर्तते । तदाह । **प्रयोजकव्यापार इति** ॥ प्रेषणादावित्यादिशब्देन अध्येषणानुमत्युपदेशादीनां ग्रहणम् । तत्र भृत्यादेर्निकृष्टस्य प्रवर्तना प्रेषणम् । आज्ञेत्यर्थः । समानस्याधिकस्य च सख्याचार्यादेः प्रवर्तना अध्येषणा । अनुमतिः राजादेः सम्मतिः । ज्वरितस्य कषायपाने हितावबोधनेन प्रवर्तना उपदेशः । हननाद्भीत्या पलायमानस्य निरोधाचरणमपि प्रयोजकव्यापारः । प्रयोजकनिष्ठप्रवर्तनायां णिजिति फलितम् । एते तु विशेषाः प्रकरणादि न अवगम्यन्ते । कुलालो घटङ्करोतीत्यत्र तु न णिच् । प्रयोज्यप्रयोजकोभयसमभिव्याहार एव तत्प्रवृत्तेः इत्यन्यत्र विस्तरः । **भवन्तमिति** ॥ देवदत्तो यज्वा भवति । तम्प्रेरयति याजक इत्याद्यर्थे भूधात्वर्थस्य भवनस्य मुख्यकर्ता यज्वा तस्य यज्वभवने प्रवर्तयिता याजकादिः प्रयोजकः तन्निष्ठायां प्रेरणायां भूधातोर्णिच् वृद्ध्यावादेशौ । भावीति णिजन्तम् । तस्माद्भवनानुकूलव्यापारार्थकात् लटि भावयतीति रूपम् । भवन्तम्प्रेरयतीति फलितोऽर्थः । **भावयाम्बभूवे इति** ॥ कर्तृगामिति क्रियाफले णिजन्तस्यात्मनेपदित्वात् अनुप्रयुज्यमाना-

२५७७ । ओः पुयण्ज्यपरे । (७-४-८०)

सनि परे यदङ्गं तदवयवाभ्यासोकारस्येत्त्वं स्यात्पवर्गयण्जकारेष्ववर्णपरेषु परतः । अबीभवत् । अपीपवत् । मूङ् । अमीमवत् । अयीयवत् । अरीरवत् । अलीलवत् । अजीजवत् ।

२५७८ । स्रवतिश्रृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा । (७-४-८१)

एषामभ्यासोकारस्य इत्त्वं वा स्यात्सन्यवर्णपरे धात्वक्षरे परे । असिस्रवत्–असुस्रवत् । 'नाग्लोपि–' (सू २५७२) इति ह्रस्वनिषेधः । अशशासत् । अडुढौकत् । अचीचकासत् । मतान्तरे । अचचकासत् । 'अग्लोपि'

दप्यात्मनेपदमिति भावः । **ओः युयण्** ॥ उ इत्यस्य ओरिति षष्ठी । पुयण्ज्यि इति छेदः । पुश्च यण् च जि चेति समाहारद्वन्द्वात्सप्तमी । अः परो यस्मादिति बहुव्रीहिः । 'सन्यतः' इत्यस्मात्सनीत्यनुवर्तते । अङ्गस्येत्यधिकृतम् । 'अत लोपः' इत्यस्मादभ्यासस्येति भृञामित्यस्मादिति चानुवर्तते । तदाह । **सनि परे इत्यादिना । अबीभवदिति** ॥ भू इ अत् इति स्थिते द्वित्वे कार्ये णौ अच आदेशस्य निषेधाद्वृद्ध्यावादेशाभ्याम्प्रागेव भू इत्यस्य द्वित्वे उत्तरखण्डस्य वृद्ध्यावादेशयोः कृतयोरुपधाह्रस्वे अभ्यासे अकाराभावेन 'सन्यतः' इत्यस्याप्रवृत्त्या सन्वत्त्वादनेन इत्त्वे दीर्घः इति भावः । **अपीपवदिति** ॥ पूङ्धातोः रूपम् । मूङित्यस्माद्धातोरमीमवदिति रूपमित्यर्थः । **अयीयवदिति** ॥ युधातोरूपम् । **अरीरवदिति** ॥ रुधातोः रूपम् । **अलीलवदिति** ॥ लूञ्धातोः रूपम् । **अजीजवदिति** ॥ जुस्सौत्रो धातुः । जुचङ्क्म्येत्यत्र निर्दिष्टः । ननु भू भू इति द्वित्वोत्तरं वृद्ध्यावादेशयोः कृतयोः उपधाह्रस्वे तस्य स्थानिवत्त्वेन लघुपरत्वाभावात् सन्वत्त्वाप्रसक्त्या कथमिहाभ्यासोवर्णस्य इत्त्वमिति चेन्न । आरम्भसामर्थ्यादेव स्थानिवत्त्वाप्रवृत्तेरित्यलम् । **स्रवति श्रृणोति** ॥ अपर इत्यनुवर्तते । न तु पूयण्जि इति । पवर्गजकारयोरसम्भवात् । स्रवत्यादौ यणस्सत्वेऽप्यव्यभिचारात् । तदाह । **अवर्णपरे धात्वक्षरे इति** ॥ अक्षरशब्दोऽवर्णपरः । **असिस्रवत्–असुस्रवदिति** ॥ द्विहल्व्यवधानेन लघुपरकत्वाभावान्न सन्वत्त्वमिति भावः । अशिश्रवत् । अशुश्रवत् । अदिद्रवत् । अदुद्रवत् । अपिप्रवत् । अपुप्रवत् । अपिप्लवत् । अपुप्लवत् । अचिच्यवत्–अचुच्यवत् । अथ शासुधातोरशशासदित्यत्राह । **नाग्लोपीति** ॥ **अडुढौकदिति** ॥ ढौक्ङ् गताविस्यस्य ऋदित्वादिति भावः । **अचीचकासदिति** ॥ चकासृ दीप्तौ । ऋदित्त्वान्नोपधाह्रस्वः । चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपर इति पक्षे सन्वत्त्वं अभ्यासदीर्घश्चेति भावः । **मतान्तरे त्विति** ॥ अङ्गं यत्र द्विरुच्यते इति मते चङ्परे णौ यल्लघु तत्परो योऽङ्गस्य अभ्यासः इति मते चेत्यर्थः । **अग्लोपीतीति** ॥ अग्लोपिन उपधाह्रस्वनिषेधे मा भवानूनदिति उदाहृतम् । अतितिरायदित्युदाहरणान्तरं सुध्धातुनिरूपणे वक्ष्यते इत्यर्थः ।

इति सुब्धातुप्रकरणे उदाहरिष्यते । ण्यन्ताण्णिच् । पूर्वविप्रतिषेधादपवादत्वाद्वा वृद्धिं बाधित्वा णिलोपः । चोरयति । 'णौ चङि—' (सू २३१४) इति ह्रस्वः । 'दीर्घो लघोः' (सू २३१८) । न चाग्लोपित्वात् द्वयोरप्यसम्भवः । ण्याकृतिनिर्देशात् । अचूचुरत् ।

२५७९ । णौ च संश्चङोः । (६-१-३१)

सन्परे चङ्परे च णौ श्वयतेः सम्प्रसारणं वा स्यात् । 'सम्प्रसारणं तदाश्रयञ्च कार्यं बलवत्' (प १२९) इति वचनात्सम्प्रसारणं पूर्वरूपम् । अशूशवत् । अलघुत्वान्न दीर्घः । अशिश्वयत् ।

ननु 'चुर स्तेये' इत्यस्मात्स्वार्थे णिचि उपधागुणे चोरि इति रूपम्। तस्माद्धेतुमण्णौ प्रथमस्य णेर्लोपे सति चोरि इत्येव हेतुमण्ण्यन्तम्। तस्माल्लटि तिपि शपि गुणे अयादेशे चोरयतीत्येव रूपमिष्यते। तन्नोपपद्यते । हेतुमण्णौ परे प्रथमस्य णेर्लोपं बाधित्वा परत्वाद्वृद्धौ आयादेशे चोराय् इ इत्यस्माल्लटि चोरायतीत्यापत्तेरित्यत आह । **ण्यन्ताण्णिजिति** ॥ ण्यन्ताण्णिचि वृद्धिम्बाधित्वा णिलोपइत्यन्वयः । कुत इत्यत आह । **पूर्वविप्रतिषेधादिति** ॥ "ण्यल्लोपाविययङ्ण्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन" इति वार्तिकेनेति भावः। **अपवादत्वाद्वेति** ॥ 'कमु कान्तौ' इति धातौ द्विधा प्रपञ्चितत्वादिति भावः । अथ ण्यन्ताण्णौ प्रथमस्य णेर्लोपे चोरि इत्यस्माल्लुङि चङि अचोर् इ अ त् इति स्थिते प्रक्रियान्दर्शयति । **णौ चङीति** ॥ **ह्रस्वः इति** ॥ ततः हेतुमण्णेर्लोपे चुर् इत्यस्य द्वित्वे सन्वद्भावविषयत्वादाह । **दीर्घो लघोरिति** ॥ तथाच अचूचुरदिति सिद्धम् । ननु उपधाह्रस्वः अभ्यासदीर्घश्चेति द्वयमपि चङ्परे णौ विहितम् । तदुभयमप्यत्र प्रत्ययलक्षणमाश्रित्य प्रथमणिचमादाय न सम्भवति । तस्य द्वितीयाणिचा व्यवहितत्वेन चङ्परकत्वाभावात् । नापि द्वितीयाणिचमादाय तदुभयसम्भवः । द्वितीयाणिच्प्रकृतेः प्रथमण्यन्तस्य णिलोपमादाय अग्लोपित्वादित्याशङ्क्य परिहरति । **न चेति** ॥ अग्लोपित्वात् द्वयोरपि उपधाह्रस्वाभ्यासदीर्घयोरसम्भवो न शङ्क्य इत्यर्थः । कुत इत्यत आह । **ण्याकृतिनिर्देशादिति** ॥ चङ्परे णाविल्यत्र णाविल्यस्य चङ्परकणित्त्वजात्याश्रयैकानेकणिज्व्यक्तिपरकत्वं विवक्षितम् । तथाच णिद्वयस्य चङ्परकत्वाभावेऽपि णित्त्वस्य चङ्परकत्वमस्तीति ह्रस्वदीर्घयोरस्ति प्रवृत्तिरिति भावः । अत्र जातिनिर्देशः अयुक्त इति शब्देन्दुशेखरे प्रपञ्चितम् । 'टु ओ श्वि गतिवृद्ध्योः' । अस्माद्धेतुमण्णौ वृद्ध्यायादेशयोः श्वायीत्यस्मात् लङादौ श्वाययतीति रूपम् । लुङि चङि अश्वि इ अ त् इति स्थिते विशेषमाह । **णौ च संश्चङोः** ॥ 'विभाषा श्वेः' इति सूत्रमनुवर्तते । 'ण्यङस्सम्प्रसारणम्' इत्यतस्सम्प्रसारणमिति च। तदाह । **सन्पर इत्यादिना** ॥ नन्वन्तरङ्गत्वात् सम्प्रसारणात्पूर्वं वृद्ध्यायादेशयोः कृतयोः पश्चात् सम्प्रसारणे पूवरूपे अशुश्वयदिति स्यात्, अशूशवदिति न स्यात्, इत्यत आह । **सम्प्रसारणन्तदाश्रयञ्च कार्यं बलवदिति** ॥ इदं वचनं 'लिट्यभ्यासस्य' इति सूत्रभाष्ये स्थितम् ।

२५८०। स्तम्भुसिवुसहां चङि। (८-३-११६)

उपसर्गनिमित्तः एषां सस्य षो न स्याच्चङि। अवातस्तम्भत्। पर्यसीषिवत्। न्यसीषहत्। आटिटत्। आशिशत्। बहिरङ्गोऽप्युपधाह्रस्वो द्वित्वात्प्रागेव। ओणेर्ऋदित्करणाल्लिङ्गात्। मा भवानिदिधत्। एजादावेधतौ विधानान्न वृद्धिः। मा भवान्प्रेदिधत्। 'नन्द्राः—' (सू २४४६) इति नदराणां न द्वित्वम्। औन्दिदत्। आड्डिडत्। आर्चिचत्। 'उञ्ज आर्जवे'। उपदेशे दकारोपधोऽयम्।

एवञ्च अश्वि इ अत् इत्यत्र वृद्ध्यायादेशाभ्यां प्रागेव वकारस्य सम्प्रसारणमुकार इति फलितम्। **पूर्वरूपमिति** ॥ ततश्च शु इत्यस्य द्वित्वे उत्तरखण्डस्य णिचमाश्रित्य वृद्ध्यावादेशयोरुपधाह्रस्वे सन्वत्त्वविषयत्वादभ्यासदीर्घे फलितमाह। **अशूशवदिति** ॥ सम्प्रसारणाभावपक्षे अशिश्वयदित्यत्र अभ्यासदीर्घमाशङ्क्य आह। **अलघुत्वादिति** ॥ संयोगपरकत्वादिति भावः। अवपूर्वात्स्तम्भेर्ण्यन्तादवष्टम्भयतीत्यादि। 'अवाच्चालम्बनाविदूर्ययोः' इति षत्वम्। चङि अवातस्तम्भदित्यत्र षत्वे प्राप्ते। **स्तम्भुसिवु** ॥ 'उपसर्गनिमित्तस्य प्रतिषेधः' इति वार्तिकम्। नरपरसृपीत्यतो नेत्यनुवर्तते। 'सहेस्साडस्सः' इत्यतो स इति षष्ठ्यन्तमनुवर्तते। मूर्धन्यः इत्यधिकृतम्। तदाह। **उपसर्गनिमित्त इत्यादि** ॥ स्तम्भुस्सौत्रो धातुः। 'षिवु तन्तुसन्ताने' 'षह मर्षणे' पर्यसीषिवत्, न्यसीषहत्, इति। 'परिनिविभ्यस्सेव' इत्युपसर्गनिमित्तं षत्वन्न। अभ्यासनिमित्तन्तु षत्वं भवत्येव। **आटिटत्। आशिशत् इति।** आट् इ अ त् आश् इ अ त् इति स्थिते 'णौ चङि' इत्युपधाह्रस्वात् प्रागन्तरङ्गत्वात् 'चङि' इति द्वित्वमाशङ्क्य आह। **बहिरङ्गोऽपीति** ॥ उपधाह्रस्वः चङ्परण्यपेक्षत्वात् बहिरङ्गः। द्वित्वन्तु चङ्मात्रापेक्षत्वादन्तरङ्गम्। अथापि द्वित्वात् प्रागेव उपधाह्रस्व इत्यर्थः। कुत इत्यत आह। **ओणेरिति** ॥ 'ओणृ अपनयने' इति धातोः ऋदित्करणं औणिणदित्यत्र 'नाग्लोपि' इति उपधाह्रस्वप्रतिषेधार्थम्। यदि तु उपधाह्रस्वात्प्रागेव अन्तरङ्गत्वात् द्वित्वं स्यात् तदा ओण् इ अ त् इत्यत्र 'अजादेर्द्वितीयस्य' इति णि इत्यस्य णिचा सह द्वित्वे सति पश्चादोकारस्य चङ्परे णौ उपधात्वाभावादेव ह्रस्वस्याप्रसक्तत्वात् ऋदित्करणं व्यर्थं स्यात्। द्वित्वात्प्रागेव उपधाह्रस्व इत्यभ्युपगमे तु ओण् इ अ त् इत्यस्यामवस्थायाम्प्राप्तस्य निषेधार्थमृदित्करणमर्थवत्। अतः बहिरङ्गोऽप्युपधाह्रस्वो द्वित्वात् प्रागेवेति विज्ञायते इत्यर्थः। ननु आटिटत् आशिशत् इत्यत्र द्वित्वप्रवृत्त्यनन्तरमुपधाह्रस्वस्याभावेऽपि 'आदश्च' इति वृद्धौ आटिटत् आशिशत् इति सिद्ध्यत्येवेति किमनेन ज्ञापनेनेत्यत आह। **मा भवानिदिधदिति** ॥ एध् इ अ त् इति स्थिते पूर्वं द्वित्वप्रवृत्तौ धि इत्यस्य द्वित्वे पश्चादेकारस्य ह्रस्वो न स्यात्। द्वित्वात्प्रागेव उपधाह्रस्वे तु इध् इ अ त् इति स्थिते धि इत्यस्य द्वित्वे माङ्योगादाडभावे इदिधदिति इष्टं सिद्ध्यतीत्यर्थः। ननु मा भवान् प्रेदिधदित्यत्र प्र इदिधदिति स्थिते कृतेऽपि ह्रस्वे एकदेशविकृतन्यायेन एधधातुत्वात् 'एत्येधत्यूठ्सु' इति वृद्धिः स्यादित्यत आह। **एजादावेधतावि ति** ॥ अवर्णादेजाद्योरेत्येधत्योरिति व्याख्यातत्वादिति भावः। **औन्दिददिति** ॥ उन्द् इ अ त् इति स्थिते दि

'भुजन्युब्जौ पाण्युपतापयोः' (२८७७) इति सूत्रे निपातनाद्दस्य बः। स चान्तरङ्गोऽपि द्वित्वविषये 'नन्द्राः—' (सू २४४६) इति निषेधाज्जिशब्दस्य द्वित्वे कृते प्रवर्तते। न तु ततः प्राक्। दकारोच्चारणसामर्थ्यात्। औब्जिजत्। अजादेरित्येव। नेह। अदिद्रयत्।

२५८१। रभेरशब्लिटोः। (७-१-६३)

रभेर्नुम्स्यादचि न तु शब्लिटोः।

२५८२। लभेश्च। (७-१-६४)

अररम्भत्। अललम्भत्। 'हेरचङि' (सू २५३१) इति सूत्रे 'अचङि' इत्युक्तेः कुत्वं न। अजीहयत्। 'अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्' (सू २५६६)। असस्मरत्। अददरत्। तपरत्वसामर्थ्यादत्र लघोर्न दीर्घः।

इत्यस्य द्वित्वमिति भावः। **आड्डिडदिति** ॥ अड्धातुर्दोपधः। ष्टुत्वसम्पन्नो डकारः। अड्डि इ अ त् इति स्थिते श्चुत्वस्यासिद्धत्वेन दकारात्परस्य डि इत्यस्य द्वित्वमिति भावः। **आर्चिचदिति** ॥ अर्च् इ अ त् इति स्थिते रेफात् परस्य चि इत्यस्य द्वित्वमिति भावः। **उब्ज आर्जवे इति** ॥ ननु चङि ब्जि इत्यस्य द्वित्वे हलादिशेषे औबिब्जदिति रूपं स्यात्। औब्जिजदित्येव तु इष्यते। तत्राह। **उपदेशे दकारोपधोऽयमिति** ॥ ततश्च 'नन्द्राः' इति दकारस्य द्वित्वनिषेधात् जि इत्यस्यैव द्वित्वमिति भावः। तर्हि दकारः कुतो न श्रूयते इत्यत आह। **भुजन्युब्जाविति** ॥ ननु द्वित्वात् प्रागन्तरङ्गत्वात् दकारस्य बकारादेशे सति 'नन्द्राः' इति निषेधस्य कथमिह प्रवृत्तिरित्यत आह। **स चेति** ॥ ननु द्रु गतौ द्रावयति। चङि द्रु इत्यस्य द्वित्वे उत्तरखण्डस्य वृद्ध्यावादेशयोः उपधाह्रस्वे 'स्रवतिश्रृणोति' इत्यभ्यासस्य इत्त्वे अदिद्रवदिति इष्यते। तन्नोपपद्यते। 'नन्द्राः' इति दकारस्य द्वित्वनिषेधादित्यत आह। **अजादेरित्येवेति** ॥ 'नन्द्राः' इत्यत्र अजादेरित्यनुवर्त्तत एवेत्यर्थः। आदिभूतादच इति व्याख्यातं प्राक्। ततश्च आदिभूतादचः पराः नदराः द्विर्न भवन्तीति फलितम्। **नेहेति** ॥ प्रकृते आदिभूतादचः परत्वाभावान्न दकारद्वित्वनिषेध इत्यर्थः। अदिद्रपदिति पाठे द्राधातोर्णिचि पुकि द्रापि इत्यस्माद्रूपम्। ननु लावस्थायामडिति पक्षे अचः परत्वमस्त्येवेति चेन्न। 'नन्द्राः' इत्यत्र 'लिटि धातोः' इत्यतो धातोरित्यनुवर्त्त्य धातुसंज्ञाकालिकादादेरचः परा नदराः द्विर्नेति व्याख्यानादित्याहुः। **रभेरशब्लिटोः** ॥ 'इदितो नुम्धातोः' इत्यतो नुमिति 'रधिजभोरचि' इत्यतः अचीति चानुवर्त्तते। तदाह। **रभेर्नुमित्यादि। लभेश्च** ॥ लभेरपि नुम् स्यात् अचि, नतु शब्लिटोरित्यर्थस्य स्पष्टत्वादनुक्तिः। **अररम्भदिति** ॥ नुमि कृते संयोगपरत्वे अकारस्य लघुत्वाभावान्नसन्वत्त्वमिति भावः। 'हि गतौ वृद्धौ च' इत्यस्माच्चङि अजीहयदित्यत्र 'हेरचङि' इति हकारस्य कुत्वनेत्याह। **हेरचङीति** ॥ 'अत् स्मृदृत्वर' इति सूत्रं चुरादौ 'प्रथ प्रख्याने' इति धातौ व्याख्यातम्। **असस्मरदिति** ॥ अत्र 'सन्यतः'

२५८३ विभाषा वेष्टिचेष्ट्योः । (७-४-९६)

अभ्यासस्यात्त्वं वा स्याच्चङ्परे णौ । अववेष्टत्–अविवेष्टत् । अचचेष्टत् अचिचेष्टत् । 'भ्राजभास—' (२५६५) इत्यादिना वोपधाह्रस्वः । अबिभ्रजत्–अबभ्राजत् । 'काण्यादीनां वेति वक्तव्यम्' (वा ४६१३) । ण्यन्ताः कणरणभणश्रणलुपहेठः काण्यादयः षड्भाष्ये उक्ताः । ह्वायिवाणिलोटिलोपयश्चत्वारोऽधिकाः न्यासे । 'चाणिलोटी' इत्यप्यन्यत्र । इत्थं द्वादश । अचीकणत्–अचकाणत् ।

२५८४ । स्वापेश्चङि । (६-१-१८)

ण्यन्तस्य स्वपेश्चङि सम्प्रसारणं स्यात् । असूषुपत् ।

इतीत्त्वे प्राप्ते अत्त्वम् । अत एव ज्ञापकादनेकहल्व्यवधानेऽपि लघुपरत्वमित्युक्तं प्राक् । संयोगपरत्वेन लघुत्वाभावान्नाभ्यासदीर्घः । **अददरदिति** ॥ दृ विदारणे इत्यस्य रूपम् । अत्रापि 'सन्यतः' इत्यस्यापवादः अत्त्वम् । 'दीर्घो लघोः' इति दीर्घमाशङ्क्य आह । **तपरत्वसामर्थ्यादिति** ॥ अतत्वरत् । अपप्रथत् । अमम्रदत् । अतस्तरत् । अपस्पशत् । **विभाषा वेष्टिचेष्ट्योः** ॥ 'अत्र लोपः' इत्यस्मादभ्यासस्येत्यनुवर्तते । 'अत् सृदृत्वर' इत्यतः अदिति 'सन्वल्लघुनि' इत्यतः चङ्परे इति । चङ् परो यस्मादिति बहुव्रीहिः णावित्यार्थिकम् । तदाह । **अभ्यासस्यात्त्वमिति** ॥ **अबिभ्रजदिति** ॥ उपधाह्रस्वपक्षे लघुपरत्वात् सन्वत्त्वादभ्यासस्य इत्त्वम् । 'दीर्घो लघोः' इति तु न । संयोगपरत्वादलघुत्वात् । **काण्यादीनां वेति** ॥ 'णौ चङ्युपधायाः' इति ह्रस्व इति शेषः । **ण्यन्ताः कणरणेति** ॥ 'कण निमीलने, रण शब्दे, भण शब्दे, श्रण दाने, लुप छेदने, हेठ विबाधायाम्' इति षट् धातवो ण्यन्ताः काण्यादयो भाष्ये पठिता इत्यर्थः । **ह्वायीति** ॥ 'ह्वेञ् स्पर्धायां शब्दे च' आत्त्वे पुकि च निर्देशः । 'वण शब्दे' दन्त्योष्ठ्यादिः 'लुठ प्रतीघाते' टवर्गद्वितीयोपधः । 'लप व्यक्तायां वाचि' इति चत्वारो ण्यन्ताः भाष्योक्तेभ्योऽधिकाः न्यासग्रन्थे पठिता इत्यर्थः । **चाणिलोटी इति** ॥ 'चण दाने' तालव्यादिः । 'लुट स्तेये' टवर्गप्रथमान्तः भ्वादिः । चुरादौ भाषार्थकोऽपि । एतावपि ण्यन्तौ द्वौ भाष्यन्यासग्रन्थाभ्यामन्यत्र क्वचित् ग्रन्थे पठितौ इत्यर्थः । **इत्थं द्वादशेति** ॥ अनेन मतभेदेन काण्यादयो द्वादशेत्यर्थः । **अचीकणदिति** ॥ उपधाह्रस्वपक्षे लघुपरत्वात् सन्वत्त्वदीर्घौ च । **अचकाणदिति** ॥ उपधाह्रस्वाभावपक्षे रूपम् । अरीरणत्–अरराणत् । अबीभणत्–अबभाणत् । अशिश्रणत्–अशश्राणत् । अलूलुपत्–अलुलोपत् । अजीहिठत्–अजिहेठत् । अजिह्वपत्–अजह्वापत् । अवीवणत्–अववाणत् । अलूलुठत्–अलुलोठत् । अलूलुपत्–अलुलोपत् । अचीचणत्–अचचाणत् । अलूलुटत्–अलुलोटत् । **स्वापेश्चङि** । **सम्प्रसारणमिति** ॥ ण्यङस्सम्प्रसारणमित्यतस्तदनुवृत्तेरिति भावः । **असूषुपदिति** ॥ "सम्प्रसारणन्तदाश्रयञ्च कार्यं बलवत्"

२५८५। शाच्छासाह्वाव्यावेपां युक्। (७-३-३७)

णौ। पुकोऽपवादः। शाययति। छाययति। साययति। ह्वाययति। व्याययति।

२५८६। ह्वः सम्प्रसारणम्। (६-१-३२)

सन्परे चङ्परे च णौ ह्वः सम्प्रसारणं स्यात्। अजूहवत्—अजुहावत्

२५८७। लोपः पिबतेरीच्चाभ्यासस्य। (७-४-४)

पिबतेरुपधायाः लोपः स्यात् अभ्यासस्य ईदन्तादेशश्च चङ्परे णौ। अपीप्यत्। 'अर्तिह्री—' (सू २५७०) इति पुक्। अर्पयति। ह्रेपयति। व्लेपयति। रेपयति। यलोपः। क्नोपयति। क्ष्मापयति। स्थापयति।

इति वचनात्कृते सम्प्रसारणे द्वित्वं पूर्वरूपं सन्वत्त्वदीर्घौ षत्वमिति भावः। **शाच्छासा॥** 'शो तनूकरणे, छो छेदने, षो अन्तकर्मणि, ह्वेञ् स्पर्धायां शब्दे च, व्येञ् संवरणे' एषाङ्कृतात्वनिर्देशः 'वेञ् तन्तुसन्ताने' 'पा पाने' भ्वादिः। एषान्द्वन्द्वात् षष्ठीबहुवचनम्। णौ परे इति शेषपूरणम्। आदन्तलक्षणयुकोऽपवादः। युकि ककार इत् उकार उच्चारणार्थः कित्त्वादन्तागमः। अत्र "लुग्विकरणाल्लुग्विकरणयोर्लुग्विकरणस्य ग्रहणम्" इति वचनात् 'पा रक्षणे' इति न गृह्यते। तस्य तु पालयतीति रूपमनुपदमेव वक्ष्यति। **शाययतीति॥** लुङि अशीशयत्। **छाययतीति॥** अचिच्छयत्। **साययतीति॥** असीषयत्। **ह्वाययतीति॥** लुङि तु विशेषो वक्ष्यते। **व्याययतीति॥** अविव्ययत्। वाययति। अवीवयत्। पाययति। लुङि तु विशेषो वक्ष्यते। **ह्वः सम्प्रसारणम्॥** ह्वेञः कृतात्त्वस्य ह्व इति षष्ठी। 'णौ च संश्चङोः' इत्यनुवृत्तिमभिप्रेत्य आह। **सन्पर इत्यादि। अजूहवदिति॥** ह्व इ अ त् इति स्थिते "सम्प्रसारणन्तदाश्रयञ्च कार्यम्बलवत्" इति वचनात् कृते सम्प्रसारणे पूर्वरूपे च हु इत्यस्य द्वित्वे उत्तरखण्डस्य वृद्ध्यावादेशयोः कृतयोरुपधाह्रस्वे सन्वत्त्वदीर्घाविति भावः। अत्र कृते सम्प्रसारणे पूर्वरूपे च ह्वारूपाभावान्न युक्। पाधातोर्णौ युगागमे पायि इत्यस्माल्लुङि चङि द्वित्वादौ अपीपय् अ त् इति स्थिते। **लोपः पिबतेः। चङ्परे णाविति॥** 'णौ चङ्युपधायाः' इत्यतस्तदनुवृत्तेरिति भावः। **अपीप्यदिति॥** "नानर्थकेऽलोऽन्त्यविधिः" इत्यस्य अनभ्यासविकार इति निषेधादभ्यासान्त्यस्य ईत्त्वम्। इह उपधालोपे कृते अग्लोपित्वादलघूपधत्वाच्च सन्वत्त्वदीर्घयोरप्राप्तावीत्त्वविधिः। **अर्तिह्री इति। पुगिति॥** क्रमेणोदाह्रियत इति शेषः। **अर्पयतीति॥** ऋधातोरुदाहरणम्। वृद्धिं बाधित्वा नित्यत्वात् पुक् गुणः। **ह्रेपयतीति॥** 'ह्री लज्जायाम्' इत्यस्य रूपम्। **व्लेपयतीति॥** व्ली विशरणे इत्यस्य रूपम्। **रेपयतीति॥** री क्षये इत्यस्योदाहरणम्। 'क्नूयी शब्दे' इत्यस्य क्नोपयतीत्युदाहरिष्यन्नाह। **यलोपः इति॥** क्नूयीधातोर्णौ पुकि 'लोपो व्योः' इति यलोप इत्यर्थः। ततः क्नूप् इ इति स्थिते अलघूपधत्वेऽपि पुगन्तत्वाद्गुणः। **क्ष्मापयतीति॥** 'क्ष्मायी विधूनने' अस्माण्णौ पुकि यलोपः। आदन्तस्योदाहरति। **स्थाप-**

२५८८ । तिष्ठतेरित् । (७-४-५)

उपधायाः इदादेशः स्याच्चङ्परे णौ । अतिष्ठिपत् ।

२५८९ । जिघ्रतेर्वा । (७-४-६)

अजिघ्रिपत्–अजिघ्रपत् । 'उर्ऋत्' (सू २५६७) । अचीकृतत्–अचिकीर्तत् । अवीवृतत्–अववर्तत् । अमीमृजत्–अममार्जत् । 'पातेर्णौ लुग्वक्तव्यः' (वा ४५२०) । पुकोऽपवादः । पालयति ।

२५९० । वो विधूनने जुक् । (७-३-३८)

वातेर्जुक्स्याण्णौ कम्पेऽर्थे । वाजयति । 'कम्पे' किम् । केशान्वापयति । 'विभाषा लीयतेः' (सू २५०९) ।

यतीति ॥ लुङि चङि अतिष्ठप् अ त् इति स्थिते । **तिष्ठतेरित्** ॥ 'णौ चङ्युपधायाः' इत्यनुवर्तते । तदाह । **उपधायाः इति । जिघ्रतेर्वा** ॥ घ्राधातोरुपधाया इद्वा स्याच्चङ्परे णावित्यर्थः । अजिघ्रप् अ त् इति स्थिते उपधाया इत्त्वविकल्पः । **उर् ऋदिति** ॥ धातोरुपधायाः ऋकारस्य ऋद्वा चङ्परे णाविति व्याख्यातञ्चुरादौ । **अचीकृतदिति** ॥ कृत् इ अ त् इति स्थिते ऋत्त्वपक्षे कृत् इत्यस्य द्वित्वे उरदत्त्वे हलादिशेषे अभ्यासचुत्वे सन्वत्त्वात् इत्त्वे तस्य दीर्घे रूपम् । **अचिकीर्तदिति** ॥ कृत् इ अ त् इति स्थिते 'उर् ऋत्' इत्युपधा ऋत्वाभावपक्षे उपधायाश्चेति इत्त्वे रपरत्वे किर् इत्यस्य द्वित्वे उत्तरखण्डे उपधायाञ्चेति दीर्घं रूपम् । **अवीवृतदिति** ॥ 'वृतु वर्तने' । णिचि लघूपधगुणं बाधित्वा उर् ऋत् । चङि कृत् इत्यस्य द्वित्वे उरदत्त्वे सन्वत्त्वात् इत्त्वं दीर्घश्चेति भावः । **अववर्तदिति** ॥ ऋत्त्वाभावपक्षे वृत् इत्यस्य द्वित्वे उरदत्त्वे उत्तरखण्डस्य लघूपधगुणे रूपम् । लघुपरकत्वाभावान्न सन्वत्त्वदीर्घौ । **अमीमृजदिति** ॥ उपधाया ऋत्वपक्षे रूपम् । **अममार्जदिति** ॥ उपधाया ऋत्वाभावपक्षे द्वित्वे उरदत्त्वे उत्तरखण्डे 'मृजेर्वृद्धिः' इति वृद्धौ रपरत्वे रूपम् । लघुपरत्वाभावान्न सन्वत्त्वम् । 'पातेर्णौ लुक्' इति लुगागम इत्यर्थः । **पुकोऽपवादः इति** ॥ आदन्तलक्षणपुकोऽपवाद इत्यर्थः । यद्यपि 'पाल रक्षणे' इति धातोरेव सिद्धम्, तथापि पुको निवृत्तिः फलम् । **वो विधूनने** ॥ 'ओ वै शोषणे' इति धातोः कृतात्त्वस्य वः इति षष्ठ्यन्तम् 'अर्तिह्री' इत्यतः णावित्यनुवर्तते । तदाह । **वातेरित्यादि** ॥ पुकोऽपवादो जुक् । **केशान्वापयतीति** ॥ सुगन्धीकरोतीत्यर्थः । अत्र वैधातोः पुगेव । वाधातोस्त्विह न ग्रहणम् । लुग्विकरणत्वात् । केचित्तु वातेरेवात्र ग्रहणम्, नतु वेञः । नापि वै इत्यस्य लाक्षणिकत्वात् सानुबन्धकत्वाच्चेत्याहुः । आत्त्वविधायकसूत्रं स्मारयति । **विभाषा लीयतेरिति** ॥ लीलीङोरात्त्वं वा स्यादेङ्ग्विषये लुङि च इति व्याख्यातं प्राक् श्यन्विकरणे । तत्र लीयतेः इति यका निर्देशः, नतु श्यना । तेन 'ली श्लेषणे' इति श्नाविकरणस्य 'लीङ् श्लेषणे'

२५९१। लीलोर्नुग्लुकावन्यतरस्यां स्नेहनिपातने। (७-३-३९)

लीयतेर्लातेश्च क्रमान्नुग्लुकावागमौ वा स्तो णौ स्नेहद्रवे। विलीनयति—विलाययति। विलालयति—विलापयति वा घृतम्। 'ली' 'ई' इति ईकारश्लेषादात्त्वपक्षे नुग्न। 'स्नेहद्रवे' किम्। लोहं विलापयति। 'प्रलम्भनाभिभवपूजासु लियो नित्यमात्त्वमशिति वाच्यम्' (वा ३४८३)।

२५९२। लियः सम्माननशालिनीकरणयोश्च। (१-३-७०)

लीङ्लियोर्ण्यन्तयोरात्मनेपदं स्यादकर्तृगेऽपि फले पूजाभिभवयोः प्रलम्भने चार्थे। जटाभिर्लापयते। पूजामधिगच्छतीत्यर्थः। श्येनो वर्तिकामुल्लापयते। अभिभवतीत्यर्थः। बालमुल्लापयते वञ्चयतीत्यर्थः।

२५९३। बिभेतेर्हेतुभये। (६-१-५६)

बिभेतेरेच आत्त्वं वा स्यात्प्रयोजकाद्भयं चेत्।

२५९४। भीस्म्योर्हेतुभये। (१-६-३८)

इति श्यन्विकरणस्य च ग्रहणमिति च प्रागुक्तं न विस्मर्तव्यम्। **लीलोः**॥ ली ला इत्यनयोः षष्ठीद्विवचनम्। **णाविति**॥ 'अर्तिह्री' इत्यतस्तदनुवृत्तेरिति भावः। स्नेहस्य तैलस्य निपातनं द्रावणं स्नेहनिपातनम्। तदाह। **स्नेहद्रवे इति**॥ आत्त्वाभावपक्षे आह। **विलीनयतीति**॥ लीलीङोरीकारान्तयोर्नुकि रूपम्। द्रवीकरोतीत्यर्थः। लीलीङोरात्त्वनुगभावपक्षे आह। **विलाययतीति**॥ लाधातोर्लुगागमे आह। **विलालयतीति**॥ अत्र लातेरादादिकस्य कृतात्त्वलीयतेश्च ग्रहणम्। व्याख्यानात्। **विलापयतीति**॥ लुगागमाभावे रूपम्। ननु कृतात्त्वस्य लीधातोरपि एकदेशविकृतन्यायेन लीत्वान्नुक् स्यादित्यत आह। **ली ई इति। लोहं विलापयतीति**॥ नुग्लुकोरभावादात्त्वपक्षे पुक्। आत्त्वाभावे तु वृद्ध्यायादेशाविति भावः। **प्रलम्भनाभिभवेति**॥ प्रलम्भनं वञ्चना। अभिभवः तिरस्कारः। पूजा प्रसिद्धा। एष्वर्थेषु लीलीङोः एज्विषये नित्यमात्त्वं वक्तव्यमित्यर्थः। **लियः सम्माननशालिनीकरणयोश्च**॥ लियः इति लीलीङोर्ग्रहणम्। 'अनुदात्तङितः' इत्यतः आत्मनेपदमिति 'णेरणौ' इत्यतो णेरिति चानुवर्तते। 'णिचश्च' इति सिद्धे अकर्तृभिप्रायार्थमिदम्। सम्माननम्पूजालाभः। शालिनीकरणम् अभिभवः। चकारात् 'गृधिवञ्चयोः' इति पूर्वसूत्रात्प्रलम्भनग्रहणं समुच्चीयते। तदाह। **लीङ्लियोरित्यादिना। बिभेतेर्हेतुभये**॥ 'आदेच उपदेशे' इत्यतः एच इति आदिति चानुवर्तते। 'विभाषा लीयतेः' इत्यतो विभाषेति, 'चिस्फुरोः' इत्यतो णाविति च। हेतुभयम्प्रयोजकाद्भयम्। तदाह। **बिभेतेरेच इत्यादिना। भीस्म्योर्हेतुभये**॥ 'अनुदात्तङितः'

आभ्यां ण्यन्ताभ्यामात्मनेपदं स्याद्धेतोश्चेद्भयस्मयौ । सूत्रे भयग्रहणं धात्वर्थोपलक्षणम् । मुण्डो भापयते ।

२५९५ । भियो हेतुभये षुक् । (७-३-४०)

'भी' 'ई' इति ईकारः प्रश्लिष्यते । ईकारान्तस्य भियः षुक्स्याण्णौ हेतुभये । भीषयते ।

२५९६ । नित्यं स्मयतेः । (६-१-५७)

स्मयतेरेचो नित्यमात्वं स्याण्णौ हेतोः स्मये । जटिलो विस्मापयते । हेतोश्चेद्भयस्मयावित्युक्तेर्नेह । कुञ्चिकयैनं भापयति । विस्माययति । कथं तर्हि 'विस्मापयन्विस्मितमात्मवृत्तौ' इति । 'मनुष्यवाचा' इति करणादेव हि तत्र

इत्यतः आत्मनेपदमिति 'णेरणौ' इत्यतो णेरिति चानुवर्तते । हेतुः प्रयोजकः । तदाह । **आभ्यां ण्यन्ताभ्यामित्यादि** ॥ अकर्त्रभिप्रायार्थमिदम् । ननु हेतोश्चेत् भयस्मयाविति अनुपपन्नम् । सूत्रे स्मयग्रहणाभावादित्यत आह । **सूत्रे भयेति** ॥ सूत्रे भयग्रहणं स्मिङ्धात्वर्थस्य स्मयस्याप्युपलक्षणमित्यर्थः । **मुण्डो भापयते इति** ॥ अत्र आत्त्वं पुक् आत्मनेपदञ्च । भिय आत्त्वाभावपक्षे विशेषमाह । **भियो हेतुभये षुक्** ॥ भी ई इति द्वयोस्सवर्णदीर्घे भीशब्दात् षष्ठीति भावः । इदञ्च स्थानिवत्सूत्रे भाष्ये स्पष्टम् । ईकारप्रश्लेषलब्धमाह । **ईकारान्तस्येति** ॥ तेन आत्वपक्षे न षुगिति फलितम् । **णाविति** ॥ 'अर्तिह्री' इत्यतस्तदनुवृत्तेरिति भावः । **नित्यं स्मयतेः** ॥ 'आदेच उपदेशे' इत्यतः एच इति, आदिति, चानुवर्तते । 'चिस्फुरोः' इत्यतो णाविति 'बिभेतेर्हेतुभये' इत्यतः हेतुभये इति च । तत्र भयग्रहणं स्मयस्याप्युपलक्षणम् । अत्र तु स्मय एव विवक्षितः । स्मयतेर्भीत्यर्थकत्वासम्भवात् । तदाह । **स्मयतेरेच इत्यादि** ॥ 'विभाषा लीयतेः' इत्यतो विभाषानुवृत्तिनिवृत्तये नित्यग्रहणम् । अथ 'बिभेतेर्हेतुभये' इति 'नित्यं स्मयतेः' इति च आत्त्वविधौ 'भीस्म्योर्हेतुभये' इति आत्मनेपदविधौ च हेतुग्रहणस्य प्रयोजनमाह । **हेतोश्चेत् भयस्मयावित्युक्तेर्नेहेति । कुञ्चिकयैनमिति** ॥ केशबन्धविशेषः कुञ्चिका । तस्याश्च करणतया प्रयोजककर्तृत्वाभावात् आत्त्वं षुक् च नेति भावः । आक्षिपति कथमिति । रघुवंशकाव्ये "तमार्यगृह्यं निगृहीतधेनुं मनुष्यवाचा मनुवंशकेतुम् । विस्मापयन्विस्मितमात्मवृत्तौ सिंहोरुसत्वन्निजगाद सिंहः॥" इति श्लोके विस्मापयन्निति कथमित्याक्षेपः । प्रयोजकाद्व्यापारेण आत्त्वपुगनुपपत्तेरिति भावः । ननु मनुष्यवागेव तत्र प्रयोजिकेत्यत आह । **मनुष्येति** ॥ मनुष्यवाचेति तृतीयान्तगम्यकरणात् मनुष्यवागात्मकादेव हि तत्र स्मयः । ननु करणभूतापि मनुष्यवाक् प्रयोजिका कुतो नेत्यत आह । **अन्यथेति** ॥ मनुष्यवाचः स्मयप्रयोजकत्वमभ्युपगम्य आत्वाश्रयणे 'भीस्म्योर्हेतुभये' इत्यात्मनेपदमपि स्यादित्यर्थः । स्मयोऽत्र प्रयोजकमूलको नेति युक्तमेव । किन्त्वात्त्वपुगाक्षेपो न

स्मयः। अन्यथा शानजपि स्यात्। सत्यम्। 'विस्माययन्' इत्येव पाठ इति साम्प्रदायिकाः। यद्वा मनुष्यवाक्प्रयोज्यकर्त्री विस्मापयते। तया सिंहो विस्मापयन्निति ण्यन्ताण्णौ 'शता' इति व्याख्येयम्।

२५९७। स्फायो वः। (७-३-४१)

णौ। स्फावयति।

२५९८। शदेरगतौ तः। (७-३-४२)

शदेर्णौ तोऽन्तादेशः स्यान्न तु गतौ। शातयति। गतौ तु गाः शादयति गोविन्दः। गमयतीत्यर्थः।

२५९९। रुहः पोऽन्यतरस्याम्। (७-३-४३)

णौ। रोपयति–रोहयति।

२६००। क्रीङ्जीनां णौ। (६-१-४८)

एषामेच आत्त्वं स्याण्णौ। क्रापयति। जापयति। अज्ञापयति।

युज्यते इत्यर्थाङ्गीकारेण परिहरति। **सत्यमिति** ॥ णौ आयादेशे स्मायि इत्यस्माच्छटश्शतरि शपि णेर्गुणे अयादेशे विस्माययन्नित्येव कालिदासो महाकविः प्रायुङ्क्त। विस्मापयन्निति पकारपाठस्तु लेखकप्रमादकृत इति भावः। **यद्वेति** ॥ राजा दिलीपं विस्मयते। तं सिंहोच्चारिता मनुष्यवाक् प्रयोजयति। विस्मापयते मनुष्यवाक् राजानम्। अत्र मनुष्यवाक् प्रयोजककर्त्री। राजा तु प्रयोज्यकर्तेति स्थितिः। अत्र स्मयस्य प्रयोजककर्तृभूतमनुष्यवाङ्मू कत्वादात्त्वे पुक्। मूले प्रयोज्यकर्त्रीत्येव पाठः। प्रयोजककर्त्रीत्यर्थः। प्रयोज्यः कर्ता यस्याः सा प्रयोज्यकर्त्री इति बहुव्रीह्याश्रयणात्। प्रयोजककर्त्रीत्येव पाठः सुगमः। तां विस्मापयन्तीं प्रयाजककर्त्रीं मनुष्यवाचं प्रयोजयति सिंहः विस्मापयन्। स्मापि ईदिति ण्यन्तात् णौ प्रथमणेर्लोपे स्मापि इत्यस्मात् शतृप्रत्यये शपि णेर्गुणे अयादेशे विस्मापयन्निति भवतीत्यभिप्रेत्य आह। **तया सिंहः इति** ॥ प्रयोजककर्तरि तृतीया। आत्मनेपदं भास्मीप्रकृतिकण्यन्तादेव, नतु ण्यन्तप्रकृतिकण्यन्तादिति भावः। **स्फायो वः** ॥ णाविति शेषपूरणम्। 'अर्तिह्री' इत्यतस्तदनुवृत्तेरिति भावः। **शदेरगतौ तः** ॥ 'अर्तिह्री' इत्यतो णावित्यनुवृत्तिं मत्वा आह। **शदेर्णाविति। तोऽन्तादेशः इति** ॥ तकार इत्यर्थः। अकार उच्चारणार्थः। **रुहः पो** ॥ णाविति शेषपूरणम्। **क्रीङ्जीनां णौ** ॥ 'डु क्रीञ् द्रव्यविनिमये, इङ् अध्ययने, जि जये' एषान्द्वन्द्वः। **एच आत्त्वमिति** ॥ 'आदेच उपदेशे' इत्यतस्तदनुवृत्तेरिति भावः। **क्रापयति। जापयतीति** ॥ आत्त्वे पुक्। छुङि अविक्रपत्। अजीजपत्। **अज्ञापयतीति** ॥ इङः आत्त्वे पुकि रूपम्। अधि इ इ अ त् इति स्थिते

२६०१ । णौ च संश्चङोः । (२-४-५१)

सन्परे चङ्परे च णौ इङो गाङ्वा स्यात् । अद्ध्यजीगपत् । अद्ध्यापिपत् ।

२६०२ । सिच्यतेरपारलौकिके । (६-१-४९)

ऐहलौकिकेऽर्थे विद्यमानस्य सिद्ध्यतेरेच आत्त्वं स्याण्णौ । अन्नं साधयति । निष्पादयतीत्यर्थः । 'अपारलौकिके' किम् । तापसः सिद्ध्यति । तत्त्वं निश्चिनोति । तं प्रेरयति सेधयति तापसं तपः ।

२६०३ । प्रजने वीयतेः । (६-१-५५)

अस्यैच आत्त्वं वा स्याण्णौ प्रजनेऽर्थे । वापयति—वाययति वा गाः पुरोवातः । गर्भं ग्राहयतीत्यर्थः । 'ऊदुपधाया गोहः' (सू २३६४) । गूहयति ।

णौ च संश्चङोः ॥ विषयसप्तमीयमित्याकरे स्पष्टम् । णौ विवक्षिते इति लभ्यते । 'इङश्च' इत्यतः इङ इति 'गाङ् लिटि' इत्यतो गाङिति 'विभाषा लुङ्लृङोः' इत्यतो विभाषेति चानुवर्तते । तदाह । **सन्परे चङ्परे चेत्यादि** ॥ सन्परे चङ्परे च णौ विवक्षिते इत्यर्थः । **वेत्यादि** । **अद्ध्यजीगपदिति** ॥ णौ इङो गाङादेशे पुकि उपधाह्रस्वे अधि गप् इ अ त् इति स्थिते गाप इत्यस्य द्वित्वे हलादिशेषे अभ्यासह्रस्वे सन्वत्त्वादित्त्वे दीर्घे अभ्यासचुत्वे रूपम् । नच द्वित्वे कार्ये 'णावजादेशो न' इति द्वित्वात् प्राक् गाङादेशनिषेधः शङ्क्यः। अभ्यासोत्तरखण्डे अवर्णसत्त्व एव तन्निषेधप्रवृत्तेरुक्तत्वात् । द्वित्वे कार्ये गाङादेशस्य निषेधे सति गाङः पूर्वं 'अजादेर्द्वितीयस्य' इति णिच एव द्वित्वे सति प्रक्रियायां परिनिष्ठिते वा धातोरुत्तरखण्डे अवर्णाभावादिति भावः । गाङभावे 'क्रीङ्जीनां णौ' इत्यात्त्वे पुकि अधि आ प् इ अ त् इति स्थिते पि इत्यस्य द्वित्वे रूपमिति भावः । **सिच्यतेरपारलौकिके** ॥ 'आदेच उपदेशे' इत्यस्मादादेच इति 'क्रीङ्जीनाम्' इत्यस्माण्णाविति चानुवर्तते । तदाह । **ऐहलौकिके इत्यादि** ॥ **अन्नमिति** ॥ तन्निष्पादनं तृप्त्यर्थत्वादैहलौकिकमिति भावः । **तत्त्वमिति** ॥ आत्मस्वरूपमित्यर्थः । **सेधयति तापसं तपः इति** ॥ तत्त्वन्निश्चाययतीत्यर्थः । आत्मतत्त्वनिश्चयः आमुष्मिकफलक इति भावः । **प्रजने वीयतेः** ॥ 'आदेच उपदेशे' इत्यस्मादादेच इति 'चिस्फुरोः' इत्यतो णाविति 'विभाषा लीयतेः' इत्यतो विभाषेति चानुवर्तते । तदाह । **अस्यैच इत्यादि** ॥ वीयतेरिति न श्यना निर्देशः 'वी गतिप्रजनस्थानार्जनोपार्जनेषु' इत्यस्य लुग्विकरणस्यत्वात् । किन्तु यका निर्देशोऽयम् । तेन व्येञोऽपि ग्रहणम् । तस्यापि सम्प्रसारणे वीधातुना तुल्यत्वादिति केचित् । वस्तुतस्तु व्येञो न ग्रहणम् । तस्य प्रयोजनार्थकत्वाभावात् । तस्य णौ 'शाच्छासा' इति पुगपवादयुग्विधानेन व्याययतीति रूपे विशेषाभावाच्चेति शब्देन्दुशेखरे प्रपञ्चितम् । **गर्भङ्ग्राहयतीति** ॥ पुरोवातकाले गावो गर्भङ्गृह्णन्तीति प्रसिद्धिः । अथ 'गुह्रू संवरणे' इत्यस्य गुणनिमित्ते अजादौ प्रत्यये परे उपधाया ऊत्त्वविधिं स्मारयति । **ऊदुपधाया गोहः इति । गूहयतीति** ॥ लघूपधगुणापवादः

२६०४। दोषो णौ। (६-४-९०)

'दुषः' इति सुवचम्। दुष्यतेरुपधाया ऊत्स्याण्णौ। दूषयति।

२६०५। वा चित्तविरागे। (६-४-९१)

विरागोऽप्रीतता। चित्तं दूषयति–दोषयति वा कामः। 'मितां ह्रस्वः' (सू २५६८)। भ्वादौ चुरादौ च मित उक्ताः। घटयति। 'जनीजृष्–'। जनयति–जरयति। जृणातेस्तु। जारयति 'रञ्जेर्णौ मृगरमणे नलोपो वक्तव्यः' (वा ४०६७)। मृगरमणमाखेटकम्। रजयति मृगान्। 'मृग–' इति किम्। रञ्जयति पक्षिणः। रमणादन्यत्र तु रञ्जयति मृगान्तृणदानेन। चुरादिषु ज्ञपादिश्चिञ्। 'चिस्फुरोर्णौ' (२५६९)। चपयति–चययतीत्युक्तम्। चिनोतेस्तु। चापयति–चाययति। स्फारयति–स्पोरयति। अपुस्फरत्–अपुस्फुरत्।

ऊत्त्वमिति भावः। **दोषो णौ** ॥ उपधाया इत्यनुवर्तते। 'दुष वैकृत्ये' इति श्यन्विकरणः तस्य कृतलघूपधगुणस्य निर्देशः। ततश्च गुणविषयकमेवेदम्। **दुष्यतेरुपधाया ऊत्स्यादिति** ॥ णाविति शेषः। **दूषयतीति** ॥ लघूपधगुणापवाद ऊत्। दुषो णावित्येव सुवचम्। **वा चित्तविरागे** ॥ ऊदुपधाया इति, दोषो णाविति, चानुवर्तते। चित्तविरागे दुष उपधाया ऊद्वास्यात् णाविति फलितम्। विरागपदस्य विवरणं अप्रीततेति। इच्छाविरह इत्यर्थः। **चित्तमिति** ॥ चित्तं दुष्यति स्नानसन्ध्यावन्दनादिनित्यकर्मसु विरक्तं भवति। तत्प्रयोजयति काम इत्यर्थः। **मितां ह्रस्वः इति** ॥ णौ मितामुपधाया ह्रस्वः इति प्राग्व्याख्यातमपि स्मारयति। **जनी जृषिति** ॥ इदमपि व्याख्यातं स्मार्यते। **जृणातेस्त्विति** ॥ श्नाविकरणस्य अपित्त्वान् न मित्त्वमिति भावः। **रञ्जेर्णाविति** ॥ णेः कित्त्वाभावात् अनिदितामित्यप्राप्तौ वचनम्। मृगरमणपदस्य विवरणं आखेटकमिति। मृगयेत्यर्थः। **रजयति मृगानिति** ॥ 'रञ्ज रागे' शब्विकरणः। 'रञ्जेश्च' इति शपि नलोपः। रजन्ति मृगाः ग्राह्या भवन्ति। तान् मृगान् तादृग्व्यापारविषयान् करोति मृगवधासक्तो राजादिरित्यर्थः। अत्र नकारलोपः। **रञ्जयति पक्षिणः इति** ॥ पक्षिणो रजन्ति ग्राह्या भवन्ति। तान् तादृग्व्यापारविषयान् करोतीत्यर्थः। पक्षिग्रहणमिदं न मृगयेति मन्यते। **रञ्जयति मृगान् तृणदानेनेति** ॥ धावतो मृगान् रक्षणाय तृणसमर्पणेन बन्धनस्थानकान् करोतीत्यर्थः। **चुरादिष्विति** ॥ चुरादिषु ज्ञपादिपञ्चकान्तर्गताश्चिञ्धातुरस्ति तस्मात् स्वार्थणिचि कृते 'चिस्फुरोः' इति आत्वपक्षे पुकि मित्त्वादुपधाह्रस्वे चपयतीति रूपम्। आत्त्वाभावे तु वृद्धौ आयादेशे मित्त्वाद्ह्रस्वे चययतीति रूपमुक्तञ्चुरादावित्यर्थः। **चिनोतेस्त्विति** ॥ श्नुविकरणस्य तु चिञ्धातोर्हेतुमण्णौ 'चिस्फुरोः' इति आत्त्वे पुकि मित्त्वाभावाद्ह्रस्वाभावे चापयतीति रूपम्। आत्त्वाभावे वृद्धौ आयादेशे मित्त्वाभावाद्ह्रस्वाभावे चाययतीति रूपमित्यर्थः। **स्फारयति–स्फोरयतीति** ॥ 'चिस्फुरोः' इत्यात्त्वविकल्पः। **अपुस्फरत्–अपुस्फुरदिति** ॥ स्फुर् इ अ त् इति स्थिते द्वित्वे कर्तव्ये णावच

२६०६ । उभौ साभ्यासस्य । (८-४-२१)

साभ्यासस्यानितेरुभौ नकारौ णत्वं प्राप्नुतो निमित्ते सति । प्राणिणत् ।

२६०७ । णौ गमिरबोधने । (२-४-४६)

इणो गमिः स्याण्णौ । गमयति । बोधने तु प्रत्याययति । 'इण्वदिक.' (वा १५७७) । अधिगमयति । 'हनस्तोऽचिण्णलोः' (सू २५७४) । 'हो हन्तेः' इति कुत्वम् । घातयति । 'ईर्ष्यतेस्तृतीयस्येति वक्तव्यम्' (वा ६४०६) तृतीयव्यञ्जनस्य तृतीयैकाच इति वार्थः । आद्ये षकारस्य द्वित्वम् वारयितुमिदम् । द्वितीये तु 'अजादेर्द्वितीयस्य' (सू २१७६) इत्यस्यापवादतया सन्नन्ते

आदेशस्य निषिद्धतया स्फुरित्युकारवतो द्वित्वे ततश्चिस्फुरोर्णाविति उत्तरखण्डे आत्वविकल्पः । आत्वपक्षे उपधाह्रस्व इति भावः । **उभौ साभ्यासस्य** ॥ अनितेरित्यनुवर्तते । 'अन प्राणने' इतिधातोरित्यर्थः । 'रषाभ्यान्नो णः' इत्यधिकृतम् । 'उपसर्गादसमासेऽपि' इत्यतः उपसर्गादित्यनुवर्तते । तदाह । **साभ्यासस्येत्यादिना** ॥ **निमित्ते सतीति** ॥ उपसर्गस्थे रेफे सतीत्यर्थः । **प्राणिणदिति** ॥ अन् इ अ त् इति स्थिते 'अनितेः' इति णत्वस्यासिद्धत्वात् नि इत्यस्य द्वित्वे उत्तरखण्डे नकारस्याभ्यासनकारेण व्यवधानाण्णत्वे अप्राप्ते उभयोर्नकारयोरनेन णत्वमित्यर्थः । नच 'पूर्वत्रासिद्धीयमद्विर्वचने' इति निषेधात् द्वित्वे कर्तव्ये णत्वस्यासिद्धत्वविरहेण परत्वात् कृते णत्वे ततः पश्चात् द्वित्वे प्राणिणदिति सिद्धमिति वाच्यम् । अत एव 'पूर्वत्रासिद्धीयमद्विर्वचने' इत्यस्यानित्यत्वविज्ञानात् । तेन ऊर्णनावेत्यत्र णत्वात् पूर्वमेव नुशब्दस्य द्वित्वे कृते अभ्यासोत्तरखण्डे णत्वाभावसिद्धिरित्यन्यत्र विस्तरः । **णौ गमिरबोधने** ॥ 'इणो गा लुङि' इत्यतः इण इत्यनुवर्तते । तदाह । **इणो गमिरिति** ॥ मकारादिकार उच्चारणार्थः । **गमयतीति** ॥ प्रापयतीत्यर्थः । **प्रत्याययतीति** ॥ बोधयतीत्यर्थः । लुङि प्रत्याययत् । इणो णिचि 'इणो यण्' इति यणम्बाधित्वा परत्वात् वृद्धौ आयादेशे आय् इ अ त् इति स्थिते यि इत्यस्य द्वित्वम् । नच द्वित्वे कार्ये णावजादेशस्य निषिद्धत्वाद्वृद्धेर्निषेधः शङ्क्यः । 'अजादेर्द्वितीयस्य' इति णिचो द्वित्वे उत्तरखण्डे अवर्णाभावात् 'इक् स्मरणे' इत्यस्य इण्वत्त्वमुक्तं स्मारयति । **इण्वदिकः इति । अधिगमयतीति** ॥ स्मारयतीत्यर्थः । हन्तेर्णिति णिति च तकारादेशमुक्तं णौ स्मारयति । **हनस्तोऽचिण्णलोरिति । कुत्वमिति** ॥ हस्येति शेषः । उपधावृद्धिं मत्वा आह । **घातयतीति** ॥ लुङि अजीघतत् । ईर्ष्यतेर्णौ रूपम् । **वक्तव्यमिति** ॥ द्वित्वमिति शेषः । **इति वार्थः इति** ॥ 'न न्द्राः' इति सूत्रभाष्ये स्पष्टमिदम् । **आद्ये इति** ॥ तृतीयस्य व्यञ्जनस्येति पक्षे इत्यर्थः । **षकारस्येति** ॥ अन्यथा ईर्ष्य् इ अ त् इति स्थिते 'नन्द्राः' इति रेफं वर्जयित्वा षकारसहितस्य ष्यि इत्यस्य द्वित्वं स्यात् । ततश्च उत्तरखण्डे णिलोपे ऐर्षिष्यदिति स्यात् । ऐर्ष्यदितीष्टं न स्यात् । अतस्तृतीयव्यञ्जनस्येत्युक्तम् । एवञ्च यकारमात्रस्य द्वित्वे णिलोपे संयुक्तद्वियकारमिष्टं सिध्यतीत्यर्थः । **द्वितीये इति** ॥ तृती-

प्रवर्तते। ऐर्ष्यीयत्—ऐर्षिष्यत्। द्वितीयव्याख्यायां णिजन्ताच्चङि षकार एवाभ्यासे श्रूयते। हलादिशेषात्। द्वित्वं तु द्वितीयस्यैव। तृतीयाभावेन प्रकृतवार्त्तिकाप्रवृत्तेः। निवृत्तप्रेषणाद्धातोर्हेतुमण्णौ शुद्धेन तुल्योऽर्थः। तेन "प्रार्थयन्ति शयनोत्थितं प्रियाः" इत्यादि सिद्धम्। एवं सकर्मकेषु सर्वेषूह्यम्।

इति तिङन्तणिच्प्रकरणम्।

यैकाच इति व्याख्याने इत्यर्थः। **सन्नन्ते प्रवर्तते इति** ॥ उक्तवार्तिकमिति शेषः। सनि इटि ईर्ष्य् इस इति स्थिते ईर्ष्य् इति प्रथमैकाच् ष्यिस् इति द्वितीयैकाच् स इति तृतीयैकाजिति स्थितिः। तत्र तृतीयैकाचस्सम्भवात्तस्य द्वित्वविधिः। अन्यथा 'अजादेर्द्वितीयस्य' इति स्यादिति भावः। **ऐर्ष्यीयदिति** ॥ यकारमात्रस्य द्वित्वे णिलोपे संयुक्तद्वियकारं रूपम्। अथ द्वितीयव्याख्यायां रूपमाह। **ऐर्षिष्यदिति** ॥ तदुपपादयति। **द्वितीयव्याख्यायामिति** ॥ ण्यन्ताच्चङि ईर्ष्य् इ अ त् इति स्थिते 'नन्द्राः' इति निषेधाद्वेफं वर्जयित्वा 'अजादेर्द्वितीयस्य' इति ष्यि इत्यस्य द्वित्वं, नतु यकारमात्रस्य प्रथमव्याख्याने एव तृतीयव्यञ्जनस्येत्युक्तेः। तत्र ष्यि इत्यस्य द्वित्वे कृतेऽपि अभ्यासे षकार एव हल् इकारशिरस्कः श्रूयते, नतु यकारोऽपीत्यर्थः। कुत इत्यत आह। **हलादिशेषादिति** ॥ ननु तृतीयस्यैकाच इति द्वितीयव्याख्यायां इह द्वितीयस्यैकाचः कथं द्वित्वमित्यत आह। **द्वित्वं तु द्वितीयस्यैवेति** ॥ एकाच इति शेषः। कुत इत्यत आह। **तृतीयाभावेनेति** ॥ ईर्ष्य् इ अ त् इत्यत्र ईर्ष्य् इति प्रथमैकाच्, नतु चङि परे तृतीयैकाजस्ति। अतोऽत्र तृतीयैकाच इति वार्तिकन्न प्रवर्तते। तस्मात् द्वितीयस्यैव एकाचो द्वित्वमित्यर्थः। एवञ्च तृतीयस्यैकाच इति वार्तिकं सन्नन्त एव प्रवर्तते। ईर्ष्यतेरामः सत्त्वेन ततः परस्य लिटोऽभावादिति बोध्यम्। ननु "प्रार्थयन्ति शयनोत्थितं प्रियाः" इति माघकाव्ये प्रार्थयन्तीति न चौरादिकस्वार्थिकं णिजन्तम्। तस्यागर्वीयतया आत्मनेपदप्रसङ्गात्। नापि हेतुमण्यन्तम्। स्वाभीष्टं याचते इत्यर्थे तदसम्भवात्। नहि प्रयोजकव्यापाराभावे तत्प्रवृत्तिरस्तीत्यत आह। **निवृत्तेति** ॥ निवृत्तं प्रेषणं यस्मात् सः निवृत्तप्रेषणः सम्प्रति अविवक्षितप्रेषणादित्यर्थः। तस्माद्धातोः भूतपूर्वगत्या प्रेषणमादाय हेतुमण्णौ कृते शुद्धेन णिज्विहीनेन धातुना तुल्योऽर्थः प्रतीयते इत्यर्थः। तदुक्तं। "निवृत्तप्रेषणाद्धातोः प्राक्तेऽर्थे णिजिष्यते" इति। इदञ्च 'णेरणौ' इति सूत्रे भाष्ये स्पष्टम् ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायां हेतुमण्णिचो निरूपणं समाप्तम्।

। श्रीरस्तु ।

॥ अथ तिङन्तसन्प्रकरणम् ॥

२६०८ । धातोः कर्मणः समानकर्तृकादिच्छायां वा । (३-१-७)

इषिकर्मण इषिणैककर्तृकाद्धातोः सन्प्रत्ययो वा स्यादिच्छायाम् । धातोर्विहितत्वादिह सन आर्धधातुकत्वम् । इट् । द्वित्वम् । 'सन्यतः' (सू २३१७) । पठितुमिच्छति पिपठिषति । 'कर्मणः' किम् । गमनेनेच्छतीति करणान्माभूत् । 'समानकर्तृकात्' किम् । शिष्याः पठन्त्वतीच्छति गुरुः । वाग्रहणात्पक्षे वाक्यमपि । 'लुङ्सनोर्घस्लृ' (सू २४२७) । 'एकाच उपदेशे—' (सू २२४६) इति नेट् । सस्य तत्वम् । अत्तुमिच्छति ।

अथ सन्प्रक्रियाः निरूप्यन्ते । **धातोः कर्मणः** ॥ 'गुप्तिज्किद्भ्यः' इत्यतस्सन्नित्यनुवर्तते । इच्छायाः श्रुतत्वात्ताम्प्रत्येव कर्मत्वं विवक्षितम् । तथा कर्मणस्समानकर्तृकत्वमपि इच्छानिरूपितमेव विवक्षितम् । कर्मेति स्ववाचकशब्दद्वारा धातौ सामानाधिकरण्येनान्वेति । एवञ्च इच्छासमानकर्तृकत्वे सति इच्छाकर्मीभूतो यो व्यापारः तद्वाचकाद्धातोरिच्छायां सन् वा स्यादिति फलति । तदाह । **इषिकर्मणः इत्यादि** ॥ इषिरिच्छा । इषिणा एककर्तृकत्वात् इषिकर्मीभूतव्यापारवाचकाद्धातोरित्यर्थः । ननु समानकर्तृकादित्युक्त्यैव धातोरिति लब्धम् । धात्वर्थव्यापाराश्रयस्यैव कर्तृत्वादित्यत आह । **धातोरिति** ॥ धातोरिति विहितस्यैव प्रत्ययस्यार्धधातुकत्वं, नतु धातोः परस्य । अन्यथा जुगुप्सते इत्यत्र धातोरित्यविहितस्यापि 'गुप्तिज्किद्भ्यः' इति सन आर्धधातुकत्वापत्तौ लघूपधगुणापत्तेरिति भावः । अस्य सन आर्धधातुकत्वे फलमाह । **इडिति** ॥ **द्वित्वमिति** ॥ 'सन्यङोः' इत्यनेनेति भावः । अभ्यासस्य इत्त्वविधिं स्मारयति । **सन्यतः इति** ॥ **पठितुमिच्छतीति** ॥ भावस्तुमुन्नर्थः । 'अव्ययकृतो भावे' इत्युक्तेः । धात्वर्थ एव भाव इत्युच्यते । तथाच पठितुमित्यस्य पठनक्रियैवार्थः । तस्मिन् पठने इच्छाकर्मत्वं इच्छासमानकर्तृकत्वञ्च सना गम्यते । तथाच स्वकर्तृकं पठनमिच्छतीत्यर्थे पिपठिषतीति शब्दो वर्तते इत्युक्तं भवति । अथ 'अद भक्षणे' इति धातोः सनि घस्लृभावं स्मारयति । **लुङ्सनोर्घस्लृ इति** ॥ घस् स इति स्थिते इदमाशङ्क्य आह । **एकाचः इति** ॥ **नेडिति** ॥ घस् स इति स्थिते आह । **सस्य तत्वमिति** ॥ 'सस्स्यार्धधातुके' इत्यनेनेति भावः । **जिघत्सतीति** ॥ द्वित्वे अभ्यासजश्त्वचुत्वे इति भावः ।

जिघत्सति । 'ईर्ष्यतेस्तृतीयस्य (वा ३४०३) इति यिसनोर्द्वित्वम् । ईर्ष्ष्य-षति–ईर्ष्यिषिषति ।

२६०९ । रुदविदमुषग्रहिस्वपिप्रच्छः संश्च । (१-२-८)

एभ्यः सन् क्त्वा च कितौ स्तः । रुरुदिषति । विविदिषति । मुमुषिषति ।

२६१० । सनि ग्रहगुहोश्च । (७-२-१२)

ग्रहेर्गुहेरुगन्ताच्च सन इण्ण स्यात् । 'ग्रहिज्या—' (सू २४१२) इति सम्प्रसारणम् । सनः षत्वस्यासिद्धत्वाद्भष्भावः । जिघृक्षति । सुषुप्सति ।

२६११ । किरश्च पञ्चभ्यः । (७-२-७५)

यिसनोर्द्वित्वमिति ॥ तृतीयस्य व्यञ्जनस्येति पक्षे ईर्ष्य् इस इत्यत्र यकारमात्रस्य द्वित्वे सनष्षत्वे संयुक्तद्वियकारं रूपमिति भावः । तदाह । **ईर्ष्ष्यषतीति** ॥ तथाच सन्नन्ते ईकाररेफषकारयकारद्वित्वेकारपकाराः । तृतीयस्यैकाच इति पक्षे ईर्ष्य् इ स इत्यत्र स इत्यस्य द्वित्वे अभ्यासेत्त्वे सकारद्वयस्यापि षत्वे रूपं मत्वा आह । **ईर्ष्यिषिषतीति** ॥ अत्र तु सन्नन्ते इकाररेफषकारयकारेकारपकारेकारपकाराकाराः । **रुदविद** ॥ इका निर्देशात् सम्प्र-सारणे गृहीति निर्देशः । स्वपीति इकारस्तु उच्चारणार्थः, न त्विका निर्देशः । सुपीति सम्प्र-सारणप्रसङ्गात् । चकारात् 'मृडमृदगुध' इति पूर्वसूत्रस्थं क्ङिति समुच्चीयते । तदाह । **सन् क्त्वा चेति** ॥ **कितावितिं** ॥ 'असंयोगाल्लिट्' इत्यतस्तदनुवृत्तेरिति भावः । रुदसाहचर्या-द्वित्तेरेव ग्रहणमिति केचित् । अविशेषात्सर्वस्येत्यन्ये । 'हलन्ताच्च' इति सिद्धे रुदविदमुषाङ्ग्रहणं 'रलो व्युपधात्' इति विकल्पबाधनार्थम् । ग्रहेस्तु क्ङायां 'न क्ङा सेट्' इति निषेधबाधनार्थम् । स्वपिप्रच्छ्योस्तु क्ङायां कित्त्वेऽपि सनः अप्राप्तकित्त्वविधानार्थम् । रुरुदिषतीत्यादौ सनः कित्त्वा-ल्लघूपधगुणाभावः । **सनि ग्रहगुहोश्च** ॥ चकारात् 'श्रयुकः किति' इत्यतः उक इत्यनु-कृष्यते, न तु श्रयतिः। तस्य 'सनीवन्तर्ध' इति विकल्पस्य वक्ष्यमाणत्वात् । 'नेड्वशिकृति' इत्यतः नेडिति चानुवर्तते । तदाह । **ग्रहेरित्यादि** ॥ ग्रहधातोर्नित्यमिटि प्राप्ते गुहेः ऊदित्त्वाद्वि-कल्पे प्राप्ते वचनम् । **ग्रहिज्येति** ॥ ग्रह् स इति स्थिते सनः कित्त्वात् 'ग्रहिज्या' इति रेफस्य सम्प्रसारणम् ऋकार इत्यर्थः । ननु गृह् स इति स्थिते हस्य ढत्वे भष्भावापेक्षया परत्वात् कत्वे सस्य षत्वे च कृते झषन्तत्वाभावे कथं भष्भाव इत्यत आह । **सनः षत्वस्येति** ॥ कत्वस्या-सिद्धत्वादित्येव सुवचम् । **जिघृक्षतीति** ॥ गृह् स इति स्थिते हकारादिणः परस्य सस्य षत्वं परत्वात् प्राप्तं तस्यासिद्धत्वात् हस्य ढत्वे भष्भावः ततः कत्वे कात्परस्य षत्वमिति क्रम इति भावः । गुहेः जुघुक्षतीत्युदाहार्यम् । उगन्तात् वुभूषति । यद्यपि 'श्रयुकः किति' इत्येव उगन्तात् सिद्धम् । तथाप्यत्र चकाराभावे सनि ग्रहगुहोरेव इट्इति नियमः स्यात् । तन्निवृत्त्यर्थश्च-कार इत्याहुः । **सुषुप्सतीति** ॥ सनः कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणं लघूपध-गुणाभावश्च । **किरश्च पञ्चभ्यः** ॥ किर इति पञ्चमी । किरादिभ्य इति विवक्षितम् । तुदादौ 'कॄ

'कृ' 'गृ' 'दृङ्' 'धृङ्' 'प्रच्छ्' एभ्यः सन इट् स्यात्। पिपृच्छिषति। चिकरिषति। जिगरिषति। जिगलिषति। अत्रेटो दीर्घो नेष्टः। दिदरिषते। दिधरिषते। कथम् 'उद्दिधीर्षुः' इति। भौवादिकयोर्धृङ्धृञ्योरिति गृहाण।

२३१२। इको झल्। (१-२-९)

इगन्ताज्झलादिः सन्निकित्स्यात्। बुभूषति। दीङ्। दातुमिच्छति दिदीषते। एज्विषयत्वाभावात् 'मीनातिमिनोति—' (सू २५०८) इत्यात्त्वं न। अत एव 'सनि मीमा—' (सू २६२३) इति सूत्रे माधातोः पृथङ्मीग्रहणं कृतम्।

२६१३। हलन्ताच्च। (१-२-१०)

इक्समीपाद्धलः परो झलादिः सन्निकित्स्यात्। गुहू। जुघुक्षति।

विक्षेपे, गृ निगरणे, दृङ् आदरणे, धृङ् अवस्थाने, प्रच्छ ज्ञीप्सायाम्' इति स्थिताः। तदाह। **कृगृ इत्यादिना** ॥ **सन इडिति** ॥ 'स्मिपूङ्रञ्ज्वशां सनि' इत्यतः 'इडत्यर्ति' इत्यतश्च तदनुवृत्तेरिति भावः। एषामनिट्त्वाद्वचनम्। **पिपृच्छिषतीति** ॥ सनः कित्त्वात् 'ग्रहिज्या' इति सम्प्रसारणम्। **चिकरिषतीति** ॥ कृधातोः सनि इटि रूपम्। **जिगरिषतीति** ॥ 'गृ निगरणे' इत्यस्मात्सनि इटि रूपम्। **जिगलिषतीति** ॥ 'अचि विभाषा' इति लत्वविकल्प इति भावः। इट् सनि वेत्यस्यायमपवादः। चिकरिषति, जिगलिषति इत्यत्र 'वृतो वा' इति दीर्घमाशङ्क्य आह। **अत्रेटो दीर्घो नेष्टः इति** ॥ वार्तिकमिदं वृत्तौ स्थितम्। भाष्ये तु न दृश्यते। **दिदरिषते। दिधरिषते इति** ॥ दृङो धृङश्च सनि इटि रूपम्। 'पूर्ववत्सनः' इत्यात्मनेपदम्। **कथमिति** ॥ उद्दिधीर्षुरिति कथमित्यन्वयः। किरादित्वेन इट्प्रसङ्गादिति भावः। **भौवादिकयोरिति** ॥ 'धृङ् अवस्थाने, धृञ् धारणे' इत्यनयोर्भौवादिकयोस्सनि किरादित्वाभावादिङभावे 'अज्झनगमां सनि' इति दीर्घे 'ऋत इद्धातोः' इति इत्त्वे रपरत्वे 'हलि च' इति दीर्घे षत्वे उद्दिधीर्ष इत्यस्मात् 'सनाशंसभिक्ष उः' इत्युप्रत्यये उद्दिधीर्षुरिति रूपमिति गृहाण जानीहीति शङ्कक्रम्प्रति उत्तरम्। **इको झल्। इगन्तादिति** ॥ सना आक्षिप्तधातुविशेषणत्वात्तदन्तविधिरिति भावः। **सन् किदिति** ॥ 'रुदविदमुषग्रहि' इत्यतः 'असंयोगाल्लिट् कित्' इत्यतश्च तदनुवृत्तेरिति भावः। **बुभूषतीति** ॥ कित्वान्न गुणः। उकः परत्वान्नेट्। **दिदीषते इति** ॥ सनः कित्त्वान्न गुणः। दीङो ङित्त्वात् 'पूर्ववत्सनः' इत्यात्मनेपदम्। **एज्विषयत्वाभावादिति** ॥ कित्त्वे गुणनिषेधादिति भावः। **अत एवेति** ॥ यद्येज्विषयादन्यत्राप्यात्वं स्यात् तदा मीमेति पृथक् ग्रहणमनर्थकं स्यात्। "गामादाग्रहणेष्वविशेषः" इत्युक्तेरिति भावः। **हलन्ताच्च** ॥ 'इको झल्' इति पूर्वसूत्रमनुवर्तते। 'रुदविदमुष' इत्यतस्सनिति 'असंयोगाल्लिट्' इत्यतः किदिति च। हलिति लुप्तपञ्चमीकं पदम्। अन्तशब्दः समीपवाची। तदाह। **इक्समीपादित्यादि** ॥ **जुघुक्षतीति** ॥ सनः कित्त्वान्न गुणः। 'सनि ग्रहगुहोश्च'

बिभित्सति । 'इकः' किम् । यियक्षते । 'झल्' किम् । विवर्धिषते । हल्ग्रहणं जातिपरम् । तृंहू तितृक्षति–तितृंहिषति ।

२६१४ । अज्झनगमां सनि । (६-४-१६)

अजन्तानां हन्तेरजादेशगमेश्च दीर्घः स्याज्झलादौ सनि । 'सन्लिटोर्जेः' (सू २३३१) । जिगीषति । 'विभाषा चेः' (सू २५२५) । चिकीषति–चिचीषति । जिघांसति ।

२६१५ । सनि च । (२-४-४७)

इणो गमिः स्यात्सनि न तु बोधने । जिगमिषति । बोधने प्रतीषिषति ।

इत्यूदित्त्वेऽपि नित्यनेट् । हस्य ढत्वे भष्भावे कत्वषत्वे इति भावः । **बिभित्सतीति** ॥ भिदेस्सनः कित्त्वान्न गुणः । **यियक्षते इति** ॥ अत्र हलः इक्समीपत्वाभावान्न कित्त्वम् । सति तु कित्त्वे यजेस्सम्प्रसारणं स्यादिति भावः । **विवर्धिषते इति** ॥ वृधेस्सनि रूपम् । अत्र सन इटि झलादित्वेनेति भावः। ननु 'तृंहू हिंसायाम्' तुदादिः नोपधोऽयम्। कृतानुस्वारस्य निर्देशः । अस्मात्सनः 'अनिदिताम्' इति नलोपार्थङ्कित्त्वमिष्यते । तन्नोपपद्यते । न ह्यत्र इत्समीपादनुस्वारात् सन् परो भवति । हकारेण व्यवधानात् । हकारात्तु परः सन् इक्समीपाद्धलः परो न भवति । अनुस्वारेण व्यवधानादित्यत आह । **हल्ग्रहणं जातिपरमिति** ॥ हल्त्वजात्याक्रान्तैकानेकव्यक्तिपरमित्यर्थः । **तृंह्धिति** ॥ तृंहूधातोः प्रदर्शनमिदम् । **तितृक्षतीति** ॥ ऊदित्त्वादिडभावे पक्षे रूपम् । सनः कित्त्वान्नलोपः । लघूपधगुणाभावश्च । ढत्वकत्वषत्वानि । इट्पक्षे आह । **तितृंहिषतीति** ॥ झलादित्वाभावेन कित्त्वाभावान्नलोपो नेति भावः । **अज्झनगमां सनि** ॥ अच् हन् गम् एषान्द्वन्द्वः । 'नोपधायाः' इत्यतः उपधायाः इत्यनुवृत्तं हनगमोरन्वेति नत्वजन्ते । असम्भवात् । अङ्गस्येत्यधिकृतम् । अचस्तद्विशेषणत्वात्तदन्तविधिः । गमधातुरिह अजादेश एव विवक्षित इति प्रकृतसूत्रभाष्ये स्पष्टम् । 'ढ्रलोपे पूर्वस्य' इत्यतो दीर्घ इत्यनुवर्तते । तदाह । **अजन्तानामित्यादिना** ॥ **झलादौ सनीति** ॥ 'च्छ्वोः शूट्' इति सूत्रभाष्ये 'अज्झनगमाम्' इत्यत्र सनं झला विशेषयिष्याम इत्युक्तेरिति भावः । अथ जिघातोरभ्यासात् परस्य कुत्वविधिं स्मारयति । **सन्लिटोर्जेरिति** ॥ **जिगीषतीति** ॥ जेर्दीर्घे अभ्यासात्परस्य कुत्वम् । अथ चिञ्धातोरभ्यासात्परस्य कुत्वविकल्पं स्मारयति । **विभाषा चेरिति** ॥ **चिकीषति–चिचीषतीति** ॥ अजन्तत्वाद्दीर्घः । **जिघांसतीति** ॥ हनेः सनि 'अज्झन' इत्यकारस्य दीर्घः, न त्वन्त्यस्य नकारस्य । दीर्घश्रुत्या अच इत्युपस्थितेः । द्वित्वं 'अभ्यासाच्च' इति कुत्वम् । 'नश्च' इत्यनुस्वारः । **सनि च** ॥ 'इणो गा लुङि' इत्यतः इण इति 'णौ गमिरबोधने' इत्यतः गमिरबोधने इति चानुवर्तते । तदाह । **इणो गमिरित्यादि** ॥ **जिगमिषतीति** ॥ गमेरिति इट् । अत्र 'अज्झनगमाम्' इति दीर्घो न । झलादौ सनीत्युक्तेः । **प्रतीषिषतीति** ॥

'इण्वदिकः' (वा १५७७)। अधिजिगमिषति। कर्मणि तङ्। 'परस्मैपदेषु' इत्युक्तेर्नेट्। 'झलादौ सनि' इति दीर्घः। जिगांस्यते। अधिजिगांस्यते। अजादेशस्येत्युक्तेर्गच्छतेर्न दीर्घः। जिगंस्यते। सञ्जिगंसते।

२६१६। इङश्च। (२-४-४८)

इङो गमिः स्यात्सनि। अधिजिगांसते।

२६१७। रलो व्युपधाद्धलादेः संश्च। (१-२-२६)

उश्च इश्च वी। ते उपधे यस्य तस्माद्धलादेः रलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः। 'द्युतिस्वाप्योः सम्प्रसारणम्' (२३४४)। दिद्युतिषते—दिद्योतिषते। रुरुचिषते—रुरोचिषते। लिलिखिषति—लिलेखिषति। 'रलः' किम्। दिदेविषति। 'व्युपधात्' किम्। विवर्तिषते। 'हलादेः' किम्। एषिषिषति।

बोधयितुमिच्छतीत्यर्थः। अत्र बोधनार्थत्वादिणो न गमिः। इ स इति स्थिते 'अजादेर्द्वितीयस्य' इति सनो द्वित्वे अभ्यासेत्त्वम्। प्रतिना सवर्णदीर्घे सकारद्वयस्यापि षत्वमिति भावः। 'इक् स्मरणे' इत्यस्याह। **इण्वदिकः इति** ॥ वार्तिकेन इक्धातुरिण्वद्भवतीत्यर्थः। ततश्च 'सनि च' इति गमिरादेश इति भावः। **कर्मणि तङिति** ॥ इण्धातोरिग्धातोश्च सन्नन्तात्कर्मणि लटस्तङित्यर्थः। 'भावकर्मणोः' इत्यनेनेति भावः। **परस्मैपदेष्विति** ॥ 'गमेरिट् परस्मैपदेषु' इत्युक्तेस्तङि नेडित्यर्थः। **झलादाविति** ॥ 'अज्झन' इति झलादौ सनि विहितो दीर्घ इत्यर्थः। **जिगांस्यते इति** ॥ गन्तुमिष्यते इत्यर्थः। इणो रूपम्। **अधिजिगांस्यते इति** ॥ स्मर्तुमिष्यते इत्यर्थः। इको रूपम्। **जिगंस्यते इति** ॥ गम्लृधातोः सन्नन्तात्कर्मणि तङि रूपम्। गमेरजादेशत्वाभावान्न दीर्घः। **इङश्च** ॥ **गमिः स्यात् सनीति** ॥ 'णौ गमिः' इत्यतः 'सनि च' इत्यतश्च तदनुवृत्तेरिति भावः। इङो ङित्त्वात् 'पूर्ववत्सनः' इति तङ्। परस्मैपदेष्वित्युक्तेर्नेट्। 'अज्झन' इति दीर्घ इति भावः। **रलो** ॥ **क्त्वासनाविति** ॥ चकारेण 'पूङः क्त्वा च' इत्यतः क्त्वायाः अनुकर्षादिति भावः। **सेटाविति** ॥ 'न क्त्वा सेट्' इत्यतस्तदनुवृत्तेरिति भावः। **वा किताविति** ॥ 'नोपधात्थफान्ताद्वा' इत्यतः 'असंयोगाल्लिट् कित्' इत्यतश्च तदनुवृत्तेरिति भावः। **दिद्युतिषते इति** ॥ 'द्युत दीप्तौ' अनुदात्तेत्। सनि द्वित्वे कित्त्वात् 'द्युतिस्वाप्योः' इत्यभ्यासस्य सम्प्रसारणे पूर्वरूपे सनः कित्त्वान्न लघूपधगुण इति भावः। सनः कित्त्वाभावे आह। **दिद्योतिषते इति** ॥ 'पूर्ववत्सनः' इत्यात्मनेपदम्। **एषिषिषतीति** ॥ इष्धातोस्सन् इट् हलादित्वाभावेन कित्त्वाभावाद्गुणे एष् इस ति इति स्थिते 'अजादेर्द्वितीयस्य' इति षिस् इत्यस्य द्वित्वे हलादिशेषे सनः षत्वे रूपम्। नन्विह सत्यपि कित्त्वे नित्यत्वात् परमपि गुणम्बाधित्वा षिस् इत्यस्य द्वित्वे

इह नित्यमपि द्वित्वं गुणेन बाध्यते। 'उपधाकार्यं हि द्वित्वात्प्रबलम्' ओणेर्ऋदित्करणस्य सामान्यापेक्षज्ञापकत्वात्।

२६१८। सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्। (७-२-४९)

इवन्तेभ्यः ऋधादिभ्यश्च सन इड्वा स्यात्। इडभावे 'हलन्ताच्च' (सू २६१३) इति कित्त्वं। 'च्छ्वोः—' (सू २५६१) इति वस्य ऊठ्। यण्। द्वित्वम् दुद्यूषति–दिदेविषति। 'स्तौतिण्योरेव—' (सू २६२७) इति वक्ष्यमाणनियमान्न षः। सुस्यूषति–सिसेविषति।

धात्ववयवस्य इकारस्य उपधात्वाभावादेव गुणाप्रसक्तेर्हलादेरिति व्यर्थमित्यत आह। **इह नित्यमपि द्वित्वं गुणेन बाध्यते इति**॥ कुत इत्यत आह। **उपधाकार्यं हि द्वित्वात्प्रबलमिति**॥ तच्च कुत इत्यत आह। **ओणेरिति**॥ ओणेः ऋदित्करणस्य ज्ञापकत्वादित्यन्वयः। तथाहि। ओणृधातोः ण्यन्तात्लुङि चङि 'णौ चङ्युपधायाः' इति ह्रस्वस्य 'नाग्लोपिशास्वृदिताम्' इति निषेधे सति ओणि अ त् इति स्थिते णि इत्यस्य द्वित्वे मा भवानोणिणदिति रूपम्। अत्र उपधाह्रस्वनिषेधार्थमोणेः ऋदित्करणम्। उपधाह्रस्वे कृते तु उण् इ अ त् इति स्थिते णि इत्यस्य द्वित्वे मा भवानुणिणदिति स्यात्। ओकारो न श्रूयेत इति स्थितिः। यदि तु नित्यत्वात् उपधाह्रस्वात् प्रागेव ओण् इ अ त् इत्यस्यां दशायां द्वित्वं स्यात्। तदा ओकारस्य उपधात्वाभावादेव ह्रस्वाप्रसक्तेस्तन्निषेधार्थमृदित्करणमनर्थकं स्यात्। तस्मादुपधाह्रस्वात्मकं उपधाकार्यं द्वित्वात् प्रबलमिति विज्ञायते इत्यर्थः। ननु भवतु उपधाह्रस्वो द्वित्वात् प्रबलः। प्रकृते तु उपधागुणः कथं द्वित्वात् प्रबलः स्यादित्यत आह। **सामान्यापेक्षेति**॥ उपधाह्रस्वस्य उपधाकार्यत्वेन रूपेण द्वित्वात् प्राबल्यविज्ञानादित्यर्थः। वस्तुतस्तु 'णौ चङ्युपधायाः' इति सूत्रे यदयमोणिमृदितङ्करोति तत् ज्ञापयति द्विर्वचनाद्ध्रस्वत्वं बलीय इति भाष्ये विशिष्य उपधाह्रस्वग्रहणात् सामान्यापेक्षत्वं ज्ञापकस्य चिन्त्यमिति शब्देन्दुशेखरे प्रपञ्चितम्। **सनीवन्तर्ध**॥ सनि इवन्तेति च्छेदः। इवन्त ऋध भ्रस्ज दन् भु श्रि स्वृ यु ऊर्णु भर ज्ञपि सन् एषान्द्वन्द्वः। इव् अन्ते येषान्ते इवन्ताः 'स्वरति' इत्यतः वेति 'इण्निष्ठायाम्' इत्यतः इडिति चानुवर्तते। तदाह। **इवन्तेभ्यः इत्यादि**॥ इवन्तस्य दिव्धातोरुदाहरिष्यन्नाह। **इडभावे इति। वस्येति**॥ वकारस्येत्यर्थः। **यणिति**॥ दकारादिकारस्य इति शेषः। **द्वित्वमिति**॥ द्यु इत्यस्येति शेषः। **दुद्यूषतीति**॥ 'अज्झन' इति दीर्घः। इट्पक्षे आह। **दिदेविषतीति**॥ अञ्झलादित्वान्न सनः कित्वं अतो नोट् किन्तु लघूपधगुण इति भावः। इवन्तस्योदाहरणान्तरं सिवुधातोः सुस्यूषतीति वक्ष्यते। तत्र द्वितीयस्य षत्वमाशङ्क्य आह। **स्तौतिण्योरिति। सुस्यूषतीति**॥ सिवुधातोः सनि इडभावे दुद्यूषतीतिवद्रूपम्। इट्पक्षे आह। **सिसेविषतीति**॥ ऋध्धातोः सनि ईर्त्सतीति रूपं वक्ष्य-

२६१९ । आप्ज्ञप्यृधामीत् । (७-४-५५)

एषामच ईत्स्यात्सादौ सनि ।

२६२० । अत्र लोपोऽभ्यासस्य । (७-४-५८)

'सनि मीमा—' (सू २६२३) इत्यारभ्य यदुक्तं तत्राभ्यासस्य लोपः स्यात् । आप्तुमिच्छति ईप्सति । अर्धितुमिच्छति रपरत्वम् चर्त्वम् । ईर्त्सति—अर्दिधिषति । बिभ्राज्जिषति—बिभर्जिषति—बिभ्रक्षति—बिभर्क्षति ।

२६२१ । दम्भ इच्च । (७-४-५६)

दम्भेरच इत्स्यादीच्च सादौ सनि, अभ्यासलोपः । 'हलन्ताच्च' (सू

त्राह । **आप्ज्ञप्यृधामीत् ॥ सादौ सनीति ॥** 'सनि मीमाघुरभ' इत्यतः सनीति अच इति चानुवर्तते । 'सःस्यार्धधातुके' इत्यतः सीत्यनुवृत्तं सनो विशेषणम्। तदादिविधिरिति भावः । **अत्र लोपोऽभ्यासस्य ॥** 'सनि मीमा' इति 'आप्ज्ञप्यृधामीत्' इति 'दम्भ इच्च' इति 'मुचोऽकर्मकस्य गुणो वा' इति पूर्वसूत्रचतुष्टयनिर्दिहितकार्यमत्रेत्यनेन परामृश्यते । तदाह । **सनि मीमेत्यारभ्येति ॥** सूत्रचतुष्टयकार्ये कृते सतीत्यर्थः । **ईप्सतीति ॥** आप्धातोस्सनि आकारस्य ईत्त्वे 'अजादेर्द्वितीयस्य' इति प्स इत्यस्य द्वित्वे अभ्यासलोप इति भावः । **रपरत्वमिति ॥** ऋधेः सनि इडभावे ऋकारस्य ईत्त्वे रपरत्वमित्यर्थः । **चर्त्वमिति ॥** ईर्ध् स इति स्थिते धस्य चर्त्वे 'न न्द्राः' इति रेफं वर्जयित्वा 'अजादेर्द्वितीयस्य' इति त्स इत्यस्य द्वित्वे अभ्यासस्य लोप इति भावः । " पूर्वत्रासिद्धीयमद्वित्वे " इति वचनात् चर्त्वे कृते द्वित्वमिति बोध्यम् । इट्पक्षे आह । **अर्दिधिषतीति ॥** सनः सादित्वाभावादित्त्वाभावे गुणे रपरत्वे अर् ध् इ स इति स्थिते धिस् इत्यस्य द्वित्वमिति भावः । भ्रस्ज्धातोः सनः इटि 'भ्रस्जो रोपधयोः' इति रमागमाभावे आह । **बिभ्राज्जिषतीति ॥** सस्य श्चुत्वेन शः शस्य जश्त्वेन जः ङिदभावात् 'ग्रहिज्या' इति सम्प्रसारणम्न । **बिभर्जिषतीति ॥** इटि रमागमपक्षे भ्रस्ज् इस इति स्थिते अकारादुपरि सकारात्प्राक् रेफागमे भकाराद्रेफस्य सकारस्य च निवृत्तौ भर्ज् इस इति स्थिते भर्ज् इत्यस्य द्वित्वे हलादिशेषे अभ्यासस्य इत्त्वे जश्त्वे सनः षत्वे च रूपम् । तदेवमिट्पक्षे रमागमतदभावाभ्यां रूपद्वयम् । **बिभ्रक्षतीति ॥** इडभावे रमागमाभावे च रूपम् । जस्य कुत्वं सस्य षः । **बिभर्क्षतीति ॥** इडभावे रमागमे च रूपम् । तदेवमिडभावपक्षे रमागमतदभावाभ्यां द्वे रूपे । **दम्भ इच्च ॥** 'सनि मीमा' इत्यतः सनीति अच इति चानुवर्तते । चकारात् 'आप्ज्ञप्यृधाम्' इति सूत्रादीदिति समुच्चीयते । 'सः सि' इत्यतस्सीत्यनुवृत्तं सनो विशेषणं तदादिविधिः । तदाह । **दम्भेरच इत्यादि ॥ अभ्यासलोपः इति ॥** 'अत्र लोपः' इत्यनेनेति शेषः । दम्भ् स इति स्थिते इक्समीपादनुस्वारादव्यवहितपरत्वाभावेऽपि हलन्तादित्यस्य प्रवृत्तिमुपपादयति । **हलन्ताच्चेत्यत्रेति ॥** हल्ग्रहणं हल्त्वजात्याक्रान्तैकानेकव्यक्तिपरमिति प्रागुक्तमित्यर्थः । ततः किमित्यत आह ।

२६१३) इत्यत्र हल्ग्रहणं जातिपरमित्युक्तम्। तेन सनः कित्त्वान्नलोपः। धिप्सति--धीप्सति--दिदम्भिषति। शिश्रीषति--शिश्रयिषति। 'उदोष्ठ्यपूर्वस्य' (सू २४९४)। सुस्वूर्षति--सिस्वरिषति। युयूषति--यियविषति। ऊर्णुनूषति ऊर्णुनुविषति--ऊर्णुनविषति। नच परत्वाद्गुणावादेशयोः सतोरभ्यासे उकारो न श्रूयेतेति वाच्यम्। 'द्विर्वचनेऽचि' (सू २२४३) इति सूत्रेण द्वित्वे कर्तव्ये स्थानिरूपातिदेशादादेशनिषेधाद्वा। नच सन्नन्तस्य द्वित्वं प्रति कार्यित्वान्निमित्तता कथमिति वाच्यम्। "कार्यमनुभवन्हि कार्यी निमित्ततया नाश्रीयते, न

तेनेति। धिप्सतीति॥ 'सनीवन्त' इति इडभावे इत्त्वे रूपम्। **धीप्सतीति॥** इडभावे ईत्त्वे च रूपम्। **दिदम्भिषतीति॥** इट्पक्षे सनो झलादित्वाभावादकित्त्वान्नलोपो नेति भावः। **शिश्रीषतीति॥** 'सनीवन्त' इति इडभावे अज्झनेति दीर्घः। सनः कित्त्वान्न गुणः। इट्पक्षे आह। **शिश्रयिषतीति॥** अझलादित्वान्न कित्त्वं नाप्यज्झनेति दीर्घः। स्वृधातोः सनि ऋकारस्य उत्त्वविधिं स्मारयति। **उदोष्ठ्येति। सुस्वूर्षतीति॥** सनीवन्तेति इडभावे ऋकारस्य 'अज्झन' इति दीर्घे कृते उत्त्वे रपरत्वे 'उपधायाश्च' इति दीर्घ इति भावः। **सिस्वरिषतीति॥** स्वृ इत्यस्य द्वित्वे उरदत्वे इत्वमिति भावः। **युयूषतीति॥** 'सनीवन्त' इति इडभावे 'अज्झन' इति दीर्घः। **यियविषतीति॥** इट्पक्षे 'द्विर्वचनेऽचि' इति गुणनिषेधात् यु इत्यस्य द्वित्वे 'ओः पुयण्ज्यपरे' इतीत्त्वमिति भावः। **ऊर्णुनूषतीति॥** 'सनीवन्त' इति इडभावपक्षे 'न न्द्राः' इति रेफं वर्जयित्वा नुस् इत्यस्य द्वित्वे अज्झनेति दीर्घः। 'इको झल्' इति सनः कित्त्वान्न गुणः। इट्पक्षे तु 'विभाषोर्णोः' इति सनः कित्त्वविकल्पं मत्वा आह। **ऊर्णुनुविषति-ऊर्णुनविषतीति॥** किडित्त्वपक्षे गुणाभावान्नुशब्दस्य द्वित्वे उत्तरखण्डे उवङ्। डित्त्वाभावपक्षे नु इत्यस्य द्वित्वे उत्तरखण्डस्य गुणावादेशाविति भावः। उभयत्राप्यभ्यासे उवर्णः श्रूयते। ननु किं डित्त्वाभावपक्षे ऊर्णु इस इति स्थिते द्वित्वात् प्रागेव परत्वात् गुणे अवादेशे च कृते नव्शब्दस्य अभ्यासस्यात इत्वे ऊर्णिनविषतीति अभ्यासे इकार एव श्रूयेत, नतु उकार इत्याशङ्क्य निराकरोति। **द्विर्वचनेऽचीति॥** अस्मिन् सूत्रे स्थानिवदित्यनुवर्त्य रूपातिदेशं चाश्रित्य द्वित्वनिमित्ते अचि परे यः अजादेशः सः द्वित्वे कर्तव्ये स्थानिरूपम्प्रतिपद्यते इत्येकोऽर्थः। 'न पदान्त' इत्यतो नेत्यनुवर्त्य द्वित्वनिमित्ते अचि यो अजादेशः स न स्यात् द्वित्वे कर्तव्ये इत्यन्योऽर्थः। तत्र प्रथमव्याख्याने तु तस्यापि गुणस्य स्थानिभूतोकाररूपप्रतिपत्त्या नु इत्यस्य द्वित्वे अभ्यासे उकार एव श्रूयते। द्वितीयव्याख्यानेऽपि द्वित्वात् प्राक् गुणस्य निषिद्धतया नुशब्दस्यैव द्वित्वे अभ्यासे उकार एव श्रूयते इति भावः। ननु ऊर्णु इस इति सन्नन्तस्य द्वित्वरूपकार्यभाक्तेन तदन्तर्गतस्य इस इत्यस्यापि कार्यित्वान्न द्वित्वनिमित्तत्वम्। नहि कार्यी निमित्ततया आश्रीयते इत्युक्तेः। तथाच द्वित्वे कर्तव्ये द्वित्वनिमित्ताच्परकादेशस्य क्रियमाणो निषेधः कथमिह गुणस्य प्रसज्यते इत्याशङ्क्य निराकरोति। **न च सन्नन्तेति॥ कार्यमनुभवन्निति॥** अत्र व्याख्यानमेव शरणम्।

त्वननुभवन्नपि" (प ११)। न चेह् सन् द्वित्वमनुभवति। बुभूर्षति--बिभरिषति। ज्ञपिः पुगन्तो मित्संज्ञः पकारान्तश्चौरादिकश्च इडभावे 'इको झल्' (सू २६१२) इति कित्त्वान्न गुणः। 'अज्झन—' (सू २६१४) इति दीर्घः। परत्वाण्णिलोपेन बाध्यते। 'आप्ज्ञप्—' (सू २६१९) इति ईत्। ज्ञीप्सति—जिज्ञपयिषति। अमितस्तु जिज्ञापयिषति। 'जनसन—' (सू २५०४) इत्यात्त्वम्। सिषासति—सिसनिषति। '[1]तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्यः' (वा ५०५९)।

२६२२। तनोतेर्विभाषा। (६-४-१७)

अस्योपधाया दीर्घो वा स्याज्झलादौ सनि। तितांसति—तितंसति—तित-

न चेह सन्निति ॥ किन्तु नुशब्द इत्यर्थः। **बुभूर्षतीति** ॥ सनीवन्तेति इडभावपक्षे भृ स इति स्थिते 'अज्झन' इति दीर्घे 'उदोष्ठ्यपूर्वस्य' इत्युत्त्वे रपरत्वे उत्तरखण्डस्य 'हलि च' इति दीर्घः। सनः कित्त्वान्न गुण इति भावः। इट्पक्षे आह। **बिभरिषतीति** ॥ भृ इस इति स्थिते द्वित्वे उरदत्त्वे रपरत्वे हलादिशेषे अभ्यासस्य अत इत्त्वे उत्तरखण्डस्य गुणे रपरत्वमिति भावः। ज्ञपिः पुगन्तो मित्संज्ञक इति 'सनीवन्त' इति सूत्रे गृह्यत इति शेषः। 'मारणतोषणनिशामनेषु ज्ञा' इति घटादौ ततो हेतुमण्णौ पुकि घटादित्वेन मित्त्वात् उपधाह्रस्वे ज्ञपीति ण्यन्तो गृह्यत इत्यर्थः। **पकारान्तश्चौरादिकश्चेति** ॥ 'ज्ञपमिच्च' इति यः स्वतः पकारान्तः पठितः चुरादौ न तु पुगन्तः सोऽपि 'सनीवन्त' इति सूत्रे गृह्यते इत्यर्थः। **इडभावे इति** ॥ उभयविधादपि ण्यन्तात् ज्ञपि इत्यस्मात् सनि इडभावपक्षे णेः परस्य सनः 'इको झल्' इति कित्त्वाण्णेर्गुणो नेत्यर्थः। **परत्वादिति** ॥ णेर्लोपे सति अचोऽभावान्न दीर्घ इति भावः। तथाच ज्ञीप् इत्यस्य द्वित्वे हलादिशेषे 'अत्र लोपः' इत्यभ्यासलोपे परिनिष्ठितमाह। **ज्ञीप्सतीति** ॥ इट्पक्षे आह। **जिज्ञपयिषतीति** ॥ **अमितस्त्विति** ॥ मारणादिव्यतिरिक्तार्थकस्य घाटादिकस्य हेतुमण्ण्यन्तस्य 'ज्ञा नियोगे' इति चौरादिकण्यन्तस्य च मित्त्वाभावेन उपधाह्रस्वाभावात् 'सनीवन्त' इत्यत्र ज्ञपिग्रहणेनाग्रहणान्नित्यमेव इडिति भावः। तदाह। **जिज्ञापयिषतीति** ॥ सनधातोस्सनि आह। **जनसनेत्यात्त्वमिति** ॥ नकारस्येति शेषः। **सिषासतीति** ॥ आत्त्वे कृते सा इत्यस्य द्वित्वे अभ्यासस्य ह्रस्वे अत इत्त्वे षत्वे रूपम्। नच 'स्तौतिण्योः' एवेति नियमान्न ष इति शङ्क्यम्। सनः षत्वे सत्येव तत्प्रवृत्तेः। इडभावे त्वाह। **सिसनिषतीति** ॥ अत्र 'जनसन' इत्यात्त्वन्तु न। सनो झलादित्वाभावात् 'स्तौतिण्योः' एवेति नियमान्न ष इति भावः। **तनिपतीति** ॥ प्राप्तविभाषेयम्। **तनोतेर्विभाषा** ॥ **उपधाया दीर्घः इति** ॥ 'नोपधायाः' इत्यतः 'ढ्रलोपे' इत्यतश्च तदनुवर्तते इति भावः। **झलादौ सनीति** ॥ 'अज्झन' इत्यतस्तदनुवर्तते। तत्र झलादाविति भाष्ये

---

१ इदं च 'सनीवन्त–' (सू २६१८) इति सूत्रे एव 'भरज्ञपिसनितनिपतिदरिद्राणाम्' इति केचित्पठन्तीति सूत्रशेषभूतमिति काशिका। अपरं वार्तिकमेवेति कैयटाशयः।

निषति। 'आशङ्कायां सन्वक्तव्यः' (वा १७०७) श्वा मुमूर्षति। कूलं पिपतिषति।

२६२३। सनि मीमाघुरभलभशकपतपदामच इस्। (७-४-५४)

एषामच इस्स्यात्सादौ सनि। अभ्यासलोपः। 'स्कोः—' (सू ३८०) इति सलोपः। पित्सति। दिदरिद्रिषति–दिदरिद्रासति। 'डु मिञ्' 'मीञ्' आभ्यां सन्। कृतदीर्घस्य मिनोतेरपि मीरुपाविशेषादिस्। 'सःसि—' (सू २३४२) इति तः। मित्सति। मित्सते। 'मा' माने। मित्सति। माङ्मेङोः। मित्सते। 'दोदाणोः'। दित्सति। 'देङ्'। दित्सते। 'दाञ्'। दित्सति। दित्सते। 'धेट्'। धित्सति। 'धाञ्' धित्सति–धित्सते। रिप्सते। लिप्सते। 'शक्ल्'। शिक्षति। 'शक मर्षणे' इति दिवादिः। स्वरितेत्। शिक्षति। शिक्षते। पित्सति। 'राधो हिंसायां सनीस् वाच्यः' (वा ४६३५)। रित्सति। 'हिंसायाम्' किम्। आरिरात्सति।

स्थितमिति भावः। **आशङ्कायामिति** ॥ शङ्काविषयक्रियावृत्तेर्धातोः स्वार्थे सन्नित्यर्थः। **श्वा मुमूर्षतीति** ॥ शङ्कितमरणो भवतीत्यर्थः। **कूलं पिपतिषतीति** ॥ शङ्कितपतनम्भवतीत्यर्थः। 'तनिपति' इति इट्पक्षे रूपम्। पतेस्सनि इडभावपक्षे त्वाह। **सनि मीमा॥ सादौ सनीति** ॥ 'सः सि' इत्यतः सीत्यनुवृत्तेरिति भावः। **अभ्यासलोपः इति** ॥ 'अत्र लोपः' इत्यनेनेति भावः। पिस्त् इस ति इति स्थिते आह। **स्कोरिति** ॥ दरिद्रातेस्सनि 'तनिपति' इति इड्विकल्पमुदाहरति। **दिदरिद्रिषति–दिदरिद्रासतीति। डु मिञिति** ॥ 'डु मिञ् प्रक्षेपणे' स्वादिः 'मीञ् हिंसायाम्' क्र्यादिः आभ्यां सन्नित्यर्थः। 'सनि मीमा' इत्यत्र मीग्रहणेन एतयोरुभयोर्ग्रहणमिति भावः। ननु मी इति दीर्घश्रवणात् डु मिञ् इत्यस्य हूस्वान्तस्य कथङ्ग्रहणमित्यत आह। **कृतदीर्घस्येति** ॥ डु मिञ्धातोस्सनि 'अज्झन' इति कृतदीर्घस्य तथा 'मीञ् हिंसायाम्' इति स्वतःसिद्धदीर्घस्य च मीरूपाविशेषादुभयोरपि ग्रहणमित्यर्थः। **सः सीति** ॥ उभयोरपि धात्वोः मी स इति स्थिते 'सनि मीमा' इति इसादेशे द्वित्वे 'अत्र लोपः' इत्यभ्यासलोपे 'सःसि' इति सस्य तकार इत्यर्थः। **मित्सति। मित्सते इति** ॥ प्रकृते ञित्त्वात् 'पूर्ववत्सनः' इति उभयपदित्त्वम्। **माङ्मेङोरिति** ॥ मेङः सनि 'आदेचः' इत्यात्त्वे कृते मारूपत्वाविशेषात् 'सनि मीमा' इत्यत्र उभयोरपि ग्रहणमिति भावः। **दोदाणोरिति** ॥ 'दो अवखण्डने' इति धातोस्सनि आत्त्वे कृते दारूपाविशेषात् घुत्वादुभयोर्ग्रहणमिति भावः। **दित्सतीति** ॥ 'हलन्ताच्च' इति कित्त्वान्नोपधागुणः। **देङिति** ॥ तस्यापि कृतात्त्वस्य दारूपत्वेन घुत्वादिति भावः। **दाञिति** ॥ 'डु दाञ् दाने' इति धातुरपि घुत्वात् गृह्यते इति भावः। **देङिति** ॥ अस्यापि कृतात्त्वस्य घुत्वात् 'सनि मीमा' इत्यत्र ग्रहणमिति भावः। **रिप्सते इति** ॥ रभधातोः रूपम्। **लिप्सते इति** ॥ लभधातोः रूपम्। **पित्सतीति** ॥ पत्लृधातोः रूपम्। पदधातोः पित्सते, इति रूपम्। **सनि इस् वाच्यः इति** ॥ आकारस्येति शेषः।

२६२४ । मुचोऽकर्मकस्य गुणो वा । (७-४-५७)

सादौ सनि । अभ्यासलोपः । मोक्षते--मुमुक्षते वा वत्सः स्वयमेव । 'अकर्मकस्य' किम् । मुमुक्षति वत्सं कृष्णः । 'न वृङ्भ्यश्चतुर्भ्यः' (सू २३४८) । विवृत्सति । तङि तु विवर्तिषते । 'सेऽसिचि—' (सू २५०६) इति वेट् । निनर्तिषति--निनृत्सति ।

२६२५ । इट् सनि वा । (७-२-४१)

वृङ्वृञ्भ्यामृदन्ताच्च सन इड्वा स्यात् । तितरिषति--तितरीषति--तितीर्षति । विवरिषति--विवरीषति--वुवूर्षति । 'वृङ्' । वुवूर्षते--विवरिषते । दुध्वूर्षति ।

२६२६ । स्मिपूङ्रञ्ज्वशां सनि । (७-२-७४)

'स्मिङ्' 'पूङ्' 'ऋ' 'अञ्जू' 'अश्' एभ्यः सन इट् स्यात् । सिस्मयिषते । पिपविषते । अरिरिषति । इह 'रिस्' शब्दस्य द्वित्वम् ।

रित्सतीति ॥ सनि इसादेशः । 'अत्र लोपः' इत्यभ्यासलोपः । **मुचोऽकर्मकस्य** ॥ **सादौ सनीति** ॥ शेषपूरणम् । 'सः सि' इत्यतस्सीति 'सनि मीमा' इत्यतस्सनीति चानुवृत्तेरिति भावः । 'हलन्ताच्च' इति कित्त्वाद्गुणनिषेधे प्राप्ते वचनम् । **अभ्यासलोपः इति** ॥ 'अत्र लोपः' इत्यनेनेति शेषः । **मोक्षते इति** ॥ 'अत्र लोपः' इत्यभ्यासलोपः । **ताङि त्विति** ॥ 'न वृङ्भ्यः' इत्यत्र परस्मैपदग्रहणानुवृत्तेरुक्तत्वादिति भावः । **निनृत्सतीति** ॥ इडभावपक्षे 'हलन्ताच्च' इति कित्त्वान्न गुणः । **इट् सनि वा** ॥ 'वृतो वा' इत्यतो वृत इत्यनुवर्तते इति मत्वा आह । **वृङ्वृञ्भ्यामित्यादि** ॥ 'सनि ग्रहगुहोश्च' इत्यस्यापवादः । चिकीर्षतीत्यादौ 'अज्झन' इति दीर्घे कृते सनि नेदं प्रवर्तते । 'एकाच उपदेशे' इत्यतः उपदेशे इत्यनुवर्त्य उपदेशे ऋकारान्तादिति व्याख्यानात् । **तितरिषति-तितरीषतीति** ॥ तॄधातोस्सनि लटि 'वृतो वा' इति दीर्घः । इडभावे त्वाह । **तितीर्षतीति** ॥ 'इको झल्' इति कित्त्वाद्गुणाभावे तॄ इत्यस्य ऋकारस्य इत्त्वे रपरत्वे 'हलि च' इति दीर्घ इति भावः । **विवरिषतीति** ॥ वृञ्धातोः सनि इटि 'वृतो वा' इति दीर्घविकल्पः । इडभावे त्वाह । **वुवूर्षतीति** ॥ 'उदोष्ठ्य' इत्युत्त्वे रपरत्वे 'हलि च' इति दीर्घः । **वुवूर्षते इति** ॥ ङित्त्वादात्मनेपदम् । **दुध्वूर्षतीति** ॥ 'ध्वृ कौटिल्ये' 'अज्झन' इति दीर्घः । 'उदोष्ठ्य' इत्युत्व 'हलि च' इति दीर्घ इति भावः । **स्मिपूङ्** ॥ स्मि पूङ् ऋ अञ्जू अश् एषां द्वन्द्वः । ऋकारस्य यणि रेफे रञ्ज्वेति निर्देशः । **इट् स्यादिति** ॥ 'इडत्यर्ति' इत्यतस्तदनुवृत्तेरिति भावः । पूञस्तु पुपूषतीत्येव । 'सनि ग्रह' इति इण्निषेधात् । **सिस्मयिषते इति** ॥ 'स्तौतिण्योः' एवेति नियमान्न षः । **पिपविषते इति** ॥ पूङ्धातोः पू इत्यस्य द्वित्वे 'ओः पुयण्ज्यि'

'इस्' इति सनोऽवयवः कार्यभागिति कार्यिणो निमित्तत्वायोगात्। 'द्विर्वचनेऽचि' (सू २२४३) इति न प्रवर्तते। अज्जिजिषति। अशिशिषते। 'उभौ साभ्यासस्य' (२६०६)। प्राणिणिषति। उच्छेस्तुक्। चुत्वम्। 'पूर्वत्रासिद्धीयमद्वित्वे' इति चछाभ्यां सहितस्येटो द्वित्वम्। 'हलादिः शेषः' (सू २१७९) उचिच्छिषति। निमित्तापाये नैमित्तिकापायः इतित्वनित्यम्। 'च्छ्वोः' (सू २५६१) इति सतुक्ग्रहणाज्ज्ञापकात्। प्रकृतिप्रत्यापत्तिवचनाद्वा—'।

इति इत्त्वम्। **अरिरिषतीति** ॥ ऋधातोस्सनि इटि रूपम्। **रिस्शब्दस्येति** ॥ गुणे रपरत्वे 'अजादेर्द्वितीयस्य' इति रिस्इत्यस्य द्वित्वमित्यर्थः। 'ननु द्विर्वचनेऽचि' इति निषेधाद्धातुनासम्भवात् रिस् इत्यस्य कथं द्वित्वमित्यत आह। **द्विर्वचनेऽचि इति न प्रवर्तते इति** ॥ कुत इत्यत आह। **कार्यिणो निमित्तत्वायोगादिति** ॥ 'नहि कार्यी निमित्ततया आश्रीयते' इति निषेधादिडादेः सनो द्वित्वरूपकार्यिणो न द्वित्वनिमित्तत्वमिति भावः। ननु इडागमः सन्भक्तः। ततश्च इस् इत्यस्य द्वित्वेऽपि समुदायस्य इस इत्यस्य द्वित्वकार्यित्वाभावात् द्वित्वनिमित्तत्वमित्यत आह। **इस् इतीति** ॥ इस् इति सनोऽवयवो द्वित्वभागिति कृत्वा अवयवद्वारा इस इति समुदायस्य कार्यित्वमिति भावः। **अज्जिजिषतीति** ॥ अज्जेस्सनि इटि 'न न्द्राः' इति नकारस्य निषेधात् जिस् इत्यस्य द्वित्वम्। ऊदित्त्वादिड्विकल्पे प्राप्ते नित्यमिट्। **अशिशिषते इति** ॥ 'अशू व्याप्तौ' ऊदित्त्वादिड्विकल्पे प्राप्ते नित्यमिट्। अश भोजने इति क्र्यादिस्तु नित्यं सेडेव। **उच्छेरिति** ॥ 'उच्छी विवासे'। अत्र 'छे च' इति तुगित्यर्थः। **श्चुत्वमिति** ॥ तुक इति शेषः। ननु उच्छ् इस इति स्थिते श्चुत्वस्यासिद्धत्वात्तकारसहितस्य द्वित्वे अभ्यासे तकारः श्रूयेत इत्यत आह। **पूर्वत्रेत्यादि** ॥ **हलादिः शेषः इति** ॥ च्छिस् इत्यस्य द्वित्वे हलादिशेषादभ्यासे छकारसकारयोर्निवृत्तौ तुकश्चकारः इकारश्च शिष्यते इत्यर्थः। तदाह। **उचिच्छिषतीति** ॥ उत्तरखण्डे छकारे परे इकारस्य तुकश्चुत्वेन चकारः। ननु च्छिस् इत्यस्य द्वित्वे हलादिशेषात्पूर्वखण्डे छकारसकारयोर्निवृत्तौ "निमित्तापाये नैमित्तिकस्याप्यपायः" इति न्यायेन तुकोऽपि निवृत्तेस्तदादेशचकारस्य कथमभ्यासे श्रवणमित्यत आह। **निमित्तापाये इति** ॥ कथमनित्यत्वमित्यत आह। **च्छ्वोरिति** ॥ पृष्टः, पृष्टवानित्यादौ प्रच्छेः चकारस्य 'च्छ्वोः' इति शकारे ष्ट्वादिना शस्य षत्वे तुक्चकारस्य श्रवणप्राप्तौ तन्निवृत्त्यर्थं सतुक्ग्रहणम्। तत्र चकारस्य शकारे सति निमित्ताभावादेव तुकोऽपि निवृत्तिसिद्धेस्सतुक्ग्रहणं व्यर्थमापद्यमानं 'निमित्तापाये' इत्यस्यानित्यतां ज्ञापयतीत्यर्थः। **प्रकृतिप्रत्यापत्तिवचनाद्वेति** ॥ 'हनश्च वधः' इति हनधातोरप्प्रत्यये प्रकृतेर्वधादेशे वधशब्दः। कंसवधमाचष्टे कंसङ्घातयतीत्यादौ 'आख्यानात्कृतस्तदाचष्टे कृल्लुक्प्रकृतिप्रत्यापत्तिः' इति अप्प्रत्ययस्य लुकि प्रकृतेर्वधादेशनिवृत्तिर्विहिता। तत्र कृतो लुकि निमित्तापायादेव वधाद्यादेशनिवृत्तिसिद्धेः प्रकृतिप्रत्यापत्तिवचनं व्यर्थमापद्यमानं 'निमित्तापाये' इत्यस्य अनित्यतां ज्ञापयतीत्यर्थः। यद्यप्यत्र वधशब्दे अप्प्रत्ययः वधादेशश्च युगपद्विहितः, ननु प्रत्यये परे।

'णौ च संश्चङोः' (सू २५७९) (सू २६०१) इति सूत्राभ्यामिङो गाङ्, श्वयतेः सम्प्रसारणं च वा। अधिजिगापयिषति—अध्यापिपयिषति। शिश्वाययिषति—शुशावयिषति। 'ह्वः सम्प्रसारणम्' (सू २५८६)। जुहावयिषति। 'णौ द्वित्वात्प्रागच आदेशो न' इत्युक्तत्वादुकारस्य द्वित्वम्। पुस्फारयिषति। चुक्षावयिषति। 'ओः पुयण्ज्यपरे' (२५७७)। पिपावयिषति। यियावयिषति। बिभावयिषति। रिरावयिषति। लिलावयिषति। जिजावयिषति। 'पुयण्जि'

तथापि सन्नियोगशिष्टत्वात् प्रत्ययस्य निमित्तत्वं पर्यवसानगत्येति बोध्यम्। वस्तुतस्तु पुष्ययोगं जानाति पुष्येण योजयतीत्येतत्साधके पुष्ययोगेति वचने भाष्योक्तप्रकृतिप्रत्यापत्तिरित्यनुवृत्तिरिह ज्ञापिका। तत्र हि 'चजोः' इति धिति परतः कुत्वम्। अन्यथा कृल्लुकि निमित्तापायपरिभाषयैव कुत्वनिवृत्तौ किं प्रकृतिप्रत्यापत्त्यनुवृत्त्येति शब्देन्दुशेखरे विस्तरः। अथ 'इङ् अध्ययने' 'टु ओ श्वि गतिवृद्ध्योः' इत्याभ्यां ण्यन्ताभ्यां सनि विशेषमाह। **णौ चेति** ॥ 'णौ च संश्चङोः' इति सूत्रं द्वितीयस्य चतुर्थे पादे षष्ठस्य प्रथमे पादे च स्थितम्। सन्परे चङ्परे च णौ इङो गाङ्ङेति प्रथमस्यार्थः। सन्परे चङ्परे च णौ श्वयतेः सम्प्रसारणं वेति द्वितीयस्यार्थः। प्रथमसूत्रेण इङो गाङ्, द्वितीयसूत्रेण श्वयतेस्सम्प्रसारणमित्युभयमपि पाक्षिकं भवतीत्यर्थः। **अधिजिगापयिषतीति** ॥ इङो णौ विवक्षिते गाङि पुकि गापि इत्यस्मात्सनि रूपम्। 'णौ च संश्चङोः' इति गाङ्विधौ विषयसप्तमीति प्रागेवोक्तम्। गाङभावे आह। **अध्यापिपयिषतीति** ॥ 'क्ङिज्ञीनां णौ' इत्यात्त्वे पुक्। **शिश्वाययिषतीति** ॥ श्विधातोर्णौ वृद्ध्यावायादेशे श्वायि इत्यस्मात्सनि सम्प्रसारणाभावे रूपम्। सम्प्रसारणपक्षे आह। **शुशावयिषतीति** ॥ ण्यन्तात्सनि इटि श्वि इ इस इति स्थिते "सम्प्रसारणन्तदाश्रयञ्च कार्यम्बलवत्" इति वचनात्प्रथमं सम्प्रसारणं पूर्वरूपम्। शु इत्यस्य द्वित्वे उत्तरखण्डे उकारस्य वृद्ध्यावादेशे णिचो गुणायादेशाविति भावः। **ह्वः सम्प्रसारणमिति** ॥ हेतुमण्ण्यन्तप्रक्रियायां व्याख्यातम्। **जुहावयिषतीति** ॥ ह्वेञो ण्यन्तात्सनि इटि प्रथमं सम्प्रसारणं पूर्वरूपम्। हु इत्यस्य द्वित्वम्। उकारस्य वृद्ध्यावादेशौ णिचो गुणायादेशाविति भावः। ननु परत्वात् द्वित्वात् प्रागेव उकारस्य वृद्ध्यावादेशयोः कृतयोः हाव् इत्यस्य द्वित्वे अभ्यासस्यात इत्त्वे इकार एव श्रूयेतेत्यत आह। **णौ द्वित्वादिति** ॥ **पुस्फारयिषतीति** ॥ स्फुरतेः ण्यन्तात्सनि इटि 'चिस्फुरोर्णौ' इत्यस्मात् प्रागेव स्फुर् इत्यस्य द्वित्वम्। द्वित्वे कार्ये णावच आदेशस्य निषेधात्। 'ओः पुयण्जि' इति इत्त्वन्तु न। फकारस्य सकारेण व्यवहिततया पवर्गपरत्वाभावात्। **चुक्षावयिषतीति** ॥ क्षुधातोः ण्यन्तात् सनि इटि क्षु इत्यस्य द्वित्वम्। परिनिष्ठिते रूपे अवर्णपरत्वेन णावच आदेशस्य निषेधादिति भावः। **ओः पुयणिति** ॥ हेतुमण्णिच्प्रक्रियायामिदं व्याख्यातमपि स्मार्यते। **पिपावयिषतीत्यादि** ॥ पू भू यु रु लू जु एभ्यो ण्यन्तेभ्यः सनि इटि द्वित्वे कार्ये णावच आदेशनिषेधात् उवर्णान्तानामेव द्वित्वे अभ्यासोवर्णस्य इत्त्वमिति भावः। जुः सौत्रो धातुः। 'जुचङ्क्रम्य' इत्यत्रोक्तः। अथ 'स्रवतिश्रृणोति' इति सूत्रं हेतुमुण्णिच्प्रक्रियायां व्याख्यातं

इति किम्। नुनावयिषति। 'अपरे' किम्। बुभूषति। 'स्रवति—' (२५७८) इतीत्त्वं वा। सिस्रावयिषति। सुस्रावयिषतीत्यादि। 'अपरे' इत्येव। शुश्रूषते।

२६२७। स्तौतिण्योरेव षण्यभ्यासात्। (८-३-६१)

अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात्षभूते सनि नान्यत्र। तुष्टूषति। 'द्युतिस्वाप्योः—' (सू २३४४) इत्युत्त्वम्। सुष्वापयिषति। सिषाधयिषति। 'स्तौतिण्योः' किम्। सिसिक्षति। उपसर्गात्तु 'स्थादिष्वभ्यासेन च—' (सू २२७७) इति षत्वम्। परिषिषिक्षति। 'षणि' किम्।

स्मारयति। **स्रवतीतीत्त्वं वेति**॥ **शुश्रूषते इति**॥ 'ज्ञाश्रुस्मृदृशां सनः' इत्यात्मनेपदम्। **स्तौतिण्योरेव**॥ षणीति कृतषत्वस्य सनो ग्रहणम्। 'अपदान्तस्य मूर्धन्यः' इत्यधिकृतम् 'इण्कोः' इति च। तत्र कुग्रहणन्निवर्तते असम्भवात्। णिग्रहणेन तदन्तग्रहणम्। 'सहेः साढः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते। तदाह। **अभ्यासेणः इत्यादि। षभूते इति**॥ षकारं प्राप्ते सनीत्यर्थः। **नान्यत्रेति**॥ अभ्यासेणः परस्य चेत्सस्य षत्वं तर्हि स्तौतिण्यन्तयोरेवेत्यर्थः। नच 'आदेशप्रत्यययोः' इत्येव सिद्धे आरम्भसामर्थ्यादेव नियमलाभात् एवकारो व्यर्थ इति शङ्क्यम्। षण्येवेति नियमनिरसनार्थत्वात्। षण्येवेति नियमे सति तुष्टावेत्यत्र षत्वानापत्तेः। स्तौतेरुदाहरति। **तुष्टूषतीति**॥ 'अज्झन' इति दीर्घः। ण्यन्तस्योदाहरिष्यन्नाह। **द्युतीति**॥ **उत्त्वमिति**॥ वकारस्य सम्प्रसारणमुकार इत्यर्थः। **सुष्वापयिषतीति**॥ स्वपेर्णौ उपधावृद्धौ स्वापि इत्यस्मात् सनि इटि वकारस्य सम्प्रसारणे पूर्वरूपे सुप् इत्यस्य द्वित्वे णेर्गुणे अयादेशे सनः षत्वे अभ्यासेणः परस्य षत्वमिति भावः। **सिषाधयिषतीति**॥ अत्रापि ण्यन्तत्वादभ्यासेणः परस्य सस्य षत्वमिति भावः। **सिसिक्षतीति**॥ सेक्तुमिच्छतीत्यर्थः। सिचधातोः सन् 'हलन्ताच्च' इति कित्त्वान्न लघूपधगुणः। अभ्यासेणः परस्य सस्य चेत् षत्वं तर्हि 'स्तौतिण्योः' एवेति नियमान्न ष इति भावः। ननु परिषिषिक्षतीत्यत्र अभ्यासेणः परस्य सस्य कथं षत्वं 'स्तौतिण्योः' एवेति नियमात् 'स्थादिष्वभ्यासेन च' इति षत्वस्याप्यनेन नियमेन निवृत्तेरित्यत आह। **उपसर्गात्त्विति**॥ 'स्तौतिण्योरेव' इति नियमेन मध्येऽपवादन्यायबलात् 'आदेशप्रत्यययोः' इति षत्वमेव बाध्यत इति भावः। **षणि किमिति**॥ कृतषत्वनिर्देशः किमर्थ इति प्रश्नः। **तिष्ठासतीति**॥ 'धात्वादेः' इति षस्य सत्त्वे स्था इत्यस्य द्वित्वे अभ्यासह्रस्वे इत्त्वे 'आदेशप्रत्यययोः' इति षत्वम्। कृतषत्वे सन्येवायं नियमः। अत्र तु सनः षत्वाभावेन नियमाप्रवृत्तेः षत्वं निर्बाधमिति भावः। **सुषुप्सतीति**॥ स्वप्धातोः सनि 'रुदविदमुषग्रहिस्वपि' इति कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणे कृते द्वित्वम्। कित्त्वान्न लघूपधगुणः। इहापि 'स्तौतिण्योः' एवेति नियमो न भवति। सनष्षत्वाभावादिति भावः। ननु षणि इणः परस्य सस्य चेत् षत्वं तर्हि 'स्तौतिण्योः' एवेत्येतावदेवास्तु। अभ्यासादिति किमर्थमित्यत आह।

तिष्ठासति । सुषुप्सति । अभ्यासादित्युक्तेर्नेह निषेधः । इण् । प्रतीषिषति । इक् । अधीषिषति ।

२६२८ । सः स्विदिस्वदिसहीनां च । (८-३-६२)

अभ्यासेणः परस्य ण्यन्तानामेषां सस्य स एव न षः षणि परे । सिस्वेदयिषति–सिस्वादयिषति । सिसाहयिषति । 'स्थादिष्वेवाभ्यासस्य' इति नियमान्नेह । अभिसुसूषति ।

'शौषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः ।
सरूपप्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते ॥' (भाष्यम्)

शैषिकाच्छैषिकः सरूपो न । तेन शालीये भव इति वाक्यमेव, न तु छान्ताच्छः । 'सरूपः' किम् । अहिच्छत्त्वे भव आहिच्छत्रः । आहिच्छत्त्रे भव आहिच्छत्त्रीयः । अण्णन्ताच्छः । तथा मत्वर्थात्सरूपः स न । धनवानस्यास्ति । इह मतुबन्तान्मतुञ्न । विरूपस्तु स्यादेव । दण्डिमती शाला । 'सरूपः'

अभ्यासादित्युक्तेर्नेहेति ॥ **प्रतीषिषतीति** ॥ इण्धातोस्सनि 'अजादेर्द्वितीयस्य' इति स इत्यस्य द्वित्वे अभ्यासेत्त्वम् । इह षभूते सनि 'इण् गतौ' इति धातोः परस्य सस्य षत्वं भवत्येव । अभ्यासेणः परत्वे सत्येव नियमप्रवृत्तेरिति भावः । अधीषिषतीत्यप्येवम् । **सः स्विदि** ॥ सः स्विदीति छेदः । 'स्तौतिण्योरेव षण्यभ्यासात्' इति सूत्रं स्तौतिवर्जमनुवर्तते । 'सहेः साढः सः' इत्यतस्स इति षष्ठ्यन्तञ्च । तदाह । **अभ्यासेणः इति** ॥ सकारविधिर्नियमार्थः इत्याह । **सस्य स एवेति** ॥ सुनोतेस्सनि 'स्तौतिण्योः' एवेति नियमादुत्तरखण्डस्य षत्वाभावे अभिसुसूषतीत्यत्र 'उपसर्गात्सुनोति' इत्यभ्यासस्य षत्वमाशङ्क्य आह । **स्थादिष्वेवेति** ॥ **शैषिकादिति** ॥ सन्विधायकसूत्रस्थमिदं वार्तिकम् । शैषिकात्सरूपः शैषिकः प्रत्ययो न । मतुबर्थीयात् सरूपो मतुबर्थिकः प्रत्ययो नेत्यन्वयः । शेषाधिकारे विहितः शैषिकः । भवार्थे अध्यात्मादित्वाट्ठञ् । मतुबर्थे भवो मतुबर्थीयः गहादित्वाच्छः । मतुबर्थोऽस्यास्तीति मतुबर्थिकः । 'अत इनिठनौ' इति ठन् । **शालीये इति** ॥ शालायां भवः शालीयः । 'वृद्धाच्छः' शालीये भव इत्यर्थे शालीयशब्दात् पुनः छो नेत्यर्थः । **आहिच्छत्त्रे भवः इति** ॥ आहिच्छत्त्रशब्दो भवार्थे अणन्तः । ततो भवार्थे 'वृद्धाच्छः' इति छ एव भवति । नतु पुनराणीति भावः । ननु जुगुप्सिषते इत्यादौ कथं सन्नन्तात् सन्नित्यत आह । **सरूपः इत्यनुषज्यते इति** ॥ सन्नन्तान्न सनिष्यते इत्यत्रापि सरूप इत्यनुषज्यते इत्यर्थः । नन्वेव-

इत्यनुषज्यते। अर्थद्वारा सादृश्यं तस्यार्थः। तेन इच्छासन्नन्तात्सन्न। स्वार्थसन्नन्तात्तु स्यादेव। जुगुप्सिषते। मीमांसिषते।

इति तिङन्तसन्प्रकरणम्।



। श्रीरस्तु ।

॥ अथ तिङन्तयङ्प्रकरणम् ॥



२६२९। धातोरेकाचो हलादेः क्रियासमभिहारे यङ्। (३-१-२२)

पौनःपुन्यं भृशार्थश्च क्रियासमभिहारः तस्मिन्द्योत्ये यङ् स्यात्।

२६३०। गुणो यङ्लुकोः। (७-४-८२)

अभ्यासस्य गुणः स्याद्यङि यङ्लुकि च। 'सनाद्यन्ताः—' (सू २६०४) इति धातुत्वाल्लडादयः। ङिदन्तत्वादात्मनेपदम्। पुनः पुनरतिशयेन वा भवति बोभूयते। बोभूयांचक्रे। अबोभूयिष्ट। 'धातोः' किम्।

मपि जुगुप्सिषते इत्यत्र सरूपस्य सनः कथं प्रवृत्तिरित्यत आह। **अर्थद्वारेति** ॥ शब्दस्वरूपतो वैरूप्यस्य सम्भवादर्थद्वारकमेव सारूप्यं विवक्षितामिति भावः। **तेनेति** ॥ इच्छासन्नन्तादिच्छासन्नेति लभ्यते इत्यर्थः। **स्वार्थेति** ॥ स्वार्थसन्नन्तात्तु इच्छासन् भवत्येवेत्यर्थः ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां सन्नन्तनिरूपणं समाप्तम्।

अथ यङ्प्रक्रियाः निरूप्यन्ते। **धातोरेकाचो** ॥ **तस्मिन्द्योत्ये इति** ॥ वाच्यत्वे तु प्रत्ययवाच्यस्य प्रधानतया सन्नन्ते इच्छाया इव तस्य विशेष्यत्वं स्यादिति भावः। **गुणो यङ्लुकोः** ॥ यङ् च लुक्च इति द्वन्द्वात् सप्तमी। लुगिह यङ एव विवक्षितः उपस्थितत्वात्। 'अत्र लोपः' इत्यतः अभ्यासस्येत्यनुवर्तते। तदाह। **अभ्यासस्येति** ॥ इक्परिभाषया इगन्तस्येति लभ्यते। **बोभूयते इति** ॥ 'सन्यङोः' इति द्वित्वम्। यङो द्वित्वादूकारस्य न गुणः। बोभूय इत्यस्माल्लटि तिपि शपि पररूपम्। 'क्रियासमभिहारे द्वे वाच्ये' इति पुनर्द्वित्वन्तु न। तस्य 'क्रियासमभि-

आर्धधातुकत्वं यथा स्यात् । तेन 'ब्रुवो वचिः' (सू २४५३) इत्यादि । 'एकाचः' किम् । पुनःपुनर्जागर्ति । 'हलादेः' किम् । भृशमीक्षते । भृशं शोभते रोचते इत्यत्र यङ् नेति भाष्यम् । पौनःपुन्ये तु स्यादेव । रोरुच्यते । शोशुभ्यते । 'सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्यः' (वा १७५१) । आद्यान्त्रयश्चुरादावदन्ताः । सोसूच्यते । सोसूत्र्यते । अनेकाच्कत्वेनाषोपदेशत्वात्षत्वं न । मोमूत्र्यते ।

२६३१ । यस्य हलः । (६-४-४९)

'यस्य' इति सङ्गातग्रहणम् । हलः परस्य यशब्दस्य लोपः स्यादा-

हारे' इति विहितलोडन्तमात्रविषयत्वात् । अत एव 'क्रियासमभिहारे लोट्' इति सूत्रभाष्ये "क्रियासमभिहारे लोण्मध्यमपुरुषैकवचनस्य द्वे वाच्ये" इत्येव पठितम् । पौनःपुन्ये यङि तु 'नित्यवीप्सयोः' इति न द्वित्वम् । 'क्रियासमभिहारे द्वे' इत्यनेन पौनःपुन्येऽपि लोडन्तद्वित्वविधानेन पौनःपुन्यस्य अन्यतो लाभे सौत्रद्वित्वाप्रवृत्तेर्ज्ञापनादित्यलम् । **धातोः किमिति** ॥ 'क्रियासमभिहारे' इत्यनेनैव धातोर्लाभात्किमर्थं धातुग्रहणमिति प्रश्नः । **आर्धधातुकत्वमिति** ॥ धातोरित्यभावे आर्धधातुकत्वन्न स्यात् । धातोरिति विहितप्रत्ययस्यैव आर्धधातुकत्वादिति भावः । **ब्रुवः इति** ॥ यङः आर्धधातुकत्वे सत्येव तस्मिन् परे 'ब्रुवो वचिः' 'वेञो वयिः' इत्यादि कार्यं सिद्ध्यति । अन्यथा 'आर्धधातुके' इत्यधिकृत्य तद्विधानान्न स्यादिति भावः । **भृशमीक्षते इति** ॥ नच भृशशब्देनैवात्र भृशार्थभानात् यङ् न भविष्यतीति वाच्यम् । भृशत्वं हि यङ्द्योत्यम्, नतु वाच्यम् । द्योतनञ्च उक्तस्यापि सम्भवतीति भावः । **यङ् नेति** ॥ अनभिधानादिति भाष्ये स्पष्टम् । **पौनःपुन्ये त्विति** ॥ पुनःपुनश्शब्दसमभिहारेऽपि यङस्त्येव । भृशार्थ एवानभिधानोक्तेरिति भावः । **सूचिसूत्रीति** ॥ सूचि सूत्रि मूत्रि अटि अर्ति अशू ऊर्णोति एषान्द्वन्द्वः । 'सूच पैशुन्ये, सूत्र वेष्टने, मूत्र प्रस्रवणे' एते त्रयश्चुराद्यन्तर्गणे कथादावदन्ताः । तेषामनेकाच्त्वादप्राप्तौ यङ्वचनमित्याह । **आद्यान्त्रयः इति** ॥ 'अट गतौ, ऋ गतौ, अश भोजने, अशू व्याप्तौ' एषां हलादित्वाभावाद्वचनम् । ऊर्णुञस्तु हलादित्वाभावादेकाच्त्वाभावाच्च वचनम् । **सोसूच्यते इति** ॥ ण्यन्ताद्यङि णिलोपे द्वित्वे 'गुणो यङ्लुकोः' इति अभ्यासगुणः । सूचेः षोपदेशत्वभ्रमं वारयति । **अनेकाच्कत्वेनेति** ॥ षोपदेशत्वे तु 'धात्वादेः' इति षस्य सत्वे कृते आदेशसकारत्वादुत्तरखण्डस्य षत्वं स्यादिति भावः । लिटि सोसूचि आमिति स्थिते । **यस्य हलः** ॥ यकारादकारस्य उच्चारणार्थत्वभ्रमं वारयति । **सङ्गातग्रहणमिति** ॥ यकाराकारसमुदायस्येत्यर्थः । हलः इति पञ्चमी । 'आर्धधातुके' इत्यधिकृतम् । 'अतो लोपः' इत्यस्मात् लोप इत्यनुवर्तते । तदाह । **हलः परस्येत्यादिना** ॥ नतु 'अलोऽन्त्यस्य' इति यकारादकारस्य लोपः स्यादित्यत आह ।

र्धधातुके। 'आदेः परस्य' (सू ४४)। 'अतो लोपः' (सू २६०८)। सोसूचांचक्रे। सोसूचिता। सोसूत्रिता। मोमूत्रिता।

२६३२। दीर्घोऽकितः। (७-४-८३)

अकितोऽभ्यासस्य दीर्घः स्याद्यङि यङ्लुकि च। अटाट्यते।

२६३३। यङि च। (७-४-३०)

अर्तेः संयोगादेश्च ऋतो गुणः स्याद्यङि यङ्लुकि च। यकारपररेफस्य न द्वित्वनिषेधः। 'अरार्यते' इति भाष्योदाहणात्। अरारिता। अशाशिता। ऊर्णोनूयते। बेभिद्यते। अलोपस्य स्थानिवत्त्वान्नोपधागुणः। बेभिदिता।

२६३४। नित्यं कौटिल्ये गतौ। (३-१-२३)

गत्यर्थात्कौटिल्य एव यङ् स्यान्न तु क्रियासमभिहारे। कुटिलं व्रजति वाव्रज्यते।

आदेः परस्येति ॥ 'अलोऽन्त्यस्य' इत्स्यायमपवाद इति भावः। **अतो लोपः इति** ॥ यकाराकारसङ्घाते यकारस्य लोपे सति परिशिष्टस्याकारस्य 'अतो लोपः' इत्यर्थः। ननु मास्तु सङ्घातग्रहणम्। यकारस्यैवात्र लोपो विधीयताम्। अतो लोपे सति इष्टसिद्धिरिति चेन्न। ईर्ष्यधातोस्तृचि इटि ईर्ष्यितेत्यत्र यकारलोपनिवृत्त्यर्थत्वादित्यलम्। अटधातोः यङि 'अजादेर्द्वितीयस्य' इति व्य इत्यस्य द्वित्वे हलादिशेषेण अभ्यासे यकारनिवृत्तौ अटट्यते इति स्थिते। **दीर्घोऽकितः** ॥ **अभ्यासस्येति** ॥ 'अत्र लोपोऽभ्यासस्य' इत्यतस्तदनुवृत्तेरिति भावः। **यङि यङ्लुकि चेति** ॥ 'गुणो यङ्लुकोः' इत्यतस्तदनुवृत्तेरिति भावः। अकित इत्यस्य तु यंयम्यते इत्यादौ प्रयोजनं वक्ष्यते। ऋधातोर्यङि कृते ङित्त्वाद्गुणनिषेधे प्राप्ते। **यङि च** ॥ 'गुणोऽर्तिसंयोगाद्योः' इति सूत्रमनुवर्तते। 'रीङ् ऋतः' इत्यस्मात् ऋत इति च। तदाह। **अर्तेरित्यादि** ॥ तथाच ऋ य इति स्थिते ऋकारस्य गुणे अकारे रपरत्वे अर् य इति स्थिते 'न न्द्राः' इति रेफस्य द्वित्वनिषेधे य इत्यस्य द्वित्वे 'दीर्घोऽकितः' इत्यभ्यासदीर्घे अर्यायते इति प्राप्ते आह। **यकारपररेफस्येति** ॥ **भाष्योदाहरणादिति** ॥ 'धातोरेकाचः' इति सूत्रे इति शेषः। **अरारितेति** ॥ 'यस्य हलः' इति यकारलोपः। **अशाशितेति** ॥ अशधातोर्यङि श्य इत्यस्य द्वित्वे हलादिशेषेण अभ्यासे यकारनिवृत्तौ 'दीर्घोऽकितः' इति दीर्घे 'यस्य हलः' इति यकारलोपः। **ऊर्णोनूयते इति** ॥ ऊर्णु य इति स्थिते 'न न्द्राः' इति नु इत्यस्य द्वित्वे हलादिशेषे अभ्यासदीर्घः। **बेभिद्यते इति** ॥ भिद् य इति स्थिते भिद् इत्यस्य द्वित्वे हलादिशेषे अभ्यासगुणः। ननु बेभिद्य इति यङन्तात्लुटि तासि इटि यलोपे अतो लोपे बेभिदितेत्यत्र तासि परे लघूपधगुणः स्यादित्यत आह। **अलोपस्य स्थानिवत्त्वादिति** ॥ **नित्यं कौटिल्ये गतौ** ॥ नित्यशब्दः एवार्थे। कौटिल्ये इत्यस्योपरि द्रष्टव्यः। 'धातोरेकाचः' इत्यतो यङित्यनुवर्तते। तदाह। **गत्यर्थात्कौटिल्य एवेति** ॥ गत्यर्थवृत्तेर्धातोः

२६३५ । लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् । (३-१-२४)

एभ्यो धात्वर्थगर्हायामेव यङ् स्यात् । गर्हितं लुम्पति लोलुप्यते । सासद्यते ।

२६३६ । चरफलोश्च । (७-४-८७)

अनयोरभ्यासस्यातो नुक् स्याद्यङ्यङ्लुकोः । 'नुक्' इत्यनेनानुस्वारो लक्ष्यते । 'स च पदान्तवद्वाच्यः' (वा ४६६१) 'वा पदान्तस्य' (सू १२५) इति यथा स्यात् ।

२६३७ । उत्परस्यातः । (७-४-८८)

चरफलोरभ्यासात्परस्यात उत्स्याद्यङ्यङ्लुकोः । 'हलि च' (सू ६५४) इति दीर्घः । चञ्चूर्यते—चंचूर्यते । पम्फुल्यते—पंफुल्यते ।

२६३८ । जपजभदहदशभञ्जपशां च । (७-४-८६)

कौटिल्ये द्योत्य एव यङित्यर्थः । एवशब्दस्य व्यवच्छेद्यमाह । **न तु क्रियासमभिहारे इति** ॥ शब्देन्दुशेखरे तु गत्यर्थेभ्यः क्रियासमभिहारे यङस्त्येवेति प्रपञ्चितम् । **लुपसद** ॥ लुप सद चर जप जभ दह दश गृ एषान्द्वन्द्वः । यङित्यनुवर्तते । भावः धात्वर्थः । तद्गता गर्हा भावगर्हा । नित्यमित्यनुवृत्तम् एवकारार्थकम् । तदाह । **एभ्यः इत्यादि** ॥ **चरफलोश्च** ॥ 'अत्र लोपः' इत्यस्मादभ्यासस्येत्यनुवर्तते । 'नुगतोऽनुनासिकान्तस्य' इत्यस्मात् अतो नुगिति । 'गुणो यङ्लुकोः' इत्यस्मात् यङ्लुकोरिति च तदाह । **अनयोरित्यादि** ॥ नुकि ककार इत् उकार उच्चारणार्थः । **लक्ष्यते इति** ॥ 'नुगतोऽनुनासिकान्तस्य' इति पूर्वसूत्रे यंयम्यते, रंरम्यते, इत्यादौ अनुस्वारश्रवणार्थं नुगित्यनुस्वारोपलक्षणमाश्रयणीयम् । अन्यथा झल्परत्वाभावात् 'नश्च' इत्यनुस्वारासम्भवान्नकार एव श्रूयेतेत्युक्तं भाष्ये । तस्यैवेहानुवृत्तेरनुस्वारोपलक्षणार्थत्वमिति भावः । **पदान्तवदिति** ॥ 'नुगतोऽनुनासिकान्तस्य' इति पूर्वसूत्रस्थमिदं वार्तिकमत्राप्यनुवर्तते इति भावः । **उत्परस्यातः** ॥ 'अत्र लोपः' इत्यस्मादभ्यासस्येत्यनुवृत्तं परशब्दयोगात् पञ्चम्या विपरिणम्यते । 'गुणो यङ्लुकोः' इत्यतः यङ्लुकोरिति 'चरफलोः' इति चानुवर्तते । तदाह । **चरफलोरित्यादि । दीर्घः इति** ॥ उकारस्येति शेषः । **चञ्चूर्यते इति** ॥ गर्हितञ्चरतीत्यर्थः । यङि द्वित्वे हलादिशेषे अभ्यासाकारादुपरि अनुस्वारागमे 'वा पदान्तस्य' इति तस्य परसवर्णे ञकारे उत्तरखण्डे अकारस्य उत्त्वे तस्य दीर्घः । परसवर्णाभावपक्षे त्वाह । **चंचूर्यते इति** ॥ **पम्फुल्यते इति** ॥ अत्र अनुस्वारस्य मकारः परसवर्णः । **जपजभ** ॥ 'चरफलोश्च' इत्यत्र यदनुवृत्तं तत्सर्वमिहाप्यनुवर्तते । तदाह ।

एषामभ्यासस्य नुक् स्याद्यङ्यङ्लुकोः । गर्हितं जपति जञ्जप्यते इत्यादि ।

२६३९ । ग्रो यङि । (८-२-२०)

गिरतेः रेफस्य लत्वं स्याद्यङि । गर्हितं गिलति जेगिल्यते । 'घुमास्था—' (सू २४६२) । इतीत्त्वम् । गुणः । देदीयते । पेपीयते । सेषीयते । 'विभाषा श्वेः' (सू २४२०) । शोशूयते । शेश्वीयते । 'यङि च' (सू २६३३) । सास्मर्यते । 'रीङृतः' (सू १२३४) । चेक्रीयते । सुट् । सञ्चेस्क्रीयते ।

२६४० । सिचो यङि । (८-३-११२)

सिचः सस्य षो न स्याद्यङि । निसेसिच्यते ।

२६४१ । न कवतेर्यङि । (७-४-६३)

कवतेरभ्यासस्य चुत्वं न स्याद्यङि । कोकूयते । कौतिकुवत्योस्तु चोकूयते ।

एषामिति ॥ **इत्यादीति** ॥ जञ्जभ्यते । दन्दह्यते । दन्दश्यते । बम्भज्यते । पसधातुर्दन्त्यान्तः सौत्रो गत्यर्थ इति माधवः । तालव्यान्त इति काशिका । **ग्रो यङि** ॥ गृ इत्यस्य ग्रः इति षष्ठ्येकवचनम् । 'कृपो रो लः' इत्यतः रो लः इत्यनुवर्तते । तदाह । **गिरतेरित्यादि** ॥ दा पा स्था एभ्यो यङि विशेषमाह । **घुमास्थेत्यादि** ॥ **शोशूयते इति** ॥ श्विधातोर्यङि 'सम्प्रसारणन्तदाश्रयञ्च कार्यम्बलवत्' इति वचनात् सम्प्रसारणे पूर्वरूपे शु इत्यस्य द्वित्वम् 'अकृत्सार्वधातुकयोः' इति दीर्घः । **सास्मर्यते इति** ॥ स्मृ य इति स्थिते संयोगादित्वात् 'यङि च' इति परत्वाद्गुणे रपरत्वे द्वित्वे 'दीर्घोऽकितः' इत्यभ्यासदीर्घः । **चेक्रीयते इति** ॥ कृ य इति स्थिते परत्वात् ऋकारस्य रीङादेशे क्री इत्यस्य द्वित्वे अभ्यासगुणः । **सुडिति** ॥ 'संपरिभ्यां करोतौ भूषणे' 'समवाये च' इत्यनेनेति शेषः । **सिचो यङि** ॥ 'सहेः साडः सः' इत्यतस्स इति षष्ठ्यन्तमनुवर्तते । 'मूर्धन्यः' इत्याधिकृतं 'न रपरसृपि' इत्यतः नेत्यनुवर्तते । तदाह । **सिचः इति । निसेसिच्यते इति** ॥ 'उपसर्गात्सुनोति' इति 'स्थादिष्वभ्यासेन' इति च षत्वमनेन निषिध्यते । **न कवतेर्यङि** ॥ 'अत्र लोपः' इत्यतः अभ्यासस्येति 'कुहोश्चुः' इत्यतः चुरिति चानुवर्तते इति मत्वा आह । **कवतेरभ्यासस्येति** ॥ ननु कोर्यङि इत्येव सिद्धे इतिपा निर्देशो व्यर्थ इत्यत आह । **कौतिकुवत्योस्त्विति** ॥ शपा निर्देशार्थं कवतिग्रहणम् । तेन 'कु शब्दे' इति लुग्विकरणस्य 'कुङ् शब्दे' इति शविकरणस्य च ग्रहणन्न लभ्यते इति भावः । नच कोरित्युक्तेऽपि दीर्घान्तस्य शविकरणस्य न ग्रहणप्रसक्तिरिति शङ्क्यम् । तुदादौ 'कुङ् शब्दे' इति ह्रस्वान्तपाठस्य न्यास-

२६४२ । नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् । (७-४-८४)

एषामभ्यासस्य नीगागमः स्याद्यङ्यङ्लुकोः । 'अकितः' इत्युक्तेर्न दीर्घः । नलोपः । वनीवच्यते । सनीस्रस्यते इत्यादि ।

२६४६ । नुगतोऽनुनासिकान्तस्य । (७-४-८५)

अनुनासिकान्तस्याङ्गस्य योऽभ्यासोऽदन्तस्तस्य नुक् स्यात् । नुका अनुस्वारो लक्ष्यते इत्युक्तम् । यय्यँम्यते—यंयम्यते । तपरत्वसामर्थ्याद्भूतपूर्वदीर्घस्यापि न । 'भाम' क्रोधे । बाभाम्यते । 'ये विभाषा' (२३१९) । जाजायते—जञ्जन्यते । 'हन्तेर्हिंसायां यङि ह्रीभावो वाच्यः' (वा ४६२१) । जेह्रीयते । 'हिंसायां' किम् । जङ्घन्यते ।

२६४४ । रीगृदुपधस्य च । (७-४-९०)

ऋदुपधस्य धातोरभ्यासस्य रीगागमः स्याद्यङ्यङ्लुकोः । वरीवृत्यते ।

सम्मतत्वात् । वस्तुतस्तु न्याससम्मते तौतादिकस्याप्रवृत्तिरेव फलम् । "लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्" इति लुग्विकरणस्य ग्रहणनिवृत्तिरिति बोध्यम् । **नीग्वञ्चु** ॥ **अभ्यासस्येति** ॥ 'अत लोपः' इत्यतस्तदनुवृत्तेरिति भावः । **यङ्लुकोरिति** ॥ यङि यङ्लुकि चेत्यर्थः । **न दीर्घः इति** ॥ रीगागमात्प्राक् प्राप्तोऽभ्यासदीर्घो नेत्यर्थः । भविष्यदपि कित्त्वन्दीर्घप्रतिबन्धकमिति भावः । **नलोपः इति** ॥ 'अनिदिताम्' इत्यनेन नकारस्य लोप इत्यर्थः । **इत्यादीति** ॥ सनीस्रस्यते, दनीध्वस्यते, वनीभ्रस्यते, चनीकस्यते, पनीपत्यते, पनीपद्यते, चनीस्कन्द्यते । **नुगतोऽनु** ॥ अङ्गस्येत्यधिकृतम् । 'अत लोपः' इत्यतः अभ्यासस्येत्यनुवर्तते । 'गुणो यङ्लुकोः' इत्यतः यङ्लुकोरिति च । तदाह । **अनुनासिकान्तस्येत्यादि** ॥ ननु यंयम्यते इत्यत्र नुको नकारस्य अपदान्तत्वादझल्परकत्वाच्च कथं 'नश्च' इत्यनुस्वार इत्यत आह । **नुकेति** ॥ नन्वभ्यासे ह्रस्वविधानाद्दीर्घस्याभावात् नुग्विधावत इति तपरकरणं व्यर्थमित्यत आह । **तपरत्वसामर्थ्यादिति** ॥ स्वाभाविक एव यो ह्रस्वः अकारः तस्यैव ग्रहणम्, नतु दीर्घादेशभूतस्य ह्रस्वाकारस्येत्येतदर्थं तपरकरणमिति भावः । **बाभाम्यते इति** ॥ अत आकारस्थानिकस्य ह्रस्वविधिसम्पन्नस्य अकारस्य न नुगिति भावः । जनधातोर्यङि नकारस्य आत्त्वविकल्पं स्मारयति । **ये विभाषेति** ॥ **ह्रीभावः इति** ॥ यद्यपीह ह्रीभावविधावपि 'अभ्यासाच्च' इति कुत्वे हकारस्य घकारः सिद्ध्यति । तथापि प्रयत्नलाघवाभावात् प्रक्रियालाघवाच्च ह्रीति घकारोच्चारणमिति भावः । **जेह्रीयते इति** ॥ पुनः पुनरतिशयेन वा हिनस्तीत्यर्थः । अत्र यङीति विषयसप्तमी । यङि विवक्षिते सतीति लभ्यते । तेन द्वित्वस्य परत्वेऽपि प्रागेव ह्रीभाव इति बोध्यम् । **जङ्घन्यते इति** ॥ गर्हितं गच्छतीत्यर्थः । **रीगृदुपधस्य च** ॥ **अभ्यासस्येति** ॥ 'अत्र लोपः' इत्यतः

क्षुभ्नादित्वान्न णः। नरीनृत्यते। जरीगृह्यते। उभयत्र लत्वम्। चलीक्लृप्यते। 'रीगृत्वत इति वक्तव्यम्' (वा ४६६२)। परीपृच्छ्यते। वरीवृश्च्यते।

२६४५। स्वपिस्यमिव्येञां यङि। (६-१-१९)

सम्प्रसारणं स्याद्यङि। सोषुप्यते। सेसिम्यते। वेवीयते।

२६४६। न वशः। (६-१-२०)

वावश्यते।

२६४७। चायः की। (६-१-२१)

चेकीयते।

तदनुवृत्तेरिति भावः। **यङ्लुकोरिति** ॥ 'गुणो यङ्लुकोः' इत्यतस्तदनुवृत्तेरिति भावः। **वरीवृत्यते इति** ॥ 'वृतु वर्तने' अस्माद्यङि द्वित्वे उरदत्त्वे हलादिशेषे अभ्यासस्य रीक्। नृतेर्यङि नरीनृत्यते इत्यत्र णत्वमाशङ्क्य आह। **क्षुभ्नादित्वान्न णः इति**॥ **जरीगृह्यते इति** ॥ 'ग्रह उपादाने' अस्माद्यङि 'ग्रहिज्या' इति सम्प्रसारणे द्वित्वे उरदत्त्वे हलादिशेषे अभ्यासस्य रीक्। **उभयत्रेति** ॥ कृपधातोः यङि द्वित्वे उरदत्त्वे रपरत्वे हलादिशेषे रीक्। चलीक्लृप्यते इत्यत्र 'कृपो रो लः' इत्यभ्यासे रेफस्य लकारः। उत्तरखण्डे ऋकारस्यावयवो रेफः तस्य लकारसदृश इत्यर्थः। ननु व्रश्चूधातोर्यङि वरीवृश्च्यते इत्यत्र कथमभ्यासस्य रीक्। धातोः शकारोपधत्वेन ऋदुपधत्वाभावादित्यत आह। **रीगृत्वतः इति** ॥ 'रीगृदुपधस्य' इत्यत्र ऋदुपधस्येत्यपनीय ऋत्वत इति वक्तव्यमित्यर्थः। ऋत् अस्यास्तीति ऋत्वत्। 'तसौ मत्वर्थे' इति भत्वात् पदत्वाभावान्न जश्त्वम्। **परीपृच्छ्यते इति** ॥ प्रच्छधातोर्यङि 'ग्रहिज्या' इति रेफस्य सम्प्रसारणमृकारः। पूर्वरूपं द्वित्व रपरत्वं हलादिशेषः रीक्। **वरीवृश्च्यते इति** ॥ व्रश्चधातोर्यङि सम्प्रसारणे द्वित्वादि पूर्ववत्। **स्वपिस्यमि** ॥ सम्प्रसारणं स्यादिति शेषपूरणम्। 'ष्यङः सम्प्रसारणम्' इत्यतस्तदनुवृत्तेरिति भावः। **सोषुप्यते इति** ॥ स्वप्धातोर्यङि वकारस्य सम्प्रसारणे उकारे पूर्वरूपे द्वित्वे अभ्यासगुणः। उत्तरखण्डे सस्य षत्वम्। **सेसिम्यते इति** ॥ स्यमुधातोर्यङि यकारस्य सम्प्रसारणे पूर्वरूपे द्वित्वादि। अषोपदेशत्वान्न षः। **वेवीयते इति** ॥ व्येञो यङि यकारस्य सम्प्रसारणे पूर्वरूपे द्वित्वादि। 'हलः' इति वा 'अकृत्सार्वधातुकयोः' इति वा दीर्घः। अथ वशधातोर्यङि वावश्यते इत्यत्र 'ग्रहिज्या' इति सम्प्रसारणे प्राप्ते तन्निषेधं स्मारयति। **न वशः**॥ वशधातोः छान्दसत्वम्प्रायिकमिति प्रागेवोक्तम्। **चायः की** ॥ यङीति शेषः। 'स्वपिस्यमिव्येञां यङि' इत्यतस्तदनुवृत्तेरिति भावः। **चेकीयते इति** ॥ 'चायृ पूजानिशाम-

२६४८ । ई घ्राध्मोः । (७-४-३१)

जेघ्रीयते । देध्मीयते ।

२६४९ । अयङ् यि क्ङिति । (७-४-२२)

शीङोऽयङादेशः स्याद्यादौ क्ङिति परे । शाशय्यते । अभ्यासस्य ह्रस्वः । ततो गुणः । डोढौक्यते । तोत्रौक्यते ।

इति तिङन्तयङ्प्रकरणम् ।

नयोः' अस्माद्यङि प्रकृतेः कीभावे द्वित्वादि । **ई घ्राध्मोः** ॥ घ्रा ध्मा अनयोः द्वन्द्वात् षष्ठीद्विवचनम् । यङीति शेषः । 'यङि च' इत्यतस्तदनुवृत्तेः । **जेघ्रीयते । देध्मीयते इति** ॥ ईत्त्वे कृते द्वित्वादि । ह्रस्वस्य इकारस्य विधावपि 'अकृत्सार्वधातुकयोः' इति दीर्घसिद्धेः दीर्घोच्चारणम् 'अस्य च्वौ' इत्युत्तरार्थम् । **अयङ् यि क्ङिति** ॥ यि इति सप्तमी । क् ङ् एतौ इतौ यस्येति विग्रहः । **शीङः इति** ॥ 'शीङः सार्वधातुके गुणः' इत्यतस्तदनुवृत्तेरिति भावः । अयङि ङकार इत् यकारादकार उच्चारणार्थः । ङित्त्वादन्तादेशः । **शाशय्यते इति** ॥ शी य इति स्थिते ईकारस्य अय् ततो द्वित्वे अभ्यासदीर्घः । ढौकृधातोर्यङि विशेषमाह । **अभ्यासस्य ह्रस्वः इति** ॥ द्वित्वे अभ्यासह्रस्वे उकारे तस्य 'गुणो यङ्लुकोः' इति गुण इत्यर्थः । **तोत्रौक्यते इति** ॥ ढौकेः रूपम् ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां यङन्तनिरूपणं समाप्तम् ।



श्रीरस्तु ।

॥ अथ तिङन्तयङ्लुक्प्रकरणम् ॥

२६५० । यङोऽचि च । (२-४-७४)

यङोऽच्प्रत्यये लुक् स्याच्चकारात्तं विनापि बहुलं लुक्स्यात् । अनैमित्तिकोऽयमन्तरङ्गत्वादादौ भवति । ततः प्रत्ययलक्षणेन यङन्तत्वात् द्वित्वम् । अभ्यासकार्यम् । धातुत्वाल्लडादयः । 'शेषात्कर्तरि—' (सू २१५९) इति

अथ यङ्लुक्प्रक्रियाः निरूप्यन्ते । **यङोऽचि च** ॥ अचि इति प्रत्ययग्रहणम् । नतु प्रत्याहारः । यङा साहचर्यात् । 'ण्यक्षत्रियार्ष' इत्यतः लुगित्यनुवर्तते । तदाह । **यङोऽच् प्रत्यये लुगिति । चकारात्तं विनापीति** ॥ अच्प्रत्ययाभावेऽपीत्यर्थः । **बहुळमिति** ॥ चकारात् 'बहुळञ्छन्दसि' इति पूर्वसूत्राद्बहुळग्रहणमप्यनुकृष्यते इति भावः । एवञ्च अच्प्रत्यये तदभावेऽपि यङो बहुळं लुगिति फलितम् । तेन लूञो यङन्ताद्यचि यङो लुगभावपक्षे अतो लोपे लोलूय इति रूपम् । लुकि तु लोलुव इति रूपं सिध्यति । तथा अच्प्रत्ययाभावेऽपि बोभूयते, बोभवीति, इत्यादौ यङो लुग्विकल्पः सिध्यतीति बोध्यम् । **अनैमित्तिकोऽयमिति** ॥ अच्प्रत्ययादन्यत्र बोभवीतीत्यादौ यङ्लुक् अनैमित्तिकः । ततश्च परस्मादपि द्वित्वादिकार्यात्प्रागेव अन्तरङ्गत्वाद्यङो लुक भवति ततो द्वित्वादीति वस्तुतः स्थितिकथनमिदम् । अच्प्रत्यये विधीयमानस्तु यङ्लुक् नैमित्तिकत्वाद्बहिरङ्ग एव । ततश्च परत्वान्नित्यत्वाच्च आदौ द्वित्वे कृते यङो लुकि अच्प्रत्ययमाश्रित्य प्राप्तो गुणः 'न धातुलोप आर्धधातुके' इति निषेधान्न भवति । अच्प्रत्ययस्य यङ्लोपनिमित्तत्वादिति बोध्यम् । नन्वेवं सति यङ्लुकि 'सन्यङोः' इति द्वित्वं न स्यात् । यङो लुका लुप्तत्वेन प्रत्ययलक्षणाभावादित्यत आह । **ततः इति** ॥ यङो लुगनन्तरमित्यर्थः । 'न लुमता' इत्यनेन हि लुमताशब्देन लुप्ते तन्निमित्तमङ्गकार्यंनिषिध्यते । द्वित्वादिकन्तु यङन्तस्य कार्यम्, नतु यङ्निमित्तकम् । यङि परतस्तद्विध्यभावादिति भावः । **द्वित्वमिति** ॥ नच 'एकाचः' इति विधीयमानं द्वित्वङ्कथमिह यङ्लुकि स्यात् । "श्तिपा शपा" इति निषेधादिति वाच्यम् । 'गुणो यङ्लुकोः' इत्याद्यभ्यासकार्यविधिवलेन द्वित्वनिषेधाभावज्ञापनादिति भावः । **अभ्यासकार्यमिति** ॥ गुणादीति भावः । **धातुत्वादिति** ॥ यङो लुकि सत्यपि प्रत्ययलक्षणमाश्रित्य यङन्तत्वात् 'सनाद्यन्ताः' इति धातुत्वम् । नच 'न लुमता' इति निषेधः शङ्क्यः । धातुसंज्ञायाः यङन्तधर्मत्वेन यङि परतोऽङ्गकार्यत्वाभावादिति भावः । यङो ङित्त्वात्तदन्तादात्मनेपदमाशङ्क्य आह । **शेषादिति** ॥ नतु 'शेषात्कर्तरि' इत्यत्र आत्मनेपदनिमित्तहीनो धातुश्शेषः ।

परस्मैपदम् । 'अनुदात्तङितः—' (सू २१५७) इति तु न । ङित्त्वस्य प्रत्ययाप्रत्ययसाधारणत्वेन प्रत्ययलक्षणाप्रवृत्तेः । यत्र हि 'प्रत्ययस्यासाधारणं रूपमाश्रीयते तत्रैव तत्' । अत एव सुदृषत्प्रासाद इत्यत्र 'अत्वसन्तस्य—' (सू ४२५) इति दीर्घो न । येऽपि स्पर्धशीङादयोऽनुदात्तङितस्तेभ्योऽपि न । अनुदात्तङितः—' (सू २१५७) इत्यनुबन्धनिर्देशात् । तत्र च 'श्तिपा शपा—' (प १३२) इति निषेधात् । अत एव श्यन्नादयो न । गणेन निर्देशात् । किंतु शबेव । 'चर्करीतं च' इत्यदौ पाठाच्छपो लुक् ।

यङन्तधातुस्तु न तथा आत्मनेपदनिमित्तः । ङकारानुबन्धसत्वादित्यत आह । **अनुदात्तङित इति तु नेति** ॥ कुत इत्यत आह । **ङित्त्वस्येति** ॥ तदेवोपपादयति । **यत्र हीति** ॥ यत्र प्रत्यये लुप्तेऽपि प्रत्ययमात्रवृत्तिधर्मपुरस्कारेण तमाश्रित्य कार्यप्रवृत्तिरिष्यते तत्रैव प्रत्ययलक्षणम् । यथा राजेत्यत्र । तत्र हि लुप्तं सुप्प्रत्ययं सुबात्मकप्रत्ययमात्रवृत्तिधर्मपुरस्कारेणाश्रित्य सुबन्ततया पदत्वात् 'नलोपः' इति नकारलोपप्रवृत्तिः । ङित्त्वन्तु न प्रत्ययमात्रधर्मः । 'ऋतेरीयङ्' इत्यादिप्रत्ययेष्वप्रत्ययेष्वपि चित्रङादिषु सत्वात् । ततश्च यङि लुप्ते सति प्रत्ययलक्षणेन तमाश्रित्य तद्वृत्तिङित्त्वप्रयुक्तङ्कार्यमात्मनेपदन्न शङ्कितुं शक्यमिति भावः । ननु यत्किञ्चिद्धर्मपुरस्कारेण प्रत्ययाश्रयकार्ये प्रत्ययलक्षणङ्कुतो नेत्यत आह । **अत एवेति** ॥ प्रत्ययमात्रवृत्तिधर्मपुरस्कारेण प्रत्ययाश्रयकार्ये प्रत्ययलक्षणाश्रयणादेवेत्यर्थः । **दीर्घो नेति** ॥ सु शोभनाः दृषदः यस्य सः सुदृषत्प्रासाद इत्यत्र समासावयवत्वाल्लुप्तं जसं प्रत्ययलक्षणेनाश्रित्य प्राप्तः असन्तत्वलक्षणो दीर्घो न भवति । उणादीनामव्युत्पत्तिपक्षे व्युत्पत्तिपक्षे च अस्त्वस्य वेधा इत्यादावप्रत्यये प्रत्यये च सत्त्वेन प्रत्ययमात्रवृत्तित्वाभावेन तत्पुरस्कारेण दीर्घे क्रियमाणे प्रत्ययलक्षणासम्भवादिति भावः । एतत्सर्वं प्रत्ययलक्षणसूत्रभाष्यकैयटादिषु स्पष्टम् । नच सुदृषत्प्रासाद इत्यत्र जसो लुका लुप्तत्वात् 'न लुमता' इति निषेधादेव दीर्घो न भविष्यतीति वाच्यम् । दीर्घस्यासन्तकार्यत्वेन जसि परे अङ्गकार्यत्वाभावादित्यलम् । ननु उक्तरीत्या प्रत्ययलक्षणाभावात् लुप्तयङन्तात् ङित्त्वप्रयुक्तमात्मनेपदं मास्तु । ये तावत् स्पर्धादयः अनुदात्तेतः ये च शीङादयो ङितः पठिताः तेभ्यः आत्मनेपदं दुर्वारमित्यत आह । **येऽपीति** ॥ **तेभ्योऽपि नेति** ॥ तेभ्यो यङ्लुकि नात्मनेपदमित्यर्थः । कुत इत्यत आह । **अनुदात्तङित इत्यनुबन्धनिर्देशादिति** ॥ नन्वनुबन्धनिर्देशेऽपि यङ्लुकि आत्मनेपदं कुतो न स्यादित्यत आह । **तत्र च श्तिपेति** ॥ न चानुबन्धनिर्देशादेव ङित्त्वप्रयुक्तमपि कार्यमात्मनेपदं यङ्लुकि न भविष्यति । अतः प्रत्ययासाधारणधर्माश्रयत्वे सत्येव प्रत्ययलक्षणमिति क्लेशानुभवो वृथेति वाच्यम् । यङो ङकारस्य प्रत्ययानुबन्धत्वेन यङन्तस्य धातोरनुबन्धेनानिर्देशादित्यलम् । **अत एवेति** ॥ "श्तिपा शपा" इति निषेधादेव यङ्लुकि श्यन्नादयो विकरणा नेत्यर्थः । "श्तिपा शपा" इति निषेधमुपपादयति । **गणेन निर्देशादिति** ॥ 'दिवादिभ्यः श्यन्' 'रुधादिभ्यः श्नम्' इत्यादिगणनिर्देशादित्यर्थः । **किंतु शबेवेति** ॥ 'कर्तरि शप्' इत्यत्र "श्तिपा शपा" इति निषेधाविषयत्वादिति भावः । **चर्करीतमिति** ॥

२६५१। यङो वा।(७-३-९४)

यङन्तात्परस्य हलादेः पितः सार्वधातुकस्येड्वा स्यात्। 'भूसुवोः—' (सू २२२४) इति गुणनिषेधो यङ्लुकि भाषायां न। '—बोभूतु तेतिक्ते' (सू ३५९६) इति छन्दसि निपातनात्। अतएव यङ्लुग्भाषायामपि सिद्धः। न च यङ्लुक्यप्राप्त एव गुणभावो निपात्यतामिति वाच्यम्। 'प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणात्' (प १०१)। 'द्विः प्रयोगो द्विर्वचनं षाष्ठम्' इति

यङ्लुगन्तमदादौ वोढ्यामिति व्याख्यातं प्राक्। अतो यङ्लुगन्ताच्छपो लुगित्यर्थः। एवञ्च भूधातोर्यङो लुकि द्वित्वादौ बोभू इत्यस्माल्लटि तिपि शपो लुकि बोभू ति इति स्थिते। **यङो वा** ॥ 'उतो वृद्धिः' इत्यतो हलीति 'नाभ्यस्तस्याचि' इत्यतः पिति सार्वधातुके इति 'ध्रुव ईट्' इत्यतः ईडिति चानुवर्तते। तदाह। **यङन्तादित्यादिना** ॥ टित्त्वात्तिप आद्यवयव ईट्। तथाच बोभू ई ति इति स्थिते ऊकारस्य गुणे अवादेशे बोभवीतीति रूपं वक्ष्यति। 'भूसुवोस्तिङि' इति गुणनिषेधमाशङ्क्य आह। **भूसुवोरिति** ॥ **निपातनादिति** ॥ 'कृषेः छन्दसि' इत्यतः छन्दसीत्यनुवृत्तौ 'दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्ते' इत्यादि सूत्रे भूधातोर्यङ्लुगन्तस्य गुणाभावो निपात्यते। 'भूसुवोः' इत्येव तत्र गुणनिषेधे सिद्धे गुणाभावनिपातनन्नियमार्थम्। यङ्लुकि छन्दस्येवायम् 'भूसुवोः' इति गुणनिषेधो नान्यत्र इत्यतो लोकेऽपि यङ्लुगस्तीति विज्ञायते। एतेन 'यङोऽचि च' इति यङ्लुग्विधौ 'बहुलं छन्दसि' इति पूर्वसूत्राच्छन्दसीत्यनुवर्तयन्तः पारस्ताः। तदाह। **अतएव यङ्लुक् भाषायामपि सिद्धः इति** ॥ 'भूसुवोस्तिङि' इति सूत्रभाष्ये तु बोभूत्वित्येतन्नियमार्थम्। अतैव यङ्लुगन्तस्य गुणो न भवति, नान्यत्र। क्व मा भूत् बोभवीतीत्युक्तम्। अत्रैवेत्यस्य बोभूत्विति लोढ्येवेत्यर्थः। यङ्लुगन्तस्येत्यस्य भूधातोरिति शेषः। बोभवीतीत्येवोदाहृतत्वादिति शब्देन्दुशेखरे प्रपञ्चितम्। वस्तुतस्तु भाष्ये यङ्लुङन्तस्येति सामान्याभिप्रायमेव। भूधातुमात्रसङ्कोचे मानाभावात्। बोभवीति इत्युदाहरणन्तु धात्वन्तराणामपि प्रदर्शनपरमिति मूलकृदाशयः। ननु भूधातोर्यङ्लुकि बोभू इत्यस्य 'भूसुवोस्तिङि' इति गुणनिषेधप्रसक्तिर्नास्ति। द्वित्वे सति यङ्लुगन्तस्य प्रकृत्यन्तरत्वेन भूरूपत्वाभावात्। ततश्च यङ्लुगन्तस्याप्राप्ते गुणाभावे तत्प्राप्तयर्थमेव बोभूत्विति निपातनमिति युक्तम्। तथा च छन्दस्येव यङ्लुगन्तस्य गुणनिषेधः, न तु भाषायामिति नियमः कथं सिध्येदित्याशङ्क्य निराकरोति। **नच यङ्लुकीति** ॥ **प्रकृतीति** ॥ 'प्रकृतिग्रहणेन यङ्लुगन्तस्यापि ग्रहणम्' इति परिभाषया 'भूसुवोः' इत्यत्र भूग्रहणेन बोभू इति यङ्लुगन्तस्यापि ग्रहणादित्यर्थः। ननु 'प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्' इत्यत्र किं प्रमाणमित्याशङ्क्य न्यायसिद्धमिदमित्याह। **द्विः प्रयोगः इति** ॥ षष्ठाध्यायादौ 'एकाचो द्वे प्रथमस्य' इत्यत्र किमिदं द्विर्वचनं एकाचः प्रथमस्य एकस्य स्थाने द्वितयात्मक आदेशः स्थान्यपेक्षया अन्यो विधीयते, उत स्थानिन एकस्य सतः द्विरुच्चारणं विधीयते, नतु तत्स्थानिनः अतिरिच्यते, इति संशय्य 'द्विः प्रयोगो

सिद्धान्तात् । बोभवीति–बोभोति । बोभूतः । बोभुवति । बोभवांचकार । बोभविता । अबोभवीत्–अबोभोत् । अबोभूताम् । अबोभवुः । बोभूयात् । बोभूयाताम् । बोभूयास्ताम् । 'गातिस्था—' (सू २२२३) इति सिचो लुक् । 'यङो वा' (सू २६५१) इतीट्पक्षे गुणं बाधित्वा नित्यत्वाद्वुक् । अबोभूवीत् । अबोभूत् । अबोभूताम् । अभ्यस्ताश्रयो जुस् । नित्यत्वाद्वुक् । अबोभूवुः । अबोभविष्यदित्यादि । पास्पर्धीति–पास्पर्द्धि । पास्पर्द्धः । पास्पर्धति ।

द्विर्वचनम्' इति सिद्धान्तितम् । तदधिकारस्थत्वात् 'सन्यङोः' इति द्विर्वचनमपि तथाविधमेव । ततश्च भू इत्यस्यैव बोभू इति द्विः प्रयुज्यमानतया 'भूसुवोः' इति भूग्रहणेन ग्रहणाद्यङ्लुक्यपि निषेधसिद्धेः बोभूत्विति निपातनं छन्दस्येव यङ्लुकि गुणनिषेधो, ननु भाषायामिति नियमलाभाल्लोकेऽपि यङ्लुक् सिद्ध इति भावः । **बोभूतः इति** ॥ अपित्त्वादीण । ङित्त्वाच्च न गुणः । **बोभुवतीति** ॥ 'अदभ्यस्तात्' इत्यत् । ङित्त्वात् गुणाभावे उवङिति भावः । बोभवीषि–बोभोषि । बोभूथः । बोभूथ । बोभवीमि–बोभोमि । बोभूवः । बोभूमः । **बोभवाञ्चकारेति** ॥ 'कास्यनेकाच्' इत्याम् । बोभविता । बोभविष्यति । बोभवीतु–बोभोतु–बोभूतात् । बोभूताम् । बोभुवतु । हेरपित्त्वादीण ङित्त्वान्न गुणः । बोभूहि–बोभूतात् । बोभूतम् । बोभूत । आटः पित्त्वेन अङित्त्वात् गुणः । बोभवानि । बोभवावः । बोभवामः । लङ्याह । **अबोभवीदित्यादि । अबोभवुरिति** ॥ 'सिजभ्यस्त' इति जुसि गुणे अवादेशः । अबोभवीः–अबोभोः । अबोभूतम् । अबोभूत । अबोभवम् । अबोभूव । अबोभूम । **बोभूयादिति** ॥ विधिलिङि आशीर्लिङि च रूपम् । बोभूयातामिति विधिलिङस्तामि रूपम् । बोभूयुः । बोभूयाः । बोभूयातम् । बोभूयात । बोभूयाम् । बोभूयाव । बोभूयाम । **बोभूयास्तामिति** ॥ आशीर्लिङि तामि रूपम् । बोभूयास्त । बोभूयासम् । बोभूयास्व । बोभूयास्म । लुङस्तिपि सिचि कृते आह । **गातिस्थेति** ॥ **ईट्पक्षे इति** ॥ 'इतश्च' इति इकारलोपे कृते ईडागमे 'सार्वधातुकार्धधातुकयोः' इति गुणं परमपि बाधित्वा नित्यत्वात् 'भुवो वुग्लुङ्लिटोः' इति वुगित्यर्थः । गुणे कृते अकृते च प्राप्तेः वुको नित्यत्वं बोध्यम् । **अबोभूवीदिति** ॥ वुकि कृते सति तेन व्यवधानादूकारस्य न गुणः । ननु लुङो झेर्जुसि वुकि अबोभूवुरिति रूपं वक्ष्यति । तदयुक्तम् । 'आतः' इति सूत्रे सिज्लुकि आदन्तादेव झेर्जुसिति नियमनादित्यत आह । **अभ्यस्ताश्रयो जुसिति** ॥ 'सिजभ्यस्त' इत्यनेन अभ्यस्तात्परत्वात् जुसित्यर्थः । 'सिजभ्यस्त' इति सूत्रे सिचः परत्वमाश्रित्य यो जुस् प्राप्तस्तस्यैवायन्नियमः, न त्वभ्यस्ताश्रयजुस इति भावः । अबोभू उस् इति स्थिते 'जुसि च' इति गुणमाशङ्क्य आह । **नित्यत्वाद्वुगिति** ॥ 'जुसि च' इति गुणापेक्षयेत्यर्थः । **अबोभूवुरिति** ॥ न चात्राभ्यस्ताश्रयजुसं बाधित्वा परत्वात् 'अदभ्यस्तात्' इत्यदादेशः स्यादिति शङ्क्यम् । अभ्यस्ताश्रयजुसः अदादेशापवादत्वादिति भावः । अबोभूवीः–अबोभोः । अबोभूतम् । अबोभूवम् । अबोभूव । अबोभूम । **इत्यादीति** ॥ अबोभविष्यताम्, अबोभविष्यन्, इत्यादि व्यक्तम् । **पास्पर्धीतीति** ॥ स्पर्धधातोः यङ्लुकि

पास्पर्त्सि। 'हुझल्भ्यो हेर्धिः' (सू २४२५)। पास्पर्धि। लङ्। अपास्पर्त्–अपास्पर्द्। सिपि 'दश्च' (सू २४६८) इति रुत्वपक्षे 'रो रि' (सू २७३) अपास्पाः। जागाद्धि। जाघात्सि। अजाघात्। सिपि रुत्वपक्षे। अजाघाः। 'नाथृ'। नानात्ति। नानात्तः। 'दध'। दादद्धि। दादद्धः। दाधत्सि।

द्वित्वे 'शर्पूर्वाः खयः' इति पकारशेषे 'दीर्घोऽकितः' इति दीर्घे पास्पर्ध् इत्यस्माल्लटस्तिपि शपि शपो लुकि 'यङो वा' इति ईडागमे रूपम्। ईडभावे त्वाह। **पास्पर्द्धीति**॥ पास्पर्ध् ति इति स्थिते 'झषस्तथोर्धोऽधः' इति तकारस्य धकारः। 'झलाञ्झ् झशि' इति पूर्वधकारस्य द इति भावः। मिव्वस्मस्सु पास्पर्धीमि–पास्पर्ध्मि। पास्पर्ध्वः। पास्पर्ध्मः। पास्पर्धाञ्चकार। पास्पर्धिता। पास्पर्धिष्यति। पास्पर्धीतु–पास्पर्द्धु–पास्पर्धात्। पास्पर्धतु। हेरपित्त्वादीडभावं सिद्धवत्कृत्य आह। **हुझल्भ्यः इति**॥ **पास्पर्धीति**॥ हेर्धिभावे 'झरो झरि' इति वा धलोपः। पास्पर्धात्। पास्पर्धम्। पास्पर्धानि। पास्पर्धाव। पास्पर्धाम। लङि तिपि उदाहरणसूचनम्। ईटि अपास्पर्धीत् इति सिद्धवत्कृत्य ईडभावे आह। **अपास्पर्त् इति**॥ अपास्पर्ध् त् इति स्थिते हल्ङ्यादिना तकारलोपे 'वाऽवसाने' इति चर्त्वविकल्प इति भावः। अपास्पर्धाम्। अपास्पर्धुः। सिपि तु अपास्पर्ध् स् इति स्थिते जश्त्वे 'दश्च' इति दकारस्य रुत्वपक्षे अपास्पर् र् स् इति स्थिते हल्ङ्यादिना सकारलोपे 'रो रि' इति रेफलोपे 'ढ्रलोपे' इति दीर्घे विसर्गे अपास्पाः इति रूपम्। 'सिपि च' इति धस्य दत्वपक्षे तु अपास्पर्द् इति रूपमित्यर्थः। नच दीर्घे सिपि 'दश्च' इति रुत्वमसिद्धमिति शङ्क्यम्। 'ढ्रलोपे' इति सूत्रे ढ्रग्रहणेन लण्सूत्रे जर्गृधेः अजघाः इति भाष्यप्रयोगेण च पूर्वत्रासिद्धमित्यस्याप्रवृत्तिबोधनात्। अपास्पर्धम्। अपास्पर्ध्व। अपास्पर्ध्म। लिङि पास्पर्ध्यात्। पास्पर्ध्याताम्। पास्पर्ध्यास्ताम् इत्यादि। लुङि अपास्पर्ध् स् इति स्थिते 'अस्तिसिचः' इति नित्यमीट्। 'इट ईटि' इति सलोपः। अपास्पर्धीत्। अपास्पर्धिष्टाम्। अपास्पर्धिषुः। अपास्पर्धिष्यत्। गाधृधातोर्यङ्लुगन्तात् लटस्तिपि ईट्पक्षे जागाधीति सिद्धवत्कृत्य ईडभावे आह। **जागाद्धीति**॥ जागाध् ति इति स्थिते 'झषस्तथोः' इति तकारस्य धः। जागाद्धः। जागाधति। सिपि ईट्पक्षे जागाधीषीति सिद्धवत्कृत्य ईडभावपक्षे आह। **जाघात्सीति**॥ जागाध् सि इति स्थिते 'एकाचो बशः' इति गस्य भष् धस्य चर्त्वमिति भावः। जागाद्धः। जागाद्ध। जागाध्मि। जागाध्वः। जागाध्मः। जागाधाञ्चकार। जागाधिता। जागाधिष्यति। जागाधीतु–जागाद्धु–जागाद्धात्। जागाद्धाम्। जागाधतु। जागाद्धि–जागाद्धात्। जागाद्धम्। जागाद्ध। जागाधानि। जागाधाव। जागाधाम। लङि अजागाधीत्–अजाघात्। अजागाद्धाम्। अजागाधुः। सिपि ईट्पक्षे अजागाधीरिति सिद्धवत्कृत्य ईडभावपक्षे आह। **सिपीति**॥ अजागाध् स् इति स्थिते भष्भावे 'सिपि धातोरुर्वा' 'दश्च' इति दस्य रुत्वपक्षे हल्ङ्यादिलोपे रेफस्य विसर्गे अजाघाः इति रूपमित्यर्थः। दत्वपक्षे तु अजाघाद् इति बोध्यम्। अजागाद्धाम्, इत्यादि। जागाध्यात्। लुङि 'अस्तिसिचः' इति नित्यमीट्। अजागाधीत्। अजागाधिष्टाम्, इत्यादि। **नाथृ इति**॥ उदाहरणसूचनम्। वर्गद्वितीयान्तोऽयं धातुः न झषन्तः। तस्य ईट्पक्षे नानाथीति इति सिद्धवत्कृत्य ईडभावपक्षे आह। **नाना-**

अदाधत्। अदादधुः। अदाधः—अदाधत्। लुङि। अदादाधीत्—अदादधीत्। चोस्कुन्दीति—चोस्कुन्ति। अचोस्कुन्। अचोस्कुन्ताम्। अचोस्कुन्दुः। मोमुदीति—मोमोत्ति। मोमोदाञ्चकार। मोमोदिता। अमोमुदीत्—अमोमोत्। अमोमुत्ताम्। अमोमुदुः। अमोमुदीः—अमोमोः—अमोमोत्। लुङि गुणः। अमोमोदीत्। चोकूर्ति—चोकूर्दीति। लङ्। तिप्। अचोकूर्त्—अचोकूर्दीत्।

त्तीति ॥ नानाथ् ति इति स्थिते 'खरि च' इति थस्य चर्त्वम्। 'झषस्तथोः' इति 'एकाचो बशो भष्' इति च न। अझषन्तत्वात्। नानात्तः। नानाथति। नानाथीषि—नानात्सि। नानात्थः। नानात्थ। नानाथीमि—नानाथ्मि। नानाथ्वः। नानाथ्मः। लोटि नानाथीतु—नानात्तु। हेर्धिः। थस्य जश्त्वेन दः। नानाद्धि। नानाथानि। नानाथाव। नानाथाम। लङि अनानाथीत्—अनानात्। अनानात्ताम्। अनानाथुः, इत्यादि। लुङि 'अस्तिसिचः' इति नित्यमीट्। अनानाथीत्। अनानाथिष्टाम्, इत्यादि। **दध्रेति** ॥ उदाहरणसूत्रनमिदम्। दधधातोर्लटस्तिपि ईट्पक्षे दादधीतीति सिद्धवत्कृत्य ईडभावपक्षे आह। **दादद्धीति** ॥ दादध् ति इति स्थिते 'झषस्तथोः' इति तकारस्य धः। दादधीषीति सिद्धवत्कृत्य आह। **दाधत्सीति** ॥ 'एकाचो बशः' इति दस्य भष्। धस्य 'खरि च' इति चर्त्वमिति भावः। दादत्थः। दादत्थ। दादध्मि, इत्यादि। लोटि दादधीतु—दादद्धु। दादद्धि। दादधानि। लङस्तिपि ईटि अदादधीत् इति सिद्धवत्कृत्य ईडभावे आह। **अदाधत् इति** ॥ अदादध् त् इति स्थिते हल्ङ्यादिलोपे भष्भावे धस्य 'वावसाने' इति चर्त्वविकल्प इति भावः। सिपि ईटि अदादधीरिति सिद्धवत्कृत्य ईडभावे आह। **अदाधः इति** ॥ अदादध् स् इति स्थिते जश्त्वे 'दश्च' इति दस्य रुत्वे हल्ङ्यादिना सलोपे रुत्वजश्त्वयोरसिद्धत्वेन झषन्तत्वात् दस्य भाषेति भावः। अदाधदिति दत्वपक्षे रूपम्। 'अस्तिसिचः' इति नित्यमीडिति मत्वा आह। **अदादधीदिति** ॥ 'अतो हलादेः' इति वृद्धिविकल्पः। अदादधिष्टाम्, इत्यादि 'स्कुदि आप्रवणे' इदित्त्वान्नुम्। अस्माद्यङ्लुकि उदाहरति। **चोस्कुन्दीतीति** ॥ ईटि रूपम्। तदभावे त्वाह। **चोस्कुन्तीति** ॥ 'झरो झरि सवर्णे' इति तकारस्य लोपविकल्पः। इह यङो लुप्तत्वादिदित्त्वाच्च यङन्तिङन्ताश्रित्य नलोपो न। लङि ईट्पक्षे अचोस्कुन्दीदिति सिद्धवत्कृत्य ईडभावे आह। **अचोस्कुन्निति** ॥ अचोस्कुन् द् त् इति स्थिते हल्ङ्यादिना तकारलोपे दकारस्य संयोगान्तलोपः। लुङि तु 'अस्तिसिचः' इति नित्यमीट्। अचोस्कुन्दीत्। अचोस्कुन्दिष्टाम्, इत्यादि। **मोमुदीतीति** ॥ 'मुद हर्षे' ईटि 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति लघूपधगुणो न। **मोमोत्तीति** ॥ ईडभावे अच्परकत्वाभावात् 'नाभ्यस्तस्याचि' इति लघूपधगुणनिषेधो न। **मोमोदितेति** ॥ 'न धातुलोप आर्धधातुके' इति गुणनिषेधस्तु न। धात्वंशलोपनिमित्ते आर्धधातुके परे एव तन्निषेधस्य प्रवृत्तेः। इह च यङ्लुकः अनैमित्तिकस्य उक्तत्वात्। **लुङि गुणः इति** ॥ सिज्निमित्तक इति शेषः। अतो 'नाभ्यस्तस्य' इति गुणनिषेधो न शङ्क्यः। **चोकूर्तीति** ॥ 'कुर्द क्रीडायाम्' यङ्लुक्

सिप्पक्षे। अचोकूः। अचोखूः। अजोगूः। वनीवच्चीति—वनीवङ्क्ति। वनीवक्तः। वनीवचति। अवनीवच्चीत्—अवनीवन्। जङ्गमीति—जङ्गन्ति। 'अनुदात्तोपदेश—' (सू २४२८)। इत्यनुनासिकलोपः। जङ्गतः। जङ्गमति। 'म्वोश्च' (सू २६०९)। जङ्गन्मि। जङ्गन्वः। एकाज्ग्रहणेनोक्तत्वान्नेण्निषेधः। जङ्गमिता। अनुनासिकलोपस्याभीयत्वेनासिद्धत्वान्न हेर्लुक्। जङ्गहि। 'मो नो धातोः' (सू ३४१)। अजङ्गन्। अनुबन्धनिर्देशान्न च्लेरङ्। 'ह्मन्त—'

द्वित्वादि। ईडभावे 'उपधायाञ्च' इति दीर्घः। **अचोकूर्त् इति** ॥ लङस्तिपि अचोकूर्द् त् इति स्थिते हल्ङ्यादिलोपे 'रात्सस्य' इति नियमान्न संयोगान्तलोपः इति भावः। **सिप्पक्षे इति** ॥ लङस्सिपि ईडभावे अचोकुर्द् स् इति स्थिते 'दश्च' इति रुत्वपक्षे हल्ङ्यादिना सलोपे 'रो रि' इति प्रथमरेफलोपे दीर्घे दकारस्थानिकरेफस्य विसर्गे अचोकूरिति रूपमित्यर्थः। **अचोखूरिति** ॥ खुर्दधातोर्यङ्लुगन्तात् लङस्सिपि कुर्दवद्रूपम्। **अजोगूरिति** ॥ गुर्दधातोर्यङ्लुगन्तात् सिपि रूपम्। **वनीवच्चीतीति** ॥ 'वञ्चु गतौ' अस्मात् 'नित्यं कौटिल्ये गतौ' इति यङन्तस्य लुक्। द्वित्वादि। 'नीग्वञ्चु' इत्यादिना अभ्यासस्य नीागमः। यङो लुक्ना लुप्तत्वान्न तदाश्रितो नलोपः। तिपः पित्त्वेन ङित्त्वान्न तदाश्रितोऽपि नलोपः। ईकारोच्चारणसामर्थ्यान्नीको न गुणः। अन्यथा निकमेव विदध्यात्। नच 'नीग्वञ्चु' इत्यनुबन्धनिर्देशाद्यङ्लुकि नीक् दुर्लभ इति शङ्क्यम्। तत्र यङ्लुकोः इत्यनुवृत्तिसामर्थ्येन अदोषादिति भावः। **वनीवङ्क्तीति** ॥ ईडभावे चस्य कुत्वेन कः। नकारस्थानिकानुस्वारस्य परसवर्णो ङकार इति भावः। **वनीवक्तः इति** ॥ तसो ङित्त्वादिह स्यादेव 'अनिदिताम्' इति नलोपः। लोटि वनीवच्चीतु—वनीवङ्क्तु—वनीवक्तात्। वनीवक्ताम्। वनीवचतु। हेर्धिः। अपित्त्वेन ङित्त्वान्नलोपः। अत एव ईडपि न। वनीवग्धि। वनीवच्चानि। आटः पित्त्वादङित्त्वान्नलोपो न। लङि तिपि ईट्पक्षे आह। **अवनीवच्चीदिति** ॥ ईडभावे त्वाह। **अवनीवन् इति** ॥ हल्ङ्यादिना तलोपे चकारस्य संयोगान्तलोपः। **जङ्गमीतीति** ॥ गमेर्यङ्लुगन्ताच्छटस्तिपि ईट्। 'नुगतोऽनुनासिकान्तस्य' इति नुक्। 'नश्च' इत्यनुस्वारः परसवर्णश्चेति भावः। तसि आह। **अनुदात्तेति** ॥ **जङ्गमतीति** ॥ 'गमहन' इत्युपधालोप इति भावः। ननु गमेरनिट्त्वात् प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणाज्जङ्गमितेत्यत्र कथमिडित्यत आह। **एकाज्ग्रहणेनेति** ॥ ननु जङ्गहीत्यत्र अनुनासिकलोपे कृते 'अतो हेः' इति लुक् स्यादित्यत आह। **अनुनासिकलोपस्येति** ॥ लङस्तिपि अजङ्गमीदिति सिद्धवत्कृत्य ईडभावे आह। **मो नः इति** ॥ अजङ्गम् त् इति स्थिते हल्ङ्यादिना तलोपे 'मो नो धातोः' इति मस्य न इत्यर्थः। तदाह। **अजङ्गन्निति** ॥ अजङ्गताम्। अजङ्गमुः। अजङ्गन्। अजङ्गतम्। अजङ्गत। अजङ्गमम्। अजङ्गन्व। अजङ्गन्म। लुङि अजङ्गमीदित्यत्र 'पुषादिद्युतादिलृदितः' इत्यङ्माशङ्क्य आह। **अनुबन्धेति** ॥ हन्तेर्यङ्लुक् हिंसार्थे क्रियासमभिहारे। गत्यर्थत्वे तु कौटिल्ये यङिति बोध्यम्। **हन्तेरित्यनुवर्त्येति** ॥ तथाच

(सू २२९९) इति न वृद्धिः । अजङ्गमीत् । अजङ्गमिष्टाम् । हन्तेर्यङ्लुक् । अभ्यासाच्च' (सू २४३०) इति कुत्वम् । यद्यपि 'हो हन्तेः—' (सू ३५८) इत्यतो 'हन्तेः' इत्यनुवर्त्य विहितम्। तथापि यङ्लुकि भवत्येवेति न्यासकारः। 'श्तिपा शपा' (प १३२) इति निषेधस्त्वनित्यः । 'गुणो यङ्लुकोः' (सू २६३०) इति सामान्यापेक्षज्ञापकादिति भावः । जङ्घनीति । जङ्घन्ति । जङ्घतः । जङ्घ्नति । जङ्घनिता । श्तिपा निर्देशाज्जादेशो न । जङ्घहि । अजङ्घनीत्—अजङ्घन् । जङ्घन्यात् । आशिषि तु वध्यात् । अवधीत् । अवधिष्टामित्यादि । वधादेशस्य द्वित्वन्तु न भवति । स्थानिवत्त्वेन 'अनभ्यासस्य' इति निषेधात् । तद्धि समानाधिकरणं धातोर्विशेषणम् । बहुव्रीहिबलात् । आङ्पूर्वात्तु 'आङो

'श्तिपा शपा' इति निषेधात्कथमिह 'हो हन्तेः' इति कुत्वमित्याक्षेपः । **गुणः इति** ॥ 'गुणो यङ्लुकोः' इति ज्ञापकादित्यन्वयः । 'एकाचो द्वे प्रथमस्य' इत्यत्र एकग्रहणाद्यङ्लुकि द्विर्वचनस्याभावादभ्यासाभावात् 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणविधानं 'श्तिपा शपा' इत्यादिनिषेधस्य क्वचिद्यङ्लुकि अप्रवृत्तिं ज्ञापयतीत्यर्थः । नन्वेकाज्ग्रहणविधेरेव यङ्लुकि क्वचिदप्रवृत्तिज्ञापनलाभेऽपि 'हो हन्तेः' इति श्तिपा निर्देशनिमित्तकनिषेधस्य कथं यङ्लुकि अप्रवृत्तिः स्यादित्यत आह । **सामान्यापेक्षेति** ॥ 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणविधानमेकाज्ग्रहणस्यानित्यत्वं ज्ञापयत् तद्वचनोपात्तत्वसामान्यात् 'श्तिपा शपा' इत्यादिसर्वनिषेधानां यङ्लुकि क्वचिदप्रवृत्तिं ज्ञापयतीत्यर्थः । **इति भावः इति** ॥ न्यासकृत इति शेषः । **जङ्घनीतीति** ॥ 'नुगतः' इति नुक् । **जङ्घतः इति** ॥ 'अनुदात्तोपदेश' इत्यनुनासिकलोपः । **जङ्घ्नतीति** ॥ 'गमहन' इत्युपधालोपः । **जङ्घनितेति** ॥ एकाज्ग्रहणादिण्निषेधो न । जङ्घहीत्यत्र 'हन्तेर्जः' इत्याशङ्क्य आह । **श्तिपेति ॥ अजङ्घन्निति** ॥ लङस्तिपि ईडभावे अजङ्घन् त् इति स्थिते हल्ङ्यादिलोप इति भावः । **आशिषि तु वध्यादिति** ॥ अयं भावः। जङ्घन् इत्यस्मादाशीर्लिङि 'हनो वध लिङि' इति वधादेशः । प्रकृतिग्रहणेन यङ्लुगन्तस्यापि ग्रहणादिति भावः । **अवधीदिति** ॥ जङ्घन् इत्यस्माल्लुङस्तिपि 'लुङि च' इति वधादेशे 'अस्तिसिचः' इति नित्यमीडिति भावः । ननु हनो यङ्लुगन्तात् आशीर्लिङो लुङश्च तिपि द्वित्वात्प्रागेव वधादेशे कृते तस्य द्वित्वं कुतो न स्यादित्यत आह । **वधादेशस्य द्वित्वन्तु न भवतीति** ॥ कुत इत्यत आह । **स्थानिवत्त्वेनेति** ॥ वधादेशात्परत्वादादौ द्वित्वे कृते सति कृतद्विर्वचनस्य स्थाने वधादेशः । तस्य च स्थानिवत्त्वेन साभ्यासतया अनभ्यासस्येति निषेधान्न द्वित्वमित्यर्थः । ननु साभ्यासस्य स्थाने भवन् वधादेशः स्थानिवत्त्वेन साभ्यासोऽस्तु । द्वित्वन्दुर्वारम् । साभ्यासत्वेऽप्यभ्यासानात्मकत्वात् अनभ्यासस्येत्यनेन धातोरवयवस्याभ्यासद्वित्वनिषेधादित्यत आह । **तद्धीति** ॥ धात्ववयवस्य अभ्यासस्येति नार्थः । किन्तु अनभ्यासो यो धातुः तदवयवस्यैकाच इत्येव । अनभ्यासग्रहणं सामानाधिकरण्येन धातोर्विशेषण-

यमहनः' (सू २६९५) इत्यात्मनेपदम्। आजङ्घ्नते इत्यादि। 'उत्परस्य—' (सू २६३७) इति तपरत्वान्न गुणः। 'हलि च' (सू ३५४) इति दीर्घस्तु स्यादेव। तस्यासिद्धत्वेन तपरत्वनिवर्त्यत्वायोगात्। चञ्चुरीति—चञ्चूर्ति। चञ्चूर्तः। चञ्चुरति। अचञ्चुरीत्—अचञ्चूः। चङ्घ्नीति—चङ्घ्नन्ति। 'जनसन—' (सू २५०४) इत्यात्त्वम्। चङ्घ्नातः। 'गमहन—' (सू २६६३) इत्युपधालोपः। चङ्ख्नति। चङ्घ्नाहि। चङ्घ्नानि। अचङ्ख्नीत्—अचङ्ख्नन्। अचङ्ख्नुः। 'ये विभाषा' (सू १३१९)। चङ्ख्नायात्—चङ्ख्नन्यात्। अचङ्ख्नीत्—अचङ्ख्नानीत्। 'उतो वृद्धिः—' (सू २४४३) इत्यत्र 'नाभ्यस्तस्य' इत्यनुवृत्तेरुतो वृद्धिर्न। योयोति—योयवीति। अयोयवीत्—

मित्यर्थः। नन्वेवमपि न अभ्यासः अनभ्यासः इति विग्रहे द्वित्वन्दुर्निवारमेव। वधादेशस्य स्थानिवत्त्वेन धातोः साभ्यासत्वेऽप्यभ्यासानात्मकत्वादित्यत आह। **बहुव्रीहिबलादिति॥** न विद्यते अभ्यासो यस्य धातोरिति बहुव्रीहिमाश्रित्य अनभ्यासस्येत्येतद्धातोः सामानाधिकरण्येन विशेषणमित्यर्थः। प्रकृते च वधादेशस्य धातोः स्थानिवत्त्वेन साभ्यासत्वादभ्यासहीनत्वाभावान्न द्वित्वमिति भावः। **आङ्पूर्वात्विति॥** यङ्लुगन्ताद्धनधातोरिति शेषः। 'आङो यमहनः' इत्यत्र हन्ग्रहणेन यङ्लुगन्तस्यापि ग्रहणम्। प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणादिति भावः। **उत्परस्येति॥** 'चर गतौ भक्षणे च' अस्माद्यङ्लुकि लटस्तिपि ईडभावे द्वित्वे 'चरफलोश्च' इत्यभ्यासस्य नुक्। 'उत्परस्यातः' इत्युत्तरखण्डे अकारस्य उत्त्वं 'हलि च' इति दीर्घः। चञ्चूर्तीति रूपम्। तिपमाश्रित्य उकारस्य लघूपधगुणस्तु न। उदिति तपरकरणसामर्थ्यात्। अन्यथा उरित्युक्तेऽपि "भाव्यमानोऽण् सवर्णान् न गृह्णाति" इत्येव दीर्घादिव्यावृत्तेरित्यर्थः। ननु उदिति तपरकरणाद्यथा गुणो निवर्तते तथा 'हलि च' इति दीर्घोऽपि निवर्तेत इत्यत आह। **हलि चेति दीर्घस्तु स्यादेवेति॥** कुत इत्यत आह। **तस्येति॥** 'हलि च' इति दीर्घशास्त्रस्य त्रैपादिकत्वेन 'उत्परस्यातः' इति शास्त्रम्प्रत्यसिद्धतया तपरकरणेन तन्निवृत्तेरसम्भवादित्यर्थः। वस्तुतस्तु गुणस्यापि बहिरङ्गतया असिद्धत्वात्तपरत्वनिवर्त्यत्वं न भवति। अतएव विप्रतिषेधसूत्रे भाष्ये 'उदोष्ठ्य' इत्युत्त्वे पोपूर्यते इत्यत्राभ्यासगुणो दृश्यमानः उपपद्यते इति शब्देन्दुशेखरे प्रपञ्चितम्। **अचञ्चूरिति॥** लङस्तिपि ईडभावे हल्ङ्यादिना तलोपे प्रत्ययलक्षणेन 'हलि च' इति वा पदान्तत्वात् 'वोरुपधायाः' इति वा दीर्घः। 'खनु अवदारणे' अस्माद्यङ्लुकि उदाहरति। **चङ्घ्नीतीति॥ चङ्घ्नाहीति॥** हेर्पित्त्वेन ङित्त्वात् 'जनसन' इत्यात्त्वम्। **अचङ्घ्नीदिति॥** 'आस्तिसिचः' इति नित्यमीट्। 'अतो हलादेः' इति वृद्धिविकल्पः। युधातोः योयोतीत्यत्र 'उतो वृद्धिः' इति वृद्धिमाशङ्क्य आह। **उतो वृद्धिरित्यत्रेति॥ आशिषि दीर्घः इति॥** 'अकृत्सार्वधातुकयोः' इत्यनेनेति भावः। **अयोयावीदिति॥** ईटि सिचि वृद्धिः। नुधातोरपि युधातुवद्रूपाणीति मत्वा आह।

अयोयोत् । योयुयात् । आशिषि दीर्घः । योयूयात् । अयोयावीत् । नोनवीति–नोनोति । जाहेति–जाहाति । 'ई हल्यघोः' (सू २४९७) । जाहीतः । इह 'जहातेश्च' (सू २४९८) 'आ च हौ' (सू २४९९) 'लोपो यि' (सू २५००) 'घुमास्था' (सू २४६२) 'एर्लिङि' (सू २३७४) इत्येते पञ्चापि न भवन्ति । ङितपा निर्देशात् । जाहति । जाहासि–जाहेषि । जाहीथः । जाहीथ । जाहीहि । अजाहेत्–अजाहात् । अजाहीताम् । अजाहुः । जाहीयात् । आशिषि जाहायात् । अजाहासीत् । अजाहासिष्टाम् । अजाहिष्यत् । लुका लुप्ते प्रत्ययलक्षणाभावात् 'स्वपिस्यमि—' (सू २६४५) इत्युत्त्वं न । 'रुदादिभ्यः—' (सू २४७४) इति गणनिर्दिष्टत्वादीण्न । सास्व-

---

नोनवीतीति ॥ हाङ्हाकोर्यङ्लुकि तुल्यानि रूपाणि । ङित्त्वप्रयुक्तात्मनेपदस्य यङ्लुकि अप्रवृत्तेरुक्तत्वादिति मत्वा आह । **जाहेतीति** ॥ हाङ्हाकोर्यङ्लुगन्ताल्लटस्तिपि ईटि आद्गुणे रूपम् । नच हाङोऽभ्यासस्य 'भृञामित्' इति इत्त्वम्। हाकस्तु तन्नास्ति । भृञ् माङ् ओहाङ् एषान्त्रयाणामेव तत्र ग्रहणात् कथं हाङ्हाकोस्तुल्यत्वमिति शङ्क्यम् । 'भृञामित्' इत्यस्य श्लावेव प्रवृत्तेः । न चाकित इति निषेधात् हाकोऽभ्यासस्य दीर्घाभावात् कथमुभयोस्तुल्यरूपत्वमिति वाच्यम् । क् इत् यस्य सः कित् न विद्यते कित् यस्य सः अकित् तस्य अकित इति बहुव्रीहिगर्भबहुव्रीह्याश्रयणात् । इह च हाको धातोः कित्त्वेऽपि न किद्वत्त्वम् । तदभ्यासस्य तु दूरेतरान्न किद्वत्त्वम् । 'द्विः प्रयोगो द्विर्वचनं षाष्ठम्' इति सिद्धान्तात् । बहुव्रीह्याश्रयणसामर्थ्यादेव व्यपदेशिवत्त्वेन हाको न कित्त्वम् । अतो हाकोऽप्यभ्यासदीर्घो निर्बाध इति भावः । **जाहीतः इति** ॥ हाङ्हाकोस्तसि ईत्वमेव । ननु हाको 'जहातेश्च' इति इत्त्वविकल्पः कुतो नेत्यत आह । **इहेति** ॥ हलादौ किङिति सार्वधातुके 'जहातेश्च' इति इत्त्वविकल्पः । तथा 'आ च हौ' इति जहातेर्हौ परे आत्वमीत्वञ्च, तथा 'लोपो यि' इति यादौ सार्वधातुके जहातेरल्लोपश्च, तथा 'घुमास्था' इति जहातेर्हलादौ किङित्यार्धधातुके ईत्वञ्च, तथा 'एर्लिङि' इति जहातेरार्धधातुके परे किङित्येत्वञ्च, इत्येते पञ्चापि विधयो यङ्लुकि न भवन्तीत्यर्थः । कुत इत्यत आह । **ङितपेति** ॥ एषाञ्च जाहीतः इत्यत्र 'ई हल्यघोः' इति ईत्वमेव । नात्वित्त्वविकल्प इति स्थितम् । **जाहतीति** ॥ 'अदभ्यस्तात्' इत्यदादेशः 'श्नाभ्यस्तयोः' इत्यात्लोपः । जाहाश्चकार । जाहिता । जाहिष्यति । जाहेतु–जाहातु–जाहीतात् । जाहीताम् । जाहतु । **जाहीहीति** ॥ हेरपित्त्वेन ङित्त्वादीत्वम् । इह 'आ च हौ' इति न । विधिलिङ्याह । **जाहीयादिति** ॥ 'ई हल्यघोः' इति ईत्वमेव । 'लोपो यि' इत्यात्लोपस्तु न । आशिषि । **जाहायादिति** ॥ इह 'घुमास्था' इति ईत्वन्न । 'एर्लिङि' इत्यपि न । **अजाहासीदिति** ॥ 'यमरम' इति सगिटौ । 'ञि ष्वप् शये' अस्य यङ्लुकि 'स्वपिस्यमिव्येञां यङि' इति सम्प्रसारणमाशङ्क्य आह । **लुका लुप्ते इति** ॥ **उत्त्वन्नेति** ॥ वस्य सम्प्रसारणन्नेत्यर्थः । ईडभावपक्षे 'रुदादिभ्यः'

पीति–सास्वप्नि । सास्वप्नः । सास्वपति । असास्वपीत्–असास्वप् । सास्वप्यात् । आशिषि तु 'वचिस्वपि—' (सू २४०९) इत्युत्त्वम् । सासुप्यात् । असास्वापीत्–असास्वपीत् ।

२६५२ । रुग्रिकौ च लुकि । (७-४-९१)

ऋदुपधस्य धातोरभ्यासस्य 'रुक्' 'रिक्' रीक्' एते आगमाः स्युर्यङ्लुकि ।

२६५३ । ऋतश्च । (७-४-९२)

ऋदन्तधातोरपि तथा । वर्वृतीति–वरिवृतीति–वरीवृतीति । वर्वर्ति–वरिवर्ति–वरीवर्ति । वर्वृतः–वरिवृतः–वरीवृतः । वर्वृतति–वरिवृतति–वरीवृतति । वर्वर्तामास–वरिवर्तामास–वरीवर्तामास । वर्वर्तिता–वरिवर्तिता–वरीवर्तिता । गणनिर्दिष्टत्वात् 'न वृद्भ्यश्चतुर्भ्यः (सू २६४८) इति न । वर्वर्तिष्यति–वरिवर्तिष्यति–वरीवर्तिष्यति । अवर्वृतीत्–अवरिवृतीत्–अवरीवृतीत् । अवर्वर्त्–अवरिवर्त्–अवरीवर्त् । सिपि 'दश्च' (सू २४६८) इति रुत्वपक्षे 'रो रि' (१७३) अवर्वाः–अवरिवाः–अवरीवाः । गणनिर्दिष्टत्वादङ् न । अवर्वर्तीत्–अवरिवर्तीत् ।

इटमाशङ्क्य आह । **रुदादिभ्यः इति** ॥ **असास्वप् इति** ॥ लङस्तिपि ईडभावे हल्ङ्यादिलोपः । **असास्वापीत् इति** ॥ 'अतो हलादेः' इति वृद्धिविकल्पः । 'अस्तिसिचः' इति नित्यमीट् । **रुग्रिकौ च लुकि** ॥ 'ऋदुपधस्य च' इत्यतः ऋदुपधस्येत्यनुवर्तते । रिगपि इह चकारात् समुच्चीयते । 'अत्र लोपः' इत्यतः अभ्यासस्येत्यनुवर्तते । 'गुणो यङ्लुकोः' इत्यतः यङ्लुक्ग्रहणञ्च । तदाह । **ऋदुपधस्येत्यादिना** ॥ रुकि उकार उच्चारणार्थः । रिकि तु इकारः श्रूयत एव । एवं रीकि ईकारश्च । व्याख्यानात् । **ऋतश्च** ॥ **तथेति** ॥ अभ्यासस्य रुक् रिक् रीक् एते आगमाः स्युः यङ्लुकीत्यर्थः । 'वृतु वर्तने' अस्माद्यङ्लुगन्तात् वर्वृत् इत्यस्माल्लटस्तिपि ईट्पक्षे अभ्यासस्य क्रमेण रुकं रिकं रीकञ्चोदाहरति । **वर्वृतीति–वरिवृतीति–वरीवृतीति इति** ॥ ईट्पक्षे 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति निषेधान्न लघूपधगुणः । ईडभावेऽपि रुगाद्यागमत्रयमुदाहरति । **वर्वर्तीत्यादि** ॥ **इति नेति** ॥ इण्निषेधो नेत्यर्थः । लोटि वर्वृतीतु–वर्वर्त्तु–वर्वृत्तात् । वर्वृत्ताम् । वर्वृततु । वर्वृद्धि । वर्वर्तानि । लङस्तिपि ईटि आह । **अवर्वृतीदिति** ॥ ईडभावे त्वाह । **अवर्वर्त् इति** ॥ हल्ङ्यादिना तिपो लोपः । 'रात्सस्य' इति नियमान्न संयोगान्तलोपः । **अवर्वाः इति** ॥ लङस्तिपि अवर्वर्त् सि इति स्थिते 'दश्च' इति दकारस्य रुत्वे 'रो रि' इति पूर्वरेफस्य लोपे ढ्रलोपे इति दीर्घे हल्ङ्यादिना सिपो लोपे रेफस्य विसर्गे इति भावः । **अङ् नेति** ॥ 'पुषादिद्युतादि' इत्यनेनेति शेषः । 'अस्तिसिचः' इति नित्यमीट् । अथ 'डु कृञ् करणे' इति धातोरुदाहरति ।

अवरीवर्तीत्। चर्करीति--चर्कर्ति--चरिकर्ति--चरीकर्ति । चर्कृतः । चर्क्रति । चर्कराञ्चकार । चर्करिता । अचर्करीत्--अचर्कः । चर्कर्यात् । आशिषि रिङ् । चर्क्रियात् । अचकर्करीत् । 'ऋतश्च' (सू २६५३) इति तपरत्वान्नेह । 'कॄ विक्षेपे'। चाकर्ति । तातर्ति । तातीर्तः । तातिरति । तातीर्हि । तातराणि । अतातरीत्--अतातः । अतातीर्ताम् । अतातरुः । अतातारीत् । अतातारिष्टा-मित्यादि । अर्तेर्यङ्लुकि द्वित्वेऽभ्यासस्योरदत्त्वं रपरत्वम् । 'हलादिः शेषः' (सू २१७९) रुक् । रिग्रीकोस्तु 'अभ्यासस्यासवर्णे' (सू २२९०) इति इयङ् । अरर्ति--अरियर्ति । अररीति--अरियरीति । अर्कृतः-अरियृतः । झि अत् । यण् । रुको 'रो रि' (सू १७३) इति लोपः । न च तस्मिन्कर्तव्ये यणः स्थानिवत्त्वम् ।

चर्करीतीत्यादि ॥ चर्कर्यादिति ॥ विधिलिङस्तिङस्सार्वधातुकत्वात् 'अकृत्सार्वधातुकयोः' इति दीर्घो न । **आशिषीति ॥** आशीर्लिङ आर्धधातुकत्वात् 'रिङ् शयग्लिङ्क्षु' इति रिङिति भावः । **लुकि अचर्कारीदिति ॥** सिचि वृद्धिः । **ऋतश्च इति तपरत्वान्नेहेति ॥** रुग्रिग्रीक इति शेषः । **चाकर्तीति ॥** ईडभावे रूपम् । नचाभ्यासह्रस्वत्वे 'रीगृत्वतः' इति रीक् शङ्क्यः । नित्यत्वादुरदत्त्वस्य प्राप्तेः । चाकीर्तः । चाकिरति । इत्यादि । ङित्त्वाद्गुणाभावे ऋत इत्वं रपरत्वम् । चाकरीति । चाकीर्तः । चाकिरति । चाकराञ्चकार । चाकरिता । चाकर्तु--चाकीर्तात् । चाकिरतु । चाकीर्हि । चाकराणि । लङि अचाकरीत्--अचाकः । अचाकीर्ताम् । अचाकरुः । विधाबा-शिषि च चाकीर्यात् । यासुटो ङित्त्वान्न गुणः । इत्वं 'हलि च' इति दीर्घः । चाकीर्यातम्, चाकीर्या-स्ताम्, इत्यादि । लुङि अचाकरीत्, अचाकरिष्टाम्, इत्यादि । एवं 'तॄ प्लवनतरणयोः' इत्यस्या-पि रूपाणि । अद्वैतदीपिकायां तु चोद्यं नावतरीतर्तीति लेखकप्रमादः । चोद्यन्तु नावतातर्तीति पाठःप्रामाणिकः । **अर्तेरिति ॥** 'सूचिसूत्रि' इत्यादिना ऋधातोर्यङ् । तस्य लुक् । व्यपदेशिवत्त्वेन ऋ इत्यस्य आदिभूतादचः परत्वात् द्वितीयैकाच्त्वाच्च द्वित्वम् । अभ्यासऋवर्णस्य अत्त्वे रपरत्वे अर् ऋ इति स्थिते हलादिशेषेण रेफस्य निवृत्तिः । अ ऋ इति स्थिते अभ्यासस्य रुक् । लटस्तिपि ईडभावे अर् ऋ ति इति स्थिते तिपि ऋकारस्य गुणे अकारे रपरे सति अरर्तीति रूपमित्यर्थः । **रिग्रीकोस्त्विति ॥** यङ्लुकि द्वित्वे उरदत्त्वे हलादिशेषे अ ऋ इति स्थिते रिकि रीकि च कृते तिपि उत्तरखण्डस्य ऋकारस्य गुणे अकारे रपरे कृते अरि अर्तीति स्थिते अभ्यासे रेफादिवर्णस्य यण-म्बाधित्वा 'अभ्यासस्यासवर्णे' इति इयङि अरियर्तीति रिग्रीकोस्तुल्यं रूपमित्यर्थः । अथ लट-स्तिपि ईट्पक्षे आह । **अररीति--अरियरीतीति ॥ अर्कृतः इति ॥** रुकि तासि रूपम् । ङि-त्वान्न गुणः । **अरियृतः इति ॥** द्वित्वे उरदत्त्वे हलादिशेषे अ ऋ तस् इति स्थिते रिकि रीकि च कृते इयङादेशे रूपम् । **झि अदिति ॥** झि इत्यविभक्तिकनिर्देशः उदाहरणसूचनार्थः । 'अदभ्यस्ता-त्' इति झेः अदादेश इति यावत् । **यणिति ॥** रुकि कृते अर् ऋ अति इति स्थिते ऋकारस्य यण् रेफ इत्यर्थः । तथाच अर् र् अतीति स्थिते आह । **रुको रो रीति लोपः इति ॥** ननु

पूर्वत्रासिद्धे तन्निषेधात्। आरति–अरियृति। लिङि श्ितपा निर्देशात् 'गुणोऽर्ति—' (सू २३८०) इति गुणो न। रिङ्। रलोपः। दीर्घः। आरियात्–अरियृयात्। 'गृहू ग्रहणे' जगृर्हीति–जगर्गर्ढि। जगृढः। जगृहति।

रेफलोपे कर्तव्ये यणादेशसम्पन्नस्य रेफस्य 'अचः परस्मिन्' इति स्थानिवत्त्वात् ऋकारपरकत्वाद्रेफपरकत्वाभावात् कथं पूर्वरेफस्य लोप इत्यत आह। **पूर्वत्रासिद्धे तन्निषेधादिति** ॥ पूर्वत्रासिद्धीयकार्ये कर्तव्ये स्थानिवत्त्वनिषेधादित्यर्थः। **आरतीति** ॥ अर् र् अति इति स्थिते पूर्वरेफस्य लोपे सति 'ढ्रलोपे' इति दीर्घः। नच यणः स्थानिवत्त्वं शङ्क्यम्। दीर्घविधौ तन्निषेधादिति भावः। **अरियृतीति** ॥ द्वित्वे उरदत्त्वे हलादिशेषे रिकि रीकि च कृते परत्वादभ्यासस्य इयङि ततो यणि रिग्रीकोस्तुल्यमेव रूपमित्यर्थः। अरर्षि–अरियर्षि–अररीषि–अरियरीषि। अर्क्थः–अरियृथः। अरार्मि–अरियर्मि–अररीमि–अरियरीमि। अर्क्वः–अरियृवः। अरराञ्चकार–अरियराञ्चकार। अररिता–अरियरिता। अररिष्यति–अरियरिष्यति। अरर्तु—अरियर्तु—अररीतु—अरियरीतु—अर्क्तात्—अरियृतात्। अर्क्ताम्—अरियृताम्। आरतु–अरियृतु। अर्क्हि–अरियृहि। अरराणि–अरियराणि। अरराव–अरियराव। लङि आरः – आरियः – आररीत् – आरियरीत्। आर्क्ताम् – आरियृताम्। आररुः–आरियरुः। आरः – आरियः – आररीः – आरियरीः। आर्क्तम् – आरियृतम्। आर्क्त–आरियृत। आररम्–आरियरम्। आर्क्व–आरियृव। विधिलिङि अर्क्यात्–अरियृयात्। अर्क्यायाताम्–अरियृयायाताम्। अर्क्युः–अरियृयुः। इत्यादि। आशीर्लिङि विशेषमाह। **लिङि श्ितपेति** ॥ रुकि अर् ऋ यात् इति स्थिते 'आर्ति' इति श्तिपा निर्देशात् 'गुणोऽर्ति' इति गुणो नेत्यर्थः। **रिङिति** ॥ ऋकारस्येति शेषः। तथाच अर् रि यात् इति स्थिते आह। **दीर्घः इति** ॥ 'रो रि' इति लोपे 'ढ्रलोपे' इति दीर्घ इत्यर्थः। तथाच परिनिष्ठितमाह। **आरियादिति** ॥ रिग्रीकोस्त्वाह। **अरियृियादिति** ॥ अरि ऋ यात् अरी ऋ यात् इति स्थिते इवर्णस्य इयङ् ऋकारस्य रिङ्। 'लोपो व्योः' इति यलोपस्तु न। बहिरङ्गत्वेन रिङोऽसिद्धत्वात्। 'अचः परस्मिन्' इति स्थानिवत्त्वाच्च। 'न पदान्त' इति निषेधस्तु न शङ्क्यः। 'स्वरदीर्घयलोपेषु लोपरूपाजादेश एव न स्थानिवत्' इत्युक्तेरित्यलम्। लुङि आरारीत्–आरियारीत्। लृङि आररिष्यत्–आरियरिष्यत्। **गृहू ग्रहणे इति** ॥ ऋदुपधोऽयम्। यङ्लुकि द्वित्वे उरदत्त्वे हलादिशेषे अभ्यासस्य रुग्रिग्रीकः। तदाह। **जगृर्हीतीत्यादि** ॥ ईट्पक्षे 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति लघूपधगुणनिषेधः। ईडभावे त्वाह। **जगर्गर्ढि इत्यादि** ॥ जगृह् ति इति स्थिते लघूपधगुणे रपरत्वे ढत्वधत्वष्टुत्वढलोपाः। 'यणो मयः' इति शिष्टस्य ढस्य द्वित्वविकल्पः। एवं जरिगर्ढि–जरीगर्ढि। **जगृढः इति** ॥ रुक् ढत्वधत्वष्टुत्वढलोपाः। ङित्त्वान्न गुणः। एवं जरिगृढः–जरीगृढः। **जगृहतीति** ॥ ३। 'अदभ्यस्तात्' इत्यत्। जगृर्हीषि–जरिगृर्हीषि–जरीगृर्हीषि। 'नाभ्यस्तस्याचि पिति' इति न लघूपधगुणः। जगर्धर्क्षि–जरिघर्क्षि–जरीघर्क्षि। जगृढः–जरिगृढः–जरीगृढः। जगृढ–जरिगृढ–जरीगृढ। जगृर्हीमि–जरिगृर्हीमि–जरीगृर्हीमि। जगर्गर्ह्मि–जरिगर्ह्मि–जरीगर्ह्मि। जगृह्वः–

अजघर्ट्। गृह्णातेस्तु जाग्रहीति--जाग्राढि। तसादौ ङिन्निमित्तं सम्प्रसारणम्। तस्य बहिरङ्गत्वेनासिद्धत्वान्न रुगादयः। जागृढः। जागृहति। जाग्रँहीषि--जाग्रक्षि। लुटि। जाग्रहिता। 'ग्रहोऽलिटि'--(सू २५६२) इति दीर्घस्तु न। तत्र 'एकाचः' इत्यनुवृत्तेः। माधवस्तु दीर्घमाह। तद्भाष्यविरुद्धम्। जर्गृधीति--

---

जरिगृह्णः--जरीगृह्णः। जर्गृह्मः--जरिगृह्मः--जरीगृह्मः। जर्गर्हाञ्चकार--जरिगर्हाञ्चकार--जरीगर्हाञ्चकार। जर्गर्हिता--जरिगर्हिता--जरीगर्हिता। जर्गर्हिष्यति--जरिगर्हिष्यति--जरीगर्हिष्यति। जर्गृहीतु--जरिगृहीतु--जरीगृहीतु--जर्गर्द्धु--जरिगर्द्धु--जरीगर्द्धु--जर्गृढात्--जरिगृढात्--जरीगृढात्। जर्गृढाम्--जरिगृढाम्--जरीगृढाम्। जर्गृहतु--जरिगृहतु--जरीगृहतु। जर्गृढि--जरिगृढि--जरीगृढि। जर्गृहाणि--जरिगृहाणि--जरीगृहाणि। लङि अजर्गृहीत्--अजरिगृहीत्--अजरीगृहीत्। ईडभावे तु अजर्गर्ह्ट्त् इति स्थिते हल्ङ्यादिना तलोपे हस्य ढत्वे गस्य भष् धकारः। अजर्घर्ट्--अजरिघर्ट्--अजरीघर्ट्। एकाज्ग्रहेण सत्यपीह यङ्लुकि भष्। 'गुणो यङ्लुकोः' इत्यनेन "ङितपा शपा" इति निषेधस्यानित्यत्वज्ञापनादित्याहुः। अजर्गृढाम् ३। अजर्गृहुः ३। अजर्गृहीः ३--अजर्घर्ट् ३। अजर्गृढम् ३। अजर्गृढ ३। अजर्गृहम् ३। अजर्गृह्व ३। अजर्गृह्म ३। जर्गृह्यात् ३। लुङि 'अस्तिसिचः' इति नित्यमीट्। अजर्गर्हीत् ३। अजर्गर्हिष्यत् ३। **गृह्णातेस्त्विति** ॥ 'ग्रह उपादाने' इत्यस्मादित्यर्थः। अदुपधोऽयम्। ईटि आह। **जाग्रहीतीति** ॥ यङो लुका लुप्तत्वात् तिपः पित्त्वाच्च 'ग्रहिज्या॰' इति सम्प्रसारणन्नेति भावः। ईडभावे त्वाह। **जाग्राढीति** ॥ जाग्रह् ति इति स्थिते ढत्वधत्वष्टुत्वढलोपदीर्घाः। जाग्रह् तस् इति स्थिते आह। **तसाविति** ॥ ननु कृते सम्प्रसारणे ऋदुपधत्वात् रुगादीनाशङ्क्य आह। **तस्येति** ॥ सम्प्रसारणस्येत्यर्थः। **जागृढः इति** ॥ ढत्वधत्वष्टुत्वढलोपाः। 'ढ्रलोपे' इति दीर्घस्तु न। ऋकारस्यानणत्वात्। जागृहति। सिपः पित्त्वान्न सम्प्रसारणमिति मत्वा आह। **जाग्रहीषि--जाग्रक्षीति** ॥ ईडभावे हस्य ढः तस्य कः सस्य षः। जागृढः। जागृढ। जाग्रहीमि--जाग्रह्मि। जागृह्वः। जागृह्मः। **इत्यनुवृत्तेरिति** ॥ 'एकाचो द्वे' इति सूत्रे हरदत्तेन तथोक्तत्वादिति भावः। **माधवस्त्विति** ॥ एकाज्ग्रहणान्नानुवर्तत इति तदाशयः। **भाष्यविरुद्धमिति** ॥ 'एकाचो द्वे प्रथमस्य' इति सूत्रभाष्ये 'ग्रह उपादाने' इत्यस्माद्यङि सम्प्रसारणे अभ्यासस्य रीकि यङन्तात् जरीगृहिता। जरीगृहितम्। जरीगृहितव्यमित्यत्र इटो दीर्घाभावं सिद्धवत्कृत्य तत्र दीर्घमाशङ्क्य ग्रहोऽज्ञात्परस्य इटो दीर्घो विधीयते। जरीगृह् इत्यङ्गं तच्च न ग्रहधातुरिति निरूप्याङ्गविशेषणसामर्थ्यादेव "प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्" इति नात्र प्रवर्तत इति समाहितम्। यङन्ते उक्तो न्यायो यङ्लुगन्तेऽपि जाग्रहितेत्यादौ समानः इत्यादि प्रौढमनोरमायां ज्ञेयम्। नच हरदत्तमते एकाज्ग्रहणानुवृत्त्यैवात्र दीर्घनिवारणे सति भाष्योक्तमिदं समाधानन्नादरणीयमिति वाच्यम्। उपायस्य उपायान्तरादूषकत्वादिति अलम्। जाग्रहिष्यति। जाग्रहीतु--जाग्राढु--जाग्राढात्। जागृढाम्। जागृहतु। हौ जागृढि। जाग्रहाणि। लङि अजाग्रहीत्--अजाग्राट्। अजागृढाम्। अजागृढम्। अजागृढ। अजाग्रहम्। अजागृह। अजागृह्व। जागृह्यात्। लुङि अजाग्रहीत् 'ह्रयन्त' इति न

जगर्द्धि। जगृद्धः। जगृधति। जगृधीषि—जघर्त्सि। अजगृधीत्। **ईडभावे गुणः**। **हलङ्यादिलोपः**। भष्भावः। जश्त्वचर्त्वे। **अजघर्त्**। **अजगृद्धाम्**। **सिपि 'दश्च'** (सू २४६८) इति पक्षे रुत्वम्। अजघाः। अजगर्धीत्। अजगर्धिष्टाम्। पाप्रच्छीति। पाप्रष्टि। तसादौ 'ग्रहिज्या—' (सू २४१२) इति सम्प्रसारणं न भवति। ङितपा निर्देशात्। 'च्छ्वोः शूठ्—' (सू २५६१) इति शः। 'व्रश्च—' (सू २९४) इति षः। पाप्रष्टः। पाप्रच्छति। पाप्रश्मि। पाप्रच्छ्वः। पाप्रश्मः।

वृद्धिः। 'अस्तिसिचः' इति नित्यमीट्। अजाग्रहिष्यत्। 'गृधु अभिकांक्षायाम्'। अस्माद्य ङ्लुगन्ताल्लटस्तिपि ईटि आह। **जगृधीतीति** ॥ 'नाभ्यस्तस्य' इति न लघूपधगुणः। ईडभावे आह। **जगर्द्धीति** ॥ जगृध् ति इति स्थिते 'झषस्तथोः' इति तकारस्य धः। लघूपधगुणः रपरत्वम्। **जगृद्धः इति** ॥ तसादौ ङित्त्वान्न गुणः। 'झषस्तथोः' इति तस्य धः। **जघर्त्सीति** ॥ जगृध् सि इति स्थिते गस्य भष् घः गुणः रपरत्वं धस्य चर्त्वम्। जगर्द्धि ३—जगृधीमि ३। जगृध्वः ३। जगर्धाञ्चकार ३। जगर्धिता ३। जगर्धिष्यति ३। जगृधीतु ३—जगर्द्धु ३—जगृद्धात् ३। हौ जगृद्धि ३। जगृधानि ३। लङि तिपि ईट् अजगृधीत् ३। **ईडभावे इति** ॥ अजगृध् त् इति स्थिते पित्त्वादाङित्त्वात् गुणे रपरत्वे हल्ङ्यादिना तकारलोपे पदान्तत्वात् गस्य भष् घकारः। धस्य जश्त्वेन दकारे तस्य 'वावसाने' इति चर्त्वविकल्प इत्यर्थः। **अजघर्त्** **इति** ॥ 'रात्सस्य' इति नियमान्न संयोगान्तलोपः। अजगृद्धाम्। अजगृधुः। सिपि ईडभावपक्षे अजगृध् स इति स्थिते गुणे रपरत्वे हल्ङ्यादिलोपे भष्भावे धस्य जश्त्वे तस्य चर्त्वाविकल्पे पूर्ववदेव रूपं सिद्धवत्कृत्य आह। **सिपि दश्चेति पक्षे रुत्वमिति** ॥ तथाच अजघर् र्इति स्थिते 'रो रि' इति लोपे 'ढ्रलोपे' इति दीर्घे शिष्टरेफस्य विसर्गे अजघाः इति रूपमित्यर्थः। अजगृद्धम्। अजगृद्ध। अजगृधम्। अजगृध्व। लुङि आह। **अजगर्धीदिति** ॥ 'अस्तिसिचः' इति नित्यमीट्। **पाप्रच्छीतीति** ॥ 'प्रच्छ ज्ञीप्सायाम्' अस्माद्यङ्लुगन्ताल्लटस्तिपि ईटि रूपम्। ईडभावे आह। **पाप्रष्टीति**॥ व्रश्चेति छस्य षः। तकारस्य ष्टुत्वेन टः। 'च्छ्वोः' इति छस्य शकारस्तु नात्र भवति। तस्य अनुनासिकादौ प्रत्यये क्ङौ झलादौ किति ङिति च विहितत्वात्। ननु तिपः पित्त्वेन ङित्त्वाभावात् 'ग्रहिज्या' इति सम्प्रसारणाभावेऽपि तसो ङित्त्वात् सम्प्रसारणं दुर्वारमित्यत आह। **तसादाविति**। **ङितपेति**॥ 'ग्रहिज्या' इति सूत्रे प्रच्छतीति ङितपा निर्देशादित्यर्थः। **पाप्रच्छतीति** ॥ 'अदभ्यस्तात्' इत्यत्। पाप्रच्छीषि। सिपि ईडभावे तु 'च्छ्वोः' इति छस्य न शः। सिपो झलादित्वेऽपि ङित्त्वाभावात्। किन्तु 'व्रश्च' इति ष एव 'षढोः' इति षस्य कः सस्य षत्वम्। पाप्रक्षि। पाप्रष्टः। पाप्रष्ट। **पाप्रश्मीति** ॥ अनुनासिकप्रत्ययपरकत्वात् छस्य 'च्छ्वोः' इति श इति भावः। **पाप्रच्छ्वः इति**॥ अत्र 'च्छ्वोः' इति न शः। वसो झलादित्वाभावात्। **पाप्रश्मः इति** ॥ अनुनासिकादिप्रत्ययपरकत्वात् छस्य शः। पाप्रच्छाञ्चकार। पाप्रच्छिता। पाप्रच्छिष्यति। पाप्रच्छीतु—पाप्रष्टु—पाप्रष्टात्। पाप्रष्टाम्। पाप्रच्छतु। हेर्द्धिः। अपित्त्वेन ङित्त्वात् झलादित्वाच्च छस्य शः। तस्य 'व्रश्च' इति षः। ष्टुत्वेन धस्य ढः। षस्य जश्त्वेन डः। पाप्रड्ढि। पाप्रच्छानि।

'यकारवकारान्तानां तु ऊठ्भाविनां यङ्लुङ् नास्ति' इति 'च्छ्वोः'—' (सू २५६१) इति सूत्रे भाष्ये ध्वनितं कैयटेन स्पष्टीकृतम् । इदं च 'च्छ्वोः—' (सू २५६१) इति यत्रोठ् तद्विषयकम् । 'ज्वरत्वर—' (सू २५६४) इत्यूठ्भाविनोः स्निविमव्योस्तु यङ्लुगस्त्येवेति न्याय्यम् । माधवादिसम्मतं च । 'मव्य बन्धने' अयं यान्त ऊठ्भावी 'तेवृ देवृ देवने' इत्यादयो वान्ताः । 'हय गतौ' जाहयीति--जाहति । जाहतः । जाहयति । जाहयीषि—जाहसि ।

लङि तिपि ईटि अपाप्रच्छीत् । ईडभावेतु अपाप्रच्छ् त् इति स्थिते हल्ङ्यादिना तलोपे छस्य षः तस्य जश्त्वचर्त्वे। अपाप्रट्। अपाप्रष्टाम्। अपाप्रच्छुः। अपाप्रच्छीः-अपाप्रट्। अपाप्रष्टम्। अपाप्रष्ट। अपाप्रच्छम्। अपाप्रच्छ्व। अपाप्रश्म। लिङि पाप्रच्छ्यात्। लुङि अपाप्रच्छीत्। 'अस्तिसिचः' इति नित्यमीट्। अपाप्राच्छिष्यत्। **ऊठ्भाविनामिति** ॥ 'भू प्राप्तौ' चुरादिराधृषीयः। तस्मात् 'आवश्यकाधमर्ण्ययोर्णिनिः' इति भविष्यदर्थे णिनिः । ऊठं प्राप्स्यतामित्यर्थः। ऊठ्विषयाणामिति यावत्। **ध्वनितमिति** ॥ सूचितमित्यर्थः। **स्पष्टीकृतमिति** ॥ तथाहि 'च्छ्वोः' इति सूत्रे ङिच्रहणानुवृत्तौ कांश्चित् दोषानुद्भाव्य परिहृत्य ङिङ्रहणानुवृत्तिं स्वीकृत्योक्तं भाष्ये । एतावानेव विशेषः । अनुवर्तमाने ङिङ्रहणे छष्त्वं वक्तव्यमिति। अत्र कैयटः । प्रष्टा, प्रष्टमित्यादौ 'च्छ्वोः' इति छस्य शत्वे कृते तस्य 'व्रश्च' इति षत्वे ष्टुत्वमिति स्थितिः । तत्र ङिदतीत्यनुवृत्तौ छस्य शत्वन्न स्यात् । अतः छस्य षत्वं वक्तव्यमित्यर्थः। नच ङिङ्रहणानुवृत्तावल्ल शत्वाभावेऽपि न दोषः । व्रश्चादिना छस्य षत्वे इष्टसिद्धेरिति वाच्यम्। 'च्छ्वोः' इत्यत्र "छस्य षत्वं वक्तव्यम्" इत्यनेनैव प्रष्टेत्यादिसिद्धेः व्रश्चादिसूत्रे छग्रहणन्न कर्तव्यमित्याशयात् । नच प्राङिति क्विबन्तात् सोर्लोपे षत्वार्थं व्रश्चादिसूत्रे छग्रहणमिति वाच्यम्। तत्रापि क्विब्निमित्तशादेशस्य दुर्निवारत्वात् । विचि तु प्रच्छधातोरनभिधानान्नास्ति । एवञ्चात्र भाष्ये "ऊठ्भाविभ्यो यङ्लुङ्नास्ति" इत्युक्तप्रायम् । अन्यथा 'च्छ्वोः' इत्यत्र ङिङ्रहणानुवृत्तौ दिवेर्यङ्लुकि तिबादौ ईडभावे लघूपधगुणे 'लोपो व्योः' इति वलोपे देदेति देदेषीत्याद्यूठः अभावे रूपम् । तदनुवृत्तौ तु वस्य ऊठि देद्योति, देद्योषि, इत्यादि रूपमिति विशेषस्य सत्त्वादेतावानेवेत्येवकारो विरुध्येत । अतः ऊठ्भाविनां यकारवकारान्तानां यङ्लुङ्नास्तीति विज्ञायते इत्यलम् । **इदञ्चेति** ॥ 'च्छ्वोः' इति सूत्रेण यत्र ऊठ् प्रवर्तते तद्विषयकमेव इदम् उक्तं ज्ञापनमित्यर्थः । **स्निविमव्योस्त्विति** ॥ 'स्निवु गतिशोषणयोः, मव्य बन्धने' इत्यनयोः इत्यर्थः। **न्याय्यमिति** ॥ उक्तज्ञापनस्य 'च्छ्वोः' इति सूत्रस्थभाष्यमूलकत्वादिति भावः। ननु ज्ञापनस्य सामान्यापेक्षत्वङ्कुतो नाश्रीयते इत्यत आह। **माधवादिसम्मतञ्चेति** ॥ उक्तविशेषवत्त्वमिति शेषः। **ऊठ्भावीति** ॥ अतो नास्य यङ्लुगिति भावः। **वान्ताः इति** ॥ ऊठ्भाविन इति शेषः। नैतेषामपि यङ्लुगिति भावः। ऊठ्भाविनामिति विशेषणस्य व्यावर्त्यमाह । **हय गताविति** ॥ अस्य यान्तत्वेऽपि ऊठ्विषयत्वाभावादस्त्येव यङ्लुगिति भावः । **जाहतीति** ॥ तिप ईडभावे 'लोपो व्योः'

बलि लोपे यञादौ दीर्घः। जाहामि। जाहावः। जाहामः। 'हर्य गतिकान्त्योः'। जाहर्यीति–जाहर्ति। जाहर्तः। जाहर्यति। लोटि। जाहर्हि। अजाहः। अजाहर्ताम्। अजाहर्युः।'मव बन्धने'।

२६५४। ज्वरत्वरस्रिव्यविमवामुपधायाश्च। (६-४-२०)

ज्वरादीनामुपधावकारयोरूठ् स्यात्कौ झलादावनुनासिकादौ च प्रत्यये। अत्र क्ङिति इति नानुवर्तते। अवतेस्तुनि 'ओतुः' इति दर्शनात्। अनुनासिकग्रहणं चानुवर्तते। अवतेर्मनिन्प्रत्यये तस्य टिलोपे 'ओम्' इति दर्शनात्। ईडभावे ऊठि पिति गुणः। मामोति–मामवीति। मामूतः। मामवति। मामोषि।

इति यलोपः। मिपि ईडभावे जाहर्य् मि इति स्थिते आह। **बलि लोपे इति**॥ ईटि जाहर्यीमि। जाहर्याञ्चकार। जाहर्यिता। जाहर्यिष्यति। लोटि जाहर्यीतु–जाहर्तु–जाहर्तात्। जाहर्ताम्। जाहर्यतु। जाहर्हि। जाहर्यानि। जाहर्याव। लङि अजाहर्यीत्–अजाहर्त्। अजाहर्ताम्। अजाहर्युः। अजाहर्यीः–अजाहः। अजाहर्तम्। अजाहर्त। अजाहर्यम्। अजाहर्व। अजाहर्म। जाहर्य्यात्। लुङि 'ह्मयन्त' इति न वृद्धिः। 'अस्तिसिचः' इति नित्यमीट्। अजाहर्यीत्। अजाहर्यिष्टाम्। अजाहर्यिष्यत्। **जाहर्तीति**॥ तिपि जाहर्य् ति इति स्थिते ईडभावे यलोपः। **जाहर्हीति**॥ हौ यलोपः। लङस्तिपि अजाहर्य् त् इति स्थिते यलोपः। हल्ङ्यादिना तकारलोपः। रेफस्य विसर्गः इति मत्वा आह। **अजाहः इति**॥ सिप्यप्येवं रूपम्। **ज्वरत्वरस्रिव्यविमवामुपधायाश्च**॥ ज्वर त्वर स्रिवि अवि मव् एषान्द्वन्द्वः। 'च्छ्वोः शूठ्' इत्यतः वकारग्रहणम् ऊठ्ग्रहणम् अनुनासिके इति चानुवर्तते। छस्य श इति नानुवर्तते। ज्वरादिषु छस्य अभावेन असम्भवात्। 'अनुनासिकस्य क्ङिझलोः क्ङिति' इत्यतः क्ङिझलोरिति चानुवर्तते। चकारो वकारसमुच्चयार्थः। तदाह। **ज्वरादीनामिति**॥ **अवतेस्तुनीति**॥ अवधातोरौणादिके तुन्प्रत्यये कृते अकारवकारयोरूठि तस्य गुणे ओतुरिति दृश्यते। क्ङितीत्यनुवृत्तौ तु तन्न स्यादिति भावः। **ओमिति**॥ 'अवतेष्टिलोपश्च' इत्यौणादिकसूत्रम्। 'अव रक्षणे' इति धातोर्मन्प्रत्ययः स्यात्। प्रत्ययस्य टेर्लोपश्चेति तदर्थः। तथाच अव् म् इति स्थिते उपधाभूतस्य अकारस्य वकारस्य च ऊठि तस्य गुणे ओमिति दृश्यते। 'ज्वरत्वर' इत्यत्र अनुनासिकग्रहणाननुवृत्तौ तु मनिनि परे अवतेरूठ् न स्यात्। क्ङिझलोरेव तद्विधिलाभादिति भावः। **ऊठि पितीति**॥ मवधातोर्यङ्लुक्। मामव् ति इति स्थिते ईडभावपक्षे अकारवकारयोरेकस्मिन् ऊठि तिपः पित्त्वेन ङित्त्वाभावादूकारस्य गुणे मामोतीति रूपमित्यर्थः। उपधायाः वकारस्य च प्रत्येकमूठ् इति पक्षे सवर्णदीर्घः। पक्षद्वयमपि 'एकः पूर्वपरयोः' इत्यत्र भाष्ये स्पष्टम्। ईट्पक्षे आह। **मामवीतीति**॥ अत्र ऊठ् न। क्ङौ झलादौ अनुनासिकादौ च परे तद्विधानात्। **मामूतः इति**॥ अकारवकारयोरूठि तसो ङित्त्वान्न गुण इति भावः। **मामवतीति**॥ 'अदभ्यस्तात्' इत्यत्। मामवीषीति सिद्धवत्कृत्य आह। **मामोषीति**॥ झल्परकत्वादूठ्। मामूथः। मामूथ।

मामोमि । मामावः । मामूमः । मामोतु--मामूतात् । मामूहि । मामवानि । अमामोत्--अमामोः । अमामवम् । अमामाव । अमामूम । 'तुर्वी हिंसायाम्' । तोतूर्वीति ।

२६५५ । राल्लोपः । (६-४-२१)

रेफात्परयोश्छ्वोर्लोपः स्यात्कौ झलादावनुनासिकादौ च प्रत्यये । इति वलोपः । लघूपधगुणः ।

२६५६ । न धातुलोप आर्धधातुके । (१-१-४)

धात्वंशलोपनिमित्ते आर्धधातुके परे इको गुणवृद्धी न स्तः । इति नेह

मामवीमि इति सिद्धवत्कृत्य आह । **मामोमीति** ॥ अनुनासिकपरकत्वाद्दूट् । गुणः । **मामावः इति** ॥ मामव् वस् इति स्थिते परनिमित्ताभावाद्दूट् न । 'लोपो व्योः' इति वलोपे 'अतो दीर्घो यञि' इति दीर्घः । **मामूमः इति** ॥ मामव् मस् इति स्थिते अनुनासिकपरकत्वाद्दूट् । ङित्त्वान्न गुणः । मामवाञ्चकार । मामविता । मामविष्यति । लोटि आह । **मामोत्विति** । **मामूतादिति** ॥ ङित्त्वान्न गुणः । मामूताम् । मामवतु । **मामूहीति** ॥ ऊठि हेरपित्त्वेन ङित्त्वान्न गुणः । मामूतात् । मामूतम् । मामूत । **मामवानीति** ॥ आटः पित्त्वादङित्त्वाद्गुणः । मामवाव । मामवाम । लङस्तिप्याह । **अमामोदिति** ॥ अमामूताम् । अमामवुः । सिप्याह । **अमामोरिति** ॥ अमामूतम् । अमामूत । लिङि मामव्यात् । लुङि 'अस्तिसिचः' इति नित्यमीट् । अमामवीत्--अमामावीत् । अमामविष्यत् । ज्वरतेस्तु जाज्वरीति--जाज्वर्ति इत्यादि । त्वरतेस्तु तात्वरीति -तात्वर्ति इत्यादि । स्विवेस्तु सेस्विवीति । ईडभावे तु ऊठि सेस्वेति, इत्यादि । अवतेस्तु यङभावात् क्विप्युदाहरणम् । ऊः । उवौ । उवः । इत्याद्यूह्यम् । **तोतूर्वीतीति** ॥ 'उपधायाश्च' इति दीर्घः । ईडभावे तोतुर्व् ति इति स्थिते 'च्छ्वोः शूट्' इत्यूठि प्राप्ते । **राल्लोपः** ॥ 'च्छ्वोः शूडनुनासिके च' इति सूत्रमूठ्वर्जमनुवर्तते । 'अनुनासिकस्य क्विझलोः' इत्यतः क्विझलोरिति च । तदाह । **रेफात्परयोरित्यादि** ॥ अत्रापि क्ङितीति नानुवर्तते । पूर्वसूत्रे तदननुवृत्तेः । **वलोपः इति** ॥ तथाच तोतुर् ति इति स्थिते उकारस्य लघूपधगुणः । तिपः पित्त्वेन अङित्त्वादित्यर्थः । **न धातुलोपे** ॥ 'इको गुणवृद्धी' इत्यनुवर्तते । तत्र धातुलोपे सति इको गुणवृद्धी न स्तः आर्धधातुके परत इत्यर्थे लूधातोः यङन्तात् पचाद्यचि यङो लुकि लोलुव इत्यत्र गुणनिषेधाभावप्रसङ्गात् । अत्र धात्ववयवस्य यङो लोपेऽपि धातोर्लोपाभावात् । धात्ववयवलोपे सतीत्यर्थे तु शीङ्धातोस्तृचि शयिता, इत्यत्र गुणो न स्यात् । तत्र धात्ववयवङकारलोपसत्त्वात् । आर्धधातुके परे यो धात्ववयवलोपः तस्मिन् सतीत्यर्थे शेते इत्यत्रापि गुणनिषेधः स्यात् । तत्र ङकारलोपस्य आर्धधातुकपरकत्वसत्त्वादित्यतो व्याचष्टे । **धात्वंशलोपनिमित्ते इति** ॥ धातुं लोपयतीति धातुलोपः कर्मण्यण् । धातुलोपनिमित्ते आर्धधातुके परे इति यावत् । लोलुवः इत्याद्युदाहरणम् । लूञ्धातोर्यङन्तात् पचाद्यचि 'यङोऽचि च' इत्यच्प्रत्ययमाश्रित्य

निषेधः। तिबादीनामनार्धधातुकत्वात्। तोतोर्ति। 'हलि च' (सू ३५४) इति दीर्घः। तोतूर्तः। तोतूर्वति। तोथोर्ति। दोदोर्ति। दोधोर्ति। 'मुच्छीं'। मोमोर्ति। मोमूर्तः। मोमूर्च्छतीत्यादि। 'आर्धधातुके' इति विषयसप्तमी। तेन यङि विवक्षिते अजेर्वी। वेवीयते। अस्य यङ्लुग्नास्ति। लुकापहारे विषयत्वासम्भवेन वीभावस्याप्रवृत्तेः।

इति तिङन्तयङ्लुक्प्रकरणम्।

यङो लुकि अच्प्रत्ययमाश्रित्य प्राप्तो गुणोऽनेन निषिध्यते। मर्मृजीतीति तु वृद्धिनिषेधोदाहरणम्। धात्विति किम्। शीङ् शेता। इह उत्सृष्टानुबन्धस्य धातुत्वं, नतु सानुबन्धस्येति। कैयटादिमते तु धातुग्रहणं स्पष्टार्थम्। इदं सूत्रं भाष्ये प्रत्याख्यातम्। हरदत्तेन पुनरुद्धृतम्। कौस्तुभे तु तदपि दूषयित्वा प्रत्याख्यातमेव। **इति नेहेति॥** तोतुरतीत्यत्र अयं गुणनिषेधो नेत्यर्थः। **हलि चेति॥** तोतुर्व् तस् इति स्थिते 'लोपो व्योः' इति वकारस्य लोपं बाधित्वा 'च्छ्वोः शूठ्' इत्यूठि प्राप्ते वकारस्यानेन लोपे 'हलि च' इति दीर्घ इत्यर्थः। यद्यपि तोतोर्तीत्यत्र 'च्छ्वोः' इत्यूठः अप्रवृत्तेर्वकारस्य 'लोपो व्योः' इति लोपः सिध्यति। तथापि तोतूर्तः इत्यादौ ऊठो बाधनाय आवश्यकोऽयं लोपो न्याय्यत्वात्तोतोर्तीत्यत्रोपन्यस्त इति बोध्यम्। **तोतूर्वतीति॥** 'अदभ्यस्तात्' इत्यत्। 'उपधायाश्च' इति दीर्घः। तोतोर्षि--तोतोर्षि। तोतूर्थः। तोतूर्थ। तोतूर्वीमि-तोतोर्मि। तोतूर्वः। तोतूर्मः। तोतूर्वाञ्चकार। तोतूर्विता। तोतूर्विष्यति। तोतूर्वीतु-तोतोर्तु--तोतूर्तात्। तोतूर्ताम्। तोतूर्वतु। तोतूर्हि। तोतूर्वाणि। लङि अतोतूर्वीत्-अतोतोः। अतोतूर्ताम्। अतोतूर्वुः। अतोतूर्वीः--अतोतोः। अतोतूर्तम्। अतोतूर्त। अतोतूर्वम्। अतोतूर्व। अतोतूर्म। तोतूर्व्यात्। लुङि 'अस्तिसिचः' इति नित्यमीट्। अतोतूर्वीत्। अतोतूर्विष्यत्। धुर्वीधातोरुदाहरति। **तोथोर्तीति॥** तुर्वीवद्रूपाणि। **दोदोर्तीति॥** दुर्वीधातोः रूपम्। **दोधोर्तीति॥** धुर्वीधातोः रूपम्। मुच्छीधातोः मोमूर्छीतीति सिद्धवत्कृत्य ईडभावे आह। **मोमोर्तीति॥** 'राल्लोपः' इति छस्य लोपः। **इत्यादीति॥** मोमूर्च्छीषि-मोमोर्षि। मोमूर्च्छीमि-मोमोर्मि। मोमूर्च्छुः। मोमूर्हि। अमोमूर्छीत्-अमोमूः। सिप्यप्येवम्। लुङि 'अस्तिसिचः' इति नित्यमीट्। अमोमूर्च्छीत्। अमोमूर्च्छिष्यत्। **विषयसप्तमीति॥** 'अजेर्व्यघञपोः' इति वीभावविधौ आर्धधातुके इत्यनुवृत्तं विषयसप्तम्यन्तमाश्रीयते। नतु परसप्तम्यन्तमित्यर्थः। ततः किमित्यत आह। **तेनेति॥** विषयसप्तम्याश्रयणेनेत्यर्थः। **विवक्षिते इति॥** यङि विवक्षिते ततः प्रागेव अजेर्वीभाव इत्यर्थः। एवञ्च कृते वीभावे हलादित्वाद्यङ् लभ्यते इति मत्वा आह। **वेवीयते इति॥** ननु अजेर्वीभावानन्तरं यङि सति तस्य 'यङोऽचि च' इति पाक्षिको लुक् कुतो नोदाहृियते इत्यत आह। **अस्य यङ्लुङ्नास्तीति॥ विषयत्वेति॥** लुका लुप्तयङः भाविज्ञानविषयत्वाभावेनेत्यर्थः।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायां यङ्लुगन्तप्रक्रिया समाप्ता।

श्रीरस्तु ।

॥ अथ तिङन्तनामधातुप्रकरणम् ॥

२६५७ । सुप आत्मनः क्यच् । (३-१-८)

इषिकर्मणः एषितृसम्बन्धिनः सुबन्तादिच्छायामर्थे क्यच्प्रत्ययो वा स्यात् । धात्ववयवत्वात्सुब्लुक् ।

२६५८ । क्यचि च । (७-४-३३)

अस्य ईत् स्यात् । आत्मनः पुत्रमिच्छति पुत्रीयति । 'वान्तो यि प्रत्यये' (सू ६३) गव्यति । नाव्यति । 'लोपः शाकल्यस्य' (सू ६७) इति तु न । अपदान्तत्वात् । तथा हि ।

अथ नामधातुप्रक्रियाः निरूप्यन्ते । **सुप आत्मनः क्यच्** ॥ प्रत्ययग्रहणपरिभाषया सुबन्तादिति लभ्यते । 'धातोः कर्मणः' इति सूत्रात्कर्मणः इच्छायां वेत्यनुवर्तते । कर्मण इति पञ्चमी । कर्मकारकादिति लभ्यते । सन्निधानादिच्छाम्प्रत्येव कर्मत्वं विवक्षितम् । आत्मन्शब्दः स्वपर्यायः । तादर्थ्यस्य शेषत्वविवक्षायां षष्ठी । स्वार्थात्कर्मण इति लभ्यते । स्वश्च इच्छायां सन्निधापितत्वादेषितैव विवक्षितः । तथाच स्वस्मै यदिष्यते कर्मकारकं तद्वृत्तेस्सुबन्तादिच्छायां क्यज्वा स्यादिति फलति । तदिदमभिप्रेत्य आह। **इषिकर्मणः एषितृसम्बन्धिनः इत्यादिना** ॥ एषित्रर्थादिषिकर्मण इत्यर्थः । एषित्रा स्वार्थे यदिष्यते कर्मकारकं तद्वाचकात्सुबन्तादिति यावत् । **धात्ववयवत्वादिति** ॥ सुबन्तात् क्यचि कृते तदन्तस्य सनाद्यन्ताः इति धातुत्वादिति भावः । **क्यचि च** ॥ 'अस्य च्वौ' इत्यनुवर्तते । 'ई घ्राध्मोः' इत्यत ईग्रहणञ्चेति मत्वा शेषम्पूरयति । **अस्येति** ॥ अकारस्येत्यर्थः । **पुत्रीयतीति** ॥ क्यचि पुत्र य इति स्थिते ईत्वे पुत्रीय इति धातोर्लडादिरित्यर्थः । आत्मनः किम् । राज्ञः पुत्रमिच्छति । पदविधित्वेन समर्थपरिभाषायाः प्रवृत्तेर्महान्तं पुत्रमिच्छतीत्यत्र पुत्रशब्दान्नक्यच् । **गव्यतीति** ॥ गामात्मन इच्छतीत्यर्थः । **नाव्यतीति** ॥ नावमात्मन इच्छतीत्यर्थः । **अपदान्तत्वादिति** ॥ 'लोपः शाकल्यस्य' इत्यस्य पदान्त एव प्रवृत्तेरिति भावः । नन्वन्तर्वर्तिविभक्त्या पदत्वमस्त्येवेत्यत आह । **तथा हीति** ॥ यथा पदत्वन्न भवति तथोच्यते इत्यर्थः ।

२६५९ । नः क्ये । (१-४-१५)

क्यचि क्यङि च नान्तमेव पदं स्यान्नान्यत् । सन्निपातपरिभाषया क्यचो यस्य लोपो न । गव्याञ्चकार । गव्यिता । नाव्याञ्चकार । नाव्यिता । **नलोपः** । राजीयति । 'प्रत्ययोत्तरपदयोश्च' (सू १३७३) । त्वद्यति । मद्यति । 'एकार्थयोः' इत्येव । युष्मद्यति । अस्मद्यति 'हलि च' (सू ३५४) । गीर्यति । पूर्यति । 'धातोः' इत्येव । नेह । दिवमिच्छति दिव्यति । इह पुरमिच्छति पुर्यतीति माधवोक्तं प्रत्युदाहरणं चिन्त्यम् । पुर्गिरोः साम्यात् ।

नः क्ये ॥ नकारादकार उच्चारणार्थः । 'सुप्तिङन्तम्' इत्यतस्सुबन्तं पदमित्यनुवर्तते । सुबन्तं नकारेण विशेष्यते । तदन्तविधिः । नकारान्तं सुबन्तं पदसंज्ञं स्यादिति लभ्यते । सुबन्तत्वादेव पदत्वे सिद्धे नियमार्थमिदम् । क्यग्रहणेन क्यच्क्यङोर्ग्रहणम् । लोहितादिडाज्भ्यः क्यष् वचनम्' इति वक्ष्यमाणतया हलन्तात् क्यषोऽभावात् । तदाह । **क्यचि क्यङि चेत्यादिना** ॥ ननु गव्याञ्चकारेत्यत्र आम आर्धधातुकत्वात्तस्मिन् परे वकाराद्धल उत्तरस्य यकारस्य 'यस्य हलः' इति लोपः स्यादित्यत आह । **सन्निपातेति** ॥ यकारनिमित्तकावादेशसम्पन्नवकारस्य यकारलोपं प्रति निमित्तत्वासम्भवादिति भावः । **गव्यितेति** ॥ इटि अतो लोपः । राजीयतीत्यत्र आह । **नलोपः इति** ॥ राजानमिच्छतीत्यर्थे क्यचि राजन् य ति इति स्थिते 'नः क्ये' इति पदत्वान्नकारस्य लोप इत्यर्थः । कृते नलोपे 'क्यचि च' इत्यकारस्य ईत्त्वमिति मत्वा आह । **राजीयतीति** ॥ नच ईत्त्वे कर्तव्ये नलोपस्यासिद्धत्वं शङ्क्यम् । 'नलोपस्सुप्स्वरं' इति नियमादित्यलम् । ननु त्वामात्मनः इच्छति मामात्मनः इच्छतीत्यत्र युष्मदस्मद्भ्यामङ्यचि धात्ववयवत्वात् सुपो लुकि प्रत्ययलक्षणाभावात् 'त्वमावेकवचने' इति कथं त्वमौ स्याताम् । विभक्तौ परत एव तद्विधानादित्यत आह । **प्रत्ययोत्तरपदयोश्चेति** ॥ सुपो लुका लुप्तत्वेऽपि क्यचमादाय मपर्यन्तस्य त्वमाविति भावः । ननु युष्मानात्मनः इच्छति, अस्मानात्मनः इच्छति, युष्मद्यति, अस्मद्यति, इत्यत्रापि क्यचमादाय त्वमौ स्यातामित्यत आह । **एकार्थयोरित्येवेति** ॥ 'प्रत्ययोत्तरपदयोश्च' इत्यत्र 'त्वमावेकवचने' इति सूत्रमनुवृत्तम् । एकवचनशब्दश्च न रूढः किन्तु एकत्वविशिष्टार्थवृत्तित्वमेकवचनशब्देन विवक्षितमिति युष्मदस्मत्प्रक्रियायां प्रपञ्चितं प्राक् । तथाच युष्मदस्मदोरेकत्वविशिष्टार्थवृत्तित्वाभावान्न त्वमाविति भावः । गिरमात्मनः इच्छति पुरमात्मनः इच्छतीत्यत्र गिर्शब्दात्पुर्शब्दाच्च क्यचि विशेषमाह । **हलि चेति** ॥ उपधादीर्घ इति शेषः । ननु दिवमिच्छति दिव्यतीत्यत्रापि 'हलि च' इति दीर्घः स्यादित्यत आह । **धातोरित्येवेति** । 'हलि च' इति सूत्रे 'सिपि धातोः' इत्यतस्तदनुवृत्तेरिति भावः । **दिव्यतीति** ॥ दिव्शब्दः अव्युत्पन्नं प्रातिपदिकमिति भावः । **इहेति** ॥ 'हलि च' इति सूत्रे धातोरित्यनुवृत्तेः पुर्यतीत्यत्र न दीर्घ इति माधवग्रन्थश्चिन्त्य इत्यर्थः । कुत इत्यत आह । **पुर्गिरोः साम्यादिति** । 'गॄ शब्दे, पॄ पालनपूरणयोः' इत्याभ्यामङ्गिपि 'ऋत इद्धातोः' इति 'उदोष्ठ्यपूर्वस्य' इति च इत्त्वे उत्त्वे च कृते रपरत्वे गिर्शब्दस्य पुर्शब्दस्य च निष्पत्तेरिति भावः ।

दीव्यतीति दीर्घस्तु प्राचः प्रामादिक एव। अदस्यति। 'रीङृतः' (सू १२३४)। कर्त्रीयति। 'क्यच्व्योश्च' (सू २११९)। गार्गीयति। वात्सीयति। 'अकृत्सार्व—' (सू २२९८) इति दीर्घः। कवीयति। वाच्यति। समिध्यति।

२६६० । क्यस्य विभाषा । (६-४-५०)

हलः परयोः क्यच्क्यङोर्लोपो वा स्यादार्धधातुके। 'आदेः परस्य' (सू ४४)। 'अतो लोपः' (सू २३०८)। तस्य स्थानिवत्त्वाल्लघूपधगुणो न। समिधिता—समिध्यिता। 'मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यच् न' (वा १७१४)। किमिच्छति। इदमिच्छति। स्वरिच्छति।

२६६१ । अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु । (७-४-३४)

प्रामादिक एवेति॥ दीर्घशब्दस्य अव्युत्पन्नप्रादिपदिकत्वान्न धातुत्वम्। दिव्धातोः क्विबन्तात् क्यचि ऊठि द्युशब्दाच्च क्यचि द्यूयतीत्येव उचितम्। विचि तु लघूपधगुणे 'लोपो व्योः' इति लोपे देशब्दात् क्यचि देयतीत्येवोचितमिति भावः। **अदस्यतीति**॥ अमुमात्मनः इच्छतीत्यर्थे अदस्शब्दात् क्यचि सुपो लुका लुप्तत्वाद्विभक्तिपरकत्वाभावान्न त्यदाद्यत्वम्। सान्तत्वान्नोत्त्वमत्त्वे। 'नः क्ये' इति नियमेन पदान्तत्वाभावान्न सस्य रुत्वमिति भावः। कर्तृशब्दात् क्यचि विशेषमाह। **रीङृतः इति**॥ गार्ग्यशब्दात् क्यचि विशेषमाह। **क्यच्व्योश्चेति**॥ आपत्यस्य यञो यकारस्य लोप इति भावः। कृते यलोपे 'क्यचि च' इत्यकारस्य ईत्त्वं मत्वा आह। **गार्गीयतीति**॥ **वात्सीयतीति**॥ वात्स्यशब्दात् क्यचि पूर्ववत्। कविशब्दात् क्यचि विशेषमाह। **अकृत्सार्वेति**॥ **वाच्यतीति**॥ वाच्शब्दात् क्यचि 'नः क्ये' इति नियमेन पदत्वाभावान्न कुत्वम्। 'वचिस्वपि' इति सम्प्रसारणन्तु न। धातोः कार्यमुच्यमानं धातुविहितप्रत्यये एवेति नियमात्। **समिध्यतीति**॥ समिध्शब्दात् क्यचि 'नः क्ये' इति नियमेन पदत्वाभावान्न जश्त्वम्। लुटस्तासि इटि समिध्य इता इति स्थिते 'यस्य हलः' इति नित्ये यलोपे प्राप्ते। **क्यस्य विभाषा**॥ 'यस्य हलः' इत्यतः हल इति पञ्चम्यन्तमनुवर्तते। 'आर्धधातुके' इत्यधिकृतम्। तदाह। **हलः परयोः क्यच्क्यङोरिति**॥ क्यष्तु नात्र गृह्यते। 'लोहितडाज्भ्यः क्यष्वचनम्' इति वक्ष्यमाणतया हलन्तात्तदभावात्। अन्तलोपमाशङ्क्य आह। **आदेः परस्येति**॥ तथाच समिध् अ इता इति स्थिते आह। **अतो लोपः इति**॥ तथाच समिध् इता इति स्थिते लघूपधगुणमाशङ्क्य आह। **तस्य स्थानिवत्त्वादिति**॥ क्यच्सूत्रे 'मान्ताव्ययेभ्यः प्रतिषेधः' इति वार्तिकम्। मान्तेभ्यः अव्ययेभ्यश्च क्यचः प्रतिषेध इत्यर्थे पुत्रमात्मनः इच्छति पुत्रीयतीत्यत्र न स्यात्। पुत्राविच्छतीत्यादावेव स्यात्। मान्तानि मान्ताव्ययानि तेभ्य इत्यर्थे स्वरिच्छतीत्यत्र क्यचः प्रतिषेधो न स्यात्। अतस्तद्वार्तिकं विवृण्वन्नाह। **मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यच् नेति**॥ **अशनायोदन्य**॥ अशनाय उदन्य धनाय इत्येषान्द्वन्द्वः। **क्यजन्ताः इति**॥ एते

क्यजन्ता निपात्यन्ते। अशनायति। उदन्यति। धनायति। 'बुभुक्षादौ' किम्। अशनीयति। उदकीयति। धनीयति।

२६६२। अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि। (७-१-५१)

एषां क्यचि असुगागमः स्यात्। 'अश्ववृषयोर्मैथुनेच्छायाम्' (वा ४३०९)। अश्वस्यति बडबा। वृषस्यति गौः। 'क्षीरलवणयोर्लालसायाम्' (वा ४३१५)। क्षीरस्यति बालः। लवणस्यत्युष्ट्रः। 'सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ' (वा ४६१६-१७) दधिस्यति—दध्यस्यति। मधुस्यति—मध्वस्यति।

२६६३। काम्यच्च। (३-१-९)

उक्तविषये काम्यच् स्यात्। पुत्रमात्मनः इच्छति पुत्रकाम्यति। इह 'यस्य हलः' (सू २६३१) इति लोपो न। अनर्थकत्वात्। यस्य इति सङ्गात-

---

त्रयः शब्दाः क्रमेण बुभुक्षादिष्वर्थेषु निपात्यन्ते इत्यर्थः। भोक्तुमिच्छा बुभुक्षा। पातुमिच्छा पिपासा। गर्द्धः अभिकांक्षा। **अशनायतीति**॥ अश्यते यत् तदशनम् अन्नं, तद्भोक्तुमिच्छतीत्यर्थः। 'क्यचि च' इति ईत्वाभावो निपात्यते। 'अकृत्सार्व' इति दीर्घः। **उदन्यतीति**॥ उदकं पातुमिच्छतीत्यर्थः। उदकशब्दस्य उदन्नादेशो निपात्यते नलोपाभावश्च। **धनायतीति**॥ जीवनार्थे सत्यपि धने अधिकं धनं वाञ्छतीत्यर्थः। ईत्वाभावो निपात्यते। **अशनीयतीति**॥ अशनम् अन्नं तत्सङ्ग्रहीतुमिच्छति। वैश्वदेवाद्यर्थमित्यर्थः। **उदकीयतीति**॥ सस्यादिसेचनार्थमुदकमिच्छतीत्यर्थः। **धनीयतीति**॥ दरिद्रस्सन् जीवनाय धनमिच्छतीत्यर्थः। **अश्वक्षीर**॥ क्यचि परेऽसुगिति शेषपूरणम्। 'आज्ञसेरसुक्' इत्यतस्तदनुवृत्तेरिति भावः। असुकि ककार इत् उकार उच्चारणार्थः। कित्त्वादन्त्यावयवः। 'अश्ववृषयोः' इति वार्तिकम्। **अश्वस्यति बडबेति**॥ मैथुनार्थमश्वमिच्छतीत्यर्थः। **वृषस्यति गौरिति**॥ मैथुनार्थं वृषभमिच्छतीत्यर्थः। "वृषस्यन्ती तु कामुकी" इति कोशस्तु अश्ववृषरूपप्रकृत्यर्थपरित्यागेन मैथुनेच्छामात्रे लाक्षणिकः। 'क्षीरलवणयोः' इति वार्तिकम्। असुगिति शेषः। लालसा उत्कटेच्छा। **सर्वप्रातिपदिकानामिति**॥ इदमपि वार्तिकम्। लालसायां सर्वेषां प्रातिपदिकानां क्यच् वक्तव्यः। तस्मिन् परे प्रकृतीनां सुगसुकौ च वक्तव्यौ इत्यर्थः। न चानेनैव वार्तिकेन सिद्धे 'क्षीरलवणयोर्लालसायाम्' इति वार्तिकं व्यर्थमिति शङ्क्यम्। 'क्षीरलवणयोः' इति वार्तिकं कात्यायनीयम्। 'सर्वप्रातिपदिकानाम्' इति तु मतान्तरमित्यदोषात्। एतच्च भाष्ये अपर आहेत्यनेन ध्वनितम्। **काम्यच्च**॥ 'सुप आत्मनः क्यच्' इत्युत्तरमिदं सूत्रम्। तदाह। **उक्तविषये इति**॥ **पुत्रकाम्यतीति**॥ कस्येत्संज्ञा तु न, फलाभावात्। **अनर्थकत्वादिति**॥ काम्यचः एकदेशस्य यकारस्य अर्थाभावादित्यर्थः। ननु बेभिदिता इत्यत्रापि

ग्रहणमित्युक्तम् । यशस्काम्यति । सर्पिष्काम्यति । मान्ताव्ययेभ्योऽप्ययं स्यादेव । किङ्काम्यति । स्वःकाम्यति ।

२६६४ । उपमानादाचारे । (३-१-१०)

उपमानात्कर्मणः सुबन्तादाचारार्थे क्यच् स्यात् । पुत्रमिवाचरति पुत्रीयति छात्रम् । विष्णूयति द्विजम् । 'अधिकरणाच्चेति वक्तव्यम्' (वा १७१७) । प्रासादीयति कुट्यां भिक्षुः । कुटीयति प्रासादे ।

२६६५ । कर्तुः क्यङ् सलोपश्च । (३-१-११)

उपमानात्कर्तुः सुबन्तादाचारे क्यङ् वा स्यात्, सान्तस्य तु कर्तृवाचकस्य लोपो वा स्यात् । क्यङ् वेत्युक्तेः पक्षे वाक्यम् । सान्तस्य लोपस्तु क्यङ्सन्नियोगशिष्टः । स च व्यवस्थितः । 'ओजसोऽप्सरसो नित्यमितरेषां

यकारस्य अनर्थकत्वाल्लोपो न स्यादित्यत आह । **यस्य इतीति** ॥ 'यस्य हलः' इत्यत्र यस्येत्यनेन यकाराकारसङ्घातग्रहणमित्यनुपदमेवोक्तमित्यर्थः । तथाच बेभिद्य इता इति स्थिते यङो यस्य सङ्घातस्यार्थवत्त्वाद्यकारलोपो निर्बाधः । प्रकृते तु काम्यजेकदेशस्य यस्यानर्थकत्वाल्लोपो नेति भावः । **यशस्काम्यतीति** ॥ 'सोऽपदादौ' इति सत्वम् । ननु किमात्मनः इच्छति किङ्काम्यति स्वःकाम्यतीति कथम् । मान्ताव्ययानां नेत्यनुवृत्तेरित्यत आह । **मान्ताव्ययेभ्योऽप्ययमिति** ॥ **उपमानादाचारे** ॥ 'सुप आत्मनः क्यच्' इत्यनुवर्तते । 'धातोः कर्मणस्समानकर्तृकात्' इत्यतो धातोरिति । तदाह । **उपमानात्कर्मणः इत्यादिना** ॥ उपमानं यत्कर्मकारकं तद्वृत्तेस्सुबन्तादित्यर्थः । **पुत्रमिवेति** ॥ 'धातोः कर्मणः' इत्यतः वेत्यनुवृत्तिरनेन सूचिता । छात्रं पुत्रत्वेन उपचरतीत्यर्थः । **विष्णूयतीति** ॥ द्विजं विष्णुत्वेन उपचरतीत्यर्थः । **अधिकरणाच्चेति** ॥ उपमानभूताधिकरणवृत्तेरपि सुबन्तादाचारे क्यजिति वक्तव्यमित्यर्थः । **प्रासादीयति कुट्यामिति** ॥ प्रासाद इव कुट्यां हृष्टो वर्तते इत्यर्थः । **कुटीयति प्रासादे इति** ॥ कुट्यामिव प्रासादे क्लिष्टो वर्तते इत्यर्थः । **कर्तुः क्यङ् सलोपश्च** ॥ कर्तुरित्यावर्तते । कर्तुः क्यङित्येकं वाक्यम् । अत्र कर्तुरिति पञ्चम्यन्तम् । उपमानादाचारे इत्यनुवर्तते । 'धातोः कर्मणः' इत्यतः वेति च । तदाह । **उपमानादिति** ॥ उपमानं यत्कर्तृकारकं तद्वृत्तेः सुबन्तादित्यर्थः । कर्तुः सलोपश्चेति द्वितीयं वाक्यम् । चकारः तुपर्यायः भिन्नक्रमः । स इति लुप्तषष्ठीकं पृथक्पदम् । कर्तुरिति षष्ठ्यन्तस्य विशेषणम् । तदन्तविधिः । तदाह । **सान्तस्य त्विति** ॥ **पक्षे इति** ॥ क्यङभावपक्षे इत्यर्थः । क्यङभावपक्षे सकारलोप इति भ्रमं वारयति । **सान्तस्य लोपस्त्विति** ॥ एतच्च महाभाष्ये स्पष्टम् । क्यङि सलोपविकल्पः स्यादित्यत आह । **स च व्यवस्थितः इति** ॥ सान्तस्य सलोप इत्यर्थः । व्यवस्थामेव दर्शयति । **ओजसोऽप्सरसः इति** ॥ इदं वार्तिकम् । **ओज-**

विभाषया' (वा १७१९–२०)। कृष्ण इवाचरति कृष्णायते। ओजश्शब्दो वृत्तिविषये तद्वति। ओजायते। अप्सरायते। यशायते–यशस्यते। विद्वायते–विद्वस्यते। त्वद्यते। मद्यते। अनेकार्थत्वे तु युष्मद्यते। अस्मद्यते। 'क्यङ्-मानिनोश्च' (सू ८३७) कुमारीवाचरति कुमारायते। हरिणीवाचरति हरितायते। गुर्वीव गुरूयते। सपत्नीव सपत्नायते। सपतीयते। सपत्नीयते। युवतिरिव युवायते। पट्वीमृद्याविव पट्वीमृदूयते। 'न कोपधायाः' (सू ८३८)। पाचिकायते। 'आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा' (वा १७२१)।

श्शब्दः इति ॥ क्यङन्तोऽयम्। सनाद्यन्ता इति धातुत्वाद्वृत्तिः। तत्र ओजश्शब्दः ओजस्विनि वर्तत इत्यर्थः। **ओजायते इति** ॥ ओजस्वीवाचरतीत्यर्थः। ओजश्शब्दात् क्यङि सलोपे 'अकृत्सार्व' इति दीर्घ इति भावः। **अप्सरायते इति** ॥ अप्सरश्शब्दात् क्यङि सलोपदीर्घौ। क्यङो ङित्त्वादात्मनेपदम्। इतरेषां विभाषयेत्यस्योदाहरति। **यशायते–यशस्यते इति** ॥ यशस्वीवाचरतीत्यर्थः। **विद्वायते–विद्वस्यते इति** ॥ विद्वानिवाचरतीत्यर्थः। विद्वच्छब्दात् क्यङि सलोपविकल्पः। **त्वद्यते। मद्यते इति** ॥ त्वमिव अहमिव आचरतीत्यर्थः। युष्मदस्मच्छब्दात् क्यङि 'प्रत्ययोत्तरपरयोश्च' इति मपर्यन्तस्य त्वमौ। **युष्मद्यते। अस्मद्यते इति** ॥ यूयमिव वयमिव आचरतीत्यर्थः। 'त्वमावेकवचने' इत्यस्मात् 'प्रत्ययोत्तरपदयोश्च' इति सूत्रे एकवचने इत्यनुवृत्तेरेकत्वविशिष्टार्थवृत्तित्वे सत्येव युष्मदस्मदोस्त्वमाविति भावः। कुमार्यादिशब्दात् क्यङि पुंवत्त्वं स्मारयति। **क्यङ् मानिनोश्चेति। कुमारायते इति** ॥ पुंवत्त्वेन ङीषो निवृत्तौ दीर्घः। **हरितायते इति** ॥ हरिणीशब्दात् क्यङि पुंवत्त्वेन 'वर्णादनुदात्तात्' इति नत्वस्य ङीषश्च निवृत्तौ दीर्घः। **गुरूयते इति** ॥ गुर्वीशब्दात् क्यङि ङीषो निवृत्तौ दीर्घः। **सपत्नायते इति** ॥ शत्रुपर्यायात् सपत्नशब्दात् शार्ङ्गरवादित्वेन ङीनन्तात् पुंवत्त्वेन ङीनो निवृत्तौ दीर्घ इति भावः। **सपतीयते इति** ॥ समानः पतिः स्वामी यस्याः इति बहुव्रीहौ सपतिशब्दस्य नत्वे ङीपि च सपत्नीशब्दात् क्यङि पुंवत्त्वेन ङीत्वनत्वयोर्निवृत्तौ दीर्घ इति भावः। **सपत्नीयते इति** ॥ विवाहनिबन्धनं पतिशब्दमाश्रित्य समानः पतिः यस्याः इति बहुव्रीहौ सपत्नीशब्दस्य नित्यस्त्रीलिङ्गत्वान्न पुंवत्त्वमिति भावः। **युवायते इति** ॥ युवतिशब्दात् क्यङि पुंवत्त्वे तिप्रत्ययस्य निवृत्तौ नलोपे दीर्घ इति भावः। वयोवाचिनाज्जातिकार्यं नैकल्पिकमिति 'जातेरस्त्रीविषयात्' इत्यत्र भाष्ये स्पष्टम्। एतेन 'जातेश्च' इति निषेधादिह पुंवत्त्वं दुर्लभमित्यपास्तमिति शब्देन्दुशेखरे स्थितम्। **पट्वीमृदूयते इति** ॥ इह पूर्वपदस्य क्यङ्परकत्वाभावान्न पुंवत्त्वम्। ननु पाचिकेवाचरति पाचिकायते इत्यत्रापि 'क्यङ्मानिनोश्च' इति पुंवत्त्वेन टापः 'प्रत्ययस्थात्' इति इत्त्वस्य च निवृत्तौ पाचकायते इति स्यादित्यत आह। **न कोपधायाः इति** ॥ 'आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा' इति वार्तिकम्। उपमानादित्यनुवर्तते। 'धातोः कर्मणः' इत्यतो वाग्रहणस्यास्मिन्प्रकरणे अनुवृत्त्यैव सिद्धे वाग्रहणं व्यर्थमित्यत आह। **वा-**

वाग्रहणात् क्यङपि । अवगल्भादयः पचाद्यजन्ताः । क्विप्सन्नियोगेनानुदात्तत्वमनुनासिकत्वं चाच्प्रत्ययस्य प्रतिज्ञायते । तेन तङ् । अवगल्भते । क्लीबते । होडते । भूतपूर्वादप्यनेकाच आम् । एतद्वार्तिकारम्भसामर्थ्यात् । न च अवगल्भते इत्यादिसिद्धिस्तत्फलम् । केवलानामेवाचारेऽपि वृत्तिसम्भवात् । धातूनामनेकार्थत्वात् । अवगल्भाञ्चक्रे । क्लीबाञ्चक्रे । होडाञ्चक्रे । वार्तिकेऽवेत्युपसर्गाविशिष्टपाठात्केवलादुपसर्गान्तरविशिष्टाच्च क्यङेवेति माधवादयः ।

ग्रहणात् क्यङपीति ॥ अन्यथा विशेषविहितत्वात् क्विपा क्यङो बाधः स्यादिति भावः । तथाचात्र वाशब्दो विकल्पार्थक इति फलितम् । अत्र सुप इति नानुवर्तते । प्रातिपदिकात् क्यङोऽप्राप्तौ वाग्रहणात् समुच्चीयते इति केचित् । **अवगल्भादयः इति** ॥ 'गल्भ धार्ष्ट्ये' (अवपूर्वः) 'क्लीब अधार्ष्ट्ये' 'होड्ड अनादरे' एभ्यः पचाद्यचि अवगल्भादिशब्दाल्लयो निष्पन्ना इत्यर्थः । तथाच अवगल्भ इवाचरति क्लीब इवाचरति होड इवाचरतीत्यर्थे अवगल्भादिशब्देभ्यः क्विप्क्यङाविति स्थितम् । अवगल्भते इत्यात्मनेपदलाभायाह । **क्विप्सन्नियोगेनेति** ॥ अन्त्यस्य अकारस्य अनुदात्तत्वमनुनासिकत्वञ्चात्र प्रतिज्ञायते । ततश्च तस्य इत्संज्ञायां लोपे अनुदात्तेत्त्वादात्मनेपदं लभ्यते । तदाह । **तेन तङिति** ॥ **अवगल्भते इति** ॥ क्विपि भकारादकारस्य लोपे हलन्ताल्लडादौ तङि शबिति भावः । ननु अवगल्भाञ्चक्रे, क्लीबाञ्चक्रे, होडाञ्चक्रे, इत्यत्र कथमाम् । अन्त्यस्य च इत्संज्ञालोपाभ्यामपहारेण धातूनामेकाच्त्वेन 'कास्यनेकाच्' इत्यस्याप्रवृत्तेः । नच अवगल्भ इत्यस्य क्विबन्तस्य धातोरनेकाच्कत्वमस्तीति वाच्यम् । "उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते" इत्यनुपदमेव वक्ष्यमाणत्वादित्यत आह । **भूतपूर्वादपीति** ॥ क्विबुत्पत्तेः प्राक्तनमनेकाच्त्वं भूतपूर्वगत्या आश्रित्येत्यर्थः । भूतपूर्वगत्याश्रयणे प्रमाणमाह । **एतद्वार्तिकेनेति** ॥ 'सर्वप्रातिपदिकेभ्यः क्विब्वा' ति वक्ष्यमाणवार्तिकादेव अवगल्भते अवजगल्भे इत्यादि सिद्धौ पुनरेभ्यः क्विब्विधानं तत्सन्नियोगेन अन्त्यवर्णस्य अनुदात्तत्वानुनासिकत्वप्रतिज्ञानार्थं सद्भूतपूर्वगत्या अनेकाच्त्वाश्रयणं ज्ञापयतीत्यर्थः । नन्वनुदात्तत्वानुनासिकत्वप्रतिज्ञानस्यात्मनेपदसिद्धावुपक्षीणत्वात् कथमुक्तज्ञापकतेत्याशङ्क्य निराकरोति । **न चावगल्भते इत्यादिसिद्धिस्तत्फलमिति** ॥ कुत इत्यत आह । **केवलानामिति** ॥ अच्प्रत्ययविहितानान्धातुपाठसिद्धानामनुदात्तेतामेव गल्भादिधातूनामवगल्भ इवाचरतीत्याद्यर्थेषु वृत्तिसम्भवात् । तच्च कुत इत्यत आह । **धातूनामनेकार्थत्वादिति** ॥ एवञ्च 'आचारेऽवगल्भ' इति क्विब्विधानमनुबन्धसम्भवार्थं सद्भूतपूर्वगत्या अनेकाच्त्वाश्रयणं ज्ञापयतीति सिद्धम् । नच 'सर्वप्रातिपदिकेभ्यः' इति क्विपि अवगल्भतीत्यादिवारणाय अनुबन्धासञ्जनमुपक्षीणमिति कथन्तस्य उक्तज्ञापकतेति वाच्यम् । 'सर्वप्रातिपदिकेभ्यः' इति वार्तिकेन क्विपि तथा प्रयोगे इष्टापत्तेः । भूतपूर्वाश्रयणपरभाष्यप्रामाण्येन 'सर्वप्रातिपदिकेभ्यः' इति वार्तिकस्य अवगल्भादिभ्यः अप्रवृत्तिविज्ञानाद्वेत्यास्तान्तावत् । 'आचारेऽवगल्भ' इत्यत्र अवेत्यस्य प्रयोजनमाह । **अवेत्युपसर्गेति** ॥ **केवलादिति** ॥ उपसर्गविहीनादवगल्भशब्दादित्यर्थः ।

तङ् नेति तूचितम्। 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' (वा १७२२)। पूर्ववार्तिकं तु अनुबन्धासङ्गार्थं तत्र क्विबनूद्यते। प्रातिपदिकग्रहणादिह सुप इति न सम्बध्यते। तेन पदकार्यं न। कृष्ण इवाचरति कृष्णति। 'अतो गुणे' (सू १९१) इति शपा सह पररूपम्। अ इवाचरति अति। अतः। अन्ति। प्रत्ययग्रहणमपनीय अनेकाच इत्युक्तेर्नाम्[1]। औ। अतुः। उः। द्वित्वम्। 'अतो गुणे' (सू १९१) 'अत आदेः' (सू २२४८) इति दीर्घः णल।

उपसर्गान्तरेति ॥ प्रगल्भानुगल्भादिशब्दादित्यर्थः। **क्यङेवेति** ॥ न तु क्विबित्यर्थः। माधवादयः इत्यस्वरसोद्भावनम्। तद्बीजमाह। **तङ् नेति तूचितमिति** ॥ केवलादुपसर्गान्तरविशिष्टाच्च गल्भशब्दात् अनेन क्विबभावेऽपि 'सर्वप्रातिपदिकेभ्यः' इति वार्तिकेन क्विप् निर्बाधः। परन्तु अवपूर्वत्व एवानुबन्धासञ्जनादात्मनेपदमेव तत्र नेति वक्तुमुचितामित्यर्थः। **सर्वप्रातिपदिकेभ्यः इति** ॥ आचारे इति शेषः। नन्वनेनैव वार्तिकेन सिद्धे 'आचारेऽवगल्भ' इति वार्तिकं व्यर्थमित्यत आह। **पूर्ववार्तिकन्त्विति** ॥ अन्त्यवर्णस्य इत्संज्ञासिद्ध्यर्थमित्यर्थः। तर्हि तत्र क्विब्ग्रहणं व्यर्थमित्यत आह। **तत्र क्विबनूद्यते इति** ॥ तत्सन्नियोगेनानुबन्धासङ्गार्थमित्यर्थः। **पदकार्यं नेति** ॥ राजानतीत्यादौ नलोपादिकन्नेत्यर्थः। अन्यथा अन्तर्वर्तिविभक्त्या पदत्वान्नलोपादिकं स्यादिति भावः। **पररूपमिति** ॥ कृष्णशब्दात् क्विबन्तात्लडादौ शपि 'अतो गुणे' इति पररूपमित्यर्थः। कृष्णाञ्चकार। कृष्णिता। कृष्णिष्यति। कृष्णतु। अकृष्णत्। कृष्णेत्। कृष्णायात्। अतो लोपात्परत्वात् 'अकृत्सार्व' इति दीर्घः। विशेषविहितत्वादतो लोप इत्यन्ये। **अ इवेति** ॥ अः विष्णुः। स इवेत्यर्थः। **अतीति** ॥ शपा पररूपम्। असि। अथः। अथ। आमि। आवः। आमः। क्विप्प्रत्ययान्तत्वाल्लिटि 'कास्प्रत्ययात्' इत्याम्प्रत्ययमाशङ्क्य आह। **प्रत्ययग्रहणमपनीयेति** ॥ औ। अतुः। उः। इति सिद्धरूपप्रदर्शनम्। तत्र प्रक्रियान्दर्शयति। **द्वित्वमिति** ॥ णलि 'द्विर्वचनेऽचि' इति लोपस्य निषेध इति भावः। **अतो गुणे इति** ॥ द्वित्वे कृते अ अ अ इति स्थिते अन्तरङ्गत्वादतो लोपं बाधित्वा पररूपमिति भावः। **अत आदेरिति** ॥ नच परत्वान्नित्यत्वादपवादत्वाच्च 'अतो गुणे' इत्यस्मात्प्राक् 'अत आदेः' इत्यस्य प्रवृत्तिरिति वाच्यम्। तस्य बहिरङ्गत्वात्। 'अत आदेः' इत्यस्यापवादत्वेऽपि आनर्देत्यत्र हलादिशेषात्प्रागेव परत्वात् 'अत आदेः' इत्यस्य चरितार्थत्वेन बाधकत्वासम्भवात्। "अपवादोऽपि यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते" इत्युक्तेः इत्यन्यत्र विस्तरः। यद्यप्यत्र प्रक्रियाव्युत्क्रमे फलविशेषो नास्ति। तथापि न्याय्यत्वादेवमुक्तम्। **णल औ इति** ॥ पररूपे

---

१. 'अनेकाज्ग्रहणं चुलुम्पाद्यर्थम्' इतिवत् एकाज्व्यावृत्त्यर्थम् इत्यनुक्त्या प्रत्ययान्तैकाज्भ्योऽप्याम् भवत्येव–इति नागेशसिद्धान्तः।

औ । वृद्धिः। अतुसादिषु तु 'आतो लोप इटि च' (सू २३७२) इत्याल्लोपः । मालेवाचरति मालाति । लिङ्गविशिष्टपरिभाषयैकादेशस्य पूर्वान्तत्वाद्वा क्विप् । मालाञ्चकार । लङि । अमालात् । अत्र हल्ङ्यादिलोपो न । ङीप्साहचर्यादापोऽपि सोरेव लोपविधानात् । इट्सकौ । अमालासीत् । कविरिव कवयति । आशीर्लिङि । कवीयात् । 'सिचि वृद्धिः—' (सू २२९७) इत्यत्र 'धातोः' इत्यनुवर्त्य धातुरेव यो धातुरिति व्याख्यानान्नामधातोर्न वृद्धिरिति कैयटादयः । अकवयीत् । माधवस्तु नामधातोरपि वृद्धिमिच्छति । अकवायीत् । विरिव

दीर्घे च आ अ इति स्थिते 'आत औ णलः' इत्यौत्वमिति भावः । **वृद्धिरिति** ॥ आ औ इति स्थिते 'वृद्धिरेचि' इति वृद्धिरित्यर्थः । तथा च औ इति रूपं परिनिष्ठितम् । **अतुसादिष्विति** ॥ अ अतुस्, अ उस्, इति स्थिते द्वित्वे पररूपे 'अत आदेः' इति दीर्घे आतो लोप इत्यर्थः । अतुः । उः । इति प्रत्ययमात्रं शिष्यते । थलि इटि द्वित्वे दीर्घे आल्लोपे, इथ । अथुः । अ । औ । इव । इम । वस्तुतस्तु 'कास्यनेकाज्ग्रहणम्' इति वार्तिकव्याख्यावसरे प्रत्ययग्रहणमपनीयेति भाष्ये नोक्तम् । कासेश्च प्रत्ययान्ताच्च आमिति लभ्यते । अत एव 'आचारेऽवगल्भक्लीबहोडेभ्यः' इति वार्तिके अवगल्भाञ्चक्रे इत्यादौ अन्त्यवर्णस्यानुबन्धत्वेन एकाच्त्वेऽपि 'कास्प्रत्ययात्' इत्यामित्युक्तं भाष्ये इति शब्देन्दुशेखरे प्रपञ्चितम् । इता । इष्यति । अतु-अतात् । अताम् । अन्तु । अ-अतात् । अतम् । अत । आनि । आव । आम । आत् । आताम् । आन् । आः । आतम् । आत । आम् । आव । आम । विधिलिङि एत् । एताम् । एयुः । एः । एतम् । एत । एयम् । एव । एम । आयात् । आयास्ताम् । आयासुः । लुङि 'इट ईटि' इति सिज्लोपे 'आटश्च' इति वृद्धिं बाधित्वा परत्वादतो लोपे इटा सह आटो वृद्धौ ऐत्, ऐष्टाम्, ऐषुः, इत्यादीति केचित् । आर्धधातुकोपदेशकाले एव परत्वादतो लोपे अङ्गस्याभावादाट् नेत्यन्ये । ईत् । ईस्ताम् । इत्यादि । ऐष्यत् । वस्तुतस्तु आकारान्तेभ्यः आचारे क्विप् नास्त्येवेति विश्वपाशब्दनिरूपणे प्रपञ्चितम् । ननु मालाशब्दस्य टाप्प्रत्ययान्तत्वेन प्रातिपदिकत्वाभावात्ततः कथं क्विबित्यत आह । **लिङ्गविशिष्टेति** ॥ **ङीप्साहचर्यादिति** ॥ ङ्यन्तादाचारक्विबन्तात् गौरीशब्दात् लुङि अगौरयीत् इत्यादौ तिस्योऽर्धन्तात्परत्वासम्भवात् तत्साहचर्यादाबन्तादपि न तयोर्लोप इत्यर्थः । **कवयतीति** ॥ शपि गुणायादेशौ । **कवीयादिति** ॥ 'अकृत्सार्व' इति दीर्घः । लुङि अकवि ईत् इति स्थिते सिचि वृद्धिमाशङ्क्य आह । **सिचि वृद्धिरित्यत्रेति** ॥ सिचा धातोराक्षेपतो लाभेऽपि 'ऋत इद्धातोः' इत्यतस्तदनुवृत्तेर्धातुरेव यो धातुरिति लभ्यते इति भावः । **कैयटादयः इति** ॥ 'इको गुणवृद्धी' इति सूत्रे गोशब्दादाचारक्विपि अगवीदित्युपक्रम्य तथोक्तत्वादिति भावः । **माधवस्त्विति** ॥ 'सिचि वृद्धिः' इत्यत्र 'ऋत इद्धातोः' इत्यतो धातुग्रहणानुवृत्तौ मानाभावेन धातुरेव यो धातुरित्युक्तार्थालाभादिति तदाशयः । वस्तुतस्तु 'इको गुणवृद्धी' 'वदव्रजहलन्तस्याचः' इत्यादिसूत्रस्थभाष्ये सिचि परतः एजन्तं नास्तीत्युक्तत्वादेजन्तेभ्यः आचारक्विपू नास्त्येवेति

वयति । विवाय । विव्यतुः । अवयीत्–अवायीत् । श्रीरिव श्रयति । शिश्राय । शिश्रियतुः । पितेव पितरति । आशिषि रिङ् । पित्रियात् । भूरिव भवति । अत्र 'गातिस्था—' (सू २२२३) इति 'भुवो वुक्—' (सू २१७४) इति 'भवतेः—' (सू २१८१) इति च न भवति । अभिव्यक्तत्वेन धातुपाठस्थस्यैव तत्र ग्रहणात् । अभावीत् । बुभाव । द्रुरिव द्रवति । 'णिश्रि—' (सू २३१२) इति चङ् न । अद्रावीत् ।

२६६६ । अनुनासिकस्य क्विझलोः क्ङिति । (६-४-१५)

अनुनासिकान्तस्योपधाया दीर्घः स्यात्क्वौ झलादौ च क्ङिति । इदमिवाचरति इदामति । राजेव राजानति । पन्था इव पथीनति । मथीनति । ऋभुक्षीणति । द्यौरिव देवतीति माधवः । अत्र ऊठि द्यवतीत्युचितम् । क इव कति । 'चकौ' इति हरदत्तः । माधवस्तु 'ण्यलोपौ' इति वचनाण्णलि

शब्देन्दुशेखरे प्रपञ्चितम् । **विरिवेति** ॥ विः पक्षी स इवेत्यर्थः । **अभिव्यक्तत्वेनेति** ॥ **अभावीदिति** ॥ इह 'गातिस्था' इति सिचो न लुक् । **बुभावेति** ॥ इह न वुक् । अभ्यासस्य अत्त्वञ्च न । **चङ् नेति** ॥ 'णिश्रि' इति सूत्रे द्रुग्रहणेन धातुपाठस्थस्यैव ग्रहणादिति भावः । **अनुनासिकस्य** ॥ अङ्गस्येत्यधिकृतमनुनासिकेन विशेष्यते । तदन्तविधिः । 'नोपधायाः' इत्यतः उपधाया इति 'ढ्रलोपे' इत्यतो दीर्घ इति चानुवर्तते । तदाह । **अनुनासिकान्तस्येत्यादिना** ॥ **इदामतीति** ॥ "हलन्तेभ्यः आचारक्विप् नास्ति" इति 'ह्रस्वनद्यापः' इति सूत्रभाष्ये स्पष्टमिति शब्देन्दुशेखरे स्थितम् । **पथीनतीति** ॥ पथिन्शब्दात् क्विपि अनुनासिकस्येति इकारस्य दीर्घः । इदन्तु माधवानुरोधेन । क्विबभ्युपगमे तिपि पथेनतीत्येव युक्तम् । 'इन्हन्' इति नियमेन दीर्घाप्राप्तेः । नच नियमस्य सजातीयापेक्षत्वात् सुबानन्तर्ये एवायन्नियमो नान्यत्रेति वाच्यम् । तथा सति वृत्रघ्नः स्त्री वृत्रघ्नीत्यत्रापि अल्लोपं बाधित्वा अन्तरङ्गत्वात् 'अनुनासिकस्य' इत्युपधादीर्घापत्तेरित्याहुः । **देवतीतीति** ॥ दिव्शब्दादाचारक्विबन्तात् शपि लघूपधगुणः । 'नः क्ये' इति नियमेन अपदान्तत्वात् 'दिव उत्' इत्युत्त्वन्नेति भावः । **अत्र ऊठीति** ॥ दिव्शब्दात् क्विपि 'च्छ्वोः' इति वकारस्य ऊठि कृते लघूपधगुणं बाधित्वा परत्वादिकारस्य यणि द्यूशब्दात् शपि ऊकारस्य गुणे अवादेशे च द्यवतीति रूपमुचितमित्यर्थः । **चकाविति** ॥ कशब्दात् क्विबन्ताल्लिटि णलि द्वित्वे चुत्वे चक अ इति स्थिते ककारादकारस्य अतो लोपात्परत्वाद्वृद्धौ आकारे 'आत औ णलः' इत्यौत्वे वृद्धिरेकादेश इति भावः । **माधवस्त्विति** ॥ चक अ इति स्थिते पूर्वविप्रतिषेधाद्वृद्धिं बाधित्वा ककारादकारस्य अतो लोपे कृते णलोऽकारेण सह चक इति रूपमित्यर्थः । नचैवं सति अ इवाचरति अति । औ । अतुः इत्यत्रापि लिटि 'अत आदेः' इति दीर्घं बाधित्वा अतो लोपः स्यादिति वाच्यम् । ण्यलोपाविति पूर्वविप्रतिषेधलभ्यः 'अतो लोपः' सन्निहितमेव 'अकृत्सार्व' इति दीर्घं बाधते । 'नतु

वृद्धिं बाधित्वा अतो लोपात् चक इति रूपमाह। स्व इव सस्वौ। सस्व। यत्तु स्वामास। स्वाञ्चकार इति। तदनाकरमेव।

२६६७। भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः। (६-१-१२)

अभूततद्भावविषयेभ्यो भृशादिभ्यो भवत्यर्थे क्यङ् स्याद्धलन्तानामेषां लोपश्च। अभृशो भृशो भवति भृशायते। 'अच्वेः' इति पर्युदासबलात् 'अभूततद्भावे' इति लब्धम्। तेनेह न। क्व दिवा भृशा भवन्ति। ये रात्रौ भृशा नक्षत्रादयस्ते दिवा क्व भवन्तीत्यर्थः। 'सुमनस्' अस्य सलोपः। सुमनायते। चुरादौ 'संग्राम युद्धे' इति पठ्यते। तत्र 'संग्राम' इति प्रातिपदिकम्। तस्मात् 'तत्करोति—' इति णिच् सिद्धः। तत्सन्नियोगेनानुबन्ध आसज्यते।

अत आदेः' इति दीर्घमपि। 'अनन्तरस्य' इति न्यायादिति माधवाशय इत्याहुः। **तदनाकरमेवेति** ॥ अनेकाच्त्वाभावादिति भावः। वस्तुतस्तु प्रत्ययग्रहणमपनीयेत्यस्य भाष्ये अदर्शनात् प्रत्ययान्तत्वादाम्भवत्येवेति युक्तमेवेत्यनुपदमेवोक्तम्। **भृशादिभ्यो** ॥ भवनं भूः भावे क्विप्। तदाह। **भवत्यर्थे इति** ॥ भवने इत्यर्थः। **क्यङ् स्यादिति** ॥ 'कर्तुः क्यङ् सलोपश्च' इत्यतस्तदनुवृत्तेरिति भावः। **हलन्तानामेषामिति** ॥ भृशादिषु ये हलन्ताः तेषां सलोपः क्यङ् चेत्यर्थः। 'ननु अभूततद्भावे' इति कुतो लब्धमित्यत आह। **अच्व्येरिति पर्युदासबलादिति** ॥ अभूततद्भावग्रहणमिति वार्तिकमेतल्लब्धार्थकथनपरमिति भावः। **ये रात्रौ भृशाः इति** ॥ प्रकाशातिशयवन्त इत्यर्थः। भृशादिषु हलन्तमुदाहरति। **सुमनस् इति** ॥ **सुमनायते इति** ॥ असुमनाः सुमनाः भवतीत्यर्थः। यद्यपि स्त्रियामित्यधिकारे 'अप्सुमनस्समासिकतावर्षाणाम्बहुत्वञ्च' इति लिङ्गानुशासनसूत्रे सुमनश्शब्दस्य नित्यं बहुवचनं विहितम्। तथापि तद्देवादिपर्यायरूढविषयम्। सु शोभनं मनो यस्येति सुमनाः इति बहुव्रीहियौगिक इति भावः। सुमनायत इति क्यङि सलोपे 'अकृत्सार्व' इति दीर्घः। ननु लङि मनश्शब्दात्प्रागटि 'स्वमनायत' इति वक्ष्यमाणमनुपपन्नम्। अङ्गस्य अङ्विधानात् सुमनश्शब्दस्य समस्तस्यैव लङं प्रत्यङ्गत्वात्। "प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्" इत्याशङ्क्य आह। **चुरादौ संग्राम युद्धे इति पठ्यते इति** ॥ ततश्च क्वचित् सोपसर्गपाठबलादन्यस्मात् सोपसर्गादाचारक्विपि उपसर्गस्य न धातुसंज्ञाप्रवेश इति विज्ञायते इत्यर्थः। ननु चुरादौ सङ्ग्रामेति समस्तो धातुः, नतु सोपसर्गो ग्रामशब्दः। एवञ्चास्य प्रातिपदिकत्वाभावात् सोपसर्गात् क्विपि उपसर्गस्य न धातुसंज्ञाप्रवेश इत्यत्र कथमिदङ्गमकमित्यत आह। **तत्र संग्राम इति प्रातिपदिकमिति** ॥ 'ग्रसेराच' इत्यौणादिके मन्प्रत्यये निष्पन्नस्य ग्रामशब्दस्य 'कृत्तद्धित' इति प्रातिपदिकत्वम्। अव्युत्पत्तिपक्षे 'अर्थवदधातुः' इति प्रातिपदिकत्वमित्यर्थः। ननु चुरादावस्य पाठो धात्वधिकारविहितचौरादिकणिजर्थः। एवञ्च प्रातिपदिकत्वेन चुरादौ तस्य पाठो व्यर्थ इत्यत आह। **तस्मादिति** ॥ तस्मात् सङ्ग्राम इति

युद्धे योऽयं ग्रामशब्दः इत्युक्तेऽपि सामर्थ्यात्संग्रामशब्दे लब्धे विशिष्टपाठो ज्ञापयति। 'उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते' इति। तेन मनःशब्दात्प्रागट्। स्वमनायत। उन्मनायते। उदमनायत। एवं च अवागल्भत अवागल्भिष्टेत्यादावप्यवेत्यस्य पृथक्करणं बोध्यम्। ज्ञापकं च सजातीयविषयम्। तेन यत्रोपसर्गस्वरूपं सकलं श्रूयते न

प्रातिपदिकात् चौरादिकणिजसम्भवेऽपि 'तत्करोति' इत्यर्थे णिच् सिद्ध इत्यर्थः। ननु 'तत्करोति' इत्यनेनैव सङ्ग्रामशब्दात् प्रातिपदिकाण्णिच्सिद्धेः किमर्थमिह चुरादौ तस्य पाठ इत्यत आह। **तत्सन्नियोगेनेति** ॥ णिच्सन्नियोगेन अकारस्य इत्संज्ञकस्य अनुदात्तेत्त्वार्थकस्य आसञ्जनार्थ इत्यर्थः। नच मकारादकारस्य इत्संज्ञकत्वे अल्लोपस्य णिनिमित्तकत्वाभावादससङ्ग्रामत इत्यत्र 'णौ चङ्युपधायाः' इत्युपधाह्रस्वः स्यादिति वाच्यम्। सङ्ग्रामेत्ययं हि कथादित्वाददन्तः। तस्मादकारः अनुबन्धत्वेनासज्यते इत्यर्थः। एवञ्च णौ अतो लोपे सति णावग्लोपित्वान्नोपधाह्रस्वः। कथादित्वलक्षणादन्तत्वालाभायैवास्य चुरादौ पाठ इति भावः। ननु चुरादौ सङ्ग्रामशब्दस्य 'तत्करोति' इति णिचि परे अस्त्वनुबन्धासङ्गः। तथापि आचारक्विपि उपसर्गस्य न धातुसंज्ञाप्रवेश इत्यत्र कथमस्य ज्ञापकतेत्यत आह। **युद्धे इति** ॥ **सामर्थ्यादिति** ॥ ग्राम युद्धे इत्येतावतैव सङ्ग्रामशब्दो लभ्यते। केवलस्य ग्रामशब्दस्य युद्धे प्रयोगाभावादित्यर्थः। **विशिष्टपाठः इति** ॥ सङ्ग्रामशब्दपाठ इत्यर्थः। ज्ञाप्यमर्थमाह। **समानाकारमिति** ॥ सङ्ग्रामशब्दे युद्धवाचिनि समित्यस्य क्रियायोगाभावात् समानाकारमित्युक्तम्। **धातुसंज्ञाप्रयोजके इति**। क्विबादाविति शेषः। **पृथक् क्रियते इति** ॥ तथाच न तस्य धातुसंज्ञाप्रवेश इत्यर्थः। ततः किमित्यत आह। **तेनेति** ॥ सम् इत्यस्य धातुसंज्ञाप्रवेशाभावेनेत्यर्थः। तथाच सुमनश्शब्दात् आचारक्विपि विवक्षिते मनश्शब्दमात्रस्य धातुत्वात्ततो लङि मनश्शब्दस्यैवाङ्गत्वात्ततः प्रागेव अट्। न तु सुमनस् इति समुदायात्प्रागित्यर्थः। एतेन सङ्ग्रामयतेरेव सोपसर्गात् नान्यस्मादित्यादि भाष्यं 'भृशादिभ्यः' इति सूत्रस्थं व्याख्यातमिति बोध्यम्। **उन्मनायते इति** ॥ भृशादित्वात् क्यङि सलोपः। **एवञ्चेति** ॥ एवमुक्तरीत्या 'आचारेऽवगल्भ' इति क्विब्विधावपि अवेत्यस्य पृथक्करणात् गल्भशब्दात्प्रागेव अट् इत्यर्थः। ननु आ ऊढः ओढः 'कुगति' इति समासः। अस्माद्भृशादित्वात् क्यङि ओढायते इत्यादि रूपम्। अत्रापि आडो धातुसंज्ञाप्रवेशो न स्यात्। तत्र यद्यपि लङि ऊढशब्दाद्वा आडो वा प्राक् आटि न रूपे विशेषः। उभयथापि औढायतेत्येव रूपं सिद्धमेव। तथापि ओढायेति क्यङन्तात् क्त्वाप्रत्यये अतो लोपे ओढायित्वेत्येवेष्यते। अत्र क्यङि चिकीर्षिते उक्तरीत्या पृथक्कृतस्य आङः 'कुगतिप्रादयः' इति क्त्वाप्रत्यान्तेन समासे सति 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति ल्यप् स्यादित्यत आह। **ज्ञापकञ्च सजातीयविषयमिति** ॥ तदेवोपपादयति। **तेनेति** ॥ चुरादौ 'सङ्ग्राम युद्धे' इति सम्ग्रहणस्य उक्तार्थं पृथक्करणे ज्ञापकस्य सजातीयविषयकत्वाश्रयणेन यत्र उपसर्गस्वरूपं अविकृतं श्रूयते नत्वेकादेशेनापहृतं तत्रैव उपसर्गस्य पृथक्कृतिरिति विज्ञायते इत्यर्थः। सङ्ग्रामे सम्ग्रह-

त्वादेशेनापहृतं तवैव पृथक्कृतिः । एवं च 'आ ऊढः ओढः' स इवाचर्य ओढायित्वा । अत्र 'उन्मनाय्य, अवगलभ्य' इतिवन्न ल्यप् । ज्ञापकस्य विशेषविषयत्वे षाष्ठवार्तिकं तद्भाष्यं च प्रमाणम् । तथाहि । 'उस्योमाङ्क्ष्वाटः प्रतिषेधः' (३६३६) । उस्योमाङोश्च परयोराटः पररूपं नेत्यर्थः । उस्रामैच्छत् औस्रीयत् । औङ्कारीयत् । औढीयत् । 'आटश्च' (सू २६९) इति चशब्देन पुनर्वृद्धिविधानादिदं सिद्धमिति षाष्ठे स्थितम् ।

णस्य ज्ञापकस्य एवंविधत्वादिति भावः । ततः किमित्यत आह । **एवञ्चेति** ॥ **ओढायित्वेति** ॥ ओढशब्दात् भृशादित्वात् क्यङि ओढायेत्यस्मात् क्यङन्तात् क्त्वाप्रत्यये अतो लोपे रूपम् । **अत्रेति** ॥ अत्र न ल्यबित्यन्वयः । क्यङि विवक्षिते आङः एकादेशेनापहृतत्वेन पृथक्करणाभावे सति तस्य आङः क्त्वाप्रत्ययान्तेन समासाभावान्न ल्यबिति भावः । उन्मनाय्य, अवगलभ्यवदिति व्यतिरेकदृष्टान्तः । उन्मनस्शब्दात् भृशादित्वादाचारे क्यङि सकारलोपे 'अकृत्सार्व' इति दीर्घे उन्मनायेत्यस्मात् क्त्वो ल्यपि अतो लोपे उन्मनाय्येति रूपम् । अवगलभशब्दात् आचारेऽवगल्भेति क्विबन्तात् क्त्वो ल्यपि रूपम् । अत्र उदित्यस्य अवेत्यस्य च उपसर्गस्वरूपस्य अनपहृतत्वेन क्यङि क्विपि च विवक्षिते पृथक्कृततया तयोः क्त्वान्तेन समासे सति ल्यबुचितः । इह तु ओढायित्वेत्यत्र न तथेति व्यतिरेकदृष्टान्तोऽयम् । ज्ञापकस्य सजातीयत्वे प्रमाणं दर्शयति । **ज्ञापकस्येति** ॥ षाष्ठं वार्तिकं दर्शयति । **उस्योमाङ्क्ष्विति** ॥ उसि ओम् आङ् एषान्द्वन्द्वः । षष्ठस्य प्रथमे पादे 'ओमाङोश्च' इति सूत्रे इदं वार्तिकं पठितम् । तद्व्याचष्टे । **उस्योमाङोश्च परयोरिति** ॥ 'एङि पररूपम्' इत्यतः पररूपग्रहणानुवृत्तिं मत्वा आह । **पररूपं नेति** ॥ उसि तावदुदाहरति । **औस्रीयदिति** ॥ उस्रामात्मन ऐच्छदित्यर्थे 'सुप आत्मनः' इति क्यजन्ताल्लङि उस्रायशब्दादङ्गात्प्रागाटि कृते 'उस्यपदान्तात्' इति पररूपं प्राप्तमनेन निषिध्यते । अर्थवद्ग्रहणपरिभाषा त्वनित्या । अस्मादेव भाष्योदाहरणात् । अन्यथा भिन्युरित्यादौ पररूपं न स्यात् । आगमसहितस्य युस एवार्थवत्त्वादिति भावः। ओमि परतः उदाहरति । **औङ्कारीयदिति** ॥ ओङ्कारशब्दात् क्यजन्ताल्लङि अङ्गस्य आटि कृते 'ओमाङोश्च' इति पररूपं प्राप्तमनेन निषिध्यते । आङि उदाहरति । **औढीयदिति** ॥ आ ऊढः ओढः तस्मात् क्यजन्ताल्लङि अङ्गस्य ओढशब्दस्य आटि कृते 'ओमाङोश्च' इति पररूपं प्राप्तमनेन निषिध्यते । उदाहरणत्रयमिदं भाष्ये स्थितम् । तत्र यदि उपसर्गस्वरूपस्य एकादेशेनापहारेऽपि क्यचि पृथक् स्यात् तर्हि क्यचि विवक्षिते आङः पृथक्कृतौ सत्यां धातुबहिर्भावादूढशब्दात् प्रागाङः परत्र आटि सति पररूपस्याप्रसक्तेराङि पररूपप्रतिषेधो व्यर्थः स्यात् । तथाच उक्तज्ञापकस्य सजातीयविषयत्वे तु अत्र आङ एकादेशेनापहारात् पृथक्करणाभावादोढशब्दात् प्रागाडागमे सति आङि पररूपप्राप्तेस्तन्निषेधोऽर्थवान् भवति । अतो ज्ञापकस्य सजातीयविषयत्वे 'उस्योमाङ्क्ष्वु' इत्याङ्ग्रहणम् औढीयदिति तदुदाहरणपरभाष्यञ्च अत्र प्रमाणमिति भावः । ज्ञापकस्य सजातीयविषयत्वे प्रमाणान्तरमाह । **आटश्चेति चशब्देनेति** ॥ 'आटश्च' इति चकारः पुनर्वृद्धिविधानार्थः । तथाच आटोऽचि वृद्धिरेव

२६६८। लोहितादिडाज्भ्यः क्यष्। (३-१-१३)

लोहितादिभ्यो डाजन्ताच्च भवत्यर्थे क्यष् स्यात्।

२६६९। वा क्यषः। (१-३-९०)

क्यषन्तात्परस्मैपदं वा स्यात्। लोहितायति--लोहितायते। अत्र 'अच्वेः' इत्यनुवृत्त्या अभूततद्भावविषयत्वं लब्धम्। तच्च लोहितशब्दस्यैव विशेषणम्। न तु डाचोऽसम्भवात्। नाप्यादिशब्दग्राह्याणाम्। तस्य प्रत्याख्यानात्। तथाच वार्तिकं—'लोहितडाज्भ्यः क्यष्वचनं, भृशादिष्वितराणि' (वा १७२९--३०) इति। न चैवं काम्यच इव क्यषोऽपि ककारः श्रूयेत। उच्चारणसामर्थ्यादिति वाच्यम्। तस्यापि भाष्ये प्रत्याख्यानात्। पटपटायति—पटपटायते। कृभ्वस्तियोगं विनापीह डाच्। डाजन्तात्क्यषो विधानसामर्थ्यात्। यत्तु—

लोहितश्यामदुःखानि हर्षगर्वसुखानि च।
मूर्छानिद्राकृपाधूमाः करुणा नित्यचर्मणी॥

यथा स्यात् नान्यत्परूपमिति लभ्यते इत्यपि षष्ठाध्याये 'ओमाङोश्च' इति सूत्रे 'आटश्च' इति सूत्रे च भाष्ये स्थितमित्यर्थः। एवञ्च एतद्वार्तिकप्रत्याख्यानपरस्सौत्रश्चकारस्तद्भाष्यञ्चात्र ज्ञापकमित्युक्तम्भवति। **लोहितादि॥ भवत्यर्थे इति॥** 'भृशादिभ्यो भुवि' इत्यतः भुवि इति अनुवृत्तेरिति भावः। **वा क्यषः॥ परस्मैपदमिति॥** 'शेषात्कर्तरि' इत्यतस्तदनुवृत्तेरिति भावः। **लोहितायतीति॥** अलोहितो लोहितो भवतीत्यर्थः। **अत्रेति॥** 'लोहितादि' इति सूत्रे इत्यर्थः। **तच्चेति॥** अभूततद्भावविषयत्वमित्यर्थः। **असम्भवादिति॥** अव्यक्तानुकरणात् डाचो विहितत्वेन तस्य अभूततद्भावविषयत्वे अनुकरणस्य भङ्गापत्तेरिति भावः। **नाप्यादिशब्दग्राह्याणामिति॥** श्यामादिशब्दानामिति शेषः। **तस्येति॥** आदिग्रहणस्येत्यर्थः। आदिग्रहणप्रत्याख्याने प्रमाणं दर्शयति। **तथाचेति॥** आदिग्रहणमपनीय लोहितशब्दात् डाजन्तेभ्यश्च क्यष्वचनङ्कर्तव्यम्। इतराणि लोहितादिगणपठितानि श्यामादीनि प्रातिपदिकानि भृशादिष्वेव पठनीयानीत्यर्थः। एवञ्च श्यामादिशब्देभ्यः क्यङि आत्मनेपदमेवेति फलितम्। **तस्यापीति॥** आदिग्रहणस्येव क्यषः ककारस्यापि भाष्ये प्रत्याख्यातत्वादित्यर्थः। **पटपटायतीति॥** अव्यक्तानुकरणात् द्व्यजवरार्द्धादनितौ डाजिति पटच्छब्दात् डाचि विवक्षिते सति 'डाचि विवक्षिते द्वे बहुलम्' इति द्वित्वे 'नित्यमाम्रेडिते डाचि' इति पूर्वखण्डान्तस्य तकारस्य उत्तरखण्डादेः पकारस्य च पररूपे एकस्मिन् पकारे द्वित्वाद्विलोपे पटपटाशब्दात् डाजन्तात् क्यषि तदन्ताल्लडादीति भावः। 'अभूततद्भावे' इति तु नात्र सम्बध्यते इत्युक्तम्। नह्यपटच्छब्दः पटच्छब्दो भवतीति युज्यते। ननु कृभ्वस्तियोगाभावादिह कथं डाजित्यत आह। **कृभ्वस्तियोगं विनापीति॥** भवार्थसत्तामात्रेणेत्यर्थः। कुत

इति पठित्वा श्यामादिभ्योऽपि क्यषि पदद्वयमुदाहरन्ति। तद्भाष्यवार्ति-कविरुद्धम्। तस्मात्तेभ्यः क्यङेव। श्यामायते। दुःखादयो वृत्तिविषये तद्वति वर्तन्ते। लिङ्गविशिष्टपरिभाषया लोहिनीशब्दादपि क्यष्। लोहिनीयति–लोहिनीयते।

२६७०। कष्टाय क्रमणे। (३-१-१४)

चतुर्थ्यन्तात्कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात्। कष्टाय क्रमते कष्टायते। पापं कर्तुमुत्सहते इत्यर्थः। 'सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम्' (१७६१)। कण्वं पापम्। सत्रादयो वृत्तिविषये पापार्थाः। तेभ्यो द्वितीयान्तेभ्यश्चिकीर्षायां क्यङ्। पापं चीकिर्षतीत्यस्वपदविग्रहः सत्रायते। कक्षायते इत्यादि।

२६७१। कर्मणो रोमन्थतपोभ्यां वर्तिचरोः। (३-१-१५)

इत्यत आह। **डाजन्तादिति** ॥ **तद्भाष्येति** ॥ 'भृशादिष्वितराणि' इत्युक्तवार्तिकं तद्भाष्य-विरुद्धमित्यर्थः। **तस्मादिति** ॥ उक्तवार्तिकभाष्यविरोधात् तेभ्यः श्यामादिभ्यः भृशादित्वलक्षणः क्यङेव नतु क्यषित्यर्थः। ततश्च 'वा क्यषः' इत्यस्याप्रवृत्तेः ङित्त्वादात्मनेपदमेवेति मत्वा आह। **श्याम-ायते इति**। श्यामो भवतीत्यर्थः। ननु देवदत्तस्सुखायते इति कथं। देवदत्तस्य सुखत्वाभावादित्यत आह। **सुखादयः इति** ॥ श्यामादिषु ये सुखदुःखादिशब्दा गुणवचनाः ते सुखादिगुणवति वर्तन्ते इत्यर्थः। एवञ्च सुखायते इत्यत्र सुखवान् भवतीत्यर्थः। एवं दुःखायते इत्यादावपि। ननु लोहितशब्दाद्विहितः क्यष् कथं लोहिनीशब्दात् स्यादित्यत आह। **लिङ्गविशिष्टेति** ॥ **कष्टाय क्रमणे** ॥ क्रमणशब्दं विवृणोति। **उत्साहे इति** ॥ अस्वरितत्वात् क्यषिति नानुवर्तते इति भावः। क्रियार्थोपपदस्येति चतुर्थीति मत्वा आह। **पापङ्कर्तुमिति** ॥ क्रमते इत्यत्र 'वृत्तिसर्गतायनेषु क्रमः' इति तङ्। 'कण्वचिकीर्षायाम्' इत्यत्र कण्वपदं व्याचष्टे। **कण्वं पापमिति** ॥ सत्रादिशब्दान् विवृणोति। **सत्रादयः इति** ॥ **द्वितीयान्तेभ्यः इति** ॥ चिकीर्षायां द्वितीयान्तस्यैवान्वययोग्यत्वादिति भावः। कण्वशब्दस्तु सत्रादिशब्दानां कण्वपरत्वे तात्पर्यग्राहकः। केचित्तु कण्वेत्यविभक्तिकम्। कण्ववर्तिभ्यः इति व्याचक्षते। **अस्वपदविग्रहः इति** ॥ वृत्तावेव सत्रादिशब्दानां पापवाचित्वादिति भावः। इदं कण्व-शब्दादन्यत्रैव। कष्टाय क्रमते इति तु स्वपदविग्रहोऽस्त्येव। भाष्ये एवं विग्रहं प्रदर्श्य सत्रादिषु विग्रहाप्रदर्शनादित्याहुः। **कर्मणो रोमन्थ** ॥ वृतुधातोर्ण्यन्तात् 'धात्वर्थनिर्देशे इग्वक्तव्यः' इति इकि वर्तिशब्दः। आवर्तनमर्थः। चरेस्सम्पदादित्वाद्भावे क्विप्। वर्तिं चर अनयोर्द्वन्द्वात्सप्तमी। आवर्तने चरणे चेति लभ्यते। कर्मशब्देन कर्मकारकं विवक्षितम्। द्वित्वे एकवचनम्। तथाच कर्मकारकवृत्तिभ्यां रोमन्थतपश्शब्दाभ्यामिति लभ्यते। यथा-

रोमन्थतपोभ्यां कर्मभ्यां क्रमेण वर्तनायां चरणे चार्थे क्यङ् स्यात्। रोमन्थं वर्तयति रोमन्थायते। 'हनुचलने इति वक्तव्यम्' (वा १७६२)। चर्वितस्याकृष्य पुनश्चर्वणमित्यर्थः। नेह। कीटो रोमन्थं वर्तयति। अपानप्रदेशान्निस्सृतं द्रव्यमिह रोमन्थः। तदश्नातीत्यर्थ इति कैयटः। वर्तुळं करोतीत्यर्थ इति न्यासकारहरदत्तौ। 'तपसः परस्मैपदं च' (वा १७६६)। तपश्चरति तपस्यति।

२६७२। बाष्पोष्मभ्यामुद्वमने। (३-१-१६)

आभ्यां कर्मभ्यां क्यङ् स्यात्। बाष्पमुद्वमति बाष्पायते। ऊष्मायते। 'फेनाच्चेति वाच्यम्' (वा १७६४)। फेनायते।

२६७३। शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे। ३-१-१७)

एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात्। शब्दं करोति शब्दायते। पक्षे 'तत्करोति—' इति णिजपीष्यत इति न्यासः। शब्दयति। 'सुदिनदुर्दिननीहारेभ्यश्च' (वा १७३६—३७)। सुदिनायते।

सङ्गच्यमन्वयः। तदाह। **रोमन्थतपोभ्यामिति॥ रोमन्थमिति॥** उद्गीर्णस्य निगीर्णस्य वा मन्थो रोमन्थ इति भाष्यम्। उद्गीर्णस्य उदरादुपरि कण्ठद्वारा निर्गतस्य निगीर्णस्य अपानद्वारा निर्गतस्य च मन्थः चर्वणं रोमन्थ इत्यर्थः। **वर्तयतीति॥** आवर्तयतीत्यर्थः। **हनुचलने इति॥** हनु ताळु तच्चलने सत्येव अयं विधिरित्यर्थः। तथाच उदरगतभक्षितं द्रव्यन्तृणादिकं पुनःपुनराकृष्य ताळुचलनेन चूर्णितस्य पुनः पुनः प्राशने रोमन्थशब्दात् क्यङिति फलितम्। तदाह। **चर्वितस्येति॥** हनुचलनेन भक्षितस्य उदरं प्रविष्टस्य पुनः पुनराकृष्य हनुचलनेन भक्षणे गम्ये इति फलितमित्यर्थः। **कीटः इति॥** इह हनुचलनाभावान्न क्यङिति भावः। तदेवोपपादयति। **अपानेति॥** 'तपसः परस्मैपदञ्च' इति वार्तिकम्। तपश्शब्दः कर्मकारकवृत्तिः। पूर्वसूत्राच्चरणे क्यङं लभते। ङित्त्वप्रयुक्तमात्मनेपदं बाधित्वा परस्मैपदमेव लभते इत्यर्थः। **तपस्यतीति॥** प्रातिपदिकादेवास्य क्यङुत्पत्तेरन्तर्वर्तिविभक्त्यभावात् 'नः क्ये' इति नियमाच्च पदत्वाभावान्न रुत्वमिति भावः। **बाष्पोष्मभ्यामुद्वमने॥ आभ्याङ्कर्मभ्यामिति॥** 'कर्मणो रोमन्थ' इत्यतः कर्मग्रहणमनुवर्तते इति भावः। कर्मकारकवृत्तिभ्यामित्यर्थः। **फेनायते इति॥** फेनमुद्वमतीत्यर्थः। **शब्दवैर॥** करणं क्रिया। तदाह। **करोत्यर्थे इति॥** तत् करोतीति णिचोऽपवादः। **पक्षे इति॥** कदाचिदित्यर्थः। **न्यासः इति॥** भाष्यानारूढत्वमत्र अरुचिबीजम्। "सुदिन-

२६७४ । सुखादिभ्यः कर्तृवेदनायाम् । (३-१-१८)

एभ्यः कर्मभ्यो वेदनायामर्थे क्यङ् स्याद्वेदनाकर्तुरेव चेत्सुखादीनि स्युः । सुखं वेदयते सुखायते । 'कर्तृग्रहणम्' किम् । परस्य सुखं वेदयते ।

२६७५ । नमोवरिवश्चित्रङः क्यच् । (३-१-१९)

'करणे इत्यनुवृत्तेः क्रियाविशेषे पूजायां परिचर्यायामाश्चर्ये च । नमस्यति देवान् । पूजयतीत्यर्थः । वरिवस्यति गुरून् । शुश्रूषते इत्यर्थः । चित्रीयते । विस्मयते इत्यर्थः । विस्मापयते इत्यन्ये ।

२६७६ । पुच्छभाण्डचीवराण्णिङ् । (३-१-२०)

'पुच्छादुदसने व्यसने पर्यसने च' । (वा १७४६) । विविधं विरुद्धं वोत्क्षेपणं व्यसनम् । उत्पुच्छयते । विपुच्छयते । परिपुच्छयते । 'भाण्डात्समाचयने' (वा १७४४) । संभाण्डयते । भाण्डानि समाचिनोति । राशीकरोतीत्यर्थ । समभाण्डत । 'चीवरादार्जने परिधाने च' (वा १७४५) । सञ्चीवरयते भिक्षुः । चीवराण्यर्जयति, परिधत्ते वेत्यर्थः ।

दुर्दिन" इति वार्तिकम् । करोत्यर्थे क्यङिति शेषः । **सुखादिभ्यः** ॥ कर्तृ इति पृथक्पदं लुप्तषष्ठीकम् । 'कर्मणो रोमन्थ' इत्यतः कर्मग्रहणानुवृत्तिं मत्वा आह । **एभ्यः कर्मभ्यः इति**॥ **वेदनायामिति** ॥ ज्ञाने इत्यर्थः । कर्तृत्वं च वेदनां प्रत्येव विवक्षितम् । उपस्थितत्वात् प्रतिपदोक्ता षष्ठी । वेदनाकर्तृवृत्तिभ्यस्सुखादिशब्देभ्य इति लभ्यते । फलितमाह । **वेदनाकर्तुरेव चेदिति** ॥ **सुखं वेदयते इति** ॥ जानातीत्यर्थः । 'विद चेतनायाम्' इति चुरादौ । **नमो वरिवस्** ॥ नमस् वरिवस् चित्रङ् एषां समाहारद्वन्द्वात्पञ्चमी । आत्मनेपदार्थश्चित्रशब्दो डित्निर्दिष्टः । 'शब्दवैर' इत्यतः करणे इत्यनुवर्तते । करणं क्रिया । सा च पूजापरिचर्याश्चर्यात्मिका विवक्षिता । मनसः पूजायाम् । वरिवसः परिचर्यायाम् । चित्रङः आश्चर्ये । इति वार्तिकैः । तदाह । **करणे इत्यनुवृत्तेरित्यादिना** ॥ **नमस्यति देवानिति** ॥ कारकविभक्तेर्बलीयस्त्वात् द्वितीया । परिचर्या शुश्रूषेति मत्वा आह । **शुश्रूषते इत्यर्थः इति** । आश्चर्यशब्दो विस्मयवाचीति मत्वा आह । **विस्मयते इत्यर्थः इति** ॥ **विस्मापयते इत्यन्ये इति** ॥ आश्चर्यशब्दो विस्मापनपर इति भावः । ततश्चित्रीयमाणोऽसाविति भट्टिः । असौ मायामृगः विस्मयमुत्पादयन्नित्यर्थः । **पुच्छभाण्ड** ॥ 'पुच्छादुदसने' इति वार्तिकम् । **उत्पुच्छयते इति** ॥ विविधं विरुद्धं वा पुच्छमुत्क्षिपतीत्यर्थः । 'भाण्डात् समाचयने' इत्यपि वार्तिकम् । **समबभाण्डतेति** ॥ उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक्क्रियते इत्युक्तत्वात् संभाण्डशब्दात् क्यङपि । भाण्डशब्दात् प्रागेवाडिति भावः ।

२६७७। मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्। (३-१-२१)

कृञर्थे। मुण्डं करोति मुण्डयति। 'व्रताद्भोजनतन्निवृत्त्योः' (वा ५०६०)। पयः शूद्रान्नं वा व्रतयति। 'वस्त्रात्समाच्छादने' (वा ५०६१)। संवस्त्रयति। 'हल्यादिभ्यो ग्रहणे' (वा ५०६२)। 'हलिकल्योरदन्तत्वं च निपात्यते' (वा १७४७)। हलिं कलिं वा गृह्णाति हलयति कलयति। महद्धलं हलिः। परत्वाद्वृद्धौ सत्यामपीष्ठवद्भावेऽगेव लुप्यते। अतः सन्वद्भावदीर्घौ न। अजहलत्। अचकलत्। कृतं गृह्णाति कृतयति। तूस्तानि विहन्ति वितूस्तयति। तूस्तं केशा इत्येके। जटीभूताः केशा इत्यन्ये। पापमित्यपरे। मुण्डादयः 'सत्यापपाश—' (सू २५६३) इत्यत्रैव पठितुं युक्ताः। 'प्रातिपदिकाद्धात्वर्थे—' इत्येव सिद्धे केषांचिद्ग्रहणं सापेक्षेभ्योऽपि णिज-

---

एवमुत्पुच्छयते इत्यादावपि। 'चीवरादार्जने' इत्यपि वार्तिकम्। **मुण्डामिश्र** ॥ कृञर्थे इति शेषपूरणम्। 'शब्दवैर' इत्यतः करणे इत्यनुवृत्तेरिति भावः। 'व्रताद्भोजने' इति वार्तिकम्। **पयः शूद्रान्नं वा व्रतयतीति** ॥ पयो भुङ्क्ते, शूद्रान्नं वर्जयतीत्यर्थः। 'वस्त्रात्समाच्छादने' इत्यपि वार्तिकम्। भाष्ये तु न दृश्यते। **संवस्त्रयतीति** ॥ वस्त्रेण सम्यगाच्छादयतीत्यर्थः। वस्त्रम्परिधत्ते इति वा। 'हल्यादिभ्यो ग्रहणे' इति वार्तिकम्। भाष्ये तु न दृश्यते। **हलिकल्योरिति** ॥ हलिकली इदन्तौ। हलकलशब्दावदन्तौ इदन्तौ च। यावदन्तौ तयोरत्वन्निपात्यते इति भाष्ये स्पष्टम्। **हलयति कलयतीति** ॥ हलिकलिभ्यां णौ इकारस्य अकारे इष्टवत्त्वेन टेर्लोपे हलि कलि इति ण्यन्ताभ्यां लडादीति भावः। **महद्धलं हलिरिति** ॥ अत्र वृद्धप्रयोगः अन्वेषणीयः। नन्वनयोरिकारान्तयोरदन्तत्वनिपातनं व्यर्थम्। इकारस्य णाविष्ठवत्त्वाल्लोपे हलयति कलयतीति सिद्धेः। नच अजहलत् अचकलत् इत्यत्र सन्वत्त्वाप्रवृत्तये अग्लोपित्वाय तयोरदन्तत्वमिति वाच्यम्। इकारलोपेऽप्यग्लोपित्वसिद्धेः इत्यत आह। **परत्वादिति** ॥ इकारस्य णौ इष्टवत्त्वे टिलोपात् प्रागेव परत्वात् 'अचो ञ्णिति' इति वृद्धौ कृतायां ऐकारस्य इष्टवत्त्वात् टिलोपे अग्लोपित्वं न स्यात्। इकारयोरत्त्वे तु अकारस्य टिलोपात् प्राक् परत्वाद्वृद्धौ सत्यामप्याकार एव इष्टवत्त्वाल्लुप्यते इत्यर्थः। **अतः इति** ॥ अग्लोपित्वात् सन्वत्त्वं 'दीर्घो लघोः' इति दीर्घश्च नेत्यर्थः। **कृतं गृह्णातीति** ॥ उपकारं स्वीकरोतीत्यर्थः। **पठितुं युक्ताः इति** ॥ लाघवादेकसूत्रत्वं युक्तमित्यर्थः। **केषाञ्चिदिति** ॥ मुण्डादीनामित्यर्थः। **सापेक्षेभ्योऽपीति** ॥ अन्यथा णिजन्तस्यास्य सनाद्यन्तवृत्तित्वाद्विशेषणसापेक्षत्वे मुण्डादिभ्यो णिच् भवेत्। सविशेषणानां वृत्तिनिषेधात्। इह मुण्डादीनां पुनर्ग्रहणे तु तत्सामर्थ्यात् सापेक्षेभ्योऽपि मुण्डादिभ्यो णिच् सिद्ध्यतीत्यर्थः। स्पष्टमेदं 'सुप आत्मनः' इत्यत्र भाष्यकैयटयोः। **मुण्डयति माणवकमिति** ॥ अत्र माणवकं

र्थम्। मुण्डयति माणवकम्। मिश्रयत्यन्नम्। श्लक्ष्णयति वस्त्रम्। लवणयति व्यञ्जनमिति। हलिकल्योरदन्तत्वार्थम्। सत्यस्यापुगर्थम्। केषांचित्तु प्रपञ्चार्थम्। सत्यं करोत्याचष्टे वा सत्यापयति। 'अर्थवेदयोरप्यापुग्वक्तव्यः' (वा १७५८)। अर्थापयति। वेदापयति। पाशं विमुञ्चति विपाशयति। रूपं पश्यति रूपयति। वीणयोपगायत्युपवीणयति। तूलेनानुकुष्णात्यनुतूलयति। तृणाग्रं तूलेनानुघट्टयतीत्यर्थः। श्लोकैरुपस्तौति उपश्लोकयति। सेनयाभियाति अभिषेणयति। 'उपसर्गात्सुनोति—' (सू २२७०) इति षः। अभ्यषेणयत्। 'प्राक्सितात्—' (सू २२७६) इति षः। अभिषिषेणयिषति। 'स्थादिष्वभ्यासेन च—' (२२७७) इति षः। लोमान्यनुमार्ष्टि अनुलोमयति। 'त्वच संवरणे' घः। त्वचं गृह्णाति त्वचयति। चर्मणा संनह्यति सञ्चर्मयति। वर्णं गृह्णाति वर्णयति। चूर्णैरवध्वंसते अवचूर्णयति। इष्टवदित्यतिदेशात्पुंवद्भावादयः। एनीमाचष्टे एतयति। दरदमाचष्टे दारदयति।

मुण्डङ्करोतीत्यर्थे मुण्डशब्दस्य माणवकसापेक्षत्वेऽपि णिजिति भावः। यदा तु प्रकरणादिना माणवकत्वादिविशेषणं ज्ञाप्यते तदैव मुण्डयतीति णिजिति भावः। 'सुप आत्मनः' इति सूत्रभाष्ये तु मुण्डय माणवकमित्यत्र गमकत्वाण्णिच्। महान्तं पुत्रमिच्छतीत्यादौ तु अगमकत्वात् न क्यजित्युक्तम्। तदा प्रपञ्चार्थमेव मुण्डादिग्रहणमिति शब्देन्दुशेखरे स्थितम्। **श्लक्ष्णयति वस्त्रमिति** ॥ निर्मलं करोतीत्यर्थः। **लवणयति व्यञ्जनमिति** ॥ लवणयुक्तं करोतीत्यर्थः। **हलिकल्योरिति** ॥ एवञ्च ताभ्यां सापेक्षाभ्यां न णिच्। तद्ग्रहणस्य अदन्तत्वनिपातने चरितार्थत्वादिति भावः। ननु सत्यशब्दात् तत्करोति इत्यादिनैव णिच्सिद्धेः 'सत्याप' इति सूत्रे सत्यग्रहणं व्यर्थमित्यत आह। **सत्यस्यापुगर्थमिति**। **केषाञ्चिदिति** ॥ पाशादीनामित्यर्थः। **सत्यापयतीति** ॥ आपुग्विधिसामर्थ्यान्न टिलोपः। पाशं विमुञ्चतीत्यादौ 'प्रातिपदिकाद्धात्वर्थे' इति णिच्। **अभिषिषेणयिषतीति** ॥ अभिषेणि इति ण्यन्तात्सनि रूपम्। ननु त्वचङ्गृह्णाति त्वचयतीति कथम्। त्वच्छब्दाच्चकारान्ताण्णिचि टिलोपे त्वचयतीत्यापत्तेरित्यत आह। **त्वचेति** ॥ 'त्वच संवरणे' इत्यस्मात् 'पुंसि संज्ञायां घः प्रायेण' इति घप्रत्यय इत्यर्थः। **पुंवद्भावादयः इति** ॥ आदिना रभावटिलोपादिग्रहणम्। **एतयतीति** ॥ 'भस्याढे' इति पुंवत्त्वस्य इष्टनि प्रवृत्तेः णावपि तस्यातिदेशात् 'वर्णादनुदात्तात्' इति स्त्रीप्रत्ययस्य तत्सन्नियोगशिष्टनत्वस्य च निवृत्तौ एतशब्दे तकारादकारस्य टिलोप इति भावः। नन्वेनीशब्दाण्णौ टिलोपेन स्त्रीप्रत्ययनिवृत्तौ तत्सन्नियोगशिष्टनत्वस्यापि निवृत्तौ एतयतीति सिद्ध्यतीत्यस्वरसत्वात् पुंवद्भावे उदाहरणान्तरमाह। **दरदमिति** ॥ दरदिति कश्चिद्राजा, तस्यापत्यं दारदः 'द्व्यञ्मगध' इत्यण्। स्त्र्यपत्ये तु दरदोऽपत्यं स्त्री दरत् 'अतश्च' इत्यणो लुक्। तामाचष्टे इत्यर्थे दरच्छब्दाण्णौ इष्टव-

पृथुं प्रथयति । वृद्धौ सत्यां पूर्वं वा टिलोपः । अपिप्रथत्–अपप्रथत् । मृदुं म्रदयति । अमम्रदत् । भृशं कृशं दृढं भ्रशयति क्रशयति द्रढयति । अबभ्रशत् अचक्रशत् अदद्रढत् । परिम्रढयति । पर्यबम्रढत् । ऊढिमाख्यत् । औजिढत् । ढत्वादीनामसिद्धत्वात् हृतिशब्दस्य द्वित्वम् । 'पूर्वत्रासिद्धीयमद्वित्वे' इति त्वनित्यमित्युक्तम् । 'ढिशब्दस्य' द्वित्वमित्यन्ये । औजिढत्–औडिढत् । ऊढमाख्यत् । औजढत्–औडढत् । 'ओः पुयण्—' (सू २५७७) इति वर्गप्रत्याहारजग्रहो लिङ्गं 'द्वित्वे कार्ये णावच आदेशो न' इति ऊनयता-

---

त्त्वात् पुंवत्त्वेन स्त्रियामित्यनुवृत्तौ 'अतश्च' इति स्त्रियां विहितस्य अण्प्रत्ययलुको निवृत्तौ दारद-शब्दे टेर्लोपे दारदयतीति रूपं सिध्यति । पुंवद्भावे तु दरद्शब्दस्य टिलोपे सति दर-यतीति स्यादिति भावः। टिलोपस्य अजादेशत्वेन स्थानिवत्त्वान्नोपधावृद्धिः। 'पृथुं मृदुं भृशञ्चैव कृशञ्च दृढमेव च। परिपूर्वं वृढञ्चैव षडेतान्नविधौ स्मरेत् ॥' इति क्रमेणोदाहरति । **पृथुमिति** ॥ आचष्टे इति शेषः । प्रथयति । तत्र प्रक्रियां दर्शयति । **वृद्धौ सत्यामिति** ॥ पृथु इ इति स्थिते परत्वाद्वृद्धौ कृतायां टिलोपः । अथवा कृतायामकृतायाञ्च वृद्धौ प्रवृत्त्या नित्य-त्वाद्वृद्धेः प्राक् टिलोपः । उभयथापि 'र ऋतः' इति रभावे प्रथयतीति रूपमिति भावः। वस्तुतस्तु अकृतायां वृद्धौ उकारस्य लोपः। कृतायान्तु औकारस्य लोपः। तथा च "शब्दान्तरस्य प्राप्नुवन विधिरनित्यः" इति टिलोपः अनित्यः । ततश्च परत्वात् टिलोपात् प्राग्वृद्धिरेवेति 'मुण्डमिश्र' इति सूत्रे भाष्ये स्थितम् । वृद्धौ सत्यां पूर्वं वा टिलोप इति मूलन्तु कृताकृतप्र-सङ्गित्वाट्टिलोपस्य नित्यत्वमभिप्रेत्येति बोध्यम् । **अपिप्रथदिति** ॥ वृद्धौ सत्यां टिलोपे अग्लो-पित्वाभावात् सन्वत्त्वे 'सन्यतः' इति इत्त्वे 'दीर्घो लघोः' इति दीर्घ इति भावः । **अपप्रथ-दिति** ॥ वृद्धेः पूर्वं टिलोपेन उकारस्य निवृत्तावग्लोपित्वात् सन्वत्त्वाभावे रूपम् । अबभ्रश-दित्यादौ वृद्धेः पूर्वं टिलोपे अग्लोपित्वान्न सन्वत्त्वमिति भावः । वृद्धौ सत्यां टिलोपे तु अबिभ्र-शदित्याद्यूह्यम् । **औजिढदिति** ॥ ऊहधातोः क्तिनि ढत्वधत्वष्टुत्वढलोपेषु ऊढिः तस्मात् णौ टिलोपे ऊढि इति ण्यन्ताल्लुङि चङि आटि वृद्धौ औढि अ त् इति स्थिते प्रक्रियां दर्शयति । **ढत्वादीनामिति** ॥ ढत्वधत्वष्टुत्वढलोपानामसिद्धत्वात् 'अजादेर्द्वितीयस्य' इति हृति शब्द-स्य द्वित्वमित्यर्थः । **इत्युक्तमिति** ॥ लुग्विकरणप्रक्रियायां ऊर्णुञ्धाताविति शेषः । एवञ्च हृतिशब्दस्य द्वित्वे हलादिशेषे 'कुहोश्चुः' इति हस्य चुत्वमिति भावः । **ढिशब्दस्येति** ॥ 'पूर्वत्रासिद्धीयमद्वित्वे' इत्यस्य क्वचिदनित्यत्वेऽप्यत्र तदप्रवृत्तौ मानाभावादिति भावः । **ऊढ-माख्यदिति** ॥ ऊहधातोः क्तप्रत्यये ढत्वधत्वष्टुत्वढलोपेषु ऊढशब्दात् ण्यन्ताल्लुङि चङि ढत्वादीनामसिद्धत्वात् हृतेत्यस्य द्वित्वे हलादिशेषे अभ्यासस्य चुत्वे रूपम् । **औडढदिति** ॥ 'पूर्वत्रासिद्धीयमद्वित्वे' इति ढत्वादीनामसिद्धत्वाभावपक्षे ढशब्दस्य द्वित्वे रूपम् । नन्विह परत्वात् टिलोपे सति णिच्सहितस्य हृतीति ढीत्यस्य वा द्वित्वे कृते अभ्यासे इकार एव श्रूयेत नत्वकार इत्यत आह । **ओः पुयणित्यादि** ॥ स्वशब्दाण्णिचि टिलोपमाशङ्क्य आह ।

वुक्तम् । 'प्रकृत्यैकाच्' (सू २०१०) । वृद्धिपुकौ । स्वापयति । त्वां मां वा आचष्टे त्वापयति मापयति । मपर्यन्तस्य त्वमौ । पररूपात्पूर्वं नित्यत्वाट्टिलोपः वृद्धिपुकौ । त्वादयति मादयति इति तु न्याय्यम् । अन्तरङ्गत्वात्पररूपे कृते 'प्रकृत्यैकाच्' (सू २०१०) इति प्रकृतिभावात् । न च प्रकृतिभावो भाष्ये प्रत्याख्यात इति भ्रमितव्यम् । भाष्यस्य प्रेष्ठाद्युदाहरणविशेषेऽन्यथासिद्धि-परत्वात् । युवामावां वा युष्मयति अस्मयति । श्वानमाचष्टे शावयति ।

प्रकृत्यैकाजिति ॥ प्रकृतिभावाट्टिलोपाभावे अकारस्य वृद्धौ आकारे पुगागमः । तदाह । **वृद्धिपुकाविति** ॥ त्वापयति मापयति इत्यत्र प्रक्रियां दर्शयति । **मपर्यन्तस्येति** ॥ युष्मदस्मद्भ्यां णौ 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य त्वमौ । त्व अद् इ, म अद् इ इति स्थिते आह । **पररूपादिति** ॥ कृते अकृते च पररूपे टिलोपस्य प्रवृत्तेर्नित्यत्वम्वोद्यम् । त्व इ म इ इति स्थिते आह । **वृद्धिरिति** ॥ अकारस्य आकारः । टिलोपस्य स्थानिवत्त्वन्तु न शङ्क्यम् । अजादेशत्वाभावात् । **पुगिति** ॥ 'अर्ति' इत्यनेनेति भावः । तदेवम्प्राचीनमतमुपन्यस्य स्वमतमाह । **त्वादयतीत्यादिना** ॥ तदेवोपपादयति । **अन्तरङ्गत्वादिति** ॥ त्व अद् इ, म अद् इ इति स्थिते नित्यमपि टिलोपम्बाधित्वा अन्तरङ्गत्वात्पररूपे कृते 'प्रकृत्यैकाच्' इति प्रकृतिभावे टिलोपस्याप्रवृत्तौ उपधावृद्धिरिति भावः । ननु 'इष्ठेमेयस्सु' किमुदाहरणमिति प्रश्ने प्रेयान् प्रेमा प्रेष्ठः इत्युदाहरणानि प्रदर्श्य नैतदस्ति प्रयोजनं 'प्रस्थस्फ' इति विहितप्रादीनामाभीयत्वेनासिद्धतया तस्य टिलोपाप्रसक्तेरित्युक्ता श्रेयान् श्रेष्ठः इत्यत्र 'प्रशस्यस्य श्रः' इति श्रादेशस्य पाञ्चमिकतया आभीयत्वाभावेनासिद्धत्वाभावात् टिलोपे अप्राप्ते प्रकृतिभावविधिरित्युदाहरणान्तरं प्रदर्श्य श्रादेशे अकारोच्चारणसामर्थ्यात्टिलोपो न भविष्यतीत्युक्ता स्रग्वितमः स्रजिष्ठः इत्यत्र 'विन्मतोर्लुक्' इति लुङ्निवृत्त्यर्थं प्रकृतिभावविधानमित्युक्ता प्राप्त एव टिलोपे आरभ्यमाणस्य लुकस्तदपवादतया लुका टिलोपस्य बाधो भविष्यतीति 'प्रकृत्यैकाच्' इत्यस्य भाष्ये प्रत्याख्यातत्वात् 'त्वादयति, मादयति' इत्यत्र प्रकृतिभावोपन्यासो न युज्यते इत्याशङ्क्य निराकरोति । **न च प्रकृतिभावो भाष्ये प्रत्याख्यात इति भ्रमितव्यमिति** ॥ कुत इत्यत आह । **भाष्यस्येति** ॥ उदाहृतभाष्यस्य हि प्रेयान् प्रेष्ठः इत्यादीनां प्रकृतिभावं विनाऽपि साधने तात्पर्यं, न तु प्रकृतिभावप्रत्याख्यानमभिमतम् । स्वमाचष्टे स्वापयतीत्यादौ तदावश्यकत्वात् । अत एव 'प्रकृत्यैकाच्' 'इष्ठेमेयस्सु' चेत्रैकाच उच्चारणसामर्थ्यादवचनात् प्रकृतिभाव इति वार्तिकव्याख्यावसरे 'अन्तरेणापि वचनं प्रकृतिभावो भविष्यति' इति भाष्ये उक्तम् । अन्यथा अन्तरेणैव वचनमित्युच्येत इत्यास्तान्तावत् । 'प्रत्ययोत्तरपदयोश्च' इत्यत्र एकवचने इत्यनुवृत्तम् । तच्च यौगिकमाश्रीयते । एकत्वविशिष्टवाचिनोर्युष्मदस्मदोरिति लभ्यते इति मत्वा आह । **युवामावां वेति** ॥ न च द्वयोरुक्तौ युवावादेशौ शङ्क्यौ विभक्तेर्लुका लुप्तत्वात् । न च लुकः प्रागेव युवावौ किन्न स्यातामिति वाच्यम् । 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इत्युक्तेरिति भावः । **शावयतीति** ॥ श्वानमाचष्टे इत्यर्थः । श्वन्शब्दाण्णौ

'नस्तद्धिते' (सू ६७९) इति टिलोपः। प्रकृतिभावस्तु न, येन नाप्राप्तिन्यायेन 'टेः' (सू १७८६) इत्यस्यैव बाधको हि सः। भत्वात्सम्प्रसारणम्। अन्ये तु 'नस्तद्धिते' (सू ६७९) इति नेहातिदिश्यते। इष्ठनि तस्यादृष्टत्वात्। ब्रह्मिष्ठ इत्यादौ परत्वात् 'टेः' (सू १७८६) इत्यस्यैव प्रवृत्तेः। तेन शुनयतीति रूपमाहुः। विद्वांसमाचष्टे विद्वयति। अङ्गवृत्तपरिभाषया सम्प्रसारणं नेत्येके। सम्प्रसारणे वृद्धावावादेशे च विदावयतीत्यन्ये। नित्यत्वाट्टिलोपात्प्राक्सम्प्रसारणम्। अन्तरङ्गत्वात्पूर्वरूपं टिलोपः। विदयतीत्यपरे।

श्वन् इ इति स्थिते आह। **नस्तद्धिते इति** ॥ 'प्रकृत्यैकाच्' इति प्रकृतिभावमाशङ्क्य आह। **प्रकृतिभावस्तु नेति** ॥ कुत इत्यत आह। **येनेति** ॥ 'टेः' इति टिलोपे प्राप्ते सत्येव प्रकृत्यैकाजित्यारभ्यते। 'नस्तद्धिते' इत्यस्य स्राजिष्टः इत्यादौ अप्राप्तोऽपि प्रकृतिभावः आरभ्यते इति भावः। **भत्वादिति** ॥ इष्टवत्त्वेन भत्वात् 'श्वयुव' इति सम्प्रसारणमित्यर्थः। तथा च श्वन् इ इति स्थिते टिलोपे सति तस्याभीयत्वेनासिद्धत्वादन्नन्तत्वात् वस्य सम्प्रसारणे पूर्वरूपे उकारस्य वृद्धौ आवादेशः। **अन्ये त्विति** ॥ इष्ठनि दृष्टस्यैव इष्ठवदित्यतिदेशः। टेरित्येव टिलोप इष्ठनि दृष्टः, न तु 'नस्तद्धिते' इति अतो नास्यातिदेश इत्यर्थः। नन्वतिशयेन ब्रह्मा ब्रह्मिष्ठ इत्यत्र नस्तद्धिते इति टिलोपो दृष्ट इत्यत आह। **ब्रह्मिष्ठ इत्यादाविति** ॥ **तेनेति** ॥ 'नस्तद्धिते' इत्यस्याप्रवर्तनेनेत्यर्थः। ततश्च प्रकृतिभावात् 'टेः' इति लोपस्याभावे सम्प्रसारणे शुनयतीति रूपमित्यर्थः। आहुरित्यस्वरसोद्भावनम्। तद्वीजन्तु ब्रह्मवच्छब्दादिष्ठनि टेरिति टिलोपापवादे 'विन्मतोर्लुक्' इति मतुपो लुकि 'नस्तद्धिते' इति टिलोपो दृष्ट एव। ततश्च इष्ठनि तस्यादृष्टत्वादित्ययुक्तम्। किञ्च ब्रंहिष्ठ इत्यादौ परत्वाट्टेरित्यस्य प्रवृत्तिरित्ययुक्तम्। केवलस्य ब्रह्मन्शब्दस्य वेदादिवचनस्य गुणवचनत्वाभावेन इष्ठनो दुर्लभत्वात् 'अजादेर्गुणवचनादेव' इत्युक्तेः। मत्वन्तादिष्ठनि तु मतोर्लुकि तेन 'टेः' इत्यस्य प्रवृत्तिबाधेन लुगुत्तरन्तदप्रवृत्त्या परत्वादित्यप्यसङ्गतिरिति शब्देन्दुशेखरे स्थितम्। **विद्वयतीति** ॥ विद्वस्शब्दाण्णौ टिलोपः। ननु इष्ठवत्त्वात् भत्वे वसोस्सम्प्रसारणमित्याशङ्क्य आह। **अङ्गवृत्तेति** ॥ 'अङ्गवृत्ते पुनर्वृत्तावविधिः' इति परिभाषयेत्यर्थः। 'अङ्गकार्ये कृते पुनर्नाङ्गकार्यम्' इति तदर्थः। वस्तुतस्तु विद्वयतीत्यत्र 'टेः' इत्यसोलोपे वस्वन्तत्वाभावात् सम्प्रसारणाप्रसक्तेरङ्गवृत्तपरिभाषोपन्यासो वृथेत्यस्वरसं सूचयति। **इत्येके इति। सम्प्रसारणे इति** ॥ विद्वस्शब्दाण्णौ इष्ठवत्त्वेन टिलोपे कृते वकारस्य सम्प्रसारणे पूर्वरूपे उकारस्य वृद्धौ आवादेशे विदावयतीत्यन्ये मन्यन्ते इत्यर्थः। अत्रापि पूर्ववदेवास्वरसः टिलोपे सति वस्वन्तत्वाभावात्। **नित्यत्वादिति** ॥ टिलोपे कृते अकृते च प्रवृत्तेः सम्प्रसारणं नित्यम्। टिलोपस्तु कृते सम्प्रसारणे पूर्वरूपे च कृते उसो भवति। अकृते तु अस् इत्यनित्यः। "शब्दान्तरस्य प्राप्नुवन्विधिरनित्यः" इति न्यायादिति भावः। ननु कृतेऽपि सम्प्रसारणे पररूपात्प्राक् अस एव टिलोप इति तस्य नित्यत्वमित्यत आह। **अन्तरङ्गत्वात्पूर्वरूपं टिलोपः इति** ॥ सम्प्रसारणे पूर्वरूपे कृते

उदञ्चमाचष्टे उदीचयति । उदैचिचत् । प्रत्यञ्चं प्रतीचयति । प्रत्यचिचत् । 'इकोऽसवर्णे—' (सू ९१) इति प्रकृतिभावपक्षे, प्रतिअचिचत् । सम्यञ्चमाचष्टे समीचयति । सम्यचिचत्—समिअचिचत् । तिर्यञ्चमाचष्टे तिरायति । अञ्चेष्टिलोपेनापहारेऽपि बहिरङ्गत्वेनासिद्धत्वात्तिरसस्तिरिः । 'असिद्धवदत्र—' (सू २१८३) इति चिणो लुङ्न्यायेन प्रथमटिलोपोऽसिद्धः । अतः पुनष्टिलोपो

उसो लोपेऽपि वस्वन्तत्वस्य विनंक्ष्यत्वान्न सम्प्रसारणमित्यस्वरसं सूचयति । **इत्यपरे इति ॥** एवञ्च विद्वयतीति प्रथमपक्ष एव स्थितः । तत्राङ्गवृत्तपरिभाषोपन्यास एव वृथेति स्थितम् । **उदीचयतीति ॥** उत्पूर्वकादञ्चिगित्यादिना क्विनि 'अनिदिताम्' इति नलोपे उदञ्चशब्दः । तस्माण्णौ इष्ठवत्त्वेन भत्वादच इत्यकारलोपं बाधित्वा 'उद ईत्' इति ईत्त्वे उदीचि इति ण्यन्ताल्लडादय इति भावः । **उदैचिचदिति ॥** लुङि 'द्विर्वचनेऽचि' इति णिलोपनिषेधात् चिशब्दस्य द्वित्वम् 'उपसर्गसमानाकारम्पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते' इत्युक्तेरुदः उपर्याडिति भावः । एवञ्च उदः पृथक्करणेन 'प्रकृत्यैकाच्' इति प्रकृतिभावान्न टिलोपः । **प्रतीचयतीति ॥** अच इत्यल्लोपे 'चौ' इति पूर्वस्य दीर्घः । इह अच इत्यल्लोपे चिशब्दात्प्रागटि तकारादिकारस्य यण् । अच इत्यकारलोपस्याभीयत्वेऽपि असमानाश्रयत्वान्नासिद्धत्वम् । लोपस्य णिनिमित्तत्वात् । आटस्तु लुङ्निमित्तत्वात् । **इकोऽसवर्णे इतीति ॥** 'न समासे' इति तु न । पृथक्करणेन समासनिवृत्तेः । **समीचयतीति ॥** 'समस्सभिः' इति सम्यादेशः । अच इति लोपे चावितिं दीर्घः । **सम्यचिचदिति ॥** सम्यादेशस्य स्थानिवत्त्वेनोपसर्गत्वात् पृथक्करणम् । पृथक्करणेन उत्तरपदपरत्वाभावेऽप्यन्तरङ्गत्वाज्जातस्सम्यादेशो न निवर्तते । **तिरायतीति ॥** तिरस् इत्यव्ययम् । तत्पूर्वात् अञ्चेः क्विनि नलोपे तिरस् अच् इत्यस्माण्णौ टिलोपेन धातोर्निवृत्तौ तिरसस्तिर्यलोपे इति तिरिभावे इकारस्य वृद्धावायादेशे तिरायि इत्यस्मात् ण्यन्ताल्लडादीति भावः । न च तिरसः पृथक्करणे सति धातोः 'प्रकृत्यैकाच्' इति प्रकृतिभावात् कथं टिलोप इति वाच्यम् । तिरसित्यस्य कदाप्यनुपसर्गतया उपसर्गसमानाकारत्वाभावेन पृथक्करणाभावात् । नन्वेवं सति अञ्चतेष्टिलोपेनापहारे सति अञ्चतिपरकत्वविरहात्कथमिह तिरसस्तिरिभाव इत्यत आह । **अञ्चेष्टिलोपेनेति । बहिरङ्गत्वेनेति ॥** बहिर्भूतनिमित्तकत्वादिति भावः । नन्वस्तु तिरसस्तिरिः । तत्र रेफादिकारस्य टेरिति लोपः स्यादित्यत आह । **असिद्धवदत्रेति ॥** प्रथमटिलोपोऽसिद्ध इत्यन्वयः । तिरस् अच् इ इति स्थिते प्रथमप्रवृत्तः अच् इत्येवंरूपटेर्लोपः तिरेष्टिलोपे कर्तव्ये आभीयत्वादसिद्ध इत्यर्थः । ननु प्रथमटिलोपस्य कथन्तिरेष्टिलोपे कर्तव्ये असिद्धत्वम् । टिलोपशास्त्रस्य एकत्वादित्यत आह । **चिणो लुङ्न्यायेनेति ॥** पचधातोर्भावकर्मणोर्लुङस्तङि प्रथमपुरुषैकवचने तशब्दे परे 'चिण् भावकर्मणोः' इति च्लेश्चिणि उपधावृद्धौ अटि अपाचि त इत्यस्मात् 'तिङश्च' इति तरपि तदन्तात् 'किमेत्तिङव्ययघादाम्' इत्याम्प्रत्यये अपाचिततरामिति स्थिते 'चिणो लुक्' इति प्रथमस्य तशब्दस्य लुकि कृते पुनस्तरप्प्रत्ययतशब्दस्य लुङ् न भवति । स्थानिभेदेन लुको भेदमाश्रित्य प्रथमलुकः असिद्धत्वेन व्यवधानादिति स्थितिः । एवमिहापीत्यर्थः । **अतः इति ॥** प्रथमटिलोपस्यासिद्ध-

न। अङ्गवृत्तपरिभाषया वा। चङ्यग्लोपित्वादुपधाह्रस्वो न। अतितिरायत्। सध्र्यश्चमाचष्टे सध्राययति। असससध्रायत्। विष्वद्र्यञ्चम् अविविष्वद्रायत्। देवद्र्यञ्चम् अदिदेवद्रायत्। अदद्र्यञ्चम् आददद्रायत्। अदमुयञ्चम् अदमुआययति। आददमुआयत्। अमुमुयञ्चम् अमुमुआययति। चङ्। आमुमुआयत्। भुवं भावयति। अबीभवत्। भ्रुवम्। अबुभ्रवत्। श्रियम् अशिश्रयत्। गाम् अजूगवत्। रायम् अरीरयत्। नावम् अनूनवत्। स्वर्धं स्वाशश्वत्। स्वः। अव्ययानां भमात्रे टिलोपः। स्वयति। असस्वत्—

त्वादित्यर्थः। **अङ्गवृत्तपरिभाषया वेति** ॥ पुनष्टिलोपो नेत्यनुषज्यते। न च तिरेरिकारस्याङ्गवृत्तपरिभाषया टेरिति लोपाभावे तिरायतीति वृद्धिरपि तस्य न स्यादिति वाच्यम्। अङ्गवृत्तपरिभाषाया अनित्यत्वेन वृद्धिविषये तदप्रवृत्तेः। **अग्लोपित्वादिति** ॥ तिरस् अच् इ इति स्थिते 'टेः' इत्यतो धातोर्लोपे सति तिरि इत्यस्य अग्लोपित्वम् अचो धातोर्लोपे अकारस्यापि लोपसत्वादित्यभिमानः। **सध्राययतीति** ॥ सहस्य सध्रिः। तिरायतीतिवद्रूपम्। सहेत्यस्य उपसर्गत्वाभावान्न पृथक्करणम्। तदाह। **अससध्रायदिति** ॥ **विष्वद्यञ्चमिति** ॥ विष्वक् अच् इ इति स्थिते 'विष्वग्देवयोश्च' इति विष्वक्शब्दटेरद्र्यादेशे टेरित्यचोधातोर्लोपे विष्वद्रि इ इति स्थिते वृद्धौ आयादेशे विष्वद्रायि इति ण्यन्ताल्लटि विष्वद्राययतीति रूपम्। **देवद्र्यञ्चमिति** ॥ देवशब्दस्य टेरद्र्यादेशे देवद्रायतीति सिद्धवत्कृत्य लुङ्याह। **अदिदेवद्रायदिति** ॥ अतितिरायदितिवद्रूपम्। **आददद्रायदिति** ॥ सर्वनामस्थानत्वाददस्शब्दस्य टेरद्र्यादेशः। त्यदाद्यत्वे सत्येव उत्त्वमत्त्वे इति पक्षे इदम्। अदस्शब्दाद्विभक्तेः लुका लुप्तत्वेन विभक्तिपरकत्वाभावेन त्यदाद्यत्वाप्रवृत्तेः। त्यदाद्यत्वाविषयत्वेऽपि उत्त्वमत्त्वे स्त इति मतमाश्रित्य आह। **अमुमुयंचमिति** ॥ अदस् अच् इ इति स्थिते टेरद्र्यादेशे अच् इत्यस्य टेर्लोपे अदद्रि इ इति स्थिते 'अदसोऽद्रेः पृथङ्मुत्वम्' इति मते दकाराकारयोर्दकाररेफयोश्च मत्वोत्त्वयोः कृतयोः अमुमु इ इति स्थिते प्रथमस्य इकारस्य णिचि वृद्धौ आयादेशे अमुमु आयि इति ण्यन्ताल्लडादीति भावः। मुत्वस्यासिद्धत्वान्न यण्। **अदमुआययतीति** ॥ 'केचिदन्त्यसदेशस्य' इति मते इदम्। **भुवमिति** ॥ भुवमाचष्टे इत्यर्थे भूशब्दात् णिच् वृद्ध्यावादेशौ भावि इत्यस्माल्लडादीति भावः। **अबीभवदिति** ॥ 'ओः पुयण्ज्' इति इत्त्वम्। **अबुभ्रवदिति** ॥ 'अचिश्नुधातु' इति उवङ्। अवर्णपरत्वाभावात् 'ओः पुयण्ज्' इति न। **स्वश्वमिति** ॥ सु शोभनः अश्वः इति विग्रहः। **स्वाशश्वदिति** ॥ उपसर्गसमानाकारस्य पृथक्करणादश्वशब्दस्य 'अजादेर्द्वितीयस्य' इति द्वित्वमाडागमश्च। **स्वरिति** ॥ स्वर् इत्यस्माण्णिचि 'अव्ययानाम्भमात्रे' इति टिलोपः। इष्टवत्त्वेन भत्वात् 'प्रकृत्यैकाच्' इति प्रकृतिभावस्तु येननाप्राप्तिन्यायेन टेरित्यस्यैव बाधकः। **असस्वदिति** ॥ द्वित्वे कार्ये णावजादेशस्य निषेधात् टिलोपम्बाधित्वा स्वर्शब्दस्य द्वित्वम्। अरित्यस्य लोपे अकारस्यापि लोपसत्त्वेन

असिस्वत्। बहून्भावयति। बह्यतीत्यन्ये। स्रग्विणं स्रजयति। संज्ञापूर्वकत्वान्न वृद्धिः। श्रीमतीं श्रीमन्तं वा श्रययति। अशिश्रयत्। पयस्विनीं पयसयति। इह टिलोपो न। तदपवादस्य लुकः प्रवृत्तत्वात्। स्थूलं स्थवयति। दूरं दवयति। कथं तर्हि 'दूरयत्यवनते विवस्वति' इति। दूरमतति अयते वा दूरात्, दूरातं कुर्वतीत्यर्थः। युवानं यवयति—कनयति। 'युवाल्पयोः—' (सू २०१९) इति वा कन्। अन्तिकं नेदयति। बाढं

अजादेशत्वादिति भावः। **असिस्वदिति** ॥ अर्लोपस्य अजादेशत्वन्नेति मते द्वित्वे कार्ये णौ टिलोपस्य निषेधाभावात् टिलोपे कृते णिचा सह स्विशब्दस्य द्वित्वमिति भावः। **बहूनिति** ॥ बहुशब्दाण्णिचि णाविष्ठवदित्यतिदेशात् 'बहोर्लोपो भूच बहोः' इति बहोर्भूभावः। इष्टस्य यिट्चेति यिडागमस्तु न। णाविष्ठवदिति सप्तम्या इष्ठनि परे दृष्टस्यैव कार्यस्यातिदेशादिति भावः। **बह्यतीति** ॥ यिडभावे तत्सन्नियोगशिष्टस्य भूभावस्याप्यभावादिति भावः। **स्रजयतीति** ॥ इष्टवत्त्वात् 'विन्मतोः' इति लुक्। नचाजादी गुणवचनादेवेति इष्टन्प्रत्ययः स्रग्विन्शब्दात् दुर्लभ इति इष्टवत्त्वमत्र कथमिति शङ्क्यम्। 'विन्मतोः' इति लुग्विधानेन स्रग्विन्शब्दादिष्टवत्त्वसिद्धेरिति भावः। उपधावृद्धिमाशङ्क्य आह। **संज्ञापूर्वकत्वान्न वृद्धिरिति** ॥ णाविष्ठवदित्यनेनातिदेशेन विनो लुकस्सत्वादङ्गवृत्तपरिभाषया न वृद्धिरिति कैयटः। **श्रीमतीमिति** ॥ श्रीमतीशब्दाण्णिचि णाविष्ठवदित्यतिदेशेन 'भस्याढे' इति पुंवत्त्वे 'विन्मतोः' इति मतो लुकि रेफादिकारस्य वृद्ध्यायादेशयोः श्रायि इत्यस्मात् लडादीति भावः। **अशिश्रयदिति** ॥ णावच आदेशो नेति वृद्ध्यायादेशयोः प्रागेव श्रीशब्दस्य द्वित्वे उत्तरखण्डे वृद्ध्यायादेशयोः कृतयोरुपधाह्रस्व इति माधवः। मतुपो लुकि अकारस्यापि लोपसत्त्वेन अग्लोपित्वान्नोपधाह्रस्वः इत्यन्ये। **पयस्विनीमिति** ॥ णिचि इष्टवत्त्वाद्विन्मतोरिति मतुपो लुगिति भावः। पयसयतीत्यत्र इष्टवत्त्वात् टिलोपमाशङ्क्य आह। **इह टिलोपो नेति** ॥ कुत इत्यत आह। **तदपवादस्येति** ॥ न च टिलोपम्बाधित्वा मतुपो लुकि कृते पयसष्टेर्लोपः कुतो न स्यादिति वाच्यम्। सत्यपि सम्भवे बाधनमिति न्यायेन पयसष्टिलोपस्यापि मतुपो लुका बाधात्। **स्थवयतीति** ॥ स्थूलशब्दात् णिचि इष्टवत्त्वात् स्थूलदूरेति स्थूलशब्दस्य यणादेर्लोपे ऊकारस्य गुणे अवादेशे स्थवि इत्यस्माल्लडादीति भावः। गुणे ओकारस्याचो ञ्णितीति वृद्धिस्तु न शङ्क्यम्। अङ्गकार्ये कृते पुनरङ्गकार्यस्याप्रवृत्तेः। **दवयतीति** ॥ पूर्ववद्यणादिलोपो गुणश्च। **कथन्तर्हीति** ॥ स्थूलदूरेति यणादिलोपस्य टिलोपापवादत्वादिति भावः। **दूरमततीति** ॥ 'अत सातत्यगमने' इति धातोः 'अन्येभ्योऽपि दृश्यते' इति क्विपि दूरादिति रूपम्। अय गतावित्यस्मात् क्विपि 'लोपो व्योः' इति यलोपे 'ह्रस्वस्य पिति' इति तुकि दूरादित्येव रूपम्। तस्माण्णौ टिलोपे दूरि इति ण्यन्तात् शतृप्रत्यये शपि इकारस्य गुणे अयादेशे दूरयच्छब्दस्य दूरयतीति सप्तम्यन्तमिति भावः। तदाह। **दूरातं कुर्वतीत्यर्थः इति**॥ कुर्वतीति सप्तम्यन्तम्। **यवयतीति**॥ युवन्शब्दात् णौ स्थूलदूरेति वनो यणादेर्लोपः। पूर्वस्य उकारस्य गुणे अवादेशः। यवि इत्यस्माल्लडादि। **कनयतीति** ॥ युवन्शब्दस्य कनादेशपक्षे रूपम्। तदाह। **युवाल्पयोरिति** ॥ **नेदयतीति** ॥

साधयति। प्रशस्यं प्रशस्ययति। इह श्रज्यौ न, उपसर्गस्य पृथक्कृतेः। वृद्धं ज्यापयति। प्रियं प्रापयति। स्थिरं स्थापयति। स्फिरं स्फापयति। उरुं वरयति-वारयति। बहुलं बंहयति। गुरुं गरयति। वृद्धं वर्षयति। तृप्रं त्रपयति। दीर्घं द्राघयति। बृन्दारकं बृन्दयति।

इति तिङन्तनामधातुप्रकरणम्।

॥ अथ तिङन्तकण्ड्वादिप्रकरणम् ॥

२६७८। कण्ड्वादिभ्यो यक्। (३-१-२७)

एभ्यो धातुभ्यो नित्यं यक्स्यात्स्वार्थे। 'धातुभ्यः' किम्। प्रातिपदिकेभ्यो मा भूत्। द्विधा हि कण्ड्वादयः, धातवः प्रातिपदिकानि च।

अन्तिकशब्दस्य णौ नेदादेशः। अन्तिकबाढयोर्नेदसाधावित्युक्तेः। **साधयतीति** ॥ बाढशब्दस्य णौ साधादेशः। **इहेति** ॥ प्रशस्ययतीत्यत्र 'प्रशस्यस्य श्रः' 'ज्यच' इति श्रज्यौ नेत्यर्थः। कुत इत्यत आह। **उपसर्गस्येति** ॥ तत्पृथक्करणे सति विशिष्टस्य स्थानिनोऽभावान्नादेशाविति भावः। **वृद्धं ज्यापयतीति** ॥ वृद्धस्य चेति वृद्धशब्दस्य ज्यादेशे वृद्धौ पुगिति भावः। 'प्रियस्थिर' इति सूत्रक्रमेणोदाहरति। **प्रियम्प्रापयतीति** ॥ प्रियशब्दस्य प्रादेशे वृद्धिः पुक्। **स्थापयतीति** ॥ स्थिरशब्दस्य स्थादेशे वृद्धिपुकौ। **वरयति-वारयतीति** ॥ उरुशब्दस्य वर्। संज्ञापूर्वकविधेरनित्यत्वादुपधावृद्धिविकल्प इति माधवः। **बंहयतीति** ॥ बहुलस्य बंहादेशः। **गरयतीति** ॥ गुरोः गर्। **वृद्धं वर्षयतीति** ॥ वृद्धस्य वर्षादेशः। वृद्धस्य चेति ज्यादेशेन विकल्प्यते। **त्रपयतीति** ॥ तृप्रस्य त्रप् आदेशः। अदुपधः। संज्ञापूर्वकत्वान्न वृद्धिः। गरयतीत्यादिवत्। त्रापयतीति क्वचित्पाठः। **द्राघयतीति** ॥ दीर्घस्य द्राघादेशः। **बृन्दयतीति** ॥ बृन्दारकस्य बृन्दादेशः॥

इति श्रीसिद्धान्तकौमुदीव्याख्यायाम्बालमनोरमायां
नामधातुप्रक्रिया समाप्ता।

अथ कण्ड्वादिप्रक्रिया निरूप्यन्ते ॥ **कण्ड्वादिभ्यो यक्। धातुभ्यः इति** ॥ 'धातोरेकाचः' इत्यतस्तदनुवृत्तेरिति भावः। **नित्यमिति** ॥ आधृषाद्वेति वाग्रहणन्तु निवृत्तमिति भावः। अन्यथा कण्ड्वतीत्यादापि स्यादिति भावः। **द्विधा हीति** ॥ एतच्च भाष्ये स्पष्टम्। तेन

'कण्डूञ् गात्रविघर्षणे'। कण्डूयति–कण्डूयते। 'मन्तु अपराधे'। रोष इत्येके। मन्तूयति। चन्द्रस्तु ञितमाह। मन्तूयते। 'वल्गु पूजामाधुर्ययोः" वल्गूयति। 'असु उपतापे' 'असु, असूञ्' इत्येके। अस्यति। असूयति–असूयते। 'लेट् लोट् धौर्त्ये, पूर्वभावे, स्वप्ने च' दीप्तावित्येके। लेट्यति। लेटिता। लोट्यति। लोटिता। 'लेला दीप्तौ'। 'इरस्, इरज्, इरञ्, ईर्ष्यायाम्' इरस्यति। इरज्यति। 'हलि च' (सू ३५४) इति दीर्घः। ईर्यति–ईर्यते। 'उषस् प्रभातीभावे' 'वेदे, धौर्त्ये, स्वप्ने च' 'मेधा आशुग्रहणे'। मेधायति। 'कुषुभ क्षेपे। कुषुभ्यति। 'मगध परिवेष्टने'। 'नीच दास्ये' इत्यन्ये। 'तन्तस् पम्पस् दुःखे'। 'सुख दुःख तत्क्रियायाम्' सुख्यति। दुःख्यति। सुखं दुःखं चानुभवतीत्यर्थः। 'सपर पूजायाम्'। 'अरर आराकर्मणि'। भिषज् चिकित्सायाम्'। 'भिष्णज् उपसेवायाम्। 'इषुध शरधारणे'। 'चरण वरण गतौ। 'चुरण चौर्ये'। 'तुरण त्वरायाम्'। 'भुरण धारणपोषणयोः'। 'गद्गद् वाक्स्खलने'। 'एला केला खेला विलासे'। 'इल इत्यन्ये'। 'लेखा स्खलने च'। अदन्तोऽयमित्यन्ये। लेख्यति। 'लिट अल्पकुत्सनयोः' लिट्यति। 'लाट जीवने'। 'हूणीङ् रोषणे लज्जायां च'। 'महीङ् पूजायाम्'। महीयते। पूजां लभते इत्यर्थः। 'रेखा श्लाघासादनयोः'। 'द्रवस् परितापपरिचरणयोः। 'तिरस् अन्तर्धौ'। 'अगद नीरोगत्वे'। 'उरस् बलार्थः'। उरस्यति। बलवान्भवतीत्यर्थः। 'तरण गतौ'। 'पयस् प्रसृतौ'। 'सम्भूयस् प्रभूतभावे'। 'अम्बर संवर संभरणे'। आकृतिगणोऽयम्।

इति तिङन्तकण्ड्वादिप्रकरणम्।

कण्डूरित्यादिरपि गृहीतरूपसिद्धिः। **लेटितेति** ॥'यस्य हलः' इति यलोपः। **मेधा आशुग्रहणे इति** ॥ आशुग्रहणन्त्वरया बोधः। सुग्रहणे इति पाठान्तरम्। **सुख्यतीति** ॥ यकि अतो लोपः। प्रातिपदिकेभ्यो यकि तु आर्द्धधातुकत्वाभावादल्लोपो न स्यादिति बोध्यम्। चौरादिकयोस्तु सुखयति दुःखयतीत्युक्तम्। **अरर आराकर्मणीति** ॥ आरा प्रतोदः तत्करणकं कर्म आराकर्म। **भिषज् चिकित्सायाम्** ॥ जान्तोऽयम्। भिषज्यति। **लेखा स्खलने चेति** ॥ लेखायति। **लेख्यतीति** ॥ अदन्ताद्यकि अतो लोपः। **आकृतिगणोऽयमिति** ॥ कण्ड्वादय इत्यर्थः। तेन दुवस् सन्दीपने इत्यादिसङ्ग्रहः। "समिधा अग्निं दुवस्यते" ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां कण्ड्वादयः समाप्ताः ॥

॥ अथ ङन्तप्रत्ययमालाप्रकरणम् ॥

कण्ड्वूयतेः सन् । 'सन्यङोः' (सू २३९५) इति प्रथमस्यैकाचो द्वित्वे प्राप्ते 'कण्ड्वादेस्तृतीयस्येति वाच्यम्' (वा ३४०४)। कण्ड्वूयियिषति। क्यजन्तात्सन्। 'यथेष्टं नामधातुषु' (वा ३४०६) । आद्यानां त्रयाणामन्यतमस्य द्वित्वमित्यर्थः । अजादेस्त्वाद्येतरस्य । पुपुत्रीयिषति–पुतित्वीयिषति–पुत्वीयियिषति । अशिश्वीयिषति–अश्वीयियिषति । नदराणां संयुक्तानामचः परस्यैव द्वित्वनिषेधः । इन्द्रीयतेः सन् । द्रीशब्दयिशब्दयोरन्यतरस्य द्वित्वम् । इन्दिद्रीयिषति–इन्द्रीयियिषति । चिचन्द्रीयिषति–चन्दिद्रीयिषति–चन्द्रीयियिषति–प्रियमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छति । पिप्रापयिषति–प्रापिपयिषति

अथ प्रत्ययमालां वक्ष्यन्नाह । **कण्ड्वूयतेस्सन्निति** ॥ 'धातोः कर्मणः' इत्यनेनेति भावः। **प्रथमस्यैकाचः इति** ॥ 'अजादेर्द्वितीयस्य' इति द्वित्वे प्राप्ते इत्यपि ज्ञेयम् । **कण्ड्वादेस्तृतीयस्येति** ॥ एकाचो द्वित्वमिति शेषः । कण्ड्वादेरित्यनन्तरं यगन्तस्येति शेषः । केवलकण्ड्वादिषु तृतीयैकाचोऽभावात् । **कण्ड्वूयियिषतीति** ॥ कण्ड्वूयेति यगन्तात् सनि इटि अतो लोपः। **क्यजन्तात्सन्निति** ॥ उदाह्रियते इति शेषः । यिस् इति तृतीयस्यैकाचो द्वित्वम्। असु उपतापे कण्ड्वादिः। असूयियिषति। अजादेस्तृतीयस्य एकाचो द्वित्वम्। यथेष्टन्नामधातुष्वित्यपि वार्तिकम्। नाम प्रातिपदिकं तद्घटितधातुष्वित्यर्थः। **आद्यानां त्रयाणामिति**॥ **अजादेस्त्वाद्येतरस्येति**॥ अजादेरित्यनुवृत्त्या आदिभूतादचः परेषामेकाचां यथेष्टमिति लाभादितिभावः। **नदराणामिति** ॥ तेषां मध्ये आदिभूतादचःपरस्यैवेत्यर्थः। **इन्द्रीयतेस्सन्निति** ॥ इन्द्रशब्दात् क्यजन्तात्सन्नित्यर्थः । **द्रीशब्दयिशब्दयोरिति** ॥ नकारस्य आदिभूतादचः परत्वान्न द्वित्वम् । दकारस्य तु आदिभूतादचः परत्वाभावान्न द्वित्वनिषेध इति भावः । **चिचन्द्रीयिषतीति** ॥ चन्द्रीयतेस्सनि प्रथमस्यैकाचो द्वित्वम्। **चन्दिद्रीयिषतीति** ॥ द्वितीयस्यैकाचो द्वित्वं दकारस्य। 'नन्द्राः' इति नकारस्य न द्वित्वमिति माधवः । आदिभूतादचः परेषान्नदराणां न द्वित्वमित्येव भाष्यसम्मतम् । अत्र नकारस्यापि न द्वित्वमित्येव युक्तम् । **चन्द्रीयियिषतीति** ॥ तृतीयस्यैकाचो द्वित्वम् । **प्रियमिति** ॥ प्रियमाख्यातुमिच्छतीत्यर्थे 'तत्करोति तदाचष्टे' इति ण्यन्तात्सनि इटि णाविष्ठवत्त्वात्प्रियशब्दस्य 'प्रियस्थिर' इति प्रादेशे वृद्धौ पुकि णिचो गुणायादेशयोष्षत्वे प्रापयिषेत्येव सन्नन्तम् । प्रियमाचक्षाणं प्रेरयितुमिच्छतीत्यर्थे तु प्रापि इति ण्यन्तादुक्ताद्धेतुमण्णौ तदन्तात् सनि इटि द्वितीयं णिचमाश्रित्य प्रथमणिचो लोपे द्वितीयणिचो गुणायादेशयोः प्रापयिषेत्येव सन्नन्तम् । तत्र यथेष्टन्नामधातुष्वित्याद्यानान्त्रयाणामेकाचामेकैकस्य द्वित्वेऽपि

—प्रापयियिषति। उरुं विवारयिषति—वारिरयिषति—वारयियिषति। बाढं सिसाधयिषतीत्यादिरूपत्रयम्। षत्वं तु नास्ति। 'यङ्सन्ण्यन्तात्सन्'। बोभूयिषयिषति। यङ्णिच्सन्नन्ताण्णिच्। बोभूययिषयतीत्यादि।

इति तिङन्तप्रत्ययमालाप्रकरणम्।

प्रापयिषतीत्यादि रूपत्रयमित्यर्थः। **उरुमिति** ॥ उरुमाख्यातुमाचक्षाणम्प्रेरयितुं वेच्छतीत्यर्थे उरुशब्दादाचष्टे इत्यर्थे णिचि 'प्रियस्थिर' इति वरादेशे उपधावृद्धौ वारि इति ण्यन्तान्सनि इटि णिचो गुणायादेशयोष्षत्वे वारयिषेति सन्नन्तम्। माधवमते वृध्यङ्गीकारात् वारि इत्यस्मात् हेतुमण्ण्यन्तात् सनि इटि प्रथमणेर्लोपे षत्वे वारयिषेत्येव रूपम्। तत्र यथेष्टन्नामधातुष्वित्येकैकस्य एकाचो द्वित्वे विवारयिषतीत्यादि रूपत्रयमित्यर्थः। **बाढं सिसाधयिषतीति** ॥ बाढमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छतीत्यर्थे णिजादि पूर्ववत्। अन्तिकबाढयोरिति साधादेशः। तत्र सकारस्यादेशत्वाभावान्न षत्वम्। तदाह। **षत्वन्तु नास्तीति** ॥ बोभूयिषयिषतीत्यत्र प्रक्रियां दर्शयति। **यङिति** ॥ भूधातोरिति शेषः। द्वित्वे बोभूयेति स्थितम्। **सन्निति** ॥ इटि अतो लोपे षत्वे भूयिषेति स्थितम्। **ण्यन्तात् सन्निति** ॥ बोभूयिषेत्यस्मात् हेतुमण्णिचि अतो लोपे बोभूयिषि इति स्थितम्। तस्मात् सनि इटि णिचो गुणायादेशयोः षत्वे बोभूयिषयिषेति स्थितम्। ततो लटस्तिपि शपि पररूपे बोभूयिषायिषतीति रूपम्। अनभ्यासस्येत्युक्तेर्न पुनर्द्वित्वम्। अथ बोभूययिषतीत्यत्र प्रक्रियान्दर्शयति। **यङिति** ॥ भूधातोरिति शेषः। द्वित्वे बोभूयेति स्थितम्। **णिजिति** ॥ बोभूयेत्यस्माद्धेतुमण्णौ अतो लोपे बोभूयि इति स्थितम्। **सन्नन्ताण्णिजिति** ॥ बोभूयि इत्यस्मात्सनि इटि णिचो गुणायादेशयोः षत्वे बोभूययिषेति स्थितम्। तस्माद्धेतुमण्णिचि अतो लोपे बोभूययिषि इत्यस्माल्लटस्तिपि शपि पररूपे बोभूययिषयतीति रूपं सिद्धम्॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायाम्प्रत्ययमाला समाप्ता।

॥ अथ तिङन्तात्मनेपदप्रकरणम् ॥

'अनुदात्तङित आत्मनेपदम्' (सू २१५७)। आस्ते। शेते।

२६७९ । भावकर्मणोः । (१-३-१३)

बभूवे। अनुबभूवे।

२६८० । कर्तरि कर्मव्यतिहारे । (१-३-१४)

क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं स्यात्। व्यतिलुनीते। अन्यस्य योग्यं लवनं करोतीत्यर्थः। 'श्नसोरल्लोपः' (सू २४६९)। व्यतिस्ते। व्यतिषाते। व्यतिषते। 'तासस्त्योः—' (सू २१९१) इति सलोपः। व्यतिसे। 'धि च' (सू २२४९)। व्यतिध्वे। 'ह एति' (सू २२५०)। व्यतिहे। व्यत्यसै।

अथ आत्मनेपदप्रक्रिया निरूप्यन्ते ॥ आत्मनेपदपरस्मैपदव्यवस्थापकानि सूत्राणि प्रथमस्य तृतीयपादे पठितानि। तानि क्रमेण व्याख्यास्यन् व्याख्यातमपि सूत्रं पुनः स्मारयति। **अनुदात्तङितः इति** ॥ आत्मनेपदमित्येतत् 'शेषात्कर्तरि परस्मैपदम्' इत्यतः प्रागनुवर्तते। **भावकर्मणोः** ॥ भावः भावना क्रियेति पर्यायाः। कर्मशब्दः कर्मकारके वर्तते। भावे कर्मणि च यो लकारस्तस्यात्मनेपदमित्यर्थः। भावे उदाहरति। **बभूवे इति** ॥ वृत्ता भवनक्रियेत्यर्थः। कर्मण्युदाहरति। **अनुबभूवे इति** ॥ आनन्द इति शेषः। आनन्दकर्मिका वृत्ता अनुभोगक्रियेत्यर्थः। **कर्तरि कर्म** ॥ कर्मव्यतिहारशब्दं विवृण्वन्नाह। **क्रियाविनिमये द्योत्ये इति** ॥ एवञ्च कर्मशब्दः क्रियापरः। व्यतिहारशब्दो विनिमयपर इत्युक्तं भवति। **अन्यस्येति** ॥ शूद्रादियोग्यं सस्यादिलवनं ब्राह्मणः करोतीत्यर्थः। परस्परकरणमपि कर्मव्यतिहार इति कैयटः। सम्प्रहरन्ते राजानः। कर्तृग्रहणम्भावकर्मणोरित्यस्यानुवृत्तिनिवृत्त्यर्थम्। अन्यथा व्यतिलुनीत इत्यत्र न स्यात्। वस्तुतस्तु पृथक् सूत्रारम्भादेव सिद्धे कर्तृग्रहणमुत्तरार्थमिति भाष्ये स्पष्टम्। व्यति अस् ते इति स्थिते आह। **श्नसोरिति** ॥ **व्यतिस्ते इति** ॥ तपसे अयोग्यः शूद्रस्तपस्वी भवतीत्यर्थः। इह 'उपसर्गप्रादुर्भ्याम्' इति न षः। यच्परकत्वाभावादिति भावः। **व्यतिषाते इति** ॥ इह अच्परकत्वादुपसर्गप्रादुर्भ्यामिति षः। व्यति स् से इति स्थिते आह। **तासस्त्योरिति** ॥ 'उपसर्गप्रादुर्भ्याम्' इति नेह षत्वम्। अस्त्यवयवस्य सकारस्य लुप्तत्वात्। व्यतिषाथे। व्यति स् ध्वे इति स्थिते आह। **धि चेति** ॥ सलोप इति शेषः। व्यतिस् ए इति स्थिते आह। **ह एतीति** ॥ सकारस्य हकार इति भावः। **व्य-**

व्यत्यास्त । व्यतिषीत । व्यतिराते । व्यतिरासे । व्यतिरासे । व्यतिभाते । व्यतिभासे । व्यतिभासे । व्यतिबभे ।

२६८१ । न गतिहिंसार्थेभ्यः । (१-३-१५)

व्यतिगच्छन्ति । व्यतिघ्नन्ति । 'प्रतिषेधे हसादीनामुपसंख्यानम्' (वा ८९८) हसादयो हसप्रकाराः शब्दक्रियाः । व्यतिहसन्ति । व्यतिजल्पन्ति । 'हरतेरप्रतिषेधः' (वा ८९९) । संप्रहरन्ते राजानः ।

२६८२ । इतरेतरान्योऽन्योपपदाच्च । (१-३-१६)

'परस्परोपपदाच्चेति वक्तव्यम्' (वा ९००) । इतरेतरस्यान्योऽन्यस्य परस्परस्य वा व्यतिलुनन्ति ।

२६८३ । नेर्विशः । (१-३-१७)

निविशते ।

२६८४ । परिव्यवेभ्यः क्रियः । (१-३-१८)

अकर्त्रभिप्रायार्थमिदम् । परिक्रीणीते । विक्रीणीते । अवक्रीणीते ।

२६८५ । विपराभ्यां जेः । (१-३-१९)

विजयते । पराजयते ।

त्यसै इति ॥ लोडुत्तमपुरुषैकवचनम् । **व्यत्यास्तेति** ॥ लङि रूपम् । **व्यतिषीतेति** ॥ लिङि रूपम् । **व्यतिराते इति** ॥ लटि प्रथमपुरुषैकद्विबहुवचनेषु समानमेव रूपम् । **व्यतिभाते इति** ॥ भाधातोः रूपम् । **व्यतिबभे इति** ॥ लिटि रूपम् । **न गतिहिंसार्थेभ्यः** । कर्मव्यतिहारे आत्मनेपदप्राप्त्यर्थः। हसादिगणस्य अदर्शनादाह । **हसप्रकाराः इति** ॥ उपसर्गमनपेक्ष्य ये गतिहिंसयोर्वर्तन्ते तेषामेव ग्रहणलाभाय अर्थग्रहणम् । हृञ्धातुस्तु उपसर्गबलाद्धिंसायां वर्तते इति न तस्य प्रतिषेध इत्याह । **हरतेरप्रतिषेधः इति** ॥ अर्थग्रहणलभ्यमिदं वार्तिकम् । **इतरेतर** ॥ नात्मनेपदमिति शेषः । **नेर्विशः** ॥ निपूर्वाद्विशः आत्मनेपदं स्यादित्यर्थः । नेति निवृत्तम् । यद्यपि न्यविशतेत्यत्र न विशिर्नेः परः । अटा व्यवधानात् । अटो विकरणान्ताङ्गभक्तत्वेन विशधात्ववयवत्वाभावात् । तथापि 'अड्व्यवाये उपसङ्ख्यानम्' इति वार्तिकाद्भवतीति 'शदेः शितः' इत्यत्र भाष्ये स्पष्टम् । **परिव्यवेभ्यः** ॥ परि वि अव एभ्यः परस्मात् क्रीञ्धातोरात्मनेपदमित्यर्थः । जित्त्वादात्मनेपदसिद्धेः किमर्थमिदमित्यत आह । **अकर्त्रभिप्रायार्थमिति** ॥ **विपराभ्याञ्जेः** ॥ वि परा आभ्याम्परस्मात् जिधातोरात्मनेपदमित्यर्थः । **विजयते इति** ॥ उत्कृष्टो भवतीत्यर्थः । **पराजयते इति** ॥ निकृष्टो भवतीत्यर्थः ।

२६८६। आङो दोऽनास्यविहरणे। (१-३-२०)

आङ्पूर्वाद्दातेर्मुखविकसनादन्यत्रार्थे वर्तमानादात्मनेपदं स्यात्। विद्यामादत्ते। 'अनास्य—' इति किम्। मुखं व्याददाति। आस्यग्रहणमविवक्षितम्। विपादिकां व्याददाति। पादस्फोटो विपादिका। नदी कूलं व्याददाति। 'पराङ्गकर्मकान्न निषेधः' (वा ९०३)। व्याददते पिपीलिकाः पतङ्गस्य मुखम्।

२६८७। क्रीडोऽनुसंपरिभ्यश्च। (१-३-२१)

चादाङः। अनुक्रीडते। संक्रीडते। परिक्रीडते। आक्रीडते। अनोः कर्मप्रवचनीयान्न। उपसर्गेण समा साहचर्यात्। माणवकमनुक्रीडति। तेन सहेत्यर्थः। 'तृतीयार्थे' (सू ५४९) इत्यनोः कर्मप्रवचनीयत्वम्। 'समोऽकूजने' (वा ९०४)। संक्रीडते। कूजने तु संक्रीडति चक्रम्। 'आगमेः क्षमायाम्' (वा ९०५)। ण्यन्तस्येदं ग्रहणम्। आगमयस्व तावत्। मा त्वरिष्ठा इत्यर्थः। 'शिक्षेर्जिज्ञासायाम्' (वा ९०६)। धनुषि शिक्षते। धनुर्विषये ज्ञाने शक्तो भवितुमिच्छतीत्यर्थः। 'आशिषि नाथः (वा ९१०)

आङो दो॥ आस्यविहरणं मुखविकसनम्। दा इत्यस्य दः इति पञ्चमी। तदाह। **ददातेर्मुखविकसनादन्यत्रेति॥ विद्यामादत्ते इति**॥ गृह्णातीत्यर्थः। दाञो भित्त्वेऽप्यकर्त्रभिप्रायार्थमिदम्। **अविवक्षितमिति**॥ अविहरणे इत्येतावदेव विवक्षितमित्यर्थः। **विपादिकां व्याददातीति**॥ क्षारौषधादिना विदारयतीत्यर्थः। अत्र आस्यविहरणाभावेऽपि विकसनसत्त्वान्नात्मनेपदमिति भावः। **नदी कूलं व्याददातीति**॥ भिनत्तीत्यर्थः। अत्रापि विकसनसत्त्वादास्यविहरणाभावेऽपि नात्मनेपदम्। **पराङ्गकर्मकान्न निषेधः इति**॥ वार्तिकम्। **पतङ्गस्येति**॥ पक्षिणो मुखम्भक्षणाय विकासयन्तीत्यर्थः। **क्रीडोऽनु**॥ **चादाङः इति**॥ तथाच अनु सम् परि आङ् एभ्यः परस्मात् क्रीडधातोरात्मनेपदमित्यर्थः। 'अनोऽकर्मप्रवचनीयान्न' इति वार्तिकम्। तदिदं न्यायसिद्धमित्याह। **उपसर्गेण समेति**॥ 'समोऽकूजने' इति वार्तिकम्। समः परस्मात् अकूजने विद्यमानात् क्रीडेरात्मनेपदमित्यर्थः। **कूजने तु संक्रीडति चक्रमिति**॥ कूजतीत्यर्थः। **आगमेः क्षमायामिति**॥ आत्मनेपदमिति शेषः। वार्तिकमिदम्। **ण्यन्तस्येदं ग्रहणमिति**॥ भाष्ये ण्यन्तस्यैवोदाहरणादिति भावः। **आगमयस्व तावदिति**॥ किञ्चित्कालं सहस्वेत्यर्थः। आङुपसर्गवशात् गमधातुः क्षमायां वर्तते। 'हन्त्यर्थाश्च' इति चुरादिगणसूत्रेण स्वार्थे णिच्। चुरादेराकृतिगणत्वाद्वा। **मा त्वरिष्ठाः इति**॥ फलितार्थकथनम्। 'शिक्षेर्जिज्ञासायाम्' इत्यपि वार्तिकम्। **धनुषि शिक्षते इति**॥ वैषयिके आधारे सप्तमी। शकिस्सन्नन्तः। 'सनि मीमा' इति इस्। अभ्यासलोपश्च। तदाह। **धनुर्विषये इत्यादि**॥ 'शिक्ष विद्योपादाने' इत्यस्य तु नेह ग्रहणम्। अनुदात्तेत्त्वादेव सिद्धेरिति भावः।

आशिष्येवेति नियमार्थं वार्तिकमित्युक्तम्। सर्पिषो नाथते। सर्पिर्मे स्यादित्याशास्त इत्यर्थः। कथं 'नाथसे किमु पतिं न भूभृताम्' इति। 'नाधसे' इति पाठ्यम्। हरतेर्गतताच्छील्ये' (वा ९०८)। गतं प्रकारः। पैतृकमश्वाः अनुहरन्ते। मातृकं गावः। पितुर्मातुश्चागतं प्रकारं सततं परिशीलयन्तीत्यर्थः। 'ताच्छील्ये' किम्। मातुरनुहरति। 'किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यम्' (९०७)। हर्षादयो विषयाः। तत्र हर्षो विक्षेपस्य कारणम्। इतरे फले।

२६८८। अपाच्चतुष्पाच्छकुनिष्वालेखने। (६-१-४२)

अपात्किरतेः सुट् स्यात्। 'सुडपि हर्षादिष्वेव वक्तव्यः' (वा ३७०६)। अपस्किरते वृषो हृष्टः। कुक्कुटो भक्षार्थी। श्वा आश्रयार्थी च। 'हर्षादिषु' इति किम्। अपकिरति कुसुमम्। इह तङ्सुटौ न। हर्षादिमात्रविवक्षायां

कथमिति ॥ भूभृतां पतिं किमु न नाथसे। न याचसे इत्यर्थः। आशिषः अप्रतीतेः कथमात्मनेपदमित्यर्थः। **नाधसे इति पाठ्यमिति** ॥ तवर्गचतुर्थान्तोऽयम्। "आशिषि नाथः" इति नियमस्तु तवर्गद्वितीयान्तस्यैवेति भावः। "हरतेर्गतताच्छील्ये' इति वार्तिकम्। आत्मनेपदमिति शेषः। **गतं प्रकारः इति** ॥ वृत्तमित्यर्थः। ताच्छील्यं स्वभावानुसरणम्। गतिताच्छील्यमिति यावत्। गतेति पाठे भावे क्तः। **पैतृकमश्वाः इति** ॥ पैतृकं वृत्तं अश्वाः स्वभावादनुसरन्तीत्यर्थः। **मातृकं गावः इति** ॥ अनुहरन्ते इत्यनुषज्यते। **मातुरनुहरतीति** ॥ अनुकरोतीत्यर्थः। अत्र सादृश्यमात्रं विवक्षितं, न तु गतिताच्छील्यमिति भावः। किरतेरिति वार्तिकम्। हर्षः प्रमोदः। जीविका जीवनोपायभक्षणम्। कुलायकरणं आश्रयसम्पत्तिः एषु कृधातोरात्मनेपदमित्यर्थः। ननु कृधातोर्विक्षेपार्थकस्य कथमेषु वृत्तिरित्यत आह। **हर्षादयो विषयाः इति** ॥ धात्वर्थत्वाभावेऽपि पदान्तरसमभिव्याहारगम्या इत्यर्थः। **तत्रेति** ॥ तेषु हर्षादिष्वित्यर्थः। **कारणमिति** ॥ तथाच हर्षमूलकत्वं विक्षेपस्य लभ्यते इति भावः। **इतरे इति** ॥ जीविकाकुलायकरणे विक्षेपस्य साध्ये इति लभ्येते। हर्षादीनामेवंविधविषयत्वे सत्येवात्मनेपदमिति फलितम्। भाष्ये तथैवोदाहृतत्वादिति भावः। **अपाच्चतुष्पात्** ॥ 'सुट्कात्पूर्वः' इत्यधिकृतम्। 'किरतौ लवने' इत्यतः किरतावित्यनुवर्तते। तदाह। **अपात् किरतेस्सुट् स्यादिति** ॥ चतुष्पात्सु शकुनिषु च गम्येष्वित्यपि ज्ञेयम्। आलेखनञ्जननम्। सुडपि हर्षादिष्वेवेति वार्तिकम्। **अपस्किरते वृषो हृष्टः इति** ॥ हर्षाद्भूमिं लिखन् धूल्यादि विक्षिपतीत्यर्थः। **कुक्कुटो भक्षार्थीति** ॥ अपस्किरते इत्यनुषज्यते। **श्वा आश्रयार्थीति** ॥ अपस्किरते इत्यनुषज्यते। **अपकिरति कुसुममिति** ॥ वृषादिरिति शेषः। ह्रियमाणो वृषादिः पादैः कुसुममवकिरतीत्यर्थः। अत्र हर्षाद्यभावान्नात्मनेपदम्। नापि सुट्। तदाह। **इह तङ्सुटौ नेति** ॥ ननु अपस्किरते वृषो हृष्ट इत्याद्युदाहरणत्रये यदि

यद्यपि तङ् प्राप्तस्तथापि 'सुडभावे नेष्यते' इत्याहुः। गजोऽपकिरति। 'आङि नुप्रच्छयोः' (वा ९०९)। आनुते। आपृच्छते। 'शप उपालम्भे' (वा ९११)। आक्रोशार्थात्स्वरितेतोऽकर्तृगेऽपि फले शपथरूपेऽर्थे आत्मनेपदं वक्तव्यमित्यर्थः। कृष्णाय शपते।

२६८९। समवप्रविभ्यः स्थः। (१-३-२२)

संतिष्ठते। 'स्थाघ्वोरिच्च' (सू २३८९)। समस्थित। समस्थिषाताम्। समस्थिषत। अवतिष्ठते। प्रतिष्ठते। वितिष्ठते। 'आङः प्रतिज्ञायामुपसंख्यानम्' (वा ९१२)। शब्दं नित्यमातिष्ठते। नित्यत्वेन प्रतिजानीते इत्यर्थः।

२६९०। प्रकाशनस्थेयाख्ययोश्च। (१-३-२३)

गोपी कृष्णाय तिष्ठते। आशयं प्रकाशयतीत्यर्थः। 'संशय्य कर्णादिषु तिष्ठते यः'। कर्णादीन्निर्णेतृत्वेनाश्रयतीत्यर्थः।

२६९१। उदोऽनूर्ध्वकर्मणि। (१-३-२४)

हर्षजीविकाकुलायकरणान्येव विवक्षितानि न त्वालेखनमपि तदा तङेव स्यान्न तु सुट् इत्यत आह। **हर्षादिमात्रेत्यादि**॥ **तथापीति**॥ आलेखनाभावेऽपीत्यर्थः। **नेष्यते इति**॥ किरतेर्हर्षजीविकेत्यात्मनेपदविधौ ससुट्कानामेव भाष्ये उदाहरणादिति भावः। भाष्यस्थान्युदाहरणान्यालेखनविषयान्येव भविष्यन्तीत्यस्वरसं सूचयति। **आहुरिति**॥ **गजोऽपकिरतीति**॥ स्वभावाख्यानमत्रेति भावः। 'आङि नुप्रच्छयोः' इति वार्तिकम्। **आनुते इति**॥ सृगाल इति भाष्यम्। सृगालः उत्कण्ठापूर्वकं शब्दङ्करोतीत्यर्थ इति कैयटः। ननु 'शप आक्रोशे' इत्यस्य स्वरितेत्त्वादेव सिद्धे 'शप उपालम्भने' इत्यात्मनेपदविधिर्व्यर्थ इत्यत आह। **आक्रोशार्थादिति**॥ 'शप आक्रोशे' इति स्वरितेतः कर्तृगामिन्येव फले आत्मनेपदं प्राप्तम्। अकर्तृगेऽपि फले शपथात्मकनिन्दाविशेषे विद्यमानात् तस्मात् शपधातोरात्मनेपदार्थमिदमित्यर्थः। **कृष्णाय शपते इति**॥ 'श्लाघह्नुङ्स्थाशपाम्' इति सम्प्रदानत्वाच्चतुर्थी। **समवप्रविभ्यः स्थः**॥ स्थः इति पञ्चमी। सम् अव प्र वि एभ्यः परस्मात् स्थाधातोरात्मनेपदमित्यर्थः। **सन्तिष्ठते इति**॥ समाप्तम्भवतीत्यर्थः। **प्रकाशन**॥ प्रकाशनं स्वाभिप्रायाविष्करणम्। स्थेयः विवादपदनिर्णेता। तिष्ठति विश्राम्यति विवादपदनिर्णयोऽस्मिन्नित्यर्थे बाहुलके अधिकरणे "अचो यत्" इति यत् इति व्युत्पत्तेः। 'स्थेयो विवादस्थानस्य निर्णेतरि पुरोहिते' इति मेदिनी। इह तु विवादपदनिर्णेतृत्वेनाध्यवसायो विवक्षितः। आख्या अभिधानम्। प्रकाशनाख्यायां स्थेयाख्यायाञ्च वर्तमानात् स्थाधातोरात्मनेपदमित्यर्थः। प्रकाशने उदाहरति। **गोपी कृष्णाय तिष्ठते इति**॥ 'श्लाघह्नुङ्स्थाशपाम्' इति सम्प्रदानत्वाच्चतुर्थी। स्थेये उदाहरति। **संशय्येति**॥ कर्णादिष्विति विषयसप्तमी। फलितमाह। **कर्णादीनिति**॥ **उदोऽनूर्ध्वकर्मणि**॥ ऊर्ध्व-

मुक्तावुत्तिष्ठते । 'अनूर्ध्व—' इति किम् । पीठादुत्तिष्ठति । 'ईहाया-मेव' (वा ९१३) । नेह । ग्रामाच्छतमुत्तिष्ठति ।

२६९२ । उपान्मन्त्रकरणे । (१-३-२५)

आग्नेय्या आग्नीध्रमुपतिष्ठते । 'मन्त्रकरणे किम्' । 'भर्तारमुपतिष्ठति यौव-नेन' । 'उपादेवपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यम् (वा ९१४) । आदित्यमुपतिष्ठते । कथं तर्हि 'स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती' इति । देवतात्वारोपात् । नृपस्य देवतांशत्वाद्वा । गङ्गा यमुनामुपतिष्ठते । उपश्लिष्य-तीत्यर्थः । रथिकानुपतिष्ठते । मित्रीकरोतीत्यर्थः । पन्थाः सुघ्नमुपतिष्ठते । प्राप्नोतीत्यर्थः । 'वा लिप्सायामिति वक्तव्यम्' (वा ९१९) । भिक्षुकः प्रभुमुपतिष्ठते—उपतिष्ठति वा । लिप्सया उपगच्छतीत्यर्थः ।

२६९३ । अकर्मकाच्च । (१-३-२६)

उपात्तिष्ठतेरकर्मकादात्मनेपदं स्यात् । भोजनकाल उपतिष्ठते । संनि-हितो भवतीत्यर्थः ।

२६९४ । उद्भ्यां तपः । (१-३-२७)

देशसंयोगानुकूला क्रिया ऊर्ध्वकर्म । तद्भिन्नमनूर्ध्वकर्म । तद्वृत्तेः स्थाधातोरुत्पूर्वादात्मनेपदमि-त्यर्थः । **मुक्तावुत्तिष्ठते इति** ॥ गुरूपगमनादिना यतते इत्यर्थः । **पीठादुत्तिष्ठतीति** ॥ उत्पततीत्यर्थः । 'उद ईहायामेव' इति वार्तिकम् । ईहा कायपरिस्पन्दः । **ग्रामाच्छतमुत्ति-ष्ठतीति** ॥ लभ्यते इत्यर्थः । **उपान्मन्त्रकरणे** ॥ मन्त्रकरणकेऽर्थे विद्यमानात्स्थाधातोरा-त्मनेपदमित्यर्थः । **आग्नेय्या आग्नीध्रमुपतिष्ठते इति** ॥ आग्नेय्या ऋचा आग्नीध्राख्यमण्डप-विशेषमुपेत्य तिष्ठतीत्यर्थः । स्थितेरकर्मकत्वेऽपि उपेत्येतदपेक्ष्य सकर्मकत्वम् । केचित्तु मन्त्र-करणके समीपावस्थितिपूर्वकस्तवे विद्यमानात् स्थाधातोरात्मनेपदमिति व्याचक्षते । तत्र स्तवः गुणवत्त्वेन सङ्कीर्तनमिति स्तुतशस्त्राधिकरणे प्रपञ्चितमस्माभिः । श्लोकैः राजानं स्तौतीत्यर्थे श्लोकैरुपतिष्ठते इत्यात्मनेपदम् । मन्त्रकरणकत्वाभावात् । उपादेवपूजा इति वार्तिकम् अमन्त्रकरण-कत्वार्थम् । **आदित्यमुपतिष्ठते इति** ॥ आभिमुख्यीभूयावस्थितिपूर्वकस्तुत्यादिभिः पूजयती-त्यर्थः । **कथन्तर्हीति** ॥ रघोर्देवतात्वाभावादिति भावः । समाधत्ते । **देवतात्वारोपा-दिति** ॥ **नृपस्येति** ॥ 'नाविष्णुः पृथिवीपतिः' इत्यादिस्मरणादिति भावः । **वा लिप्साया-मिति** ॥ लिप्साहेतुकार्थवृत्तेः स्थाधातोरात्मनेपदं वेत्यर्थः । **अकर्मकाच्च** ॥ **उपात्तिष्ठते-रिति** ॥ 'उपान्मन्त्रकरणे' इत्यतः 'समवप्रविभ्यः स्थः' इत्यतश्च तदनुवृत्तेरिति भावः । **उद्भि-भ्यान्तपः** ॥ अकर्मकादित्येवेति भाष्यम् । **दीप्यते इति** ॥ दीप्तिमान् भवतीत्यर्थः ।

'अकर्मकात्' इत्येव । उत्तपते । वितपते । दीप्यते इत्यर्थः । 'स्वाङ्गकर्मकाच्चेति वक्तव्यम्' (वा ९१६) । स्वमङ्गं स्वाङ्गं न तु 'अद्रवन्—' इति परिभाषितम् । उत्तपते वितपते पाणिम् । नेह । सुवर्णमुत्तपति सन्तापयति–विलापयति वेत्यर्थः । चैत्रो मैत्रस्य पाणिमुत्तपति । सन्तापयतीत्यर्थः ।

२६९५ । आङो यमहनः । (१-३-२८)

आयच्छते । आहते । अकर्मकात्स्वाङ्गकर्मकादित्येव । नेह । परस्य शिर आहन्ति । कथं तर्हि 'आजघ्ने विषमविलोचनस्य वक्षः' इति भारविः । 'आहध्वं मा रघूत्तमम्' इति भट्टिश्च । प्रमाद एवायमिति भागवृत्तिः । प्राप्येत्यध्याहारो वा । ल्यब्लोपे पञ्चमीति तु ल्यबन्तं विनैव तदर्थावगतिर्यत्र तद्विषयम् । भेत्तुमित्यादितुमुन्नन्ताध्याहारो वास्तु । समीपमेत्येति वा ।

२६९६ । आत्मनेपदेष्वन्यतरस्याम् । (२-४-४४)

हनो वधादेशो वा लुङि आत्मनेपदेषु परेषु । आवधिष्ट । आवधिषाताम् ।

स्वाङ्गकर्मकाच्चेति ॥ उद्विभ्यान्तप इत्यनुवर्तते । चकारादकर्मकसमुच्चयः । स्वाङ्गशब्दोऽत्र यौगिक इत्याह । **स्वमङ्गमिति** ॥ **सुवर्णमुत्तपतीति** ॥ अस्वाङ्गकर्मकत्वादकर्मकत्वाभावाच्च नात्मनेपदमिति भावः । स्वाङ्गशब्दोऽत्र न पारिभाषिकः । किन्तु यौगिक इत्यस्य प्रयोजनमाह । **चैत्रो मैत्रस्य पाणिमुत्तपतीति** ॥ अत्र अद्रवन्मूर्तिमदित्यादिपरिभाषितस्वाङ्गकर्मकत्वेऽपि स्वकीयाङ्गकर्मकत्वाभावान्नात्मनेपदमिति भावः । **आङो यमहनः** ॥ आङः परस्मात् यमो हनश्चात्मनेपदमित्यर्थः । **आयच्छते इति** ॥ रज्जुर्दीर्घीभवतीत्यर्थः । दीर्घीकरोति पादमिति वा । **आहते इति** ॥ सोदरमिति शेषः । **परस्य शिर आहन्तीति** ॥ स्वीयाङ्गकर्मकत्वाभावादकर्मकत्वाभावाच्च नात्मनेपदम् । **कथन्तर्हीति** ॥ स्वीयाङ्गकत्वाभावादकर्मकत्वाभावाच्चात्मनेपदासम्भवादिति भावः । **प्राप्येति** ॥ विषमविलोचनस्य वक्षः प्राप्य आजघ्ने इति रघूत्तमम्प्राप्य माहध्वमिति च प्राप्तिक्रियाम्प्रत्येव विषमविलोचनस्य रघूत्तमस्य च कर्मतया हन्तेरकर्मकत्वादात्मनेपदन्निर्बाधमिति भावः । यद्यपि हननक्रियाम्प्रत्यपि तयोरेव वस्तुतः कर्मत्वं तथापि तस्याविवक्षितत्वादकर्मकत्वमेव । 'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात् । प्रसिद्धेराविवक्षातः कर्मणोऽकर्मिका क्रिया' इत्यनुपदमेव वक्ष्यमाणत्वादिति बोध्यम् । ननु प्राप्येत्यध्याहारे प्रासादात्प्रेक्षते इत्यादिवत्पञ्चमी स्यादित्यत आह । **ल्यब्लोपे इति** ॥ ल्यब्लोपे पञ्चमीत्येतत्तु यत्रार्थाध्याहारमाश्रित्य ल्यबन्तार्थावगतिः तद्विषयकम् । अत्र तु ल्यबन्तशब्दाध्याहारान्नात्र पञ्चमीत्यर्थः । **भेत्तुमित्यादीति** ॥ एवञ्च ल्यब्लोपपञ्चम्या न प्रसक्तिरिति भावः । 'आजघ्ने विषम' इत्यत्र परिहारान्तरमाह । **समीपमेत्येति वेति** ॥ अध्याहार इति शेषः ।

२६९७ । हनः सिच् । (१-२-१४)

कित्स्यात् । अनुनासिकलोपः । आहत । आहसाताम् । आहसत ।

२६९८ । यमो गन्धने । (१-२-१५)

सिच्कित्स्यात् । गन्धनं सूचनं परदोषाविष्करणम् । उदायत । 'गन्धने' किम् । उदायंस्त पादम् । आकृष्टवानित्यर्थः ।

२६९९ । समो गम्यृच्छिभ्याम् । (१-३-२९)

'अकर्मकाभ्याम्' इत्येव सङ्गच्छते ।

२७०० । वा गमः । (१-२-१३)

गमः परौ झलादी लिङ्सिचौ वा कितौ स्तः । सङ्गसीष्ट–सङ्गंसीष्ट । समगत–समगंस्त । समृच्छते । समृच्छिष्यते । 'अकर्मकाभ्याम्' किम् । ग्रामं सङ्गच्छति 'विदिप्रच्छिस्वरतीनामुपसंख्यानम्' (वा ९१८) । वेत्तेरेव ग्रहणम् । संवित्ते । संविदाते ।

२७०१ । वेत्तेर्विभाषा । (७-१-७)

विषमविलोचनस्य समीपमेत्य स्वीयमेव वक्षः मल्ल इव वीरावेशादास्फालयाञ्चक्रे इत्यर्थः । तथाच स्वाङ्गकर्मकत्वादात्मनेपदं निर्बाधमिति भावः । लुङि आहन् स् त इति स्थिते । **हनः सिच्** । कित्स्यादिति शेषपूरणम् । 'असंयोगाल्लिट्कित्' इत्यतः तदनुवृत्तेरिति भावः । हनधातोः परस्सिच् कित्स्यादिति फलितम् । **अनुनासिकलोपः इति** ॥ 'अनुदात्तोपदेश' इति नकारलोप इत्यर्थः । उत् आ यम् स् त इति स्थिते । **यमो गन्धने** ॥ सिच्कित्स्यादिति शेषपूरणम् । सिचः कित्त्वे मकारस्य अनुदात्तोपदेश इति लोपः । **समो गम्यृच्छिभ्याम्** ॥ आत्मनेपदमिति शेषः । **अकर्मकाभ्यामित्येवेति** ॥ स्वाङ्गकर्मकाच्चेति तु निवृत्तामिति भावः । **सङ्गच्छते इति** ॥ सङ्गतम्भवतीत्यर्थः । **वा गमः** ॥ 'इको झल्' इत्यतो झलिति 'लिङ्सिचावात्मनेपदेषु' इत्यतो लिङ्सिचाविति 'असंयोगाल्लिट्' इत्यतः किदिति चानुवर्तते । तदाह । **गमः परावित्यादि॥ समगतेति** ॥ लुङि रूपम् । सिचः कित्त्वपक्षे 'अनुदात्तोपदेश' इति मकारलोपे 'हूखादञ्झात्' इति सिचो लुक् । **समृच्छते इति** ॥ 'ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु' इति तौदादिकस्य रूपम् । अत्र तौदादिकस्य ऋच्छतेरेव ग्रहणं, नतु ऋच्छादेशस्येति सूचयितुं लृङन्तमप्युदाहरति । **समृच्छिष्यते इति** ॥ **विदिप्रच्छिस्वरतीनामिति** ॥ सम इत्यनुवर्तते । सम्पूर्वेभ्यो विदिप्रच्छिस्वरतिभ्यः आत्मनेपदमित्यर्थः । **वेत्तेरिति** ॥ लुग्विकरणस्यैव विदेर्ग्रहणमित्यर्थः । व्याख्यानादिति भावः । **वेत्तेर्विभाषा** ॥ 'झोऽन्तः' इत्यतः झ इत्यनुवर्तते ॥ 'अद-

वेत्तेः परस्य झादेशस्यातो रुडागमो वा स्यात्। संविद्रते। संविदते। सम्पृच्छते। संस्वरते। 'अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम्' (वा ९२६)। अर्तीति द्वयोर्ग्रहणम्। अङ्विधौ त्वियर्तेरेवेत्युक्तम्। मा समृत, मा समृषाताम्, मा समृषत इति, समार्त, समार्षाताम्, समार्षत इति च भ्वादेः। इयर्तेस्तु मा समरत, मा समरेताम्, मा समरन्त इति, समारत, समारेताम्, समारन्त इति च। संशृणुते। सम्पश्यते। अकर्मकादित्येव। अत एव 'रक्षांसीति पुरापि संशृणुमहे' इति मुरारिप्रयोगः प्रामादिक इत्याहुः। अध्याहारो वा 'इति कथयञ्ज्यः' इति। अथास्मिन्नकर्मकाधिकारे हनिगम्यादीनां कथमकर्मकतेति चेत्। शृणु।

धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥

भ्यस्तात्' इत्यतः अदित्यनुवृत्तं षष्ठ्या विपरिणम्यते। शीङो रुडित्यतो रुडिति च। तदाह। **वेत्तेः परस्येत्यादिना॥ अर्तिश्रुदृशिभ्यः इति॥** सम्पूर्वेभ्यस्तङिति शेषः। **द्वयोरिति॥** भौवादिकस्य इयर्तेश्चेत्यर्थः। **अङ्विधौ त्विति॥** 'सर्तिशास्त्यर्तिभ्यश्च' इत्यत्रेत्यर्थः। **मा समृतेति॥** 'उश्च' इति सिचः कित्त्वान्न गुणः। 'हृस्वादङ्गात्' इति सिचो लोपः। माङ्योगे मासमृतेत्यादि। माङ्योगाभावे तु समार्तेत्यादि। इत्येवम्भौवादिकस्य ऋधातोः रूपमित्यर्थः। माङ्योगादाडभावः। अथ माङ्योगाभावे आडागमे उदाहरति। **समार्तेति॥** सम् आ ऋ स् त इति स्थिते 'उश्च' इति कित्त्वाद्गुणनिषेधे 'आटश्च' इति वृद्धिम्बाधित्वा परत्वात् हृस्वादङ्गादिति सिचो लोपे 'आटश्च' इति ऋकारस्य वृद्धौ रपरत्वे रूपम्। नच सिज्लोपस्यासिद्धत्वादाटश्चेति वृद्धौ कृतायां हृस्वादङ्गादिति सिज्लोपस्याप्रवृत्त्या समार्ष्टेत्येवोचितमिति वाच्यम्। 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति वचनेन पूर्वं सिज्लोपे पश्चादाटश्चेति वृद्धेः प्रवृत्तिसम्भवादित्यलम्। **इयर्तेस्त्विति॥** श्लुविकरण ऋधातोरित्यर्थः। **मा समरतेति॥** 'सर्तिशास्त्यर्ति' इत्यङ्। तत्र इयर्तेर्ग्रहणादिति भावः। 'ऋदृशोऽङि' इति गुणः। **समारतेति॥** 'आटश्च' इति वृद्धिः। **इति चेति॥** इयर्तेः रूपमिलन्वयः। तदेवमर्तिश्रुदृशिभ्यः इत्यत्र अर्तिप्रपञ्चमुक्त्वा श्नुधातोरुदाहरति। **संशृणुते इति॥** दृशेरुदाहरति। **सम्पश्यते इति॥ अकर्मकादित्येवेति॥** 'समो गम्यृच्छिभ्याम्' इत्यत्र अकर्मकादित्यनुवृत्तेरभ्युपगतत्वेन तत्रोपसङ्ख्यातवार्तिकेऽस्मिन् तदनुवृत्तेर्युक्तत्वादिति भावः। **अत एवेति॥** प्रामादिक इत्याहुरित्यन्वयः। सकर्मकत्वेनात्मनेपदासम्भवादिति भावः। **अध्याहारो वेति॥** इति कथयञ्ज्य इत्यध्याहारो वेत्यन्वयः। तथाच रक्षांसीति कथयञ्ज्यः पुरा संशृणुमहे इत्यत्र कथन एव रक्षसामन्वितत्वात् शृवः अकर्मकत्वादात्मनेपदानिर्बाधमिति भावः। **धातोरिति॥** धातोरर्थान्तरे वृत्तेरिति धात्वर्थेनोपसङ्ग्रहादिति प्रसिद्धेरिति अविवक्षातः इति चत्वारि वाक्यानि। अकर्मिका क्रियेति सर्वत्रान्वेति। कर्मण इति तु द्वितीयादिषु वाक्येष्व-

वहति भारम् । नदी वहति । स्यन्दते इत्यर्थः । जीवति । नृत्यति । प्रसिद्धेर्यथा । मेघो वर्षति । कर्मणोऽविवक्षातो यथा । 'हितान्न यः संशृणुते स किंप्रभुः' । 'उपसर्गादस्यत्यूह्योर्वेति वाच्यत्' (वा ९२०) । 'अकर्मकात्' इति निवृत्तम् । बन्धं निरस्यति--निरस्यते । समूहति--समूहते ।

२७०२ । उपसर्गाद्ध्रस्व ऊहतेः । (७-४-२३)

यादौ क्ङिति । ब्रह्म समुह्यात् । अग्निं समुह्य ।

२७०३ । निसमुपविभ्यो ह्वः । (१-३-३०)

निह्वयते ।

२७०४ । स्पर्धायामाङः । (१-३-३१)

कृष्णश्चाणूरमाह्वयते । 'स्पर्धायाम्' किम् । पुत्रमाह्वयति ।

२७०५। गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्न-प्रकथनोपयोगेषु कृञः । (१-३-३२)

न्वेति । **वहति भारमिति** ॥ प्रापयतीत्यर्थः । अत्र सकर्मकत्वमिति भावः । अस्यार्थान्तरे क्वचिदकर्मकत्वमुदाहरति । **नदी वहतीति** ॥ **स्यन्दते इति** ॥ प्रस्रवतीत्यर्थः । धात्वर्थोपसङ्ग्रहे उदाहरति । **जीवतीति । नृत्यतीति** ॥ जीवेः प्राणधारणमर्थः । नृतेस्त्वङ्गविक्षेपः । उभयत्रापि कर्मणो धात्वर्थान्तर्भावान्न सकर्मकत्वमिति 'सुप आत्मनः' इति सूत्रे भाष्ये स्पष्टम् । **मेघो वर्षतीति** ॥ वर्षणकर्मणो जलस्य प्रसिद्धत्वादकर्मकत्वम् । **हितान्न यः इति** ॥ हितात्पुरुषात् यः न संशृणुते स्वहितन्न मन्यते । सः किम्प्रभुः, कुत्सित इत्यर्थः । अत्र स्वहितस्य वस्तुतः कर्मत्वेऽपि तदविवक्षया अकर्मकत्वमिति भावः । एवाच्चास्मिन्नकर्माधिकारे हनि गम्यादीनां सतोऽपि कर्मणः अविवक्षया अकर्मकत्वं सिद्धमिति बोध्यम् । अकर्मकत्वनिर्णयोऽयं 'लः कर्मणि' इत्यादौ उपयुज्यते । **उपसर्गादस्यत्यूह्योर्वेति** ॥ आत्मनेपदमिति शेषः । **निवृत्तमिति** ॥ सोपसर्गयोरस्यत्यूह्योस्सकर्मकत्वनियमादिति भावः । **उपसर्गाद्ध्रस्व ऊहतेः** ॥ यादौ क्ङिति इति शेषपूरणम् । 'अयङ् यि क्ङिति' इत्यतः तदनुवृत्तेरिति भावः । **ब्रह्म समुह्यादिति** ॥ ऊह वितर्के, सम्यग्विचारयेदित्यर्थः । अत्र आशीर्लिङि यासुटः कित्त्वेन ऊकारस्य ह्रस्वः । **अग्निं समुह्येति** ॥ परितस्सम्मृज्येत्यर्थः । ल्यादेशस्य ल्यपः कित्त्वमिति भावः । **निसमुपवि** ॥ ह्वेञः कृतात्त्वस्य ह्वः इति पञ्चम्यन्तम् । **निह्वयते इति** ॥ संह्वयते । उपह्वयते । विह्वयते । अकर्त्रभिप्रायार्थमिदम् । **स्पर्द्धायामाङः** । आङ्पूर्वकात् स्पर्धाविषयकात् 'ह्वेञः' आत्मनेपदमित्यर्थः । **कृष्णश्चाणूरमाह्वयते इति** ॥ स्पर्द्धार्थमाकारयतीत्यर्थः । **गन्धनावक्षेपण** ॥ आत्मनेपदम् अकर्त्रभिप्रायेऽपीति शेषः । **गन्धनं हिं-**

गन्धनं हिंसा। उत्कुरुते। सूचयतीत्यर्थः। सूचनं हि प्राणवियोगानुकूलत्वाद्धिंसैव। अवक्षेपणं भर्त्सनम्। श्येनो वर्तिकामुदाकुरुते। भर्त्सयतीत्यर्थः। हरिमुपकुरुते। सेवते। परदारान्प्रकुरुते। तेषु सहसा प्रवर्तते। एधोदकस्योपस्कुरुते। गुणमाधत्ते। गाथाः प्रकुरुते। प्रकथयति। शतं प्रकुरुते। धर्मार्थं विनियुङ्क्ते। 'एषु' किम्। कटं करोति।

२७०६। अधेः प्रसहने। (१-३-३३)

प्रसहनं क्षमाभिभवश्च। 'षह मर्षणेऽभिभवे च' इति पाठात्। शत्रुमधिकुरुते। क्षमते इत्यर्थः। अभिभवतीति वा।

२७०७। वेः शब्दकर्मणः। (१-३-३४)

स्वरान्विकुरुते। उच्चारयतीत्यर्थः। 'शब्दकर्मणः' किम्। चित्तं विकरोति कामः।

२७०८। अकर्मकाच्च। (१-३-३५)

'वेः कृञः' इत्येव। छात्राः विकुर्वते। विकारं लभन्ते।

सेति॥ गन्ध अर्दने। अर्द हिंसायामित्युक्तेरिति भावः। **सूचयतीति॥** परदोषमाविष्करोतीत्यर्थः। नन्वेवं सति कथमस्य गन्धने वृत्तिः। हिंसायाः असत्त्वादित्यत आह। **सूचनं हीति॥ श्येनो वर्तिकामिति॥** वर्तिका शकुनिविशेषः। साहसिक्ये उदाहरति। **परदारान् प्रकुरुते इति॥** साहसप्रवृत्तिविषयीकरोतीत्यर्थः। सहसा वर्तते साहसिकः। 'ओजस्सहोऽम्भसा वर्तते' इति ठक्। तस्य कर्म असमीक्ष्यकरणं साहसिक्यम्। तदाह। **तेषु सहसा प्रवर्तते इति॥** फलितार्थकथनमिदम्। साहसप्रवृत्तिमात्रार्थकत्वे द्वितीयानुपपत्तेः। अतः साहसप्रवृत्तिविषयीकरणपर्यन्तानुधावनमिति बोध्यम्। प्रतियत्ने उदाहरति। **एधोदकस्योपस्कुरुते इति॥** एधशब्दः अदन्तः 'अवोदैधौद्मप्रश्रथहिमश्रथाः' इति सूत्रे निपातितः। एधश्च उदकञ्चेति समाहारद्वन्द्वः। यद्वा एधस्शब्दस्सकारान्तो नपुंसकलिङ्गः। एधश्च दकञ्चेति विग्रहः दकशब्दः उदकवाची प्रोक्तः प्राज्ञैः। 'जीवनममृतञ्जीवनीयं दकञ्च' इति हलायुधः। 'काष्ठन्दार्विन्धनन्त्वेध इध्ममेधस्समित् स्त्रियाम्' इत्यमरः। प्रतियत्नो गुणाधानमित्यभिप्रेत्य आह। **गुणमाधत्ते इति॥** काष्ठस्य शोषणादिगुणाधानं। दकस्य तु गन्धद्रव्यसम्पर्कजनितगन्धाधानम्। **अधेः प्रसहने॥** अधेः परस्मात् कृञः प्रसहनवृत्तेरात्मनेपदमित्यर्थः। **वेः शब्दकर्मणः॥** शब्दः कर्मकारकं यस्य तस्मात् कृञो विपूर्वादात्मनेपदमित्यर्थः। **अकर्मकाच्च॥ वेः कृञ इत्येवेति॥** तथाच अकर्मकात् विपूर्वात् कृञ आत्मनेपदमित्यर्थः। विकुर्वते इत्येतद्व्याचष्टे। **विकारं लभन्ते इति॥** लाभे विकारस्य कर्मत्वेऽपि धात्वर्थोपसङ्ग-

२७०९ । सम्माननोत्सञ्जनाचार्यकरणज्ञानभृ-तिविगणनव्ययेषु नियः । (१-३-३६)

अत्रोत्सञ्जनज्ञानविगणनव्ययाः नयतेर्वाच्याः । इतरे प्रयोगोपाधयः । तथा हि शास्त्रे नयते । शास्त्रस्थं सिद्धान्तं शिष्येभ्यः प्रापयतीत्यर्थः । तेन च शिष्यसम्माननं फलितम् । उत्सञ्जने । दण्डमुन्नयते । उत्क्षिपतीत्यर्थः । माणवकमुपनयते । विधिना आत्मसमीपं प्रापयतीत्यर्थः । उपनयनपूर्वकेणाध्यापनेन हि उपनेतरि आचार्यत्वं क्रियते । ज्ञाने । तत्त्वं नयते । निश्चिनोतीत्यर्थः । कर्मकरानुपनयते । भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः । विगणनमृणादेर्निर्यातनम् । करं विनयते । राज्ञे देयं भागं परिशोधयतीत्यर्थः । शतं विनयते । धर्मार्थं विनियुङ्क्ते इत्यर्थः ।

हादकर्मकत्वम् । **सम्माननोत्सञ्जन** ॥ एषु गम्येषु णीञ्धातोरात्मनेपदमित्यर्थः । परगामिन्यपि फले आत्मनेपदार्थमिदम् । **इतरे इति** ॥ सम्माननाचार्यकरणभृतयः इत्यर्थः । **प्रयोगोपाधयः इति** ॥ वाच्यत्वाभावेऽपि आर्थिकाः सत्तामात्रेण शब्दप्रयोगे निमित्तभूता इत्यर्थः । आत्मनेपदद्योत्या इति यावत् । तदेवोपपादयितुं प्रतिजानीते । **तथाहीति** ॥ सम्माननेन उदाहरति । **शास्त्रे नयते इति** ॥ अत्र णीञ् प्रापणार्थकः । सिद्धान्तमित्यध्याहार्यम् । सिद्धान्तम्प्रत्याधिकरणत्वात् शास्त्रे इति सप्तमी । तदाह । **शास्त्रस्थमिति** ॥ **तेनेति** ॥ सिद्धान्तप्रापणेनेत्यर्थः । **फलितमिति** ॥ अर्थादिति भावः । **उत्सञ्जने इति** ॥ उदाह्रियते इति शेषः । उत्सञ्जनमुत्क्षेपः । **उत्क्षिपतीत्यर्थः इति** ॥ धातूनामनेकार्थत्वादिति भावः । आचार्यकरणे उदाहरति । **माणवकमुपनयते इति** ॥ उपपूर्वो णीञ् समीपप्रापणार्थकः । सामीप्यञ्च प्रत्यासत्त्या प्रापयित्रपेक्षमेव । तच्च माणवकीयमात्मसमीपप्रापणं वैधमेव विवक्षितम् । पूर्वोत्तराङ्गकलापान्नानसामर्थ्यात् । तदाह । **विधिना आत्मसमीपं प्रापयतीति** ॥ तत्राचार्यकरणस्यार्थिकत्वमुपपादयति । **उपनयनपूर्वकेणेति** ॥ माणवकमुपनयीत तमध्यापयीतेत्यध्यापनार्थत्वमुपनयनस्यावगतम् । अध्यापनादाचार्यत्वं सम्पद्यते । 'उपनीय तु यश्शिष्यं वेदमध्यापयेत्तु यः । सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते ।' इपि स्मरणात् । तथा च आचार्यकरणमुपनयसाध्यत्वादार्थिकमिति भावः । **ज्ञाने इति** ॥ उदाह्रियते इति शेषः । **निश्चिनोतीत्यर्थः इति** ॥ नयतिर्निश्चयार्थक इति भावः । भृतौ उदाहरति । **कर्मकरानुपनयते इति** ॥ भृतिः वेतनं तदर्थङ्कर्म करोतीति कर्मकरः । 'कर्मणि भृतौ' इति टप्रत्ययः । कर्मण्युपपदे कृञः टः स्यात्कर्तरीति तदर्थः । उपपूर्वको णीञ् समीपप्रापणार्थकः । समीपप्रापणञ्च भृत्यर्थमिति कर्मकरशब्दसमभिव्याहाराद्गम्यते । फलितमाह । **भृतिदानेनेति** ॥ **ऋणादेरिति** ॥ आदिना करादिसङ्ग्रहः । निर्यातनं प्रत्यर्पणादि । **करं विनयते इति** ॥ राज्ञो देयो भागः करः । विपूर्वो णीञ् परिशोधनार्थकः । तदाह । **राज्ञे देयं भागं परिशोधयतीति** ॥ परिगणयति

२७१०। कर्तृस्थे चाशरीरे कर्मणि। (१-३-३७)

नियः कर्तृस्थे कर्मणि यदात्मनेपदं प्राप्तं तच्छरीरावयवभिन्न एव स्यात्। सूत्रे शरीरशब्देन तदवयवो लक्ष्यते। क्रोधं विनयते। अपगमयति। तत्फलस्य चित्तप्रसादस्य कर्तृगत्वात् 'स्वरितञितः—' (सू २१५८) इत्येव सिद्धे नियमार्थमिदम्। तेनेह न। गडुं विनयति। कथं तर्हि 'विगणय्य नयन्ति पौरुषम्' इति। कर्तृगामित्वाविवक्षायां भविष्यति।

२७११। वृत्तिसर्गतायनेषु क्रमः। (१-३-३८)

वृत्तिरप्रतिबन्धः। ऋचि क्रमते बुद्धिः। न प्रतिहन्यते इत्यर्थः। सर्ग उत्साहः। अध्ययनाय क्रमते। उत्सहते। क्रमन्तेऽस्मिन् शास्त्राणि। स्फीतानि भवन्तीत्यर्थः।

२७१२। उपपराभ्याम्। (१-३-३९)

वृत्त्यादिष्वाभ्यामेव क्रमेर्न तूपसर्गान्तरपूर्वात्। उपक्रमते। पराक्रमते। नेह संक्रामति।

दातुमित्यर्थः। व्यये उदाहरति। **शतं विनयते धर्मार्थमिति**॥ अत्र विपूर्वो णीञ् व्ययार्थकः। तदाह। **विनियुङ्क्ते इत्यर्थः इति**॥ **कर्तृस्थे**॥ **नियः इति**॥ कर्मकारके कर्तृस्थे सति णीञ्धातोर्यदात्मनेपदङ्कर्तृगेऽपि फले ञित्त्वात् प्राप्तं तत् शरीरावयवभिन्न एव सति कर्मकारके स्यात्। कर्मणः शरीरावयवत्वे तु कर्तृगेऽपि फले परस्मैपदमेवेत्यर्थः। ननु सूत्रे शरीरग्रहणात् कथं शरीरावयवेत्युक्तमित्यत आह। **सूत्रे इति**॥ शरीरतादात्म्यापन्नस्यैव कर्तृतया शरीरस्य कर्तृस्थत्वन्न सम्भवति। शरीरावयवानान्तु समवायेन आधारतया तत्सम्भवतीति भावः। ननु क्रोधापगमस्य क्रोधविषयशत्रुगतानिष्टपरिहारफलकत्वात् ञित्त्वेऽप्यात्मनेपदाप्राप्तेस्तद्विध्यर्थत्वात्कथमुक्तनियमार्थत्वमस्य सूत्रस्येत्यत आह। **तत्फलस्येत्यादि**॥ **गडुं विनयतीति**॥ कर्मणो गडोः शरीरावयवत्वान्नात्मनेपदमित्यर्थः। **कथं तर्हीति**॥ पौरुषस्य कर्मणः शरीरावयवभिन्नतया आत्मनेपदप्रसङ्गादिति भावः। **कर्तृगामित्वेति**॥ कर्तृस्थे कर्मणि नियः कर्तृगे फले ञित्त्वात् प्राप्तमात्मनेपदं शरीरावयवभिन्न एवेति नियम्यते, नतु विधीयते। अत्र तु फलस्य कर्तृगामित्वं सदपि न विवक्षितम् अतो नात्मनेपदमिति भावः। **वृत्तिसर्ग**॥ आत्मनेपदमिति शेषः। तायने उदाहरति। **क्रमन्तेऽस्मिन्निति**॥ तायनं वृद्धिः। तदाह। **स्फीतानीति**॥ **उपपराभ्याम्**॥ 'वृत्तिसर्गतायनेषु क्रमः' इत्यनुवर्तते। तेनैव सिद्धे नियमार्थमिदम्। तदाह। **आभ्यामेव क्रमेरिति**॥ आत्मनेपदमिति शेषः।

२७१३ । आङ उद्गमने । (१-३-४०)

आक्रमते सूर्यः । उदयते इत्यर्थः । 'ज्योतिरुद्गमने इति वाच्यम्' (वा ९२१) । नेह । आक्रामति धूमो हर्म्यतलात् ।

२७१४ । वेः पादविहरणे । (१-३-४१)

साधु विक्रमते वाजी । 'पादविहरणे' किम् । विक्रामति सन्धिः । द्विधा भवति । स्फुटतीत्यर्थः ।

२७१५ । प्रोपाभ्यां समर्थाभ्याम् । (१-३-४२)

समर्थौ तुल्यार्थौ । शकन्ध्वादित्वात्पररूपम् । प्रारम्भेऽनयोस्तुल्यार्थता । प्रक्रमते । उपक्रमते । 'समर्थाभ्याम्' किम् । प्रक्रामति । गच्छतीत्यर्थः । उपक्रामति । आगच्छतीत्यर्थः ।

२७१६ । अनुपसर्गाद्वा । (१-३-४३)

क्रामति–क्रमते । अप्राप्तविभाषेयम् । वृत्त्यादौ तु नित्यमेव ।

२७१७ । अपह्नवे ज्ञः । (१-३-४४)

शतमपजानीते । अपलपतीत्यर्थः ।

२७१८ । अकर्मकाच्च । (१-३-४५)

आङ उद्गमने ॥ आङः परस्मादुद्गमनवृत्तेः क्रमः आत्मनेपदमित्यर्थः । **आक्रमते सूर्यः इति** ॥ आङ्पूर्वः क्रमिरुद्गमनार्थकः । तदाह । **उदयते इत्यर्थः इति** ॥ उपसर्गवशादिति भावः । **वेः पादविहरणे** ॥ पादविहरणं पादविक्षेपः । तद्वृत्तेर्विपूर्वात् क्रमेरात्मनेपदमित्यर्थः । **साधु विक्रमते वाजीति** ॥ सम्यक्पदानि विक्षिपतीत्यर्थः । **प्रोपाभ्यां** ॥ क्रम आत्मनेपदमिति शेषः । समौ अर्थौ ययोरिति विग्रह इत्याह । **समर्थौ तुल्यार्थाविति** ॥ सवर्णदीर्घमाशङ्क्य आह । **शकन्ध्वादित्वादिति** ॥ ननु प्रक्रमते इत्यत्र अतिशयितपदविक्षेपार्थप्रतीतेः उपक्रमते इत्यत्र समीपे पदानि विक्षिपतीति प्रतीतेः कथमनयोस्तुल्यार्थकत्वमित्यत आह । **प्रारम्भेऽनयोस्तुल्यार्थतेति** ॥ तथाच आरम्भार्थकाभ्यामिति फलितमिति भावः । **अनुपसर्गाद्वा** ॥ क्रम आत्मनेपदमिति शेषः । **अप्राप्तविभाषेयमिति** ॥ अनुपसर्गात् क्रमेः आत्मनेपदस्य कदाप्यप्राप्तेरिति भावः । **वृत्त्यादाविति** ॥ वृत्तिसर्गतायनेषु तु पूर्वविप्रतिषेधान्नित्यमेवेत्यर्थः । **अपह्नवे ज्ञः** ॥ अपह्नवः अपलापः । तद्वृत्तेर्ज्ञाधातोरात्मनेपदमित्यर्थः । **अकर्मकाच्च** ॥ ज्ञः आत्मनेपदमिति शेषः । **सर्पिषो जानीते इति** ॥ अत्र ज्ञा-

सर्पिषो जानीते। सर्पिषोपायेन प्रवर्तते इत्यर्थः।

२७१९। संप्रतिभ्यामनाध्याने। (१-३-४६)

शतं सञ्जानीते। अवेक्षते इत्यर्थः। शतं प्रतिजानीते। 'अङ्गीकरोती-त्यर्थः। 'अनाध्याने' इति योगो विभज्यते। तत्सामर्थ्यात् अकर्मकाच्च' (सू २७१८) इति प्राप्तिरपि बाध्यते। मातरं मातुर्वा सञ्जानाति। कर्मणः शेषत्वविवक्षायां षष्ठी।

२७२०। भासनोपसम्भाषाज्ञानयत्नविमत्युप-मन्त्रणेषु वदः। (१-३-४७)

उपसम्भाषोपमन्त्रणे धातोर्वाच्ये, इतरे प्रयोगोपाधयः। शास्त्रे वदते।

धातुः प्रवृत्तौ वर्तते। 'ज्ञोऽविदर्थस्य करणे' इति तृतीयार्थे षष्ठी। तदाह। **सर्पिषोपायेन प्रवर्तते इति**॥ 'अनुपसर्गात् ज्ञः' इति वक्ष्यमाणेनैव सिद्धे सोपसर्गार्थमिदम्। सर्पिषोऽनुजानी-ते। **सम्प्रतिभ्यामनाध्याने** ॥ ज्ञः आत्मनेपदमिति शेषः। **अवेक्षते इत्यर्थः इति** ॥ अकर्मकत्वाभावात् पूर्वेणाप्राप्तिरिति भावः। अनाध्याने किम्। मातरं सञ्जानाति। आध्यायती-त्यर्थः। उत्कण्ठापूर्वकं स्मरणमाध्यानम्। ननु यदा आध्याने कर्मणश्शेषत्वविवक्षया षष्ठी-माश्रित्य मातुस्सञ्जानाति इति प्रयुज्यते तदा सम्पूर्वो जानातिरयमकर्मक इति स्थितिः। 'सम्प्रतिभ्यामनाध्याने' इत्यात्मनेपदस्याप्रवृत्तावपि 'अकर्मकाच्च' इति सूत्रेणात्मने-पदं दुर्वारम्। तत्र अनाध्याने इत्यभावात् सम्प्रतिभ्यामित्यत्र अनाध्यानग्रहणस्य मातरं सञ्जानातीति सकर्मके चरितार्थत्वादित्यत आह। **अनाध्याने इति योगो विभज्यते इति** ॥ ततश्च 'सम्प्रतिभ्याम्' इत्येको योगः। सम्प्रतिपूर्वात् ज्ञः आत्मनेपदमित्यर्थः। 'अना-ध्याने' इति योगान्तरम्। अनाध्याने सम्प्रतिभ्यामात्मनेपदमित्यर्थः। ततः किमित्यत आह। **अकर्मकाच्चेति प्राप्तिरपि बाध्यते इति** ॥ ननु अनन्तरस्येऽति न्यायेन सम्प्रतिभ्यामि-त्यस्यैव बाधो युक्त इत्यत आह। **तत्सामर्थ्यादिति** ॥ एकसूत्रत्वेनैव सिद्धे अनाध्याने इति योगविभागाद्व्यवहितस्यापि बाध इत्यर्थः। ननु मातरं मातुर्वा सञ्जानाति इत्यत्र मातुः कर्मत्वात् द्वितीयैव युक्तेत्यत आह। **कर्मणः शेषत्वविवक्षायां षष्ठीति** ॥ नचैवमपि 'अधीगर्थदयेशां कर्मणि' इति षष्ठ्येव स्यान्नतु द्वितीयेति वाच्यम्। तत्र शेष इत्यनुवर्त्य कर्मणः शेष-त्वविवक्षायां षष्ठी, कर्मत्वविवक्षायान्तु द्वितीयेत्यभ्युपगमात्। नचैवं सति 'षष्ठी शेषे' इत्यने-नैव सिद्धत्वात् 'अधीगर्थ' इति व्यर्थमिति वाच्यम्। मातुः स्मरणमित्यादौ शेषषष्ठ्यास्समासाभावार्थ-त्वादिति कारकाधिकारे प्रपञ्चितम्। **भासनोपसम्भाषा** ॥ आत्मनेपदमिति शेषः। **इतरे इति** ॥ भासनज्ञानादय इत्यर्थः। **प्रयोगोपाधयः इति** ॥ 'सम्माननोत्सञ्जन' इत्यत्र व्याख्यातं प्राक्। भासनन्तु तत्तदाक्षेपेषु समाधानाय नवनवयुक्त्युल्लेखः। **शास्त्रे वदते**

भासमानो ब्रवीतीत्यर्थः । उपसम्भाषा उपसान्त्वनम् । भृत्यानुपवदते । सान्त्वयतीत्यर्थः । ज्ञाने शास्त्रे वदते । यत्ने क्षेत्रे वदते । विमतौ क्षेत्रे विवदन्ते । उपमन्त्रणमुपच्छन्दनम् । उपवदते । प्रार्थयते इत्यर्थः ।

२७२१ । व्यक्तवाचां समुच्चारणे । (१-३-४८)

मनुष्यादीनां सम्भूयोच्चारणे वदेरात्मनेपदं स्यात् । सम्प्रवदन्ते ब्राह्मणाः । नेह सम्प्रवदन्ति खगाः ।

२७२२ । अनोरकर्मकात् । (१-३-४९)

व्यक्तवाग्विषयादनुपूर्वादकर्मकाद्वदेरात्मनेपदं स्यात् । अनुवदते कठः कलापस्य । 'अकर्मकात्' किम् । उक्तमनुवदति । 'व्यक्तवाचाम्' किम् । अनुवदति वीणा ।

२७२३ । विभाषा विप्रलापे । (१-३-५०)

विरुद्धोक्तिरूपे व्यक्तवाचां समुच्चारणे उक्तं वा स्यात् । विप्रवदन्ते-विप्रवदन्ति वा वैद्याः ।

२७२४ । अवाद्गः । (१-३-५१)

इति ॥ विषयसप्तम्येषा । **भासमानः इति** ॥ नवनवयुक्तीरुल्लिखतीत्यर्थः । शास्त्रे वदते इति विषयसप्तमी । व्यवहरतीत्यर्थः । व्यवहारश्च ज्ञानं विना न सम्भवतीति ज्ञानमार्थिकम् । ज्ञात्वा व्यवहरतीति फलितम् । **क्षेत्रे विवदन्ते इति** ॥ विरुद्धं व्यवहरन्तीत्यर्थः । विरुद्धव्यवहारश्च वैमत्यमूलक इति विमतिरार्थिकी । **उपवदते इति** ॥ उपपूर्वस्य वदेः प्रार्थनमर्थः । तदाह । **प्रार्थयते इत्यर्थः इति** ॥ **व्यक्तवाचाम्** ॥ व्यक्ताः अञ्जल्भेदेन स्पष्टोच्चारिताः वाचः शब्दाः येषामिति विग्रहः । समिल्लेकीभावे । तदाह । **मनुष्यादीनामिति** ॥ **सम्प्रवदन्ते ब्राह्मणाः इति** ॥ सम्भूयोच्चारयन्तीत्यर्थः । **अनोरकर्मकात्** ॥ व्यक्तवाचामित्यनुवृत्तं विषयषष्ठ्यन्तमाश्रीयते । समुच्चारणे इति निवृत्तम् । तदाह । **व्यक्तवाग्विषयादिति** ॥ मनुष्यकर्तृकादित्यर्थः । **अनुवदते इति** ॥ अनुः सादृश्ये । 'तुल्यार्थैरतुलोपमाभ्याम्' इति षष्ठी । कठः कलापेन तुल्यं वदतीत्यर्थः । वस्तुतस्तु शेषषष्ठीत्येवोचितम् । 'तुल्यार्थैः' इत्यत्र अतुलोपमाभ्यामिति पर्युदासेन अनव्ययानामेव तुल्यार्थानाङ्ग्रहणात् । अन्यथा चन्द्र इव मुखमित्यादावपि तृतीयाषष्ठ्योरापत्तेरित्यलम् । **विभाषा विप्रलापे** ॥ 'व्यक्तवाचां समुच्चारणे' इत्यनुवर्तते । विरुद्धोक्तिर्विप्रलापः । तदाह । **विरुद्धोक्तिरूपे इति** ॥ **अवाद्गः** ॥ आत्मनेपदमिति शेषः । गृ इत्यस्य ग्र इति पञ्चमी । प्रकृतिवदनुकरणमित्यस्यानित्यत्वात् 'ऋत इद्धातोः' इति न भवति ।

अवगिरते। 'गृणातिस्त्ववपूर्वो न प्रयुज्यत एव' इति भाष्यम्।

२७२५। समः प्रतिज्ञाने। (१-३-५२)

शब्दं नित्यं सङ्गिरते। प्रतिजानीते इत्यर्थः। 'प्रतिज्ञाने' किम्। सङ्गिरति ग्रासम्।

२७२६। उदश्वरः सकर्मकात्। (१-३-५३)

धर्ममुच्चरते। उल्लङ्घ्य गच्छतीत्यर्थः 'सकर्मकात्' किम्। बाष्पमुच्चरति। उपरिष्टाद्गच्छतीत्यर्थः।

२७२७। समस्तृतीयायुक्तात्। (१-३-५४)

रथेन सञ्चरते।

२७२८। दाणश्च सा चेच्चतुर्थ्यर्थे। (१-३-५५)

सम्पूर्वाद्दाणस्तृतीयान्तेन युक्तादुक्तं स्यात् सा च तृतीया चेच्चतुर्थ्यर्थे। दास्या संयच्छते। पूर्वसूत्रे 'समः' इति षष्ठी। तेन सूत्रद्वयमिदं व्यवहितेऽपि प्रवर्तते। रथेन समुदाचरते। दास्या संप्रयच्छते।

तदनित्यत्वे इदमेव मानम्। **अवगिरते इति**॥ शविकरणोऽयम्। अवगृणातीत्यत्राप्यात्मनेपदमाशङ्क्य आह। **गृणातिस्त्विति**॥ एवञ्च तुदादेरेव ग्रहणमिति भावः। **समः प्रतिज्ञाने**॥ गिरतेरात्मनेपदमित्यर्थः। प्रतिज्ञानम् अभ्युपगमः। **सङ्गिरति ग्रासमिति**॥ भक्षयतीत्यर्थः॥ **उदश्वरः**॥ उत्पूर्वाच्चरधातोस्सकर्मकादात्मनेपदमित्यर्थः। **समस्तृतीया**॥ सकर्मकादिति निवृत्तम्। सम्पूर्वात् तृतीयान्तसमभिव्याहृताच्चरेरात्मनेपदमित्यर्थः। तृतीयायुक्तादिति किम्। रथिकाः सञ्चरन्ति। अत्र यद्यपि रथेनेत्यर्थाद्गम्यते। तथापि तृतीयान्तश्रवणाभावान्नात्मनेपदम्। एतदर्थमेव योगग्रहणम्। अन्यथा तृतीययेत्यवक्ष्यत्। सकर्मकादप्येतदात्मनेपदम्भवति। अविशेषात्। अत एव तृतीयायुक्तादिति किम्। 'उभौ लोकौ सञ्चरसीमञ्चामुञ्च लोकम्' इति भाष्यं सङ्गच्छते। **दाणश्च सा**॥ 'समस्तृतीयायुक्तात्' इत्यनुवर्त्तते। तदाह। **सम्पूर्वादिति**॥ **उक्तं स्यादिति**॥ आत्मनेपदमित्यर्थः। **सा चेदिति**॥ तच्छब्देन तृतीया परामृश्यते। तदाह। **तृतीया चेदिति**॥ **दास्या संयच्छते इति**॥ अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया वाच्येति तृतीया। ननु रथेन समुदाचरते इत्यत्र 'समस्तृतीयायुक्तात्' इति पूर्वसूत्रस्य न प्रवृत्तिः। आङा व्यवहितत्वेन सम्पूर्वकत्वाभावात् 'तस्मादित्युत्तरस्य' इति परिभाषया सम इति पञ्चम्याः चरेः अव्यवहितपरत्वलाभात्। तथा दास्यां सम्प्रयच्छते इत्यत्रापि 'दाणश्च सा चेत्' इति कथम्प्रवर्तते। प्रशब्देन व्यवधानादित्यत आह। **पूर्वसूत्रे समः इति षष्ठीति**॥ तथाच षष्ठ्या पौर्वापर्यमेव गम्यते।

२७२९ । उपाद्यमः स्वकरणे । (१-३-५६)

स्वकरणं स्वीकारः । भार्यामुपयच्छते ।

२७३० । विभाषोपयमने । (१-२-१६)

यमः सिच्किद्वा स्याद्विवाहे । रामः सीतामुपायत–उपायंस्त वा । उदवोढेत्यर्थः । गन्धनाङ्गे उपयमे तु पूर्वविप्रतिषेधान्नित्यं कित्त्वम् ।

२७३१ । ज्ञाश्रुस्मृदृशां सनः । (१-३-५७)

सन्नन्तानामेषां प्राग्वत् । धर्मं जिज्ञासते । शुश्रूषते । सुस्मूर्षते । दिदृक्षते ।

२७३२ । नानोर्ज्ञः । (१-३-५८)

न त्वव्यवहितत्वमिति भावः । **तेनेति** ॥ षष्ठ्याश्रयणेनेत्यर्थः । **सूत्रद्वयमिति** ॥ 'समस्तृतीयायुक्तात्' इति पूर्वसूत्रस्थस्य षष्ठ्यन्तस्यैव 'दाणश्च' इति सूत्रेऽप्यनुवृत्तेरिति भावः । **उपाद्यमः** ॥ आत्मनेपदमिति शेषः । ननु स्वं वस्त्रमुत्पादयतीत्यर्थे वस्त्रमुपयच्छतीत्यत्राप्यात्मनेपदं स्यादित्यत आह । **स्वकरणं स्वीकारः इति** ॥ अस्वस्य सतः स्वत्वेन परिग्रहः स्वकरणशब्देन विवक्षित इत्यर्थः । च्विप्रत्ययस्तु वैकल्पिकः । 'समर्थानां प्रथमाद्वा' इत्युक्तेरिति भाष्ये स्पष्टम् । **भार्यामुपयच्छते इति** ॥ अन्यदीयाङ्कन्याम्भार्यात्वेन परिगृह्णातीत्यर्थः । **विभाषोपयमने** ॥ 'यमो गन्धने' इत्यतो यम इति 'हनस्सिच्' इत्यतस्सिजिति 'असंयोगात्' इत्यतः किदिति चानुवर्तते । तदाह । **यमः सिच्किद्वा स्याद्विवाहे इति** ॥ उपयमशब्दो विवाहे वर्तते इति भावः । **रामः सीतामुपायतेति** ॥ भार्यात्वेन स्वीकृतवानित्यर्थः । सिचः कित्त्वपक्षे 'अनुदात्तोपदेश' इति मकारलोपे 'ह्रस्वादङ्गात्' इति सिचो लोपः । **उदवोढेति** ॥ भार्यात्वेन परिग्रहः उद्वाहः । **गन्धनाङ्गे उपयमे त्विति** ॥ हिंसापूर्वके विवाहे त्वित्यर्थः । राक्षसविवाहे त्विति यावत् । 'हत्वा भित्वा च शीर्षाणि रुदतीं रुदतो हरेत् । स राक्षसो विवाहः' इति स्मृतेः । **नित्यङ्कित्त्वमिति** ॥ 'यमोऽगन्धने' इति पूर्वसूत्रेणेति शेषः । यदि गन्धनाङ्गकेऽप्युपयमने परत्वादियं विभाषा स्यात् तर्हि एषा प्राप्तविभाषा स्यात् । 'ततश्च 'नवेति विभाषा' इत्यत्र भाष्ये अप्राप्तविभाषासु अस्याः परिगणनं विरुध्येत । अतः पूर्वविप्रतिषेध आश्रयणीय इति भावः । **ज्ञाश्रु** ॥ **प्राग्वदिति** ॥ आत्मनेपदमित्यर्थः । यद्यपि 'अपह्नवे ज्ञः अकर्मकाच्च, सम्प्रतिभ्यामनाध्याने' इति सूत्रे 'आर्तिश्रुदृशिभ्यश्च' इति वार्तिकेन च ज्ञादिभ्यः आत्मनेपदे कृते 'पूर्ववत्सनः' इत्यात्मनेपदं सिद्धम् । तथाप्यपह्नवाद्यभावेऽप्यात्मनेपदार्थं ज्ञाश्रुदृशीनामिह ग्रहणमिति मत्वोदाहरति । **धर्मं जिज्ञासते इति** ॥ ज्ञातुमिच्छतीत्यर्थः । **शुश्रूषते इति** ॥ 'अज्झनगमां सनि' इति दीर्घः । 'इको झल्' इति सनः कित्त्वम् । 'श्रुवः किति' इति इण्निषेधः । **सुस्मूर्षते इति** ॥ स्मृधातोस्सनि 'अज्झन' इति दीर्घे 'उदोष्ठ्यपूर्वस्य' इत्युत्त्वे रपरत्वे 'हलि च' इति दीर्घः । **नानोर्ज्ञः** ॥ अनुपू-

पुत्रमनुजिज्ञासति। पूर्वसूत्रस्यैवायं निषेधः। 'अनन्तरस्य–' (प ६२) इति न्यायात्। तेनेह न। सर्पिषोऽनुजिज्ञासते। सर्पिषा प्रवर्तितुमिच्छतीत्यर्थः। 'पूर्ववत्सनः' (सू २७३४) इति तङ्। 'अकर्मकाच्च' (सू २७१८) इति केवलाद्विधानात्।

२७३३। प्रत्याङ्भ्यां श्रुवः। (१-३-५९)

आभ्यां सन्नन्ताच्छ्रुव उक्तं न स्यात्। प्रतिशुश्रूषति। आशुश्रूषति। कर्मप्रवचनीयात्स्यादेव। देवदत्तं प्रति शुश्रूषते। 'शदेः शितः' (सू २३६२) 'म्रियतेर्लुङ्लिङोश्च' (सू २५३८) व्याख्यातम्।

२७३४। पूर्ववत्सनः। (१-३-६२)

सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात्। एदिधिषते शिशयिषते। निविविक्षते। 'पूर्ववत्' किम्। बुभूषति। 'शदेः—' (सू २३६२) (सू २५३८) इत्यादिसूत्रद्वये 'सनो न' इत्यनुवर्त्य वाक्यभेदेन व्याख्येयम्। तेनेह न। शिशत्सति। मुमूर्षति। 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य (सू २२४०) एधांचक्रे।

र्वात् ज्ञाधातोस्सन्नन्तात् नात्मनेपदमित्यर्थः। **पुत्रमनुजिज्ञासतीति** ॥ अनुज्ञातुमिच्छतीत्यर्थः। ननु सर्पिषा प्रवर्तितुमिच्छतीत्यर्थे सर्पिषोऽनुजिज्ञासते इत्यत्रापि 'अपह्नवे ज्ञः, अकर्मकाच्च' इत्यात्मनेपदस्याप्यनेन निषेधे सति सन्नन्तात्परस्मैपदमेव स्यादित्यत आह। **पूर्वसूत्रस्यैवेति** ॥ एवञ्च सर्पिषोऽनुजिज्ञासते इत्यत्र 'अकर्मकाच्च' इत्यात्मनेपदान्निर्बाधमिति भावः। ननु 'अकर्मकाच्च' इति ज्ञाधातोरात्मनेपदे सन्नन्तात्कथमात्मनेपदलाभ इत्यत आह। **पूर्ववदिति** ॥ केवलात् सन्विहीनात् ज्ञाधातोरात्मनेपदविधानात् सन्नन्तादपि तस्मात् 'पूर्ववत्सनः' इत्यात्मनेपदमित्यर्थः। **प्रत्याङ्भ्यां श्रुवः** ॥ **उक्तं नेति** ॥ आत्मनेपदन्नेत्यर्थः। प्रत्याङाविहोपसर्गावेव गृह्येते। व्याख्यानात्। तदाह। **कर्मप्रवचनीयात्स्यादेवेति** ॥ आत्मनेपदमिति शेषः। **देवदत्तं प्रतीति** ॥ 'लक्षणेत्थम्भूत' इति प्रतिः कर्मप्रवचनीयः। **पूर्ववत्सनः** ॥ पूर्वेणेव पूर्ववत्। तेन तुल्यमिति तृतीयान्ताद्वतिः। पूर्वशब्देन सन्प्रकृतिर्विवक्षिता। तदाह। **सनः पूर्वः इत्यादि** ॥ **एदिधिषते इति** ॥ सन्प्रकृतेरेव धातोरात्मनेपदित्वात्तत्प्रकृतिकसन्नन्तादात्मनेपदम्। 'नेर्विशः' इत्यात्मनेपदविधानात्तत्प्रकृतिकसन्नन्तादपि आत्मनेपदम्। ननु 'शदेः शितः' 'म्रियतेर्लुङ्लिङोश्च' इत्यात्मनेपदविधानात् शिशत्सति मुमूर्षति इत्यत्रापि सन्नन्तादात्मनेपदं स्यादित्यत आह। **शदेरित्यादीति** ॥ आदिना म्रियतेः 'लुङ्लिङोश्च' इत्यस्य ग्रहणम्। शदेरित्यादिसूत्रद्वये 'पूर्ववत्सनः' इति 'नानोर्ज्ञः' इत्यतो नेति चानुवर्त्य शदेर्म्रियतेश्च सन्नन्तान्नात्मनेपदमिति व्याख्येयमित्यर्थः। नन्वेवं सति शीयते

२७३५ । प्रोपाभ्यां युजेरयज्ञपात्रेषु । (१-३-६४)

प्रयुङ्क्ते । उपयुङ्क्ते । 'स्वराद्यन्तोपसर्गादिति वक्तव्यम्' (वा ९३९) । उद्युङ्क्ते । नियुङ्क्ते । 'अयज्ञपात्रेषु' किम् । द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति ।

२७३६ । समः क्ष्णुवः । (१-३-६५)

संक्ष्णुते शस्त्रम् ।

२७३७ । भुजोऽनवने । (१-३-६६)

ओदनं भुङ्क्ते । अभ्यवहरतीत्यर्थः । 'बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्' । 'वृद्धो जनो दुःखशतानि भुङ्क्ते' । इह उपभोगो भुजेरर्थः । 'अनवने' किम् । महीं भुनक्ति ।

२७३८ । णेरणौ यत्कर्म णौ चेत्सकर्ताऽनाध्याने । (१-३-६७)

ण्यन्तादात्मनेपदं स्यादणौ या क्रिया सैव चेण्ण्यन्तेनोच्यते । अणौ

म्रियते इत्यादावात्मनेपदन्न लभ्येतेत्यत आह । **वाक्यभेदेनेति** ॥ 'शदेः शितः' 'म्रियतेर्लुङ्लिङोश्च' इति एकं वाक्यम् । शिद्भ्यां विनः शदेरात्मनेपदं स्यात् मृङो लुङ्प्रकृतिभूतात् शित्प्रकृतिभूताच्चात्मनेपदं स्यात् नान्यत्रेत्यर्थः। तेन शीयते म्रियते ममारेत्यादि सिद्ध्यति। सनो नेत्यपरं वाक्यम्। म्रियतेश्च सन्नन्तान्नात्मनेपदमित्यपरम्। तेन शिशत्सति, मुमूर्षति, इत्यादौ नात्मनेपदमित्यर्थः।**प्रोपाभ्यां** ॥ आत्मनेपदमिति शेषः। **स्वरेति** ॥ स्वरौ अचौ आद्यन्तौ यस्य सः स्वराद्यन्तः। तथाभूतोपसर्गात्परत्व एव युजेरात्मनेपदमित्यर्थः । **द्वन्द्वमिति** ॥ द्वन्द्वं द्विशः न्यञ्चि अधोबिलानीत्यर्थः । **समः क्ष्णुवः** ॥ आत्मनेपदम् इति शेषः । 'समो गम्यृच्छिभ्याम्' इत्यत्रैव समो गम्यृच्छिक्ष्णुवः इति न सूत्रितम् । तथा सति अकर्मकादित्यनुवृत्त्या सकर्मकान्न स्यात् । तत्सूचयन्नुदाहरति। **संक्ष्णुते शस्त्रमिति** ॥ तीक्ष्णीकरोतीत्यर्थः । **भुजोऽनवने** ॥ अवनं रक्षणम् । ततोऽन्यत्र भुजेरात्मनेपदमित्यर्थः । ननु 'भुज पालनाभ्यवहारयोः' इति धातुपाठे स्थितम् । तत्र बुभुजे पृथिवीपालः पृथिवीमित्यत्र न पालनमर्थः । तथा सति अनवने इति पर्युदासादात्मनेपदायोगात् । नाप्यभ्यवहरणम्, असम्भवात् । नहि पृथिव्या अभ्यवहरणं सम्भवति । तथा 'वृद्धो जनो दुःखशतानि भुङ्क्ते' इत्यपि न युज्यते । दुःखशतानाम्पालनस्य अभ्यवहरणस्य चासम्भवात् । तत्राह । **इह उपभोगो भुजेरर्थः इति** ॥ धातूनामनेकार्थकत्वादिति भावः । **महीं भुनक्तीति** ॥ रक्षतीत्यर्थः । अत्र रौधादिकस्यैव 'भुज पालनाभ्यवहारयोः' इत्यस्य ग्रहणम् । ननु 'भुजो कौटिल्ये' इति तौदादिकस्यापीति भाष्यम् । भुजति वासः । कुटिलीभवतीत्यर्थः । **णेरणौ** ॥ इह चत्वार्यवान्तरवाक्यानि णेरिति प्रथमं वाक्यम् । प्रत्ययग्रहणपरिभाषया णेरिति तदन्तग्रहणम् । आत्मनेपदमित्यधिकृतम् । तदाह । **ण्यन्तादात्मनेपदं**

यत्कर्मकारकं स चेण्णौ कर्ता स्यान्न त्वाध्याने। 'णिचश्च' (सू २५६४) इति सिद्धेऽकर्त्रभिप्रायार्थमिदम्। कर्त्रभिप्राये तु 'विभाषोपपदेन—' (सू २७४४) इति विकल्पे 'अणावकर्मकात्—' (सू २७५४) इति परस्मैपदे च परत्वात्प्राप्ते 'पूर्वविप्रतिषेधेनेदमेवेष्यते'। कर्तृस्थभावकाः कर्तृस्थक्रियाश्चोदाहरणम्।

स्यादिति॥ अणौ यत् कर्म णौ चेदिति द्वितीयं वाक्यम्। 'कर्तरि कर्मव्यतिहारे' इतिवत्कर्मशब्दोऽत्र क्रियापरः। यत्तदोर्नित्यसम्बन्धात् तदिति लभ्यते। तथाच अणौ या क्रिया सा ण्यन्ते चेदिति लभ्यते। एवं सति पचति पाचयतीत्यादौ सर्वत्र अणौ क्रियायाः ण्यन्ते अवश्यसत्त्वाद्वाक्यमिदमनर्थकम्। तस्मात् अणौ या क्रिया सैव ण्यन्ते चेदित्येवकारो लभ्यते। ततश्च द्वितीयवाक्यस्य फलितमाह। **अणौ या क्रिया सैव चेण्ण्यन्तेनोच्येत इति॥** स कर्तेति तृतीयं वाक्यम्। अत्र अणौ यत् कर्म णौ चेदित्यनुवर्तते। कर्मशब्दोऽत्र कारकविशेषपरः। शब्दाधिकाराश्रयणात्। तदेतदाह। **अणौ यत्कर्मकारकं स चेण्णौ कर्ता स्यादिति॥** अत्र तच्छब्दस्य विधेयसमर्पककर्तृशब्दानुसारेण पुल्लिङ्गता ज्ञेया। 'शैत्यं हि यत्सा प्रकृतिर्जलस्य' इतिवत्। अथ 'अनाध्याने' इति चतुर्थं वाक्यं व्याचष्टे। **न त्वाध्याने इति॥** आध्यानमुत्कण्ठापूर्वकं स्मरणम्। तत्र नात्मनेपदमिति प्रसज्यप्रतिषेधोऽयमिति मन्यते। वस्तुतस्तु आध्याने आत्मनेपदन्नेत्यर्थाश्रयणे भवतीत्यत्र नञोऽन्वितत्वेन असामर्थ्यादाध्यानशब्देन समासासम्भवात् पर्युदास एवायम्। 'न त्वाध्याने' इति मूलन्तु फलितार्थकथनपरमेव। तथाच आध्यानभिन्नेऽर्थे विद्यमानात् ण्यन्तादात्मनेपदं स्यादित्येवं प्रथमवाक्य एंव आध्याने इत्यस्यान्वयात् त्रीण्येवात्रावान्तरवाक्यानीति युक्तम्। वाक्यत्रयमित्येव च भाष्ये दृश्यते। ननु 'णिचश्च' इति सिद्धे किमर्थमिदं सूत्रमित्यत आह। **णिचश्चेतीति॥** परगामिन्यपि फले आत्मनेपदार्थमित्यर्थः। स्यादेतत्। 'विभाषोपपदेन प्रतीयमाने' इति सूत्रं वक्ष्यते। कर्तृगामिनि क्रियाफले यदात्मनेपदं विहितं तत् उपपदेन क्रियाफलस्य कर्तृगामित्वे गम्ये वा स्यादिति तदर्थः। स्वं यज्ञं यजति यजते वेत्याद्युदाहरणम्। 'णेरणौ' इत्यस्य तु दर्शयते भवः इत्यनुपदमेव उदाहरणं वक्ष्यते इति स्थितिः। तत्र दर्शयते भवः स्वयमेवेत्यत्र फलस्य कर्तृगामित्वविवक्षायां णेरणाविति नित्यमात्मनेपदमिष्यते। तत्र परत्वात् 'विभाषोपपदेन' इति विकल्पः स्यात्। 'णेरणौ' इत्यस्य फले आत्मगामित्वगमकोपपदाभावे सावकाशत्वात्। किञ्च 'अणावकर्मकाचित्तवत्कर्तृकात्' इति वक्ष्यते। अण्यन्ते यो धातुरकर्मकः चित्तवत्कर्तृकश्च तस्मात् ण्यन्तात् परस्मैपदं स्यादिति तदर्थः। शेते कृष्णः। तं गोपी शाययतीत्युदाहरणम्। णेरणावित्यस्य तु दर्शयते भव इत्युदाहरणं विषय इति स्थितिः। तत्र लूधातोः लुनाति केदारं देवदत्तः इत्यत्र चित्तवत्कर्तृकत्वात् लूयते केदारः इति कर्मकर्तरि कर्मणः केदारस्य कर्तृत्वेन विवक्षिततया अकर्मकत्वाच्च लावयते केदार इति ण्यन्तात् 'णेरणौ' इत्यात्मनेपदं बाधित्वा परत्वात् 'अणावकर्मकात्' इति परस्मैपदमेव स्यात्। णेरणावित्यस्य दर्शयते भवः इत्यत्र सावकाशत्वादित्यत आह। **कर्त्रभिप्राये त्विति॥ पूर्वविप्रतिषेधेनेति॥** पूर्वविप्रतिषेधाश्रयणे राजा दर्शयते

तथाहि । पश्यन्ति भवं भक्ताः । चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः । प्रेरणांशत्यागे पश्यति भवः । विषयो भवतीत्यर्थः । ततो हेतुमण्णिच् । दर्शयन्ति

इति भाष्यप्रयोगो मानम्। अन्यथा तत्र 'अणावकर्मकात्' इति परस्मैपदापत्तेः। दर्शनविषयो भवतीत्यर्थे पश्यति भवः इत्यत्र दृशेरणावकर्मकत्वात् चित्तवत्कर्तृकत्वाच्च 'विभाषोपपदेन' इति विकल्पबाधविषये पूर्वविप्रतिषेधाश्रयणे तु व्याख्यानमेव शरणम्। अन्ये तु दर्शयते राजा इति भाष्यप्रयोगः फलस्य परगामित्वाविषयो भविष्यति । एवञ्च कर्तृगामिनि क्रियाफले परत्वादणावकर्मकादित्यस्य प्रवृत्तौ न किञ्चिद्बाधकमिति पूर्वविप्रतिषेधाश्रयणञ्चिन्त्यमित्याहुः । तच्चिन्त्यम्। अणावकर्मकादित्यस्य परगामिन्यपि फले परत्वात् प्रवृत्तेर्दुर्वारत्वात् । नह्यणावकर्मकादित्यत्र कर्त्राभिप्राये इत्यस्ति । 'स्वरितञितः कर्त्रभिप्राये' इत्यस्य बहुव्यवहितत्वादिति शब्दरत्ने प्रपञ्चितम्। ननु दर्शनविषयो भवतीत्यर्थे दर्शयते भवः इत्यत्र वस्तुतो दर्शनकर्मीभूतस्यैव भवस्य कर्तृत्वविवक्षायां तस्य 'कर्मवत्कर्मणा' इति कर्मवद्भावात् 'भावकर्मणोः' इत्यात्मनेपदसिद्धेः 'णेरणौ' इति सूत्रं व्यर्थमित्यत आह। **कर्तृस्थेति** ॥ कर्तृस्थः भावो येषां ते कर्तृस्थभावकाः। कर्तृस्था क्रिया येषां ते कर्तृस्थक्रियाः एवंविधा धातव इह सूत्रे उदाहरणम्। 'कर्मवत्कर्मणा' इत्यस्य तु कर्मस्थभावकाः कर्मस्थक्रियाश्चोदाहरणमिति प्रकृतसूत्रे 'कर्मवत्कर्मणा' इति सूत्रे च भाष्ये स्पष्टम्। अतो विषयभेदात् 'कर्मवत् कर्मणा' इत्यनेन 'णेरणौ' इत्यस्य न गतार्थतेति भावः। अपरिस्पन्दनसाध्यो धात्वर्थो भावः। यथा दर्शनश्रवणादिः। परिस्पन्दनसाध्यो धात्वर्थः क्रिया । यथा पाकादिः । यद्यपि दर्शने चक्षुरुन्मीलनादिरूपं स्पन्दनमस्ति । तथापि तद्भिन्नहस्तपादादिचेष्टैवात्र स्पन्दनमित्यविरोधः । तत्र कर्तृस्थभावकमुदाहरति । **पश्यन्ति भवं भक्ताः इति** ॥ सकर्मकेषु धातुषु फलव्यापारयोर्धातुः। यथा पचेर्विक्लित्त्यनुकूलो व्यापारः। तत्र विक्लित्तिः फलम् । तदनुकूलोऽधिश्रयणादिर्व्यापारः। धातूपात्तव्यापाराश्रयः कर्ता देवदत्तादिः । व्यापारव्यधिकरणधातूपात्तफलाश्रयभूतङ्कर्म । यथा तण्डुलान् पचतीत्यत्र विक्लित्त्याश्रयास्तण्डुला इति स्थितिः । प्रकृते च दृशेश्चाक्षुषज्ञानानुकूलव्यापारार्थकत्वे सकर्मकत्वानुपपत्तिः। फलस्य चाक्षुषज्ञानस्य तदनुकूलप्रयत्नादेश्च समानाधिकरणत्वात्। अतो दृशेश्चाक्षुषज्ञानविषयत्वापत्त्यनुकूलव्यापारोऽर्थः। तत्र ज्ञानविषयत्वापत्तिः फलम्। तदनुकूलः प्रयत्नादिव्यापारो देवदत्तनिष्ठः । एवञ्च प्रयत्नादिव्यापारव्यधिकरणचाक्षुषज्ञानविषयत्वरूपफलाश्रयो घटादिः कर्मेति युज्यते । तदेतदाह । **चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः इति** ॥ **प्रेरणेति** ॥ यथा चाक्षुषज्ञानविषयत्वापत्तिरेव दृशेरर्थो विवक्षितः । ननु तदनुकूलव्यापारः कृञ्धातुगम्यः प्रेषणांशः। तदा पश्यति भवः इत्यस्य चाक्षुषज्ञानविषयस्सम्पद्यते इत्यर्थः। सौकर्यातिशयविवक्षया अनुकूलव्यापारांशस्य अविवक्षा बोध्या। तथाच चाक्षुषज्ञानविषयत्वापत्तेरेव दृश्यर्थत्वात्तदाश्रयस्य भवस्य कर्तृत्वमेव। तदाह। **विषयो भवतीत्यर्थः इति** ॥ लक्षणया चाक्षुषज्ञानविषयो भवतीत्यर्थ इत्यर्थः। नचात्र भवस्य वस्तुतो दर्शनकर्मणः इह कर्तृत्वात् 'कर्मवत्कर्मणा तुल्यक्रियः' इति कर्मवत्त्वाद्यगादिकमेव स्यान्न तु शबादीति शङ्क्यम्। 'कर्मवत्कर्मणा' इत्यस्य कर्मस्थभावकेषु कर्मस्थक्रियेषु च प्रवृत्तेः। अतः कर्मकर्तर्यपि शबादिकमेवेति भावः। **ततः**

भवं भक्ताः। पश्यन्तीत्यर्थः। पुनर्ण्यर्थस्याविवक्षायां दर्शयते भवः। इह प्रथमतृतीययोरवस्थयोर्द्वितीयचतुर्थ्योश्च तुल्योऽर्थः। तत्र तृतीयकक्ष्यायां न तङ्। क्रियासाम्येऽप्यणौ कर्मकारकस्य णौ कर्तृत्वाभावात्। चतुर्थ्यां तु तङ्। द्वितीयामादाय क्रियासाम्यात्। प्रथमायां कर्मणो भवस्येह कर्तृत्वाच्च।

इति॥ क्रिया तु गम्यं प्रेषणांशं विहाय चाक्षुषज्ञानविषयत्वापत्तिवृत्तेर्दृशेर्हेतुमण्णिजित्यर्थः। **दर्शयन्ति भवं भक्ताः इति**॥ चाक्षुषज्ञानविषयत्वमापादयन्तीति णिजन्तस्य फलितोऽर्थः। तदाह। **पश्यन्तीत्यर्थः इति**॥ चाक्षुषज्ञानविषयङ्कुर्वन्तीत्यर्थः। **पुनरिति**॥ चाक्षुषज्ञानविषयत्वमापादयन्तीत्यर्थके दर्शयन्ति भवं भक्ता इत्युक्तोदाहरणे णिजर्थस्य आपादनांशस्य अविवक्षायां प्रकृतसूत्रेणात्मनेपदे सति दर्शयते भव इत्युदाहरणमित्यर्थः। अत्र ण्यन्तस्य प्रेरणारहितेऽर्थे लक्षणा। गङ्गायाङ्घोष इत्यत्र टाप इव णिचः स्थितिः। चुरादेराकृतिगणत्वात् स्वार्थिको णिजित्यन्ये। **इहेति**॥ अवस्था पदविशेषात्मकावयवसन्निवेशविशेषः। प्रथमा च द्वितीया च प्रथमद्वितीये। तयोरवस्थयोरिति विग्रहः। 'सर्वनाम्नो वृत्तिमात्रे' इति प्रथमाशब्दस्य पुंवत्त्वम्। पश्यन्ति भवं भक्ता इति प्रथमावस्था। पदविशेषसन्दर्भ इति यावत्। अवस्थैव कक्ष्येति व्यवहरिष्यते मूले। कक्ष्या हि राजधान्यादौ जनविशेषसङ्घातनिवासात्मिका अनन्तरस्थानप्रापिका। तद्यथा। रामायणे 'आ पञ्चमायाः कक्ष्यायाः नैनङ्कश्चिदवारयत्' इत्यादि। इदञ्च प्रथमवाक्यम्। प्रेरणांशत्यागे पश्यति भव इति द्वितीयवाक्यस्य उपपादकम्। चाक्षुषज्ञानविषयत्वापादने दृश्यर्थे प्रेरणांशत्यागस्य प्रेरणाविशिष्टार्थकहशिघटितप्रथमवाक्याभावे असम्भवात्। प्रेरणांशत्यागे पश्यति भव इति द्वितीया कक्ष्या तु दर्शनविषयत्वापत्तिमात्रार्थकाद्धेतुमण्णिचि दर्शयन्ति भवं भक्ता इति तृतीयवाक्यस्य पश्यन्ति भवं भक्ता इति प्रथमवाक्यसमानार्थकस्य उपपादिका। चाक्षुषज्ञानविषयत्वापादनानुकूलव्यापारार्थवृत्तेर्दृशेर्हेतुमण्णिचि चाक्षुषज्ञानविषयत्वापत्त्यनुकूलव्यापारान्तरस्यापि प्रवेशापत्तेः। तृतीयं वाक्यन्त्विदन्दर्शयन्तीति ण्यर्थस्याविवक्षायां दर्शयते भवः इति चतुर्थवाक्यस्य दर्शनविषयो भवतीति द्वितीयवाक्यसमानार्थकस्य ण्यन्तघटितस्योपपादकमिति स्पष्टमेव। तथाच प्रथमतृतीययोः कक्ष्ययोः पश्यन्ति भवं भक्ताः, दर्शयन्ति भवं भक्ताः, इत्यनयोः तथा पश्यति भवः, दर्शयते भवः, इति द्वितीयचतुर्थ्योः कक्ष्ययोश्च तुल्योऽर्थ इत्यर्थः। तत्र प्रथमाद्वितीययोः कक्ष्ययोः दृशेर्ण्यन्तत्वाभावादेव तङो न प्रसक्तिरिति मत्वा आह। **तत्र तृतीयकक्ष्यायान्न तङिति**॥ कुत इत्यत आह। **क्रियासाम्येऽपीति**॥ दर्शयन्ति भवं भक्ता इति तृतीयकक्ष्यायाः, पश्यन्ति भवं भक्ताः, इति प्रथमकक्ष्यासमानार्थकतया अणौ या क्रिया सैव चेण्यन्तेनोच्येतेत्यंशस्य सत्त्वेऽपि प्रथमकक्ष्यायामणौ कर्मकारकस्य भवस्य दर्शयन्ति भवं भक्ता इति तृतीयकक्ष्यायां णौ कर्तृत्वाभावादित्यर्थः। एवञ्चतुर्थकक्ष्योपपादिका तृतीयकक्ष्यैषा प्रत्युदाहरणञ्चेत्युक्ता भवति। अणौ या क्रिया सैव चेण्यन्तेनोच्येतेत्यंशस्य तु अद्यारोपितप्रेरणपक्षे द्वितीयकक्ष्यायान्न तङिति वक्ष्यते। चतुर्थकक्ष्या तु प्रकृतसूत्रस्योदाहरणमित्याह। **चतुर्थ्यान्तु तङिति**॥ 'णेरणौ' इति प्रकृतसूत्रेणेति शेषः। तदेवोपपादयति। **द्वितीयामादायेति**॥ पश्यति भव इति द्वितीयकक्ष्या-

एवमारोहयते हस्तीत्यप्युदाहरणम्। आरोहन्ति हस्तिनं हस्तिपकाः। न्यग्भावयन्तीत्यर्थः। तत आरोहति हस्ती। न्यग्भवतीत्यर्थः। ततो णिच् आरोहयन्ति। आरोहन्तीत्यर्थः। तत आरोहयते न्यग्भवतीत्यर्थः। यद्वा पश्यन्त्यारोहन्तीति प्रथमकक्ष्या प्राग्वत्। ततः कर्मण एव हेतुत्वारोपाण्णिच्। दर्शयति भवः। आरोहयति हस्ती। पश्यत आरोहतश्च प्रेरयतीत्यर्थः। ततो णिजभ्यां तत्प्रकृति-

---

यां या चाक्षुषज्ञानविषयत्वापत्तिरूपा क्रिया तस्या एव दर्शयते भव इति चतुर्थकक्ष्यायां ण्यन्तदृश्यर्थत्वादित्यर्थः। अनेन अणौ या क्रिया सैव चेण्यन्तेनोच्येतेत्यंश उपपादितः। अथ अणौ यत्कर्मकारकं णौ स चेत्कर्ता स्यादित्यंशमुपपादयति। **प्रथमायामिति ॥** पश्यन्ति भवं भक्ता इति प्रथमकक्ष्यायां अण्यन्तदृशिकर्मणो भवस्य दर्शयते भव इति चतुर्थकक्ष्यायां ण्यन्तदृशिकर्तृत्वाच्चेत्यर्थः। अथ कर्तृस्थक्रियाधातुमुदाहरति। **एवमारोहयते हस्तीत्यप्युदाहरणमिति ॥** तत्र प्रथमकक्ष्यामाह। **आरोहन्ति हस्तिनं हस्तिपकाः इति ॥** हस्तिनम्पान्तीति हस्तिपाः। त एव हस्तिपकाः। स्वार्थे कः। उपरिभागाक्रमणानुकूलव्यापारो रुहेरर्थः। तत्र प्रासादमारोहतीत्यादौ उपरिभागाक्रमणानुकूलव्यापारस्सोपानगमनादिः। इह तु उच्चस्य हस्तिनो न्यग्भावनमेव उपरिभागाक्रमणानुकूलो व्यापारो विवक्षितः। तच्च नीचीकरणम्। तदाह। **न्यग्भावयन्तीति ॥** अत्र उपरिभागाक्रमणानुकूलन्यग्भावनानुकूलोऽङ्कुशपातादिः व्यापारः। उपरिभागाक्रमणानुकूलन्यग्भवनं फलम्। तदाश्रयत्वाद्धस्ती कर्म। तादृशव्यापाराश्रयत्वाद्धस्तिपकाः कर्तारः। अथ द्वितीयकक्ष्यामाह। **ततः इति ॥** प्रेरणांशपरित्यागे सति उपरिभागाक्रमणानुकूलन्यग्भवनार्थकाल्लटि आरोहति हस्तीति भवतीत्यर्थः। प्रेषणांशपरित्यागे फलितमाह। **न्यग्भवतीत्यर्थः इति ॥** अथ तृतीयकक्ष्यामाह। **ततो णिजिति ॥** प्रेषणांशं परित्यज्य न्यग्भवनार्थकत्वमाश्रितात् धातोः प्रेषणविवक्षायां हेतुमण्णिजिति भावः। **आरोहयन्तीति ॥** हस्तिनं हस्तिपका इति शेषः। प्रेषणांशनिवृत्तौ णिजन्तस्य फलितमर्थमाह। **आरोहयन्तीत्यर्थः इति ॥** आक्रमणाय हस्तिनं न्यग्भावयन्तीति यावत्। चतुर्थकक्ष्यामाह। **ततः इति ॥** अविवक्षितप्रेषणात् ण्यन्तात् प्रकृतसूत्रेणात्मनेपदे आरोहयते इति रूपमित्यर्थः। प्रेषणांशत्यागे सति ण्यन्तस्य फलितमर्थमाह। **न्यग्भवतीत्यर्थः इति ॥** तदेवं निवृत्तप्रेषणाद्धातोः प्रकृतेऽर्थे णिजिष्यते, इति पक्षमाश्रित्योदाहृतम्। इदानीमध्यारोपितप्रेषणपक्षमाश्रित्य आह। **यद्वेति ॥ पश्यन्तीति ॥** पश्यन्ति भवं भक्ता इति, आरोहन्ति हस्तिनं हस्तिपकाः इति च, प्रथमकक्ष्या पूर्ववद्व्याख्येयेत्यर्थः। द्वितीयकक्ष्यामाह। **ततः कर्मणः इति ॥** दृशेः रुहेश्च प्रथमकक्ष्यायां कर्मीभूतस्य भवस्य हस्तिनश्च प्रयोजककर्तृत्वरूपहेतुत्वारोपाद्धेतुमण्णिजित्यर्थः। **दर्शयति भवः इति ॥** भक्तानिति शेषः। तदाह। **पश्यत आरोहतश्च प्रेरयतीत्यर्थः इति ॥** चाक्षुषज्ञानविषयत्वमापादयतो भक्तान् भवः प्रेरयति न्यग्भावयतो हस्तिपान् हस्ती प्रेरयतीत्यर्थः। उभयत्र हेतुमण्णिच्। तत्र प्रकृतिभ्यां दृशिरुहिभ्यामेकैकम्प्रेरणम्। णिचा तु तद्विषयकमेकैकम्प्रेरणान्तरम्प्रतीयते इति स्थितिः। चतुर्थकक्ष्यामाह। **ततो**

भ्यां च उपात्तयोर्द्वयोरपि प्रेषणयोस्त्यागे दर्शयते आरोहयते इत्युदाहरणम्। अर्थः प्राग्वत्। अस्मिन्पक्षे द्वितीयकक्ष्यायां न तङ्। समानक्रियात्वाभावाण्यिजर्थस्याधिक्यात्। 'अनाध्याने' किम्। स्मरति वनगुल्मं कोकिलः। स्मरयति वनगुल्मः। उत्कण्ठापूर्वकस्मृतौ विषयो भवतीत्यर्थः। 'भीस्म्योर्हेतुभये' (सू २५९४) व्याख्यातम्।

२७३९। गृधिवञ्च्योः प्रलम्भने। (१-३-६९)

प्रतारणेऽर्थे ण्यन्ताभ्यामाभ्यां प्राग्वत्। माणवकं गर्धयते, वञ्चयते वा। 'प्रलम्भने' किम्। श्वानं गर्धयति। अभिकाङ्क्षामस्योत्पादयतीत्यर्थः। अहिं वञ्चयति। वर्जयतीत्यर्थः। 'लियः सम्माननशालिनीकरणयोश्च' (सू २५९२)। व्याख्यातम्।

णिजभ्यामिति ॥ हेतुमण्णिजभ्यां तत्प्रकृतिभूतदृशिरुहिभ्याञ्च उपात्तयोः प्रेरणयोस्त्यागे सति चाक्षुषज्ञानविषयो भवति भव इति न्यग्भवति हस्तीति चार्थः पर्यवस्यति। तत्र प्रकृतसूत्रेणात्मनेपदे दर्शयते भवः आरोहयते हस्तीति च सिद्धमित्यर्थः। पश्यन्ति भवं भक्ता इति आरोहन्ति हस्तिनं हस्तिपका इति च प्रथमकक्ष्यायाङ्कर्मणो भवस्य हस्तिनश्च तृतीयकक्ष्यायाङ्कर्तृत्वात् प्रथमकक्ष्यायां अर्णौ या क्रिया तस्या एवात्र तृतीयकक्ष्यायां सत्त्वाच्चेति तृतीयकक्ष्यायामुदाहरणे सूत्रप्रवृत्तिरुपपाद्या। नच प्रथमकक्ष्यायाञ्चाक्षुषज्ञानविषयङ्कुर्वन्तीति न्यग्भावयन्तीति प्रकृत्युपात्तस्य प्रेषणांशस्य तृतीयकक्ष्यायां त्यागादर्णौ या क्रिया सैव चेण्यन्तेनोच्येतेत्यंशस्य कथं प्रवृत्तिरिति वाच्यम्। सैव चेण्यन्तेनेत्यत्र आधिक्यमात्रं व्यवच्छिद्यते, नतु न्यूनत्वमपि इत्यदोषात्। ननु द्वितीयकक्ष्यायामेव कुतो न तङित्यत आह। **अस्मिन्पक्षे द्वितीयेति** ॥ कुत इत्यत आह। **समानक्रियात्वाभावादिति** ॥ द्वितीयकक्ष्यायां अर्णौ या क्रिया सैव चेण्यन्तेनोच्येतेत्यंशस्याभावादिति यावत्। तदेवोपपादयति। **णिजर्थस्येति** ॥ णेरिति किम्। पश्यत्यारोहतीति निवृत्तप्रेषणान्मा भूत्। **स्मरति वनगुल्मङ्कोकिलः इति** ॥ स्मृतिविषयत्वमापादयतीत्यर्थः। पक्षद्वयेऽप्येषा प्रथमकक्ष्या द्वितीयतृतीयकक्ष्ययोरप्युपलक्षणम्। तत्र निवृत्तप्रेषणपक्षे स्मरति वनगुल्म इति द्वितीयकक्ष्या। स्मृतिविषयो भवतीत्यर्थः। स्मरति वनगुल्मङ्कोकिल इति तृतीयकक्ष्या। स्मृतिविषयत्वमापादयतीत्यर्थः। अध्यारोपितप्रेषणपक्षे त्वेषा द्वितीयकक्ष्या। स्मरन्तम्प्रेरयतीत्यर्थः। **स्मरयति वनगुल्मः इति** ॥ प्रत्युदाहरणमिदम्। निवृत्तप्रेषणपक्षे चतुर्थकक्ष्यैषा। अध्यारोपितप्रेषणपक्षे तु तृतीयकक्ष्येति बोध्यम्। 'स्मृ आध्याने' इति घाटादिकत्वेन मित्त्वाद्ध्रस्वः। विस्तरस्त्वत्र प्रौढमनोरमाशब्दरत्नशब्देन्दुशेखरेष्वनुसन्धेयः। **गृधिवञ्च्योः** ॥ प्रलम्भनं प्रतारणमिति मत्वा आह। **प्रतारणेऽर्थे इति** ॥ **प्राग्वदिति** ॥ आत्मनेपदमित्यर्थः। धातूनामनेकार्थकत्वादनयोः प्रतारणे वृत्तिः। **मिथ्योप-**

२७४० । मिथ्योपपदात्कृञोऽभ्यासे । (१-३-७१)

'णेः' इत्येव। पदं मिथ्या कारयते । स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः । 'मिथ्योपपदात्' किम् । पदं सुष्ठु कारयति । 'अभ्यासे' किम् । सकृत्पदं मिथ्या कारयति । 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (सू २१५८) । यजते । सुनुते । 'कर्त्रभिप्राये' किम् । ऋत्विजो यजन्ति । सुन्वन्ति ।

२७४१ । अपाद्वदः । (१-३-७३)

न्यायमपवदते । कर्त्रभिप्राये इत्येव । अपवदति । 'णिचश्च' (सू २५६४) । कारयते ।

२७४२ । समुदाङ्भ्यो यमोऽग्रन्थे । (१-३-७५)

'अग्रन्थे' इति च्छेदः । व्रीहीन् संयच्छते । भारमुद्यच्छते । वस्त्रमायच्छते । 'अग्रन्थे' किम् । उद्यच्छति वेदम् । अधिगन्तुमुद्यमं करोतीत्यर्थः । कर्त्रभिप्राये इत्येव । व्रीहीन् संयच्छति ।

२७४३ । अनुपसर्गाज्ज्ञः । (१-३-७६)

गां जानीते । 'अनुपसर्गात्' किम् । "स्वर्गं लोकं न प्रजानाति" । कथं तर्हि भट्टिः—'इत्थं नृपः पूर्वमवाप्तलोचे ततोऽनुजज्ञे गमनं सुतस्य' इति । कर्मणि लिट् । नृपेणेति विपरिणामः ।

पदात् ॥ अभ्यासवृत्तेर्मिथ्याशब्दोपपदकात् कृञः आत्मनेपदमित्यर्थः । इत ऊर्ध्वं णेरिति निवृत्तम् । **अपाद्वदः** ॥ अपपूर्वाद्वदधातोरात्मनेपदमित्यर्थः । **न्यायमपवदते इति** ॥ वदनेन निरस्यतीत्यर्थः । 'किमिह वचनन्न कुर्यान्नास्ति वचनस्यातिभारः' इति न्यायात् । **समुदाङ्भ्यो** ॥ सम् उत् आङ् एतत्पूर्वात् अग्रन्थविषयकात् यमेरात्मनेपदमित्यर्थः । **व्रीहीन् संयच्छते इति** ॥ सङ्गृह्णातीत्यर्थः । **भारमुद्यच्छते इति** ॥ उद्गृह्णातीत्यर्थः । **वस्त्रमायच्छते इति** ॥ कव्यादौ निबध्नातीत्यर्थः । **कर्त्रभिप्राये इत्येवेति** ॥ **व्रीहीन् संयच्छतीति** ॥ परार्थं सङ्गृह्णातीत्यर्थः । 'आङो यमहनः' इत्येव सिद्धे आङ्ग्रहणं सकर्मकार्थम् । तस्य अकर्मकादेव प्रवृत्तेरिति बोध्यम् । **अनुपसर्गाज्ज्ञः** ॥ अनुपसर्गात् ज्ञाधातोरात्मनेपदमित्यर्थः । 'अकर्मकाच्च' इत्येव सिद्धे सकर्मकार्थमिदम् । तदाह । **गामजानीते इति** ॥ अनुपूर्वकस्य अनुमत्यर्थकस्य ज्ञाधातोरुपसर्गपूर्वकतया प्रकृतसूत्रस्याप्रवृत्तेः सकर्मकतया 'अकर्मकाच्च' इत्यस्याप्यप्रवृत्तेः। **अनुजज्ञे इति** ॥ कथमात्मनेपदमित्यर्थः । समाधत्ते । **कर्मणि लिडिति** ॥ तथाच 'भावकर्मणोः' इत्यात्मनेपदमिति भावः । सुतस्य गमनमनुज्ञातमित्यर्थः फलति । नन्वेवं सति नृप इति प्रथमान्तस्य कथमिहान्वय इत्यत आह । **नृपेणेति विपरिणामः इति** ॥ अवाप्तलोचे

२७४४। विभाषोपपदेन प्रतीयमाने। (१-३-७७)

'स्वरितञितः' इत्यादिपञ्चसूत्र्या यदात्मनेपदं विहितं तत्समीपोच्चारितेन पदेन क्रियाफलस्य कर्तृगामित्वे द्योतिते वा स्यात्। स्वं यज्ञं यजति—यजते वा। स्वं कटं करोति—कुरुते वा। स्वं पुत्रमपवदति—अपवदते वा। स्वं यज्ञं कारयति—कारयते वा। स्वं व्रीहिं संयच्छति—संयच्छते वा। स्वां गां जानाति—जानीते वा।

इत्यत्रान्वितं नृप इति प्रथमान्तं तृतीयया विपरिणमितमत्रानुषज्यते इत्यर्थः। **विभाषोपपदेन॥ स्वरितञित इत्यादीति॥** 'स्वरितञितः कर्त्रभिप्राये क्रियाफले, अपाद्वदः, णिचश्च, समुदाङ्भ्यो यमोऽग्रन्थे, अनुपसर्गाज्ज्ञः' इति पञ्चसूत्रीत्यर्थः। समीपोच्चारितम्पदमुपपदम्, नतु 'तत्रोपपदं सप्तमीस्थम्' इति सङ्केतितम्। असम्भवात्। तदाह। **समीपोच्चारितेन पदेनेति॥** फलस्य कर्तृगामित्वे नित्यमात्मनेपदे पञ्चसूत्र्या प्राप्ते विभाषेयमिति 'नवेति विभाषा' इति सूत्रे भाष्ये स्पष्टम्। **स्वं यज्ञमिति॥** स्वीयमित्यर्थः। अत्र स्वशब्देनैव फलस्यात्मगामित्वावगमात् 'स्वरितञितः' इति नित्यमात्मनेपदस्यानेन विकल्पः। स्वं यज्ञं कारयतीत्यत्र 'णिचश्च' इत्यस्यानेन विकल्पः। **स्वं व्रीहिमिति॥** अत्र 'समुदाङ्भ्यो यमः' इत्यस्यानेन विकल्पः। **स्वां गामिति॥** अत्र 'अनुपसर्गाज्ज्ञः' इत्यस्यानेन विकल्पः॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायामात्मनेपदव्यवस्था समाप्ता।



श्रीरस्तु ।

॥ अथ तिङन्तपरस्मैपदप्रकरणम् ॥

'शेषात्कर्तरि परस्मैपदम्' (२१५९) अत्ति ।

२७४५ । अनुपराभ्यां कृञः । (१-३-७९)

कर्तृगेऽपि फले गन्धनादौ च परस्मैपदार्थमिदम् । अनुकरोति । पराकरोति । कर्तरीत्येव । भावकर्मणोर्मा भूत् । न चैवमपि कर्मकर्तरि प्रसङ्गः । कार्यातिदेशपक्षस्य मुख्यतया तत्र 'कर्मवत्कर्मणा—' (सू २७६६) इत्यात्मनेपदेन परेणास्य बाधात् । शास्त्रातिदेशपक्षे तु 'कर्तरि शप्' (सू २१६७) इत्यतः 'शेषात्—' (सू २१५९) इत्यतश्च कर्तृग्रहणद्वयमनुवर्त्य कर्तैव यः कर्ता न तु कर्मकर्ता तत्रेति व्याख्येयम् ।

अथ परस्मैपदव्यवस्थान्निरूपयितुमुपक्रमते ॥ **शेषात्कर्तरीति** ॥ **अनुपराभ्यां कृञः** ॥ परस्मैपदमिति शेषः । ननु 'स्वरितञितः' इत्यात्मनेपदस्य कर्तृगामिन्येव फले विधानादकर्तृगामिनि फले 'शेषात्कर्तरि' इति परस्मैपदस्य सिद्धत्वात् किमर्थमिदमित्यत आह । **कर्तृगे चेति** । **गन्धनादाविति** ॥ गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु इत्यर्थः । **मा भूदिति** ॥ भावे कर्मणि लकारस्य कर्तृगे फले परस्मैपदनिवृत्त्यर्थं कर्तरीत्यस्यानुवृत्तिरिति भावः। ननु कर्तरीत्यस्यानुवृत्तावपि अनुक्रियते शब्दः स्वयमेवेत्यत्र कर्मकर्तरि परस्मेपदन्दुर्वारमित्याशङ्क्य परिहरति। **नचेति** ॥ एवमपि कर्तरीत्यस्यानुवृत्तावपि कर्मकर्तरि आत्मनेपदस्य प्रसङ्गो न शङ्क्य इत्यर्थः । कुत इत्यत आह । **कार्यातिदेशेति** ॥ तत्र कर्मकर्तरि 'कर्मवत्कर्मणा तुल्यक्रियः' इत्यात्मनेपदेन परेणास्य परस्मैपदस्य बाधादित्यन्वयः । ननु कर्मणि यच्छास्त्रं तत् 'कर्मवत्कर्मणा' इति कर्मकर्तर्यतिदिश्यते । तथा चात्र कर्मकर्तरि 'भावकर्मणोः' इत्यात्मनेपदशास्त्रमिह प्राप्तम् । तस्य च परत्वाभावात् 'अनुपराभ्यां कृञः' इत्यनेन कथं बाधः स्यादित्यत आह । **कार्यातिदेशपक्षस्य मुख्यतयेति** ॥ शास्त्रातिदेशस्य कार्यातिदेशार्थतया कार्यातिदेशस्य मुख्यत्वम्। ततश्च कर्मवत् कर्मणेत्यनेन कर्मणि विहितमात्मनेपदं कर्मकर्तरि विधीयते। तस्य च परत्वात्तेनात्मनेपदेन 'अनुपराभ्याम्' इति परस्मैपदङ्कर्मकर्तरि बाधमर्हतीति भावः । 'कर्मवत्कर्मणा' इत्यत्र शास्त्रातिदेशमभ्युपगम्य आह । **शास्त्रातिदेशपक्षे त्विति** ॥ 'अनुपराभ्यां कृञः' इत्यत्र 'कर्तरि कर्मव्यतिहारे' इत्यस्मादेकङ्कर्तृग्रहणमनुवर्तते । तथा 'शेषात् कर्तरि परस्मैपदम्' इत्यस्मात् द्वितीयं कर्तृग्रहणमनुवर्तते । तथा च स्वभावत एव यः कर्ता, ननु विव-

२७४६ । अभिप्रत्यतिभ्यः क्षिपः । (१-३-८०)

'क्षिप प्रेरणे' । स्वरितेत् । अभिक्षिपति ।

२७४७ । प्राद्वहः । (१-३-८१)

प्रवहति ।

२७४८ । परेर्मृषः । (१-३-८२)

परिमृष्यति । भौवादिकस्य तु परिमर्षति । इह परेरिति योगं विभज्य वहेरपीति केचित् ।

२७४९ । व्याङ्परिभ्यो रमः । (१-३-८३)

विरमति ।

२७५० । उपाच्च । (१-३-८४)

यज्ञदत्तमुपरमति । उपरमयतीत्यर्थः । अन्तर्भावितण्यर्थोऽयम् ।

क्षाधीनः कर्मकर्ता तथाविधकर्तर्येव 'अनुपराभ्यां कृञः' परस्मैपदमिति लभ्यते । एवञ्च कर्मकर्तरि नास्य प्रवृत्तिरित्यर्थः । **अभिप्रति** ॥ परस्मैपदमिति शेषः । **स्वरितेदिति** ॥ ततश्च कर्तृगामिनि फले आत्मनेपदे प्राप्ते अनेन तत्रापि परस्मैपदमिति भावः । **अभिक्षिपतीति** ॥ प्रतिक्षिपति अतिक्षिपति इत्यप्युदाहार्यम् । **प्राद्वहः** ॥ प्रपूर्वाद्वहेः परस्मैपदमित्यर्थः । वहेः स्वरितेत्त्वात् कर्तृगामिन्यात्मनेपदे प्राप्ते तत्राप्यनेन परस्मैपदम् । **परेर्मृषः** ॥ परस्मैपदमिति शेषः । 'मृषस्तितिक्षायाम्' इति दैवादिकस्य स्वरितेत्त्वात् पदद्वये प्राप्ते अयं विधिः । तदाह । **परिमृष्यतीति** ॥ चौरादिकस्यापि 'आधृषाद्वा' इति णिजभावे स्वरितेत्त्वेऽपि परस्मैपदमेव परिमर्षतीति । **भौवादिकस्य त्विति** ॥ 'मृषु सहने, सेचने च' इति भौवादिकस्य तु परस्मैपदित्वात् परिमर्षतीत्येव रूपं सिद्धम् । अतोऽस्मिन् सूत्रे तस्य न ग्रहणमिति भावः । **इहेति** ॥ परेरिति योगो विभज्यते । वह इत्यनुवर्तते । परेर्वहः परस्मैपदमित्यर्थः । परिवहति । मृष इति योगान्तरम् । तत्र परेः इत्यनुवर्तते परेः मृषः परस्मैपदमित्युक्तोर्थ इति केचिदाहुरित्यर्थः । भाष्ये त्वयं योगविभागो न दृश्यते । **व्याङ्परिभ्यो रमः** ॥ परस्मैपदमिति शेषः । रमेरनुदात्तेत्त्वाद्विधिरयम् । **विरमतीति** ॥ आरमति, परिरमति, इत्यप्युदाहार्यम् । **उपाच्च** ॥ उपपूर्वादपि रमेः परस्मैपदमित्यर्थः । उत्तरसूत्रे उपादित्यस्यैवानुवृत्तये व्याङ्परिभ्यो रमेरिति नोक्तम् । अत्र विरमतीत्यर्थे उपरमतीति नोदाहरणम् । तस्य अकर्मकतया उत्तरसूत्रेण परस्मैपदविकल्पविधानात् । अतस्सकर्मकमुदाहरति । **यज्ञदत्तमुपरमतीति** ॥ ननु विरामार्थकत्वात् कथं सकर्मकतेत्यत आह । **उपरमयतीत्यर्थः इति** ॥ ननु णिजभावात् कथमयमर्थो लभ्यते इत्यत आह । **अन्तर्भावितण्यर्थोऽयमिति** ॥ धातूनामनेकार्थत्वादिति भावः ।

२७५१ । विभाषाऽकर्मकात् । (१-३-८५)

उपाद्रमेरकर्मकात्परस्मैपदं वा । उपरमति—उपरमते वा । निवर्तते इत्यर्थः ।

२७५२ । बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः । (१-३-८६)

एभ्यो ण्यन्तेभ्यः परस्मैपदं स्यात् । 'णिचश्च' (सू २५६४) इत्यस्यापवादः । बोधयति पद्मम् । योधयति काष्ठानि । नाशयति दुःखम् । जनयति सुखम् । अध्यापयति । प्रावयति । प्रापयतीत्यर्थः । द्रावयति । विलापयतीत्यर्थः । स्रावयति । स्यन्दयतीत्यर्थः ।

२७५३ । निगरणचलनार्थेभ्यश्च । (१-३-८७)

विभाषाऽकर्मकात् ॥ उपादिति रम इति परस्मैपदमिति चानुवर्तते । तदाह । **उपाद्रमेरिति** ॥ **बुधयुध** ॥ बुध युध नश जन इङ् प्रु द्रु स्रु एषान्द्वन्द्वः । **बोधयति पद्ममिति** ॥ सूर्य इति शेषः । बुधिर्विकसनार्थकः । विकसति पद्मम् । तद्विकासयति सूर्य इत्यर्थः । 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति परस्मैपदन्तु न सिध्यति । अणौ पद्मस्य कर्तृतया चित्तवत्कर्तृकत्वाभावात् । **योधयति काष्ठानीति** ॥ काष्ठानि युद्ध्यन्ते स्वयमेव । तानि योधयतीत्यर्थः । अणावचित्तवत्कर्तृकत्वात् 'अणावकर्मकात्' इत्यस्य न प्राप्तिः । अत एव योधयति देवदत्तमिति नोदाहृतम् । 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इत्येव सिद्धेः । एवमग्रेऽपि ज्ञेयम् । **नाशयति दुःखमिति** ॥ दुःखं नश्यति । तत् नाशयति हरिरित्यर्थः । **जनयति सुखमिति** ॥ जायते सुखम् । तत् जनयति हरिरित्यर्थः । **अध्यापयतीति** ॥ अधीते वेदः स्वयमेव । तमध्यापयतीत्यर्थः । 'प्रुगतौ' इत्यस्योदाहरति । **प्रावयतीति** ॥ गत्यर्थकत्वं मत्वा आह । **प्रापयतीत्यर्थः इति** ॥ **द्रावयतीति** ॥ द्रवत्याज्यं तत् द्रावयतीत्यर्थः । धातोर्द्रवीभावार्थकत्वं मत्वा आह । **विलापयतीत्यर्थः इति** ॥ **स्रावयतीति** ॥ स्रवति जलम् । तत्स्रावयतीत्यर्थः । धातोः स्यन्दनार्थकत्वं मत्वा आह । **स्यन्दयतीत्यर्थः इति** ॥ "प्रीतिं भक्तजनस्य यो जनयते" इत्यात्मनेपदन्तु प्रामादिकमेव । यद्वा भक्तजनः हरौ प्रीतिं जनयत्यात्मविषये तां हरिः जनयते इति ण्यन्ताण्णौ रूपम् । प्रयोज्यकर्तुः शेषत्वविवक्षया भक्तजनस्येति षष्ठीत्याहुः । **निगरण** ॥ निगरणं भक्षणम् । चलनङ्कम्पनम् । एतदर्थकेभ्यो ण्यन्तेभ्यः परस्मैपदमित्यर्थः । पूर्वसूत्रे प्रुद्रुस्रुणाङ्ग्रहणन्तु अचलनार्थानामेव । अत एव मूले प्रापयतीत्यादि व्याख्यातं पानमपि भक्षणमेव 'अपोऽश्नाति' इति श्रुतेः । अतएव 'न पादम्याङ्यमाङ्यस' इति सूत्रे पाग्रहणमर्थवत् । "न पीयतान्नाम चकोरजिह्वया कथञ्चिदेतन्मुखचन्द्रचन्द्रिका । इमाङ्किमाचामयसे न चक्षुषा चिरञ्चकोरस्य भवन्मुखस्पृशी ॥" इति श्रीहर्षश्लोके आचामयेति पृथक्पदम् । अः विष्णुः तस्याः स्त्री ईः लक्ष्मीः । तया सहिता से इत्येकारान्तस्य सेशब्दस्य सम्बोधनम् । 'एङ्ह्रस्वात्' इति सम्बुद्धिलोप

निगारयति। आशयति। भोजयति। चलयति। कम्पयति। 'अदेः प्रतिषेधः' (वा ९५९)। आदयते देवदत्तेन। 'गतिबुद्धि—' (सू ५४०) इति कर्मत्वम् 'आदिखाद्योर्न' (वा ११०९) इति प्रतिषिद्धम्। 'निगरण-चलन—' (सू २७५३) इति सूत्रेण प्राप्तस्यैवायं निषेधः। शेषादित्यकर्त्रभिप्राये परस्मेपदं स्यादेव। आदयत्यन्नं वटुना।

२७५४। अणावकर्मकाच्चित्तवत्कर्तृकात्। (१-३-८८)

ण्यन्तात्परस्मैपदं स्यात्। शेते कृष्णस्तं गोपी शाययति।

२७५५। न पादम्याङ्यमाङ्यसपरिमुह-रुचिनृतिवदवसः। (१-३-८९)

एभ्यो ण्यन्तेभ्यः परस्मैपदं न। पिबतिर्निगरणार्थः। इतरे चित्तवत्कर्तृकाकर्मकाः। नृतिश्चलनार्थोऽपि। तेन सूत्रद्वयेन प्राप्तिः। पाययते।

इति व्याख्येयमिति प्रौढमनोरमायां स्थितम्। वस्तुतस्तु चक्षुषोर्मुखचन्द्रिकाकर्मकपानात्मकाच्चमनासम्भवादाचामिरादरे लाक्षणिकः। अतो निगरणार्थकत्वाभावान्न परस्मैपदम्। नचैवं सति 'प्रत्यवसानार्थकत्वाभावाच्चक्षुषोः 'गतिबुद्धि' इति कर्मत्वन्न स्यादिति शङ्क्यम्। न ह्याचामिरत्र केवले आदरे वर्तते। किन्तु दर्शनपूर्वकादरे वर्तते। सादरज्ञाने लाक्षणिक इति यावत्। ततश्च बुद्ध्यर्थकत्वादाचामेः चक्षुषोः कर्मत्वन्निर्बाधमित्यादि शब्देन्दुशेखरे प्रपञ्चितम्। **अदेः प्रतिषेधः इति** ॥ अदेर्ण्यन्तात् निगरणार्थकतया प्राप्तस्य परस्मैपदस्य प्रतिषेधो वक्तव्य इत्यर्थः। आदयते देवदत्तेनेत्यत्र अदेः प्रत्यवसानार्थत्वात् प्रयोज्यकर्तुर्देवदत्तस्य कर्मत्वमाशङ्क्य आह। **गतिबुद्धीति** ॥ नन्वादयत्यन्नं वटुनेति कथम्। निगरणार्थकतया प्राप्तस्य परस्मैपदस्य अदेः प्रतिषेधादित्यत आह। **निगरणचलनेति सूत्रेण प्राप्तस्यैवायन्निषेधः इति** ॥ नतु शेषात्कर्तरि इति प्राप्तस्येत्येवकारार्थः। 'अनन्तरस्य' इति न्यायादिति भावः। **अणावकर्मकात्** ॥ ण्यन्तादिति शेषपूरणम्। णेरित्यनुवृत्तेरिति भावः। अणौ यो धातुरकर्मकः चित्तवत्कर्तृकश्च तस्मात् ण्यन्तात्परस्मैपदमिति यावत्। चित्तवत्कर्तृकादिति किम्। व्रीहयः शुष्यन्ति तान् शोषयते। अकर्मकात्किम्। कटङ्करोति। तं प्रयुङ्क्ते। कटङ्कारयते। **न पादम्याङ्यम्** ॥ पा दमि आङ्यम् आङ्यस परिमुह रुचि नृति वद वस् एषां समाहारद्वन्द्वात्पञ्चमी। प्राप्तस्य निषेध्यत्वात् प्राप्तिमुपपादयति। **पिबतिर्निगरणार्थः इति** ॥ ततश्च 'निगरणचलनार्थेभ्यः' इति प्राप्तिरिति भावः। **इतरे इति** ॥ दम्यादयः अणौ चित्तवत्कर्तृका अकर्मकाश्चेत्यर्थः। ततश्च 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति प्राप्तिरिति भावः। **नृतिरिति** ॥ नृतिश्चलनार्थकः। अणौ चित्तवत्कर्तृकः अकर्मकश्चेत्यर्थः। **सूत्रद्वयेनेति** ॥ 'अणावकर्मकात्' इति 'निगरणचलनार्थेभ्यश्च' इति च सूत्रद्वयेनेत्यर्थः। **पाययते इति** ॥ 'शाच्छासाह्वाव्यावेषां युक्' इति पुको-

दमयते । आयामयते । आयासयते । परिमोहयते । रोचयते । नर्तयते । वादयते । वासयते । 'धेट उपसङ्ग्रहणानम्' (वा ९६२) । 'धापयेते शिशुमेकं समीची' । अकर्त्रभिप्राये 'शेषात्—' (सू २१५९) इति परस्मैपदं स्यादेव । वत्सान्पाययति पयः । 'दमयन्ती कमनीयतामदम्' । भिक्षां वासयति । 'वा क्यषः' (२६६९) लोहितायति–लोहितायते । 'युङ्क्षो लुङि' (सू २३४५) । अद्युतत्–अद्योतिष्ट । 'वृद्भ्यः स्यसनोः' (२३४७) वर्त्स्यति । वर्तिष्यते । विवृत्सति । विवर्तिषते । 'लुटि च क्लृपः' (सू २३५१) । कल्प्ता । कल्प्तासि । कल्पितासे । कल्प्स्यति । कल्पिष्यते–कल्प्स्यते । चिक्लृप्सति–चिकल्पिषते–चिक्लृप्सते ।

इति तिङन्तपरस्मैपदप्रकरणम् ।

ऽपवादो युक् । **दमयते इति** ॥ 'जनीजृष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वाद्ध्रस्वः । ननु दिवादौ दमिस्सकर्मक इत्युक्तम् । अतः कथमिह 'अणावकर्मकात्' इति प्राप्तिरिति चेत् दमेः परस्मैपदनिषेधादेव दमिरकर्मकोऽपि । अतो दमिस्सकर्मक इत्यस्य न विरोधः । **आयामयते इति** ॥ 'यमोऽपरिवेषणे' इति मित्त्वनिषेधान्न ह्रस्वः । **वासयते इति** ॥ 'वस निवासे' इति भौवादिकस्यैवात्र ग्रहणम् । नतु 'वस आच्छादने' इत्यादादिकस्यापि । तस्य सकर्मकत्वादेवाप्राप्तेः । लुग्विकरणालुग्विकरणयारलुग्विकरणस्यैव ग्रहणमित्युक्तेश्च । **धेट उपसङ्ग्रहणानमिति** ॥ परस्मैपदनिषेधस्येति शेषः । धापयेते शिशुमिति मन्त्रः । ननु 'वत्सान् पाययति पयः'। 'दमयन्ती कमनीयतामदम्'। भिक्षां वासयतीति च कथम्। 'न पादम्याङ्यस' इति 'धेटः' इति च परस्मैपदस्य निषेधादित्यत आह । **अकर्त्रभिप्राये इति** ॥ 'अनन्तरस्य' इति न्यायेन 'निगरणचलनार्थेभ्यश्च, अणावकर्मकात्' इति सूत्रद्वयप्राप्तस्यैव 'न पादम्याङयमाङ्यस' इति 'धेट उपसङ्ग्रहणानम्' इति च निषेध इति भावः । 'वा क्यषः' इत्यादि प्राग्व्याख्यातमिति सूत्रक्रमेण पुनरुपात्तम् ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायां पदव्यवस्था समाप्ता ।



श्रीरस्तु ।

॥ अथ भावकर्मतिङ्प्रकरणम् ॥

अथ भावकर्मणोर्लडादयः । 'भावकर्मणोः' (सू २६७९) इति तङ्—

२७५६ । सार्वधातुके यक् । (३-१-६१)

धातोर्यक्प्रत्ययः स्याद्भावकर्मवाचिनि सार्वधातुके परे । भावो भावना उत्पादना क्रिया । सा च धातुत्वेन सकलधातुवाच्या भावार्थकलकारेणानूद्यते ।

अथ भावकर्मतिङ्प्रकरणं निरूप्यते ॥ 'लः कर्मणि' इत्यत्र सकर्मकेभ्यो धातुभ्यः कर्मणि कर्तरि च। अकर्मकेभ्यस्तु भावे कर्तरि च लकारा विहिताः। तेषु कर्तरि लकारा निरूपिताः । अथेदानीं भावकर्मणोर्लकारा निरूप्यन्ते इति प्रतिजानीते । **अथ भावकर्मणोर्लडादयः इति** ॥ निरूप्यन्ते इति शेषः। तत्र 'शेषात्कर्तरि परस्मैपदम्, अनुपराभ्यां कृञः' इत्यादि परस्मैपदविधिषु प्राप्तेष्वाह । **भावकर्मणोरिति। तङिति** ॥ **सार्वधातुके यक्॥ धातोरिति**॥ 'धातोरेकाचः' इत्यतस्तदनुवृत्तेरिति भावः । **भावकर्मवाचिनीति** ॥ 'चिण्भावकर्मणोः' इत्यतस्तदनुवृत्तेरिति भावः । घटस्य भावो घटत्वमित्यादौ प्रकृतिजन्यबोधे प्रकारो भावः । कवेरयं भाव इत्यादौ अभिप्रायः । "भावः पदार्थसत्तायां क्रियाचेष्टात्मयोनिषु। विद्वल्लीलास्वभावेषु भूत्यभिप्रायजन्तुषु" इति नानार्थरत्नमाला। 'भावस्सत्तास्वभावाभिप्रायचेष्टात्मजन्तुषु' इत्यमरः। इह तु 'लः कर्मणि' इत्यत्र भावशब्दो भावनायां यौगिक इत्याह। **भावो भावनेति** ॥ 'लः कर्मणि' इत्यत्र भावशब्देन भावना विवक्षितेति भावः। भावनाशब्दस्य चिन्तायामपि प्रसिद्धत्वादाह । **उत्पादनेति** ॥ उत्पत्त्यनुकूलो व्यापार इत्यर्थः । एवञ्च भूधातोरुत्पत्त्यर्थकाद्धेतुमण्णौ वृद्ध्यावादेशयोः भाविशब्दात् 'एरच' इति भावे अचि णिलोपे भावशब्दः भावयतेरुत्पत्त्यर्थकाद्धेतुमण्ण्यन्तात् स्त्रियामित्यधिकारे 'ण्यासश्रन्थो युच्' इति युचि अनादेशे टापि भावनाशब्द इति बोध्यम्। उत्पादनाचेयं धात्वर्थन्नातिरिच्यते इति दर्शयितुमाह । **क्रियेति** ॥ धात्वर्थात्मकक्रियैव उत्पादनेत्यर्थः । तथाहि फलव्यापारयोर्धातुरिति सिद्धान्तः । पचधातोः पाकोऽर्थः । पाको विक्लित्त्यनुकूलव्यापारः । तत्र विक्लित्त्यंशः फलम् । अधिश्रयणादिस्तदनुकूलो व्यापारः । तथाविधव्यापाराश्रयो देवदत्तादिः कर्ता । धातूपात्तव्यापाराश्रयः कर्तेति सिद्धान्तात् । अधिश्रयणादिव्यापारजन्या विक्लित्तिः फलम् । तदाश्रयत्वादोदनं कर्म । व्यापारजन्यफलशालि कर्मेति सिद्धान्तात् । एवं सकर्मकेषु सर्वत्र ज्ञेयम्। 'एध वृद्धौ' इत्यस्मिन्नकर्मकेऽपि वृद्ध्यनुकूलव्यापारो धात्वर्थः । नचैवं सति एधते देवदत्त इत्यत्र धापूपात्तव्यापाराश्रयत्वाद्व्यापारजन्यवृद्धिरूपफलाश्रयत्वाच्च कर्तृत्वं कर्मत्वञ्च स्यादिति वाच्यम् । धातूपात्तव्यापारजन्यतद्व्यापारव्यधिकरणफलाश्रयत्वं कर्मत्व-

युष्मदस्मद्भ्यां सामानाधिकरण्याभावात्प्रथमपुरुषः। तिङ्वाच्यभावनाया असत्त्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि । किं त्वेकवचनमेव । तस्यौत्सर्गिकत्वेन

मिति सिद्धान्तात् । एवञ्च फलोत्पत्त्यनुकूलव्यापारात्मिका क्रिया धात्वर्थ इति सिद्धम् । एतेन क्रियावाची धातुः धातुवाच्या क्रियेत्यन्योन्याश्रयोऽपि निरस्तः । उत्पत्त्यनुकूलव्यापारस्यैव क्रियात्वात् । तदुक्तम् । व्यापारो भावना । सैवोत्पादना सैव क्रियेति । ननु उत्पत्त्यनुकूलव्यापारस्यैव सर्वत्र धातुवाच्यत्वे सर्वेषां धातूनामेकार्थत्वापत्तिः । विक्लित्त्यादितत्तत्फलोत्पत्त्यनुकूलव्यापारार्थकत्वन्तु न सम्भवति । एकैकस्य धातोर्विक्लित्त्यादितत्तत्फलांशे तदनुकूलव्यापारात्मकव्यापारसामान्ये च वाचकत्वानुपपत्तेरित्यत आह । **सा च धातुत्वेन सकलधातुवाच्येति** ॥ पच्यादयो धातुत्वेन रूपेण उत्पत्त्यनुकूलव्यापारात्मिकां क्रियामाहुः । पचित्वादिविशेषरूपेण तु विक्लित्त्यादितत्तत्फलांशमाहुः । तथाच वाचकतावच्छेदकभेदाद्विक्लित्त्यादिफलविशेषस्य क्रियासामान्यस्य च वाच्यता सङ्गच्छते इति भावः । तथाच भट्टिराह । 'विभज्य सेनां परमार्थकर्मा सेनापतींश्चापि पुरन्दरोऽथ । नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातून् ॥' इति । अस्तिभवतिविद्यतीनामपि सत्तानुकूलव्यापार एवार्थः । तत्र सत्ता आत्मभरणम् । तदनुकूलव्यापारस्तु जायते अस्ति विपरिणमते, वर्धते, अपक्षीयते, विनश्यति, इति वार्ष्यायणिप्रणीतषड्भावविकारेष्वन्यतमो यथायथं ज्ञेयः । भूवादिसूत्रे भाष्ये स्पष्टमेतत् । प्रपञ्चितञ्च मञ्जूषायामित्यलम् । ननु उत्पादनात्मकक्रियारूपस्य भावस्य धातुवाच्यत्वे लः कर्मणि च भावे च इति भावे कथं लकारविधिः । अनन्यलभ्यस्यैव शब्दार्थत्वादित्यत आह । **भावार्थकलकारेणानूद्यते इति** ॥ द्वौ त्रयः इत्यादौ द्विवचनबहुवचनवदिति भावः । **युष्मदस्मद्भ्यामिति** ॥ युष्मदि अस्मदीति च तिङ्समानाधिकरणे उपपदे मध्यमोत्तमपुरुषौ विहितौ । युष्मदस्मदोस्तिङ्सामानाधिकरण्यञ्च तिङ्वाच्यकारकवाचित्वमेव । लकारे तु आस्यते त्वया आस्यते मया इत्यादौ भाव एव लकारादेस्तिङ्वाच्यः । ननु युष्मदस्मदर्थौ । अतो न मध्यमोत्तमावित्यर्थः । कर्मलकारे तु त्वं वन्द्यसे अहं वन्द्ये इत्यादौ लकारस्य युष्मदस्मदोश्च सामानाधिकरण्यसम्भवात्पुरुषत्रयमपि यथायथमुदाहरिष्यते । **तिङ्वाच्येति** ॥ सत्त्वं द्रव्यं लिङ्गसङ्ख्यान्वययोग्यम् । तिङ्वाच्या या भावना क्रिया सा असत्त्वरूपा लिङ्गसङ्ख्यान्वययोग्या । शब्दशक्तिस्वभावात् । ततश्च तस्याः तिङ्वाच्यभावनायां द्वित्वबहुत्वयोरप्रतीतेः युवाभ्यां युष्माभिर्वा आस्यते इत्यादौ न द्विवचनं बहुवचनञ्चेत्यर्थः । तिङ्वाच्येत्यनेन कृद्वाच्यायाः क्रियायाः लिङ्गसङ्ख्यान्वयित्वात्मकं सत्त्वरूपत्वमस्तीत्युक्तम्भवति । तद्यथा । पाकौ पाकाः इत्यादि । तदुक्तम् । 'सार्वधातुके यक्' इति सूत्रे भाष्ये 'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति द्रव्यवत् लिङ्गसङ्ख्यान्वयं लभते इत्यर्थः । शब्दशक्तिस्वभावादिति भावः । ननु तिङ्वाच्यभावनाया असत्त्वरूपतया द्विबहुवचनाभावे आस्यते इत्यादौ एकवचनञ्च न स्यादित्यत आह । **किन्त्वेकवचनमेवेति** ॥ तिङ्वाच्यभावलकारस्येति शेषः । **तस्येति** ॥ 'द्येकयोर्द्विवचनैकवचनं' 'बहुषु बहुवचनम्' इति सूत्रन्यासं भङ्क्त्वा एकवचनद्विबहुवचनेषु द्विबहुवचनं इति सूत्रन्यासः कर्त-

संख्यानपेक्षत्वादनभिहिते कर्तरि तृतीया। त्वया मया अन्यैश्च भूयते। बभूवे।

२७५७। स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झन-ग्रहदृशां वा चिण्वदिट् च। (६-४-६२)

उपदेशे योऽच् तदन्तानां हनादीनां च चिणीवाङ्कार्यं वा स्यात्स्यादिषु परेषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च। अयमिट् चिण्वद्भावसन्नियोगशिष्टत्वात्तदभावे न। इहार्धधातुके इत्यधिकृतं सीयुटो विशेषणं, नेतरेषामव्यभिचारात्। चिण्वद्भावाद्वृद्धिः। नित्यश्चायं वल्निमित्तो विघाती। भावि-

---

व्यः। तत्र द्वित्वबहुत्वयोर्द्विबहुवचननियमे सति तयोरविषये एकवचनमिति लभ्यते इति भाष्ये स्पष्टम्। एवञ्च एकवचनस्य एकत्वमुत्सृज्य द्विबहुवचनान्यविषये विहितत्वेन औत्सर्गिकतया एकत्वसङ्ख्यानपेक्षत्वात् भावलकारस्य असत्त्वरूपभाववाचित्वेऽप्येकवचनमेवेति भावः। **अनभिहिते इति॥** भावलकारे कर्तुस्तिङ्वाच्यत्वाभावेन अनभिहितत्वात्तृतीयेत्यर्थः। **त्वया मयेति॥** त्वत्कर्तृकं, मत्कर्तृकम्, अन्यकर्तृकं, भावनमित्यर्थः। **स्यसिच्॥** अच् हन ग्रह दृश् एषान्द्वन्द्वात् षष्ठी। उपदेश इत्यच एव विशेषणम्। नेतरेषाम्। अव्यभिचारात्। तदाह। **उपदेशे योऽजिति॥** अजित्यस्य उपदेशान्वयित्वेऽपि सौत्रः समासः। अजिति लुप्तषष्ठीकम्। वा चिण्वदिति सप्तम्यन्ताद्वृतिः। स्यसिच्सीयुट्तासिष्वित्युपमेयतस्सप्तमीदर्शनात्। तदाह। **चिणीवेति॥ अङ्गकार्यमिति॥** अङ्गस्येत्यधिकृतत्वादिति भावः। भावकर्मवाचिषु स्यादिष्विति नार्थः। सीयुटो लिङागमतया भावकर्मवाचित्वेऽपि स्यसिच्तासीनां भावकर्मवाचित्वाभावात्। नापि भावकर्मवाचिनि प्रत्यये परे स्यादयस्तेष्वित्यर्थः। स्यसिच्तासीनां भावकर्मवाचिप्रत्ययपरत्वसम्भवेऽपि सीयुटस्तदसम्भवात्। सीयुडागमविशिष्टस्यैव लिङो भावकर्मवाचितया केवलसीयुटो भावकर्मवाचिप्रत्ययपरकत्वमास्ति। अतो विषयसप्तमीति मत्वा आह। **भावकर्मणोर्गम्यमानयोरिति॥** इड्विधौ स्यसिच्सीयुट्तासिषु, इति सप्तमी षष्ठ्या विपरिणम्यते इति मत्वा आह। **स्यादीनामिडागमश्चेति॥** अत्र अज्झनग्रहदृशां स्यादीनाञ्च न यथासङ्ख्यम्। व्याख्यानात्। स्यादिषु परेषु अङ्गस्य इडिति नार्थः। 'आर्धधातुकस्येड्वलादेः' इत्यत्र 'आर्धधातुके' इति योगं विभज्य यावानिट् स आर्धधातुकस्यैवेति भाष्ये उक्तत्वात् णिचि यदङ्गाधिकारविहितं कार्यन्तस्यैवात्रातिदेशः ननु चिणि दृष्टमात्रस्य। तेन घानिष्यते इत्यत्र 'हनो वध लिङि, लुङि च' इति चिणि दृष्टो वधादेशश्चिण्वदिति नातिदृश्यते। तस्य द्वैतीयीकत्वेन अङ्गाधिकारविहितत्वाभावात्। तथा अयिष्यते इत्यत्र इणो गादेशो न। अध्यायिष्यते इत्यत्र इङो गाङादेशो न। द्वैतीयीकत्वात् चिण्वत्त्वाभावे अयमिट् नेत्याह। **अयमिडिति॥** सेट्कस्य वलादित्वलक्षण इट् तु स्यादेवेति भावः। ननु भूयेतेति विधिलिङि चिण्वत्त्वं इट् च स्यातामित्यत आह। **इहार्धधातुके इति॥ नेतरेषामिति॥** स्यसिच्तासीनां न विशेषणमित्यर्थः। **अव्यभिचारादिति॥** स्यसिच्तासीनां सर्वत्रार्धधातुकत्वनि-

ता—भविता । भाविष्यते—भविष्यते । भूयताम् । अभूयत । भूयेत । भाविषीष्ट—भविषीष्ट ।

२७५८ । चिण्भावकर्मणोः । (३-१-६६)

च्लेश्चिण्स्यद्भावकर्मवाचिनि तशब्दे परे । अभावि । अभाविष्यत—अभविष्यत । तिङोक्तत्वात्कर्मणि न द्वितीया । अनुभूयते आनन्दश्चैत्रेण त्वया मया च । अनुभूयेते । अनुभूयन्ते । त्वमनुभूयेसे। अहमनुभूये । अन्वभावि । अन्वभाविषाताम्—अन्वभविषाताम् । णिलोपः । भाव्यते । भावयाञ्चक्रे । भावयांबभूवे । भावयामासे । इह तशब्दस्य एशि, इट एत्त्वे च, कृते

यमादिति भावः । अत्र वार्तिकम् । "चिण्वद्वृद्धिर्युक् च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणिति इट्चासिद्धस्तेन मे लुप्यते णिर्निलश्चायं वलादिनिमित्तो विघाती" इति स्यसिच्सीयुडितिसूत्रस्य वृद्ध्यादिप्रयोजनमित्यर्थः । तत्र वृद्धिं दर्शयति । **चिण्वद्भावाद्वृद्धिरिति** ॥ लुटि भू ता इति स्थिते चिण्वत्त्वात् 'अचोऽञ्णिति' इति वृद्धिरित्यर्थः । इडागमश्चेत्यपि बोध्यम् । तत्फलन्तु वक्ष्यते । तथा दाधातोर्लटि 'आतो युक् चिण्कृतोः' इति युक् । तथा लुटि घानिष्यते इत्यत्र 'होहन्तेर्ञ्णिन्नेषु' इति घत्वं शमेर्हेतुमण्ण्यन्ताल्लुटि शामिता, शमितेत्यत्र 'चिण्णमुलोः' इति दीर्घः । तथा अनेनैवात्र इटि कृते तस्य आभीयत्वेनासिद्धत्वात् अनिटीति निषेधाभावात् णिलोपः । तथा भाविष्यते इत्यत्र भू स्य इति स्थिते परमपि वलादिलक्षणं इटं बाधित्वा नित्यत्वादनेन इट् । वलादिलक्षणस्त्विट् न नित्यः । चिण्वदिटि कृते वलादित्वस्य विहतत्वेन वलादिलक्षणस्य इटः अप्रवृत्तेः । नित्यश्चायमित्यस्य चिण्वदिडिति शेषः । वलादिनिमित्त इत्यनन्तरं इडनित्य इति शेषः । अनित्यत्वे हेतुः । **विघातीति** ॥ चिण्वदिटो वलादिनिमित्तविघातकत्वादित्यर्थः । एवञ्च सेट्कत्वेऽप्यनेनैव इट् । एतदभावपक्षे तु सेट्कत्वे वलादिलक्षण इडिति बोध्यम । तदाह । **भवितेति** ॥ चिण्वदिडभावपक्षे वलादिलक्षण इडिति भावः । **चिण् भावकर्मणोः** ॥ **च्लेरिति** ॥ 'च्लेस्सिच्' इत्यतस्तदनुवृत्तेरिति भावः । **तशब्दे परे इति** ॥ 'चिण् ते पदः' इत्यतस्तदनुवृत्तेरिति भावः । **अभावीति** ॥ च्लोश्चिणि कृते 'चिणो लुक्' इति तशब्दस्य लोपः । चिण्विधौ तशब्दे किम् । अभाविषाताम् । अथ अनुपूर्वात् भूधातोरुपभोगार्थकात्सकर्मकेभ्यः कर्मणि लकारे विशेषमाह । **तिङोक्तत्वादिति** ॥ कर्तुस्त्वनभिहितत्वात् तृतीयैवेति भावः । तदाह । **अनुभूयते आनन्दश्चैत्रेण त्वया मया चेति** ॥ इहानन्दस्य तिङाभिहितत्वात् प्रथमेति भावः । युष्मदस्मदुपात्तयोः कर्त्रोस्त्वनभिहितत्वात् तृतीया । **अनुभूयेते इति** ॥ सुखदुःखे इति शेषः । **अनुभूयन्ते इति** ॥ सुखानीति शेषः । **णिलोपः इति** ॥ भूधातोर्णौ वृद्धौ आवादेशे भावि इति ण्यन्तात् कर्मणि लटस्तादेशे यकि णिलोप इत्यर्थः । **भावयामासे इति** ॥ प्रथमपुरुषैकवचने उत्तमपुरुषैकवचने च रूपम् । **इहेति** ॥ भावयामासे इत्यत्र

'ह एति' (सू २२५०) इति हत्वं न। तासिसाहचर्यादस्तेरपि व्यतिहे इत्यादौ सार्वधातुके एति हत्वप्रवृत्तेरित्याहुः। भाविता। चिण्वदिटः आभीयत्वेनासिद्धत्वाण्णिलोपः। पक्षे भावयिता। भाविष्यते—भावयिष्यते। भाव्यताम्। अभाव्यत। भाव्येत। भाविषीष्ट—भावयिषीष्ट। अभावि। अभाविषाताम्—अभावयिषाताम्। बुभूष्यते। बुभूषांचक्रे। बुभूषिता। बुभूषिष्यते। बोभूय्यते। यङ्लुगन्तात्तु। बोभूयते। बोभवाञ्चक्रे। बोभाविता—बोभविता। 'अकृत्सार्व—' (सू २२९८) इति दीर्घः। स्तूयते विष्णुः। तुष्टुवे। स्ताविता—स्तोता। स्ताविष्यते—स्तोष्यते। अस्तावि। अस्ताविषाताम्—अस्तोषाताम्। 'गुणोऽर्ति' (सू २३८०) इति गुणः। अर्यते। स्मर्यते। सस्मरे। परत्वा-

---

प्रथमैकवचनतशब्दस्य 'लिटस्तझयोः' इति एशादेशे उत्तमपुरुषैकवचनस्य इटश्च 'टित आत्मनेपदानाम्' इत्येत्वे च कृते भावयामास् ए इति स्थिते 'ह एति' इति सकारस्य हकारः प्राप्तो न भवतीत्यर्थः। कुत इत्यत आह। **तासीति** ॥ 'ह एति' इत्यत्र तासस्त्योरित्यनुवर्तते। तत्र एधिताहे इत्यादौ तासेस्सस्य सार्वधातुक एव एति परे हकार इति निर्विवादः। तथाविधतासिसाहचर्यादस्तेरपि सकारस्य व्यतिहे इत्यादौ सार्वधातुक एव परे प्रवृत्तिः। अतो भावयामासे इत्यत्र नास्तेस्सकारस्य हकारः। एकारस्यार्धधातुकत्वादित्यर्थः। **भावितेति** ॥ ण्यन्तात् भावि ता इति स्थिते परत्वाद्वलादिलक्षणमिटं बाधित्वा चिण्वदिटि तस्याभीयत्वेनासिद्धत्वादनिटीति निषेधाभावाण्णिलोपे भावितेति रूपम्। अत एव चिण्वदिड्विधौ उपदेशे योऽजित्येव व्याख्यातम्, नतु उपदेशे अजन्तस्येति। तथा सति हि णिजन्तस्य उपदेशाभावान्न स्यादिति भावः। वलादिलक्षणे इटि कृते तु तस्य अनाभीयत्वेन असिद्धत्वाभावादनिटीति निषेधाण्णिलोपाभावे णेर्गुणायादेशयोः कृतयोर्भावयितेति रूपमिति मत्वा आह। **पक्षे भावयितेति** ॥ अथ सन्नन्तात् भूधातोः कर्मलकारे उदाहरति। **बुभूष्यते इति**॥ यकि सनोऽकारस्य 'अतो लोपः' इति लोपः। **बुभूषिता। बुभूषिष्यते इति** ॥ चिण्वदिटि वलादिलक्षणे इटि च रूपं तुल्यम्। चिण्वदिड्भावपक्षेऽपि तदतिदेशेन प्राप्तां वृद्धिं बाधित्वा परत्वादतो लोपः। अथ यङन्तात् भूधातोः भावलकारे उदाहरति। **बोभूय्यते इति** ॥ यकि यङोऽकारस्य पूर्ववदतोलोपः। द्वियकारकं रूपम्। यङ्लुगन्तात् बोभूयते इति एकयकारं रूपम्। ष्टुञ्धातोः कर्मलकारे यकि तस्यार्धधातुकत्वात् 'अतो दीर्घो यञि' इत्यप्राप्तावाह। **अकृत्सार्वेति**॥ **स्ताविता-स्तोतेति** ॥ चिण्वदिडभावपक्षे अनिट्कत्वान्नेट्। अथ ऋधातोः कर्मणि लकारे यकि कृते कित्त्वाद्गुणनिषेधे प्राप्ते आह। **गुणोऽर्तीति**॥ **अर्यते इति** ॥ गुणे कृते रपरत्वम्। स्मृधातोः कर्मणि लकारे आह। **स्मर्यते इति** ॥ 'गुणोऽर्ति' इति संयोगादित्वात् गुणे रपरत्वमिति भावः। ननु ङिटि ऋ ता, स्मृ ता इति स्थिते चिण्वदिटं बाधित्वा परत्वात् गुणः प्राप्नोति नित्यत्वाच्च। अकृते कृते च चिण्वदिटि गुणस्य प्राप्तेः। कृते तु गुणे रपरत्वे अजन्तत्वाभावाच्चिण्वदिडभावे अनिट्त्वाद्वलादिलक्षणेऽभावे अर्ता स्मर्तेत्येव स्यात्। आरिता स्मारितेति न स्यादित्यत आह। **परत्वादि-**

न्नित्यत्वाच्च गुणे रपरे कृते अजन्तत्वाभावेऽप्युपदेशग्रहणाच्चिण्वदिट्। आरिता—अर्ता। स्मारिता—स्मर्ता। 'गुणोऽर्ति—' (सू २३८०) इत्यत्र नित्यग्रहणानुवृत्तेरुक्तत्वान्नेह गुणः। संस्क्रियते। 'अनिदिताम्—' (सू ४१५) इति नलोपः। स्रस्यते। इदितस्तु नन्द्यते। सम्प्रसारणम्। इज्यते। 'अयङ्यि क्ङिति' (सू २६४९)। शय्यते।

२७५९। तनोतेर्यकि। (६-४-४४)

आकारोऽन्तादेशो वा स्यात्। तायते—तन्यते। 'ये विभाषा' (सू २३१९)। जायते—जन्यते।

२७६०। तपोऽनुतापे च। (३-१-६५)

तपश्च्लेश्चिण्न स्यात्कर्मकर्तर्यनुतापे च। अन्वतप्त पापेन। पापं कर्तृ। तेनाभ्याहृत इत्यर्थः। कर्मणि लुङ्। यद्वा पापेन पुंसा कर्त्रा अशोचीत्यर्थः।

त्यादि ॥ कृते गुणे रपरत्वे अजन्तत्वाभावेऽपि उपदेशे योऽच् तदन्तस्येत्युक्तेश्चिण्वदिट् निर्बाध इत्यर्थः। **आरितेति** ॥ कृतेऽपि गुणे रपरत्वे चिण्वदिटि उपधावृद्धिः। **अर्तेति** ॥ चिण्वदिडभावे रूपम्। एवं स्मारिता स्मर्तेत्यपि। ननु सम्पूर्वात् कृञः कर्मणि लकारे यकि 'रिङ् शयग्लिङ्क्षु' इति रिङादेशे 'सम्परिभ्यां करोतौ भूषणे, समवाये च' इति सुटि संस्क्रियते इति वक्ष्यते। तत्र 'गुणोऽर्ति' इति संयोगादित्वात् गुणः स्यादित्यत आह। **नित्यग्रहणानुवृत्तेरिति** ॥ 'नित्यं छन्दसि' इत्यतो नित्यमित्यनुवृत्तेः 'गुणोऽर्ति' इत्यत्र नित्यं यस्संयोगादिस्तस्यैव संयोगादिलक्षणो गुण इति लभ्यते। कृञ्तु न नित्यं संयोगादिः। सम्परिपूर्वकत्वाभावे तदभावादिति भावः। अथ स्रंसूधातोर्भावलकारे यकि विशेषमाह। **अनिदितामिति नलोपः इति** ॥ **इदितस्त्वेति** ॥ 'टु नदि समृद्धौ' इत्यस्माद्भावलकारे यकि इदित्वान्नलोपो नेत्यर्थः। अथ यजधातोः कर्मलकारे यकि विशेषमाह। **सम्प्रसारणमिति** ॥ 'वचिस्वपियजादीनाम्' इत्यनेनेति भावः। शीङ्धातोर्भावलकारे यकि विशेषमाह। **अयङ्यि क्ङितीति** ॥ **तनोतेर्यकि** ॥ 'विड्वनोः' इत्यतः आदिति 'ये विभाषा' इत्यतः विभाषेति चानुवर्तते। तदाह। **आकारोऽन्तादेशो वा स्यादिति** ॥ शेषपूरणमिदम्। **तायते—तन्यते इति** ॥ कर्मणि लकारः। **तपोऽनुतापे च** ॥ 'च्लेस्सिच्' इत्यतः च्लेरिति 'चिण् ते' इत्यतश्चिण् इति 'न रुधः' इत्यतो नेति चानुवर्तते। चकारात् 'अचः कर्म' इत्यतः कर्मकर्तरीति समुच्चीयते। तदाह। **तपश्च्लेरित्यादि** ॥ तत्र कर्मकर्तरि कर्मकर्तृप्रक्रियायामुदाहरिष्यति। अनुतापे कर्मलकारे उदाहरति। **अन्वतप्त पापेनेति** ॥ पापेनेति कर्तरि तृतीयेति मत्वा आह। **पापङ्कर्त्रिति** ॥ अनुपूर्वस्य तपेः पश्चात्तापार्थकत्वे असङ्गतिः। नहि पापस्य सूर्यादिवत्तपनशक्तिरस्ति। शोकार्थकत्वे अकर्मकत्वापत्तिरित्यत आह। **अभ्याहृत इति** ॥ अनुपूर्वस्तपिरिह उपसर्गवशात् अभिहननार्थक इति भावः। तस्य च सकर्मकत्वात् कर्मलकारः उपपद्यते इति मत्वा आह। **कर्मणि लुङिति** ॥ शोकार्थकत्वमाश्रित्य

'घुमास्था—' (सू २४६२) इतीत्त्वम्। दीयते। धीयते। 'आदेचः—' (सू २३७०) इत्यत्र अशितीति कर्मधारयादित्संज्ञकशकारादौ निषेधः। एशः आदिशित्त्वाभावात्तस्मिन्नात्त्वम्। जग्ले।

२७६१। आतो युक्चिण्कृतोः। (७-३-३३)

आदन्तानां युगागमः स्याच्चिणि ञिति णिति कृति च। दायिता—दाता। दायिषीष्ट—दासीष्ट। अदायि। अदायिषाताम्—अदिषाताम्। अधायिषाताम्—अधिषाताम्। अग्लायिषाताम्—अग्लासाताम्। हन्यते। 'अचिण्णलोः—' (सू २५७४) इत्युक्तेर्हनस्तो न। 'हो हन्तेः—' (सू ३५८) इति कुत्वम्। घानिता—हन्ता। घानिष्यते—हनिष्यते। आशीर्लिङि वधादेशस्यापवादश्चि-

---

भावे वा लुङित्याह। **यद्वा पापेन पुंसा कर्त्रेति** ॥ परिणाममसमीक्ष्य सहसा किञ्चिदकृत्यं कृत्वा पश्चात् दुःखमन्वभवदित्यर्थः। दुःखानुभवः शोकः धात्वर्थेनोपसङ्ग्रहादकर्मकः। 'शुच शोके' अकर्मकः। पुत्रमनुशोचतीत्यत्र तु वियुक्तं पुत्रं स्मृत्वा शोचतीत्यर्थः। स्मरणे पुत्रस्य कर्मत्वात् द्वितीयेत्यविरोधः। अथ दाधातोर्धाधातोश्च कर्मलकारे यकि विशेषमाह। **घुमास्थेतीत्त्वमिति** ॥ ग्लैधातोर्भावे लिटस्तादेशस्य एशादेशे 'आदेचः' इत्यात्त्वस्य अशितीति निषेधमाशङ्क्य आह। **आदेच इत्यत्रेति** ॥ श् चासावित्र इति कर्मधारयाश्रयणादित्संज्ञकशकारादौ प्रत्यये परे आत्त्वस्य निषेधो लभ्यते। एशः शित्त्वेऽपि आदिभूतशकारेत्कत्वाभावान्निषेधाभावात्तस्मिन् एशि परे आत्त्वं भवत्येवेत्यर्थः। **जग्ले इति** ॥ आत्त्वे कृते 'आतो लोप इटि च' इति तस्य लोप इति भावः। **आतो युक्** ॥ अङ्गस्येत्यधिकृतमाता विशेषितम्, तदन्तविधिः। 'अचो ञ्णिति' इत्यतो ञ्णितीत्यनुवृत्तं कृत एव विशेषणम्, नतु चिणः। तस्य णित्त्वाव्यभिचारात्। तदाह। **आदन्तानामित्यादि** ॥ **दायितेति** ॥ चिण्वदिट्पक्षे युक्। **अदायिषातामिति** ॥ 'स्थाघ्वोरिच्च' इत्येतत् बाधित्वा परत्वाच्चिण्वदिटि कृते 'घुमास्था' इतीत्त्वन्न। अजादित्वात्। पुनः 'स्थाघ्वोरिच्च' इति तु न भवति। अञ्चलादित्वात्। तत्र हि 'इको झल्' इति सूत्रात् झल् इत्यनुवृत्तम्। तथाच झलादिरेव सिच् किदिति लाभादिडादिः सिच् न कित्। तत्सन्नियोगादित्त्वमपि न भवतीत्याहुः। वस्तुतस्तु सत्यपि तस्मिन्नात्र काचित् क्षतिः। सिचः कित्त्वेऽप्यनिग्लक्षणया वृद्ध्या रूपसिद्धेरिति दिक्। अथ हनधातोः कर्मलकारे आह। **हन्यते इति** ॥ **अचिण्णलोरिति** ॥ लुटि चिण्वदिटि वृद्धौ 'हनस्तोऽचिण्णलोः' इति हनो नकारस्य तकारो न भवति। चिण्वत्त्वादित्यर्थः। **कुत्वमिति** ॥ तस्य णिति विहितस्यात्र चिण्वत्त्वात् प्राप्तिरिति भावः। **घानिष्यते इति** ॥ 'ऋद्धनोः' इति बाधित्वा नित्यत्वाच्चिण्वदिट्। 'ऋद्धनोः' इति तु चिण्वदिटि कृते न भवतीत्यनित्यम्। तत्र बलीत्यनुवृत्तेरिति भावः। नन्वाशीर्लिङि घानिषीष्टेत्यत्र 'हन् सीष्ट' इति स्थिते परमपि चिण्वत्त्वं बाधित्वा वधादेशः प्राप्नोति। आर्धधातुके विवक्षिते विहितत्वेन वधादेशस्यान्तरङ्गत्वादित्यत आह। **आशीर्लिङि वधादेशस्यापवादश्चि-**

ण्वद्भावः । आर्धधातुके सीयुटीति विशेषविहितत्वात् । घानिषीष्ट । पक्षे वधिषीष्ट । अघानि । अघानिषाताम्–अहसाताम् । पक्षे वधादेशः । अवधि । अवधिषाताम् । अघानिष्यत–अहनिष्यत । नच स्यादिषु चिण्वदित्यतिदेशाद्वधादेशः स्यादिति वाच्यम् । 'अङ्गस्य' (सू २००) इत्यधिकारादाङ्गस्यैवातिदेशात् । गृह्यते । चिण्वदिटो न दीर्घत्वम् । प्रकृतस्य वलादिलक्षणस्यैवेटो 'ग्रहोऽलिटि'— (सू २५६२) इत्यनेन दीर्घविधानात् । ग्राहिता–ग्रहीता । ग्राहिष्यते–ग्रहीष्यते । ग्राहिषीष्ट–ग्रहीषीष्ट । अग्राहि । अग्राहिषाताम्–अग्रही-

---

ण्वद्भावः इति ॥ ननु घानितेत्यादौ प्राप्तेऽपि वधादेशे आरम्भात् कथं वधादेशस्य चिण्वद्भावः अपवादः स्यादित्यत आह । **आर्धधातुके सीयुटीति** ॥ 'स्यसिच्सीयुट्' इति सूत्रे अजन्तस्य स्ये, अजन्तस्य सिचि, अजन्तस्य आर्धधातुके सीयुटि, अजन्तस्य तासौ, इत्यजन्तस्य चत्वारि वाक्यानि । एवं हनदृशामप्येकैकस्य चत्वारि वाक्यानीति स्थितिः । तत्र हनः आर्धधातुके सीयुटि चिण्वदिड्विधिर्निरवकाशत्वाद्वधादेशापवादः । अप्राप्त एव वधादेशे आरम्भात् । वधादेशस्तु न चिण्वदिटोऽपवादः । तस्य वध्यादित्यत्र कर्तरि लिङि चरितार्थत्वादिति भावः । **पक्षे इति** ॥ चिण्वत्त्वाभावपक्षे 'हनो वध लिङि' इति वधादेशे वलादिलक्षणे इटि अतो लोपे रूपम् । वधादेशस्यादन्तत्वात् । नच हनधातोरनुदात्तत्वादुपदेशे एकाच्त्वात्तदीयवधादेशस्यापि तथाविधत्वादिह कथं वलादिलक्षण इडिति वाच्यम् । 'एकाच उपदेशे' इत्यत्र अच इत्येकत्वसामर्थ्यादेकत्वे सिद्धे पुनरेकग्रहणबलेन य उपदेशे एकाजेव नतु कदाप्यनेकाजिति लभ्यते । तेन वधेर्हन्त्युपदेशमादाय एकाचोऽपि न निषेधः । आदेशोपदेशे अनेकाच्त्वादित्युक्तं प्राक् । लुङि तु सिचश्चिणि उपधावृद्धौ कुत्वेन घः । आत्मनेपदेष्वन्यतरस्यामिति वधादेशाभावः । **अघानिषातामिति** ॥ चिण्वदिटि वधादेशाभावपक्षे रूपम् । **अहसातामिति** ॥ चिण्वदिडभावपक्षे 'हनः सिच्' इति कित्त्वादनुदात्तोपदेशेत्यनुनासिकलोपः । **पक्षे अवधीति** ॥ 'आत्मनेपदेष्वन्यतरस्याम्' इति वधादेशपक्षे इत्यर्थः । **अवधिषातामिति** ॥ 'आत्मनेपदेष्वन्यतरस्याम्' इति वधादेशस्यापि चिण्वत्त्वात् पाक्षिकतया अप्राप्तेऽपि वधादेशे चिण्वत्त्वस्यारम्भान्नापवादत्वमिति भावः । ननु चिणि वधादेशस्य दृष्टत्वात् स्यादिषु चिण्वत्त्वाद्वधादेशः स्यादित्याशङ्क्य परिहरति । **नचेत्यादिना** ॥ **आङ्गस्यैवेति** ॥ वधादेशस्तु द्वैतीयीकः । न त्वङ्गाधिकारस्थ इति भावः । अथ 'ग्रह उपादाने' इत्यस्मादुपधात् कर्मलकारे उदाहरति । **गृह्यते इति** ॥ 'ग्रहिज्या' इति सम्प्रसारणम् । अथ लुटि तासि चिण्वदिटि 'ग्रहोऽलिटि' इति दीर्घमाशङ्क्य आह । **चिण्वदिटो न दीर्घत्वमिति** ॥ कुत इत्यत आह । **प्रकृतस्येति** ॥ वलादिलक्षणस्य इटः प्रकृतत्वात्तस्यैव 'ग्रहोऽलिटि' इति दीर्घविधौ ग्रहणम् । नतु चिण्वदिटः इति भाष्ये स्पष्टम् । **ग्राहितेति** ॥ चिण्वदिटि रूपम् । **ग्रहीतेति** ॥ चिण्वदिडभावपक्षे वलादिलक्षणस्य इटो दीर्घे रूपम् । अथ दृशेः कर्म-

षाताम्। दृश्यते। अदर्शि। अदर्शिषाताम्। सिचः कित्त्वादम्न। अदृक्षाताम्। गिरतेर्लुङि ध्वमि चतुरधिकं शतम्। तथा हि। चिण्वदिटो दीर्घो नेत्युक्तम्। अगारिध्वम्। द्वितीये त्विटि 'वृतो वा' (सू २३९१) इति वा दीर्घः। अगरीध्वम्–अगरिध्वम्। एषां त्रयाणां लत्वं ढत्वं द्वित्वत्रयं चेति पञ्च वैकल्पिकानि। इत्थं षण्णवतिः। 'लिङ्सिचोः—' (सू २५२८) इति विकल्पादिडभावे

लकारे उदाहरति। **दृश्यते इति** ॥ लिटि ददर्शे। लुटि तासि चिण्वदिट्पक्षे दर्शिता। चिण्वत्त्वाभावे 'सृजिदृशोः' इत्यम्। द्रष्टा। दर्शिष्यते–द्रक्ष्यते। दर्शिषीष्ट। चिण्वदिडभावे तु 'लिङ्सिचावात्मनेपदेषु' इति कित्त्वात् 'सृजिदृशोः' इत्यम्न। नापि लघूपधगुणः। दृक्षीष्ट। **अदर्शीति** ॥ चिणि लघूपधगुणः। **अदर्शिषातामिति** ॥ चिण्वदिटि रूपम्। चिण्वत्त्वाभावे त्वाह। **सिचः कित्त्वादम्नेति** ॥ 'लिङ्सिचावात्मनेपदेषु' इति सिचः कित्त्वात् 'सृजिदृशोः' इत्यम्न भवति। अकितीति पर्युदासादित्यर्थः। अथ गृधातोः कर्मलकारे यकि ऋत इत्त्वे 'हलि च' इति दीर्घे, गीर्यते। जगिरे। लुटि तासि चिण्वत्त्वपक्षे, गारिता। चिण्वत्त्वाभावे वलादिलक्षणे इटि गुणे रपरत्वे गरिता–गरीता, 'वृतो वा' इति वा दीर्घः। गारिष्यते–गरिष्यते–गरीष्यते। गीर्यताम्। अगीर्यत। गीर्येत। गारिषीष्ट। चिण्वत्त्वाभावपक्षे तु 'लिङ्सिचोरात्मनेपदेषु' इति इड्विकल्पः। इडभावपक्षे 'उश्च' इति कित्त्वम्। इत्त्वं। रपरत्वम्। 'हलि च' इति दीर्घः। षत्वम्। गीर्षीष्ट। इट्पक्षे तु, गिरिषीष्ट। लुङि अगारिष्ट। अगारिषाताम्–अगीर्षाताम्–अगरिषाताम्। इति सिद्धवत्कृत्य आह। **लुङि ध्वमि चतुरधिकं शतमिति** ॥ रूपाणीति शेषः। तदेवोपपादयति। **तथाहीति** ॥ **अगारिध्वमिति** ॥ गृ स् ध्वम् इति स्थिते चिण्वदिटि वृद्धौ रपरत्वे 'धि च' इति सलोपे रूपमिति भावः। **द्वितीये त्विटीति** ॥ चिण्वदिडभावपक्षे वलाद्विलक्षणे सिचः इटि ऋकारस्य गुणे रपरत्वे 'धि च' इति सलोपे 'वृतो वा' इति दीर्घविकल्पे अगरिध्वम्, अगरीध्वम्, इति रूपद्वयमित्यर्थः। **एषामिति** ॥ एषां त्रयाणां रूपाणां मध्ये एकैकस्मिन् रेफस्य 'अचि विभाषा' इति लत्वम्। 'विभाषेटः' इति वा धस्य ढत्वम्। तथा धस्य तदादेशढस्य वस्य मस्य च द्वित्वत्रयमित्येवं पञ्च वैकल्पिकानीत्यर्थः। तत्र धढयोर्मस्य च 'अनचि च' इति द्वित्वविकल्पः। वकारस्य तु मय इति पञ्चमीमाश्रित्य 'यणो मयः' इति द्वित्वविकल्प इति विवेकः। यद्यपि धढयोर्वस्य मस्य च द्वित्वचतुष्टयमिति वक्तुमुचितम्। तथापि ढस्य धस्थानिकतया धढयोरेकत्वमभिप्रेत्य द्वित्वत्रयमित्युक्तिः। **इत्थमिति** ॥ एवञ्च त्रयाणामेषां लत्वविकल्पे रेफवन्ति त्रीणि, लकारवन्ति त्रीणि, इति षट्। एषु षट्सु धस्य द्वित्वविकल्पे एकधानि षट्, द्विधानि च षडिति द्वादश। तथा रेफवत्सु त्रिषु लकारवत्सु च त्रिषु ढस्य द्वित्वविकल्पे एकढानि षट्, द्विढानि च षडिति द्वादश। उभयेषामपि द्वादशानां मेळने चतुर्विंशतिः। एषु वस्य द्वित्वविकल्पे एकवानि चतुर्विंशतिः, द्विवानि चतुर्विंशतिरित्यष्टाचत्वारिंशत्। एषु मस्य द्वित्वविकल्पे एकमान्यष्टाचत्वारिंशत्, द्विमान्यष्टाचत्वारिंशदिति षण्णवतिरित्यर्थः। **लिङ्सिचोरितीति** ॥ चिण्वदिडभावपक्षे

'उश्च' (सू २३६८) इति कित्त्वम्। इत्त्वं रपरत्वं 'हलि च' (सू ३५४) इति दीर्घः । 'इणः षीध्वम्—' (सू २२४७) इति नित्यं ढत्वम् । अगीर्ढ्वम् । ढवमानां द्वित्वविकल्पेऽष्टौ । उक्तषण्णवत्या सह सङ्कलने उक्ता संख्येति ।

इट् दीर्घश्चिण्वदिट् लत्वढत्वे द्वित्वत्रिकं तथा ।
इत्यष्टानां विकल्पेन चतुर्भिरधिकं शतम् ॥

हेतुमण्ण्यन्तात्कर्मणि लः । यक् णिलोपः । शम्यते मोहो मुकुन्देन ।

२७६२ । चिण्णमुलोर्दीर्घोऽन्यतरस्याम् । (६-४-९३)

चिण्परे णमुल्परे च णौ मितामुपधायाः दीर्घो वा स्यात् । प्रकृतो 'मितां ह्रस्वः' (सू २५६८) एव तु न विकल्पितः । ण्यन्ताण्णौ ह्रस्वविकल्पा-

---

वलादिलक्षणस्य इटो 'लिङ्सिचोः' इति विकल्पितत्वात्तदभावपक्षे 'उश्च' इति सिचः कित्त्वाद्गुणाभावे ऋत इत्त्वे रपरत्वे 'हलि च' इति दीर्घे रेफादिणः परत्वात् 'इणष्षीध्वम्' इति नित्यं ढत्वे अगीर्ढ्वमिति रूपमित्यर्थः। **ढवमानामिति** ॥ ढस्य 'अचो रहाभ्याम्' इति द्वित्वविकल्पे एकढं द्विढमिति द्वे रूपे । तयोः वस्य 'यणो मयः' इति द्वित्वविकल्पे एकवे द्वे द्विवे द्वे इति चत्वारि । एषु चतुर्षु मस्य 'अनचि च' इति द्वित्वविकल्पे एकमानि चत्वारि द्विमानि चत्वारीत्यष्टौ रूपाणीत्यर्थः। **षण्णवत्येति**॥ उक्तषण्णवत्या अष्टानां मेलने सति या सङ्ख्या सिध्यति सा चतुरुत्तरशतसङ्ख्या उक्तेति ज्ञेयमित्यर्थः। उक्तप्रक्रियां श्लोकेन संगृह्णाति। **इट्दीर्घ इत्यादिना** ॥ वलादिलक्षण इट् 'वृतो वा' इति दीर्घः। अजन्तलक्षणः चिण्वदिट्, अचि विभाषा इति लत्वं, विभाषेट इति वा ढत्वं, धढवमानां द्वित्वत्रिकमित्यष्टानां विकल्पात् चतुरधिकं शतं रूपाणीत्यर्थः। शम्यते मोहो मुकुन्देनेत्यत्र प्रक्रियां दर्शयति । **हेतुमण्ण्यन्तादिति** ॥ शमधातोर्हेतुमण्णौ उपधावृद्धौ अमन्तत्वेन मित्त्वाद्ह्रस्वे शमीत्यस्मात्कर्मणि लः, नतु भावे । हेतुमण्ण्यन्तस्य सकर्मकत्वनियमादिति भावः । **यगिति** ॥ तङि कृते 'सार्वधातुके यक्' इत्यनेनेति शेषः। **णिलोपः इति** ॥ 'णेरनिटि' इत्यनेनेति शेषः। लुटि तासि शमि इ ता इति स्थिते अमन्तत्वेन मित्त्वान्नित्यमुपधाह्रस्वे प्राप्ते । **चिण्णमुलोः** ॥ 'दोषो णौ' इत्यतो णाविति 'ऊदुपधाया गोहः' इत्यस्मादुपधाया इति 'मितां ह्रस्वः' इत्यतो मितामिति चानुवर्तते । तदाह । **चिण्परे इत्यादिना** ॥ नान्विह दीर्घग्रहणं व्यर्थम् । 'चिण्णमुलोर्दीर्घः' इत्यतः अन्यतरस्यामित्येतावतैव 'मितां ह्रस्वः' इति पूर्वसूत्रादनुवृत्तस्य ह्रस्वस्य विकल्पे एव दीर्घविकल्पस्य सिद्धेरित्यत आह । **प्रकृतो मितां ह्रस्व एव तु न विकल्पितः इति** ॥ कुत इत्यत आह । **ण्यन्ताण्णाविति** ॥ शमधातोर्ण्यन्ताण्णौ पूर्वणेर्लोपे लुटि तासि ण्यन्तस्याजन्तत्वाच्चिण्वदिटि तस्याभीयत्वेनासिद्धतया अनिटीति निषेधाभावाण्णिलोपे दीर्घविकल्पे सति शमिता शामितेति रूपद्वयमिष्यते। ह्रस्वविकल्पस्य विधौ तु ह्रस्वविकल्पो न स्यात्। प्रथमणिलोपस्य 'अचः परस्मिन्' इति स्थानिवत्त्वेन व्यवहिततया चिण्परकणिपरकत्वाभावादित्यर्थः।

सिद्धेः। दीर्घविधौ हि णिचो लोपो न स्थानिवदिति दीर्घः सिद्ध्यति। ह्रस्वविधौ तु स्थानिवत्त्वं दुर्वारम्। भाष्ये तु 'पूर्वत्रासिद्धे न स्थानिवत्' इत्यवष्टभ्य द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः। णाविति जातिपरो निर्देशः। दीर्घग्रहणं चेदं मास्त्विति तदाशयः। शामिता—शमिता—शमयिता। शामिष्यते—शमिष्यते—शमयिष्यते। यङन्ताण्णिच्। शंशम्यते। शंशामिता—शंशमिता—शंशमयिता। यङ्लुगन्ताण्णिच्यप्येवम्। भाष्यमते तु यङन्ताच्चिण्वदिटि दीर्घो नास्तीति विशेषः। ण्यन्तत्वाभावे। शम्यते मुनिना।

दीर्घविकल्पविधौ तु न दोष इत्याह। **दीर्घविधाविति**॥ दीर्घविकल्पविधौ हि प्रथमस्य णिचो लोपो न स्थानिवत्। दीर्घविधौ स्थानिवत्त्वनिषेधात्। अतोऽत्र दीर्घविकल्पस्सिद्ध्यति। ह्रस्वविधौ तु प्रथमणिलोपस्य स्थानिवत्त्वं दुर्वारम्। तत्र स्थानिवत्त्वनिषेधाभावादित्यर्थः। **भाष्ये त्विति**॥ न पदान्तसूत्रस्थभाष्ये तु 'पूर्वत्रासिद्धे न स्थानिवत्' इत्येव सिद्धत्वात् न पदान्तसूत्रे द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः। सुद्धयुपास्य इत्यत्र 'अनचि च' इति द्विर्वचनस्य शिण्डीत्यत्र 'नश्च' इत्यनुस्वारस्य 'अनुस्वारस्य ययि' इति परसवर्णस्य च प्रतिदीव्न इत्यत्र 'हलि च' इति दीर्घस्य, सग्धिरित्यत्र 'झलाञ्जश् झशि' इति जश्त्वस्य, जक्षतुरित्यत्र 'खरि च' इति चर्त्वस्य, पूर्वत्रासिद्धीयत्वादित्यर्थः। ननु ण्यन्ताण्णौ 'चिण्णमुलोः' इति दीर्घे कर्तव्ये प्रथमणिलोपस्य स्थानिवत्त्वं दुर्वारम्। 'चिण्णमुलोः' इति दीर्घस्य पूर्वत्रासिद्धीयत्वाभावात्। ततश्च प्रथमणिचा व्यवहितत्वात् दीर्घानापत्तिः। एवञ्च तत्र दीर्घे कर्तव्ये स्थानिवत्त्वनिवारणाय दीर्घग्रहणस्यावश्यकत्वात्कथं दीर्घग्रहणप्रत्याख्यानमित्यत आह। **णावितीति**॥ 'चिण्णमुलोः' इति दीर्घविधौ चिण्परे णमुल्परे च णौ इत्यत्र णाविति णित्त्वजातिप्रधानो निर्देशः। चिण्णमुल्परकणित्त्वजातौ परतः इति लभ्यते। णित्त्वजातिश्च णिद्वयेऽस्तीति प्रथमणेः स्थानिवत्त्वेऽपि दीर्घो निर्बाध इति, न पदान्तसूत्रे दीर्घग्रहणप्रत्याख्यानभाष्यस्याशय इत्यर्थः। **शामिता-शमितेति**॥ शमधातोर्ण्यन्ताल्लुटि तासि चिण्वदिटि दीर्घविकल्पः। **शमयितेति**॥ चिण्वत्त्वाभावे वलादिलक्षणे इटि रूपम्। **यङन्तादिति**॥ शमधातोर्यङि शंशम्यते इत्यस्मात् हेतुमण्णौ 'यस्य हलः' इति यकारलोपे अतो लोपे शंशमि इत्यस्मात् कर्मलकारे णिलोपे शंशम्यते इति रूपमित्यर्थः। **शंशामिता-शंशमितेति**॥ 'चिण्णमुलोः' इति दीर्घविकल्पः। **शंशमयितेति**॥ चिण्वत्त्वाभावे वलादिलक्षणे इटि रूपम्। **भाष्यमते त्विति**॥ न पदान्तसूत्रे दीर्घग्रहणप्रत्याख्यानपरभाष्यमते त्वित्यर्थः। **यङन्तादिति**॥ ण्यन्तादिति शेषः। यङन्ताण्णिचि यलोपे अह्लोपे च कृते शंशमित्यस्माल्लुटि तासि चिण्वदिटि कृते तस्यासिद्धत्वाण्णिलोपे शंशमितेत्यत्र अह्लोपस्य स्थानिवत्त्वेन णिच्परकत्वाभावात् 'चिण्णमुलोः' इति दीर्घो नास्ति। भाष्यमते न पदान्तसूत्रे दीर्घग्रहणाभावे स्थानिवत्त्वनिषेधाभावादि-

२७६३ । नोदात्तोपदेशस्य मान्तस्यानाचमेः । (७-३-३४)

उपधाया वृद्धिर्न स्याञ्चिणि ञिति णिति कृति च । अशमि । अदमि । 'उदात्तोपदेशस्य' इति किम् । अगामि । 'मान्तस्य' किम् । अवादि । 'अनाचमेः' किम् । आचामि । 'अनाचमिकमिवमीनामिति वक्तव्यम्' (वा ४५१८) । चिणि 'आयादयः—' (सू २३०५) इति णिङभावे । अकामि । णिङ्णिचोरप्येवम् । अवामि । 'वध हिंसायाम्' । हलन्तः । 'जनिवध्योश्च—' (सू २५१२) इति न वृद्धिः । अवधि । जाग्रोऽविचिण्णल्ङित्सु' (सू २४८०) इत्युक्तेर्न गुणः । अजागारि ।

२७६४ । भञ्जेश्च चिणि । (६-४-३३)

नलोपो वा स्यात् । अभाजि–अभञ्जि ।

२७६५ । विभाषा चिण्णमुलोः । (७-१-६९)

त्यर्थः । **शम्यते मुनिनेति** ॥ अकर्मकत्वाद्भावे ल इति भावः । **नोदात्तोपदेशस्य** ॥ 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति 'अत उपधायाः' इत्यतः उपधाया इति 'अचो ञ्णिति' इत्यतो ञ्णितीति 'आतो युक्' इत्यतश्चिण्कृतोः इति चानुवर्तते । तत्र ञ्णितीति कृत एव विशेषणम्, नतु चिणः। अव्यभिचारात् । तदाह । **उपधाया इत्यादिना** ॥ अनुदात्तोपदेशास्सङ्गृहीताः । ततोऽन्यस्सर्वोऽपि धातुरुदात्तोपदेशः। आङ्पूर्वश्चमिराचमिः तद्वर्जस्येत्यर्थः। **अशमि। अदमीति** ॥ शमधातोर्दमधातोश्च लुङि णिचि 'अत उपधायाः' इति वृद्धिर्न । **अगामीति** ॥ गमेरनुदात्तोपदेशत्वादिति भावः । **अवादीति** ॥ वदधातुर्नमान्त इति भावः । **आचामीति** ॥ अनाचमेरित्युक्तेरिह नोपधावृद्धिनिषेधः । **अनाचमिकमिवमीनामिति** ॥ आचमिकमिवमिवर्जानाम्' इत्यर्थः । एवञ्च कमिवम्योरपि न निषेध इति फलितम् । ननु कमेर्णिङन्तत्वात् केवलस्य तस्य चिणादौ प्रयोग एव नास्तीत्यत आह । **चिण्यायादयः इति** ॥ **णिङ्णिचोरप्येवमिति** ॥ णिङन्ताण्णिजन्ताद्वा कमेश्चिणि णिलोपे सति पूर्ववत् रूपं शिष्यते इत्यर्थः । ननु 'जनिवध्योश्च' इति वधेरुपधावृद्धिनिषेधो व्यर्थः । वधादेशस्यादन्ततया अल्लोपस्य स्थानिवत्त्वादेव अवधीत्यादौ उपधावृद्ध्यभावसिद्धेरित्याशङ्क्य वधिर्धात्वन्तरं हलन्तमेव 'जनिवध्योश्च' इत्यत्र गृह्यत इत्यभिप्रेत्य आह । **वध हिंसायां हलन्तः इति** ॥ **भञ्जेश्च चिणि** ॥ 'श्नान्लोपः' इत्यतो नेति लुप्तषष्ठीकं लोप इति चानुवर्तते । 'जान्तनशां विभाषा' इत्यतो विभाषेति मत्वा शेषं पूरयति । **नलोपो वा स्यादिति। अभाजीति** ॥ नलोपपक्षे उपधावृद्धिः । **विभाषा चिण्णमुलोः** ॥ 'लभेश्च' इत्यतो लभेरिति 'इदितो नुम्' इत्यतो नुमिति चानुवर्तते इति मत्वा

लभेर्नुमागमो वा स्यात्। अलम्भि—अलाभि। व्यवस्थितविकल्पत्वा-त्प्रादेर्नित्यं नुम्। प्रालम्भि। द्विकर्मकाणां तु

गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।
बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया॥
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः।

(१०९०—१०९५ वार्तिकार्थः) गौर्दुह्यते पयः। अजा ग्रामं नीयते।

शेषं पूरयति। **लभेर्नुमागमो वेति** ॥ ननु प्रालम्भि उपालम्भीत्यादौ उपसर्गपूर्वस्यापि लभेर्नुम्विकल्पः स्यादित्यत आह। **व्यवस्थितेति** ॥ प्रादेरुपसर्गात्परस्य लभेर्नित्यं नुम्। अनुपसर्गात्परस्य तु लभेर्विभाषा नुमिति व्यवस्थितविकल्पाश्रयणादुपसर्गपूर्वस्य लभेर्नित्यं नु-मित्यर्थः। 'चिण्णमुलोरनुपसर्गस्य' इति वार्तिकाद्भाष्ये 'उपसर्गात् खल्घञोः' इत्यतः उपसर्गादिति 'न सुदुर्भ्याम्' इत्यतो नेति चानुवर्त्य उपसर्गात्परस्य लभेः 'विभाषा चिण्णमुलोः' इति नेति व्याख्या-तत्वाच्च। एतेन प्रपूर्वस्य लभेर्नित्यं नुमिति व्याख्यानं परास्तम्। 'लः कर्मणि' इति कर्मणि लकारा विहिताः। तथा 'तयोरेव कृत्यक्तखलर्थाः' इति कर्मणि कृत्यादिप्रत्यया वक्ष्यन्ते। ते तावत् द्विकर्म-कधातुषु कतरस्मिन् कर्मणि भवन्तीत्यत्र व्यवस्थामाह। **द्विकर्मकाणां त्विति** ॥ कर्मप्रत्य-यव्यवस्था वक्ष्यत इति शेषः। तां व्यवस्थां सार्धश्लोकेन दर्शयति। **गौणे कर्मणीत्यादिना** ॥ 'दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्' गौणे कर्मणि लादयो मता इत्यन्वयः। 'अकथितञ्च' इति सूत्रेण यस्य कर्मसंज्ञा तत् गौणकर्मेति बोध्यम्। **प्रधाने इति** ॥ नीहृकृष्वहां प्रधाने कर्मणि लादयो मता इत्यन्वयः। 'अकथितञ्च' इति सूत्रादन्येन यस्य कर्म-संज्ञा तत्प्रधानकर्मेति बोध्यम्। अथ 'गतिबुद्धि' इति सूत्रेण ये द्विकर्मकाः तेषु व्यवस्थामाह। **बुद्धीति** ॥ बुद्ध्यर्थकस्य भक्षार्थकस्य शब्दकर्मकाणाञ्च प्रधाने वा गौणे वा कर्मणि स्वेच्छया लादयो मता इत्यन्वयः। इह 'गतिबुद्धि' इत्यनेन यस्य कर्मसंज्ञा तत् गौणं कर्म। तदितरत्तु प्रधानकर्म। **प्रयोज्येति** ॥ अन्येषां गत्यर्थानां अकर्मकाणां 'हृक्रोः' इति सूत्रोपात्तहृकृञोश्च प्रयोज्यकर्मणि लादयो मता इत्यन्वयः। अयं सार्धश्लोकः 'अकथितञ्च' इति सूत्रस्थवार्तिक-भाष्यसङ्ग्रह इति बोध्यम्। **गौर्दुह्यते पयः इति** ॥ गोपेनेति शेषः। अत्र गोरप्रधानकर्म-त्वात्तस्मिन् कर्मणि लकारः। तिङा अभिहितत्वात् गोः प्रथमा। प्रधानकर्मत्वात्पय इति द्वितीया-न्तम्। तस्य तिङा अनभिहितत्वात्। बलिर्याच्यते वसुधाम्। अविनीतो विनयं याच्यते। तण्डुलाः ओदनं पच्यन्ते। गर्गाः शतं दण्ड्यन्ते। व्रजो रुध्यते गाम्। माणवकः पन्थानं पृच्छयते। वृक्षोऽपचीयते फलानि। माणवको धर्मं उच्यते। शिष्यते वा। शतं जीयते देव-दत्तः। सुधां क्षीरोदधिर्मथ्यते। देवदत्तश्शतं मुष्यते। एतेषु गौणकर्मणि लकारः। अथ प्रधाने नीहृकृष्वहामित्यत्रोदाहरति। **अजा ग्रामं नीयते, ह्रियते, कृष्यते, उह्यते इति** ॥ प्रति-क्रियमजा ग्राममित्यन्वेति। उह्यत इत्यत्र वहतेर्यजादित्वात्सम्प्रसारणम्। अत्र अजायाम्प्रधान-

ह्रियते । कृष्यते । उह्यते । बोध्यते माणवकं धर्मः, माणवको धर्ममिति वा । भोज्यते माणवकमोदनः, माणवक ओदनं वा । देवदत्तो ग्रामं गम्यते । 'अकर्मकाणां कालादिकर्मकाणां कर्मणि भावे च लकार इष्यते' । मासो मासे वा आस्यते देवदत्तेन । णिजन्तात्तु प्रयोज्ये प्रत्ययः । मासमास्यते माणवकः ।

इति भावकर्मतिङ्प्रकरणम् ।

कर्मणि लकारः । ग्रामस्यानभिहितत्वात् द्वितीया । बुध्यर्थस्योदाहरति । **बोद्धते माणवकं धर्मः, माणवको धर्ममिति वेति** ॥ गुरुणेति शेषः । अत्र माणवके गौणकर्मणि धर्मे वा प्रधानकर्मणि प्यन्तात् लकारः। भक्षार्थस्य तु अश्यन्ते देवाः अमृतं हरिणा, अश्यतेऽमृतं देवानिति वा उदाहार्यम्। शब्दकर्मकस्य तु वेदोऽध्याप्यते विधिं हरिणा, वेदमध्याप्यते विधिरिति वेत्युदाहार्यम् । यदुक्तङ्गत्यर्थानां अकर्मकाणां हृकृञोश्चेत्येतेषां प्रयोज्यकर्मणि लकार इति । तत्र गत्यर्थस्योदाहरति । **देवदत्तो ग्रामं गम्यते इति** ॥ यज्ञदत्तेनेति शेषः । अत्र प्रयोज्यकर्मणि देवदत्ते गमेर्ण्यन्तात् लः । ननु अकर्मकाणां प्यन्तानां प्रयोज्यकर्मण्येव लादय इति व्यवस्था व्यर्था । तत्र प्रयोज्यं विना अन्यस्य कर्मणोऽभावादित्याशङ्क्य 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्' इति वार्तिकेन अकर्मकधातूनामपि देशकालादिकर्मत्वेन प्यन्तानां तेषां द्विकर्मकतया प्रयोज्यकर्मण्येव तत्र लादय इति व्यवस्था प्रयोजनवतीत्यभिप्रेत्य मासमास्यते माणवक इति प्यन्ते प्रयोज्यकर्मणि माणवके एव लः, ननु मासे कर्मणि इत्युदाहरिष्यते । एवं तर्हि अण्यन्तेष्वकर्मकेषु मासमास्यते देवदत्तेनेति भावे लकारो न स्यात् । सकर्मकेभ्यः कर्मणि कर्तरि च ल इति नियमात् मास आस्यते देवदत्तेनेत्येव कर्मणि मासे लकारः स्यादित्याशङ्क्य आह । **अकर्मकाणामित्यादि** ॥ ये अकर्मकाः 'कर्तुरीप्सिततमङ्कर्म, तथायुक्तञ्चानीप्सितम्' इति सूत्रसिद्धकर्मरहिताः 'आस उपवेशने, वृतु वर्तने' इत्यादयः, तेषां 'अकर्मकधातुभिर्योगे' इति वार्तिकसिद्धाकर्मकाणाङ्कर्मणि भावे च लकार इष्यते इत्यर्थः। नचेदं वार्तिकमिति भ्रमितव्यम् । भाष्ये अदर्शनात् । किन्तु न्यायमूलकमेव। अकर्मकधातुभिर्योगे देशकालादीनां कर्मसंज्ञाविकल्पस्य भाष्याद्यभिमतत्वात्। यथा चैतत्तथा कारकाधिकारे 'अकर्मकधातुभिर्योगे' इति वचनव्याख्यावसरे अवोचाम। तदाह। **मासो मासे वा आस्यते देवदत्तेनेति** ॥ अत्र मासस्य कर्मत्वपक्षे कर्मलकारः। मासस्याभिहितत्वात् प्रथमा । मासस्य कर्मत्वाभावपक्षे तु भावे लकारः । मास इति सप्तमी। मासमिति त्वपपाठः । अथ प्रकृतमनुसरति । **णिजन्तात्त्विति** ॥ आसधातोः प्रकृतिसिद्धकर्मरहितत्वेन अकर्मकाण्णौ मासस्य कर्मत्वपक्षेऽपि प्रयोज्यकर्मण्येव लकार इत्यर्थः । **मासमास्यते माणवकः इति** ॥ प्यन्तात्प्रयोज्यकर्मणि माणवके लः । मासस्यानभिहितत्वात् द्वितीया । हृकोस्तु हार्यते कार्यते वा भृत्यः कटं देवदत्तेन ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायां भावकर्मप्रक्रिया समाप्ता ।

। श्रीरस्तु ।

॥ अथ कर्मकर्तृतिङ्प्रकरणम् ॥

यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते । स्वव्यापारे स्वतन्त्रत्वात् । तेन पूर्वं करणत्वादिसत्त्वेऽपि सम्प्रति कर्तृत्वात्कर्तरि लकारः । साध्वसिः छिनत्ति । काष्ठानि पचन्ति । स्थाली पचति । कर्मणस्तु कर्तृत्वविवक्षायां प्राक्सकर्मका अपि प्राये-

---

अथ कर्मकर्तृप्रक्रियान्निरूपयिष्यन् कर्मणः कर्तृत्वं साधयितुमाह । **यदेति** ॥ फलव्यापारयोर्धातुरिति सिद्धान्तः । पचिर्हि विक्लित्त्यनुकूलव्यापारे वर्तते । तत्र विक्लित्तिः फलम् । तदाश्रयं ओदनं कर्म । तदनुकूलो व्यापारः अधिश्रयणादिः पुरुषप्रयत्नरूपो व्यापारः । तत्राधिश्रयणं चुल्या उपरि तण्डुलयुक्तस्थाल्याः / स्थापनं स्थित्यनुकूलव्यापारः । तत्र स्थितिः स्थालीतण्डुलनिष्ठा । तदनुकूलः पुरुषचेष्टाविशेषः । धातूपात्तव्यापाराश्रयः पुरुषः कर्ता । स्वतन्त्रत्वात् । स्वातन्त्र्यम्प्राधान्यमिति भाष्यम् । कर्मकरणादिकन्तु पुरुषप्रयत्नपरतन्त्रत्वान्न कर्तृत्वं लभते इति स्थितिः । तत्र यदा सौकर्यातिशयविवक्षया कर्तुः पुरुषस्य व्यापारः प्रयत्नः न विवक्ष्यते, किन्तु कर्मादिगत एव व्यापारः विक्लित्त्यादिफलानुकूलत्वेन विवक्ष्यते, तदा कर्मादिकारकाण्यपि कर्तृसंज्ञां लभन्ते इत्यर्थः । ननु कर्मादिगतव्यापारस्य पुरुषप्रयत्नाधीनत्वादस्वतन्त्रत्वात्कथङ्कर्मणः कर्तृत्वमित्यत आह । **स्वव्यापारे स्वतन्त्रत्वादिति** ॥ स्वातन्त्र्येण विवक्षितत्वादित्यर्थः । तदुक्तं 'कर्मवत्कर्मणा' इत्यत्र भाष्ये । 'कर्मकर्तरि कर्तृत्वं स्वातन्त्र्यत्वविवक्षितत्वात्' इति । अत्र कर्मग्रहणङ्करणादिकारकस्याप्युपलक्षणम् । **तेनेति** ॥ असिना छिनत्तीत्यादिप्रयोगदशायां असिकुठारादीनाङ्करणत्वादिसत्त्वेऽपि, असिः छिनत्ति इत्यादिप्रयोगदशायाङ्कर्तृत्वेन विवक्षितत्वात् कर्तरि लकार इत्यर्थः । **साध्वसिः छिनत्तीति** ॥ अत्र करणस्य कर्तृत्वविवक्षा। साधु इति क्रियाविशेषणम् । सौकर्यातिशयद्योतनाय अतितैक्ष्ण्यात् पुरुषप्रयत्नविशेषमाघातातिशयं विना स्वयमेव असिः छिनत्तीत्यर्थः । **काष्ठानि पचन्तीति** ॥ अत्रापि करणानाङ्कर्तृत्वविवक्षा । **स्थाली पचतीति** ॥ अत्राधिकरणस्य कर्तृत्वविवक्षा । काष्ठानामतिशुष्कत्वात् धमनफूत्कारानपेक्षया स्थाल्या अतिलघुत्वादविलम्ब्य श्रपणतया सौकर्यम्बोद्ध्यम् । **कर्मणास्त्विति** ॥ ये छिदिभिदिप्रभृतयः एककर्मकाः तत्र कर्मणः कर्तृत्वविवक्षायां वृक्षः छिनत्तीत्यादौ सकर्मकत्वेऽपि सम्प्रति कर्मणः कर्तृत्वविवक्षायामकर्मका एते इत्यर्थः । ये तु द्विकर्मकाः तत्र एकस्य कर्मणः कर्तृत्वविवक्षायामपि इतरेण कर्मणा सकर्मकत्वसत्वात्प्रायेणेत्युक्तिः ।

णाकर्मकाः। तेभ्यो भावे कर्तरि च लकाराः। पच्यते ओदनेन। भिद्यते काष्ठेन। कर्तरि तु।

२७६६। कर्मवत्कर्मणा तुल्यक्रियः। (३-१-८७)

कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत्स्यात्। कार्यातिदेशोऽयम्। तेन यगात्मनेपदचिण्चिण्वदिटः स्युः। कर्तुरभिहितत्वात्प्रथमा। पच्यते ओदनः। भिद्यते काष्ठम्। अपाचि। अभेदि। ननु भावे लकारे कर्तुर्द्वितीया स्यादस्मादतिदेशादिति चेन्न। लकारवाच्य एव हि कर्ता कर्मवत्। 'लिङ्याशिष्यङ्'

ततश्च तेषु द्विकर्मकेषु कर्मणि कर्तरि च लकारः। तत्र कर्मणि लकारे यथा सुधां क्षीरसागरो मथ्यते। कर्तरि यथा सुधां क्षीरसागरो मथ्नाति। अथ यदुक्तं एककर्मकेषु कर्मणः कर्तृत्वविवक्षायामकर्मकत्वमिति तस्य प्रयोजनमाह। **तेभ्यो भावे कर्तरि च लकाराः इति॥** नतु कर्मणि। असम्भवात्। अत एव अकर्मकेभ्यो भावे कर्तरि ल इत्युक्तमिति भावः। तत्र एककर्मकेभ्यः कर्मणः कर्तृत्वविवक्षायां भावे लकारं उदाहरति। **पच्यते ओदनेनेति॥** ओदनकर्तृकः पाक इत्यर्थः। एवं भिद्यते काष्ठेनेत्यपि। यद्यपि पचेर्द्विकर्मकत्वम् / तथापि तण्डुलानामविवक्षायां एककर्मकत्वं पचेराश्रितम्। **कर्तरि त्विति॥** एककर्मकेषु कर्मणः कर्तृत्वविवक्षायाङ्कर्तरि लकारे विशेषो वक्ष्यते इत्यर्थः। **कर्मवत्कर्मणा॥** 'कर्तरि शप्' इत्यतः कर्तरीत्यनुवृत्तं प्रथमया विपरिणम्यते। तुल्या क्रिया यस्य सः कर्ता तुल्यक्रियः। कर्मणेत्यनेन कर्मकारकस्था क्रिया विवक्षिता। क्रियायाः कर्मकारकेण तुल्यत्वस्य तत्स्थक्रियामादायैव उपपाद्यत्वात्। तदाह। **कर्मस्थयेत्यादिना॥** कर्मणः कर्तृत्वेन विवक्षायां कर्ता कर्मवदिति यावत्। वत्करणाभावे तु कर्मसंज्ञक इत्यर्थशङ्का स्यात्। तथा सति सकर्मकत्वात् पच्यते ओदनेन भिद्यते काष्ठेनेति भावे लो न स्यात्। **कार्यातिदेशोऽयमिति॥** यद्यपि शास्त्रातिदेशे कार्यातिदेशे वा न फलभेदः। तथापि शास्त्रातिदेशस्यापि कार्यातिदेशार्थत्वान्मुख्यत्वात् कार्यातिदेश एवाश्रयणीय इत्यर्थः। **तेनेति॥** स्युरित्यत्रान्वेति। कर्मवत्त्ववचनेन कर्मकार्याणि 'सार्वधातुके यक्' इत्यतः यक्। 'भावकर्मणोः' इत्यात्मनेपदम्। 'स्यसिच्सीयुट्तासिषु' इति चिण्वत्, तत्सन्नियोगशिष्टः इट् च स्युरित्यर्थः। कर्मणः कर्तृत्वविवक्षायाङ्कर्तरि विहितानि शास्त्राण्येव न स्युरिति भावः। कर्तुरिति कर्मणः कर्तृत्वविवक्षायाङ्कर्तरि लकारे सति तदादेशतिङा कर्तुरभिहितत्वादित्यर्थः। **पच्यते ओदनः इति॥** फूत्कारादिपुरुषश्रमातिशयविशेषं विना विक्लित्त्याश्रयो भवतीत्यर्थः। **भिद्यते काष्ठमिति॥** कुठारादिदृढाघातम्पुरुषश्रमं विना द्विधा भवतीत्यर्थः। अत्र कर्मणः कर्तृत्वेऽपि कर्मत्वातिदेशाद्यक्। **अपाचि। अभेदीति॥** अत्र कर्मवत्त्वाच्चिण्। ननु कर्मणः कर्तृत्वविवक्षायां भावलकारे पच्यते ओदनेन, भिद्यते काष्ठेनेत्यत्र कर्मकर्तुस्तिङाऽनभिहितत्वात् द्वितीया स्यात्। कर्मवत्त्वातिदेशादित्याशङ्कते। **नन्विति॥** परिहरति। **नेति॥** नायमाक्षेप उन्मिषतीत्यर्थः। कुत इत्यत आह। **लकारवाच्य एव हि कर्ता कर्मवदिति॥** तच्च कुत इत्यत आह।

(सू ३४३४) इति द्विलकारकात् 'लः' इत्यनुवृत्तेः भावे प्रत्यये च कर्तुर्लकारेणानुपस्थितेः। अत एव कृत्यक्तखलर्थाः कर्मकर्तरि न भवन्ति। किं तु भाव एव। भेत्तव्यं कुसूलेन। ननु पचिभिद्योः कर्मस्था क्रिया विक्लित्तिर्द्विधाभवनं च। सैवेदानीं कर्तृस्था नतु तत्तुल्या। सत्यम्। कर्मत्वकर्तृत्वावस्थाभेदोपाधिकं तत्समानाधिकरणक्रियाया भेदमाश्रित्य व्यवहारः। 'कर्मणा' इति किम्। करणाधिकरणाभ्यां तुल्यक्रिये पूर्वोक्ते साध्वसिरित्यादौ मा भूत्। किंच कर्तृस्थक्रियेभ्यो मा भूत्। गच्छति ग्रामः। आरोहति हस्ती। 'अधिगच्छति

लिङ्याशिषीति ॥ 'व्यत्ययो बहुलम्, लिङ्याशिष्यङ्' इति संहितया पाठे लकारात् पूर्वं लकारान्तरं 'हलो यमाम्' इति लुप्तं प्रश्लिष्यते। ततश्च ल् ल् इति द्विलकारात् सूत्रात् ल् इति षष्ठ्यन्तं 'कर्मवत्कर्मणा' इत्यत्रानुवर्तते। तथाच लः कर्ता कर्मवदिति लभ्यते। वाच्यत्वं षष्ठ्यर्थः। तथाच लकारवाच्यः कर्ता कर्मवदिति पर्यवस्यतीत्यर्थः। अस्त्वेवम्। प्रकृते किमायातमित्यत आह। **भावे प्रत्यये च कर्तुर्लकारेणानुपस्थितेरिति** ॥ तत्र भावस्यैव तद्वाच्यत्वादिति भावः। **अत एवेति** ॥ लकारवाच्यस्यैव कर्मकर्तुः कर्मवत्त्वविधानादेव कृत्यक्तखलर्थाः प्रत्ययाः कर्मणि विहिताः कर्मकर्तरि न भवन्ति। तस्य लकारवाच्यत्वाभावेन कर्मवत्त्वस्य तत्राप्रवृत्तेरित्यर्थः। एतच्च भाष्ये स्पष्टम्। ननु 'सिनोतेर्ग्रासकर्मकर्तृकस्य' इति निष्ठानत्ववार्तिके सिनो ग्रासः स्वयमेवेति भाष्ये कथमुदाहृतम्। क्तप्रत्ययस्य कर्मकर्तर्यभावादिति चेत् उच्यते। अत एव भाष्यात् 'निष्ठा' इति सूत्रविहितकर्मार्थकक्तप्रत्ययस्यैव कर्मकर्तर्यभाव इति विज्ञायते। सिनो ग्रासः स्वयमेवेत्यत्र तु गत्यर्थाकर्मकेत्यादिना कर्तरि विहितः क्तप्रत्ययः कर्मकर्तरि भवत्येवेति शब्देन्दुशेखरे विस्तरः। **भेत्तव्यं कुसूलेनेति** ॥ पुरुषप्रयत्नमनपेक्ष्य कुसूलकर्तृका भिदिक्रियेत्यर्थः। शङ्कते। **नन्विति** ॥ **इदानीमिति** ॥ कर्मणः कर्तृत्वविवक्षादशायामित्यर्थः। **ननु तत्तुल्येति** ॥ तुल्यत्वस्य भेदघटितत्वादिति भावः। अर्धाङ्गीकारेण परिहरति। **सत्यमिति** ॥ विक्लित्तिर्द्विधाभवनञ्च कर्मस्थमेव सम्प्रति कर्तृस्थमिति युक्तम्। अथापि तयोस्तुल्यत्वाभावस्तु नेत्यर्थः। **कर्मत्वेति** ॥ कर्मत्वकर्तृत्वे ये अवस्थे धर्मविशेषौ तयोर्भेदः स एव उपाधिः निमित्तं यस्य तथाविधं तत्समानाधिकरणं कर्मत्वकर्तृत्वसमानाधिकरणं क्रियाभेदं आश्रित्य तुल्यव्यवहार इत्यर्थः। वास्तवभेदाभावेऽपि औपाधिकभेदात्कर्मस्थक्रियातुल्यक्रियत्वङ्कर्मकर्तुरिति भावः। **करणाधिकरणाभ्यामिति** ॥ असिना छिनत्ति स्थाल्यां पचतीत्यत्र करणाधिकरणयोर्यो व्यापारः स एव असिश्छिनत्ति स्थाली पचतीत्यत्र कर्तृस्थ इति तत्रापि कर्मवत्त्वं स्यात्। तन्निवृत्त्यर्थङ्कर्मणेति पदमित्यर्थः। ननु 'कर्मवत्कर्मणा' इत्यत्र 'धातोरेकाचः' इत्यतो धातोरित्यनुवर्तते। धातोर्वाच्यया क्रियया तुल्यक्रिय इत्यर्थः। करणत्वाद्यवस्थायां वस्तुतस्सन्नपि असिस्थाल्योर्व्यापारो न धातूपात्त इति नोक्तदोष इत्यस्वरसादाह। **किञ्चेति** ॥ **गच्छति ग्रामः इति** ॥ मार्गस्य अविषमनिष्कण्टकतया प्रत्यासन्नतया च श्रमं विना प्राप्त्याश्रयो भवतीत्यर्थः। **आरोहति हस्तीति** ॥ अङ्कुशाघातादिहस्तिपक-

शास्त्रार्थः, स्मरति, श्रद्दधाति वा ।' यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते यथा पक्वेषु तण्डुलेषु, यथा वा छिन्नेषु काष्ठेषु, तत्र कर्मस्था क्रिया । नेतरत्र । न हि पक्वापक्वतण्डुलेष्विव गतागतग्रामेषु वैलक्षण्यमुपलभ्यते । करोतिरुत्पादनार्थः । उत्पत्तिश्च कर्मस्था । तेन करिष्यते घट इत्यादि । यत्नार्थत्वे तु नैतत्सिद्ध्येत् । ज्ञानेच्छादिवद्यत्नस्य कर्तृस्थत्वात् । एतेनानुव्यवस्यमानेऽर्थे इति व्याख्यातम् । कर्तृस्थत्वेन यगभावाच्छ्यनि कृते ओलोपे च रूपसिद्धेः ।

व्यापारं विना स्वयमेव न्यग्भवन् आरोहणाश्रयो भवतीत्यर्थः । '**अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति वेति ॥**' पूर्वार्धमिदम् । 'यत्कृपालेशतस्तस्मै नमोऽस्तु गुरवे सदा' इत्युत्तरार्धम् । गुरुकृपालेशादेव श्रमं विना स्वयमेव शास्त्रार्थः अधिगच्छति निश्चयविषयो भवति स्मृतिविषयो भवति श्रद्धाविषयो भवतीत्यर्थः । अत्र कर्मकर्तुः ग्रामादेः कर्तृस्थक्रियावत्त्वेन कर्मस्थक्रियावत्त्वाभावात् न कर्मवत्त्वम् । अतः न कर्मकार्यं यगादि । किन्तु कर्तृकार्यं शबाद्येवेति भावः । ननु कर्मकर्तुः ग्रामादेः प्राप्त्याद्याश्रयत्वेन कर्मस्थक्रियत्वमस्त्येवेत्यत आह । **यत्रेति ॥** यत्र क्रियाकृतः विशेषः वैलक्षण्यं दृश्यते प्रत्यक्षमुपलभ्यते तत्र कर्मणि विद्यमाना क्रिया कर्मस्थक्रियेत्युच्यते इत्यन्वयः । तदुदाहृत्य दर्शयति । **यथा पक्वेषु तण्डुलेष्विति ॥** तण्डुलावस्थापेक्षया विक्लित्तिकृतो विशेषो दृश्यते इति शेषः । अन्यत्रापि क्रियाकृतं वैलक्षण्यमुदाहृत्य दर्शयति । **यथा वा छिन्नेषु काष्ठेष्विति ॥** अछिन्नापेक्षया वैलक्षण्यं दृश्यते इति शेषः । गच्छति ग्राम इत्यादौ तु नैवमित्याह । **नहीति ॥ ग्रामेष्विति ॥** उपलक्षणमिदम् । पक्वापक्वतण्डुलेषु यथा क्रियाकृतं वैलक्षण्यमुपलभ्यते तथा गतागतग्रामे आरूढानारूढहस्तिनि अधिगतानधिगते स्तृतास्तृते श्रद्धिताश्रद्धिते च शास्त्रार्थे क्रियाकृतवैलक्षण्यन्न दृश्यते इत्यर्थः । ग्रामगमनादौ कर्तर्येव श्रमादिवैलक्षण्यदर्शनादिति भावः । ननु ज्ञानेच्छयोरिव यत्नस्यापि कर्तृस्थत्वात् तद्वाचिनः कृञोऽपि कर्ता न कर्मवत्स्यात् । ततश्च क्रियते घटः स्वयमेवेति यगादिः न सिद्ध्येदित्याशङ्क्य कृञो न यत्नार्थत्वमित्याह । **करोतिरुत्पादनार्थः इति ॥** उत्पत्त्यनुकूलव्यापारार्थक इत्यर्थः । एतच्च भूवादिसूत्रे भाष्ये स्पष्टम् । करोतेरुत्पादनार्थकत्वे तु कर्मस्थक्रियत्वन्तत्कर्तुरुपपादयति । **उत्पत्तिश्च कर्मस्थेति ॥** उत्पन्ने अनुत्पन्ने च वैलक्षण्यस्य प्रत्यक्षत्वादिति भावः । **तेनेति ॥** कृञः कर्तुः कर्मस्थक्रियत्वेनेत्यर्थः । तथाच क्रियते घटः स्वयमेवेत्यत्र यक् । तासि तु चिण्वदिट्पक्षे कारिता, तदभावे तु कर्ता इति सिद्धवत्कृत्य आह । **करिष्यते घट इत्यादीति ॥** चिण्वदिट्पक्षे कारिष्यते इति रूपम् । तदाभावपक्षे तु 'ऋद्धनोः स्ये' इति इट् । करिष्यते । सीयुटश्चिण्वदिटि कारिषीष्ट । तदभावे तु कृषीष्ट । लुङि अकारिष्ट–अकृत । **नैतदिति ॥** कर्मवत्वन्न सिद्ध्येदित्यर्थः । यतते इतिवत्सकर्मकत्वमेव न स्यादित्यपि बोध्यम् । **एतेनेति ॥** ज्ञानस्य कर्तृस्थत्वव्युत्पादनेनेत्यर्थः । **अनुव्यवस्यमानेऽर्थे इति ॥** अर्थे स्वयमेव निश्चयविषयतां सम्पद्यमाने इत्यर्थः । **व्याख्यातमिति ॥** समर्थितमित्यर्थः । कथं समर्थितमित्यत आह । **कर्तृस्थत्वेन यगभावादिति ॥** अनुव्यवसायः निश्चयः तत्र

ताच्छील्यादावयं चानश् न त्वात्मनेपदम् । 'सकर्मकाणां प्रतिषेधो वक्तव्यः' (वा १८७३) । अन्योन्यं स्पृशतः । अजा ग्रामं नयति । दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यम्' (वा १८७६) ।

२७६७ । न दुहस्नुनमां यक्चिणौ । (३-१-८९)

कर्मकर्ता अर्थः सः न कर्मस्थक्रियः । अर्थे अनुव्यवसायकृतवैलक्षण्याभावात् । किन्तु कर्तृस्थक्रिय एव । अनुव्यवसायकर्तरि देवदत्ते हर्षादिदर्शनात् । ततश्च कर्मवत्त्वाभावान्न यक् । यकि तु कित्त्वात् 'घुमास्थागापाजहातिसाम्' इति ईत्त्वे अनुव्यवसीयमान इति स्यादित्यर्थः । ननु यगभावे कथं यकारश्रवणमित्यत आह । **श्यनीति** ॥ 'षो अन्तकर्मणि' इति धातोरनुव्यवपूर्वादुपसर्गवशेन निश्चयवृत्तेर्लट आनादेशे कृते श्यनि 'ओतः श्यनि' इत्योकारलोपे अनुव्यवस्यमान इति रूपसिद्धेरित्यर्थः । ननु कर्मवत्त्वाभावे 'भावकर्मणोः' इत्यात्मनेपदाभावात् कथमिह लटश्शानच् । तस्यात्मनेपदत्वादित्यत आह । **ताच्छील्यादाविति** ॥ 'ताच्छील्यवयोवचनशक्तिषु चानश्' इत्यनेन चानाशित्यर्थः । तस्य च लादेशत्वाभावेन आत्मनेपदत्वाभावात् कर्मवत्त्वाभावेऽपि कर्मकर्तरि प्रवृत्तिर्निर्बाधा । तदाह । **न त्वात्मनेपदमिति** ॥ ननु अन्योन्यं स्पृशतः स्वयमेव यज्ञदत्तदेवदत्तावित्यत्रापि कर्मवत्त्वाद्यगादि स्यात् । तत्र हि स्पृशिस्संयोगानुकूलव्यापारार्थकः । उभावपि कर्तारौ कर्मभूतौ च । स्पर्शनक्रियाया एकत्वेऽपि आश्रयभेदात्तद्भेदमाश्रित्य यज्ञदत्तनिष्ठां स्पर्शनक्रियां प्रति देवदत्तस्य कर्मत्वम् । एवं देवदत्तनिष्ठामपि स्पर्शनक्रियां प्रति यज्ञदत्तस्य कर्मत्वम् । एवङ्कर्तृत्वमप्युभयोर्ज्ञेयम् । एवञ्च उभयोः कर्तृत्वकर्मत्वसत्त्वादेकस्मिन् कर्तरि कर्मणि वा या स्पृशिक्रिया सैवेतरस्मिन् कर्तरि कर्मणि वा वर्तते इति कर्मवत्त्वं स्यात् । आश्रयनिबन्धनं भेदमाश्रित्य तुल्यक्रियत्वोपपत्तेः । स्पृष्टास्पृष्टयोरन्योन्यसंयोगकृतहर्षादितदभावदर्शनाच्चेत्यत आह । **सकर्मकाणां प्रतिषेधः इति** ॥ एककर्मकाणां छिदिभिदिप्रभृतीनां कर्मणः कर्तृत्वविवक्षया अकर्मकाणां कर्तुः कर्मवत्त्वमुक्तम् । ये तु द्विकर्मकाः कर्मणः कर्तृत्वविवक्षायामपि सकर्मका धातवः तेषां धातूनां कर्मकर्तुः कर्मवत्त्वप्रतिषेधो वक्तव्य इत्यर्थः । **अन्योन्यं स्पृशतः इति** ॥ कर्मवत्त्वे तु यकि तद्धि च स्पृश्येते इति स्यादिति भावः । 'सकर्मकाणां प्रतिषेधः' इत्यस्य उदाहरणान्तरमाह । **अजा ग्रामं नयतीति** ॥ अजा ग्रामं स्वयमेव प्राप्नोतीत्यर्थः । अत्र नयनं प्रत्यजायाः कर्मणः कर्तृत्वविवक्षायामपि ग्राममादाय सकर्मकत्वान्न कर्मवत्त्वमिति भावः । वस्तुतस्तु गते अगते च ग्रामे वैलक्षण्याभावादेवात्र कर्मवत्त्वस्याप्राप्तिरिति नेदमस्य वार्तिकस्योदाहरणम् । अत एव भाष्ये अन्योन्यमाश्लिष्यतः, अन्योन्यं स्पृशतः, अन्योन्यं संगृह्णीतः, इत्येवोदाहृतमिति शब्देन्दुशेखरे स्पष्टम् । **दुहिपच्योरिति** ॥ कर्मवत्त्वमिति शेषः । अनयोर्द्विकर्मकत्वादेकस्य कर्मणः कर्तृत्वविवक्षायामपि अन्यकर्मणा सकर्मकत्वात्पूर्ववार्तिकेन कर्मवत्त्वनिषेधे प्राप्ते प्रतिप्रसवोऽयम् । **न दुह** ॥ दुह स्नु नम् एषान्द्वन्द्वः । **कर्मकर्तरीति** ॥ एतत्तु नानुवृत्तिलभ्यम् । पूर्वत्रानुपलम्भात् । किन्तु 'कर्मवत्कर्मणा तुल्यक्रियः' इति समभिव्या-

एषां कर्मकर्तरि यक्चिणौ न स्तः । दुहेरनेन यक एव निषेधः । चिण्तु विकल्पिष्यते । शप्, लुक् । गौः पयो दुग्धे ।

२७६८ । अचः कर्मकर्तरि । (३-१-६२)

अजन्ताच्च्लेश्चिण्वा स्यात्कर्मकर्तरि तशब्दे परे । अकारि—अकृत ।

२७६९ । दुहश्च । (३-१-६३)

अदोहि । पक्षे क्सः । 'लुग्वा—' (सू ३६५) इति पक्षे लुक् । अदुग्ध—अधुक्षत । उदुम्बरः फलं पच्यते । 'सृजियुज्योः श्यंस्तु' (वा १८७७)

हारलभ्यमेव । 'अचः कर्मकर्तरि' इत्यतो मण्डूकप्लुत्या तदनुवृत्तिर्वा । **दुहेरनेनेति** ॥ 'न दुहस्नुनमाम्' इत्यनेन दुहेः कर्मकर्तरि यक एव निषेधः । चिण्तु 'दुहश्च' इति वक्ष्यमाणसूत्रेण विकल्पितो वक्ष्यते इत्यर्थः । कर्मकर्तरि तशब्दे परे दुहेश्चिण्वेति तदर्थः । चिण्तु विकल्पेनेष्यते इति क्वचित्पाठः । दुग्धे इत्यत्र प्रक्रियां दर्शयति । **शप् लुगिति** ॥ दुहेः कर्मकर्तरि यकि निषिद्धे शप् प्रवर्तते । तस्य 'अदिप्रभृतिभ्यः' इति लुगित्यर्थः । **गौः पयो दुग्धे इति** ॥ गौः स्वयमेव पय उत्सृजतीत्यर्थः । कर्मकर्तृभूतायां गवि लट् । स्वरितेत्त्वेऽपि भावकर्मणोः इत्यात्मनेपदमेव । 'न दुह' इति न यक् । गां पयो दुग्धे इति तु नोदाहृतम् । 'गौणे कर्मणि दुह्यादेर्लादयो मताः' इत्युक्तेः । **अचः कर्मकर्तरि** ॥ 'च्लेस्सिच्' इत्यतः च्लेरिति 'चिण् ते पदः' इत्यतः चिण्ते इति, दीपजन इत्यतः अन्यतरस्यामिति, चानुवर्तते । 'धातोरेकाचः' इत्यतो अनुवृत्तस्य धातुग्रहणस्य अचा विशेषितत्वात्तदन्तविधिः । तदाह । **अजन्तादित्यादिना** ॥ **अकारीति** ॥ कटं स्वयमेवेति शेषः । कर्मकर्तरि लुङ् । च्लेश्चिण् । वृद्धिः । रपरत्वम् । 'चिणो लुक्' इति तशब्दस्य लुक् । **अकृतेति** ॥ चिणभावपक्षे 'हूस्वादङ्गात्' इति सिचो लोपः । **दुहश्च** ॥ अच इति वर्जं पूर्वसूत्रं तत्रानुवृत्तं, तत्सर्वमिहानुवर्तते । कर्मकर्तरि तशब्दे परे दुहेश्चिण्वा स्यादित्यर्थः । स्पष्ट इति न व्याख्यातम् । अनुवृत्तिसौकर्यार्थमेव पूर्वसूत्रं प्रकृतदुहधातावनुपयुक्तमप्युपन्यस्तम् । **अदोहीति** ॥ दुहेः कर्मकर्तरि लुङ् । स्वयमेव गौः पय इति शेषः । चिण्पक्षे लघूपधगुणः । चिणभावपक्षे आह । **पक्षे क्सः इति** ॥ 'शल इगुपधात्' इत्यनेनेति भावः । **लुग्वेति** ॥ 'लुग्वादुहदिहलिहगुहाम्' इति क्सस्य पाक्षिको लुगित्यर्थः । अत्र दुहिपच्योरित्यत्र पचेरुदाहरति । **उदुम्बरः फलं पच्यते इति** ॥ उदुम्बरवृक्षं फलं पचति कालविशेषः इत्यत्र द्विकर्मकः पाचिः । इह तु इदुम्बरो वृक्षः स्वयमेव कालविशेषमनपेक्ष्य फलं पक्वाश्रयं करोतीत्यर्थः । अत्र उदुम्बरस्य गौणकर्मणः कर्तृत्वेन विवक्षायां फलेन प्रधानकर्मणा सकर्मकत्वात् 'सकर्मकाणां प्रतिषेधः' इति कर्मवत्त्वस्य प्रतिषेधे प्राप्ते 'दुहिपच्योः' इति कर्मवत्त्वस्य प्रतिप्रसवाद्यगादिकामिति भावः । वस्तुतस्तु भाष्ये द्विकर्मकेषु पचेरपरिगणनान्न द्विकर्मकत्वामिति कारकाधिकारे प्रपञ्चितमस्माभिः । तथाच कर्मकर्तरि उदुम्बरः फलं पच्यते इत्यत्र फलस्यैव कर्मतया तस्य कर्तृत्वविवक्षायां पचेरकर्मकत्वात् 'सकर्मकाणाम्' इति प्रतिषेधस्याप्रसक्तेः

अनयोः सकर्मकयोः कर्ता बहुलं कर्मवद्यगपवादश्च श्यन्वाच्य इत्यर्थः। 'सृजेः श्रद्धोपपन्ने कर्तर्येवेति वाच्यम्'[1] (वा ५०५४) सृज्यते स्रजं भक्तः। श्रद्धया निष्पादयतीत्यर्थः। असर्जि। युज्यते ब्रह्मचारी योगम्। 'भूषाकर्मकिरादिसनां

प्रतिप्रसवविधिरयं व्यर्थ इति यद्यपि। तथाप्यत्र मते उदुम्बरः फलं पचतीत्यत्र कर्तृलकारे पचेः कर्तृस्थक्रियत्वात् कर्मस्थक्रियत्वाभावादुदुम्बरः फलं पच्यत इति कर्मकर्तरि 'कर्मवत्कर्मणा' इति कर्मवत्त्वस्याप्राप्तौ 'दुहिपच्योः' इति कर्मवत्त्वस्य बहुलं पचेरपूर्वविधिरित्यन्यत्र विस्तरः। 'सृजि-युज्योश्श्यंस्तु' इति वार्तिकम्। अनयोः सकर्मकयोः इत्यादि तद्भाष्यम्। अत्र सृजियुज्योर्दैवादिकयोर्न ग्रहणम्। तयोरकर्मकताया उक्तत्वात्। किन्तु 'सृज विसर्गे' इति तौदादिकस्य 'युजिर्योगे' इति रौधादिकस्य च ग्रहणम्। तत्र विसर्ग उत्पादनम्। यथा प्रजास्सृजतीति। योगस्संयोजनम्। यथा अश्वं युनक्तीति। रथादिना संयोजयतीति गम्यते। **सृजेः श्रद्धोपपन्ने इति**॥ श्रद्धायुक्ते मुख्यकर्तर्येव उक्तो विधिरित्यर्थः। तत्र मुख्यकर्तरि अत्यन्ताप्राप्तं कर्मवत्त्वमिह बहुलं विधीयते। 'युजेस्तु कर्मकर्तर्येव उक्तविधिः' इति भाष्यात्तत्रापि कर्मणि क्रियाकृतवैलक्षण्याभावादप्राप्तं कर्मवत्त्वमिह बहुलं विधीयते। कर्मवत्त्वे सति यकि प्राप्ते तदपवादश्श्यन्विधीयते। तेन 'ञ्णिल्यादिर्नित्यम्' इत्यायुदात्तत्वं सिद्ध्यति। यकि तु 'तास्यनुदात्तेत्' इत्यादिना लसार्वधातुकानुदात्तत्वे प्रत्ययस्वरेण यकः उदात्तत्वं स्यात्। **सृज्यते स्रजं भक्तः इति**॥ अत्र मुख्यकर्तरि लकारः। कर्मवत्त्वादात्मनेपदम्। यगपवादश्श्यन्। **श्रद्धया निष्पादयतीत्यर्थः इति**॥ धातूनामनेकार्थत्वादिति भावः। सृज्यते स्रजं भक्त इत्यत्र यदा तु निष्पादयतीत्येवार्थः, नतु श्रद्धयेति तदा सृजति स्रजमित्येव भवति। अथ युजेरुदाहरति। **युज्यते ब्रह्मचारी योगमिति**॥ अत्र कर्मकर्तरि यगपवादः श्यन्निति भाष्यम्। योगश्चित्तवृत्तिनिरोधः योगशास्त्रप्रसिद्धः। ब्रह्मचर्यं स्त्रीसङ्गराहित्यम्। 'तद्योगाङ्गम्' इति च योगशास्त्रप्रसिद्धम्। सः योगः ब्रह्मचारिणं युनक्ति। आत्मदर्शनेन संयोजयतीति कर्तृलकारे संयोजनक्रियायां योगो मुख्यकर्ता। ब्रह्मचारी तु कर्मेति स्थितिः। तत्र कर्मणो ब्रह्मचारिणः कर्तृत्वविवक्षायां युज्यते ब्रह्मचारी योगमिति कर्मकर्तरि ब्रह्मचारिणि लकारः कर्मवत्त्वम्। स्वरितेत्त्वेऽपि कर्मवत्त्वात्तदेव यगपवादः श्यन्। ब्रह्मचारी प्राणायामाभ्यासादिश्रमबाहुल्यं विना स्वयमेव योगेन संबध्यते इत्यर्थः। तत्र ब्रह्मचारिणि कर्मकर्तरि धात्वर्थसम्बन्धः अनुयोगितया वर्तते। योगे तु प्रतियोगितया वर्तत इति स्थितिः। तत्र यद्यपि प्रतियोगिनो योगात् 'सहयुक्तेऽप्रधाने' इति तृतीया भवितव्या। तथापि युजेः प्रतियोगित्वावच्छिन्नसम्बन्धोऽर्थः। तत्र प्रतियोगित्वं फलं, सम्बन्धो व्यापारः। प्रतियोगित्वरूपफलाश्रयत्वात् द्वितीयेति समाहितं शब्देन्दुशेखरे। अत्र भाष्ये प्रयोगादेव योगात् द्वितीयेत्यन्ये। भूषाकर्मेति वार्तिकम्। भूषाकर्म किरादि सन् एषां द्वन्द्वः। अन्यत्रेति **स्वार्थे** त्रल्। आत्मनेपदात् अन्यत्कर्मकार्यमिति लभ्यते। भूषा कर्म क्रिया येषां

---

१. अत्र च 'सृजेः श्रद्धोपपन्ने कर्तरि कर्मवद्भावो वाच्यश्चिणात्मनेपदार्थः' इति भाष्यं मानम्।

चान्यत्रात्मनेपदात्' (वा १८८०) भूषावाचिनां किरादीनां सन्नन्तानां च यक्चिणौ चिण्वदिट् च नेति वाच्यमित्यर्थः। अलंकुरुते कन्या। अलमकृत। अवकिरते हस्ती। अवाकीर्ष्ट। गिरते। अगीर्ष्ट। आद्रियते। आदृत। किरादिस्तुदाद्यन्तर्गणः। चिकीर्षते कटः। अचिकीर्षिष्ट। इच्छायाः कर्तृस्थत्वेऽपि करोतिक्रियापेक्षमिह कर्मस्थक्रियात्वम्।

२७७०। न रुधः। (३-१-६४)

अस्माच्च्लेश्चिण्न। अवारुद्ध गौः। कर्मकर्तरीत्येव। अवारोधि गौर्गोपेन।

२७७१। तपस्तपःकर्मकस्यैव। (३-१-८८)

वाच्यतया ते भूषाकर्मणः धातवः। भूषणक्रियावाचिनामिति यावत्। तदाह। **भूषावाचिनामित्यादिना** ॥ **अलंकुरुते कन्येति** ॥ स्वयमेव अन्यप्रयत्नं विना भूषणक्रियावतीत्यर्थः। अत्र भूषार्थकत्वात् कर्मकर्तरि तङेव नतु यक्। **अलमकृतेति** ॥ अत्र तङेव नतु चिण्। लुटि तु अलङ्कर्तेत्येव। नतु चिण्वदिटौ। **अवकिरते हस्तीति** ॥ हस्तिनमवकिरति कुसुमादिरित्यत्र मुख्यकर्तरि लकारः। तत्र हस्ती कर्म। तस्य कर्तृत्वविवक्षायां स्वयमेव पुरुषप्रयत्नं विना वृक्षादिसमीपं गच्छन् पुष्पादिभिः अवकिरणवान् भवतीत्यर्थः। अत्रापि तङेव, नतु यगादि। **अवाकीर्ष्टेति** ॥ 'लिङ्सिचोरात्मनेपदेषु' इति वेट्। **गिरते इति** ॥ ओदनं स्वयमेवेति शेषः। 'गॄ निगरणे' अयङ्किरादिः। **आद्रियते इति** ॥ 'दृङ् आदरणे' अयमपि किरादिः। शप्रत्यये 'रिङ् शयग्लिङ्क्षु' इति रिङ्। अतिथिमाद्रियते इति मुख्यकर्तरि आद्रियतेऽतिथिरिति कर्मकर्तरि स्वयमेव आदरणाश्रय इत्यर्थः। अत्र यद्यपि शे यकि च न विशेषः। तथापि न्याय्यश्च एव। यको निषिद्धत्वात्। स्वरे वा विशेषः। ताङि तु ङित्त्वादेव सिद्धः। अतिथेरभिहितत्वात् प्रथमेति विशेषः। **आदृतेति** ॥ चिणोऽनेन निषेधे 'हूस्वादङ्गात्' इति सिचो लोपः। 'उश्च' इति कित्त्वम्। अथ सन्नन्तस्योदाहरति। **चिकीर्षते कटः इति** ॥ स्वयमेव कर्तुमिच्छाविषय इत्यर्थः। नन्विच्छायाः पुरुषरूपकर्तृनिष्ठत्वात् कटरूपकर्मनिष्ठत्वाभावात् इच्छायां सत्यां असत्याञ्च कटे कर्मणि वैलक्षण्यादर्शनाच्च कर्मस्थक्रियत्वाभावादिह कर्मवत्त्वस्याप्रसक्तेस्तन्निषेधो व्यर्थ इत्यत आह। **इच्छायाः इति** ॥ **न रुधः** ॥ 'च्लेस्सिच्' इत्यतः च्लेरिति 'चिण्ते पदः' इत्यतश्चिणिति चानुवर्तते। तदाह। **अस्माच्च्लेश्चिण् नेति** ॥ **अवारुद्ध गौरिति** ॥ स्वयमेवेति शेषः। **कर्मकर्तरीत्येवेति** ॥ 'अचः कर्मकर्तरि' इत्यतस्तदनुवृत्तेरिति भावः। **अवारोधि गौर्गोपेनेति** ॥ इह गोः कर्मणः कर्तृत्वविवक्षाया अभावान्न चिण्निषेध इति भावः। **तपस्तपःकर्मकस्यैव** ॥ आद्यं तपः इति षष्ठ्यन्तम्। तपःकर्मकस्यैव तपधातोरिति लभ्यते। 'कर्तरि शप्' इत्यतः कर्तरीत्यनुवृत्तं प्रथमया विपरिणम्यते। 'कर्मवत्कर्मणा' इत्यतः कर्मवदित्यनुवर्तते, इति मत्वा

कर्ता कर्मवत्स्यात्। विध्यर्थमिदम्। एवकारस्तु व्यर्थ एवेति वृत्त्यनुसारिणः। तप्यते तपस्तापसः। अर्जयतीत्यर्थः। 'तपोऽनुतापे च' (सू २७६०) इति चिण्निषेधात्सिच्। अतप्त। 'तपःकर्मकस्य' इति किम्। उत्तपति सुवर्णं सुवर्णकारः। 'न दुहस्नुनमां यक्चिणौ' (सू २७६७)। प्रस्नुते। प्रास्नाविष्ट—प्रास्नोष्ट। नमते दण्डः। अनंस्त। अन्तर्भावितण्यर्थोऽत्र

सूत्रशेषं पूरयति। **कर्ता कर्मवदिति ॥ विध्यर्थमिदमिति ॥** एतच्चानुपदमेव उदाहरणव्याख्यावसरे स्पष्टीभविष्यति। ननु विध्यर्थत्वे एवकारो व्यर्थ इत्यत आह। **एवकारस्त्विति ॥ तप्यते तपस्तापसः इति ॥** अत्र तपिरार्जनार्थक इत्याह। **अर्जयतीत्यर्थः इति ॥** प्राजापत्यचान्द्रायणादिकृच्छ्राद्यात्मकतपस्सम्पादयतीत्यर्थः। मुख्यकर्तरि लः सम्पादनस्य तापसात्मककर्तृस्थत्वात् तपोरूपकर्मस्थत्वाभावात् 'कर्मवत्कर्मणा' इत्यप्राप्तङ्कर्मवत्त्वमनेन सूत्रेण विधीयते। तेन यगात्मनेपदादि। यदा तु तदपि दुःखजननात्मके सन्तापे वर्तते तदा तापसं तपस्तपतीत्येव भवति। दुःखयतीत्यर्थः। अत्र मुख्यकर्तृ तपः। तापसस्तु तपःकर्म। अत्रापि दुःखजननव्यापारस्य तपोरूपकर्तृस्थतया तापसरूपकर्मस्थत्वाभावात् 'कर्मवत् कर्मणा' इत्यनेन कर्मवत्त्वं न भवति। तपःकर्मकत्वाभावादनेनापि न कर्मवत्त्वम्। अतो न यगादिकर्मकार्यम्। अथ लुङि अतप्तेत्यत्र कर्मवत्त्वाच्चिणमाशङ्क्य आह। **तपोऽनुतापे च इति ॥ चिण्निषेधात् सिजिति ॥** तस्य 'झलो झलि' इति लोपे परिनिष्ठितमाह। **अतप्तेति। उत्तपति सुवर्णं सुवर्णकारः इति ॥** अत्र तपःकर्मकत्वाभावान्न कर्मवत्त्वमिति भावः। भाष्ये तु एवकारादिदं सूत्रं नियमार्थमित्युक्तमिति शब्देन्दुशेखरे प्रपञ्चितमेतत्। वृत्त्यनुसारिण इत्यनेन भाष्यविरोधस्सूचित इत्यलम्। 'दुहिपच्योर्बहुळम्' इति कर्मवत्त्वविधिस्थदुहिप्रसङ्गात् 'न दुहस्नुनमाम्' इति सूत्रमुपन्यस्तं प्राक्। इदानीं सिंहावलोकनन्यायेन स्नुनमोरुदाहर्तुं पुनस्सूत्रमुपन्यस्यति। **न दुहस्नुनमां यक्चिणाविति ॥** तत्र स्नुधातोरुदाहरति। **प्रस्नुते इति ॥** स्नुधातुः क्षीरप्रस्रवणविषयोत्कण्ठीकरणे वर्तते। वत्सो गां प्रस्नौतीति मुख्यकर्तरि लकारे वत्सो गां क्षीरप्रस्रवणविषये उत्कण्ठयतीत्यर्थः। अन्तर्भावितण्यर्थोऽत्र स्नुधातुः। अत्र गौः कर्म। उत्कण्ठनव्यापारस्तु कर्तृभूतवत्सनिष्ठः। उत्कण्ठा तु गोरूपकर्मनिष्ठा। गोः कर्मणः कर्तृत्वविवक्षायान्तु प्रस्नुते गौः। स्वयमेव क्षीरप्रस्रवणविषये उत्कण्ठावतीत्यर्थः। तत्र उत्कण्ठा पूर्वं कर्मगता। सम्प्रति तु कर्तृगता। उत्कण्ठाकृतश्च वैलक्षण्यं प्रस्रवणं दृश्यत एव। ततश्च कर्मस्थक्रियत्वात् कर्मवत्त्वे यकि प्राप्ते अनेन निषेधः। **प्रास्नाविष्टेति ॥** अत्र कर्मवत्त्वात् प्राप्तश्विण् न। किन्तु चिण्वदिटौ पक्षे स्तः। चिण्वदिडभावे तु 'स्नुक्रमोः' इति नियमाद्वलादिलक्षण इण्न। तदाह। **प्रास्नोष्टेति ॥** णम उदाहरति। **नमते दण्डः इति ॥** नमति दण्डं कश्चित्। नमयतीत्यर्थः। कर्मणः कर्तृत्वविवक्षायान्तु नमते दण्डः। अत्र कर्मवत्त्वेऽपि न यक्। **अनंस्तेति ॥** अत्र कर्मवत्त्वेऽपि न चिण्। ननु णमधातोः प्रह्वीभावार्थकस्याकर्मकत्वात् कर्मवत्त्वाप्रसक्तेर्यक्चिणोर्न प्रसक्तिरित्यत आह। **अन्त-**

नमिः । यक्चिणोः प्रतिषेधे 'हेतुमण्णिश्रिब्रूभ्यामुपसंख्यानम्' (वा १८८१)। कारयते । अचीकरत । उच्छ्रयते दण्डः । उदशिश्रियत । चिण्वदिट् तु स्यादेव । कारिष्यते । उच्छ्रायिष्यते । ब्रूते कथा । अवोचत । भारद्वाजीयाः पठन्ति। 'णिश्रन्थिग्रन्थिब्रूभ्यात्मनेपदाकर्मकाणामुपसंख्यानम्' (वा १८८२)। पुच्छमुदस्यति उत्पुच्छयते गौः । अन्तर्भावितण्यर्थतायाम् उत्पुच्छयते गाम् । पुनः कर्तृत्वविवक्षायाम् उत्पुच्छयते गौः । उदपुपुच्छत । यक्चिणोः प्रति-

---

र्भावितण्यर्थोऽत्र नमिरिति ॥ धातूनामनेकार्थकत्वादिति भावः । **यक्चिणोरिति** ॥ 'न दुहस्नुनमाम्' इति यक्चिणोः प्रतिषेधसूत्रे दुहस्नुनमां हेतुमण्णिश्रिब्रूभ्यामिति च वाच्यमित्यर्थः । **कारयते इति** ॥ स्वयं देवदत्त इति शेषः । करोति देवदत्तः, तं प्रेरयति यज्ञदत्त इति ण्यन्तान्मुख्यकर्तरि लकारः । अत्र ण्यन्तकर्मणो देवदत्तस्य यज्ञदत्तप्रेरणमनपेक्ष्य कर्तृत्वविवक्षायाङ्कर्मकर्तरि लकारः । कर्ववत्त्वेऽपि तङेव, न यगिति भावः । **अचीकरतेति** ॥ अत्र कर्मवत्त्वेऽपि न चिण् 'णिश्रि' इति चङेव । **उच्छ्रयते दण्डः इति** ॥ स्वयमेवेति शेषः । दण्डमुच्छ्रयति कश्चिदित्यर्थः । मुख्यकर्तरि लकारः । तत्र कर्मणो दण्डस्य कर्तृव्यापारमनपेक्ष्य कर्तृत्वविवक्षायाङ्कर्मकर्तरि लकारः । कर्मवत्त्वेऽपि न यक् तङेव । **उदशिश्रियतेति** ॥ कर्मवत्त्वेऽपि चिणभावात् 'णिश्रि' इति चङ् । ननु कारिष्यते इत्यत्र कथञ्चिण्वदिटौ । ण्यन्तस्याजन्तस्य उपदेशाभावादित्यत आह । **चिण्वदिट् तु स्यादेवेति** ॥ 'स्यसिच्सीयुट्तासिषु' इत्यत्र हि उपदेशे अजन्तस्येति नार्थः । किन्तु उपदेशे योऽच् तदन्तस्येत्यर्थः । तथाच णिजन्तस्योपदेशाभावेऽपि णेरुपदेशसत्त्वान्न दोष इति भावः । **उच्छ्रायिष्यते इति**॥ श्रिञः उपदेशे योऽच् तदन्तत्वाच्चिण्वदिटौ । **ब्रूते कथेति** ॥ स्वयमेवेति शेषः । कथां ब्रवीति कश्चिदिति मुख्यकर्तृलकारे कथा कर्म तस्य पुरुषप्रयत्नाविवक्षायाङ्कर्मकर्तरि लकारः । कर्मवत्त्वात् तङ् । न यक् । **अवोचतेति** ॥ कर्मवत्त्वेऽपि न चिण् । किन्तु 'ब्रुवो वचिः, अस्तिवक्तिख्यातिभ्योऽङ्, वच उम्' इति भावः । उच्चारणेन शब्देषु प्राकट्यरूपविशेषदर्शनात् कर्मस्थक्रियत्वं बोध्यम् । 'णिश्रन्थि' इति ण्यन्तस्य श्रन्थेः ग्रन्थेः ब्रूञः आत्मनेपदविधावकर्मकस्य च यक्चिणोः प्रतिषेधः भारद्वाजीयाभिमत इत्यर्थः । अत्र णि इति सामान्यस्य ग्रहणम्। नत्वहेतुमण्णिच एव । ततश्च णिङन्तस्यापि न यक्चिणाविति मत्वा आह । **पुच्छमुदस्यति उत्पुच्छयते गौरिति** ॥ 'पुच्छादुदसने' इति णिङ् । नन्वत्र उदसने पुच्छङ्कर्म । गौर्मुख्यकर्त्री । ननु कर्मकर्त्री । ततश्च नात्र यक्चिणोः प्रसक्तिरित्यत आह । **अन्तर्भावितण्यर्थतायामिति** ॥ उदस्यतीत्यस्य उदासयतीत्यन्तर्भावितण्यर्थताश्रयणे उत्पुच्छयते गां देवदत्तः इत्यत्र गौः कर्म । तस्य गोरूपकर्मणः प्रेरयितृपुरुषप्रयत्नानपेक्षया कर्तृत्वविवक्षायाङ्कर्मकर्तरि लकारे उत्पुच्छयते गौरिति भवतीत्यर्थः । स्वयमेव पुच्छमुदस्यति गौरिति बोधः । **उदपुपुच्छतेति** ॥ अत्र न चिण् । **शप्चङाविति** ॥ उत्पुच्छयते गौरित्यत्र यकः प्रतिषेधात् शप् । उदपुपुच्छतेत्यत्र चिणः प्रतिषेधाच्चङित्यर्थः । ननु 'श्रन्थ मोक्षणे, ग्रन्थ ग्रथने'

वेधाच्छप्चङौ । श्रन्थिग्रन्थ्योराधृषीयत्वाण्णिजभावपक्षे ग्रहणम् । ग्रन्थति ग्रन्थम् । श्रन्थति मेखलां देवदत्तः । ग्रन्थते ग्रन्थः । अग्रन्थिष्ट । श्रन्थते । अश्रन्थिष्ट । क्रैयादिकयोस्तु श्रथ्नीते ग्रथ्नीते स्वयमेव । विकुर्वते सैन्धवाः । वल्गन्तीत्यर्थः । 'वेः शब्दकर्मणः' (सू २७०७) 'अकर्मकाच्च' (सू २७०८) इति तङ् । अन्तर्भावितण्यर्थस्य पुनः प्रेषणत्यागे । विकुर्वते सैन्धवाः । व्यकारिष्ट । व्यकारिषाताम् । व्यकारिषत । व्यकृत । व्यकृषाताम् । व्यकृषत ।

२७७२ । कुषिरञ्जोः प्राचां श्यन् परस्मैपदं च । (३-१-९०)

अनयोः कर्मकर्तरि न यक् । किं तु श्यन्परस्मैपदं च । आत्मनेपदाप-

---

इति श्रन्थिग्रन्थ्योः चौरादिकतया णिग्रहणेनैव सिद्धेः पुनर्ग्रहणं व्यर्थमित्यत आह । **श्रन्थिग्रन्थ्योरिति** ॥ **ग्रन्थति ग्रन्थमिति** ॥ रचयतीत्यर्थः । **श्रन्थति मेखलां देवदत्तः इति** ॥ विस्रंसयतीत्यर्थः । देवदत्त इत्युभयत्रान्वेति । अत्र कर्मणो ग्रन्थस्य मेखलायाश्च कर्तृत्वविवक्षायां ग्रन्थते ग्रन्थः श्रन्थते मेखलेति च भवति । स्वयमेव ग्रन्थरचनाश्रयस्रंसनाश्रयश्चेत्यर्थः । तत्र कर्मवत्त्वेऽपि न यगिति भावः । अग्रन्थिष्ट अश्रन्थिष्टेत्यत्र च न चिण् । **क्रैयादिकयोस्त्विति** ॥ कर्मवत्त्वेऽपि तयोर्यकि निषिद्धे श्नाविकरण इति भावः । आत्मनेपदविधावकर्मकोऽयं तदुदाहरति । **विकुर्वते सैन्धवाः इति** ॥ सैन्धवाः अश्वाः । अत्र विपूर्वः कृञ् वल्गने वर्तते । उपसर्गवशात् । तदाह । **वल्गन्तीति** ॥ शब्दङ्कुर्वन्तीत्यर्थः । धात्वर्थेनोपसङ्ग्रहादकर्मकोऽयम् । मुख्यकर्तरि लकारः । **वेरिति** ॥ 'वेः शब्दकर्मणः' इत्यनन्तरं पठितेन 'अकर्मकाच्च' इति सूत्रेण परगामिन्यपि फले तङित्यर्थः । नन्वस्याकर्मकतया अश्वानाङ्कर्मकर्तृत्वाभावान्न यकः प्रसक्तिरित्यत आह । **अन्तर्भावितेति** ॥ विपूर्वकः कृञ् शब्दङ्कुर्वाणस्य प्रेरणे यदा वर्तते, तदा विकुर्वते सैन्धवानिति भवति । अश्वान् शब्दाययतीत्यर्थः । तत्र सैन्धवानाङ्कर्मणां पुरुषप्रेरणाविवक्षया कर्तृत्वविवक्षायां विकुर्वते सैन्धवाः इति भवति । वल्गन्तीत्यर्थः । अत्र सैन्धवानाङ्कर्मकर्तृणाङ्कर्मवत्त्वेऽपि न यगित्यर्थः । **व्यकारिष्टेति** ॥ चिणि निषिद्धे ण्यन्तत्वाभावाच्चङभावे सिचश्चिण्वदिटि वृद्धिरिति भावः । चिण्वदिडभावपक्षे आह । **व्यकृतेति** ॥ 'हूस्वादङ्गात्' इति सिचो लोपः । **कुषिरञ्जोः** ॥ **अनयोरिति** ॥ 'कुष निष्कर्षे, रञ्ज रागे' इत्यनयोरित्यर्थः । **कर्मकर्तरीति** ॥ 'अचः कर्मकर्तरि' इत्यतो मण्डूकप्लुत्या तदनुवृत्तेरिति भावः । 'न दुहस्नुनमाम्' इत्यतः नेति यगिति चानुवर्तते। तदाह । **यगिति** ॥ **किन्तु श्यनिति** ॥ श्यन्विषयेत्यर्थः। एवञ्च यग्विषयादन्यत्र न श्यनः प्रवृत्तिः । न यगित्यनुक्त्वा श्यनो विधाने तु यग्विषयादन्यत्रार्धधातुकेऽपि श्यन् स्यादिति भावः । प्राचाङ्ग्रहणाद्विकल्पः । तदाह । **कुष्यति कुष्यते वा पादः इति** ॥ स्वयमेवेति शेषः । **कुष्णाति पादं देवदत्तः इति** ॥ मुख्यकर्तृलकारे पादः कर्म । तस्य पुरुषप्रयत्नमनपेक्ष्य कर्तृत्वविवक्षायां श्यनि परस्मैपदे च कुष्यतीति रूपम्। तदुभयाभावे यकि आत्मनेपदे च कुष्यते

वादः । कुष्यति–कुष्यते वा पादः । कुष्णाति पादं देवदत्तः । रज्यति–रज्यते वा वस्त्रम् । यगविषये तु नास्य प्रवृत्तिः । कोषिषीष्ट । रङ्क्षीष्ट ।

इति कर्मकर्तृतिङ्प्रकरणम् ।

। श्रीरस्तु ।

॥ अथ लकारार्थप्रकरणम् ॥

२७७३ । अभिज्ञावचने लृट् । (३-२-११२)

स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट् स्यात् । लङोऽपवादः ।

इति रूपमिति भावः । यक्श्यनोः स्वरे विशेषः । श्यनि कुष्यन्ती वधूरित्यत्र 'शप्श्यनोर्नित्यम्' इति नित्यं नुम् । यकि तु 'आच्छीनद्योः' इति विकल्पः स्यात् । **रज्यति रज्यते वा वस्त्रमिति** ॥ अन्तर्भावितण्यर्थतायां दैवादिकत्वात् श्यनि रज्यति वस्त्रमित्यत्र रञ्जयतीत्यर्थः । मुख्ये कर्तरि लः कर्मणः कर्तृत्वविवक्षायान्तु रज्यति रज्यते वेति भवतीत्यर्थः । **यगविषये तु नास्त्येवेति** ॥ श्यनिति शेषः । यकं प्रतिषिध्य तत्स्थाने श्यनो विधिसामर्थ्यादित्यर्थः । **कोषिषीष्टेति** ॥ आर्धधातुकत्वेन यगविषयत्वान्न श्यन् । तत्सन्नियोगशिष्टत्वात् परस्मैपदञ्च श्यनभावे सति न भवतीति भावः । **रङ्क्षीष्टेति** ॥ रञ्जेस्सीयुटि जस्य कुत्वेन गः । तस्य चर्त्वेन कः । अनुस्वारपरसवर्णौ । अत्र कर्मकर्तृप्रकरणे सर्वत्र पच्यते ओदनः स्वयमेवेति, भिद्यते काष्ठं स्वयमेवेत्यादौ स्वयंशब्दस्य आत्मना करणेनेत्यर्थः । नत्वात्मना कर्त्रेति । तथा सति कर्मण्येव लः स्यादिति 'णेरणौ' इति सूत्रे कैयटे स्पष्टम् ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायाङ्कर्मकर्तृप्रक्रिया समाप्ता ।

अथ लकारार्थप्रक्रियाः निरूप्यन्ते ॥ **अभिज्ञावचने लृट्** ॥ अभिज्ञा स्मृतिः सा उच्यते बोद्ध्यते अनेनेति विग्रहः । तदाह । **स्मृतिबोधिन्युपपदे इति** ॥ स्मृतिबोधकपदे समीपे प्रयुज्यमाने सतीत्यर्थः । भूते इत्यधिकृतम् । 'अनद्यतने लुङ्' इत्यतः अनद्यतने इत्यनुवर्तते ।

स्मरसि कृष्ण गोकुले वत्स्यामः। एवं बुध्यसे चेतयसे इत्यादियोगेऽपि। तेषामपि प्रकरणादिवशेन स्मृतौ वृत्तिसम्भवात्।

२७७४। न यदि। (३-२-११३)

यद्योगे इक्तं न। अभिजानासि कृष्ण यद्वने अमुञ्ज्महि।

२७७५। विभाषा साकाङ्क्षे। (३-२-११४)

उक्तविषये लट्वा स्यात्। लक्ष्यलक्षणभावेन साकाङ्क्षश्चेद्वाक्यार्थः। स्मरसि कृष्ण वने वत्स्यामस्तत्र गाश्चारयिष्यामः। वासो लक्षणं चारणं लक्ष्यम्। पक्षे लङ्। यच्छब्दयोगेऽपि 'न यदि' (सू २७७४) इति बाधित्वा परत्वाद्विकल्पः। 'परोक्षे लिट्' (सू २१७१)। चकार। उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यम्। 'सुप्तोऽहं किल विललाप' 'बहु जगद पुरस्तात्तस्य मत्ता किलाहम्'। अत्यन्तापह्नवे लिङ्क्तव्यः' (वा २०८४)। कलिङ्गेष्ववात्सीः। नाहं कलिङ्गाञ्जगाम।

तदाह। **भूतानद्यतने इति** ॥ **लङः इति** ॥ अनद्यतने लङित्यस्यापवाद इत्यर्थः। **स्मरसीति** ॥ हे कृष्ण गोकुले अवसमिति यत् तत् स्मरसीत्यर्थः। अत्र वाक्यार्थः कर्म। कृतज्ञोकुलवासं स्मरसीति यावत्। **एवमिति** ॥ स्मरसीति पदयोग इव बुध्यसे इत्यादिस्मृतिबोधकपदयोगेऽपि लृडित्यर्थः। ननु बुध्यत्यादेः स्मृतित्वेन रूपेण स्मृत्यर्थकत्वाभावात्कथमिह लृडित्यत आह। **तेषामपीति** ॥ पर्यवसानगत्या स्मृतिबोधकत्वात्तद्योगेऽपि लृट्। एतदर्थमेव वचनग्रहणमिति भावः। **न यदि** ॥ यदीति सप्तमीति मत्वा आह। **यद्योगे इति** ॥ **उक्तं नेति** ॥ अभिज्ञावचने इति लृट् न भवतीत्यर्थः। **अभिजानासीति** ॥ वने अमुञ्ज्महीति यत् तत् स्मरसीत्यर्थः। **विभाषा** ॥ **उक्तविषये इति** ॥ अभिज्ञाबोधिन्युपपदे इत्यर्थः। **लक्ष्यलक्षणभावेनेति** ॥ अत्र व्याख्यानमेव शरणम्। ज्ञाप्यज्ञापकभावेनेत्यर्थः। **स्मरसीति** ॥ पूर्वं वने अवसाम, तत्र वने गाः अवारयाम इति यत् तत् हे कृष्ण स्मरसीत्यर्थः। अत्र यत् इत्यस्य गम्यत्वेऽपि तस्य प्रयोगाभावान्न यद्योगः। **वासो लक्षणमिति** ॥ चारणस्येति शेषः। उभयत्रापि लृड्विकल्पः। अभिज्ञावचनयोगस्य अविशिष्टत्वादिति भावः। नच यद्योग एव 'विभाषा साकांक्षे' इति विकल्पोऽस्त्विति भ्रमितव्यम्। 'यदि वायं विकल्पः' इति भाष्यात्तदाह। **यच्छब्दयोगेऽपीति** ॥ 'परोक्षे लिट्' इति प्राक् व्याख्यातमपि विशेषविवक्षया स्मर्यते। अहमर्थस्य प्रत्यक्षत्वात् परोक्षत्वाभावात् कथमस्य लिट उत्तमपुरुष इत्यत आह। **उत्तमपुरुषे चित्तेति** ॥ **सुप्तः इति** ॥ सुप्तत्वादहं विललापेत्यर्थः। अत्र स्वापाच्चित्तविक्षेपः। **बहु जगदेति** ॥ मत्तत्वात्तस्य पुरस्तादहं बहु जगदेत्यर्थः। अत्र उन्मादाच्चित्तविक्षेपः। आदिना व्यासङ्गसङ्ग्रहः। **अत्यन्तापह्नवे इति** ॥ अपरोक्षार्थमिदम्। **कलिङ्गेष्ववात्सीरिति** ॥ अतस्त्वन्न सहवासयोग्य इति प्रश्नः। 'अङ्गवङ्गकलिङ्गेषु सौराष्ट्रमगधेषु

२७७६ । हशश्वतोर्लङ् च । (३-२-११६)

अनयोरुपपदयोर्लिङ्विषये लङ् स्यात् । चालिट् । इति हाकरोच्चकार वा । शश्वदकरोच्चकार वा ।

२७७७ । प्रश्ने चासन्नकाले । (३-२-११७)

प्रष्टव्यः प्रश्नः । आसन्नकाले पृच्छ्यमानेऽर्थे लिङ्विषये लङ्लिटौ स्तः । अगच्छत्किम् । जगाम किम् । अनासन्ने तु कंसं जघान किम् ।

२७७८ । लट् स्मे । (३-२-११८)

लिटोऽपवादः । यजति स्म युधिष्ठिरः ।

२७७९ । अपरोक्षे च । (३-२-११९)

भूतानद्यतने लट् स्यात्स्मयोगे । एवं स्म पिता ब्रवीति ।

२७८० । ननौ पृष्टप्रतिवचने । (३-२-१२०)

'अनद्यतने' 'परोक्षे' इति निवृत्तम् । भूते लट् स्यात् । अकार्षीः किम् । ननु करोमि भोः ।

२७८१ । नन्वोर्विभाषा । (३-२-१२१)

च । तीर्थयात्रां विना यातः पुनः संस्कारमर्हति ॥' इति वचनादिति भावः । नाहङ्कलिङ्गाञ्जगामेत्युत्तरम् । कलिङ्गशब्दस्य जनपदविशेषवाचित्वात् बहुवचनम् । अत्र तद्देशगमनोत्तरकालिकवासविषयकप्रश्ने कारणीभूतगमनस्यैवापलापादत्यन्तापह्नवो ज्ञेयः । कलिङ्गेष्ववात्सीरित्यत्र 'अकर्मकधातुभिर्योगे देशः कालो भावः' इति कर्मसंज्ञायाः पाक्षिकत्वान्न द्वितीयेति कारकाधिकारे निरूपितम् । **हशश्वतोर्लङ् च** ॥ स्पष्टम् । **प्रश्ने चासन्नकाले** ॥ प्रश्ने इत्यनेन प्रश्नविषयो विवक्षित इत्याह । **प्रष्टव्यः प्रश्नः इति** ॥ अर्थे इत्यनन्तरं वर्तमानाद्धातोरिति शेषः । प्रयोक्तृदृष्टिपथातिक्रान्तत्वमनासन्नकालकत्वम् । वृत्तौ तु पञ्चवर्षातीतकालः अनासन्नकाल इत्युक्तम् । **लट् स्मे** ॥ स्मेत्यव्ययम् । तद्योगे लिङ्विषये लट् स्यादित्यर्थः । **यजति स्मेति** ॥ स्मशब्दो भूतकालद्योतकः । **अपरोक्षे च** ॥ **एवं स्मेति** ॥ पिता एवमुक्तवानित्यर्थः । **ननौ पृष्ट** ॥ **निवृत्तमिति** ॥ व्याख्यानादिति भावः । अकार्षीः किमिति प्रश्नः । ननु करोमीत्युत्तरम् । अकार्षमित्यर्थः । नन्विति संबोधने । **नन्वोर्विभाषा** ॥

नशब्दे नुशब्दे च लङ्वा स्यात्। अकार्षीः किम्। न करोमि। नाकार्षम्। अहं नु करोमि। अहं न्वकार्षम्।

२७८२। पुरि लुङ् चास्मे। (३-२-१२२)

अनद्यतनग्रहणं मण्डूकप्लुत्यानुवर्तते। पुराशब्दयोगे भूतानद्यतने विभाषा लुङ्। चाल्लट्। न तु स्मयोगे। पक्षे यथाप्राप्तम्। वसन्तीह पुरा छात्राः—अवात्सुः—अवसन्—ऊषुर्वा। 'अस्मे' किम्। यजति स्म पुरा। भविष्यतीत्यनुवर्तमाने।

२७८३। यावत्पुरानिपातयोर्लट्। (३-३-४)

यावद्भुङ्क्ते। पुरा भुङ्क्ते। निपातावेतौ निश्चयं द्योतयतः। 'निपातयोः' किम्। यावद्दास्यते तावद्भोक्ष्यते। करणभूतया पुरा यास्यति।

२७८४। विभाषा कदाकर्ह्योः। (३-३-५)

भविष्यति लट् वा स्यात्। कदा कर्हि वा भुङ्क्ते—भोक्ष्यते—भोक्ता वा।

न नु अनयोर्द्वन्द्वः। तदाह। **नशब्दे नुशब्दे चेति॥ लङ्वा स्यादिति॥** भूते इति शेषः। अकार्षीः किमिति प्रश्नः। न करोमि नाकार्षमित्युत्तरम्। अहं नु करोमि। अहं न्वकार्षमिति च। 'तर्के नु स्यात्' इत्यमरः। **पुरि लुङ् चास्मे॥** अस्मे इति च्छेदः। पुरेत्याकारान्तमव्ययम्। पुरीति तस्य सप्तम्येकवचनम्। आत इति योगविभागादाल्लोपः। **मण्डूकप्लुत्येति॥** अत्र व्याख्यानमेव शरणम्। **चाल्लडिति॥** तथाच लुङ् लट् च वेति फलितम्। **पक्षे इति॥** एतदुभयाभावपक्षे इत्यर्थः। **यथाप्राप्तमिति॥** अनद्यतनपरोक्षभूते लिट्। परोक्षत्वाविवक्षायान्तु लडित्यर्थः। 'अभिज्ञावचने' इत्यारभ्य एतदन्ताः विधयस्तृतीयस्य द्वैतीयीकाः। अथ तृतीयस्य तार्तीयीका विधयो वक्ष्यन्ते। **भविष्यतीत्यनुवर्तमाने इति॥** 'भविष्यति गम्यादयः' इति सूत्रादिति भावः। **यावत्पुरा॥** यावत् पुरा इति द्वे पदे। अनयोः प्रयुज्यमानयोर्लट् स्यादित्यर्थः। लुडादेरपवादः। **निश्चयं द्योतयतः इति॥** 'यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे' इत्यमरः। **यावद्दास्यते तावद्भोक्ष्यते इति॥** यत्परिमाणकं तत्परिमाणकमित्यर्थः। 'यत्तदेतेभ्यः परिमाणे वतुप्' इति वतुबन्तत्वेन निपातत्वाभावान्न लडिति भावः। **करणभूतयेति॥** पुरा यास्यतीति प्रत्युदाहरणान्तरम्। पुरशब्दस्य पुरेति तृतीयान्तमिदम्। तत्स्फोरणाय करणभूतयेत्युक्तम्। **विभाषा कदाकर्ह्योः॥** भविष्यति लट्वा स्यादिति शेषपूरणम्। लडभावपक्षे लुट्लृटौ यथाप्राप्तम्। तदाह। **कदा कर्हि वा भुङ्क्ते भोक्ष्यते भोक्ता वेति॥** नच कर्हियोगे लडभावपक्षे लुडेवोचितः, नतु लट्। 'अनद्यतने र्हिलन्यतरस्याम्' इति र्हिलन्तकर्हियोगविरोधादिति वाच्यम्। लुडुदाहरणस्य कदायोगमात्रविषयत्वादित्याहुः।

२७८५ । किंवृत्ते लिप्सायाम् । (३-३-६)

किंवृत्तं विभक्त्यन्तम् । भविष्यति लट्वा स्यात् । कं कतरं कतमं वा भोजयसि—भोजयिष्यसि—भोजयितासि वा । 'लिप्सायाम्' किम् । कः पाटलिपुत्रं गमिष्यति ।

२७८६ । लिप्स्यमानसिद्धौ च (३-३-७)

लिप्स्यमानेनान्नादिना स्वर्गादेः सिद्धौ गम्यमानायां भविष्यति लट्वा स्यात् । योऽन्नं ददाति—दास्यति—दाता वा । स स्वर्गं याति—यास्यति—याता वा ।

२७८७ । लोडर्थलक्षणे च । (३-३-८)

लोडर्थः प्रैषादिर्लक्ष्यते येन तस्मिन्नर्थे वर्तमानाद्धातोर्भविष्यति लट्वा स्यात् । कृष्णश्चेद्भुङ्क्ते त्वं गाश्चारय । पक्षे लुट्लटौ ।

२७८८ । लिङ् चोर्ध्वमौहूर्तिके । (३-३-९)

ऊर्ध्वं मुहूर्तादूर्ध्वमौहूर्तिकः । निपातनात्समासः उत्तरपदवृद्धिश्च । ऊर्ध्वमौहूर्तिके भविष्यति लोडर्थलक्षणे वर्तमानाद्धातोर्लिङ्लटौ वा स्तः । मुहूर्ता-

---

किंवृत्ते लिप्सायाम् ॥ किंशब्देन वृत्तं निष्पन्नं किंवृत्तमित्यभिप्रेत्य आह । **विभक्त्यन्तमिति** ॥ **लड्वेति** ॥ लडभावे तु लुट्लृटौ यथाप्राप्तम् । किंवृत्तशब्देन विभक्त्यन्तडतरडतमान्तानामेव ग्रहणमिति वृत्तिः । तेन कदादियोगे भविष्यति लट् । 'यद्वृत्तान्नित्यम्' इति सूत्रभाष्यरीत्या तु किंवृत्तानां सर्वेषां कदेत्यादीनामपि ग्रहणमिति युक्तम् । **कं कतरं कतमं वेति** ॥ क्षुधितमन्नलिप्सुमिति शेषः । **लिप्स्यमानसिद्धौ च** ॥ **लड्वेति** ॥ पक्षे लिप्स्यमानसिद्धौ लिप्सायाः सत्वेऽप्यकिंवृत्तार्थमिदमिति मत्वोदाहरति । **योऽन्नमिति** ॥ योऽन्नं ददाति स स्वर्गं याति । योऽन्नं दास्यति स स्वर्गं यास्यति । योऽन्नं दाता सः स्वर्गं यातेत्यन्वयः । **लोडर्थलक्षणे च** ॥ **लोडर्थः प्रैषादिरिति** ॥ विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु इत्यनुवृत्तौ लोट् चेति लोड्विधानादिति भावः । **कृष्णश्चेदिति** ॥ कृष्णभोजनकाले त्वङ्गाश्चारयेत्यर्थः । अत्र कृष्णभोजनं लोडर्थस्य गोचारणप्रैषस्य लक्षणम् । परिच्छेदकमिति यावत् । **पक्षे लुट्लटाविति** ॥ कृष्णश्चेद्भोक्ता, भोक्ष्यते, वा त्वङ्गाश्चारयेत्युदाहार्यम् । **लिङ् चोर्ध्वमौहूर्तिके** ॥ ऊर्ध्वमिति विभक्तिप्रतिरूपकमव्ययम् । ऊर्ध्वं मुहूर्तात् भवः इति विग्रहः । केचित्तु ऊर्ध्वमिति द्वितीयान्तम् । 'अकर्मकधातुभिर्योगे' इति कर्मत्ववादित्याहुः । **ऊर्ध्वमौहूर्तिकः इति** ॥ ऊर्ध्वमुहूर्तशब्दात् भवार्थे कालाट्ठञिति भावः । ननु तद्धितार्थेत्यत्र दिक्सङ्ख्ये इत्यनुवृत्तेस्समानाधिकाराच्चात्र कथं समास इत्यत आह । **निपातनादिति** ॥ पूर्वपदे आदिवृद्धिमाशङ्क्य आह । **उत्तरपदवृद्धिश्चेति** ॥ निपातनादित्यनुषज्यते । **ऊर्ध्वमौहूर्तिके इति** ॥ मुहू-

दुपरि उपाध्यायश्चेदागच्छेत्--आगच्छति--आगमिष्यति--आगन्ता वा अथ त्वं छन्दोऽधीष्व।

२७८९। वर्तमानसामीप्ये वर्तमानवद्वा। (३-३-१३१)

समीपमेव सामीप्यम्। स्वार्थे ष्यञ्। 'वर्तमाने लट्' (सू २१५१) इत्यारभ्य 'उणादयो बहुलम्' (सू ३१६९) इति यावद्येनोपाधिना प्रत्यया उक्तास्ते तथैव वर्तमानसमीपे भूते भविष्यति च वा स्युः। कदा आगतोऽसि। अयमागच्छामि। अहमागमम्। कदा गमिष्यसि। एष गच्छामि—गमिष्यामि वा।

२७९०। आशंसायां भूतवच्च। (३-३-१३२)

वर्तमानसामीप्ये इति नानुवर्तते। भविष्यति काले भूतवद्वर्तमानवच्च प्रत्यया वा स्युराशंसायाम्। देवश्चेदवर्षाद्वर्षति—वर्षिष्यति वा धान्यमवाप्स्म—

र्तादूर्ध्वकालीने इत्यर्थः। लोडर्थलक्षण इत्यत्रान्वेति प्रैषादाविति। **लिङ्लटाविति**॥ चाल्लट् समुच्चीयत इति भावः। **वा स्तः इति**॥ पक्षे लुट्लृटौ यथाप्राप्तम्। **छन्दः इति**॥ वेद इत्यर्थः। इति तृतीयस्य तृतीये भविष्यर्तीत्यधिकारस्थाः लविधयः। अथास्मिन्नेव तृतीयपादे कतिपयान् विधीनाह। **वर्तमानसामीप्ये**॥ **स्वार्थे ष्यञिति**॥ अस्मादेव निर्देशात् चतुर्वर्णादेराकृतिगणत्वाद्वेति भावः। **इत्यारभ्येति**॥ तृतीयस्य द्वितीये 'वर्तमाने लट्' इत्यारभ्य आपादसमाप्तेः 'उणादयो बहुलम्' इति तृतीयपादादिमसूत्रात् प्राक् वर्तमानाधिकारः। तस्मिन्नधिकारे येन विशेषणेन याभ्यः प्रकृतिभ्यः वर्तमाने प्रत्यया विहिताः ते सर्वे तेनैव विशेषणेन ताभ्यः प्रकृतिभ्यः वर्तमानसमीपकाले भूते भविष्यति च वा भवन्तीत्यर्थः। अत्र भूते भविष्यति चेत्यार्थिकम्। तयोरेव वर्तमानसामीप्यसत्वात्। कदा आगतोऽसीत्यागतं प्रति प्रश्नः। अयमागच्छामीत्युत्तरम्। अव्यवहितपूर्वकाले आगतवानस्मीत्यर्थः। वर्तमानसमीपकाले भूते लट्। अयमित्यनेन आगमनकालीनं प्रस्वेदपरिकरबन्धादियुक्तं रूपं निर्दिश्यते। इदानीमागमं सूचयितुं वर्तमानवत्त्वाभावे भूते लङ्। कदा गमिष्यसीति गमनात्प्राक् प्रश्ने, एष गच्छामि इत्युत्तरम्। अव्यवहितोत्तरकाले गमिष्यामीत्यर्थः। एष इति तु अयमितिवत् व्याख्येयः। वर्तमानकालसमीपे भविष्यति लट्। गमिष्यामि वेति वर्तमानवत्त्वाभावे भविष्यति लट्। **आशंसायां भूतवच्च**॥ **नानुवर्तते इति**॥ अत्र व्याख्यानमेव शरणम्। अप्राप्तस्य प्रियस्य प्राप्तीच्छा आशंसा। सा च भविष्यद्विषयैव। भूते इच्छाविरहात्। तदाह। **भविष्यति काले इति**॥ **देवश्चेदिति**॥ देवः पर्जन्यः, अवर्षीच्चेत् धान्यमवाप्स्म। वर्षति चेत् वपामः। वर्षिष्यति चेत् वप्स्याम इत्यन्वयः। भूतवद्भावात् भविष्यति लुङ्। अवर्षीदिति अवाप्स्मेति च

वपामः—वप्स्यामो वा। 'सामान्यातिदेशे विशेषानतिदेशः।' तेन लङ्लिटौ न।

२७९१ । क्षिप्रवचने लृट् । (३-३-१३३)

क्षिप्रपर्याये उपपदे पूर्वविषये लट् स्यात्। वृष्टिश्चेत्क्षिप्रमाशु त्वरितं वा यास्यति। शीघ्रं वप्स्यामः। नेति वक्तव्ये लङ्ग्रहणं लुटोऽपि विषये यथा स्यात्। श्वः शीघ्रं वप्स्यामः।

२७९२ । आशंसावचने लिङ् । (३-३-१३४)

आशंसावाचिन्युपपदे भविष्यति लिङ् स्यान्न तु भूतवत्। गुरुश्चेदुपेयादाशंसेऽधीयीय। आशंसे क्षिप्रमधीयीय।

२७९३ । नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः । (३-३-१३५)

क्रियायाः सातत्ये सामीप्ये च लङ्लुटौ न। यावज्जीवमन्नमदादास्यति

भवति। वपधातोर्लुडि उत्तमपुरुषबहुवचने अवाप्स्मेति भवति। वृष्टिवापयोरुभयोरप्याशंसाविषयत्वादुभयत्रापि लुङ्। वर्तमानवत्त्वपक्षे तु लट्। तदुभयाभावे तु लृट्। ननु भूतवत्त्वपक्षे लङ्लिटावपि कुतो न स्यातामित्यत आह। **सामान्यातिदेशे इति**॥ भूतत्वसामान्ये विहितस्यातिदेशादनद्यतनभूतत्वविशेषविहितयोर्लङ्लिटोर्नातिदेश इत्यर्थः। एतच्च भाष्ये स्पष्टम्। **क्षिप्रवचने लृट्**॥ वचनग्रहणात् क्षिप्रपर्याये इति लभ्यते। तदाह। **क्षिप्रपर्याये इति**॥ **पूर्वविषये इति**॥ आशंसायामित्यर्थः। 'आशंसायां भूतवच्च' इत्यस्यापवादः। ननु क्षिप्रवचने नेत्येतावतैव आशंसायां क्षिप्रपर्याये उपपदे भविष्यति न भूतवत् न वर्तमानवदिति लाभाल्लृङ्ग्रहणमनर्थकमित्यत आह। **नेति वक्तव्ये इति**॥ क्षिप्रवचने नेत्युक्ते 'सामान्यातिदेशे विशेषानतिदेशः' इति न्यायेन भविष्यत्सामान्ये विहितस्य लृङ एव निषेधः स्यात्, नतु लुटः। तस्य अनद्यतनभविष्यद्विशेषविधानात्। लृङ्ग्रहणे तु उक्ताधिषये लृङेव स्यात्, नतु लकारान्तरमिति लाभाल्लुटोऽपि विषये लृटेवेति लभ्यत इत्यर्थः। **श्वः शीघ्रं वप्स्यामः इति**॥ अनद्यतनत्वद्योतनाय श्वश्शब्दः। अत्र न लुडिति भावः। **आशंसावचने लिङ्**॥ आशंसायाः प्राप्तीच्छायाः भूते असम्भवात् भविष्यतीति लभ्यत इति मत्वा आह। **भविष्यतीति**॥ 'आशंसायां भूतवच्च' इत्यस्यापवादः। तदाह। **नतु भूतवदिति**॥ **गुरुश्चेदिति**॥ गुरुरुपेयानेत्र क्षिप्रमधीयीयेत्याशंसे इत्यन्वयः। क्षिप्रयोगेऽपि परत्वाल्लिङेव नतु लृडिति भावः। **नानद्यतनवत्**॥ क्रियायाः प्रबन्धः सातत्यम्। तदाह। **क्रियायाः सातत्ये इति**॥ अनद्यतनवदित्यनेन अनद्यतने भूते भविष्यति च विहितौ लङ्लुटौ विवक्षितौ। तदाह। **लङ्लुटौ नेति**॥ अनद्यतने भूते लङ् न भवति। भविष्यत्यनद्यतने तु लुट् नेत्यर्थः। क्रियासातत्ये लङ्निषेधमुदाहरति। **यावज्जीवमन्नमदादिति**॥ लुडि 'गातिस्था' इति सिचो लुक्। सामीप्ये

वा। सामीप्यं तुल्यजातीयेनाव्यवधानम्। येयं पौर्णमास्यतिक्रान्ता तस्यामग्नी-नाधित। सोमेनायष्ट। येयममावास्याऽऽगामिनी तस्यामग्नीनाधास्यते। सोमेन यक्ष्यते।

२७९४। भविष्यति मर्यादावचनेऽवरस्मिन्। (३-३-१३६)

भविष्यति काले मर्यादोक्तावरस्मिन्प्रविभागेऽनद्यतनवन्न। योऽयमध्वा गन्तव्यः आपाटलिपुत्रात्तस्य यदवरं कौशाम्ब्यास्तत्र सक्तून्पास्यामः।

२७९५। कालविभागे चानहोरात्राणाम्। (३-३-१३७)

पूर्वसूत्रं सर्वमनुवर्तते। अहोरात्रसम्बन्धिनि विभागे प्रतिषेधार्थमिदम्। योगविभाग उत्तरार्थः। योऽयं वत्सर आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे। 'अनहोरात्राणाम्' किम्। योऽयं मासः आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्राध्येतास्महे।

उदाहरिष्यन्नाह। **सामीप्यमिति**॥ **येयमिति**॥ पौर्णमास्या उपरि कृष्णपक्षे कतिपयाहोरात्रैः व्यवधानेऽपि सामीप्यमस्त्येव। पौर्णमास्यन्तरेण सजातीयेन व्यवधानाभावात्। **आधितेति**॥ धाधातोर्लुङि 'स्थाध्वोरिच्च' इति धाधातोरित्त्वं सनः कित्त्वञ्च। 'हृस्वादङ्गात्' इति सिचो लोपः। **सोमेनायष्टेति**॥ येयं पौर्णमास्यतिक्रान्ता तस्यामित्यनुषज्यते। अथ क्रियासातत्ये लुटो निषेधमुदाहरति। **येयममावास्येति**॥ **सोमेन यक्ष्यते इति**॥ येयममावास्या आगामिनी तस्यामित्यनुषज्यते। **भविष्यति मर्यादा**॥ अवरस्मिन्निति च्छेदः। **अनद्यतनवन्नेति**॥ लुट्नेत्यर्थः। अक्रियाप्रबन्धार्थमिति भाष्यम्। असामीप्यार्थश्चेति कैयटः। **योऽयमिति**॥ कस्मिंश्चिज्जनपदविशेषे वसतः पाटलिपुत्राख्यं नगरविशेषं जिगमिषोरिदं वाक्यम्। मध्येमार्गङ्कौशाम्बी नाम काचिन्नगरीति स्थितिः। तत्र आपाटलिपुत्रात् योऽयं गन्तव्योऽध्वा तस्य अध्वनः मध्ये वर्तिन्याः कौशाम्ब्याः यदवरं पूर्वप्रदेशः तत्र सक्तून् श्वःप्रभृति पास्याम इति योजना। अत्र कौशाम्ब्या इति मर्यादा गम्यते। अवरमित्यनेन अवरत्वङ्गम्यते। अत्र भविष्यत्यनद्यतने लुट् न, किन्तु लृडेवेति भावः। **कालविभागे**॥ **पूर्वसूत्रमिति**॥ 'भविष्यति मर्यादावचनेऽवरस्मिन्' इति सूत्रमित्यर्थः। ननु कालमर्यादायामपि पूर्वसूत्रेणैव सिद्धमित्यत आह। **अहोरात्रेति**॥ तथाच अहोरात्रसम्बन्धिने प्रविभागे भविष्यति मर्यादावचने इत्युक्तविधिर्न भवतीत्यर्थः। ननु 'भविष्यति मर्यादावचनेऽवरस्मिन्' इत्येकमेव सूत्रङ्कुतो नेत्यत आह। **योगविभाग उत्तरार्थः इति**॥ इदमुत्तरसूत्रे स्पष्टीभविष्यति। **योऽयं वत्सर आगामीति**॥ कालतो मर्यादायामुदाहरणम्। **आग्रहायण्या इति**॥ मार्गशीर्षपौर्णमास्या इत्यर्थः। **युक्ताः इति**॥ नियमयुक्ता इत्यर्थः। अध्येष्यामहे इत्यत्र न लुट्। किन्तु लृडेवेति भावः। **पञ्चदशरात्रः इति**॥ पञ्चदश रात्रयो यस्य पक्षस्येति बहुव्रीहिः। 'अच्प्रत्यन्ववपूर्वात्' इत्यच्समासान्तः। यद्वा पञ्चदशानां रात्रीणां समाहारः पञ्चदशरात्रः। 'अहः-

२७९६ । परस्मिन्विभाषा । (३-३-१३८)

अवरस्मिन्वर्जे पूर्वसूत्रद्वयमनुवर्तते। अप्राप्तविभाषेयम् । योऽयं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्राध्येष्यामहे । अध्येतास्महे । 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' (सू २२२९) भविष्यतीत्येव । सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत् ।

२७९७ । भूते च । (३-३-१४०)

पूर्वसूत्रं सम्पूर्णमनुवर्तते ।

२७९८ । वोताप्योः । (३-३-१४१)

'वा 'आ' 'उताप्योः' 'उताप्योः—' (सू २८०९) इत्यतः प्राग्भूते लिङ्निमित्ते लृङ् वेत्यधिक्रियते । पूर्वसूत्रं तु 'उताप्योः' इत्यादौ प्रवर्तत इति विवेकः ।

२७९९ । गर्हायां लडपिजात्वोः । (३-३-१४२)

आभ्यां योगे लट् स्यात् । कालत्रये गर्हायाम् । लुङादीन्परत्वादयं बाधते । अपि जायां त्यजसि । जातु गणिकामाधत्से । गर्हितमेतत् ।

सर्वैकदेश' इत्यच्समासान्तः । 'सङ्ख्यापूर्वं रात्रं क्लीबम्' इति तु 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति वचनान्न भवति । **परस्मिन्विभाषा** ॥ **अनुवर्तते इति** ॥ तथाच भविष्यति काले मर्यादोक्तौ परस्मिन् विभागे अनद्यतनवद्वेति फलितम् । 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति व्याख्यातं भूधातुनिरूपणे । **भूते च** ॥ अधिकारोऽयम् । **अनुवर्तते इति** ॥ तथाच लिङ्निमित्ते लृङ् क्रियातिपत्तौ भूत इति अधिक्रियते इति फलितमिति भावः । **वोताप्योः** ॥ अयमप्यधिकारः । वा आ उताप्योरिति छेदः । भूते इति लिङ्निमित्ते लृङिति चानुवर्तते । तदाह । **उताप्योरित्यतः प्रागिति** ॥ उताप्योः समर्थयोरित्यतः प्रागित्यर्थः । नन्वनेन 'उताप्योः' इत्यतः प्राक् भूते लिङ्निमित्ते लृङ्ल्यधिकाराक्रान्तत्वात् भूते चेति पूर्वमधिकारसूत्रनिर्विषयमित्यत आह । **पूर्वसूत्रं त्विति** ॥ 'उताप्योः समर्थयोर्लिङ्' इत्यारभ्य 'इच्छार्थेभ्यो विभाषा' इत्यतः भूते चेति पूर्वमधिकारसूत्रं प्रवर्तत इत्यर्थः । इमावधिकारौ यत्र लिङ्विधिस्तत्रैव प्रवर्तते, नतु लङादिविधौ । लिङ्निमित्ताभावात् । **गर्हायाम्** ॥ अपि जातु अनयोर्द्वन्द्वः । अत्र 'वोताप्योः' इति 'भूते लिङ्निमित्ते लृङ् वा' इत्यधिकारो न सम्बध्यते । लङ्विधानेन तद्विषये लिङ्निमित्ताभावात् । **कालत्रये इति** ॥ वर्तमाने भूते भविष्यति चेत्यर्थः । भविष्यतीति निवृत्तम् । अतः कालसामान्ये लडिति भावः । **परत्वादिति** ॥ अनवकाशत्वाच्चेत्यपि द्रष्टव्यम् । अपि जायामित्यत्र जातु गणिकामित्यत्र च अपि-

२८००। विभाषा कथमि लिङ् च। (३-३-१४३)

गर्हायामित्येव। कालत्रये लिङ् चाल्लट्। कथं धर्मं त्यजेः त्यजसि वा। पक्षे कालत्रये लकारः। अत्र भविष्यति नित्यं लङ् भूते वा। कथं नाम तत्रभवान्धर्ममत्यक्ष्यत्।

२८०१। किंवृत्ते लिङ्लृटौ। (३-३-११४)

गर्हायामित्येव। विभाषा तु नानुवर्तते। कः—कतरः—कतमो वा हरिं निन्देत्—निन्दिष्यति वा। लङ् प्राग्वत्।

२८०२। अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि। (३-३-१४५)

गर्हायामिति निवृत्तम्। अनवक्लृप्तिरसंभावना। अमर्षोऽक्षमा। न सम्भावयामि न मर्षये वा भवान्हरिं निन्देत्—निन्दिष्यति वा। कः—कतरः—कतमो वा हरिं निन्देत्—निन्दिष्यति वा। लङ् प्राग्वत्।

जातुशब्दौ निन्दाद्योतकौ। तदाह। **गर्हितमेतदिति**॥ **विभाषा कथमि लिङ् च**॥ **गर्हायामित्येवेति**॥ अनुवर्तत एवेत्यर्थः। कालत्रये लिङिति शेषपूरणम्। भविष्यतीति निवृत्तमिति भावः। चाल्लडिति समुच्चीयते इति शेषः। तथाच कथमित्यस्मिन् प्रयुज्यमाने कालत्रये गर्हायां लिङ्लटौ वा स्त इति फलितम्। **कथं धर्मं त्यजेरिति**॥ त्यक्तवान् त्यक्ष्यसि त्यजसि वेत्यर्थः। गर्हितमेतदिति कथंशब्दाद्गम्यते। लटि उदाहरति। **त्यजसि वेति**॥ उक्तोऽर्थः। **पक्षे इति**॥ विभाषाग्रहणाल्लिङ्लटोरभावपक्षे भूते वर्तमाने भविष्यति च कालत्रये लिट्लङ्लुङ्लृट्लृङ्लृटः इत्यर्थः। **अत्रेति**॥ अत्र उक्तविषये भविष्यति काले क्रियायाः अनिष्पत्तौ गम्यमानायां 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति नित्यमेव लृङ्। कथमो गर्हायाश्च लिङ्निमित्तस्य सत्वादित्यर्थः। विशेषविहितत्वादिति भावः। **भूते वेति**॥ 'वोताप्योः' इति भूते लिङ्निमित्ते लृङ वेति अधिकृतत्वादुक्तविषये भूतकाले लृङ् वेत्यर्थः। भविष्यति नित्यं लृडित्यत्रोदाहरति। **कथन्नामेति**॥ तत्रभवानिति समुदायः पूज्यवाची। वेदप्रामाण्याभ्युपगन्तेति यावत्। एवंविधः कथं धर्ममत्यक्ष्यत्। तत्त्यागस्य गर्हितत्वादिति भावः। **किंवृत्ते लिङ्लृटौ**॥ **नानुवर्तते इति**॥ व्याख्यानादिति भावः। विभक्त्यन्तं डतरडतमान्तञ्च किंशब्दनिष्पन्नं किंवृत्तमित्युक्तम्। तस्मिन्प्रयुज्यमाने गर्हायां लिङ्लृटौ स्त इत्यर्थः। सर्वलकाराणामपवादाविति वृत्तिः। **लृङ् प्राग्वदिति**॥ भविष्यति नित्यं लृङ्, भूते वेति प्रागुक्तमिहाप्यनुसन्धेयमित्यर्थः। लिङ्निमित्तस्य किंवृत्तस्य गर्हायाश्च सत्त्वादिति भावः। **अनवक्लृप्त्यमर्ष**॥ **निवृत्तमिति**॥ व्याख्यानादिति भावः। अनवक्लृप्त्यमर्षयोः लिङ्लृटोश्च यथासङ्ख्यमन्वेष्यते। अल्पाच्तरस्य अमर्षशब्दस्य पूर्वनिपातत्यागादिति वृत्तिः। **न सम्भावयामीति**॥ अकिंवृत्ते उदाहरणम्। भवान् हरिन्निन्देदिति यत् तत् न सम्भावयामि न मर्षये वेत्यन्वयः। किंवृत्ते उदाहरति। **कः**

२८०३ । किंकिलास्त्यर्थेषु लृट् । (३-३-१४६)

अनवक्लृप्त्यमर्षयोरित्येतत् 'गर्हायां च' (सू २८०६) इति यावदनुवर्तते । किंकिलेति समुदायः क्रोधद्योतक उपपदम् । अस्त्यर्थाः अस्त्रिभवतिविद्यतयः । लिङोऽपवादः । न श्रद्दधे न मर्षये वा किंकिल त्वं शूद्रान्नं भोक्ष्यसे । अस्ति भवति विद्यते वा शूद्रीं गामिष्यसि । अत्र लृङ् न ।

२८०४ । जातुयदोर्लिङ् । (३-३-१४७)

'यदायद्योरुपसंख्यानम्' (वा २२७५) । लृटोऽपवादः । जातु यद्यदा यदि वा त्वादृशो हरिं निन्देन्नावकल्पयामि न मर्षयामि । लृङ् प्राग्वत् ।

२८०५ । यच्चयत्रयोः । (३-३-१४८)

यच्च यत्र वा त्वमेवं कुर्याः न श्रद्दधे न मर्षयामि ।

कतरः इति ॥ **लृङ् प्राग्वदिति** ॥ भविष्यति नित्यं लृङ्, भूते वेत्युक्तमिहाप्यनुसन्धेयमित्यर्थः । **किङ्किल** ॥ किङ्किलेतिसमुदायस्य अस्त्यर्थानाञ्च द्वन्द्वः । **यावदिति** ॥ 'गर्हायाञ्च' इत्यभिव्याप्येत्यर्थः । किङ्किलेत्यस्मिन् अस्त्यर्थेषु च प्रयुज्यमानेषु अनवक्लृप्त्यमर्षयोर्लृट् स्यादित्यर्थः । पूर्वसूत्रेण लृङ्लृटोः प्राप्तौ लृङेवेत्यर्थमिदम् । तदाह । **लिङोऽपवादः इति** ॥ **न श्रद्दधे इति** ॥ न सम्भावयामीत्यर्थः । त्वं शूद्रान्नं भोक्ष्यसे इति यत् तत् न श्रद्दधे न मर्षये वा किङ्किलेत्यन्वयः । किङ्किलेति क्रोधं द्योतयति । **अस्तीति** ॥ शूद्रस्य स्त्री शूद्री । ताञ्चमिष्यसीत्यस्ति भवति विद्यते वेत्यन्वयः । **अत्र लृङ् नेति** ॥ भविष्यति नित्यं लृङ्, भूते वेत्युक्तमिह न सम्भवति । अत्र लिङो विध्यभावेन लिङ्निमित्तविरहात् । **जातुयदोर्लिङ्** ॥ जातु यदा अनयोः प्रयोगे अनवक्लृप्त्यमर्षयोर्लिङ् स्यादित्यर्थः । यदेति विभक्तिप्रतिरूपकमव्ययम् । अनवक्लृप्त्यमर्षयोराकिंवृत्तेऽपीति लिङ्लृटौ प्राप्तौ लिङेवेत्यर्थमिदम् । तदाह । **लृटोऽपवादः इति** ॥ **यदायद्योरिति** ॥ यदायद्योः प्रयोगेऽपि उक्तविषये लिङ उपसङ्ख्यानमित्यर्थः । जात्वादिशब्दाः उदाहरणे अनवक्लृप्त्यमर्षद्योतकाः । त्वादृशो हरिन्निन्देदित्येतत् नावकल्पयामि न मर्षयामि वेत्यन्वयः । नावकल्पयामीत्यस्य न सम्भावयामीत्यर्थः । **लृङ् प्राग्वदिति** ॥ भविष्यति नित्यं लृङ् भूते वेत्युक्तमिहाप्यनुसन्धेयमित्यर्थः । जात्वादियोगस्य अनवक्लृप्त्यमर्षयोश्च लिङ्निमित्तत्वादिति भावः । **यच्चयत्रयोः** ॥ यच्चेति समुदाये यत्रशब्दे च प्रयुज्यमाने अनवक्लृप्त्यमर्षयोर्लिङ् स्यादित्यर्थः । लृटोऽपवादः । योगविभागस्तु उत्तरसूत्रे अनयोरेवानुवृत्त्यर्थः । उदाहरणे यच्चेति यत्रेति च अनवक्लृप्त्यमर्षद्योतकौ । त्वमेवङ्कुर्या इत्येतत् न श्रद्दधे न मर्षयामि वेत्यन्वयः । अत्रापि भविष्यति नित्यं लृङ्, भूते वेत्युक्तमनुसन्धेयम् । लिङ्निमित्तस्य

२८०६। गर्हायां च। (३-३-१४९)

अनवक्लृप्त्यमर्षयोरिति निवृत्तम्। यच्चयत्रयोर्योगे गर्हायां लिङेव स्यात्। यच्च यत्र वा त्वं शूद्रं याजयेः। अन्याय्यं तत्।

२८०७। चित्रीकरणे च। (३-३-१५०)

यच्च यत्र वा त्वं शूद्रं याजयेः। आश्चर्यमेतत्।

२८०८। शेषे लृडयदौ। (३-३-१५१)

यच्चयत्राभ्यामन्यस्मिन्नुपपदे चित्रीकरणे गम्ये धातोर्लृट् स्यात्। आश्चर्यमन्धो नाम कृष्णं द्रक्ष्यति। 'अयदौ' किम्। आश्चर्यं यदि मूकोऽधीयीत[1]।

२८०९। उताप्योः समर्थयोर्लिङ्। (३-३-१५२)

बाढमित्यर्थेऽनयोस्तुल्यार्थता। उत अपि वा हन्यादघं हरिः। 'समर्थयोः' किम्। उत दण्डः पतिष्यति। अपिधास्यति द्वारम्। प्रश्नः प्रच्छादनं च गम्यते। इतः प्रभृति लिङ्निमित्ते क्रियातिपत्तौ भूतेऽपि नित्यो लङ्।

सत्त्वात्। **गर्हायाञ्च ॥ निवृत्तमिति ॥** व्याख्यानादिति भावः। 'यच्चयत्रयोः' इति लिङिति चानुवर्तते। तदाह। **यच्चयत्रयोर्योगे इति ॥ लिङेवेति ॥** नतु लकारान्तरमित्यर्थः। उदाहरणे यच्चेति यत्रेति च गर्हाद्योतकम्। त्वं शूद्रं याजयेरिति यत् तदन्याय्यमित्यन्वयः। लृङ् प्राग्वत्। **चित्रीकरणे च ॥** यच्चयत्रयोः प्रयोगे आश्चर्ये गम्ये लिङेव स्यात्, नतु लकारान्तरमित्यर्थः। उदाहरणे यच्चेति यत्रेति चाश्चर्यद्योतकम्। त्वं शूद्रं याजयेरिति यत् तदाश्चर्यमित्यन्वयः। **शेषे लृडयदौ ॥** यच्चयत्राभ्यामन्यश्शेषः। तदाह। **यच्चयत्राभ्यामन्यस्मिन्निति ॥** यदिभिन्न इति शेषः। **लृट् स्यादिति ॥** नतु लकारान्तरमित्यर्थः। **आश्चर्यमिति ॥** अन्धः कृष्णं द्रक्ष्यतीत्याश्चर्यमित्यन्वयः। नामेत्यव्ययमाश्चर्यद्योतकम्। **मूकः इति ॥** मूको अधीयीत इत्याश्चर्यमित्यन्वयः। यदीत्याश्चर्यद्योतकम्। **उताप्योः ॥** समौ अर्थौ ययोरिति विग्रहः। शकन्ध्वादित्वात्पररूपम्। एकार्थकयोरित्यर्थः। कमर्थमादायानयोरेकार्थकत्वमित्यत आह। **बाढमिति ॥** तथाच बाढार्थकयोः उत अपि इत्यनयोः प्रयोगे लिङ् स्यान्न तु लकारान्तरमित्यर्थः। **उत अपि वेति ॥** उत हन्यादघं हरिः, अपि हन्यादघं हरिरित्यन्वयः। उतापी बाढमित्यर्थकौ। **गम्यते इति ॥** उत दण्डः पतिष्यतीत्यत्र उतशब्देन प्रश्नो गम्यते। अपिधास्यति द्वारमित्यत्र अपिना धाधातोः प्रच्छादनार्थकत्वङ्गम्यत इत्यर्थः। **इतः प्रभृतीति ॥** 'वोताप्योः' इति मर्यादायामाङ्। 'उताप्योः' इत्यतः प्राक् भूते लिङ्निमित्ते लृङ् वेत्यधिक्रियते। 'उताप्योः' इत्यादिसूत्रेषु भूते 'लिङ्-

---

१, अत्र सोऽधीयीतेत्येव पाठः बहुषु ग्रन्थेषु दृश्यते।

२८१० । कामप्रवेदनेऽकच्चिति । (३-३-१५३)

स्वाभिप्रायाविष्करणे गम्यमाने लिङ् स्यान्न तु कच्चिति । कामो मे भुञ्जीत भवान् । 'अकच्चिति' इति किम् । कच्चिज्जीवति ।

२८११ । सम्भावनेऽलमिति चेत्सिद्धाप्रयोगे । (३-३-१५४)

अलमर्थोऽत्र प्रौढिः । सम्भावनमित्यलमिति च प्रथमया सप्तम्या च विपरिणम्यते । सम्भावनेऽर्थे लिङ स्यात्, तच्चेत्सम्भावनमलमिति सिद्धाप्रयोगे सति । अपि गिरिं शिरसा भिन्द्यात् । 'सिद्धाप्रयोगे' किम् । अलं कृष्णो हस्तिनं हनिष्यति ।

२८१२ । विभाषा धातौ सम्भावनवचनेऽयदि । (३-३-१५५)

निमित्ते लृङ् क्रियातिपत्तौ' इत्येवाधिक्रियते इत्युक्तम् । एवञ्च 'उताप्योः' इति सूत्रप्रभृति लिङ्निमित्ते क्रियातिपत्तौ भूते लृडित्येवाधिक्रियते, नतु वाग्रहणम् । अतो नित्यमेवात्र विषये क्रियातिपत्तौ भूते भविष्यति च लृडित्यर्थः । **कामप्रवेदनेऽकच्चिति** ॥ अकच्चितीति च्छेदः । तदाह । **नतु कच्चितीति** ॥ सर्वलकारापवादः । अभिप्रायः इच्छा । **कामः इति** ॥ भवान् भुञ्जीतेति मे कामः । इच्छेत्यर्थः । अत्र लिङ्निमित्तस्य सत्त्वात् क्रियातिपत्तौ भूतेऽपि नित्यं लृङ् । प्रश्न एवायङ्कामप्रवेदनद्योतक इति प्राप्तिः । अत्र कच्चिच्छब्दस्य इच्छार्थकत्वाभावादिच्छार्थेष्विति वक्ष्यमाणन्नात्र प्रवर्तते । **सम्भावने** ॥ **अलमर्थोऽत्र प्रौढिरिति** ॥ पर्याप्तिरित्यर्थः । **विपरिणम्यते इति** ॥ सम्भावने इति यत् सप्तम्यन्तन्तत् आवर्त्य प्रथमया सम्भावनमिति च विपरिणम्यते । यत्तु अलम् इति प्रथमान्तन्तत् आवर्त्य सप्तम्या अलमि इति च विपरिणम्यत इत्यर्थः । छान्दसं विभक्तिव्यत्ययमाश्रित्येति शेषः । तथाच सम्भावने इति सप्तम्यन्तं सम्भावनमिति प्रथमान्तञ्च लभ्यते । तथा अलम् इति प्रथमान्तं अलमि इति सप्तम्यन्तञ्च लभ्यते। तत्र सम्भावने इति सप्तम्यन्तमर्थनिर्देशपरम् । तदाह । **सम्भावनेऽर्थे लिङ् स्यादिति** ॥ उत्कटान्यतरकोटिकं ज्ञानं सम्भावनमित्युच्यते । सम्भावनमिति प्रथमान्तन्तु अलमिति प्रथमान्तेन विशेष्यते । इतिहेतौ । तदाह । **तच्चेदिति** ॥ तत्सम्भावनम् अलं पर्याप्तिहेतुकञ्चेदित्यन्वयः । षिधधातोर्ज्ञानार्थकात् 'मतिबुद्धि' इति वर्तमाने कर्मणि क्ते सिद्धशब्दः। सिद्धे गम्यमानेऽप्यलमर्थे अप्रयोगो यस्य सः सिद्धाप्रयोगः तस्मिन्निति विग्रहः। अलमि इति सप्तम्यन्तमत्र विशेष्यसमर्पकं सम्बध्यते । अलंशब्दप्रयोगं विनापि तदर्थे गम्यमाने इति यावत् । तदाह । **सिद्धाप्रयोगे सतीति** ॥ अलमीति शेषः । **अपि गिरिमिति** ॥ बलवन्तं पुरुषमधिकृत्य अत्युक्तिरियम् । प्रायेण शिरसा गिरिं भेत्तुमयं समर्थ इत्यर्थः । गिरिभेदसम्भावनस्य सामर्थ्यहेतुकत्वद्योतकः अपिशब्दः। अत्र लिङ्निमित्तसत्त्वात् क्रियातिपत्तौ भूते लृङ्। 'अलमिति सम्भावने सिद्धाप्रयोगश्चेत्' इति सुवचम् । **विभाषा धातौ** ॥ अयदीति छेदः । तदाह । **नतु**

पूर्वसूत्रमनुवर्तते। संभावनेऽर्थे धातावुपपदे उक्तेऽर्थे लिङ् वा स्यात्, न तु यच्छब्दे । पूर्वेण नित्ये प्राप्ते वचनम्। सम्भावयामि भुञ्जीत भोक्ष्यते वा भवान्। 'अयदि' किम्। सम्भावयामि यद्भुञ्जीथास्त्वम्।

२८१३। हेतुहेतुमतोर्लिङ्। (३-३-१५६)

वा स्यात्। कृष्णं नमेच्चेत्सुखं यायात्। कृष्णं नंस्यति चेत्सुखं यास्यति। 'भविष्यत्येवेष्यते।' (वा २२७५)। नेह। हन्तीति पलायते।

२८१४। इच्छार्थेषु लिङ्लोटौ। (३-३-१५७)

इच्छामि भुञ्जीत—भुङ्क्तां वा भवान्। एवं कामये प्रार्थये इत्यादियोगे बोध्यम्। 'कामप्रवेदने इति वक्तव्यम्' (वा २२७६)। नेह। इच्छन्करोति।

२८१५। लिङ् च। (३-३-१५९)

समानकर्तृकेषु इच्छार्थेषु लिङ्। भुञ्जीयेतीच्छति।

२८१६। इच्छार्थेभ्यो विभाषा वर्तमाने। (३-३-१६०)

लिङ् स्यात्पक्षे लट्। इच्छेत्। इच्छति। कामयेत। कामयते।

यदिति ॥ लिङभावे लट्। 'शेष लृडयदौ' इत्यतस्तदनुवृत्तेः। **सम्भावयामीति** ॥ प्रायण भोक्तुं समर्थ इत्यर्थः। **हेतुहेतुमतोर्लिङ्** ॥ पूर्वसूत्राद्विभाषानुवृत्तिं मत्वा आह। **वा स्यादिति** ॥ पक्षे लट्। हेतुभूते फलभूते वाऽर्थे वर्तमानाद्धातोर्लिङ् वा स्यादिति यावत्। **भविष्यत्येवेति** ॥ लिडित्यनुवर्तमाने पुनर्लिङ्ग्रहणादिति भावः। **हन्तीतीति** ॥ इतिहेतौ वर्तमानकालिकहननाद्धेतोर्लिरित्यर्थः। अत्र लिङ्निमित्तसत्त्वात्। भविष्यति तु क्रियातिपत्तौ भूते च लृङ्। **इच्छार्थेषु लिङ्लोटौ** ॥ इच्छार्थकधातुषु प्रयुज्यमानेषु लिङ्लोटौ स्तः। सर्वलकारापवादः। असमानकर्तृकविषयमिदम्। समानकर्तृकेषु तु 'लिङ् च' इति वक्ष्यते। **इच्छामीति** ॥ भुञ्जीत भवानिति इच्छामीत्यन्वयः। **कामप्रवेदने इति** ॥ परं प्रति स्वाभिप्रायाविष्करणे इच्छार्थेषु लिङ्लोटाविति विधिरित्यर्थः। **इच्छन्करोतीति** ॥ परं प्रति स्वाभिप्रायाविष्करणाभावान्न लिङ्लोटाविति भावः। 'कामप्रवेदनेऽकर्त्रिति' इति सूत्रन्तु प्रकरणादिना यत्र कामप्रवेदनं नास्त्विच्छार्थकमुपपदमस्ति तद्विषयमिति बोध्यम्। इत उत्तरसूत्रं समानकर्तृकेषु तुमुन्निति तु कृदभ्यकारे व्याख्यास्यते। **लिङ् च** ॥ समानकर्तृकेष्विति इच्छार्थेष्विति च नुवर्तते। तदाह। **समानेत्यादि** ॥ **भुञ्जीयेतीच्छतीति** ॥ अत्र भोक्तुरेव इषिकर्तृत्वात्समानकर्तृकत्वम्। समानकर्तृकेषु इच्छार्थेष्विति च लोटो निवृत्त्यर्थमिदं सूत्रम्। क्रियातिपत्तौ तु भावष्यति नित्य लृङ् भूते वेत्यधिकारः सम्पूर्णः। **इच्छार्थेभ्यो** ॥ लिडित्येवानुवर्तते। समानकर्तृकेष्विति तु निवृत्तम्। तत् सूचयन्नुदाहरति। **इच्छेत्। इच्छतीति** ॥ 'विधिनिमन्त्रण' इति भूधातौ व्याख्यातमपि सूत्र-

'विधिनिमन्त्रण—' (सू २२०८) इति लिङ्। विधौ। यजेत। निमन्त्रणे। इह भुञ्जीत भवान्। आमन्त्रणे। इहासीत। अधीष्टे। पुत्रमध्यापयेद्भवान्। 'संप्रैसारणे'। किं भो वेदमधीयीय उत तर्कम्। प्रार्थने। भो भोजनं लभेय। एवं लोट्।

२८१७। प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च। (३-३-१६३)

लोट् च। प्रैषो विधिः। अतिसर्गः कामचारानुज्ञा। भवता यष्टव्यम्। भवान्यजताम्। चकारेण लोटोऽनुकर्षणं प्राप्तकालार्थम्।

२८१८। लिङ् चोर्ध्वमौहूर्तिके। (३-३-१६४)

प्रैषादयोऽनुवर्तन्ते। मुहूर्तादूर्ध्वं यजेत—यजताम्—यष्टव्यम्।

२८१९। स्मे लोट्। (३-३-१६५)

पूर्वसूत्रस्य विषये। लिङः कृत्यानां चापवादः। ऊर्ध्वं मुहूर्ताद्यजतां स्म।

२८२०। अधीष्टे च। (३-३-१६६)

क्रमप्राप्तत्वात् स्मारितम्। **सम्प्रसारणे इति** ॥ सम्प्रश्ने इत्यर्थः। **एवं लोडिति** ॥ लोट् चेति विध्यादिषु विहितो लोडप्येवमुदाहृियते इत्यर्थः। **प्रैषातिसर्ग** ॥ **लोट् चेति** ॥ पूर्वसूत्रोपात्तो लोट् चकारात्समुच्चीयते। कृत्यसंज्ञकाः प्रत्ययाः वक्ष्यमाणो लोट्च प्रैषादिषु भवन्तीत्यर्थः। प्रैषे अतिसर्गे च कृत्यप्रत्ययमुदाहरति। **भवता यष्टव्यमिति** ॥ भावे तव्यप्रत्ययः। लोटमुदाहरति। **भवान् यजतामिति** ॥ ननु चकारेण लोटोऽनुकर्षणं व्यर्थम्। प्रैषस्य विधिरूपतया अतिसर्गस्य आमन्त्रणरूपतया च 'लोट् च' इत्यनेनैव सिद्धेरित्यत आह। **चकारेणेति** ॥ प्राप्तकाले यथा। गुरुणा भोक्तव्यं। गुरुर्भुञ्जीत। भोजनं प्राप्तावसरमित्यर्थः। प्राप्तकाले च कृत्याश्च, इत्युक्तौ तु निमन्त्रणादिष्वपि कृत्याः स्युः। अतः प्रैषादिग्रहणम्। **लिङ् चोर्ध्वमौहूर्तिके** ॥ 'लोडर्थलक्षणे च' इत्युत्तरमेवज्जातीयकमेवं सूत्रं लिङ्लङ्लुङ्लृङ्विधायकं प्राक् पठितम्। तत्र ऊर्ध्वमौहूर्तिकशब्दो व्याख्यातः। **प्रैषादयः इति** ॥ तथाच मुहूर्तादुपरितनकालके धात्वर्थे विद्यमानाद्धातोः प्रैषातिसर्गप्राप्तकालेषु लिङ् च स्यात् लोट् कृत्याश्चेत्यर्थः। क्रमेण लिङादीनुदाहरति। **मुहूर्तादूर्ध्वं यजेत-यजतां-यष्टव्यमिति** ॥ अत्र प्राप्तकाले अप्राप्तस्य लिङो विधिः। विध्यादिसूत्रे लिङ्विधौ प्राप्तकालस्य ग्रहणाभावात्। प्रैषातिसर्गयोस्तु विध्यादिसूत्रेणैव लिङ् सिद्ध्यति। लिङ एवात्र विधौ तु, तेन लोटः कृत्यानाञ्च बाधः स्यात्। अतश्चकारेण तेषामपि विधिरिति ज्ञेयम्। **स्मे लोट्** ॥ **पूर्वसूत्रेति** ॥ तथाच मुहूर्तादुपरितनकाले प्रैषातिसर्गप्राप्तकालेषु लोडेव स्यात्, नतु लिङ् कृत्याश्चेत्यर्थः। तदाह। **लिङः कृत्यानाञ्चापवादः इति** ॥ **अधीष्टे च** ॥ **लोट् स्यादिति** ॥ 'अधीष्टे च' इति विहितस्य लिङोऽपवादः। अधीष्टं

---

१. अयं पाठः व्याख्यातभिमतः 'संप्रश्ने' इति पाठस्तु साम्प्रदायिकः।

स्मे उपपदेऽधीष्टे लोट् स्यात्। त्वं स्माऽध्यापय।

२८२१। लिङ् यदि। (३-३-१६८)

यच्छब्दे उपपदे कालसमयवेलासु च लिङ् स्यात्। कालः समयो वेला वा यद्भुञ्जीत भवान्।

२८२२। अर्हे कृत्यतृचश्च। (३-३-१६९)

चाल्लिङ्। त्वं कन्यां वहेः।

२८२३। शकि लिङ् च। (३-३-१७२)

शक्तौ लिङ् स्यात्। चात्कृत्याः। भारं त्वं वहेः। 'माङि लुङ्' (२२१९) मा कार्षीः। कथं मा भवतु मा भविष्यतीति। नायं माङ् किंतु माशब्दः।

२८२४। धातुसम्बन्धे प्रत्ययाः। (३-४-१)

सत्कारपूर्वको व्यापार इत्युक्तम्। त्वं स्माऽध्यापयेति गुरुं प्रत्युक्तिः। 'स्मे लोडधीष्टे च' इत्येकसूत्रत्वेन सिद्धे योगविभागस्तु ऊर्ध्वमौहूर्तिक इत्यनुवृत्तिनिवृत्त्यर्थः। 'कालसमयवेलासु तुमुन्' इत्युत्तरसूत्रन्तु कृदधिकारे व्याख्यास्यते। **लिङ् यदि॥** कालसमयवेलास्विल्यनुवर्तते। सर्वलकारापवादः। तुमुनपवादश्च। भुञ्जीत भवानिति यत् तस्य कालः समयो वेला वेत्यन्वयः। **अर्हे कृत्यतृचश्च॥ चाल्लिङिति॥** योग्ये कर्तरि गम्ये कृत्याः तृच् लिङ् चेत्यर्थः। **त्वङ्कन्यां वहेरिति॥** कन्याविवाहस्य योग्य इत्यर्थः। **शकि लिङ् च॥** शकि इति भावे क्विबन्तम्। शक्तौ गम्यमानायामित्यर्थः। **भारं त्वं वहेरिति॥** वोढुं शक्त इत्यर्थः। माङि लुङिति व्याख्यातमपि क्रमप्राप्तं विशेषविवक्षया पुनः स्मार्यते। ननु सर्वलकारापवादोऽयमित्युक्तम्। एवं सति मा भवतु मा भविष्यतीति कथमिति शङ्कते। **कथमिति॥** परिहरति। **नायं माङिति॥ किन्त्विति॥** ङकारानुबन्धविनिर्मुक्तस्यापि अव्ययेषु पाठादिति भावः। नच माशब्दमादाय मा भवत्विल्यादिप्रयोगसत्त्वे 'माङि लुङ्' इति व्यर्थमिति वाच्यम्। सर्वलकारविषये 'न माङ्योगे' इत्यडाड्हितलुङन्तप्रयोगार्थन्तदावश्यकत्वात्। **धातुसम्बन्धे॥** धातुशब्देन धात्वर्थो लक्ष्यते। धातोः सम्बन्ध इति विग्रहः। सम्बन्धस्य द्विनिष्ठत्वात्। तथाच धात्वर्थयोस्सम्बन्धे सति प्रत्ययाः स्युरिति लब्धम्। कस्मिन्नर्थे इत्याकांक्षायाङ्काले इति गम्यते। 'वर्तमाने लट्' इत्यारभ्य तत्तत्कालविशेषेष्वेव प्रत्ययविधिदर्शनात्। तत्र तत्तद्विधिभिरेव तत्तत्कालविशेषे प्रत्ययसिद्धेस्ततोऽन्यस्मिन्काले

---

१ वस्तुतः स नास्त्येव। 'आङ्माङोश्च' इति सूत्रे भाष्ये तथा ध्वनितत्वात्—इति शेखरकृत्॥

धात्वर्थानां संबन्धे यत्र काले प्रत्यया उक्तास्ततोऽन्यत्रापि स्युः। तिङन्तवाच्यक्रियायाः प्राधान्यात्तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः। वसन्ददर्श। भूते लट्। अतीतवासकर्तृकं दर्शनमर्थः। सोमयाज्यस्य पुत्रो भविता। सोमेन यक्ष्यमाणो यः पुत्रस्तत्कर्तृकं भवनम्।

२८२५। क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः। (३-४-२)

पौनःपुन्ये भृशार्थे च द्योत्ये धातोर्लोट् स्यात्तस्य च हिस्वौ स्तः। तिङामपवादः। तौ च हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तस्तिङ्संज्ञौ च।

इति गम्यते। तदाह। **धात्वर्थानामित्यादिना** ॥ धात्वर्थयोरित्यर्थः। उदाहरणबहुत्वाभिप्रायं बहुवचनम्। 'वर्तमानसामीप्ये वर्तमानवद्वा' इत्यादिसूत्रे यत्र काले ये प्रत्यया उक्ताः ते धात्वर्थयोस्सम्बन्धे गम्ये ततोऽन्यस्मिन्नपि काले स्युरिति यावत्। तथाच वसन् ददर्शेत्यत्र लडादेशः शतृप्रत्ययो भूतकाले इति सिद्धं भवति। ननु 'वसन् ददर्श' इत्यत्र भूते लडिव वर्तमाने लिडित्यपि स्यादित्यत आह। **तिङन्तेति** ॥ वसन् ददर्शेत्यादौ तिङन्तवाच्यदर्शनादिक्रिया प्रधानम्। वासादिक्रिया तु दर्शनादिक्रियार्थत्वात् गुणभूता। अतः प्रधानभूतदर्शनादिक्रियानुसारेण गुणभूतवासादिक्रियावाचिभ्य एव इह प्रत्ययाः कालान्तरेषु विधीयन्त इत्यर्थः। **भूते लडिति** ॥ एवञ्च उषित्वा ददर्शेत्यर्थः। तदाह। **अतीतेति** ॥ अतीतवासे कर्ता यस्येति विग्रहः। 'सप्तमीविशेषणे बहुव्रीहौ' इति ज्ञापकाद्यधिकरणपदो बहुव्रीहिः। उदाहरणान्तरमाह। **सोमयाजीति** ॥ सोमेन इष्टवान्यः स सोमयाजी 'करणे यजः' इति भूते विहितो णिनिः इह भविष्यत्यनद्यतभविष्यल्लुङन्तप्रधानक्रियानुसारेण अनद्यतनभविष्यति बोध्यः। तदाह। **सोमेन यक्ष्यमाणः इति** ॥ **भवनमिति** ॥ उत्पत्तिरित्यर्थः। गोमानासीदित्यप्युदाहार्यम्। अत्र गौरस्यास्तीति अस्तिक्रियायां वर्तमानायान्तदस्यास्तीति विहितो मतुप् गौरस्यासीदितीति भूतायामस्तिक्रियायाम्भवति। धात्वर्थद्वयसम्बन्धस्य सत्त्वात्। एतेन अर्थद्वारके धात्वोस्सम्बन्धे इत्यपि व्याख्यानं परास्तम्। तथा सति परस्परसम्बन्धार्थबोधकधातुद्वयप्रयोगे प्रत्यया इत्यर्थलाभात् गोमानासीदित्यत्र मतुबन्तापत्तेः। नहि धात्वोरिह प्रयोगोऽस्ति। धात्वर्थयोस्सम्बन्धे इत्यर्थभ्युपगमे तु गोमानासीदित्यत्र धातुद्वयप्रयोगाभावेऽपि धात्वर्थद्वयस्य सत्त्वादासीदित्यर्थे मतुप् निर्बाध इत्यन्यत्र विस्तरः। **क्रियासमभि** ॥ अत्र चत्वारि वाक्यानि। तत्र क्रियासमभिहारे लोडिति प्रथमं वाक्यम्। पौनःपुन्यं भृशार्थश्च क्रियासमभिहार इत्युक्तम्। क्रियासमभिहारे इति धात्वर्थविशेषणम्। क्रियासमभिहारविशिष्टक्रियावृत्तेर्धातोरिति लभ्यते। लोट् तु द्योतकः। तदाह। **पौनःपुन्ये भृशार्थे च द्योत्ये इति** ॥ क्रियासमभिहारविशिष्टक्रियावृत्तेर्धातोर्लोडिति यावत्। सर्वलकारापवादः। लोटो हिस्वाविति द्वितीयं वाक्यं व्याचष्टे। **तस्येति** ॥ पूर्ववाक्यविहितस्य लोटः हिस्वावादेशौ स्त इत्यर्थः। **तिङामपवादः इति** ॥ अपवादावित्यर्थः। प्रत्येका-

तध्वमोर्विषये तु हिस्वौ वा स्तः। पुरुषैकवचनसंज्ञे तु नानयोरतिदिश्येते। हिस्वविधानसामर्थ्यात्। तेन सकलपुरुषवचनविषये परस्मैपदिभ्यो हिः कर्तरि। आत्मनेपदिभ्यः स्वो भावकर्मकर्तृषु।

२८२६। ससुच्चयेऽन्यतरस्याम्। (३-४-३)

भिप्रायमेकवचनम्। ननु हिस्वयोरुभयोरपि लादेशत्वात् परस्मैपदत्वं स्यात्। तथा सति हेः परस्मैपदत्वं स्वादेशस्य त्वात्मनेपदत्वमितीष्टा व्यवस्था न सिद्ध्येत्। अस्य स्वादेशस्य तङ्प्रत्याहारप्रविष्टत्वाभावेन 'तङानावात्मनेपदम्' इत्यस्याप्रवृत्तेः। 'तिप्तस्झि' इत्यादिसूत्रोपात्तेषु तातामादिष्वेव तङ्संज्ञाप्रवृत्तेः। किञ्च अनयोर्हिस्वयोः 'तिप्तस्झि' इति सूत्रानन्तर्भूतत्वात्तङ्त्वञ्च दुर्लभमित्यत आह। **तौ चेति** ॥ लोटो हिस्वाविति द्वितीयवाक्ये तावत्क्रियासमभिहारे लोडिति प्रथमवाक्यात् लोडित्यनुवृत्तं स्थानषष्ठ्या विपरिणतं तृतीयं वाक्यं सम्पद्यते। तत्र हिलोटो हिस्वौ इति द्वितीयवाक्यात् हिस्वावित्यनुवृत्तं धर्मपरमाश्रीयते। तथा च लोडादेशौ हिस्वबद्भवत इति लभ्यते। कौ भवतः इत्याकांक्षायां पूर्ववाक्योपस्थितौ हिस्वाविति गम्यते। ततश्च याविमौ तिङन्तर्भूतौ हिस्वावुक्तौ तौ प्रसिद्धलोडादेशतिङन्तर्भूतहिस्ववत् भवत इति तृतीयं वाक्य पर्यवस्यति। तिङन्तर्भूतहिस्वयोस्तावत् क्रमात् परस्मैपदत्वमात्मनेपदत्वञ्च। प्रसिद्धं तिङ्त्वम्। अतः प्रकृतौ हिस्वौ क्रमात् परस्मैपदात्मनेपदसंज्ञौ स्तः तिङ्संज्ञौ चेत्यर्थः। तिङ्त्वात्पदत्वंसिद्धिः। ननु वा च तध्वमोः इति तध्वमोर्हिस्वादेशविकल्पविधिरनुपपन्नः। लोडादेशभूतहिस्वयोस्तिङपवादतया लोटस्तध्वमोरप्रसक्तेरित्यत आह। **तध्वमोर्विषये त्विति** ॥ स्थानषष्ठीमाश्रित्य लोडादेशतध्वमोः स्थाने हिस्वावित्यर्थ इति न भ्रमितव्यम्। येनोक्तदोषः स्यात्। किन्तु विषयविषयिभावः षष्ठ्यर्थः। तथाच तध्वमोर्विषये लोटो हिस्वौ, पक्षे तध्वमाविति फलतीत्यर्थः। अत्र मध्यमपुरुषबहुवचनमेव तशब्दो गृह्यते। व्याख्यानात्। ध्वंसाहचर्याच्च। ननु हिस्वयोरनयोर्मध्यमपुरुषैकवचनत्वस्याप्यतिदेशाद्युष्मत्सामानाधिकरण्ये एकत्वे च सत्येव हिस्वौ स्याताम्। तथाच "इमौ हिस्वौ सर्वेषां पुरुषाणां सर्वेषाञ्च वचनानामिष्यते" इति भाष्यमनुपपन्नमित्यत आह। **पुरुषैकवचनसंज्ञे त्विति॥** हिस्वयोर्मध्यमपुरुषसंज्ञा एकवचनसंज्ञा च नातिदिश्यते इत्यर्थः। कुत इत्यत आह। **हिस्वविधानेति** ॥ यदि हिस्वयोर्मध्यमपुरुषैकवचनसंज्ञे स्याताम्। तर्हि युष्मत्सामानाधिकरण्ये एकत्वे च सत्येव लोटो हिस्वौ स्याताम्। अन्यत्र तु यथायथन्तिबादेशाः स्युः। तथा सति लोटो हिस्वविधानमनर्थकं स्यात्। अतो न पुरुषवचनातिदेशा इत्यर्थः। **तेनेति** ॥ हिस्वयोः पुरुषवचनातिदेशाभावेन क्रमात् परस्मैपदात्मनेपदसंज्ञालाभेन चेत्यर्थः। **सकलेति** ॥ सकलपुरुषवचनविषये हिर्भवति। स च भवन् परस्मैपदिभ्य एव कर्तर्येव भवति, न त्वात्मनेपदिभ्यो भावकर्मकर्तृष्वित्यर्थः। शेषात्कर्तरि परस्मैपदमित्युक्तेरिति भावः। **आत्मनेपदिभ्यः स्वः इति॥** 'अनुदात्तङित आत्मनेपदम्,, भावकर्मणोः' इत्यादिसूत्रविषयेभ्यो धातुभ्यः भावकर्मकर्तृषु लोटः स्व एव भवतीत्यर्थः। अनयोरत्र क्रमात् परस्मैपदात्मनेपदसंज्ञाविध्यभावे तु लादेशत्वेन उभयोः परस्मैपदत्वात् कर्तर्येव परस्मैपदमात्मनेपदिभ्योऽपि स्यादिति भावः। **समुच्चये** ॥

अनेककियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात् ।

२८२७ । यथाविध्यनुप्रयोगः पूर्वस्मिन् । (३-४-४)

आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुरनुप्रयोज्यः ।

२८२८ । समुच्चये सामान्यवचनस्य । (३-४-५)

समुच्चये लोड्विधौ सामान्यार्थकस्य धातोरनुप्रयोगः स्यात् । अनुप्रयोगाद्यथायथं लडादयस्तिबादयश्च । ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभिव्यक्तिः । 'क्रियासमभिहारे द्वे वाच्ये' (वा ४६९५) । याहि याहीति याति । पुनः पुनरतिशयेन वा यानं ह्यन्तस्यार्थः । एककर्तृकं वर्तमानं यानं यातीत्यस्य । इतिशब्दस्त्वभेदान्वये तात्पर्यं ग्राहयति । एवं यातः । यान्ति । यासि ।

समभिव्याहारः इति पदरहितं 'क्रिया लोट्लेटो हिस्वौ वा च तध्वमोः' इति पूर्वसूत्रमनुवर्तते । क्रियेति लुप्तषष्ठीबहुवचनान्तं समुच्चय इत्यत्रान्वेति । तदाह । **अनेककियासमुच्चये द्योत्ये इति** ॥ एवञ्च कारकसमुच्चयमाश्रित्य नास्य प्रवृत्तिः । **प्रागुक्तमिति** ॥ धातोर्लोट् तस्य हिस्वप्रसिद्धहिस्वधर्मकौ तध्वमोर्विषये वा इत्युक्तमित्यर्थः । **यथाविध्यनुप्रयोगः** ॥ 'क्रियासमभिहारे' इति, 'समुच्चयेऽन्यतरस्याम्' इति च, लोड्विधौ उक्तौ । तयोर्मध्ये यत्पूर्वसूत्रं क्रियासमभिहार इति तदेतत्पूर्वशब्देन परामृश्यते । तदाह । **आद्ये लोड्विधाने इति** ॥ विधिमनतिक्रम्य यथाविधि । यस्याः प्रकृतेः लोड्विहितः तस्या अनुप्रयोग इति लभ्यते । तदाह । **लोट्प्रकृतिभूत एवेति** ॥ अत्रानुप्रयोगः पश्चात्प्रयोगः, नत्वव्यवहितत्वं विवक्षितम् । लुनीहि लुनीहि इत्येवायं लुनातीति भाष्यप्रयोगाच्छ्रिज्ञात् । **समुच्चये सामान्यवचनस्य** ॥ उच्यतेऽनेनेति वचनः । सामान्यवाचिन इत्यर्थः । फलितमाह । **सामान्यार्थकस्येति** ॥ समुच्चीयमानक्रियासामान्यवाचिन इत्यर्थः । **अनुप्रयोगादिति** ॥ अनुप्रयुज्यमानादित्यर्थः । **ततः इति** ॥ अनुप्रयुज्यमानधातुप्रकृतिकलडादिभिरित्यर्थः । हिस्वाभ्यान्तु न सङ्ख्याकारकाद्यभिव्यक्तिः । तथाच भाष्यं ' हिस्वान्तमव्यक्तपदार्थकन्तेनापरिसमाप्तोऽर्थः' इत्यादि । 'क्रियासमभिहारे द्वे वाच्ये' इति वार्तिकन्द्विरुक्तिप्रक्रियायां व्याख्यातम् । इदमाद्यसूत्रविहितलोडन्तविषयमिति भाष्ये स्पष्टम् । क्रियासमभिहारे लोटमुदाहरति । **याहि याहीति यातीति** ॥ भाष्ये इतिशब्दस्य दर्शनादिति भावः । **ह्यन्तस्येति** ॥ याहि याहीत्यस्येत्यर्थः । **एककर्तृकमिति** ॥ यातीति यानकर्तुस्तदेकत्वस्य च प्रतीतेरित्यर्थः । **अभेदान्वये इति** ॥ तथाच पुनःपुनरतिशयेन वा यद्यानन्तदात्मकमेककर्तृकं वर्तमानं यानमिति बोधः । तिङन्तेषु सर्वत्र क्रियाविशेष्यक एव बोध इति सिद्धान्तादेवमुक्तिः । **एवमिति** ॥ याहि याहीति यातः, याहि याहीति यान्तीत्यादिसकलपुरुषवचनेषूदाहार्यमित्यर्थः । याहि याहीति ययौ । याहि याहीति याता । याहि याहीति यास्यति । याहि याहीति यातु । लोण्मध्यमपुरुषबहुवचनतादेशविषये लोटो हिभावविकल्प उक्तः वा च तध्वमोरिति । तत्र हिभावपक्षे याहि याहीति यूयं यातेति सिद्धवत्कृत्य अभावपक्षे आह ।

याथः। याथ। यात यातेति यूयं यात। याहि याहीत्ययासीत्। अयास्यद्वा। अधीष्वाधीष्वेत्यधीते। ध्वंविषये पक्षे अधीध्वमधीध्वमिति यूयमधीध्वम्। समुच्चये तु सक्तून्पिब, धानाः खादेत्यभ्यवहरति। अन्नं भुङ्क्ष्व, दाधिकमास्वादयस्वेत्यभ्यवहरते। तध्वमोस्तु पिबत, खादतेत्यभ्यवहरत। भुङ्ध्वमास्वदध्वमित्यभ्यवहरध्वम्। पक्षे हिस्वौ। अत्र समुच्चीयमानविशेषाणामनुप्रयोगार्थेन सामान्येनाभेदान्वयः। पक्षे सक्तून्पिबति। धानाः खादति। अन्नं भुङ्क्ते। दाधिकमास्वदते। एतेन।

'पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः।
विगृह्य चक्रे नुमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः॥

इति व्याख्यातम्। अवस्कन्दनलवनादिरूपा भूतानद्यतनपरोक्षा एककर्तृका अस्वास्थ्यक्रियेत्यर्थात्। इह पुनःपुनश्चस्कन्देत्यादिरर्थ इति व्याख्यानं

यात यातेति यूयं यातेति॥ याहि याहीत्ययात्। याहि याहीति यायात्। लुङ्याह। **याहि याहीत्ययासीदिति॥** लृङि उदाहरति। **अयास्यद्वेति॥** याहि याहीत्ययास्यदिति लृङि रूपम्। यास्यति वेति पाठे लृटि उदाहरणम्। क्रमस्तु न विवक्षितः। **पक्षे इति॥** ध्वंविषये स्वादेशाभावपक्षे इत्यर्थः। **यूयमधीध्वम् इति॥** लोण्मध्यमपुरुषबहुवचनम्। भावकर्मणोस्तु भूयस्व भूयस्वेति भूयते। पच्यस्व पच्यस्वेति पच्यते इत्युदाहार्यम्। अथ 'समुच्चये सामान्यवचनस्य' इत्यस्योदाहरति। **समुच्चये त्विति॥** **अभ्यवहरतीति॥** पानं द्रवद्रव्यस्य दन्तसम्मर्दनं विना भक्षणम्। खादनन्तु कठिनद्रव्यस्य चर्वणम्। तयोस्सामान्यरूपमभ्यवहरणम्। यथाकथञ्चित् भक्षणात्मकत्वात्। **पक्षे हिस्वाविति॥** तध्वमोर्विषये कदाचित् हिस्वादेशपक्षे इत्यर्थः। पिब खादेत्यभ्यवहरतीत्युदाहार्यम्। **अत्रेति॥** पिब खादेत्यभ्यवहरतीत्यादौ समुचीयमानपानखादनादिक्रियाविशेषणमनुप्रयुज्यमानधातुवाच्याभ्यवहरणात्मकक्रियासामान्येन अभेदान्वय इत्यर्थः। **पक्षे सक्तूनिति॥** समुच्चये लोडभावपक्षे अनुप्रयोगोऽपि सामान्यवचनस्य नास्तीति भावः। **एतेनेति॥** 'समुच्चयेऽन्यतरस्याम्' इति 'समुच्चये सामान्यवचनस्य' इति च सूत्रद्वयेन तदुदाहरणप्रदर्शनेन च पुरीमवस्कन्देत्यादि माघकाव्यस्थं श्लोकवाक्यं व्याख्यातमित्यर्थः। बली रावणः नमुचिद्विषा इन्द्रेण विगृह्य विरोधं प्राप्य पुर्याः अमरावत्याः अवस्कन्दनं पीडनं, नन्दनवनस्य लवनं, रत्नानाम्मोषणम्, अमराङ्गनानां हरणम्, इत्येवंप्रकारेण अहर्दिवं अहन्यहनि अस्वास्थ्यञ्चक्रे कृतवानित्यन्वयः। इत्थंशब्दः इतिपर्यायः। अवस्कन्दनादिक्रियाविशेषाणां अस्वास्थ्यक्रियासामान्ये अभेदङ्गाहयति। फलितमाह। **अवस्कन्दनलवनादीति॥** आदिना मोषणं हरणञ्च गृह्येते। भ्रममूलकत्वमुपपादयति। **द्वितीयसूत्रे**

भ्रममूलकमेव । द्वितीयसूत्रे क्रियासमभिहारे इत्यस्याननुवृत्तेः । लोडन्तस्य द्वित्वापत्तेश्च । पुरीमवस्कन्देत्यादि मध्यमपुरुषैकवचनमित्यपि केषांचिद्भ्रम एव । पुरुषवचनसंज्ञे इह नेत्युक्तत्वात् ।

इति लकारार्थप्रकरणम् ।

इति ॥ अननुवृत्तेरिति ॥ भाष्ये तदनुवृत्तेरनुक्तत्वादिति भावः । तदनुवृत्त्यभ्युपगमे बाधकमाह । **लोडन्तस्येति ॥** 'समुच्चयेऽन्यतरस्याम्' इति सूत्रे क्रियासमभिहारे इत्यनुवृत्तौ अवस्कन्देत्यादिलोडन्तानां 'क्रियासमभिहारे द्वे वाच्ये' इति द्वित्वापत्तेरित्यर्थः । **भ्रम एवेति ॥** मध्यमपुरुषांशे एकवचनांशे च भ्रम एवेत्यर्थः । कुत इत्यत आह । **पुरुषवचनसंज्ञे इह नेत्युक्तत्वादिति ॥** अत्र भाष्ये 'हिस्वान्तयोरनभिव्यक्तसङ्ख्याकालकत्वात्तदभिव्यक्तये अनुप्रयोगस्यन्यायत एव प्राप्तत्वादनुप्रयोगविधिर्मास्तु' इत्युक्तम् । एवञ्च 'तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानम्' इति श्रुतौ 'समुच्चयेऽन्यतरस्याम्' इतिलोटो हिस्वावेव भवतः, न त्वनुप्रयोगः । तत्र जननमरणक्रिययोरेव विवक्षिततया सङ्ख्याकालाभिव्यक्तेरविवक्षितत्वेन तत्रानुप्रयोगस्य प्रयोजनाभावात् । एतेन 'आ च सत्यलोकादाचार्वाचेर्जायस्व म्रियस्व' इति विपरिवर्तमानमात्मानं जीवलोकश्चालोक्यास्मिन् संसारे नित्याशुचिदुःखात्मकम्प्रसङ्ख्यानमुपवर्तत इति वाचस्पत्यग्रन्थेऽपि जायस्व म्रियस्वेति व्याख्यातम् । नचात्र 'समुच्चयेऽन्यतरस्याम्' इत्यत्र क्रियासमभिहारे इत्यस्याननुवृत्तेरुक्तत्वात् कथमिह पौनःपुन्यावगतिरिति वाच्यम् । 'आ च सत्यलोकादाचार्वाचेः विपरिवर्तमानम्' इति समभिव्याहारेण तदुपपत्तेः । उदाहृतश्रुतौ तु पौनःपुन्यं असकृत् पदगम्यमित्यदोषः । कल्पतरुग्रन्थे तु जायस्व म्रियस्वेत्यत्र क्रियासमभिहार इतिसूत्रेण लोडित्युक्तम् । तत्तु द्वित्वापत्तेरुपेक्ष्यमिति शब्देन्दुशेखरे प्रपञ्चितम् ॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायां लकारार्थप्रक्रिया निरूपणं समाप्तम् ।



। श्रीरस्तु ।

॥ अथ कृदन्तकृत्यप्रकरणम् ॥

२८२९ । धातोः । (३-१-९१)

आ तृतीयसमाप्तेरधिकारोऽयम् । 'तत्रोपपदं सप्तमीस्थम् ।' (सू ७८१) । 'कृदतिङ्' (सू ३७४) ।

२८३० । वाऽसरूपोऽस्त्रियाम् । (३-१-९४)

परिभाषेयम् । अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्ययः उत्सर्गस्य बाधको वा स्यात्स्त्र्यधिकारोक्तं विना ।

अथ कृदन्तप्रक्रियाः निरूप्यन्ते । तदेवं "प्रत्यया अथ कथ्यन्ते तृतीयाध्यायगोचराः" इति प्रतिज्ञातेषु तृतीयाध्यायस्थप्रत्ययेषु प्रथमपादे 'प्रत्ययः, परश्च' इत्यारभ्य 'कुषिरजोः प्राचां श्यन्' इत्यन्तैः सूत्रैर्विहिताः कतिचित्प्रत्यया निरूपिताः । अथ तदुत्तरसूत्रविहितान् निरूपयितुमुपक्रमते । **धातोः ॥ आ तृतीयेति ॥** आ तृतीयाध्यायपरिसमाप्तेरित्यर्थः । एतच्च भाष्ये स्पष्टम् । **तत्रोपपदं सप्तमीस्थम् इति । कृदतिङ् इति ॥** व्याख्यातं प्राक् । **वाऽसरूपोऽस्त्रियाम् ॥** असरूपः इति छेदः । **परिभाषेयमिति ॥** अधिकारत्वं स्वरितत्वकल्पनागौरवादिति भावः । असरूपः इति लिङ्गनिर्देशः । यत्र असरूपप्रत्ययो विधास्यते तत्र वेत्युपतिष्ठते । वेत्यतः प्राक् बाधकः इति शेषः । असरूपो बाधको भवतीति यावत् । कस्य बाधको वेत्याकांक्षायाम् उत्सर्गस्येत्यर्थाल्लभ्यते । फलितमाह । **अस्मिन् धात्वधिकारे इत्यादिना ॥** स्त्रीशब्दः स्वर्यते । तदाह । **स्त्र्यधिकारोक्तं विनेति ॥** 'स्त्रियां क्तिन्' इति वक्ष्यमाणस्त्र्यधिकारस्थमपवादं विनेत्यर्थः । स्त्र्यधिकारस्तु असरूपः प्रत्ययः उत्सर्गस्य नित्यमेव बाधक इति भावः । 'ण्वुल्तृचौ' इत्युत्सर्गः । 'इगुपधज्ञाप्रीकिरः कः' इत्यपवादः । तद्विषये ण्वुल्तृचावपि भवतः । विक्षेपकः । विक्षेप्ता । विक्षिपः । असरूप इति किम् । 'कर्मण्यण्' उत्सर्गः । 'आतोऽनुपसर्गे कः' इत्यपवादः । स तु सरूपत्वान्नित्यं बाधक एव । गोदः । कम्बलदः । 'नानुबन्धकृतमसारूप्यम्' इति वचनात् अनुबन्धो न सारूप्यप्रतिबन्धकः । अस्त्रियां किम् । 'स्त्रियां क्तिन्' इत्युत्सर्गः । 'अ प्रत्ययात्' इति प्रत्ययान्ताद्विहितः अकारप्रत्ययः तस्य अपवादः । स बाधक एव भवति । चिकीर्षा । व्यावक्रोशी । व्याकुष्टिः इत्यत्र तु 'कर्मव्यतिहारे णच् स्त्रियाम्' इति णच् क्तिनो बाधको वा भवत्येव । अस्त्रियामिति निषेधस्तु नास्ति । तस्य णचः स्त्रियामित्यधिकारो-

२८३१ । कृत्याः । (३-१-९५)

अधिकारोऽयं ण्वुलः प्राक् ।

२८३२ । कर्तरि कृत् । (३-४-६७)

कृत्प्रत्ययः कर्तरि स्यादिति प्राप्ते ।

२८३३ । तयोरेव कृत्यक्तखलर्थाः । (३-४-७०)

एते भावकर्मणोरेव स्युः ।

२८३४ । तव्यत्तव्यानीयरः । (३-१-९६)

धातोरेते प्रत्ययाः स्युः । तकाररेफौ स्वरार्थौ । एधितव्यम् । एधनीयं त्वया । भावे औत्सर्गिकमेकवचनं क्लीबत्वं च । चेतव्यश्चयनीयो वा धर्मस्त्वया । 'वसेस्तव्यत्कर्तरि णिच्च' (वा १९२०) । वसतीति वास्तव्यः । 'केळिमर उपसंख्यानम्' (१९१९) । पचेळिमा माषाः । पक्तव्याः। भिदेळिमाः

क्त्वाभावात् । **कृत्याः** ॥ कृत्यसंज्ञका इत्यर्थः । ततश्च 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च, अर्हे कृत्यतृचश्च, शकि लिङ् च' इत्यादि प्रवर्तते । **ण्वुलः प्रागिति** ॥ 'ण्वुल्तृचौ' इत्यतः प्रागित्यर्थः । एतच्च भाष्ये स्पष्टम् । **कर्तरि कृत्** ॥ अर्थनिर्देशोऽयम् ॥ **इति प्राप्ते इति** ॥ वक्ष्यमाणतव्यदादिप्रत्ययानां कृत्संज्ञकत्वात्तेषाङ्कर्तरि प्राप्तावित्यर्थः । **तयोरेव कृत्यक्तखलर्थाः** ॥ 'लः कर्मणि च भावे च' इति सूत्रोपात्ते भावकर्मणी तच्छब्देन परामृश्येते । तदाह । **एते भावकर्मणोरेवेति** ॥ ननु कर्तरीति भावः । वैशेषिकत्वादेव सिद्धे एवकारस्तु तव्यदादीनां कृत्सञ्ज्ञकतया प्राप्तकर्तृकत्वस्याभावमनुवदन् कृत्यसंज्ञया वैशेषिक्या कृत्संज्ञाया अबाधङ्गमयति । **तव्यत्तव्यानीयरः** ॥ तव्यत् तव्य अनीयर् एषान्द्वन्द्वः । **प्रत्ययाः स्युरिति** ॥ ते कृत्संज्ञकाः कृत्यसंज्ञकाश्च इत्यपि ज्ञेयम् । **स्वरार्थाविति** ॥ 'तित्स्वरितम्' इति 'उपोत्तमं रिति' इति च स्वरविशेषार्थत्वादित्यर्थः । निरनुबन्धकस्य तु तव्यस्य प्रत्ययस्वरेण आद्युदात्तत्वमेवेति बोध्यम् । भावे उदाहरति । **एधितव्यमिति** ॥ त्वत्कर्तृका एधनक्रियेत्यर्थः । ननु 'लः कर्मणि च' इत्यत्र असत्त्वभूतस्यैव भावस्य ग्रहणम् । तिङ्वाच्यभावनाया असत्त्वरूपतायाः उक्तत्वात् । ततश्च तस्य भावस्य असत्त्वरूपस्यात्र 'तयोरेव कृत्य' इति तच्छब्देन परामर्शात्तव्यदादीनामसत्त्ववाचितया लिङ्गसङ्ख्यान्वयोऽनुपपन्न इत्यत आह । **भावे औत्सर्गिकमेकवचनमिति** ॥ 'एकवचनं, द्विबहुषु द्विबहुवचने' इति सूत्रपाठमभ्युपगम्य द्वित्वबहुत्वाभावे एकवचनमिति भाष्यसिद्धान्तादिति भावः । **क्लीबत्वञ्चेति** ॥ एकश्रुतिः स्वरसर्वनाम । लिङ्गसर्वनाम नपुंसकमिति 'दाण्डिनायन' इति सूत्रस्थभाष्यादिति भावः । कर्मण्युदाहरति । **चेतव्यः इति** ॥ 'वसेस्तव्यत् कर्तरि णिच्च' इति वार्तिकम् । **वास्तव्यः इति** ॥ वस्तेत्यर्थः । णित्त्वादुपधावृद्धिः । **केळिमरः इति** ॥ धातोरित्येव । भावकर्मणोरेवेदम् । केळिमरि ककारे

सरलाः भेत्तव्याः। कर्मणि प्रत्ययः। वृत्तिकारस्तु 'कर्मकर्तरि चायमिष्यते' इत्याह। तद्भाष्यविरुद्धम्।

२८३५। कृत्यचः। (८-४-२९)

उपसर्गस्थान्निमित्तात्परस्माच्च उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात्। प्रयाणीयम् 'अचः' किम्। प्रमग्नः। 'निर्विण्णस्योपसंख्यानम्' (वा ५००४)। 'अचः' परत्वाभावान्नकारेण व्यवधानाच्चाप्राप्ते वचनम्। परस्य णत्वम्। पूर्वस्य ष्टुत्वम्। निर्विण्णः।

२८३६। णेर्विभाषा। (८-४-३०)

उपसर्गस्थान्निमित्तात्परस्य ण्यन्ताद्विहितो यः कृत्तत्स्थस्य नस्य णो वा स्यात्। प्रयापणीयम्—प्रयापनीयम्। 'विहितविशेषणम्' किम्। यका व्यवधाने यथा स्यात्। प्रयाप्यमाणं पश्य। 'णत्वे दुर उपसर्गत्वं न' इत्युक्तम्। दुर्यानम्—दुर्यापनम्।

फाणितौ। **भिदेळिमाः इति** ॥ कित्त्वान्नोपधागुणः। सरळाः वृक्षविशेषाः। **तद्भाष्येति** ॥ भाष्ये भिदेळिमाः, इत्युदाहृत्य भेत्तव्या इत्येव विवरणादिति भावः। **कृत्यचः** ॥ 'रषाभ्यान्नो णः' इत्यनुवर्तते। 'उपसर्गादनोत्परः' इत्यतः उपसर्गादिति च। उपसर्गस्थादिति विवक्षितम्। कृतीत्यनन्तरं विद्यमानस्येति शेषः। अच इति पञ्चमी। तदाह। **उपसर्गस्थादिति** ॥ असमानपदत्वादप्राप्तौ वचनम्। 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनुवर्तते। तदाह। **प्रयाणीयमिति** ॥ **निर्विण्णस्येति** ॥ नस्य ण उपसङ्ख्यानमित्यर्थः। **अचः परत्वाभावादिति** ॥ विदेः क्तप्रत्यये 'रदाभ्याम्' इति दकारादुत्तरस्य तकारस्य नत्वे निर्विद् न इति स्थिते नकारस्य अचः परत्वाभावात् 'कृत्यचः' इति अप्राप्ते णत्वे इदं णत्ववचनमित्यर्थः। दकारेण व्यवधानाच्च णत्वस्य न प्राप्तिर्बोध्या। **पूर्वस्येति** ॥ नस्य णत्वे ष्टुत्वेन दस्य डत्वे तस्य 'प्रत्यये भाषायाम्' इति णत्वमित्यर्थः। तथाच द्विणकारकं रूपम्। **णेर्विभाषा** ॥ 'कृत्यचः' इत्यनुवर्तते। 'रषाभ्यान्नो णः' इति च। णेरिति कृतो विहितविशेषणम्। तदाह। **उपसर्गस्थादित्यादिना** ॥ **प्रयापणीयमिति** ॥ याधातोर्णौ पुकि यापि इत्यस्मात् ण्यन्तादनीयरि णेर्लोपे अनेन णत्वविकल्पः। **यकेति** ॥ यापि इत्यस्मात् ण्यन्तात् कर्मणि लटः शानचि 'आने मुक्' इति मुगागमे यकि णिलोपे प्रयाप्यमाणशब्दे णत्वविकल्पः इष्यते। णेः परो यः कृत् तत्स्थस्य णत्वविकल्प इत्युक्तौ तु कृतश्शानचो यका व्यवहितत्वेन यकः परत्वाभावात् तत्स्थस्य नस्य णत्वविकल्पो न स्यात्। तदर्थं णेरिति विहितविशेषणमाश्रितमित्यर्थः। भाष्ये तु ण्यन्तात्परो यः कृत् इत्यंशेऽप्यट्कुप्वाङ्नुमित्याद्यनुवर्त्य यकारव्यवधानेऽपि णत्वविकल्पः समर्थितः। **णत्वे दुरः इति** ॥ 'दुरष्षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः' इत्यनेनेति भावः

२८३७ । हलश्चेजुपधात् । (८-४-३१)

हलादेरिजुपधात्कृन्नस्याचः परस्य णो वा स्यात् । प्रकोपणीयम्—प्रकोपनीयम् । 'हलः' किम् । प्रोहणीयम् । 'इजुपधात्' किम् । प्रवपणीयम् ।

२८३८ । इजादेः सनुमः । (८-४-३२)

सनुमश्चेद्भवति तर्हि इजादेर्हलन्ताद्विहितो यः कृत्तत्स्थस्यैव । प्रेङ्खणीयम् । 'इजादेः' किम् । 'मगि सर्पणे' । प्रमङ्गनीयम् । नुम्ग्रहणमनुस्वारोपलक्षणम् । 'अट्कुप्वाङ्—' (सू १९७) इति सूत्रेऽप्येवम् । तेनेह न । प्रेन्वनम् । इह तु स्यादेव । प्रोम्भणम् ।

२८३९ । वा निंसनिंक्षनिन्दाम् । (८-४-३३)

एषां नस्य णो वा स्यात्कृति परे । प्रणिंसितव्यम्—प्रनिंसितव्यम् ।

२८४० । न भाभूपूकमिगमिप्यायीवेपाम् (८-४-३४)

एभ्यः कृन्नस्य णो न । प्रभानीयम् । प्रभवनीयम् । पूञ एवेह ग्रहणमिष्यते' (वा ५०११) पूङस्तु प्रपवणीयः सोमः । 'ण्यन्तभादीनामुपसंख्यानम्' (वा ५०१२) । प्रभापनीयम् 'क्शाञः शस्य यो वा' (वा

ततश्च दुर उपसर्गत्वाभावात् ततः परे कृत्स्थनकारे सूत्रद्वयमपि न प्रवर्तते इत्यभिप्रेत्य उदाहरति । **दुर्यानं-दुर्यापनमिति** ॥ यातेर्ण्यन्तात् ल्युटि णिलोपे रूपम् । **हलश्चेजुपधात्** ॥ हलन्तादिति नार्थः । इजुपधस्य हलन्तत्वाव्यभिचारात् । किन्तु हलादेरिति विवक्षितम् । तदाह । **हलादेरिजुपधादिति** ॥ परस्येति शेषः । प्रोहणीयमित्यादि प्रत्युदाहरणे तु 'कृत्यचः' इति नित्यमेव णत्वम् । **इजादेः** ॥ 'णेर्विभाषा' इति निवृत्तम् । 'कृत्यचः' इत्यनुवर्तते । 'हलश्चेजुपधात्' इत्यतो हल इति च । प्रकृतिविशेषणत्वात् तदन्तविधिः । तथाच सनुमो हलन्तात् इजुपधात् कृन्नस्य णः स्यादिति लभ्यते । एवञ्च प्रेङ्खणीयमित्यादौ 'कृत्यचः' इत्येव सिद्धेरिदभियमार्थमित्याह । **सनुमश्चेदिति** ॥ कृत्स्थस्यैवेत्यनन्तरं णत्वमिति शेषः । **प्रेङ्खणीयमिति** ॥ इखधातुरिदित्त्वात्सनुम् । ननु 'इवि प्रीणने' इति धातोर्ल्युटि तस्यानादेशे प्रेन्वनमित्यत्रापि णत्वं स्यात् । सनुमोऽस्य इजादित्वात् हलन्तत्वाच्चेत्यत आह । **नुंग्रहणमित्यादि** ॥ अनुस्वारश्च सर्व एव गृह्यते, ननु नुंस्थानिक एव । अविशेषात् । तदाह । **इह त्विति** ॥ **प्रोम्भणमिति** ॥ इह उम्भधातुः स्वाभाविकानुस्वारवानेव, न तु नुंस्थानिकानुस्वारवानिति भावः । **'वा निंस** ॥ उपसर्गादिति अच इति च निवृत्तम् । तदाह । **एषान्नस्येति** ॥ **न भाभू** ॥ **प्रभानीयमिति** ॥

१५८४) इत्युक्तं णत्वप्रकरणोपरि तद्बोध्यम् । यत्वस्यासिद्धत्वेन शकारव्यवधानान्न णत्वम् । प्रख्यानीयम् ।

२८४१ । कृत्यल्युटो बहुळम् । (३-३-११३)

स्नान्त्यनेन स्नानीयं चूर्णम् । दीयतेऽस्मै दानीयो विप्रः ।

२८४२ । अचो यत् । (३-१-९७)

अजन्ताद्धातोर्यत्स्यात् । चेयम् । जेयम् । अज्ग्रहणं शक्यमकर्तुम् । योगविभागोऽप्येवम् । तव्यदादिष्वेव यतोऽपि सुपठत्वात् ।

२८४३ । ईद्यति । (६-४-६५)

यति परे आत ईत्स्यात् । गुणः । देयम् । ग्लेयम् 'तकिशसिचतियतिजनिभ्यो यद्वाच्यः' (वा १९२२) तक्यम् । शस्यम् । चत्यम् । यत्यम् । जन्यम् । जनेर्यद्विधिः स्वरार्थः । ण्यतापि रूपसिद्धेः । न च वृद्धिप्रसङ्गः ।

इह 'कृत्यचः' इति प्राप्तं णत्वन्नेति भावः । **णत्वप्रकरणोपरीति** ॥ इदं 'चक्षिङः ख्याञ्' इति सूत्रे भाष्ये स्पष्टम् । **प्रख्यानीयमिति** ॥ इह यत्वस्यासिद्धतया शकारेण व्यवधानात् 'कृत्यचः' इति णत्वन्नेति भावः । **कृत्यल्युटो** ॥ याभ्यः प्रकृतिभ्यो येष्वर्थेषु विहिताः ततोऽन्यत्रापि स्युरित्यर्थः । **स्नानीयमिति** ॥ करणे अनीयर् । **दानीयः इति** ॥ सम्प्रदाने अनीयर् । भाष्येऽपि 'कृत्यल्युटो बहुळमिति वक्तव्यम्' इत्युक्त्वा पादाभ्यां ह्रियते पादहारकः । कर्मणि ण्वुल् । श्वोऽग्नीनाधास्यमानेन अनद्यतने भविष्यति लृडित्युदाहृतम् । **अचो यत्** ॥ **शक्यमकर्तुमिति** ॥ 'ऋहलोर्ण्यत्' इति ऋहलन्तात् विशिष्य ण्यतो विहितत्वेन हलन्तेभ्यो यत्प्रत्ययस्याप्रवृत्तिरित्यर्थः । वासरूपविधिस्तु सरूपत्वान्न भवति । **योगविभागोऽप्येवमिति** ॥ कर्तुमशक्य इत्यर्थः । कुत इत्यत आह । **तव्यदादिष्वेवेति** ॥ तव्यत्तव्यानीयर्यतः, इत्येकसूत्रत्वेनैव पठितुं शक्यत्वादित्यर्थः । **ईद्यति** ॥ **आतः इति** ॥ 'आतो लोप इटि च' इत्यतः तदनुवृत्तेरिति भावः । **गुणः इति** ॥ दाधातोः 'अचो यत्' इति यति आतः ईत्त्वे 'सार्वधातुकार्धधातुकयोः' इति गुण इति भावः । **ग्लेयमिति** ॥ 'ग्लै हर्षक्षये' इति धातोर्यति आदेचः इत्यात्त्वे ईत्त्वे गुण इति भावः । **तकिशसीति** ॥ तकि, शसि, चति, यति, जनि, एषां पञ्चानां द्वन्द्वः । इका निर्देशः । 'ऋहलोर्ण्यत्' इत्यस्यापवादः । 'तक हसने, शसु हिंसायां, चते याचने, यती प्रयत्ने, जनी प्रादुर्भावे' इति धातवः । अत्र सर्वत्र अकर्मकेभ्यो भावे प्रत्ययः । सकर्मकेभ्यस्तु कर्मण्यपीति विवेकः । ननु 'अर्हे कृत्यतृचश्च' इत्यर्हेऽपि जनेर्ण्यताऽपि जन्यमिति रूपसिद्धेः जनिग्रहणं व्यर्थमित्यत आह । **स्वरार्थः इति** ॥ 'यतो नावः' इत्यादुदात्तार्थ इत्यर्थः । ननु ण्यति उपधावृद्धिः स्यात् । अतस्तदभावार्थमिह जनेर्यद्विधिरस्त्वित्याशङ्क्य निराकरोति । **न च वृद्धिप्रसङ्गः इति** ॥ कुत इत्यत आह । **जनि-**

'जनिवध्योश्च' (सू २५१२) इति निषेधात्। 'हनो वा यद्वधश्च वक्तव्यः' (वा १९२३)। वध्यः। पक्षे वक्ष्यमाणो ण्यत्। घात्यः।

२८४४। पोरदुपधात्। (३-१-९८)

पवर्गान्ताददुपधाद्यत्स्यात्। ण्यतोऽपवादः। शप्यम्। लभ्यम्। 'नानुबन्धकृतमसारूप्यम्'। अतो न ण्यत्। तव्यदादयस्तु स्युरेव।

२८४५। आङो यि। (७-१-६५)

आङः परस्य लभेर्नुम्स्याद्यादौ प्रत्यये विवक्षिते। नुमि कृते अदुपधत्वाभावात् ण्यदेव। आलम्भ्यो गौः।

२८४६। उपात्प्रशंसायाम्। (७-१-६६)

उपलम्भ्यः साधुः। 'स्तुतौ' किम्। उपलब्धुं शक्यः उपलभ्यः।

२८४७। शकिसहोश्च। (३-१-९९)

शक्यम्। सह्यम्।

वध्योरिति॥ **हनो वेति**॥ हनधातोर्यद्वा स्यात्। प्रकृतेर्वधादेशश्चेत्यर्थः। **पक्षे इति**॥ यदभावपक्षे इत्यर्थः। **घात्यः इति**॥ ण्यति 'हनस्तोऽचिण्णलोः' इति नस्य तः। आत्त्वम्। उपधावृद्धिः। वधादेशस्तु यत्सन्नियोगशिष्टत्वान्नेति भावः। **पोरदुपधात्**॥ ननु शप्यं लभ्यमित्यत्र 'ऋहलोर्ण्यत्' इति कदा चित् ण्यदपि स्यात्। यत्ण्यतोरसारूप्येण वाऽसरूपः इत्यस्य प्रवृत्तेरित्यत आह। **नानुबन्धकृतमसारूप्यमिति**॥ वाऽसरूपसूत्रे भाष्ये स्थितमिदम्। अनुबन्धविनिर्मुक्तस्यैव असारूप्यं विवक्षितमित्यर्थः। प्रकृते च यत्ण्यतोरनुबन्धरहितयोस्सारूप्यात् वासरूपविधेरप्रवृत्तेः शप्यमित्यादौ ण्यदपवादो यदेवेति भावः। **आङो यि**॥ 'इदितो नुं धातोः' इत्यतो नुमिति 'लभेश्च' इत्यतो लभेरिति चानुवर्तते। तदाह। **आङः परस्येति**॥ **विवक्षिते इति**॥ यीति विषयसप्तमीति भाष्ये स्पष्टम्। विवक्षिते इत्यस्य प्रयोजनमाह। **नुमि कृते इति**॥ यत्प्रत्यये विवक्षिते तत्प्रवृत्तेः प्रागेव नुमि कृते अदुपधत्वाभावाद्यत्प्रत्ययस्याप्रवृत्तेर्ण्यदेवेत्यर्थः। यति परे नुमित्यर्थे तु अदुपधत्वात् यदेव स्यात्। ननु ण्यदिति भावः। **आलम्भ्यो गौरिति**॥ यद्यपि यत्ण्यतोर्न रूपभेदः। तथापि ण्यति कृते 'तित्स्वरितम्' इति स्वरितत्वम्। यति तु 'यतो नावः' इत्याद्युदात्तत्वमिति स्वरभेदः फलम्। **उपात्प्रशंसायाम्**॥ उपात्परस्य लभेर्नुं स्यात् यादौ प्रत्यये विवक्षिते प्रशंसायां गम्यमानायामित्यर्थः। **उपलम्भ्यस्साधुरिति**॥ समीपे प्राप्यः इत्यर्थः। साधुशब्दात् प्रशंसा गम्यते। इहापि नुमि कृते अदुपधत्वाभावात् ण्यदेव। स्वरे विशेषः पूर्ववत्। **शकिसहोश्च**॥ पञ्चम्यर्थे षष्ठी। आभ्यां

२८४८। गदमदचरयमश्चानुपसर्गे। (३-१-१००)

गद्यम्। मद्यम्। चर्यम्। 'चरेराङि चागुरौ' (वा १९२५)। आचर्यो देशः। गन्तव्य इत्यर्थः। 'अगुरौ' किम्। आचार्यो गुरुः। यमेर्नियमार्थम्। सोपसर्गान्मा भूदिति। प्रयाम्यम्। निपूर्वात्स्यादेव। तेन 'तत्र न भवेद्विनियम्यम्' (वा १९३०) इति वार्तिकप्रयोगात्। एतेन 'अनियम्यस्य नायुक्तिः'। 'त्वया नियम्या ननु दिव्यचक्षुषा' इत्यादि व्याख्यातम्। नियमे साधुरिति वा।

२८४९। अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु। (३-१-१०१)

वदेर्नञ्युपपदे 'वदः सुपि–' (सू २८५४) इति यत्क्यपोः प्राप्तयोर्यदेव सोऽपि गर्ह्यायामेवेत्युभयार्थं निपातनम्। अवद्यं पापम्। 'गर्ह्ये' किम्। अनुद्यं गुरुनाम। तद्धि न गर्ह्यं वचनानर्हं च।

'आत्मनाम गुरोर्नाम नामातिकृपणस्य च।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः॥'

यदित्यर्थः। ण्यतोऽपवादः। **गदमद**॥ गद, मद, चर, यम, एषाञ्चतुर्णां द्वन्द्वः। अनुपसर्ग इति सप्तमी पञ्चम्यर्थे। एभ्योऽनुपसर्गेभ्यो यदित्यर्थः। ण्यतोऽपवादः। उपसर्गात् ण्यदेव। प्रगाद्यमित्यादि। **चरेराङि चागुराविति**॥ वार्तिकमिदम्। आङि उपसर्गे सत्यपि चरेर्यत्स्यादगुरौ इत्यर्थः। **आचार्यो गुरुरिति**॥ शुश्रूषणीयः इत्यर्थः। ननु 'पोरदुपधात्' इत्येव सिद्धे यमेरिह ग्रहणं व्यर्थमित्यत आह। **यमेर्नियमार्थमिति**॥ अनुपसर्गादेव यमेर्ण्यदिति नियमार्थमित्यर्थः। तत्फलमाह। **सोपसर्गान्मा भूदिति**॥ ननु 'अनियम्यस्य नायुक्तिः' इत्यत्र 'त्वया नियम्या ननु दिव्यचक्षुषा' इत्यादौ च निपूर्वाद्यमेः कथं यत्। अनुपसर्गादिति निषेधादित्यत आह। **निपूर्वात्स्यादेवेति**॥ यदिति शेषः। कुत इत्यत आह। **तेन तत्रेति**॥ प्रकारान्तरेण समाधत्ते। **नियमे साधुरिति वेति**॥ 'यमः समुपनिविषु च' इति निपूर्वाद्यमेर्भावे अप्प्रत्यये नियमशब्दः। नियमे साधुरित्यर्थे 'तत्र साधुः' इति प्राग्घितीये यत्प्रत्यये नियम्यशब्दो व्युत्पाद्य इत्यर्थः। **अवद्यपण्य**॥ अवद्य, पण्य, वर्य, एषान्द्वन्द्वात्प्रथमाबहुवचनम्। गर्ह्य पणितव्य अनिरोध एषान्द्वन्द्वात्सप्तमीबहुवचनम्। अवद्यादयस्त्रयः क्रमात् गर्ह्यादिषु त्रिष्वर्थेषु निपात्यन्ते इत्यर्थः। ननु 'वदस्सुपि' इत्येव सिद्धे अवद्यग्रहणं व्यर्थमित्यत आह। **नञ्युपपदे इति**॥ यत्क्यपोः स्वरे विशेषः। सम्प्रसारणतदभावौ चेति भावः। **अवद्यं पापमिति**॥ गर्हितत्वादवाच्यमित्यर्थः। **अनुद्यं गुरुनामेति**॥ अत्र नञि उपपदे 'वदस्सुपि' इति क्यपि 'वचिस्वपियजादीनाङ्किति' इति सम्प्रसारणे रूपम्। वचनानर्हमित्यर्थः। अत्र गर्हायाः अप्रतीतेः यदेवेति न नियम इति भावः। ननु गुरुनाम्नः अगर्ह्यत्वात् कथं वचनानर्हत्वमित्यत आह। **तद्धि न गर्ह्यं वचनानर्हञ्चेति**॥ कुत इत्यत आह। **आत्मनामेति**॥ **पण्या गौरिति**॥

इति स्मृतेः । पण्या गौः । व्यवहर्तव्येत्यर्थः । पाण्यमन्यत् । स्तुत्यर्हमित्यर्थः । अनिरोधोऽप्रतिबन्धस्तस्मिन्विषये वृङो यत् । शतेन वर्या कन्या । वृत्यान्या ।

२८५० । वह्यं करणम् । (३-१-१०२)

वहन्त्यनेनेति वह्यं शकटम् । 'करणम्' किम् । वाह्यम्—वोढव्यम् ।

२८५१ । अर्यः स्वामिवैश्ययोः । (३-१-१०३)

'ऋ गतौ' अस्माद्यत् । ण्यतोऽपवादः । अर्यः स्वामी वैश्यो वा । 'अनयोः' किम् । आर्यो ब्राह्मणः प्राप्तव्य इत्यर्थः ।

२८५२ । उपसर्या काल्या प्रजने । (३-१-१०४)

गर्भग्रहणे प्राप्तकाला चेदित्यर्थः । उपसर्या गौः । गर्भाधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः । 'प्रजने काल्या' इति किम् । उपसार्या काशी । प्राप्तव्येत्यर्थः ।

२८५३ । अजर्यं सङ्गतम् । (३-१-१०५)

पणधातोर्व्यवहारार्थकात् यन्निपात्यते इति भावः । यद्यपि 'पण व्यवहारे स्तुतौ च' इति धातोः अर्थद्वयमस्ति । तथापि पण्यशब्दस्य प्रयोगबलेन व्यवहर्तव्य एव रूढत्वादिह व्यवहारार्थक एव गृह्यते । तदाह । **व्यवहर्तव्येति** ॥ क्रेतव्येत्यर्थः । **पाण्यमन्यदिति** ॥ ण्यति उपधावृद्धिरिति भावः । व्यवहर्तव्यादन्यादित्यर्थः । तदाह । **स्तुत्यर्हमिति** ॥ **अप्रतिबन्धः इति** ॥ अनियम इत्यर्थः । **वृङो यदिति** ॥ 'वृङ् सम्भक्तौ' इति क्रैयादिकस्यैवात्र ग्रहणम् । नतु 'वृञ् वरणे' इत्यस्य । अनिरोधरूपार्थस्य सम्भक्तिवाचित्व एव सामञ्जस्यादिति भावः । **शतेन वर्या कन्येति** ॥ पुरुषशतेन परिग्रहीतुमर्हा । अनेनैव वरणीयेति नियमो नास्तीत्यर्थः । **वृत्या अन्येति** ॥ अनुरूपेण वरणीयेत्यर्थः । 'एतिस्तुशास्वृदृजुषः क्यप्' इति क्यपि तुक् । अत्र अनियमस्य अप्रतीतेः न यत् । अत्र वर्याशब्दस्य स्त्रीलिङ्गस्य ग्रहणात्पुंसि वार्या ऋत्विज इति वृत्तिः । **वह्यङ्करणम्** ॥ वहेः करणे यत् निपात्यते । ण्यतोऽपवादः । **अर्यः स्वामिवैश्ययोः** ॥ **अस्माद्यदिति** ॥ निपात्यत इति शेषः । **ण्यतोऽपवाद इति** ॥ 'ऋहलोः' इति प्राप्तस्य ण्यतोऽपवाद इत्यर्थः । यति ऋकारस्य गुणे रपरत्वम् । तदाह । **अर्यः स्वामीति । आर्यो ब्राह्मणः इति** ॥ ण्यति वृद्धौ रपरत्वमिति भावः । **उपसर्या** ॥ प्रजननं प्रजनः गर्भग्रहणम् । भावे घञ्, 'जनिवध्योश्च' इति वृद्धिनिषेधः । कालः प्राप्तोऽस्याः काल्या । तदस्य प्राप्तमित्यनुवर्तमाने 'कालाद्यत्' इति यत् । चेदित्यध्याहार्यम् । तदाह । **गर्भग्रहणे प्राप्तकाला चेदिति** ॥ गर्भग्रहणे प्राप्तकाला स्त्रीपशुव्यक्तिः विवक्षिता चेत् उपसर्या इति निपात्यते । उपपूर्वात् सृधातोः यदिति फलितम् । ण्यतोऽपवादः । **अजर्यम्** ॥ **कर्तरि**

नञ्पूर्वाज्जीर्यतेः कर्तरि यत् सङ्गतं चेद्विशेष्यम्। न जीर्यतीत्यजर्यम्। 'तेन सङ्गतमार्येण रामाजर्यं कुरु द्रुतम्' इति भट्टिः। 'मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध' इत्यत्र तु सङ्गतमिति विशेष्यमध्याहार्यम्। 'सङ्गतम्' किम्। अजरिता कम्बलः। भावे तु सङ्गतकर्तृकेऽपि ण्यदेव। अजार्यं सङ्गतेन।

२८५४। वदः सुपि क्यप्च। (३-१-१०६)

उत्तरसूत्रादिह भाव इत्यपकृष्यते। वदेर्भावे क्यप्स्याच्चाद्यदनुपसर्गे सुप्युपपदे। ब्रह्मोद्यम्—ब्रह्मवद्यम्। ब्रह्म वेदः तस्य वदनमित्यर्थः। कर्मणि प्रत्ययावित्येके। उपसर्गे तु ण्यदेव। अनुवाद्यम्। अपवाद्यम्।

२८५५। भुवो भावे। (३-१-१०७)

क्यप्स्यात्। ब्रह्मणो भावो ब्रह्मभूयम्। सुपीत्येव। भव्यम्। अनुपसर्गे इत्येव। प्रभव्यम्।

२८५६। हनस्त च। (३-१-१०८)

अनुपसर्गे सुप्युपपदे हन्तेर्भावे क्यप्स्यात्तकारश्चान्तादेशः। ब्रह्मणो हननं ब्रह्महत्या। स्त्रीत्वं लोकात्।

२८५७। एतिस्तुशास्वृदृजुषः क्यप्। (३-१-१०९)

एभ्यः क्यप्स्यात्।

यदिति॥ 'कर्तरीति वक्तव्यम्' इति वार्तिकम्, निपातनात् कर्तरीति लभ्यत इति तदाशयः। **सङ्गतमिति॥** सङ्गतं सङ्गमः। **न जीर्यतीत्यजर्यमिति॥** मित्रत्वमिति शेषः। जरितृ न भवतीत्यर्थः। अत्र भट्टिप्रयोगमाह। **तेनेति॥** हे राम तेन आर्येण अजर्यम् अनश्वरं सङ्गतं सङ्गमं द्रुतङ्कुरु इति अन्वयः। ननु "मृगैरजर्यञ्जरसा" इत्यत्र सङ्गतशब्दाभावात् कथं यदित्यत आह। **मृगैरित्यादि॥** कालिदासकाव्यमिदम्। **अजरितेति॥** तृजन्तम्। अत्र सङ्गतशब्दाभावान्न यदिति भावः। **भावे त्विति॥** भावस्य सङ्गतिकर्तृत्वेऽपि सङ्गतस्य प्रत्ययवाच्यत्वाभावात् न यदित्यर्थः। **वदः सुपि॥ उत्तरेति॥** 'भुवो भावे' इत्युत्तरसूत्राद्भावे इत्यपकृष्यते इत्यर्थः। भूधातोरकर्मकत्वेन उत्तरसूत्रे भावग्रहणस्य वैयर्थ्यादिति भावः। **अनुपसर्गे इति॥** "वदस्सुप्यनुपसर्गग्रहणम्" इति भाष्यादिति भावः। **ब्रह्मोद्यमिति॥** वदेः क्यपि 'वचिस्वपि' इति सम्प्रसारणम्। वस्तुतस्तु नेह भावग्रहणमपकृष्यते। तत्र भावग्रहणमुत्तरार्थमिति भाष्यादिति मतमनुसृत्य आह। **कर्मणि प्रत्ययावित्येके इति॥** क्यब्यतावित्यर्थः। **भुवो भावे॥ ब्रह्मभूयमिति॥** किन्त्वात्र गुणः। क्लीबत्वं लोकात्। **भव्यमिति॥** भाव इत्यर्थः। अत्र सुबुपपदाभावात् यदेव, गुणः, 'वान्तो यि' इत्यवादेशः। **प्रभव्यमिति॥** प्रभाव इत्यर्थः। **हनस्त च॥ अन्तादेशः इति॥** प्रकृतेरिति शेषः। भावे किम्। घात्यो वृषळः। अनुपसर्गे किम्। प्रघातः। निरुपपदं हत्येति तु असाध्वेव। **एतिस्तु॥** एति, स्तु, शास्,

२८५८ । ह्रस्वस्य पिति कृति तुक् । (६-१-७१)

इत्यः । स्तुत्यः । 'शास इदङ्हलोः' (सू २४८६) । शिष्यः । 'वृ' इति वृञो ग्रहणं न वृङः । वृत्यः । वृङस्तु वार्या ऋत्विजः । आहृत्यः । जुष्यः । पुनः क्यबुक्तिः परस्यापि ण्यतो बाधनार्था । अवश्यस्तुत्यः । 'शंसिदुहिगुहिभ्यो वा' (वा १८३५) इति काशिका । शस्यम् । शंस्यम् । दुह्यम् । दोह्यम् । गुह्यम् । गोह्यम् । 'प्रशस्यस्य श्रः' (सू २००९) 'ईडवन्दवृशंसदुहां ण्यतः' (सू ३७०२) इति सूत्रद्वयबलाच्छंसेः सिद्धम् । इतरयोस्तु मूलं मृग्यम् । 'आङ्पूर्वादञ्जेः संज्ञायामुपसङ्ख्यानम्' (वा १९२५) । 'अञ्जू' व्यक्तिम्रक्षणादिषु । बाहुलकात्करणे क्यप् । 'अनिदिताम्—' (सू ४१५) इति नलोपः । आज्यम् ।

२८५९ । ऋदुपधाच्चाक्लृपिचृतेः । (३-१-११०)

वृ, ह, जुष्, एषां षण्णां समाहारद्वन्द्वात्पञ्चमी । सुप्यनुपसर्गे भाव इति निवृत्तम् । तदाह । **एभ्यः क्यप्स्यादिति** ॥ **ह्रस्वस्य** ॥ स्पष्टमिति न व्याख्यातम् । **इत्य इति** ॥ इणः क्यपि तुक् । उपयमित्यत्र तु ईङो दैवादिकाद्यत् । **वृञो ग्रहणमिति** ॥ वार्तिकमिदम् । **न वृङः इति** ॥ 'वृङ् सम्भक्तौ' इति ङितः क्र्यादिकस्य न ग्रहणमित्यर्थः । **वार्या ऋत्विज इति** ॥ अवश्यं भजनीया इत्यर्थः । अत्र 'वृङ् सम्भक्तौ' इत्यस्मात् ण्यदित्यर्थः । अवद्यपण्यवर्या इति निपातसिद्धो यत्तु न । अत्र निरोधस्य नियमस्य विवक्षितत्वात् । ननु 'वदस्सुपि' इत्यतः अनुवृत्त्यैव सिद्धे क्यब्ग्रहणमिह व्यर्थम् । नच चकारानुकृष्टयतोऽप्यनुवृत्तिनिवृत्तये क्यब्ग्रहणमिति वाच्यम् । चकारस्य अस्वरितत्वेन 'भुवो भावे' इत्यादुत्तरसूत्रेष्वनुवृत्त्यभावादित्यत आह । **क्यबुक्तिः परस्यापीति** ॥ 'ओरावश्यके' इति विहितस्येत्यर्थः । **वेति काशिकेति** ॥ वा क्यप् । तदभावे हलन्तत्वात् ण्यत् । भाष्ये त्वेतन्न दृश्यते इति भावः । **शस्यम्, शंस्यमिति** ॥ क्यप्पक्षे 'अनिदिताम्' इति नलोपः । **दुह्यमिति** ॥ क्यप्पक्षे कित्त्वान्न गुणः । अत्र 'शंसिदुहिगुहिभ्यो वा' इत्यस्य भाष्ये अदर्शनेऽपि शंसेर्ण्यत्क्यपौ प्रामाणिकावित्याह । **प्रशस्यस्येति** ॥ 'प्रशस्यस्य श्रः' इति निर्देशबलात् शंसेः क्यप्सिद्धः । 'ईडवंदवृशंसदुहाण्यतः' इत्यादुदात्तत्वविधौ शंसेर्ण्यदन्तत्वानुवादबलात् ण्यत्सिद्धः । ततश्च शस्यं शंस्यमिति रूपद्वयं सिद्धम् । इतरयोस्तु दुहिगुह्योः क्यब्विकल्पे मूलं नास्तीत्यर्थः । **उपसङ्ख्यानमिति** ॥ क्यप इति शेषः । **आज्यमिति** ॥ न चाङ्पूर्वकत्वे पदपाठे अवग्रहः स्यादिति वाच्यम् । इष्टापत्तेः । पदकाराणामवग्रहाभावस्त्वप्रामाणिक एव पदपाठस्याधुनिकत्वात् इति भाष्ये स्पष्टम् । एवञ्च अस्मद्रियगित्यस्म द्रियगित्यवग्रहः अप्रामाणिक एव । अस्मद्रि अक् इत्येवावग्रहो युक्तः । अस्मच्छब्दस्य टेरद्यादेशविधानात् इत्यादूह्यम् । **ऋदुपधाच्चाक्लृपिचृतेः** ॥ क्लृप्चृती वर्जयित्वा ऋदुपधाद्धातोः क्यबित्यर्थः । तपरकरणमिह व्यर्थमित्यत

'वृत्' । वृत्यम् । 'वृध्' । वृध्यम् । क्लृपिचृत्योस्तु । कल्प्यम् । चर्त्यम् । 'तपरकरणम्' किम् । 'कृत्' कीर्त्यम्' । अनित्यण्यन्ताश्चुरादय इति णिजभावे ण्यत् । णिजन्तात्तु यदेव ।

२८६० । ई च खनः । (३-१-१११)

चात्क्यप् । आद्रुणः । खेयम् । 'इ च' इति ह्रस्वः सुपठः ।

२८६१ । भृञोऽसंज्ञायाम् । (३-१-११२)

भृत्याः कर्मकरा भर्तव्या इत्यर्थः । क्रियाशब्दोऽयं न तु संज्ञा । 'समश्च बहुलम्' (वा १९४०) । सम्भृत्याः—सम्भार्याः । असंज्ञायामेव विकल्पार्थमिदं वार्तिकम् । 'असंज्ञायाम्' किम् । भार्या नाम क्षत्रियाः । अथ कथं भार्या वधूरिति । इह हि 'संज्ञायां समज—' (सू ३२७६) इति क्यपा भाव्यम् । संज्ञापर्युदासस्तु पुंसि चरितार्थः । सत्यम् । बिभर्तेर्भृ इति दीर्घान्तात्क्यादेर्वा ण्यत् । क्यप्तु भरतेरेव । तदनुबन्धकग्रहणे—' इति परिभाषया ।

आह । **अनित्यण्यन्ता इति** ॥ **णिजन्तात्तु यदेवेति** ॥ 'अचो यत्' इत्यनेनेति भावः । **ई च खनः** ॥ **चात् क्यबिति** ॥ खनेः क्यप् स्यात् प्रकृतेः ईकारोऽन्तादेशश्चेत्यर्थः । **ह्रस्वस्सुपठ इति** ॥ ह्रस्वस्य इकारस्य विधौ आद्रुणेन खेयमिति सिद्धेः इति भावः । दीर्घोच्चारणसमर्थनन्तु भाष्ये स्पष्टम् * । **भृञोऽसंज्ञायाम्** ॥ क्यबिति शेषः । **भृत्याः कर्मकरा इति** ॥ भृत्यर्थङ्कर्म कुर्वाणा इत्यर्थः । 'कर्मणि भृतौ' इति कृञष्टः । **भर्तव्या इति** ॥ वेतनदानेन परार्थे कर्मणि प्रेषयितव्या इत्यर्थः । ननु भृत्यशब्दस्य कर्मकरेषु रूढत्वात्संज्ञाशब्दत्वमेवेत्यत आह । **क्रियाशब्द इति** ॥ **भार्या नाम क्षत्रिया इति** ॥ क्षत्रियविशेषेषु रूढस्संज्ञाशब्दोऽयमिति भावः । **अथ कथं भार्येति** ॥ क्यपा भवितव्यमित्याक्षेपः । ननु वध्वाम्भार्याशब्दस्य संज्ञाशब्दत्वात् 'भृञोऽसंज्ञायाम्' इत्यस्याप्रवृत्तेरयमाक्षेपोऽनुपपन्न इत्यत आह । **इह हीति** ॥ 'स्त्रियां क्तिन्' इत्यतः स्त्रियामित्यनुवृत्तौ 'व्रजयजोर्भावे क्यप्' । 'संज्ञायां समजनिषद' इति सूत्रेण क्यप् स्यादित्यर्थः । ननु संज्ञायां भृञः क्यब्विधौ 'भृञोऽसंज्ञायाम्' इत्यत्र असंज्ञायामिति व्यर्थमित्यत आह । **संज्ञापर्युदासस्त्विति** ॥ समाधत्ते । **सत्यमिति** ॥ 'डु भृञ् धारणपोषणयोः' इति जुहोत्यादौ ह्रस्वान्तः ङित् ञिच्च 'भृ भर्त्सने, भरणेऽपि' इति क्र्यादौ दीर्घान्तः । आभ्यां 'ऋहलोर्ण्यत्' इति ण्यदेवेत्यर्थः । **क्यप् तु भरतेरेवेति** ॥ 'भृञ् भरणे' इति भ्वादौ ह्रस्वान्तो ञित् । अस्यैव 'संज्ञायां समजनिषद' इत्यत्र 'भृञोऽसंज्ञाम्' इत्यत्र च भृञ्ग्रहणेन ग्रहणम् । नतु डुभृञो जौहोत्यादिकस्य । न च क्रैयादिकस्य निरनुबन्धकस्य दीर्घान्तस्येति भावः । कुत इत्यत आह । **तदनुबन्धकेति** ॥ 'तदनुबन्धकग्रहणे नातदनुबन्धकस्य' इति परिभाषयेत्यर्थः । बिभर्तेः क्यबभावे बीजमिदम् । क्रैयादिकस्य दीर्घान्तत्वात्

---

* संप्रत्युपलभ्यमानभाष्यकोशेषु तु न तत्समर्थनमस्ति । एतद्विचारस्तु प्रौढमनोरमायां दृश्यते ।

२८६२ । मृजेर्विभाषा (३-१-११३)

मृजेः क्यब्वा स्यात्, पक्षे ण्यत् । मृज्यः ।

२८६३ । चजोः कु घिण्ण्यतोः । (७-३-५२)

चस्य जस्य च कुत्वं स्याद्घिति ण्यति च प्रत्यये परे । 'निष्ठायामनिट इति वक्तव्यम्' (वा ४५५१) । तेनेह न । गर्ज्यम् । 'मृजेर्वृद्धिः' (सू २४७३) । मार्ग्यः ।

२८६४ । न्यङ्क्वादीनां च । (७-३-५३)

कुत्वं स्यात् । न्यङ्कुः । 'नावञ्चेः' (उणा १७) इत्युप्रत्ययः ।

२८६५ राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः। (३-१-११४)

एते सप्त क्यबन्ता निपात्यन्ते । राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्यः । यद्वा । लतात्मकः सोमो राजा स सूयते खण्ड्यतेऽत्रेत्यधिकरणे क्यन्निपातनाद्दीर्घः । राजसूयः—राजसूयम् । अर्धर्चादिः । सरत्याकाशे सूर्यः । कर्तरि क्यन्निपातनादुत्वम् । यद्वा 'षू प्रेरणे' तुदादिः । सुवति कर्मणि लोकं प्रेरयति क्यपो रुट् । मृषोपपदाद्वदेः कर्मणि नित्यं क्यप् । मृषोद्यम् । विशेष्यनिघ्नोऽयम् । 'उच्छ्रायसौन्दर्यगुणा मृषोद्याः' । रोचतेः रुच्यः ।

न क्यप् इति बोध्यम् । **मृजेर्विभाषा** ॥ क्यप्पक्षे उदाहरति । **मृज्य इति** ॥ कित्त्वान्न गुणः । **चजोः कु घिण्ण्यतोः** ॥ कु इत्यविभक्तिको निर्देशः । चजोर्घिण्ण्यतोश्च यथासङ्ख्यन्तु न । 'तेन रक्तं रागात्' इति घांशे जस्य कुत्वनिर्देशात् । **राजसूय** ॥ **राज्ञेति** ॥ क्षत्रियेणेत्यर्थः । **अभिषवेति** ॥ प्रावभिः रसनिष्पत्त्यर्थं सोमलतानाङ्कुट्टनमभिषवः, तत्प्रनाडिकया निष्पादयितव्यो यज्ञविशेषः राजसूय इत्यन्वयः । **यद्वेति** ॥ लताविशेषात्मकः सोमः राजशब्देन विवक्षितः राजानं क्रीणातीत्यादौ तथा प्रसिद्धेः । सः राजा सूयते अभिषूयते अत्र यज्ञविशेषे इति व्युत्पत्त्या राजसूय इत्यन्वयः । 'कर्तरि कृत्' इत्यधिकारात् कथमधिकरणव्युत्पत्तिरित्यत आह । **अधिकरणे क्यबिति** ॥ कुत इत्यत आह । **निपातनादिति** ॥ ननु षुञ्धातोः क्यपि कथन्दीर्घः । 'अकृत्सार्वधातुकयोः' इत्यस्य कृत्यप्रवृत्तेरित्यत आह । **निपातनाद्दीर्घ इति** ॥ निपातनादित्युभयत्रान्वेति । **उत्वमिति** ॥ तस्य रपरत्वे 'हलि च' इति दीर्घ इत्यपि बोध्यम् । **मृषोद्यमिति** ॥ क्यपि 'वचिस्वपि' इति सम्प्रसारणम् । **रोचतेरिति** ॥ रुचधातोः क्यपि रुच्य इति रूपमित्यर्थः । **गुपेरिति** ॥ गुप्धातोः क्यप् प्रकृतेरादिवर्णस्य ककारश्च संज्ञायान्निपात्यते इत्यर्थः । सुवर्णरजतभिन्नन्धनङ्कुप्यमिति ज्ञेयम् । तथा च 'हेमरूपे कृताकृते'

गुपेरादेः कुत्वं च संज्ञायाम्। सुवर्णरजतभिन्नं धनं कुप्यम्। गोप्यमन्यत्। कृष्टे स्वयमेव पच्यन्ते कृष्टपच्याः कर्मकर्तरि। शुद्धे तु कर्मणि कृष्टपाक्याः। न व्यथतेऽव्यथ्यः।

२८६६। भिद्योद्यौ नदे। (३-१-११५)

भिदेरुज्झेश्च क्यप्। उज्झेर्धत्वं च। भिनत्ति कूलं भिद्यः। उज्झत्युदकमुद्ध्यः। 'नदे' किम्। भेत्ता। उज्झिता।

२८६७। पुष्यसिद्ध्यौ नक्षत्रे। (३-१-११६)

अधिकरणे क्यब्निपात्यते। पुष्यन्त्यस्मिन्नर्थाः पुष्यः। सिध्यन्त्यस्मिन्सिध्यः।

२८६८। विपूयविनीयजित्या मुञ्जकल्कहलिषु। (३-१-११७)

पूङ्नीञ्जिभ्यः क्यप्। विपूयो मुञ्जः। रज्ज्वादिकरणाय शोधयितव्य इत्यर्थः। विनीयः कल्कः। पिष्ट औषधिविशेष इत्यर्थः। पापमिति वा। जित्यो हलिः। बलेन कृष्टव्य इत्यर्थः। कृष्टसमीकरणार्थं स्थूलकाष्ठं हलिः। अन्यत्तु विपव्यम्। विनेयम्। जेयम्।

२८६९। प्रत्यपिभ्यां ग्रहेः। (३-१-११८)

'छन्दसीति वक्तव्यम्' (वा १९४४)। प्रतिगृह्यम्। अपिगृह्यम्। लोके तु प्रतिग्राह्यम्। अपिग्राह्यम्।

इत्युक्त्वा अमरः आह "ताभ्यां यदन्यत्तत्कुप्यम्" इति। **कृष्ट इति**॥ कृष्टप्रदेशे ये स्वयं पच्यन्ते फलन्ति ते कृष्टपच्याः इत्यर्थः। **कर्मकर्तरीति**॥ अत्र कर्मकर्तरि क्यबित्यर्थः। निपातनादिति भावः। **शुद्धे त्विति**॥ मुख्यकर्मणि तु ण्यति उपधावृद्धौ 'चजोः' इति कुत्वे कृष्टपाक्य इति रूपमित्यर्थः। **न व्यथते अव्यथ्यः इति**॥ अत्र निपातनात् कर्तरि क्यबिति भावः। **भिद्योद्यौ नदे**॥ **क्यबिति**॥ नदविशेषे कर्तरि निपात्यते इति शेषः। **पुष्यसिद्ध्यौ**॥ निपात्येते इति शेषः। नक्षत्रविशेषे गम्ये इत्यर्थः। **विपूय**॥ विपूय, विनीय, जित्य, एते यथाक्रमं मुञ्जकल्कहलिषु क्यबन्ता निपात्यन्ते। तदाह। **विपूय इत्यादिना**॥ न्यादिसाहचर्यात् भौवादिकस्यैव पूधातोर्ग्रहणमिति भावः। कल्कः शोधकद्रव्यम्। **पापमिति वेति**॥ कल्कशब्दस्य शोधनीये पापेऽपि प्रसिद्धत्वादिति भावः। हलिशब्दस्य विवरणम्। **कृष्टसमीकरणार्थमिति**॥ **प्रत्यपिभ्यां ग्रहेः**॥ **छन्दसीति**॥ वार्तिकमिदम्। वक्तव्यमिति वृत्तिकृता प्रक्षिप्तम्। ननु छान्दसस्य किमर्थमिहोपन्यास

२८७०। पदास्वैरिबाह्यापक्ष्येषु च। (३-१-११९)

अवगृह्यं प्रगृह्यं वा पदम्। अस्वैरी परतन्त्रः, गृह्यकाः शुकाः। पञ्जरादिबन्धनेन परतन्त्रीकृता इत्यर्थः। बाह्यायां ग्रामगृह्या सेना। ग्रामबहिर्भूतेत्यर्थः। स्त्रीलिङ्गनिर्देशात्पुन्नपुंसकयोर्न। पक्षे भवः पक्ष्यः। दिगादित्वाद्यत्। आर्यैर्गृह्यते आर्यगृह्यः। तत्पक्षाश्रित इत्यर्थः।

२८७१। विभाषा कृवृषोः। (३-१-१२०)

क्यप्स्यात्। कृत्यम्। वृष्यम्। पक्षे।

२८७२। ऋहलोर्ण्यत्। (३-१-१२४)

ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत्स्यात्। कार्यम्। वर्ष्यम्।

२८७३। युग्यं च पत्रे। (३-१-१२१)

पत्रं वाहनम्। युग्यो गौः। अत्र क्यप्कुत्वं च निपात्यते।

२८७४। अमावस्यदन्यतरस्याम्। (३-१-१२२)

अमोपपदाद्वसेरधिकरणे ण्यत्। वृद्धौ सत्यां पाक्षिको ह्रस्वश्च निपात्यते। अमा सह वसतोऽस्यां चन्द्रार्कावमावास्या—अमावस्या। 'ऋहलोर्ण्यत्' (सू २८७२)। 'चजोः—' (सू २८६३) इति कुत्वम्। पाक्यम्। 'पाणौ सृजेर्ण्यद्वाच्यः' (वा १९४६)। ऋदुपधलक्षणस्य क्यपोऽपवादः। पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः। 'समवपूर्वाच्च' (वा १९४७)। समवसर्ग्या।

इत्यत आह। **लोके त्विति** ॥ **पदास्वैरिबाह्यापक्ष्येषु च** ॥ पद, अस्वैरि, बाह्या, पक्ष्य, ष्वर्थेषु ग्रहेः क्यबित्यर्थः। **अवगृह्यं प्रगृह्यं वा पदमिति** ॥ समस्तपदस्य अवान्तरपदविच्छेदः अवग्रहः। 'अग्रावेत्यादिपदामितिशिरस्कं' प्रग्रहः इति प्रातिशाख्ये प्रसिद्धम्। 'ईदूदेद्विवचनं प्रगृह्यम्' इति सूत्रोदाहरणञ्च प्रगृह्यम्। **विभाषा कृवृषोः** ॥ पञ्चम्यर्थे षष्ठी। कृञः ऋदन्तत्वात् नित्यं ण्यति प्राप्ते, वृषेः ऋदुपधत्वात् नित्यं क्यपि प्राप्ते च, क्यब्विकल्पोऽयम्। **पक्षे इति** ॥ क्यबभावपक्षे विशेषो वक्ष्यते इत्यर्थः। **ऋहलोर्ण्यत्** ॥ पञ्चम्यर्थे षष्ठी। तदाह। **ऋवर्णान्तादिति** ॥ **युग्यञ्च पत्रे** ॥ क्यबन्तन्निपात्यते। ण्यतोऽपवादः। **युग्यो गौरिति** ॥ शकटादिना योक्तव्य इत्यर्थः। क्यपि कुत्वन्निपातनात्। **पत्रं वाहनमिति** ॥ पतन्ति गच्छन्त्यनेनेत्यर्थे 'दात्रीशस' इत्यादिना करणे ष्ट्रन्। ण्यति तु योग्यमिति स्यात्। **अमावस्यद** ॥ **अधिकरणे इति** ॥ निपातनलभ्यमिदम्। अमेत्यस्य विवरणम्। **सहेति** ॥ 'ऋहलोर्ण्यत्' इत्यनुपदमेव प्राक् प्रसङ्गाद्याख्यातमपि सूत्रक्रमात् पुनरुपात्तम्। **कुत्वमिति** ॥ पचेर्ण्यति 'चजोः' इति कुत्वमिति भावः। ननु पाणौ सृजेर्ण्यदिति व्यर्थम्। 'ऋहलोः' इत्येव सिद्धेरित्यत आह। **ऋदुपधलक्षणस्येति** ॥ 'ऋदुपधाच्चाक्लृपिचृतेः' इति ण्यदपवादस्य क्यपो बाधनार्थमित्यर्थः। **पाणिसर्ग्या रज्जुरिति** ॥ ण्यति

२८७५। न क्वादेः। (७-३-५९)

क्वादेर्धातोश्चजोः कुत्वं न। गर्ज्यम्। वार्तिककारस्तु 'चजोः—' (सू २८६३) इति सूत्रे 'निष्ठायामनिटः' इति पूरयित्वा 'न क्वादेः' (सू २८७५) इत्यादि प्रत्याचख्यौ। तेन अर्जितर्जिप्रभृतीनां न कुत्वम्। निष्ठायां सेट्त्वात्। ग्रुचुग्लुञ्चुप्रभृतीनां तु कादित्वेऽपि कुत्वं स्यादेव। सूत्रमते तु यद्यपि विपरीतं प्राप्तम्। तथापि 'यथोत्तरं मुनीनां प्रामाण्यम्'।

२८७६। अजिव्रज्योश्च। (७-३-६०)

न कुत्वम्। समाजः। परिव्राजः।

२८७७। भुजन्युब्जौ पाण्युपतापयोः। (७-३-६१)

एतयोरेतौ निपात्यौ। भुज्यते अनेनेति भुजः पाणिः। 'हलश्च' (सू ३३००) इति घञ्। न्युब्जन्त्यस्मिन्निति न्युब्जः। उपतापो रोगः। 'पाण्युपतापयोः' किम्। भोगः समुद्रः।

२८७८। प्रयाजानुयाजौ यज्ञाङ्गे। (७-३-६२)

एतौ निपात्यौ यज्ञाङ्गे। पञ्च प्रयाजाः। त्रयोऽनुयाजाः। 'यज्ञाङ्गे' किम्। प्रयागः। अनुयागः।

२८७९। वञ्चेर्गतौ। (७-३-६३)

'चजोः' इति कुत्वम्। **समवपूर्वाच्चेति** ॥ वार्तिकमिदम्। सृजेर्ण्यदिति शेषः। **न क्वादेः** ॥ कुः आदिर्यस्येति विग्रहः। चजोः कु इत्यनुवर्तते। तदाह। **क्वादेरिति** ॥ कवर्गादेरित्यर्थः। **वार्तिककारस्त्विति** ॥ 'चजोः कु घिण्ण्यतोः' इति सूत्रे 'निष्ठायामनिटः' इति पूरितम्। तथा च निष्ठायां यः अनिट् तद्धात्ववयवयोः चजोः कु स्यात् घिति णिति चेत्यर्थः फलति। तथा 'न क्वादेः' इति सूत्रं 'अजिव्रज्योश्च' इति सूत्रं 'यजयाचरुचप्रवचर्चश्च' इत्यत्र यजयाचप्रहणञ्च न कर्तव्यमिति प्रत्याचख्याविति भावः। किन्तत इत्यत आह। **तेनेति** ॥ अर्जितर्जिप्रभृतीनां ण्यति कुत्वं स्यात्। 'न क्वादेः' इति निषेधस्य तत्राप्रवृत्तेरिति भावः। तदेव सूत्रमते अतिव्याप्तिमुक्त्वा अव्याप्तिमाह। **ग्रुचुग्लुञ्चुप्रभृतीनामिति** ॥ तेषां कवर्गादित्वेऽपि ण्यति प्रोक्ष्यमित्यादौ कुत्वमिष्टं स्यादेव। वार्तिकमते 'न क्वादेः' इति निषेधस्य प्रत्याख्यातत्वात्। सूत्रमते तु 'न क्वादेः' इति निषेधात् प्रोक्ष्यमित्यादौ कुत्वमिष्टन्न स्यादित्यव्याप्तिरिति भावः। नन्विदं वार्तिकं विपरीतमपि सूत्रसम्मतत्वात् ग्राह्यमेव। विरोधे विकल्पस्य वक्तुं शक्यत्वादिति शङ्कते। **सूत्रमते तु यद्यपीति** ॥ परिहरति। **तथापीति** ॥ **यथोत्तरमिति** ॥ अयं वैयाकरणसमयः। **अजिव्रज्योश्च** ॥ इत्यादि स्पष्टम्। **वञ्चेर्गतौ** ॥ **कुत्वन्नेति** ॥

कुत्वं न । वक्ष्यम् । 'गतौ' किम् । वङ्क्षं काष्ठम् । कुटिलीकृतमित्यर्थः ।

२८८० । ओक उचः के । (७-३-६४)

उचेर्गुणकुत्वे निपात्येते के परे । ओकः शकुन्तवृषळौ । इगुपधलक्षणः कः । घञा सिद्धे अन्तोदात्तार्थमिदम् ।

२८८१ । ण्य आवश्यके । (७-३-६५)

कुत्वं न । अवश्यपाच्यम् ।

२८८२ । यजयाचरुचप्रवचर्चश्च । (७-३-६६)

ण्ये कुत्वं न । याज्यम् । याच्यम् । रोच्यम् । प्रवाच्यं ग्रन्थविशेषः । 'ऋच्' । अर्च्यम् । ऋदुपधत्वेऽप्यत एव ज्ञापकाण्ण्यत् । 'त्यजेश्च' । त्याज्यम् । 'त्यजिपूज्योश्च' इति काशिका । तत्र पूजेर्ग्रहणं चिन्त्यम् । भाष्यानुक्तत्वात् । 'ण्यत्प्रकरणे त्यजेरुपसङ्ख्यानम्' इति हि भाष्यम् ।

२८८३ । वचोऽशब्दसंज्ञायाम् । (७-३-६७)

वाच्यम् । शब्दाख्यायां तु वाक्यम् ।

२८८४ । प्रयोज्यनियोज्यौ शक्यार्थे । (७-३-६८)

प्रयोक्तुं शक्यः प्रयोज्यो नियोक्तुं शक्यो नियोज्यो भृत्यः ।

शेषपूरणमिदम् । 'चजोः कु घिण्ण्यतोः' इत्यतः कुग्रहणस्य 'न क्रादेः' इत्यतो नेत्यस्य चानुवृत्तेरिति भावः । **ण्य आवश्यके** ॥ **कुत्वन्नेति** ॥ शेषपूरणमिदम् । आवश्यकेऽर्थे यो ण्यः तस्मिन् परे 'चजोः कु घिण्ण्यतोः' इति कुत्वन्नेत्यर्थः । **यजयाच** ॥ **ण्ये कुत्वन्नेति** ॥ शेषपूरणमिदम् । यज, याच, रुच, प्रवच, ऋच्, एषान्द्वन्द्वात् षष्ठी । एषां ण्ये परे 'चजोः कु घिण्ण्यतोः' इति कुत्वन्नेत्यर्थः । ननु अर्च्यमित्यत्र कथं ण्यत् । 'ऋदुपधाच्चाक्लृपिचृतेः' इति ऋदुपधत्वलक्षणस्य क्यपो ण्यदपवादत्वादित्यत आह । **ऋदुपधत्वेऽपीति** ॥ **त्याजिपूज्योश्चेति** ॥ ण्ये कुत्वन्नेति शेषः । **वचोऽशब्दसंज्ञायाम्** ॥ वचधातोर्ण्ये कुत्वन्न । शब्दसंज्ञां वर्जयित्वेत्यर्थः । **वाच्यमिति** ॥ वस्त्विति शेषः । अशब्दसंज्ञायामित्यस्य प्रयोजनमाह । **शब्दाख्यायान्तु वाक्यमिति** ॥ एकतिङ् वाक्यम्, इति संज्ञाशब्दोऽयमिति भावः । प्रवाच्यमित्यत्र तु ग्रन्थविशेषसंज्ञात्वेऽपि नायङ्कुत्वनिषेधस्य निषेधः, 'यजयाच' इत्यत्र प्रवचेति विशिष्योपादानात् असंज्ञायामित्यस्य प्रपूर्वाद्वचेरन्यत्र चरितार्थत्वात् । एतदभिप्रायेणैव प्रवाच्यं ग्रन्थविशेषः इत्युक्तम्प्राक् । **प्रयोज्यनियोज्यौ** ॥ शक्यार्थे ण्ये कुत्वाभावो निपात्यते । 'शकि लिङ् च' इति कृत्यानां शक्यार्थेऽपि

२८८५। भोज्यं भक्ष्ये। (७-३-६९)

भोग्यमन्यत्। 'ण्यत्प्रकरणे लपिदभिभ्यां चेति वक्तव्यम्'। लाप्यम्। दभिर्धातुष्वपठितोऽपि वार्तिकबलात्स्वीकार्यः। दाभ्यः।

२८८६। ओरावश्यके। (३-१-१२५)

उवर्णान्ताद्धातोर्ण्यत्स्यादवश्यम्भावे द्योत्ये। लाव्यम्। पाव्यम्।

२८८७। आसुयुवपिरपिव्रापिच्चमश्च। (३-१-१२६)

'षुञ्' आसाव्यम्। 'यु मिश्रणे' याव्यम्। वाप्यम्। राप्यम्। व्राप्यम्। आचाम्यम्।[1]

२८८८। आनाय्योऽनित्ये। (३-१-१२६)

आङ्पूर्वान्नयतेर्ण्यदायादेशश्च निपात्यते। दक्षिणाग्निविशेष एवेदम्। स हि गार्हपत्यादानीयतेऽनित्यश्च सततमप्रज्वलनात्। आनेयोऽन्यः घटादिः, वैश्यकुलादानीतो दक्षिणाग्निश्च।

विहितण्यन्तस्य शक्यार्थकत्वमपि। **भोज्यं भक्ष्ये**॥ भक्ष्ये गम्ये ण्ये भुजेः कुत्वाभावो निपात्यते। इति प्रासङ्गिकम्। अथ प्रकृतम्। **लपिदभिभ्याश्चेति**॥ वार्तिकमिदं 'ऋहलोर्ण्यत्' इति सूत्रस्थम्। 'पोरदुपधात्' इति प्राप्तस्य ण्यदपवादस्य यतोऽपवादः। **ओरावश्यके**॥ **लाव्यं पाव्यमिति**॥ 'अचो ञ्णिति' इति वृद्धौ 'वान्तो यि' इत्यावादेशः। **आसुयुवपि**॥ आसु, यु, वपि, रपि, व्लपि, चम्, एषां समाहारद्वन्द्वः। ण्यदिति शेषः। **आसाव्यमिति**॥ आङ्पूर्वस्य सुञो ग्रहणमिति भावः। **आनाय्योऽनित्ये**॥ अनित्ये इति छेदः। **दक्षिणाग्निविशेष एवेति**॥ वार्तिकमिदम्। **स हीति**॥ दक्षिणाग्निर्हि अग्निहोत्रार्थमहरहः गार्हपत्यादेः प्रणीयत इत्यर्थः। एतेन आङ्पूर्वकस्य नयतेरर्थ उक्तः। **अनित्यश्चेति**॥ गार्हपत्यवन्नित्यधारणाभावादिति भावः। तदाह। **सततमप्रज्वलनादिति**॥ सततन्धारणाभावादित्यर्थः। प्रणीतस्य दक्षिणाग्नेस्तत्तत्कर्मणि समाप्ते लौकिकत्वमुक्तं कल्पसूत्रेषु "अप्रवृत्ते कर्मणि लौकिकं सम्पद्यते" इति। ततश्च पुनः पुनः प्रणयनात् अनित्यत्वन्दक्षिणाग्नेरिति बोध्यम्। यद्यप्याहवनीयस्यापि पुनः पुनः प्रणयनमस्ति, तथापि दक्षिणाग्निविशेष एवेति वार्तिकान्नाहवनीयस्य ग्रहणमित्यर्थः। विशेषग्रहणान्नित्यधारणपक्षे दाक्षिणाग्निरिह न गृह्यते इति सूचितम्। गतश्रियान्दक्षिणाग्नेरपि नित्यधार्यत्वात्। "गतश्रियो नित्यधार्या अग्नयः" इति वचनादित्यलम्पल्लवितेन। **वैश्यकुलादानीत इति**॥ दक्षिणाग्निं प्रकृत्य हि श्रूयते। 'अहरहरेवैनं वैश्यकुलादाहरन्' इति।

---

१. 'चाम्यम्' इति अपपाठः, वृद्ध्यनुपपत्तेः।

२८८९ । प्रणाय्योऽसंमतौ । (३-१-१२८)

संमतिः प्रीतिविषयीभवनं कर्मव्यापारः । तथा भोगेष्वादरोऽपि संमतिः । प्रणाय्यश्चोरः । प्रीत्यनर्हे इत्यर्थः । प्रणाय्योऽन्तेवासी । विरक्त इत्यर्थः । प्रणेयोऽन्यः ।

२८९० । पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु । (३-१-१२९)

मीयतेऽनेन पाय्यं मानम् । ण्यत् धात्वादेः पत्वञ्च । 'आतो युक्–' (सू २७६१) इति युक् । सम्यङ् नीयते होमार्थमग्निं प्रतीति सान्नाय्यं हविर्विशेषः । ण्यदायादेशः समो दीर्घश्च निपात्यते । निचीयतेऽस्मिन्धान्यादिकं निकाय्यो निवासः । अधिकरणे ण्यत् आय् धात्वादेः कुत्वञ्च निपात्यते । धीयतेऽनया समिदिति धाय्या ऋक् ।

२८९१ । क्रतौ कुण्डपाय्यसञ्चाय्यौ । (३-१-१३०)

कुण्डेन पीयतेऽस्मिन्सोमः कुण्डपाय्यः क्रतुः । सञ्चीयतेऽसौ सञ्चाय्यः ।

तथाविधदक्षिणाग्नौ वाच्ये आनेयशब्द एवेति भावः । **प्रणाय्योऽसम्मतौ** ॥ असम्मतौ गम्यायां प्रणाय्य इति निपात्यते । तत्र असम्मतिशब्दैकदेशं सम्मतिशब्द विवृणोति । **सम्मतिः प्रीतिविषयीभवनमिति** ॥ तच्च कर्मनिष्ठमित्याह । **कर्मव्यापार इति** ॥ **तथेति** ॥ भोगेषु सुखदुःखानुभवेषु आसक्तिरपि सम्मतिरित्यर्थः । एवंविधा सम्मतिर्न भवतीति असम्मतिरिति फलितम् । **प्रणाय्यश्चोर इति** ॥ ण्यति वृद्धौ आयादेशः । **पाय्यसान्नाय्य** ॥ पाय्य, सान्नाय्य, निकाय्य, धाय्य, एषान्द्वन्द्वात्प्रथमाबहुवचनम् । मान, हविः, निवास, सामिधेनी एषान्द्वन्द्वात्सप्तमी । मानादिषु गम्येषु क्रमात् पाय्यादयो निपात्यन्ते । **मीयते अनेनेति** ॥ माधातोः करणे ण्यत्, धात्वादेर्मकारस्य पत्वञ्च निपात्यते इत्यर्थः । **आत इति** ॥ ण्यति 'मीनाति' इत्यात्त्वे कृते, आतो युगिति भावः । **ण्यदिति** ॥ सम्पूर्वात् नीधातोः कर्मणि निपात्यते इत्यर्थः । **आयादेश इति** ॥ सन्नी य इति स्थिते आयादेशः निपात्यते इत्यन्वयः । **निवास इति** ॥ कुसूलादिरित्यर्थः । **अधिकरणे इति** ॥ चिञ्धातोराधिकरणे ण्यन्निपात्यते इत्यन्वयः । **आय् इति** ॥ अच्परकत्वाभावात् आयादेशोऽप्राप्तो निपात्यते इत्यन्वयः । **धाय्या ऋगिति** ॥ धाधातोः करणे ण्यति, आयादेशो निपात्यते इति भावः । सामिधेन्यो नाम समिदाधानार्था ऋग्विशेषाः । तत्र 'समिध्यमानो अध्वरे' इति ऋच उपरि प्रक्षेप्या 'पृथुपाजा अमर्त्यः' इत्याद्या ऋक्प्रसिद्धा । **क्रतौ कुण्डपाय्य** । क्रतुविशेषे गम्ये एतौ निपात्येते । **कुण्डेनेति** ॥ अत्सरुकैः चमसैरित्यर्थः । सामान्येनैकवचनम् । "यदत्सरुकैश्चसमैर्भक्षयन्ति तदेषाँ कुण्डम्" इति श्रुतिः । **कुण्डपाय्य इति** ॥ सत्रविशेषात्मकः क्रतुः । कुण्डेनेति तृतीयान्ते उपपदे

२८९२। अग्नौ परिचाय्योपचाय्यसमूह्याः। (३-१-१३१)

अग्निधारणार्थे स्थलविशेषे एते साधवः। अन्यत्र तु परिचेयम्। उपचेयम्। संवाह्यम्।

२८९३। चित्याग्निचित्ये च। (३-१-१३२)

चीयतेऽसौ चित्योऽग्निः। अग्नेश्चयनमग्निचित्या। 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' (सू २८१७)। त्वया गन्तव्यम्। गमनीयम्। गम्यम्। इह लोटा बाधा मा भूदिति पुनः कृत्यविधिः 'स्त्र्यधिकारादूर्ध्वं वासरूपविधिः क्वचिन्न' इति ज्ञापयति। तेन 'क्त्वल्युट्तुमुन्खलर्थेषु न—' इति सिद्धम्।

अधिकरणे ण्यत्। आतो युक्। **सञ्ज्ञाय्य इति** ॥ सम्पूर्वात् चिञः कर्मणि ण्यत् आयादेशश्च निपात्यते इति भावः। सञ्ज्ञाय्यो नाम क्रतुविशेषः क्वाचिच्छाखायामन्वेषणीयः। **अग्नौ परिचाय्य** ॥ अग्नौ गम्ये परिचाय्य, उपचाय्य समूह्य, एते निपात्यन्ते। अग्निशब्द इष्टकारचितस्थण्डिलविशेषे वर्तते। "इष्टकाभिरग्निञ्चिनोति" इति श्रुतेः इष्टकाकृतचयनेन अग्नयाख्यं स्थण्डिलं निष्पादयेदित्यर्थः। "ब्रह्मवादिनो वदन्ति यन्मृदाचाद्भिश्चाग्निश्चीयतेऽथ कस्मादग्निरुच्यत इति यच्छन्दोऽभिश्चिनोत्यग्नयो वै छंदाँसि तस्मादग्निरुच्यतेऽथो इयं वा अग्निर्वैश्वानरो यन्मृदाचिनोति तस्मादग्निरुच्यते" इति वाक्यशेषाच्च। तदाह। **अग्निधारणेति** ॥ तत्र परिपूर्वादुपपूर्वाच्च चिञः कर्मणि ण्यत् आयादेशश्च निपात्यते। सम्पूर्वस्य वहेस्तु कर्मणि ण्यति सम्प्रसारणम्, दीर्घश्च निपात्यते। "समूह्याग्निञ्चिन्वीत पशुकामः परिचाय्याग्निञ्चिन्वीत ग्रामकामः" इति तैत्तिरीयश्रुतौ परिचाय्यसमूह्यौ प्रसिद्धौ। उपचाय्यस्त्वग्निः क्वाचिच्छाखायामन्वेषणीयः। **चित्याग्निचित्ये च** ॥ चित्यश्च अग्निचित्या चेति द्वन्द्वः। अग्नौ निपात्येते। **चित्योऽग्निरिति** ॥ कर्मणि ण्यत् तुक्च निपात्यते। **अग्नेश्चयनमिति** ॥ अग्निशब्दे षष्ठ्यन्ते उपपदे चिणो ण्यत् तुक् च, स्त्रीत्वं लोकात्। 'प्रैषातिसर्ग' इति व्याख्यातमपि स्मार्यते। **गम्यमिति** ॥ 'पोरदुपधात्' इति ण्यदपवादः क्यप्। ननु सामान्येन भावकर्मणोर्विहितानां कृत्यानाम्प्रैषादिषु तदभावे च सिद्धे प्रैषादिषु कृत्यविधिर्व्यर्थ इत्यत आह। **लोटा बाधा इति** ॥ इह प्रैषादिषु कृत्यविध्यभावे लोट् चेति प्रैषादिषु लोटा विशेषविहितेन कृत्यानां बाधः स्यात्। कृत्यानाम्प्रैषाद्यभावे भावकर्मणोश्चरितार्थत्वात्। अतः प्रैषादिषु कृत्यानां लोटा बाधनिवृत्तये पुनः कृत्यविधिरित्यर्थः। ननु वासरूपविधिनैव लोटा प्रैषादिषु कृत्यानां बाधो न भविष्यतीत्यत आह। **स्त्र्यधिकारादूर्ध्वमिति** ॥ 'स्त्रियां क्तिन्' इत्यूर्ध्वमित्यर्थः। 'प्राक् स्त्रियाः वासरूपविधिः' इति भाष्यम्। ननु स्त्र्यधिकारादूर्ध्वं वासरूपविधेरप्रवृत्तौ 'स्त्रियां क्तिन्' इति सामान्यविहितस्य क्तिनः 'षिद्भिदादिभ्योऽङ्' इति विशेषविहितेन नित्यबाधस्स्यात्, ततः क्षमा क्षान्तिः, भिदा भित्तिरित्यादि न स्यात् इत्यत आह। **क्वचिन्नेति** ॥ क्वचिदित्यस्यानिर्धारणादाह। **तेन क्त्वल्युट्तुमुन्खलर्थेषु नेति**

'अर्हे कृत्यतृचश्च' (सू २८२२) स्तोतुमर्हः स्तुत्यः स्तुतिकर्म । स्तोता स्तुतिकर्ता । लिङा बाधा मा भूदिति कृत्यतृचोर्विधिः ।

२८९४ । भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा । (३-४-६७)

एते कृत्यान्ताः कर्तरि वा निपात्यन्ते । पक्षे तयोरेवेति सकर्मकात्कर्मणि, अकर्मकात्तु भावे ज्ञेयाः । भवतीति भव्यः । भव्यमनेन वा । गायतीति गेयः साम्नामयम् । गेयं सामानेन वा इत्यादि । 'शकि लिङ् च' (सू २८२३)। चात्कृत्याः । वोढुं शक्यो वोढव्यः । वहनीयो वाह्यः । लिङा बाधा मा

सिद्धमिति ॥ एषु वासरूपविधिर्नास्तीत्यर्थः । "स्त्र्यधिकारात् प्राक् वासरूपविधिः, नतु तत ऊर्ध्वम्" इति भाष्यस्य क्त्वल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीत्यत्र सङ्कोच इति भावः । अत्र व्याख्यानमेव शरणम् । **अर्हे कृत्यतृचश्चेति** ॥ प्राग्व्याख्यातं विशेषविवक्षया स्मार्यते । 'लिङर्थदि' इत्यतो लिङनुकर्षार्थश्चकार इत्युक्तं प्राक् । ननु अर्हे अनर्हे च सामान्यविधानादेव अर्हेऽपि कृत्यतृचोः सिद्धयोः पुनस्तद्विधिर्व्यर्थः इत्यत आह । **लिङा बाधेति** ॥ अर्हेचेत्येतावत्येव उक्ते चकारानुकृष्टस्य लिङ एवार्हे विधिः स्यात् । तथा च अर्हे कृत्यतृचोर्विधिर्नस्यात्, अर्हे विशेषविहितेन लिङा बाधात्, अनर्हे कृत्यतृचोश्चरितार्थत्वात् । वासरूपविधिस्तु स्त्र्यधिकारादूर्ध्वन्न प्रवर्तते इत्युक्तमेव, अतो लिङा बाधा मा भूदिति कृत्यतृचोर्विधिरित्यर्थः । **भव्यगेय** ॥ **कर्तरि वेति** ॥ 'कर्तरि कृत्' इत्यतः कर्तरीत्यनुवृत्तं वेत्यनेन सम्बध्यते । तथा च कर्तरि वा एते निपात्यन्ते । अन्यत्र नेति फलति । तत्र अन्यत्रेत्यस्यानिर्धारणादाह । **पक्षे इति** ॥ अन्यत्रापि न सर्वत्र, किन्तु 'तयोरेव कृत्यक्तखलर्थाः' इति सूत्रेण सकर्मकात् कर्मणि अकर्मकाद्भावे एते कृत्या ज्ञेयाः इत्यर्थः । 'तयोरेव कृत्य' इति सूत्रे 'लः कर्मणि च' इत्यस्मात्सकर्मकेभ्यः कर्मणि अकर्मकेभ्यो भावे इति अनुवर्तते इति भावः । **भवतीति भव्य इति** ॥ कर्तरि अचो यत् । **भव्यमनेन वेति** ॥ भावे यत् । **गेयस्साम्नामयमिति** ॥ गाधातोः कर्तरि यत् । 'ईद्यति' इति प्रकृतेः ईत्त्वम् । गुणः । साम्नाङ्कर्मणामनभिहितत्वात् कृद्योगे षष्ठी । कर्तुरभिहितत्वात् प्रथमा । **गेयं सामानेनेति** ॥ कर्मणि यत् । सकर्मकत्वात्, नतु भावे । कर्तुरनभिहितत्वात्तृतीया । कृद्योगषष्ठी तु कृत्ययोगे कर्तरि वैकल्पिकी, 'कृत्यानाङ्कर्तरि वा' इत्युक्तेः । **इत्यादीति** ॥ प्रवचनीयो गुरुर्वेदस्य । प्रवक्तेत्यर्थः । कर्तरि अनीयर् । प्रवचनीयो वेदो गुरुणेति वा । उपस्थानीयश्शिष्यो गुरोः, उपस्थानीयो गुरुश्शिष्येणेति वा । जन्योऽसौ जायते इत्यर्थः । जन्यमनेनेति वा । आप्लवतेऽसौ आप्लाव्यः । 'ओरावश्यके' इति कर्तरि ण्यत् । आप्लाव्यमनेनेति वा । आपतत्यसौ आपात्यः । 'ऋहलोः' इति कर्तरि ण्यत् । आपात्यमनेन वा । 'शकि लिङ् च' इत्यपि व्याख्यातं प्राक् । विशेषविवक्षया सूत्रक्रमादिहोपन्यस्तम् । नन्विह चकारानुकृष्टकृत्यविधिर्व्यर्थः । शक्तौ अशक्तौ च भावकर्मणोः सामान्यतः कृत्यविधित एव

भूदिति कृत्योक्तिः। लाघवादनेनैव ज्ञापनसंभवे प्रैषादिसूत्रे 'कृत्याश्च' इति सुत्यजम्। अर्हे कृत्यतृचोर्ग्रहणं च।

॥ इति कृदन्तकृत्यप्रकरणम् ॥

॥ श्रीरस्तु ॥

॥ अथ कृदन्तप्रकरणम् ॥

२८९५। ण्वुल्तृचौ। (३-१-१३३)

धातोरेतौ स्तः। 'कर्तरि कृत्' (सू २८३२) इति कर्बर्थे। 'युवोरनाकौ' (सू १२४७)। कारकः। कर्ता। वोढुमर्हो वोढा। कारिका। कर्त्री। 'गाङ्कुटा—' (सू २४६१) इति ङित्त्वम्। कुटिता। अञ्णिदित्युक्तेर्न ङित्त्वम्। कोटकः। 'विज इट्' (सू २५३६)। विजिता। 'हनस्तोऽचिण्णलोः' (सू २५७४)। घातकः। 'आतो युक्—' (सू २७६१)। दायकः। 'नोदात्तोपदेशस्य—' (सू २७६३) इति न वृद्धिः शमकः। दमकः।

शक्तावपि सिद्धेरित्यत आह। **लिङा बाधेति** ॥ 'शकि लिङ्' इत्येतावत्येवोक्ते शक्तौ विशेषविहितेन कृत्यानाम्बाधः स्यात्, अशक्तौ कृत्यानाञ्चरितार्थत्वात्, वासरूपविधिस्तु स्त्र्यधिकारादूर्ध्वन्नेत्युक्तमेवेति भावः। **लाघवादिति** ॥ इह चकारमात्रेण वासरूपविधेः स्त्र्यधिकारादूर्ध्वं अनित्यताज्ञापनं सम्भवति। अतः 'प्रैषातिसर्ग' इति सूत्रे कृत्यग्रहणेन 'अर्हे कृत्यतृचश्च' इत्यत्र तृज्ग्रहणेन च तज्ज्ञापनाश्रयणे गौरवमिति भावः॥

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां कृदन्तकृत्यप्रकरणं समाप्तम्।

अथ कृदन्तप्रकरणम्—**ण्वुल्तृचौ** ॥ अनयोर्वर्तमानकालादन्यत्र न प्रयोग इति भाष्यम्। **वोढुमर्हः इति** ॥ 'अर्हे कृत्यतृचश्च' इत्युक्तेरिति भावः। **वोढेति** ॥ वहेः तृच्यनुदात्तत्वादिडभावे ढत्वधत्वष्टुत्वढलोपेषु 'सहिवहोः' इत्योत्त्वम्। कुटितेत्यत्र लघूपधगुणमाशङ्क्य आह। **गाङिति** ॥ तर्हि ण्वुलि कोटक इत्यत्रापि गुणो न स्यादित्यत आह। **अञ्णिदित्युक्तेरिति** ॥ विजितेत्यत्र लघूपधगुणमाशङ्क्य आह। **विज इडिति** ॥ कित्त्वमिति शेषः। **विजितेति** ॥

अनिटस्तु नियामकः। 'जनिवध्योश्च' (सू २५१२)। जनकः। 'वध हिंसायाम्'। वधकः। 'रधिजभोरचि' (सू २३०२)। रन्धकः। जम्भकः। 'नेट्यलिटि रधेः' (सू २५१६)। रधिता—रद्धा। 'मस्जिनशोः—' (सू २५१७) इति नुम्। मङ्क्ता। नंष्टा—नशिता। 'रभेरशब्लिटोः' (सू २५८१)। रम्भकः। रब्धा। 'लभेश्च' (सू २५८२)। लम्भकः। लब्धा। 'तीषसह—' (सू २३४०)। एषिता—एष्टा। सहिता—सोढा। दरिद्रातेरालोपः। दरिद्रिता। 'ण्वुलि न'। दरिद्रायकः। 'कृत्यल्युटः—' (सू २८४१) इत्येव सूत्रमस्तु। यत्र विहितास्ततोऽन्यत्रापि स्युरित्यर्थात्। एवं च बहुलग्रहणं योगविभागेन कृन्मात्रस्यार्थव्यभिचारार्थम्। पादाभ्यां ह्रियते पादहारकः। कर्मणि ण्वुल्। 'क्रमेः कर्तर्यात्मनेपदविषयात्कृत इण्निषेधो वाच्यः' (वा ४४२२, ४४२३)।

ङित्त्वान्न गुणः। **अनिटस्त्विति** ॥ तस्यानुदात्तोपदेशत्वादिति भावः। जनकः इत्यत्रोपधावृद्धिमाशङ्क्य वृद्धिनिषेधं स्मारयति। **जनिवध्योश्चेति ॥ वध हिंसायामिति ॥** धात्वन्तरं भौवादिकम्। भ्वादेराकृतिगणत्वात्। नत्वयं हन्तेर्वधादेशः। तथा सति 'जनिवध्योश्च' इति वृद्धिनिषेधसूत्रे वधिग्रहणवैयर्थ्यात्। वधादेशस्यादन्ततया अल्लोपस्य स्थानिवत्त्वादेव वृद्ध्यभावसिद्धेः। **वधक इति** ॥ 'जनिवध्योश्च' इति वृद्धिनिषेधः। रन्धकः जम्भकः इत्यत्र इदित्त्वाभावादप्राप्ते नुमि तद्विधिं स्मारयति। **रधिजभोरचीति** ॥ रधितेत्यत्र 'रधिजभोः' इति नुममाशङ्क्य आह। **नेट्यलिटि रधेरिति ॥ रधिता-रद्धेति ॥** 'रधादिभ्यश्च' इति वेट्। मस्ज् तृ इति स्थिते आह। **मस्जिनशोरिति** ॥ नुम्विधिरयम्। **मङ्क्तेति** ॥ मस्ज् तृ इति स्थिते 'मस्जेरन्त्यात् पूर्वो नुम् वाच्यः' इति सकारादुपरि जकारात् प्राङ्नुम्। मस्नज् तृ इति स्थिते 'स्कोः' इति सलोपः, जस्य कुत्वेन गः, तस्य चर्त्वेन कः, अनुस्वारः, परसवर्णेन ङ इति भावः। **नंष्टा-नशितेति** ॥ रधादित्वाद्वेट्। इडभावपक्षे 'मस्जिनशोः' इति नुमि ननश् तृ इति स्थिते 'व्रश्च' इति शस्य षः। नस्यानुस्वारः ष्टुत्वम्। **रभेरशब्लिटोः इति** ॥ नुम्विधिरयम्। **लब्धेति** ॥ 'झषस्तथोः' इति तस्य धः जश्त्वेन भस्य बः। **तीषसहेति** ॥ इड्विकल्पोऽयम्। **सोढेति** ॥ ढत्वधत्वष्टुत्वढलोपाः। 'सहिवहोः' इत्योत्त्वम्। **दरिद्रातेरालोप इति** ॥ 'दरिद्रातेरालोपो वक्तव्यः' इत्यनेनेति भावः। **ण्वुलि नेति** ॥ दरिद्रातेर्ण्वुलि आल्लोपो नेत्यर्थः। 'न दरिद्रायके लोपः' इति वार्तिकादिति भावः। **दरिद्रायक इति** ॥ 'आतो युक्' इति भावः। पादाभ्यां ह्रियते पादहारकः इत्यत्र कर्मणि ण्वुलं साधयितुमाह। **कृत्यल्युट इत्येवेति** ॥ 'कृत्यल्युटः' इत्येतावतैव पुनर्वचनबलात् येष्वर्थेषु ते कृत्यल्युटः विहिताः, ततोऽन्येष्वप्यर्थेषु भवन्तीत्यर्थलाभात् बहुलग्रहणं योगविभागार्थम्। कृत्प्रत्यया येष्वर्थेषु विहिताः ततोऽन्यत्रापि क्वचित् भवन्तीति। एवञ्च कर्मण्यपि ण्वुल् सिध्यतीत्यर्थः। 'कृतो बहुलम्' इति वार्तिकन्तु एतद्योगविभागसिद्धकथनपरमिति भावः। **क्रमेरिति** ॥ आत्मनेपदविषयात् क्रमेः परस्य कर्तरि कृतो नेडित्यर्थः।

प्रक्रन्ता। 'कर्तरि' इति किम्। प्रक्रमितव्यम्। 'आत्मनेपद—' इति किम्। सङ्क्रमिता। अनन्यभावे विषयशब्दः। तेन 'अनुपसर्गाद्वा' (सू २७१६) इति विकल्पार्हस्य न निषेधः। क्रमिता। तदर्हत्वमेव तद्विषयत्वम्। तेन क्रन्तेत्यपीति केचित्। 'गमेरिट्—' (सू २४०१) इत्यत्र परस्मैपदग्रहणं तङानयोरभावं लक्षयति। सञ्जिगमिषिता। एवं 'न वृङ्ह्यश्रुतुर्भ्यः' (सू २३४८) विवृत्सिता। यङन्ताण्ण्वुल्। अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः। पापचकः। यङ्लुगन्तात्तु पापाचकः।

२८९६। नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः। (३-१-१३४)

नन्द्यादेर्ल्युर्ब्रह्यादेर्णिनिः पचादेरच्स्यात्। नन्दयतीति नन्दनः। जनमर्दयतीति जनार्दनः। मधुं सूदयतीति मधुसूदनः। विशेषेण भीषयतीति

'स्नुक्रमोः' इति सूत्रस्थमिदं वार्तिकम्। **प्रक्रन्तेति** ॥ 'प्रोपाभ्यां समर्थाभ्याम्' इत्यात्मनेपदविषयोऽयम्। नन्वेवं सति क्रमितेत्यत्र कथमिडित्यत्र आह। **अनन्यभावे विषयशब्द इति** ॥ वर्तते इति शेषः। आत्मनेपदाविनाभाव इति यावत्। क्रमेः कर्तर्यात्मनेपदिन इत्येतावतैव सिद्धेरयमर्थो लभ्यते इति भावः। तथाच नित्यमात्मनेपदिन इति फलितम्। **तेनेति** ॥ क्रमितेत्यत्र क्रमेः 'अनुपसर्गाद्वा' इत्यात्मनेपदविकल्पविधानात् नित्यमात्मनेपदित्वाभावात् इण्निषेधो नेत्यर्थः। मतान्तरमाह। **तदर्हत्वमेवेति** ॥ आत्मनेपदार्हत्वमेवात्मनेपदविषयत्वम्। ततश्च आत्मनेपदपक्षे इण्निषेधे सति प्रक्रन्तेति रूपम्। आत्मनेपदाभावपक्षे तु क्रम इटि क्रमितेति रूपमिति केचिदाहुरित्यर्थः। अत्र पक्षे विषयपदस्य न प्रयोजनमित्यस्वरसः। ननु सञ्जिगमिषितेत्यत्र सनः कथमिट्, गमेरनिट्त्सु पाठात् सनः परस्मैपदपरत्वाभावेन 'गमेरिट् परस्मैपदेषु' इत्यस्याप्रवृत्तेरित्यत आह। **गमेरिडित्यत्रेति** ॥ **एवमिति** ॥ 'न वृङ्ह्यश्रुतुर्भ्यः' इत्यत्रापि परस्मैपदग्रहणमनुवृत्तं तङानयोरभावं लक्षयतीत्यर्थः। **विवृत्सितेति** ॥ वृतेस्सनि रूपम्। 'हलन्ताच्च' इति कित्त्वान्न गुणः। **यङन्तादिति** ॥ पचिधातोर्यङन्तात् पापच्येत्यस्मात् ण्वुलित्यर्थः। तस्य अकादेशे 'यस्य हलः' इति यकारलोपे अतो लोपे पापच् अक इति स्थिते उपधावृद्धिमाशङ्क्य आह। **स्थानिवत्त्वान्न वृद्धिरिति** ॥ **यङ्लुगन्तात्त्विति** ॥ यङस्सङ्घातस्य लुकः अजादेशत्वाभावेन स्थानिवत्त्वासम्भवादुपधावृद्धिर्निर्बाधा। 'न धातुलोपः' इति निषेधस्तु न, यङ्लुकः अनैमित्तिकत्वात् उपधावृद्धेरिग्लक्षणत्वाभावाच्च। **नन्दिग्रहि** ॥ नन्दि, ग्रहि, पच, एषां द्वन्द्वात्पञ्चमी। नन्दिग्रहिपचाः आदिर्येषामिति विग्रहः। आदिशब्दस्य प्रत्येकमन्वयः फलति। ल्यु, णिनि, अच्, एषां द्वन्द्वात्प्रथमा। यथासङ्ख्यमन्वयः। तदाह। **नन्द्यादेरित्यादि** ॥ नन्दि इति ण्यन्तग्रहणम्। तदाह। **नन्दयतीति नन्दन इति** ॥ ल्योरनादेशः, 'णेरनिटि' इति णिलोपः। **मधुं सूदयतीति** ॥ मधुः असुरविशेषः, तं सूदयति हन्तीति मधुसूदनः। ल्युः अनादेशः णिलोपः।

विभीषणः। लवणः। नन्द्यादिगणे निपात्तनाण्णत्वम्। ग्राही। स्थायी। मन्त्री। विशयी। वृद्ध्यभावो निपातनात्। विषयी। इह षत्वमपि। परिभावी—परिभवी। पाक्षिको वृद्ध्यभावो निपात्यते। पचादिराकृतिगणः। 'शिवशमरिष्टस्य करे' (सू ३४८९)। 'कर्मणि घटोऽठच्' (सू १८३६) इति सूत्रयोः करोतेर्घटेश्चाऽप्रयोगात्। अच्प्रत्यये परे यङ्लुग्विधानाच्च। केषाञ्चित्पाठस्त्वनुबन्धासञ्ज्ञनार्थः। केषाञ्चित्प्रपञ्चार्थः। केषाञ्चिद्बाधकबाधनार्थः। पचतीति पचः। नदट्। चोरट्। देवट्। इत्यादयष्टितः। नदी। चोरी। देवी। दीव्यतेः 'इगुपध—' (सू २८९७) इति कः प्राप्तः। जारभरा। श्वपचा। अनयोः 'कर्मण्यण्' (सू २९१३) प्राप्तः। न्यङ्कादिषु पाठाच्छ्वपाकोऽपि। 'यङोऽचि च' (सू २६५०) इति लुक्। 'न धातुलोपे—' (सू २६५६) इति गुणवृद्धि-

---

'सात्पदाद्योः' इति न षत्वम्। नन्द्यादयो वृत्तौ पठिताः। तत्र केचित् ण्यन्ताः केचिदण्यन्ताः। सूत्रे 'ग्रह उपादाने' इत्यस्य ग्रहीति इका निर्देशः। सौत्रत्वात् 'ग्रहिज्या' इति सम्प्रसारणं न। **ग्राहीति** ॥ ग्रहधातोरदुपधाण्णिनिः। नकारादिकार उच्चारणार्थः। उपधावृद्धिः। **विशयीति** ॥ विपूर्वात् 'शीङ् स्वप्ने' इति धातोर्णिनिः। गुणायादेशौ। 'अचोऽञ्णिति' इति वृद्धिमाशङ्क्य आह। **वृद्ध्यभाव इति** ॥ **विषयीति** ॥ 'षिञ् बन्धने' अस्मात्कृतसत्वाण्णिनिः। गुणायादेशौ। नन्विह कथन्न वृद्धिः, कथञ्च षत्वं पदादित्वादित्यत आह। **षत्वमपीति** ॥ निपातनात् वृद्ध्यभावष्षत्वञ्चेत्यर्थः। परिभावी—परिभवी इत्यत्र णित्त्वान्नित्यवृद्धिमाशङ्क्य आह। **पाक्षिक इति** ॥ ग्रह्यादयो वृत्तौ पठिताः। **पचादिराकृतिगण इति** ॥ पच वप इत्यादिकतिपयधातून् पठित्वा आकृतिगण इति गणपाठे वचनादिति भावः। गणपाठे आकृतिगणत्ववचनाभावेऽप्याह। **शिवशमिति** ॥ सूत्रे करशब्दस्य पचादिगणेऽपठितस्य कृञः अच्प्रत्ययान्तस्य 'कर्मणि घटः' इति सूत्रे घटेरचि घटशब्दस्य च प्रयोगदर्शनादित्यर्थः। **अच्प्रत्यय इति** ॥ यङन्तादच्प्रत्यये परे 'यङोऽचि च' इति यङो लुग्विधीयते। नहि पचादिगणे यङन्तं पठितमस्ति। अतोऽपि पचादेराकृतिगणत्वं विज्ञायते इत्यर्थः। पचादेराकृतिगणत्वे नदट् चोरट् इत्यादीनां तत्र पाठो व्यर्थ इत्यत आह। **केषाञ्चिदिति** ॥ टकारानुबन्धनासञ्ज्ञनार्थ इत्यर्थः। नन्वेवमपि वद चल इत्यादीनां अनुबन्धरहितानां तत्र किमर्थः पाठ इत्यत आह। **केषाञ्चित्प्रपञ्चार्थ इति** ॥ **बाधकेति** ॥ जारभर श्वपच इत्यादौ पचाद्यजपवादस्य कर्मण्यणो बाधनार्थं भरपचादीनां पाठः इति भाष्यम्। देवः सेवः इत्यादौ 'इगुपधज्ञाप्रीकिरः कः' इति विशिष्य विहितस्य कस्य बाधनार्थञ्च। तदेतदुपपादयति। **नदडित्यादि** ॥ ननु पचादिगणे श्वपचशब्दस्य बाधकबाधनार्थत्वे श्वपाक इति कथमित्यत आह। **न्यङ्कादिषु पाठाच्छ्वपाकोऽपीति** ॥ कदाचिदण्प्रत्ययः कुत्वञ्चेत्यर्थः। चेक्रियः, मरीमृजः इत्यादौ प्रक्रियान्दर्शयति। **यङोऽचि चेति** ॥ क्रीत्रादिधातोरचि यङो लुगित्यर्थः। द्वित्वादौ चेक्री

निषेधः। चेक्रियः। नेन्यः। लोलुवः। पोपुवः। मरीमृजः। 'चरिचलिपतिवदीनां वा द्वित्वमच्याक्चाभ्यासस्येति वक्तव्यम्' (वा ३४३०)। आगागमस्य दीर्घत्वसामर्थ्यादभ्यासह्रस्वो 'हलादिःशेषः' (सू २१७९) च न। चराचरः। चलाचलः। पतापतः। वदावदः। 'हन्तेर्घत्वं च' (वा ३४३१)। घत्वमभ्यासस्योत्तरस्य तु 'अभ्यासाच्च' (सू २४३०) इति कुत्वम्। घनाघनः। 'पाटेर्णिलुक्चोक्च दीर्घश्चाभ्यासस्य'। पाटूपटः। पक्षे चरः। चलः। पतः। वदः। हनः। पाटः। 'रात्रेः कृति—' इति वा मुम्। रात्रिञ्चरो रात्रिचरः।

२८९७। इगुपधज्ञाप्रीकिरः कः। (३-१-१३५)

एभ्यः कः स्यात्। क्षिपः। लिखः। बुधः। कृशः। ज्ञः। प्रीणातीति प्रियः। किरतीति किरः। वासरूपविधिना ण्वुल्तृचावपि। क्षेपकः—क्षेप्ता।

२८९८। आतश्चोपसर्गे। (३-१-१३६)

कः स्यात्। 'श्याव्यध—' (सू २९०३) इति णस्यापवादः। सुग्लः। प्रज्ञः।

अ इत्यादिस्थितौ आह। **न धातुलोप इति** ॥ **चेक्रियः इति** ॥ गुणाभावे संयोगपूर्वत्वान्न यण्। **नेन्य इति** ॥ 'एरनेकाचः' इति यण्। **लोलुवः इति** ॥ उवङ्। यण्तु न। 'ओस्सुपि' इत्युक्तेः। **मरीमृज इति** ॥ अत्र 'न धातुलोपे' इति निषेधात् न मृजेर्वृद्धिः। **चरिचलीति** ॥ एषाम् अच्प्रत्यये परे द्वित्वम् अभ्यासस्य आगागमश्चेत्यर्थः। ननु चराचर इत्यत्राभ्यासे रेफादाकारस्य ह्रस्वः स्यात्, हलादिशेषेण तत्र रेफस्यापि निवृत्तिः स्यादित्यत आह। **आगागमस्येति** ॥ ह्रस्वत्वे सत्यागागमे दीर्घोच्चारणं व्यर्थम्, अगागमस्यैव विधातुं शक्यत्वात्। तथा हलादिशेषेण रेफस्य निवृत्तौ ह्रस्वत्वेऽपि सवर्णदीर्घेण चराचर इति सिद्धे दीर्घोच्चारणं हलादिशेषाभावज्ञमयतीत्यर्थः। **हन्तेरिति** ॥ वार्तिकमिदम्। हनधातोरचि घत्वं द्वित्वं आक् चेत्यर्थः। ननु उत्तरखण्डे 'अभ्यासाच्च' इति कुत्वसिद्धेः किमर्थमिह घत्वविधानमित्यत आह। **घत्वमभ्यासस्येति** ॥ इह विधीयते इति शेषः। **पाटेरिति** ॥ वार्तिकमिदम्। पाटेर्णौ पाटि इत्यस्मात् आचि णेर्लुक्, द्वित्वम्। अभ्यासस्य ऊगागमः। अभ्यासस्य आकारस्य ह्रस्वे तस्य दीर्घश्चेत्यर्थः। वृद्धिनिवृत्तये णेर्लुग्विधिः। आगमे दीर्घोच्चारणात् हलादिशेषेण टकारस्य न निवृत्तिः। हलादिशेषे तु आद्गुणे पोपट इति रूपस्य उगागमेऽपि सिद्धेः। **इगुपधज्ञा** ॥ 'कृ विक्षेपे' इत्यस्य इत्त्वे रपरत्वे च किर् इति रेफान्तम्, इगुपध, ज्ञा, प्री, किर्, एषान्द्वन्द्वात्पञ्चमी। कित्त्वं गुणनिषेधार्थम्। **ज्ञ इति** ॥ आतो लोपः। **प्रिय इति** ॥ प्रीञ् के इयङ्। **किर इति** ॥ कृधातोरचि इत्त्वे रपरत्वम्। **आतश्चोपसर्गे** ॥ **कः स्यादिति** ॥ शेषपूरणम्। उपसर्गे उपपदे आदन्ताद्धातोः कस्स्यादिति फलति। **णस्यापवाद इति** ॥ तस्य उपसर्गेऽनुपसर्गे च आदन्तसामान्यविहितत्वात् इति भावः। **सुग्ल इति** ॥ ग्लैधातोः 'आदेचः' इत्यात्वे कृते कप्रत्यये आतो लोप इति भावः। **प्रज्ञ इति** ॥ ज्ञाधातोरातो लोपः।

२८९९ । पाघ्राध्माधेट्दृशः शः । (३-१-१३७)

पिबतीति पिबः । जिघ्रः । धमः । धयः । धया कन्या । धेटष्टित्त्वात् 'स्तनन्धयी' इति खशीव ङीप्प्राप्तः । 'खशोऽन्यत्र नेष्यते' इति हरदत्तः । पश्यतीति पश्यः । घ्रः संज्ञायां न (वा १९६७) । 'व्याघ्रादिभिः—' (सू ७३५) इति निर्देशात् ।

२९०० । अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसाति-साहिभ्यश्च । (३-१-१३८)

शः स्यात् । लिम्पः । विन्दः । धारयः । पारयः । वेदयः । उदेजयः । चेतयः । सातिः सुखार्थः । सौत्रो हेतुमण्ण्यन्तः । सातयः । वासरूपन्यायेन

पाघ्रा ॥ अत्र 'ङ्ग्विकरणाङ्ग्विकरणयोरङ्ग्विकरणस्य ग्रहणम्' इति मत्वा आह । **पिबतीति पिब इति** ॥ पाघ्रातोदशप्रत्यये तस्य शित्त्वेन सार्वधातुकत्वात् 'पाघ्राध्मा' इति पिबादेशः । स चादन्त इत्युक्तम् । शप् पररूपम् । **जिघ्र इति** ॥ 'पाघ्रा' इति घ्राधातोर्जिघ्रादेशः । **धम इति** ॥ ध्माधातोर्धमादेशः । **धय इति** ॥ धेटश्शः, शप्, अयादेशः, पररूपमिति भावः । **धया कन्येति** ॥ अत्र धेट्धातुष्टित् सः अदन्तो न भवति । यस्त्वदन्तो धयशब्दः, स न टित् । अतोऽत्र 'टिड्ढाणञ्' इति न ङीबिति भावः । धेटष्टित्त्वादित्यारभ्य हरदत्तमतम् । **स्तनन्धयीतीति** ॥ स्तनशब्दे उपपदे धेट्धातोः 'नासिकास्तनयोः' इति खशि कृते 'खित्यनव्ययस्य' इति मुमि स्तनन्धयशब्दः । तत्र खशि कृते धेटष्टित्त्वमाश्रित्य यथा 'टिड्ढाणञ्' इति ङीप्, तथा धया कन्येत्यत्रापि ङीप् प्राप्तः । स ङीप् खशोऽन्यत्र नेष्यते इति हरदत्त आहेत्यर्थः । वस्तुतस्तु 'टिड्ढाणञ्' इति सूत्रे टिदाद्यवयवाकारस्यैव ग्रहणमिति भाष्यविरोधादिदञ्चिन्त्यम् । नच टित्त्वसामर्थ्यादेव स्तनन्धयीशब्दात् ङीबिति वाच्यम् । धया कन्येत्यत्रापि ङीप्रसङ्गात् । खशोऽन्यत्र नेष्यते इत्यत्र प्रमाणाभावात् । तस्मात् स्तनन्धयीत्यप्रामाणिकमेव । तस्य प्रामाणिकत्वे गौरादित्वङ्कल्प्यम् । ङीष्प्युदात्तनिवृत्तिस्वरप्राप्त्या स्वरे विशेषाभावात् इति शब्देन्दुशेखरे स्थितम् । दृशः उदाहरति । **पश्य इति** ॥ 'पाघ्रा' इति पश्यादेशः । **घ्रस्संज्ञायां नेति** ॥ घ्राधातोस्संज्ञायां शो नेत्यर्थः । कुत इत्यत आह । **व्याघ्रादिभिरिति** ॥ अन्यथा व्याजिघ्रादिभिरिति निर्देशेदिति भावः । **अनुपसर्गात्** ॥ **शः स्यादिति** ॥ शेषपूरणम् । **लिम्पः, विन्द इति** ॥ 'लिप उपदाहे, विद्लृ लाभे' इति तुदादौ ताभ्यां शः, 'श्नसोरल्लोपः' इति नुम् । सूत्रे कृतनुमौ लिम्पविन्दौ निर्दिष्टौ । अतस्तौदादिकयोरेव ग्रहणम् । **धारय इति** ॥ 'धृङ् धारणे, धृङ् अवस्थाने' आभ्यां हेतुमण्ण्यन्ताभ्यां शः, शप्, गुणायादेशौ । **पारय इति** ॥ पॄधातोः ण्यन्ताच्छः, शप् गुणायादेशौ । विद वेदनाख्यादिषु । चुरादिण्यन्ताच्छः । शप् गुणायादेशौ । **उदेजय इति** ॥ उत्पूर्वादेजधातोः ण्यन्ताच्छः । शप् गुणायादेशौ । **चेतय इति** ॥ 'चिती संज्ञाने' ण्यन्ताच्छः, शप्, गुणायादेशौ । एवं

क्विपि सात्परमात्मा। सात्वन्तो भक्ताः। षह मर्षणे, चुरादिः। हेतुमण्ण्यन्तो वा। साहयः। 'अनुपसर्गात्' किम्। प्रलिपः। 'नौ लिम्पेर्वाच्यः' (वा १९६८)। निलिम्पा देवाः। 'गवादिषु विन्देः संज्ञायाम्' (वा १९६९)। गोविन्दः। अरविन्दम्।

२९०१। ददातिदधात्योर्विभाषा। (३-१-१३९)

शः स्यात्। ददः। दधः। पक्षे वक्ष्यमाणो णः। अनुपसर्गादित्येव। प्रदः। प्रधः।

२९०२। ज्वलितिकसन्तेभ्यो णः। (३-१-१४०)

इति शब्द आद्यर्थः। ज्वलादिभ्यः कसन्तेभ्यो वा णः स्यात्। पक्षेऽच्। ज्वालः—ज्वलः। चालः—चलः। अनुपसर्गादित्येव। उज्ज्वलः। 'तनोतेरुपसङ्ख्यानम्' (वा १९७०)। इहानुपसर्गादिति विभाषेति च न सम्बध्यते। अवतनोतीत्यवतानः।

सातयः। सादिति रूपं साधयितुमाह। **वासरूपन्यायेन क्विबिति** ॥ सातयति सुखयतीत्यर्थे क्विप् णिलोपः। यद्यपि क्विप् सामान्यविहितः सातेश्शप्रत्ययस्तु तदपवादः। तथापि वासरूपविधिना क्विबपि भवतीत्यर्थः। **सात्परमात्मेति** ॥ "एष ह्येवानन्दयाति" इति श्रुतेः तस्य सुखयितृत्वावगमादिति भावः। **सात्वन्त इति** ॥ सात् परमात्मा भजनीयः एषामित्यर्थे मतुप् 'मादुपधायाः' इति मस्य वः। 'तसौ मत्वर्थे' इति भत्वात् पदत्वाभावान्न जश्त्वम्। **साहय इति** ॥ साहेश्शः शप् गुणायादेशौ। **प्रलिप इति** ॥ इगुपधलक्षणः कः। **नौ लिम्पेरिति** ॥ वार्तिकमिदम्। नि इत्युपसर्गे उपपदे लिम्पेश्शो वाच्य इत्यर्थः। अनुपसर्गादित्युक्तेः पूर्वेणाप्राप्तौ वचनम्। **गवादिष्विति** ॥ वार्तिकमिदम्। गवादिषु उपपदेषु विन्देश्शो वाच्य इत्यर्थः। संज्ञायामेवेति नियमार्थमिदम्। **गोविन्द इति** ॥ गाः उपनिषद्वाचः प्रमाणतया विन्दतीत्यर्थः। **अरविन्दमिति** ॥ चक्रे नाभिनेम्योरन्तराळप्रोतानि काष्ठानि अराणि तत्सदृशानि दळानि विन्दतीत्यर्थः। कर्मण्यणोऽपवादश्शः। **ददातिदधात्योर्विभाषा** ॥ दाञ्, धाञ्, आभ्यां शो वा स्यात्। **ददः, दधः इति** ॥ शः, शप् लुक्, 'श्लौ' इति द्वित्वम्। आतो लोपः। **वक्ष्यमाण इति** ॥ 'श्याद्व्यध' इत्यनेनेति भावः। **प्रदः, प्रधः इति** ॥ 'आतश्चोपसर्गे' इति कः। **ज्वलिति** ॥ **आद्यर्थ इति** ॥ तथा च ज्वल् इति आदिर्येषां ते ज्वलितयः ते च ते कसन्ताश्चेति ज्वलितिकसन्ताः तेभ्य इति विग्रहः। तदाह। **ज्वलादिभ्य इति** ॥ 'ज्वल दीप्तौ' इत्यारभ्य 'कस गतौ' इत्येवमन्तेभ्य इत्यर्थः। **वा णः स्यादिति** ॥ विभाषेत्यनुवर्तते इति भावः। **पक्षेऽजिति** ॥ इगुपधेभ्यः क इत्यपि बोध्यम्। **उपसङ्ख्यानमिति** ॥ णस्येति शेषः। **न सम्बध्यते इति** ॥ अवतानः इत्येव

२९०३। श्याद्व्यधास्रुसंस्रवतीणवसावहलिहश्लिषश्वसश्च। (३-१-१४१)

श्यैङ्प्रभृतिभ्यो नित्यं णः स्यात्। श्येङोऽवस्यतेश्चादन्तत्वात्सिद्धे पृथग्ग्रहणमुपसर्गे कं बाधितुम्। अवश्यायः। प्रतिश्यायः। आत्। दायः। धायः। व्याधः। 'स्रु गतौ' आङ्पूर्वः संपूर्वश्च। आस्रावः। संस्रावः। अत्ययः। अवसायः। अवहारः। लेहः। श्लेषः। श्वासः।

२९०४। दुन्योरनुपसर्गे। (३-१-१४२)

णः स्यात्। दुनोतीति दावः। नीसाहचर्यात्सानुबन्धकाद्दुनोतेरेव णः। दवतेस्तु पचाद्यच् दवः। नयतीति नायः। उपसर्गे तु प्रदवः। प्रणयः।

२९०५। विभाषा ग्रहः। (३-१-१४३)

णो वा। पक्षेऽच्। व्यवस्थितविभाषेयम्। तेन जलचरे ग्राहः। ज्योतिषि ग्रहः। 'भवतेश्च' इति काशिका। भवो देवः संसारश्च। भावाः पदार्थाः। भाष्यमते तु भास्त्यर्थाच्चुरादिण्यन्तादच्। भावः।

भाष्ये उदाहरणादिति भावः। **श्याद्व्यधास्रु॥** श्या, आत्, व्यध, आस्रु, संस्रु, अतीण्, अवसा, अवह, लिह, श्लिष, श्वस्, एषामेकादशानां समाहारद्वन्द्वात्पञ्चमी। अनुपसर्गादिति निवृत्तम्। उत्तरसूत्रेऽनुपसर्गग्रहणात्। एतच्च तत्सम्बद्धं विभाषाग्रहणञ्च नानुवर्तते। तदाह। **नित्यमिति॥ श्यैङ्ः इति॥** श्यैङ्धातोः श्वावपूर्वकात् षोधातोश्च कृतात्त्वयोः सूत्रे निर्देशः। तयोरादन्तत्वादेव सिद्धे पुनर्ग्रहणम् 'आतश्चोपसर्गे' इति कप्रत्ययबाधनार्थमित्यर्थः। **अवश्यायः, प्रतिश्याय इति॥** श्यैङः आत्त्वे कृते णः आतो युक्। **आदिति॥** आदन्तस्योदाहरणसूचनम्। **दायः, धायः इति॥** णे आतो युक्। **व्याध इति॥** व्यधेर्णे उपधावृद्धिः। **आस्रावः, संस्राव इति॥** णे 'अचोऽञ्णिति' इति वृद्धिः, आवादेशः। **अत्यय इति॥** अतिपूर्वादिण्धातोर्णे वृद्ध्यायादेशौ। **अवसाय इति॥** अवपूर्वात् 'षोऽन्तकर्मणि' इत्यस्मात् णे आत्त्वे आतो युक्। **लेहः, श्लेषः इति॥** णे लघूपधगुणः। **श्वास इति॥** णे उपधावृद्धिः। **दुन्योरनुपसर्गे॥** दुनोतेः नयतेश्चेत्यर्थः। दवशब्दं साधयितुमाह। **नीसाहचर्यादिति॥** नीधातुस्सानुबन्धकः तत्साहचर्यात् 'ट्टु दु उपतापे' इति स्वादिगणस्थादेव णप्रत्यय इत्यर्थः। **दवतेस्त्विति॥** 'दु द्रु गतौ' इति भौवादिकात् निरनुबन्धकात्पचाद्यजित्यर्थः। **विभाषा ग्रहः॥ व्यवस्थितविभाषेयमिति॥** इदं 'शाच्छोः' इति सूत्रे भाष्ये स्पष्टम्। **तेनेति॥** जलचरे मत्स्यादौ वाच्ये णप्रत्यये उपधावृद्धौ ग्राह इत्येव भवति। ज्योतिषि सूर्यचन्द्रादौ वाच्ये अच्प्रत्यये ग्रह इत्येव भवतीत्यर्थः। **भवतेश्चेति॥** णो वेति शेषः। पक्षे अच्। **काशिकेति॥** भाष्ये तु न दृश्यते इति भावः। इयमपि व्यवस्थितविभाषैव। तदाह। **भवो देव इति॥** महादेव इत्यर्थः। अत्र अजेवेति भावः। **भावाः पदार्था इति॥** अत्र ण एवेति भावः। ननु भवतेश्चेति णविकल्पस्य भाष्ये अदर्शनात् कथं भाष्यमते भावशब्द इत्यत आह। **भाष्यमते त्विति॥** भावयति

२९०६। गेहे कः। (३-१-१४४)

गेहे कर्तरि ग्रहेः कः स्यात्। गृह्णाति धान्यादिकमिति गृहम्। तात्स्थ्यात् गृहा दाराः।

२९०७। शिल्पिनि ष्वुन्। (३-१-१४५)

क्रियाकौशलं शिल्पं तद्वत्कर्तरि ष्वुन्स्यात्। 'नृतिखनिरञ्जिभ्य एव' (वा १९७१)। नर्तकः—नर्तकी। खनकः—खनकी। 'असि अके अने च रञ्जेर्नलोपो वाच्यः' (वा ४०६७)। रजकः—रजकी। भाष्यमते तु नृतिखनिभ्यामेव ष्वुन्। रञ्जेस्तु 'क्वुन्शिल्पिसंज्ञयोः' (उणा १९१) इति क्वुन्। टाप्। रजिका। पुंयोगे तु रजकी।

२९०८। गस्थकन्। (३-१-१४६)

गायतेस्थकन्स्यात्, शिल्पिनि कर्तरि। गाथकः।

२९०९। ण्युट् च। (३-१-१४७)

गायनः। टित्त्वाद्ङीनी।

२९१०। हश्च व्रीहिकालयोः। (३-१-१४८)

प्रापयति स्वस्वकार्यमित्यर्थे 'भू प्राप्तौ' इति चुरादिण्यन्तात् भावि इत्यस्मात् अच्प्रत्यये णिलोपे भावशब्द इत्यर्थः। **गेहे कः** ॥ 'विभाषा ग्रहः' इत्यस्यापवादः। **गृहमिति** ॥ 'ग्रहिज्या' इति सम्प्रसारणं पूर्वरूपञ्च। ननु गृहा दारा इति कथम्। गेहे कर्तर्येव वाच्ये कप्रत्ययविधानादित्यत आह। **तात्स्थ्यादिति** ॥ गृहशब्दो गेहस्थे लाक्षणिकः इति भावः। **गृहा दारा इति** ॥ "दारेष्वपि गृहाः" इत्यमरः। **शिल्पिनि ष्वुन्** ॥ **नृतिखनिरञ्जिभ्य एवेति** ॥ वार्तिकमिदम्। **नर्तकीति** ॥ षित्त्वात् ङीषिति भावः। 'दंशसञ्जस्वञ्जां शपि' इति सूत्रे 'रजकरजनरजस्सूपसङ्ख्यानम्' इति वार्तिकम्। तत् अर्थतस्सञ्जृह्णाति। **असि अके अने चेति** ॥ **रजक इति** ॥ रञ्जेः शिल्पिनि ष्वुनि अकादेशे नलोपः। **रजकीति** ॥ षित्त्वात् ङीष्। नृतिखनिरञ्जिभ्य एवेति परिगणनात्। 'वेञ् तन्तुसन्ताने' इत्यस्मात् कृतात्त्वात् 'ण्यासश्रन्थ' इति णप्रत्यये आतो युकि वाय इति सिध्यति। **भाष्यमते तु नृतिखनिभ्यामेवेति** ॥ इदञ्च 'दंशसञ्जस्वञ्जां शपि' इति सूत्रे भाष्ये स्पष्टम्। ननु भाष्यमते क्वुनि रजकीति कथमित्यत आह। **पुंयोगे तु रजकीति** ॥ **गस्थकन्** ॥ गः थकन्निति च्छेदः। गैधातोः कृतात्वस्य गः इति पञ्चम्यन्तम्। तदाह। **गायतेरिति** ॥ **ण्युट् च** ॥ ककार उच्चारणसामर्थ्ये। गायतेर्ण्युट् च स्यात् थकन् च शिल्पिनि कर्तरि। **गायन इति** ॥ आत्वे युक्। 'आदेच' इत्यात्वस्य अनैमित्तिकत्वेन वृद्ध्यपेक्षया अन्तरङ्गत्वात्। यद्यपि 'गस्थकन् ण्युट् च' इत्येकमेव सूत्रमुचितम्। तथापि ण्युट एवोत्तरसूत्रे अनुवृत्त्यर्थो योगविभागः। **हश्च** ॥ 'ओ हाक् त्यागे' इत्यस्य 'ओ हाङ् गतौ' इत्यस्य च हः इति पञ्चम्यन्तम्।

हाको हाङश्च ण्युट् स्यात् व्रीहौ काले च कर्तरि । जहात्युदकमिति हायनो व्रीहिः । जहाति भावानिति हायनो वर्षम् । जिहीते प्राप्नोतीति वा ।

२९११ । प्रुसृल्वः समभिहारे वुन् । (३-१-१४९)

समभिहारग्रहणेन साधुकारित्वं लक्ष्यते । प्रवकः । सरकः । लवकः ।

२९१२ । आशिषि च । (३-१-१५०)

आशीर्विषयार्थवृत्तेर्वुन्स्यात्कर्तरि । जीवतात्—जीवकः । नन्दतात्—नन्दकः । आशीः प्रयोक्तुर्धर्मः । आशासितुः पित्रादेरियमुक्तिः ।

इति तृतीयाध्यायस्य प्रथमः पादः ।

२९१३ । कर्मण्यण् । (३-२-१)

कर्मण्युपपदे धातोरण्प्रत्ययः स्यात् । उपपदसमासः । कुम्भं करोतीति कुम्भकारः । आदित्यं पश्यतीत्यादावनभिधानान्न । 'शीलिकामिभक्ष्याचरिभ्यो णः' (वा १९८०) । अणोऽपवादार्थं वार्तिकम् । मांसशीला । मांसकामा ।

तदाह । **हाको हाङश्चेति** ॥ **प्रुसृल्वः** ॥ **लक्ष्यते इति** ॥ एतच्च भाष्ये स्पष्टम् । प्रु, सृ, लु, एषां समाहारद्वन्द्वात्पञ्चमी । **आशिषि च** ॥ **जीवक इति** ॥ आशास्यमानजीवनक्रियाश्रय इत्यर्थः । एवन्नन्दकः । **आशीरिति** ॥ आशासनम् अयमित्थंभूयादिति प्रार्थनं शब्दप्रयोक्तृकर्तृकमिति यावत् । तत आशासितुः पित्रादेरियमुक्तिः । इयं नन्दकशब्दप्रयोग इत्यर्थः, औचित्यादिति भावः ॥

इति तृतीयाध्यायस्य प्रथमः पादः ।

अथ तृतीयाध्यायस्य द्वितीयः पादः—**कर्मण्यण् ॥ कर्मण्युपपदे इति** ॥ 'तत्रोपपदं सप्तमीस्थम्' इत्यत्र तत्रेत्यनेनेदं लभ्यत इति तत्रैवोक्तम् । प्रत्ययस्तु कर्तर्येव । **उपपदसमास इति** ॥ 'उपपदमतिङ्' इत्यनेनेति भावः । **कुम्भङ्करोतीति** ॥ अस्वपदो लौकिकविग्रहोऽयम् । कुम्भ अस् कार इत्यलौकिकविग्रहवाक्ये सुबुत्पत्तेः प्रागेव कारशब्देन कृदन्तेन कुम्भ अस् इति षष्ठ्यन्तस्य समास इति प्रागेवोक्तम् । ननु आदित्यम्पश्यतीत्यादित्यदर्शः, हिमवन्तं शृणोतीति हिमवच्छ्रावः, ग्रामङ्गच्छतीति ग्रामगामः, इत्यादि स्यादित्यत आह । **आदित्यम्पश्यतीत्यादावनभिधानान्नेति** ॥ एतच्च भाष्ये स्पष्टम् । **शीलीति** ॥ शीलि, कामि, भक्षि, आचरि, एभ्यो णप्रत्ययो वाच्य इत्यर्थः । ननु 'कर्मण्यण्' इत्यणैव सिद्धे किमर्थमिदमित्यत आह । **अणोऽपवादार्थमिति** ॥ अणन्तत्वे तु ङीप् स्यात् । तन्निवृत्त्यर्थं णविधानमिति भावः । तदाह । **मांसशीलेति** ॥ 'शील समाधौ' इति भ्वादिः । इह तु स्वभावतस्सेवने वर्तते । मांसं स्वभावतस्सेवमानेत्यर्थः । **मांसकामेति** ॥ मांसङ्कामयते इति विग्रहः । **मांसभक्षेति** ॥

मांसभक्षा। कल्याणाचारा। 'ईक्षिक्षमिभ्याञ्च' (वा १९८१)। सुखप्रतीक्षा। बहुक्षामा। कथं तर्हि गङ्गाधरभूधरादयः। कर्मणः शेषत्वविवक्षायां भविष्यन्ति।

२९१४। ह्वावामश्च। (३-२-२)

एभ्यः अण् स्यात्। कापवादः। स्वर्गह्वायः। तन्तुवायः। धान्यमायः।

२९१५। आतोऽनुपसर्गे कः। (३-२-३)

आदन्ताद्धातोरनुपसर्गात्कर्मण्युपपदे कः स्यान्नाण्। 'आतो लोपः'। गोदः। पार्ष्णिव्रम्। 'अनुपसर्गे' किम्। गोसन्दायः। 'कविधौ सर्वत्र संप्रसारणिभ्यो डः' (वा १९८४)। ब्रह्म जिनाति ब्रह्मज्यः। सर्वत्रग्रहणादातश्चोपसर्गे आह्वः। प्रह्वः।

२९१६। सुपि स्थः। (३-२-४)

मांसं भक्षयते इति विग्रहः। **कल्याणाचारेति** ॥ कल्याणमाचरतीति विग्रहः। सर्वत्र टापू। **ईक्षिक्षमिभ्यामिति** ॥ वार्तिकमिदम्। ण इति शेषः। **कथमिति** ॥ कर्मण्यणि गङ्गाधारः इत्यादि स्यादित्याक्षेपः। **कर्मणश्शेषत्वेति** ॥ तथाच कर्मोपपदाभावान्नाणिति भावः। **ह्वावामश्च** ॥ 'ह्वेञ् स्पर्धायाम्, वेञ् तन्तुसन्ताने' अनयोः कृतात्वयोर्निर्देशः, 'माङ् माने' एषान्द्वन्द्वात्पञ्चम्येकवचनम्। **एभ्य इति** ॥ कर्मण्युपपदे एभ्यः अण् स्यादित्यर्थः। ननु 'कर्मण्यण्' इत्येव सिद्धे किमर्थमिदमित्यत आह। **कापवाद इति** ॥ 'आतोऽनुपसर्गे कः' इत्यस्याणपवादस्य वक्ष्यमाणस्य बाधनार्थमित्यर्थः। माङ्मेङोरिह ग्रहणम्, ननु 'मा माने' इत्यस्य, अकर्मकत्वात्। **स्वर्गह्वाय इति** ॥ यद्यपि पराभिभवेच्छायां स्पर्द्धायां पराभिभवस्य कर्मणो धात्वर्थत्वेनोपसङ्ग्रहादकर्मक इत्युक्तम्। तथापि इह पराभिभवेच्छा धात्वर्थः। स्वर्गमभिभवितुं वाञ्छतीत्यर्थः। अन्तरङ्गत्वादात्वे कृते आतो युक्। एवमग्रेऽपि। **आतोऽनुपसर्गे कः** ॥ **पार्ष्णिव्रमिति** ॥ पार्ष्णिः पादमूलभागः। तं व्रायते इति विग्रहः। 'व्रैङ् पालने' आत्वे कृते कः। **गोसन्दाय इति** ॥ अण्यातो युक्। **कविधौ सर्वत्रेति** ॥ वार्तिकमिदम्। सर्वत्र कप्रत्ययविधौ सम्प्रसारणार्हेभ्यः कापवादो डप्रत्ययो वाच्य इत्यर्थः। **ब्रह्मज्य इति** ॥ 'ज्या वयोहानौ' अस्माङ्डः। डित्त्वसामर्थ्यादभस्यापि टेर्लोपः। अत्र कप्रत्यये सति कित्त्वात् 'ग्रहिज्या' इति सम्प्रसारणम्प्रसक्तम्। अतो ड एव नतु कः। **सर्वत्रेति** ॥ उपसर्गे उपपदे आतोऽपि ड एव। ननु 'आतश्चोपसर्गे' इति कः। सर्वत्र ग्रहणादित्यन्वयः। अन्यथा अनन्तरस्य विधिरिति न्यायात् 'आतोऽनुपसर्गे कः' इत्येव बाध्येत, नतु 'आतश्चोपसर्गे' इति कप्रत्यय इति भावः। **आह्वः, प्रह्व इति** ॥ अत्र 'आतश्चोपसर्गे' इति कम्बाधित्वा ड एव। तस्य अकित्त्वाद्यजादिलक्षणं सम्प्रसारणञ्च। **सुपि स्थः** ॥ **योगो**

सुपीति योगो विभज्यते । सुप्युपपदे आदन्तात्कः स्यात् । द्वाभ्यां पिबतीति द्विपः । समस्थः । विषमस्थः । ततः 'स्थः' । सुपि तिष्ठतेः कः स्यादारम्भसामर्थ्याद्भावे । आखूनामुत्थानमाखूत्थः ।

२९१७ । प्रष्ठोऽग्रगामिनि । (८-३-९२)

प्रतिष्ठत इति प्रष्ठो गौः । अग्रतो गच्छतीत्यर्थः । 'अग्र—' इति किम् । प्रस्थः ।

२९१८ । अम्बाम्बगोभूमिसव्येऽपद्वित्रिकुशेकुशङ्कङ्कुमञ्जिपुञ्जि-परमेबर्हिर्दिव्यग्निभ्यः स्थः । (८-३-९७)

'स्थः' इति कप्रत्ययान्तस्यानुकरणम् । षष्ठ्यर्थे प्रथमा । एभ्यः स्थस्य सस्य षः स्यात् । द्विष्ठः । त्रिष्ठः । इत ऊर्ध्वं कर्मणि सुपिति द्वयमप्यनुवर्तते । तत्राकर्मकेषु सुपीत्यस्य सम्बन्धः ।

विभज्यते इति ॥ इदं भाष्ये स्पष्टम् । तत्र सुपीत्यंशं व्याचष्टे । **सुप्युपपदे इति** ॥ इदङ्केवलोपसर्गे व्यर्थम् । 'आतश्चोपसर्गे' इत्येव सिद्धेः । कर्मण्युपपदेऽप्येतद्व्यर्थमेव, 'आतोऽनुपसर्गे कः' इत्यारभ्यादिति मत्वोदाहरति । **द्वाभ्यामिति** ॥ **तत इति** ॥ सुपीत्यंशस्य व्याख्यानानन्तरं स्थ इत्यंशो व्याख्यायते इत्यर्थः । ननु सुपि इत्यंशेनैव सिद्धे किमर्थमिदमित्यत आह । **आरम्भसामर्थ्यादिति** ॥ कर्तरि 'सुपि' इति पूर्वेण सिद्धेरिह 'कर्तरि कृत्' इति नानुवर्तते । अनिर्दिष्टार्थत्वात् 'गुप्तिज्किद्भ्यस्सन्' इत्यादिवत् स्वार्थिकोऽयम् । स्वार्थश्च भाव एवेति भाष्ये स्पष्टम् । नच एवं सति 'घञर्थे कविधानम्' इत्येव सिद्धमिति वाच्यम् । नित्योपपदसमासार्थत्वात् । अत एव ल्युडन्तेन अस्वपदविग्रहन्दर्शयन्नाह । **आखूनामुत्थानम् आखूत्थ इति** ॥ **प्रष्ठोऽग्रगामिनि** ॥ प्रपूर्वात् स्थाधातोः 'आतश्चोपसर्गे' इति कप्रत्यये आतो लोपे प्रस्थशब्दः । सः अग्रगामिनि वाच्ये कृतषत्वः निपात्यते । इण्कवर्गाभ्यां परत्वाभावात् षत्वस्य न प्राप्तिः । **प्रतिष्ठत इति** ॥ अग्रे गच्छतीत्यर्थः, उपसर्गवशात् । **प्रष्ठो गौरिति** ॥ अग्रगामीत्यर्थः । एवं प्रष्ठोऽश्व इत्यादि । **अम्बाम्ब** ॥ अम्ब, आम्ब, गो, भूमि, सव्ये, अप, द्वि, त्रि, कुशे, कु, शङ्क, अङ्कु, मञ्जि, पुञ्जि, परमे, बर्हिस्, दिवि, अग्नि, एषामष्टादशानां द्वन्द्वः । अम्बष्टः आम्बष्टः गोष्टः भूमिष्टः । सव्येष्टः निपातनादलुक् । 'हलदन्तात्सप्तम्याः' इति वा । अपष्टः । एषु कतिपयेषु इण्कवर्गाभ्यां परत्वाभावात् षत्वस्य न प्राप्तिः । कतिपयेषु 'सात्पदाद्योः' इति निषेधः प्राप्तः । एवमग्रेऽपि । **द्विष्ठ इति** ॥ द्वाभ्यान्तिष्ठतीति विग्रहः । एवं त्रिष्ठः, कुशेष्टः, कुष्टः*, शङ्कुष्ठः, अङ्कुष्टः, मञ्जिष्टः, पुञ्जिष्टः । परमेष्टः, निपातनादलुक् 'हलन्दात्' इति वा । बर्हिष्टः । दिविष्टः पूर्ववदलुक् । अग्निष्टः । कप्रत्ययान्तस्येति किम् । भूमिस्थितम् । **इत ऊर्ध्वमिति** ॥ 'तुन्दशोकयोः' इत्यारभ्येत्यर्थः । **सुपीत्यस्येति** ॥ ननु कर्मणीत्यस्य, असम्भवादिति

---

* सम्प्रत्युपलभ्यमानकाशिकावृत्तौ तु कुष्टः शेकुष्टः इत्युपलभ्यते ।

२९१९। तुन्दशोकयोः परिमृजापनुदोः। (३-२-५)

तुन्दशोकयोः कर्मणोरुपपदयोराभ्यां कः स्यात्। 'आलस्यसुखाहरणयोरिति वक्तव्यम्' (वा १९८८)। तुन्दं परिमार्ष्टीति तुन्दपरिमृजोऽलसः। शोकापनुदः। सुखस्याहर्ता। अलसादन्यत्र तुन्दपरिमार्ज एव। यश्च संसारासारत्वोपदेशेन शोकमपनुदति स शोकापनोदः। 'कप्रकरणे मूलविभुजादिभ्य उपसङ्ख्यानम्' (वा १९८९)। मूलानि विभुजति मूलविभुजो रथः। आकृतिगणोऽयम्। महीध्रः। कुध्रः। गिलतीति गिलः॥

२९२०। प्रे दाज्ञः। (३-२-६)

दारूपाज्ज्ञानातेश्च प्रोपसृष्टात्कर्मण्युपपदे कः स्यादणोऽपवादः। सर्वप्रदः। पथिप्रज्ञः। अनुपसर्ग इत्युक्तेः प्रादन्यस्मिन्सुपि न कः गोसम्प्रदायः।

२९२१। समि ख्यः। (३-२-७)

गोसङ्ख्यः।

२९२२। गापोष्टक्। (३-२-८)

अनुपसृष्टाभ्यामाभ्यां टक्स्यात्कर्मण्युपपदे। सामगः—सामगी। उपसर्गे तु सामसङ्गायः। 'पिबतेः सुराशीध्वोरिति वाच्यम्' (वा १९९०)। सुरापी। शीधुपी। अन्यत्र क्षीरपा ब्राह्मणी। सुरां पाति रक्षतीति सुरापा।

भावः। **तुन्दशोकयोः**॥ तुन्दशोकयोरिति सप्तमी। परिमृज, अपनुद, अनयोर्द्वन्द्वात्पञ्चम्यर्थे षष्ठी। तदाह। **उपपदयोराभ्यामिति**॥ **तुन्दपरिमृज इति**॥ तुन्दम् उदरम्। अत्र 'मृजेरजादौ' इति पाक्षिकवृद्धिर्न भवति, व्यवस्थितविभाषाश्रयणादित्याहुः। **मूलानि विभुजतीति**॥ विमर्दयतीत्यर्थः। 'भुजो कौटिल्ये' तुदादिः। हेहोपसर्गबलान्मर्दने वृत्तिः। **महीध्र इति**॥ महीं धरतीति विग्रहः। कित्त्वान्न गुणः। ऋकारस्य यण् रेफः। अणि तु महीधार इति स्यात्। **कुध्र इति**॥ कुः पृथ्वी, तां धरतीति विग्रहः। **गिल इति**॥ 'गॄ निगरणे' अस्मात् कः कित्त्वान्न गुणः, इत्वं रपरत्वम्। 'अर्तिॄ विभाषा' इति लत्वम्। **प्रे दाज्ञः**॥ प्रे इति सप्तमी पञ्चम्यर्थे। दा ज्ञा अनयोर्द्वन्द्वात् पञ्चम्येकवचनम्। **प्रोपसृष्टादिति**॥ प्रेत्युपसर्गपूर्वकादित्यर्थः। सोपसर्गार्थ आरम्भः। **समि ख्यः**॥ समीति पञ्चम्यर्थे सप्तमी। **गोसङ्ख्य इति**॥ गाः सञ्चष्टे इति विग्रहः। सम्पूर्वात् चक्षिङः ख्याञि रूपम्। 'ख्या प्रकथने' इत्यस्य तु सम्पूर्वस्य प्रयोगाभावात्, सार्वधातुकमात्रविषयत्वाच्च नेह सम्बध्यते। **गापोष्टक्**॥ 'गै शब्दे, पा पाने' इत्यनयोः टक् स्यात् कर्मण्युपपदे। **सामग इति**॥ टकि आतो लोपः। **सामगीति**॥ टित्त्वान्ङीबिति भावः। **सामसङ्गाय इति**॥ सोपसर्गात् गै धातोः कर्मण्यणि आतो युकि रूपम्। **पिबतेरिति**॥ वार्तिकमिदम्। पाधातोः सुराशीध्वोरुपपदयोः टक्

२९२३ । हरतेरनुद्यमनेऽच् । (३-२-९)

अंशहरः । 'अनुद्यमने' किम् । भारहारः । 'शक्तिलाङ्गलाङ्कुशतोमरयष्टिघटघटीधनुःषु गृहेरुपसङ्ख्यानम्' (वा १९९२) शक्तिग्रहः । लाङ्गलग्रहः । 'सूत्रे च धार्येऽर्थे' (वा १९९३) सूत्रग्रहः । यस्तु सूत्रं केवलमुपादत्ते न तु धारयति तत्राणेव, सूत्रग्राहः ।

२९२४ । वयसि च । (३-२-१०)

उद्यमनार्थं सूत्रम् । कवचहरः कुमारः ।

२९२५ । आङि ताच्छील्ये । (३-२-११)

पुष्पाण्याहरति तच्छीलः । पुष्पाहरः 'ताच्छील्ये' किम् । भाराहारः ।

२९२६ । अर्हः । (३-२-१२)

अर्हतेरच्स्यात्कर्मण्युपपदे अणोऽपवादः । पूजार्हो ब्राह्मणी ।

२९२७ । स्तम्बकर्णयो रमिजपोः । (३-२-१३)

'हस्तिसूचकयोरिति वक्तव्यम्' (वा १९९४) । स्तम्बे रमते स्तम्बेरमो हस्ती । 'तत्पुरुषे कृति—' (सू ९७२) इति 'हलदन्तात्—' (सू ९६६) इति वा ङेरलुक् । कर्णेजपः सूचकः ।

स्यादित्यर्थः । **क्षीरपेति** ॥ क्षीरं पिबतीत्यर्थे सुराशीध्वोरन्यतरत्वाभावात् 'आतोऽनुपसर्गे कः' इति कप्रत्यये टाप् । **पाति रक्षतीति** ॥ 'पा रक्षणे' इति लुग्विकरणस्य पिबतिग्रहणेन अग्रहणमिति भावः । **हरतेरनुद्यमनेऽच्** ॥ अनुद्यमने विद्यमानात्कर्मण्युपपदे अजित्यर्थः । उद्यमनम् उद्ग्रहणम् । **अंशहर इति** ॥ अंशस्य स्वीकर्तेत्यर्थः । **भारहार इति** ॥ भारम् उद्वहतीत्यर्थः । **गृहेरुपसङ्ख्यानमिति** ॥ अच्प्रत्ययस्येति शेषः । 'ग्रह उपादाने' अदुपधः । गृहेरिति तु कृतसम्प्रसारणस्य इका निर्देशः । **शक्तिग्रह इति** ॥ अकित्त्वान्न सम्प्रसारणम् । **लाङ्गलग्रह इति** ॥ अङ्कुशग्रह इत्याद्यप्युदाहार्यम् । **सूत्रे चेति** ॥ वार्तिकमिदम् । सूत्रे कर्मण्युपपदे धारणार्थकात् ग्रहधातोरजित्यर्थः । **वयसि च** ॥ कर्मण्युपपदे वयसि गम्ये हरतेरजित्यर्थः । ननु 'हरतेरनुद्यमनेऽच्' इत्येव सिद्धे किमर्थमिदमित्यत आह । **उद्यमनार्थमिति** ॥ **आङि ताच्छील्ये** ॥ आङ्पूर्वाद्धरतेः कर्मण्युपपदे अच् स्यात्ताच्छील्ये गम्ये । ताच्छील्यन्तत्स्वभावता । **पुष्पाहर इति** ॥ पुष्पाहरणे फलानपेक्षमेव स्वाभाविकी प्रवृत्तिरस्येत्यर्थः । **अर्हः** ॥ **अणोऽपवाद इति** ॥ यद्यपि अणि अचि च पूजार्हरूपे न विशेषः । अदुपधत्वाभावेन वृद्धेरप्रसक्तेः । तथापि स्त्रियामण्णन्तत्वे ङीप्स्यात् । तन्निवृत्तये अज्विधिः । तदाह । **पूजार्हेति । स्तम्बकर्णयोः** ॥ रम् जप् अनयोरकर्मकत्वात् कर्मणीति न सम्बध्यते । जपेश्शब्दोच्चारणार्थकस्य धात्वर्थोपसङ्ग्राहकर्मकत्वमवोध्यम् । दर्भादितृणनिचयः स्तम्बः । सूचकः पिशुनः । हस्तिसूचकयोः

२९२८। शमि धातोः संज्ञायाम्। (३-२-१४)

शम्भवः। शंवदः। पुनर्धातुग्रहणं बाधकविषयेऽपि प्रवृत्त्यर्थम्। कृञो हेत्वादिषु टो मा भूत्। शङ्करा नाम परिव्राजिका तच्छीला।

२९२९। अधिकरणे शेतेः। (३-२-१५)

खे शेते खशयः। 'पार्श्वादिषूपसङ्ख्यानम्' (वा १९९६)। पार्श्वाभ्यां शेते पार्श्वशयः। पृष्ठशयः। उदरेण शेते उदरशयः। 'उत्तानादिषु कर्तृषु' (वा १९९८)। उत्तानः शेते उत्तानशयः। अवमूर्धशयः। अवनतो मूर्धा यस्य सोऽवमूर्धा। अधोमुखः शेत इत्यर्थः। 'गिरौ डश्छन्दसि' (वा १९९९) गिरौ शेते गिरिशः। लोके गिरिशयः। कथं तर्हि 'गिरिशमुपचचार प्रत्यहं सा सुकेशी' इति। गिरिरस्यास्तीति विग्रहे लोमादित्वाच्छः।

२९३०। चरेष्टः। (३-२-१६)

अधिकरण उपपदे। कुरुचरः। कुरुचरी।

२९३१। भिक्षासेनादायेषु च। (३-२-१७)

किम्। स्तम्बे रता गौः। कर्णे जपिता गुरुः मशको वा। **शमि धातोः**॥ शमि इति सप्तम्यन्तम्। शमिति सुखार्थकमव्ययम्। तस्मिन्नुपपदे धातोरच् स्यात्संज्ञायाम्। ननु धातुग्रहणं व्यर्थम्। न च रमिजपोरननुवृत्त्यर्थन्तदिति वाच्यम्। अस्वरितत्वादेव तदननुवृत्तिसिद्धेरित्यत आह। **पुनर्धातुग्रहणमिति**॥ 'कृञो हेतुताच्छील्यानुलोम्येषु' इति टप्रत्ययः अच् प्रत्ययबाधको वक्ष्यते, तद्बाधनार्थमित्यर्थः। **अधिकरणे**॥ सुबन्तेऽधिकरणवाचिन्युपपदे शीङ्धातोरच् स्यादित्यर्थः। **पार्श्वादिष्विति**॥ अत्राधिकरणवाचिनीति न सम्बध्यते। तत् ध्वनयन्नुदाहरति। **पार्श्वाभ्यामिति**॥ **उत्तानादिषु कर्तृष्विति**॥ वार्तिकमिदम्। उत्तानादिशब्देषु कर्तृवाचिषूपपदेषु शीङोऽजित्यर्थः। **गिराविति**॥ वार्तिकमिदम्। गिरावुपपदे शीङो डप्रत्यय इत्यर्थः। 'अधिकरणे शेतेः' इत्यचोऽपवादः। "नमो गिरिशाय च शिपिविष्टाय च" इति शीङो डप्रत्ययो डित्त्वसामर्थ्यादभस्यापि टेर्लोपः। यद्यपि वैदिकप्रक्रियायामेवेदं सूत्रं व्याख्येयम्। तथापि लोके डप्रत्ययस्य न प्रवृत्तिः। किन्त्वजेवेति प्रदर्शनार्थमिह तद्व्याख्यानमित्यभिप्रेत्य लोके अच्प्रत्ययमुदाहरति। **गिरिशाय इति**॥ **कथमिति**॥ लोके डप्रत्ययासम्भवादिति भावः। समाधत्ते। **गिरिरस्यास्तीत्यादि**॥ **चरेष्टः**॥ ट इति च्छेदः। अधिकरणे उपपदे इति शेषः। अधिकरणे शेतेरित्यतः तदनुवृत्तिरिति भावः। **कुरुचर इति**॥ कुरुषु चरतीति विग्रहः। न च 'अकर्मकधातुभिर्योगे' इति कर्मत्वं शङ्क्यम्। तस्य वैकल्पिकतायाः तत्रैव प्रपञ्चितत्वात्। तत्र आत्रत्यमपि भाष्यं प्रमाणम्। **भिक्षासेना**॥ भिक्षा, सेना, आदाय, एषु चोपपदेषु चरेष्टः स्यादित्यर्थः। **भिक्षाञ्चरतीति**॥

भिक्षां चरतीति भिक्षाचरः । सेनाचरः । आदायेति ल्यबन्तम् आदायचरः । कथम् 'प्रेक्ष्य स्थितां सहचरीम्' इति । पचादिषु चरडिति पाठात् ।

२९३२ । पुरोऽग्रतोऽग्रेषु सर्तेः । (३-२-१८)

पुरःसरः । अग्रतःसरः अग्रमग्रेणाग्रे वा सरतीत्यग्रेसरः । सूत्रेऽग्र इत्येदन्तत्वमपि निपात्यते । कथं तर्हि 'यूथं तदग्रसरगर्वितकृष्णसारम्' इति । बाहुळकादिति हरदत्तः ।

२९३३ । पूर्वे कर्तरि । (३-२-१९)

कर्तृवाचिनि पूर्वशब्द उपपदे सर्तेष्टः स्यात् । पूर्वः सरतीति पूर्वसरः । 'कर्तरि' किम् । पूर्वं देशं सरतीति पूर्वसारः ।

२९३४ । कृञो हेतुताच्छील्यानुलोम्येषु । (३-२-२०)

एषु द्योत्येषु कर्तृतेष्टः स्यात् । 'अतः कृकमि–' (१६०) इति सः । यशस्करी विद्या । श्राद्धकरः । वचनकरः ।

२९३५ । दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबालिभक्तिकर्तृचित्रक्षेत्रसङ्ख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु। (३-२-२१)

चरलिरत्र चरणपूर्वके आजीने वर्तते । चरणेन भिक्षामार्जयतीत्यर्थः । **सेनाचर इति** ॥ सेनां प्रापयतीत्यर्थः । **ल्यबन्तमिति** ॥ अत्र व्याख्यानमेव शरणम्। **आदाय चरतीति** ॥ लब्धं द्रव्यं गृहीत्वा चरतीत्यर्थः । **कथमिति** ॥ अधिकरणे भिक्षासेनादायेषु उपपदेषु च विहितस्य टप्रत्ययस्य सहपूर्वाच्चरेरसम्भवादिति भावः । समाधत्ते । **पचादिष्विति** ॥ यद्यपि भिक्षाचर इत्यादौ पचाद्यचि रूपसिद्धिः, तथापि नित्योपपदसमासार्थमज्विधानमित्याहुः । **पुरोऽग्रतः** ॥ पुरस्, अग्रतस्, अग्र, एषूपपदेषु सर्तेः टः स्यादित्यर्थः । **अग्रेसर इति** ॥ ननु समासावयवत्वात्सुपो लुकि, अग्रसर इति स्यात् इत्यत आह । **सूत्र इति** ॥ **कथमिति** ॥ एदन्तत्वनिपातनात् कथमग्रसरशब्दः इत्यर्थः । समाधत्ते । **बाहुळकादिति** ॥ **पूर्वे कर्तरि** ॥ कर्तृशब्दः कर्तृवाचिनि गौणः । तदाह । **कर्तृवाचिनीति** ॥ **कृञो हेतु** ॥ हेतुः कारणम्, आनुलोम्यम् आराध्यचित्तानुवर्तनम्। **द्योत्येष्विति** ॥ कर्तुरेव प्रत्ययवाच्यत्वादिति भावः । हेत्वादिष्वपपदेष्विति तु नार्थः, व्याख्यानात् । कर्मण्युपपदे इत्यपि द्रष्टव्यम् । 'कुप्वोः' इति जिह्वामूलीयमाशङ्क्य आह । **अतः कृकमीति** ॥ हेतावुदाहरति । **यशस्करी विद्येति** ॥ विद्या यशोहेतुः । **श्राद्धकर इति** ॥ श्राद्धक्रियाशील इत्यर्थः । **वचनकर इति** ॥ गुर्वादिवचनानुवर्तीत्यर्थः । **दिवाविभा** ॥ दिवा,

एषु कृञ्यष्टः स्यादहेत्वादावपि। दिवाकरः। विभाकरः। निशाकरः। कस्कादित्वात्सः। भास्करः। बहुकरः। बहुशब्दस्य पृथग्ग्रहणम्। लिपिलिबिशब्दौ पर्यायौ। सङ्ख्या। एककरः। द्विकरः। कस्कादित्वादहस्करः। 'नित्यं समासेऽनुत्तरपदस्थस्य' (१५९) इति षत्वम्। धनुष्करः। अरुष्करः। 'किंयत्तद्बहुषु कृञ्योऽञ्विधानम्' (वा २००२) इति वार्तिकम्। किङ्करा। यत्करा। तत्करा। हेत्वादौ टं बाधित्वा परत्वादच्। पुंयोगे ङीष्। किङ्करी।

२९३६। कर्मणि भृतौ। (३-२-२२)

कर्मशब्द उपपदे करोतेष्टः स्याद्भृतौ। कर्मकरो भृतकः। कर्मकारोऽन्यः।

विभा, निशा, प्रभा, भास्, कार, अन्त, अनन्त, आदि, बहु, सान्दी, किम्, लिपि, लिबि, बलि, भक्ति, कर्तृ, चित्र, क्षेत्र, सङ्ख्या, जङ्घा, बाहु, अहर्, यद्, तद्, धनुस्, अरुस्, एषां सप्तविंशतेर्द्वन्द्वात्सप्तमी। **एष्विति**॥ उपपदेष्विति शेषः। **अहेत्वादिष्वपीति**॥ हेतुताच्छील्यानुलोम्येषु अगम्येष्वपीत्यर्थः। हेत्वादिग्रहणस्य अननुवृत्तेरिति भावः। एतेन अहेत्वार्थमिदं सूत्रमुक्तं भवति। अत्र कर्मणीति सुपीति चानुवृत्तं यथायोगमन्वेति। **दिवाकर इति**॥ दिवेत्याकारान्तमव्ययमह्नीत्यर्थे। तस्याधिकरणशक्तिप्रधानस्यापि वृत्तिविषये कर्मत्वं बोध्यम्। दिवा अह्नि अर्थात् प्राणिनश्चेष्टायुक्तान् करोतीति वा विग्रहः। **विभाकर इति**॥ विभां करोतीति विग्रहः। **निशाकर इति**॥ निशां करोतीति विग्रहः। एवं प्रभाकरः। भाः करोति इति विग्रहे 'अतः कृकमि' इत्यत्वात इति तपरकरणात्सत्वस्याप्राप्तेः 'कुप्वोः' इति जिह्वामूलीयविसर्गावाशङ्क्य आह। **कस्कादित्वादिति**॥ कारकरः, अन्तकरः, अनन्तकरः, आदिकरः, इति सिद्धवत्कृत्य आह। **बहुकर इति**॥ नन्वत्र सङ्ख्याग्रहणेनैव सिद्धे बहुग्रहणं व्यर्थमित्यत आह। **बहुशब्दस्येति**॥ वैपुल्यवाचिनस्तस्य न सङ्ख्याशब्दत्वमिति 'बहुगणवतुडति सङ्ख्या' इत्यत्रोक्तम्। नान्दीकरः किङ्करः इति सिद्धवत्कृत्य आह। **लिपिलिबिशब्दाविति**॥ तथा च लिपिकरः-लिबिकरः। क्षेत्रकर इत्यन्तं सिद्धवत्कृत्य आह। **सङ्ख्येति**॥ उदाहियते इति शेषः। जङ्घाकरः, बाहुकरः इति सिद्धवत्कृत्य अहस्करशब्दे 'कुप्वोः' इति जिह्वामूलीयविसर्गावाशङ्क्य आह। **कस्कादित्वादिति**॥ नञि जहातेरुत्पन्ने अहन्शब्दे हन्शब्दस्योत्तरपदतया तद्विसर्गस्य, उत्तरपदस्थत्वात् 'अतः कृकमि' इत्यस्य न प्राप्तिरिति भावः। धनुष्करशब्दे आह। **नित्यं समास इति**॥ प्रत्ययावयवत्वात् 'इदुदुपधस्य च' इत्यस्य न प्राप्तिरिति भावः। **कृञोऽञ्विधानमिति**॥ टस्यापवादः। **किङ्करेति**॥ टप्रत्यये तु टित्त्वात् ङीप्स्यादिति भावः। हेत्वादिषु पूर्वविप्रतिषेधमाश्रित्य 'कृञो हेतु' इति किङ्करादिषु ट एव किङ्करीति न्यासकारमतं दूषयितुमाह। **हेत्वादाविति**॥ पूर्वविप्रतिषेधाश्रयणस्य निर्मूलत्वादिति भावः। तर्हि किङ्करीति कथमित्यत आह। **पुंयोगे ङीषिति**॥ **कर्मणि भृतौ**॥ कर्मणीत्यनुवृत्तौ पुनः कर्मग्रहणन्तु कर्मशब्दस्वरूपग्रहणार्थम्। **कर्मकरो भृतक इति**॥ वेतनङ्गृहीत्वा यः कर्म करोति स भृतक

२९३७ । न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु । (३-२-२३)

एषु कृञष्टो न । हेत्वादिषु प्राप्तः प्रतिषिध्यते । शब्दकार इत्यादि ।

२९३८ । स्तम्बशकृतोरिन् । (३-२-२४)

'व्रीहिवत्सयोरिति वक्तव्यम्' (वा २००३) स्तम्बकरिर्व्रीहिः । शकृत्करिर्वत्सः । 'व्रीहिवत्सयोः' किम् । स्तम्बकारः । शकृत्कारः ।

२९३९ । हरतेर्दृतिनाथयोः पशौ । (३-२-२५)

दृतिनाथयोरुपपदयोर्हृञ इन्स्यात् पशौ कर्तरि । दृतिं हरतीति दृतिहरिः । नाथं नासारज्जुं हरतीति नाथहरिः । 'पशौ' किम् । दृतिहरः । नाथहरः ।

२९४० । फलेग्रहिरात्मम्भरिश्च । (३-२-२६)

फलानि गृह्णाति फलेग्रहिः । उपपदस्य एदन्तत्वं ग्रहेरिन्प्रत्ययश्च निपात्यते । आत्मानं बिभर्तीति आत्मम्भरिः । आत्मनो मुमागमः । भृञ इन् । चात्कुक्षिम्भरिः । चान्द्रास्तु आत्मोदरकुक्षिष्विति पेठुः । 'ज्योत्स्नाकरम्बमुदरम्भरयश्चकोराः' इति मुरारिः ।

२९४१ । एजेः खश् । (३-२-२८)

ण्यन्तादेजेः खश् स्यात् ।

इत्युच्यते । **न शब्दश्लोक** ॥ शब्द, श्लोक, कलह, गाथा, वैर, चाटु, सूत्र, मन्त्र, पद, एषान्नवान्द्वन्द्वः । **हेत्वादिष्विति** ॥ 'कृञो हेतुताच्छील्यानुलोम्येषु' इति प्राप्तः टप्रत्ययोऽनेन प्रतिषिध्यते इत्यर्थः । **स्तम्बशकृतोरिन्** ॥ स्तम्बे शकृति च कर्मण्युपपदे कृञ इन् स्यात् । नकार इत् । **व्रीहिवत्सयोरिति** ॥ व्रीहौ वत्से च कर्तरीत्यर्थः । स्तम्बशकृतोर्यथासङ्ख्यमन्वयः । **स्तम्बकरिर्व्रीहिरिति** ॥ स्तम्बं तृणनिचयं करोतीति विग्रहः । **हरतेर्दृतिनाथयोः** ॥ दृतिः चर्मभस्त्रिका । दृतिहरिः श्वा इति वृत्तिः । नाथशब्दस्य विवरणम् । **नासारज्जुरिति** ॥ नासिकाप्रोतं रज्जुरित्यर्थः । **नाथहरिरिति** ॥ नासिकाप्रोतरज्जुके पशुविशेषे रूढोऽयम् । **फलेग्रहिः** ॥ **ग्रहेरिन्निति** ॥ नतु 'गृहू ग्रहणे' इति ऋदुपधादित्यर्थः । **मुमागम इति** ॥ आत्मनशब्दस्य नलोपे कृते अकारादुपरि मुमित्यर्थः । चकारोऽनुक्तसमुच्चयार्थ इति मत्वा आह । **चात्कुक्षिम्भरिरिति** ॥ भाष्ये तु 'भृञः कुक्ष्यात्मनो मुञ्चेति वक्तव्यम्' इति रथतम् । 'स्यादवन्ध्यः फलेग्रहिः' इति वृक्षपर्याये अमरः । 'उभावात्मम्भरिः कुक्षिम्भरिस्त्वे' दरपूरके' इति विशेष्यनिघ्नवर्गे । उदरम्भरिशब्दं समर्थयितुमाह । **चान्द्रास्त्विति** ॥ **पः खश्** ॥ एजेरिति ण्यन्तस्य एजृधातोर्ग्रहणम् । नत्विका निर्देशः,

२९४२। अरुर्द्विषदजन्तस्य मुम्। (६-३-६७)

अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात्खिदन्ते उत्तरपदे न त्वव्ययस्य। शित्त्वाच्छबादिः। जनमेजयतीति जनमेजयः। 'वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्यः खश उपसङ्ख्यानम्' (वा २००५) वातमजा मृगाः।

२९४३। खित्यनव्ययस्य। (६-३-६६)

खिदन्ते परे पूर्वपदस्य ह्रस्वः स्यात् ततो मुम्। शुनिन्धयः। तिलन्तुदः। शर्धञ्जहा माषाः। शर्धोऽपानशब्दस्तं जहातीति विग्रहः। जहातिरन्तर्भावितण्यर्थः।

२९४४। नासिकास्तनयोर्ध्माधेटोः। (३-२-२९)

अत्र वार्तिकम्—'स्तने धेटो नासिकायां ध्मश्चेति वाच्यम्' (वा २००६—७)। स्तनं धयतीति स्तनन्धयः। धेटष्टित्त्वात्स्तनन्धयी। नासिकन्धमः। नासिकन्धयः।

व्याख्यानादिति भावः। खकारशकारावितौ। कर्मण्युपपदे इत्यपि ज्ञेयम्। **अरुर्द्विषत्** ॥ अरुस्, द्विषत्, अजन्त, एषां समाहारद्वन्द्वात् षष्ठी। 'अलुगुत्तरपदे' इत्यधिकारात् उत्तरपदे इति लभ्यते। 'खित्यनव्ययस्य' इत्यतः खितीत्यनुवृत्तम्। खितः प्रत्ययत्वात्तदन्तविधिः। तदाह। **खिदन्ते उत्तरपदे इति** ॥ **जनमेजय इति** ॥ जनान् एजयतीति विग्रहः। खशश्शित्त्वात्सार्वधातुकत्वं शप्, गुणायादेशौ, पररूपम्, सुपो लुकि, मुम्। **वातशुनीति** ॥ वार्तिकमिदम्। वात, शुनी, तिल, शर्ध, एषान्द्वन्द्वात्सप्तमी। अज, धेट्, तुद, जहाति, एषान्द्वन्द्वात्पञ्चमी। यथासङ्ख्यमन्वयः। **वातमजा इति** ॥ वातमजन्तीति विग्रहः। सुपो लुकि मुम्। अथ शुनीन्धयतीति विग्रहे शुनीशब्दे उपपदे धेटः खशि शपि अयादेशे पररूपे शुनीधय इति स्थिते आह। **खित्यनव्ययस्य** ॥ **ह्रस्वः स्यादिति** ॥ 'इको ह्रस्वोऽङ्यो गालवस्य' इत्यतः तदनुवृत्तेरिति भावः। अत्र ह्रस्वश्रुत्या अच इत्युपस्थितन्द्रष्टव्यम्। **ततो मुमिति** ॥ पूर्वं ह्रस्वे कृते ततो मुमित्यर्थः। पूर्वं मुमि कृते तु अजन्तत्वाभावाद्ध्रस्वो न स्यादिति भावः। **शर्धञ्जहा माषा इति** ॥ भाष्ये तु मृगा इति पाठः। शर्धः अपानद्वारे स्थितश्शब्द इति माधवाशयः। **अन्तर्भावितेति** ॥ तथाच शर्धं हापयतीति विग्रहः फलितः। भाष्ये तु 'वातशुनी' इति वार्तिके गर्धेष्विति पठितम्। **नासिका** ॥ नासिका, स्तन, अनयोः द्वन्द्वात्सप्तमी। ध्मा, धेट्, अनयोः द्वन्द्वात्पञ्चम्यर्थे षष्ठी। खशिति शेषः। यथासङ्ख्यमन्वये प्राप्ते आह। **अत्र वार्तिकमिति** ॥ **धेटष्टित्त्वादिति** ॥ यद्यपि 'टिड्ढ' इत्यत्र टिदाद्यन्तं यददन्तं प्रातिपदिकमिति व्याख्यातं, तथापि टित्त्वस्यावयवे अचरितार्थत्वात् ङीबिति हरदत्तः। अत्र यद्वक्तव्यन्तत् 'पाघ्राध्माधेट्दृशश्शः' इत्यत्रोक्तम्। **नासिकन्धम इति** ॥ ह्रस्वे कृते मुम्।

२९४५ । नाडीमुष्टयोश्च । (३-२-३०)

एतयोरुपपदयोः कर्मणोर्ध्माधेटोः खश् स्यात् । 'यथासङ्ख्यं नेष्यते' । नाडिन्धमः—नाडिन्धयः । मुष्टिन्धमः—मुष्टिन्धयः । 'घटीखारीखरीषूपसङ्ख्यानम्' (वा २००८) । घटिन्धमः—घटिन्धयः इत्यादि खारी परिमाणविशेषः । खरी गर्दभी ।

२९४६ । उदि कूले रुजिवहोः । (३-२-३१)

उत्पूर्वाभ्यां रुजिवहिभ्यां कूले कर्मण्युपपदे खश् स्यात् । कूलमुद्रुजतीति कूलमुद्रुजः । कूलमुद्वहः ।

२९४७ । वहाभ्रे लिहः । (३-२-३२)

वहः स्कन्धस्तं लेढीति वहंलिहो गौः । अदादित्वाच्छपो लुक् । खशो ङित्त्वान्न गुणः । अभ्रंलिहो वायुः ।

२९४८ । परिमाणे पचः । ३-२-३३)

प्रस्थम्पचा स्थाली । खारिम्पचः कटाहः ।

२९४९ । मितनखे च । (३-२-३४)

मितम्पचा ब्राह्मणी । नखम्पचा यवागूः । पचिरत्र तापवाची ।

२९५० । विध्वरुषोस्तुदः । (३-२-३५)

विधुन्तुदः । मुमि कृते संयोगान्तस्य लोपः । अरुन्तुदः ।

नासिकायाः ध्मश्चेति चकाराद्धेटश्चेति लभ्यते । तस्योदाहरति । **नासिकन्धय इति ॥ नाडीमुष्ट्योश्च ॥ यथासङ्ख्यन्नेष्यते इति ॥** इदन्तु भाष्ये स्पष्टम् । **घटीखारीति ॥** इत्यादि स्पष्टम् । **उदि कूले ॥** उदीति दिग्योगपञ्चम्यर्थे सप्तमी । रुजिवहोरिति पञ्चम्यर्थे षष्ठी । 'रुजो भङ्गे' तुदादिः । अत्र रुजेस्सकर्मकत्वात् कर्मण्युपपदे इति लब्धम् । तेन कूलं विशेष्यते, नतु उच्छब्दः । तस्य असत्त्ववाचित्वात् । तदाह । **उत्पूर्वाभ्यामित्यादि ॥ कूलमुद्रुज इति ॥** सुपो लुकि मुमिति भावः । **वहाभ्रे लिहः ॥** वहे अभ्रे च कर्मण्युपपदे लिहः खशित्यर्थः । वहशब्दस्य विवरणम् । **स्कन्ध इति ॥ शपो लुगिति ॥** खशदिशत्त्वेन सार्वधातुकत्वात् कृतस्य शपो लुगित्यर्थः । **परिमाणे पचः ॥** परिमाणं प्रस्थादि । तस्मिन् कर्मण्युपपदे पचेः खशित्यर्थः । **खारिम्पचः इति ॥** 'खित्यनव्ययस्य' इति ह्रस्वः । मुम् । **मितनखे च ॥** मिते नखे च कर्मण्युपपदे पचेः खशित्यर्थः । नखानां विक्लित्त्यसम्भवादाह । **पचिरत्रेति ॥ विध्वरुषोस्तुदः ॥** विधु, अरुस्, अनयोः कर्मणोरुपपदयोः तुदः खशित्यर्थः । **विधुन्तुद इति ॥** विधुश्चन्द्रः तं तुदतीति विग्रहः । राहुरित्यर्थः । अरुस्शब्दे उकारादुपरि मुमि कृते

२९५१। असूर्यललाटयोर्दृशितपोः। (३-२-३६)

असूर्यमित्यसमर्थसमासः। दृशिना नञः सम्बन्धात्। सूर्यं न पश्यन्तीत्यसूर्यम्पश्या राजदाराः। ललाटन्तपः सूर्यः।

२९५२। उग्रम्पश्येरम्मदपाणिन्धमाश्च। (३-२-३७)

एते निपात्यन्ते। उग्रमिति क्रियाविशेषणं तस्मिन्नुपपदे दृशेः खश्। उग्रं पश्यतीत्युग्रम्पश्यः। इरोदकं तेन माद्यति दीप्यतेऽबिन्धनत्वादिति इरम्मदो मेघज्योतिः। इह निपातनाच्छयन्न। पाणयो ध्मायन्तेऽस्मिन्निति पाणिन्धमोऽध्वा। अन्धकाराद्यावृत इत्यर्थः। तत्र हि सर्पाद्यपनोदनाय पाणयः शब्द्यन्ते।

२९५३। प्रियवशे वदः खच्। (३-२-३८)

प्रियंवदः। वशंवदः। 'गमेः सुपि वाच्यः' (वा २००९) असंज्ञार्थमिदम्। मितङ्गमो हस्ती। 'विहायसो विह इति वाच्यम्' (वा २०१०)। 'खच डिद्वा वाच्यः' (वा २०११)। विहङ्गः—विहङ्गमः। भुजङ्गः—भुजङ्गमः।

सकारस्य संयोगान्तलोप इत्यर्थः। **अरुन्तुद इति** ॥ अरुर्मर्म तत्तुदतीति विग्रहः। **असूर्यललाट** ॥ दृशितपोरिति पञ्चम्यर्थे षष्ठी। असूर्ये ललाटे च कर्मण्युपपदे दृशेस्तपेश्च खशित्यर्थः। **असूर्यमितीति** ॥ असूर्यम्पश्या इत्युदाहरणे असूर्यमित्यसमर्थसमासस्सौत्र इत्यर्थः। कुतोऽसामर्थ्यमित्याह। **दृशिनेति** ॥ सूर्यन्न पश्यन्तीत्यर्थे नञो दृशिनान्वितत्वेन सूर्यशब्देनान्वयाभावादित्यर्थः। **ललाटन्तपस्सूर्य इति** ॥ ललाटन्तपतीति विग्रहः। सूर्यम्पश्यतो ललाटस्य अवश्यन्तापादिति भावः। **उग्रम्पश्य** ॥ उग्रम्पश्य, इरम्मद, पाणिन्धम, एषान्द्वन्द्वः। **उग्रम्पश्य इति** ॥ खशि शप्, पश्यादेशः। इराशब्दस्य विवरणम्। **उदकमिति॥ इरम्मद इति॥** 'खित्यनव्ययस्य' इति ह्रस्वः। मदेर्दैवादिकत्वात् श्यनमाशङ्क्य आह। **निपातनाच्छयन्नेति** ॥ **पाणिन्धम इति** ॥ शपि 'पाघ्रा' इति धमादेशः। **प्रियवशे** ॥ प्रिये वशे च कर्मण्युपपदे वदधातोः खजित्यर्थः। खशि प्रकृते खच्विधेरुत्तरसूत्रे प्रयोजनं वक्ष्यते। **गमेस्सुपि वाच्य इति** ॥ खजिति शेषः। ननु संज्ञायामित्यनुवृत्तौ 'गमश्च' इति वक्ष्यमाणसूत्रेणैव सिद्धे किमर्थमिदं वार्तिकमित्यत आह। **असंज्ञार्थमिदमिति** ॥ **विहायस इति** ॥ विहायशब्दः आकाशे वर्तते। तस्मिन्नुपपदे गमेः खच्। 'गमश्च' इति वक्ष्यमाणसूत्रेण पूर्ववार्तिकेन वा सिद्धः खच्चेत्यनूद्यते। प्रकृतेर्विहायशब्दस्य विहादेशो वाच्यः, सच खच् डिद्वा वाच्य इत्यर्थः। **विहङ्ग इति** ॥ डित्त्वपक्षे तत्सामर्थ्यादभस्यापि टेर्लोपः। **विहङ्गम इति** ॥ विहायसा गच्छतीति विग्रहः। **भुजङ्गम इति** ॥

२९५४ । द्विषत्परयोस्तापेः । (३-२-३९)

खच्स्यात् ।

२९५५ । खचि ह्रस्वः । (६-४-९४)

खच्परे णौ उपधाया ह्रस्वः स्यात् । द्विषन्तं परं वा तापयतीति द्विषन्तपः । परन्तपः । घटघटीग्रहणाल्लिङ्गविशिष्टपरिभाषा अनित्या । तेनेह न । द्विषतीं तापयतीति द्विषतीतापः ।

२९५६ । वाचि यमो व्रते । (३-२-४०)

वाक्छब्द उपपदे यमेः खच्स्याद्व्रते गम्ये ।

२९५७ । वाचंयमपुरन्दरौ च । (६-३-६९)

वाक्पुरोरमन्तत्वं निपात्यते । वाचंयमो मौनव्रती । 'व्रते' किम् । अशक्त्यादिना वाचं यच्छतीति वाग्यामः ।

२९५८ । पूःसर्वयोर्दारिसहोः । (३-२-४१)

भुजैर्गच्छतीति विप्रहः । **द्विषत्परयोः** ॥ 'तप दाहे' चुरादिः 'तप सन्तापे' भ्वादिः । द्वयोरपि ण्यन्तयोस्तापेरिति निर्देशः । **खच् स्यादिति** ॥ द्विषत्, पर, अनयोः कर्मणोरुपपदयोः तापेः खजित्यर्थः । द्विषत् तापि अ इति स्थिते आह । **खचि ह्रस्वः** ॥ 'दोषो णौ' इत्यतो णाविति 'ऊदुपधायाः' इत्यतः उपधाया इति चानुवर्तते । तदाह । **खच्परे णाविति** ॥ खशि प्रकृते खचो विधिरिह ह्रस्वार्थः णिलोपार्थश्च । खशि तु तदुभयन्न स्यात् । खशश्शित्त्वेन सार्वधातुकतया णिलोपासम्भवात् । न च इहैव सूत्रे खज्विधीयतां पूर्वसूत्रे खशेवानुवर्ततामिति वाच्यम्, अन्यतोऽपि विधानार्थत्वात् । एवञ्च 'गमेस्सुपि' इति वार्तिकम् एतल्लब्धार्थकथनपरमेवेत्याहुः । **द्विषन्तप इति** ॥ 'अरुर्द्विषत्' इति तकारात्प्राक् मुम् । **परन्तप इति** ॥ परः शत्रुः । ननु लिङ्गविशिष्टपरिभाषया द्विषतीशब्देऽप्युपपदे तापेः खचि द्विषतीतप इति स्यात् । द्विषतीताप इत्यण्णन्तन्न स्यात् इत्यत आह । **घटघटीति** ॥ 'शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुष्षु गृहेरुपसङ्ख्यानम्' इत्यत्र घटग्रहणेनैव लिङ्गविशिष्टपरिभाषया घटीशब्दस्यापि सिद्धे पुनर्घटीग्रहणात् लिङ्गविशिष्टपरिभाषा अनित्येति विज्ञायते इत्यर्थः । उपपदविधौ लिङ्गविशिष्टपरिभाषा नेति ङ्याप्सूत्रे भाष्याच्चेत्यपि द्रष्टव्यम् । **वाचि यमो व्रते** ॥ इत्यादि व्यक्तम् । **वाचंयमपुरन्दरौ च** ॥ **वाक्पुरोरिति** ॥ वाचं यच्छतीति पुरं दारयतीति च विग्रहे यमेर्दारेश्च खच् । सुपो लुकि वाच् यम्, पुर् दार, इति स्थिते वाक्पुरोरमन्तत्वन्निपात्यते इत्यर्थः । 'अरुर्द्विषदजन्तस्य' इति मुमस्तु न प्रसक्तिः । **पूस्सर्वयोर्दारिसहोः** ॥ दारिसहोरिति पञ्चम्यर्थे षष्ठी । पुरिशब्दे सर्वशब्दे च कर्मवाचिन्युपपदे दारेस्सहेश्च खजित्यर्थः ।

पुरं दारयतीति पुरन्दरः। सर्वसहः। सहिग्रहणमसंज्ञार्थम्। 'भगे च दारेः' (वा २०१३) इति काशिका। बाहुलकेन लब्धमिदमित्याहुः। भगं दारयतीति भगन्दरः।

२९५९। सर्वकूलाभ्रकरीषेषु कषः। (३-२-४२)

सर्वङ्कषः खलः। कूलङ्कषा नदी। अभ्रङ्कषो वायुः। करीषङ्कषा वात्या।

२९६०। मेघर्तिभयेषु कृञः। (३-२-४३)

मेघङ्करः। ऋतिङ्करः। भयङ्करः। भयशब्देन तदन्तविधिः। अभयङ्करः।

२९६१। क्षेमप्रियमद्रेऽण् च। (३-२-४४)

एषु कृञोऽण्स्यात्। चात्खच्। क्षेमङ्करः—क्षेमकारः। प्रियङ्करः—प्रियकारः। मद्रङ्करः—मद्रकारः। वेति वाच्येऽण्ग्रहणं हेत्वादिषु टो मा भूदिति। कथं तर्हि 'अल्पारम्भः क्षेमकरः' इति। कर्मणः शेषत्वविवक्षायां पचाद्यच्।

२९६२। आशिते भुवः करणभावयोः। (३-२-४५)

आशितशब्द उपपदे भवतेः खच्। आशितो भवत्यनेनाशितम्भव ओदनः। आशितस्य भवनमाशितम्भवः।

२९६३। संज्ञायां भृतृवृजिधारिसहितपिदमः। (३-२-४६)

यथासङ्ख्यमन्वयः। दारीति ण्यन्तस्य ग्रहणम्। **पुरन्दर इति** ॥ पुरं दारयतीति विग्रहे दारेः खचि णिलोपे 'खचि ह्रस्वः' इत्युपधाह्रस्वे सुपो लुकि 'वाचंयमपुरन्दरौ च' इति निपातनादमन्तत्वम्। ननु 'संज्ञायां भृतृवृजिधारिसहितपिदमः' इत्येव सिद्धे सहधातोरिह ग्रहणं व्यर्थमित्यत आह। **असंज्ञार्थमिति** ॥ **भगे चेति** ॥ इत्यादि स्पष्टम्। **ऋतिङ्कर इति** ॥ ऋतिर्गमनम्। अभयङ्करशब्दं साधयितुमाह। **भयशब्देन तदन्तविधिरिति** ॥ इदञ्च 'येन विधिः' इत्यत्र भाष्ये स्पष्टम्। **क्षेमप्रिय** ॥ ननु 'क्षेमप्रियमद्रे वा' इति खचो विकल्पविधौ खजभावे 'कर्मण्यण्' इत्यस्य सिद्धत्वादण्ग्रहणं व्यर्थमित्यत आह। **वेति वाच्ये इति** ॥ **हेत्वादाविति** ॥ 'कृञो हेतुताच्छील्यानुलोम्येषु' इति विहित इत्यर्थः। **कथन्तर्हीति** ॥ 'कृञो हेतु' इत्यस्य अणा बाधात् क्षेमकार इति भवितव्यम्। खचि तु सुम् स्यादित्याक्षेपः। समाधत्ते। **कर्मणश्शेषत्वेति** ॥ तथाच कर्मोपपदाभावात् अणभावे चाजिति भावः। क्षेमङ्करीति तु गौरादित्वात् ङीषित्याहुः। **आशिते** ॥ करणे उदाहरति। **आशितो भवत्यनेनेति** ॥ भावे उदाहरति। **आशितस्य भवनमिति** ॥ **संज्ञायाम्** ॥ खजिति शेषः। भृ, तृ, वृ, जि, धारि, सहि, तपि, दमि, एषामष्टानां समाहारद्वन्द्वात्पञ्चमी।

विश्वं बिभर्तीति विश्वम्भरः । विश्वम्भरा । रथन्तरं साम । इह रथेन तरतीति व्युत्पत्तिमात्रं, न त्ववयवार्थानुगमः । पतिंवरा कन्या । शत्रुञ्जयो हस्ती । युगन्धरः पर्वतः । शत्रुंसहः । शत्रुन्तपः । अरिन्दमः । दमिः शमनायाम्, तेन सकर्मक इत्युक्तम् । मतान्तरे तु अन्तर्भावितण्यर्थोऽत्र दमिः ।

२९६४ । गमश्च । (३-२-४७)

सुतङ्गमः ।

२९६५ । अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः । (३-२-४८)

संज्ञायामिति निवृत्तम् । एषु गमेर्डः स्यात् । डित्त्वसामर्थ्यादभस्यापि टेर्लोपः । अन्तं गच्छतीत्यन्तग इत्यादि । 'सर्वत्रपन्नयोरुपसङ्ख्यानम्' (वा २०१४) । सर्वत्रगः । पन्नं पतितं गच्छतीति पन्नगः । पन्नमिति पद्यतेः क्तान्तं क्रियाविशेषणम् । 'उरसो लोपश्च' (वा २०१५) । उरसा गच्छतीत्युरगः । 'सुदुरोरधिकरणे' (वा २०१६) । सुखेन गच्छत्यत्र सुगः । दुर्गः । 'अन्यत्रापि दृश्यत इति वक्तव्यम्' (वा २०१८) । ग्रामगः । 'डे च विहायसो विहादेशो वक्तव्यः' (वा २०१२)—विहगः ।

विश्वम्भर इति ॥ विष्णोरियं संज्ञा । **विश्वम्भरेति** ॥ पृथिव्या संज्ञा इयम् । **रथन्तरमिति** ॥ तृधातोः खच् । रथेन तरितृत्वस्य सामविशेषे असम्भवादाह । **इहेति** ॥ वृधातोरुदाहरति । **पतिंवरेति** ॥ **शत्रुञ्जय इति** ॥ जिधातोः खच् । धारीति ण्यन्तग्रहणं, तस्योदाहरति । **युगन्धर इति** ॥ युगं धारयतीति विग्रहः । 'खचि ह्रस्वः' इत्युपधाह्रस्वः, णिलोपः । **शत्रुंसह इति** ॥ शत्रून् सहते इति विग्रहः । ह्रस्वादि पूर्ववत् । एवमग्रेऽपि । **शत्रुन्तप इति** ॥ शत्रून् तपतीति विग्रहः । **अरिन्दम इति** ॥ अरिषु निग्रहविषये शाम्यतीत्यर्थः । **दमिः शमनायामिति** ॥ 'दमु उपशमे' इति धातुपाठे उपशमशब्दे शमेर्ण्यन्तात् घञ् । तथाच दाम्यतीत्यस्य उपशमयतीत्यर्थाश्रयणात् सकर्मकत्वामिति माधवादिमते सकर्मकोऽयमित्यर्थः । **मतान्तरे त्विति** ॥ 'दमु उपशमे' इत्युपशमार्थस्य दमेरकर्मकत्वामिति हरदत्तादिभिरुक्तमित्यर्थः । **गमश्च** ॥ संज्ञायां खजिति शेषः । **अन्तात्यन्त** ॥ इत्यादि व्यक्तम् । **सर्वत्रपन्नयोरिति** ॥ सर्वत्रशब्दे पन्नशब्दे चोपपदे गमेर्डस्योपसङ्ख्यानमित्यर्थः । **उरस इति** ॥ उरसि उपपदे गमेर्डः उरश्शब्दान्त्यस्य लोपश्चेति वक्तव्यमित्यर्थः । **सुदुरोरिति** ॥ सु दुर् अनयोरुपपदयोर्गमेर्डः स्यात् अधिकरणे वाच्ये इत्यर्थः । **अन्यत्रापि दृश्यत इति** ॥ अन्येष्वप्युपपदेषु अन्येभ्योऽपि धातुभ्यः डो दृश्यते इत्यर्थः । अनेनैव सिद्धे 'सर्वत्रपन्नयोः' इत्यादि प्रपञ्चार्थमेव । एवञ्च 'सप्तम्याञ्जनेर्डः' इत्यत्रापि 'अन्येष्वपि दृश्यते' इति प्रपञ्चार्थमेव । **डे चेति** ॥ विहायसो विह चेत्युक्तस्य खञ्विषयत्वादिदं वचनम् । **विहग**

२९६६। आशिषि हनः। (३-३-४९)

शत्रुं वध्याच्छत्रुहः। 'आशिषि' किम्। शत्रुघातः। 'दारावाहनोऽणन्तस्य च टः संज्ञायाम्' (वा २०१९)। दारुशब्दे उपपदे आङ्पूर्वाद्धन्तेरण् टकारश्चान्तादेशो वक्तव्य इत्यर्थः। दार्वाघाटः। 'चारौ वा' (वा २०२०)। चार्वाघाटः—चारौघातः। 'कर्मणि समि च' (वा २०२१)। कर्मण्युपपदे सम्पूर्वाद्धन्तेरुक्तं वेत्यर्थः। वर्णान्संहन्तीति वर्णसङ्घाटः। पदसङ्घाटः। वर्णसङ्घातः। पदसङ्घातः।

२९६७। अपे क्लेशतमसोः। (३-२-५०)

अपपूर्वाद्धन्तेर्डः स्यात्। अनाशीरर्थमिदम्। क्लेशापहः पुत्रः। तमोऽपहः सूर्यः।

२९६८। कुमारशीर्षयोर्णिनिः। (३-२-५१)

कुमारघाती। शिरसः शीर्षभावो निपात्यते शीर्षघाती।

२९६९। लक्षणे जायापत्योष्टक्। (३-२-५२)

हन्तेष्टक्स्याल्लक्षणवति कर्तरि। जायाघ्नो ना। पतिघ्नी स्त्री।

२९७०। अमनुष्यकर्तृके च। (३-२-५३)

इति ॥ खचि तु मुमि विहङ्गम इति रूपम्। **आशिषि हनः** ॥ कर्मण्युपपदे हन्तेर्डः स्यात् आशिषि गम्यायामित्यर्थः। **शत्रुघात इति** ॥ आशीरभावाङ्घाभावे अण् 'हनस्त' इति तत्वम्। **दारावाहन इति** ॥ वार्तिकमिदम्। दारौ, आहनः अण् अन्तस्येति च्छेदः। अण्सन्नियोगेन टत्वविधानार्थमिदम्। **चारौ वेति** ॥ वार्तिकमिदम्। चारुशब्दे उपपदे आङ्पूर्वाद्धन्तेः अण् अन्तस्य टः वा स्यादित्यर्थः। **कर्मणि समि चेति** ॥ वार्तिकमिदम्। **उक्तं वेति** ॥ अण् अन्तस्य टः इत्यर्थः। चारावित्यस्यानुवृत्तिनिवृत्तये कर्मणीत्युक्तिः। **अपे क्लेशतमसोः** ॥ 'आशिषि हनः' इत्येव सिद्धे किमर्थमिदमित्यत आह। **अनाशीरर्थमिति** ॥ **कुमारशीर्षयोर्णिनिः** ॥ अनयोरुपपदयोः हन्तेर्णिनिः स्यादित्यर्थः। नकारादिकार उच्चारणार्थः। **लक्षणे** ॥ **लक्षणवतीति** ॥ सूत्रे लक्षणशब्दः अर्शआद्यजन्त इति भावः। **जायाघ्नो नेति** ॥ जायाहननसूचकलक्षणवान् पुरुष इत्यर्थः। 'गमहन' इत्युपधालोपः। **पतिघ्नी स्त्रीति** ॥ पतिहननसूचनलक्षणवतीत्यर्थः। टित्त्वात् ङीप्। **अमनुष्य** ॥ अमनुष्यकर्तृके धात्वर्थे वर्तमानाद्धन्तेः कर्मण्युपपदे टगित्यर्थः। **जायाघ्नस्तिलकालक इति** ॥ तिलाकृतिकृष्णबिन्दुरित्यर्थः। पूर्वसूत्रस्य लक्षणवति कर्तरि

जायाघ्नस्तिलकालकः । पतिघ्नी पाणिरेखा । पित्तघ्नं घृतम् । 'अमनुष्य–' इति किम् । आखुघातः शूद्रः । अथ कथं 'बलभद्रः प्रलम्बघ्नः, शत्रुघ्नः, कृतघ्नः' इत्यादि । मूलविभुजादित्वात्सिद्धम् । चोरघातो नगरघातो हस्तीति तु बाहुलकादणि ।

२९७१ । शक्तौ हस्तिकवाटयोः । (३-२-५४)

हन्तेष्टक्स्याच्छक्तौ द्योत्यायाम् । मनुष्यकर्तृकार्थमिदम् । हस्तिघ्नो ना । कवाटघ्नश्चोरः । कपाटेति पाठान्तरम् ।

२९७२ । पाणिघताडघौ शिल्पिनि । (३-२-५५)

हन्तेष्टक्टिलोपो घत्वं च निपात्यते पाणिताडयोरुपपदयोः । पाणिघः । ताडघः । 'शिल्पिनि' किम् । पाणिघातः । ताडघातः । 'राजघ उपसङ्ख्यानम्' (वा २०२२) । राजानं हन्ति राजघः ।

२९७३ । आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् । (३-२-५६)

एषु च्व्यर्थेष्वच्व्यन्तेषु कर्मसूपपदेषु कृञः ख्युन्स्यात् । अनाढ्यमाढ्यं कुर्वन्त्यनेन आढ्यंकरणम् । अच्वौ किम् । आढ्यीकुर्वन्त्यनेन । इह प्रतिषेधसामर्थ्याल्ल्युडपि नेति काशिका । भाष्यमते तु ल्युट् स्यादेव । अच्वावित्युत्तरार्थम् ।

प्रवृत्तिरित्यारम्भः । **अथ कथमिति** ॥ प्रलम्बघ्नादौ हन्तेर्मनुष्यकर्तृकतया टकोऽसम्भवादित्याक्षेपः । समाधत्ते । **मूलविभुजादित्वात्सिद्धमिति** ॥ कप्रत्ययेनेति भावः । ननु चोरघातो हस्तीत्यादि कथम् । अमनुष्यकर्तृकत्वेन हन्तेष्टको दुर्वारत्वादित्यत आह । **चोरघात इत्यादीति** ॥ **बाहुळकादणीति** ॥ 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणादणि समाधेयमिति भावः । **शक्तौ हस्तिकवाटयोः** ॥ **हस्तिघ्न इति** ॥ हस्तिनं हन्तुं शक्त इत्यर्थः । एवं कवाटघ्नः । **पाणिघताडघौ** ॥ पाणिना हन्तीति पाणिघः । ताडः ताडनं तेन हन्तीति ताडघः । मल्लादिः । **राजघ उपसङ्ख्यानमिति** ॥ राजघशब्दे उक्तनिपातनस्य उपसङ्ख्यानमित्यर्थः । **आढ्यसुभग** ॥ आढ्य, सुभग, स्थूल, पलित, नग्न, अन्ध, प्रिय, एषां सप्तानां द्वन्द्वात्सप्तमी । **ख्युन् स्यादिति** ॥ करणे वाच्ये इति शेषः । 'करणाधिकरणयोश्च' इति ल्युडपवादोऽयम् । कर्तरीति तु अत्र न सम्बध्यते । **आढ्यङ्करणमिति** ॥ राजायनुवर्तनमिति शेषः । कृञः ख्युन् अनादेशः, 'अरुर्द्विषदजन्तस्य' इति मुम् । सुभगङ्करणमित्याद्यप्युदाहार्यम् । **आढ्यीकुर्वन्त्यनेनेति** ॥ अत्र च्विप्रत्ययसत्त्वात् न ख्युन्निति भावः । ननु ल्युडपवादभूतख्युनभावपक्षे उत्सर्गभूतो ल्युट् कुतो नेत्यत आह । **इहेति** ॥

२९७४। कर्तरि भुवः खिष्णुच्खुकञौ। (३-२-५७)

आढ्यादिषु च्व्यर्थेष्वच्व्यन्तेषु भवतेरेतौ स्तः। अनाढ्यः आढ्यो भवतीति आढ्यम्भविष्णुः। आढ्यम्भावुकः। 'स्पृशोऽनुदके क्विन्' (सू ४३२)। घृतस्पृक्। कर्मणीति निवृत्तम्। मन्त्रेण स्पृशतीति मन्त्रस्पृक्। 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (सू ३७३) व्याख्यातम्। 'त्यदादिषु दृशोऽनालोचने कञ्च' (सू ४२९)। 'समानान्ययोश्चेति वाच्यम्' (वा २०२९)। सदृक्—सदृशः। अन्यादृक्—अन्यादृशः। 'क्सोऽपि वाच्यः' (वा २०३०)। तादृक्षः। सदृक्षः। अन्यादृक्षः।

२९७५। सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिन्नीराजामुपसर्गेऽपि क्विप्। (३-२-६१)

यदि ल्युडपवादल्युनभावे उत्सर्गभूतो ल्युट् स्यात्, तदा ल्युन्विधिरनर्थकः स्यात्। च्व्यन्ते उपपदे ल्युन्ल्युटोः रूपे विशेषाभावात्। नच ल्युनि मुम्, ल्युटि तदभावः इत्यस्ति विशेष इति वाच्यम्। क्विप्रत्ययान्तस्याव्ययत्वेन ल्युनि सत्यपि मुमभावात्। 'अरुर्द्विषदजन्तस्य' इत्यत्रानव्ययस्येत्यनुवृत्तेः। एवञ्च 'अच्वौ' इति च्व्यन्ते उपपदे ल्युनः प्रतिषेधसामर्थ्यात् ल्युनभावे ल्युडपि नेति विज्ञायत इति काशिकामतमित्यर्थः। एवञ्च 'अच्वौ' इति च्व्यन्ते उपपदे ल्युन्प्रतिषेधः ल्युनभावपक्षे ल्युडभावार्थ इति स्थितम्। **भाष्यमते त्विति**॥ भाष्ये "ल्युनि क्विप्रतिषेधानर्थक्यम्। ल्युट्ल्युनोरविशेषात्। मुमर्थमिति चेन्न, अव्ययत्वात्" इत्यादिसन्दर्भेण अच्विग्रहणं ल्युन्विधौ प्रत्याख्याय 'अच्वौ' इत्युत्तरार्धमित्युक्तम्। तन्मते तु च्व्यन्ते उपपदे ल्युना मुक्ते ल्युट् स्यादेवेत्यर्थः। **कर्तरि भुवः**॥ खिष्णुचि खचावितौ। खुकञि खञावितौ। **आढ्यम्भविष्णुरिति**॥ अनाढ्यः आढ्यो भवतीति विग्रहः। **आढ्यम्भावुक इति**॥ ञित्त्वाद्वृद्धिः। करणग्रहणानुवृत्तिनिवृत्तये कर्तृग्रहणम्। खिष्णुचि इकारस्तु व्यर्थ एव। इटा सिद्धेः। अच्वौ किम्। आढ्यीभविता। **स्पृशोऽनुदके क्विन्निति**॥ व्याख्यातं हलन्ताधिकारे। **निवृत्तमिति**॥ अत्र व्याख्यानमेव शरणम्। **समानान्ययोश्चेति**॥ अनयोरुपपदयोः दृशः क्विन्कञावित्यर्थः। **सदृक्-सदृश इति**॥ समानो दृश्यते इति न विग्रहः। कर्तर्येव क्विन्विधानात्। किन्तु कर्मकर्तरि क्विन्कञौ। समानः पश्यतीति विग्रहः। समानत्वेन ज्ञानविषयो भवतीत्यर्थ इति भाष्ये स्पष्टम्। 'दृग्दृशवतुषु' इति समानस्य सभावविकल्पः। तत्र 'विभाषोदरे' इत्यतः विभाषानुवृत्तेः समानदृक् सदृक् समानदृशः सदृशः इति भाष्याच्च। **अन्यादृगिति**॥ 'आ सर्वनाम्नः' इत्यात्वम्। **क्सोऽपीति**॥ त्यदादिषु समानान्ययोश्च दृशेः क्सोऽपि वाच्य इत्यर्थः। **सत्सूद्विष**॥ सद्, सू, द्विष, द्रुह, दुह, युज, विद, भिद, छिद, जि, नी, राज्, एषां द्वन्द्वात्पञ्चम्यर्थे षष्ठी। अनुपसर्गे इत्यस्य निवृत्त्यैव सिद्धे उपसर्गेऽपीति वचनम् अन्यत्र सुब्ग्रहणे उपसर्गग्रहणं नेति ज्ञापनार्थम्।

एभ्यः क्विप्स्यादुपसर्गे सत्यसति च सुप्युपपदे । द्युसत् । उपनिषत् । अण्डसूः । प्रसूः । मित्रद्विट् । प्रद्विट् । मित्रध्रुक् । प्रध्रुक् । गोधुक् । प्रधुक् । अश्वयुक् । प्रयुक् । वेदवित् । निविदित्यादि । 'अग्रग्रामाभ्यां नयतेर्णो वाच्यः' (वा ५०६४) । अग्रणीः । ग्रामणीः ।

२९७६ । भजो ण्विः । (३-२-६२)

सुप्युपसर्गे चोपपदे भजेर्ण्विः स्यात् । अंशभाक् । प्रभाक् ।

२९७७ । अदोऽनन्ने । (३-२-६८)

विट् स्यात् । आममत्ति आमात् । सस्यात् । 'अनन्ने' किम् । अन्नादः ।

२९७८ । क्रव्ये च । (३-२-६९)

अदेर्विट् । पूर्वेण सिद्धे वचनमण्बाधनार्थम् । क्रव्यात् । आममांसभक्षकः । कथं तर्हि 'क्रव्यादोऽस्रप आशरः' इति । पक्वमांसशब्दे उपपदेऽण् । उपपदस्य क्रव्यादेशः, पृषोदरादित्वात् ।

२९७९ । दुहः कब्घश्च । (३-२-७०)

कामदुघा ।

तेन 'वदस्सुपि क्यप् च' इति विधिरुपसर्गे न भवतीति भाष्ये स्पष्टम् । **द्युसदिति** ॥ दिवि सीदतीति विग्रहः । 'सात्पदाद्योः' इति न षत्वम् । 'पूर्वपदात्' इति षत्वं तु न भवति, तस्य च्छान्दसत्वात् । 'आदेर्नो या दिविषदः' इत्यत्र सुषामादित्वात् षत्वमित्याहुः । **उपनिषदिति** ॥ 'सदिरप्रतेः' इति षत्वम् । **इत्यादीति** ॥ काष्ठाभित्, रज्जुच्छित्, शत्रुजित्, अत्र 'ह्रस्वस्य पिति' इति तुक् । सेनानीः, विराट् । **अग्रग्रामाभ्यामिति** ॥ असमानपदत्वादप्राप्ते णत्वे वचनम् । **भजो ण्विः** ॥ सुप्युपपदे भजेर्ण्विरित्यर्थः । **अंशभागिति** ॥ णित्त्वादुपधावृद्धिः । **अदोऽनन्ने** ॥ **विट् स्यादिति** ॥ शेषपूरणमिदम् । अन्नशब्दभिन्ने सुप्युपपदे अदेर्विट् स्यादिति फलितम् । 'जनसनखनक्रमगमो विट्' इति छान्दससूत्राद्विडित्यनुवर्तते । **सस्यादिति** ॥ सस्यमत्तीति विग्रहः । **दिग्नाद इति** ॥ कर्मण्यण् । **क्रव्ये च** ॥ **अदेर्विडिति** ॥ शेषपूरणमिदम् । **अण्बाधनार्थमिति** ॥ क्रव्ये अदेर्विडेव न त्वणित्यर्थलाभादिति भावः । **कथमन्तर्हीति** ॥ क्रव्ये उपपदे अदेर्विडेवेति नियमादणोऽसम्भवादित्याक्षेपः । समाधत्ते । **पक्वमांसशब्द इति** ॥ तर्हि पक्वमांसाद इति स्यादित्यत आह । **उपपदस्य क्रव्यादेश इति** ॥ कुत इत्यत आह । **पृषोदरादित्वादिति** ॥ **दुहः कब्घश्च** ॥ सुप्युपपदे दुहेः कप्स्यात् प्रकृतेर्घश्चान्तादेश इत्यर्थः । **कामदुघेति** ॥ धेनुरिति शेषः । काममपेक्षितन्दुग्धे

---

१. 'पूर्वपदात्संज्ञायामगः' (सू ८५८) इति सूत्रेणेति भावः । अपूर्ववचनत्वे तु 'ग्रामनयनस्य' इति ग्रन्थविरोधः ।

२९८०। अन्येभ्योऽपि दृश्यन्ते। (३-२-७५)

छन्दसीति निवृत्तम्। मनिन् क्वनिप् वनिप् विच् एते प्रत्यया: धातोः स्युः।

२९८१। नेड्वशि कृति। (७-२-८)

वशादेः कृत इण्न स्यात्। शॄ, सुशर्मा। प्रातरित्वा।

२९८२। विड्वनोरनुनासिकस्याऽऽत्। (६-४-४१)

अनुनासिकस्य आत्स्यात्। विजायत इति विजावा। ओणृ, अवावा। विच्, रोट्। रेट्। सुगण्।

२९८३। क्विप्च। (३-२-७६)

अयमपि दृश्यते। 'सत्सूद्विष—' (सू २९७५) इति त्वस्यैव प्रपञ्चः। उखास्रत्। पर्णध्वत्। वाहभ्रट्।

२९८४। अन्तः। (८-४-२०)

पदान्तस्यानितेर्नस्य णत्वं स्यादुपसर्गस्थान्निमित्तात्परश्चेत्। हे प्राण्।

इति विग्रहः। **अन्येभ्योऽपि दृश्यन्ते** ॥ 'विजुपे छन्दसि' 'आतो मनिन्क्वनिब्वनिपश्च' इत्यधिकारे इदं सूत्रम्। **निवृत्तमिति** ॥ व्याख्यानादिति भावः। मनिनि अन्त्यो नकार इत् इकार उच्चारणार्थः। क्वनिपि वनिपि च पकार इत्, इकार उच्चारणार्थः। विचि चकार इत्, इकार इत्। **नेड्वशि कृति** ॥ षष्ठ्यर्थे सप्तम्यौ। वशा कृद्विशेष्यते। तदादिविधिः। तदाह। **वशादेरिति** ॥ **सुशर्मेति** ॥ शृधातोर्मनिन्। **प्रातरित्वेति** ॥ इण्धातोः क्वनिप्। **विड्वनोरनुनासिकस्याऽऽत्** ॥ विड्वनोरिति सप्तमी। अनुनासिकस्य आदिति छेदः। **विजावेति** ॥ जनेर्वनिप्। जनेर्नकारस्य आकारः। सवर्णदीर्घः। **अवावेति** ॥ ओणृर्वनिप्। णकारस्य आकारः अवादेशः। **विजिति** ॥ उदाहियते इति शेषः। **रोट्, रेडिति** ॥ 'रुष, रिष हिंसायाम्' विच्। 'वेरपृक्तस्य' इति वलोपः। **सुगण्गिति** ॥ सुगणेर्विच्। **क्विप् च** ॥ **अयमपीति** ॥ सर्वधातुभ्यस्सोपपदेभ्यः निरुपपदेभ्यश्च छन्दसि लोकेऽपि क्विप् दृश्यते इत्यर्थः। नन्वनेनैव सिद्धे 'सत्सूद्विष' इति सूत्रं व्यर्थमित्यत आह। **सत्सूद्विषेति** ॥ 'सत्सूद्विष' इति सूत्रन्तु 'क्विप् च' इत्यस्यैव प्रपञ्च इत्यर्थः। **उखास्रदिति** ॥ उखायास्रंसत इति विग्रहः। स्रंसेः क्विप्, 'अनिदिताम्' इति नलोपः, 'वसुस्रंसु' इति दत्वम्। एवं पर्णध्वत्। पर्णात् ध्वंसत इति विग्रहः। **वाहभ्रडिति** ॥ वाहात् भ्रश्यति इति विग्रह। व्रश्चादिना षः। **अन्तः** ॥ 'अनितेः' इति सूत्रमनुवर्तते, 'रषाभ्यां नो णः' इति च। अन्तः शब्दे षष्ठ्यर्थे प्रथमा। पदस्यान्तो विवक्षितः। 'उपसर्गादसमासेऽपि' इत्यतः उपसर्गादित्यनुवर्तते। तदाह। **पदान्तस्येत्यादिना** ॥ **हे प्राणिति** ॥ प्रपूर्वादनेः क्विबन्तात् सम्बोधनैकवचनस्य हल्ङ्यादिलोपः, नस्य णः। नलोपस्तु न,

'शास इत्—' (सू २४८६) इतीत्त्वम्। मित्राणि शास्ति मित्रशीः। 'आशासः कौ उपधाया इत्त्वं वाच्यम्' (वा ४०७०)। आशीः। इत्त्वोत्त्वे। गीः। पूः।

२९८५। इस्मन्त्रन्क्विषु च। (६-४-९७)

एषु छादेर्ह्रस्वः स्यात्। तनुच्छत्। 'अनुनासिकस्य क्वि—' (सू २६६६) इति दीर्घः। 'मो नो धातोः' (सू ३४१)। प्रतान्। प्रशान्। 'च्छ्वोः—' (सू २५६१) इत्यूठ्। अक्षन्यूः। 'ज्वरत्वर—' (सू २६५४) इत्यूठ्। जूः। जूरौ। जूरः। तूः। स्तूः। ऊठ्, वृद्धिः, जनानवतीति जनौः। जनावौ। जनावः। भूः। भुवौ। भुवः। सुभूः। सुभ्वौ। सुभ्वः। 'राल्लोपः' (सू २६५५)। मुर्छा, मूः। मुरौ। मुरः। धुर्वी, धूः।

'न डिसम्बुध्योः' इति निषेधात्। **मित्रशीरिति** ॥ मित्राणि शास्तीति विग्रहः। शासेः क्विप् 'शास इदङ्हलोः' इत्युपधाया इत्त्वम्, 'वोरुपधायाः' इति दीर्घः। मित्रशिषाविल्यादौ अपदान्तत्वान्न दीर्घः। **आशासः क्वाविति** ॥ 'आङः शासु इच्छायाम्' इत्यात्मनेपदी। तस्य 'शास इदङ्हलोः' इति इत्त्वन्तु न भवति। तत्र परस्मैपदिन एव शासेर्ग्रहणात्। अन्यथा आशास्ते इत्यादावपि इत्त्वापत्तेः। अतः आशासः क्वाविति विधिः। **इत्त्वोत्त्वे इति** ॥ गृधातोः क्विपि, ऋत इत्त्वे, रपरत्वे, सार्लोपे, 'वोरुपधायाः' इति दीर्घे, गीरिति रूपम्। पृधातोः क्विपि, 'उदोष्ठ्यपूर्वस्य' इति ऋतः उत्त्वे, रपरत्वे, सुलोपे, उपधादीर्घे पूः इति रूपमित्यर्थः। **इस्मन्त्रन्** ॥ इस्, मन्, त्रन्, क्वि, एषाञ्चतुर्णान्द्वन्द्वः। 'छादेर्घेऽद्व्युपसर्गस्य' इत्यतः छादेरिति 'खचि ह्रस्वः' इत्यतः ह्रस्व इति चानुवर्तते। तदाह। **एषु छादेरिति** ॥ अर्थादाकारस्येति गम्यते। अलोऽन्त्यपरिभाषामाश्रित्य इकारस्य ह्रस्वविधौ प्रयोजनाभावात्। एवञ्च 'ऊदुपधायाः' इत्यतः उपधाया इति चानुवर्तनीयम्। ण्यन्तस्य छादेर्दकारोपधत्वात्। इस् छदिः, मन् छद्म, त्रन् छत्त्रम्। क्विं तदाहरति। **तनुच्छदिति** ॥ तनुं छादयतीति विग्रहः। अथ तनेश्शमेश्च क्विपि विशेषमाह। **अनुनासिकस्येति** ॥ अक्षन्यूरित्यत्र आह। **च्छ्वोरिति** ॥ अक्षैर्दीव्यतीति विग्रहे अक्षधातोः क्विपि वकारस्य ऊठि इकारस्य यणिति भावः। **ज्वरेति** ॥ ज्वरधातोः क्विपि अकारवकारयोरेवास्मिन् ऊठि जूरिति रूपम्। एवं त्वरेः तूरिति रूपम्। स्विवेः क्विपि इकारवकारयोरूठि सूरिति रूपम्। अवधातोः क्विपि अकारवकारयोरूठि ऊरिति रूपम्। **वृद्धिरिति** ॥ जनानवतीति विग्रहे, अवेः क्विपि, अकारवकारयोरूठि, जन ऊ इति स्थिते, आद्गुणं बाधित्वा 'एत्येधत्यूठ्सु' इति वृद्धिरौकारादेश इत्यर्थः। **भूरिति** ॥ भवेः क्विपि, अकारवकारयोरूठ्। **सुभ्वौ, सुभ्वः इति** ॥ अनेकान्त्वात् गतिपूर्वत्वाच्च यणिति भावः। **रादिति** ॥ मुर्छाधातोः क्विपि 'राल्लोपः' इति छकारस्य लोपे सुलोपे 'वोः' इति दीर्घे मूरिति रूपम्। **मुरौ, मुरः इति** ॥ अपदान्तत्वान्नोपधादीर्घः। **धुर्वीति** ॥ धुर्वीधातोः

२९८६। गमः क्वौ। (६-४-४०)

अनुनासिकलोपः स्यात्। अङ्गगत्। 'गमादीनामिति वक्तव्यम्' (वा ४०७६)। पुरीतत्। संयत्। सुनत्। 'ऊ च गमादीनामिति वक्तव्यं लोपश्च' (वा ४०७३–७४)। अग्रेगूः। अग्रेभूः।

२९८७। स्थः क च। (३-२-७७)

चात्किप्। शंस्थः। शंस्थाः। 'शमिधातोः—' (सू २९२८) इत्यचं बाधितुं सूत्रम्।

२९८८। सुप्यजातौ णिनिस्ताच्छील्ये। (३-२-७८)

अजात्यर्थे सुपि धातोर्णिनिः स्यात्ताच्छील्ये द्योत्ये। उष्णभोजी। शीतभोजी। 'अजातौ' किम्। ब्राह्मणानामन्त्रयिता। 'ताच्छील्ये' किम्।

क्विपि 'राल्लोपः' इति वकारस्य लोपे सुलोपे 'वोः' इति दीर्घे धूरिति रूपमिति भावः। **गमः क्वौ॥ अनुनासिकलोपः स्यादिति॥** शेषपूरणमिदम्। 'अनुदात्तोपदेश' इत्यतस्तदनुवृत्तेरिति भावः। झलादिप्रत्ययपरकत्वाभावात् अनुदात्तोपदेशेत्यप्राप्तौ वचनम्। **अङ्गगदिति॥** अङ्गाख्यं देशं गच्छतीति विग्रहः। क्विपि मकारलोपे तुक्। एवं वङ्गगत्कलिङ्गगदित्यादि। **गमादीनामिति॥** क्वावनुनासिकलोप इति शेषः। **पुरीतदिति॥** पुरिः हृदयाख्यः मांसखण्डविशेषः। तन्तनोति आच्छादयतीति विग्रहः। हृदयकमलाच्छादको मेदोविशेषः। 'पुरीतदा हि हृदयमाच्छाद्यते" इति श्रुतिरिति कर्किभाष्यम्। तनेः क्विपि नकारलोपे तुक्। 'नहिवृतिवृषि' इति पूर्वपदस्य दीर्घः। **संयदिति॥** यमेः क्विप्। मलोपे तुक्। **सुनदिति॥** नमेः क्विपि मलोपे तुक्। **ऊ चेति॥** गमादीनामुपधायाः ऊभावश्चेति वक्तव्यमित्यर्थः। **लोपश्चेति॥** चकारादनुनासिकलोपः समुच्चीयते इति भावः। **अग्रेगूरिति॥** अग्रे गच्छतीति विग्रहः। गमेरकारस्य ऊभावः मलोपश्च 'तत्पुरुषे कृति बहुळम्' इत्यलुक्। **अग्रेभूरिति॥** भ्रमेरकारस्य ऊभावः, मलोपश्च। **स्थः क [illegible] च॥** केत्यविभक्तिकम्। स्थ इति पञ्चम्यन्तम्। **चात् क्विबिति॥** उपसर्गे अनुपसर्गे च [illegible]न्ते उपपदे स्थाधातोः कप्रत्ययः स्यात् क्विप् चेति फलितम्। **शंस्थ इति॥** शमिल्लयं सुखे। तत्पूर्वात् स्थाधातोः कप्रत्यये आतो लोपः। **शंस्था इति॥** क्विपि रूपम्। सुखं स्थापयतीत्यर्थः। तिष्ठतिरन्तर्भावितण्यर्थः। शंस्था इति भाष्यप्रयोगात् पृषोदरादित्वाच्च 'घुमास्था' इति ईत्त्वम्न। केचित्तु कचेति चकारात् विजेवानुकृष्यते इत्याहुः। ननु 'सुपि स्थः' इति कप्रत्यये 'क्विप् च' इति क्विपि च सिद्धे किमर्थमिदमित्यत आह। **शमिधातोरित्यचमिति॥** अन्यथा धातुग्रहणसामर्थ्यात् कृञो हेत्वादिषु टप्रत्ययमिव शम्पूर्वात् स्थाधातोः कं क्विपञ्च अच्प्रत्ययो बाधेतेति भावः। **सुप्यजातौ णिनिस्ताच्छील्ये॥** 'सुपि स्थः' इत्यतः सुपीत्यनुवृत्तौ पुनः सुब्ग्रहणमुपसर्गेऽपि विधानार्थम्। अन्यथा 'आतोऽनुपसर्गे' इत्यतः अनुपसर्गे इत्यनुवर्तेत।

उष्णं भुङ्क्ते कदाचित्। इह वृत्तिकारेणोपसर्गभिन्न एव सुपि णिनिरिति व्याख्याय 'उत्प्रतिभ्यामाङि सर्तेरुपसङ्ख्यानम्' इति पठितम्। हरदत्तमाधवादिभिश्च तदेवानुसृतम्। एतच्च भाष्यविरोधादुपेक्ष्यम्। प्रसिद्धश्चोपसर्गेऽपि णिनिः। 'स बभूवोपजीविनाम्' 'अनुयायिवर्गः'। 'पतत्यधो धाम विसारि'। 'न वञ्चनीयाः प्रभवोऽनुजीविभिः' इत्यादौ। 'साधुकारिण्युपसङ्ख्यानम्' (वा २०३८) 'ब्रह्मणि वदः' (वा २०३९) अताच्छील्यार्थं वार्तिकद्वयम्। साधुदायी। ब्रह्मवादी।

२९८९। कर्तर्युपमाने। (३-२-७९)

णिनिः स्यात्। उपपदार्थः कर्ता प्रत्ययार्थस्य कर्तुरुपमानम्। उष्ट्र इव क्रोशति उष्ट्रक्रोशी। ध्वाङ्क्षरावी। अताच्छील्यार्थं जात्यर्थं च सूत्रम्। 'कर्तरि' किम्। अपूपानिव भक्षयति माषान्। 'उपमाने' किम्। उष्ट्रः क्रोशति।

२९९०। व्रते। (३-२-८०)

णिनिः स्यात्। स्थण्डिलेशायी।

तद्धनयन्नुदाहरति। **उष्णभोजीति**॥ उष्णभोजनशील इत्यर्थः। **उपसर्गभिन्न एवेति**॥ अनुपसर्ग इत्यनुवर्तते। सुब्ग्रहणन्तु 'सत्सूद्विष' इति सूत्रात् उपसर्गेऽपीत्यनुवृत्तिनिवृत्तये इति भावः। **उत्प्रतिभ्यामिति**॥ उत्प्रतिभ्याम्परे आङि प्रयुज्यमाने सति तत्पूर्वात्सर्तेर्णिनेरुपसङ्ख्यानमिति तदर्थः। उदासारिणी प्रत्यासारिणीत्युदाहरणम्। **भाष्यविरोधादिति**॥ सुब्ग्रहणमुपसर्गग्रहणानुवृत्तिनिवृत्त्यर्थम्। उपसर्गे अनुपसर्गे च सुबन्ते उपपदे धातोर्णिनिरित्येव भाष्ये उदाहृतत्वादिति भावः। तथाच 'उत्प्रतिभ्यामाङि सर्तेः' इति वचनन्नादर्तव्यम्। भाष्ये तत्पाठस्तु प्राक्षिप्त एवेति भावः। अत एव 'अनुगादिनः' इति सूत्रप्रयोगश्च सङ्गच्छते इति ज्ञेयम्। उपसर्गभिन्न एव सुपि णिनिरिति मतं शिष्टप्रयोगविरुद्धत्वेत्याह। **प्रसिद्धश्चोपसर्गेऽपि णिनिरिति**॥ इत्यादावित्यत्रान्वयः। **साधुकारिणीति**॥ कृञ्ग्रहणं सर्वधातूपलक्षणम्। साधुकारीत्यादिशब्दविषये तत्सिद्ध्यर्थं णिनेरुपसङ्ख्यानमित्यर्थः। साधुशब्दे उपपदे धातोर्णिनिरिति यावत्। भाष्ये साधुकारी साधुदायीत्युदाहरणात्। **ब्रह्मणि वद इति**॥ णिनेरुपसङ्ख्यानमिति शेषः। ननु 'सुप्यजातौ' इत्येव सिद्धे किमर्थमिदं वार्तिकमित्यत आह। **अताच्छील्यार्थमिति**॥ **साधुदायीति**॥ आतो युक्। **ब्रह्मवादीति**॥ ब्रह्म वेदः। **कर्तर्युपमाने**॥ **कर्तुरुपमानमिति**॥ चेदित्यध्याहार्यम्। ननु 'सुप्यजातौ' इति सिद्धे किमर्थमिदमित्यत आह। **अताच्छील्यार्थमिति**॥ **व्रते**॥ **णिनिः स्यादिति**॥ सुप्युपपदे णिनिः स्यात्

२९९१। बहुलमाभीक्ष्ण्ये। (३-२-८१)

पौनःपुन्ये द्योत्ये सुप्युपपदे णिनिः। क्षीरपायिणः। अशीनराः।

२९९२। मनः। (३-२-८२)

सुपि मन्यतेर्णिनिः स्यात्। दर्शनीयमानी।

२९९३। आत्ममाने खश्च। (३-२-८३)

स्वकर्मके मनने वर्तमानान्मन्यतेः सुपि खश् स्यात्। चाणिनिः। पण्डितमात्मानं मन्यते पण्डितम्मन्यः—पण्डितमानी। 'खित्यनव्ययस्य' (सू २७४३)। कालिंमन्या। 'अनव्ययस्य' किम्। दिवामन्या।

२९९४। इच एकाचोऽम्प्रत्ययवच्च। (६-३-६८)

इजन्तादेकाचोऽम्स्यात्स च स्वाद्यम्वत्खिदन्ते परे। 'औतोऽम्शसोः' (सू २८५) गाम्मन्यः। 'वाम्शसोः' (सू ३०२)। स्त्रियम्मन्यः। स्त्रीम्मन्यः।

व्रते गम्ये इति यावत्। **स्थण्डिलेशायीति** ॥ 'तत्पुरुषे कृति बहुलम्' इत्यलुक्। **बहुलमाभीक्ष्ण्ये** ॥ जातावप्युपपदे प्राप्त्यर्थमिदम्। तत् ध्वनयन्नुदाहरति। **क्षीरपायिण इति ॥ मनः** ॥ दैवादिकस्यैव मनेर्ग्रहणं न तु तानादिकस्य, बहुलग्रहणानुवृत्तेः। तदाह। **सुपि मन्यतेरिति** ॥ मनुतेर्ग्रहणे तु बाधकमुत्तरसूत्रे वक्ष्यते। **आत्ममाने खश्च** ॥ आत्मनः स्वस्य मानः मननम् आत्ममानः। तदाह। **स्वकर्मके मनने इति। पण्डितम्मन्य इति** ॥ खशः शित्त्वेन सार्वधातुकत्वात् श्यन्। खित्वात् 'अरुर्द्विषत्' इति मुम्। तानादिकस्य मनेर्ग्रहणे तु उविकरणः स्यात्। कालीमात्मानम्मन्यते इत्यर्थे खशि श्यनि कृते आह। **खित्यनव्ययस्येति** ॥ 'स्त्रियाः पुंवत्' इति पुंवत्त्वं बाधित्वा परत्वाद्ह्रस्वः इत्यर्थः। **दिवामन्येति** ॥ अधिकरणशक्तिप्रधानस्यापि दिवाशब्दस्य वृत्तिविषये कर्मत्वं बोध्यम्। **इच एकाचः** ॥ एकाचः अमिति छेदः। अम् च अम् चेत्येकशेषः। एकं विधेयसमर्पकम्। इच एकाचोऽमिति प्रथमं वाक्यम्। इच इत्येकाच इति च पञ्चमी। 'अलुगुत्तरपदे' इत्युत्तरपदाधिकारात् आक्षिप्तम्पूर्वपदम् इचा विशेष्यते। तदन्तविधिः। तदाह। **इजन्तादेकाचोऽम् स्यादिति** ॥ मुमोऽपवादः। द्वितीयम् अम्पदम्प्रत्ययवदित्येकदेशेन प्रत्ययेन समानाधिकरणं सम्बध्यते। असामर्थ्येऽपि वतिप्रत्यय आर्षः। अम्प्रत्ययवदिति द्वितीयं वाक्यं सम्पद्यते। स्वादिप्रत्ययेषु यत् द्वितीयैकवचनं तदेवात्र अमिति विवक्ष्यते, व्याख्यानात्। तदाह। **स च स्वाद्यम्वदिति** ॥ एतत्सर्वं भाष्ये स्पष्टम्। **खिदन्ते परे इति** ॥ खिदन्ते उत्तरपदे परत इत्यर्थः। 'खित्यनव्ययस्य' इत्यतः खितीत्यनुवर्तते इति भावः। अम्प्रत्ययवदित्यतिदेशस्य प्रयोजनमाह। **औतोऽशसोरिति ॥ गाम्मन्य इति** ॥ गामात्मानं मन्यते इत्यर्थे मनेः खशि श्यन्, सुपो लुक्, गोशब्दादम्, अम्प्रत्ययवदित्यतिदेशात् मकारस्य 'न विभक्तौ' इति नेत्त्वम्। 'औतोम्शसोः'

नृ, नरम्मन्यः। भुवम्मन्यः। 'श्रियमात्मानं मन्यते श्रिमन्यं कुलम्'। भाष्यकारवचनाच्छ्रीशब्दस्य ह्रस्वो मुममोरभावश्च।

२९९५। भूते। (३-२-८४)

अधिकारोऽयम्। 'वर्तमाने लट्' (सू २१५१) इति यावत्।

इत्योकारस्य आकार इति भावः। अम्प्रत्ययवदित्यस्य प्रयोजनान्तरमाह। **वांशसोरिति** ॥ **स्त्रियम्मन्य इति** ॥ स्त्रियमात्मानम्मन्यते इत्यर्थे मनेः खशि श्यन्। सुपो लुक्। स्त्रीशब्दात् 'वाम्शसोः' इति इयङ्विकल्पः। अत्र यकारादकारश्रवणार्थम् अम्विधिः। मुमि तु अकारो न श्रूयेत। **स्त्रीम्मन्य इति** ॥ इयङभावपक्षे 'अमि पूर्वः'। अम्प्रत्ययवदित्यस्य प्रयोजनान्तरमाह। **नृ नरम्मन्य इति** ॥ नृ इत्यविभक्तिकम् उदाहरणे नृशब्दस्य समावेशसूचनार्थम्। नरमात्मानम्मन्यते इत्यर्थे मनेः खश्, श्यन्, सुपो लुक्, नृशब्दादम् अम्प्रत्ययवदित्यतिदेशात् 'ऋतोऽङि' इति गुणः। अत्रापि रेफादकारश्रवणार्थं अम्विधिः। मुमि त्वकारो न श्रूयेत। अम्प्रत्ययवदित्यस्य प्रयोजनान्तरमाह। **भुवम्मन्य इति** ॥ भुवमात्मानम्मन्यते इत्यर्थे मनेः खश्, श्यन्, सुपो लुक्। भूशब्दादम्, अम्प्रत्ययवदित्यतिदेशात् 'अचि श्नुधातु' इत्युवङ्। अतिदेशाभावे तु उवङ् न स्यात्, तस्याजादिप्रत्यये विधानात्। **श्रिमन्यमिति** ॥ मनेः खश् श्यन्। अत्र मननक्रियाम्प्रति कुलत्वेन रूपेण कुलङ्कर्तृ, तस्यैव कुलस्य अध्यारोपितश्रीत्वेन रूपेण कर्मत्वञ्चेति स्थितिः। एवञ्च श्रीशब्दस्य नित्यस्त्रीलिङ्गस्यापि कुले लक्षणया वृत्तेर्नपुंसकत्वम्। "यत्र हि प्रातिपदिकस्यैव लक्षणा प्रसिद्धा तत्र पूर्वलिङ्गत्यागः। यथा प्रकृते श्रीशब्दः। यत्र तु पदस्य लक्षणा, न तत्र पूर्वलिङ्गत्यागः। यथा गङ्गायाङ्घोष इत्यादौ" इति 'पुंयोगादाख्यायाम्' इति सूत्रे प्रकृतसूत्रे च भाष्यकैयटयोर्मर्यादा स्थिता। एवञ्च काळिम्मन्यं कुलमित्यत्र काळीशब्दस्य न स्त्रीलिङ्गपरित्यागः, प्रयोगानुसारेण तत्र पदलक्षणाया एवाभ्युपगमात्। श्रिमन्यं कुलमित्यत्र तु प्रयोगानुसारात् श्रीशब्दस्य प्रातिपदिकस्यैव लक्षणेति पूर्वलिङ्गपरित्यागात् नपुंसकलिङ्गत्वमेवाश्रीयते। ततश्च श्रीशब्दस्यात्र नपुंसकत्वात् 'खित्यनव्ययस्य' इति बहिरङ्गं बाधित्वा 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्व एव न्याय्यः। मुमपवादे 'इच एकाचः' इति अमि कृते तस्य 'स्वमोर्नपुंसकात्' इति लुक्। तथाच श्रिमन्यङ्कुलमिति सिद्धम्। नच गाम्मन्य इत्यादावपि 'सुपो धातुप्रातिपदिकयोः' इति लुक् स्यादिति वाच्यम्। 'इच एकाचः' इत्यमः 'सुपो धातु' इति लुगपवादत्वात्। 'स्वमोर्नपुंसकात्' इति लुकस्तु नायमम्विधिबाधकः। मध्येऽपवादन्यायात् इति प्रकृतसूत्रे भाष्यकैयटयोः स्पष्टम्। तदाह। **भाष्यकारवचनाच्छ्रीशब्दस्य ह्रस्व इति** ॥ 'ह्रस्वो नपुंसके' इत्यनेनेति शेषः। **मुममोरभावश्चेति** ॥ मुमपवादस्य अमः 'स्वमोर्नपुंसकात्' इति लुकि सति तयोः प्रयोगाभावः फलतीत्यर्थः। **भूते** ॥ **अधिकारोऽयमिति** ॥ धातोरित्यधिकृतम्। ततश्च भूतार्थवृत्तेर्धातोरित्युत्तरत्रानुवर्तते इति फलति। **वर्तमाने इति** ॥ 'वर्तमाने लट्' इत्यतः प्रागित्यर्थः। अत

२९९६। करणे यजः। (३-२-८५)

करणे उपपदे भूतार्थाद्यजेर्णिनिः स्यात्कर्तरि। सोमेनेष्टवान् सोमयाजी। अग्निष्टोमयाजी।

२९९७। कर्मणि हनः। (३-२-८६)

पितृव्यघाती। कर्मणीत्येतत् 'सहे च' (सू ३००६) इति यावदधिक्रियते।

२९९८। ब्रह्मभ्रूणवृत्रेषु क्विप्। (३-२-८७)

एषु कर्मसूपपदेषु हन्तेर्भूते क्विप् स्यात्। ब्रह्महा। भ्रूणहा। वृत्रहा। 'क्विप् च' (सू २९८३) इत्येव सिद्धे नियमार्थमिदम्। ब्रह्मादिष्वेव, हन्तेरेव, भूत एव, क्विबेवेति चतुर्विधोऽत्र नियम इति काशिका। ब्रह्मादिष्वेव क्विबेवेति द्विविधो नियम इति भाष्यम्।

२९९९। सुकर्मपापमन्त्रपुण्येषु कृञः। (३-२-८९)

सुकर्मादिषु च कृञः क्विप्स्यात्। त्रिविधोऽत्र नियम इति काशिका। सुकृत्। कर्मकृत्। पापकृत्। मन्त्रकृत्। पुण्यकृत्। क्विबेवेति नियमात्कर्म

व्याख्यानमेव शरणम्। **करणे यजः** ॥ **सोमेनेति** ॥ सोमाख्यलताविशेषरसेन यागं कृतवानित्यर्थः। सोमलतारसद्रव्यकेन यागेन अपूर्वमुत्पादितवानिति मीमांसकाः। एतच्च द्वितीयस्य द्वितीये द्रव्यसंयोगाच्चोदना पशुसोमयोः—इत्यधिकरणे अध्वरमीमांसाकुतूहलवृत्तौ प्रपञ्चितमस्माभिः। **अग्निष्टोमयाजीति** ॥ अग्निष्टोमाख्ययागेन अपूर्वम्भावितवानित्यर्थः। **कर्मणि हनः** ॥ कर्मण्युपपदे भूतार्थात् हनेर्णिनिः स्यात्। **पितृव्यघातीति** ॥ पितृव्यं हतवानित्यर्थः। 'हनस्तः' इति तः, 'हो हन्तेः' इति हस्य घः। **ब्रह्मभ्रूणवृत्रेषु क्विप्** ॥ पूर्वसूत्रात्कर्मग्रहणानुवृत्तेराह। **कर्मस्विति** ॥ **हन्तेर्भूते इति** ॥ भूतार्थवृत्तेर्हन्तेरित्यर्थः। **चतुर्विध इति** ॥ पुनर्विधानलब्धस्य एवकारस्य विनिगमनाविरहाच्चतुर्ष्वपि निवेश इति भावः। तत्र ब्रह्मादिष्वेव हन्तेरिति नियमात्पुरुषं हतवानित्यत्र न क्विप्। ब्रह्मादिषु हन्तेरेवेति नियमात् ब्रह्म अधीतवानित्यत्र न क्विप्। ब्रह्मादिषु हन्तेर्भूतकाले एवेति नियमात् ब्रह्म हन्ति हनिष्यति वेत्यत्र न क्विप्। ब्रह्म हतवानित्यत्र अण् न भवति, किन्तु 'ब्रह्मभ्रूण' इति क्विबेव। निष्ठा तु भवत्येव, सोपपदप्रत्ययस्यैव नियमेन व्यावृत्तेः। **द्विविध इति** ॥ उभयतो नियमोऽयम्। ब्रह्मादिष्वेवेति क्विबेवेति च भाष्यमित्यर्थः। एवञ्च हन्तेरेव भूत एवेति नियमद्वयमुपेक्ष्यमिति भावः। **सुकर्म** ॥ सु, कर्म, पाप, मन्त्र, पुण्य, एषां पञ्चानां द्वन्द्वः। **त्रिविध इति** ॥ सुकर्मादिषु भूते कृञः क्विबेवेति, सुकर्मादिषु भूते कृञ एव क्विबिति,

कृतवानित्यत्राण् न । कृञ एवेति नियमान्मन्त्रमधीतवान्मन्त्राध्यायः । अत्र न किप् । भूत एवेति नियमान्मन्त्रं करोति करिष्यति वेति विवक्षायां न किप् । स्वादिष्वेवेति नियमाभावादन्यस्मिन्नप्युपपदे किप् । शास्त्रकृत् । भाष्यकृत् ।

३००० । सोमे सुञः । (३-२-९०)

सोमसुत् । चतुर्विधोऽत्र नियम इति काशिका । एवमुत्तरसूत्रेऽपि ।

३००१ । अग्नौ चेः । (३-२-९१)

अग्निचित् ।

३००२ । कर्मण्यग्न्याख्यायाम् । (३-२-९२)

कर्मण्युपपदे कर्मण्येव कारके चिनोतेः किप् स्यात् अग्न्याधारस्थलविशेषस्याख्यायाम् । श्येन इव चितः श्येनचित् ।

३००३ । कर्मणीनि विक्रियः । (३-२-९३)

कर्मण्युपपदे विपूर्वात्क्रीणातेरिनिः स्यात् । 'कुत्सितग्रहणं कर्तव्यम्' (वा २०४७) । सोमविक्रयी । घृतविक्रयी ।

३००४ । दृशेः क्वनिप् । (३-२-९४)

कर्मणि भूत इत्येव । पारं दृष्टवान् पारदृश्वा ।

सुकर्मादिषु भूत एव कृञ इति, त्रिविध इत्यर्थः । **अण् नेति** ॥ क्तवतुस्तु भवत्येव, सोपपदप्रत्ययस्यैव नियमेन व्यावृत्तेरिति भावः । **स्वादिष्वेवेति** ॥ सुकर्मादिषु पञ्चस्वित्यर्थः । **सोमे सुञः** ॥ सोमे कर्मण्युपपदे भूते सुनोतेः क्विबित्यर्थः । **चतुर्विध इति** ॥ पूर्ववद्व्याख्येयम् । **एवमिति** ॥ 'अग्नौ चेः' इत्युत्तरसूत्रेऽपि चतुर्विधो नियम इत्यर्थः । **अग्नौ चेः** ॥ अग्नौ कर्मण्युपपदे भूतार्थवृत्तेश्चिनोतेः क्विप्स्यादित्यर्थः । **अग्निचिदिति** ॥ अग्न्याख्यं स्थण्डिलविशेषमिष्टकाभिश्चितवानित्यर्थः । **कर्मण्यग्न्याख्यायाम्** ॥ कर्मणीत्यनुवृत्तमुपपदसमर्पकम् । अत्रत्यन्तु कर्मणीत्येतत्प्रत्ययार्थसमर्पकम् । तथा चात्र कर्तरीति न सम्बध्यते । तदाह । **कर्मण्युपपदे इत्यादि** ॥ **चिनोतेरिति** ॥ भूतार्थादित्यपि बोध्यम् । **श्येन इवेति** ॥ श्येनशब्दः श्येनसदृशे लाक्षणिक इति भावः । श्येनाकृतिक इते यावत् । **कर्मणीनि विक्रियः** ॥ इनि इत्यविभक्तिकम् । विपूर्वस्य क्रीञ्धातोर्विक्रिय इति पञ्चम्यन्तम् । **कुत्सितेति** ॥ कुत्सिते कर्मण्युपपदे उक्तविधिर्भवतीत्यर्थः । **सोमविक्रयीति** ॥ सोमद्रव्यञ्च विक्रीयमाणं विक्रेतुः कुत्सामावहति, तद्विक्रयस्य निषिद्धत्वादिति भावः । **दृशेः क्वनिप्** ॥ 'आतो मनिन्क्वनिब्वनिपश्च, अन्येभ्योऽपि दृश्यन्ते' इत्येव क्वनिपि सिद्धे तत्सहचरितमनिनादिव्यावृत्त्यर्थमिदम् । सोपपदाणादिबाधनार्थञ्च । निष्ठा तु भवत्येव, सोपपदप्रत्ययस्यैवात्र

३००५। राजनि युधिकृञः। (३-२-९५)

क्विप् स्यात्। युधिरन्तर्भावितण्यर्थः। राजानं योधितवान्राजयुध्वा। राजकृत्वा।

३००६। सहे च। (३-२-९६)

कर्मणीति निवृत्तम्। सहयुध्वा। सहकृत्वा।

३००७। सप्तम्यां जनेर्डः। (३-२-९७)

सरसिजम्। मन्दुरायां जातो मन्दुरजः। 'ङ्याप्रातिः—' (सू १००१) इति ह्रस्वः।

३००८। पञ्चम्यामजातौ। (३-२-९८)

जातिशब्दवर्जिते पञ्चम्यन्ते उपपदे जनेर्डः स्यात्। संस्कारजः। अदृष्टजः।

३००९। उपसर्गे च संज्ञायाम्। (३-२-९९)

'प्रजा स्यात्सन्ततौ जने'।

३०१०। अनौ कर्मणि। (३-२-१००)

अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात्। पुमांसमनुरुध्य जाता पुमनुजा।

३०११। अन्येष्वपि दृश्यते। (३-२-१०१)

अन्येष्वप्युपपदेषु जनेर्डः स्यात्। अजः। द्विजो ब्राह्मणः। (ब्राह्मणजः) अपिशब्दः सर्वोपाधिव्यभिचारार्थः। तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित्। परितः खाता परिखा।

पुनः क्विब्ग्रहणेन निवृत्तेः, पारं दृष्टवान्। **राजनि युधिकृञः॥** युधि, कृञ् अनयोस्समाहारद्वन्द्वात्पञ्चमी। **क्विप् स्यादिति॥** राजनि कर्मण्युपपदे भूतार्थाद्युधेः कृञश्च क्विबित्यर्थः। ननु युधेरकर्मकत्वात् तत्र कर्मण्युपपदे इत्यस्य कथमन्वय इत्यत आह। **युधिरन्तर्भावितेति॥ राजकृत्वेति॥** राजानं कृतवानित्यर्थः। **सहे च॥** सहशब्दे उपपदे युधिकृञ्भ्यां क्विबित्यर्थः। **सप्तम्याञ्जनेर्डः॥** सप्तम्यन्ते उपपदे जनेः भूतार्थाड् इत्यर्थः। **सरसिजमिति॥** ङित्त्वसामर्थ्यादभस्यापि टेर्लोपः। 'हलदन्तात्' इति 'तत्पुरुषे कृति' इति वा अलुक्। **मन्दुरज इति॥** "वाजिशाला तु मन्दुरा" इत्यमरः। **पञ्चम्यामजातौ॥ जनेरिति॥** भूतार्थादिति शेषः। **संस्कारजमिति॥** संस्काराज्जातमित्यर्थः। **उपसर्गे च॥** जनेर्ड इति शेषः। संज्ञायामिति समुदायोपाधिः। **अनौ कर्मणि॥** ननु जनेरकर्मकत्वात्तत्र कर्मण्युपपदे इत्यर्थस्य कथमन्वय इत्यत आह। **पुमांसमनुरुध्येति॥** अनुरुध्य जननं धात्वर्थ इति भावः। **पुमनुजेति॥** पुंस् इति पूर्वपदे संयोगान्तलोप इति भावः। **अन्येष्वपि दृश्यते॥ अज इति॥** न जात इत्यर्थः। **द्विजो ब्राह्मण इति॥** द्विर्जातः इत्यर्थः। "मातुर्यदग्रे जायन्ते द्वितीयं मैञ्जिबन्धनात्" इत्यादिस्मृतेरिति भावः। **अपिशब्द इति॥** 'सप्तम्याञ्जनेर्डः' इत्यादिसूत्रेषु डविधिषु यानि विशेषणान्युपात्तानि

३०१२ । क्तक्तवतू निष्ठा । (१-१-२६)

एतौ निष्ठासंज्ञौ स्तः ।

३०१३ । निष्ठा । (३-२-१०२)

भूतार्थवृत्तेर्धातोर्निष्ठा स्यात् । तत्र 'तयोरेव–' (सू २८३३) इति भावकर्मणोः क्तः । 'कर्तरि कृत्' (सू २८३२) इति कर्तरि क्तवतुः । उकावितौ । स्नातं मया । स्तुतस्त्वया विष्णुः । बिष्णुर्विश्वं कृतवान् ।

३०१४ । निष्ठायामण्यदर्थे । (६-४-६०)

ण्यदर्थो भावकर्मणी, ततोऽन्यत्र निष्ठायां क्षियो दीर्घः स्यात् ।

३०१५ । क्षियो दीर्घात् । (८-२-४६)

दीर्घात्क्षियो निष्ठातस्य नः स्यात् । क्षीणवान् । भावकर्मणोस्तु क्षितः कामो मया । 'श्र्युकः किति' (सू २३८१) । श्रितः–श्रितवान् । भूतः–भूत-

---

प्रकृतिविशेषरूपाणि भूते कर्तरीति प्रत्ययार्थविशेषणञ्च तदतिक्रमार्थ इत्यर्थः । **क्तक्तवतू निष्ठा** ॥ क्त, क्तवतु अनयोर्द्वन्द्वः । निष्ठेति प्रत्येकाभिप्रायमेकवचनम् । **निष्ठा** ॥ भूते इति धातोरिति चाधिकृतम् । तदाह । **भूतार्थेत्यादि** ॥ **भावकर्मणोः क्त इति** ॥ तथाच क्तप्रत्ययविषये कर्तरीति न सम्बध्यते इति भावः । **कर्तरि क्तवतुरिति** ॥ कृत्यक्तखलर्थानामेव भावकर्मणोर्विधानादिति भावः । 'तयोरेव कृत्यक्त' इत्यत्र 'लः कर्मणि' इत्यस्मात् सकर्मकेभ्यः कर्मणि कर्तरि च अकर्मकेभ्यो भावे कर्तरि चेत्यनुवर्तते । ततश्च अकर्मकेभ्यो भावे क्तः, सकर्मकेभ्यस्तु कर्मणीति व्यवस्था लभ्यते इति मत्वा उदाहरति । **स्नातम्मयेति** ॥ अकर्मकत्वात् भावे क्तः । **स्तुतस्त्वया विष्णुरिति** ॥ सकर्मकत्वात् कर्मणि क्तः । कर्तरि क्तवतुमुदाहरति । **विष्णुर्विश्वं कृतवानिति** ॥ **निष्ठायामण्यदर्थे** ॥ **ण्यदर्थो भावकर्मणी इति** ॥ 'ऋहलोः' इति ण्यतः कृत्यसंज्ञकस्य तयोरेवेति भावकर्मणोरेव प्रवृत्तेरिति भावः । **ततोऽन्यत्रेति** ॥ कर्तरीत्यर्थः । क्तवताविति फलितम् । **क्षियो दीर्घः स्यादिति** ॥ क्षिय इति पूर्वसूत्रमनुवर्तते । 'युप्लुवोर्दीर्घश्छन्दसि' इत्यतः दीर्घ इति चेति भावः । **क्षियो दीर्घात्** ॥ दीर्घादिति क्षियो विशेषणम् । तदाह । **दीर्घात् क्षिय इति** ॥ दीर्घान्तादित्यर्थः । **निष्ठातस्य न इति** ॥ 'रदाभ्याम्' इत्यतस्तदनुवृत्तेरिति भावः । **क्षीणवानिति** ॥ क्षिधातोः कर्तरि क्तवतुः, 'निष्ठायामण्यदर्थे' इति दीर्घः, तकारस्य नत्वम्, षात्परत्वाण्णः । **क्षितः कामो मयेति** ॥ क्षपित इत्यर्थः । 'क्षि क्षये' इत्यस्मात् अन्तर्भावितण्यर्थात्कर्मणि क्तः । भावे तु क्षितं कामेनेत्युदाहार्यम् । अत्र ण्यदर्थयोर्भावकर्मणोर्विहिते क्ते दीर्घो न भवति, अण्यदर्थ इत्युक्तेः । दीर्घान्तत्वाभावात् 'क्षियो दीर्घात्' इति नत्वं न । **श्र्युकः कितीति** ॥

वान्। क्षुतः। 'ऊर्णोतेर्नुवद्भावो वाच्यः' (वा १७५१)। तेन एकाच्त्वान्नेट्। ऊर्णुतः। नुतः। वृतः।

३०१६। रदाभ्यां निष्ठातो नः पूर्वस्य च दः। (८-२-४२)

रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यात्। निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च। शॄ 'ऋत इत्–' (सू २३९०)। रपरः, णत्वम्। शीर्णः। बहिरङ्गत्वेन वृद्धेरसिद्धत्वान्नेह। कृतस्यापत्यं कार्तिः। भिन्नः। छिन्नः।

३०१७। संयोगादेरातो धातोर्यण्वतः। (८-२-४३)

निष्ठातस्य नः स्यात्। द्राणः। स्यानः। ग्लानः।

३०१८। ल्वादिभ्यः। (८-२-४४)

एकविंशतेर्लूआदिभ्यः प्राग्वत्। लूनः। ज्या, 'ग्रहिज्या' (सू २४१२)। जीनः। 'दुग्वोर्दीर्घश्च' (वा ४८३२)। 'दु गतौ'। दूनः। 'टु दु उपतापे'

श्रित इत्यादौ इण्निषेधस्मारकमिदम्। **क्षुत इति** ॥ 'टु क्षु शब्दे' अस्मात् क्तः। ननु ऊर्णुत इति कथम्। अनेकाच्कत्वेन 'श्रयुकः' इति निषेधस्याप्रवृत्तेरित्यत आह। **ऊर्णोतेर्नुवदिति** ॥ वार्तिकमिदम्। **रदाभ्याम्**। रदाभ्यामित्यकारावुच्चारणार्थौ। तदाह। **रेफदकाराभ्यामिति** ॥ निष्ठायाः त् निष्ठात्, तस्य निष्ठात इति विग्रहः। तदाह। **निष्ठातस्येति** ॥ निष्ठातकारस्येत्यर्थः। **नस्स्यादिति** ॥ नकारस्स्यादित्यर्थः। सूत्रे न इति प्रथमान्तम्। अकार उच्चारणार्थः। **दकारस्य चेति** ॥ नकार इत्यनुषज्यते। सूत्रे दः इति षष्ठ्यन्तमिति भावः। चरितम् उदितम् इत्यत्र तु नत्वन्न। निष्ठातकारस्य इटा व्यवहितत्वेन रदाभ्यां परत्वाभावात्। रेफात्परस्योदाहरति। **शॄ इति** ॥ शॄधातोः क्तप्रत्ययसूचनमिदम्। ननु कृतस्यापत्यङ्कार्तिः। अत इञ्, आदिवृद्धिः, रपरत्वम्। अत्र निष्ठातकारस्य रेफात् परस्य नत्वं स्यादित्यत आह। **बहिरङ्गत्वेनेति** ॥ दात्परस्योदाहरति। **भिन्नम्, छिन्नमिति** ॥ अत्र निष्ठातकारस्य धात्वन्तदकारस्य च नत्वमिति भावः। **संयोगादेः॥ निष्ठातस्य नस्स्यादिति** ॥ शेषपूरणमिदम्। **द्राण इति** ॥ 'द्रा कुत्सायाङ्गतौ' अस्मात् क्तः, नत्वम्, णत्वम्। **ग्लान इति** ॥ 'ग्लै ह्रर्षक्षये' 'आदेचः' इत्यात्त्वे नत्वम्। **ल्वादिभ्यः॥ एकविंशतेरिति** ॥ क्र्यादिषु प्वादयो द्वाविंशतिः, तेषु आद्यम्पूञं विहाय ल्वादिभ्यः एकविंशतेरित्यर्थः। **ज्येति** ॥ धातुसूचनम्। **ग्रहिज्येति** ॥ सम्प्रसारणसूचनम्। **जीन इति** ॥ ज्या त इति स्थिते 'संयोगादेः' इति निष्ठानत्वस्यासिद्धत्वात् ततः प्रागेव सम्प्रसारणे पूर्वरूपे च कृते आतः परत्वाभावात् 'संयोगादेरातः' इति नत्वस्याप्राप्तावनेन नत्वम्। **दुग्वोर्दीर्घश्चेति** ॥ वार्तिकमिदम्। दु गु आभ्याम्परस्य निष्ठातस्य नत्वं प्रकृतेर्दीर्घश्च इत्यर्थः। 'मृदुतया दुतया' इति माघकाव्ये दुतशब्दं साधयितुमाह। **टु दु**

इत्ययं तु न गृह्यते, सानुबन्धकत्वात् । 'मृदुतया दुतया' इति माघः । गूनः । 'पूञो विनाशे' (वा ४८३३) । पूना यवाः । विनष्टा इत्यर्थः । पूतमन्यत् । 'सिनोतेर्ग्रासकर्मकर्तृकस्य' (वा ४८३४) । सिनो ग्रासः । 'ग्रास' इति किम् । सिता पाशेन सूकरी । 'कर्मकर्तृकस्य' इति किम् । सितो ग्रासो देवदत्तेन ।

३०१९ । ओदितश्च । (८-२-४५)

भुजो, भुग्नः । 'टु ओ श्वि', उच्छूनः । ओ हाक्, प्रहीणः । 'स्वादय ओदितः' इत्युक्तम् । सूनः—सूनवान् । दूनः—दूनवान् । ओदिन्मध्ये डीङः पाठसामर्थ्यान्नेट्, उड्डीनः ।

३०२० । द्रवमूर्तिस्पर्शयोः श्यः । (६-१-२४)

द्रवस्य मूर्तौ काठिन्ये स्पर्शे चार्थे श्यैङः सम्प्रसारणं स्यान्निष्ठायाम् ।

३०२१ । श्योऽस्पर्शे । (८-२-४७)

उपतापे इत्यादि ॥ **गून इति** ॥ गुधातोः क्ते दीर्घः । **पूञो विनाशे इति** ॥ वार्तिकमिदम् । विनाशार्थात् पूञः परस्य निष्ठातस्य नत्वमित्यर्थः । **सिनोतेरिति** ॥ वार्तिकमिदम् । कर्मैव कर्ता कर्मकर्ता, ग्रासः कर्मकर्ता यस्य सः ग्रासकर्मकर्तृकः तस्मात् 'षिञ् बन्धने' इत्यस्मात्परस्य निष्ठातस्य नत्वमित्यर्थः । **ओदितश्च** ॥ ओकारेतो धातोः परस्य निष्ठातस्य नत्वमित्यर्थः । **भुग्न इति** ॥ नत्वस्यासिद्धत्वात् जस्य पूर्वङ्कत्वम् । ततो नत्वम् । **उच्छून इति** ॥ उत्पूर्वात् 'टु ओ श्वि' इति धातोः क्तः, यजादित्वात्सम्प्रसारणम्, पूर्वरूपम्, 'श्वीदितः' इति नेट्, हल इति दीर्घः, निष्ठानत्वम् । **प्रहीण इति** ॥ 'घुमास्था' इति ईत्त्वं, नत्वं, 'क्ङ्यचः' इति णत्वम् । **स्वादय इति** ॥ 'षूङ् प्राणिप्रसवे' इत्याद्या नव धातवः ओदित इति दिवादिगणे उक्तमित्यर्थः । **सून इति** ॥ षूङः क्तः, नत्वं 'श्रयुकः किति' इति इण्निषेधः । **दून इति** ॥ 'दूङ् परितापे' अस्मात् क्तः, स्वादित्वेन ओदित्वान्नत्वम् । ननु 'डीङ् विहायसा गतौ' इत्यस्य उड्डीन इति कथं रूपं, सेट्कत्वात् उगन्तत्वाभावेन 'श्रयुकः किति' इति निषेधस्याप्रवृत्तेरित्यत आह । **ओदिन्मध्ये डीङः पाठसामर्थ्यान्नेडिति** ॥ इटि सति निष्ठातस्य ओदितः डीङः परत्वाभावान्नत्वाप्रसक्तेस्तस्य ओदित्सु पाठो व्यर्थः स्यादित्यर्थः । **द्रवमूर्ति** ॥ 'श्यैङ् गतौ' इत्यस्य कृतात्वस्य श्य इति षष्ठी । द्रवमूर्तिश्च स्पर्शश्चेति विग्रहः । मूर्तावित्यस्य विवरणम् । **काठिन्ये इति** ॥ **सम्प्रसारणं स्यादिति** ॥ 'घ्यङस्सम्प्रसारणम्' इत्यतस्तदनुवृत्तेरिति भावः । तथाच श्यैङः क्ते आत्त्वे सम्प्रसारणे पूर्वरूपे शि त इति स्थिते । **श्योऽस्पर्शे** ॥ श्यः अस्पर्शे इति छेदः । **दीर्घ इति** ॥ नत्वात्प्रागेव 'हलः' इति दीर्घ इत्युचितम् । नत्वस्य

श्यैङो निष्ठातस्य नः स्यादस्पर्शेऽर्थे। 'हलः' (सू २५५९) इति दीर्घः। शीनं घृतम्। 'अस्पर्शे' किम्। शीतं जलम्। 'द्रवमूर्तिस्पर्शयोः' किम्। संश्यानो वृश्चिकः शीतात्सङ्कुचित इत्यर्थः।

३०२२। प्रतेश्च। (६-१-२५)

प्रतिपूर्वस्य श्यः सम्प्रसारणं स्यान्निष्ठायाम्। प्रतिशीनः।

३०२३। विभाषाभ्यवपूर्वस्य। (६-१-२६)

श्यः सम्प्रसारणं वा स्यात्। अभिश्यानम्—अभिशीनं घृतम्। अवश्यानः—अवशीनो वृश्चिकः। व्यवस्थितविभाषेयम्। तेनेह न। समवश्यानः।

३०२४। अञ्चोऽनपादाने। (८-२-४८)

अञ्चो निष्ठातस्य नः स्यान्न त्वपादाने।

३०२५। यस्य विभाषा। (७-२-१५)

यस्य कचिद्विभाषयेङिहितस्ततो निष्ठाया इण्न स्यात्। 'उदितो वा'

त्रैपादिकत्वात्। **शीनं घृतमिति** ॥ घनीभूतमित्यर्थः। धातूनामनेकार्थत्वात्। यद्यपि घृतेऽप्यनुष्णः शीतस्पर्शोऽस्त्येव। तथापि शीताख्यस्पर्शविशेषः एव विवक्षितः इति भावः। **अस्पर्शे किमिति** ॥ श्यैङो निष्ठातस्य नत्वं स्यादित्येतावदेवास्त्वित्यर्थः। **शीतञ्जलमिति** ॥ शीतस्पर्शवदित्यर्थः। अत्र 'द्रवमूर्ति' इति सम्प्रसारणमेव, न तु निष्ठानत्वमित्यर्थः। एवञ्च 'द्रवमूर्तिस्पर्शयोः' इत्यस्य स्पर्शे इदमुदाहरणम्। 'श्योऽस्पर्शे' इत्यस्य तु प्रत्युदाहरणमिति बोध्यम्। सूत्रयोः स्पर्शशब्दः प्रधानभूते गुणभूते च वर्तते। तत्र गुणभूते विशेष्यनिघ्नः। शीताः आपः शीतं जलमित्यादि। यदा तु स्पर्शविशेषो गुणः प्राधान्येन विवक्षितः तदा क्लीबत्वमेव। "शीतङ्कुणे" इत्यमरः। सम्प्रसारणविधौ पृच्छति। **द्रवमूर्तिस्पर्शयोः किमिति** ॥ **संश्यान इति** ॥ अत्र स्पर्शस्याप्रतीतेः न सम्प्रसारणम्। नत्वन्तु भवत्येवेति भावः। **प्रतेश्च** ॥ द्रवमूर्तिस्पर्शाभ्यामन्यत्रापि सम्प्रसारणप्राप्त्यर्थमिदम्। **प्रतिशीन इति** ॥ प्रतिगत इत्यर्थः। अत्र 'श्योऽस्पर्शे' इति नत्वम्। **विभाषा** ॥ श्यैङ इति शेषः। **सम्प्रसारणं वा स्यादिति** ॥ शेषपूरणमिदम्। द्रवमूर्तिस्पर्शयोर्नित्यं सम्प्रसारणे प्राप्ते ततोऽन्यत्राप्राप्ते विभाषेयम्। **अभिश्यानं घृतमिति** ॥ अत्र द्रवमूर्तौ सम्प्रसारणविकल्पः। **अवश्यानः—अवशीनः वृश्चिक इति** ॥ अत्र द्रवमूर्तिस्पर्शाभावेऽपि सम्प्रसारणविकल्पः। समवश्यान इत्यत्रापि सम्प्रसारणविकल्पमाशङ्क्य आह। **व्यवस्थितेति** ॥ **अञ्चोऽनपादाने** ॥ **न त्वपादाने इति** ॥ अपादानसमभिव्याहारे असतीत्यर्थः। **यस्य विभाषा** ॥ **यस्येति** ॥ यस्मादित्यर्थः। **निष्ठाया इण्न स्यादिति** ॥ 'श्वीदितः' इत्यतो निष्ठायामिति 'नेड्वशि' इत्यतो नेडिति चानुवर्तत इति भावः। नन्वञ्चेर्नित्यं सेट्कत्वात् कथन्तस्य क्वचिद्वेट्कत्वमित्यत आह। **उदितो वेति** ॥

(सू ३३२८) इति क्त्वायां वेट्त्वादिह नेट्। समक्तः। 'अनपादाने' किम्। उदक्तमुदकं कूपात्। नत्वस्यासिद्धत्वात् 'व्रश्च—' (सू २९४) इति षत्वे प्राप्ते, 'निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः' (वा ४७७३)। वृक्णः। वृक्णवान्।

३०२६। परिस्कन्दः प्राच्यभरतेषु। (८-३-७५)

पूर्वेण मूर्धन्ये प्राप्ते तदभावो निपात्यते। परिस्कन्दः। 'प्राच्य—' इति किम्। परिष्कन्दः—परिस्कन्दः। 'परेश्च' (सू २३९९) इति षत्वविकल्पः। 'स्तन्भेः' (सू २२७२) इति षत्वे प्राप्ते।

३०२७। प्रतिस्तब्धनिस्तब्धौ च। (८-३-११४)

अत्र षत्वं न स्यात्।

३०२८। दिवोऽविजिगीषायाम्। (८-३-४९)

दिवो निष्ठातस्य नः स्यादविजिगीषायाम्। द्यूनः। विजिगीषायां तु, द्यूतम्।

३०२९। निर्वाणोऽवाते। (८-२-५०)

समक्त इति ॥ सङ्गत इत्यर्थः। सम्पूर्वात् अञ्चुधातोः क्तः 'आर्धधातुकस्येट्' इति प्राप्तस्य इटो निषेधः। 'अनिदिताम्' इति नलोपः। चस्य कुत्वम्। **उदक्तमुदकं कूपादिति** ॥ उद्धृतमित्यर्थः। अत्रापादानसमभिव्याहारसत्वात् नत्वन्नेति भावः। 'ओ व्रश्चू छेदने' सस्य श्चुत्वेन निर्देशः, अस्मात्क्तः, 'ग्रहिज्या' इति सम्प्रसारणम्, ऊदित्त्वेन वेट्कत्वादिह 'यस्य विभाषा' इति नेट्, चस्य कुत्वेन कः, 'ओदितश्च' इति निष्ठानत्वं, तस्यासिद्धत्वेन झलूपरत्वात् 'स्कोः' इति सलोपः, णत्वम्, वृक्ण इति रूपमिति स्थितिः। तत्र नत्वस्यासिद्धत्वेन झलूपरत्वात् 'व्रश्च' इति षत्वं स्यादित्यत आह। **निष्ठादेशषत्वेति** ॥ तथा च 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति षत्वे कर्तव्ये नत्वस्यासिद्धत्वाभावेन झलूपरकत्वाभावान्न षत्वमित्यर्थः। स्वरप्रत्ययेड्विधिषूदाहरणानि भाष्ये स्पष्टानि। **परिस्कन्दः प्राच्यभरतेषु** ॥ 'अपदान्तस्य मूर्धन्यः' इत्यधिकारे इदं सूत्रम्। **पूर्वेणेति** ॥ 'परेश्च' इति पूर्वसूत्रम्। परेः परस्य स्कन्देः सस्य षो वा स्यादिति तदर्थः। तेन षत्वविकल्पे प्राप्ते प्राच्यभरतेषु षत्वाभावो निपात्यत इत्यर्थः। **परिस्कन्द इति** ॥ परिपूर्वात् स्कन्देर्निष्ठायास्तकारलोपः। **दिवो** ॥ अविजिगीषायामिति छेदः। **द्यून इति** ॥ स्तुत इत्यर्थः। 'च्छ्वोः' इत्यूठ्। **विजिगीषायान्तु द्यूतमिति** ॥ द्यूतस्य विजिगीषया प्रवृत्तेरिति भावः। **निर्वाणोऽवाते** ॥ **कर्ता नेति** ॥ निरित्युपसर्गपूर्वो वाधातुर्विनाशे वर्तते, उपरमे च। तस्मिन् धात्वर्थे यदि वायुः कर्ता तदा नत्वन्नेत्यर्थः।

अवाते इति च्छेदः। निःपूर्वाद्वातेर्निष्ठातस्य नत्वं स्याद्वातश्चेत्कर्ता न। निर्वाणोऽग्निर्मुनिर्वा। वाते तु निर्वातो वातः।

३०३०। शुषः कः। (८-२-५१)

निष्ठात इत्येव। शुष्कः।

३०३१। पचो वः। (८-२-५२)

पक्वः।

३०३२। क्षायो मः। (८-२-५३)

क्षामः।

३०३३। स्त्यः प्रपूर्वस्य। (६-१-२३)

प्रात्स्त्यः सम्प्रसारणं स्यान्निष्ठायाम्।

३०३४। प्रस्त्योऽन्यतरस्याम्। (८-२-५४)

निष्ठातस्य मो वा स्यात्। प्रस्तीमः—प्रस्तीतः। 'प्रात्' किम्। स्त्यानः।

३०३५। अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः। (८-२-५५)

ञि फला, फुल्लः। निष्ठातस्य लत्वं निपात्यते। क्तवत्वेकदेशस्यापीदं निपातनमिष्यते। फुल्लवान्। क्षीबादिषु तु क्तप्रत्ययस्यैव तलोपः। तस्य

निर्वाणोऽग्निर्मुनिर्वेति ॥ नष्टः उपरतः इति क्रमेणार्थः। 'गत्यर्थाकर्मक' इत्यादिना कर्तरि क्तः। **निर्वातो वात इति** ॥ अत्र वातस्य कर्तृत्वान्नत्वनेति भावः। 'निर्वाणो दीपो वातेन' इत्यत्र तु वातस्य करणत्वेन विवक्षितत्वात्कर्तृत्वाभावात् नत्वनिर्वाह्यम्। भावे तु निर्वातं वातेन। **शुषः कः** ॥ **निष्ठात इति** ॥ शुषः परस्य निष्ठातस्य कः स्यादिति फलितम्। **पचो वः** ॥ पचेः परस्य निष्ठातस्य वः स्यादित्यर्थः। **पक्व इति** ॥ वत्वस्यासिद्धत्वात् कुत्वम्। **क्षायो मः** ॥ 'क्षै क्षये' इत्यस्मात् परस्य निष्ठातस्य मः स्यादित्यर्थः। **क्षाम इति** ॥ 'आदेचः' इत्यात्वम्। 'गत्यर्थाकर्मक' इति कर्तरि क्तः। क्षीण इत्यर्थः। अन्तर्भावितण्यर्थत्वे क्षपित इत्यर्थः। **स्त्यः प्रपूर्वस्य** ॥ स्त्यै इत्यस्य कृतात्वस्य स्त्य इति षष्ठ्यन्तम्। 'ष्यङस्सम्प्रसारणम्' इत्यतस्सम्प्रसारणमिति 'स्फायः स्फी' इत्यतो निष्ठायामिति चानुवर्तते। तदाह। **प्रादित्यादि** ॥ सम्प्रसारणे पूर्वरूपे 'हलः' इति दीर्घे प्रस्ती त इति स्थिते **प्रस्त्योऽन्यतरस्याम्** ॥ प्रस्त्य इति पञ्चमी। प्रपूर्वात्स्त्यैधातोरित्यर्थः। निष्ठातस्य म इति शेषः। **प्रस्तीम इति** ॥ सङ्घीभूत इत्यर्थः। **अनुपसर्गात्** ॥ एते निपात्यन्ते उपसर्गात् परा न चेदित्यर्थः। **लत्वमिति** ॥ 'आदितश्च' इति इडभावः, 'चरफलोश्च' इत्युत्तरञ्च सिद्धमिति भावः। 'फल निष्पत्तौ' इत्यस्य तु नात्र ग्रहणम्, इडभावस्यापि निपात्यत्वापत्तेः। ननु क्तवतुप्रत्यये फुल्लवानिति कथम्। क्तवतुप्रत्यये क्तस्यानर्थकत्वेन फुल्लशब्देनाग्रहणादित्यत आह।

सिद्धत्वात्प्राप्तस्येटोऽभावश्च निपात्यते । क्षीबो मत्तः । कृशस्तनुः । उल्लाघो नीरोगः । 'अनुपसर्गात्' किम् ।

३०३६ । आदितश्च । (७-२-१६)

आकारेतो निष्ठाया इण्न स्यात् ।

३०३७ । ति च । (७-४-८९)

चरफलोरत उत्स्यात्तादौ किति । प्रफुल्तः । प्रक्षीबितः । प्रकृशितः । प्रोल्लाघितः । कथं तर्हि 'लोध्रद्रुमं सानुमतः प्रफुल्लम्' इति । 'फुल्ल विकसने' पचाद्यच् । सूत्रं तु फुल्तादिनिवृत्त्यर्थम् । 'उत्फुल्लसम्फुल्लयोरुपसङ्ख्यानम्' (वा ४८४३) ।

३०३८ । नुदविदोन्दीत्राघ्राह्रीभ्योऽन्यतरस्याम् । (८-२-५६)

एभ्यो निष्ठातस्य नो वा । नुन्नः—नुत्तः । 'विद' विचारणे, रौधादिक एव गृह्यते । उन्दिना परेण साहचर्यात् । विन्नः—वित्तः । वेत्तेस्तु विदितः । विद्यतेर्विन्नः । उन्दी ।

क्तवत्वेकदेशस्यापीति ॥ क्षीबादिष्विति ॥ क्षीबकृशोल्लाघेष्वित्यर्थः । **क्तप्रत्ययस्यैवेति** ॥ ननु क्तवत्वेकदेशस्यापीत्यर्थः । अनर्थकत्वादिति भावः । **तस्येति** ॥ तलोपस्येत्यर्थः । **क्षीबो मत्त इति** ॥ क्षीबेः क्तः, तलोपः, इडभावश्च । **कृशस्तनुरिति** ॥ कृशेः क्तः, तलोपः, इडभावश्च । **उल्लाघो नीरोग इति** ॥ लाघेः क्तः, तलोपः, इडभावश्च । अत्र मत्तादिरेवार्थः निपातनबलात् । **अनुपसर्गात्किमिति** ॥ अत्र फुल्त इति प्रत्युदाहरणं विवक्षन् तत्र विशेषमाह । **आदितश्च** ॥ **निष्ठाया इण्न स्यादिति** ॥ 'श्वीदितः' इत्यतो निष्ठायामिति 'नेड्वशि' इत्यतो नेडिति चानुवर्तते इति भावः । **ति च** ॥ 'चरफलोश्च' इति सूत्रानुवृत्तिम्मत्वा आह । **चरफलोरिति** ॥ **अत उत्स्यादिति** ॥ 'उत्परस्यातः' इत्यतस्तदनुवृत्तेरिति भावः । **कितीति** ॥ "दीर्घ इणः किति' इत्यतः मण्डूकप्लुत्या तदनुवर्तते इति भावः । वस्तुतस्तु कितीत्यनुवृत्तिर्निर्मूला निष्फला च । तयोस्सेट्कत्वेन निष्ठां विना तकारादिप्रत्ययाभावात् । **कथन्तर्हीति** ॥ प्रफुल्लमित्यस्य सोपसर्गत्वेन निष्ठातस्य लत्वासम्भवादिति भावः । समाधत्ते । **फुल्लेति** ॥ ननु फुल्लेः पचाद्यचैव फुल्ल इत्यस्य सिद्धेः फुल्ल इत्यस्य निपातनं व्यर्थमित्यत आह । **सूत्रन्त्विति** ॥ **उत्फुल्लसम्फुल्लयोरिति** ॥ निष्ठातस्य लत्वनिपातनमिति शेषः । सोपसर्गार्थं वचनम् । **नुदविदोन्दी** ॥ ह्रीधातोरप्राप्ते इतरेभ्यो नित्यम्प्राप्ते नत्वविकल्पोऽयम् । **रौधादिक इति** ॥ 'विद विचारणे' इत्यर्थमित्यर्थः । **वेत्तेस्त्विति** ॥ 'विद ज्ञाने' इत्यस्येत्यर्थः । अयं सेट्, अनिट्केष्वनन्तर्भावात् । तदाह । **विदित इति** ॥ अत्र निष्ठातस्य इटा व्यवहितत्वान्नत्वनेति भावः । **विद्यतेर्विन्न इति** ॥ 'विद सत्तायाम्' इत्ययमनिट् 'रदाभ्याम्' इति नित्यन्नत्वमिति

३०३९। श्वीदितो निष्ठायाम्। (७-२-१४)

श्वयतेरीदितश्च निष्ठाया इण्न। उन्नः—उत्तः। त्राणः—त्रातः। घ्राणः—घ्रातः। ह्रीणः—ह्रीतः।

३०४०। न ध्याख्यापॄमूर्च्छिमदाम्। (८-२-५७)

एभ्यो निष्ठातस्य नत्वं न। ध्यातः। ख्यातः। पूर्तः। 'राल्लोपः'। मूर्तः। मत्तः।

३०४१। वित्तो भोगप्रत्यययोः। (४-२-५८)

विन्दतेर्निष्ठान्तस्य निपातोऽयं भोग्ये प्रतीते चार्थे। वित्तं धनम्। वित्तः पुरुषः। 'अनयोः' किम्, विन्नः। 'विभाषा गमहन—' (सू ३०९९) इति कसौ वेट्त्वादिह नेट्।

३०४२। भित्तं शकलम्। (८-२-५९)

भिन्नमन्यत्।

भावः। **उन्दीति** ॥ उदाहरणसूचनम्। **श्वीदितो निष्ठायाम्** ॥ श्वि, ईदित् अनयोस्समाहारद्वन्द्वात्पञ्चमी। 'नेड्वशि' इत्यतो नेडित्यनुवर्तते। तदाह। **श्वयतेरिति** ॥ **न ध्याख्या** ॥ पञ्चम्यर्थे षष्ठी। तदाह। **एभ्य इति** ॥ **ध्यात इति** ॥ ध्यैधातोः क्तः 'आदेचः' इत्यात्वम्। अत्र 'संयोगादेरातः' इति प्राप्तन्नत्वन्न। **ख्यात इति** ॥ ख्याआदेशपक्षे यण्वत्त्वात् 'संयोगादेरातः' इति प्राप्तन्नत्वन्न। ख्शादेशस्य शस्य यत्वे तु यस्य णत्वप्रकरणगतस्यासिद्धत्वाद्यण्वत्त्वाभावात् 'संयोगादेरातः' इति नत्वस्य न प्रसक्तिः। स्वतस्सिद्धख्याधातोस्तु आर्धधातुके प्रयोगो नास्त्येवेति ख्याग्रहणं व्यर्थमेव। **पूर्त इति** ॥ पॄधातोः क्तः 'श्रयुकः किति' इति नेट् 'उदोष्ठ्यपूर्वस्य' इति उत्त्वं, रपरत्वम्, इह 'रदाभ्याम्' इति प्राप्तन्नत्वन्न। मुर्छाधातोः क्त आह। **राल्लोप इति** ॥ छस्य लोप इति भावः। **मूर्त इति** ॥ 'आदितश्च' इति नेट्। छलोपे 'रदाभ्याम्' इति प्राप्तन्नत्वन्न। 'हलि च' इति दीर्घः। **मत्त इति** ॥ 'मदी हर्षग्लेपनयोः' आस्मात् क्तः 'श्वीदितः' इति नेट्। अत्र 'रदाभ्याम्' इति प्राप्तं नत्वन्न। **वित्तो भोग** ॥ भुज्यत इति भोगः भोग्यम्। प्रतीयते इति प्रत्ययः प्रख्यातः। अत्र विन्दतेरेव ग्रहणमिति भाष्ये स्पष्टम्। तदाह। **विन्दतेरिति** ॥ **निपातोऽयमिति** ॥ 'नुदविदोन्दी' इति प्राप्तस्य पाक्षिकनत्वस्य अभावनिपातनमित्यर्थः। तस्य भोगप्रत्यययोः कदाऽपि नत्वन्नेत्यर्थः। **प्रतीते इति** ॥ प्रख्याते इत्यर्थः। **वित्तः पुरुष इति** ॥ प्रख्यात इत्यर्थः। **विन्न इति** ॥ क्रुन्धश्चोरादिरित्यर्थः। अत्र 'यस्य विभाषा' इति इण्निषेधमुपपादयति। **विभाषा गमेति** ॥ एकाच इति निषेधाच्चेत्यपि बोध्यम्। **भित्तं शकलम्** ॥ शकले वाच्ये भिदेः क्तस्य नत्वाभावो निपात्यते।

३०४३ । ऋणमाधमर्ण्ये । (८-२-६०)

ऋधातोः क्ते तकारस्य नत्वं निपात्यते आधमर्ण्यव्यवहारे । ऋतमन्यत् ।

३०४४ । स्फायः स्फी निष्ठायाम् । (६-१-२२)

स्फीतः ।

३०४५ । इण्निष्ठायाम् । (७-२-४७)

निरः कुषो निष्ठाया इट् स्यात् । 'यस्य विभाषा' (सू ३०२५) इति निषेधे प्राप्ते पुनर्विधिः । निष्कुषितः ।

३०४६ । वसतिक्षुधोरिट् । (७-२-५२)

आभ्यां क्त्वानिष्ठयोर्नित्यमिट् स्यात् । उषितः । क्षुधितः ।

३०४७ । अञ्चेः पूजायाम् । (७-२-५३)

पूजार्थादञ्चेः क्त्वानिष्ठयोरिट् स्यात् । अञ्चितः । गतौ तु अक्तः ।

३०४८ । लुभो विमोहने । (७-२-५४)

शकलत्वजातिविशिष्ट अवयवार्थमनपेक्ष्य रूढोऽयम् । ततश्च भित्तशकलयोः पर्यायत्वान्न सहप्रयोगः । भिदिक्रियाविवक्षायान्तु भित्तं भिन्नमिति भवतीति भाष्ये स्पष्टम् । **ऋणमाधमर्ण्ये** ॥ अधमर्णस्य कर्म आधमर्ण्यम् । **आधमर्ण्यव्यवहारे इति** ॥ स च अन्यदीयं द्रव्यं गृहीतमियता कालेन इयत्या वृद्ध्या प्रतिदीयते इति संविद्रूपः, तस्मिन्विषये इत्यर्थः । **ऋतमन्यदिति** ॥ सत्यमित्यर्थः । **स्फायः स्फी** ॥ 'स्फायी वृद्धौ' अस्य स्फीभावः स्यात् निष्ठायाम्परत इत्यर्थः । **इण्निष्ठायाम्** ॥ 'निरः कुषः' इति सूत्रमनुवर्तते । तदाह । **निर इति** ॥ ननु 'आर्द्धधातुकस्येट्' इत्येव सिद्धे किमर्थमिदं सूत्रमित्यत आह । **यस्येति** ॥ कुषधातोः तृजादौ 'निरः कुषः' इति पूर्वसूत्रेण वेट्कत्वात् 'यस्य विभाषा' इति प्राप्तस्येण्निषेधस्य बाधनार्थम्पुनरिह विधानमित्यर्थः । इडित्यनुवर्तमाने पुनरिड्ग्रहणन्तु 'स्वरातिसूति' इत्यतो वाग्रहणानुवृत्तिनिवृत्तये । **वसतिक्षुधोरिट्** ॥ पञ्चम्यर्थे षष्ठी । **क्त्वानिष्ठयोरिति** ॥ 'क्लिशः क्त्वानिष्ठयोः' इत्यतः तदनुवृत्तेरिति भावः । **नित्यमिति** ॥ इडित्यनुवर्तमाने पुनरिड्ग्रहणस्य 'स्वरातिसूति' इत्यतो वाग्रहणानुवृत्तिनिवृत्त्यर्थत्वादिति भावः । 'एकाच उपदेशे' इति इण्निषेधबाधनार्थमिदं सूत्रम् । **उषित इति** ॥ यजादित्वात् सम्प्रसारणम्, 'शासिवसिघसीनाञ्च' इति षः । **अञ्चेः पूजायाम्** ॥ 'उदितो वा' इति क्त्वायां विकल्पे प्राप्ते निष्ठायान्तु 'यस्य विभाषा' इति नेषधे प्राप्ते वचनम् । **अञ्चित इति** ॥ 'नाञ्चेः पूजायाम्' इति नलोपनिषेधः । **लुभो विमोहने** ॥ लुभ इति पञ्चमी । 'लुभ विमोहने' तुदादिः । विमोहनं व्याकुलीकरणमिति वृत्तिः । 'लुभ गार्ध्ये' दिवादिः । अत्र तौदादिकस्यैव ग्रहणम्,

लुभः क्त्वानिष्ठयोर्नित्यमिट् स्यान्न तु गार्ध्ये। लुभितः। गार्ध्ये तु, लुब्धः।

३०४९। क्लिशः क्त्वानिष्ठयोः। (७-२-५०)

इड्वा स्यात्। 'क्लिश उपतापे' (अस्य) नित्यं प्राप्ते 'क्लिशू विबाधने' अस्य क्त्वायां विकल्पे सिद्धेऽपि निष्ठायां निषेधे प्राप्ते विकल्पः। क्लिशितः-क्लिष्टः।

३०५०। पूङश्च। (७-२-५१)

पूङः क्त्वानिष्ठयोरिड्वा स्यात्।

३०५१। पूङः क्त्वा च। (१-२-२२)

पूङः क्त्वा निष्ठा च सेट् किन्न स्यात्। पवितः-पूतः। क्त्वाग्रहणमुत्तरार्थम्। 'नोपधात्—' (सू ३३२४) इत्यत्र हि क्त्वैव सम्बध्यते।

३०५२। निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः। (१-२-२९)

एभ्यः सेण्निष्ठा किन्न स्यात्। शयितः-शयितवान्। अनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थः। शेश्रियतः-शेश्रियतवान्। 'आदिकर्मणि निष्ठा वक्तव्या' (वा २०५१)।

तस्यैव विमोहनार्थकत्वात्। ननु दैवादिकस्य, तस्य गार्ध्यार्थकत्वात्। तदाह। **न तु गार्ध्ये इति**॥ 'तीषसह' इति क्त्वायां विकल्पे प्राप्ते निष्ठायान्तु 'यस्य विभाषा' इति निषेधे प्राप्ते वचनम्। **लुभित इति**॥ विमोहित इत्यर्थः। **गार्ध्ये तु लुब्ध इति**॥ अभिकाङ्क्षावानित्यर्थः। 'मतिबुद्धिपूजार्थेभ्यश्च' इति कर्तरि क्तः। **क्लिशः क्त्वानिष्ठयोः**॥ इड्वा स्यादिति शेषः। 'स्वरतिसूति' इत्यतो वेत्यनुवृत्तेरिति भावः। **नित्यं प्राप्ते इति**॥ 'आर्धधातुकस्येड्वलादेः' इत्यनेनेति भावः। **विकल्पे सिद्धे इति**॥ ऊदित्त्वादिति भावः। **निष्ठायान्निषेधे प्राप्ते इति**॥ 'यस्य विभाषा' इत्यनेनेति भावः। **पूङश्च**॥ **क्त्वानिष्ठयोरिति**॥ 'क्लिशः क्त्वानिष्ठयोः' इत्यतस्तदनुवृत्तेरिति भावः। **इड्वेति**॥ 'स्वरतिसूति' इत्यतः वाग्रहणस्य 'इण्निष्ठायाम्' इत्यतः इट् इत्यस्यचानुवृत्तेरिति भावः। 'श्रयुकः' इति निषेधे प्राप्ते विकल्पोऽयम्। **पूङः क्त्वा च**॥ 'न क्त्वा सेट्' इत्यतो न सेट् इत्यनुवर्तते। 'असंयोगात्' इत्यतः किदिति 'निष्ठा शीङ्' इत्यतो निष्ठेति च। तदाह। **पूङः क्त्वा निष्ठाचेत्यादि**॥ ननु 'न क्त्वा सेट्' इत्येव सिद्धे किमर्थमिह क्त्वाग्रहणमित्यत आह। **क्त्वाग्रहणमुत्तरार्थमिति**॥ तदेवोपपादयति। **नोपधादित्यत्रेति**॥ तत्र हि क्त्वाप्रत्ययस्यैवानुवृत्तिरिष्टा 'पूङश्च' इत्येवोक्तौ तु 'निष्ठाशीङ्' इत्यतो निष्ठाग्रहणमेवानुवर्तेतेति भावः। **निष्ठा शीङ्**॥ 'न क्त्वा सेट्' इत्यतः न सेडित्यनुवर्तते। 'असंयोगात्' इत्यतः किदिति च। तदाह। **एभ्यस्सेडिति**॥ शीङिति ङकारस्य फलमाह। **अनुबन्धेति**॥ यङ्लुकि "रितपा शपा" इति निषेधार्थ इत्यर्थः। **शेश्रियतवानिति**॥ अत्र कित्त्वनिषेधाभावात् कित्त्वान्न गुण इति भावः। **आदिकर्मणि निष्ठा वक्तव्येति**॥

३०५३ । आदिकर्मणि क्तः कर्तरि च । (३-४-७१)

आदिकर्मणि यः क्तः स कर्तरि स्यात् । चाद्भावकर्मणोः ।

३०५४ । विभाषा भावादिकर्मणोः । (७-२-१७)

भावे आदिकर्मणि च अदितो निष्ठाया इड्वा स्यात् । प्रस्वेदितश्चैत्रः । प्रस्वेदितं तेन । 'ञि ष्विदा' इति भ्वादिरत्र गृह्यते, ञीद्भिः साहचर्यात् । स्विद्यतेस्तु स्विदितः इत्येव । 'ञि मिदा' 'ञि क्ष्विदा' दिवादी भ्वादी च । प्रमेदितः—प्रमेदितवान् । प्रक्ष्वेदितः—प्रक्ष्वेदितवान् । प्रधर्षितः—प्रधर्षितवान् । धर्षितं तेन । 'सेट्' किम् । प्रस्विन्नः । प्रस्विन्नं तेनेत्यादि ।

३०५५ । मृषस्तितिक्षायाम् । (१-२-२०)

सेण्निष्ठा किन्न स्यात् । मर्षितः—मर्षितवान् । 'तितिक्षायां' किम् । अपमृषितं वाक्यम् । अविस्पष्टमित्यर्थः ।

३०५६ । उदुपधाद्भावादिकर्मणोरन्यतरस्याम् । (१-२-२१)

उदुपधात्परा भावादिकर्मणोः सेण्निष्ठा वा किन्न स्यात् । द्युतितम्—द्योतितम् । मुदितं—मोदितं साधुना । प्रद्युतितः—प्रद्योतितः साधुः । प्रमुदितः—

दीर्घकालव्यासक्तायाः कटाद्युत्पादनक्रियायाः आरम्भकालविशिष्टोंशः आदिकर्म । तत्र विद्यमानाद्धातोर्निष्ठा वक्तव्येत्यर्थः । तत्र आद्येषु क्रियाक्षणेषु भूतेष्वपि क्रियाया भूतत्वाभावात् भूते विहिता निष्ठा न प्राप्तेत्यारम्भः । **आदिकर्मणि क्तः कर्तरि च ॥ चाद्भावकर्मणोरिति ॥** 'तयोरेव कृत्य' इत्यतस्तदनुवृत्तेरिति भावः । "प्रकृतः कटं देवदत्तः, प्रकृतवान् कटं देवदत्तः" इति भाष्ये उदाहृतम् । आरभ्यमाणकरणक्रियेति बोधः । **विभाषा भावादिकर्मणोः ॥ आदितो निष्ठाया इड्वेति ॥** 'आदितश्च' इत्यतः आदित इति 'श्वीदितः' इत्यतः निष्ठाग्रहणं 'नेड्वशि' इत्यतो नेति चानुवर्तत इति भावः । निषेधस्य वैकल्पिकत्वात्पक्षे इडभ्यनुज्ञायते । **प्रस्वेदितश्चैत्र इति ॥** चैत्रकर्तृका आरभ्यमाणप्रस्वेदनक्रियेत्यर्थः । **ञीद्भिरिति ॥** ञिः इत् येषान्ते ञीतः, तैर्मिदिप्रभृतिभिरिति तदर्थः । स विषयः कित्त्वप्रतिषेधस्येति बोध्यम् । **स्विद्यतेस्त्विति ॥** 'ञि ष्विदा गात्रप्रक्षरणे' इति दैवादिकस्यैव कित्त्वनिषेधविधौ ग्रहणमित्यर्थः । **स्विदितः इति ॥** 'विभाषा भाव' इति पक्षे इट् । कित्त्वनिषेधविधौ स्विद्यतेर्ग्रहणाभावात् कित्त्वान्न गुणः । अत्र स्विदादीनाम् 'आदितश्च' इति इट् प्रतिषिध्यते । भावादिकर्मणोस्तु पक्षे इट् । **मृषस्तितिक्षायाम् ॥** तितिक्षा क्षमा । **सेण्निष्ठा किन्नेति ॥** शेषपूरणमिदम् । 'निष्ठा शीङ्' इत्यतो निष्ठेति 'न क्ता सेट्' इत्यतस्सेण्नेति 'असंयोगात्' इत्यतः किदिति चानुवर्तत इति भावः । **उदुपधाद्भावादिकर्मणोः ॥** भावे उदाहरति । **मुदितमित्यादि ॥** आदिकर्मण्युदाहरति । **प्रद्युतितः—प्रद्योतितः साधुरिति ॥**

प्रमोदितः साधुः। 'उदुपधात्' किम्। विदितम्। 'भाव–' इत्यादि किम्। रुचितं कार्षापणम्। 'सेट्' किम्। क्रुष्टम्। 'शब्विकरणेभ्य एवेष्यते' (वा ६२६)। नेह। गुध्यतेर्गुधितम्।

३०५७। निष्ठायां सेटि। (६-४-५२)

णेर्लोपः स्यात्। भावितः–भावितवान्। 'श्वीदितः–' (३०३९) इति नेट्। सम्प्रसारणम्। शूनः। दीप्तः। गुहू, गूढः। वनु, वतः। तनु, ततः। पतेः सनि वेट्कत्वादिडभावे प्राप्ते 'द्वितीया श्रित–' (सू ६८६) इति सूत्रे निपातनादिट्। पतितः। 'सेऽसिचि' (२५०६) इति वेट्कत्वात्सिद्धे कृन्त-

---

आदिकर्मणि कर्तरि क्तः। **उदुपधात्किम्**। **विदितमिति** ॥ 'विद ज्ञाने' इति वेत्तेः रूपम्। **गुध्यतेर्गुधितमिति** ॥ 'गुध परिवेष्टने' दिवादिस्सेट्कः। **निष्ठायां सेटि** ॥ **णेर्लोपः स्यादिति** ॥ शेषपूरणमिदम्। 'णेरनिटि' इत्यतो णेरिति 'आतो लोपः' इत्यस्माल्लोप इति चानुवर्तते इति भावः। अनिटीति निषेधादप्राप्ते आरम्भः। 'टु ओ श्वि गतिवृद्ध्योः' अस्मात् क्ते आह। **श्वीदित इति नेडिति** ॥ **सम्प्रसारणमिति** ॥ यजादित्वादिति भावः। सम्प्रसारणे सति पूर्वरूपे 'हलः' इति दीर्घे 'ओदितश्च' इति निष्ठानत्वे रूपमाह। **शून इति** ॥ यद्यपि मूले 'ओदितश्च' इत्यत्र उच्छून इत्युदाहृतमेव, तथापि विशेषविवक्षया पुनरिहोपन्यासः। अत्र अल्विधित्वेऽपि हल इत्यारम्भसामर्थ्यादेव पूर्वरूपस्य सम्प्रसारणत्वम्। न च नित्यत्वात्सम्प्रसारणपूर्वरूपयोः 'श्रयुकः किति' इत्येव निषेधसिद्धेः श्विग्रहणं व्यर्थमिति वाच्यम्। 'श्रयुकः किति' इत्यत्र 'एकाच उपदेशे' इत्यतः उपदेशे इत्यनुवृत्तेः। तथाच उपदेशे उगन्तत्वाभावात् निषेधाप्राप्तौ श्विग्रहणम्। अत एव स्तीर्त्वेत्यादौ उपदेशे उगन्तत्वमादाय इण्निषेधसिद्धिरित्यलम्। ईदित उदाहरति। **दीप्त इति** ॥ 'दीपी दीप्तौ' दिवादिः। ईदित्त्वान्नेट्। **गूढ इति** ॥ ऊदित्त्वेन वेट्कत्वात् 'यस्य विभाषा' इति नेट्। ढत्वधत्वष्टुत्वढलोपदीर्घाः **वनु, वतः। तनु, ततः इति** ॥ 'उदितो वा' इति क्त्वायां वेट्कत्वात् 'यस्य विभाषा' इति नेट्। 'अनुदात्तोपदेश' इति नकारलोपः। **पतेस्सनीति** ॥ 'पत्लृ गतौ' अस्य 'तनिपतिदरिद्राणामुपसङ्ख्यानम्' इति सनि वेट्कत्वात् 'यस्य विभाषा' इति निष्ठायामिण्निषेधे प्राप्ते इत्यर्थः। पतितशब्दे इटं साधयितुं युक्त्यन्तरमाह। **सेऽसिचीति** ॥ 'कृती छेदने' 'चृती हिंसाग्रन्थनयोः' 'नृती गात्रविक्षेपे' एषामीदित्त्वं 'श्वीदितः' इति इण्निषेधार्थमिति वक्तव्यम्। तत्तु न सम्भवति। एषां 'सेऽसिचिकृतचृतछृदतृदनृतः' इति सकारादौ वेट्कतया 'यस्य विभाषा' इत्येव निष्ठायां नित्यमिण्निषेधसिद्धेः। ततश्च एषामीदित्करणात् 'यस्य विभाषा' इति इण्निषेधस्य अनित्यत्वं विज्ञायते। एवञ्च कृतादीनां 'यस्य विभाषा' इति इण्निषेधस्य अभावसम्भावनायां 'श्वीदितः' इति इण्निषेधार्थमीदित्त्वमर्थवत्। तथा च पतितशब्दे 'यस्य विभाषा' इत्यनित्यत्वान्न भवतीत्यर्थः। **तेनेति** ॥ 'यस्य विभाषा'

त्यादीनामीदित्त्वेनानित्यत्वज्ञापनाद्वा । तेन 'धावितमिभराजाधिया' इत्यादि । 'यस्य विभाषा' (सू ३०२५) इत्यत्रैकाच इत्येव । दरिद्रितः ।

३०५८ । क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु । (७-२-१८)

क्षुब्धादीन्यष्टावनिट्कानि निपात्यन्ते समुदायेन मन्थादिषु वाच्येषु । द्रवद्रव्यसंपृक्ताः सक्तवो मन्थः, मन्थनदण्डश्च । क्षुब्धो मन्थश्चेत् । स्वान्तं मनः । ध्वान्तं तमः । लग्नं सक्तम् । निष्ठानत्वमपि निपातनात् । म्लिष्टमविस्पष्टम् । विरिब्धः स्वरः । 'म्लेच्छ' 'रेभृ' अनयोरुपधाया इत्त्वमपि निपात्यते । फाण्टम् अनायाससाध्यः कषायविशेषः । माधवस्तु नवनीतभावात्प्रागवस्थापन्नं द्रव्यं फाण्टमिति वेदभाष्ये आह । बाढं भृशम् । अन्यत्र तु

इत्यनित्यत्वज्ञापनेनेत्यर्थः । **धावितमिति** ॥ 'स्वरतिसूति' इति धूञो वेट्कत्वेऽपि 'यस्य विभाषा' इति इण्निषेधो नेति भावः । ननु दरिद्राधातोः 'तनिपतिदरिद्राणामुपसङ्ख्यानम्' इति सनि वेट्कत्वात् 'यस्य विभाषा' इति निष्ठायामिण्निषेधस्स्यादित्यत आह । **यस्य विभाषेत्यत्रेति** ॥ **क्षुब्धस्वान्त** ॥ क्षुब्ध, स्वान्त, ध्वान्त, लग्न, म्लिष्ट, विरिब्ध, फाण्ट, बाढ, एषामष्टानां द्वन्द्वात्प्रथमाबहुवचनम् । मन्थ, मनः, तमः, सक्त, अविस्पष्ट, स्वर, अनायास, भृश, एषामष्टानां द्वन्द्वात्सप्तमी । यथासङ्ख्यमन्वयः । **समुदायेनेति** ॥ मन्थादिष्वेते रूढाः । अवयवार्थाभिनिवेशो न कर्तव्य इत्याह । **द्रवद्रव्येति** ॥ अत्र याज्ञिकप्रसिद्धिरेव शरणीकर्तव्या । **मन्थनदण्डश्चेति** ॥ "वैशाखमन्थमन्थानमन्थानो मन्थदण्डके" इत्यमरः । **क्षुब्ध इति** ॥ 'क्षुभ सञ्चलने' अस्मात् क्तः, इडभावो निपात्यते । 'झषस्तथोः' इति धः, जश्त्वम् । **स्वान्तमिति** ॥ स्वनधातोः क्तः । 'अनुनासिकस्य क्वि' इति दीर्घः, निपातनान्नेट् । "स्वान्तं हृन्मानसं मनः" इत्यमरः । **ध्वान्तं तम इति** ॥ ध्वनेः क्तः । 'अनुनासिकस्य क्वि' इति दीर्घः । "अन्धकारोऽस्त्रियां ध्वान्तन्तमिस्रं तिमिरं तमः" इत्यमरः । **लग्नं सक्तमिति** ॥ सम्बद्धमित्यर्थः । लगेः क्तः, इडभावः । तत्र रदाभ्यां परत्वाभावात् कथं निष्ठानत्वमित्यत आह । **निष्ठानत्वमपि निपातनादिति** ॥ **म्लिष्टमविस्पष्टमिति** ॥ इडभावे 'व्रश्च' इति षः । तकारस्य ष्टुत्वेन टः । "अथ म्लिष्टमविस्पष्टम्" इत्यमरः । **विरिब्धः स्वर इति** ॥ स्वरविशेषे इत्यर्थः । 'रेभृ शब्दे' अस्मात् क्तः, इडभावे 'झषस्तथोर्धः' इति धः । उभयत्र धातुस्वरूपं प्रदर्शयन् आह । **म्लेच्छ रेभृ अनयोरिति** ॥ **इत्त्वमपीति** ॥ इडभावश्चेत्यर्थः । **फाण्टमिति** ॥ फणेः क्तः, इडभावः, निष्ठातस्य टत्वञ्च निपात्यते । तस्यासिद्धत्वात् 'अनुनासिकस्य' इति दीर्घः । "अनायासकृतं फाण्टम्" इत्यमरः । वृत्तिकृन्मतमाह । **कषायविशेष इति** ॥ "यदभ्यूतमपिष्टं च कषायमुदकसंसर्गमात्राद्विभक्तरसभीषदुष्णन्तत्फाण्टमित्युच्यते" इति वृत्तौ स्थितम् । **वेदभाष्ये आहेति** ॥ "तद्वै नवनीतम्भवति घृतं वै

क्षुभितम्। 'क्षुब्धो राजा' इति त्वागमशास्त्रस्यानित्यत्वात्। स्वनितम्। ध्वनितम्। लगितम्। म्लेच्छितम्। विरेभितम्। फणितम्। बाहितम्।

३०५९। धृषिशसी वैयात्ये। (७-२-१९)

एतौ निष्ठायामविनय एवानिटौ स्तः। धृष्टः। विशस्तः। अन्यत्र धर्षितः। विशसितः। भावादिकर्मणोस्तु वैयात्ये धृषिर्नास्ति। अत एव नियमार्थमिदं सूत्रमिति वृत्तिः। धृषेरादित्त्वे फलं चिन्त्यमिति हरदत्तः। माधवस्तु भावादिकर्मणोरवैयात्ये विकल्पमाह। धृष्टम्—धर्षितम्। प्रधृष्टः—प्रधर्षितः।

३०६०। दृढः स्थूलबलयोः। (७-२-२०)

देवानाम्फाण्टम्मनुष्याणाम्" इति शतपथब्राह्मणव्याख्यावसरे आहेत्यर्थः। **बाढम्भृशमिति॥** 'बाह् प्रयत्ने' अस्मात् क्तः, इडभावः, ढत्वधत्वष्टुत्वढलोपाः। **अन्यत्र त्विति॥** मन्थादेर्वाच्यत्वाभाव इत्यर्थः। **धृषिशसी॥** वियातः अविनीतः, तस्य भावः वैयात्यम्। तत्र 'ञि धृषा प्रागल्भ्ये' इत्यस्य आदित्त्वादेवेण्निषेधस्सिद्धः। 'शसु हिंसायाम्' इत्यस्य तु 'उदितो वा' इति क्त्वायां वेट्कत्वात् 'यस्य विभाषा' इति इण्निषेधस्सिद्धः। अतो नियमार्थमित्याह। **अविनय एवेति॥ धृष्टः विशस्त इति॥** अविनीत इत्यर्थः। **अन्यत्रेति॥** वैयात्याभावे इत्यर्थः। **धर्षित इति॥** बलात्कृत इत्यर्थः। **विशसित इति॥** हिंसित इत्यर्थः। अत्र वैयात्याभावादिण्निषेधो नेति भावः। ननु धृषेरादित्त्वात् 'विभाषा भावादिकर्मणोः' इति भावे आदिकर्मणि च इड्विकल्पे प्राप्ते तदंशे नित्यार्थोऽत्र विधिरस्तु। ततश्च भावादिकर्मभ्यामन्यत्र वैयात्याभावेऽपि 'आदितश्च' इति इण्निषेध एव स्यादित्यत आह। **भावादिकर्मणोस्त्विति॥ नास्तीति॥** अनभिधानादिति भावः। तत्र बृद्धसम्मतिमाह। **अत एवेति॥** भावकर्मणोर्धृषेरनभिधानादेवेत्यर्थः। अन्यथा धृषेरादित्त्वात् 'विभाषा भावादिकर्मणोः' इति भावे आदिकर्मणि च इड्विकल्पे प्राप्ते तदंशे नित्यार्थतया विधानार्थत्वापत्तेरिति भावः। **चिन्त्यमिति॥** धृषेरादित्त्वं हि न वैयात्ये आदित्वलक्षणेण्निषेधार्थम्, 'धृषिशसी वैयात्ये' इत्येव सिद्धेः। नापि वैयात्यादन्यत्र आदित्त्वलक्षणेण्निषेधार्थम्, धृषेर्वैयात्य एव इण्निषेध नियमेन ततोऽन्यत्र आदित्त्वलक्षणनिषेधाभावात्। नापि धृषेर्वैयात्ये भावादिकर्मणोर्विषये 'विभाषा भावादिकर्मणोः' इति इड्विकल्पार्थम्, भावादिकर्मणोर्वैयात्ये धृषेरनभिधानात्। तस्माद्धृषेरादित्त्वं व्यर्थमिति हरदत्त आहेत्यर्थः। **माधवस्त्विति॥** अवैयात्ये भावादिकर्मणोरनभिधाने प्रमाणाभावादिति भावः। तत्र अवैयात्ये भावे उदाहरति। **धृष्टम्-धर्षितमिति॥** आदिकर्मण्युदाहरति। **प्रधृष्टः-प्रधर्षित इति॥ दृढः स्थूलबलयोः॥** बलशब्दः अर्शआद्यजन्तः बलवत्परः। तदाह। **बलवति चेति॥ तस्येति॥**

स्थूले बलवति च निपात्यते । 'दह दहि वृद्धौ' । क्तस्येडभावः, तस्य ढत्वम्, हस्य लोपः, इदितो नलोपश्च । दृहितो—दृंहितोऽन्यः ।

३०६१ । प्रभौ परिबृढः । (७-२-२१)

'बृह बृहि वृद्धौ' । निपातनं प्राग्वत् । परिबृहितः—परिबृंहितोऽन्यः ।

३०६२ । कृच्छ्रगहनयोः कषः । (७-२-२२)

कषो निष्ठाया इण्न स्यादेतयोरर्थयोः । कष्टं दुःखं तत्कारणं च । 'स्यात्कष्टं कृच्छ्रमाभीलम्' । कष्टो मोहः । कष्टं शास्त्रम् । दुरवगाहमित्यर्थः । कषितमन्यत् ।

३०६३ । घुषिरविशब्दने । (७-२-२३)

घुषिर्निष्ठायामनिट् स्यात् । घुष्टा रज्जुः । 'अविशब्दने' किम् । घुषितं वाक्यम् । शब्देन प्रकटीकृताभिप्रायमित्यर्थः ।

३०६४ । अर्देः सन्निविभ्यः । (७-२-२४)

एतत्पूर्वादर्देर्निष्ठाया इण्न स्यात् । समर्णः । न्यर्णः । व्यर्णः । अर्दितोऽन्यः ।

३०६५ । अभेश्चाविदूर्ये । (७-२-२५)

अभ्यर्णम् । नातिदूरमासन्नं वा । अभ्यर्दितमन्यत् ।

निष्ठातकारस्य ढत्वान्निपात्यते इत्यर्थः । **हस्य लोप इति** ॥ निपात्यते इति शेषः । **इदित इति** ॥ अनिदितस्तु नलोपसिद्ध एवेति भावः । ननु हस्य ढत्वे कृते 'झषस्तथोर्धोऽधः' इति तकारस्य धत्वे तस्य ष्टुत्वेन ढत्वे 'ढो ढे' इति ढलोपे दढ इति सिद्धम् । ततश्च इडभाव एव निपात्यताम्, न तु हकारलोपो ढत्वञ्चेति चेत् । मैवम् । तथाहि सति द्रढीयानित्यादौ ढलोपस्यासिद्धत्वेन ऋकारस्य संयोगपरतया लघुत्वाभावात् 'र ऋतो हलादेर्लघोः' इति रभावो न स्यात् । अत्र हकारलोपस्य ढत्वस्य च निपातने तु ऋकारस्य न संयोगपरकत्वम् । अस्य हलोपस्य साप्तमिकत्वेन असिद्धत्वाभावात् इति भाष्ये स्पष्टम् । **प्रभौ परिबृढः** ॥ **प्राग्वदिति** ॥ तकारढत्वस्य हलोपस्य चेत्यर्थः । **कृच्छ्रगहनयोः** ॥ कृच्छ्रशब्दो दुःखे तत्कारणे च वर्तते । **कष्टं दुःखं तत्कारणञ्चेति** ॥ "स्यात्कष्टङ्कृच्छ्रमाभीलम्" इत्यमरकोशवाक्यम् । दुःखकारणे उदाहरति । **कष्टो मोह इति** ॥ गहने उदाहरति । **कष्टं शास्त्रमिति** ॥ गहनशब्दं विवृणोति । **दुरवगाहमिति** ॥ **घुषिरविशब्दने** ॥ **घुष्टा रज्जुरिति** ॥ उत्पादितेत्यर्थः । आयामितेति वा । शब्देन अभिप्रायप्रकाशनं विशब्दनम् । तदाह । **शब्देनेति** ॥ **अर्देः सन्निविभ्यः** ॥ **समर्ण इति** ॥ सम् अर्द् त इति स्थिते 'रदाभ्याम्' इति निष्ठातस्य पूर्वदकारस्य च नत्वम्, णत्वम् । **अभेश्चाविदूर्ये** ॥ अविदूरस्य भावः आविदूर्यम् । तस्मिन्

३०६६। णेरध्ययने वृत्तम्। (७-२-२६)

ण्यन्ताद्धृतेः क्तस्येडभावो णिलुक्चाधीयमानेऽर्थे। वृत्तं छन्दः, छात्रेण सम्पादितम्, अधीतमिति यावत्। अन्यत्र तु वर्तिता रज्जुः।

३०६७। शृतं पाके। (६-१-२७)

श्रातिश्रपयत्योः क्ते शृभावो निपात्यते क्षीरहविषोः पाके। शृतं क्षीरं स्वयमेव विक्लित्तं पक्वं वेत्यर्थः। क्षीरहविर्भ्यामन्यत्तु श्राणं—श्रपितं वा।

३७६८। वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः। (७-२-२७)

एते णिचि निष्ठान्ता वा निपात्यन्ते। पक्षे, दमितः। शमितः। पूरितः। दासितः। स्पाशितः। छादितः। ज्ञापितः।

गम्ये अभेः परः अर्दिरनिट्क इत्यर्थः। सामीप्य इत्येव तु नोक्तम्। अनतिदूरस्य असङ्ग्रहापत्तेः। तत्सूचयन्नाह। **नातिदूरमिति॥ णेरध्ययने॥ णिलुक् चेति॥** णिलोपे तु लघूपधगुणः स्यादिति भावः। **अधीयमान इति॥** सूत्रे अध्ययनशब्दः कर्मणि ल्युडन्तः इति भावः। **शृतम्पाके॥** 'श्रा पाके' घटादिः। तस्माद्धेतुमण्णिचि पुकि मित्त्वाद्ध्रस्वे श्रपि इति भवतीति स्थितिः। **श्रातिश्रपयत्योरिति॥** अण्यन्तस्य ण्यन्तस्य च श्राधातोरित्यर्थः। **क्षीरहविषोरिति॥** एतच्च वार्तिकाल्लभ्यते। अण्यन्तं व्याचष्टे। **स्वयमेव विक्लित्तमिति॥** श्राधातुरण्यन्तः पाके वर्तते। पाकश्चात्र विक्लित्तिरेव विवक्षिता। न तु तदनुकूलव्यापारोऽपि। तथाच श्राधातोर्विक्लित्तावकर्मकत्वात् 'गत्यर्थाकर्मक' इति कर्तरि क्तः। तथाच क्षीरं विक्लित्त्याश्रयमिति फलितम्। ततो णिचि विक्लित्त्यनुकूलव्यापारार्थकपाचिना समानार्थकात् श्रपि इत्यस्मात् कर्मणि क्तप्रत्यये फलितमाह। **पक्वमिति॥** एतच्च भाष्यकैयटयोः स्पष्टम्। "क्षीराज्यहविषां शृतम्" इत्यमरस्य तु प्रमाद एव, 'क्षीरहविषोः' इति वार्तिकविरोधात्। **वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः॥** 'णेरध्ययने वृत्तम्' इत्यतो णेरित्यनुवर्तते। 'दमु शमु उपशमे' ण्यन्ताभ्यामिडभावो निपात्यते। 'अनुनासिकस्य' इति दीर्घः। णिलोपस्तु न स्थानिवत्। निपातनाद्दीर्घविधौ तन्निषेधाच्च। दान्तः, शान्तः। 'पूरी आप्यायने' ण्यन्तात् क्तः, इडभावो निपात्यते, णिलोपः। रात्परत्वान्नत्वम्, णत्वम्, पूर्णः। एतेन 'न ध्याख्यापूर्मूर्च्छि' इत्येव सिद्धे पूर्णग्रहणं व्यर्थमित्यपास्तम्, पूरीधातोर्ण्यन्तात् पूर्णरूपार्थत्वात्। 'दसु उपक्षये' ण्यन्तात् इडभावो निपात्यते, उपधावृद्ध्यभावश्च। णिलोपः। 'स्पश बाधने' ण्यन्तात् क्तः, इडभावो निपात्यते उपधावृद्ध्यभावश्च, णिलोपः। स्पष्टम्। 'छद अपवारणे' ण्यन्तात् क्तः। इडभावो वृद्ध्यभावश्च निपात्यते। णिलोपः, 'रदाभ्याम्' इति नत्वम्, छन्नः। 'ज्ञप मिच' इति चुरादिण्यन्तात् क्तः। "इडभावो वृध्यभावो णिलोपः" इति कैयटः, ज्ञप्तः। **पक्ष इति॥** निपातनाभावपक्ष इत्यर्थः। **दमितः, शमित इति॥** अमन्तत्वेन मित्त्वाद्ध्रस्वः।

३०६९ । रुष्यमत्वरसङ्घुषास्वनाम् । (७-२-२८)

एभ्यो निष्ठाया इड्वा स्यात् । रुष्टः—रुषितः । आन्तः—अमितः । तूर्णः—त्वरितः । अस्यादित्त्वे फलं मन्दम् । सङ्घुष्टः—सङ्घुषितः । आस्वान्तः—आस्वनितः ।

३०७० । हृषेर्लोमसु । (७-२-२९)

हृषेर्निष्ठाया इड्वा स्यात् लोमसु विषये । हृष्टं—हृषितं लोम । 'विस्मित-प्रतिघातयोश्च' (वा ४४१७) । हृष्टो—हृषितो मैत्रः । विस्मितः, प्रतिहतो वेत्यर्थः । अन्यत्र तु, 'हृषु अलीके' उदित्त्वान्निष्ठायां नेट् । 'हृष तुष्टौ' इट् ।

३०७१ । अपचितश्च । (७-२-३०)

चायेर्निपातोऽयं वा । अपचितः—अपचायितः ।

ज्ञापित इति ॥ अचौरादिकस्य रूपम् । चौरादिकस्य तु ज्ञपित इत्येव । **रुष्यमत्वर** ॥ रुषि, अम, त्वर, संघुष्, आस्वन्, एषान्द्वन्द्वः । णेरिति निवृत्तम् । पञ्चम्यर्थे षष्ठी । तदाह । **एभ्य इति** ॥ **वा स्यादिति** ॥ 'वा दान्त' इत्यतस्तदनुवृत्तेरिति भावः । **रुष्टः-रुषितः इति** ॥ 'तीषसह' इति रुषो वेट्कत्वात् 'यस्य विभाषा' इति निषेधे प्राप्ते विकल्पोऽयम् । **आन्तः-अमित इति** ॥ 'अम गत्यादिषु' क्तः । इडभावपक्षे 'अनुनासिकस्य' इति दीर्घः । **तूर्णः-त्वरित इति** ॥ 'ञि त्वरा सम्भ्रमे' क्तः, इडभावपक्षे 'ज्वरत्वर' इत्यूठ् । 'रदाभ्याम्' इति नत्वम्, णत्वम् । 'आदितश्च' इति नित्यमिण्निषेधे प्राप्ते विकल्पोऽयम् । आदित्त्वस्य तु फलमात्मनेपदमात्रम् । तदाह । **अस्य आदित्त्वे फलम्मन्दमिति** ॥ तथा च 'एध वृद्धौ' इत्यादिवत् ह्रस्वानुबन्धत्वमेव न्याय्यमिति भावः । **संघुष्टः-संघुषित इति** ॥ 'घुषिरविशब्दने' इति घुषेस्सम्पूर्वस्य नित्यमिण्निषेधे प्राप्ते विकल्पोऽयम् । **आस्वान्तः-आस्वनितः इति** ॥ आङ्पूर्वस्वनेः क्तः । इडभावपक्षे 'अनुनासिकस्य' इति दीर्घः । 'क्षुब्धस्वान्त' इति निपातनन्तु सम्पूर्वस्य स्वनेर्न भवति । परत्वादस्यैव विकल्पस्य प्राप्तेरित्याहुः । 'न वा' इति सूत्रभाष्ये तु संघुषास्वनोर्विषये उभयत्र विभाषेत्युक्तम् । **हृषेर्लोमसु** ॥ लोमसु कर्तृष्विति बोध्यम् । इदञ्च "अजर्यम्" इति सूत्रे भाष्ये स्पष्टम् । **हृष्टम्-हृषितं लोमेति** ॥ 'गत्यर्थाकर्मक' इति कर्तरि क्तः । रोमाञ्चितभूतमित्यर्थः । **विस्मितप्रतिघातयोश्चेति** ॥ वार्तिकमिदम् । 'हृषेर्निष्ठाया इड्वा' इति शेषः । **उदित्त्वादिति** ॥ 'उदितो वा' इति क्त्वायां वेट्कत्वात् 'यस्य विभाषा' इति निष्ठायान्नेडित्यर्थः । तथा अलीकेऽर्थे हृष्ट इत्येव । मृषोक्तवानित्यर्थः । **इडिति** ॥ 'हृष तुष्टौ' इति धातोः क्ते इडेव भवतीत्यर्थः । हृषितः तुष्ट इत्यर्थः । विस्मितप्रतिघातयोस्तु धातूनामनेकार्थत्वाद्वृत्तिः । तत्र लोमसु विस्मितप्रतिघातयोश्च 'हृषु अलीके' इत्यस्मात् 'यस्य विभाषा' इति नित्यमिण्निषेधे प्राप्ते विभाषेयम् । 'हृष तुष्टौ' इत्यस्मात्तु नित्यमिट्प्राप्तौ विभाषा इति विवेकः । **अपचितश्च** ॥ "अपपूर्वस्य चिञो ण्यन्तस्य निष्ठायाञ्चिभावो निपात्यते" इति भाष्यम् । तदाह ।

३०७२। प्यायः पी। (६-१-२८)

पी वा स्यान्निष्ठायाम्। व्यवस्थितविभाषेयम्। तेन स्वाङ्गे नित्यम्। पीनं मुखम्। अन्यत्र प्यानः—पीनः स्वेदः। 'सोपसर्गस्य न' (वा ५०६५) प्रप्यानः। 'आङ्पूर्वस्यान्धूधसोः स्यादेव' (वा ३४६१)। आपीनोऽन्धुः। आपीनमूधः।

३०७३। ह्लादो निष्ठायाम्। (६-४-९५)

ह्रस्वः स्यात्। प्रह्लन्नः।

३०७४। द्यतिस्यतिमास्थामित्ति किति। (७-४-४०)

एषामिकारोऽन्तादेशः स्यात्तादौ किति। ईत्त्वदद्ध्वावयोरपवादः। दितः। सितः। मा, माङ्, मेङ्, मितः। स्थितः।

३०७५। शाच्छोरन्यतरस्याम्। (७-४-४१)

शितः—शातः। छितः—छातः। व्यवस्थितविभाषात्वाद्व्रतविषये श्यतेर्नित्यम्। संशितं व्रतम्। सम्यक्सम्पादितमित्यर्थः। संशितो ब्राह्मणः। व्रतविषयकयत्नवानित्यर्थः।

३०७६। दधातेर्हिः। (७-४-४२)

तादौ किति। अभिहितम्। निहितम्।

चायेर्निपातोऽयमिति ॥ प्यायः पी ॥ वा स्यान्निष्ठायामिति ॥ शेषपूरणमिदम्। 'विभाषाभ्यवपूर्वस्य' इत्यतो विभाषेति 'स्फायः स्फी' इत्यतो निष्ठायामिति चानुवर्तते इति भावः। **व्यवस्थितविभाषेति ॥** अत्र व्याख्यानमेव शरणम्। 'सोपसर्गस्य न' इत्यादि भाष्ये स्पष्टम्। **ह्लादो निष्ठायाम् ॥ ह्रस्वः स्यादिति ॥** शेषपूरणमिदम्। 'खचि ह्रस्वः' इत्यतस्तनुवृत्तेरिति भावः। **प्रह्लन्न इति ॥** 'ह्लादी सुखे' क्तः। 'श्वीदितः' इति नेट्। 'रदाभ्याम्' इति नत्वम्। **द्यतिस्यति ॥** एषां चतुर्णां द्वन्द्वात्षष्ठी। 'दो अवखण्डने' इत्यस्य द्यतीति निर्देशः। 'षो अन्तकर्मणि' इत्यस्य तु स्यतीति निर्देशः। इत् ति कितीति च्छेदः। **ईत्त्वेति ॥** 'घुमास्था' इति ईत्त्वस्य 'दो दद्घोः' इति दद्भावस्य च यथासम्भवमपवाद इत्यर्थः। दोधातोरुदाहरति। **दित इति ॥ मा माङ् मेङिति ॥** 'गामादाग्रहणष्वविशेषः' इति वचनादिति भावः। **शाच्छोः ॥** 'शो तनूकरणे', 'छो छेदने' अनयोः कृतात्वयोर्निर्देशः। अनयोरिकारान्तादेशो वा स्यात् तादौ कितीत्यर्थः। **व्यवस्थितेति ॥** एतच्च भाष्ये स्पष्टम्। **दधातेर्हिः ॥ तादौ कितीति ॥** शेषपूरणमिदम्। 'द्यतिस्यति'

---

१. इदं च 'आङ्पूर्वस्यान्धूधसोः' (वा ३४३१) इति वार्तिकस्य 'आङ्पूर्वस्यैव' इति नियमसिद्धम्।

३०७७ । दो दद्घोः । (७-४-४६)

घुसंज्ञकस्य 'दा' इत्यस्य 'दथ्' स्यात्तादौ किति । चर्त्वम् । दत्तः । 'घोः' किम् । दातः । तान्तो वायमादेशः । न चैवं विदत्तमित्यादावुपसर्गस्य 'दस्ति' (सू ३०७९) इति दीर्घापत्तिः । तकारादौ तद्विधानात् । दान्तो वा । धान्तो वा । न च दान्तत्वे निष्ठानत्वं धान्तत्वे 'झषस्तथोः—' (सू २२८०) इति धत्वं शङ्क्यम् । सन्निपातपरिभाषाविरोधात् ।

३०७८ । अच उपसर्गात्तः । (७-४-४७)

अजन्तादुपसर्गात्परस्य 'दा' इत्यस्य घोरचस्तः स्यात्तादौ किति । चर्त्वम् । प्रत्तः । अवत्तः ।

"अवदत्तं विदत्तञ्च प्रदत्तं चादिकर्मणि ।
सुदत्तमनुदत्तञ्च निदत्तमिति चेष्यते ॥" [इति भाष्यम्]

चशब्दाद्यथाप्राप्तम् ।

इत्यतस्तदनुवृत्तेरिति भावः । **दो दद्घोः** ॥ द इति षष्ठ्यन्तम् । तदाह । **दा इत्यस्येति** ॥ दथ् इति च्छेदः । तदाह । **दथ् स्यादिति** ॥ तवर्गद्वितीयान्तोऽयमादेशः । **तादौ किंतीति** ॥ ति कितीत्यनुवृत्तेरिति भावः । **चर्त्वमिति** ॥ 'खरि च' इति थकारस्य तकार इत्यर्थः । **दात इति** ॥ दाप्दैप्ो रूपम् । अदाप् इत्युक्तेः घुत्वाभावान्न दद्घावः । **तान्तो वेति** ॥ तवर्गप्रथमान्त इत्यर्थः । नन्वेवं सति विदत्तमित्यादौ दस्तीत्युपसर्गस्य दीर्घत्वापत्तिः । तत्र हि द इति षष्ठी सप्तम्यर्थे । इगन्तोपसर्गस्य दीर्घः स्यात् तकारान्ते ददातौ परत इत्यर्थः इत्याशङ्क्य निराकरोति । **न चैवमिति** ॥ आदेशस्य तवर्गप्रथमान्तत्वे सतीत्यर्थः । **तकारादाविति** ॥ 'दस्ति' इत्यत्र द इति षष्ठी तीत्यत्रान्वेति । तथाच इगन्तोपसर्गस्य दीर्घः स्यात् दकारादेशतकारादावुत्तरपदे इत्यर्थः । उत्तरपदाधिकारात् । ततश्च उत्तरपदस्यात्र तकारादित्वाभावात् न दीर्घ इति भावः । **दान्तो वा धान्तो वेति** ॥ तवर्गतृतीयान्तो वा चतुर्थान्तो वा अयमादेश इत्यर्थः । **न चेति** ॥ दान्तत्वे निष्ठानत्वम्, धात्वन्ते 'झषस्तथोः' इति धत्वञ्च न शङ्क्यमित्यन्वयः । **सन्निपातेति** ॥ दान्तादेशस्य धान्तादेशस्य च तकारादिप्रत्ययोपजीव्यतया तद्विघातकनत्वधत्वे प्रति निमित्तत्वासम्भवादिति भावः । **अच उपसर्गात्तः** ॥ त इत्यत्राकार उच्चारणार्थः । अच इत्यावर्तते, एकमुपसर्गविशेषणम् । द्वितीयन्तु स्थानिसमर्पकम् । तदाह । **अजन्तादिति** ॥ **घोरिति** ॥ घोरवयवस्येत्यर्थः । **तः स्यादिति** ॥ तकारः स्यादित्यर्थः । ददादेशापवादः । **चर्त्वमिति** ॥ प्र दा त इति स्थिते दकारादाकारस्य तकारादेशे दकारस्य चर्त्वेन तकार इत्यर्थः । **अवदत्तं विदत्तञ्चेति** ॥ भाष्यस्थश्लोकोऽयम् । अत्र आदिकर्मणीत्येतत् प्रदत्तमित्यत्रैव सम्बध्यते । नायम् 'अच उपसर्गात्तः' इत्यस्य अपवाद इति भ्रमितव्यमित्याह । **चशब्दाद्यथाप्राप्तमिति** ॥ तथा चावदत्तादिशब्देषु

३०७९। दस्ति। (६-३-१२४)

इगन्तोपसर्गस्य दीर्घः स्यादादेशो यस्तकारस्तदादावुत्तरपदे। 'खरि च' (सू १२१) इति चर्त्वमाश्रयात्सिद्धम्। नीत्तम्। सूत्तम्। 'घुमास्था–' (सू २४६२) इतीत्त्वम्। धेट्। धीतम्। गीतम्। पीतम्। 'जनसन–' (सू २५०४) इत्यात्त्वम्। जातम्। सातम्। खातम्।

३०८०। अदो जग्धिर्ल्यप्ति किति। (२-४-३६)

ल्यबिति लुप्तसप्तमीकम्। अदो जग्धिः स्याल्ल्यपि तादौ किति च। इकार उच्चारणार्थः। धत्वम्। 'झरो झरि–' (सू ७१) जग्धः। 'आदिकर्मणि क्तः कर्तरि च' (सू ३०५३)। प्रकृतः कटं सः। प्रकृतः कटस्तेन 'निष्ठायामण्यदर्थे' (सू ३०१४) इति दीर्घः। 'क्षियो दीर्घात्' (सू ३०१५) इति नत्वम्। प्रक्षीणः सः।

३०८१। वाऽऽक्रोशदैन्ययोः। (६-४-६१)

ददादेशोऽपि कदाचिल्लभ्यते इत्यर्थः। अत एव प्रकृतसूत्रभाष्ये 'अच उपसर्गात्तः' इत्यस्यावकाशः प्रत्तमवत्तम् इति सङ्गच्छते इति भावः। **दस्ति** ॥ 'इकः काशे' इत्यतः इक इति 'उपसर्गस्य घञ्यमनुष्ये' इत्यतः उपसर्गस्येति 'ढ्रलोपे' इत्यतो दीर्घ इति चानुवर्तते। उत्तरपदे इत्यधिकृतं तीत्यनेन विशेष्यते। तदादिविधिः। द इति षष्ठी ति इत्यत्रान्वेति। तथाच दाधातोरादेशः यस्तकारः तदादौ उत्तरपदे इति लभ्यते। तदाह। **इगन्तेत्यादि** ॥ ननु नि दा त इति स्थिते 'अच उपसर्गात्तः' इति दकारादाकारस्य तकारे दकारस्य 'खरि च' इति चर्त्वे प्रकृतसूत्रेण उपसर्गस्य दीर्घे नीत्तमिति रूपं वक्ष्यति। तदयुक्तम्। दीर्घे कर्तव्ये चर्त्वस्यासिद्धत्वे दादेशे तकारादुत्तरपदत्वाभावादित्यत आह। **खरि चेति चर्त्वमाश्रयात् सिद्धमिति** ॥ दादेशतकारमाश्रित्य विधीयमाने दीर्घे चर्त्वं नासिद्धम्। चर्त्वासिद्धं तकारमाश्रित्य विधिबलादित्यर्थः। सूत्तमिति चिन्त्यम्। 'गतिश्च' इति सूत्रभाष्यवार्तिकयोस्सुदत्तमित्यत्र 'अच उपसर्गात्तः' इति तत्त्वे कर्तव्ये सोरुपसर्गत्वन्नेति प्रपञ्चितत्वात्। अथ धेड्गापाधातुभ्यः क्ते आह। **घुमास्थेति** ॥ **धीतमिति** ॥ 'दधातेर्हिः' इत्यत्र श्लुविकरणग्रहणान्न हिभावः। **अदो जग्धिः** ॥ **धत्वमिति** ॥ जग्ध् त इति स्थिते 'झषस्तथोः' इति तकारस्य धकार इत्यर्थः। **झरो झरि इति** ॥ अनेन पाक्षिको धकारलोप इत्यर्थः। **आदिकर्मणि क्त इति** ॥ व्याख्यातं प्राक्। उदाहरणान्तरविवक्षया पुनरुपन्यासः। **प्रकृतः कटं स इति** ॥ कर्तुमारब्धवानित्यर्थः। कटस्य कर्मणः अनभिहितत्वात् द्वितीया। कर्तुरभिहितत्वात् तच्छब्दात्प्रथमा। चकाराद्भावे कर्मणि चेत्युक्तम्। तत्र कर्मण्युदाहरति। **प्रकृतः कटस्तेनेति** ॥ **प्रक्षीणस्स इति** ॥ आदिकर्मणि क्तः। आदिकर्मणीति वा। **वाऽऽक्रोशदैन्ययोः** ॥ अण्यदर्थ इत्यनुवर्तते।

क्षियो निष्ठायां दीर्घो वा स्यादाक्रोशे दैन्ये च । क्षीणांयुर्भव । क्षिता-युर्वा । क्षीणोऽयं तपस्वी, क्षितो वा ।

३०८२ । निनदीभ्यां स्नातेः कौशले । (८-३-८९)

आभ्यां स्नातेः सस्य षः स्यात्कौशले गम्ये । निष्णातः शास्त्रेषु । नद्यां स्नातीति नदीष्णः । 'सुपि–' (सू २९१६) इति कः ।

३०८३ । सूत्रं प्रतिष्णातम् । (८-३-९०)

प्रतेः स्नातेः षत्वम् । प्रतिष्णातं सूत्रम् । शुद्धमित्यर्थः । अन्यत्र प्रतिस्नातम् ।

३०८४ । कपिष्ठलो गोत्रे । (८-३-९१)

कपिष्ठलो नाम यस्य कापिष्ठलिः पुत्रः । 'गोत्रे' किम् । कपीनां स्थलं कपिस्थलम् ।

३०८५ । विकुशमिपरिभ्यः स्थलम् । (८-३-९६)

एभ्यः स्थलस्य सस्य षः स्यात् । विष्ठलम् । कुष्ठलम् । शमिष्ठलम् । परिष्ठलम् ।

३०८६ । गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुह-जीर्यतिभ्यश्च । (३-४-७२)

एभ्यः कर्तरि क्तः स्याद्भावकर्मणोश्च । गङ्गां गतः । गङ्गां प्राप्तः । म्लानः सः । लक्ष्मीमाश्लिष्टो हरिः । शेषमधिशयितः । वैकुण्ठमधिष्ठितः ।

ण्यदर्थौ भावकर्मणी इत्युक्तम् । आक्रोशे उदाहरति । **क्षीणायुर्भवेति** ॥ 'गत्यर्थाकर्मक' इति कर्तरि क्तः । दैन्ये उदाहरति । **क्षीणोऽयं तपस्वीति** ॥ कृश इत्यर्थः । **निनदीभ्याम्** ॥ **सस्य षः स्यादिति** ॥ 'सहेस्साडस्सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते, 'अपदान्तस्य मूर्धन्यः' इत्यप्यधिकृतमिति भावः । **निष्णात इति** ॥ कुशल इत्यर्थः । **नदीष्ण इति** ॥ नद्याङ्कुशलं स्नातीति विग्रहः । **सुपीति क इति** ॥ 'सुपि स्थः' इत्यत्र सुपीति योगविभागात् क इत्यर्थः । **गत्यर्थ** ॥ गत्यर्थ, अकर्मक, श्लिष, शीङ्, स्था, आस, वस, जन, रुह, जीर्यति, एषान्दशानान्द्वन्द्वः । 'लः कर्मणि च भावे च' इत्यतः भावे कर्मणीति 'आदिकर्मणि क्तः कर्तरि च' इत्यतः कर्तरि इति चानुवर्तते । तदाह । **एभ्य इत्यादिना** ॥ कर्तरीत्येवानुवृत्तौ भावकर्मणोर्न स्यादिति तयोरप्यनुवृत्तिः । **गङ्गाङ्गत इति** ॥ कर्तरि क्तः । **गङ्गाम्प्राप्त इति** ॥ 'आप्ल व्याप्तौ' उपसर्गवशाद्गतौ वर्तते । अकर्मकादुदाहरति । **म्लान इति** ॥ क्षीण इत्यर्थः । 'संयोगादेः' इति निष्ठानत्वम् । **आश्लिष्ट इति** ॥ आलिङ्गितवानित्यर्थः । ननु अकर्मकत्वादेव सिद्धे शीङादीनां पुनर्ग्रहणं व्यर्थमित्यत आह । **शेषमधिशयित इति** ॥ शेषे शयितवा-नित्यर्थः । 'अधिशीङ्स्थासाम्' इति शेषः कर्म । अतो नाकर्मकत्वादिह प्राप्तिरिति भावः । **वैकुण्ठमधिष्ठित इति** ॥ वैकुण्ठे स्थितवानित्यर्थः । 'अधिशीङ्स्थासाम्' इति वैकुण्ठः कर्म ।

शिवमुपासितः। हरिदिनमुपोषितः। राममनुजातः। गरुडमारूढः। विश्वमनुजीर्णः। पक्षे प्राप्ता गङ्गा तेनेत्यादि।

३०८७। क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः। (३-४-७६)

एभ्योऽधिकरणे क्तः स्यात्। चाद्यथाप्राप्तम्। ध्रौव्यं स्थैर्यम्।

"मुकुन्दस्यासितमिदमिदं यातं रमापतेः।
भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः॥"

पक्षे आसेरकर्मकत्वात्कर्तरि भावे च। आसितो मुकुन्दः। आसितं तेन। गत्यर्थेभ्यः कर्तरि कर्मणि च। रमापतिरिदं यातः। तेनेदं यातम्। भुजेः कर्मणि। अनन्तेनेदं भुक्तम्। कथं 'भुक्ता ब्राह्मणाः' इति। भुक्तमस्ति एषामिति मत्वर्थीयोऽच्। वर्तमाने इत्यधिकृत्य।

अतो नाकर्मकत्वादिह प्राप्तिः। **शिवमुपासित इति**॥ शिवम्परिचरितवानित्यर्थः। उपवेशनार्थकत्वे अकर्मकत्वेऽपि इह उपसर्गवशनार्थान्तरसकर्मकत्वादकर्मकेत्यनेन न प्राप्तिरिति भावः। **हरिदिनमुपोषित इति**॥ 'वसनिक्षुधाः' इति इट्। यजादित्वात्सम्प्रसारणम्। 'शासि' इति षः। हरिदिने न भुक्तवानित्यर्थः। 'उपान्वध्याङ्वसः' इति हरिदिनङ्कर्म। ततश्चाकर्मकत्वाभावादप्राप्तिः। **राममनुजात इति**॥ अनुकूलवानित्यर्थः। अनुसृत्य जातवानिति वा। ततश्चाकर्मकत्वाभावादप्राप्तिः। **गरुडमारूढ इति**॥ उपर्याक्रान्तवानित्यर्थः। **विश्वमनुजीर्ण इति**॥ हतवानित्यर्थः। व्याप्तवानिति वा। अकर्मकत्वाभावादप्राप्तिः। जॄधातोः कर्तरि क्तः। 'ऋतः' इति इत्त्व, रपरत्वं 'हलि च' इति दीर्घः। 'रदाभ्याम्' इति नत्वं, णत्वम्। **पक्षे इति**॥ कर्तरि प्रत्ययाभावपक्षे इत्यर्थः। **क्तोऽधिकरणे च**॥ ध्रौव्यं गतिः प्रत्यवसानञ्च अर्थो येषामिति विग्रहः। ध्रौव्यार्थेभ्यः गत्यर्थेभ्यः प्रत्यवसानार्थेभ्यश्चेति यावत्। **चाद्यथाप्राप्तमिति**॥ कर्मकर्तृभावेष्वपि यथासम्भवमित्यर्थः। ध्रौव्यमित्यस्य विवरणं, **स्थैर्यमिति**॥ स्थिरीभवनम्, उपवेशनशयनादिक्रियेति यावत्। **मुकुन्दस्यासितमिदमिति**॥ श्लोकोऽयम्। आस्यते अस्मिन्नित्यासितम्, आसनमित्यर्थः। ध्रौव्यार्थस्योदाहरणमिदम्। **इदं यातं रमापतेरिति**॥ गत्यर्थस्योदाहरणम्। यायते गम्यते अस्मिन्निति यातं, मार्ग इत्यर्थः। **भुक्तमेतदनन्तस्येति**॥ भुज्यते अस्मिन्निति भुक्तम्। भोजनस्थानमित्यर्थः। 'अधिकरणवाचिनश्च' इति त्रिष्वपि कर्तरि षष्ठी। **पक्षे इति**॥ अधिकरणे प्रत्ययाभावपक्षे इत्यर्थः। **आसेरकर्मकत्वादिति**॥ ततश्च न कर्मणि क्त इत्यर्थः। **आसितो मुकुन्द इति**॥ आसितवानित्यर्थः। **आसितं तेनेति**॥ भावे उदाहरणम्। **गत्यर्थेभ्य इति**॥ तेषां सकर्मकतया कर्तरि कर्मणि च क्तः, न तु भावे इत्यर्थः। 'लः कर्मणि च' इत्यत्रादर्शनादिति भावः। **भुजेः कर्मणीति**॥ भक्षणार्थात्कर्मणि क्तः, न तु भावे। सकर्मकेभ्यो भावे प्रत्ययस्य 'लः कर्मणि' इत्यत्रादर्शनात्। नापि प्रत्यवसानार्थेभ्यः कर्तरि, अनभिधानादित्यर्थः। **कथमिति**॥ भुजेः कर्तरि क्ताभावस्योक्तत्वादिति भावः। समाधत्ते। **भुक्तमस्त्येषामिति**॥ अत्र गत्यर्थेभ्यो भावेऽपि क्तप्रत्ययोऽस्त्येव। अविशेषात्। 'अजर्यं सङ्गतम्'

३०८८ । ञितः क्तः । (३-२-१८७)

'ञि क्ष्विदा' क्ष्विण्णः । 'ञि इन्धी' इद्धः ।

३०८९ । मतिबुद्धिपूजार्थेभ्यश्च । (३-२-१८८)

मतिरिहेच्छा । बुद्धेः पृथगुपादानात् । राज्ञां मतः इष्टः । तैरिष्यमाण इत्यर्थः । बुद्धः । विदितः । पूजितः । अर्चितः । चकारोऽनुक्तसमुच्चयार्थः । "शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि" इत्यादि ।

३०९० । नपुंसके भावे क्तः । (३-३-११४)

क्लीबत्वविशिष्टे भावे कालसामान्ये क्तः स्यात् । जल्पितम् । शयितम् । हसितम् ।

३०९१ । सुयजोर्ङ्वनिप् । (३-२-१०३)

सुनोतेर्यजेश्च ङ्वनिप्स्याद्भूते । सुत्वा, सुत्वानौ । यज्वा, यज्वानौ ।

३०९२ । जीर्यतेरतृन् । (३-२-१०४)

भूते इत्येव । जरन्-जरन्तौ-जरन्तः । वासरूपन्यायेन निष्ठापि । जीर्णः जीर्णवान् ।

इति सूत्रे 'अनेकमन्यपदार्थे' इति सूत्रे च भाष्ये गत्यर्थेभ्यो भावे क्तप्रत्ययस्य अभ्युपगमाच्चेति शब्देन्दुशेखरे विस्तरः । **इत्यधिकृत्येति** ॥ 'वर्तमाने लट्' इत्यतो मण्डूकप्लुत्या अनुवर्तमान इत्यर्थः । चानशादीनां सर्वकालतायाः 'भूते' इति सूत्रे भाष्ये उक्तत्वात् इत्याहुः । **ञितः क्तः** ॥ ञिः इत् यस्य तस्माद्वर्तमानक्रियावृत्तेः क्त इत्यर्थः । 'तयोरेव कृत्यक्त' इति भावकर्मणोरेव भूते विहितः क्तः वर्तमाने न प्राप्नोतीत्यारम्भः । **क्ष्विण्ण इति** ॥ 'आदितश्च' इति नेट् । **इद्ध इति** ॥ 'श्वीदितः' इति नेट् । **मतिबुद्धि** ॥ मति, बुद्धि, पूजा, अर्थः, एषामिति विग्रहः । वर्तमाने क्त इति शेषः । 'तयोरेव' इति भावकर्मणोरेव । **मतः इष्ट इति** ॥ इच्छार्थकान्मनेरिषेश्च क्तः । 'तीषसह' इति वेट्कत्वात् 'यस्य विभाषा' इति नेट् । **शीलितो रक्षित इति** ॥ भाष्यस्थश्लोकोऽयम् । **इत्यादीति** ॥ आदिना "रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि ।" "हृष्टतुष्टौ तथाक्रान्तस्तथोभौ संयतोद्यतौ । कष्टम्भविष्यतीत्याहुरमृतः पूर्ववत्स्मृतः" इति सङ्ग्रहः । कष्टशब्दो भविष्यति अमृतशब्दो वर्तमाने इत्यर्थः । **नपुंसके भावे क्तः** ॥ **कालसामान्ये इति** ॥ अस्य वर्तमानाद्यधिकारानन्तर्भावादिति भावः । 'अकर्मकेभ्य एव नपुंसके भावे क्तः, नतु सकर्मकात्' इति 'णेरध्ययने वृत्तम्' इति सूत्रे भाष्यकैयटयोः स्पष्टम् । तद्धि नयन्नकर्मकेभ्य एवोदाहरति । **जल्पितमित्यादि** ॥ गतं भुक्तमित्यादौ तु अविवक्षितकर्मकत्वात् अकर्मकत्वं बोध्यम् । अत एव गतं हंसस्य, भुक्तमोदनस्येत्यादौ शेषत्वविवक्षया षष्ठीति दिक् । **सुयजोर्ङ्वनिप्** ॥ पञ्चम्यर्थे षष्ठी । सुनोतेर्यजेश्च ङ्वनिबित्यर्थः । **भूते इति** ॥ अस्य भूताधिकारस्थत्वादिति भावः । **सुत्वा-सुत्वानाविति** ॥ ङ्वनिपि ङ्पाबितौ, इकार उच्चारणार्थः । ङित्त्वान्न गुणः । **जीर्यतेरतृन् ॥ भूते इत्येवेति** ॥ भूतार्थवृत्तेर्जॄधातोरतृन् स्यादित्यर्थः । ऋकारनकारावितौ । अत्प्रत्ययश्शिष्यते । **जरन्निति** ॥ उगित्त्वान्नुम् । **जीर्ण इति** ॥ 'ऋत इत्'

३०९३। छन्दसि लिट्। (३-२-१०५)
३०९४। लिटः कानज्वा। (३-२-१०६)
३०९५। क्वसुश्च। (३-२-१०७)

इह भूतसामान्ये छन्दसि लिट्। तस्य विधीयमानौ क्वसुकानचावपि छान्दसाविति त्रिमुनिमतम्। कवयस्तु बहुलं प्रयुञ्जते। 'तं तस्थिवांसं नगरोपकण्ठे'। 'श्रेयांसि सर्वाण्यधिजग्मुषस्ते' इत्यादि।

३०९६। वस्वेकाजाद्घसाम्। (७-२-६७)

कृतद्विर्वचनानामेकाचामादन्तानां घसेश्च वसोरिट्, नान्येषाम्। एकाच्, आरिवान्। आत्, ददिवान्। जक्षिवान्। 'एषाम्' किम्। बभूवान्।

रपरत्वम्, 'हलि च' इति दीर्घः। निष्ठानत्वम्। **छन्दसि लिट्** ॥ **लिटः कानज्वा** ॥ **क्वसुश्च** ॥ त्रीणीमानि सूत्राणि। अत्र प्रथमसूत्रे भूत इत्यनुवृत्तिमभिप्रेत्य व्याचष्टे। **भूतसामान्ये छन्दसि लिडिति** ॥ अनद्यतनपरोक्षत्वं छन्दसि न विवक्षितमिति भावः। 'लिटः कानज्वा' इति द्वितीयं सूत्रम्। तत्र छन्दसीत्यनुवर्तते, भूते इति च। छन्दसि भूते लिटः कानजादेशः स्यादित्यर्थः। लिड्ग्रहणं लिण्मात्रस्य ग्रहणार्थम्। तेन 'परोक्षे लिट्' इति यो लिङ्निहितः तस्यापि ग्रहणार्थः। अन्यथा 'अनन्तरस्य' इति न्यायेन प्रकृतस्यैव लिटो ग्रहणं स्यादिति वृत्तौ स्पष्टम्। वाग्रहणन्तु पक्षे लिटः श्रवणार्थं, वासरूपविधिर्लादेशेषु नेति ज्ञापनार्थं वा। तत्प्रयोजनन्तु 'भाषायां सदवस' इत्यत्र अनुपदमेव वक्ष्यते। 'क्वसुश्च' इति तृतीयं सूत्रम्। छन्दसि भूते लिटः क्वसुश्चादेशः स्यादित्यर्थः। योगविभागस्तु उत्तरसूत्रे क्वसोरेवानुवृत्त्यर्थः। इमौ कानच्क्वसू आदेशौ छान्दसाविति अत्रैव भाष्यकैयटयोः स्पष्टम्। तदाह। **तस्येत्यादि त्रिमुनिमतमित्यन्तम्** ॥ 'विभाषा पूर्वाह्णापराह्ण' इति सूत्रभाष्ये तु पपुष आगतं पपिवद्भूत्यमिति प्रयुक्तम्। तेन लोकेऽपि क्वचित् क्वसोस्साधुत्वं सूचितम्। तदाह। **कवयस्त्विति** ॥ **तस्थिवांसमिति** ॥ स्थाधातोः लिटः क्वसुः। द्वितीयैकवचने 'अत्वसन्तस्य' इति दीर्घः, उगित्त्वान्नुम्। **अधिजग्मुष इति** ॥ अधिपूर्वाद्गमेर्लिटः क्वसुः 'गमहन' इत्युपधालोपः, शसि वसोस्सम्प्रसारणं, पूर्वरूपम्, षत्वम्। **वस्वे** ॥ वसु इत्यविभक्तिको निर्देशः। तथाच व्याख्यास्यति। **वसोरिति** ॥ नित्यत्वात् द्वित्वे कृते एकाच्त्वमेव नेति कथमिट्स्यात् इत्यत आह। **कृतद्विर्वचनानामेकाचामिति** ॥ कृतेऽपि द्वित्वे एकाच एव ये अवशिष्यन्ते तेषामित्यर्थः। 'नेड्वशि कृति' इति निषेधं बाधित्वा क्रादिनियमात् सर्वत्र प्राप्तस्य इटो नियमोऽयमित्याह। **नान्येषामिति** ॥ **आरिवानिति** ॥ 'ऋ गतौ' "ऋच्छत्यृताम्" इति गुणे कृते द्वित्वादिषु पूर्ववत् कृतेषु अयमेकाच्। **ददिवानिति** ॥ डु दाञ् दाने कृते द्वित्वे नायमेकाच् इण्निमित्तश्चातो लोपो नासति तस्मिन् भवतीति अनेकाजर्थमाग्रहणम्। **जक्षिवानिति** ॥ 'लिट्यन्यतरस्याम्' इत्यदेर्घस्लादेशः। द्वित्वे कृते नायमेकाजिति

३०९७ । भाषायां सदवसश्रुवः । (३-२-१०८)

सदादिभ्यो भूतसामान्ये भाषायां लिड्वा स्यात्, तस्य च नित्यं क्वसुः । 'निषेदुषीमासनबन्धधीरः' । 'अध्यूषुषस्तामभवज्जनस्य' । शुश्रुवान् ।

३०९८ । उपेयिवाननाश्याननूचानश्च । (३-२-१०९)

एते निपात्यन्ते । उपपूर्वादिणो भाषायामपि भूतमात्रे लिड्वा, तस्य नित्यं क्वसुः । इट् । उपेयिवान् । 'उपेयुषः स्वामपि मूर्तिमग्र्याम्' । उपेयुषी । उपेत्यविवक्षितम् । ईयिवान् । समीयिवान् । नञ्पूर्वादश्नातेः क्वसुरिडभावश्च । 'धृतजयधृतेरनाशुषः' इति भारविः । अनुपूर्वाद्वचेः कर्तरि कानच् । वेदस्यानुवचनं कृतवाननूचानः ।

घसिग्रहणम् । **भाषायाम्** ॥ सद, वस, श्रु, एषान्द्वन्द्वान्पञ्चमी । पुंस्त्वमेकवचनञ्चार्षम् । **तस्य च नित्यं क्वसुरिति** ॥ वाग्रहणं लिटैव सम्बध्यते । तस्य क्वसुस्तु नित्यः इति भाष्ये स्पष्टम् । पक्षे लुङ् । तस्य भूतसामान्ये विहितत्वात् । वाग्रहणानुवृत्तौ तु भूतसामान्ये लिडयं नित्यं लुङपवादः स्यात् । सरूपत्वात् । अस्य च भूतसामान्ये लिटः न तिङ् । अस्य क्वसोस्तदपवादत्वात् । वासरूपविधिस्तु लादेशेषु नेति 'लिटः कानज्वा' इत्यत्र उक्तमिति शब्देन्दुशेखरे विस्तरः । **निषेदुषीमिति** ॥ निपूर्वात्सदेर्लिटः क्वसुः, द्वित्वम् 'अत एकहल्मध्ये' इयेत्त्वाभ्यासलोपौ, वसास्सम्प्रसारणं, पूर्वरूपं, षत्वम् । **अध्यूषुष इति** ॥ अधिपूर्वाद्वसधातोर्लिटः क्वसुः, यजादित्वाद्धातोरस्य सम्प्रसारणम् । पूर्वरूपम्, उस् इत्यस्य द्वित्वं, हलादिशेषः, सवर्णदीर्घः । शसि वसोस्सम्प्रसारणं, पूर्वरूपम् । **शुश्रुवानिति** ॥ श्रुधातोर्लिटः क्वसुः, द्वित्वम् । **उपेयिवान्** ॥ **इडिति** ॥ उपपूर्वादिण्धातोः लिट क्वसु, नित्यत्वद्द्वित्वम् । "वलादिलक्षण इट् 'नेड्वशि कृति' इति प्रतिषिद्धः, स तावत् क्रादिनियमात्पुनरुत्थितः । पुनश्च 'वस्वेकाजाद्धसाम्' इति सूत्रेण एकाच्श्च आदन्ताच्च घसेश्च परस्य वसोरिट् स्यात् नान्येभ्य इत्यर्थकेन द्वित्वनन्तरमनेकाच्त्वात् प्रतिषिद्धः, सोऽयमिट् अनेन निपातनेन प्रतिप्रसूयते" इति भाष्ये स्पष्टम् । इटि कृते उत्तरखण्डस्य इकारस्य यण्, अभ्यासस्य दीर्घस्तु निपात्यते । नन्वत्र अपूर्व एव इट् निपात्यतामित्यत आह । **उपेयुषीति** ॥ उगित्त्वान्ङीप् वसोस्सम्प्रसारणम् । प्रतिप्रसूतो वलादिलक्षण इट्तु न । तान्नामत्तस्य वकारस्य सम्प्रसारणेन विनाशोन्मुखत्वात् । अत्र अपूर्वस्य इटो निपातने तु अत्रापि इट् स्यादिति भावः । **उपेत्यविवक्षितमिति** ॥ अत्र व्याख्यानमेव शरणम् । **अश्नातेरिति** ॥ 'अश भोजने' श्नाविकरणः, क्र्यादिः, लिटः क्वसुः, द्वित्वम् 'अत आदेः' इति दीर्घः, सवर्णदीर्घः, द्विहल्त्वाभावान्न नुट् । 'अश्नोतेश्च' इत्यपि न नुट् । श्नुविकरणस्थस्यैव तत्र ग्रहणात् । नञ उपपदसमासः । 'नलोपो नञः, तस्मान्नुडचि' इति भावः । **वचेः कर्तरीति** ॥ न तु भावकर्मणोरिति भावः ।

३०९९। विभाषा गमहनविदविशाम्। (७-२-६८)

एभ्यो वसोरिड्वा। जग्मिवान्–जगन्वान्। जघ्निवान्–जघन्वान्। विविदिवान्–विविद्वान्। विविशिवान्–विविश्वान्। विशिना साहचर्याद्विन्दतेर्ग्रहणम्। वेत्तेस्तु विविद्वान्। 'नेड्वशि कृति' (सू २९८१) इतीण्निषधः। 'दृशेश्च' (वा ४४५२)। ददृशिवान्–ददृश्वान्।

३१००। लटः शतृशानचावप्रथमासमानाधिकरणे। (३-२-१२४)

अप्रथमान्तेन सामानाधिकरण्ये सतीत्यर्थः। शबादि। पचन्तं चैत्रं पश्य।

३१०१। आने मुक्। (७-२-८२)

अदन्तस्याङ्गस्य मुगागमः स्यादाने परे। पचमानं चैत्रं पश्य। लडित्यनुवर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थम्। तेन प्रथमासामानाधिकरण्येऽपि क्वचित्। सन्ब्राह्मणः। 'माङ्याक्रोशे इति वाच्यम्' (वा २१०९)। 'मा जीवन्यः परावज्ञादुःखदग्धोऽपि जीवति'। 'माङि लुङ्' (सू २२१९) इति प्राप्ते एतद्वचनसामर्थ्याल्लट्।

३१०२। सम्बोधने च। (३-२-१२५)

हे पचन्। हे पचमान।

कानचि यजादित्वात्सम्प्रसारणं, पूर्वरूपं, सवर्णदीर्घः। **विभाषा गम**॥ 'विभाषा गमहन' इत्यादि स्पष्टम्। **लटः शतृशानचौ**॥ 'वर्तमाने लट्' इति पूर्वसूत्रविहितस्यैव एतौ शतृशानचौ। अनन्तरस्येति न्यायादिति 'वर्तमानसामीप्ये' इत्यादिभाष्ये स्पष्टम्। शतृप्रत्यये शकारऋकारावितौ। **पचन्तमिति**॥ पाकानुकूलव्यापाराश्रयमित्यर्थः 'क्रियाप्रधानमाख्यातम्, सत्वप्रधानानि नामानि' इति सिद्धान्तात्। शतरिशत्त्वेन सार्वधातुकत्वात् शपि 'अतो गुणे' इति पररूपम्। शानचि शचाविती। **आने मुक्**॥ 'अङ्गस्य' इत्यधिकृतम्। 'अतो येयः' इति पूर्वसूत्रादनुवृत्तेन षष्ठ्या विपरिणतेन अता विशष्यते। तदन्तविधिः। तदाह। **अदन्तस्येति**॥ मुकि ककार इत्, उकार उच्चारणार्थः, कित्त्वादन्तावयवः। **अनुवर्तमाने इति**॥ 'वर्तमाने लट्' इति पूर्वसूत्रादनुवृत्तस्य लडित्यस्य षष्ठ्या विपरिणामेन उक्तार्थलाभे सतीत्यर्थः। **अधिकेति**॥ सूत्राक्षरारूढस्यापि अर्थस्य लाभार्थमित्यर्थः। **सन् ब्राह्मण इति**॥ 'अस भुवि' शतृप्रत्ययं शपो लुक्। श्नसोरल्लोपः। **माङीति**॥ माङि प्रयुज्यमाने आक्रोशे गम्ये लटश्शतृशानचाविति वक्तव्यमित्यर्थः। **मा जीवान्निति**॥ न जीवत्ययम् अनुपकारित्वात्। मृतप्राय इत्यर्थः। मा पचमान इत्यप्युदाहार्यम्। 'लटश्शतृशानचौ' इत्येव सिद्धेः किमर्थमिदमित्यत आह। **माङि लुङितीति**॥ **सम्बोधने च**॥ लटश्शतृशानचाविति शेषः। प्रथमासमानाधिकरणार्थ आरम्भः। पूर्वसूत्रस्थपुनर्लड्ग्रहणस्य अधिकविधानार्थत्वादेव सिद्धे प्रपञ्चार्थ-

३१०३ । लक्षणहेत्वोः क्रियायाः । (३-२-१२६)

क्रियायाः परिचायके हेतौ चार्थे वर्तमानाद्धातोर्लटः शतृशानचौ स्तः । शयाना भुञ्जते यवनाः । अर्जयन्वसति । हरिं पश्यन्मुच्यते । हेतुः फलं कारणं च । 'कृत्यचः' (सू २८३५) । प्रपीयमाणः सोमः ।

३१०४ । ईदासः । (७-२-८३)

आसः परस्यानस्य ईत्स्यात् । 'आदेः परस्य' (सू ४४) आसीनः ।

३१०५ । विदेः शतुर्वसुः । (७-१-३६)

वेत्तेः परस्य शतुर्वसुरादेशो वा स्यात् । विद्वान् । विदन् । विदुषी ।

३१०६ । तौ सत् । (३-२-१२७)

तौ शतृशानचौ सत्संज्ञौ स्तः ।

३१०७ । लृटः सद्वा । (३-३-१४)

व्यवस्थितविभाषेयम् । तेनाप्रथमासामानाधिकरण्ये प्रत्ययोत्तरपदयोः संबोधने लक्षणहेत्वोश्च नित्यम् । करिष्यन्तं करिष्यमाणं पश्य । करिष्यतोऽपत्यं

मिदम् । **लक्षणहेत्वोः** ॥ लक्ष्यते ज्ञाप्यतेऽनेनेति लक्षणम्, ज्ञापकम् । तदाह । **क्रियायाः परिचायके इति** ॥ धात्वर्थस्य लक्षणत्वे हेतुत्वे च द्योत्ये इति यावत् । कर्तैव प्रत्ययार्थः । **शयाना भुञ्जते यवना इति** ॥ अत्र भोजनकालीनं शयनं भोक्तुर्यवनत्वसूचकम् । हेतावुदाहरति । **अर्जयन्वसतीति** ॥ अर्जनाय वसतीत्यर्थः । हेतावुदाहरणान्तरमाह । **हरिं पश्यन्निति** ॥ हरिदर्शनेन संसारदुःखान्मुच्यते इत्यर्थः । ननु धनाद्यार्जनस्य वाससाध्यतया कथं तस्य वासहेतुत्वं इत्यत आह । **हेतुः फलं कारणञ्चेति** ॥ इष्टसाधनताज्ञानस्य वासप्रवृत्तौ हेतुतया इष्टस्यार्जनस्यापि वासहेतुत्वमिति भावः । **प्रपीयमाण इति** ॥ अत्र भिन्नपदस्थत्वात् कथं णत्वमित्यत आह । **कृत्यच इति** ॥ **ईदासः** ॥ आस इति पञ्चमी । **आनस्येति** ॥ 'आने मुक्' इत्यतस्तदनुवृत्तेरिति भावः । **विदेः शतुर्वसुः** ॥ **वेत्तेरिति** ॥ 'विद ज्ञाने' इति लुग्विकरणस्यैव ग्रहणम् । शतुः परस्मैपदत्वात् विद्यतेर्विन्तेश्चात्मनेपदित्वात् । यद्यपि विन्दतिरुभयपदी, तथापि तस्य न ग्रहणम् । 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इत्युक्तेरिति भावः । **वा स्यादिति** ॥ 'तुह्योस्तातङ्' इत्यतस्तदनुवृत्तेरिति भावः । **विदुषीति** ॥ उगित्त्वान्ङीप्, वसोस्सम्प्रसारणं, पूर्वरूपम्, षत्वम् । **तौ सत्** ॥ 'लटश्शतृशानचौ' इति सूत्रोपात्तौ शतृशानचौ तच्छब्दः परामृशति । तदाह । **तौ शतृशानचाविति** ॥ **लृटः सद्वा** ॥ लटश्शतृशानचौ वा स्त इत्यर्थः । **व्यवस्थितेति** ॥ व्याख्यानादिति भावः । **नित्यमिति** ॥ तेन तिङान्निवृत्तिः । अप्रथमासामानाधिकरण्ये उदाहरति । **करिष्यन्तमिति** ॥ प्रत्यये परतः उदाहरति । **करिष्यतोऽपत्यं कारिष्यत इति** ॥ उत्तरपदे उदाहरति । **करिष्यद्भक्तिरिति** ॥ करिष्यन्ती भक्तिरिति कर्मधारयः । सम्बोधने उदाहरति । **हे कटं करिष्यन्निति** ॥

कारिष्यतः। करिष्यद्भक्तिः। हे करिष्यन्। अर्जयिष्यन्वसति। प्रथमासामानाधिकरण्येऽपि क्वचित्। करिष्यतीति करिष्यन्।

३१०८। पूङ्यजोः शानन्। (३-२-१२८)

वर्तमाने। पवमानः। यजमानः।

३१०९। ताच्छील्यवयोवचनशक्तिषु चानश्। (३-२-१२९)

एषु द्योत्येषु कर्तरि चानश्। भोगं भुञ्जानः। कवचं बिभ्राणः। शत्रुं निघ्नानः।

३११०। इङ्धार्योः शत्रकृच्छ्रिणि। (३-२-१३०)

आभ्यां शतृ स्यादकृच्छ्रिणि कर्तरि। अधीयन्। धारयन्। 'अकृच्छ्रिणि' किम्। कृच्छ्रेण अधीते धारयति।

३१११। द्विषोऽमित्रे। (३-२-१३१)

द्विषञ्छत्रुः।

३११२। सुञो यज्ञसंयोगे। (३-२-१३२)

सर्वे सुन्वन्तः, सर्वे यजमानाः, सत्रिणः।

शयिष्यमाणा भोक्ष्यन्ते यवना इति लक्षणे उदाहार्यम्। हेतावुदाहरति। **अर्जयिष्यन्वसतीति॥ प्रथमासामानाधिकरण्येऽपि क्वचिदिति॥** प्रथमासामानाधिकरण्येऽपि क्वचिदित्यर्थः। कदाचिदित्यपि द्रष्टव्यम्। इदञ्च 'लृट् शेषे च' इति भविष्यदधिकारविहिते लृट्येव प्रवर्तते इति "अनवक्लृप्त्यमर्षे" इत्यत्र भाष्ये स्पष्टम्। **पूङ्यजोः शानन्॥** पञ्चम्यर्थे षष्ठी। **वर्तमाने इति॥** शेषपूरणमिदम्। 'वर्तमाने लट्' इत्यतस्तदनुवृत्तेरिति भावः। लड्ग्रहणन्तु निवृत्तम्। ततश्च ण्वुलादिवत्स्वतन्त्रोऽयम्, नतु शत्रादिवल्लादेशः। तथा च कर्तर्येवायम्, नतु भावकर्मणोः। नच लादेशत्वाभावे सोमम्पवमान इत्यत्र कर्मणि षष्ठी स्यादिति वाच्यम्। 'न लोक' इति सूत्रे 'तृन्' इति प्रत्याहार इत्युक्तत्वात्। **ताच्छील्य॥** चानशि चशाविती। **भोगं भुञ्जान इति॥** भोगशील इत्यर्थः। **कवचम्बिभ्राण इति॥** यौवनबलादिति भावः। **शत्रुन्निघ्नान इति॥** निहन्तुं शक्त इत्यर्थः। अतः परत्वाभावान्न मुक्। चानशः लादेशत्वाभावात् अनात्मनेपदत्वात् परस्मैपदिभ्योऽपि प्रवृत्तिः। **इङ्धार्योः॥** शतृ अकृच्छ्रिणीति छेदः। अकृच्छ्रम्, अदुःखम्, तदस्यास्तीति अकृच्छ्री। इङ्, धारि, अनयोः द्वन्द्वात् पञ्चम्यर्थे षष्ठी। **अधीयन्निति॥** सुखमध्येतेत्यर्थः। **धारयन्निति॥** सुखेन धारयितेत्यर्थः। **द्विषोऽमित्रे॥** द्विषश्शतृप्रत्ययः स्यात्। अमित्रे कर्तरीत्यर्थः। **सुञो यज्ञ॥** यज्ञसंयुक्तेऽभिषवे वर्तमानात् सुनोतेः शतृप्रत्यय इत्यर्थः। संयोगग्रहणं यज्ञस्वामिपरिग्रहार्थम्। तेन याजकेषु न भवति। तत्र सुन्वन्निति त्वेकवचनान्तं दर्शपूर्णमासज्योतिष्टोमादिविषयम्, एककर्तृकत्वात्। बहुवचनान्तन्तु सत्रविषयमेव, तत्र ऋत्विजामपि यजमानत्वादिति मत्वा आह। **सर्वे सुन्वन्त इति॥**

३११३ । अर्हः प्रशंसायाम् । (३-२-१३३)

अर्हन् ।

३११४ । आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु । (३-२-१३४)

क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छीलतद्धर्मतत्साधुकारिषु कर्तृषु बोध्याः ।

३११५ । तृन् । (३-२-१३५)

कर्ता कटम् ।

३११६ । अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् । (३-२-१३६)

अलङ्करिष्णुरित्यादि । (निराकरिष्णुः । प्रजनिष्णुः । उत्पचिष्णुः । उत्पतिष्णुः । उन्मदिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । वर्तिष्णुः । वर्धिष्णुः । सहिष्णुः । चरिष्णुः ।)

३११७ । णेश्छन्दसि । (३-२-१३७)

'वीरुधः पारयिष्णवः' ।

अर्हः प्रशंसायाम् ॥ अर्ह इति पञ्चम्या । शतृप्रत्यय इति शेषः । **अर्हन्निति** ॥ पूजामाप्तुं योग्य इत्यर्थः । अत्र प्रशस्तस्यैव पूजायोग्यत्वात् प्रशंसा गम्यते । **आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु** ॥ आङभिविधौ । तदाह । **क्विपमभिव्याप्येति** ॥ 'भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्' इति सूत्रमभिव्याप्येति यावत् । तत्र ताच्छीलिकाः प्रत्ययाः प्रायेण सोपसर्गेभ्यो नेति 'आदृगमहन' इति सूत्रे भाष्ये स्पष्टम् । तच्छीलः तत्स्वभावः फलमनपेक्ष्य स्वभावादेव प्रवर्तमान इति यावत् । सः धर्मः यस्य सः तद्धर्मा । स्वधर्मोऽयमिति प्रवर्तमानः । तस्य धात्वर्थस्य साधुकर्ता तत्साधुकारी । **तृन्** ॥ धातोस्तृन्प्रत्ययः स्यात् तच्छीलादिषु कर्तृषु । तच्छीले उदाहरति । **कर्ता कटमिति** ॥ कटकरणक्रियाशील इत्यर्थः । 'न लोक' इति षष्ठीनिषेधः । 'न लोक' इति सूत्रे तृन्नित्यनेन 'लटः शतृ' इत्यारभ्य एतत्सूत्रस्थनकारेण प्रत्याहाराश्रयणात् । तद्धर्मणि यथा । मण्डयितारः श्राविष्ठायनाः । ऊढां वधूं श्राविष्ठायना नाम देशविशेषीयाः वधूमण्डनं स्वधर्मं इत्यनुष्ठातार इत्यर्थः । तत्साधुकारिणि कर्ता कटमित्येवोदाहरणम् । कट साधु करोतीत्यर्थः । **अलंकृञ** ॥ अलंकृञ्, निराकृञ्, प्रजन, उत्पच, उत्पत, उन्मद, रुचि, अपत्रप, वृतु, वृधु, सह, चर, एषां द्वादशानामितरेतरद्वन्द्वात्पञ्चमी । एभ्यः तच्छीलादिषु कर्तृषु इष्णुच् स्यात् । **इत्यादीति** ॥ निराकरिष्णुः प्रजनिष्णुः उत्पचिष्णुः उत्पतिष्णुः उन्मदिष्णुः रोचिष्णुः अपत्रपिष्णुः वर्तिष्णुः वर्धिष्णुः सहिष्णुः चरिष्णुः । **णेश्छन्दसि** ॥ ण्यन्ताद्धातोरिष्णुच् स्यात् छन्दसीत्यर्थः । **पारयिष्णव इति** ॥

३११८। भुवश्च। (३-२-१३८)

छन्दसीत्येव। भविष्णुः। कथं तर्हि 'जगत्प्रभोरप्रभविष्णु वैष्णवम्' इति। निरङ्कुशाः कवयः। चकारोऽनुक्तसमुच्चयार्थः। भ्राजिष्णुरिति वृत्तिः। एवं क्षयिष्णुः। नैतद्भाष्ये दृष्टम्।

३११९। ग्लाजिस्थश्च क्स्नुः। (३-२-१३९)

छन्दसीति निवृत्तम्। गिदयं न तु कित्। तेन स्थ ईत्त्वं न। ग्लास्नुः। गित्त्वान्न गुणः। जिष्णुः। स्थास्नुः। चाङ्गुवः। 'श्रयुकः किति' (सू २३८१) इत्यत्र गकारप्रश्लेषान्नेट्। भूष्णुः। 'दंशेश्छन्दस्युपसङ्ख्यानम्' (वा २१२९)। 'दङ्क्ष्णवः पशवः।'

३१२०। त्रसिगृधिधृषिक्षिपेः क्नुः। (३-२-१४०)

त्रस्नुः। गृध्नुः। धृष्णुः। क्षिप्नुः।

३१२१। शमित्यष्टाभ्यो घिनुण्। (३-२-१४१)

उकार उच्चारणार्थ इति काशिका। अनुबन्ध इति भाष्यम्। तेन शमिनितरा—शमिनीतरा इत्यत्र 'उगितश्च' (सू ९८७) इति ह्रस्वविकल्पः।

पूधातोर्ण्यन्तादिष्णुचि णेर्लोपम्बाधित्वा 'अयामन्ताल्वाय्य' इत्ययू। इदं सूत्रं वैदिकप्रक्रियायामेव व्याख्यातुमुचितम्। **भुवश्च** ॥ **छन्दसीत्येवेति** ॥ भूधातोरिष्णुच् स्यात्। तच्छीलादिषु छन्दसीत्यर्थः। अण्यन्तार्थ आरम्भः। **ग्लाजिस्थश्च** ॥ **निवृत्तमिति** ॥ व्याख्यानादिति भावः। चात् भुव इत्यनुकृष्यते। ग्ला, जि, स्था, एषान्द्वन्द्वात्पञ्चभी। ग्ला, जि, स्था, भू इत्येभ्यः क्स्नुः स्यात् तच्छीलादिष्वित्यर्थः। ककार इत्। स्थाम्नु इत्यत्र कित्त्वलक्षणं 'घुमास्था' इतीत्त्वमाशङ्क्य आह। **गिदयमिति** ॥ सूत्रे चर्त्वेन ककारानिर्देश इति भावः। **गित्त्वान्न गुण इति** ॥ 'कृकृङिति च' इत्यत्र गस्य चर्त्वेन ककारान्तरप्रश्लेषादिति भावः। **ननु** भूष्णुरित्यत्र इट् स्यात्, 'श्रयुकः किति' इति कित एव इण्निषेधात्। अस्य च गित्त्वादित्यत आह। **इन्युक इति** ॥ **प्रश्लेषादिति** ॥ चर्त्वेनेति भावः। **त्रसिगृधि** ॥ तच्छीलादिषु कर्तृष्विति शेषः। **त्रस्नुरिति** ॥ नडुशीति नेट। गृध्नुः धृष्णुरित्यत्र कित्त्वान्न गुणः। **शमित्यष्टाभ्यः** ॥ इतिशब्दः आदिपर्यायः। शमादयः दिवादौ स्थिताः। तेभ्यः अष्टाभ्यो घिनुण् स्यात् तच्छीलादिष्वित्यर्थः। घित्त्वमुत्तरसूत्रार्थम्। "अकर्मकेभ्य एव घिनुण्" इति भाष्यम्। **शमिनितरा-शमिनीतरेति** ॥ शमिनशब्दात् स्त्रियान्नान्तलक्षणङीबन्तात् तरबन्ताट्टाप्। **ह्रस्वविकल्पः इति** ॥ भाष्यमते उगित्त्वाद्ह्रस्वः। काशिकामते तु उगित्त्वाभावान्न ह्रस्वः।

न चैवं शमी शमिनावित्यादौ नुम्प्रसङ्गः । झल्ग्रहणमपकृष्य झलन्तानामेव तद्विधानात् । 'नोदात्तोपदेशस्य–' (सू २७६३) इति वृद्धिनिषेधः । शमी । तमी । दमी । श्रमी । भ्रमी । क्षमी । क्रमी । प्रमादी । उत्पूर्वान्मदेः अलङ्कृञादिसूत्रेणेष्णुजुक्तः, वासरूपविधिना घिनुणपि । उन्मादी । 'ताच्छीलिकेषु वासरूपविधिर्नास्ति' इति तु प्रायिकम् ।

३१२२ । सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसञ्ज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च । (३–२–१४२)

घिनुण्स्यात् । सम्पर्की । अनुरोधी । आयामी । आयासी । परिसारी । संसर्गी । परिदेवी । संज्वारी । परिक्षेपी । परिराटी । परिवादी । परिदाही । परिमोही । दोषी । द्वेषी । द्रोही । दोही । योगी । आक्रीडी । विवेकी । त्यागी । रागी । भागी । अतिचारी । अपचारी । आमोषी । अभ्याघाती ।

३१२३ । वौ कषलसकत्थस्नम्भः । (३-२-१४३)

नच ह्रस्वाभावे 'तसिलादिषु' इति पुंवत्त्वं शङ्क्यम् । 'संज्ञापूरण्योश्च' इति निषेधात् । ननु भाष्यरीत्या उगित्त्वाभ्युपगमे शमी–शमिनौ इत्यादौ 'उगिदचाम्' इति नुम् स्यादित्याशङ्क्य निराकरोति । **न चैवमिति ॥ झल्ग्रहणमपकृष्येति ॥** 'नपुंसकस्य झलचः' इति उत्तरसूत्रादिति भावः । एतच्च प्रकृतसूत्रे 'युवोरनाकौ' इति सूत्रे च भाष्ये स्पष्टम् । शमादिभ्यो घिनुणि उपधावृद्धिमाशङ्क्य आह । **नोदात्तेति ॥ प्रमादीति ॥** मान्तत्वाभावान्न वृद्धिनिषेधः । ननु उत्पूर्वान्मदेरुन्मादीति कथं घिनुण् । अलङ्कृञादिसूत्रे उत्पूर्वान्मदेर्विशिष्य इष्णुचो विधानादित्यत आह । **उत्पूर्वादित्यादिना ॥** ननु कथमत्र ताच्छीलिके घिनुणि वासरूपविधिप्रवृत्तिः । ताच्छीलिकेषु वासरूपविधिर्नास्तीति निषेधादित्यत आह । **ताच्छीलिकेष्विति ॥** इयम्परिभाषा 'निन्दाहिंस' इत्यादिवक्ष्यमाणसूत्रे ज्ञापितेति भाष्ये स्पष्टम् । **प्रायिकमिति ॥** एतच्च 'सूददीपदीक्षश्च' इति दीपग्रहणादिति 'जुचङ्क्रम्यदन्द्रम्य' इति सूत्रे भाष्ये स्पष्टम् । **सम्पृचानुरुधाङ्यमाङ्यस ॥** सम्पृच, अनुरुध, आङ्यम, आङ्यस, परिसृ, संसृज, परिदेवि, संज्वर, परिक्षिप, परिरट, परिवद, परिदह, परिमुह, दुष, द्विष, द्रुह, दुह, युज, आक्रीड, विविच, त्यज, रज, भज, अतिचर, अपचर, आमुष, अभ्याहन्, एषां सप्तविंशानां द्वन्द्वात्पञ्चमी । **सम्पर्कीति ॥** 'चजोः' इति कुत्वम् । अनुरोधीत्यादौ लघूपधगुणः । अदुपधेषु उपधावृद्धिः । **परिदेवीति ॥** 'देवृ देवने' भ्वादिः । दीव्यतेस्तु प्यन्तस्य न ग्रहणम् । लाक्षणिकत्वात्, अण्यन्तैस्साहचर्याच्च । **अभ्याघातीति ॥** 'हनस्तोऽचिण्णलोः' इति तत्वम् । 'हो हन्तेः' इति कुत्वम् । **वौ कषलस ॥** कष, लस,

विकाषी। विलासी। विकत्थी। विस्रम्भी।

३१२४। अपे च लषः। (३-२-१४४)

चाद्वौ। अपलाषी। विलाषी।

३१२५। प्रे लपसृद्रुमथवदवसः। (३-२-१४५)

प्रलापी। प्रसारी। प्रद्रावी। प्रमाथी। प्रवादी। प्रवासी।

३१२६। निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ्। (३-२-१४६)

पञ्चम्यर्थे प्रथमा। एभ्यो वुञ्स्यात्। निन्दकः। हिंसकः, इत्यादि। ण्वुला सिद्धे वुञ्वचनं ज्ञापकं तच्छीलादिषु वासरूपन्यायेन तृजादयो नेति।

३१२७। देविक्रुशोश्चोपसर्गे। (३-२-१४७)

आदेवकः। आक्रोशकः। 'उपसर्गे' किम्। देवयिता। क्रोष्टा।

कत्थ, स्रम्भ्, एषान्द्वन्द्वात्पञ्चमी। एभ्यो घिनुण् स्यात् ताच्छील्यादिष्वित्यर्थः। **अपे च लषः॥ चाद्वाविति॥** वौ उपपदेऽपीत्यर्थः। अपे वौ च उपपदे लषः घिनुण् इत्यर्थः। ताच्छील्यादिष्वेवेत्यर्थः। **प्रे लप॥** लप, सृ, द्रु, मथ, वद्, वस्, एषां षण्णान्द्वन्द्वात्पञ्चमी। प्रे उपपदे एभ्यः घिनुण् स्यात् ताच्छील्यादिष्वित्यर्थः। **निन्दहिंस॥** निन्द, हिंस, क्लिश, खाद, विनाश, परिक्षिप, परिरट, परिवादि, व्याभाष, असूय, एषां दशानां द्वन्द्वः। **पञ्चम्यर्थे प्रथमेति॥** सौत्रं पुंस्त्वमेकवचनं वेति भावः। विनाशेति विपूर्वस्य नशेर्ण्यन्तस्य भाविना णिलोपेन निर्देशः। शकारादकार उच्चारणार्थः। केचित्तु विनाशीति ण्यन्तमेव पठन्ति। परिवादीति तु ण्यन्तमेव। असूयेति कण्ड्वादियगन्तः। **इत्यादीति॥** क्लेशकः, खादकः, विनाशकः, परिक्षेपकः, परिराटकः, परिवादकः, व्याभाषकः, असूयकः। ननु 'असूयो वुञ्' इति असूयतेरेव वुञ्विधीयतां, न तु निन्दादिभ्योऽपि, तेषां ण्वुलैव सिद्धेः। लित्स्वरादित्स्वरयोस्तु नास्ति विशेषः। उभयथाप्युदात्तत्वात्। असूयतेस्तु ण्वुलि प्रत्ययात् पूर्वं ऊकार उदात्तः। वुञि तु 'ञ्नित्यादिर्नित्यम्' इति धातोरकार उदात्त इति विशेषः। तस्मादसूयतेरेव वुञ्विधिरिति युक्तमित्यत आह। **ण्वुला सिद्धे इति॥ तृजादयो नेतीति॥** तच्छीलादिषु वासरूपविधिसत्त्वे हि तद्विषये ण्वुलस्सरूपतया वुञा नित्यम्बाधेऽपि तृजादयः स्युः। अत्र वासरूपविध्यप्रवृत्तौ तु 'तृन्' इति सूत्रेण तच्छीलादिषु तृनि प्राप्ते वुञ्विधिरर्थवान्। अतस्तच्छीलादिषु वासरूपविधिर्न प्रवर्तत इति भावः। इदं च प्रायिकम्। तत्फलन्तु उत्पूर्वान्मदेरलंकृञादिसूत्रेण इष्णुजुक्तः, वासरूपविधिना घिनुणपीति मूल एवानुपदमुक्तम्। **देविक्रुशोः॥** देवीति चुरादिण्यन्तस्य 'दिवु क्रीडा' इत्यस्य च ग्रहणम्। उपसर्गे उपपदे देवयतेः क्रुशेश्च तच्छीलादिषु वुञ्

३१२८ । चलनशब्दार्थादकर्मकाद्युच् । (३-२-१४८)

चलनार्थाच्छब्दार्थाच्च युच् स्यात् । चलनः । चोपनः । कम्पनः । शब्दनः । रवणः । 'अकर्मकात्' किम् । पठिता विद्याम् ।

३१२९ । अनुदात्तेतश्च हलादेः । (३-२-१४९)

अकर्मकाद्युच्स्यात् । वर्तनः । वर्धनः । 'अनुदात्तेतः' किम् । भविता । 'हलादेः' किम् । एधिता । 'अकर्मकात्' किम् । वसिता वस्त्रम् ।

३१३० । जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः । (३-२-१५०)

'जु' इति सौत्रो धातुर्गतौ वेगे च । जवनः । चङ्क्रमणः । दन्द्रमणः । सरणः । पूर्वेण सिद्धे पदग्रहणं 'लषपतपद—' (सू ३१३४) इत्युकञ्बाधा मा भूदिति । तेन ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्तीति । तेनालङ्कृञस्तृन्न ।

३१३१ । क्रुधमण्डार्थेभ्यश्च । (३-२-१५१)

क्रोधनः । रोषणः । मण्डनः । भूषणः ।

स्यादित्यर्थः । **चलन ॥ शब्दन इति ॥** 'शब्द शब्दने' चुरादिः । शब्दनं शब्दोच्चारणम् । धात्वर्थोपसङ्ग्रहादकर्मकः । **अनुदात्तेतश्च ॥** आदिग्रहणाभावे हलन्तादित्यर्थः स्यात् । ततश्च जुगुप्सनः इति न स्यात् । सन्नन्तस्य हलन्तत्वाभावात् । अस्ति चानुदात्तेत्त्वं सन्नन्तस्य । गुप इत्यनुदात्तेत्त्वस्य केवले प्रयोजनाभावेन सन्नन्तार्थत्वात् । **जुचंक्रम्यदन्द्रम्य ॥** जु, चङ्क्रम्य, दन्द्रम्य, सृ, गृधि, ज्वल, शुच, लष, पत, पद एषान्दशानां द्वन्द्वात्पञ्चमी । एभ्यः तच्छीलादिषु युच् स्यादित्यर्थः । धातुपाठे जुधातोरदर्शनादाह । **जु इति सौत्र इति ॥ चङ्क्रमण इति ॥** यङन्ताद्युच् । 'यस्य हलः' इति यकारलोपः, अतो लोपः । एवन्दन्द्रमणः, सरणः, गर्द्धनः, ज्वलनः, शोचनः, लषणः, पतनः, पदनः, इत्यप्युदाहार्यम् । **पूर्वेणेति ॥** 'अनुदात्तेतश्च हलादेः' इत्यनेनेत्यर्थः । **तेनेति ॥** उकञ्बाधं तच्छीलाधिकारस्थः । तत्र वासरूपविधिनैव उकञ् 'अनुदात्तेतश्च हलादेः'इति विहितस्य पदेर्युचः बाधो न भविष्यतीति 'जुचङ्क्रम्य' इति युञ्बाधरनर्थकः स्यात् । अतस्ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्ति इति विज्ञायत इत्यर्थः । 'निन्दहिंस' इति सूत्रे तच्छीलादिषु वासरूपविधिना तृजादयो नेति ज्ञापितम् । इह तु ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्तीति ज्ञाप्यते इति न पौनरुक्त्यम् । **तृन्नति ॥** अलम्पूर्वात् कृञः अलंकृञित्यादिसूत्रविहितेन तच्छीलाधिकारस्थेन इष्णुचा 'तृन्' इति सामान्यविहितः तच्छीलाधिकारस्थो बाध्यते इत्यर्थः । **क्रुधमण्डार्थेभ्यश्च ॥** 'क्रुध

३१३२। न यः। (३-२-१५२)

यकारान्ताद्युञ्न स्यात्। क्नूयिता। क्ष्मायिता।

३१३३। सूददीपदीक्षश्च। (३-२-१५३)

युञ्न स्यात्। सूदिता। दीपिता। दीक्षिता। 'नमिकम्पि—' (सू ३१४७) इति रेण युचो बाधे सिद्धे दीपेर्ग्रहणं ज्ञापयति 'ताच्छीलिकेषु वासरूपविधिर्नास्ति' इति प्रायिकमिति। तेन कम्रा कमना युवतिः। कम्प्रा कम्पना शाखा। यदि सूदेर्युञ्न, कथं मधुसूदनः। नन्द्यादिः।

३१३४। लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्। (३-२-१५४)

लाषुकः। पातुकः इत्यादि।

३१३५। जल्पभिक्षकुट्टलुण्टवृङः षाकन्। (३-२-१५५)

जल्पाकः। भिक्षाकः। कुट्टाकः। लुण्टाकः। वराकः। वराकी।

३१३६। प्रजोरिनिः। (३-२-१५६)

कोपे' 'मडि भूषायाम्' एतदर्थेभ्यः धातुभ्यो युच् स्यात् तच्छीलादिष्वित्यर्थः। **न यः**॥ य इति पञ्चम्यन्तं धातुविशेषणम्। तदन्तविधिः। तदाह। **यकारान्तादिति**॥ **क्नूयिता। क्ष्मायितेति**॥ 'क्नूयी शब्दे उन्दने च' 'क्ष्मायी विधूनने' 'अनुदात्तेतश्च हलादेः' इति युच् निषिध्यते। तृनेव भवति। **सूददीप**॥ सूद, दीप, दीक्ष, एषान्द्वन्द्वात्पञ्चमी। **युञ्नेति**॥ शेषपूरणमिदम्। 'अनुदात्तेतश्च' इति प्राप्तो युच् प्रतिषिध्यते। नान्विह दीपग्रहणं व्यर्थम्। 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' इति विशेषविहितेन रप्रत्ययेन युचो बाधसिद्धेः। नच वासरूपविधिना तद्बाधः शङ्क्यः। ताच्छीलिकेषु वासरूपविधेः प्रतिषेधादित्यत आह। **नमिकम्पीति रेणेति**॥ रप्रत्ययेनेत्यर्थः। **प्रायिकामति**॥ तथा चात्र वासरूपविधिना ताच्छीलिकेनापि रप्रत्ययेन युचो बाधसम्भवात् इह दीपेर्युचो निषेधोऽर्थवानिति भावः। **तेनेति**॥ ताच्छीलिकेऽपि क्वचिद्वासरूपविधेस्सत्त्वादित्यर्थः। **कम्रा कमनेति**॥ इच्छाशीलेत्यर्थः। 'अनुदात्तेतश्च' इति युच 'नमिकम्पि' इति रेण पक्षे बाध इति भावः। **कम्प्रा, कम्पनेति**॥ चलनशीलेत्यर्थः। अत्रापि 'नमिकम्पि' इति रेण युच पक्षे बाध इति भावः। आक्षिपति। **यदीति**॥ 'सूददीपदीक्षश्च' इति सूदर्युच्प्रतिषिध्यते तदा मधुसूदन इति कथमित्यन्वयः। समाधत्ते। **नन्द्यादिरिति**॥ सूदिरिति शेषः। तथाच 'नन्दिग्राह' इति ल्युप्रत्यय इति भावः। **लषपत**॥ एभ्यो दशभ्यः उकञ् स्यात् तच्छीलादिष्वर्थेषु। **इत्यादीति**॥ पादुकः। आतो युक्, स्थायुकः। भावुकः, वर्षुकः, घातुकः 'हनस्तः' इति तत्वम्। हो हन्तेः' इति कुत्वम्। कामुकः, गामुकः, शारुकः। **जल्पभिक्ष**॥ एभ्यः पञ्चभ्यष्षाकन् स्यात्। तच्छीलादिष्वित्यर्थः। षनाविती। स्त्रियां षित्त्वान्ङीष्। जल्पाकः, इत्यादि। **प्रजोरिनिः**॥

प्रजवी—प्रजविनौ—प्रजविनः ।

३१३७ । जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च । (३-२-१५७)

जयी । दरी । क्षयी । विश्रयी । अत्ययी । वमी । अव्यथी । अभ्यमी । परिभवी । प्रसवी ।

३१३८ । स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् । (३-२-१५८)

आद्यास्त्रयश्चुरादावदन्ताः । स्पृहयालुः । गृहयालुः । पतयालुः । दयालुः । निद्रालुः । तत्पूर्वो द्रा, तदो नान्तत्वं निपात्यते । तन्द्रालुः । श्रद्धालुः । 'शीङो वाच्यः' (वा २१४०) । शयालुः ।

३१३९ । दाधेट्सिशदसदो रुः । (३-२-१५९)

दारुः । धारुः । सेरुः । शद्रुः । सद्रुः ।

३१४० । सृघस्यदः क्मरच् । (३-२-१६०)

सृमरः । घस्मरः । अघ्मरः ।

३१४१ । भञ्जभासमिदो घुरच् । (३-२-६१)

जुस्तौत्रो धातुः । प्रपूर्वादस्मात् इनिप्रत्ययः स्यात् तच्छीलादिष्वित्यर्थः । नकारादिकार उच्चारणार्थः । **जिदृक्षि** ॥ जि, दृ, क्षि, विश्रि, इण्, वम, अव्यथ, अभ्यम, परिभू, प्रसू, एषां दशानां द्वन्द्वः । 'जि जये, जि अभिभवे, दृङ् आदरे, क्षि क्षये, क्षि निवासगत्योः, श्रिञ् सेवायां' विपूर्वः । 'इण् गतौ, वमु उद्गिरणे, व्यथ भयसञ्चलनयोः' नञ्पूर्वः । निपातनात् नञो धातुना समासे 'न लोपो नञः' इति नकारलोपः । 'अम गत्यादिषु' अभिपूर्वः । 'भू सत्तायाम्' परिपूर्वः । 'सू प्रेरणे' प्रपूर्वः । एभ्यः इनिः स्यात्तच्छीलादिष्वित्यर्थः । सूति-सूयत्योस्तु सानुबन्धकत्वात् नेह ग्रहणम् । **स्पृहिगृहि** ॥ स्पृहि, गृहि, पति, दयि, निद्रा, तन्द्रा, श्रद्धा, एभ्यः सप्तभ्यः आलुच् स्यात्तच्छीलादिष्वित्यर्थः । **स्पृहयालुरिति** ॥ स्पृह-धातोरदन्तादालुच् । 'अयामन्त' इति णेरय्, णिलोपापवादः । अल्लोपस्य स्थानिवत्त्वान्न लघूपधगुणः । एवं गृहयालुः । पतयालुरित्यत्र तु अल्लोपस्य स्थानिवत्त्वान्नोपधावृद्धिः । **निद्रालुरिति** ॥ 'द्रा कुत्सायाङ्गतौ' निपूर्वादालुच् । **तत्पूर्वोद्रेति** ॥ तच्छब्दपूर्वो द्राधातुः तन्द्रत्यनेन गृह्यत इत्यर्थः । **श्रद्धालुरिति** ॥ श्रदित्यव्ययम्, तत्पूर्वात् धाधातोरालुच् । **शीङो वाच्य इति** ॥ आलुजिति शेषः । **दाधेट्** ॥ दा, धेट्, सि, शद्, सद्, एषां द्वन्द्वात्पञ्चमी । एभ्यो रुप्रत्ययः स्यात्तच्छीलादिष्वित्यर्थः । **सृघस्यदः** ॥ सृ, घसि, अद्, एषां द्वन्द्वात्पञ्चमी । घसिः प्रकृत्यन्तरम् । **भञ्जभास** ॥ भञ्ज, भास, मिद्, एषां द्वन्द्वात्

भङ्गुरः। भासुरः। मेदुरः।

३१४२। विदिभिदिच्छिदेः कुरच्। (३-२-६२)

विदुरः। भिदुरम्। छिदुरम्।

३१४३। इण्नशिजिसर्तिभ्यः क्वरप्। (३-२-१६३)

इत्वरः। इत्वरी। नश्वरः। जित्वरः। सृत्वरः।

३१४४। गत्वरश्च। (३-२-१६४)

गमेरनुनासिकलोपोऽपि निपात्यते। गत्वरी।

३१४५। जागुरूकः। (३-२-१६५)

जागर्तेरूकः स्यात्। जागरूकः।

३१४६। यजजपदशां यङः। (३-२-१६६)

एभ्यो यङन्तेभ्य ऊकः स्यात्। दशामिति भाविना नलोपेन निर्देशः। यायजूकः। जञ्जपूकः। दन्दशूकः।

३१४७। नमिकम्पिस्म्यजसकमहिंसदीपो रः। (३-२-१६७)

पञ्चमी। एभ्यः घुरच् स्यात् तच्छीलादिष्वित्यर्थः। घचावितौ। **भंगुर इति** ॥ 'चजोः' इति कुत्वम्। **विदिभिदि** ॥ तच्छीलादिष्वित्येव। विदेर्ज्ञानार्थस्यैव ग्रहणम्, नतु लाभार्थस्य, व्याख्यानादित्याहुः। विदुर इत्यादौ कित्त्वान्न लघूपधगुणः। **इण्नशिजि** ॥ इण्, नशि, जि, सृ, एभ्यः क्वरप् स्यात् तच्छीलादिष्वित्यर्थः। कित्त्वान्न गुणः। पित्त्वन्तु तुगर्थम्। **गत्वरश्च** ॥ **गमेरिति** ॥ गमेः क्वरप् अनुनासिकलोपश्च निपात्यते इत्यर्थः। झलादिप्रत्ययपरकत्वाभावादनुनासिकलोपस्याप्राप्तिः। पित्त्वात्तुक्। **गत्वरीति** ॥ 'टिड्ढ' इति ङीप्। **जागुरूकः** ॥ जागृ इत्यस्य जागुरिति पञ्चम्यन्तम्पदम्। तदाह। **जागर्तेरिति** ॥ तच्छीलादिष्वित्येव। **जागरूक इति** ॥ ऋकारस्य गुणः, रपरत्वं। सिद्धरूपन्तु न निपातितम्, उत्तरसूत्रे ऊक इत्यननुवृत्तिप्रसङ्गात्। **यजजपदशां यङः** ॥ यज, जप, दश, एषां त्रयाणां द्वन्द्वः। पञ्चम्यर्थे षष्ठी। तदाह। **एभ्य इति** ॥ तच्छीलादिष्वित्येव। ननु दंशेर्नोपधत्वात् कथन्दशामिति निर्देश इत्यत आह। **भाविनेति** ॥ ऊके कृते सति भविष्यतो नलोपस्यात्र निपातनमिति यावत्। **यायजूक इति** ॥ 'यस्य हलः' इति यलोपः। 'अतो लोपः, दीर्घोऽकेतः' इत्यभ्यासस्य दीर्घः। **जञ्जपूक इति** ॥ 'जपजभदहदशभञ्जपशां च' इत्यभ्यासस्य नुक्। एवन्दन्दशूकः। निपातनान्नकारलोपः। **नमिकम्पि** ॥ नमि, कम्पि, स्मि, अजस, कम, हिंस, दीप्, एषान्द्वन्द्वात्पञ्चम्येकवचनम्। एभ्यस्सप्तभ्यो रप्रत्ययः स्यात् तच्छीलादिष्वित्यर्थः। अजसधातोः धातुपाठे अदर्शनात् आह।

नम्रः । कम्प्रः । स्मेरः । जसिर्नञ्पूर्वः क्रियासातत्ये वर्तते । अजस्रम्, सन्ततमित्यर्थः । कम्रः । हिंस्रः । दीप्रः ।

३१४८ । सनाशंसभिक्ष उः । (३-२-१६८)

चिकीर्षुः । आशंसुः । भिक्षुः ।

३१४९ । विन्दुरिच्छुः । (३-२-१६९)

वेत्तेर्नुम् इषेश्छत्वं च निपात्यते । वेत्ति तच्छीलो विन्दुः । इच्छति इच्छुः ।

३१५० । क्याच्छन्दसि । (३-२-१७०)

'देवाञ्जिगाति सुम्नयुः' ।

३१५१ । आदृगमहनजनः किकिनौ लिट् च । (३-२-१७१)

आदन्ताद्दन्ताद्गमादिभ्यश्च किकिनौ स्तश्छन्दसि तौ च लिड्वत् । पपिः सोमम् । ददिर्गाः । बभ्रिर्वज्रम् । जग्मिर्युवा । 'जघ्निर्वृत्रममित्रियम्' जक्षिः । 'भाषायां धाञ्कृसृगमिजनिनामिभ्यः' (वा २१४४) दधिः । चक्रिः ।

जसिर्नञ्पूर्व इति ॥ 'जसु मोक्षणे' अयन्नञ्पूर्वश्शक्तिस्वभावात् क्रियासातत्ये वर्तते इत्यर्थः। निपातनाद्धातुना नञः समासे 'नलोपो नञः' इति नलोपः। **सनाशंस** ॥ सन्, आशंस, भिक्ष, एषान्त्रयाणान्द्वन्द्वात्पञ्चम्येकवचनम् । सनिति सन्प्रत्ययान्तं गृह्यते । 'षणु दाने, षण सम्भक्तौ' इत्यनयोस्तु न ग्रहणम् । गर्गादिषु विजिगीषुशब्दपाठाल्लिङ्गात् । एभ्यः उप्रत्ययः स्यात् तच्छीलादिष्वित्यर्थः। **आशंसुरिति** ॥ 'आङः शासु इच्छायाम्' इत्यस्मादुः। **विन्दुरिच्छुः** ॥ **वेत्तेरिति** ॥ 'विद ज्ञाने' इत्यस्मादुप्रत्यये प्रकृतेर्नुमागमः । 'इषु इच्छायाम्' इत्यस्मादुप्रत्यये षकारस्य छत्वञ्च निपात्यत इत्यर्थः । **वेत्तीति** ॥ धातुप्रदर्शनम् । **तच्छील इति** ॥ वेदनशील इत्यर्थः । **इच्छतीति** ॥ 'इषु इच्छायाम्' इति धातुप्रदर्शनम् । **इच्छुरिति** ॥ एषणशील इत्यर्थः। **क्याच्छन्दसि** ॥ क्यप्रत्ययान्तादुप्रत्ययः स्यात् तच्छीलादिषु छन्दसीत्यर्थः। **सुम्नयुरिति** ॥ सुम्नं सुखम् । तदात्मन इच्छतीत्यर्थे सुम्नशब्दात् क्यच् । 'न च्छन्दस्यपुत्रस्य' इति निषेधात् 'क्यचि च' इति ईत्वम्, 'अकृत्सार्वे' इति दीर्घश्च न। सुम्नयुरिति क्यजन्तादुप्रत्ययः, आतो लोपः । **आदृगम** ॥ आत्, ऋ, गम, हन, जन, एषान्द्वन्द्वात्पञ्चमी। लिट्चेति व्याचष्टे । **तौ च लिड्वदिति** ॥ कि किन् अनयोर्द्वन्द्वः। तच्छीलादिष्वित्येव । **पपिरिति** ॥ पाधातोः किः, द्वित्वादि, आल्लोपः । **ददिरिति** ॥ दाधातोः किः, द्वित्वादि । **बभ्रिर्वज्रमिति** ॥ भृञः किः, द्वित्वादि । **जघ्निरिति** ॥ हनः किः, द्वित्वादि । 'गमहन' इत्युपधालोपः । 'हो हन्तेः' इति कुत्वम् । **जक्षिरिति** ॥ जनेः किः, द्वित्वादि । एवं किन्यपि बोध्यम् । स्वरे विशेषः । छान्दसमप्येतत्सूत्रद्वयम्भाषायामित्यादिवक्ष्यमाणवार्तिकविवेचनाय

सस्निः। जग्मिः। जह्निः। नेमिः। 'सासहिवावहिचाचलिपापतीनामुपसङ्ख्यानम्' (वा २१४४)। यङन्तेभ्यः सहत्यादिभ्यः किकिनौ पतेर्नीगभावश्च निपात्यते।

३१५२। स्वपितृषोर्नजिङ्। (३-२-१७२)

स्वप्नक्। तृष्णक्, तृष्णजौ, तृष्णजः। 'धृषेश्चेति वाच्यम्' इति काशिकादौ। धृष्णक्।

३१५३। शृवन्द्योरारुः। (३-२-१७६)

शरारुः। वन्दारुः।

३१५४। भियः क्रुक्लुकनौ। (३-२-१७४)

भीरुः। भीलुकः। 'क्रुकन्नपि वाच्यः' (वा २१४५)। भीरुकः।

३१५५। स्थेशभासपिसकसो वरच्। (३-२-१७५)

स्थावरः। ईश्वरः। भास्वरः। पेस्वरः। कस्वरः।

३१५६। यश्च यङः। (३-२-१७६)

इहोपन्यस्तम्। **भाषायामिति** ॥ वार्तिकमिदम्। धात्, कृ, सृ, गमि, जनि, नमि, एभ्यष्षड्भ्यः किकिनौ, तौ च लिड्वदिति वक्तव्यमित्यर्थः। **दधिरित्यादि** ॥ किकिनोः कृतयोः द्वित्वादि यथासम्भवं ज्ञेयम्। **नेमिरिति** ॥ नमेः किः। द्वित्वम्, एत्त्वाभ्यासलोपौ। **सासहीति** ॥ सहेर्यङि द्वित्वादौ 'दीर्घोऽकितः' इति दीर्घे, किकिनोः कृतयोः 'यस्य हलः' इति यकारलोपे अतो लोपे सासहीति निर्देशः। एवं वहेः चलेः पतेश्च यङन्तस्य किकिनन्तस्य निर्देशः। एषान्निपातनस्य उपसङ्ख्यानमित्यर्थः। तदाह। **यङन्तेभ्यस्सहत्यादिभ्य इति** ॥ **नीगभाव इति** ॥ 'नीग्वञ्चु' इति प्राप्तस्य नीगागमस्याभाव इत्यर्थः। **स्वपितृषोर्नजिङ्** ॥ पञ्चम्यर्थे षष्ठी। स्वपेः तृषेश्च, नजिङ् स्यात् तच्छीलादिष्वित्यर्थः। जकारादिकार उच्चारणार्थः। ङकार इत्। **स्वप्नगिति** ॥ स्वपनशील इत्यर्थः। स्वप्नजौ—स्वप्नजः। एवं तृष्णक्, तर्षणशील इत्यर्थः। **धृषेश्चेति** ॥ नजिङिति शेषः। **काशिकादाविति** ॥ भाष्ये तु न दृश्यते इति भावः। **शृवन्द्योरारुः** ॥ पञ्चम्यर्थे षष्ठी। 'शृ हिंसायाम्' 'वदि अभिवादनस्तुत्योः' आभ्याम् आरुप्रत्ययः स्यात्तच्छीलादिष्वित्यर्थः। **भियः** ॥ भीधातोः क्रुः क्लुकन् एतौ स्तः। तच्छीलादिष्वित्यर्थः। कित्त्वान्न गुणः। **स्थेश** ॥ 'ष्ठा गतिनिवृत्तौ, ईश ऐश्वर्ये, भासृ दीप्तौ, पिसृ पेसृ गतौ, कस गतौ' एभ्यः वरच् स्यात्तच्छीलादिष्वित्यर्थः। ईश्वरीति तु पुंयोगे ङीष्। **यश्च यङः** ॥ 'या प्रापणे' इत्यस्य धातोरनुकरणस्य या इत्यस्य

यातेर्यङन्ताद्वरच् स्यात्। 'अतो लोपः' (सू २३८०) तस्य 'अचः परस्मिन्—' (सू ५०) इति स्थानिवद्भावे प्राप्ते न पदान्त इति सूत्रेण यलोपं प्रति स्थानिवद्भावनिषेधात् 'लोपो व्योः—' (सू ८७३) इति यकारलोपः। अल्लोपस्य स्थानिवत्त्वमाश्रित्य आतो लोपे प्राप्ते 'वरे लुप्तं न स्थानिवत्'। यायावरः।

३१५७। भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्। (३-२-१७७)

विभ्राट्। भाः—भासौ। धूः—धुरौ। विद्युत्। ऊर्क्। पूः—पुरौ। दृशिग्रहणस्याप्यपकर्षाज्जवतेर्दीर्घः। जूः—जुवौ—जुवः। ग्रावशब्दस्य धातुना समासः सूत्रे निपात्यते। ततः क्विप्। ग्रावस्तुत्।

यः इति षष्ठ्यन्तम्। तदाह। **यातेरिति**॥ याधातोर्यङ्, द्वित्वादि 'दीर्घोऽकितः' इत्यभ्यासस्य दीर्घः, यायाय इति यङन्ताद्वरचि विशेषमाह। **अतो लोप इति**॥ हलः परत्वाभावात् 'यस्य हलः' इति यकारलोपो न। यायाय् वर इति स्थिते आह। **लोपो व्योरिति यकारलोप इति**॥ ननु अतो लोपस्य 'अचः परस्मिन्' इति स्थानिवत्त्वात् अकारेण व्यवधानात् वल्परत्वाभावात् कथमिह यलोप इत्यत आह। **तस्येति**॥ तस्य अल्लोपस्य यलोपे कर्तव्ये 'न पदान्त' इति स्थानिवत्त्वनिषेधादित्यर्थः। एवञ्च यङोऽकारस्य यकारस्य च लोपे यायावर इत्यत्र 'आतो लोप इटि च' इत्यालोपमाशङ्क्य निराकरोति। **अल्लोपस्येति**॥ यङकारलोपस्य 'अचः परस्मिन्' इति स्थानिवत्त्वमाश्रित्य तदकारात्मकार्धधातुकपरत्वात् आकारस्य 'आतो लोप इटि च' इत्यालोपे प्राप्ते सति परिहार उच्यते इत्यर्थः। परिहारमेवाह। **वरे लुप्तन्न स्थानिवदिति**॥ लुप्तमिति भावे क्तः। 'न पदान्त' इति सूत्रे वरे इत्यनेन वरे परे विहितन्न स्थानिवदिति लभ्यते। अल्लोपोऽयमार्धधातुके परे विहितः। अतः तस्य स्थानिवत्त्वाभावान्न यङोऽकारमाश्रित्य 'आतो लोप इटि च' इत्यस्य प्रवृत्तिरित्यर्थः। एवञ्च 'न पदान्त' इति सूत्रे वरे इत्यंशस्य यलोपे इत्यंशस्य च यायावर इत्युदाहरणमिति बोध्यम्। **भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः**॥ भ्राज, भास, धुर्वी, द्युत, ऊर्जि, पृ, जु, ग्रावस्तु, एभ्योऽष्टभ्यः क्विप्स्यात् तच्छीलादिषु कर्तृष्वित्यर्थः। **विभ्राडिति**॥ 'व्रश्च' इति षः। **भा इति**॥ भासेः क्विपि सकारान्तस्य रुत्वविसर्गौ। **धूरिति**॥ धुर्वीधातोः क्विप्। 'राल्लोपः' इति वकारस्य लोपः। धुर् इति रेफान्तम्। सुलोपः। 'वोरुपधायाः' इति दीर्घः। **पूरिति**॥ पृधातोः क्विप्। 'उदोष्ठ्य' इत्युत्त्वम्, रपरत्वम्। पुर् इति रेफान्तम्, सुलोपे 'वोः' इति दीर्घः। जुधातोः क्विपि दीर्घं साधयितुमाह। **दृशिग्रहणस्याप्यपकर्षादिति**॥ उत्तरसूत्रादिति भावः। अत्र व्याख्यानमेव शरणम्। ननु ग्रावस्तु इति कथं समस्तनिर्देशः। सुबन्तस्य ग्रावशब्दस्य धातुना समासासम्भवादित्यत आह। **ग्रावशब्दस्येति**॥

३१५८। अन्येभ्योऽपि दृश्यते। (३-२-१७८)

क्विप्। छित्। भिद्। दृशिग्रहणं विध्यन्तरोपसंग्रहार्थम्। क्वचिद्दीर्घः, क्वचिदसम्प्रसारणं, क्वचिद्वे, क्वचिद्ध्रस्वः। तथा च वार्तिकम्। 'क्विब्वचि प्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणञ्च' (वा २१४७-४८)। क्विब्वचीत्यादिनोणादिसूत्रेण केषाञ्चित्सिद्धे तच्छीलादौ तृना बाधा मा भूदिति वार्तिके ग्रहणम्। वक्तीति वाक्। पृच्छतीति प्राट्। आयतं स्तौति आयतस्तूः। कटं प्रवते कटप्रूः। जुरुक्तः। श्रयति हरिं श्रीः। 'द्युतिगमिजुहोतीनां द्वे च' (वा २१४९)। दृशिग्रहणादभ्याससंज्ञा। दिद्युत्। जगत्। 'जुहोतेर्दीर्घश्च' (वा २१४९)। जुहूः। 'दृ भये'। अस्य ह्रस्वश्च। दीर्यति। ददत्। 'ध्यायतेः सम्प्रसारणञ्च' (वा २१५१)। धीः।

३१५९। भुवः संज्ञान्तरयोः। (३-२-१७९)

मित्रभूर्नाम कश्चित्। धनिकाधमर्णयोरन्तरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः।

ग्रावस्तुदिति ॥ पित्त्वात्तुक्। **अन्येभ्योऽपि** ॥ **क्विबिति** ॥ शेषपूरणमिदम्। भ्राजभास इत्यादिसूत्रोपात्तापेक्षया अन्येभ्योऽपि धातुभ्यः तच्छीलादिषु कर्तृषु क्विप् दृश्यते इत्यर्थः। **विध्यन्तरेति** ॥ विधीयते इति विधिः, कार्यं, कार्यान्तरोपसङ्ग्रहार्थमित्यर्थः। तदेव दर्शयति। **क्वचिद्दीर्घ इत्यादि** ॥ **क्विब्वचीत्यादिनेति** ॥ 'क्विब्वचिप्रच्छायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणञ्च' इत्यौणादिकसूत्रेणेत्यर्थः। **तृना बाधा मा भूदिति** ॥ वासरूपविधिषु ताच्छीलिकेषु नेति भावः। **वागिति** ॥ वचधातोः क्विप्। वचनात् उपधाया दीर्घः। 'वचिस्वपि' इति सम्प्रसारणाभावश्च। एवं कटप्रूरित्यत्र दीर्घः। **प्राडिति** ॥ वचनान्न सम्प्रसारणम्। **जुरुक्त इति** ॥ 'भ्राजभास' इत्यत्रेति शेषः। अतोऽत्र तद्ग्रहणम्मास्त्विति भावः। **श्रीरिति** ॥ श्रिञः क्विपि दीर्घः। **द्युतीति** ॥ 'द्युतिगमिजुहोत्यादीनाद्द्वित्वं क्विप्च' इति वाच्यमित्यर्थः। 'पूर्वोऽभ्यासः' इत्यत्र षाष्ठद्विर्वचन एव पूर्वखण्डस्याभ्यासंज्ञावचनादाह। **दृशिग्रहणादिति** ॥ 'अन्येभ्योऽपि दृश्यते' इत्यत्रेत्यर्थः। ततश्चाभ्यासकार्यं हलादिशेषादीति भावः। **दिद्युदिति** ॥ 'द्युतिस्वाप्योः' इति सम्प्रसारणम्। **जगदिति** ॥ गमेः क्विप् 'गमः क्वौ' इति मलोपे तुक्। **जुहोतेर्दीर्घश्चेति** ॥ वार्तिकमिदम्। चात्क्विप्द्वित्वे। **ह्रस्वश्चेति** ॥ वार्तिकमिदम्। **ददिति** ॥ ह्रस्वे कृते तुक्। **ध्यायतेरिति** ॥ वार्तिकमिदम्। चात् क्विप्। **धीरिति** ॥ ध्यैधातोः क्विपि सम्प्रसारणे पूर्वरूपे 'हलः' इति दीर्घ इति भावः। अत्र 'ध्यायतेस्सम्प्रसारणञ्च' इत्युणादिषु पठितत्वादिदं वार्तिकं मास्त्विति आहुः। वस्तुतस्तु उणादिसूत्राणि न पाणिनीयानि किन्तु ऋष्यन्तरप्रणीतानीति वक्ष्यन्ते, अतो न पौनरुक्त्यशङ्का। **भुवः संज्ञान्तरयोः** ॥ क्विबिति शेषः। संज्ञान्तरयोरेवेति नियमार्थं सूत्रम्। संज्ञाया-

३१६० । विप्रसम्भ्यो ड्वसंज्ञायाम् । (३-२-१८०)

एभ्यो भुवो ड्वः स्यान्न तु संज्ञायाम् । विभुर्व्यापकः । प्रभुः स्वामी । सम्भुर्जनिता । संज्ञायां तु विभूर्नाम कश्चित् । 'मितद्वादिभ्य उपसङ्ख्यानम्' (वा २१५२) । मितं द्रवतीति मितद्रुः । शतद्रुः । शम्भुः । अन्तर्भावितण्यर्थोऽत्र भवतिः ।

३१६१ । धः कर्मणि ष्ट्रन् । (३-२-१८१)

धेटो धात्वश्च कर्मण्यर्थे ष्ट्रन्स्यात् । षो ङीषर्थः । 'धात्री जनन्यामलकी-वसुमत्युपमातृषु' ।

३१६२ । दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे । (३-२-१८२)

दाबादेः ष्ट्रन्स्यात्करणेऽर्थे । दान्त्यनेन दात्रम् । नेत्रम् ।

३१६३ । तितुत्रतथसिसुसरकसेषु च । (७-२-९)

एषां दशानां कृत्प्रत्ययानामिण्न स्यात् । शस्त्रम् । योत्रम् । योक्त्रम् । स्तोत्रम् । तोत्रम् । सेत्रम् । सेक्त्रम् । मेद्रम् । पत्रम । दंष्ट्रा । नद्री ।

मुदाहरति । **मित्रभूर्नामेति** ॥ अन्तरे उदाहरति । **धनिकेत्यादि** ॥ यावद्द्रव्यभाविन्यः संज्ञाः । प्रतिभूशब्दस्तु सत्येव पुरुषे कदाचित्र भवति । ऋणे प्रतिदत्ते सति प्रातिभाव्यस्य निवृत्तेः । **विप्रसम्भ्यः** ॥ ड्व असंज्ञायामिति छेदः । **विभुरिति** ॥ ङित्त्वसामर्थ्यादभस्यापि टेर्लोपः । **सम्भुरिति** ॥ संभवति उत्पादयतीति सम्भुः । तदाह । **जनितेति** ॥ **मितद्वादिभ्य इति** ॥ मितद्वादिसिद्ध्यर्थं ड्वप्रत्ययस्य उपसङ्ख्यानमित्यर्थः । **शम्भुरिति** ॥ शं सुखं भवति उत्पादयतीत्यर्थः । तदेवोपपादयति । **अन्तर्भावितेति** ॥ **धः कर्मणि ष्ट्रन्** ॥ धेटः कृतात्वस्य धात्वश्च ध इति पञ्चम्यन्तम् । तदाह । **धेट इत्यादि** ॥ षकारात् तकारस्य ष्टुत्वसम्पन्नटकारेण निर्देशः, षस्य इत्संज्ञायां लोपे सति ष्टुत्वसम्पन्नस्य निवृत्तिः । तदाह । **धात्रीत्यादि** ॥ **दाम्नी** ॥ दाप्, नी, शस, यु, युज, स्तु, तुद, सि, सिच, मिह, पत, दश, नह, एषां त्रयोदशानां द्वन्द्वः । 'दाप् लवने' इत्यस्य पकारस्य स्थाने 'यरोऽनु' इति कृतमकारस्य निर्देशः । अत्र शसेः पतेश्च त्रप्रत्यये इटमाशङ्क्य आह । **तितुत्रत** ॥ ति, तु, त्र, त, थ, सि, सु, सर, क, स, एषां दशानां द्वन्द्वः । अत्र सरेत्येकम् । ति, तन्तिः, 'स्त्रियाम्' इति क्तिन् । तु, सक्तुः, 'तनिगमि' इत्यादिना तुप्रत्ययः । त्र, शस्त्रम्, पत्त्रम् । 'दात्री' इति त्रप्रत्ययः । त, हस्तः । औणादिकः तप्रत्ययः । क्तप्रत्यये तु हसितमित्येव । थ कुष्ठम् । औणादिकः क्थप्रत्ययः । सि कुक्षिः । कुषेरौणादिकः क्सिप्रत्ययः । सु, इक्षुः, इषेरौणादिकः क्सुप्रत्ययः । सर, अक्षरम्, अशेस्सरन् । क, शल्कः, शलेः कः । स, वत्सः, वदेः सः । **मेद्रमिति** ॥ 'मिह सेचने' त्रः । ढत्वधत्वष्टुत्वढलोपाः ।

३१६४। हलसूकरयोः पुवः। (३-२-१८३)

पूङ्पूञोः करणे ष्ट्रन्स्यात्। तच्चेत्करणं हलसूकरयोरवयवः। हलस्य सूकरस्य वा पोत्रम्। मुखमित्यर्थः।

३१६५। अर्तिल्धूसूखनसहचर इत्रः। (३-२-१८४)

अरित्रम्। लवित्रम्। धुवित्रम्। सवित्रम्। खनित्रम्। सहित्रम्। चरित्रम्।

३१६६। पुवः संज्ञायाम्। (३-२-१८५)

पवित्रम्। येनाज्यमुत्पूयते, यच्चानामिकावेष्टनम्।

३१६७। कर्तरि चर्षिदेवतयोः। (३-२-१८६)

पुव इत्रः स्यात् ऋषौ करणे, देवतायां कर्तरि। ऋषिर्वेदमन्त्रः। तदुक्तमृषिणेति दर्शनात्। पूयतेऽनेनेति पवित्रम्। देवतायां तु 'अग्निः पवित्रं स मा पुनातु'।

इति पूर्वकृदन्तप्रकरणम्।

दंष्ट्रेति ॥ दंशधातोः त्रः। क्ङित्प्रत्ययाभावान्नलोपो न। सूत्रे दशेति शपा निर्देशात् 'दंश-सञ्ज' इति नलोपः। केचित्तु दशेत्यकार उच्चारणार्थः। नलोपनिर्देशात् क्वचिदन्यस्मिन्नपि प्रत्यये अकृङित्यपि नलोप इति दशना दन्ता इत्याहुः। **नद्धीति** ॥ नह्यते अनयेति विग्रहः। चर्मरज्जुः। 'नह बन्धने' त्रः। 'नहो धः' 'झषस्तथोः' इति तस्य धः। षित्त्वान्ङीष्। **हलसूकरयोः पुवः** ॥ **पोत्रमिति** ॥ 'तितुत्रतथसिसुसर' इति नेट्। **अर्तिल्धू** ॥ अर्ति, लू, धू, सू, खन, सह, चर, एषां सप्तानां द्वन्द्वात्पञ्चमी। **पुवः संज्ञायाम्** ॥ इत्र इति शेषः। करणे इत्येव। **पवित्रमिति** ॥ पूयते अनेनाज्यमिति विग्रहः। तदाह। **येनाज्यमिति** ॥ पूयते आचमनोदकादिकमनेनेति विग्रहं मत्वा आह। **यच्चानामिकेति** ॥ अनामिका उपकनिष्ठिकाङ्गुलिः। **कर्तरि च** ॥ **पवित्रमिति** ॥ पावमान्यादि सूक्तम्। **अग्निः पवित्रमिति** ॥ पुनातीत्यर्थः। सामान्याभिप्रायमेकवचनं नपुंसकत्वञ्च ॥

इति श्रीमद्वासुदेवदीक्षितविरचितायां सिद्धान्तकौमुदीव्याख्यायां श्रीबालमनोरमाख्यायां तृतीयाध्यायस्य द्वितीयपादे पूर्वकृदन्तप्रकरणं समाप्तम्।

॥ श्रीरस्तु ॥

॥ अथोणादयः ॥

१ । **कृवापाजिमिस्वदिसाध्यशूभ्य उण्** । करोतीति कारुः, शिल्पी कारकश्च । 'आतो युक्–' (सू २७६१) । वातीति वायुः । पायुर्गुदम् । जयत्यभिभवति रोगान् जायुः औषधम् । मिनोति प्रक्षिपति देहे ऊष्माणमिति मायुः

अथ उणादिप्रारम्भः—'कृवापाजि' इत्यादीन्युणादिसूत्राणि मूले प्रौढमनोरमायाञ्च स्फुटं व्याख्यातानि। तत्र न किञ्चिद्व्याख्यातव्यमुपलभ्यते। तानि चेमान्युणादिसूत्राणि शाकटायनमुनिप्रणीतानि, नतु पाणिनिना प्रणीतानि इति 'उणादयो बहुलम्' इति सूत्रभाष्ये 'नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्' इति वार्तिकव्याख्यानावसरेऽभिहितम्। 'उणादीनां शास्त्रान्तरपठितानां साधुत्वाभ्यनुज्ञानार्थं बहुलग्रहणम्' इति कैयटः। न ह्येषाम्पाणिनीयत्वे शास्त्रान्तरशब्दो युज्यते। उणादिप्रत्ययान्ताश्शब्दाः पाणिनिमते अव्युत्पन्ना एव। अत एव 'आयनेयी' इति सूत्रे "प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेस्सिद्धमुणादयो ह्यव्युत्पन्नानि प्रातिपदिकानि" इति भाष्ये उक्तम्। अत एव च "'आदेशप्रत्यययोः' इति सूत्रभाष्ये उणादयो ह्यव्युत्पन्नानि प्रातिपदिकानि इत्युक्त्वा तर्हि सर्पिषा थजुषेत्यादौ अप्रत्ययत्वात् षत्वाभावमाशङ्क्य बहुलग्रहणात् प्रत्ययसंज्ञामवलम्ब्य षत्वं साधितम्। व्युत्पत्तिपक्षश्च निराकृतः। अतोऽप्युणादिसूत्राणान्न पाणिनीयत्वम्। अत एव 'अजेर्व्यघञपोः' इति सूत्रभाष्ये अजधातोर्युप्रत्यये प्रकृतेर्वीभावे वायुशब्दो व्युत्पादितः। उणादिसूत्राणां पाणिनीयत्वे हि 'कृवापाजि' इत्युणादिसूत्रेण उप्रत्ययमाश्रित्यैव व्युत्पद्येत। एवञ्च क्वचिद्भाष्ये उणादीनां व्युत्पन्नत्वाश्रयणं शास्त्रान्तरमूलकमेव इति शब्देन्दुशेखरे प्रपञ्चितम्। तथा च 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां' इत्युणादिसूत्राणां तथाविधवार्तिकानाञ्च न पौनरुक्त्यशङ्का॥*

कृवापा ॥ "कारुः शिल्पिनि कारके" इति धरणिकोशमभिप्रेत्याह। **कारुरित्यादि** ॥ आद्ये योगरूढिः। द्वितीये तु योगमात्रामिति विवेकः। अत एव द्वितीये धात्वर्थं प्रति कारकान्वयो भवत्येव। तथा च भट्टिः। "राघवस्य ततः कार्यं कारुर्वानरपुङ्गवः। सर्ववानरसेनानामाश्वागमनमादिशत्" इति। पायुः पुंसि। 'गुदन्त्वपानं पायुर्ना' इत्यमरः। पिबत्यनेन तैलादिकामिति विग्रहः। पाति रक्षतीति विग्रहे रक्षकोऽपि। तथा च मन्त्रः। 'भुवस्तस्य स्वतवाः पायुरग्रे' इति। 'स्वतवान्पायौ' इति रुत्वम्। **जायुरिति** ॥ 'भेषजौषधभैषज्यान्यगदो जायुरित्यपि' इत्यमरः। साहचर्यात्पुंस्त्वम्। 'मायुः पित्तं कफः श्लेष्म' इत्यमरः।

---

* उणादिषु बालमनोरमाप्रणेतुर्वासुदेवदीक्षितस्याभिप्रायानुसारेण प्रौढमनोरमा मुद्रयते।

पित्तम्। स्वादुः। साध्नोति परकार्यं साधुः। अश्नुते आशु शीघ्रम्। 'आशुर्व्रीहिः पाटलः स्यात्'।

२। **छन्दसीणः**। 'मा न आयौ'।

३। **दृसनिजनिचरिचटिभ्यो ञुण्**। दीर्यत इति दारु। 'स्नुः प्रस्थः सानुरस्त्रियाम्'। जानु—जानुनी। इह 'जनिवध्योश्च' (सू २५१२) इति न निषेधः। अनुबन्धद्वयसामर्थ्यात्। चारु रम्यम्। चाटु प्रियं वाक्यम्। मृगय्वादित्वात्कुप्रत्यये 'चटु' इत्यपि।

४। **किञ्जरयोः श्रीणः**। किं शृणातीति किंशारुः सस्यशूकं, बाणश्च। जरामेति जरायुर्गर्भाशयः। 'गर्भाशयो जरायुः स्यात्'।

५। **त्रो रश्च लः**। तरन्त्यनेन वर्णा इति तालु।

६। **कृके वचः कश्च**। कृकेन गलेन वक्तीति कृकवाकुः। 'कृकवाकुर्मयूरे च सरटे चरणायुधे' इति विश्वः।

शब्दोऽपि मायुः। 'यत्पशुर्मायुमकृत गोमायुरेको अजमायुरेकः' इत्यादौ वेदभाष्यकारादिभिस्तथैव व्याख्यानात्। स्वदते रोचते इति स्वादुः। विशेष्यनिघ्नोऽयम्। एवं साधुरपि। **आशु शीघ्रमिति**॥ विलम्बाभावमात्रपरत्वे क्लीबं, तद्विशिष्टद्रव्यपरत्वे तु त्रिलिङ्गम्। अथ शीघ्रमित्युपक्रम्य 'क्लीबे शीघ्राद्यसत्त्वे स्यात्त्रिष्वेषां भेद्यगामि यत्' इत्यमरः। व्रीहौ तु पुंस्येव। **छन्दसीणः**॥ उणनुवर्तते। **मा न आयाविति**॥ आयुशब्दो मनुष्यपर्यायेषु वैदिकनिघण्टौ पठितः। अत एव 'त्वामग्ने प्रथममायुमायवे। मानस्तोक' इत्यादिमन्त्रेषु वेदभाष्ये तथैव व्याख्यातम्। अर्वाचीनास्तु 'छन्दसीणः' इति सूत्रं बहुलवचनाद्भाषायामपि प्रवर्तते इति स्वीकृत्य 'आयुर्जीवितकालो ना' इत्यमरग्रन्थे आयुशब्दमुकारान्तं व्याचख्युः। 'वायुना जगदायुर्वा' इति वर्णविवेकः। 'एतेर्णिच्च' इत्युप्रत्ययः। सकारान्तो वक्ष्यमाण आयुरशब्दस्तु लोकवेदयोर्निर्विवाद एव। अत एव जटा आयुरस्येति विग्रहे 'गृध्रं हत्वा जटायुषम्' इति प्रयोगः। कथन्तर्हि, 'मा वधिष्ट जटायुं माम्' इति भट्टिः। 'तटीं विन्ध्यस्याद्रेरभजत जटायोः प्रथमजः' इति विन्ध्यवर्णने अभिनन्दश्चेति चेत्। अर्वाचीनमते तावद्भद्रमेव। वस्तुतस्तु जटां याति प्राप्नोतीति जटायुः। मृगय्वादित्वात् कुः। आयातीत्यायुः। 'जटायुषा जटायुश्च विद्यादायुन्तथायुषा' इति द्विरूपकोशः। **चाटुरिति**॥ 'चटु चाटु प्रियं वाक्यम्' इति हट्टचन्द्रः। "'चाटु चाकृतकसम्भ्रममासाङ्कार्मणत्वमगमद्रमणेषु" इति माघः। 'चाटुर्नरि प्रियोक्तिः स्यात्' इति रत्नमालाकोशः। नरि पुंसि। 'चकर च बहुचाटून् प्रौढयोषिद्वदस्य' इति माघः। इह सूत्रे रहिमपि पठित्वा राहुरित्येके। बाहुलकादिति तु बहवः। **सस्येति**॥ 'किंशारुर्ना सस्यशूके विशिखे कङ्कपक्षिणि' इति मेदिनीकोशः। **त्रो रश्च लः**॥ त्र इति तरतेः षष्ठ्या निर्देशः। के चित्तु त्रोरिति च्छित्वा ऋधातोरपि प्रश्लेषात् इयर्ति अर्यते वा आलुः। शाकविशेषो घटी

७। **भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः**। भरति बिभर्ति वा भरुः, स्वामी हरश्च। म्रियन्तेऽस्मिन्भूतानि मरुर्निर्जलदेशः। शेते शयुः अजगरः। तरुर्वृक्षः। चरन्ति भक्षयन्ति देवता इमामिति चरुः। त्सरुः खड्गादिमुष्टिः। तनु स्वल्पम्। तन्यते कर्मपाशोऽनया इति तनुः, शरीरञ्च। 'स्त्रियां मूर्तिस्तनुस्तनूः'। धनुः शस्त्रविशेषः। 'धनुना च धनुर्विदुः'। 'धनुरिवाजनि वक्रः' इति श्रीहर्षः। मयुः किन्नरः। 'मद्गुः पानीयकाकिका' इति रभसः। न्यङ्कादित्वात्कुत्वं, जश्त्वेन सस्य दः।

८। **अणश्च**। 'लवलेशकणाणवः' चात्कटिवटिभ्याम्। कटति रसनां कटुः। वटति वदतीति वटुः।

९। **धान्ये नित्**। धान्ये वाच्येऽण उप्रत्ययः स्यात्। स च नित्। नित्त्वादाद्युदात्तः, प्रियङ्गवश्चमेऽणवश्च मे। 'व्रीहिभेदस्त्वणुः पुमान्'। निद्ग्रहणं 'फलिपाटि–' इत्यादिसूत्रमभिव्याप्य सम्बध्यते।

चेत्याहुः। 'कर्कर्यालुर्गलन्तिका' इत्यमरः। **भृमृशी** ॥ **भरुरिति** ॥ 'भरुः स्वर्णे हरे पुंसि' इति मेदिनी। 'भरुर्भर्तृकनकयोः' इति हेमचन्द्रः। **शयुरिति** ॥ 'अजगरे शयुर्वाहस इत्युभौ' इत्यमरः। **तरुरिति** ॥ तरन्ति नरकमनेन रोपकाः। **चरुरिति** ॥ 'अनवस्रावितान्तरूष्मपक्व ओदनः' इति याज्ञिकाः। त्रिवृदधिकरणेऽप्येवम्। 'उगवादिभ्यो यत्' इति सूत्रे कैयटस्त्वाह। 'स्थालीवाची चरुशब्दस्तात्स्थ्यादोदने भाक्तः' इति। विश्वप्रकाशे तु 'चरुर्भाण्डे च हव्यान्ने' इति नानार्थतोक्ता। 'अथ पुमान् चरुर्हव्यान्नभाण्डयोः' इति मेदिनी च। 'हव्यपाके चरुः पुमान्' इत्यमरग्रन्थे। कर्मार्थघञन्तेन कर्मधारयमधिकरणार्थघञन्ते षष्ठीतत्पुरुषञ्चाश्रित्य द्वेधा व्याचक्षाणाः स्वाम्यादयोऽपि नानार्थतायामनुकूलाः। 'तनुः काये त्वचि स्त्री स्यात्तिष्वल्पे विरहे कृशे। धनुः पुमान् प्रियालद्रौ राशिभेदे शरासने' इति नान्तमेदिनी। विश्वप्रकाशमुदाहरति। **धनुना चेत्यादि** ॥ 'स्यात्तनुस्तनुषा सार्द्धम्' इत्यतः सार्धमित्यनुषज्यते। **धनुरिवेति** ॥ "शुद्धवंशजनितोऽपि गुणस्य स्थानतामनुभवन्नपि शक्रः। 'क्षिप्नुरेनमृजुमाशु विपक्षं सायकम्' इति श्रीहर्षश्लोकशेषः। "धनुर्वंशविशुद्धोऽपि निर्गुणः किङ्करिष्यति" इति धन्वन्तरिः। केचित्तु इह सूत्रे धनिं न पठन्ति। तेषां मते सकारान्तधनुःशब्दमेवाश्रित्योक्तग्रन्था निर्वाह्याः। तस्यापि पुंस्त्वात्। उक्तं ह्यमरेण। 'अथास्त्रियौ धनुश्चापौ' इति। **किन्नर इति** ॥ 'तुरङ्गवदनो मयुः' इत्यमरः। 'मीनातिमिनोति' इत्यात्वन्तु नेह। बाहुलकात्। कटति रसनामिति कटुः। 'कटुः स्त्री कटुरोहिण्यां लताराजिफलोरपि। नपुंसकमकार्ये स्यात्पुल्लिङ्गो रणमात्रके। त्रिषु तद्वत्सगन्धोश्च मत्सरेऽपि खरेऽपि च' इति मेदिनी। **वटतीति** ॥ 'वटुर्द्विजसुतः स्मृतः' इति संसारावर्तात्। नटवद्वटुरिति तूपचारात्। दन्त्योष्ठ्यादिरयम्। कल्पद्रुमादिप्रामाण्यात्। **अभिव्याप्येति** ॥

१०। **शृस्वृस्निहित्र्यसिदासिसाध्यशूभ्यो रुः** । शृणातीति शरुः। 'शरुरायुधकोपयोः'। स्वरुर्वज्रम्। स्नेहुर्व्याधिः। चन्द्र इत्यन्ये। त्रपु सीसम्। 'पुंसि भूम्न्यसवः प्राणाः'। 'वसुर्ह्रदेऽग्नौ योक्त्रेऽशौ वसु तोये धने मणौ'। हनुर्वक्त्रैकदेशः। क्रेदुश्चन्द्रः। बन्धुः। मनुः। चात् 'बिदि अवयवे'। बिन्दुः।

११। **स्यन्देः सम्प्रसारणं धश्च**। 'देशे नदविशेषेऽब्धौ सिन्धुर्नौ सरिति स्त्रियाम्' इत्यमरः।

१२। **उन्देरिच्चादेः**। उनत्ति इन्दुः।

१३। **ईषेः किच्च**। ईषेरुः स्यात्स च किदादेरिकारादेशश्च। ईषते हिनस्ति इषुः शरः। 'इषुर्द्वयोः'।

१४। **स्कन्देः सलोपश्च**। कन्दुः।

१५। **सृजेरसुम् च**। चात्सलोप उप्रत्ययश्च। रज्जुः।

१६। **कृतेराद्यन्तविपर्ययश्च**। ककारतकारयोर्विनिमयः। तर्कुः सूत्रवेष्टनम्।

१७। **नावश्वेः**। न्यङ्क्वादित्वात्कुत्वम्। नियतमञ्चति **न्यङ्कुर्मृगः**।

१८। **फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च**। **फलेर्गुक् फल्गुः**।

यद्यपि फलिपाटीत्यादिसूत्रं यावदनुवर्तते इति न्यासग्रन्थेन मर्यादीकृत्येत्यपि प्रतीयते। तथापि अभिव्याप्येत्येवोचितम्। 'पिबतं सौम्यं मधु' इत्यादौ मधुशब्दस्याद्युदात्ततादर्शनात्। 'वोतो गुणवचनात्' इति सूत्रे हरदत्तेन अभिव्याप्येति स्पष्टमभिधानाच्चेति भावः। **त्रपु सीसमिति** ॥ तद्धि अग्निं दृष्ट्वा त्रपते लज्जते इव। 'त्रपु सीसकरङ्गयोः' इति मेदिनीकोशः। **हनुरिति** ॥ 'हनुः पुमान् परो गण्डात्' इति वररुचिकोशः। स्त्रीलिङ्गोऽप्ययम्। 'हनुर्हट्टविलासिन्यां मृत्यावल्लगदे स्त्रियाम्। द्वयोः कपोलावयवे" इति मेदिनी। अतिशायने मतुप्। हनुमान्। 'अन्येषामपि दृश्यते' इति दृशिग्रहणात् पाक्षिको दीर्घः। हनूमान्। स्नेहेन बध्नातीति बन्धुः। प्रज्ञादित्वात् बान्धवः। मनुरादिराजो मन्त्रश्च। बिन्दुः पवर्गीयादिः। **कन्दुरिति** ॥ स्कन्दत्यस्मिन् जनताप इति व्युत्पत्त्या भोगस्थानमित्याहुः। अमरस्त्वाह। 'क्लीबेऽम्बरीषं भ्राष्टौ ना कन्दुर्वा स्वेदनी स्त्रियाम्' इति। कन्दुर्वा ना इति पूर्वेणान्वयाद्वा पुमानित्यर्थः। **सृजेरसुम् चेति** ॥ सृजतीति रज्जुः। स्त्रियां, 'रज्जुर्वेण्यां गुणे योषित्' इति मेदिनी। आगमसकारस्य श्चुत्वेन शः, जश्त्वेन जः। **तर्कुरिति** ॥ कृन्तत्यनेनेति विग्रहः। 'तर्कुटी सूत्रला तर्कुः' इति हारावलीकोशः। **फलिपाटि** ॥ एकापि षष्ठी विषयभेदाद्भिद्यते। गुणागमे हि फलेरवयवषष्ठी। पट्यादेशचतुष्टयविधौ तु पाट्यादिभ्यः स्थानषष्ठी। सा धतयोर्विधौ अन्त्येऽल्युपसंहियते इति

पाटेः पटिः । पाटयतीति पटुः । नम्यतेऽनेन नाकुर्वल्मीकम् । मन्यत इति मधु । जायत इति जतु ।

१९ । **वलेर्गुक्च** । 'वल संवरणे' । वल्गुः ।

२० । **शः कित्सन्वच्च** । श्यतेरुः स्यात्स च कित्सन्वच्च । शिशुर्बालः ।

२१ । **यो द्वे च** । ययुरश्वोऽश्वमेधीयः । सन्वदिति प्रकृते द्वेग्रहणमित्व-निवृत्त्यर्थम् ।

२२ । **कुभ्रेश्च** । बभ्रुः । 'बभ्रुर्मुन्यन्तरे विष्णौ बभ्रू नकुलपिङ्गलौ ।' चादन्यतोऽपि । चक्रुः कर्ता । जघ्नुर्हन्ता । पपुः पालकः ।

२३ । **पृभिदिव्यधिगृधिधृषिभ्यः** । कुः स्यात् । पुरुः । भिनत्ति भिदुर्वज्रम् । 'ग्रहिज्या—' (सू २४१२) इति सम्प्रसारणम् । विरहिणं विध्यति विधुः । 'विधुः शशाङ्के कर्पूरे हृषीकेशे च राक्षसे' । गृधुः कामः । धृषुर्दक्षः ।

२४ । **कृग्रोरुच्च** । करोतीति कुरुः । गृणातीति गुरुः ।

२५ । **अपदुःसुषु स्थः** । 'सुषामादिषु च' (सू १०२२) इति षत्वम् । अपष्टु । प्रतिकूलम् । दुष्टु । सुष्टु ।

२६ । **रपेरिच्चोपधायाः** । अनिष्टं रपतीति रिपुः ।

२७ । **अर्जिदृशिकम्यमिपशिवाधामृजिपशितुग्भुग्दीर्घहकारश्च** । अर्जयति गुणान्नृजुः । सर्वानविशेषेण पश्यतीति पशुः । कन्तुः कन्दर्पः । अन्धुः कूपः ।

विवेकः । अनागमकानां सागमका आदेशा इति पक्षे तु स्थानषष्ठ्येवेति बोध्यम् । 'फल्गवसारेऽभिधेयवत् । नदीभेदे मलय्यां स्त्री' इति मेदिनी । **वल संवरणे इति** ॥ दन्त्योष्ठ्यादिः । यत्तूज्ज्वलदत्तेन सूत्रे पवर्गीयादिं पठित्वा, 'बल प्राणने' इत्युपन्यस्तम् । तल्लक्ष्यविरोधादुपेक्ष्यम् । 'अयं नाभा वदति वल्गवो गृहे' इत्यादौ दन्त्योष्ठ्यपाठस्य निर्विवादत्वात् । धरणिकोशस्थमाह । **बभ्रुरिति** ॥ 'बभ्रुर्वैश्वानरे मूलपाणौ च गरुडध्वजे । विशाले नकुले पुंसि पिङ्गले त्वभिधेयवत्॥' इति मेदिनीकोशः । **अन्यतोऽपीति** ॥ 'भ्रः कुश्च' इति वक्तव्ये प्राक् प्रत्ययनिर्देशादित्याहुः । भ्रश्चेति प्रकृतिसंसृष्टेन चकारेण प्रकृत्यन्तरसमुच्चयाच्चेति बोध्यम् । **पृभिदिव्यधिगृधि** ॥ 'पुरुः प्राज्ये अभिधेयवत् । पुंसि स्यादेवलोके च नृत्यभेदपरागयोः' इति मेदिनी । **सुषामेत्यादि** ॥ एतच्च न्यासाद्यनुरोधेनोक्तम् । वार्तिककृता तु, स्थास्थिन्स्थूनामुपसङ्ख्यातम् । 'अपष्टुः पुंसि बाले च वामे स्यादन्यलिङ्गके' इति मेदिनी । **अर्जिदृशि** ॥ 'अर्ज अर्जने' । अस्य ऋजिरादेशः । दृशेः पशिः । कमेस्तुगागमः । 'अम रोगगत्यादिषु ।' अस्य धुगागमः । 'पशि नाशने' । सौत्रो धातुः । अस्य दीर्घः । 'बाधृ लोडने' । अस्य हादेशः । षड्भ्योऽपि कुप्रत्ययः स्यादित्यर्थः । **अविशेषेणेति** ॥ चादिगणे तु पश्विति पठितम् । 'पशु दृश्यर्थमव्ययम्' इति धरणिः । **कन्तुः कन्दर्प इति** ॥ 'कन्तुर्मकराङ्कः'

'पांसुर्ना न द्वयो रजः'। 'तालव्या अपि दन्त्याश्च सम्बसूकरपांसवः'। बाधत इति बाहुः। 'बाहुः स्त्रीपुंसयोर्भुजः'।

२८। **प्रथिभ्रदिभ्रस्जां संप्रसारणं सलोपश्च**। त्रयाणां कुः सम्प्रसारणं भ्रस्जेः सलोपश्च। पृथुः। मृदुः। न्यङ्क्वादित्वात्कुत्वम्। भृज्जति तपसा भृगुः।

२९। **लङ्घिबंह्योर्नलोपश्च**। लघुः। 'बालमूललघ्वलमङ्गुलीनां वा लो रत्वमापद्यते' (वा ४७९८)। रघुर्नृपभेदः। बहुः।

३०। **ऊर्णोतेर्नुलोपश्च**। ऊरु सक्थि।

३१। **महति ह्रस्वश्च**। उरु महत्।

३२। **श्लिषेः कश्च**। श्लिष्यतीति श्लिकुर्भृत्यः। उद्यतो ज्योतिश्च।

३३। **आङ्परयोः खनिशृभ्यां डिच्च**। आ खनतीत्याखुः। परं शृणातीति परशुः। पृषोदरादित्वादकारलोपात्पर्शुरपि।

३४। **हरिमितयोर्द्रुवः**। 'द्रु गतौ' अस्मात् हरिमितयोरुपपदयोः कुः स च डित्। हरिभिर्द्रूयते हरिद्रुर्वृक्षः। मितं द्रवति मितद्रुः समुद्रः।

३५। **शते च**। शतधा द्रवति शतद्रुः। बाहुलकात्केवलादपि। द्रवत्यूर्ध्वमिति द्रुर्वृक्षः शाखा च। तद्वान्द्रुमः।

इति त्रिकाण्डशेषः। **पांसुरिति**॥ 'पडि पसि नाशने।' चुरादिर्दन्त्यान्तः। **स्त्रीपुंसयोरिति**॥ उक्तं ह्यमरेण। 'द्वौ परौ द्वयोर्भुजबाहू' इति। परौ द्वौ भुजबाहुशब्दौ द्वयोः स्त्रीपुंसयोरिति तदर्थः। अकारान्तोऽप्ययम्। अत एव 'बाह्वोश्च भुजयोः पुमान्' इति दामोदरः। 'बाहा भुजेऽपुमान्मानभेदाश्ववृषवायुषु' इति मेदिन्याम्। टाबन्तोऽप्ययम्। **प्रथिभ्रदि**॥ प्रथते इति पृथुः। 'पृथुः स्यान्महति त्रिषु। त्वक्पत्र्याङ्कृष्णजीरेऽथ पुमानग्नौ नृपान्तरे' इति मेदिनी। भ्रदितुं शक्यते अकठिनत्वादिति मृदुः कोमलः। 'भृगुः पुमान् मुनौ हरे तटे शुक्रे' इति मेदिनी। 'भृगुः शुक्रे प्रपाते च जमदग्नौ पिनाकिनि' इति कोशान्तरम्। **लघुरिति**॥ 'पृक्कायां स्त्री लघुः क्लीबं शीघ्रे कृष्णागुरुण्यपि' इति त्रिकाण्डशेषः। 'लघुरगुरौ च मनोज्ञे निःसारे वाच्यवत् क्लीबम्। शीघ्रे कृष्णागुरुणि च पृक्कानामौषधौ तु स्त्री' इति मेदिनी। **नृपभेद इति**॥ एतेन 'अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसम्भवम्' इति व्याख्यातम्। **बहुरिति**॥ बहुस्तु त्र्यादिसङ्ख्यासु विपुले त्वभिधेयवत्' इति मेदिनी। ऊरुर्जङ्घेति उज्ज्वलदत्तः। तन्न। तयोर्भेदात्। ऊर्णूयते आच्छाद्यते इत्यूरुः। कर्मणि प्रत्ययः। **उरु महदिति**॥ कर्तरि प्रत्ययः। **उद्यत इति**॥ स हि यावत्कार्यं श्लिष्यति लगति व्याप्रियते इति यावत्। **पर्शुरपीति**॥ 'पर्शुः परशुना सह' इति विश्वः। **हरिद्रुर्वृक्ष इति**॥ दारुहरिद्रा इत्येके। **तद्वानिति**॥

३६। **खरुशङ्कुपीयुनीलंगुलिगु**। पञ्चैते कुप्रत्ययान्ता निपात्यन्ते। खनते रेफश्चान्तादेशः। खरुः कामः क्रूरो मूर्खोऽश्वश्च। 'शङ्कुर्ना कीलशल्ययोः'। 'पिबतेरीत्त्वं युगागमश्च'। पीयुर्वायसः कालः सुवर्णश्च। निपूर्वाल्लगि गतावस्मात्कुर्नेर्दीर्घश्च। नीलङ्गुः कृमिविशेषः शृगालश्च। 'नीलाङ्गुः' इति पाठान्तरम्। तत्र धातोरपि दीर्घः। 'लग सङ्गे' अस्य अत इत्वश्च। लगतीति लिगु चित्तम्। लिगुर्मूर्खः।

३७। **मृगय्वादयश्च**। एते कुप्रत्ययान्ता निपात्यन्ते। मृगं यातीति मृगयुर्व्याधः। देवयुर्धार्मिकः। मित्रयुर्लोकयात्राभिज्ञः। आकृतिगणोऽयम्।

३८। **मन्दिवाशिमथिचतिचङ्क्यङ्क्षिभ्य उरच्**। मन्दुरा वाजिशाला। वाशुरा रात्रिः। मथुरा। चतुरः। चङ्कुरो रथः। अङ्कुरः। खर्जूरादित्वादङ्कूरोऽपि।

३९। **व्यथेः सम्प्रसारणं किच्च**। 'विथुरश्चोररक्षसोः'।

'युद्रुभ्यां मः'। खरुशब्दस्य क्रूरो मूर्ख इत्यर्थः। द्वयं दशपादीवृत्त्यनुसारेणोक्तम्। खरुः पतिंवरा कन्येत्यपि बोध्यम्। 'खरुर्दन्ते हरे दर्पे हये श्वेते तु वाच्यवत्' इति विश्वत्रिकाण्डशेषौ। **शंकुरिति** ॥ 'शकि शङ्कायाम्'। शङ्कतेऽस्मादिति, 'शङ्कुः कीले गरे शस्त्रे सङ्ख्यापादपभेदयोः। यादोभेदे च पापे च स्थाणावपि च दृश्यते' इति विश्वः। **पीयुरिति** ॥ 'पीयुः काले रवौ घूके' इति मेदिनी। **कृमिविशेष इति**। 'नीलङ्गुः कृमिजातौ स्यात् भम्भरालीप्रसूनयोः' इति विश्वः। **पाठान्तरमिति** ॥ 'नीलङ्कुरपि नीलाङ्गुः' इति विश्वः। **धातोरपीति** ॥ केचित्तु नीलशब्दे उपपदे गमेष्टिलोपः उपपदस्य मुम् दीर्घश्च पाक्षिको निपात्यते इत्याहुः। 'लिगु चित्ते नपुंसकम्' इति वररुचिः। **मृगय्वादयश्च** ॥ 'मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनि' इति मेदिनी। 'मृगयुर्ब्रह्मणि ख्यातो गोमायुव्याधयोरपि। देवयुर्धार्मिके ख्यातो देवयुर्लोकयात्रिके' इति विश्वः। **आकृतिगण इति** ॥ तेन, 'पील प्रतिष्टम्भे' अस्मात्कुः। 'पीलुर्गजे द्रुमे काण्डे परमाणुप्रसूनयोः' इति विश्वः। भट्टास्तु पीलुशब्दस्य वृक्षे आर्यप्रसिद्धिः गजे तु म्लेच्छप्रसिद्धिरित्याश्रित्य व्यवजहुः। कडि मदे। कण्डुरित्यादि बोध्यम्। **वाशुरा रात्रिरिति** ॥ वाश्यन्ते अस्यामिति विग्रहः। वासुरो गर्दभ इत्यन्ये। 'वाशुरा वासितारात्र्योः' इति मेदिनी। 'चङ्कुरः स्यन्दने वृक्षे' इति मेदिनी। 'अङ्कुरो रुधिरे लोम्नि पानीयेऽभिनवोद्भिदि' इति च। **खर्जूरेति** ॥ 'अङ्कूराङ्कुर एव च' इति विश्वप्रकाशः। **व्यथेः** ॥ 'व्यथ भयसञ्चलनयोः'। अस्मादुरच् कित् स्याद्धातोः सम्प्रसारणञ्च। दशपाद्यां तु धः किच्चेति पठित्वा धकारमन्तादेशं विधाय विधुरोऽनिकः इत्युदाहृतम्। माधवेनापि तदेवानुसृतम्। न त्वेतद्युक्तम्। 'त्वमेषां विथुरा शर्वांसि। अतिविद्धा विथुरेणाचिदस्रा' इत्यादिमन्त्रेषु थकारपाठस्य निर्विवादत्वात्। यदपि माधवेनोक्तं विदिभिदि इत्यत्र व्यथेः सम्प्रसारणञ्चेति वचनात् कुरचि थान्तं रूपमिति। तदतिस्थवीयः। कुरञ्जिधायके

४०। **मुकुरदर्दुरौ**। मुकुरो दर्पणः। बाहुलकान्मकुरोऽपि। 'दृ विदारणे' धातोर्द्विर्वचनमभ्यासस्य रुक्टिलोपश्च। 'दर्दुरस्तोयदे भेके वाद्यभाण्डाद्रिभेदयोः'। 'दर्दुरा चण्डिकायां स्याद्ग्रामजाले च दर्दुरम्' इति विश्वः।

४१। **मद्गुरादयश्च**। उरजन्ता निपात्यन्ते। माद्यतेर्गुक्। मद्गुरो मत्स्यभेदः। 'कबृ वर्णे'। रुगागमः। 'कर्बुरं श्वेतरक्षसोः'। बभ्नातेः खर्जूरादित्वादूरोऽपि। 'बन्धूरबन्धुरौ स्यातां नम्रसुन्दरयोस्त्रिषु' इति रन्तिदेवः। 'कोकतेर्वा कुक् (च)' (गण १९५) कुक्कुरः—कुक्कुरः।

४२। **असेरुरन्**। असुरः। प्रज्ञाद्यण्। आसुरः।

४३। **मसेश्च**। पञ्चमे पादे 'मसेरूरन्' इति वक्ष्यते। 'मसूरा मसुरा व्रीहिप्रभेदे पण्ययोषिति'। 'मसूरा मसुरा वा ना वेश्याव्रीहिप्रभेदयोः'। 'मसूरी पापरोगे स्यादुपधाने पुनः पुमान्'। 'मसूरमसुरौ च द्वौ' इति विश्वः।

४४। **शावशेरासौ**। शु इत्याश्वर्थे। श्वशुरः। 'पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः' इत्यमरः।

४५। **अविमह्योष्टिषच्**। अविषः। महिषः।

४६। **अमेर्दीर्घश्च**। 'आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि'।

४७। **रुहेर्ट्टिद्धिश्च**। 'रङ्कुशम्बररौहिषाः'। 'रौहिषो मृगभेदे स्याद्रौहिषञ्च तृणं मतम्' इति संसारावर्तः।

सूत्रे व्यथेरुपसङ्ख्यानस्याप्रसिद्धत्वात्। तस्मादिह धः किच्चेति दशपादीपाठं पुरस्कुर्वन्तः प्रसादकारादयोऽप्युपेक्ष्याः। कथं तर्हि विधुर इति प्रयोगस्य निर्वाह इति चेत्। धुरो विगत इति प्रादिसमासेनेत्यवधेहि। 'समासान्ताः' इति सूत्रे वृत्तिपदमञ्जर्योस्तथैवोक्तत्वात्। **मुकुर इति** ॥ 'मकि मण्डने'। अस्मादुरच् नलोपश्च। **बाहुळकादिति** ॥ धातोरुपधायाः पक्षे उकार इति भावः। 'मुकुरो मकुरोऽपि च' इति विश्वः। 'मुकुरः स्यान्मकुरवत् दर्पणे वकुळद्रुमे। कुलालदण्डे' इति मेदिनी च। **धातोरिति** ॥ केचित्तु गुणो दुरागमश्च निपात्यते इत्याहुः। **कर्बुरमिति** ॥ 'कर्बुरं सलिले हेम्नि कर्बुरः पापरक्षसोः। कर्बुरा कृष्णवृन्तायां शबले पुनरन्यवत्' इति मेदिनी। **अविष इति** ॥ राजा समुद्रश्च। महिषो महान्। 'तुरीयन्धाम महिषो विवक्ति। उत माता महिषमन्ववेनत्।' टित्त्वात् ङीप्। महिषी राजपत्नी। **रुहेः** ॥ 'रौहिषो मृगभेदे स्याद्रौहिषञ्च तृणं मतम्' इति संसारावर्तः।

४८। **तवेर्णिद्वा**। 'तव' इति सौत्रो धातुः। 'तविषताविषावब्धौ स्वर्गे च'। स्त्रियां तविषी—ताविषी नदी देवकन्या भूमिश्च। 'तविषी बलम्' इति वेदभाष्यम्।

४९। **नञि व्यथेः**। 'अव्यथिषोऽब्धिसूर्ययोः'। अव्यथिषी धरारात्र्योः।

५०। **किलेर्बुक्च**। किल्बिषम्।

५१। **इषिमदिमुदिखिदिछिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच्**। इषिरोऽग्निः। मदिरा सुरा। 'मुदिरः कामुकाभ्रयोः' इति विश्वमेदिन्यौ। खिदिरश्चन्द्रः। 'छिदिरोऽसिकुठारयोः'। भिदिरं वज्रम्। मन्दिरं गृहम्। स्त्रियामपि। 'मन्दिरं मन्दिरापि स्यात्' इति विश्वः। 'चन्दिरौ चन्द्रहस्तिनौ'। तिमिरं तमोऽक्षिरोगश्च। मिहिरः सूर्यः। 'मुहिरः काम्यसभ्ययोः'। मुचिरो दाता। रुचिरम्। रुधिरम्। बधिरः। 'शुष शोषणे' शुषिरं छिद्रम्। शुष्कमित्यन्ये।

५२। **अशेर्णित्**। आशिरो वह्निरक्षसोः।

५३। **अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः**। अजेर्वीभावाभावः। अजिरमङ्गणम्। शशेरुपधाया इत्वम्। 'शिशिरं स्यादृतोर्भेदे तुषारे शीतलेऽन्यवत्'। 'श्रथ मोचने' उपधाया इत्वं रेफलोपः। प्रत्ययरेफस्य लत्वम्। शिथिलम्। स्थास्फाय्योष्टिलोपः। स्थिरं निश्चलम्। स्फिरं प्रभूतम्।

वेदभाष्यमिति॥ 'इन्द्रो मित्रस्य तविषीम्। इन्द्रस्यात्र तविषीभ्यः' इत्यादिमन्त्रेष्विति भावः। वैदिकनिघण्टौ, 'ओजः पाज.' इत्यादिषु बलनामसु तविषीशब्दस्य पाठश्चेह मूलमिति बोध्यम्। 'तविषः शोभनाकारे भेलेऽब्धिव्यवसाययोः। तविषी देवकन्यायां पुंसि स्वर्गे महोदधौ॥ तविषी चेन्द्रकन्यायां ना स्वर्गाम्बुधिकाञ्चने' इति मेदिनी। **किलेर्बुक् च**॥ 'किल श्वैत्यक्रीडनयोः'। 'किल्बिषं पापरोगयोः। अपराधेऽपि' इति मेदिनी। **इषिरोऽग्निरिति**॥ आहार इत्यन्ये। 'छिदिरः पावके रज्जौ करवाले परश्वधे। मन्दिरं नगरेऽगारे क्लीबं ना मकरालये। चन्दिरोऽनेकपे चन्द्रे। तिमिरन्ध्वान्तनेत्रामयान्तरे। मिहिरः सूर्यबुधयोः। मुहिरः काममूर्खयोः। रुधिरोऽङ्गारके पुंसि क्लीबन्तु कुङ्कुमासृजोः। शुषिरं वंश्यादिवाद्ये विवरे च नपुंसकम्। मूषिके न स्त्रियां नील्योषधौ रन्ध्रान्विते त्रिषु। आशिरो वीतिहोत्रे स्यात् राक्षसे भास्करे पुमान्' इति मेदिनी। **अजिरमङ्गणमिति**॥ अङ्गेर्ल्युटि अनादेशस्य बाहुलकाण्णत्वमित्येके। अन्ये तु विश्वकोशाद्युपष्टम्भेन दन्त्यमेवेच्छन्ति। इह दशपादीवृत्तौ नञ्पूर्वस्य जीर्यतेः ऋवर्णलोपो निपात्यते इत्युक्तन्तदपि ग्राह्यम्। 'आशुन्दूतमजिरं प्रत्नमीड्यम्' इत्यादौ न जीर्यतीत्यजिरः इत्यर्थस्यानुगुणत्वात्। 'अजिरं प्राङ्गणे कार्यविषये दर्दुरेऽनिले। शिशिरो ना हिमे न स्त्री त्रृतुभेदे जडे

तिष्ठतेर्वुक्ह्रस्वत्वञ्च। स्थविरः। खदिरः। बाहुलकाच्छीङो वुक्ह्रस्वत्वञ्च। शिबिरम्।

५४। **सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्**। सलति गच्छति निम्नमिति सलिलम्। कलिलः। अनिलः। महिळा। पृषोदरादित्वान्महेळापि। भड इति सौत्रो धातुः। 'भडिलौ शूरसेवकौ'। भण्डिलो दूतः कल्याणश्च। शण्डिलो मुनिः। पिण्डिलो गणकः। तुण्डिलो मुखरः। कोकिलः। भविलो भव्यः। बाहुळकात्कुटिलः।

५५। **कमेः पश्च**। कपिलः।

५६। **गुपादिभ्यः कित्**। गुपिलो राजा। तिजिलो निशाकरः। गुहिलं वनम्।

५७। **मिथिलादयश्च**। मथ्यन्तेऽत्र रिपवो मिथिला नगरी। पथिलः—पथिकः।

५८। **पतिकठिकुठिगडिगुडिदंशिभ्य एरक्**। पतेरः पक्षी गन्ता च। कठेरः कृच्छ्रजीवी। कुठेरः पर्णाशः। बाहुळकान्नुम्न। गडेरो मेघः। गुडेरो गुडकः। दंशेरो हिंस्रः।

५९। **कुम्बेर्नलोपश्च**। कुबेरः।

६०। **शदेस्त च**। शतेरः शत्रुः।

६१। **मूलेरादयः**। एरगन्ता निपात्यन्ते। मूलेरो जटा। गुधेरो गोप्ता। गुहेरो लोहघातकः। मुहेरो मूर्खः।

६२। **कबेरोतः पश्च**। कपोतः पक्षी।

त्रिषु। खदिरः शाकभेदे स्यात् ना चन्द्रे दन्तधावने' इति मेदिनी। **शिबिरमिति**॥ शेरतेऽस्मिन् राजानः। 'निवेशः शिबिरं षण्डम्' इत्यमरः। **सलिकलि**॥ **कलिल इति**॥ मिश्रो गहनश्च। **महिळेति**॥ 'महिळा फलिनीस्त्रियोः' इति मेदिनी। **पृषोदरेति**॥ तथाच दमयन्तीकाव्ये, 'परमहेलारतोऽप्यपारदारिकः' इति। परस्य महेला स्त्री। अथ च परमा उत्कृष्टा हेला क्रीडा तत्र रत इत्यर्थः। **कापिल इति**॥ 'कपिला रेणुकायाञ्च शिंशपागोविशेषयोः। पुण्डरीकः करिण्यां स्त्री वर्णभेदे त्रिलिङ्गकम्। नानले वासुदेवे च कुक्कुरे' इति मेदिनी। रेणुकेह लताविशेषः। 'हरेणू रेणुका कौन्ती कपिला भस्मगन्धिनी' इत्यमरात्। **मिथिलादयश्च**॥ मथे विलोडने। अकारस्येत्वं निपातनात्। **कुठेर इति**॥ कठ कृच्छ्रजीवने। कुठि च। द्वितीयस्य इदित्त्वान्नुमि प्राप्ते आह। **बाहुलकादिति**॥ **कबेरोतः**॥ गुपादिसूत्रादारभ्य एतदन्तानि सप्त सूत्राणि केषाञ्चिदसम्मतानि। **कपोत**

६३ । **भातेर्डवतुः** । भातीति भवान् ।

६४ । **कठिचकिभ्यामोरन्** । कठोरः । चकोरः ।

६५ । **किशोरादयश्च** । किंपूर्वस्य शृणातेष्टिलोपः । किमोऽन्त्यलोपः । किशोरोऽश्वशावः । सहोरः साधुः ।

६६ । **कपिगडिगण्डिकटिपटिभ्य ओलच्** । कपीति निर्देशान्नलोपः । कपोलः । गडोलगण्डोलौ गुडकपर्यायौ । कटोलः कटुः । पटोलः ।

६७ । **मीनातेरूरन्** । मयूरः ।

६८ । **स्यन्देः सम्प्रसारणञ्च** । सिन्दूरम् ।

६९ । **सितनिगमिमसिसच्यविधाञ्कुशिभ्यस्तुन्** । सिनोतीति सेतुः । 'तितुत्र–' (३१६३) इति नेट् । तन्तुः । गन्तुः । मस्तु दधिमण्डम् । सच्यत इति सक्तुः । अर्धर्चादिः । 'ज्वर त्वर–' (सू २६५४) इत्यूठ् । तत्र क्ङितीत्यनुवर्तत इति मते तु बाहुलकात् । ओतुर्बिडालः । धातुः । क्रोष्टा ।

७० । **पः कित्च** । पिबतीति 'पितुर्वह्नौ दिवाकरे' ।

७१ । **ऋतेश्च तुः** । अर्तेस्तुः स्यात्स च कित् 'ऋतुः स्त्रीपुष्पकालयोः' ।

इति ॥ 'कपोतः स्याच्चित्रकण्ठे पारावतविहङ्गयोः' इति मेदिनी । 'कपोतः पक्षिमात्रेऽपि' इति त्रिकाण्डशेषः । अत्रौतचश्चित्त्वं प्रामादिकम् । 'यत्कपोतः पदमन्ना कृणोति । देवाः कपोत इषितो यदिच्छन्' इत्यादौ सर्वत्र प्रत्ययस्वरेण मध्योदात्तस्यैव पठ्यमानत्वात् । **कठोर इति** ॥ कठिनः पूर्णश्च । 'कठोरतारधिपलाञ्छनच्छविः' इति माघः । **किशोर इति** ॥ 'किशोरोऽश्वस्य शाबके । तैलपर्ण्यौषधौ च स्यात्तरुणावस्थसूर्ययोः' इति मेदिनी । **कपोल इति** ॥ कटे वर्षावरणयोः । केचित्तु सूत्रे कडि मदे इत्येतं पठन्ति । कण्डोलः पिटकः, चण्डालश्च । 'चण्डालिका तु कण्डोलवीणाचण्डालवल्लकी' इत्यमरः । **पटोल इति** ॥ 'पटोलं वस्त्रभेदे नौषधौ ज्यौत्स्न्यान्तु योषिति' इति मेदिनी । 'कल्ल शब्दे ।' बाहुळकादतोऽप्योलच् । 'कल्लोलः पुंसि हर्षे स्यान्महत्सूर्मिषु वारिणः' इति मेदिनी । **स्यन्देः** ॥ 'सिन्दूरस्तरुभेदे स्यात् सिन्दूरं रक्तचूर्णके । सिन्दूरी रोचनारक्तवेल्लिकाधातकीषु च' इति मेदिनीविश्वप्रकाशौ । **सितनि** ॥ 'सेतुर्नालौ कुमारके' इति मेदिनी । 'सेतुरालौ स्त्रियां पुमान्' इति, 'मण्डन्दधिभवं मस्तु' इति चामरः । 'धातुर्नेन्द्रियेषु च । शब्दयोनिमहाभूततद्गुणेषु रसादिषु । मनःशिलादौ श्लेष्मादौ विशेषाद्रैरिकेऽस्त्रि च' इति मेदिनी । 'श्लेष्मादिसरक्तादिमहाभूतानि तद्गुणाः । इन्द्रियाण्यमविकृतिः शब्दयोनिश्च धातवः' इत्यमरः । **अर्तेश्च तुः** ॥ तुनि प्रकृते अन्तोदात्तत्वार्थन्तुः क्रियते । 'ऋतुना यज्ञम् । य ऋतुर्जनानाम्' इत्यादि । 'ऋतुर्वर्षादिषट्सु च । आर्तवे मासि च पुमान्' इति

७२। **कमिमनिजनिगाभायाहिभ्यश्च**। एभ्यस्तुः स्यात्। 'कन्तुः कन्दर्प-चित्तयोः'। मन्तुरपराधः। जन्तुः प्राणी। 'गातुः पुंस्कोकिले भृङ्गे गन्धर्वे गायनेऽपि च'। भातुरादित्यः। 'यातुरध्वगकालयोः'। रक्षसि क्लीबम्। हेतुः कारणम्।

७३। **चायः किः**। 'केतुर्ग्रहपताकयोः'।

७४। **आप्नोतेर्ह्रस्वश्च**। अप्तुः शरीरम्।

७५। **वसेस्तुन्**। वस्तु।

७६। **अगारे णिच्च**। 'वेश्मभूर्वास्तुरस्त्रियाम्'।

७७। **कृञः क्रतुः**। क्रतुर्यज्ञः।

७८। **एधिवह्योश्चतुः**। एधतुः पुरुषः। वहतुरनड्वान्।

७९। **जीवेरातुः**। 'जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे'।

८०। **आतृकन्वृद्धिश्च**। जीवेरित्येव। 'जैवातृकस्त्विन्दुभिषगायुष्मत्सु कृषीवले'।

८१। **कृषिचमितनिधानिसर्जिखर्जिभ्य ऊः**। 'कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मता'। चमूः। तनूः। धनूः शस्त्रम्। 'सर्ज सर्जने'। सर्जूर्वणिक्। 'खर्ज व्यथने'। खर्जूः पामा।

८२। **मृजेर्गुणश्च**। मर्जूः शुद्धिकृत्।

८३। **वहो धश्च**। 'वधूर्जायास्नुषास्त्रीषु'।

मेदिनी। **कमि**॥ कमिग्रहणं प्रपञ्चार्थम्। 'अर्जिदृशि' इत्यादिना कुप्रत्यये तुकि सिद्धत्वात्। **मन्तु-रिति**॥ 'मन्तुः पुंस्यपराधेऽपि मनुष्येऽपि प्रजापतौ' इति मेदिनी। 'दीर्घं ह्यङ्कुशम्' इति मन्त्रस्य वेदभाष्ये तु मन्तुम इति मन्तुर्ज्ञानन्तद्वान् हे इन्द्रेति व्याख्यातम्। 'गातुर्ना कोकिले भृङ्गे गन्धर्वे त्रिषु रोषणे' इति मेदिनी। 'भातुर्ना किरणे सूर्ये' इति च। **चायः किः**॥ 'केतुर्ना रुक्पताकारिग्रहोत्पातेषु लक्ष्मणि' इति मेदिनी। **अप्तुः शरीरमिति**॥ अभिलषितार्थश्च, आप्तव्यत्वात्। अत एव अप्नोर्यामशब्दस्याभिलषितार्थप्रापक इत्यवयवार्थमाहुः। **कृञः क्रतुः**॥ 'क्रतुर्यज्ञे मुनौ पुंसि' इति मेदिनी। **एधिवह्योश्चतुः**॥ चित्त्वादन्तोदात्तः। 'स्योनं पत्ये वहतुं कृणुष्व'। 'वहतुः पथिके वृषभे पुमान्' इति मेदिनी। **आतृकन्**॥ 'जैवातृकः पुमान् सोमे कृषकायुष्मतोस्त्रिषु' इति मेदिनी। **कृषि**॥ रभसकोशस्थमाह। **कर्षूरिति**॥ 'कर्षूः पुमान् करीषाग्नौ स्त्रियां कुल्याल्पखातयोः' इति मेदिनी। 'सर्जूर्वणिजि विद्युति। स्त्रियां स्वर्गे विधौ रुद्रे' इति, 'खर्जूः कीटान्तरे स्मृता। खर्जूरी पादपे कण्ड्वाम्' इति च। **मृजेः**॥ 'मर्जूः स्त्री शुद्धौ धावकेऽपि च' इति मेदिनी। **वहः**॥ 'वधूः स्नुषा नवोढा स्त्री भार्यापृक्काङ्गनासु च' इति विश्वः। 'पृक्का च महिला

८४। **कषेश्छश्च**। कच्छूः पामा।

८५। **णित्कसिपद्यर्तेः**। कासूः शक्तिः। पादूश्चरणधारिणी। आरूः पिङ्गलः।

८६। **अणो डश्च**। आडूर्जलप्लवद्रव्यम्।

८७। **नञि लम्बेर्नलोपश्च**। 'तुम्ब्यलाबूरुभे समे' इत्यमरः।

८८। **के श्र एरङ् चास्य**। कशब्दे उपपदे शृणातेरूः स्यात् एरङादेशः। 'कशेरूस्तृणकन्दे स्त्री' बाहुलकादुप्रत्यये कशेरुः। क्लीबे पुंसि च।

८९। **त्रो दुट् च**। तरतेरूः स्यात्तस्य दुट्। 'तर्दूः स्याद्दारुहस्तकः'।

९०। **दरिद्रातेर्यालोपश्च**। इश्च आश्च यौ तयोर्लोपः। दर्दूः कुष्ठप्रभेदः।

९१। **नृतिशृध्योः कूः**। नृतूर्नर्तकः। शृधूरपानम्।

९२। **ऋतेरम् च**। ऋतिः सौत्रो धातुः। ततः कूरमागमश्च। **रन्तूर्देवनदी सत्यवाक्च**।

९३। **अन्दूदम्भूजम्बूकफेलूकर्कन्धूदिधिषूः**। एते कूप्रत्ययान्ता निपात्यन्ते। अन्दूर्बन्धनम्। 'दभी ग्रन्थे' निपातनान्नुम्। दम्भूः। अनुस्वाराभावोऽपि निपातनादित्येके। दन्भूः। जनेर्वुक्। जम्बूः। 'जमु अदने' इत्यस्येत्येके।

वधूः' इति त्रिकाण्डशेषः। **कषेः** ॥ कषशषेति दण्डके पठितः। 'कच्छान्तु, पामपामे विचर्चिका' इत्यमरः। **णित्कसि** ॥ कस गतौ। 'कासूर्विकलवाचि स्यात् तथा शक्त्यायुधे स्त्रियाम्' इति मेदिनी। 'कासूः शक्त्यायुधे रुजि। बुद्धौ विकलवाचि स्यात्' इति हेमचन्द्रः। न लम्बते अलाबूः। **त्रो दुट् च** ॥ **तर्दूरिति** ॥ 'नेड्वशि' इति नेट्। वरमनादाविति परिगणनस्यानाश्रितत्वात् बाहुलकाद्वा। केचित्तु त्रो दुक् चेति पठित्वा धातोर्दुगागममाहुः। तेषान्धातोर्गुणो दुर्लभः। चकारबलेन वा साधनीयः, दुगागमात्पूर्वं यत्प्राप्तन्तदपि भवतीति व्याख्यानात्। **दरिद्रातेः** ॥ **इश्च आश्चेति** ॥ भोजदेवस्तु र्यालोप इति रेफादिकं पदं छित्वा द्वेधा व्याख्यत्। इश्च आश्च। दर्दूः। रश्च इश्च आश्च। 'अन्त्यबाधेऽन्त्यसदेशस्य' इति द्वितीयरेफलोपः। दर्दूः। मृगय्वादित्वाद्दर्दुर्हस्वान्तश्च। 'दद्रुणो दद्रुरोगी स्यात्' इत्यमरः। इत्थञ्चत्वारि रूपाणि। **अन्दूदम्भू** ॥ **अन्दूर्बन्धनमिति** ॥ 'अदि बन्धने'। 'अन्दूः स्त्रियां स्यान्निगडे प्रभेदे भूषणस्य च' इति मेदिनी। 'अन्दुको हस्तिनिगडे' इत्यमरः। 'संज्ञायाङ्कन्'। 'केऽणः' इति ह्रस्वः। केचित्तु 'अम गतौ' अस्य दुक् अन्दूर्बुद्धिरिति व्याचख्युः। दभी ग्रन्थे इति तुदादिः। **दम्भूरिति** ॥ सन्दर्भकर्तेत्यर्थः। कथकः इत्यन्ये। अस्य रूपाणि हूहूवदित्युक्तम्। कैयटोऽप्यत्रानुकूलः। माधवादयस्तु दृढशब्दे उपपदे भुवः क्विप्प्रत्ययः, उपपदस्य दृन्नादेशो निपात्यते। यद्वा दृन्निति नान्तमव्ययं दृढार्थकमुपपदं, दृन्भूः, तरुः सर्पः कपिर्वेति व्याख्याय 'दृन्कर' इति य

बाहुलकाद्ध्रस्वोऽपि । जम्बुः । कफं लाति कफेल्लुः श्लेष्मातकः । निपातनादेत्वम् । कर्कं दधाति कर्कन्धूर्बदरी । निपातनान्नुम् । दिधिं धैर्यं स्यति त्यजतीति दिधिषूः पुनर्भूः । केचित्तु 'अन्दूदृम्भूजम्बूकम्बू' इति पठन्ति । 'दृम्फ उत्क्लेशे' दृम्फूः सर्पजातिः । 'कमेर्बुक्' । कम्बूः परद्रव्यापहारी ।

९४ । **मृग्रोरुतिः** । मरुत् । गरुत्पक्षः ।

९५ । **ग्रो मुट् च** । गिरतेरुतिस्तस्य च मुट् । गर्मुत्सुवर्णं तृणविशेषश्च ।

९६ । **हृषेरुलच्** । 'हर्षुलो मृगकामिनोः' । बाहुलकाच्चटतेः । चटुलं शोभनम् ।

९७ । **हसृरुहियुषिभ्य इतिः** । 'हरित्ककुभि वर्णे च तृणवाजिविशेषयोः' । सरिन्नदी । 'रोहित्' मृगविशेषस्य स्त्री । 'युष' इति सौत्रो धातुः । 'ऋश्यस्य रोहित् पुरुषस्य योषित्' इति भाष्यम् ।

९८ । **ताडेर्णिलुक् च** । ताडयतीति तडित् ।

९९ । **शमेर्ढः** । बाहुलकादित्संज्ञा एयादेशः इट् च न । 'शण्ढः स्यात्पुंसि गोपतौ' । शण्ढः । क्लीबः ।

वर्षाभूवद्रूपमस्येत्याहुः । **ह्रस्वोऽपीति** ॥ उदाहृतश्च विक्रमादित्येन । 'तस्या जम्बोः फलरसो नदीभूय प्रवर्तते' इति । यत्तु "परिणतजम्बुफलोपभोगहृष्टा" इति भारविप्रयोगं ह्रस्वान्तत्वे साधकत्वेनोदाजहुः । तन्न । 'इको ह्रस्वोऽङ्यः' इति सूत्रेण गतार्थत्वात् । **दिधिमिति** ॥ केचित्तु दधातेरित्वन्द्वित्वं षुक् च निपात्यते । दधात्यसौ दिधिषूरित्याहुः । उज्ज्वलदत्तोक्तं पाठमाह । **केचित्त्विति** ॥ एतच्च कैयटमाधवादिमहाग्रन्थविरुद्धमित्यवधेयम् । अत एव 'दृम्भूः स्त्री सर्पचक्रयोः' इति भान्ते मेदिनी । **मरुदिति** ॥ प्रज्ञादित्वादणि मारुतोऽपि । मरुतशब्दोऽप्यव्युत्पन्नोऽस्ति । तथा च विक्रमादित्यकोशः । 'मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुत्' इति संसारावर्तश्च । 'कोऽयं वाति स दाक्षिणात्यमरुतः' इति कविराजः । अत्रानुपपत्तिं मत्वा दाक्षिणात्यपवन इति पाठं कल्पयन्त्यल्पदक्षानः इति वर्णविवेकः । **गरुदिति** ॥ यवादिरयम् । तेन मतुपो वत्वं न । गरुत्मान् । **ग्रो मुट् च** ॥ 'गर्मुत् स्त्री स्वर्णलतयोः' इति मेदिनी । विश्वकोशमाह । **हरिदिति** ॥ 'हरिद्दिशि स्त्रियां पुंसि हयवर्णविशेषयोः । अस्त्रियां स्यात्तृणे च' इति मेदिनी । **ऋश्यस्येति** ॥ एतेन 'गतं रोहिद्भूतां रिरमयिषुमृश्यस्य वपुषा' इति पुष्पदन्तप्रयोगो व्याख्यातः । 'रोहिन्मृग्यां लतामेदे स्त्री नार्के' इति मेदिनी । **शमेर्ढः** ॥ **बाहुलकादिति** ॥ यद्यपि 'नेड्वशिकृति' इति इण्निषेधः सुवचः । तथापि नेड्वरमनादाविति परिगणनादेवमुक्तम् । 'शण्ढः स्यात्पुंसि गोपतौ' आकृष्टाङ्गे वर्षवरे तृतीयप्रकृतावपि' इति मेदिनी । **कमठ इति** ॥ 'कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकम्' इति

१०० । **कमेरठः** । कमठः । 'कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकम्' इति मेदिनी । बाहुलकाज्जरठः ।

१०१ । **रमेर्वृद्धिश्च** । रामठं हिङ्गु ।

१०२ । **शमेः खः** । शङ्खः ।

१०३ । **कणेष्ठः** । कण्ठः ।

१०४ । **कलस्तृपश्च** । तृपतेः कलप्रत्ययः । चात्तृफतेः । **तृपला लता** । 'तृफला तु फलत्रिके' ।

१०५ । **शपेर्बश्च** । शबलः ।

१०६ । **वृषादिभ्यश्चित्** । वृषलः । पललम् । बाहुलकाद्रुणः । **सरलः** । तरलः । 'कमेर्बुक् (च)' (गण १९६) कम्बलः । 'मुस खण्डने' मुसलम् । 'लङ्गेर्वृद्धिश्च' (गण १९७) लाङ्गलम् । 'कुटिकशिकौतिभ्यः प्रत्ययस्य मुट् ।

मेदिनी । **जरठ इति** ॥ जॄष् वयोहानौ । 'जरठः कठिने पाण्डौ कर्कशेऽप्यभिधेयवत्' इति विश्वमेदिन्यौ । 'जरठः कठिने जीर्णे' इति वैजयन्ती । **शमेः खः** ॥ 'शङ्खो निधौ ललाटास्थि कम्बौ न स्त्री' इत्यमरः । 'शङ्खः कम्बौ न योषिन्ना भालास्थि निधिभिन्नखे' इति मेदिनी । **कणेष्ठः** ॥ 'कण्ठो गले सन्निधाने ध्वनौ मदनपादपे' इति विश्वमेदिन्यौ । **फलत्रिके इति** ॥ 'त्रिफला तृफला च सा' इति विश्वः । त्रिफलाशब्दसमानार्थस्तृफलाशब्द इति 'द्विगोः' इति सूत्रे रक्षितः । 'शप आक्रोशे' । **वृषादिभ्यश्चित्** ॥ 'शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः' इत्यमरः । 'वृषलस्तुरगे शूद्रे' इति हेमचन्द्रः । **पललमिति** ॥ पल गतौ । 'पललं तिलचूर्णे च पङ्के मांसे नपुंसकम् । ना राक्षसे' इति मेदिनी । 'सरलः पूतिकाष्ठे नाऽथोदारावक्रयोस्त्रिषु' इति मेदिनी । 'सरला विरलायन्ते घनायन्ते कलिद्रुमाः । न शमी न च पुन्नागा अस्मिन्संसारकानने' इत्यभियुक्तप्रयोगः । **कमेरिति** ॥ बाहुलकादित्यत्रानुषज्यते । 'कम्बलो नागराजे स्यात् सास्नाप्रावारयोरपि । कृमावप्युत्तरासङ्गे सलिले तु नपुंसकम्' इति मेदिनी । 'मुसलं स्यादयोऽग्रे च पुंनपुंसकयोः स्त्रियाम् । तालमूल्यामाखुपर्णीगृहगोधिकयोरपि' इति मेदिन्याम् । मूर्धन्यमध्योऽप्ययमिति वर्णदेशना, 'मुस खण्डने' इति धातोर्दन्त्यान्तेषु मूर्धन्यान्तेषु च बोपदेवात्रेयादिभिः पठितत्वात् । उज्ज्वलदत्तादयस्तु तालव्यमध्यमप्याहुः । अत एव मुसलोऽपि चेति विश्वकोशे मुशलोऽपि चेति पाठान्तरम् । **लङ्गेरिति** ॥ बाहुलकादित्येव । एवमग्रेऽपि । 'लाङ्गलं तालहलयोः पुष्पभिद्रुहदारुणोः । लाङ्गली गृहपिप्पल्याम्' इति हेमचन्द्रः । 'लाङ्गली तोयपिप्पल्यां क्लीबन्तु कुसुमान्तरे । गोदारणे तृणे राजगृहदारुविशेषयोः' इति मेदिनी । 'कुड्मलो मुकुले पुंसि न द्वयोर्नरकान्तरे । 'कोमलं मृदुले जले' इति च । बाहुलकादन्यत्रापि । तथा 'कुस श्लेषणे' । दन्त्यान्तो निर्विवादः । बोपदेवमते तालव्यान्तोऽपि । गुणः । कोसलः कोशलो

(च), (गण १९८) कुट्मलः। कुडेरपि। कुड्मलः। कश्मलम्। बाहुलकाद्गुणः। कोमलम्।

१०७। **मृजेष्टिलोपश्च**। मलम्।

१०८। **चुपेरचोपधायाः**। चपलम्।

१०९। **शकिशम्योर्नित्**। शकलम्। शमलम्।

११०। **छो गुग्घस्वश्च**। छगलः। प्रज्ञादित्वाच्छागलः।

१११। **अमन्ताड्डः**। दण्डः। रण्डा। खण्डः। मण्डः। वण्डश्छिन्नहस्तः। अण्डः। बाहुलकात्सत्वाभावः। षण्डः सङ्घातः। तालव्यादिरित्यपरे। शण्डः। गण्डः। चण्डः। पण्डः क्लीबः। पण्डा बुद्धिः।

वा देशविशेषः। 'वृद्धेत्कोसल' इति सूत्रे तु दन्त्यपाठ एव साम्प्रदायिकः। 'सम्ब सम्बन्धे, शम्ब च'। सम्बलम्। 'शम्बलोऽस्त्री सम्बलवत् कुलपाथेयमत्सरे' इति मेदिनी। 'कदि आह्वाने'। नलोपः। गौरादित्वान्ङीष्। 'मदान्दोलितकर्पूरकदलीदलसंज्ञया। विश्रमाय श्रमापन्नानाह्वयन्तमिवाध्वगान्' इति काशीखण्डम्। अजादेराकृतिगणत्वाट्टाबपि। 'कदलाकदलौ पृश्न्यां कदलीकदलौ पुनः। रम्भावृक्षेऽथ कदली पताकामृगभेदयोः॥ कदला डिम्बिकायाञ्च' इति मेदिनी। 'पिजि हिंसायाम्'। न्यङ्क्वादित्वात्कुत्वम्। 'पिङ्गलो नागभिद्वह्निचण्डांशुपारिपार्श्वके। निधिभेदे कवावग्नौ पुंसि स्यात्कपिलेऽन्यवत्॥ स्त्रियां वेश्याविशेषे च करिण्याङ्कुमुदस्य च' इति मेदिनी। कुश इति सौत्रो धातुः। 'कुशलः शिक्षिते त्रिषु। क्षेमे च सुकृते चापि पर्याप्तौ च नपुंसकम्' इति मेदिनी। 'कमु कान्तौ'। 'कमलं सलिलं ताम्रे जलजे व्योम्नि भेषजे। मृगभेदे तु कमलः कमला श्रीवरस्त्रियोः' इति विश्वमेदिन्यौ। 'मडि भूषायाम्'। 'मण्डलं परिधौ कोठे देशे द्वादशराजके। क्लीबेऽथ निवहे बिम्बे त्रिषु पुंसि तु कुक्कुरे' इति मेदिनी। 'कोठो मण्डलकम्' इत्यमरः। 'बिम्बोऽस्त्री मण्डलं त्रिषु' इति च। 'कुडि दाहे', 'पट गतौ', 'छो छेदने'। 'कुण्डलङ्कर्णभूषायां पाशेऽपि वलयेऽपि च। अथ पटलं पिटके च परिच्छदे। छदिर्दंग्रोगतिलके क्लीबं बृन्दे पुनर्नना। छलं स्खलितशाठ्ययोः' इति मेदिनी। **मृजेष्टिलोपश्च**॥ 'मलोऽस्त्री पापविट्किट्टे कृपणे त्वभिधेयवत्' इति मेदिनी। **चुपेः**॥ 'चपलः पारदे मीने चिबुके प्रस्तरान्तरे। चपला कमला विद्युत् पुंश्चलीपिप्पलीषु च। नपुंसकं तु शीघ्रे स्याद्वाच्यवत्तरलं चले' इति मेदिनी। **शकिशम्योः**॥ शकलं खण्डे रोहितादीनान्त्वचि च। तद्योगाच्छकली मत्स्यः। 'मत्स्यान् शकलान्' इति भाष्यम्। 'शकलन्त्वचि खण्डे स्यात् रागवस्तुनि वल्कले' इति मेदिनी। 'शमलं शकृदेनसोः' इति नानार्थरत्नमाला। **छो गुग्**॥ 'छगलं नीलवस्त्रे ना च्छागे स्त्री वृद्धदारके' इति मेदिनी। 'छगलश्छागे च्छगली वृद्धदारकभेषजे' इति हेमचन्द्रः। **अमन्ताड्डः**॥ अमिति प्रत्याहारः। त्रिभ्य एव कणमा इति वृत्तिकारोक्तिस्तु अष्टाध्यायीस्थमात्रविषया। **दण्ड इति**॥ बाहुलकात्, 'चुट्' इति नेत्संज्ञा। 'दण्डोऽस्त्री लगुडेऽपि स्यात्' इत्यमरः। 'दण्डौ सैन्यार्कपार्श्वगौ' इति त्रिकाण्डशेषः। 'रण्डा मूषिकपर्ण्याञ्च विधवायाञ्च योषिति। खण्डोऽस्त्री शकले

११२। **कादिभ्यः कित्**। कवर्गादिभ्यो डः कित्स्यात्। कुण्डम्। काण्डम्। गुङ् गुडः। 'घुण भ्रमणे' घुण्डो भ्रमरः।

११३। **स्थाचतिमृजेरालज्वालञ्चालीयचः**। तिष्ठतेरालच्। स्थालम्—स्थाली। चतेर्वालञ्। चात्वालः। मृजेरालीयच्। मार्जालीयो बिडालः।

११४। **पतिचण्डिभ्यामालञ्**। पातालम्। चण्डालः। प्रज्ञादित्वादणि चाण्डालोऽपीत्येके।

११५। **तमिविशिबिडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन्**। तमालः। विशालः। बिडालः। मृणालम्। कुलालः। कपालम्। पलालम्। पञ्चालाः।

नेक्षुविकारमणिभेदयोः। मण्डः पञ्चाङ्गुले शाकभेदे क्लीबन्तु मस्तुनि। चण्डा तु पांसुलायां स्त्री त्रिषु हस्तादिवर्जिते। अण्डं मुष्कं च पेश्यां स्यात्। षण्डं पद्मादिसङ्घाते न स्त्री स्यात् गोपतौ पुमान्। गण्डः स्यात्पुंसि खड्गिनि। ग्रहयोगप्रभेदे च वीथ्यङ्गे पिटकेऽपि च। चिह्नवीरकपोलेषु हयभूषणबुद्बुदे। चण्डोला तिन्त्रिणीवृक्षे यमकिङ्करदैत्ययोः। चण्डी कात्यायनीदेव्यां हिंस्राकोपनयोषितोः। चण्डा धनहरो शङ्खपुष्पी त्रिष्वतिकोपने। तीव्रेऽपि। पण्डः शठे धियि स्त्री स्यात्' इति मेदिनी। 'फण गतौ'। फण्डः। प्रज्ञादित्वादण्। फाण्डं सुन्दरम्। **कादिभ्यः कित्॥ कुण्डमिति॥** कुण शब्दोपकरणयोः। कित्त्वान्न गुणः। 'कुण्डमग्न्यालये मानभेदे देवजलाशये। कुण्डी कमण्डलौ जारातपतिवह्नीसुते पुमान्। पिठरे तु न ना' इति मेदिनी। **काण्डमिति॥** कमु कान्तौ। 'अनुनासिकस्य क्वि' इति दीर्घः। 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु' इत्यमरः। अर्वा कुत्सितः। अत एव 'काण्डं स्तम्बे तरुस्कन्धे बाणे वरदनीरयोः। कुत्सिते वृक्षभिन्नाडीवृन्दे रहसि न स्त्रियाम्' इति मेदिनी। 'गुडो गोलेक्षुपाकयोः' इत्यमरः। गुडा स्नुही, तद्वत्केशाः अस्य गुडाकेशः, शिवः। जटाधारित्वात्। 'गुडः स्याद्गोलके हस्तिसन्नाहेक्षुविकारयोः। गुडा स्नुह्याञ्च कथिता गुडिकायाञ्च योषिति' इति मेदिनी। **स्थाचति॥** लचा सिद्धे आलचः आकारश्चिन्त्यप्रयोजनः। चित्स्वरं बाधित्वा पक्षे आद्युदात्तार्थ इत्येके। 'स्थालं भाजनभेदेऽपि स्थाली स्यात् पाटलोखयोः' इति मेदिनी। 'चात्वालो यज्ञकुण्डे स्याद्गर्भे च' इति विश्वः। 'मार्जालीयः स्मृतः शूद्रे बिडाले कायशोधने' इति मेदिनी। **पातालमिति॥** उपधावृद्धिः। 'पातालं नागलोके स्याद्विवरे बडबानले' इति मेदिनी। 'चडि कोपे' इत्यस्य तु इदित्त्वान्नुमि अदुपधत्वाभावान्न वृद्धिः। यत्तु माधवग्रन्थे 'पतिचण्डिभ्यामालन्' इति पठित्वा पातालशब्दे बाहुलकाद्वृद्धिमुक्त्वा आलञिति वृद्ध्यर्थं ञितङ्केचित्पठन्ति इत्युपन्यस्य चण्डालशब्देऽपि वृद्धिः स्यादिति दूषितम्। तदतिरभसात्। एके इत्यपरितोषोद्भावनम्। तद्वीजन्तु 'कुलालवरुडकर्मारनिषादचण्डालमित्रामित्रेभ्यश्छन्दसि' इति चण्डालात्स्वार्थेऽणं विदधता वार्तिकेन तद्भाष्येण च सह विरोध इति बोध्यम्। **तमिविशि॥** 'तमु काङ्क्षायाम्, विश प्रवेशने, बिड आक्रोशे, मृण हिंसायाम्, कुल संस्त्याने, कपि चलने, निर्देशान्नलोपः। 'पल गतौ, पाचि विस्तारे। 'तमालस्तिलके खड्गे तापिञ्छे वारुणद्रुमे।

११६। **पतेरङ्गच्पक्षिणि**। पतङ्गः।

११७। **तरत्यादिभ्यश्च**। तरङ्गः। लवङ्गम्।

११८। **बिडादिभ्यः कित्**। बिडङ्गः। मृदङ्गः। कुरङ्गः। बाहुलकादुत्वं च।

११९। **सृवृञोर्वृद्धिश्च**। सारङ्गः। वारङ्गः खड्गादिमुष्टिः।

१२०। **गन्गम्यद्योः**। गङ्गा। अङ्गः पुरोडाशः।

१२१। **छापूखडिभ्यः कित्**। छागः। पूगः। खड्गः। बाहुलकात् 'षिड अनादरे' गन्सत्वाभावश्च। षिङ्गस्तरलः। 'षिङ्गैरगद्यत ससम्भ्रममेवमेका' इति माघः।

१२२। **भृञः किन्नुट् च**। भृञो गन्किदित्स्यात्तस्य नुट् च। 'भृङ्गाः षिङ्गालिधूम्याटाः'।

विशाला त्विन्द्रवारुण्यामुज्जयिन्यान्तु योषिति। नृपवृक्षभिदोः पुंसि पृथुलेऽप्यभिधेयवत्। बिडालो नेत्रपिण्डे स्यात् पृषदंशुकके पुमान्। मृणालं नलदे क्लीबं पुन्नपुंसकयोर्बिसे। कुलालः ककुभे कुम्भकारे स्त्री त्वज्ञनान्तरे। कपालोऽस्त्री शिरोऽस्रि स्याद्घटादेः शकले व्रजे। पाञ्चाली पुत्रिकारीत्योः स्त्रियां पुम्भूम्नि नीवृति' इति मेदिनी। बाहुलकात् इयतेरपि। शाला। 'शल चलने' अस्माद्ञि 'छायाशालानिशानाम्' इति निपातनात् स्त्रीत्वमिति न्यासकारः। बोपदेवस्तु 'शालङ्कत्थने' इति पपाठ। 'शाला द्रुस्कन्धशाखायाङ्गृहे गेहैकदेशयोः। ना झषे' इति मेदिनी। **पतेः**॥ पतेर्बाहुलकादर्थान्तरेऽपि। 'पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्ययोः। क्लीबं सूते' इति मेदिनी। सूते पारदे इत्यर्थः। **तरत्यादिभ्यः**॥ 'तरङ्गस्तुरगादीनामुत्फाले वस्त्रभङ्गयोः' इति विश्वः। **बिडङ्ग इति**॥ 'बिड आक्रोशे'। 'बिलङ्गः कृमिसङ्घेऽपि बिडङ्गो नागरेऽन्यवत्' इति विश्वः। 'बिडङ्गस्त्रिष्वभिज्ञे स्यात् कृमिघ्ने पुंनपुंसकम्' इति मेदिनी। **मृदङ्ग इति**॥ 'मृद क्षोदे। 'मृदङ्गः पटहे घोषे' इति मेदिनी। **कुरङ्ग इति**॥ 'कृ विक्षेपे' बाहुलकादुत्वम्। कुर शब्दे इति वा अस्तु। 'सारङ्गः पुंसि हरिणे चातके च मतङ्गजे। शबले त्रिषु' इति मेदिनी। बाहुलकात् 'नृ नये'। 'अथ नारङ्गः पिप्पलीरसः। यमजप्राणिनिकटे नागरङ्गद्रुमेऽपि च' इति मेदिनी। **गन् गम्यद्योः**॥ बाहुलकादमेरपि। 'अङ्गं गात्र उपाये च प्रतीके चाप्रधानके। अङ्गो देशविशेषे स्यादङ्ग सम्बोधनेऽव्ययम्' इति विश्वः। 'अङ्गं गात्रे प्रतीकोपाययोः पुंभूम्नि नीवृति। क्लीबैकत्वे त्वप्रधाने त्रिष्वङ्गवति चान्तिके' इति मेदिनी। **छापू**॥ छायते छिद्यते यज्ञार्थमिति छागः। पूयते मुखमनेन। 'पूगस्तु क्रमुके वृन्दे' इति मेदिनी। 'खड भेदने'। खड्गो गण्डकशृङ्गे स्यात् निस्त्रिंशे गण्डकेऽपि च' इति शब्दतरङ्गिणी। 'खड्गो गण्डकशृङ्गेऽसिबुद्धभेदेषु गण्डके' इति मेदिनी। **भृञः**॥ किद्ग्रहणं स्पष्टार्थम्, अनुवृत्त्यैव लाभात्। 'भृङ्गो धूम्याटषिङ्गयोः। मधुव्रते भृङ्गराजे पुंसि भृङ्गडुडत्वचि' इति मेदिनी। 'शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके। विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके। स्त्री विषायां

१२३ । **शृणातेर्ह्रस्वश्च** । शृङ्गम् ।

१२४ । **गण्शकुनौ** । नुट् चेत्यनुवर्तते । शार्ङ्गः ।

१२५ । **मुदिग्रोर्गग्गौ** । मुद्गः । गर्गः ।

१२६ । **अण्डन्कुसुभृवृञः** । करण्डः । सरण्डः पक्षी । भरण्डः स्वामी । वरण्डो मुखरोगः ।

१२७ । **शृदृभसोऽदिः** । शरत् । 'दरद्धृदयकूलयोः' । भसज्जघनम् ।

१२८ । **दृणातेः षुग्घ्रस्वश्च** । दृषत् ।

१२९ । **त्यजितनियजिभ्यो डित्** । त्यद् । तद् । यद् । सर्वादयः ।

१३० । **एतेस्तुट् च** । एतद् ।

१३१ । **सर्तेरटिः** । 'सरट् स्याद्वातमेघयोः' । वेदभाष्ये तु 'याभिः कृशानुम्' इति मन्त्रे 'सरड्भ्यो मधुमक्षिकाभ्यः' इति व्याख्यातम् ।

१३२ । **लङ्घेर्नलोपश्च** । लघट् वायुः ।

१३३ । **पारयतेरजिः** । पारक् सुवर्णम् ।

१३४ । **प्रथः कित्सम्प्रसारणञ्च** । पृथक् । स्वरादिपाठादव्ययत्वम् ।

१३५ । **भियः षुग्घ्रस्वश्च** । भिषक् ।

१३६ । **युष्यसिभ्यां मदिक्** । 'युष्' सौत्रो धातुः । युष्मद् । अस्मद् । त्वम् । अहम् ।

१३७ । **अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्** । एभ्यश्चतुर्दशभ्यो मन् । अर्मश्चक्षूरोगः । स्तोमः सङ्घातः । सोमः । होमः । सर्मो

स्वर्णमीनभेदयो ऋषभौषधौ' इति मेदिनी । 'शृङ्गं विषाणमाख्यातं शैलाग्रे जलयन्त्रके । मीनौषधिसुवर्णानां भेदे शृङ्गी प्रयुज्यते ॥' इति उत्पलिनीकोशः । **अण्डन् कृसृ** ॥ 'करण्डी मधुकोशासिकारण्डेषु ललाटके' इति मेदिनी । 'वरण्डोऽप्यन्तरावेदौ समूहमुखरोगयोः' इति विश्वमेदिन्यौ । बाहुलकात् तरतेः । 'तरण्डो बडिशीसूत्रबद्धकाष्ठादिके प्लवे' इति मेदिनी । **शृदृ** ॥ 'शरत् स्त्री वत्सरेऽप्यृतौ । दरत् स्त्रियां प्रपाते च भयपर्वतयोरपि । भसत् स्त्री भास्वरे योनौ' इति च मेदिनी । "उवे अम्बसुलाभिके" इति मन्त्रस्य व्याख्यायां भसद्भग इति वेदभाष्यम् । "जाघन्या पत्नीः संयाजयन्ति भसद्वीर्या हि स्त्रियः" इत्यत्र भसज्जघनमिति व्याख्यातारः । **दृणातेः** ॥ 'दृषन्निष्पेषणशिलापदप्रस्तरयोः स्त्रियाम्' इति मेदिनी । **अर्तिस्तु** ॥ 'सोमस्तुहिनदीधितौ । वानरे च कुबेरे च पितृदेवे समीरणे । वसुप्रभेदे कर्पूरे नीरे सोमलतौषधौ' इति मेदिनी । 'धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः

गमनम्। धर्मः। क्षेमं कुशलम्। क्षोमम्। प्रज्ञाद्यणि क्षौमञ्च। भामः आदित्यः। यामः। 'वामः शोभनदुष्टयोः'। पद्मम्। यक्ष पूजायाम्। यक्ष्मो रोगराजः। नेमः।

१३८। **जहातेः सन्वदालोपश्च**। 'जिह्वः कुटिलमन्दयोः'।

१३९। **अवतेष्टिलोपश्च**। मन्प्रत्ययस्यायं टिलोपो न प्रकृतेः। अन्यथा डिदित्येव ब्रूयात्। 'ज्वरत्वर–' (सू २६५४) इति ऊठौ। तयोर्दीर्घे कृते गुणः। चादिपाठाद्व्ययत्वमित्युज्ज्वलदत्तस्तन्न। तेषामसत्त्वार्थत्वात्। वस्तुतस्तु स्वरादिपाठाद्व्ययत्वम्। अवतीति ओम्।

१४०। **ग्रसेरा च**। ग्रामः।

१४१। **अविसिविसिशुषिभ्यः कित्**। ऊमं नगरम्। स्यूमो रश्मिः। सिमः सर्वः। 'शुष्ममग्निसमीरयोः'।

१४२। **इषियुधीन्धिदसिश्याधूसूभ्यो मक्**। 'इष्मः कामवसन्तयोः'।

क्रतौ। अहिंसोपनिषन्न्यायेऽ ना धनुर्यमसोमपे' इति च। 'धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ' इति विश्वः। 'क्षौमं पट्टे दुकूलेऽस्त्री क्षौमं वल्कलजांशुके। शणजेऽतसिजे' इति मेदिनी। 'भामः क्रोधे रवौ दीप्तौ। यामस्तु पुंसि प्रहरे संयमेऽपि प्रकीर्तितः। वामं धने पुंसि हरे कामदेवे पयोधरे। वल्गुप्रतीपसव्येषु त्रिषु नार्यां स्त्रियामथ। वामी शृगालीबडबारासभीकरभीषु च। पद्मोऽस्त्री पद्मके व्यूहनिधिसंख्यान्तरेऽम्बुजे। ना नागे' इति च मेदिनी। **यक्ष पूजायामिति**॥ यत्तूज्ज्वलदत्तेन 'जक्ष भक्ष हसनयोः' इत्युपन्यस्तम्, तन्न, तस्य चवर्गतृतीयादित्वात्। न च लक्ष्यमपि तथैवेति भ्रमितव्यम्। "अक्षिभ्यान्ते नासिकाभ्याम्" इति मन्त्रे यक्ष्मशब्दस्यान्तःस्थादित्वनिर्णयात्। न च तदुपन्यस्तधातुरप्यन्तःस्थादिरिति भ्रमितव्यम्। 'जक्षत् क्रीडन् रममाणः' इत्यादिप्रयोगेण तथा कविकल्पद्रुमादिभिः सह विरोधादिति दिक्। मनिन्प्रत्यये तु नान्तः। 'राजयक्ष्मेव रोगाणाम्' इति माघः। 'यक्ष्मणापि परिहाणिरायथौ' इति रघुः। दशपादीवृत्तौ तु इह सूत्रे पक्षीति पवर्गीयादिं पठित्वा सौत्रो धातुः बाहुलकान्नकारस्य नेत्संज्ञा इत्युक्ता अक्षिपक्ष्मेत्युदाहृतम्। तन्न। 'पक्ष परिग्रहे' इत्यस्मान्मनिना गतार्थत्वात्। 'नेमः क्लीबेऽवधौ गर्ते प्राकारे कैतवेऽपि च' इति मेदिनी। 'नेमस्त्वर्धे प्राकारगर्तयोः। अवधौ कैतवे च' इति हेमचन्द्रः। **जहातेः**॥ 'जिह्मस्तु कुटिले मन्दे क्लीबन्तगरपादपे' इति मेदिनी। **अवतेः**॥ 'ओं प्रश्नेऽङ्गीकृतौ रोषे' इति विश्वः। **ग्रसेरा च**॥ 'ग्रसु अदने'। अतो मन्। धातोराकारश्च। 'ग्रामः स्वरे संवसथे बृन्दे शब्दादिपूर्वके' इति विश्वः। शब्दादिपूर्वको ग्रामशब्दो बृन्दे। शब्दग्रामो गुणग्राम इति यथा। संपूर्वोऽयं युद्धे। तदुक्तम्। 'संपूर्वः संयुगे स्मृतः' इति। **ऊमं नगरमिति**॥ 'त्वे क्रतुम्' इति मन्त्रे 'ऊमास्तर्पका यजमानाः' इति वेदभाष्यम्। **स्यूमो रश्मिरिति**॥ सूत्रतन्तुरित्यन्ये। 'शुष्मं तेजसि सूर्ये ना' इति मेदिनी। 'शुष्मं बलम्' इति वेदभाष्ये। **इषियुधि**॥

ईषीति पाठे दीर्घादिः । युध्मः शरो योद्धा च । इध्मः समित् । दस्मो यजमानः । श्यामः । धूमः । सूमोऽन्तरिक्षम् । बाहुलकादीर्मं व्रणः ।

१४३ । **युजिरुचितिजां कुश्च** । युग्मम् । रुक्मम् । तिग्मम् ।

१४४ । **हन्तेर्हिं च** । हिमम् ।

१४५ । **भियः षुग्वा** । भीमः । भीष्मः ।

१४६ । **घर्मः** । घृधातोर्मग्गुणश्च निपात्यते ।

१४७ । **ग्रीष्मः** । ग्रसतेर्निपातोऽयम् ।

१४८ । **प्रथेः षिवन्सम्प्रसारणं च** । पृथिवी षवन्नित्येके । पृथ्वी । 'पृथवी पृथिवी पृथ्वी' इति शब्दार्णवः ।

१४९ । **अशूप्रुषिलटिकणिखटिविशिभ्यः क्कन्** । अश्वः । 'प्रुष स्नेहनादौ' । प्रुष्वः स्यादृतुसूर्ययोः' । प्रुष्वा जलकणिका । लट्वा पक्षिभेदः फलं च । कण्वं पापम् । बाहुलकादित्त्वे किण्वमपि । खट्वा । विश्वम् ।

१५० । **इण्शीभ्यां वन्** । एवो गन्ता । 'ये च एवा मरुतः' । असत्त्वे निपातोऽयम् । शेवं लाञ्छनं पुंसाम् । 'शेवं मित्राय वरुणाय' ।

१५१ । **सर्वनिघृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वा अस्वतन्त्रे** । अकर्तर्येते निपात्यन्ते । सृतमनेन विश्वमिति सर्वम् । निपूर्वाद्धृषेर्गुणाभावोऽपि । निघृष्यते

युध्म इति ॥ 'युध्मो धनुषि संयुगे' इति मेदिनी । 'दस्मस्तु यजमाने स्यादपि चौरे हुताशने' इति च । 'न पूषणम्' इति मन्त्रस्य भाष्ये तु दस्मो दर्शनीय इति व्याख्यातम् । 'त्रिषु श्यामौ हरित्कृष्णौ श्यामा स्याच्छारिका निशा' इत्यमरः । 'श्यामो वटे प्रयागस्य वारिदे वृद्धदारके । पिके च कृष्णहरितोः पुंसि स्यात्तद्वति त्रिषु । मरीचे सिन्धुलवणे क्लीबं स्त्री शारिकौषधौ । अप्रसूताङ्गनायाश्च प्रियङ्गावपि गुग्गलौ । यमुनायां त्रियामायां कृष्णत्रिवृतिकौषधौ । नीलिकायाम्' इति मेदिनी । **ईर्ममिति** ॥ 'ईर गतौ' । 'व्रणोऽस्त्रियामीर्ममरुः क्लीबे' इत्यमरः । 'जन जनने' । जन्मम् । मनिनन्तस्तु नान्तः । 'जनुर्जननजन्मानि' इत्यमर उभयसाधारणः । **युजिरुचि** ॥ 'रुक्मन्तु काञ्चने लोहे' इति विश्वमेदिन्यौ । **हन्तेर्हिं च** ॥ 'हिमं तुषारमलयोद्भवयोः स्यान्नपुंसकम् । शीतले वाच्यलिङ्गः' इति मेदिनी । 'भीष्मो गाङ्गेयघोरयोः । भीमोऽम्लवेतसे घोरे शम्भौ मध्यमपाण्डवे । घर्मः स्यादातपे ग्रीष्मेऽप्युष्णस्वेदाम्भसोरपि । ग्रीष्म ऊष्मर्तुभेदयोः' इति च मेदिनी । **अशूप्रुषि** ॥ 'अश्वः पुंभेदवाजिनोः' इति विश्वः । 'लट्वा करजभेदे स्यात् फले मद्ये खगान्तरे' इति विश्वमेदिन्यौ । 'कण्वं पापे मुनौ पुंसि कण्वं बीजाद्यशीथुषु । विश्वात्वतिविषायां स्त्री जगति स्यान्नपुंसकम् ॥ न ना शुण्ठ्यां पुंसि देवप्रभेदेऽप्यखिले त्रिषु' इति मेदिनी । **इण्शीभ्याम्** ॥ शेवं सुखमिति वेदभाष्यम् ।

अनेन निघृष्वः खुरः। रिष्वो हिंस्रः। लष्वो नर्तकः। लिष्व इत्यन्ये। तत्रोपधाया इत्वमपि। शेतेऽस्मिन् सर्वमिति शिवः शम्भुः। शीङो ह्रस्वत्वम्। पद्वो रथो भूलोकश्च। प्रहूयते इति प्रह्वः। ह्वेञ आकारवकारलोपः। जहातेरालापो वा। ईषेर्वन्। ईष्वः आचार्यः। इष्व इत्यन्ये। 'अस्वतन्त्रे' किम्। सर्ता सारकः। बाहुलकाद्भसतेः। ह्रस्वः।

१५२। **शेवयह्वजिह्वाग्रीवाष्वमीवाः**। शेव इत्यन्तोदात्तार्थम्। यान्त्यनेन यह्वः। ह्रस्वो हुगागमश्च। लिहन्त्यनया जिह्वा। लकारस्य जः गुणाभावश्च। गिरन्त्यनया ग्रीवा। ईडागमश्च। आप्नोतीत्याष्वो वायुः। मीवा उदरकृमिः। वायुरित्यन्ये।

१५३। **कृगृशृदृभ्यो वः**। कर्वः कामः आखुश्च। गर्वः। शर्वः। दर्वो राक्षसः।

१५४। **कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः**। यौतीति युवा। वृषा इन्द्रः। तक्षा। राजा। धन्वा मरुः। धन्व शरासनम्। द्युवा सूर्यः। प्रतिदीव्यन्त्यस्मिन्प्रतिदिवा दिवसः।

१५५। **सप्यशूभ्यां तुट् च**। सप्त। अष्ट।

१५६। **नञि जहातेः**। अहः।

१५७। **श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति**। एते त्रयोदश कनिप्रत्ययान्ता निपात्यन्ते। श्वयतीति

ह्रस्व इति ॥ 'ह्रस शब्दे'। 'ह्रस्वो न्यक्खर्वयोस्त्रिषु' इति मेदिनी। **शेवयह्व** ॥ दशपादीवृत्तिरीत्याह। **यान्त्यनेनेति** ॥ अन्ये तु यजतेर्जकारस्य हकारो निपात्यत इत्याहुः। यह्वशब्दो वदिकनिघण्टौ महन्नामसु पठितः। प्रवो यह्वं पुरूणाम्। 'यह्वं महान्तम्' इति वेदभाष्यम्। **मीवेति** ॥ वेदभाष्ये तु अमीव इति छित्वा 'अम रोगे' इत्यस्माद्वः ईट् चेत्युक्तम्। 'अमी वहा वास्तोष्पते' इत्यादिमन्त्रास्तत्रानुकूलाः। **कनिन्यु** ॥ 'युवा स्यात्तरुणे श्रेष्ठे निसर्गबलशालिनि। वृषा कर्णे महेन्द्रे ना' इति मेदिनी। 'तक्षा तु वर्धकिस्त्वष्टा रथकारस्तु काष्ठतट्' इत्यमरः। 'राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ। यक्षे शक्रे च पुंसि स्यात्' इति मेदिनी। 'समानौ मरुधन्वानौ' इत्यमरः। 'अथास्त्रियाम्। धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्' इति च। धन्वा तु मरुदेशे ना क्लीबे चापे स्थलेऽपि च' इति मेदिनी। धन्विगत्यर्थः सौत्रो धातुः। 'द्यु अभिगमे' द्युवा सूर्यः। **प्रतिदिवेति** ॥ 'प्रतिदीव्ने इन्धत् आकृतान्' इति मन्त्रे तु प्रतिदिवा कितव इति व्याख्यातम्। **श्वन्नुक्षन्॥ कनिप्रत्ययान्ता**

श्वा । उक्षा । पूषा । 'प्रिह गतौ' । इकारस्य दीर्घत्वम् । प्रेहतीति प्रीहा कुक्षिव्याधिः । 'क्ष्विदू आर्द्रीभावे' । क्ष्विद्यति क्ष्वेदा चन्द्रः । स्निह्यतेर्गुणः । स्निह्यतीति स्नेहा सुहृच्चन्द्रश्च । मुह्यन्त्यस्मिन्नाहते मूर्धा । मुहेरुपधाया दीर्घो धोऽन्तादेशो रमागमश्च । मज्जत्यस्थिषु मज्जा अस्थिसारः । अर्यपूर्वो माङ् । अर्यमा । विश्वं प्साति विश्वप्सा अग्निः । परिजायते परिज्मा चन्द्रोऽग्निश्च । जनेरुपधालोपो मश्चान्तादेशः । मातर्यन्तरिक्षे श्वयतीति मातरिश्वा । धातोरिकारलोपः । 'मह पूजायाम्' । हस्य घो वुगागमश्च । मघवा इन्द्रः ।

॥ इत्युणादिषु प्रथमःपादः ॥

॥ अथ उणादिषु द्वितीयः पादः ॥

१५८ । **कृहृभ्यामेणुः** । करेणुः । हरेणुः गन्धद्रव्यम् ।

१५९ । **हनिकुषिनीरमिकाशिभ्यः क्थन्** । हथो विषण्णः । कुष्ठः । नीथो नेता । रथः काष्ठम् ।

इति ॥ नायं निदिति भावः । एतच्च हलन्तशब्दप्रकरणे मघवन्शब्दे व्युत्पादितम् । केचित्तु नित्त्वं स्त्रीकृत्योक्षन्नादीनां सौत्रमन्तोदात्तनिपातनमाहुः । तद्गौरवादुपेक्षितम् । **श्वेति** ॥ इकारलोपो निपात्यते । **पूषेति** ॥ 'पूष वृद्धौ' 'क्लेदौषधिशशाङ्कयोः' इति यादवः । **मूर्धेति** ॥ 'मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः । **मज्जेति** ॥ टाबन्तोऽप्ययम् । 'ऊष्मया सार्द्धमूष्मापि मज्जोक्तो मज्जया सह' इति द्विरूपकोशात् । 'अर्यमा तु पुमान् सूर्ये पितृदेवान्तरेऽपि च' इति मेदिनी । **परिजायते इत्यादि** ॥ एतच्च दशपादीवृत्त्यनुरोधेनोक्तम् । 'परिज्मानं सुखं रथम्' इति मन्त्रस्थ वेदभाष्ये तु परिज्मा परितो गन्ता । अजेः परिपूर्वस्य 'श्वन्नुक्षन्' इत्यादिना मन्प्रत्ययः । अकारलोपः । आद्युदात्तत्वञ्च निपात्यते इत्युक्तम् । उज्ज्वलदत्तस्तु परिज्वेति पठित्वा जु इति सौत्रो धातुः परिपूर्वः, यणादेशः, परिज्वा चन्द्र इत्याह । तल्लक्ष्यविरोधादुपेक्ष्यम् । **मातरिश्वेति** ॥ सप्तम्या अलुक् उदात्तत्वञ्च निपात्यते । इह भत्वविषये सम्प्रसारणन्न भवति । श्वयुवेति सूत्रेऽभिव्यक्ततरत्वेन कुक्कुरवाचकस्यैव श्वशब्दस्य ग्रहणम् । इह सूत्रान्त इति शब्द आद्यर्थः । तेनान्येभ्योऽपि यथादर्शनङ्कनिः । दशपाद्यान्तु इतिशब्दो न पठ्यते ॥

॥ इत्युणादिषु प्रथमः पादः ॥

कृहृभ्याम् ॥ 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः । 'करेणुर्गजयोषायां स्त्रियां पुंसि मतङ्गजे' इति मेदिनी । **गन्धेति** ॥ कलापश्चेति बोध्यम् । 'कलापस्तु सतीनकः । हरेणुः खण्डके चास्मिन्' इति वैश्यवर्गे अमरः । 'हरेणुर्ना सतीने स्त्री रेणुकाकुलयोषितोः' इति मेदिनीविश्वप्रकाशौ । 'कुष्ठं रोगे सुगन्धे च' इति विश्वः । 'नीथे नीथे मघवानं सुतासः' इति

१६०। **अवे भृञः**। अवभृथः।

१६१। **उषिकुषिगार्तिभ्यस्थन्**। ओष्ठः। कोष्ठम्। गाथा। अर्थः। बाहुलकाच्छोथः।

१६२। **सर्तेर्णित्**। सार्थः समूहः।

१६३। **जृवृञ्भ्यामूथन्**। जरूथं मांसम्। 'वरूथो रथगुप्तौ ना'।

१६४। **पातृतुदिवचिरिचिसिचिभ्यस्थक्**। पीथो रविः घृतं पीथम्। 'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु। अवतारर्षिजुष्टाम्भःस्त्रीरजःसु च विश्रुतम्' इति विश्वः। तुत्थोऽग्निः। उक्थं सामभेदः। रिक्थम्। बाहुलकादृचेरपि। 'रिक्थमृक्थं धनं वसु'। सिक्थम्।

१६५। **अर्तेर्निरि**। निर्ऋथं साम।

१६६। **निशीथगोपीथावगथाः**। निशीथोऽर्धरात्रो रात्रिमात्रं च। गोपीथं तीर्थम्। अवगथः प्रातःस्नातः।

१६७। **गश्चोदि**। उद्गीथः साम्नो भागविशेषः।

१६८। **समीणः**। समिथो वह्निः, संग्रामश्च।

मन्त्रे नीथशब्दस्यान्तोदात्तत्वं बाहुलकात्। 'नीथे नीथे स्तोत्रे स्तोत्रे च' इति वेदभाष्यम्। 'रथः पुमानवयवे स्यन्दने वेतसेऽपि च' इति मेदिनी। 'रथः स्यात्स्यन्दने काये चरणे वेतसेऽपि च' इति विश्वः। 'काष्ठा दारुहरिद्रायाङ्कालमानप्रकर्षयोः। स्थानमात्रे दिशि च स्त्री दारुणि स्यान्नपुंसकम्' इति मेदिनी। **उषिकुषि**॥ 'कोष्ठः कुसूले चात्मीये मध्ये कुक्षेर्गृहस्य च। गाथा श्लोके संस्कृतान्यभाषायां शेषवृत्तयोः' इति मेदिनी। 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः। 'अर्थो विषयार्थनयोर्द्धर्मकारणवस्तुषु। अभिधेये च शब्दानां निवृत्तौ च प्रयोजने' इति मेदिनी। शोथः श्वयथुः। शु गतौ। **सर्तेर्णित्**॥ 'साथों वणिक्समूहे स्यादपि सङ्घातमात्रके' इति मेदिनीविश्वप्रकाशौ। **जृवृञ्**॥ 'जरूथोऽसुरविशेषः' इति वेदभाष्यम्। 'वरूथं स्यात्तनुत्राणे रथगोपनवेश्मनोः' इति हेमचन्द्रः। 'वरूथो रथगुप्तौ स्याद्वरूथं रथवेश्मनोः' इति विश्वः। **पातृ**॥ 'तुत्थो ग्रावाञ्जने तु स्यान्नीलीसूक्ष्मैलयोरपि' इति विश्वः। 'तुत्थमञ्जनभेदे स्यात् नीलीसूक्ष्मैलयोः क्लियाम्। सिक्थो भक्तपुलाके ना' इति मेदिनी। **अर्तेः**॥ 'ऋ गतौ' 'द्रोघवाचस्ते निर्ऋथं सञ्चन्ताम्' इति मन्त्रे 'निर्ऋथो हिंसा' इति वेदभाष्यम्। 'निशीथस्तु पुमानर्धरात्रे स्याद्रात्रिमात्रके' इति मेदिनी। 'प्रतित्यच्चारुमध्वरम्' इति मन्त्रे गोपीथः सोमपानमिति वेदभाष्यम्। यास्कोऽप्येवम्। तीर्थमिति तु वृत्तिकारः। **अवगथ इति**॥ गाङो ह्रस्वत्वं निपातनात्। **समीणः**॥ 'समिथशब्दः सङ्ग्रामपर्यायेषु वैदिकनिघण्टौ पठितः। 'श्रिये जात' इति मन्त्रे समिथा युद्धानि' इति वेदभाष्यम्। युक्तश्चैतत्। सम्यगेति

१६९ । तिथपृष्ठगूथयूथप्रोथाः । तिजेर्जलोपः । तिथोऽनलः कामश्च । पृष्ठम् । गूथं विष्ठा । यूथं समूहः । 'प्रोथमस्त्री तुरङ्गास्ये प्रोथः प्रस्थित उच्यते' ।

१७० । स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्विति-वृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमन्दिचन्दिदहिदसिदम्भिवसिवा-शिशीङ्हसिसिधिशुभिभ्यो रक् । द्वात्रिंशतो रक्स्यात् । वलि यलोपः । स्फारम् । न्यङ्क्वादित्वात्कुत्वम् । तक्रम् । वक्रम । शक्रः । क्षिप्रम् । क्षुद्रः । सृप्रश्चन्द्रः । तृप्रः पुरोडाशः । दृप्रो बलवान् । वन्द्रः पूजकः । उन्दी । उन्द्रो जलचरः । श्वित्रं कुष्ठम् । 'वृत्रो रिपौ ध्वनौ ध्वान्ते शैले चक्रे च दानवे' । अजेर्वी । वीरः । नीरम् । पद्रो ग्रामः । मद्रो हर्षो देशभेदश्च । 'मुद्रा प्रत्ययकारिणी' । 'खिद्रो रोगो दरिद्रश्च' । छिद्रम् । भिद्रं वज्रम् । मन्द्रः । चन्द्रः । पचाद्यचि चन्दोऽपि । 'हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्दो हिमद्युतिः' । दह्रोऽग्निः । दस्रः स्वर्वैद्यः । 'दभ्रः समुद्रः स्वल्पं च' । वसेः सम्प्रसारणे ।

३१६८ । न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् । (८-३-११०)

जयार्थमत्रेति व्युत्पत्तेः । सम्पूर्वस्य इणः क्तिन्नाद्यन्तस्य लोकेऽपि युद्धार्थत्वदर्शनाच्च । उक्तं ह्यमरेण 'समित्याजिसमिद्युधः' । तिथं पृष्ठम् । 'पृषु सेचने' 'पृष्ठन्तु चरमन्तनोः' इत्यमरः । 'पृष्ठश्चरममात्रेऽपि देहस्यावयवान्तरे' इति मेदिनी । स्तोत्रविशेषोऽपि पृष्ठम् । चित्राधिकरणे पृष्टैः स्तुवत इत्यादौ तथा निर्णयात् । **गूथमिति** ॥ 'गु पुरीषोत्सर्गे' निपातनाद्दीर्घः । एवं यूथेऽपि । 'यूथन्तिर्यक्समूहे स्त्री पुष्पभेदे च योषिति' इति मेदिनी । 'यूथी पुष्पप्रभेदे स्यात् मागध्याञ्च करेणुके । यूथन्तिर्यक्समूहेऽपि वृन्दमात्रेऽपि भाषितम्' इति विश्वः । 'प्रुङ् गतौ' निपातनाद्रुणः । 'प्रोथोऽस्त्री हयघोणाग्रां ना कट्यामध्वगे लिषु' इति मेदिनी । **स्फायितञ्चि** ॥ **द्वात्रिंशत इति** ॥ दशपाद्यान्तु त्रयस्त्रिंशदुक्ताः । दम्भिवहिवसीति पठित्वा 'वह् प्रापणे' उह्रोऽनड्वानित्युदाहरणात् । माधवोऽप्येवम् । **स्फारमिति** ॥ 'नेड्वशि' इति नेट् । वलि यलोपः । 'स्फारः स्यात्पुंसि विकटे करकादेश्च बुद्बुदे' इति मेदिनी । **तक्रमिति** ॥ 'तञ्चू सङ्कोचे' । 'वक्रः स्याज्जटिले क्रूरे पुटभेदे शनैश्चरे' इति विश्वः । 'वक्रः शनैश्चरे पुंसि पुटभेदे नपुंसकम् । शक्रः पुमान् देवराजे कुहनार्जुनभूरुहोः' इति मेदिनी । **क्षुद्र इति** ॥ क्षुदिर् सम्पेषणे । 'क्षुद्रः स्यादधमक्रूरकृपणाल्पेषु वाच्यवत् । क्षुद्रा व्यङ्गानटी-कण्टकारिकासरघासु च । चाङ्गेरीवेश्ययोर्हिङ्गामक्षिकामात्रयोरपि' इति मेदिनी । **तृप्रः पुरोडाश इति** ॥ 'न तृप्रा उरुव्यंसः' इति मन्त्रे वेदभाष्यकारैः प्रकृतसूत्रे उज्ज्वलदत्तादिभि-श्चेत्थं व्याख्यातम् । दशपादीवृत्तौ तु तृप्रमाज्यङ्काष्ठश्चेत्युक्तम् । तृप्रन्दुःखमिति सुब्धातुवृत्तौ माधवः । हिमांशुरित्यादि शब्दार्णवः । दस्यति रोगान् क्षिपति दस्रः । 'दस्रः खरेऽश्विनीसुते'

रेफपरस्य सकारस्य सृप्यादीनां च मूर्धन्यो न स्यात्। 'पूर्वपदात्' (सू ३६४३) इति प्राप्तः प्रतिषिध्यत इति वृत्तिर्भूयोऽभिप्राया। तेन 'शासिवसि–' (सू २४१०) इति प्राप्तमपि न। उस्रो रश्मिः। उस्रा गौः। वाश्रो दिवसः। वाश्रं मन्दिरम्। शीरोऽजगरः। हस्रो मूर्खः। सिध्रः साधुः। शुभ्रम्। बाहुलकात् मुसे रक्। मुस्रम् उदश्रु।

१७१। **चकिरम्योरुचोपधायाः**। चुक्रमम्लद्रव्यम्। रुस्रोऽरुणः।

१७२। **वौ कसेः**। विकुस्रश्चन्द्रः।

१७३। **अमितम्योर्दीर्घश्च**। आम्रम्। ताम्रम्।

१७४। **निन्देर्नलोपश्च**। निद्रा।

१७५। **अर्देर्दीर्घश्च**। आर्द्रम्।

१७६। **शुचेर्दश्च**। शूद्रः।

१७७। **दुरीणो लोपश्च**। दुःखेनेयते प्राप्यत इति दूरम्।

१७८। **कृतेश्छः क्रू च**। कृच्छ्रं क्रूरः।

१७९। **रोदेर्णिलुक् च**। रोदयतीति रुद्रः।

१८०। **बहुलमन्यत्रापि संज्ञाछन्दसोः**। णिलुगित्येव। 'वान्ति पर्णशुषो वातास्ततः पर्णमुचोऽपरे'।

इति मेदिनी। 'दस्रः खरे चाश्विनयोः' इति विश्वः। **भूयोऽभिप्रायेति** ॥ माधवस्तु वृत्तिस्वरसमनुरुध्य 'अविन्द उस्रिया' इति मन्त्रे बाहुलकात् षत्वं नेति व्याचष्टे। 'उस्रो वृषे च किरणेऽप्युस्रार्जुन्युपचित्रयोः' इति मेदिनी। 'उस्रा गव्युपचित्तायामुस्रन्तु किरणे स्मृतः' इति विश्वः। 'वाश्रो ना दिवसे क्लीवं मन्दिरे च चतुष्पथे' इति मेदिनी। 'वाश्रो रासभपक्षिणोः' इत्येके। माधवस्तु 'वाश्रेव विद्युन्मिमाति' इति मन्त्रे शब्दयुक्ता प्रस्तुतस्तना धेनुर्वाश्रेति व्याख्यत्। 'शुभ्रं स्यादभ्रके क्लीबमुदीप्रशुक्लयोस्त्रिषु' इति मेदिनी। **चुक्रमिति** ॥ 'चक तृप्तौ'। 'चुक्रस्त्वम्लेऽम्लवेतसे। चुक्री चाङ्गेरिकायां स्यात् वृक्षाम्ले चुक्रमिष्यते' इति विश्वः। 'चुक्रं वृक्षाम्ले चाङ्गेर्यां स्त्रीं पुंस्यम्लेऽम्लवेतसे' इति मेदिनी। **अर्देर्दीर्घश्च** ॥ 'आर्द्रा नक्षत्रभेदे स्यात् स्त्रियां क्लिन्नेऽभिधेयवत्' इति मेदिनी। **शुचेर्दश्च** ॥ शूद्रो वृषलः। 'अहहारे त्वा शूद्रा' इति श्रुतौ तु रूढेर्बाधायोग एव पुरस्कृतः। तथा चोत्तरतन्त्रे भगवता व्यासेन सूत्रितम्। 'शुगस्य तदनादरश्रवणात्' इति। **कृतेः** ॥ अन्त्यस्य च्छः। क्रू तु सर्वस्य। अनेकाल्त्वात्। 'कृच्छ्रमाख्यानमाभीले पापसान्तपनादिनोः' इति विश्वमेदिन्यौ। 'क्रूरस्तु कठिने घोरे नृशंसे चाभिधेयवत्' इति च। **बहुलमन्यत्रापि संज्ञा** ॥ बृंहयति वर्धयति प्रजाः ब्रह्मा। शं सुखं भावयति शम्भुः। शोषयति शुष्मेत्यादि। छन्दसि, 'वर्धन्तु

१८१ । **जोरी च** । जीरोऽणुः । ज्यश्चेत्येके ।

१८२ । **सुसूधागृधिभ्यः क्रन्** । सुरः । सूरः । धीरः । गृध्रः ।

१८३ । **शुसिचिमीनां दीर्घश्च** । शुः सौत्रः शूरः । सीरम् । चीरम् । मीरः समुद्रः ।

१८४ । **वाविन्धेः** । वीध्रं विमलम् ।

१८५ । **वृधिवपिभ्यां रन्** । वर्ध्रं चर्म । वप्रः प्राकारः ।

१८६ । **ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवत्रेरामालाः** । रत्नन्ता एकोनविंशतिः । निपातनाद्गुणाभावः । ऋज्रो नायकः । इदि इन्द्रः । अङ्गेर्नलोपः । अग्रम् । 'वज्रोऽस्त्री हीरके पवौ' । डु वप्, उपधाया इत्त्वम् । विप्रः । कुम्बिचुम्ब्योर्नलोपः । कुब्रमरण्यम् । चुब्रं मुखम् । 'क्षुर विलेखने' रेफलोपः । अगुणः । क्षुरः । 'खुर छेदने' रलोपो गुणाभावश्च । खुरः । भन्देर्नलोपः भद्रम् । 'उच समवाये' चस्य गः उग्रः । 'ञि भी

त्वा सुष्टुतयः । य इमं जजान ।' बाहुलकादसंज्ञाछन्दसोरपि क्वचिदित्याशयेनोदाहरति । **वान्तीत्यादि** ॥ **जोरी च** ॥ 'जीरः खड्गे वणिग्द्रव्ये' इति विश्वः । 'जीरस्तु जरणे खड्गे' इति मेदिनी । **ज्यश्चेति** ॥ तथा च, 'न धातुलोपे' इति सूत्रे 'जीवेरदानुः' इत्यस्य प्रत्याख्यानार्थं नैतज्जीवे रूपं किन्तु रकि ज्यः सम्प्रसारणमिति भाष्ये उक्तम् । **सुसू** ॥ 'सुरा चषकमद्ययोः । पुल्लिङ्गस्त्रिदिवेशे स्यात्' इति मेदिनी । 'सुरो देवे सुरा मद्ये चषकेऽपि सुरा क्वचित्' इति विश्वः । सुवति प्रेरयति कर्माणि लोकमिति सूरः । सूर्यः । 'धीरो धैर्यान्विते स्थैरे बुधे क्लीबन्तु कुङ्कुमे । स्त्रियां श्रवणतुल्यायाम्' इति मेदिनी । 'गृध्रः खगान्तरे पुंसि वाच्यलिङ्गोऽर्थलुब्धके' इति च । शुरिति तालव्यादिर्गत्यर्थः । 'शूरः स्यात् यादवे भटे' इति मेदिनी । 'शूरश्चारुभटे सूर्ये' इति विश्वहेमचन्द्रौ । 'शूरः सूरश्च तरणौ' इति द्विरूपेषु विश्वः । 'सीरोऽर्कहलयोः पुंसि । चीरी झिल्ल्यां नपुंसकम् । गोस्तने वस्त्रभेदे च रेखालेखनभेदयोः' इति मेदिनी । 'चीरन्तु गोस्तने वस्त्रे चूडायां सीसकेऽपि च । चिरी कृच्छ्रादिकाझिल्ल्योः' इति विश्वः । **वाविन्धेः** ॥ 'वीध्रन्तु विमलार्थकम्' इति विशेष्यनिघ्नेष्वमरः । 'वप्रः-पितरि केदारे वप्रः प्राकाररोधसोः' इति धरणिरन्तिदेवौ । 'वप्रस्तातेे पुमानस्त्री वेणुक्षेत्रचये तटे' इति मेदिनी । **ऋज्रेन्द्र** ॥ 'ऋज गत्यादिषु' । 'ऋज्राश्वः प्रष्टिभिरम्बरीष' इति मन्त्रे ऋज्रा गतिमन्तोऽश्वा यस्य स ऋज्राश्व इति वेदभाष्यम् । 'इन्द्रः शचीपतावन्तरात्मन्यादित्ययोगयोः' इति विश्वः । 'अग्रं पुरस्तादुपरि परिमाणे पलस्य च । आलम्बने समूहे च प्रान्ते च स्यान्नपुंसकम् । अधिके च प्रधाने च प्रथमे चाभिधेयवत्' इति मेदिनी । 'क्षुरः स्याच्छेदनद्रव्ये कोकिलाक्षे च गोक्षुरे' इति विश्वमेदिन्यौ । 'खुरः कोलदले शफे । भद्रः शिवे खञ्जरीटवृषभेरुकदम्बके । करिजातिविशेषे ना क्लीबं मङ्गलमुस्तयोः । काञ्चने च स्त्रियां रास्नाकृष्णाव्योमनदीषु च । तिथिभेदे

भेरी। पक्षे लः। भेलो जलतरणद्रव्यम्। शुचेश्चस्य कः, शुक्रः। पक्षे लः। शुल्कः। गुङ् वृद्धिः। 'गौरोऽरुणे सिते पीते' 'वन सम्भक्तौ'। वन्त्रो विभागी। इणो गुणाभावः। 'इरा मद्ये च वारिणि'। 'मा माने' माला।

१८७। **समि कस उकन्**। 'कस गतौ'। सम्यक् कसन्ति पलायन्ते जनाः अस्मादिति सङ्कसुकः दुर्जनः, अस्थिरश्च।

१८८। **पचिनशोर्णुकन्कनुमौ च**। पचेः कः। पाकुकः सूपकारः। नशेर्नुम्। नंशुकः।

१८९। **भियः क्रुकन्**। भीरुकः।

१९०। **क्वुन्शिल्पिसंज्ञयोरपूर्वस्यापि**। रजकः। इक्षुकुट्टकः। चरकः। 'चष भक्षणे'। चषकः। शुनकः। भषकः।

१९१। **रमे रश्च लो वा**। रमको विलासी। लमकः।

१९२। **जहातेर्ढे च**। जहकस्त्यागी कालश्च।

१९३। **धमो धम च**। धमकः कर्मकारः।

प्रसारिण्याङ्कटफलानन्तयोरपि। त्रिषु श्रेष्ठे च साधौ च न पुंसि करणान्तरे। उग्रः शूद्रासुते क्षत्राद्रुद्रे पुंसि त्रिषूत्कटे। स्त्री वचाक्षुद्रयोः' इति मेदिनी। 'भेदः क्लवे भीरुके च निर्बुद्धिमुनिभेदयोः' इति विश्वः। 'भेलः क्लवे मणौ पुंसि भीरावज्ञे च वाच्यवत्। शुक्रः स्यात् भार्गवे ज्येष्ठे मासे वैश्वानरे पुमान्। रेतोऽक्षिरुग्भिदोः क्लीबं शुक्लो योगान्तरे सिते। नपुंसकन्तु रजते। गौरः पीतेऽरुणे श्वेते विशुद्धेऽप्यभिधेयवत्। ना श्वेतसर्षपे चन्द्रे न द्वयोः पद्मकेसरे। गौरी त्वसञ्जातरजःकन्याशङ्करभार्ययोः। 'रोचना रजनीपिङ्गाप्रियङ्गुवसुधासु च। आपगाया विशेषेऽपि यादसां पतियोषिति' इति मेदिनी। 'नदीभेदे च गौरी स्याद्वरुणस्य च योषिति' इति विश्वः। 'अष्टवर्षा तु या दत्ता श्रुतशीलसमन्विते। सा गौरी तत्सुतो यस्तु स गौरः परिकीर्तितः' इति ब्रह्माण्डवचनं श्राद्धकाण्डे हेमाद्रिणा उदाहृतम्। एतेन 'गौरः शुच्याचारः' इति भाष्यं व्याख्यातम्। 'इरा भूवाक्सुराप्सु च' इति मेदिनी। 'मालं क्षेत्रे जने मालो माला पुष्पादिदामनि' इति मेदिनी। 'मालमुन्नतभूतलम्' इत्युत्पलः। 'क्षेत्रमारुह्य मालम्' इति मेघदूतः। मणिपूर्वोऽयमर्थान्तरेऽपि रूढः। 'मणिमाला स्मृता हारे स्त्रीणान्दन्तक्षतान्तरे' इति विश्वः। बाहुलकात् 'तिज निशाने' रन् दीर्घत्वं जस्य वः। 'तीव्रा तु कटुरोहिण्यां राजिकागण्डदूर्वयोः। त्रिष्वत्युष्णे नितान्ते च कटौ' इति मेदिनी। **समि कसः**॥ 'सङ्कसुकोऽस्थिरः' इति विशेष्यनिघ्ने अमरः। **क्वुन्**॥ अपूर्वस्य निरुपपदस्य अपिशब्दात्सोपपदस्य। अर्थद्वारकसम्बन्धे षष्ठी, प्रकृतिप्रत्ययार्थयोः क्रियाकारकभावात्। 'रजको धावके शुक्ले' इति विश्वः। 'रजकौ धावकशुकौ' इति हेमचन्द्रः। **इक्षुकुट्टक इति**॥ 'कुट्ट छेदने'। इक्षून् कुट्टयति इक्षुकुट्टको गौडिकः।

१९४ । **हनो वध च** । वधकः ।

१९५ । **बहुलमन्यत्रापि** । 'कुह विस्मापने' । कुहकः । कृतकम् ।

१९६ । **कृषेर्वृद्धिश्चोदीचाम्** । कार्षकः—कृषकः ।

१९७ । **उदकं च** । प्रपञ्चार्थम् ।

१९८ । **वृश्चिकृषोः किकन्** । वृश्चिकः । कृषिकः ।

१९९ । **प्राङि पणिकषः** । प्रापणिकः पण्यविक्रयी । प्राकषिकः परदारोपजीवी ।

२०० । **मुषेर्दीर्घश्च** । मूषिकः आखुः ।

२०१ । **स्यमेः सम्प्रसारणं च** । चादीर्घः । सीमिकः वृक्षभेदः ।

२०२ । **क्रिय इकन्** । क्रयिकः क्रेता ।

२०३ । **आङि पणिपनिपतिखनिभ्यः** । आपणिकः । आपनिकः इन्द्रनीलः किरातश्च । आपतिकः श्येनो दैवायत्तश्च । आखनिको मूषिको वराहश्च ।

२०४ । **श्यास्त्याहृञविभ्य इनच्** । श्येनः । स्त्येनः । हरिणः । अविनोऽध्वर्युः ।

२०५ । **वृजेः किच्च** । वृजिनम् ।

२०६ । **अजेरज च** । वीभाववाधनार्थम् । अजिनम् ।

'चषकोऽस्त्री सुरापात्रे मद्यमाद्यप्रभेदयोः' इति मेदिनी । लमकः ऋषिविशेषः । **कृषेः** ॥ कार्षकः कृषीवलः । कृषकः स एव । 'कृषकः पुंसि फाले स्यात् कार्षके त्वभिधेयवत्' इति मेदिनी । 'स्त्री कुशी कुशिकः फालः' इति रत्नकोशः । **उदकं च** ॥ उन्दी क्लेदने । ननु 'क्वुन् शिल्पि इत्यादिना गतार्थमिदम् । अत आह । **प्रपञ्चेति** ॥ **प्राङि** ॥ सङ्घात उपपदम् । **आङि** ॥ नन्वनेनैव सिद्धे प्राङीत्यत्र पणिग्रहणं व्यर्थमिति चेन्न । उपसर्गान्तरनिवृत्त्यर्थत्वात् । **आपणिक इति** ॥ वणिक् । नित्स्वरेणाद्युदात्तः । आपणेन व्यवहरतीत्यर्थे ठकि तु 'कितः' इत्यन्तोदात्तः । **श्यास्त्या** ॥ 'श्येनः पत्रिणि पाण्डुरे' इति मेदिनी । स्त्येनश्चोरः । 'स्तेन चौर्ये' इति चौरादिकात्पचाद्यचि तु निर्यकारोऽपि । केचित्तु 'स्तायूनां पतये' इत्यादिप्रयोगोपष्टम्भेन निर्यकारस्यापि ष्टैधातोर्भ्वादिषु माधवादिभिः स्वीकृतत्वात् प्रकृतसूत्रेऽपि तमेव पठन्तः स्तेनशब्दो निर्यकार एवेत्याहुः । 'हरिणः पुंसि सारङ्गे विश्वदे त्वभिधेयवत् । हरिणी हरितायाञ्च नारीभिद्वत्तभेदयोः । सुवर्णप्रतिमायाञ्च' इति मेदिनी । **वृजेः किच्च** ॥ 'वृजिनं कल्मषे क्लीबत्रिषु कुटिलेऽन्यवत्' इति मेदिनी । **अजिनमिति** ॥ 'अजिनञ्चर्म कृत्तिः स्त्री' इत्यमरः ।

२०७। **बहुलमन्यत्रापि**। कठिनम्। नलिनम्। मलिनम्। कुण्डिनम्। द्यतेः 'यत्परुषि दिनम्' दिवसोऽपि दिनम्।

२०८। **द्रुदक्षिभ्यामिनन्**। द्रविणम्। दक्षिणः। दक्षिणा।

२०९। **अर्तेः किदिच्च**। इरिणं शून्यम्।

२१०। **वेपितुह्योर्ह्रस्वश्च**। विपिनम्। तुहिनम्।

२११। **तलिपुलिभ्यां च**। 'तलिनं विरले स्तोके स्वच्छेऽपि तलिनं त्रिषु'। पुलिनम्।

२१२। **गर्वेरत उच्च**। गौरादित्वान्ङीष्। गुर्विणी गर्भिणी।

२१३। **रुहेश्च**। रोहिणः।

२१४। **महेरिनण्च**। चादिनन्। माहिनम्—महिनम् राज्यम्।

२१५। **क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसम्प्रसारणं च**। वाक्। प्राट्। श्रीः। स्रवत्यतो घृतादिकमिति स्रूः, यज्ञोपकरणम्। दूर्हिरण्यम्। कटप्रूः कामरूपी कीटश्च। 'जूराकाशे सरस्वत्यां पिशाच्यां जवने स्त्रियाम्'।

२१६। **आप्नोतेर्ह्रस्वश्च**। आपः। अपः। अद्भिः। अद्भ्यः।

२१७। **परौ व्रजेः षः पदान्ते**। व्रजेः क्विब्दीर्घौ स्तः, पदान्ते तु षश्च। परिव्राट्। परिव्राजौ।

कठिनमिति ॥ कठ कृच्छ्रजीवने। 'कठिनमपि निष्ठुरे स्यात् स्तब्धे तु नपुंसके स्थाल्याम्। कठिनी खटिकायामपि कठिना गुडशर्करायाञ्च' इति मेदिनी। **मलिनमिति** ॥ 'मल मल्ल धारणे'। 'मलिनन्दूषिते कृष्णे ऋतुमत्यान्तु योषिति' इति मेदिनी। **कुण्डिनमिति** ॥ 'नगरङ्कुण्डिनमण्डजो ययौ' इति श्रीहर्षः। कुण्डिनः ऋषिः। तस्यापत्यङ्कौण्डिन्यः। **दिनमिति** ॥ परुषि पर्वणि दिनं खण्डितमिति तैत्तिरीयश्रुत्यर्थः। **द्रुदक्षिभ्यामिनन्** ॥ 'द्रु गतौ'। 'दक्ष वृद्धौ'। 'द्रविणं न द्रयोर्वित्ते काञ्चने च पराक्रमे। दाक्षिणा दक्षिणोद्भूतसरलच्छन्दवर्तिषु। अवामे त्रिषु यज्ञादिविधिदाने दिशि स्त्रियाम्' इति मेदिनी। 'दक्षिणः सरलोदारपरच्छन्दानुवर्त्तिषु। वाच्यवद्दक्षिणावाची यज्ञदानप्रतिष्ठयोः' इति विश्वः। **अर्तेः** ॥ 'इरिणं शून्यमूषरम्' इत्यमरः। 'इरिणन्तु खरे शून्येऽपि' इति मेदिनी। **तुहिनमिति** ॥ तुहिर् अर्दने। लघूपधगुणे कृते ह्रस्वः। **तलिपुलिभ्याञ्च** ॥ तल प्रतिष्ठायाम्। पुल महत्त्वे। 'तलिनं विरले स्तोके स्वच्छेऽपि वाच्यलिङ्गकम्' इति मेदिनी। **महेः** ॥ 'कुतस्त्वमिन्द्र माहिनस्सन्' इति मन्त्रे माहिनो महनीयः पूजनीय इति वेदभाष्यम्। **क्विब्वचि** ॥ पृच्छतीति प्राट्। 'छ्वोः शूठ्' इति शः। प्राशौ प्राशः। **श्रीरिति** ॥ 'कृदिकारात्' इति ङीष् तु न। कृत्प्रत्ययो य इकार इति व्याख्यानात्। कृदन्तं यदिकारान्तमिति

२१८। **हुवः श्लुवच्च**। जुहूः।

२१९। **स्रुवः कः**। स्रुवः।

२२०। **चिक्च**। इकार उच्चारणार्थः। क इत्, कुत्वम्। स्रुक्। 'स्रुवं च स्रुचश्च सम्मृड्ढि'।

२२१। **तनोतेरनश्च वः**। तनोतेश्चिक्प्रत्ययः, अनो वशब्दादेशश्च। त्वक्।

२२२। **ग्लानुदिभ्यां डौः**। ग्लौः। नौः।

२२३। **च्विरव्ययम्**। डौरित्येव। ग्लौ करोति। 'कृन्मेजन्तः' (सू ४४९)। इति सिद्धे नियमार्थमिदम्। उणादिप्रत्ययान्तश्च्व्यन्त एवेति।

२२४। **रातेर्डः**। राः। रायौ। रायः।

२२५। **गमेर्डोः**। 'गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः। स्त्री तु स्यादिशि भारत्यां भूमौ च सुरभावपि। नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु' बाहुलकाद्द्युतेरपि डोः। 'द्यौः स्त्री स्वर्गान्तरिक्षयोः' इति कोशः।

२२६। **भ्रमेश्च डूः**। भ्रूः। चाद्रमेः। अग्रेगूः।

२२७। **दमेर्डोसिः**। दोः। दोषौ।

२२८। **पणेरिजादेश्च वः**। वणिक्। स्वार्थेऽण्। 'नैगमो वाणिजो वणिक्'।

२२९। **वशेः कित्**। 'उशिगग्नौ घृतेऽपि च'।

२३०। **भृञ ऊच्च**। भूरिक् भूमिः।

२३१। **जसिसहोरुरिन्**। जसुरिर्वज्रम। सहुरिरादित्यः पृथिवी च।

पक्षेऽपि कारग्रहणे तत्सामर्थ्यादेव केवलग्रहणात्। दुर्घटस्तु ङीपि श्रीमिल्यपि रक्षित इच्छतीत्याह। 'श्रीर्विष्णुरचनाशोभाभारतीसरलद्रुमे। लक्ष्म्यान्त्रिवर्गसम्पत्तिविधोपकरणेषु च। विभूतौ च मतौ च स्त्री' इति मेदिनी। जुराकाशे इत्यादि मूलोदाहृतञ्च। **हुवः**॥ चात् क्विब्दीर्घौ। **स्रुवः कः**॥ 'स्रु गतौ'। स्रुवो यज्ञपात्रविशेषः। 'अयं स्रुवोऽभिजिहर्ति' 'स्रुवेण पार्वणौ जुहोति' इत्यादौ प्रसिद्धः। **चिक्च**॥ स्रुव इत्येव। योगविभाग उत्तरार्थः। **तनोतेः**॥ व इति सङ्घातग्रहणम्। तदाह। **वशब्देति**॥ 'स्त्रियान्तु त्वग्गम्यग्धरा' इत्यमरः। केशवोक्तमाह। **गौर्नेत्यादि**॥ 'गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान्। स्त्री सौरभेय्यादिग्वाणदिग्वाग्भूष्वप्सु भूम्नि च' इति मेदिनी। **द्यौरिति**॥ कर्तर्यधिकरणे वा प्रत्ययः। **दोरिति**॥ त्रिलिङ्गोऽयमिति प्रागेवोक्तम्। **जसिसहोरुरिन्**॥ 'जसुरये स्तर्यं पिप्यथुर्गाम्' इति मन्त्रे जसुरये श्रान्तायेति 'नीचायमानं जसुरिं न श्येनम्' इत्यत्र जसुरिं क्षुधितम्। श्येनत्र श्येनपक्षिणमिवेति। 'उतस्य वाजी सहुरिर्ऋतौ वा' इति मन्त्रे सहुरिः सहनशीलः इति च वेदभाष्यम्।

२३२। **सुयुरुवृञो युच्**। सवनश्चन्द्रमाः। यवनः। रवणः कोकिलः। वरणः।

२३३। **अशे रश च**। अश्नोतेर्युच्स्यात् रशादेशश्च। रशना काञ्ची। जिह्वावाची तु दन्त्यसकारवान्।

२३४। **उन्देर्नलोपश्च**। ओदनः।

२३५। **गमेर्गश्च**। गमेर्युच्स्याद्गश्चादेशः। गगनम्।

२३६। **बहुलमन्यत्रापि**। युच्स्यात्। स्यन्दनः। रोचना।

२३७। **रञ्जेः क्युन्**। रजनम्।

२३८। **भूसूधूभ्रास्जिभ्यश्छन्दसि**। भुवनम्। सुवनः आदित्यः। धुवनो वह्निः। निधुवनं सुरतम्। भृज्जनमम्बरीषम्।

२३९। **कृपृवृजिमन्दिनिधाञः क्युः**। किरणः। पुरणः समुद्रः। वृजनमन्तरिक्षम्। मन्दनं स्तोत्रम्। निधनम्।

सुयु॥ 'सवनन्त्वध्वरे स्नाने सोमनिर्दलनेऽपि च' इति मेदिनी। 'रवणः शब्दने खरे' इति च। 'वरणस्तिक्तशाकेऽपि प्राकारे वरणं वृतौ' इति विश्वः। 'वरुणे वरणः सेतुस्तिक्तशाकः कुमारकः' इत्यमरः। **अशे रश च**॥ **जिह्वेति**॥ 'रस आस्वादने' चौरादिकः। ततो नन्द्यादित्वाल्ल्युः। 'ण्यासश्रन्थः' इति युज्वा। 'अथ रसनं स्वादने ध्वनौ। जिह्वायान्तु न पुंसि स्यात् रास्नायां रसना स्त्रियाम्' इति मेदिनी। एषा दन्त्यतालव्यवतोर्द्वयोरर्थव्यवस्था भूरिप्रयोगाभिप्रायेणोक्ता। वस्तुतस्तु द्वावप्यर्थद्वये साधू। तथा हि। 'तालव्या अपि दन्त्याश्च शम्बशम्बलशूकराः। रशनापि च जिह्वायाम्' इति विश्वकोशाज्जिह्वायामुभयम्। 'रसनं निस्वने स्वादे रसना काञ्चिजिह्वयोः' इत्यजयधरणिकोशाभ्यां काञ्च्यामुभयं साधु। 'रसनं स्वदने वाथ रसना काञ्चिजिह्वयोः। रसनञ्चापि रास्नायाम्' इति विश्वप्रकाशाच्चेति दिक्। एवञ्चेह सूत्रे अशू व्याप्तौ 'अश भोजने' इति धातुद्वयमपि ग्राह्यम्। 'रस आस्वादने' 'रस शब्दे' इति धातुभ्यां 'बहुलमन्यत्रापि' इत्यनुपदं वक्ष्यमाणो युच्। तेन सर्वत्रावयवार्थानुगमोऽपि सूपपाद इत्यवधेयम्। **उन्देः**॥ 'ओदनं न स्त्रियां भक्ते बलायामोदनी स्त्रियाम्' इति मेदिनी। **बहुलम्**॥ 'स्यन्दनन्तु स्रुतौ नीरे तिनिशे ना रथेऽस्त्रियाम्' इति मेदिनी। 'रोचना रक्तकल्हारे गोपित्तवरयोषितोः। रोचनः कूटशाल्मल्यां पुंसि स्याद्रोचके त्रिषु' इति च। 'चदि आह्लादने'। 'चन्दनं मलयोद्भवे। चन्दनः कपिभेदे स्यान्नदीभेदे तु चन्दनी' इति विश्वः। 'चन्दनी तु नदीभेदे। चन्दनोऽस्त्री मलयजे भद्रकाल्यां नपुंसकम्' इति मेदिनी। भद्रकाली ओषधिविशेषः। 'भद्रकाली तु गन्धोल्यां काल्यायन्यामपि स्त्रियाम्' इति मेदिनी। 'असु क्षेपणे'। 'असनं क्षेपणे क्लीबं पुंसि स्याज्जीवकद्रुमे' इति मेदिनी। 'अत सातत्यगमने'। राजपूर्वः। 'राजातनः क्षीरिकायां प्रियाले किंशुकेऽपि च' इति विश्वमेदिन्यौ। एवमन्येऽपि द्रष्टव्याः। **रञ्जेः क्युन्**॥ बाहुलकात्कृपेरपि। लत्वाभावश्च। कृपणः। **भूसू**॥ बहुलवचनाद्भाषायामपि। 'भुवनं विष्टपेऽपि स्यात्सलिले गगने जने' इति मेदिनी। **कृपृ**॥ 'निधनं स्यात्कुले नाशे' इति

२४०। **धृषेर्धिष् च संज्ञायाम्**। धिषणो गुरुः। धिषणा धीः।

२४१। **वर्तमाने पृषद्बृहन्महज्जगच्छतृवत्**। अतिप्रत्ययान्ताः। 'पृषु सेचने' गुणाभावः। पृषन्ति। बृहत्। महान्। गमेर्जगादेशः। जगत्।

२४२। **संश्चत्पद्वेहत्**। एते निपात्यन्ते। पृथक्करणं शतृवद्भावनिवृत्त्यर्थम्। सञ्चिनोतेः सुट्। इकारलोपः। संश्चत् कुहकः। तृपत् छत्रम्। विपूर्वात् हन्तेष्टिलोपः इत ए च। 'वेहद्भर्भोपघातिनी'।

२४३। **छन्दस्यसानच्शुजृभ्याम्**। शवसानः पन्थाः। जरसानः पुरुषः।

२४४। **ऋञ्जिवृधिमन्दिसहिभ्यः कित्**। ऋञ्जसानो मेघः। वृधसानः पुरुषः। मन्दसानोऽग्निर्जीवश्च। सहसानो यज्ञो मयूरश्च।

२४५। **अर्तेर्गुणः शुट् च**। अर्शसानोऽग्निः।

२४६। **सम्यानच्स्तुवः**। संस्तवानो वाग्मी।

मेदिनी। 'निधनङ्कलनाशयोः' इति हेमचन्द्रः। **धृषेः**॥ 'धिषणस्त्रिदशाचार्ये धिषणा धियि योषिति' इति मेदिनी। **वर्तमाने**॥ 'पृषन्मृगे पुमान् बिन्दौ न द्वयोः पृषतोऽपि ना। अनयोश्च त्रिषु श्वेतबिन्दुयुक्तेऽप्युभाविमौ' इति मेदिनी। 'बृहती क्षुद्रवार्ताक्यां कण्टकार्याञ्च वाचि च। वारिधान्यां महत्याञ्च छन्दोवसनभेदयोः' इति विश्वः। शतृवद्भावात् 'उगिदचाम्' इति नुम्। बृहत् विपुलम्। 'महती वल्लकीभेदे राज्ये तु स्यान्नपुंसकम्। तत्त्वभेदे पुमान् श्रेष्ठे वाच्यवत्' इति मेदिनी। महती नारदीया वीणा। 'अवेक्षमाणं महतीं मुहुर्मुहुः' इति माघः। 'जगत्स्याद्विष्टपे क्लीबं वायौ ना जङ्गमे त्रिषु। जगती भुवने क्ष्मायां छन्दोभेदे जनेऽपि च' इति मेदिनी। तत्र वायुवाचिनः पुँल्लिङ्गस्य नुमि जगन्–जगन्तौ–जगन्तः इत्यादि। 'द्युगमिजुहोतीनान्द्वे च' इति व्युत्पादितस्य तु नुमभावात् जगत्–जगतावित्यादि। **सञ्चिनोतेरिति**॥ सुभूतिचन्द्रस्तु सम्पूर्वाच्छ्रयतेः संश्रदित्याह। **तृपत् छत्रमिति**॥ चन्द्रमा इत्यन्ये। 'पिब मध्वस्तृपदिन्द्रावृषस्व' इति मन्त्रे तु तृपच्छब्दो यौगिकः। तृप्यन्नित्यर्थः। वेदभाष्ये तु तौदादिकात् तृपतेः शतृप्रत्यये आगमशास्त्रस्यानित्यत्वान्नुमभाव इत्युक्तम्। तत्प्रौढिवादमात्रम्। एतेन 'त्वमस्य ब्राह्मणादातृपत्पिब' इत्यादि मन्त्रान्तरं व्याख्यातम्। गौरित्यनुवृत्तौ 'वेहद्भर्भोपघातिनी' इत्यमरः। **छन्दस्य**॥ 'शु गतौ, जृष् वयोहानौ'। एतेन 'प्रमन्महे' इत्यादिमन्त्रद्वयेऽपि शवसानशब्दस्य गन्तृपरतया सौष्ठवे बाहुलकोपष्टम्भेन क्लिष्टव्याख्यानं नातीवादर्तव्यम्। **ऋञ्जिवृधि**॥ ऋजि भर्जने। इदित्त्वान्नुम्। तत एव नलोपाभावः। एवञ्च अयं मन्दिसही च पूर्वसूत्रे एव पठितुं योग्याः। कित्त्वन्तु वृद्धावेवोपयुज्यते। उत्तरसूत्रेऽपि गुणग्रहणं सुत्यजम्, अर्तेः शुट् च वृधेःकिदित्युक्तौ सर्वसामञ्जस्यात्। **ऋञ्जसानो मेघ इति**॥ 'ऋञ्जसानः पुरुवार उक्थैः। अस्मिन् मन्दसामा वृषन्ने वसु' इत्यादिमन्त्राणां भाष्ये तु यौगिकार्थ एव पुरस्कृतः। **अर्तेः**॥ धातोर्गुणः। प्रत्ययस्य शुडागमः। 'आसाविषदर्शसानाय शरुम्' इति मन्त्रस्य भाष्ये

२४७। **युधिबुधिदृशिभ्यः किच्च**। युधानः। बुधानः। दृशानो लोकपालकः।

२४८। **हुर्छेः सनो लुक् छलोपश्च**। जुहुराणश्चन्द्रमाः।

२४९। **श्वितेर्दश्च**। शिश्विदानः पुण्यकर्मा।

२५०। **तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ**। शंसेः क्षदादिभ्यश्च क्रमात्तृन्तृचौ स्तः। तौ चानिटौ। शंस्ता स्तोता। शंस्तरौ। शंस्तरः। क्षदिः सौत्रो धातुः शकलीकरणे भक्षणे च। अनुदात्तेत्। 'वृक्ये चक्षदानम्' इति मन्त्रात्। 'उक्षाणं वा वेहतं वा क्षदन्ते' इति ब्राह्मणाच्च। 'क्षत्ता स्यात्सारथौ द्वाःस्थे वैश्यायामपि शूद्रजे'।

२५१। **बहुलमन्यत्रापि**। मन् मन्ता। हन् हन्ता। इत्यादि।

२५२। **नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ**। न पतन्त्यनेन पितरो नरके इति नप्ता पौत्रो दौहित्रश्च। नयतेः षुग्गुणश्च। नेष्टा। त्विषेरितोऽत्त्वम्। त्वष्टा। होता। पोता ऋत्विग्भेदः। भ्राजतेर्जलोपः भ्राता। जायां माति

अर्शसानाय शत्रूणां हिंसित्रे इति व्याख्यातम्। **युधिबुधि** ॥ बाहुलकात् कृपेरपि। कृपाणः खड्गः। 'कृपाणेन कथङ्कारं कृपणः सह गण्यते। परेषान्दानसमये यः स्वकोशं विमुञ्चति।' **हुर्छेः** ॥ 'युयोध्यस्मज्जुहुराणमेनः' इति मन्त्रे जुहुराणङ्कौटिल्यकारि पापं, युयोधि पृथक् कुर्विति भाष्यम्। **श्वितेर्दश्च** ॥ श्विता वर्णे। अस्मात्सनन्तादानच्, सनो लुक्, तकारस्य दकारः। किदित्यनुवृत्तेर्न गुणः। **पुण्यकर्मेति** ॥ स हि उज्ज्वलो भवितुमिच्छति। 'शिश्विदानोऽकृष्णकर्मा' इति विशेष्यनिघ्ने अमरः। अकृष्णं शुक्लं शुद्धमित्यर्थः। इह क्षीरस्वामी प्रकृतसूत्रं विस्मृत्य, श्विदि श्वैत्ये, अस्माल्लिटः कानजिति व्याख्यत्। तत्तुच्छम्। कानचश्छान्दसत्वात्। इदित्त्वेन नलोपानुपपत्तेश्चेति दिक्। कृष्णकर्मेत्यमरे पाठान्तरम्। पापकर्मेत्यर्थः तत्रावयवार्थानुगमबलेन बोध्यः। शुद्धो भवितुमिच्छतीत्युक्तो हि इदानीमशुद्ध इति गम्यते। **तृन्तृचौ** ॥ 'अप्तृन्' इत्यतोऽत्र दीर्घो नेत्युदाहरति। **शंस्तरावित्यादि** ॥ नित्त्वादाद्युदात्तः। तथाच मन्त्रः। 'आवग्राम उत शंस्तासु विप्रः'। आदिशब्दात् 'शासु अनुशिष्टौ'। शास्ति विनयति सत्त्वानि शास्ता बुद्धः, शास्तरौ-शास्तरः। 'शास्ता समन्तभद्रे ना शासके पुनरन्यवत्' इति मेदिनी। प्रपूर्वस्य तु 'अप्तृन्' इति दीर्घः। प्रशास्तारौ-प्रशास्तारः। 'क्षत्ता शूद्राच्च वैश्याजे प्रतीहारे च सारथौ। भुजिष्यातनयेऽपि स्यात् नियुक्तवेधसोः पुमान्' इति मेदिनी। कोशानुसारेणाह। **वैश्यायामिति** ॥ अमरस्तु 'क्षत्रियायाञ्च शूद्रजे' इत्याह। याज्ञवल्क्योऽपि। 'क्षत्तृया मागधं वैश्यात् शूद्रात् क्षत्तारमेव च' इति। इह बहुलमन्यत्रापीति प्रपञ्चार्थत्वात् उपेक्षितम्। **नप्तेति** ॥ नञः प्रकृतिभावः। 'पत्लृ गतौ' इत्यस्मात् तृच् टिलोपः। 'त्वष्टा पुमान्

जामाता । 'मान पूजायाम्' नलोपः माता । पातेराकारस्येत्त्वम् । पिता । दुहेस्तृच्, इट् गुणाभावश्च । दुहिता ।

२५३ । **सुञ्यसेर्ऋन्** । स्वसा ।

२५४ । **यतेर्ट्टिच्च** । याता । 'भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्' ।

२५५ । **नञि च नन्देः** । न नन्दति ननान्दा । इह वृद्धिर्नानुवर्तते इत्येके । 'ननान्दा तु स्वसा पत्युर्ननन्दा नन्दिनी च सा' इति शब्दार्णवः ।

२५६ । **दिवेर्ऋः** । देवा । देवरः । 'स्वामिनो देवृदेवरौ' ।

२५७ । **नयतेर्डिच्च** । ना । नरौ । नरः ।

२५८ । **सव्ये स्थश्छन्दसि** । 'अम्बाम्ब—' (सू २९१८) इत्यत्र 'स्थास्थिन्स्थूणामुपसंख्यानम्' (वा ४९६१) सव्येष्ठा सारथिः । सव्येष्ठौ । सव्येष्ठरः ।

२५९ । **अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः** । अष्टभ्योऽनिप्रत्ययः स्यात् । अरणिरग्नेर्योनिः । सरणिः । धरणिः । धमनिः । अमनिर्गतिः । अशनिः । अवनिः । तरणिः । बाहुलकाद्रजनिः ।

२६० । **आङि शुषेः सनश्छन्दसि** । आशुशुक्षणिरग्निर्वातश्च ।

२६१ । **कृषेरादेश्च चः** । चर्षणिर्जनः ।

देवशिल्पितक्ष्णोरादित्यभिषपि' इति मेदिनी । जायां मातीत्यन्तर्भावितण्यर्थः । **सुञ्यसेः** ॥ असु क्षेपणे । अस दीप्त्यादिषु । आभ्यां सुञि उपपदे ऋन् । **यतेः** ॥ यती प्रयत्ने । **नञि च नन्देः** ॥ 'उषाप्यूषा ननन्दा च ननान्दा च प्रकीर्तिता' इति द्विरूपेषु विश्वः । **देवेति** ॥ भ्रातर इत्यनुवृत्तौ 'स्वामिनो देवृदेवरौ' इत्यमरः । 'देवे धवे देवरि माधवे च' इति श्रीहर्षः । **नयतेः** ॥ 'स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः' इत्यमरः । **सव्ये** ॥ ऋडिच्चेत्यनुवर्तते । **सव्येष्ठेति** ॥ 'तत्पुरुषे कृति' इति सप्तम्या अलुक् । **अर्तिसृ** ॥ धमिः सौत्रः । 'अरणिर्वह्निमन्थेना द्वयोर्निर्मन्थदारुणि' इति मेदिनी । 'सरणिः श्रेणिवर्त्मनोः' इति दन्त्यादौ रभसः । 'सरणिः पङ्क्तौ मार्गे च' इति मेदिनी । शृ हिंसायाम् । ततः शरणिरित्येके । 'शरणिः पथि चाऽऽवलौ' इति तालव्यादावजयः । 'इमामग्ने शरणिम्' इति मन्त्रे शरणिं हिंसां व्रतलोपरूपां मीमृषः क्षमस्वेति वेदभाष्यम् । 'धमनी तु शिरा हट्टविलासिन्याञ्च योषिति । अशनिः स्त्रीपुंसयोः स्याच्चञ्चलायां पवावपि । तरणिर्द्युमणौ पुंसि कुमारीनौकयोः स्त्रियाम् । रजनी नीलिनीरात्रिहरिद्राजतुकासु च' इति मेदिनी । कुमारी लताविशेषः । 'तरणी रामतरणी कर्णिका कारुकेसरा । सहा कुमारी गन्धाढ्या' इति धन्वन्तरिनिघण्टुः । रञ्जेर्नलोपोऽपि बाहुलकात् । **कृषेरादेश्च चः** ॥ **चर्षणिर्जन इति** ॥ वैदिकनिघण्टौ चर्षणिशब्दस्य मनुष्यनामसु

२६२। **अदेर्मुट् च**। अद्मनिः अग्निः।

२६३। **वृतेश्च**। वर्तनिः। गोवर्धनस्तु चकारान्मुट् वर्त्मनिरित्याह।

२६४। **क्षिपेः किच्च**। क्षिपणिरायुधम्।

२६५। **अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः**। अर्चिर्ज्वाला। इदन्तोऽप्ययम्। 'अग्नेर्भ्राजन्ते अर्चयः'। शोचिर्दीप्तिः। हविः सर्पिः। 'इस्मन्—' (सू २९८५) इति ह्रस्वः। छदिः पटलम्। छर्दिर्वमनव्याधिः। इदन्तोऽपि। 'छर्दतीसारशूलवान्'।

२६६। **बृंहेर्नलोपश्च**। 'बर्हिर्नो कुशशुष्मणोः'।

२६७। **द्युतेरिसिन्नादेश्च जः**। ज्योतिः।

२६८। **वसौ रुचेः संज्ञायाम्**। वसुरोचिर्यज्ञः।

२६९। **भुवः कित्**। भुविः समुद्रः।

२७०। **सहो धश्च**। सधिरनड्वान्।

२७१। **पिवतेस्थुक्**। 'पाथिश्चक्षुःसमुद्रयोः'।

२७२। **जनेरुसिः**। जनुर्जननम्।

२७३। **मनेर्धश्छन्दसि**। मधुः।

२७४। **अर्तिपृवपियजितनिधनितपिभ्यो नित्**। अरुः। परुर्ग्रन्थिः।

पाठात्। 'ओमासश्चर्षणीधृतः। प्रचर्षणिभ्यः' इत्यादिमन्त्राणां भाष्ये तथैव व्याख्यानाच्च। उज्ज्वलदत्तस्तु आदेश्च ध इति पठित्वा धर्षणी बन्धकीति व्याख्यत्। तदयुक्तम्, तथा सति धृषेरित्येव सूत्रयेत्, प्रागल्भ्यरूपावयवार्थानुगमात्। आदेश्च ध इत्यंशस्य त्यागेन लाघवाच्च। **वर्तनिरिति**॥ कृदिकारादिति पक्षे ङीष्। 'सरणिः पद्धतिः पद्या वर्तन्येकपदीति च' इत्यमरः। **क्षिपणिरायुधमिति**॥ 'उतस्य वाजी क्षिपणिन्तुरण्यति' इति मन्त्रस्य वेदभाष्ये तु क्षिपणिं क्षेपणमनु तुरण्यति त्वरयति गन्तुमिति व्याख्यातम्। अर्चिरिति सान्तम्। 'तमर्चिषा स्फूर्जयन्' इति मन्त्रः। 'नयनमिव सनिद्रं घूर्णते नैशमर्चिः' इति माघः। 'ज्वालाभासोर्न पुंस्यर्चिः' इति नानार्थे सान्तेष्वमरः। **इदन्तोऽपीति**॥ णिजन्तादच इरिति भावः। 'अर्चिर्हेतिः शिखा स्त्रियाम्' इत्यमरः। 'रोचिः शोचिरुभे क्लीबे' इति च। छाद्यतेऽनया छदिः। छदिः स्त्रियामेवेति लिङ्गानुशासनसूत्रम्। एवञ्च 'पटलं छदिः' इत्यमरग्रन्थे पटलसाहचर्याच्छदिषः क्लीबतां वदन्त उपेक्ष्याः। **बृंहेः**॥ 'बर्हिः पुंसि हुताशने। न स्त्री कुशे' इति मेदिनी। **द्युतेः**॥ 'ज्योतिरग्नौ दिनकरे। पुमान्नपुंसके दृष्टौ स्यान्नक्षत्रप्रकाशयोः' इति मेदिनी। **वसौ रुचेः**॥ बाहुलकात्केवलादपि। 'रोचिः शोचिरुभे क्लीबे'। **अर्तिपृ**॥ 'व्रणोऽस्त्रियामीर्ममरुः क्लीबे'

वपुः । यजुः । तनुः—तनुषी—तनूंषि । धनुरस्त्रियाम् । 'धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति' । सान्तस्योदन्तस्य वा रूपम् । 'तपुः सूर्याग्निशत्रुषु' ।

२७५ । **एतेर्णिच्च** । आयुः । आयुषी ।

२७६ । **चक्षेः शिच्च** । चक्षुः ।

२७७ । **मुहेः किच्च** । मुहुरव्ययम् ।

२७८ । **बहुलमन्यत्रापि** । आचक्षुः । परिचक्षुः ।

२७९ । **कृगृशृवृश्वातिभ्यः ष्वरच्** । 'कर्वरो व्याघ्ररक्षसोः' । गर्वरोऽहङ्कारी । शर्वरी रात्रिः । 'वर्वरः प्राकृतो जनः' । चत्वरम् ।

२८० । **नौ सदेः** । 'निषद्वरस्तु जम्बालः' । निषद्वरी रात्रिः ।

॥ इत्युणादिषु द्वितीयऽपादः ॥

॥ अथ उणादिषु तृतीयऽपादः ॥

२८१ । **छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः** । एकादश ष्वरच्प्रत्ययान्ता निपात्यन्ते । 'छिदिर्' 'छद्' अनयोस्तकारोऽन्तादेशः छिदेर्गुणाभावश्च । छित्वरो धूर्तः । 'छत्वरो गृहकुञ्जयोः' ।

इत्यमरः । 'ग्रन्थिर्ना पर्वपरुषी' इति च । 'वपुः क्लीवन्तनुः शस्ताकृतावपि' इति मेदिनी । तनुः शरीरम् । 'तनुषे तनुषेऽनङ्गम्' इति सुबन्धुः । 'स्यात्तनुस्तनुषा सार्धं धनुषा च धनुं विदुः' इति द्विरूपेषु विश्वः । 'अथास्त्रियान्धनुश्चापौ' इत्यमरः । 'धनुः प्रियाले ना न स्त्री राशिभेदे शरासने । धनुर्धरे त्रिषु' इति सान्ते मेदिनी । **चक्षेः** ॥ शित्त्वात्सार्वधातुकत्वे ख्याञ् न । चक्षते रूपमनुभवन्त्यनेनेति चक्षुः । **मुहेः** ॥ 'मुहुः पुनःपुनः शश्वत् अभीक्ष्णमसकृत् समाः ।' इत्यव्ययेष्वमरः । अस्मात्परं बहुलमन्यत्रापीति सुस्पष्टत्वात्त्यक्तम् । **कृगृ** ॥ 'नैर्ऋतः कर्वरः क्रव्यात्क्रव्युरो यातुरक्षसोः' इति शब्दार्णवः । 'शर्वरी यामिनीस्त्रियोः' इति मेदिनी । 'वर्वरः पामरे केशविन्यासे नीवृदन्तरे । वर्वरः फञ्जिकायान्तु वर्वरा शाखपुष्पयोः' इति विश्वः । 'वर्वरः पामरे केशवल्कले नीवृदन्तरे । फञ्जिकायां पुमान् शाकभेदपुष्पभिदोः स्त्रियाम्' इति मेदिनी । 'चत्वरं स्थण्डिलेऽङ्गणे' इति च । **नौ सदेः** ॥ ष्वरजनुवर्तते । 'सदिरप्रतेः' इति षत्वम् । 'निषद्वरः स्मरे पङ्के निशायान्तु निषद्वरा' इति मेदिनी ॥

॥ इत्युणादिषु द्वितीयः पादः ॥

छित्वर ॥ 'छित्वरं छेदनद्रव्ये धूर्ते वैरिणि च त्रिषु' इति मेदिनी । 'डु धाञ्' । अन्त्यस्य ईत्वम् । एवं 'पा पाने' इत्यादीनामित्येके । अन्ये तु 'पीव मीव तीव नीव स्थौल्ये'

धीवरः कैवर्तः। पीवरः स्थूलः। मीवरो हिंसकः। चिनोतेर्दीर्घश्च। चीवरं भिक्षुकप्रावरणम्। तीवरो जातिविशेषः। नीवरः परिव्राट्। गाहतेर्ह्रस्वत्वम्। गह्वरम्। कटे वर्षादौ, कट्वरं व्यञ्जनम्। यमेर्दकारः संयद्वरो नृपः। पदेः सम्पद्वर इत्येके।

२८२। **इण्सञ्जिदीङुष्यविभ्यो नक्**। 'इनः सूर्ये नृपे पत्यौ' सिनः काणः। जिनः अर्हन्। दीनः। उष्णः। ऊनः।

२८३। **फेनमीनौ**। एतौ निपात्येते। स्फायतेः फेनः। मीनः।

२८४। **कृषेर्वर्णे**। कृष्णः।

२८५। **बन्धेर्ब्राधिबुधी च**। ब्रध्नः। बुध्नः।

२८६। **धापृवस्यज्यतिभ्यो नः**। 'धाना भृष्टयवे स्त्रियः'। पर्ण पत्रम्। पर्णः किंशुकः। 'वल्लो मूल्ये वेतने च'। अजेर्वी। वेनः। अत्रः आदित्यः। बाहुलकाच्छृणोतेः। श्रोणः पङ्गुः।

२८७। **लक्षेरत् च**। लक्षेरचुरादिण्यन्तान्नः स्यात्तस्याडागमश्च। चान्मुडित्येके। 'लक्षणं लक्ष्मणं नाम्नि चिह्ने च'। लक्षणो लक्ष्मणश्च रामभ्राता। 'लक्षणा हंसयोषायां सारसस्य च लक्ष्मणा'।

एभ्यः प्रत्यये 'लोपो व्योः' इति वलोपमाहुः। 'पीवरः कच्छपे स्थूले' इति मेदिनी। 'तीवरो नाम्बुधौ व्याधे' इति च। 'स्यान्नीवरो वणिजके वास्तवेऽपि च दृश्यते' इति मेदिनीविश्वप्रकाशौ। 'कट्वरं कुत्सिते वाच्यलिङ्गं तक्रे नपुंसकम्' इति मेदिनी। बाहुलकादुपपूर्वाज्जुहोतेरुकारलोपः। 'उपह्वरे समीपे स्यादेकान्तेऽपि नपुंसकम्' इति मेदिनी। उपह्वरो रथः इति केचित्। 'तदुप्रयक्षतम्' इति मन्त्रे तु उपह्वरे उपगन्तव्ये समीपे देशे। 'ह्वृ कौटिल्ये'। गतिविशेषवाचिना धातुना गतिमात्रमिह लक्ष्यते। ततोऽधिकरणे घः। कृदुत्तरपदप्रकृतिस्वरत्वमिति भाष्ये व्याख्यातम्। **इण्सञ्**॥ 'इनः पत्यौ नृपार्कयोः। जिनोऽर्हति च बुद्धे च पुसि स्यात् त्रिषु जित्वरे' इति मेदिनी। 'दीना मूषिकयोषायां दुर्गते कातरेऽन्यवत्' इति विश्वः। 'उष्णो ग्रीष्मे पुमान् दक्षाशीतयोरन्यलिङ्गके' इति मेदिनी। **फेनमीनौ**॥ 'डिण्डीरोऽब्धिकफः फेनः' इत्यमरः। 'मीनो राश्यन्तरे मत्स्ये' इति विश्वः। **कृषेः**॥ 'कृष्णः सत्यवतीपुत्रः केशवे वायसेऽर्जुने। कृष्णा स्यात् द्रौपदीनीलीकणाद्राक्षासु योषिति। मेचके वाच्यलिङ्गः स्यात् क्लीबे मरिचलोहयोः' इति मेदिनी। ब्रध्नः सूर्यः। 'बुध्नः शिफायां रुद्रे च' इति विश्वः। 'बुध्नो ना मूलरुद्रयोः' इति मेदिनी। **धापृ**॥ 'धाना भृष्टयवे प्रोक्ता धान्यकेऽभिनवोद्भिदि' इति विश्वः। 'पर्ण पत्रे किंशुके ना' इति मेदिनी। 'वल्लस्त्ववक्रये पुंसि वेतने स्यान्नपुंसकम्' इति च। **वेन इति**॥ लुण्टाकः प्रजापतिश्च। 'सपूर्व्यो महोनाम्' इति मन्त्रे मनोः पुत्रेऽपि प्रसिद्धः। **लक्षणमित्यादि**॥ लक्षणलक्ष्मणशब्दौ द्वावपि नाम-

२८८ । **वनेरिच्चोपधायाः** । वेन्ना नदी ।

२८९ । **सिवेष्टेर्यूं च** । दीर्घोच्चारणसामर्थ्यान्न गुणः । स्यून आदित्यः । बाहुलकात्केवलो नः । ऊठ् । अन्तरङ्गत्वाद्यण् । गुणः । स्योनः ।

२९० । **कृवृजृसिद्रुपन्यनिस्वपिभ्यो नित्** । कर्णः । वर्णः । 'जर्णश्चन्द्रे च वृक्षे च' । सेना । द्रोणः । पन्नो नीचैर्गतिः । अन्नमोदनः । स्वप्नो निद्रा ।

२९१ । **धेट इच्च** । 'धेनः सिन्धुर्नदी धेना' ।

२९२ । **तृषिशुषिरासिभ्यः कित्** । तृष्णा । शुष्णः सूर्यो वह्निश्च । **रत्नं** द्रव्यम् ।

२९३ । **सुञो दीर्घश्च** । सूना वधस्थानम् ।

२९४ । **रमेस्त च** । रमयतीति रत्नम् ।

२९५ । **रास्नासास्नास्थूणावीणाः** । रास्ना गन्धद्रव्यम् । सास्ना गोगलकम्बलः । स्थूणा गृहस्तम्भः । वीणा वल्लकी ।

२९६ । **गादाभ्यामिष्णुच्** । गेष्णुर्गायनः । देष्णुर्दाता ।

चिह्नयोः क्लीबौ । रामभ्रातरि पुंलिङ्गो हंसयोषायां लक्षणा सारसयोषायां लक्ष्मणा इति व्यवस्थेत्यर्थः । 'लक्षणं नाम्नि चिह्ने च सारस्यां लक्ष्मणा क्वचित् । लक्ष्मणा त्वौषधीभेदे सारस्यामपि योषिति । रामभ्रातरि पुंसि स्यात् सश्रीके चाभिधेयवत्' इति मेदिनी । कोशे तु सारस्यामपि निर्मकारः स्वीकृतः । **वेन्नेति** ॥ लघूपधगुणः । **बाहुलकादिति** ॥ एतच्च 'च्छ्वोः शूठ्' इति सूत्रे वृत्तौ 'येन विधिः' इति सूत्रे कैयटग्रन्थे च स्पष्टम् । 'स्योनः किरणसूर्ययोः' इति मेदिनी । **कृवृ** ॥ 'कर्णः पृथाज्येष्ठसुते सुवर्णाद्रौ श्रुतावपि' इति विश्वमेदिन्यौ । 'वृञ् वरणे' दीर्घपाठे तु 'वृ वरणे' । 'वर्णो द्विजादिशुक्लादियशोगुणकथासु च । स्तुतौ ना न स्त्रियां भेदे रूपाक्षरविलेखने' इति मेदिनी । विश्वमेदिनीस्थमाह । **जर्ण इति** ॥ 'जर्णो जीर्णद्रुमेन्दुषु' इति हेमचन्द्रः । 'द्रोणेऽस्त्रियामाढके स्यात् आढकादिचतुष्टये । पुमान् कृषीपतौ कृष्णकाके स्त्री नीवृदन्तरे । स्त्रियाङ्काष्ठाम्बुवाहिन्याङ्गवादीनामपीष्यते । अन्नं भक्तं च भुक्ते स्यात् । स्वप्नः स्वापे प्रसुप्तस्य विज्ञाने दर्शने पुमान्' इति मेदिनी । **धेट इच्च** ॥ 'धेना नद्यां नदे पुमान्' इति मेदिनी । 'धेनः समुद्रे नद्याञ्च धेना' इति विश्वः । श्लोको धारेत्यादिषु सप्तपञ्चाशत्संख्याकेषु वाङ्नामसु धेनेति वैदिकनिघण्टौ पठितम् । अत एव 'धेनां जिगाति दाशुषे । इन्द्रं धेनाभिरिह मादयस्व' इत्यादिषु धेना वागिति व्याख्यातं भाष्ये । **तृषिशुषि** ॥ 'ञि तृषा पिपासायाम्' । 'तृष्णा लिप्सापिपासयोः' इति विश्वः । **सुञः** ॥ सूनाऽधोजिह्विकापि च' इति नान्ते अमरः । 'सूनं प्रसवपुष्पयोः । सूना पुत्र्यां वधस्थानगलकण्डिकयोः स्त्रियाम्' इति मेदिनी । **रमेस्त च** ॥ 'रत्नं स्वजातिभेदेऽपि मणावपि नपुंसकम्' इति मेदिनी ।

२९७। **कृत्यशूभ्यां क्त्नः**। कृत्नम्। अक्ष्णमखण्डम्।

२९८। **तिजेर्दीर्घश्च**। तीक्ष्णम्।

२९९। **श्लिषेरच्चोपधायाः**। श्लक्ष्णम्।

३००। **यजिमनिशुन्धिदसिजनिभ्यो युच्**। यज्युरध्वर्युः। 'मन्युर्दैन्ये क्रतौ क्रुधि'। शुन्ध्युरग्निः। दस्युस्तस्करः। जन्युः शरीरी।

३०१। **भुजिमृङ्भ्यां युक्त्युकौ**। भुज्युर्भोजनम्। मृत्युः।

३०२। **सर्तेरयुः**। सरयुर्नदी। अयूरिति पाठान्तरम्। सरयूः।

३०३। **पानीविषिभ्यः पः**। पाति रक्षत्यस्मादात्मानमिति पापम्। तद्योगात्पापः। नेपः पुरोहितः। बाहुलकाद्गुणाभावे नीपो वृक्षविशेषः। वेष्पः पानीयम्।

३०४। **च्युवः किच्च**। च्युपो वक्त्रम्।

३०५। **स्तुवो दीर्घश्च**। स्तूपः समुच्छ्रायः।

३०६। **सुशृभ्यां निच्च**। चात्कित्। सूपः। बाहुलकादुत्त्वम्। शूर्पम्।

३०७। **कुयुभ्यां च**। कुवन्ति मण्डूका अस्मिन्कूपः। युवन्ति बध्नन्त्यस्मिन्पशुमिति यूपो यज्ञस्तम्भः।

३०८। **खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः**। सप्तैते पप्रत्ययान्ता निपात्यन्ते। खनतेर्नकारस्य षत्वम्। 'खष्पौ क्रोधबलात्कारौ'। शीलतेर्ह्रस्वश्च। शिल्पं कौशलम्। 'शसु हिंसायाम्'। निपातनात्षत्वम्। शष्पं बालतृणं प्रतिभाक्षयश्च। बाधतेः षः। 'बाष्पो नेत्रजलोष्मणोः'। बाष्पश्च। रौतेर्दीर्घः। 'रूपं स्वभावे सौन्दर्ये'। पॄ। पर्प गृहं बालतृणं पङ्क्तिपीठश्च। 'तल प्रतिष्ठाकरणे' चुरादिणिचो लुक्। 'तल्पं शय्याट्टदारेषु'।

च्युवः॥ 'च्युङ् गतौ'। अनेकार्थत्वादिह भाषणे। च्यवन्ते भाषन्तेऽनेनेति विग्रहः। दशपाद्यान्तु 'चुपः किच्च' इति पठ्यते। 'चुप मन्दायाङ्गतौ'। चोपतीति चुप्पो मन्दगमनकर्ता। **सुशृ**॥ 'सूपो व्यञ्जनसूदयोः' इति मेदिनी। **शूर्पमिति**॥ बाहुलकादुत्वं रपरत्वं 'हलि च' इति दीर्घः। 'प्रस्फोटनं शूर्पमस्त्री' इत्यमरः। दशपाद्यान्तु कुसुयुभ्यश्च। 'सृशृभ्यामूङ् च' इति पठित्वा सूपं शूर्पञ्च व्युत्पादितम्। द्विरूपकोशेऽप्युभयन्दर्शितम्। **कुयुभ्याञ्च**॥ 'कु शब्दे, यु मिश्रणे' आभ्यां पः स च नित्धातोर्दीर्घत्वञ्च। 'कूपकूपकमृन्मानगर्तास्तु गुणवृक्षके' इति मेदिनी। 'शष्पः क्रोधे बलात्कृतौ' इति विश्वः। 'शष्पे बालतृणेऽपि च। पुंसि स्यात्प्रतिभाहानौ' इति मेदिनी। विश्वोक्तिमाह। **बाष्प इति**॥ 'बाष्पमूष्मणि चाश्रुणि' इति कोशान्तरमभिप्रेत्याह। **बाष्पश्चेति**॥ 'रूपं स्वभावे सौन्दर्ये नालके पशुशब्दयोः। ग्रन्थवृत्तौ नाटकादौ आकरश्लोकयोरपि' इति विश्वमेदिन्यौ। 'तल्पमट्टे कलत्रे च शयनीये च न द्वयोः' इति मेदिनी।

३०९ । **स्तनिहृषिषुषिगदिमदिभ्यो णेरित्नुच्** । 'अयामन्त–' (सू २३११) इति णेरयादेशः । स्तनयित्नुः । हर्षयित्नुः । पोषयित्नुः । गदयित्नुः वावदूकः । मदयित्नुः मदिरा ।

३१० । **कृहनिभ्यां क्त्नुः** । कृत्नुः शिल्पी । हत्नुर्व्याधिः **शस्त्रञ्च** ।

३११ । **गमेः सन्वच्च** । जिगत्नुः ।

३१२ । **दाभाभ्यां नुः** । दानुर्दाता भानुः ।

३१३ । **वचेर्गश्च** । वग्नुः ।

३१४ । **धेट इच्च** । धयति तामिति धेनुः ।

३१५ । **सुवः कित्** । 'सूनुः पुत्रेऽनुजे रवौ' ।

३१६ । **जहातेर्ढेऽन्तलोपश्च** । जह्नुः ।

३१७ । **स्थो णुः** । 'स्थाणुः कीले स्थिरे हरे' ।

३१८ । **अजिवृरीरिभ्यो निच्च** । अजेर्वी वेणुः । वर्णुर्नददेशभेदयोः । 'रेणुर्द्वयोः स्त्रियां धूलिः' ।

अमरोक्तमाह । **तल्पमिति** ॥ **स्तनिहृषि** ॥ स्तनगर्दा देवशब्दे । चुरादिण्यन्तौ । 'हृष तुष्टौ, पुष पुष्टौ, मदी हर्षग्लेपनयोः ।' घटादिः । 'स्तनयित्नुः पुमान् वारिधरेऽपि स्तनितेऽपि च' इति मेदिनी । 'हर्षयित्नुः सुते हेम्नि पोषयित्नुः पिके द्विजे । स्तनयित्नुः पयोवाहे तद्भ्रौ मृगरोगयोः' इति विश्वः । 'गदयित्नुः पुमान् कामे जल्पाके कामुकेऽपि च' इति विश्वमेदिन्यौ । 'मदयित्नुः कामदेवे पुमान् मद्ये नपुंसकम्' इति मेदिनी । **कृहनिभ्यां त्नुः** ॥ **कृत्नुरिति** ॥ कर्तेत्यर्थः । कित्त्वान्न गुणः । **हत्नुरिति** ॥ अनुदात्तेत्यादिना अनुनासिकलोपः । एवमुत्तरत्र गमेरपि । **शस्त्रञ्चेति** ॥ चाद्धन्ता । दशपादीवृत्तौ तु क्नुरिति तकाररहितं पठित्वा कृणुः कर्ता हनुर्वक्रैकदेशः । बाहुलकान्नलोपः । गमेस्तु जिगन्नुरित्युदाहृतम् । तत्सर्वं प्रामादिकम् । लक्ष्यविसंवादात् । तथा च श्रूयते । 'सुरूपकृत्नुमूतये । ज्येष्ठराजं भरेकृत्नुम् अयङ्कृत्नुरगृभीतः । मा नो वधाय हत्नवे । मृगं न भीममुपहत्नुमुग्रम् । यो नः सनुत्यः उत वा जिगत्नुः' इत्यादि । अत एव हन्तिधातुं विवृण्वता माधवेन उपहत्नुरित्युदाहृत्य क्नोः कित्त्वादनुनासिकलोप इत्युक्तम् । यत्तु तेनैव 'सुरूपकृत्नुम्' इति मन्त्रे विवृण्वता तकारोपजनश्छान्दस इत्युक्तम् । तदशपादीवृत्तिमनुसृत्य, न तु वस्तुस्थितिमनुरुध्येति सहृदयैराकलनीयम् । **दाभाभ्यां नुः** ॥ 'दानुर्दातरि वक्रान्ते' इति मेदिनी । 'भानू रश्मिदिवाकरौ' इत्यमरः । **वचेः** ॥ वग्नुर्वक्ता । **धेटः** ॥ 'धेनुस्त्यान्नवसूतिका' इत्यमरः । विश्वोक्तिमाह । **सूनुरिति** ॥ **जहातेः** ॥ 'जह्नुः स्यात्पुंसि राजर्षिभेदे च मधुसूदने' इति मेदिनी । विश्वोक्तिमाह । **स्थाणुरिति** ॥ 'स्थाणुः कीले हरे पुमान् । अस्त्री ध्रुवे' इति मेदिनी । **अजिवृ** ॥ 'वेणुर्नृपान्तरे वंशे' इति विश्वः ।

३१९। **विषेः किच्च**। विष्णुः।

३२०। **कृदाधारार्चिकलिभ्यः कः**। बाहुलकान्न कस्येत्संज्ञा। 'कर्को धवलघोटकः'। दाको दाता। धाकोऽनङ्वानाधारश्च। राका पौर्णमासी। अर्कः। कल्कः पापाशये पापे दम्भे विट्किट्टयोरपि'।

३२१। **सृवृभूशुषिमुषिभ्यः कक्**। 'सृक उत्पलवातयोः'। 'वृकः श्वापदकाकयोः'। भूकं छिद्रम्। शुष्कः। मुष्कोऽण्डम्।

३२२। **शुकवल्कोल्काः**। शुभेरन्त्यलोपः। शुकः। 'वल्कं वल्कलमस्त्रियाम्'। 'उष दाहे'। षस्य लः। उल्का।

३२३। **इण्भीकापाशल्यतिमर्चिभ्यः कन्**। 'एके मुख्यान्यकेवलाः'। 'भेको मण्डूकमेषयोः' इति विश्वमेदिन्यौ। काकः। पाकः शिशुः। शल्कं शकलम्। अत्कः पथिकः शरीरावयवश्च। मर्कः शरीरवायुः।

'रेणुः स्त्रीपुंसयोर्धूलौ पुंलिङ्गः पर्पटे तु ना' इति मेदिनी। **विषेः किच्च** ॥ चकारान्नित्। आद्युदात्तः। 'विष्णुरित्थाप्रविष्णवे शूषम्'। **कृदा** ॥ 'कर्कः कर्के तले वह्नौ शुक्लाश्वे दर्पणे घटे' इति विश्वमेदिन्यौ। 'राका नक्षत्रान्तरे कच्छ्वां नवजातरजःस्त्रियाम्। संपूर्णेन्दुतिथावपि' इति मेदिनी। 'राका तु सरिदन्तरे। राका नवरजःकन्या पूर्णेन्दुः पूर्णमाऽपि च' इति विश्वः। इह दाधारा एषां 'केणः' इति ह्रस्वोऽपि बाहुलकान्नेति बोध्यम्। 'अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ' इति विश्वमेदिन्यौ। 'कल्कोऽस्त्री घृततैलादिशेषे दम्भे विभीतके। विट्किट्टयोश्च पापे च त्रिषु पापाशये पुनः' इति मेदिनी। बाहुलकात् रमेरपि कः। 'रङ्कः कृपणमन्दयोः' इति मेदिनी। कपिलकादित्वाल्लत्वं टाप्। 'लङ्का रक्षःपुरी शाखाशाकिनीकुलटासु च' इति विश्वमेदिन्यौ। **सृवृ** ॥ 'सृका बाणोत्पलवाता' इति हेमचन्द्रः। 'सृकं संशाय पविमिन्द्र तिग्मम्' इति मन्त्रस्य वेदभाष्ये तु सृकं सरणशीलम्। पविं वज्रं संशाय सम्यक्तीक्ष्णीकृत्येति व्याख्यातम्। भूकं छिद्रे च काले च' इति मेदिनी। 'शुको व्याससुते कीरे रावणस्य च मन्त्रिणि। शिरीषपादपे पुंसि ग्रन्थिपर्णे नपुंसकम्। वल्कं वल्कलशल्कयोः' इति च। उल्का ज्वाला विभावसोः' इति भूतिचन्द्रः। **इण्भी** ॥ 'एकं सङ्ख्यान्तरे श्रेष्ठे केवलेतरयोस्त्रिषु' इति मेदिनी। 'काकः स्याद्वायसे वृक्षप्रभेदे पीठसर्पिणि। शिरोवक्षालने मानप्रभेदे द्वीपभेदयोः। काका स्यात्काकनासायाङ्काकोलीकाकजङ्घयोः। रक्तिकायां मलव्याञ्च काकमाच्यां च योषिति। काकं सुरतबन्धे स्यात् काकानामपि संहतौ' इति विश्वमेदिन्यौ। पाकः परिणतौ शिशौ। केशस्य जरसा शौकल्ये स्थाल्यादौ पाचनेऽपि च। शल्कन्तु शकले कल्के' इति मेदिनी। 'शल्कैरग्निमिन्थानः' इति मन्त्रे काष्ठखण्डैरिति व्याख्यातारः। **मर्क इति** ॥ मर्चिः सौत्रो धातुरिति बहवः। 'मर्च शब्दे' चौरादिक इति भिदचोन्त्यात्सूत्रे कैयटः। मर्तो मर्तं मर्चयति द्वयेन' इति मन्त्रे मर्चयति विधेयीकरोति भर्त्सयतीति वेदभाष्यम्। न चैवं णिलोपस्य स्थानिवद्भावात्कत्वं न स्यात् इति वाच्यम्। पूर्वत्रासिद्धे

३२४ । **नौ हः** । जहातेः कन्स्यान्नौ । निहाका गोधिका ।

३२५ । **नौ सदेर्डिच्च** । 'निष्कोऽस्त्री हेम्नि तत्पले' ।

३२६ । **स्यमेरीट् च** । स्यमीको वल्मीकः वृक्षभेदश्च । इट् ह्रस्व इति केचित् । स्यमिकः ।

३२७ । **अजियुधिनीभ्यो दीर्घश्च** । 'वीकः स्याद्वातपक्षिणोः' । यूका । धूको वायुः । नीको वृक्षविशेषः ।

३२८ । **ह्रियो रश्च लो वा** । 'ह्रीका ह्रीका त्रपा मता' ।

३२९ । **शकेरुनोन्तोन्त्युनयः** । 'उन' 'उन्त' 'उन्ति' 'उनि' एते चत्वारः स्युः । शकुनः । शकुन्तः । शकुन्तिः । शकुनिः ।

३३० । **भुवो झिच्** । भवन्तिर्वर्तमानकालः । बाहुलकादवेश्च । अवन्तिः । वदेर्वदन्तिः । 'किंवदन्ती जनश्रुतिः' ।

३३१ । **कन्युच्क्षिपेश्च** । चाद्भुवः । 'क्षिपण्युर्वसन्तः' इत्युज्ज्वलदत्तः । 'भुवन्युः स्वाभिसूर्ययोः' ।

३३२ । **अनुङ् नदेश्च** । चात्क्षिपेः । नदनुर्मेघः । क्षिपणुर्वातः ।

३३३ । **कृवृदारिभ्य उनन्** । 'करुणो वृक्षभेदः स्यात्करुणा च कृपा मता' । वरुणः । दारुणम् ।

तदभावात् । बाहुलकात् इयतेः कन् । 'शाको द्वीपान्तरेऽपि च । शक्तौ द्रुमविशेषे च पुमान् हारीतके स्त्रियाम्' इति मेदिनी । **नौ हः** ॥ 'निहाका गोधिका समे' इत्यमरः । 'शाकं नस्यनिहाकयोः' इति श्रुतिः । 'निष्कमस्त्री साष्टहेमशते दीनारकर्षयोः । वक्षोऽलङ्करणे हेमपात्रे हेमपलेऽपि च' इति मेदिनी । **स्यमेः** ॥ 'स्यमु शब्दे' । 'स्यमीका नीलिकायां स्त्री स्यमीको नाकुवृक्षयोः' इति मेदिनी । **अजियु** ॥ एभ्यः कन् । एषान्दीर्घश्च । तत्सामर्थ्यात् गुणाभावः । **शकेः** ॥ 'शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः' इत्यमरः । 'शकुनस्तु पुमान् पक्षिमात्रे पक्षिविशेषयोः । शुभशंसिनिमित्ते च शकुनं स्यान्नपुंसकम्' इति मेदिनी । 'शकुन्तः कीटभेदे स्याद्वासपक्षिविहङ्गयोः' इति । शकुनिः पुंसि विहगे सौबले करणान्तरे' इति च । बाहुलकात्कमेरपि प्रत्ययादिलोपे कुशब्दादेशः । कुन्तिः । 'इतो मनुष्यजातेः' इति ङीष् । 'कुन्ती पाण्डुप्रियायाञ्च सल्लक्यामुरुगुग्गुलुद्रुमे' इति मेदिनी । **कन्युच्** ॥ 'क्षिपण्युस्तु पुमान् देहे सुरभौ वाच्यलिङ्गके' इति मेदिनी । 'भुवन्युः स्यात् पुमान् भानौ ज्वलने शशलाञ्छने' इति विश्वमेदिन्यौ । **कृवृ** ॥ 'करुणस्तु रसे वृक्षे कृपायाङ्करुणा मता' इति विश्वमेदिन्यौ । 'वरुणस्तरुभेदेऽप्सु प्रतीचीपतिसूर्ययोः' इति विश्वः । 'दारुणो रसभेदे ना त्रिषु तु स्याद्भयावहे' इति मेदिनी ।

३३४। **त्रो रश्च लो वा**। 'तरुणस्तलुनो युवा'।

३३५। **क्षुधिपिशिमिथिभ्यः कित्**। क्षुधुनो म्लेच्छजातिः। पिशुनः। मिथुनम्।

३३६। **फलेर्गुक्च**। फल्गुनः पार्थः। प्रज्ञाद्यण्। फाल्गुनः।

३३७। **अशेर्लशश्च**। लशुनम्।

३३८। **अर्जेर्णिलुक्च**। अर्जुनः।

३३९। **तृणाख्यायां चित्**। चित्त्वादन्तोदात्तः। अर्जुनं तृणम्।

३४०। **अर्तेश्च**। अरुणः।

३४१। **अजियमिशीङ्भ्यश्च**। 'वयुनं देवमन्दिरम्'। यमुना। शयुनः अजगरः।

३४२। **वृतृवदिहनिकमिकषिभ्यः सः**। वर्स तर्सम्। 'तर्सः प्लवसमुद्रयोः' वत्सः। वत्सं वक्षः। हंसः। 'कंसोऽस्त्री पानभाजनम्'। कक्षम् अरण्यम्।

त्रो रश्च ॥ 'तरुणं कुब्जपुष्पे ना रुचके यूनि च त्रिषु' इति मेदिनी। 'तरुणी तलुनीति च' इति द्विरूपेषु विश्वः। **क्षुधिपिशि** ॥ 'पिशुनङ्कङ्कमे स्मृतम्। कपिचक्के च काके ना सूचक-क्रूरयोस्त्रिषु। पृक्तायां पिशुना स्त्री स्यात्' इति मेदिनी। मिथुनं तु द्वयो राशिभेदे स्त्रीपुंसयुग्मके' इति च। **फलेः** ॥ 'फल्गुनस्तु गुडाकेशे नदीजार्जुनभूरुहे। तपस्यसंज्ञमासे तत्पूर्णिमायाञ्च फाल्गुनी' इति मेदिनी। **अणिति** ॥ प्रज्ञादित्वात्पक्षेऽणित्यर्थः। 'फल्गुनः फाल्गुनोऽर्जुने' इति द्विरूपकोशः। **अशेर्लशश्च** ॥ 'अश भोजने'। अस्मादुनन् धातोर्लशादेशश्च। लशुनं महाकन्दः। 'उशना लशुनं वेश्म कश्मलं विश्वमश्ववत्' इति मध्यतालव्येषु विश्वः। लस् चेति पाठस्तु प्रामादिकः। **अर्जेर्णिलुक् च** ॥ अत्र 'णेरनिटि' इति लोपेन सिद्धे णिलुक् चेन्युक्तेः फलञ्चिन्त्यम्। 'अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः। मातुरेकसुतेऽपि स्याद्धवले पुनरन्यवत्। नपुंसकन्तृणं नेत्ररोगे चाप्यर्जुना गवि। उषायां बाहुदानद्याङ्कष्टिन्यामपि च क्वचित्' इति विश्वमेदिन्यौ। **अर्तेश्च** ॥ 'अरुणोऽव्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथौ। निःशब्दे कपिले कुष्ठभेदे ना गुणिनि त्रिषु। अरुणाऽतिविषा श्यामा मञ्जिष्ठा त्रिवृतासु च' इति मेदिनी। **अजियमि** ॥ 'विश्वानि देव वयुनानि विद्वान्' इति मन्त्रे वयुनानि प्रजनानीति वेदभाष्यम्। वैदिकनिघण्टौ प्रज्ञापर्याये प्रशस्यपर्याये च वयुनशब्दः पठितः। **वृतृ** ॥ **वर्सन्तर्समिति** ॥ 'तितुत्र' इति नेट्। षत्वन्तु न भवति। बाहुलकेन षत्वे कर्तव्ये प्रत्ययसंज्ञाया अप्रवृत्तेः। कक्षशब्दे तु षत्वं भवत्येव। एतच्च सर्वम् 'आदेशप्रत्यययोः' इति सूत्रे भाष्यकैयटपदमञ्जरीषु स्पष्टमेव। उणादिवृत्ति-कृतस्तु सर्वेऽपीह षत्वमुदाजहुः। तेषामयमाशयः। अस्तु भाष्यप्रामाण्याद्वर्सन्तर्समिति दन्त्योऽपि साधुः। बाहुलकबललभ्यषत्वाभावस्य पाक्षिकत्वेऽपि बाधकाभावात् पक्षे षत्वमस्तु। वृषितृषि-भ्याङ्ञि ण्यन्तादेराचि घञर्थे कप्रत्यये वा वर्षतर्षशब्दयोर्दुर्वारत्वात्। आज्विधौ भियादीनामुप-सङ्ख्यानं नपुंसके क्त्रादिनिवृत्त्यर्थम्' इत्यत्र वर्षमित्याकरे उदाहृतत्वाच्चेति। तस्मादिह द्विरूपता

३४३ । **प्लुषेरच्चोपधायाः** । प्लक्षः ।

३४४ । **मनेर्दीर्घश्च** । मांसम् ।

३४५ । **अशेर्देवने** । अक्षः ।

३४६ । **स्नुवश्चिकृत्यृषिभ्यः कित्** । स्नुषा । वृक्षः । कृत्समुदकम् । ऋक्षं नक्षत्रम् ।

३४७ । **ऋषेर्जातौ** । 'ऋक्षोऽद्रिभेदे भल्लूके शोणके कृतवेधने । ऋक्षमुक्तञ्च नक्षत्रे' इति विश्वः ।

३४८ । **उन्दिगुधिकुषिभ्यश्च** । उत्सः प्रस्रवणम् । गुत्सः स्तबकः । कुक्षो जठरम् ।

३४९ । **गृधिपण्योर्दः कौ च** । गृत्सः कामदेवः । पक्षः ।

३५० । **अशेः सरः** । अक्षरम् ।

३५१ । **वसेश्च** । वत्सरः ।

फलिता । 'वर्षोऽस्त्री भारतादौ स्याज्जम्बूद्वीपाब्दवृष्टिषु । प्रावृट्काले स्त्रियां भूम्नि' इति मेदिनी । 'तर्षो लिप्सोदन्ययोः' इति च । 'पुत्रादौ तर्णके वर्षे वत्सः क्लीबन्तु वक्षसि' इति त्रिकाण्डशेषः । 'हंसः स्यान्मानसौकसि । निर्लोभनृपविष्ण्वर्कपरमात्मसु मत्सरे । योगभेदे मन्त्रभेदे शरीरमरुदन्तरे । तुरङ्गमप्रभेदे च' इति मेदिनी । 'कंसोऽस्त्री तैजसे द्रव्ये कांस्ये मानेऽसुरे तु ना' इति च । 'कंसो दैत्यान्तरे स्मृतः । कांस्ये च कांस्यपात्रे च मानभेदे च कीर्तितः' इति विश्वः । 'कक्षा स्यादन्तरीयस्य पश्चादञ्चलपल्लवे । स्पर्द्धायां ना तु दोर्मूलकच्छवीरुत्तृणेषु च' इति मेदिनी । **प्लुषेः** ॥ 'प्लक्षो जटी गर्दभाण्डद्विपभित्कुञ्जराशने' इति मेदिनी । 'प्लक्षो द्वीपविशेषे स्यात्पर्कटीगर्दभाण्डयोः । पिप्पले द्वारपार्श्वे च गृहस्य परिकीर्तितः' इति विश्वः । **मनेर्दीर्घश्च** ॥ मांसं स्यादामिषे क्लीबं कक्कोलीजटयोः स्त्रियाम्' इति मेदिनी । **अशेः** ॥ 'अथाक्षमिन्द्रिये । ना द्यूताङ्गे कर्षचक्रे व्यवहारे कलिद्रुमे' इत्यमरः । 'अक्षो ज्ञानात्मशकटव्यवहारेषु पाशके । रुद्राक्षेन्द्राक्षयोः सर्पे विभीतकतरावपि । चक्रे कर्षो पुमान् क्लीबन्तु त्थसौवर्चलेन्द्रिये' इति मेदिनी । **स्नुवश्चि** ॥ 'ऋक्षः पर्वतभेदे स्याद्भल्लूके शोणके पुमान् । कृतवेधनेऽन्यलिङ्गं नक्षत्रे च नपुंसकम्' इति मेदिनी । **ऋषेर्जातौ** ॥ नियमार्थमिदं सूत्रं ऋषेर्जातावेवेति । तेनान्येभ्यः केवलयौगिकत्वेऽपि प्रत्ययः । **उन्दिगुधि** ॥ 'गुत्सः स्यात्स्तबके स्तम्बे हारभिद्ग्रन्थिपर्णयोः' इति मेदिनी । गुच्छश्च । 'गुत्सो गुच्छो गुलुच्छवत्' इति द्विरूपकोशात् । 'स्याद्गुच्छः स्तबके स्तम्बे हारभेदकलापयोः' इति च वर्गद्वितीयान्तमेदिनीकोशाच्च । गृधेश्चर्त्वेन सिद्धे भष्भावनिवृत्तये दकारविधिः । 'पक्षो मासार्द्धके पार्श्वे ग्रहे साध्यविरोधयोः । केशादेः परतो बृन्दे बले सखिसहाययोः । चुल्लीरन्ध्रे परत्रे च राजकुञ्जरपार्श्वयोः' इति विश्वमेदिन्यौ । **अशेस्सरः** ॥ **अक्षरमिति** ॥ 'अक्षरं स्यादपवर्गे परमब्रह्मपर्णयोः' इति

३५२। **सपूर्वाच्चित्**। संवत्सरः।

३५३। **कृधूमदिभ्यः कित्**। बाहुलकान्न षत्वम्। 'कृसरः स्यात्तिलौदनम्'। धूसरः। मत्सरः। 'मत्सरा मक्षिका ज्ञेया भम्भराली च सा मता'।

३५४। **पते रश्च लः**। पत्सलः पन्थाः।

३५५। **तन्यृषिभ्यां क्सरन्**। तसरः सूत्रवेष्टनम्। ऋक्षरः। ऋत्विक्।

३५६। **पीयुक्णिभ्यां कालन्ह्रस्वः सम्प्रसारणञ्च**। पीयुः सौत्रः। पियालो वृक्षभेदः। कुणालो देशभेदः।

३५७। **कठिकुषिभ्यां काकुः**। कठाकुः पक्षी। कुषाकुरग्निः सूर्यश्च।

३५८। **सर्तेर्दुक्च**। 'सृदाकुर्वातसरितोः'।

३५९। **वृतेर्वृद्धिश्च**। वार्ताकुः। बाहुलकादुकारस्य अत्त्वम्। वार्ताकम्।

हेमचन्द्रः। उज्ज्वलदत्तादयस्तु अशेः सरन्निति पेठुः। तन्न। नित्स्वरापत्तेः। इष्यते तु प्रत्ययस्वरेणाक्षरशब्दस्य मध्योदात्तत्वम्। 'ऋचो अक्षरे परमे व्योमन्।' 'अक्षेरण निमति सप्तवाणी' इत्यादृच्यन्तेषु 'त्रीणि च शतानि षष्टिश्चाक्षराणि' इति यजुषि च तथैव पाठात्। अत एव द्वितीयाह्निकान्ते। 'अश्नोतेर्वा सरोऽक्षरम्' इति भाष्यकृतोक्तम्। **सपूर्वाच्चित्** ॥ पूर्वेण सहितः सपूर्वः। 'इद्वत्सराय परिवत्सराय संवत्सराय। सम्पूर्वादिति पाठस्तु लक्ष्यविरोधादुपेक्ष्यः। **कृधू** ॥ कृसर इत्यादि हारावलीस्थम्। 'धूसरी किन्नरीभेदे नागरे त्रिषु पाण्डुरे' इति मेदिनी। 'मत्सरा मक्षिकायां स्यान्मात्सर्यक्रोधयोः पुमान्। असह्यपरसम्पत्तौ कृपणे चाभिधेयवत्' इति। मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोः स्त्रिषु' इति अमरः। 'असह्यपरसम्पत्तौ मात्सर्ये कृपणे क्रुधि' इति विश्वः। वेदे तु योगं पुरस्कृत्य प्रयुज्यते। 'इन्दुमिन्द्राय मत्सरम्। तं सिन्धवो मत्सरमिन्द्रपानम्' इत्यादि। मत्सरं हर्षहेतुमिति तद्भाष्यम्। अमरोक्तिमाह। **तसर इति** ॥ 'अनुदात्तोपदेश' इत्यादिना अनुनासिकलोपः। **ऋक्षरः, ऋत्विगिति** ॥ 'ऋक्षरन्तोयधारायामृक्षरस्त्वृत्विजि स्मृतः' इति मेदिनी। 'अनृक्षरा ऋजवः सन्तु पन्थाः' इति मन्त्रस्य वेदभाष्ये तु ऋक्षरः कण्टक इति व्याख्यातम्। **पीयुक्णिभ्याम्** ॥ 'राजादनं प्रियालुः स्यात्' इत्यमरः। 'प्रियालुः स्यात्प्रियालवत्' इति हि द्विरूपकोशः। बाहुलकाद्भ्रेरपि कालन्। नलोपः। न्यङ्वादित्वात्कुत्वम्। भगालं नरमस्तकम्। मत्वर्थे इनिः। 'चण्डीकान्तो भगाली च लेलिहानो वृषध्वजः' इति राजशेखरः। **कठिकुषिभ्याम्** ॥ 'कठ कृच्छ्रजीवने, कुष निष्कर्षे।' 'कठाकुः कपिवह्वधर्के ना परोत्तापिनि त्रिषु' इति मेदिनी। उज्ज्वलदत्तस्तु कटिकषिभ्यामिति पठित्वा 'कषशिष' इति दण्डकधातुमुपन्यस्य कषाकुरित्युदाजहार। तत्कोशविरुद्धम्। मेदिनीकोशे उकारप्रक्रमे पाठात्। **सर्तेः** ॥ 'सृदाकुर्नानिले चक्रे ज्वलने प्रतिसूर्यके' इति मेदिनी। **वृतेः** ॥ वार्ताकुरपि वार्ताके वृन्ताकोऽपि च दृश्यते' इति द्विरूपे विश्वः। 'वार्ताकी हिङ्गुली

३६०। **पर्देर्दितच्चाणलोपश्च**। 'पृदाकुर्वृश्चिके व्याघ्रे चित्रके च सरीसृपे'।

३६१। **सृयुवचिभ्योऽन्युजागूजक्नुचः**। अन्युच्, आगूच्, अक्नुच्, एते क्रमात्स्युः। 'सरण्युर्मेघवातयोः'। यवागूः। 'वचक्नुर्विप्रवाग्मिनोः'।

३६२। **आनकः शीङ्भियः**। शयानकोऽजगरः। भयानकः।

३६३। **आणको लूधूशिङ्घिधाञ्भ्यः**। लवाणकं दात्रम्। धवाणको वातः। शिङ्घाणकः श्लेष्मा। पृषोदरादित्वात्पक्षे कलोपः। 'शिङ्घाणं नासिकामले'। 'धाणको दीनारभागः'।

३६४। **उल्मुकदर्विहोमिनः**। उष दाहे। षस्य लः मुकप्रत्ययश्च। उल्मुकं ज्वलदङ्गारम्। दृणातेर्विः। दर्विः। 'जुहोतेर्मिनिः'। होमी।

३६५। **ह्रियः कुग्रश्च लो वा**। ह्रीकुः ह्रीकुः लज्जावान्।

३६६। **हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन्**। दशभ्यस्तन्स्यात्। 'तितुत्र–' (सू ३१६३) इति नेट्। हस्तः। मर्तः। गर्तः। एतः कर्बुरः। वातः। अन्तः। दन्तः। 'लोतः स्यादश्रुचिह्नयोः'। 'पोतो बालवहित्रयोः'। धूर्तः। बाहुलकात्तुसेर्दीर्घश्च। तूस्तं पापं धूलिर्जटा च।

सिंही भण्टाकी दुष्प्रधर्षिणी' इत्यमरः। 'वार्ताकं पित्तलङ्खिदङ्गारपरिपाचितम्' इति वैद्यकशास्त्रम्। **पर्देः**। **पृदाकुरित्यादि** ॥ 'पृदाकुर्वृश्चिके व्याघ्रे सर्पचित्रकयोः पुमान्' इति मेदिनी। **सृयु** ॥ 'सरण्युस्तु पुमान् वारिवाहे स्यान्मातरिश्वनि' इति मेदिनी। 'सरण्युरस्यसूनुरश्वः' इति मन्त्रस्य भाष्ये तु सरण्युः शीघ्रगामीति व्याख्यातम्। 'यवागूरुष्णिका श्राणा विलेपी तरला च सा' इत्यमरः। 'वचक्नुस्तु पुमान् विप्रे वावदूकेऽभिधेयवत्' इति मेदिनी। ऋषिविशेषऽप्ययम्। यस्य कन्या वाचक्नवीति प्रसिद्धा। **आनकः** ॥ 'भयानकः स्मृतो व्याघ्रे रसे राहौ भयङ्करे' इति मेदिनी। **शिङ्घाणक इति** ॥ 'शिघि आघ्राणे'। 'शिङ्घाणङ्काचपात्रे स्यात् लोहनासिकयोर्मले' इति विश्वः। 'शिङ्घाणः फेनडिण्डीरो नक्करेतश्च पिच्छले' इति विक्रमादित्यकोशः। हारावलीस्थमाह। **शिङ्घाणमिति** ॥ **उल्मुकमिति च** ॥ 'दर्विः कम्बिः खजा काच' इत्यमरः। **ह्रियः** ॥ कुक्प्रत्ययेऽयङ्कारो गुणनिषेधार्थः। **हसिमृ** ॥ 'हस्तः करे करिकरे सप्रकोष्ठे करेऽपि च। ऋक्षे केशात्परो व्राते' इति मेदिनी। मर्तो भूलोकः, तत्र भवो मर्त्यः। दिगादेराकृतिगणत्वाद्यत्। 'गर्तस्त्रिगर्तभेदे स्यादवटे च कुकुन्दरे। एतः कर्बुर आगते। अन्तः स्वरूपे नाशे वा न स्त्री शेषेऽन्तिके त्रिषु। दन्तोऽष्टकटके कुञ्जे दशने चौषधौ स्त्रियाम्' इति मेदिनी। 'लोतमश्रुणि चोरिते' इति विश्वः। 'क्तक्तवतू' इति सूत्रे लोतो मेष इति कैयटः। 'पोतः शिशौ वहित्रे च' इति विश्वमेदिन्यौ।

३६७। **नञ्याप इट् च**। नापितः।

३६८। **तनिमृङ्भ्यां किच्च**। ततम्। मृतम्।

३६९। **अञ्जिघृसिभ्यः क्तः**। अक्तम्। घृतम्। सितम्।

३७०। **दुतनिभ्यां दीर्घश्च**। दूतः। तातः।

३७१। **जेर्मूट् चोदात्तः**। जीमूतः।

३७२। **लोष्टपलितौ**। लुनातेः क्तः तस्य सुट् धातोर्गुणः। लोष्टम्। पलितम्।

धूर्त इति ॥ 'धुर्वी हिंसायाम्'। 'लोपो व्योः' इति वलोपः। क्विडतीत्यननुवृत्तिपक्षे तु 'राल्लोपः' इति लोपः। 'हलि च' इति दीर्घः। 'धूर्तन्तु खण्डलवणे धुत्तूरे ना शठे त्रिषु' इति मेदिनी। **तनिमृङ्भ्याम्** ॥ 'ततं वीणादिकं वाद्यम्' इत्यमरः। 'अथ ततं व्याप्ते विस्तृते च त्रिलिङ्गकम्। क्लीबं वीणादिवाद्ये स्यात् पुल्लिङ्गस्तु समीरणे। मृतन्तु याचिते मृत्यौ क्लीबं मृत्युमति त्रिषु' इति मेदिनी। **अञ्जिघृ** ॥ अक्तं परिच्छिन्नम्। 'अक्तपरिमाणस्य वाचकः' इति भाष्यस्य कैयटेन तथा व्याख्यातत्वात्। अत्र 'व्यस्तं प्राप्ते च सङ्कले' इति विश्वप्रकाशे लिपिभ्रमात् 'अक्तं व्याप्ते च सङ्कले' इत्युदाहरन्नुज्ज्वलदत्तो भ्रान्तत्वादुपेक्ष्यः। तथा च मेदिन्यां वकारादिप्रक्रमे 'व्यस्तन्तु व्याकुले व्याप्ते' इत्युक्तम्। 'घृतमाज्ये जले क्लीबं प्रदीप्ते त्वभिधेयवत्। सितमवसिते च बद्धे धवले त्रिषु शर्करायां स्त्री' इति मेदिनी। 'ऋ गतौ'। बाहुलकात् क्तः। 'ऋतमुञ्छे शिले जले। सत्ये दीप्ते पूजिते स्यात्' इति मेदिनी। **दुतनिभ्याम्** ॥ दूतः प्रेष्यः। गौरादित्वात् ङीष्। दूती। अथ कथं, तेन दूतिविदितं निषेदुषा' इति रघुः। 'दूङ् परितापे' अस्मात् क्तिच्। 'दूत्यान्दूतिरपि स्मृता' इति द्विरूपकोशः। 'तातोऽनुकम्प्ये जनके' इति विश्वमेदिन्यौ। बाहुलकात् शीङोऽपि। शीता लाङ्गलपद्धतिः। रामपत्नी च। 'शीता नभःसरिति लाङ्गलपद्धतौ च शीता दशाननरिपोः सहधर्मिणी च। शीतं स्मृतं हिमगुणे च तदन्विते च शीतोऽलसे च बहुवारतरौ च दृष्टः' इति तालव्यादौ धरणिः। सीता दन्त्यादिरपि। 'सीता लाङ्गलपद्धतिः। वैदेहीस्वर्गगङ्गासु' इति दन्त्यादौ मेदिनीकोशात्। 'सीता लाङ्गलरेखा स्यात् व्योमगङ्गा च जानकी' इति दन्त्यादौ रभसकोशाच्च। अत्र त्यक्तं सूत्रम्। **जेर्मूट् चोदात्तः** ॥ 'जि जये'। अतः क्तः, तस्य मूडागमः, स चोदात्तः धातोर्दीर्घश्च। 'जीमूतस्येव भवति'। 'जीमूतोऽद्रौ भूतिकरे देवताडे पयोधरे' इति मेदिनी। 'वेणी गरागरीदेवताळो जीमूत इत्यपि' इत्यमरः। 'जीमूतः स्यात् वृत्तिकरे शक्रेऽद्रौ घोषके घने' इति विश्वः। इदं सूत्रमनार्षमिति पुरुषोत्तमः। अत एव आकरे पृषोदरादिषु जीमूतशब्दः उदाहृतः। **लोष्ट** ॥ 'लोष्टानि लोष्टवः पुंसि' इत्यमरः। अत्र पुंसीत्युभयान्वयि। तेन पुंनपुंसकलिङ्गोऽयम्। तथा च स्थानेऽन्तरतमसूत्रे भाष्यम्। लोष्टः क्षिप्तो बाहुवेगङ्गत्वा इत्यादि। अत एव 'लोष्टः पिण्डेऽपि लोष्टुः स्यात्' इति पुंस्काण्डे गोपालितः। 'पलितं

३७३ । **हृश्याभ्यामित-** । हरितश्येतौ वर्णभेदौ ।

३७४ । **रुहे रश्च लो वा** । 'रोहितो मृगमत्स्ययोः' । लोहितं रक्तम् ।

३७५ । **पिशेः किच्च** । पिशितं मांसम् ।

३७६ । **श्रुदक्षिस्पृहिगृहिभ्य आय्यः** । श्रवाय्यो यज्ञपशुः । दक्षाय्यो गरुडो गृध्रश्च । स्पृहयाय्यः । गृहयाय्यो गृहस्वामी ।

३७७ । **दिधिषाय्यः** । दधातेर्द्वित्वमित्वं पुक्च । 'मित्र इव यो दिधिषाय्यः ।'

३७८ । **वृञ एण्यः** । वरेण्यः ।

३७९ । **स्तुवः क्सेय्यश्छन्दसि** । 'स्तुषेय्यं पुरुवर्चसम्' ।

३८० । **राजेरन्यः** । राजन्यो वह्निः ।

३८१ । **शृरम्योश्च** । शरण्यम् । रमण्यम् ।

३८२ । **अर्तेर्निच्च** । अरण्यम् ।

३८३ । **पर्जन्यः** । 'पृषु सेचने' षस्य जः 'पर्जन्यः शक्रमेघयोः' ।

३८४ । **वदेरान्यः** । 'वदान्यस्त्यागिवाग्मिनोः' ।

शैलजे तापे केशपाशे च कर्दमे' इति मेदिनी । **हृश्या** ॥ 'हरिता स्त्री च दूर्वायां हरिद्वर्णयुतेऽन्यवत्' इति मेदिनी । **रुहेः** ॥ रोहितं कुङ्कुमे रक्ते ऋजुशक्रशरासने । पुंसि स्यान्मीनमृगयोर्भेदे रोहितकद्रुमे । रोहितं रक्तगोशीर्षकुङ्कुमाजिकुचन्दने । पुमान्नदान्तरे भौमे वर्णे च त्रिषु तद्वति' इति मेदिनी । **पिशेः** ॥ 'पिशितं मांसं मांस्यां स्त्री' इति मेदिनी । मांस्याञ्जटामांस्याम् । तथा च 'जटा च पिशिता पेशी' इति धन्वन्तरिः । **श्रुदक्षि** ॥ 'उद्यतस्रुचे भवसि श्रवाय्यः' इति मन्त्रे श्रवाय्यो मन्त्रैः श्रवणीयः इति वेदभाष्यम् । 'दक्षाय्यो यो दम आस नित्यः ।' 'विश्वरूपस्य स्पृहयाय्यस्य राजन् ।' **दिधिषाय्य इति** ॥ 'मित्र इव यो दिधिषाय्यः' इत्यादिष्वपि यौगिकार्थ एव भाष्ये पुरस्कृतः । उज्ज्वलदत्तस्तु दधिषाय्य इति सूत्रं पठित्वा दधिपूर्वात्स्यतेराय्यः षत्वञ्च, दधिषाय्यो घृतमिति व्याख्यत् । दशपादीवृत्तिकारस्तु धिषशब्दे अस्य द्वित्वं गुणाभावः अत्वञ्चाभ्यासस्य निपात्यते इत्याह । प्रसादकारादयोऽप्येवमेव प्रतिपन्नाः । तदेतत्सर्वं लक्ष्यविरोधाद्वेदभाष्यविरोधाच्चोपेक्ष्यम् । **स्तुवः** ॥ स्तुषेय्यं स्तोतव्यम् । बहुरूपमिति वेदभाष्यम् । यत्तूज्ज्वलदत्तेन 'स्तुवः केय्यः' इति पठित्वा कित्त्वाद्गुणाभावे उवङादेशे स्तुवेय्यः पुरन्दरः इत्युक्तम् । तन्न । वेदतद्भाष्यादिविरोधात् । तस्मादिह कृसेय्यप्रत्ययं पठन् दशपादीवृत्तिकृदेव ज्यायान् । **पर्जन्यः** ॥ 'पर्जन्यो मेघशब्देऽपि घ्वनदम्बुदशक्रयोः' इति मेदिनी । **वदेः** ॥ अजयकोशस्थमाह । **वदान्य इत्यादि** ॥

३८५। **अमिनक्षियजिवधिपतिभ्योऽत्रन्**। अमत्रं भाजनम्। नक्षत्रम्। यजत्रः। वधत्रमायुधम्। पतत्रं तनूरुहम्।

३८६। **गडेरादेश्च कः**। कडत्रम्। डलयोरेकत्वस्मरणात्कलत्रम्।

३८७। **वृञश्चित्**। वरत्रा चर्ममयी रज्जुः।

३८८। **सुविदेः कत्रः**। 'सुविदत्रं कुटुम्बकम्'।

३८९। **कृतेर्नुम्च**। कृन्तत्रं लाङ्गलम्।

३९०। **भृमृदृशियजिपर्विपच्यमितमिनमिहर्येभ्योऽतच्**। दशभ्योऽतच्स्यात्। भरतः। मरतो मृत्युः। 'दर्शतः सोमसूर्ययोः'। यजतः ऋत्विक्। पर्वतः। पचतोऽग्निः। अमतो रोगः। तमतस्तृष्णापरः। नमतः प्रह्वः। हर्यतोऽश्वः।

३९१। **पृषिराजिभ्यां कित्**। पृषतो मृगो बिन्दुश्च। रजतम्।

३९२। **खलतिः**। स्खलतेः सलोपः। अतच्प्रत्ययान्तस्येत्वञ्च। खलतिर्निष्केशशिराः।

अमि ॥ 'नक्ष गतौ'। वधिः प्रकृत्यन्तरम्। **नक्षत्रमिति** ॥ 'नभ्राण्नपात्' इति सूत्रे नञः प्रकृतिभाव उक्तः। क्षदेः सौत्रे त्रनि नञ्समासे व्युत्पत्त्यन्तरं तदिति बोध्यम्। यजत्रं अग्निहोत्रमिति प्राञ्चः। वस्तुतस्तु यजत्रो यष्टव्यदेवता। 'सन्तो वायुर्वातेन गच्छतां संयजत्रैरङ्गानि' इति मन्त्रे तथा दर्शनात्। **गडेः** ॥ 'गड सेचने' 'कळत्रं श्रोणिभार्ययोः' इत्यमरः। **वृञ** ॥ चित्त्वादन्तोदात्तः। 'वरत्रायान्दार्वा नह्यमानः।' **सुविदेः कत्रः** ॥ इह प्रायेण कत्रन्निति नितं पठन्ति। तत्प्रामादिकम्। 'बृहस्पतेः सुविदत्राणि राज्ये'त्यादौ नित्स्वरादर्शनात्। कृदुत्तरपदप्रकृतिस्वरेण प्रत्ययस्वरस्यैव दर्शनाच्च। 'धन्वचयत्कृन्तत्रञ्च' इति मन्त्रेऽपि तथैव। 'कृन्तत्रङ्कर्तनीयमरण्यम्' इति वेदभाष्यम्। **भृमृदृशियजिपर्विपच्य** ॥ 'भृञ् भरणे' 'मृङ् प्राणत्यागे' 'दृशिर् प्रेक्षणे'। दशपाद्यान्तु 'मृदशीङ्' इति पठित्वा 'दृङ् आदरे'। द्रियते दरतः शेते शयतः इत्युदाहृतम्। तत्र। रुशन्तमग्निन्दर्शतं बृहन्तम्। तरणिर्विश्वदर्शतः। दैव्यो दशतो रथः इत्यादिमन्त्रैस्तद्भाष्येण च विरोधात्। 'भरतो नाट्यशास्त्रे मुनौ नटे। रामानुजे च दौष्यन्तौ' इति मेदिनी। **यजतः ऋत्विगिति** ॥ उज्ज्वलदत्तादयनुरोधेनोक्तम्। 'त्रिर्नो अश्विना यजत। हिरण्यशम्यं यजतो बृहन्तम्' इत्यादिषु यजतशब्दो यष्टव्यपरतयैव वेदभाष्ये व्याख्यातः। 'पर्वतः पादपे पुंसि शाकमत्स्यप्रभेदयोः। देवमुन्यन्तरे शैले' इति मेदिनी। **हर्यतोऽश्व इति** ॥ एतदपि 'हर्य कान्तौ गतौ च' इति धात्वर्थं वृत्तिकारोक्तिञ्चानुसृत्योक्तम्। 'परित्वं हर्यतं हरिम्। आहर्यताय धृष्णवे' इत्यादिमन्त्रेषु हर्यतः सर्वैः स्पृहणीय इति वेदभाष्यम्। **पृषिराजि** ॥ 'पृषन्मृगे पुमान् बिन्दौ न द्वयोः पृषतोऽपि ना'। अनयोश्च त्रिषु श्वेतबिन्दुयुक्तेऽप्युभाविमौ।

३९३ । **शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः** । सप्तभ्योऽथः स्यात् । शयथोऽजगरः । शपथः । रवथः कोकिलः । गमथः पथिकः पन्थाश्च । वञ्चथो धूर्तः । वन्दीति पाठे कर्मणि कर्तरि वा प्रत्ययः वन्द्यते वन्दते वा वन्दथः स्तोता स्तुत्यश्च । जीवथः आयुष्मान् । प्राणथो बलवान् । बाहुलकाच्छमिदमिभ्याम् । 'शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः' ।

३९४ । **भृञश्चित्** । भरथो लोकपालः ।

३९५ । **रुदिविदिभ्यां ङित्** । रोदितीति रुदथः शिशुः । वेत्तीति विदथः ।

३९६ । **उपसर्गे वसेः** । आवसथो गृहम् । संवसथो ग्रामः ।

३९७ । **अत्यविचमितमिनमिराभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच्** । त्रयोदशभ्योऽसच्स्यात् । अततीत्यतसो वायुरात्मा च । अवतीत्यवसो राजा भानुश्च । चमन्त्यस्मिंश्चमसः सोमपानपात्रम् । ताम्यत्यस्मिन्निति तमसोऽन्धकारः । नमसोऽनुकूलः । 'रभसो वेगहर्षयोः' । लभसो धनं याचकश्च । नभते नभ्यति वा नभस आकाशः । तपसः पक्षी चन्द्रश्च । पतसः पक्षी । 'पनसः कण्टकिफलः' । पणसः पण्यद्रव्यम् । महसं ज्ञानम् ।

३९८ । **वेञस्तुट् च** । बाहुलकादात्वाभावः । वेतसः ।

रजतन्त्रिषु शुक्ले स्यात् क्लीबं हारे च दुर्व्रणे' इति मेदिनी । **शीङ्शपि** ॥ उज्ज्वलदत्तेनात्र पञ्चमो वञ्चिः पठ्यते । अन्यैस्तु वन्दिः । वञ्चथवन्दथयोरन्यतरं वेदादुपलभ्य बहुश्रुतैः पाठो निर्णेयः । **बाहुलकादिति** ॥ 'शमथः शान्तिमन्त्रिणोः' इति मेदिनी । 'दमथस्तु पुमान् दण्डे दमे च परिकीर्तितः' इति च । **रुदिविदि** ॥ 'विदथो योगिकृतिनोः' इति मेदिनी । अत्रोज्ज्वलदत्तः 'रुविदिभ्याङ्कित्' इति पठित्वा रौतीति रुवथः श्वेत्युदाजहार । दशपादीवृत्तिकारस्तु 'रुदिविदिभ्याङ्कित्' इति पपाठ । किं चोपसर्गे वसेरित्येवंरूपमुत्तरसूत्रन्द्वावपि न पेठतुः । तथा हि । शीङ्शपीति सूत्रानन्तरं सोपसर्गाद्वसेः भृञश्चित् रुदिविदिभ्याङ्कित् । इत्युज्ज्वलदत्तस्य सूत्रपाठः । अन्यस्य तु शीङ्शपीति सूत्रानन्तरम् आङिचसेः, भृञश्चित्, रुदिविदिभ्याङ्कित्, इति सूत्रपाठः । तदेतत्पाठद्वयं भाष्यादिविरोधादुपेक्षितम् । तथा हि । गाङ्कुटादिसूत्रे के पुनश्चङादयः चङ् अङ् नजिङ्अवङ्नडः इति भाष्यम् । 'रुदिविदिभ्याङ्कित्' इत्यनुवर्तमाने उपसर्गे वसेरित्यथप्रत्यय इति कैयटेन व्याख्यातम् । एवञ्च कुर्वतां भाष्यादिविरोधः स्पष्ट एवेत्यास्तान्तावत् । भाष्यकैयटमतेऽपि ङिदित्यस्यानुवृत्तेः फलञ्चिन्त्यम् । **अत्यविचमि** ॥ गौरादित्वात् ङीष् । 'अतसी स्यादुमा क्षुमा' इत्यमरः । 'चमसो यज्ञपात्रस्य भेदेऽस्त्री पिष्टके स्त्रियाम् । पनसः कण्टकिफले कन्दके वानरान्तरे । स्त्रियां रोगप्रभेदे स्यात्' इति

३९९। **वहियुभ्यां णित्**। वाहसोऽजगरः। यावसस्तृणसङ्घातः।

४००। **वयश्च**। वय गतौ। वायसः काकः।

४०१। **दिवः कित्**। दिवसम्–दिवसः।

४०२। **कृशृशलिकलिगर्दिभ्योऽभच्**। करभः। शरभः। शलभः। कलभः। गर्दभः।

४०३। **ऋषिवृषिभ्यां कित्**। ऋषभः। वृषभः।

४०४। **रुषेर्निल्लुष्च**। 'रुष हिंसायाम्'। अस्मादभच् नित्कित्स्यात्, लुषादेशश्च। 'लुषभो मत्तदन्तिनि'।

४०५। **रासिवल्लिभ्याञ्च**। रासभः। वल्लभः।

४०६। **जृविशिभ्यां झच्**। जरन्तो महिषः। वेशन्तः पल्वलम्।

४०७। **रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि**। रोहन्तो वृक्षभेदः। नन्दन्तः पुत्रः। जीवन्त औषधम्। प्राणन्तो वायुः। षित्त्वान्ङीष्। रोहन्ती।

४०८। **तृभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च**। दशभ्यो झच्स्यात्। स च षित्। तरन्तः समुद्रः। तरन्ती नौका। भवन्तः कालः। वहन्तो वायुः। वसन्तः ऋतुः। भासन्तः सूर्यः। साधन्तो भिक्षुः। गडेर्घटादित्वान्मित्त्वं ह्रस्वः। 'अयामन्त–' (सू २३११) इति णेरयः। गण्डयन्तो जलदः। मण्डयन्तो भूषणम्। जयन्तः शक्रपुत्रः। नन्दयन्तो नन्दकः।

४०९। **इन्तेर्मुट् हि च**। हेमन्तः।

मेदिनी। 'वेञस्तुट् च' इति पठित्वा 'वी गत्यादिषु' इति धातुरुदाहृतः। **वहियुभ्याम्** ॥ 'अजगरे शयूर्वाहस इत्युभौ' इत्यमरः। 'वा तु क्लीबे दिवसवासरौ' इति च। **कृशृ** ॥ 'करभो मणिबन्धादिकनिष्ठान्तोष्ट्रतत्सुते'। 'शरभस्तु पशौ' इति मेदिनी। 'समौ पतङ्गशलभौ' इत्यमरः। 'कलभः करिशावकः' इति च। 'गर्दभं श्वेतकुमुदे गर्दभो गन्धभिद्यपि। रासभे गर्दभी क्षुद्रजन्तुरोगप्रभेदयोः' इति मेदिनी। **ऋषिवृषिभ्यां कित्** ॥ 'ऋषभस्त्वौषधान्तरे। स्वरभिद्वृषयोः कर्णरन्ध्रगर्दभपुच्छयोः। उत्तरस्थः स्मृतः श्रेष्ठे स्त्री नराकारयोषिति। शूकशिम्ब्यां शिरालायां विधवायां क्वचिन्मता॥' इति मेदिनी। 'वृषभः श्रेष्ठवृषयोः' इति च। **रासिवल्लिभ्याञ्च** ॥ 'रास शब्दे' 'वल्ल संवरणे'। 'वल्लभो दयितेऽध्यक्षे सलक्षणतुरङ्गमे' इति च मेदिनी। **जृविशिभ्यां झच्** ॥ बाहुलकादर्हतेरपि झच्। 'अर्हन्तः क्षपणको जिनः' इति विक्रमादित्यकोशः। **तृभू** ॥ इह नन्दिर्ग्यन्तः। तदाह। **नन्दयन्त इति** ॥ उज्ज्वलदत्तस्तु नन्दन्त इत्युदाहृत्य पूर्वसूत्रेण गतार्थतामाशङ्क्य अनाशीरर्थं नन्दिग्रहणमित्याह। तन्न।

४१० । **भन्देर्नलोपश्च** । भदन्तः प्रव्रजितः ।

४११ । **ऋच्छेररः** । ऋच्छरा वेश्या । बाहुलकाज्जर्जरझर्झरादयः ।

४१२ । **अर्तिकामिभ्रमिचमिदेविवासिभ्यश्चित्** । षड्भ्योऽरश्चित्स्यात् । अररं कपाटम् । कमरः कामुकः । भ्रमरः । चमरः । देवरः । वासरः ।

४१३ । **कुवः क्ररन्** । कुररः पक्षिभेदः ।

४१४ । **अङ्गिमदिमन्दिभ्य आरन्** । अङ्गारः । मदारो वराहः । 'मन्दारः पारिजातकः' ।

४१५ । **गडेः कड च** । कडारः ।

४१६ । **शृङ्गारभृङ्गारौ** । शृभृङ्भ्यामारन्नुम्गुग्घस्वश्च । शृङ्गारो रसः । 'भृङ्गारःकनकालुका' ।

४१७ । **काञ्जिमृजिभ्यां चित्** । कञ्जिः सौत्रः । कञ्जारो मयूरः । मार्जारः ।

४१८ । **कमेः किदुचोपधायाः** । चिदित्यनुवृत्तेरन्तोदात्तः । कुमारः ।

४१९ । **तुषारादयश्च** । तुषारः । कासारः । सहार आम्रभेदः ।

इहाप्याशिषीत्यस्य स्वयमेवानुवर्तितत्वात् । **बाहुलकादिति** ॥ 'जर्जरं शैवले शङ्खवजे त्रिषु जरत्तरे । झर्झरः स्यात् कलियुगे वाद्यभेदे नदान्तरे' इति मेदिनी । **अर्तिकमि** ॥ 'अररं छदकपाटयोः । भ्रमरः कामुके भृङ्गे चमरश्चामरे स्त्री तु मञ्जरीमृगभेदयोः' इति च मेदिनी । **वासर इति** ॥ वसेर्ण्यन्तादरः । केचित्तु सूत्रे वाशिभ्य इति तालव्यं पठित्वा 'वाश्र शब्दे' वाश्यते वाशरः, कोकिल इत्याहुः । **अङ्गिमदि** ॥ 'अङ्गार उल्मुके न स्त्री पुल्लिङ्गस्तु महीसुते' इति मेदिनी । 'मन्दारः स्यात् सुरद्रुमे । पारिभद्रेऽर्कपर्णे च मन्दारो हस्तिधूर्नयोः' इति च । 'मदि स्तुत्यादौ' इत्यस्मात् बाहुलकादारुरपि । पारिभद्रे तु मन्दारुर्मन्दारः पारिजातकः' इति शब्दार्णवः । **गडेः** ॥ 'कडारः कपिले दासे' इति मेदिनी । **शृङ्गारभृङ्गारौ** ॥ 'शृङ्गारः सुरते नव्ये रस च गजमण्डने । नपुंसकं लवङ्गेऽपि नागसम्भवचूर्णयोः' इति मेदिनी । 'भृङ्गारी झिल्लिकायां स्यात् कनकालौ पुनः पुमान्' इति च । **कञ्जिमृजभ्यां** ॥ 'कञ्जारो जठरे सूर्ये विरिञ्चौ चारणे मुनौ' इति विश्वमेदिन्यौ । 'माजोर आतौ खट्वाङ्गे' इति च । **कमेः** ॥ 'कुमारः स्याच्छुके स्कन्दे युवराजेऽश्ववारके । बालक वरुण द्वौ ना न द्वयोर्जात्यकाञ्चने । कुमारी शैलतनयायौवनकाल्योर्नदीभिदि । सहापराजिता कन्याजम्बूद्वीपेषु च स्त्रियाम्' इति मेदिनी । विश्वप्रकाशे तु 'कुमारी रामतरणी' इति पाठः । रामतरणी लताविशेषः सहेति प्रसिद्धः । 'तरणी रामतरणी कणिका चारुकेसरा । सहा कुमारी गन्धाढ्या' इति धन्वन्तरिनिघण्टुः । 'जम्बूद्वीपसहाकन्याकुमार्योऽश्वारके । बालके कार्तिकेये च कुमारी भर्तृदारके' इति त्रिकाण्डशेषः । 'तुषारस्तुहिनं हिमम् । कासारः

४२०। **दीङो नुट् च**। दीनारः सुवर्णाभरणम्।

४२१। **सर्तेरपः षुक्च**। सर्षपः।

४२२। **उषिकुटिदलिकचिखजिभ्यः कपन्**। 'उषपो वह्निसूर्ययोः'। कुटपो मानभाण्डम्। दलपः प्रहरणम्। कचपं शाकपत्रम्। खजपं घृतम्।

४२३। **कृणेः सम्प्रसारणञ्च**। कुंणपम्।

४२४। **कपश्चाक्रवर्मणस्य**। स्वरे भेदः।

४२५। **विटपपिष्टपविशिपोलपाः**। चत्वारोऽमी कपन्प्रत्ययान्ताः। 'विट शब्दे'। 'विटपः'। विशतेरादेः पः। प्रत्ययस्य तुट्। षत्वम्। पिष्टपं भुवनम्। विशतेः प्रत्यय देरित्वम्। विशिपं मन्दिरम्। वलतेः सम्प्रसारणम्। 'उलपं कोमलं तृणम्'।

४२६। **वृतेस्तिकन्**। वर्त्तिका।

४२७। **कृतिभिदिलतिभ्यः कित्**। कृत्तिका। भित्तिका भित्तिः। लत्तिका गोधा।

४२८। **इष्यशिभ्यां तकन्**। इष्टका। अष्टका।

४२९। **इणस्तशन्तशसुनौ**। एतशो ब्राह्मणः। स एव एतशः।

४३०। **वीपतिभ्यां तनन्**। 'वी गत्यादौ'। वेतनम्। पत्तनम्।

४३१। **दृदलिभ्यां भः**। दर्भः। 'दल्भः स्याद्दृषिचक्रयोः'।

४३२। **अर्तिगृभ्यां भन्**। अर्भः। गर्भः।

४३३। **इणः कित्**। इभः।

४३४। **असिसाञ्जिभ्यां क्थिन्**। अस्थि। सक्थि।

४३५। **प्लुषिकुषिशुषिभ्यः क्सिः**। प्लुक्षिर्वह्निः। कुक्षिः। शुक्षिर्वातः।

सरसी सरः।' **कृणेः** ॥ 'कुणपः पूतिगन्धे शवेऽपि च' इति मेदिनी। **विटपपिष्टप** ॥ 'विटपो न स्त्रियां स्तम्बशाखाविस्तारपल्लवे। पीठाधिपे च' इति मेदिनी। **आदेः प इति** ॥ एतच्चोज्ज्वलदत्तरीत्योक्तम्। अन्ये तु सूत्रे 'विष्टप' इति दन्त्योष्ठ्यादिमेव पठन्ति। युक्तञ्चैतत्। 'यत्र ब्रध्नस्य विष्टपम्' इत्यादौ तथा दर्शनात्। 'उलपो न स्त्री गुल्मिन्यां ना तृणान्तरे' इति मेदिनी। **लत्तिकेति** ॥ लतिः सौत्रः। **इष्टकेति** ॥ 'इष्टकेषीकामालानाम्' इति निर्देशात् 'प्रत्ययस्थात्' इति नेत्त्वम्। **अर्तिगृ** ॥ 'गर्भो भ्रूणेऽर्भके कुक्षौ सन्धौ पनसकण्टके' इति मेदिनी। **इणः** ॥ 'इभः स्वम्बेरमः पद्मी' इत्यमरः।

४३६ । **अशेर्नित्** । अक्षि ।

४३७ । **इषेः क्सुः** । इक्षुः ।

४३८ । **अवितृस्तृतन्त्रिभ्य ईः** । 'अवीनारी रजस्वला' । तरीनौः । स्तरीर्धूमः । 'तन्त्रीर्वीणादेर्गुणः ।

४३९ । **यापोः किद्वे च** । ययीरश्वः । 'पपीः स्यात्सोमसूर्ययोः' ।

४४० । **लक्षेर्मुट् च** । लक्ष्मीः ।

॥ इत्युणादिषु तृतीयः पादः ॥

॥ अथ उणादिषु चतुर्थः पादः ॥

४४१ । **वातप्रमीः** । वातशब्द उपपदे माधातोरीप्रत्ययः । स च कित् । वातप्रमीः । अयं स्त्रीपुंसयोः ।

४४२ । **ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्किकुयुक्रुशिभ्यः कन्निज्यतुजलिजिष्टुजिष्ठजिसन्स्यानिथिनुल्यसासानुकः** । द्वादशभ्यः क्रमात्स्युः । अर्तेः कन्निच् । यण् । 'बद्धमुष्टिः करो रन्निः सोऽरन्निः प्रसृताङ्गुलिः' । तनोतेर्यतुच् । तन्यतुर्वायू रात्रिश्च । अञ्जेरलिच् । अञ्जलिः । वनेरिष्टुच् । वनिष्टुः स्थविरान्त्रम् ।

लक्षेर्मुट् च ॥ 'लक्ष दर्शनाङ्कनयोः' । चुरादिण्यन्तः । अस्मादौप्रत्ययः स्यात् । तस्य मुडागमश्च । णिलोपः । 'लक्ष्मीः सम्पत्तिशोभयोः । ऋद्ध्यौषधौ च पद्मायां वृद्धिनामौषधेऽपि च । फलिन्यां स्त्री' इति मेदिनी ॥

इत्युणादिषु तृतीयः पादः ।

अयमिति ॥ 'द्विचतुःषट्पदोरगाः' इत्यमरेणोभयलिङ्गोक्तेः, सुभूतिचन्द्रादिभिरपि वातप्रमीशब्दस्य द्विलिङ्गतोक्तेश्चेति भावः । तत्र 'कृदिकारात्' इति पाक्षिको ङीप् कैश्चिदिष्यते । न हि 'कारग्रहणे केवलग्रहणम्' इति मुनित्रयेण परिभाषितम् । अत एव 'वातप्रमीश्रीलक्ष्मीति पक्षे ङ्यन्ताः सुसाधवः' इति रक्षितः । एतच्च दुर्घटग्रन्थे स्पष्टम् । 'आशीराश्यहिदंष्ट्रायां लक्ष्मीर्लक्ष्मी हरिस्त्रियाम्' इति द्विरूपकोशः । अत एव 'आशीविषो विषधरः' इति सङ्गच्छते । 'आशीमिव कलामिन्दोः' इति राजशेखरः । 'आशीर्हिताशंसाहिदंष्ट्रयोः' इति सान्ते अमरात् सान्तोऽप्याशीःशब्द इत्यन्यदेतत् । **बद्धेति** ॥ 'मुष्ठा तु बद्धया । सरन्निः स्यात्' इत्यमरः । सहस्त इत्यर्थः । प्रसङ्गादाह । **अरन्निरिति** ॥ न रन्निः अरन्निः इति नञ्समासः । दशपादीवृत्तौ तु इह सूत्रे अर्तेरन्निचमकितं विधाय अरन्निः साधितः । उज्ज्वलदत्तानुसारेणाह । **वायू रात्रिश्चेति** ॥ इह शब्दो मेघः, अशनिश्चेत्यपि बोध्यम् । 'आविष्कृणोमि तन्यतुर्न वृष्टिम्' इति मन्त्रे तन्यतुर्गर्जितामिति, 'सृजावृष्टिं न तन्यतुः' इति मन्त्रे तन्यतुर्मेघ इति, 'दिवश्चित्रं न तन्यतुः' इति मन्त्रे तन्यतुरशनिरिति वेदभाष्ये

अञ्जेरिष्टच्। अञ्जिष्ठो भानुः। अर्पयतेरिसन्। अर्पिसोऽग्रमांसम्। मदेः स्यन्, मत्स्यः। अतेरिथिन्, अतिथिः। अङ्गेरुलिः, अङ्गुलिः। कौतेरसः, कवसः। अच इत्येके। कवचम्। यौतेरासः, यवासो दुरालभा। कृशेरानुक्, कृशानुः।

४४३। **श्रः करन्**। उत्तरसूत्रे किद्ग्रहणादिह ककारस्य नेत्त्वम्। शर्करा।

४४४। **पुषः कित्**। पुष्करम्।

४४५। **कलंश्च**। पुष्कलम्।

४४६। **गमेरिनिः**। गमिष्यतीति गमी।

४४७। **आङि णित्**। आगामी।

४४८। **भुवश्च**। भावी।

४४९। **प्रेः स्थः**। प्रस्थायी।

४५०। **परमे कित्**। परमेष्ठी।

४५१। **मन्थः**। मन्थतेरिनिः कित्स्यात्। कित्त्वान्नकारलोपः। मन्थाः—मन्थानौ—मन्थानः।

४५२। **पतस्थ च**। पन्थाः—पन्थानौ।

व्याख्यातत्वात्। 'अञ्जलिस्तु पुमान् हस्तसम्पुटे कुटवेऽपि च' इति मेदिनी। **स्थविरान्त्रमिति**॥ 'वनिष्ठोर्हृदयादधि' इति मन्त्रस्य भाष्ये तथोक्तत्वात्। **अञ्जिष्ठ इति**॥ केचिदञ्जेरिष्णुचमिच्छन्ति। तेषामञ्जिष्णुरित्युदाहरणम्। **मदेरिति**॥ 'मत्स्यो मीनेऽथ पुंभूम्नि देशे' इति मेदिनी। 'अतिथिः कुशपुत्रे स्यात् पुमानागन्तुके त्रिषु। अङ्गुलिः करशाखायां कर्णिकायाञ्च जस्य च' इति मेदिनी। कवसः सन्नाहः कङ्कटजातिश्च। **अच इति**॥ 'कवचो दुर्गभाण्डे च सन्नाहे पर्पटेऽपि च' इति मेदिनी। **पुषः**॥ पुष्यतेः करः स्यात्। स च कित्। 'पुष्करं खेऽम्बुपद्मयोः। तूर्यवक्त्रे खड्गफले हस्तिहस्ताग्रकाण्डयोः। कुष्ठौषधे द्वीपतीर्थभेदयोश्च नपुंसकम्। न। रागनागविहगनृपभेदेषु वारुणौ' इति मेदिनी। **कलंश्च**॥ पुष्यतेः कलन् कित्स्यात्। पुष्कलस्तु पूर्णे श्रेष्ठे' इति हेमचन्द्रः। **मन्था इति**॥ पथिमथीत्यात्त्वम्। इतोऽत्सर्वनामस्थाने। 'मन्था मन्थनदण्डे च व्रजे वातेऽपि च स्मृतः।' **पन्था इति**॥ पथे गतौ अस्मात्पचाद्यचि अकारान्तोऽप्यस्ति। 'वाटः पथश्च मार्गश्च' इति सुभूतिचन्द्रपुरुषोत्तमौ। 'त्वचि त्वचः किरोऽपि स्यात् किरो प्रोक्तः पथः पथि' इति द्विरूपेषु विश्वः। इह ऋभवो देवाः क्षयन्त्यस्मिन्निति विग्रहे 'अन्येभ्योऽपि दृश्यते' इति डः। 'ऋभुक्षः स्वर्गवज्रयोः' इति विश्वः। ततो मत्वर्थीये इनिः। ऋभुक्षिन्निति नान्तं प्रातिपदिकम्। आत्त्वमत्वं च। ऋभुक्षा इन्द्रः। ऋभुक्षाणौ ऋभुक्षाणः इत्युज्ज्वलदत्तः। दशपाद्यान्तु 'अर्तेर्भुक्षिक्षिनक्' इति सूत्रमुपन्यस्तम्। 'ऋभुक्षणमिन्द्रमाहुव ऊतये' इति मन्त्रस्य वेदभाष्येऽपि तत्सूत्रमुदाहृतम्।

४५३ । **खजेराकः** । खजाकः पक्षी ।

४५४ । **बलाकादयश्च** । बलाका । शलाका । पताका ।

४५५ । **पिनाकादयश्च** । पातेरित्त्वं नुम् च । 'क्लीबपुंसोः पिनाकः स्याच्छूलशङ्करधन्वनोः' । 'तड आघाते' । तडाकः ।

४५६ । **कषिदूषिभ्यामीकन्** । कषीका पक्षिजातिः । 'दूषीका नेत्रयोर्मलम्' ।

४५७ । **अनिहृषिभ्यां किच्च** । अनीकम् । हृषीकम् ।

४५८ । **चङ्कणः कङ्कणश्च** । 'कण शब्दे' अस्माद्यङ्लुगन्तादीकन् धातोः कङ्कणादेशश्च । 'घण्टिकायां कङ्कणीका सैव प्रतिसरापि च' ।

४५९ । **शृपॄवृञां द्वे रुक्चाभ्यासस्य** । शर्शरीको हिंस्रः । पर्परीको दिवाकरः । वर्वरीकः कुटिलकेशः ।

४६० । **पर्फरीकादयश्च** । 'स्फुर स्फुरणे' । अस्मादीकन् धातोः पर्फरादेशः । पर्फरीकं किसलयम् । दर्दरीकं वादित्रम् । झर्झरीकं शरीरम् ।

अत्रायं विवेकः । आद्यमन्त्रेऽन्तोदात्तत्वं न्याय्यम् । अवग्रहाभावो बाहुलकात् । द्वितीये तु अवग्रहाभावो न्याय्यः । अन्तोदात्तस्तु बाहुलकादिति । **खजाक इति** ॥ 'खज मन्थे' **बलाकादयश्च** ॥ 'बलाका वकपङ्क्तिः स्यात् बलाका विसकण्टिका । बलाका कामुकी प्रोक्ता बलाकश्च बको मतः' इति विश्वशाश्वतौ । 'शलाका शल्यमदनशारिकासल्लकीषु च' इति मेदिनी । 'पताका वैजयन्त्याञ्च सौभाग्ये नाटकाङ्कयोः' इति च । 'पताका वैजयन्त्याञ्च सौभाग्येऽङ्के ध्वजेऽपि च' इति विश्वः । **पिनाकादयश्च** ॥ 'पिनाकोऽस्त्री रुद्रचापे पांसु-र्षात्रिशूलयोः' इति मेदिनी । अमरोक्तिमाह । **क्लीबेति** ॥ किच्च 'पिष्लृ सञ्चूर्णने' । षकारस्य णत्वं धातोर्युगागमः । 'पिण्याकोऽस्त्री तिलकल्के हिङ्गुबाह्लीकमिश्रके' इति मेदिनी । अमरोक्तिमाह । **दूषीकेति** ॥ किच्च दूषयतेः 'अच इः' इति इप्रत्यये दूषिः । 'कृदिकारात्' इति ङीष् । दूषी । उभाभ्यामपि स्वार्थे कनि दूषिका ह्रस्वमध्यैव, 'केऽणः' इति ङीषो ह्रस्वादेशात् । 'पिचण्डी दूषिका दूषिः पिचाठश्च दृशो मलम्' इति विक्रमादित्यकोशः । 'दूषिका तूलिकायाञ्च मले स्याल्लोचनस्य च' इति मेदिनी । **अनिहृषिभ्यां** ॥ 'अनीकोऽस्त्री गणे सैन्येऽपि" इति मेदिनी । 'हृषीकं विषयीन्द्रियम्' इत्यमरः । **पर्फरादेश इति** ॥ उज्ज्वलदत्तरीत्योक्तम् । वस्तुतस्तु धातोर्द्वित्वम् । उकारस्याकारः सलोपः । 'रुक् चाभ्यासस्य' इति दशपाद्युक्तमेव न्याय्यम् । चरेर्नुम् चेत्युत्तरग्रन्थानुरोधेन द्वे रुक्चेत्यादेरनुवृत्तेर्न्याय्यत्वात् । **किसलयमिति** ॥ 'नैतौशेव तुर्फरीपर्फरीका' इति मन्त्रस्य वेदभाष्ये तु 'ञि फला विशरणे, पॄ पालनपूरणयोः, पर्व पूरणे' एषामन्यतमस्य निपातनमिदमाश्रित्य शत्रूणां विदारयितारः स्तोतॄणां पालका

तिन्तिडीको वृक्षभेदः। 'चरेर्नुम् च' (गण १९९)। चञ्चरीको भ्रमरः। मर्मरीको हीनजनः। कर्करीका गलन्तिका। पुणतेः, पुण्डरीकं वादित्रम्। पुण्डरीको व्याघ्रोऽग्निर्दिग्गजश्च।

४६१। **ईषेः किद्ध्रस्वश्च**। इषीका शलाका।

४६२। **ऋजेश्च**। ऋजीक उपहतः।

४६३। **सर्तेर्नुम् च**। सृणीका लाला।

४६४। **मृडः कीककङ्कणौ**। मृडीको मृगः। मृडङ्कणः शिशुः।

४६५। **अलीकादयश्च**। कीकन्नन्ता निपात्यन्ते। 'अल भूषणादौ'। अलीकं मिथ्या। विपूर्वाद्व्यलीकं विप्रियं खेदश्च। 'वलीकं पटलप्रान्ते' इत्यादि।

४६६। **कृतृभ्यामीषन्**। करीषोऽस्त्री शुष्कगोमये। तरीषः तरिता।

४६७। **शृपृभ्यां किच्च**। शिरीषः। पुरीषम्।

४६८। **अर्जेऋज च**। ऋजीषं पिष्टपचनम्।

विशिष्टार्थस्य पूरयितारौ चेति व्याख्यातम्। **तिन्तिडीक इति॥** तिमेर्मकारस्य डकारः। अभ्यासस्य नुक् च। 'तिन्तिडी चिञ्चाम्लिका' इत्यमरे तु शब्दान्तरम्। तथा च 'तिन्तिडी त्वम्लिका चिञ्चा तिन्तिडीका कपिप्रिया' इति वाचस्पतिः। 'अम्लीका चाम्लिका चिञ्चा तित्तिडीका च तिन्तिडी' इति चन्द्रः। 'अम्लिका चुक्रिका चुक्रा साम्रा शुक्लाऽथ शुक्लिका। अम्लिका चिञ्चिका चिञ्चा तित्तिडीका च तित्तिडा' इति धन्वन्तरिनिघण्टुः। यत्तु उज्ज्वलदत्तेनोक्तम् 'उपदंशस्तृतीयायाम्' इति सूत्रे तित्तिडोपदंशं भुङ्क्ते इति भाष्यप्रयोगात्साधुतेति, तदुपेक्ष्यम्। 'उपदंशः' इति सूत्रस्य भाष्यकारैरस्पृष्टत्वात्। तदुदाहृतप्रयोगस्य भाष्ये कुत्राप्यभावाच्च। 'भ्रमरश्चञ्चरीकः स्याद्द्विरेफो मधुसूदनः। इन्दिन्दिरः पुष्पकीटो मधुव्रतो मधुकेशटः' इति त्रिकाण्डशेषः। 'कर्कर्यालूर्गलन्तिका' इत्यमरः। 'पुण्डरीकं सिताम्भोजे सितच्छत्रे च भेषजे। पुंसि व्याघ्रे च दिङ्नागे कोशकारान्तरेऽपि च' इति मेदिनी। **ईषेः॥** 'ईषीका स्यादिशीकापि वानायुजवनायुजा' इति द्विरूपकोशः। **सर्तेः॥** 'सृणीका स्यन्दिनी लाला' इत्यमरः। **मृडः कीक॥** कित्त्वादन्तोदात्तः। कीकनित्युज्ज्वलदत्तादिपाठस्तु प्रामादिकः। 'मृलीकेऽस्य सुमतौ स्याम। मृलीकावप्रियव्रजान्' इत्यादिषु चित्स्वरस्यैव दर्शनात्। **अलीकादयश्च॥** 'अलीकमप्रियेऽपि स्यात् दिव्यसत्ये नपुंसकम्' इति मेदिनी। 'अलीकमप्रिये भाले वितथे' इति हेमचन्द्रः। तथा च प्रयुज्यते। "ते दृष्टिमात्रपतिता अपि कस्य नात्र क्षोभाय पक्ष्मलदृशामलिकाः खलाश्च। नीचाः सदैव सविलासमलीकमग्ना ये कालतां कुटिलताश्च न संत्यजन्ति" इति। 'व्यलीकमप्रियाकार्यवैलक्ष्येष्वपि पीठके। ना नागरे' इति

४६९ । **अम्बरीषः** । अयं निपात्यते । 'अबि शब्दे' । 'अम्बरीषः पुमान्भ्राष्ट्रम्' । अमरस्तु 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना' ।

४७० । **कृशृपृकटिपटिशौटिभ्य ईरन्** । करीरो वंशाङ्कुरः । शरीरम् । परीरं फलम् । कटीरः कन्दरो जघनप्रदेशश्च । पटीरश्चन्दनः कण्टकः कामश्च । 'शौटीरस्त्यागिवीरयोः' । ब्राह्मणादित्वात् ष्यञ् । शौटीर्यम् ।

४७१ । **वशेः कित्** । उशीरम् ।

४७२ । **कशेर्मुट् च** । कश्मीरो देशः ।

४७३ । **कृञ उच्च** । कुरीरं मैथुनम् ।

४७४ । **घसेः किच्च** । क्षीरम् ।

४७५ । **गभीरगम्भीरौ** । गमेर्भः । पक्षे नुम् च ।

४७६ । **विषा विहा** । स्यतेर्जहातेश्च विपूर्वाभ्यामाप्रत्ययः । विषा बुद्धिः, विहा स्वर्गः, अव्यये इमे ।

४७७ । **पच एलिमच्** । 'पचेलिमो वह्निरव्योः' ।

४७८ । **शीङो भुक्कलञ्वालनः** । चत्वारः प्रत्ययाः स्युः । शीधु मद्यम् ।

मेदिनी । 'वल्मीकं नीव्रे पटलप्रान्ते' इत्यमरः । वलतेर्मुगागमे वल्मीकम् । 'वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम्' इत्यमरः । वहतेर्वृद्धिश्च । वार्हको गौः, वाहश्च । सुप्रपूर्वादिणस्तुट् च । सुप्रतीकः । शाम्यतेः शमीकः ऋजीषम् । एतच्च ऋजीषिणं वृषणं संसताश्रिये । आसत्या यातु मघवान् ऋजीषीत्यादिमन्त्रभाष्ये स्पष्टम् । **अयमिति** ॥ ईषन् प्रत्ययः, अरुट् च तस्यागम इत्यर्थः । बोपालितोक्तिमाह । **अम्बरीष इत्यादि** ॥ 'अम्बरीषं रणे भ्राष्ट्रे क्लीबं पुंसि नृपान्तरे । नरकस्य प्रभेदे च किशोरे भास्करेऽपि च । आम्रातके तु तापे च' इति मेदिनी । **कृशृ** ॥ 'वंशाङ्कुरे करीरोऽस्त्री वृक्षभिद्वटयोः पुमान् । करीरा चीरिकायाञ्च दन्तमूले च दन्तिनाम्' इति मेदिनी । 'शरीरं वर्ष्म विग्रहः' इत्यमरः । अर्धर्चादित्वात् शरीरोऽपि । बाहुलकात् । 'हिडि गत्यनादरयोः ।' हिण्डते इतस्ततो गच्छतीति हिण्डीरः । 'हिण्डीरोऽब्धिकफः फेनः' इत्यमरः । 'डिण्डीरोऽपि च हिण्डीरः' इति द्विरूपकोशः । किर्मीरञ्जम्बीरतूणीरादयोऽप्येवं बोध्याः । 'किर्मीरो नागरङ्गे च कर्बुरे राक्षसान्तरे' इति मेदिनी । 'जम्बीरः प्रस्थपुष्पे स्यात्तथा दन्तशठे द्रुमे' इति च । उशीरं वीरणमूलम् । उशीरोऽपि । 'मूलेऽस्योशीरमस्त्रियाम् । अभयं नलदं सेव्यम्' इत्यमरः । **कुरीरमिति** ॥ कपिलकादित्वाल्लत्वे कुलीरः कर्कटकः । **घसेः** ॥ **क्षीरमिति** ॥ उपधालोपः । कत्वं षत्वम् । 'क्षीरं दुग्धे च नीरे च' इति विश्वः । **गमेरिति** ॥ 'निम्नङ्गभीरङ्गम्भीरम्' इत्यमरः । पच एलिमच् । कर्तर्ययं कृत्यप्रत्ययेषु रिदुपसङ्ख्यातः । शेरतेऽनेन शीधुः । मद्यविशेषः । 'मैरेयमासवः शीधुः'

शीलं स्वभावः। शैवलः। शेवालम्। बाहुलकात् वस्य पोऽपि। 'शेवालं शैवलो न स्त्री शेपालो जलनीलिका'।

४७९। **मृकणिभ्यामूकोकणौ**। मरूको मृगः काणूकः काकः।

४८०। **वलेरूकः**। वलूकः पक्षी उत्पलमूलं च।

४८१। **उलूकादयश्च**। वलेः संप्रसारणमूकश्च। उलूकाविन्द्रपेचकौ। वावदूको वक्ता। भल्लूकः। 'शमेर्बुक् च' (गण २००)। शम्बूको जलशुक्तिः।

४८२। **शलिमण्डिभ्यामूकण्**। शालूकं कन्दविशेषः। मण्डूकः।

४८३। **नियो मिः**। नेमिः।

४८४। **अर्तेरूच्च**। ऊर्मिः।

४८५। **भुवः कित्**। भूमिः।

४८६। **अश्नोते रश्च**। रश्मिः किरणो रज्जुश्च।

४८७। **दल्मिः**। दल विशरणे। दल्मिरिन्द्रायुधम्।

इत्यमरः। अर्धर्चादिपाठात् क्लीवत्वञ्च। 'पुन्नपुंसकयोर्दारुजीवातुस्थाणुशीधवः' इति त्रिकाण्डशेषः। 'शीलं स्वभावे सद्वृत्ते' इति मेदिनी। 'जलनीली तु शेवालं शैवलः' इत्यमरः। शैवलं पद्मकाष्ठे स्यात् शैवले तु पुमानयम्' इति मेदिनी। शब्दार्णवोक्तिमाह। **शेवालमित्यादि॥ उलूकादयश्च॥** 'उलूकः पुंसि काकादाविन्द्रे भारतयोधिनि' इति मेदिनी। वदेर्यङन्तादृकः। 'वाचोयुक्तिपटुर्वाग्मी वावदूकश्च वक्तरि' इत्यमरः। **शमेर्बुक् च॥** 'शम्बूको गजकुम्भान्ते घोषे च शूद्रतापसे' इति मेदिनी। बाहुलकादुकप्रत्यये ह्रस्वमध्योऽपि। 'जम्बूकं जम्बुकं प्राहुः शम्बूकमपि शम्बुकम्' इति द्विरूपकोशः। जम्बूकबन्धूकादयोऽप्यत्रैव द्रष्टव्याः। 'जम्बूकः फेरवे नीचे पश्चिमाशापतावपि' इति विश्वमेदिन्यौ। 'बन्धूकं बन्धुजीवे स्यात् बन्धूकः पीतसारके' इति च। **शलिमण्डि॥** 'सौगन्धिकन्तु कह्लारम्' इत्याद्युपक्रम्य 'शालूकमेषां कन्दः स्यात्' इत्यमरः। एषां सौगन्धिकादीनां कैरवान्तानां कन्दो मूलमित्यर्थः। **नियो मिः॥** 'नेमिर्ना तिनिशे कूपत्रिकाचक्रान्तयोः स्त्रियाम्' इति मेदिनी। बाहुलकादन्यतोऽपि। 'या प्रापणे।' 'यामिः स्वसृकुलस्त्रियोः' इत्यन्तःस्थादौ रभसः। 'यामिः कुलस्त्रीस्वस्रोः स्त्री' इत्यन्तःस्थादौ मेदिनी। 'जै क्षये।' 'जामिः स्वसृकुलस्त्रियोः' इति चवर्गतृतीयादौ अजयकोशः। 'चवर्गादिरपि प्रोक्तो यामिः स्वसृकुलस्त्रियोः' इति द्विरूपेषु विश्वः। **अर्तेरूच्च॥** उच्चेत्युचितम्। 'ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः। वस्त्रसङ्कोचरेखायां वेदनापीडयोरपि' इति मेदिनी। भूमिः, 'भूमिर्वसुन्धरायां स्यात् स्थानमात्रेऽपि च स्त्रियाम्' इति मेदिनी। **अश्नोतेः॥** 'रश्मिः पुमान् दीधितौ स्यात् पक्षप्रग्रहयोरपि' इति मेदिनी।

४८८ । **वीज्याज्वरिभ्यो निः** । बाहुलकाण्णत्वम् । वेणिः स्यात्केश-विन्यासः प्रवेणी च स्त्रियामुभे । ज्यानिः । जूर्णिः ।

४८९ । **सृवृषिभ्यां कित्** । सृणिरङ्कुशः । 'वृष्णिः क्षत्रियमेषयोः' ।

४९० । **अङ्गेर्नलोपश्च** । अग्निः ।

४९१ । **वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्** । वह्निः । श्रेणिः । श्रोणिः । योनिः । द्रोणिः । ग्लानिः । ह्लानिः । तूर्णिः । बाहुलकान्म्लानिः ।

४९२ । **घृणिपृश्निपार्ष्णिचूर्णिभूर्णि** । एते पञ्च निपात्यन्ते । घृणिः किरणः । स्पृशतेः सलोपः । पृश्निरल्पशरीरः । पृषेर्वृद्धिश्च । पार्ष्णिः पादतलम् । चरेरुपधाया उत्वम् । चूर्णिः कपर्दकशतम् । बिभर्तेरुत्वम् । भूर्णिर्धरणी ।

४९३ । **वृदृभ्यां विन्** । वर्विर्घस्मरः । दर्विः ।

४९४ । **जृशृस्तृजागृभ्यः क्विन्** । जीर्विः पर्शुः । शीर्विर्हिंस्रः । स्तीर्वि-रध्वर्युः । जागृविर्नृपः ।

४९५ । **दिवो द्वे दीर्घश्चाभ्यासस्य** । 'दीदिविः स्वर्गमोक्षयोः' ।

वीज्या ॥ अमरोक्तमाह । **वेणिः स्यादित्यादि** ॥ 'वेणी केशस्य बन्धने । नद्यादेरन्तरे देवताडे' इति मेदिनी । 'वेणी गरागरी देवताडो जीमूत इत्यपि' इत्यमरः । 'ज्यानिर्हानौ स्रवन्त्याञ्च' इति विश्वः । जूर्णिः स्त्रीरोगः । **सृवृषि** ॥ 'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' इत्यमरः । 'सृणिः स्यादङ्कुशे पुमान्' इति कोशान्तरम् । अत एव 'आरक्षमग्नमवमत्य सृणिं शिताग्रम्' इति माघः । 'वृष्णिस्तु यादवे मेषे वृष्णिः पाखण्डचण्डयोः' इति विश्वः । 'ऐन्द्रे वृष्णि षोडशिनि तृतीयम्' इति श्रुतौ वृष्णि मेषमित्यर्थः । **अङ्गेः** ॥ 'अग्निर्वैश्वानरेऽपि स्याच्चित्रकाख्यौषधौ पुमान्' इति मेदिनी । **वहिश्रि** ॥ 'श्रेणिः स्त्रीपुंसयोः पङ्क्तौ समाने शिल्पिसंहतौ' इति च । 'कटिः श्रोणिः ककुद्मती' इत्यमरः । 'योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे' इति मेदिनी । **घृणिपृश्नि** ॥ 'घृ सेचने' निप्रत्ययो गुणाभावश्च । 'घृणिः पुनः, अंशुज्वालातरङ्गेषु' इति हेमचन्द्रः । 'पृश्निरल्पतनौ' इत्यमरः । 'पार्ष्णिः स्यादुन्मदः स्त्रियाम् । स्त्रियां द्वयोः सैन्यपृष्ठे पादग्रन्थ्यधरेऽपि च' इति मेदिनी । **भूर्णिर्धरणीति** ॥ 'तक्मानभूर्णिः' इति मन्त्रे भाष्ये तु 'भूर्णिर्धारकः पोषको वा' इति व्याख्यातम् । **दिवो द्वे** ॥ 'दीदिविर्धिषणान्नयोः' इति विश्वः । 'दीदिविर्नो धिषणेऽन्ने तदस्त्रियाम्' इति मेदिनी । धिषणो बृहस्पतिः । 'दीदिवि-र्द्वादशकरश्वक्षा सुरगुरुर्गुरुः' इति त्रिकाण्डशेषः । 'दीदिविर्द्वादशार्चिः स्याज्जीवः प्राक्फल्गुनी-सुतः' इति हारावली । 'ओदनोऽस्त्री सदीदिविः' इत्यमरः । अत्र सदीदिविर्दीदिविसहित इति व्याख्यानं न्याय्यम् । स इति छेदे तु अस्त्रियामिति न लभ्यते । ततश्च 'अन्ने तदस्त्रियाम्'

४९६। **कृविघृष्विछविस्थविकिकीदिवि**। कृविस्तन्तुवायद्रव्यम्। घृष्विर्वराहः। छास्थोर्ह्रस्वत्वं च। छविर्दीप्तिः। स्थविस्तन्तुवायः। दीव्यतेः किकीपूर्वात्। किकीदिविश्चाषः। बाहुलकाद्ह्रस्वदीर्घयोर्विनिमयः। 'चाषेण किकिदीविना'।

४९७। **पातेर्डतिः**। पतिः।

४९८। **शकेर्ऋतिन्**। शकृत्।

४९९। **अमेरतिः**। अमतिः कालः।

५००। **वहिवस्यर्तिभ्याश्वित्**। वहतिः पवनः। 'वसतिर्गृहयामिन्योः'। अरतिः क्रोधः।

५०१। **अञ्चेः को वा**। अङ्कतिरञ्चतिर्वातः।

५०२। **हन्तेरंह च**। हन्तेरतिः स्यादंहादेशश्च धातोः। हन्ति दुरितमनया अंहतिर्दानम्। 'प्रादेशनं निर्वपणमपवर्जनमंहतिः'।

५०३। **रमेर्नित्**। 'रमतिः कालकामयोः।

५०४। **सूङः क्रिः**। सूरिः।

इति मेदिनीग्रन्थो विरुद्ध्येतेति ध्येयम्। 'गोपामृतस्य दीदिविम्' इति मन्त्रे तु द्योतमानमित्यर्थः। **कृविघृष्वि** ॥ एतेन क्विन्नन्ता निपात्यन्ते। **घृष्विर्वराह इति** ॥ 'उग्रस्य पुनः स्थविरस्य घृष्वेः' इति मन्त्रे तु घृष्वेः कामानां वर्षकस्येत्यर्थः, 'घृषु सेचने' इति धात्वर्थानुगमात्। 'छविः शोभारुचोर्योषित्' इति मेदिनी। 'अथ चाषः किकीदिविः' इत्यमरः। **विनिमय इति** ॥ 'किकिदीविः किकीदिविः' इति द्विरूपकोशः। **पातेः** ॥ 'पतिर्धवे नाविष्र्वीशे' इति मेदिनी। **शकेः** ॥ 'उच्चारावस्करौ शमलं शकृत्। गूथं पुरीषं वर्चस्कमस्त्री विष्ठाविशौ स्त्रियाम्' इत्यमरः। **अमेरतिः** ॥ 'अथामतिः पुंसि हिमदीधितिकालयोः' इति मेदिनी। 'अमतिश्चामतिः कालः' इति द्विरूपेषु विश्वः। **वहिवासि** ॥ 'वहतिः सचिवे गवि' इति विश्वः। वसतिः स्यात्स्त्रियां वासो यामिन्याञ्च निकेतने' इति मेदिनी। अमरोक्तिमाह। **प्रादेशनमिति** ॥ **रमेः** ॥ 'रमन्निनार्यके नाके पुंसि स्यात्' इति मेदिनी। वृत्तिकारोक्तं कोशान्तरमाह। **रमतिरित्यादि** ॥ नित्त्वमाद्युदात्तार्थम्। रन्तिरसि–रमतिरसि। **सूङः क्रिः** ॥ 'धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः' इत्यमरः। दशपाद्यान्तु 'सुवो रिन् दीर्घश्च' इति पाठः। तत्र रिनो नकारो नानुबन्धः। उत्तरसूत्रे प्रत्ययान्तरारम्भात्। अनुबन्धत्वे हि लाघवादिहैव किन्नुच्येत। तथा च सूरी सूरिणौ सूरिण इत्यादि रूपम्। अत एवाभिधानमालायां सूरीति नान्तमुदाहृतमित्यवधेयम्। यत्तु दशपादीवृत्तिकारैर्नित्त्वं स्वीकृत्य सूरिरित्युदाहृतम्। तदेतेन प्रत्युक्तम्। स्वरविरुद्धमपि, 'सदा पश्यन्ति सूरयः'

५०५। **अदिशदिभूशुभिभ्यः क्रिन्**। अद्रिः। शद्रिः शर्करा। भूरि प्रचुरम्। शुभ्रिर्ब्रह्मा।

५०६। **वङ्क्र्यादयश्च**। क्रिन्नन्ता निपात्यन्ते। वङ्क्रिर्वाद्यभेदो गृहदारु पार्श्वास्थि च। वप्रिः क्षेत्रम्। 'अंह्रिरङ्घ्रिश्च चरणः'। तदिः सौत्रो धातुः। तन्द्रिर्मोहः। बाहुलकादुणः। भेरिः।

५०७। **राशदिभ्यां त्रिप्**। रात्रिः। शत्रिः कुञ्जरः।

५०८। **अदेस्त्रिनिश्च**। चात्रिप्। अत्री। अत्रिणौ। अत्तृणः। अत्रिः। अत्त्री। अत्तृयः।

५०९। **पतेरत्रिन्**। पतत्रिः पक्षी।

५१०। **मृकणिभ्यामीचिः**। मरीचिः। कणीचिः पल्लवो निनादश्च।

५११। **श्वयतेश्चित्**। श्वयीचिर्व्याधिः।

५१२। **वेञो डिच्च**। वीचिस्तरङ्गः। नञ्समासेऽवीचिर्नरकभेदः।

५१३। **ऋहनिभ्यामूषन्**। अरूषः सूर्यः। हनूषो राक्षसः।

'विसूरयो दधतो विश्वमायुः' इत्यादौ सूरिशब्दस्यान्तोदात्तत्वात्। **अदिशदि** ॥ 'अद्रयो द्रुमशैलार्काः' इत्यमरः। 'भूरिर्ना वासुदेवे च हरे च परमेष्ठिनि। नपुंसके सुवर्णे च प्राज्ये स्याद्वाच्यलिङ्गकम्' इति मेदिनी। **वङ्क्रिरिति** ॥ 'वक्रि कौटिल्ये।' **तन्द्रिरिति** ॥ 'कृदिकारात्' इति पक्षे ङीष्। 'तन्द्री निद्राप्रमीलयोः' इति मेदिनी। 'तन्द्री तन्द्रिश्च तन्द्रायाम्' इति द्विरूपकोशः। 'विभज्य नक्तन्दिवमस्ततन्द्रिणा' इति भारविः। **राशदिभ्यां** ॥ 'शत्रिर्नाम्भोधरे जिष्णौ' इति मेदिनी। 'शत्रिमग्र उपमाङ्केतुमर्यय' इति मन्त्रस्य वेद भाष्ये तु उपमामुपमानभूतङ्केतुं प्रख्यातं शत्रिम् एतन्नामकं राजर्षिमिति व्याख्यातम्। **अदेस्त्रिनिश्च** ॥ अत्त्री भक्षकः। अत्तृः ऋषिविशेषः। उज्ज्वलदत्तस्तु अदेस्त्रिन् इति पठित्वा अत्तृरित्युदाजहार। तन्न, त्रिपैव सिद्धे प्रत्ययान्तरवैयर्थ्यात्। गोवर्धनस्तु 'अदेस्त्रिन्निच्च' इति पठित्वा निदिति वचनान्नकारस्य नेत्संज्ञा। अत्त्री–अत्तृणौ–अत्तृणः इत्याह। तदपि न, आयुदात्तापत्तेः। न चेष्टापत्तिः। 'जहीन्या अत्तृणं पणिम्। दूरे वा ये अन्ति वा केचिदत्तृणः। अग्ने हंसीत्यत्तृणम्' इत्यादावन्तोदात्तस्य निर्विवादत्वात्। दशपादीवृत्तौ तु 'अदेस्त्रिन्निच्च' इति पठित्वा चकारात्त्रिबित्युक्तम्। तदपि न, त्रिनिचश्चित्त्वस्य व्यर्थत्वात्। इकारेणैव नकारपरित्राणे सति प्रत्ययस्वरेणैवेष्टसिद्धेः। अत एव 'वधैर्द्युशंसान्' इति मन्त्रस्य भाष्ये 'अदेस्त्रिनिश्च' इति माधवः। 'न लुमताङ्गस्य' इति सूत्रे कैयटोऽप्येवमाहेति दिक्। **पतत्रिरिति** ॥ पक्षिवाचकात्पतत्रशब्दान्मत्वर्थे इनि तु पतत्री पतत्रिणौ इत्यादि। **मृकणिभ्यां** ॥ 'मरीचिः कृपणे दीप्तावृषिभेदे च दृश्यते' इति विश्वः। 'मरीचिर्मुनिभेदे ना गभस्तावनपुंसकम्' इति मेदिनी। 'कणीचिः पुष्पितलतागुञ्जयोः शकटेऽस्त्रियाम्' इति च। **वेञः** ॥ 'वीचिः स्वल्पे

५१४। **पुरः कुषन्**। 'पुर अग्रगमने:' पुरुषः। 'अन्येषामपि—' (सू ३५३९) इति दीर्घः। पूरुषः।

५१५। **पृनहिकलिभ्य उषच्**। परुषम्। नहुषः। कलुषम्।

५१६। **पीयोरूषन्**। पीय इति सौत्रो धातुः। पीयूषम्। बाहुलकादुणे 'पेयूषोऽभिनवं पयः'।

५१७। **मस्जेर्नुम्च**। मञ्जूषा।

५१८। **गडेश्च**। गण्डूषः—गण्डूषा।

५१९। **अर्तेररुः**। अररुः शत्रुः। अररू। अरवः।

५२०। **कुटः किच्च**। कुटरुर्वस्त्रगृहम्। कित्त्वप्रयोजनं चिन्त्यम्।

५२१। **शकादिभ्योऽटन्**। शकटोऽस्त्रियाम्। ककिर्गत्यर्थः। कङ्कटः संनाहः। देवटः शिल्पी। करट इत्यादि।

५२२। **कृकदिकडिकटिभ्योऽम्बच्**। करम्बं व्यामिश्रम्। कदिकडी सौत्रौ। कदम्बो वृक्षभेदः। कडम्बोऽग्रभागः। कटम्बो वादित्रम्।

५२३। **कदेर्णित्पक्षिणि**। कादम्बः कलहंसः।

तरङ्गे स्यादवकाशे सुखे द्वयो.' इति विश्वमेदिन्यौ। **पुरः**॥ 'पुरुषः पुरुषे साङ्गचङ्गे च पुन्नागपादपे' इति विश्वमेदिन्यौ। **पृनहि**॥ परुषं कर्बुरे रूक्षे निष्ठुरोक्तौ च वाच्यवत्' इति मेदिनी। 'नहुषो राजविशेषे नागभिद्यपि' इति हेमचन्द्रः। चित्स्वरेणान्तोदात्तत्वे प्राप्ते ग्रामादित्वात् वृषादित्वाद्वा आद्युदात्तोऽयम्। 'एतच्च 'देवा अकृण्वन्नहुषस्य विश्वम्' इति मन्त्रस्य भाष्ये स्पष्टम्। 'कलुषं त्वाविलैनसोः' इति विश्वः। **पीयो**॥ 'पीयूषं सप्तदिवसावधिक्षीरे तथाऽमृते' इति मेदिनी। 'पियूषं' इत्यादिस्त्वमरः। **मस्जेः**॥ 'पिटकः पेटकः पेटा मञ्जूषा' इत्यमरः। **गडेश्च**॥ 'गण्डूषो मुखपूर्तांम्भःपुष्करप्रसृतोन्मिते' इति मेदिनी। **अर्तेररुः**॥ उकारान्तोऽयं प्रत्ययः। न तु सकारान्त इति स्फोरयति। **अररुः इत्यादिना**॥ युक्तश्चैतत्। 'कश्चिद्वाविररुं शूरमर्त्यम्। अपाररुमदेवयजनो जहि' इत्यादिमन्त्रेषु तथा दर्शनात्। यत्तु 'मानः शंसो अररुषः' इति मन्त्रस्य भाष्ये सान्तोऽयमिति माधवेनोक्तं तत्प्रौढिवादमात्रं न तु वास्तवम्, पदस्याद्युदात्तत्वानुपपत्तिप्रसङ्गात्। उक्तप्रयोगस्य क्वसन्तेन रातिना नञ्समासे सौष्ठवात्। 'गुरुद्वेषो अररुषे दधन्ति' इत्यत्र स्वयमेव तथा व्याख्यानात्। 'यो नोऽग्रे अररिवाम् अघायुः' इत्यादिमन्त्रान्तरसंवादाच्चेति दिक्। 'क्लीबेऽनः शकटोऽस्त्री स्यात्' इत्यमरः। 'करटो गजगण्डे स्यात्कुसुमे निस्वजीविनि। एकादशाहादिश्राद्धे दुर्दुरूढेऽपि वायसे' इति मेदिनी। **कृकदि**॥ 'करम्बो मिश्रिते बान्तो भान्तस्तु दधिसक्तुषु' इति विश्वः। 'कदम्बं निकुरुम्बे स्यान्नीपसर्षपयोः पुमान्' इति मेदिनी। 'कलम्बी शाकभेदे स्यात्कदम्बशरयोः पुमान्' इति च। **कदेः**॥ 'कादम्बः स्यात् पुमान् पक्षिविशेषे सायकेऽपि ना' इति मेदिनी।

५२४ । **कलिकर्दोरमः** । कलमः । कर्दमः ।

५२५ । **कुणिपुल्योः किन्दच्** । 'कुण शब्दोपकरणयोः' । कुणिन्दः शब्दः । पुलिन्दो जातिविशेषः ।

५२६ । **कुपेर्वा वश्च** । कुपिन्दकुविन्दौ तन्तुवाये ।

५२७ । **नौ षञ्जेर्घथिन्** । निषङ्गथिरालिङ्गकः ।

५२८ । **उद्यर्तेश्चित्** । उदरथिः समुद्रः ।

५२९ । **सर्तेर्णिच्च** । सारथिः ।

५३० । **खर्जिपिञ्जादिभ्य ऊरोलचौ** । खर्जरः । कर्पूरः । वल्लूरं शुष्कमांसम् । पिञ्जूलं कुशवर्तिः । 'लङ्गेर्वृद्धिश्च' (गण २०१) । लाङ्गूलम् । कुसूलः । 'तमेर्बुग्वृद्धिश्च' (गण २०२) । ताम्बूलम् । 'शृणातेर्दुग्वृद्धिश्च' (गण २०३) शार्दूलः । 'दुकोः कुक्च' (गण २०४) । दुकूलम् । कुकूलम् ।

कलि ॥ 'कलमः पुंसि लेखन्यां शालौ पाटच्चरेऽपि च' इति मेदिनी । **कुपेर्वा** ॥ 'कुप क्रोधे ।' अतः किन्दच् । वकारान्तादेशश्च वा । 'तन्तुवायः कुविन्दः स्यात्' इत्यमरः । बाहुलकात् 'अल भूषणादौ ।' अलिन्दः । 'यस्यामलिन्देषु न चक्रुरेव मुग्धाङ्गना गोमयगोमुखानि' इति माघः । प्रज्ञादित्वादणि दीर्घादिरप्ययम् । **निषङ्गथिरिति** ॥ 'चजोः' इति कुत्वम् । "आभुरस्य निषङ्गथिः ।" रथकूबर इत्यर्थः । **सर्तेः** ॥ 'नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः' इत्यमरः । **खर्जिपिञ्जादिभ्यः** ॥ 'खर्ज मार्जने' एवमादिभ्य ऊरः । 'पिञ्ज हिंसायाम्' । एवमादिभ्य ऊलच् । 'खर्जूरं रूप्यफलयोः खर्जूरः कीटवृक्षयोः' इति मेदिनीहेमचन्द्रौ । 'कृपू सामर्थ्ये ।' बाहुलकाल्लत्वाभावः । 'अथ कर्पूरमस्त्रियाम् । घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका' इत्यमरः । 'वल्ल संवरणे ।' वल्लूरम् । 'उत्तप्तं शुष्कमांसं स्यात्तद्वल्लूरं त्रिलिङ्गकम्' इत्यमरः । एवं शालूरमण्डूरादयः । 'भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः' इत्यमरः । 'अथ मण्डूरं 'शिङ्घाणमपि तन्मले' इति च । तन्मले तस्य पूर्वोक्तस्य लोहस्य मले इत्यर्थः । 'लाङ्गूलं पुच्छशेफसोः' इति मेदिनी । **कुसूल इति** ॥ 'कुस श्लेषणे ।' दन्त्यसकारवान् । 'कुसूलश्च कुसीदश्च मद्ध्यदन्त्यमुदाहृतम्' इति विश्वः । ताम्बूलादयोऽप्यत्र । 'तमु ग्लानौ ।' 'ताम्बूली नागवल्ल्यां स्त्री क्रमुके तु नपुंसकम्' इति मेदिनी । 'शृ हिंसायाम् ।' धातोर्वृद्धिः । दुगागमश्च । 'शार्दूलो राक्षसान्तरे । व्याघ्रे च पशुभेदे च सप्तमे तूत्तरस्थिते' इति मेदिनीविश्वप्रकाशौ । उत्तरस्थितमुत्तरपदम् । राजशार्दूल इति यथा । 'दु गतौ', 'कुङ् शब्दे' अनयोः कुक् च । 'दुकूलं श्लक्ष्णवस्त्रे स्यात्क्षौमे च' इति मेदिनी । 'कुकूलं शङ्कुसङ्कीर्णश्वभ्रे ना तु तुषानले' इति विश्वमेदिन्यौ । 'शिरीषादपि मृद्वङ्गी केयमायतलोचना । अयं क्वच

५३१। **कुवश्चट्दीर्घश्च**। कूची चित्रलेखनिका।

५३२। **समीणः**। समीचः समुद्रः। समीची हरिणी।

५३३। **सिवेष्टेरूः च**। सूचो दर्भाङ्कुरः। सूची।

५३४। **शमेर्बन्**। शम्बो मुसलम्।

५३५। **उल्बादयश्च**। बन्नन्ता निपात्यन्ते। 'उच समावाये'। चस्य लत्वं गुणाभावश्च। उल्बो गर्भाशयः। शुल्बं ताम्रम्। निम्बः। बिम्बम्।

५३६। **स्थः स्तोऽम्बजबकौ**। तिष्ठतेरम्बच् अबक एतौ स्तः स्तादेशश्च। 'स्तम्बो गुच्छस्तृणादिनः'। स्तबकः पुष्पगुच्छः।

५३७। **शाशपिभ्यां ददनौ**। 'शादो जम्बालशष्पयोः'। शब्दः।

५३८। **अब्दादयश्च**। अवतीत्यब्दः। 'कौतेर्नुम् (च)' (ग २०५)। कुन्दः।

५३९। **वलिमलितनिभ्यः कयन्**। वलयम्। मलयः। तनयः।

५४०। **वृहोः षुग्दुकौ च**। वृषय आश्रयः। हृदयम्।

५४१। **मिपीभ्यां रुः**। मेरुः। पेरुः सूर्यः। बाहुलकात्पिबतेरपि। 'संवत्सरवपुः पारुः पेरुर्वासीर्दिनप्रणीः'।

५४२। **जत्वादयश्च**। जत्रु। जत्रुणी। अश्रु। अश्रुणी।

कुकूलाग्निकर्कशो मदनानलः' इति प्रयोगश्च। **कुवश्चट् दीर्घश्च** ॥ कूचः स्तनः। 'कुचकूचौ स्तने मतौ' इति विश्वः। **कूचीति** ॥ टित्त्वान्ङीप्। **समीणः**॥ इणः सम्युपपदे चट् स्यात्। दीर्घत्वञ्च धातोः। **सिवेः** ॥ 'सूची तु सीवनद्रव्ये आङ्गिकाभिनयान्तरे' इति मेदिनी। **शमेः** ॥ 'शम्बः स्यान्मुसलाग्रस्थलोहमण्डलके पवौ। शुभान्विते त्रिषु' इति विश्वमेदिन्यौ। **उल्बादयश्च** ॥ 'गर्भाशयो जरायुः स्यादुल्बञ्च कललोऽस्त्रियाम्' इत्यमरः। **शुल्बमिति** ॥ 'शुच शोके।' लत्वादि प्राग्वत्। 'शुल्बे ताम्रे यज्ञकर्मण्याचारे जलसन्निधौ' इति मेदिनी-हेमचन्द्रौ। वेतेर्नुमागमो ह्रस्वत्वञ्च। 'बिम्बस्तु प्रतिबिम्बे स्यात् मण्डले पुन्नपुंसकम्। बिम्बिकायाः फले क्लीबं कृकलासे पुनः पुमान्' इति मेदिनी। **स्थः स्तः**॥ 'स्तम्बो गुल्मे तृणादीनामप्रकाण्डद्रुमेऽपि च' इति विश्वः। 'स्तम्बोऽप्रकाण्डद्रुमगुच्छयोः' इति मेदिनी। 'स्यात् गुच्छकस्तु स्तबकः' इत्यमरः। **शाशपि** ॥ 'शादः स्यात् कर्दमे शष्पे' इति मेदिनी। 'अब्दः संवत्सरे वारिवाहमुस्तकयोः पुमान्। कुन्दो माध्येऽस्त्री मुकुन्दभ्रमिनिध्यन्तरेषु ना' इति च। **वलिमलि** ॥ 'वलयः कण्ठरोगे ना कङ्कणे पुन्नपुंसकम्' इति मेदिनी। 'मलयः पर्वतान्तरे। शैलांशे देश आरामे त्रिवृतायान्तु योषिति' इति च। 'आत्मजस्तनयः सूनुः सुतः पुत्रः' इत्यमरः। **वृहोः** ॥ ह्रियते विषयैः हृदयम्। हृद्दन्द्रोक्तिमाह। **संवत्सरेत्यादि** ॥ **जत्वादयश्च** ॥ रुप्रत्ययान्ता निपात्यन्ते। 'जनी प्रादुर्भावे।' नकारस्य तकारः।

५४३ । **रुशातिभ्यां क्नुन्** । रुरुर्मृगभेदः । शातयतीति शत्रुः । प्रज्ञादौ पाठाद्ध्रस्वत्वम् ।

५४४ । **जनिदाच्युसृवृमदिषमिनमिभृञ्भ्य इत्वन्त्वन्त्वाण्क्रन्शक्स्यढड-टाटचः** । जनित्वौ मातापितरौ । दात्वो दाता । च्यौत्नो गन्ताण्डजः क्षीण-पुण्यश्च । सृणिरङ्कुशश्चन्द्रः सूर्यो वायुश्च । वृश आर्द्रकं मूलकं च । मत्स्यः । षण्ढः । डित्त्वाट्टिलोपः । नमतीति नटः शैलूषः । बिभर्ति भरटः कुलालो भृतकश्च ।

५४५ । **अन्येभ्योऽपि दृश्यन्ते** । पेत्वममृतम् । भृशम् ।

५४६ । **कुसेरुम्भोमेदेताः** । कुसुम्भम् । कुसुमम् । कुसीदम् । कुसितो जनपदः ।

५४७ । **सानसिवर्णसिपर्णसितण्डुलाङ्कुशचपालेवलपल्वलधिष्ण्य-शल्याः** । सनोतेरसिप्रत्यय उपधावृद्धिः । सानसिर्हरण्यम् । वृञो नुक्च । वर्णसिर्जलम् । पॄ । पर्णसिर्जलगृहम् । 'तड आघाते' । तण्डुलाः । अकि

जत्रु स्कन्धसन्धिः । 'सन्धी तस्यैव जत्रुणी' इत्यमरः । तस्य पूर्वोक्तस्य स्कन्धस्य सन्धी इत्यर्थः । **रुशातिभ्याम्** ॥ 'रुरुर्दैत्ये मृगेऽपि च' इति मेदिनी । **जनिदा** ॥ नवभ्यो यथासङ्ख्यं नव स्युः । जनेरित्वन् इकारोच्चारणमुत्तरार्थम् । जनेरिट्टा सिद्धत्वात् । **सृणिरिति** ॥ नित्स्वरेणाद्युदात्तोऽयम् । 'सृवृषिभ्याङ्कित्' इति निप्रत्यये त्वन्तोदात्तः । **मत्स्य इति** ॥ अन्तोदात्तोऽयम् । 'ऋतन्यञ्जि' इति सूत्रे तु आद्युदात्तः साधितः । **षण्ढ इति** ॥ 'षम ष्टम वैकल्ये ।' बाहुलकात्सत्वाभावः । 'शमो ढः' इति सूत्रे तु तालव्यादिः साधितः । 'सायं सायो भवेत्कोषः कोशः षण्ढश्च शण्ढवत्' इति द्विरूपकोशः । कैयटस्तु 'ठस्येकः' इति सूत्रे शण्ढ इति प्रतीकमुपादाय, 'जनिदाच्यसृ' इत्यनेन ढप्रत्यये शण्ढ इत्याह । 'नटी नीलौषधौ स्त्री स्यात् शैलूषाशोकयोः पुमान्' इति मेदिनी । **अन्येभ्योऽपि दृश्यन्ते** ॥ इत्वन्नादयो-ऽनुवर्तन्ते । **कुसेः** ॥ 'कुस श्लेषणे ।' 'कुसुम्भं हेमनि महाराजते ना कमण्डलौ' इति मेदिनी । 'कुसुमं स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः' इति च । 'कुसीदं जीवने वृद्ध्या क्लीबं त्रिषु कुसीदके' इति च । इह सूत्रे तृतीयो ह्रस्वादिर्दीर्घादिश्च तन्त्रेणोपात्तः । 'वृषाकप्यग्नि' इति सूत्रे ह्रस्व एवेति वृत्तिकारहरदत्तादिप्रयोगोपष्टम्भेन निर्णीतम् । 'पारलौकिककुसीदकमासीत्' इति श्रीहर्षः । उक्तश्च 'गाण्ड्यजगात्' इति सूत्रे ह्रस्वदीर्घयोस्तन्त्रेण निर्देशो वामनेनेति दिक् । उज्ज्वलदत्तमतेनाह । **वृञो नुक्चेति** ॥ दशपाद्यान्तु सानसिधर्णसीति पठित्वा वृञो नुक् च, धर्णसिर्लोकपालः इति व्याख्यातम् । युक्तञ्चैतत् । धर्णसिम्भूरिधायसमित्यादि-दर्शनात् । **तण्डुला इति** ॥ उलच्प्रत्ययः, नुगागमः । 'त्रेधा तण्डुलान् विभजेत् ।' चित्स्वरः ।

लक्षणे उशच्। अङ्कुशः। 'चषेरालः। चषालो यूपकटकः'। इल्वलो दैत्यभेदः। पल्वलम्। ञिधृषा ण्यः। ऋकारस्येकारः। धिष्ण्यम्। शलेर्यः। शल्यम्। 'वा पुंसि शल्यं शङ्कुर्ना'।

५४८। **मूशक्यबिभ्यः क्कः**। मूलम्। शङ्कः प्रियंवदे। अम्बलो रसः। बाहुलकादमेः। अम्लः।

५४९। **माछाससिभ्यो यः**। माया। छाया। सस्यम्। बाहुलकात्सुनोतेः। 'सव्यं दक्षिणवामयोः।

५५०। **जनेर्यक्**। 'ये विभाषा' (सू २३१९)। जन्यं युद्धम्। जाया भार्या।

५५१। **अघ्न्यादयश्च**। यगन्ता निपात्यन्ते। हन्तेर्यक् अडागम उपधालोपश्च।

'तण्डुलः स्याद्विगण्डे च धान्यादिनिकरे पुमान्' इति मेदिनी। **अंकुश इति** ॥ अयमपि चित्स्वरेणान्तोदात्तः। तथा च मन्त्रः। दीर्घं ह्यङ्कुशं पथेति ॥ **चषेराल इति** ॥ प्रत्ययस्वरेणाद्युदात्तः। उज्ज्वलदत्तादयस्तु आलच् इति चितमाहुः। तन्न। 'चषालं ये अश्वयूपाय तक्षति। चषालवन्तस्तरवः पृथिव्याम्' इत्यादौ चित्स्वरादर्शनात्। अमरोक्तिमाह। **चषाल इति** ॥ **इल्वल इति** ॥ 'इल स्वप्नप्रेरणयोः।' वलच् गुणाभावः। 'इल्वला तारकाभेदे ना भेदे दैत्यमत्स्ययोः' इति मेदिनी। 'इल्वलाः तच्छिरोदेशे तारका निवसन्ति याः' इत्यमरः। तत्र 'इल्वकाः' इति पाठान्तरम्। तच्च 'इवि प्रीणने' 'अस्मात् क्वुन् शिल्पिसंज्ञयोः' इति क्वुनि बोध्यम्। पिबतेर्वलच्। लुगागमः। ह्रस्वत्वञ्च। पिबन्त्यस्मिन् इति पल्वलम्। अल्पसरः। 'वेशन्तः पल्वलञ्चाल्पसरः' इत्यमरः। **इकार इति** ॥ रपरत्वाभावो ण्यप्रत्ययश्चेति बोध्यम्। 'धिष्ण्यं स्थाने गृहे भेऽग्नौ' इत्यमरः। 'धिष्ण्यं स्थानाग्निसद्मसु। ऋक्षे शक्तौ च' इति मेदिनी। 'धिष्ण्यं स्थाने च ऋक्षे चाग्नौ धिष्ण्यो नालये' इति धरणिः। **शलेरिति** ॥ 'शल्ये तु न स्त्रियां शङ्कौ क्लीबं क्ष्वेडेषुतोमरे। मदनद्रुश्वाविधोर्ना' इति मेदिनी। **मूशक्य** ॥ 'मूङ् बन्धने।' 'शक्ल शक्तौ।' 'अबि शब्दे।' 'मूलं शिफाघयोः। मूलं वित्तेऽन्तिके' इति मेदिनी। 'शङ्कः प्रियंवदः' इति विशेष्यनिघ्नेऽमरः। 'अम्लो रसविशेषे स्यादम्ला चाङ्गेरिकौषधौ' इति मेदिनी। **माछा** ॥ 'माया स्याच्छाम्बरीबुद्ध्योर्मायः पीताम्बरेऽसुरे' इति मेदिनी। 'छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः। पालनोत्कोचयोः कान्तिसच्छोभापङ्क्तिषु स्त्रियाम्' इति विश्वमेदिन्यौ। 'वृक्षादीनां फलं सस्यम्' इत्यमरः। 'सव्यं वामे प्रतीपे च' इति मेदिनी। **जनेर्यक्** ॥ 'जन्यं हट्टे परीवादे सङ्गामे च नपुंसकम्। जन्या मातृवयस्यायाञ्जन्यः स्याज्जनके पुमान्। त्रिषूत्पाद्यजनित्रोश्च नवोढाज्ञातिभृत्ययोः। वरस्निग्धे' इति मेदिनी। **अघ्न्यादयश्च** ॥ कौतेर्यतिर्डुक् कुज्यमित्युज्ज्वलदत्तादयः। 'यतोऽनावः' इत्याद्युदात्तः। ज्यक्प्रत्ययोऽन्तोदात्त इत्यन्ये इति, 'निवाते वातत्राणे' इति सूत्रे वृत्तिः। गुणप्रतिषेधार्थात्ककारात् डकारस्येत्त्वं नेति तत्रैव हरदत्तः। एवं स्थिते यगन्ता इति प्रायोवादः। **अडागम इति** ॥ नञ्पूर्वाद्धन्तेर्यगिति वा बोध्यम्।

अघ्न्या माहेयी । अघ्न्यः प्रजापतिः । 'कनी दीप्तौ' । कन्या । बवयोरैक्यम् । वन्ध्या ।

५५२ । **स्नामदिपद्यर्तिपृशकिभ्यो वनिप्** । स्नावा रसिकः । मद्वा शिवः । पद्वा पन्थाः । 'अर्वा तुरङ्गगर्ह्ययोः' । पर्व ग्रन्थिः प्रस्तावश्च । शक्वा हस्ती । ङीत्रौ । शकरी अङ्गुलिः ।

५५३ । **शीङ्कुशिरुहिजिक्षिसृधृभ्यः कनिप्** । शीवा अजगरः । क्रुश्वा सृगालः । रुह्वा वृक्षः । जित्वा जेता । क्षित्वा वायुः । सृत्वा प्रजापतिः । धृत्वा विष्णुः ।

५५४ । **ध्याप्योः संप्रसारणं च** । धीवा कर्मकरः । पीवा स्थूलः ।

५५५ । **अदेर्घ च** । अध्वा ।

५५६ । **प्र ईरशदोस्तुट् च** । प्रेत्वा प्रशत्त्वा च सागरः । प्रेत्वरी प्रशत्त्वरी च नदी ।

५५७ । **सर्वधातुभ्य इन्** । पचिरग्निः । तुडिः । तुण्डिः । वलिः । वटिः । यजिः । देवयजिः । काशत इति काशिः । यतिः । मल्लिः । मल्ली । केलिः । 'मसी परिणामे ।' मसिः । बाहुलकादुणः । कोटिः । हेलिः । बोधिः । नन्दिः । कलिः ।

अघ्न्या इति ॥ यत्तु 'अघ्न्यस्य मूर्द्धनि' इति मन्त्रे वेदभाष्यकारैरुक्तम् । 'हन्तुमशक्योऽघ्न्यः पर्वतः' इति तत् प्रकृतसूत्रमभिप्रेत्यैव । यत्तु अहननमघ्नः तमर्हतीत्यर्थे 'छन्दसि च' इति य इति तत्रैवोक्तम्, तदुपायान्तरपरतया बोध्यम् । 'माहेयी सौरभेयी गौरुक्षा माहा च शृङ्गिणी । अर्जुन्यघ्न्या रोहिणी स्यात्' इत्यमरः । सम्पूर्वाद्धाञो यक् । आतो लोपश्च । 'सन्ध्या पितृप्रसूनद्यौश्चिन्तामर्यादयोरपि । प्रज्ञायां च सन्ध्याने सन्ध्या च कुसुमान्तरे' इति विश्वः । 'सन्ध्या पितृप्रसूनद्यन्तरयोर्युगसन्धिषु' इति मेदिनी । 'सन्ध्या कुमारिका नार्यौषधीराशिभेदयोः' इति विश्वमेदिन्यौ । **वन्ध्येति** ॥ 'बन्ध बन्धने ।' 'वन्ध्यस्त्वफलवृक्षादौ स्त्रियां स्यादप्रजःस्त्रियाम्' इति मेदिनी । **स्नामदि** ॥ 'अर्वा तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गके' इति मेदिनी । 'पर्व क्लीबं महे ग्रन्थौ प्रबले लक्षणान्तरे । दर्शप्रतिपदोः सन्धौ विषुवत्प्रभृतिष्वपि' इति च । **अंगुलिरिति** ॥ एतच्च 'आरोहतन्दशतं शक्करीर्मम' इत्यादिमन्त्रव्याख्यायां स्पष्टम् । 'शक्करी च्छन्दसो भेदे नदीमेखलयोरपि' इति मेदिनी । **सर्वधातुभ्य इन्** ॥ **यतिरिति** ॥ 'यती प्रयत्ने ।' 'यतिः स्त्री पाठविच्छेदे निकारयतिनोः पुमान्' इति मेदिनी । 'कोटिः स्त्री धनुषोऽग्रेऽश्रौ सङ्ख्याभेदप्रकर्षयोः । बोधिः पुंसि समाधेश्च भेदे पिप्पलपादपे । नन्दिर्धूताङ्ग आनन्दे स्त्री नन्दिकेश्वरे पुमान् । कलिः स्त्री कलिकायां ना शूराजिकलहे

५५८। **हृषिषिरुहिवृतिविदिछिदिकीर्तिभ्यश्च**। हरिर्विष्णावहाविन्द्रे भेके सिंहे हये रवौ। चन्द्रे कीले प्लवङ्गे च यमे वाते च कीर्तितः। पेषिर्वज्रम्। रोहिर्व्रतती। वर्तिः। वेदिः। छेदिश्छेत्ता। कीर्तिः।

५५९। **इगुपधात्कित्**। कृषिः। ऋषिः। शुचिः। लिपिः। बाहुलकाद्वृत्वे लिबिः। तूल निष्कर्षे। तूलिः। तूली। कूर्चिका।

५६०। **भ्रमेः संप्रसारणं च**। भृमिर्वातः। बाहुलकाद्भ्रमिः।

५६१। **क्रमितमिशतिस्तम्भामत इच्च**। क्रिमिः। संप्रसारणानुवृत्तेः कृमिरपि। तिमिर्मत्स्यभेदः। शितिर्मेचकशुक्लयोः। स्तिम्भिः समुद्रः।

५६२। **मनेरुच्च**। मुनिः।

युगे' इति च। इह इन्नित्येव सूत्रम्। अधिकन्तु प्रक्षिप्तं व्यर्थञ्च। एवं 'सर्वधातुभ्यष्ट्रन्' इत्यादावपि। अत एव दशपाद्यामिन्नित्येव पठितमिति दिक्। **हृषिषि** ॥ हरतेः कीर्तयतेश्च 'अच इः' इति प्राप्ते इतरेषां तु 'इगुपधात्' इति कित्त्वे प्राप्ते वचनम्। 'हरिश्चन्द्रार्कवाताश्वशुकभेकयमाहिषु। कपौ सिंहे हरेऽर्जेऽशौ शक्रे लोकान्तरे पुमान्। वाच्यवल्लिङ्गहरितोः' इति मेदिनी। 'वर्तिर्भेषजनिर्माणे नयनाञ्जनलेखयोः। मात्रानुलेपनीदीपदशादीपेषु योषिति। वेदिः स्यात्पण्डिते पुमान्। स्त्रियामङ्गुलिमुद्रायां स्यात्परिष्कृतभूतले' इति च। 'कीर्तिः प्रसादयशसोर्विकारे कर्दमेऽपि च' इति विश्वः। 'सा रसवत्ता विगता नवका विलसन्ति चरति नो कङ्कः। सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये' इति कविप्रयोगः। **इगुपधात्कित्** ॥ इनः कित्त्वं विधीयते। केचित्तु किरिति पठित्वा इनोऽपवादः किप्रत्यय इत्याहुः। तन्न। प्रत्ययस्वरेण प्रातिपदिकानामन्तोदात्ततापत्तेः। न चेष्टापत्तिः। 'अग्निः पूर्वेभिर्ऋषिभिः। ऋषिर्विप्रः काव्येन। शुचिर्विप्रः शुचिः कविः' इत्यादौ ऋषिशुचिप्रभृतीनामाद्युदात्तत्वदर्शनात्। कथं तर्हि 'अक्षैर्मा दिव्य कृषिमित्कृषस्व' इत्यादौ कृषिशब्दस्यान्तोदात्ततेति चेत्। 'इक् कृष्यादिभ्यः' इतीक्प्रत्यये सतीति गृहाण। 'ऋषिर्वेदे वसिष्ठादौ दीधितौ च पुमानयम्। शुचिर्ग्रीष्माग्निशृङ्गारेष्वौषधे शुद्धमन्त्रिणि' इति मेदिनी। यत्तु माधवेन 'अग्निः पूर्वेभिरित्यृग्व्याख्यावसरे ऋषिशब्दस्येत्प्रत्ययान्तत्वमङ्गीकृत्य, 'ऋष्यन्धक' इति निपातनाल्लघूपधगुणाभाव इत्युक्तं तत्प्रकृतसूत्रविस्मरणमूलकत्वादुपेक्ष्यम्। **भ्रमेः** ॥ 'भृमिं विद्यथावसवोऽजुषन्त' इति मन्त्रे भृमिं भ्रमणशीलन्दरिद्रञ्जनमिति वेदभाष्यम्। **क्रमितमि** ॥ 'क्रमु पादविक्षेपे।' 'कृमिर्ना क्रिमिवत्कीटे लाक्षायां क्रिमिले खरे' इति विश्वमेदिन्यौ। 'पारतं पारदं वाऽस्त्री वासरः क्रिमिवत्कृमिः' इति द्विरूपकोशः। **तिमिरिति** ॥ 'तमु काङ्क्षायाम्।' 'अस्ति मत्स्यस्तिमिर्नाम तथा चास्ति तिमिङ्गिलः। तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति लक्ष्मण' इति रामायणे सप्तमे काण्डे रामवाक्यम्। 'शितिः कृष्णेऽसिते भूर्जे' इति विश्वः। 'शितिर्भूर्जे ना रसितासितयोस्त्रिषु' इति मेदिनी। **मनेरुच्च** ॥ 'मुनिः पुंसि वसिष्ठादौ बङ्गसेनतरौ जिने' इति मेदिनी।

५६३ । **वर्णेर्बलिश्चाहिरण्ये** । वर्णिः सौत्रः । अस्य बलिरादेशः । करोपहारयोः पुंसि बलिः प्राण्यङ्गके स्त्रियाम् । वबयोरैक्यात् वलिः । हिरण्ये तु वर्णिः सुवर्णम् ।

५६४ । **वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्** । वासिश्छेदनवस्तुनि । वापिः । वापी । याजिर्यष्टा । राजिः । राजी । व्राजिर्वीतालिः । सादिः सारथिः । निघातिर्लोहघातिनी । वाशिरग्निः । वादिर्विद्वान् । वारिर्गजबन्धनी । जले तु क्लीबम् । बाहुलकाद्वारिः पथिकसंहतौ ।

५६५ । **नहो भश्च** । नाभिः स्यात्क्षत्रिये पुंसि । प्राण्यङ्गे तु स्त्रियाम् । पुंस्यपीति केचित् ।

५६६ । **कृषेर्वृद्धिश्छन्दसि** । कार्षिः ।

५६७ । **श्रः शकुनौ** । शारिः शारिका ।

५६८ । **कृञ उदीचां कारुषु** । कारिः शिल्पी ।

५६९ । **जनिघसिभ्यामिण्** । जनिर्जननम् । घासिर्भक्ष्यमग्निश्च ।

वर्णेः ॥ वलिर्दैत्यप्रभेदे च करचामरदण्डयोः । उपदायां पुमान् स्त्री तु जरया श्लथचर्मणि । गृहदाहप्रभेदे च जठरावयवेऽपि च' इति मेदिनी । **वासि** ॥ एभ्यो दशभ्य इञ्स्यात् । **वाशिरिति** ॥ दन्त्यसः । सूत्रे अष्टमस्तु तालव्यशः । द्वयमपि च्छेदनसाधने प्रयुज्यते । वास्यादीनामिव करणानाङ्कर्तृव्यापार्यत्वनियमादिति वैशेषिकाः । वास्यर्थमित्यत्र 'स्कोः' इति सलोपः प्राप्नोतीति भाष्यम् । 'वार्शीमन्य अष्ठिमन्तो मनीषिणः' इति मन्त्रः । 'राजिः स्त्री पङ्क्तिरेखयोः' इति मेदिनी । इह वादीति ण्यन्तो निर्दिष्टः । बाहुलकादण्यन्तादपि । तथा च भूवादिसूत्रे 'वदन्तीति वादयो वाचकाः' इति न्यासकारादयः । 'वारिर्वार्गजबन्धयोः स्त्री क्लीबेऽम्बुनि वालके । वारी स्याद्गजबन्धन्याङ्कलश्यामपि योषिति' इति च । 'वारिः स्मृता सरस्वत्यां वारिह्वीभेदनीरयोः । वारी घटीभबन्धन्योः' इति विश्वः । 'हारिः पथिकसन्तानवृतादिभङ्गयोः स्त्रियाम्' इति मेदिनी । खटतेः खाटिः । 'खाटिस्त्वसङ्गहेऽपि स्यात् किणे शवरथे स्त्रियाम्' इति मेदिनी । **नहो भश्च** ॥ **स्त्रियामिति** ॥ लिङ्गानुशासने स्त्रियामित्यधिकारे नाभिरक्षत्रिय इति सूत्रितत्वादिति भावः । **केचिदिति** ॥ तथा च मेदिनी । 'नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात् स्त्रियाङ्कस्तूरिकामदे' इति । भारविश्च प्रायुङ्क । 'समुल्लसत्पङ्कजकोशकोमलैरुपाकृतश्रीण्युपनीवि नाभिभिः' इति । **श्रः** ॥ 'शारिर्नाक्षोपकरणे स्त्रियां शकुनिकान्तरे । युद्धार्थगजपर्याणे व्यवहारान्तरेऽपि च' इति मेदिनी । कपिलकादित्वाल्लत्वम् । शालिस्तु कलमादौ च गन्धमार्जारके पुमान्' इति मेदिनी । **कृञः** ॥ 'कारिः स्त्रियां क्रियायां स्याद्वाच्यलिङ्गस्तु शिल्पिनि' इति मेदिनी । **जनिघसिभ्यामिण्** ॥ प्रत्ययान्तरकरणं स्वरार्थम् । यच्च घासिञ्जघास । आजिघ्र जग्मुः सुकृतोतमर्णः' इत्यादौ घास्याजिपाणिप्रभृतीनामन्तोदात्तत्वात् । जनिरिति स्त्रीलिङ्गम् । 'कृदिकारात्' इति पक्षे ङीष् । 'जनी

५७०। **अज्यतिभ्यां च**। आजिः संग्रामः। आतिः पक्षी।

५७१। **पादे च**। पदाजिः। पदातिः।

५७२। **अशिपणाय्यो रुडायलुकौ च**। अशेरुट्। राशिः पुञ्जः। पणायतेरायलुक्। पाणिः करः।

५७३। **वातेर्डिच्च**। विः पक्षी। स्त्रियां वीत्यपि।

५७४। **प्रे हरतेः कूपे**। प्रहिः कुपः।

५७५। **नौ व्यो यलोपः पूर्वस्य च दीर्घः**। व्येव इण् स्याद् यलोपश्च नेर्दीर्घः। नीविः नीवी। वस्त्रग्रन्थौ मूलधने च।

५७६। **समाने ख्यः स चोदात्तः**। समानशब्दे उपपदे ख्या इत्यस्मादिण् स्यात् स च डिच्च यलोपश्च। समानस्य तूदात्तः स इत्यादेशश्च। समानं ख्यायते जनैरिति सखा।

सीमन्तिनीवध्वोरुत्पत्तावोषधीभिदि' इति मेदिनी। 'आजिः सभावनौ युद्धे' इति विश्वः। 'शरारिराजिराटिश्च' इत्यमरः। **पादे च** ॥ पादे उपपदे अज्यतिभ्यामिण्। 'पादस्य पदाज्यातिगोपहतेषु' इति पदादेशः। अत एव निर्देशात् बाहुलकादजेर्वीभावो न। 'पदातिपत्तिपदगपादातिकपदाजयः। पद्मश्च पदिकश्च' इत्यमरः। **अशि** ॥ 'राशिर्मेषादिपुञ्जयोः' इति मेदिनी। **प्रे** ॥ 'पुंस्येवान्धुः प्रहिः कूप उदपानन्तु पुंसि वा' इत्यमरः। **नौ** ॥ 'स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च' इत्यमरः। परिपणं मूलधनम्। **समाने** ॥ **इण् स्यादिति** ॥ यत्तूज्ज्वलदत्तेनोक्तम्। इञ् स्यात् स चोदात्त इतीति। तन्न। इणः सन्निधानात् इञो विच्छिन्नत्वात्। यदपि तेनैव नौव्य इति पूर्वसूत्रे उक्तम्। इञेवात्रानुवर्तते, न त्विण्। उत्तरत्रोदात्तवचनाज्ज्ञापकादिति। तदपि न, स चोदात्त इति हि नायं प्रत्ययं निर्देष्टुं तच्छब्दः, किं तु समानशब्दस्य स्थाने विधेयं निर्देष्टुं शब्दस्वरूपपरः। तथा च कथं ज्ञापकता। यदपि स इञिति व्याख्याय समानस्य सभाव इति प्रक्रियास्मरणमात्रङ्कृतम्। तदपि न। विधायकाभावात्। यदपि स्वरमञ्जरीकारादिभिः 'समानस्य छन्दसि' इति सूत्रेणेत्युक्तं तदपि न। लोके सखिशब्दस्यासाधुतापत्तेः। अपि च—'सखा सखायमब्रवीत्। सखा सख्ये अयचत्। सखायस्त्वा ववृमहे। सखा सखिभ्य ईड्यः।' इत्यादिमन्त्रेषु सर्वत्र सखिशब्द आद्युदात्त एवेति निर्विवादम्। एवञ्च इञ् उदात्त इति व्याख्यानं वेदवार्तानभिज्ञत्वप्रयुक्तमेव। तथा च ज्ञापकोपन्यासोऽपि गर्भस्रावेणैव गतः। अपि च। त्वत्पक्षे 'सख्य इण्' इत्येव सूत्र्यतां, किं स चेत्यादिना, शब्दतोऽर्थतश्च गौरवप्रसङ्गात्। अपि च। इणित्यपि मास्तु। नौव्य इत्यादित्रिसूत्री जनिघसिभ्यामित्यतः प्रागेव उपेयताम्। एवं हि महदेव लाघवम्। स चोदात्त इति मण्डूकप्लुतौ ज्ञापकख्यानाश्रयणात्। ननु 'वातेर्डिच्च' इति डित्त्वोपजीवनार्थमित्थं पाठ इति चेत्। तर्हीण्प्रकरणानन्तरमेव इञ्प्रकरणं सर्वत्रास्तु। नौव्य इति सूत्रे इञ् पठ्यताम्। आङि

५७७। **आङि श्रिहनिभ्यां ह्रस्वश्च** । इण् स्यात्स च डित् आङो ह्रस्वश्च । स्रियः पाल्यश्रिकोटयः । सर्पे वृत्रासुरेऽप्यहिः ।

५७८। **अच इः** । रविः । पविः । तरिः । कविः । अरिः । अलिः ।

५७९। **खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचलिभ्यश्च** । खनिः । कषिर्हिंस्रः । अजिः । असिः । वसिर्वस्त्रम् । वनिरग्निः । सनिर्भक्तिर्दानं च । ध्वनिः । ग्रन्थिः । चलिः पशुः ।

५८०। **वृतेश्छन्दसि** । वर्तिः ।

५८१। **भुजेः किच्च** । भुजिः ।

५८२। **कृगृशृपृकुटिभिदिछिदिभ्यश्च** । इः कित्स्यात् । किरिर्वराहः । गिरिर्गोत्राद्रिरोगयोः । गिरिणा काणः गिरिकाणः । शिरिः शलभो हन्ता च । पुरिर्नगरं राजा नदी च । कुटिः शाला शरीरं च । भिदिर्वज्रम् । छिदिः परशुः ।

श्रीत्यस्यानन्तरं वसिवपीत्यादि पठ्यताम् । इञ् चानुवर्तिष्यते, न तु डित्त्वम् । वकाराद्यनेकधातुपाठवैयर्थ्यापत्तेरिति दिक् । तस्मादस्य उक्तैव व्याख्या सुधीभिरादर्तव्या । दशपादीवृत्तिग्रन्थाः, ख्याधातौ माधवग्रन्थः, 'यस्ते सखिभ्य आवरम्" इत्यादीन् मन्त्रान् व्याचक्षाणानां वेदभाष्यकृतामनेकप्रघट्टकस्थिता ग्रन्थाश्चेहानुकूला इत्यवधेयम् । अग्निः कोणः । अमरोक्तिमाह । **स्त्रिय इति** ॥ एवञ्च 'सुप्रातसुश्र' इति सूत्रे चतुरश्रेति तालव्यपाठ एव । केषाञ्चिद्दन्त्यपाठस्तु एतत्सूत्रानालोचनमूलक इत्यवधेयम् । न चैतावता चतुरस्रमिति दन्त्यप्रयोगोऽशुद्ध इति भ्रमितव्यम् । अकारान्तेन दन्त्यगर्भेणास्रशब्देन विग्रहे तत्सौष्ठवात् । न च तादृशशब्देऽपि विप्रतिपत्तव्यम् । 'अस्रः कोणे कचे पुंसि क्लीबमश्रुणि शोणिते' इति मेदिनीकोशात् । 'अहिर्वृत्रासुरे सर्पे' इति मेदिनी । **अच इः** ॥ 'कुङ् शब्दे ।' 'कविर्वाल्मीकिशुक्रयोः । सूरौ काव्यकरे पुंसि स्यात् खलीने तु योषिति' इति मेदिनी । **खनिकष्य** ॥ 'खनिः स्त्रियामाकरः स्यात्' इत्यमरः । ण्यन्तात् 'अच इः' इतीप्रत्यये खानिरपि । 'खनिरेवं मता खानिः' इति द्विरूपकोशः । 'ग्रन्थिस्तु ग्रन्थिपर्णे ना बन्ध रुग्भेदपर्वणोः' इति मेदिनी । **वृतेश्छन्दसि** ॥ बाहुलकाल्लोकेऽपि । 'वर्त्तिर्भेषजनिर्माणे नयनाञ्जनलेखयोः । गात्रानुलेपनीदीपदशादीपेषु योषिति' इति मेदिनी । **कृगृ** ॥ यत्तु 'न पदान्त' इति सूत्रे न्यासकारहरदत्ताभ्यां किर्योर्गिर्योरित्यत्र 'कृग्रोरिकच' इत्युपन्यस्तम् । तत् क्वचिदुणादिवृत्तिषु अन्वेषणीयम् । कुर्वोः गुर्वोः । 'कृग्रोरुकच' इति वा पाठः शोधनीयः । 'वराहः सूकरो गृष्टिः कोलः पोत्री किरिः किटिः' इत्यमरः । 'ह्रगुपधज्ञाग्री' इति कप्रत्यये किरोऽपि । 'स्यात्किरौ किरः प्रोक्तः पथः पथि' इति द्विरूपकोशः । 'गिरिर्नो नेत्ररुग्भिदि । अद्रौ गिरिजके योषिद्गीर्णे पूज्ये पुनस्त्रिषु' इति मेदिनी । **कुटिरिति** ॥ ङीषि तु कुटी । 'कुटः कीटे पुमानस्त्री घटे स्त्रीपुंसयोर्गृहे । कुटी स्यात्कुम्भदास्याञ्च सुरायां

५८३। **कुडिकम्योर्नलोपश्च**। कुडि दाहे। कुडिर्देहः। कपिः।

५८४। **सर्वधातुभ्यो मनिन्**। क्रियत इति कर्म। चर्म। भस्म। जन्म। शर्म। स्थाम बलम्। इस्मन्निति ह्रस्वः। छद्म। सुत्रामा।

५८५। **बृहेर्नोच्च**। नकारस्याकारः। ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिः

५८६। **अशिशकिभ्यां छन्दसि**। अश्मा। शक्मा।

५८७। **हृभृधृसृस्तृशृभ्य इमनिच्**। हरिमा कालः। भरिमा कुटुम्बम्। धरिमा रूपम्। सरिमा वायुः। स्तरिमा तल्पम्। शरिमा प्रसवः।

५८८। **जनिमृङ्भ्यामिमनिन्**। जनिमा जन्म। मरिमा मृत्युः।

५८९। **वेञः सर्वत्र**। छन्दसि भाषायां चेत्यर्थः। वेमा तन्तुवायदण्डः। अर्धर्चादिः। सामनी वेमनी इति वृत्तिः।

५९०। **नामन् सीमन् व्योमन् रोमन् लोमन् पाप्मन् धामन्**[1]। सर्वे सप्त अमी निपात्यन्ते। म्नायतेऽनेनेति नाम। सिनोतेर्दीर्घः। सीमा। सीमानौ। सीमानः। पक्षे डाप्। सीमे। सीमाः। व्येञोऽन्त्यस्योत्वं गुणः। व्योम। रौतेः। रोम। लोमा पाप्मा पापम्। धाम परिमाणं तेजश्च।

चित्रगुच्छके' इति मेदिनी। 'कपिर्ना सिह्लके शाखामृगे च मधुसूदने' इति च। **सर्वधातुभ्यः** ॥ कर्म व्याप्ये क्रियायाञ्च पुन्नपुंसकयोर्मतम्' इति रुद्रः। 'चर्म कृत्तौ च फलके' इति मेदिनी। **बृहेः** ॥ 'ब्रह्म तत्त्वतपोवेदे न द्वयोः पुंसि वेधसि। ऋत्विग्योगभिदोर्विप्रे' इति मेदिनी। **अशमेति** ॥ भाषायामपीष्यते। छन्दसीति तु शकिनैवान्वेति। **हृभृ** ॥ **शरिमेति** ॥ 'शॄ हिंसायाम्।' एतच्चोज्ज्वलदत्तरीत्योक्तम्। दशपाद्यान्तु शॄणातिर्नेष्यते। तत्स्थाने सॄः प्रत्ययश्च दीर्घादिर्निच्च 'स्तृभृसृभ्य ईमन्' इति छन्दोग्रहणञ्चानुवर्तितम्। युक्तञ्चैतत्। 'पिपृतान्नो भरीमभिः। वातस्य सर्गो अभवत्सरीमणि। स्तीर्णं बर्हिः सुष्टरीमा जुषाणा। यस्यामतिर्भा अदिद्युतत्सवीमनिहिरण्यपाणिः।' इत्यादिमन्त्राणां तद्ग्राह्यस्य चानुगुणत्वादुक्तप्रयोगाणां भाषायामदर्शनेन छन्दोऽनुवृत्तेर्न्याय्यत्वाच्च। अत एव 'वेञः सर्वत्र' इति सूत्रे सर्वत्रग्रहणं करिष्यति। **नामन् सीमन्** ॥ **सर्वे इति** ॥ मनिनन्ता इति शेषः। **नामेति** ॥ 'म्ना अभ्यासे' मलोपः। **सीमेति** ॥ 'सीमसीमे स्त्रियामुभे' इत्यमरः। **पाप्मेति** ॥ पिबतेः पुमागमः। बाहुलकादन्यतोऽपि। 'यक्ष पूजायाम्।' 'क्षयः शोषश्च यक्ष्मा च' इत्यमरः। 'घू प्रेरणे।' सोमा चन्द्रः। 'डु धाञ्।' 'धाम देहे गृहे रश्मौ स्थाने

---

१. ध्यामन् इति क्वचित्पाठः।

५९१ । **मिथुने मनिः** । उपसर्गक्रियासंबन्धो मिथुनम् । न तु स्त्रीपुंसौ । स्वरार्थमिदम् । सुशर्मा ।

५९२ । **सातिभ्यां मनिन्मनिणौ** । स्यतीति साम । सामनी । आत्मा ।

५९३ । **हनिमशिभ्यां सिकन्** । हंसिका हंसयोषिति । मक्षिका ।

५९४ । **कोररन्** । कवरः ।

५९५ । **गिर उडच्** । गरुडः ।

५९६ । **इन्देः कमिर्नलोपश्च** । इदम् ।

५९७ । **कायतेर्डिमिः** । किम् ।

५९८ । **सर्वधातुभ्यः ष्ट्रन्** । वस्त्रम् । अस्त्रम् । शस्त्रम् । इस्सन्निति ह्रस्वत्वम् । छादनाच्छत्रम् ।

५९९ । **भ्रस्जिगमिनमिहनिविश्यशां वृद्धिश्च** । भ्राष्ट्रः । गान्त्रं शकटम् । नान्त्रं स्तोत्रम् हान्त्रं मरणम । वैष्ट्रं पिष्टपम । आष्ट्रमाकाशम् ।

६०० । **दिवेर्युच्च** । द्यौत्रं ज्योतिः ।

६०१ । **उषिखनिभ्यां कित्** । उष्ट्रः । खात्रं खनित्रं जलाधारश्च ।

जन्मप्रभावयोः' इति मेदिनी । **सुशर्मेति** ॥ कृदुत्तरपदस्वरेणान्तोदात्तं पदम् । मनिनि तु मध्योदात्त स्यात् । सुष्ठु शृणातीति विग्रहः । स्यति दुःखयति दुरध्येयत्वात्साम । 'साम क्लीबमुपायस्य भेदे वेदान्तरेऽपि च' इति मेदिनी । 'आत्मा पुंसि स्वभावेऽपि प्रसन्नमनसोरपि । धृतावपि मनीषायां शरीरब्रह्मणोरपि' इति च । **हनि** ॥ 'मक्षिका भम्भराळी स्यात्' इति हारावळी । कवरः पाठकः । 'बवयोरैक्यात्कबरी केशविन्यासः । 'जानपद' इति ङीष् । अन्यत्र कबरा । **गिर उडच्** ॥ इद सूत्रं केचिन्न पठन्ति । अत एव गरुता डयत इति विगृह्य डप्रत्यये पृषोदरादित्वाल्लोपे गरुडशब्दं व्युत्पादयन्ति । **इन्देः कमिः** ॥ उज्ज्वलदत्तस्तु कमिन्निति नितं पपाठ । तन्न । 'इदन्ते पात्रमिन्द्रियाणाम् । इदं ते सौम्यं मधु' इत्यादौ नित्स्वराभावात् । दशपाद्यान्तु 'इणो दमक्' इति सूत्रितम् । **इदमिति** ॥ सर्वनामशब्दोऽयं प्रत्यक्षपरामर्शी । **कायतेर्डिमिः** ॥ 'प्रयोजनाभावादेव मकारस्येत्संज्ञाविरहे सिद्धे इकारः उच्चारणार्थः । दशपाद्यान्तु डिमित्येव सूत्रितम् । किमिति सर्वनाम । **सर्व** ॥ दशपाद्यान्तु ष्ट्रन्नित्येव सूत्रम् । अत एवाधिकं प्रक्षिप्तमित्याहुः । 'असु क्षेपणे ।' 'अस्त्रं प्रहरणे चापे करवाले नपुंसकम्' इति मेदिनी । 'पत्त्रन्तु वाहने पर्णे स्यात्पक्षे शरपक्षिणोः' इति मेदिनी । पिबतेः पात्रम् । षित्वात् ङीष् । 'पात्र्यमत्रे त्रिषु क्लीबं स्रुवादौ राजमन्त्रिणि । तीरद्वयान्तरे योग्ये' इति मेदिनी । **भ्रस्जि** ॥ 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना' इत्यमरः । वैष्ट्रं विष्टपम् । **उष्ट्रः**

६०२। **सिविमुच्योष्टेरूः च**। सूत्रम्। मूत्रम्।

६०३। **अमिचिमिदिशसिभ्यः क्त्रः**। आत्रम् चित्रम्। मित्त्रम्। शस्त्रम्।

६०४। **पुवो ह्रस्वश्च**। पुत्रः।

६०५। **स्त्यायतेर्ड्रट्**। स्त्री।

६०६। **गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः**। गोत्रं स्यान्नामवंशयोः। गोत्रा पृथिवी। धर्त्रं गृहम्। वेत्रम्। पक्त्रम्। वक्त्रम्। यन्त्रम्। सत्त्रम्। क्षत्त्रम्।

६०७। **हुयामाश्रुभसिभ्यस्त्रन्**। होत्रम्। यात्रा। मात्रा। श्रोत्रम्। भस्त्रा।

६०८। **गमेरा च**। गात्रम्।

६०९। **दादिभ्यश्छन्दसि**। दात्रम्। पात्रम्।

६१०। **भूवादिगृभ्यो णित्रन्**। भावित्रम्। वादित्रम्। गारित्रमोदनम्।

६११। **चरेर्वृत्ते**। चारित्रम्।

इति ॥ 'उष्ट्रः क्रमेलकमयमहाङ्गाः' इत्यमरः। **सिविमुच्योः** ॥ सूत्रिमूत्रिभ्यां चुरादिण्यन्ताभ्यामेरचा रूपसिद्धेः आद्युदात्तार्थमिदं सूत्रम्। न च घञा तत्सिद्धिः। अचा घञो बाधात्। 'सूत्रन्तु सूचनाग्रन्थे सूत्रतन्तुव्यवस्थयोः' इति विश्वः। **अमिचिमिदि** ॥ **आन्त्रमिति** ॥ 'अनुनासिकस्य क्विझलोः' इति दीर्घः। 'चित्राश्वपर्णागोतुम्बीसुभद्रादन्तिकासु च। मायायां सर्पनक्षत्रनदीभेदेषु च स्त्रियाम्। तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि। तद्युक्तयोस्त्वन्यलिङ्गम्' इति मेदिनी। 'मित्रं सुहृदि न द्वयोः सूर्ये पुंसि' इति च। 'शस्त्रं लोहास्त्रयोः क्लीबं छुरिकायान्तु योषिति' इति च। प्रत्ययस्वरेणैव अन्तोदात्ताः। 'शुन आन्त्राणि पेचे। चित्रं देवानाम्। मित्रं त्रयम्। शस्त्रस्य शस्त्रमसि' इत्यादि। **पुवो ह्रस्वश्च** ॥ **पुत्र इति** ॥ पुनातीति पुत्रः। पुन्नाम नरकः तस्मात् त्रायते इति तु व्युत्पत्त्यन्तरम्। **स्त्रीति** ॥ ङित्वाट्टिलोपः। वलि लोपः। टित्त्वात् ङीप्। 'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः' इत्यमरः। **गुधृ** ॥ 'गुङ् अव्यक्ते शब्दे।' 'गोत्रा भूगव्ययोर्गोत्रः शैले गोत्रं कुलाख्ययोः। सम्भावनीयबोधे च काननक्षेत्रवर्त्मसु' इति मेदिनी। 'सत्रमाच्छादने यज्ञे सदा दाने धनेऽपि च' इत्यमरः। 'सत्रं यज्ञसदादानाच्छादनारण्यकैतवे' इति मेदिनी। **हुयामा** ॥ होत्राशब्दः ऋत्विक्ष्वपि स्त्रीलिङ्ग इति 'होत्राभ्यश्छः' इति सूत्रे हरदत्तादयः। श्रूयते च। 'कारादद्धोत्राश्विनावाम्' इति। होत्रं हविः। 'यात्रा तु यातनेऽपि स्यात् गमनोत्सवयोः स्त्रियाम्। मात्रा कर्णविभूषायां वित्ते माने परिच्छदे। अक्षरावयवे स्वल्पे क्लीबं कात्स्न्र्येऽवधारणे' इति च मेदिनी। 'कर्णशब्दग्रहौ श्रौत्रं श्रुतिः स्त्री श्रवणं श्रवः' इत्यमरः। 'भस्त्रा चर्मप्रसेविका' इति च। **गमेः** ॥ 'गात्रमङ्गे कलेबरे। स्तम्बेरमाप्रजङ्घादिविभागेऽपि समीरितम्' इति विश्वः। **चरेर्वृत्ते** ॥ **चारित्रमिति** ॥ इत्रप्रत्यये चरित्रमित्युक्तम्।

६१२ । **अशित्रादिभ्य इत्रोत्रौ** । अशित्रम् । वहित्रम् । धरित्री मही । त्रैङ् एवमादिभ्य उत्रः । त्रोत्रं प्रहरणम् । वृञ् वरुत्रं प्रावरणम् ।

६१३ । **अमेर्द्विषति चित्** । अमित्रः शत्रुः ।

६१४ । **आः समिण्निकषिभ्याम्** । संपूर्वादिणो निपूर्वात्कषेश्च आ स्यात् । । स्वरादित्वादव्ययत्वम् । समया । निकषा ।

६१५ । **चितेः कणः कश्च** । बाहुलकादगुणः । चिक्कणं मसृणं स्निग्धम् ।

६१६ । **सूचेः स्मन्** । सूक्ष्मम् ।

६१७ । **पातेर्डुम्सुन्** । पुमान् ।

६१८ । **रुचिभुजिभ्यां किष्यन्** । रुचिष्यमिष्टम् । भुजिष्यो दासः ।

६१९ । **वसेस्तिः** । वस्तिर्नाभेरधो द्वयोः । वस्तयः स्युर्दशासूत्रे । बाहुलकात् शासः शास्तिः राजदण्डः । विन्ध्याख्यमगमस्यतीत्यगस्तिः । शकन्ध्वादिः ।

६२० । **सावसेः** । स्वस्ति । स्वरादिपाठादव्ययत्वम् ।

६२१ । **वौ तसेः** । वितस्तिः ।

६२२ । **पदिप्रथिभ्यां नित्** । पत्तिः । प्रथितिः । तितुत्रेष्वग्रहादीनाम् (वा ४३१३) इतीट् ।

६२३ । **दृणातेर्ह्रस्वश्च** । दृतिः ।

न च तत एव प्रज्ञाद्यणा सिद्धे किमनेनेति वाच्यम् । स्वरे विशेषात् । **धरित्रीति** ॥ गौरादित्वान्ङीष् । **अमेः** ॥ इत्र एवानुवर्तते नोत्रः । **आः समिण** ॥ समयानिकषाशब्दौ समीपवाचकौ । बाहुलकाद्दुषेः दोषा । दिवेर्गुणाभावश्च । दिवा । स्वदेर्धश्च । स्वधा इत्यादि । अमरोक्तमाह । **चिक्कणमिति** ॥ **सूचेः** ॥ **सूक्ष्ममिति** ॥ णिलोपे कृते कुत्वादि । 'सूक्ष्मं स्यात्कण्टकेऽध्यात्मे पुंस्यणौ त्रिषु चाल्पके' इति मेदिनी । **पातेः** ॥ डित्वाट्टिलोपः । उकारनकारयोस्तु फलं 'पुंसोऽसुङ्' इति सूत्रेऽवोचाम । यत्तूज्ज्वलदत्तेनोक्तम् । उकार उच्चारणार्थ इति । तदाकरविरुद्धम् । 'पुंसोऽसुङ्' इति सूत्रे न्यासरक्षिताभ्यां पुनातेर्मक् सुन् ह्रस्वश्चेति पठितम् । पूञो डुम्सुन्नित्यन्ये । भाष्ये तु सूतेः सप्रसवे पुमानित्युक्तम् । 'उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः' इति तु तत्त्वम् । **रुचिभुजि** ॥ 'भुजिष्यस्तु स्वतन्त्रे च हस्तसूत्रकदासयोः । स्त्रियां दासीगणिकयोः' इति मेदिनी । **वसेस्तिः** ॥ 'वस्तिर्द्वयोर्निरूढे नाभ्यधोभूमिदशासु च' इति मेदिनी । 'अगस्तिः कुम्भयोनौ च वङ्गसेनतरौ पुमान्' इति च । **सावसेः** ॥ अस भुवि बहुलवचनान्न भूभावः । **वौ तसेः** ॥ 'अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः' इत्यमरः । 'स्त्रीपुंसयोर्वितस्तिः स्यात्' इत्यमरमाला । **दृणातेः** ॥ 'दृतिश्चर्मघटे

६२४। **कृतृकृपिभ्यः कीटन्**। किरीटं शिरोवेष्टनम्। तिरीटं सुवर्णम्। कृपीटं कुक्षिवारिणोः।

६२५। **रुचिवचिकुचिकुटिभ्यः कितच्**। रुचितमिष्टम्। उचितम्। कुचितं परिमितम्। कुटितं कुटिलम्।

६२६। **कुटिकुषिभ्यां क्मलम्**। कुट्मलम्। कुड्मलम्।

६२७। **कुषेर्लश्च**। कुल्मलं पापम्।

६२८। **सर्वधातुभ्योऽसुन्**। चेतः। सरः। पयः। सदः।

६२९। **रपेरत एच्च**। रेपोऽवद्यम्।

६३०। **अशेर्देवने युट् च**। देवने स्तुतौ। यशः।

६३१। **उब्जेर्बले बलोपश्च**। ओजः।

६३२। **श्वेः संप्रसारणं च**। शवः। शवसी। बलपर्यायोऽयम्।

मत्स्ये ना' इति मेदिनी। 'कृतृकृपिकपिभ्यः' इति पठित्वा कृपीट इति चतुर्थमुदाहृतम्। 'कृपो रो ल.' इत्यत्र न्यासे तु कृकृपिभ्यामिति पठ्यते। अतस्तरतिरत्न प्रक्षिप्त इति कश्चित्। तरतेश्चेति पृथक् पठित्वा 'तिरीटः कूलवृक्षः' इति कश्चित् व्याख्यत्। **रुचिवचि** ॥ 'उचितं तु भवे न्यस्ते मिते जाते समञ्जसे' इति मेदिनी। 'कुड्मलो मुकुले पुंसि न द्वयोर्नरकान्तरे' इति मेदिनी। **कुटिकुषि** ॥ कुड्मलं छर्दनं विकसितमित्यन्ये। **सर्वधातुभ्योऽसुन्** ॥ दशपाद्यादिष्वसुन् इत्येव सूत्रम्। **सर इति** ॥ अयं स्त्रियामपि। गौरादित्वान्ङीष्। 'सरसी तु महासरः' इति शब्दार्णवः। महान्ति सरांसि सरस्य इति भाष्यम्। **पय इति** ॥ 'पीङ् पाने।' 'पयः स्यात् क्षीरनीरयोः' इति मेदिनी। 'वर्च दीप्तौ।' 'वर्चो नपुंसकं रूपे विष्ठायामपि तेजसि। पुंसि चन्द्रस्य तनये' इति मेदिनी। 'णभ हिंसायाम्।' भौवादिकः क्रैयादिकश्च। 'तप सन्तापे', 'षह मर्षणे', 'मह पूजायाम्', 'तमु ग्लानौ', 'रञ्ज रागे' एभ्यः षड्भ्योऽसुनि सान्तम्। अच्कयोरदन्तमपि। 'नभन्तु नभसा सार्धन्तपन्तु तपसा सह। सहञ्च सहसा सार्धं महञ्च महसा सह। तमेन च तमः प्रोक्तं रजेनापि रजः समम्' इति द्विरूपकोशः। 'तपो लोकान्तरेऽपि च। चान्द्रायणादौ धर्मे च पुमान् शिशिरमाघयोः। सहो बले ज्योतिषि च पुंसि हेमन्तमार्गयोः' इति च मेदिनी। 'मह उत्सवतेजसोः' इति च। 'तमः क्लीबं गुणे शोके सैंहिकेयान्धकारयोः' इति रभसः। तमो ध्वान्ते गुणे शोके क्लीबं वा ना विधुन्तुदे' इति मेदिनी। नभोरजसी तु व्याख्यास्येते। रुदिर् 'रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक्। सह प्रयोगेऽप्यनयो रोदस्यावपि रोदसी' इति विश्वः। 'वी गत्यादिषु।' 'वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम्' इति मेदिनी। 'अन प्राणने।' अनो भक्तं तत्स्थानञ्च। 'अनोऽश्मायःसरसां जातिसंज्ञयोः' इति टचि तु अदन्तम्। 'पाकस्थानं महानसम्' इत्यमरः। **रेपोऽवद्यमिति** ॥ 'अरेपसा तन्वा' इति मन्त्रे निरवद्ययेति भाष्यम्। ओजो बले।

६३३ । **श्रयतेः स्वाङ्गे शिरः किच्च** । श्रयतेः शिर आदेशोऽसुन् किच्च । शिरः । शिरसी ।

६३४ । **अर्तेरुच्च** । उरः ।

६३५ । **व्याधौ शुट् च** । अर्शो गुदव्याधिः ।

६३६ । **उदके नुट् च** । अर्तेरसुन्स्यात्तस्य च नुट् । अर्णः । अर्णसी ।

६३७ । **इण आगसि** । एनः ।

६३८ । **रिचेर्धने घिच्च** । चात्प्रत्ययस्य नुट् । घित्त्वात्कुत्वम् । रेक्णः सुवर्णम् ।

६३९ । **चायतेरन्ने ह्रस्वश्च** । चनो भक्तम् ।

६४० । **वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुट् च** । वर्पो रूपम् । शेपो गुह्यम् ।

६४१ । **सुरीभ्यां तुट् च** । स्रोतः । रेतः ।

६४२ । **पातेर्बले जुट् च** । पाजः । पाजसी ।

'ओजो दीप्तावष्टम्भे प्रकाशबलयोरपि' इति मेदिनी । **श्रयतेः** ॥ 'उत्तमाङ्गं शिरः शीर्षम्' इत्यमरः । शृणातेर्घञर्थे कप्रत्यये अदन्तोऽपि 'शिरोवार्ची शिरोऽदन्तो रजोवार्ची रजस्तथा' इति कोशान्तरम् । 'पिण्डं दद्यात् गयाशिरे' इति वायवीये । 'कुण्डलोद्भृष्टगण्डानां कुमाराणां तरस्विनाम् । निचकर्त शिरान्द्रौणिर्नीलेभ्य इव पङ्कजान्' इति महाभारतम् । **अर्तेः** ॥ 'उरो वत्सं च वक्षश्च' इत्यमरः । **रिचेः** ॥ इह दशपादीवृत्तौ तु नुट् नानुवर्तितः । रेकः रेकसी इत्युदाहृतञ्च । तन्न । उत्तरसूत्रे नुडनुवृत्तेर्निर्विवादत्वात् मण्डूकप्लुतौ मानाभावात् लक्ष्यविसंवादाच्च । उज्ज्वलदत्तेन तु 'रिचेर्धने चिच्चिच्च' इति पठित्वा नुटं चानुवर्त्य कित्त्वात् गुणाभावे नुटश्चुत्वेन ञकारे रिञ्चमिति साधितम् । तदपि न । उक्तोदाहरणस्य लोकवेदयोरप्रसिद्धत्वात् । 'नित्यं रेक्णे अमर्त्यः । परिषद्यं ह्यरणस्य रेक्णः । रेक्णः स्वल्यभिया वाममेति' इत्यादिमन्त्रेषु रेक्ण इति शब्दस्य प्रसिद्धत्वात् । वैदिकनिघण्टौ च सुवर्णपर्यायेषु तथा पाठात् । वेदभाष्यादिषु प्रकृतसूत्रेणैव तस्य साधितत्वाच्च रेक्ण इति प्रयोग एव साधीयानिति दिक् । **चायतेः** ॥ चनो दधिष्वपचतः । सुनेदधिष्वनश्चनः । इत्यादिमन्त्रेषु चनशब्दः प्रसिद्धः । एतेन चणोऽन्नमित्युदाहृत्य बाहुलकाण्णत्वमिति वदन्तो दशपादीवृत्तिकारास्तदनुगाः प्रसादकारादयश्च परास्ताः । **वर्पो रूपमिति** ॥ 'घ्नन्छिश्नदेवा अभिवर्पसाभूः' इत्यादिमन्त्रेषु प्रसिद्धमिदम् । 'शेपः स्याद्वृषणं पेलम्' इति सुभूतिचन्द्रः । अकारान्तोऽप्ययमिति 'शेपपुच्छलाङ्गूलेषु शुनः' इत्यत्रावोचाम । 'शेपःशेपौ च शेफश्च शेफं प्रोक्तश्च शेफसा' इति द्विरूपकोशः । **सुरीभ्याम्** ॥ 'स्रोतोऽम्बुवेगेन्द्रिययोः' इति विश्वः । 'रेतः शुक्रे पारदे च' इति मेदिनी । **पातेर्बले** ॥ चवर्गतृतीयादिः । उज्ज्वलदत्तस्तु युट् चेत्यन्तस्थादिं पपाठ । तन्न । 'विपाजसा

६४३। **उदके थुट् च**। पाथः।

६४४। **अन्ने च**। पाथो भक्तम्।

६४५। **अदेर्नुम्धौ च**। अदेर्भक्ते वाच्येऽसुन्नुमागमो धादेशश्च। अन्धोऽन्नम्।

६४६। **स्कन्देश्च स्वाङ्गे**। स्कन्धः—स्कन्धसी।

६४७। **आपः कर्माख्यायाम्**। कर्माख्यायां ह्रस्वो नुट् च वा। अप्रः। अपः। बाहुलकात् आपः आपसी।

६४८। **रूपे जुट् च**। अब्जो रूपम्।

६४९। **उदके नुम्भौ च**। अम्भः।

६५०। **नहेर्दिवि भश्च**। नभः।

६५१। **इण आगोऽपराधे च**। 'आगः पापापराधयोः'।

६५२। **अमेर्हुक्च**। अंहः।

६५३। **रमेश्च**। रंहः।

६५४। **देशे ह च**। रमन्तेऽस्मिन्रहः।

पृथुना। पृथुपाज्ञा अमर्त्यः' इत्यादिमन्त्रतद्ब्राह्मणविरोधात्। **अदेः** ॥ 'भिस्सा स्त्री भक्तमन्धोऽन्नम्' इत्यमरः। 'द्विजातिशेषेण यदेतदन्धसा' इति भारविः। 'समन्धसा समदः पृष्ठ्येन' इति श्रुतिः। **स्कन्देश्च** ॥ असुन् धश्चान्तादेशः। **आपः कर्माख्यायाम्** ॥ असुन्। ह्रस्वश्च धातोः। प्रत्ययस्य नुडागमस्तु वा। 'अप्रस्वतीमश्विना। अपांसि यस्मिन्नधिसन्दधुः।' बाहुलकादित्युपलक्षणम्। ह्रस्वनुटौ वा स्त इति व्याख्यानादित्यपि बोध्यम्। तथा च ब्रुवते 'कतमेऽपि नपुंसकमापः' इति कोशमुदाहृत्य 'सर्वमापोमयञ्जगत्' इति प्रयोगो दुर्घटवृत्तौ समर्थितः। **रूपे** ॥ आप्नोतेरसुन् ह्रस्वत्वञ्च धातोः प्रत्ययस्य जुट् चेत्यर्थः। **अब्ज इति** ॥ 'झलाञ्जश् झशि' इति पकारस्य बकारः। **नहेः** ॥ 'नभो व्योम्नि नभो मेघे श्रावणे च पतङ्गहे। घ्राणे मृणालसूत्रे च वर्षासु च नभः स्मृतम्' इति विश्वः। 'नभः क्लीबं व्योम्नि पुमान्। घने श्रावणवर्षासु बिसतन्तौ पतङ्गहे' इति मेदिनी। 'नभन्तु नभसा सार्द्धम्' इति द्विरूपकोशादकारान्तोऽपि। विश्वोक्तिमाह। **आग इति** ॥ **अमेः** ॥ अमन्ति गच्छन्त्यधोऽनेनेत्यंहो दुरितम्। **रमेश्च** ॥ रंहो वेगः। अहिरहिभ्यामसुना सिद्धेऽधिरधिभ्यामसनि अङ्गो रङ्गः इति माभूदिति सूत्रद्वयमिति गोवर्द्धनः। तथा च 'स्यान्मद्ध्योष्मचतुर्थत्वमंहसो रंहसस्तथा' इति द्विरूपकोशः। एवञ्च 'दत्तार्घाः सिद्धसङ्घैर्विदधतु घृणयः शीघ्रमङ्गोविघातम्' इति। 'रङ्गः सङ्गः सुराणाञ्जगदुपकृतये नित्ययुक्तस्य यस्य स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरुचेः सोऽवतात् स्यन्दनो वः' इति घकारपाठोऽनुप्रासरसिकानां प्रामादिक इति वदन्ति। **देशे ह च** ॥

६५५ । **अञ्च्यञ्जियुजिभृजिभ्यः कुश्च** । एभ्योऽसुन्कवर्गश्चान्तादेशः । 'अङ्कश्चिह्नशरीरयोः' । अङ्गः पक्षी । योगः समाधिः । भर्गस्तेजः ।

६५६ । **भूरञ्जिभ्यां कित्** । भुवः । रजः ।

६५७ । **वसेर्णित्** । वासो वस्त्रम् ।

६५८ । **चन्देरादेश्च छः** । छन्दः ।

६५९ । **पचिवचिभ्यां सुट् च** । 'पक्षसी तु स्मृतौ पक्षौ' । **वक्षो हृदयम्** ।

६६० । **वहिहाधाञ्भ्यश्छन्दसि** । वक्षा अनड्वान् । हासाश्चन्द्रः । धासाः पर्वत इति प्राञ्चः । वस्तुतस्तु णिदित्यनुवर्तते न तु सुट् । तेन वहेरुपधावृद्धिः । इतरयोः 'आतो युक्–' (सू २७६१) इति युक् । 'शोणा धृष्णू नृवाहसा' । 'श्रोता हवं गृणतः स्तोमवाहाः' । 'विश्वो विहायाः ।' 'वाजम्भरो विहायाः' । 'देवो नयः पृथिवीं विश्वधायाः' । 'अधारयत्पृथिवीं विश्वधायसम्' । 'धर्णसं भूरिधायसम्' इत्यादि ।

६६१ । **इण आसिः** । अयाः वह्निः । स्वरादिपाठादव्ययत्वम् ।

६६२ । **मिथुनेऽसिः पूर्ववच्च सर्वम्** । उपसर्गविशिष्टो धातुर्मिथुनं तत्रासुनोऽपवादोऽसिः स्वरार्थः । यस्य धातोर्यत्कार्यम् असुनप्रत्यये उक्तं तदत्रापि भवतीत्यर्थः । अशेर्देवने युट् चेत्यादि सुयशाः ।

६६३ । **नञि हन एह च** । अनेहाः । अनेहसौ ।

६६४ । **विधाञो वेध च** । विदधातीति वेधाः ।

'रहस्तत्त्वे रते गुह्ये' इति मेदिनी । **अञ्च्यञ्जियुजि** ॥ अङ्कः–अङ्कसौ–अङ्कांसि । अङ्गः–अङ्गसौ–अङ्गांसि । योगः–योगसौ–योगांसि । 'उच समवाये ।' अस्मादसुनि बाहुलकात् कुत्वं, न्यङ्क्वादित्वाद्वा । 'ओक आश्रयमात्रेऽपि मन्दिरेऽपि नपुंसकम्' इति मेदिनी । **भूरञ्जिभ्याम्** ॥ भुवः अन्तरिक्षम् । षष्ठ्यन्तप्रतिरूपकमव्ययमिदम् । रजो रेणुः । 'रजः क्लीबं गुणान्तरे । आर्तवे च परागे च रेणुमात्रेऽपि दृश्यते' इति मेदिनी । घञर्थे कप्रत्यये तु अकारान्तोऽप्ययम् । 'रजोऽयं रजसा सार्द्धं स्त्रीपुष्पगुणधूलिषु' इत्यजयकोशः । विरजां नदीम् । विरजां दीक्षामिति । **चन्देरादेश्च छः** ॥ **छन्द इति** ॥ 'छन्दः पद्यप्रभेदेऽपि स्वैराचाराभिलाषयोः' इति मेदिनी । अकारान्तोऽपि । 'अभिप्रायवशौ छन्दौ' इत्यमरद्विरूपकोशौ । **पचिवचिभ्याम्** ॥ पक्षः–पक्षसी–पक्षांसि । अनीकाधिकरणे 'पूर्वोत्तरे द्वे पक्षसी' इति शबरस्वाम्यादयः । माधवस्तु 'पक्ष परिग्रहे' इत्यस्मादसुन् । पक्षः । छदिः संवत्सरार्धश्चेत्याह । **वहिहा** ॥ अत्र पूर्वसूत्रात्सुटमनुवर्तयतां उज्ज्वलदत्तादीनां मतेनोदाहरणमाह । **वक्षा इत्यादि** ॥ **प्राञ्च इति** ॥ सकलवृत्तिकृतः प्रसादकारादयश्चेत्यर्थः । एतच्चायुक्तम् । उक्तोदाहरणानीह तावल्लोके दृश्यन्ते । न च सम्भवन्ति । छन्दसीति सूत्रात् । वेदे तु विपरीतमेवास्तीत्याह । **वस्तुतस्त्विति** ॥ वेदभाष्यकाराश्चेह साक्षिण इत्यवधेयम् । **मिथुनेऽसिः** ॥ सुपयाः सुस्रोताः इत्यादुदाहरणम् । **विधाञः** ॥ 'वेधाः पुंसि हृषीकेशे

६६५। **नुवो धुट् च**। नोधाः ऋषिः।

६६६। **गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च**। असिः स्यात्। सुतपाः। जातवेदाः। 'गतिकारकोपपदात्कृत्' (सू ३८७३) इत्युत्तरपदप्रकृतिस्वरत्वे सति शेषस्यानुदात्तत्वे प्राप्ते तदपवादार्थमिदम्।

६६७। **चन्द्रे मो डित्**। चन्द्रोपपदान्माङोऽसिः स्यात्स च डित्, चन्द्रमाः।

६६८। **वयसि धात्रः**। वयोधास्तरुणः।

६६९। **पयसि च**। पयोधाः समुद्रो मेघश्च।

६७०। **पुरसि च**। पुरोधाः।

६७१। **पुरूरवाः**। पुरुशब्दस्य दीर्घो रौतेरसिश्च निपात्यते।

६७२। **चक्षेर्बहुलं शिच्च**। नृचक्षाः।

६७३। **उषः कित्**। उषः।

६७४। **दमेरुनसिः**। 'सप्तार्चिर्दमुनाः'।

६७५। **अङ्गतेरसिरिरुडागमश्च**। अङ्गिराः।

६७६। **सर्तेरप्पूर्वादसिः**। अप्सराः। प्रायेणायं भ्रूम्नि। अप्सरसः।

बुधे च परमेष्ठिनि' इति मेदिनी। **नोधा इति** ॥ 'सद्योभुवद्वीर्याय नोधाः' इति मन्त्रे, नोधा ऋषिर्भवतीति निरुक्तम्। नवं दधातीति तु नैरुक्तं व्युत्पत्त्यन्तरं बोध्यम्। अत्र स्वरसूत्रम् 'गतिकारकयोः पूर्वपदप्रकृतिस्वरत्वञ्च' इति कृदुत्तरपदप्रकृतिस्वरापवादोऽयम्। **चन्द्रे** ॥ चन्द्रं रजतम् अमृतञ्च, तदिव मीयते असौ चन्द्रमाः इति हरदत्तः। **पुरसि च** ॥ 'पुरोधास्तु पुरोहितः' इत्यमरः। 'पुरूरवाः बुधसुतो राजर्षिश्च पुरूरवाः' इत्यपि। 'विद्यात्पुरूरवःशब्दे रुकारस्यापि दीर्घताम्' इति द्विरूपकोशः। **नृचक्षा इति** ॥ शिच्चेत्युक्ते सार्वधातुकसंज्ञा। अतः ख्याञ् न। उषः कित्। दशपाद्यान्तु वसः किदिति पाठः। 'वसति सूर्येण सहेत्युषा। अपो भीति सूत्रे उषसश्चेष्यते' इति वार्तिकस्य समुषद्भिरित्युदाहरणं विवृण्वद्भिर्हरदत्तादिभिरयं पाठः पुरस्कृतः। **दमेरुनसिः** ॥ 'सप्तार्चिर्दमुनः शुक्रः' इत्यमरः। पक्षे 'अन्येषामपि दृश्यते' इति दीर्घः। जुष्टो दमूनाः। दमूनसङ्गृहपतिं वरेण्यम्। दशपाद्यां तु सूत्रे दीर्घः पठ्यते। तन्मते पक्षे ह्रस्वो बाहुलकाद्बोध्यः। **प्रायेणेति** ॥ 'स्त्रियां बहुष्वप्सरसः' इत्यमरः। 'स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपि' इति शब्दार्णवः। 'अप्सरस्स्वप्सराः प्रोक्ताः सुमनाः सुमनःसु च' इति द्विरूपकोशः 'एकाप्सरःप्रार्थितयोर्विवादः' इति

६७७ । **विदिभुजिभ्यां विश्वे** । विश्ववेदाः । विश्वभोजाः ।

६७८ । **वशेः कनसिः** । संप्रसारणम् । उशनाः ।

॥ इत्युणादिषु चतुर्थः पादः ॥

॥ अथ उणादिषु पञ्चमः पादः ॥

६७९ । **अदि भुवो डुतच्** । अद्भुतम् ।

६८० । **गुधेरूमः** । गोधूमः ।

६८१ । **मसेरूरन्** । मसूरः । प्रथमे पादे असेरुरन्, 'मसेश्च' इत्यत्र व्याख्यातः ।

६८२ । **स्थः किच्च** । स्थूरो मनुष्यः ।

६८३ । **पातेरतिः** । पातिः स्वामी । संपातिः पक्षिराजः ।

६८४ । **वातेर्निन्** । 'वातिरादित्यसोमयोः' ।

६८५ । **अर्तेश्च** । अरतिरुद्वेगः ।

६८६ । **तृहेः क्रो हलोपश्च** । तृणम् ।

६८७ । **वृञ्लुटितनिताडिभ्य उलच् तण्डश्च** । ब्रियन्ते लुट्यन्ते तन्यन्ते ताड्यन्त इति वा तण्डुलाः ।

६८८ । **दंसेष्टनौ न आ च** । 'दासः सेवकशूद्रयोः' ।

रघुः । **विदिभुजिभ्याम्** ॥ विश्वे । शब्दस्वरूपपरत्वात्स्मिन्नादेशो न कृतः । उदाहरणं विश्वं वेत्ति विन्दति भुङ्क्ते इति विग्रहः । अत्रोज्ज्वलदत्तेन विश्वेवेदा अग्निः । विश्वेभोजा इन्द्रः । 'तत्पुरुषे कृति' इति सप्तम्या अलुगित्युक्तम् । तत्र, तथा सति स्मिन्नादेशस्य दुर्वारत्वापत्तेः । 'सुमृलीको भवतु विश्ववेदाः । पूषा भगः प्रभृथे विश्वभोजा' इत्यादिमन्त्रेषु सुपो लुक एव दर्शनात् वृत्त्यन्तरेषु तथैवोदाहरणाच्च । **वशेः** ॥ 'वश कान्तौ ।' 'उशना भार्गवः कविः' इत्यमरः ॥

॥ इत्युणादिषु चतुर्थः पादः ॥

अद्भुतमिति ॥ अत् इत्यव्ययमाकस्मिकार्थे । तस्मिन्नुपपदे भुवः डुतच्प्रत्ययः । गुध्यते परितो वेष्ट्यते प्राणिभिरिति गोधूमः । 'गोधूमो नागरङ्गे स्यादोषधीत्रीहिभेदयोः' इति मेदिनी । **मसेः** ॥ 'मसी परिणामे ।' **स्थूरो मनुष्य इति** ॥ 'स्थूरस्य रायो बृहतो ययीशे' इति मन्त्रे तु योगपुरस्कारात् स्थिरस्य इत्यर्थः । रभसकोशस्थमाह । **वातिरिति** ॥ **वृञ्लुटि** ॥ यद्यपि 'स्वानसिवर्णसि' इति सूत्रे तण्डुलशब्दो निपातितः । तथापि प्रत्ययस्वरेण मध्योदात्तः सः । अयं तु चित्स्वरेणान्तोदात्त इति विवेकः । **दंसेः** ॥ 'दासः शूद्रे दानपत्रे भृत्यधीवरयोरपि'

६८९। **दंशेश्च**। दाशो धीवरः।

६९०। **उदि चेर्डैसिः**। स्वरादिपाठादव्ययत्वम्। उच्चैः।

६९१। **नौ दीर्घश्च**। नीचैः।

६९२। **सौ रमेः क्तो दमे पूर्वपदस्य च दीर्घः**। रमेः सुपूर्वादमे वाच्ये क्तः स्यात्। कित्त्वादनुनासिकलोपः। सूरत उपशान्तो दयालुश्च।

६९३। **पूञो यण्णुग्घ्रस्वश्च**। यत्प्रत्ययः। पुण्यम्।

६९४। **स्रंसेः शि कुट् किच्च**। स्रंसतेः शिरादेशो यत्प्रत्ययः कित्तस्य कुडागमश्च। शिक्यम्।

६९५। **अर्तेः क्युरुच्च**। उरणो मेषः।

६९६। **हिंसेरीरन्नीरचौ**। हिंसीरो व्याघ्रदुष्टयोः।

६२७। **उदि दृणातेरजलौ पूर्वपदान्त्यलोपश्च**। उदरम्।

६९८। **डित्खनेर्मुट् स चोदात्तः**। अजल् च डित्स्याद्धातोर्मुट् स चोदात्तः। मुखम्।

६९९। **अमेः सन्**। अंसः।

७००। **मुहेः खो मूर्च**। मूर्खः।

७०१। **नहेर्हलोपश्च**। नखः।

७०२। **शीङो ह्रस्वश्च**। शिखा।

७०३। **माङ ऊखो मयूच**। मयूखः।

७०४। **कलिगलिभ्यां फगस्योच्च**। कुल्फः शरीरावयवो रोगश्च। गुल्फः पादग्रन्थिः।

इति विश्वः। **दंशेश्च**॥ 'कैवर्ते दाशधीवरौ' इत्यमरः। **पूञः**॥ 'पुण्यं मनोऽभिहितं तथा सुकृतधर्मयोः' इति विश्वः। **अर्तेः**॥ 'मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडके' इत्यमरः। **डित्खनेः**॥ 'मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि' इति विश्वः। सन्ध्यन्तरे नाटकादेः शब्देऽपि च नपुंसकम्' इति मेदिनी। **अमेः सन्**॥ 'स्कन्धो भुजशिरोंऽसो स्त्री' इत्यमरः। 'अंसः स्कन्धविभागे च' इति दन्त्यान्ते विश्वः। **मुहेः**॥ 'अज्ञे मूढयथाजातमूर्खवैधेय-बालिशाः' इत्यमरः। **नहेः**॥ 'नखः कररुहे शृङ्गे गन्धद्रव्ये नखं नखी' इति विश्वः। 'नखी स्त्रीक्लीबयोः शुक्तौ नखरे पुन्नपुंसकम्' इति मेदिनी। **शीङः**॥ ह्रस्वविधिसामर्थ्याद्धुणो न। 'शिखाशाखाबर्हिचूडालाङ्गुलिष्वग्रमात्रके। चूडामात्रे शिफायाञ्च ज्वालायां प्रपदेऽपि च' इति मेदिनी। **माङः**॥ 'मयूखस्त्विट्करज्वालासु' इत्यमरः। **गुल्फ इति**॥ 'तद्ग्रन्थी घुटिके

७०५। **स्पृशेः श्वण्शुनौ पृ च**। श्वण्शुनौ प्रत्ययौ 'पृ' इत्यादेशः। पार्श्वम् 'पार्श्वोऽस्त्री कक्षयोरधः'। पर्शुरायुधम्।

७०६। **श्मनि श्रयतेर्डुन्**। श्मञ्छब्दो मुखवाची। मुखमाश्रयत इति श्मश्रु।

७०७। **अश्वादयश्च**। अश्रु नयनजलम्।

७०८। **जनेष्टन्लोपश्च**। जटा।

७०९। **अचतस्य जङ्घ च**। तस्य जनेर्जङ्घादेशः स्यादच्च। जङ्घा।

७१०। **हन्तेः शरीरावयवे द्वे च**। जघनम्। 'पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः'।

७११। **क्लिशेरन्लो लोपश्च**। लकारस्य लोपः। केशः।

७१२। **फलेरितजादेश्च पः**। पलितम्।

७१३। **कृत्रादिभ्यः संज्ञायां वुन्**। करकः-करका। कटकः। नरकम्-नरकः। 'नरको नारकोऽपि च' इति द्विरूपकोशः। सरकं गगनम्। कोरकः। कोरकं च।

ऊल्फौ' इत्यमरः। तयोः पादयोर्ग्रन्थौ इत्यर्थः। **स्पृशेः**॥ 'पार्श्वङ्कक्षाधरे चक्रोपान्ते पर्शुगणेऽपि च' इति विश्वमेदिन्यौ। **श्मनि**॥ 'तद्वृद्धौ श्मश्रु पुंमुखे' इत्यमरः। पुरुषस्य मुखे तेषां रोम्णां वृद्धौ श्मश्रुशब्दो वर्तते इत्यर्थः। **अश्वादयश्च**॥ 'अशू व्याप्तौ।' रुन्प्रत्ययः। नञ्पूर्वात् श्रयतेर्डुन् वा। यत्तु अश्नोतेर्डुन् रुट् चेत्युज्ज्वलदत्तेनोक्तं, तन्न। धातुलोपापत्तेः। तदभावोऽपि निपात्यत इति चेत्। तर्हि डित्त्वोत्प्रेक्षणं निष्फलमिति दिक्। **जनेष्टन् लोपश्च**॥ अलोऽन्त्यस्य। 'जटा लम्बकचे मूले मांस्यां वृक्षे पुनर्जटी' इति मेदिनी। **हन्तेः**॥ चादच् अभ्यासकार्यम्। 'अभ्यासाच्च' इति कुत्वम्। अमरोक्तिमाह। **पश्चादिति**॥ 'जघनञ्च स्त्रियाः श्रोणिपुरोभागे कटावपि' इति मेदिनी। **क्लिशेः**॥ 'केशः स्यात् पुंसि वरुणे कुविरे कुन्तलेऽपि च' इति मेदिनी। 'पलितञ्जरसा शौक्ल्यं केशादौ' इत्यमरः। **कृत्रादिभ्यः**॥ 'करकस्तु पुमान् पक्षिविशेषे दाडिमेऽपि च। द्वयोर्मेघोपले न स्त्री करके च कमण्डलौ' इति मेदिनी। **कटक इति**॥ 'क्वुन् शिल्पिसंज्ञयोः' इति क्वुनाप्ययं सिद्धः। गुणभाज इहैवोदाहार्याः। गुणनिषेधभाजस्तु क्वुनि। उदासीनास्तु यत्र कुत्रचिदिति भावः। 'नृ नये।' 'नरकः पुंसि निरये देवारातिप्रदेशयोः' इति मेदिनी। उदयनाचार्यास्तु न नरकाण्येव सन्तीति क्लीबं प्रयुञ्जते। तत्र मूलं मृग्यम्। 'सृ गतौ।' 'सरकोऽस्त्री शीधुपात्रे शीधुपानेक्षुशीधुनोः' इति मेदिनी। 'कुर शब्दे।' 'कोरकोऽस्त्री कुड्मले स्यात् कक्कोलकमृणालयोः' इति मेदिनी। 'विचकार कोरकाणि' इति माघः। 'कोरकः पुमान्' इत्यमरस्य

७१४। **चीकयतेराद्यन्तविपर्ययश्च**। कीचको वंशभेदः।

७१५। **पचिमच्योरिच्चोपधायाः**। पेचकः। मेचकः।

७१६। **जनेररष्ठ च**। जठरम्।

७१७। **वचिमनिभ्यां चिच्च**। वठरो मूर्खः। 'मठरो मुनिशौण्डयोः'। बिदादित्वान्माठरः। गर्गादित्वान्माठर्यः।

७१८। **ऊर्जि दृणातेरलचौ पूर्वपदान्तलोपश्च**। 'ऊर्दरः शूररक्षसोः'।

७१९। **कृदरादयश्च**। कृदरः कुसूलः। मृदरं विलसत्। सृदरः सर्पः।

७२०। **हन्तेर्युनाद्यन्तयोर्घत्वतत्वे**। घातनो मारकः।

७२१। **क्रमिगमिक्षमिभ्यस्तुन्बुद्धिश्च**। क्रान्तुः पक्षी। गान्तुः पथिकः। क्षान्तुर्मशकः।

७२२। **हर्यतेः कन्यन्हिरच्**। कन्यन्प्रत्ययः। हिरण्यम्।

७२३। **कृञः पासः**। कर्पासः। बिल्वादित्वात्कार्पासं वस्त्रम्।

७२४। **जनेस्तु रश्च**। जर्तुर्हस्ती योनिश्च।

७२५। **ऊर्णोतेर्डः**। ऊर्णा।

७२६। **दधातेर्यन्नुट् च**। धान्यम्।

७२७। **जीर्यतेः क्रिन्रश्च वः**। 'जिव्रिः स्यात्कलपक्षिणोः'। बाहुलकात् 'हलि च' (सू ३५४) इति दीर्घो न।

७२८। **मन्यतेर्यलोपो मश्चापतुट् चालः**। मन्यतेरालप्रत्ययः स्यात्तस्यापतुडागमो धातोर्यलोपो मकारश्चान्त्यस्य। ममापतालो विषये।

प्रमादः। अपवरकावरकादयोऽपीहैव बोध्याः। **चीकयतेः**॥ बाहुलकबललब्धोऽयमर्थः। एवमनुपदं वक्ष्यमाणं पचिमच्योरित्यपि बोध्यम्। 'कीचको दैत्यभिद्वाताहतसस्वनवंशयोः। पेचको गजलाङ्गूलमूलोपान्ते च कौशिके। मेचकस्तु मयूरस्य चन्द्रके श्यामले पुमान्। तद्युक्ते वाच्यवत् क्लीबं स्रोतोऽञ्जनान्धकारयोः' इति मेदिनी। **जनेः**॥ 'जठरः कठिनोऽपि स्यात्' इत्यमरः। जठरो न स्त्रियां कुक्षौ बद्धकर्कटयोस्त्रिषु' इति मेदिनी। **वचि**॥ 'वठरः कुक्कुटे वण्टे शठे च' इति मेदिनी। **ऊर्जि**॥ 'तमूर्दरत्नपृणतायनेन' इति मन्त्रः। **हर्यतेः**॥ 'हर्य गतिकान्त्योः।' हिरण्यं रेतसि द्रव्ये शातकुम्भवराटयोः। अक्षये मानभेदे स्यादकुप्ये च नपुंसकम्' इति मेदिनी। **जनेः**॥ तु इत्यविभक्तिकम्। तुप्रत्ययः। रेफश्चान्तादेशः। **ऊर्णोतेः**॥ 'ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवोः' इत्यमरः। भ्रुवोर्मध्ये य आवर्तस्तत्रेत्यर्थः। 'अन्तरान्तरेण' इति द्वितीया। **दधातेः**॥ 'धान्यं व्रीहिषु धान्याके' इति

७२९ । **ऋजेः कीकन्** । ऋजीक इन्द्रो धूमश्च ।

७३० । **तनोतेर्डउः सन्वच्च** । 'तितउः पुंसि क्लीबे च' ।

७३१ । **अर्भकपृथुकपाका वयसि** । 'ऋधु वृद्धौ' । अतो वुन् । भकार-श्चान्तादेशः । प्रथेः कुकन्संप्रसारणं च । पिबतेः कन् ।

७३२ । **अवद्यावमाधमार्वरेफाः कुत्सिते** । वदेर्नञि यत् । अवद्यम् । अवतेरमः । बस्य पक्षे धः । अवमः । अधमः । अर्तेर्वन् । अर्वा । रिफतेस्तौ-दादिकात् अः रेफः ।

७३३ । **लीरीडोर्ह्रस्वः पुट् च तरौ श्लेषणकुत्सनयोः** । तरौ प्रत्ययौ क्रमात्स्तो धातोर्ह्रस्वः प्रत्ययस्य पुट् । लिप्तं श्लिष्टम् । रिप्रं कुत्सितम् ।

७३४ । **क्लिशेरीचोपधायाः कन्लोपश्च लो नाम्च** । क्लिशेः कन्त्वादु-पधाया ईत्वं लस्य लोपो नामागमश्च । कीनाशो यमः । कित्त्वफलं चिन्त्यम् ।

७३५ । **अश्नोतेराशुकर्मणि वरट् च** । चकारादुपधाया ईत्वम् । ईश्वरः ।

७३६ । **चतेरुरन्** । चतुरः ।

७३७ । **प्रा (प्रेऽ) ततेररन्** । प्रातः ।

७३८ । **अमेस्तुट् च** । अन्तर्मध्यम् ।

मेदिनी । **तनोतेः** ॥ 'चालनी तितउः पुमान्' इत्यमरः । 'चालनं तितउन्युक्तम्' इति कोशान्तरम् । 'तितउ परिपवनं भवति' इति पस्पशायां भाष्यम् । 'स्याद्वास्तु हिङ्गु तितउः' इति पुंनपुंसकवर्गे त्रिकाण्डशेषः । **अर्भक** ॥ 'अर्भकः कथितो बाले मूर्खेऽपि च कृशेऽपि च । पृथुकः पुंसि चिपिटे शिशौ स्यादभिधेयवत् । पाकः परिणते शिशौ । केशस्य जरसा शौक्ल्ये स्थाल्यादौ पचनेऽपि च' इति मेदिनी । **अवद्य** ॥ 'निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः । विपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः' इति सर्वत्रामरः । 'अधमः स्याद्गर्ह्य ऊनेऽपि' इति मेदिनी । 'अर्वा तुरङ्गमे पुंसि कुत्सिते वाच्यलिङ्गकः । रेफो रवर्णे पुंसि स्यात् कुत्सिते पुन-रन्यवत्' इति च । **लीरीडोः** ॥ 'लिप्तं विषाक्ते भुक्ते च वाच्यवत् स्याद्विलेपितः' इति विश्वः । **क्लिशेः** ॥ 'कीनाशः कर्षकक्षुद्रोपांशुघातिषु वाच्यवत् । यमे ना' इति मेदिनी । **ईश्वर इति** ॥ स्त्रियां टित्त्वात् ङीप् । ईश्वरी मध्योदात्ता । वनिपि ङीत्रयोस्तु आद्युदात्ता । पुंयोगलक्षणे ङीषि अन्तोदात्ता । 'स्थेशभास' इति वरजन्तादपि तु ईश्वरेति विवेकः । 'ईश्वरो मन्मथे शम्भौ नाथे स्वामिनि वाच्यवत् । ईश्वरी चेश्वरोमायाम्' इति मेदिनी । 'ईश्वरः शङ्करेऽधीशे तत्पत्न्यामीश्वरीश्वरा' इति वोपालितः । विन्यस्तमङ्गलमहौषधिरीश्वरायाः' इति भारविः । दशपाद्यान्तु सूत्रान्तरमपि । "हन्तेरन् घश्च" रन्प्रत्ययः घ्र-घश्चादेशः । हन्यते गम्यतेऽतिथिभिः घरः गृहम् । **प्रातरिति** ॥ 'अत सातत्यगमने ।' प्रपूर्वः ।

७३९। **दहेर्गो लोपो दश्च नः**। गप्रत्ययो धातोरन्त्यस्य लोपो दकारस्य नकारः। नगः।

७४०। **सिचेः संज्ञायां हनुमौ कश्च**। सिच्यते: कप्रत्ययो हकारादेशो नुम्च स्यात्। सिंहः।

७४१। **व्याङि घ्रातेश्च जातौ**। कप्रत्ययः स्यात्। व्याघ्रः।

७४२। **हन्तेरच्घुर च**। घोरम्।

७४३। **क्षमेरुपधालोपश्च**। चादच्। क्ष्मा।

७४४। **तरतेर्ड्रिः**। त्रयः। त्रीन्।

७४५। **ग्रहेरनिः**। ग्रहणिः। ङीष्। ग्रहणी व्याधिभेदः।

७४६। **प्रथेरमच्**। प्रथमः।

७४७। **चरेश्च**। चरमः।

७४८। **मङ्गेरलच्**। मङ्गलम्।

॥ इत्युणादिषु पञ्चमः पादः ॥

स्वरादिपाठादव्ययत्वम्। **दहेः** ॥ 'नगो महीरुहे शैले भास्करे पवनाशने' इति मेदिनी। **सिचेः** ॥ 'सिंहः कण्ठीरवे राशौ सत्तमे चोत्तरस्थिते। सिंही क्षुद्रबृहत्योः स्याद्वासके राहुमातरि' इति विश्वः। 'हिंसेर्वर्णव्यत्ययतः सिंहः' इति व्युत्पत्त्यन्तरम्। **व्याङि** ॥ 'व्याघ्रः स्यात्पुंसि शार्दूले रक्तैरण्डकरञ्जयोः। श्रेष्ठेनराद्युत्तरस्थः कण्टकार्यांच्च योषिति' इति मेदिनी। **हन्तेः** ॥ 'घोरं भीमे हरे घोरः' इति विश्वः। **ग्रहेः** ॥ 'ग्रहणी रुक्प्रवाहिका' इत्यमरः। **प्रथेः** ॥ 'प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्यवत्' इति मेदिनी। 'प्रथमचरम' इति सर्वनामत्वात्पक्षे जसः शी। प्रथमे प्रथमाः। **चरेश्च** ॥ चरमे। चरमाः। 'प्रथिचरिभ्याम्' इति सुवचम्। **मङ्गेरलच्** ॥ उखवखेत्यादिदण्डके मगिः पठ्यते। 'मङ्गला सितदूर्वायामुमायां पुंसि भूमिजे। नपुंसके तु कल्याणे सर्वार्थे रक्षणेऽपि च' इति मेदिनी। भावे ष्यञि माङ्गल्यम्। तत्र साधुरिति यत्। 'मङ्गल्यः स्यात्त्रायमाणाश्वत्थबिल्वमसूरके। स्त्रियां शम्यामधःपुष्पीमिसिशुक्लवचासु च। रोचनायामथो दध्नि क्लीबं शिवकरे त्रिषु' इति मेदिनी ॥

॥ इत्युणादिषु पञ्चमः पादः ॥

प्राचा तु कतिपयानामेवोणादीनामुपन्यासः कृतः। सोऽपि नैकप्रघट्टकतया। किन्तु विच्छिद्येति स्पष्टमेव। तत्रापि प्रमादं लेशतो दर्शयामः। 'भजो ण्विः' इति ण्विप्रकरणे, 'छन्दसि सहः, वहश्च' इत्युपन्यस्य, 'परौ व्रजेः षः पदान्ते' इति ण्विस्तेनैव षः। परिव्राट् इति तावत् प्राचो ग्रन्थः। तद्व्याख्यायां तत्पौल्लेण पञ्चपाद्युणादिसूत्रे इदं पठ्यते इत्युक्तम्। तन्न। क्विब्वचि

इति क्विब्दीर्घौ प्रकम्य, 'परौ व्रजेः' इति सूत्रस्य पाठात् । अस्मिन्नंशे पञ्चपादीदशपाद्योरेकवाक्यत्वात् । यदपि प्राचो ग्रन्थे क्वचित्पठ्यते चिणिति तदप्यपाणिनीयत्वादुपेक्ष्यम् । एतेन प्रघट्टकान्तरे स्तुद्रु परिव्रजां दीर्घश्चेति केचिदिति प्राचो ग्रन्थोऽपि प्रत्युक्तः । सूत्रारूढे सर्वसम्मते चार्थे केचिदित्युक्तेरप्रामाणिकत्वात् । यदपि धनर्तिचक्षिङ्क्षिपिनपिजनियजेरुस् इति पठितं तदप्यनाकरम् । तथा हि । जनेरुसिः । अर्तिपॄवपियजितनिधनितपिभ्यो नित् । एतेर्णिच्च । 'चक्षेः शिच्च' इति सर्वसम्मतः पाठः । 'वपूंषि तस्मै वपुषो वपुष्टरम्' इत्यादिमन्त्रेष्वाद्युदात्ततया अनुकूलश्च । वेदभाष्येऽप्येवमेव स्थितम् ॥ इति द्वितीये प्रमादाः ॥ तृतीयेऽपि 'स्तनिदूषिपुषिगदिमदिहृदिभ्यो णेरित्नुच्' इति प्राचा पठितम् । तत्र दूषिहृदी प्राचां वृत्तिकृतां ग्रन्थे क्वापि न पठितौ । दूषयित्नुः हृदयित्नुरिति प्रयोगोऽप्याकरे न दृष्टः । स्तनिहृषिपुषिमुदिगदिमदिभ्य इति हि पञ्चपादीपाठः । घुषिगन्धिमण्डिजनिगमिभ्य इति दशपाद्यामधिकमित्यन्यदेतत् । यदपि श्रुदक्षिस्पृहिगृहिहृजिभ्य आय्य इति पठित्वा दाराय्यः जयाय्य इति प्राचोक्तं तदपि न । हृजिग्रहणस्याकरविरुद्धत्वात् । यदपि जृविशिभ्यां झच् गण्डिमण्डिजनिनन्दिभ्यश्चेत्युक्त्वा गण्डयन्तो जनयन्त इत्युदाहृतं प्राचा, यच्च गण्डयन्त इति प्रतीकमुपादाय मेघनादमिति व्याख्याय 'गडि वदनैकदेशे' इति व्याख्यातृभिर्विवृतं तदेतत्सर्वं प्रामादिकम् । तथा हि उणादिवृत्तिषु गडीति निरनुषङ्गं पठित्वा 'गड सेचने' इति विवृतम् । अयामन्त' इति सूत्रवृत्तिन्यासहरदत्तादिसकलग्रन्थेष्वेवम् । माधवग्रन्थेऽप्येवमेव । युक्तश्चैतत् । मेघ इति व्याख्यानं प्रति सेचनार्थस्यैवानुगुणत्वात् । जनेः पाठोऽप्यप्रामाणिकः । जिधातुं पठित्वा जयन्तः पाकशासनिरिति सर्वैर्निवृत्तत्वात् अप्रसिद्धत्वाच्च ॥ इति तृतीये प्राचः प्रमादाः ॥ यदपि कृगृस्तृजागृभ्यः क्विन् । गीर्विः स्तृर्विरिति । तदपि लिपिभ्रमप्रयुक्तमेव । 'कॄ विक्षेपे, गॄ निगरणे, स्तृञ् आच्छादने' इति प्राचो ग्रन्थं विवृण्वतामुक्तिरपि मूलाशुद्ध्यैव हेया । जृगृस्तृजागृभ्यः क्विन् इति पाठः उणादिवृत्तिकृतां माधवादीनाञ्च सम्मतः । जीर्विः पशुः । शीर्विर्हिंस्रः । स्तीर्विरध्वर्युरिति च तत्तद्ग्रन्थेषूदाहृतम् । स्तृ इत्यस्य दीर्घान्तत्वे एव हि, 'ऋत इद्धातोः' इतीत्त्वं लभ्यते, न तु ह्रस्वान्तत्वेऽपि । तस्माद्यथाकरमेव ग्रहीतुमुचितामिति दिक् । 'ग्लाज्याहात्वरिभ्यो निरित्यप्यनाकरम् । वीज्याज्वरिभ्यो निरिति पठित्वा सूत्रद्वयानन्तरं वहिश्रीति सूत्रे ग्लाहात्वरिभ्यो नित्' इति सूत्रितत्वात् । तूर्णीरथः सदानव इत्यादावायुदात्तदर्शनाच्च । न च 'स्त्रियां क्तिन्' इत्यधिकारस्थं वार्तिकमेवेदं प्राचोदाहृतं न तूणादिस्थमिति वाच्यम् । एवमपि त्वरतेः पाठस्यानुचितत्वात् । न ह्यसौ वार्तिकेऽस्तीति दिक् । एवं संस्त्याने स्त्यायतेर्ड्डिति प्राचोदाहृतमप्यनाकरम् । स्त्यायतेर्ड्डित्येव सूत्रस्याकरे पञ्चपाद्यान्दशपाद्याञ्च उपलम्भात् । संस्त्याने स्त्यायतेर्ड्ड् स्त्री सूते सप्रसवे पुमान्' इति तु भाष्ये श्लोकपाठः । स एव माधवेनोपन्यस्तः । न तु सूत्रपाठस्य तथात्वं दृश्यते । एतद्ग्रन्थव्याख्यातॄणामपि प्रमादा ऊह्याः । यथा पाणिन्यादिमुनीनिति व्याचक्षाणैरुक्तम् । मनेरुच्चोपधाया इति । न ह्येवंविधं सूत्रं पञ्चपाद्यां दशपाद्यामप्यस्ति । अत इत्यनुवर्तमाने मनेरुच्चेति सूत्रितत्वात् इति दिक् ॥ इति चतुर्थे प्राचः प्रमादाः ॥

॥ श्रीरस्तु ॥

॥ अथ उत्तरकृदन्तप्रकरणम् ॥

३१६९ । उणादयो बहुलम् । (३-३-१)

एते वर्तमाने संज्ञायां च बहुलं स्युः । केचिदविहिता अप्यूह्याः ।

'संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु' (भाष्यम्) ॥

३१७० । भूतेऽपि दृश्यन्ते । (३-३-२)

३१७१ । भविष्यति गम्यादयः । (३-३-३)

३१७२ । दाशगोघ्नौ संप्रदाने । (३-४-७३)

अथ उत्तरकृदन्तप्रक्रियाः निरूप्यन्ते—**उणादयो बहुलम्** ॥ तृतीयेऽध्याये तृतीयपादस्येदमादिमं सूत्रम् । **वर्तमाने संज्ञायाञ्चेति** ॥ 'वर्तमाने लट्' इत्यतः 'पुवस्संज्ञायाम्' इत्यतश्च तदनुवृत्तेरिति भावः । अत एव नञि हन एह च नञ्पूर्वाद्धन्तेरसिप्रत्यये प्रकृतेः एहादेशे व्युत्पन्न अनेहस्शब्दो वर्तमानकाल एवेत्युक्तं भाष्ये । संज्ञाशब्दश्चात्र रूढशब्दपरः । वैदिकानामपि शब्दानामुपलक्षणम् । अत एव 'नैगमरूढिभवं हि सुसाधु' इति वार्तिकम् । वैदिका रूढशब्दाश्चौणादिका इति भाष्यञ्च सङ्गच्छते । रूढाश्चैते उणादिप्रत्ययान्ताः अवयवार्थशून्या असन्तमप्यवयवार्थमाश्रित्य प्रायः कर्तरि व्युत्पाद्याः । उणादयो वेत्यनुक्त्वा बहुलग्रहणस्य प्रयोजनमाह । **केचिदविहिता अप्यूह्या इति** ॥ तदेवाह । **संज्ञास्वित्यादि** ॥ भाष्यस्थोऽयं श्लोकः । डित्थो डिबित्थ इत्यादौ धातुरूपाणि प्रत्ययाश्च यथासम्भवमूह्याः । गुणनिषेधादिकार्यवशात् अनूबन्धं विद्यात् । अनूबन्धमित्यत्र 'उपसर्गस्य घञ्यमनुष्ये' इति दीर्घः । एतत् उणादिषु शास्त्रं शासितव्यम् । 'कृवापाजि' इत्यादिसूत्राणि तु शाकटायनप्रणीतानि अस्यैव बहुलग्रहणस्य प्रपञ्च इत्यर्थः । **भूतेऽपि दृश्यन्ते** ॥ उणादय इति शेषः । वर्तमानाधिकारादिदं भूतग्रहणम् । दाशिः प्रयोगानुसारार्थः । इदं सूत्रं बहुलग्रहणवत्प्रपञ्चार्थम् । **भविष्यति गम्यादयः** ॥ भविष्यति काले गम्यादयश्शब्दाः णिनिप्रत्ययान्ताः निपात्यन्ते इत्यर्थः । ग्रामङ्गमीति निपातनान्नात्र णित्वम् गमिष्यन्नित्यर्थः । प्रस्थायी प्रस्थास्यमान इत्यर्थः ।

एतौ संप्रदाने कारके निपात्येते । दाशन्ति तस्मै दाशः । गां हन्ति तस्मै गोघ्नोऽतिथिः ।

३१७३ । भीमादयोऽपादाने । (३-४-७४)

भीमः । भीष्मः । प्रस्कन्दनः । प्ररक्षः । मूर्खः । खलतिः ।

३१७४ । ताभ्यामन्यत्रोणादयः । (३-४-७५)

संप्रदानापादानपरामर्शार्थं ताभ्यामिति । ततोऽसौ भवति तन्तुः । वृत्तं तदिति वर्त्म । चरितं तदिति चर्म ।

३१७५ । तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् । (३-३-१०)

क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः । मान्तत्वादव्ययत्वम् । कृष्णं द्रष्टुं याति । कृष्णं दर्शको याति । अत्र वाऽसरूपेण तृजादयो न । पुनर्ण्वुलुक्तेः ।

३१७६ । समानकर्तृकेषु तुमुन् । (३-३-१५८)

अक्रियार्थोपपदार्थमेतत् । इच्छार्थेष्वेककर्तृकेपूपपदेषु धातोस्तुमुन्स्यात् । इच्छति भोक्तुम् । वष्टि वाञ्छति वा ।

तुमुन्ण्वुलौ ॥ क्रियार्थायामिति ॥ क्रियोद्देश्यभूतक्रियावृत्तिधातौ उपपदे इत्यर्थः । भविष्यतीत्यनुवर्तते । तुमुनि नकार इत् मकारादुकार उच्चारणार्थः । ण्वुलि णलाविती, वोरकादेशः । **मान्तत्वादिति ॥** तुमुनो मान्तकृत्त्वात् 'कृन्मेजन्तः' इत्यव्ययत्वमित्यर्थः । ततश्च 'अव्ययकृतो भावे' इति वचनाद्भावे तुमुन् । ण्वुल् तु कर्तर्येव । **कृष्णं द्रष्टुमिति ॥** 'न लोकाव्यय' इति न षष्ठी । कृष्णकर्मकं भविष्यद्दर्शनार्थं यानमित्यर्थः । अत्र यातीत्युपपदम् । अत्र तुमुन्प्रत्ययप्रकृत्यर्थस्य दर्शनस्य यानार्थत्वं तुमुना द्योत्यं वाच्यं वा । **कृष्णं दर्शको यातीति ॥** कृष्णं द्रक्ष्यन् तदर्थं यातीत्यर्थः । 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति न षष्ठी । ननु तुमुनो भावार्थकत्वे तद्विषये कर्तरि विहितानां तृजादीनामप्रवृत्तावपि ण्वुल्विषये कर्तरि तृजादयः कुतो न स्युः । न च विशेषविहितेनानेन ण्वुला तृजादयो बाध्यन्ते इति वाच्यम् । वासरूपविधिना तद्बाधस्य पाक्षिकत्वादित्यत आह । **अत्रेति ॥** क्रियार्थक्रियोपपदे विषये वासरूपविधिना पक्षे प्राप्ताः ये तृजादयस्ते न भवन्तीत्यर्थः । आदिना 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इत्यादिसङ्ग्रहः । कुतोऽत्र तृजादयो नेत्यत आह । **पुनर्ण्वुलुक्तेरिति ॥** 'ण्वुल् तृचौ' इति कालसामान्ये कर्तरि विहितो ण्वुल् क्रियार्थक्रियोपपदे विषये भवतीति पुनरिह ण्वुल्विधानात् तदितरतृजादयो न भवन्तीति विज्ञायते इति भावः । **समानकर्तृकेषु ॥** 'तुमुन्ण्वुलौ क्रियायाम्' इत्येव सिद्धे किमर्थमिदमित्यत आह । **अक्रियार्थेति ॥**

३१७७। शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्। (३-४-६५)

एषूपपदेषु धातोस्तुमुन्स्यात्। शक्नोति भोक्तुम्। एवं धृष्णोतीत्यादौ। अर्थग्रहणमस्तिनैव संबध्यते। अनन्तरत्वात्। अस्ति भवति विद्यते वा भोक्तुम्।

३१७८। पर्याप्तिवचनेष्वलमर्थेषु। (३-४-६६)

पर्याप्तिः पूर्णता। तद्वाचिषु सामर्थ्यवचनेषूपपदेषु तुमुन्स्यात्। पर्याप्तो भोक्तुं प्रवीणः कुशलः पटुरित्यादि। 'पर्याप्तिवचनेषु' किम्। अलं भुक्त्वा। 'अलमर्थेषु' किम्। पर्याप्तं भुङ्क्ते। प्रभूततेह गम्यते न तु भोक्तुः सामर्थ्यम्।

३१७९। कालसमयवेलासु तुमुन्। (३-३-१६७)

पर्यायोपादानमर्थोपलक्षणार्थम्। कालार्थेषूपपदेषु तुमुन्स्यात्। कालः समयो वेला अनेहा वा भोक्तुम्। प्रैषादिग्रहणमिहानुवर्तते तेनेह न। 'भूतानि कालः पचतीति वार्ता'।

इच्छार्थेष्विति ॥ 'इच्छार्थेषु लिङ्लोटौ' इत्यतस्तदनुवृत्तेरिति भावः। **इच्छति भोक्तुमिति** ॥ अत्र इच्छत्युपपदार्थस्य इच्छाया भोजनोद्देश्यत्वाभावेऽपि तुमुन्। इच्छार्थेष्वित्यर्थग्रहणस्य प्रयोजनमाह। **वष्टि वाञ्छति वेति** ॥ यद्यपि वशेः छान्दसेषु परिगणनं धातुपाठे। तथापि 'वष्टि भागुरिः' इति वार्तिकप्रयोगात् लोकेऽपि प्रयोग इति भावः। **शकधृष** ॥ 'शकधृषज्ञा' इति सूत्रमप्यक्रियोपपदार्थम्। **शक्नोति भोक्तुमिति** ॥ अत्र शक्तेर्भोजनोद्देश्यत्वाभावेऽपि तुमुन्। **एवमिति** ॥ धृष्णोति जानाति ग्लायति घटते आरभते लभते क्रमते उत्सहते अर्हति वा भोक्तुमित्युदाहार्यम्। **अस्तिनैवेति** ॥ न तु शकादिनेत्यर्थः। कुत इत्यत आह। **अनन्तरत्वादिति** ॥ सन्निहितत्वादित्यर्थः। **पर्याप्तिवचने** ॥ पर्याप्तिरित्यस्य विवरणम्। **पूर्णतेति** ॥ अलमर्थेष्वित्यस्य विवरणम्। **सामर्थ्यवचनेष्विति** ॥ **पर्याप्तो भोक्तुमिति** ॥ अन्यूनसामर्थ्यवानित्यर्थः। वचनग्रहणस्य फलमाह। **प्रवीण इत्यादि** ॥ **अलं भुक्त्वेति** ॥ अत्र अलमिति प्रतिषेधार्थकम्। ननु पर्याप्त्यर्थकमिति भावः। **पर्याप्तं भुङ्क्ते इति** ॥ बहुलमन्नं भुङ्क्ते इत्यर्थः। **प्रभूततेति** ॥ अन्नस्येति शेषः। **कालसमयवेलासु** ॥ अक्रियोपपदेऽपि प्रवृत्त्यर्थमिदम्। ननु कालपर्यायाणां कतिपयानां प्रहणात्तदितरस्मिन् अनेह आदिशब्दे उपपदे न स्यादित्यत आह। **पर्यायोपादानमर्थोपलक्षणार्थमिति** ॥ **अनुवर्तते इति** ॥ प्रैषातिसर्गसूत्रादिति भावः। **भूतानीति** ॥ पृथिव्यादिपञ्चभूतानि कालः पचति उपचयापचयादिविकारं प्रापयति इति वार्ता लोकवृत्तान्त

३१८०। भाववचनाश्च। (३-३-११)

भाव इत्यधिकृत्य वक्ष्यमाणा घञादयः क्रियार्थायां क्रियायां भविष्यति स्युः। यागाय याति। 'तुमर्थात्' (सू ५८२) इति चतुर्थी।

३१८१। अण्कर्मणि च। (३-३-१२)

कर्मण्युपपदे क्रियार्थायां क्रियायां चाण्स्यात्। ण्वुलोऽपवादः। काण्डलावो व्रजति। परत्वादयं कादीन्बाधते। कम्बलदायो व्रजति।

इत्यर्थः। **भाववचनाश्च** ॥ क्रियार्थायां क्रियायामिति भविष्यतीति चानुवर्तते। भावे चेत्येव सिद्धे वचनग्रहणस्य प्रयोजनमाह। **भाव इत्यधिकृत्येति** ॥ भावे इत्यधिकृत्य घञादयो विधास्यन्ते ये सामान्यतः ते क्रियार्थायां क्रियायां उपपदे भविष्यति काले विशेषविहितेनापि तुमुना समुच्चिता भवन्तीत्यर्थः। न च वाऽसरूपविधिना सिद्धमेतदिति शङ्क्यम्। 'क्त्वाल्युट् तुमुन् खलर्थेषु वाऽसरूपविधिर्नास्ति' इत्युक्तेरिति भावः। ननु यागाय यातीत्यत्र यागस्य सम्प्रदानत्वाभावात् कथं चतुर्थी। नापि तादर्थ्यचतुर्थी तादर्थ्यस्य प्रत्ययेनैव लाभादित्यत आह। **तुमर्थादिति** ॥ **अण् कर्मणि च** ॥ चकारेण क्रियार्थायां क्रियायामिति समुच्चीयते। तदाह। **क्रियार्थायां क्रियायाञ्चेति** ॥ तथा च क्रियार्थायां क्रियायां कर्मणि चेत्युपपदद्वये सत्येवास्य प्रवृत्तिः नान्यतरस्मिन्निति भाष्ये स्पष्टम्। कर्त्रर्थकोऽयमण्। कर्तरि कृदभिधानाधिकारात्। अत्र 'ण्वुलृतृचौ' इति बाधित्वा 'कर्मण्यण्' इति सामान्यविधिना अण् प्राप्तः तन्तावत्क्रियार्थायां क्रियायामुपपदे विशेषविहितस्तुमुन्ण्वुलाविति ण्वुल् बाधितुमुद्युङ्क्ते, पुनर्ण्वुल्विधिसामर्थ्येन वाऽसरूपविधेरत्राप्रवृत्तेरुक्तत्वात्। तमिमं ण्वुलम्बाधितुमयमण्विधिः। तदाह। **ण्वुलोऽपवाद इति** ॥ 'तुमुन्ण्वुलौ' इति विहितस्य ण्वुलोऽपवाद इत्यर्थः। एवञ्च ण्वुला बाधितस्य 'कर्मण्यण्' इत्यस्य अयमण्विधिः प्रतिप्रसवार्थ इति स्थितम्। ननु ण्वुला बाधितस्याणः प्रतिप्रसवेऽपि 'आतोऽनुपसर्गे' इति कप्रत्ययः कम्बलदायो व्रजतीत्यत्र दुर्निवारः। कप्रत्ययस्य कर्मण्यणपवादत्वात् सरूपत्वेन च वाऽसरूपविध्यप्रवृत्तेः। न चायं वैशेषिकोऽण्विधिः कप्रत्ययस्याप्यपवाद इति शङ्क्यम्। न ह्ययमपूर्वोऽण्विधिः। किन्तु लाघवात् 'कर्मण्यण्' इत्यणेवात्र प्रतिप्रसूयते। सच 'कर्मण्यण्' इत्यण् सामान्यविहितः 'आतोऽनुपसर्गे कः' इति वैशेषिकस्य नापवादः। प्रत्युत कप्रत्यय एव तदपवादः। अतः कम्बलदायो व्रजतीत्यत्र कर्मण्यणपवादं तुमुन्ण्वुलाविति ण्वुलम्बाधित्वा कप्रत्ययः स्यादित्यत आह। **परत्वादयं कादीन् बाधते इति** ॥ आदिना सामगो गुरुकुलं व्रजतीत्यादौ गापोष्टगित्यादिसङ्ग्रहः। अण्कर्मणि चेति ह्यावर्तते। प्रतिप्रसवविधिरपूर्वविधिश्च। तत्र प्रतिप्रसवविधिना ण्वुला अणो बाधनिवृत्तिः। अपूर्वविधिविहितस्य त्वणः तृतीयपादीयस्य द्वितीयपादस्थकप्रत्ययापेक्षया परत्वात् कादिप्रत्यया अणा अनेन वाध्यन्ते इत्यर्थः। एतच्च भाष्ये स्पष्टम्। इत ऊर्ध्वम् 'लट् शेषे च' इत्यादिसूत्रेषु क्रियार्थायां क्रियायामिति निवृत्तम्। भविष्यतीत्येवानुवर्तते इति

३१८२। पदरुजविशस्पृशो घञ्। (३-३-१६)

भविष्यतीति निवृत्तम्। पद्यतेऽसौ पादः। रुजतीति रोगः। विशतीति वेशः। स्पृशतीति स्पर्शः।

३१८३। सृ स्थिरे। (३-३-१७)

'सृ' इति लुप्तविभक्तिकम्। स्थिरे कर्तरि सर्तेः घञ्स्यात्। सरति कालान्तरमिति सारः। 'व्याधिमत्स्यबलेषु चेति वाच्यम्'। (वा २१७४) अतीसारो व्याधिः। 'उपसर्गस्य' इति दीर्घः। अन्तर्भावितण्यर्थोऽत्र सरतिः। रुधिरादिकमतिशयेन सारयतीत्यर्थः। विसारो मत्स्यः। 'सारो बले दृढांशे च।'

३१८४। भावे। (३-३-१८)

सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ्स्यात्। पाकः। पाकौ।

३१८५। स्फुरतिस्फुलत्योर्घञि। (६-१-४७)

अनयोरेच आत्वं स्याद्घञि। स्फारः। स्फालः। 'उपसर्गस्य घञ्मि—' (सू १०४४) इति दीर्घः। परीहारः। 'इकः काशे' (सू १०४५)। काशे उत्तरपदे इगन्तस्यैव प्रादेर्दीर्घः स्यात्। नीकाशः अनूकाशः। 'इकः' किम्।

बोध्यम्। **पदरुज** ॥ कर्तरीत्येव। **पद्यतेऽसाविति** ॥ करणस्याप्यत्र विवक्षातः कर्तृत्वम्। 'एरच्' इत्यतः प्राक् घञधिक्रियते। **सृ स्थिरे** ॥ **लुप्तविभक्तिकमिति** ॥ लुप्तपञ्चमीकमित्यर्थः। **स्थिरे कर्तरीति** ॥ स्थिरे इति कर्तृविशेषणम्। न तूपपदमिति भावः। **सर्तेरिति** ॥ भ्वादेर्जुहोत्यादेश्च ग्रहणम्, न तु जुहोत्यादेरेव, व्याख्यानात्। तदाह : **सरति कालान्तरामेति सार इति** ॥ अर्धर्चादिपाठात् पुस्त्वं क्लीबत्वञ्च। अत एव च स्थिर इति नोपपदम्। **व्याधीति** ॥ वार्तिकमस्थिरार्थम्। **सारो बल इति** ॥ भाष्ये तु बले खदिरसार इत्युदाहृतम्। **भावे** ॥ भावो भावना क्रिया सा च धातुत्वेन सकलधातुवाच्येत्यादि मूलव्याख्यावसरे सर्वधातुवाच्यं क्रियासामान्यं तद्विशेषः पाकादिश्च धातुविशेषवाच्यः। तत्र क्रियासामान्यं भावशब्दार्थः। तिङ्वाच्यं लिङ्गसङ्ख्यान्वयायोग्यं साध्यावस्थापन्नम्। कृद्वाच्यन्तु लिङ्गसङ्ख्यान्वययोग्यं सिद्धावस्थापन्नम्, कृदभिहितो भावो द्रव्यवत्प्रकाशत इति भाष्यादिति प्रपञ्चितम्। तदाह। **सिद्धावस्थापन्न इत्यादिना** ॥ **घञिति** ॥ 'पदरुज' इत्यतस्तदनुवृत्तेरिति भावः। **इकः काशे** ॥ **उत्तरपदे इति** ॥ 'अलुगुत्तरपदे' इत्यतस्तदनुवृत्तेरिति भावः। 'ढ्रलोपे पूर्वस्य' इत्यतो दीर्घ इत्यनुवर्तते। 'उपसर्गस्य घञ्यमनुष्ये' इत्यतो घञीति। तेनैव सिद्धे नियमार्थमिदम्। तदाह। **इगन्तस्यैवेति** ॥ **दीर्घः स्यादिति** ॥ घञीति शेषः।

प्रकाशः । 'नोदात्तोपदेश–' (सू २७६३) इति न वृद्धिः । शमः । आचमा-देस्तु । आचामः । कामः । वामः । विश्राम इति त्वपाणिनीयम् ।

३१८६ । अकर्तरि च कारके संज्ञायाम् । (३-३-१९)

कर्तृभिन्ने कारके घञ्स्यात् ।

३१८७ । घञि च भावकरणयोः (६-४-२७)

रञ्जेर्नलोपः स्यात् । रागः । 'अनयोः' किम् । रज्यत्यस्मिन्रङ्गः । प्रास्यत इति प्रासः । 'संज्ञायाम्' इति प्रायिकम् । को भवता लाभो लब्धः । इत उत्तरं 'भावे' 'अकर्तरि कारके' इति 'कृत्यल्युटो बहुलम्' (सू २८४१) इति यावद्वयमप्यनुवर्तते ।

३१८८ । स्यदो जवे । (६-४-२८)

स्यन्देर्घञि नलोपो वृद्ध्यभावश्च निपात्यते । स्यदो वेगः । अन्यत्र स्यन्दः ।

३१८९ । अवोदैधौद्म्रप्रश्रथहिमश्रथाः । (६-४-२९)

आचाम इति ॥ अनाचमेरिति पर्युदासान्न वृद्धिनिषेध इति भावः । **अपाणिनीयमिति** ॥ 'नोदात्तोपदेशस्य' इति वृद्धिनिषेधादिति भावः । **अकर्तरि** ॥ कारक इति प्रत्ययार्थनिर्देशः । न तूपपदम् । व्याख्यानात् । संज्ञाशब्देन रूढिर्विवक्षितः । तेन राग इति वक्ष्यमाणमुदाहरणं सङ्गच्छते । **घञि** ॥ 'अनिदिताम्' इति नलोपप्रकरणे 'रञ्जेश्च' इत्युत्तरमिदं सूत्रम् । तदाह । **रञ्जेर्नलोपः स्यादिति** ॥ सूत्रे शेषपूरणमिदम् । **राग इति** ॥ 'चजोः कु घिण्ण्यतोः' इति जस्य गः, नलोपे कृते उपधावृद्धिः रञ्जनक्रियेत्यर्थः, रञ्जनद्रव्यं वा । **प्रास्यत इति** ॥ प्रपूर्वात् 'असु क्षेपणे' इत्यस्मात् 'अकर्तरि च' इति करणे घञि प्रास इति रूपमित्यर्थः । प्रास्यन्ते क्षिप्यन्ते शत्रवोऽननेति प्रासः आयुधविशेषः । **प्रायिकमिति** ॥ स्पष्टमिदं भाष्ये । ततश्च असंज्ञायामपि क्वचिदयं घञ् भवतीति भावः । तदाह । **को भवतेति** ॥ **लाभ इति** ॥ भावे घञ् । कः लाभः हिरण्यादिप्राप्तिरूपः लब्धः सम्पन्न इत्यर्थः । भवतेत्यस्य लब्ध इत्यत्रान्वयात् 'नलोक' इति षष्ठी निषेधः । **अनुवर्तत इति** ॥ अत्र व्याख्यानमेव शरणम् । 'स्यन्दू प्रस्रवणे' इत्यस्मात् 'अकर्तरि च' इति घञि क्विङ्दभावात् 'अनिदिताम्' इति नलोपो न प्राप्तः । तत्र स्यन्देश्चेत्युक्तौ यद्यपि नलोपस्सिद्ध्यति । तथापि कृते नलोपे उपधावृद्धिः स्यात् । तत्र नलोपमुपधावृद्ध्यभावञ्च प्रापयितुमाह । **स्यदो जवे** ॥ **स्यदो वेग इति** ॥ वेगे रूढोऽयम् । **अन्यत्रेति** ॥ प्रस्रवणे इत्यर्थः । **अवोदैधौद्म्र** ॥ अवोद, एध, ओद्म, प्रश्रथ, हिमश्रथ, एषां द्वन्द्वः । **अवोद इति** ॥ घञि नलोपो निपात्यते । कृते नलोपे

अवोदः अवक्लेदनम्। एध इन्धनम्। ओद्म उन्दनम्। श्रन्थेर्नलोपो वृद्ध्यभावश्च। प्रश्रथः। हिमश्रथः।

३११०। परिमाणाख्यायां सर्वेभ्यः। (३-३-२०)

घञ्। अजपोर्बाधनार्थमिदम्। एकस्तण्डुलनिचायः। तण्डुलानां निचायः राशिः परिच्छिद्यते। द्वौ शूर्पनिष्पावौ। शूर्पेण निष्पावौ। द्वौ कारौ। अत्र विक्षिप्यमाणो धान्यादिः परिच्छिद्यते। 'दारजारौ कर्तरि णिलुक्च' (वा २१८२)। दारयन्तीति दाराः। जरयतीति जारः उपपतिः।

आद्गुणः। लघूपधगुणस्तु न भवति। 'न धातुलोपे' इति निषेधात्। **एध इति** ॥ 'ञि इन्धी दीप्तौ' इत्यस्मात् घञि नलोपः। 'न धातुलोप' इति निषेधं बाधित्वा गुणश्च निपात्यते। **ओद्म इति** ॥ उन्देरौणादिके मन्प्रत्यये नलोपो गुणश्च निपात्यते। **श्रन्थेरिति** ॥ प्रपूर्वस्य हिमपूर्वस्य च घर्त्रीति शेषः। **परिमाणाख्यायां** ॥ **घञिति** ॥ शेषपूरणम्। सर्वेभ्य धातुभ्य अकर्तरि कारके वाच्ये घञ् स्यात् प्रत्ययार्थस्य परिच्छेदे गम्ये इत्यर्थः। ननु 'अकर्तरि कारके' इत्येव सिद्धे किमर्थमिदमित्यत आह। **अजपोरिति** ॥ 'एरच्' 'ऋदोरप्' इति वक्ष्यमाणयोर्बाधनार्थमित्यर्थः। 'अकर्तरि च' इति घञ् तु ताभ्यां विशेषविहिताभ्यां बाध्येत, सरूपत्वेन वाऽसरूपविधेरप्रवृत्तेरिति भावः। **एकस्तण्डुलनिचाय इति** ॥ निष्कृष्य चीयते सङ्गीक्रियते इति निचायः। कर्मकारके वाच्ये 'एरच्' इत्यस्यापवादो घञ्। तण्डुलनिचायशब्दे विग्रहं दर्शयति। **तण्डुलानामिति** ॥ निचायशब्दस्य विवरणम्। **राशिरिति** ॥ **परिच्छिद्यते इति** ॥ तण्डुलावयवकसङ्घातात्मकः राशिरेकत्वेन परिच्छिद्यते इत्यर्थः। **द्वौ शूर्पनिष्पावाविति** ॥ निष्पूयते तुषापनयनेन शोध्यते इति निष्पावः तण्डुलादिराशिः। कर्मणि घञ् अबपवादः। शूर्पेण निष्पावः शूर्पनिष्पावः। 'कर्तृकरणे कृता बहुलम्' इति समासः। द्वित्वन्तु शूर्पद्वारा निष्पावेऽन्वेति। अतश्शूर्पद्वित्वमार्थिकम्। न तु शाब्दमिलेकवचनं निर्बाधम्। तदाह। **शूर्पेणेत्यादि** ॥ **द्वौ काराविति** ॥ कीर्यते विक्षिप्यते इति कारः। धान्यादिराशिः कर्मणि घञ् अबपवादः। तदाह। **अत्र विक्षिप्यमाण इति** ॥ न च धातोरित्यधिकारादेव धातुमात्रात्सिद्धे सर्वग्रहणं व्यर्थमिति शङ्क्यम्। प्रकृत्याश्रय एवापवादो बाध्यते। नत्वर्थाश्रय इत्येतदर्थत्वात्। तेनेह न। एका तिलोच्छ्रितिः। उच्छ्रीयते ऊर्ध्वीक्रियते इत्युच्छ्रितिः। ऊर्ध्वं कृतो राशिः कर्मणि स्त्रियां क्तिन्। स च अर्थाश्रयत्वात् प्रकृत्याश्रयत्वाभावात् नानेन घञा बाध्यते। किन्तु एरच् 'ऋदोरप्' इति प्रकृत्याश्रयावेव अजपौ बाध्येते इति भाष्ये स्पष्टम्। **दारजाराविति** ॥ वार्तिकम्। 'दृ विदारणे', 'जॄ वयोहानौ' आभ्यां ण्यन्ताभ्याङ्कर्तरि घञ्। णिलोपं बाधित्वा णिलुक् चेत्यर्थः। दारयन्ति चित्तं विद्रावयन्तीति दाराः भार्या। "दाराः पुंसि च भूम्न्येव" इत्यमरः। घञि णिलुक्। ण्याश्रयवृद्धौ निवृत्तायां घञाश्रया वृद्धिः। तदाह। **दारयन्तीति दारा इति** ॥ जरयति नाशयति कुलमिति जारः जॄधातोर्ण्यन्तात् घञ् णिलुक्। णिलोपे सति तु तस्य परनिमित्तकत्वेन 'अचः परस्मिन्' इति स्थानिवत्त्वात् घञाश्रया वृद्धिः न स्यात्। न च णिनिमित्तैव

३१९१ । इङश्च । (३-३-२१)

घञ् । अचोऽपवादः । उपेत्यास्मादधीयते उपाध्यायः । 'अपादाने स्त्रियामुपसंख्यानं तदन्ताच्च वा ङीप्' (वा २१८४) । उपाध्याया—उपाध्यायी । 'शॄ वायुवर्णनिवृतेषु' (वा २१८५) । 'शॄ' इत्यविभक्तिको निर्देशः । शारो वायुः । करणे घञ् । शारो वर्णः । चित्रीकरणमिह धात्वर्थः । निव्रियते आव्रियतेऽनेनेति निवृतमावरणम् । बाहुलकात्करणे क्तः । 'गौरिवाकृतनीशारः प्रायेण शिशिरे कृशः' । अकृतप्रावरण इत्यर्थः । प्रदक्षिणप्रसव्यगामिनां शाराणाम्' इति वार्तिककारप्रयोगादक्षेष्वपि शार इति भवति ।

३१९२ । उपसर्गे रुवः । (३-३-२२)

घञ् । संरावः । 'उपसर्गे' किम् । रवः ।

३१९३ । अभिनिसः स्तनः शब्दसंज्ञायाम् । (८-३-८६)

अस्मात्स्तनः सस्य मूर्धन्यः अभिनिष्टानो वर्णः । शब्दसंज्ञायां किम् । अभिनिःस्तनति मृदङ्गः ।

वृद्धिरस्त्विति वाच्यम् । 'जनीजॄपृक्रुसुरञ्जोऽमन्ताश्च' इति मित्त्वे 'मितां ह्रस्वः' इति णिनिमित्तकह्रस्वापत्तेः । णिलुकि तु तस्य परनिमित्तकत्वाभावेन स्थानिवत्त्वाभावान्न ह्रस्वप्रसङ्गः । तदाह । **जरयतीति जार इति** ॥ **उपपतिरिति** ॥ "जारस्तूपपतिस्समौ" इत्यमरः । **इङश्च** ॥ **घञिति** शेषपूरणम् । 'इङ् अध्ययने' नित्यमधिपूर्वः । अस्मादकर्तरि कारके घञित्यर्थः । अकर्तरि चेति सिद्धेराह । **अचोऽपवाद इति** ॥ 'एरच्' इत्यस्यापवाद इत्यर्थः । **उपेत्येति** ॥ समीपम्प्राप्य यस्मादधीते स उपाध्यायः इत्यर्थः । अपादाने घञिति भावः । 'आख्यातोपयोगे' इत्यपादानत्वम् । **अपादाने इति** ॥ अपादानकारके वाच्ये स्त्रीत्वे गम्ये इङो घञ उपसङ्ख्यानमित्यर्थः । **तदन्ताच्च वा ङीषिति** ॥ वार्तिकम् । 'अपादाने स्त्रियाम्' इति विहितघञन्तात् इत्यर्थः । अत्र पठितमेव वार्तिकं स्त्रीप्रत्ययाधिकारे या तु स्वयमेव अध्यापिका, तत्र वा ङीषित्युपन्यस्तं मूले । ननु 'अकर्त्तरि च' इत्येव सिद्धे किमर्थङ्घञो विधानमिति चेन्न । 'घञनुक्रमणमजपोर्विषये' इति 'एरच्' 'ऋदोरप्' इत्यजपोरेव विषये 'अकर्तरि च' इति घञ्विधिरिति भाष्यवचनात् स्त्रीत्वे गम्ये 'स्त्रियां क्तिन्' इति क्तिन्विषये घञि अप्राप्ते 'अपादाने स्त्रियाम्' इति घञ्वचनात् । **उपाध्यायेति** ॥ उपेत्य अस्यास्सकाशादधीयते इत्यर्थः । **शॄवायिवि** ॥ वार्त्तिकम् । **अविभक्तिकमिति** ॥ लुप्तपञ्चमीकमित्यर्थः । वायौ वर्णे निवृत्ते च कर्त्तरि शॄधातोर्घञित्यर्थः । अपोऽपवादः । **शारो वायुरिति** ॥ शीर्यन्ते पर्णफलादीनि यैरिति विग्रहः । तदाह । **करणे घञिति** ॥ **चित्रीकरणमिति** ॥ शीर्यन्ते चित्रीक्रियन्ते पटादयः अनेनेति भावः । **गौरिवेति** ॥ भाष्यस्थं श्लोकार्धम् । नीशार इत्यत्र 'उपसर्गस्य घञि' इति दीर्घः । अक्षे शारशब्दं साधयति । **प्रदक्षिणेति** ॥ **वार्तिककारप्रयोगादिति** ॥ पञ्चमस्य द्वितीये 'अनुपदसर्वान्नायानयम्' इति सूत्रभाष्ये स्थितमिदम् । **उपसर्गे**

३१९४। समि युद्रुदुवः। ३-३-२३)

संयूयते मिश्रीक्रियते गुडादिभिरिति संयावः पिष्टविकारोऽपूपविशेषः। संद्रावः। संदावः।

३१९५। श्रिणीभुवोऽनुपसर्गे। (३-३-२४)

श्रायः। नायः। भावः। 'अनुपसर्गे' किम्। प्रश्रयः। प्रणयः। प्रभवः। कथम् 'प्रभावो राज्ञः' इति। प्रकृष्टो भाव इति प्रादिसमासः। कथम्। 'राज्ञो नयः' इति। बाहुलकात्।

३१९६। वौ क्षुश्रुवः। (३-३-२५)

विक्षावः। विश्रावः। 'वौ' किम्। क्षवः। श्रवः।

३१९७। अवोदोर्नियः। (३-३-२६)

अवनायोऽधोनयनम्। उन्नायः ऊर्ध्वनयनम्। कथम् 'उन्नयः उत्प्रेक्षा' इति। बाहुलकात्।

३१९८। प्रे द्रुस्तुस्रुवः। (३-३-२७)

प्रद्रावः। प्रस्तावः। प्रस्रावः। 'प्रे' इति किम्। द्रवः। स्तवः। स्रवः।

३१९९। निरभ्योः पूल्वोः (३-३-२८)

निष्पूयते शूर्पादिभिरिति निष्पावो धान्यविशेषः। अभिलावः। 'निरभ्योः' किम्। पवः। लवः।

३२००। उन्न्योर्ग्रः। (३-३-२९)

उद्गारः। निगारः। 'उन्न्योः' किम्। गरः।

३२०१। कॄ धान्ये। (३-३-३०)

रुवः ॥ घञिति शेषः। उपसर्गे उपपदे रुधातोर्घञित्यर्थः। अबपवादः। **समि युद्रुदुवः** ॥ समित्युपसर्गे उपपदे यु द्रु दु एभ्यः घञित्यर्थः, अबपवादः। **श्रिणी** ॥ उपसर्गे असति श्रि, नी, भू, एभ्यो घञित्यर्थः, अजपोरपवादः। **बाहुलकादिति** ॥ 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणादित्यर्थः। **वौ क्षुश्रुवः** ॥ वि इत्युपसर्गे उपपदे क्षु, श्रु, धातोर्घञित्यर्थः। अबपवादः। **अवोदोर्नियः** ॥ अव, उत्, अनयोरुपपदयोः नीधातोर्घञित्यर्थः। अजपवादः। उन्नय इत्यस्य विवरणम्। **उत्प्रेक्षेति** ॥ **प्रे द्रुस्तुस्रुवः** ॥ प्र इत्युपपदे द्रु, स्तु, स्रु, एभ्यः घञित्यर्थः। अबपवादः। **निरभ्योः** ॥ निर्, अभि, अनयोरुपपदयोर्घञित्यर्थः। अबपवादः। **उन्न्योर्ग्रः** ॥ उत्, नि, इत्युपपदयोर्घञित्यर्थः, अबपवादः। **कॄ धान्ये** ॥ कॄ इति

'कृ इत्यस्माद्धान्यविषयकादुन्न्योर्घञ्स्यात्। उत्कारो निकारो धान्यस्य विक्षेप इत्यर्थः। 'धान्ये' किम्। भिक्षोत्करः। पुष्पनिकरः।

३२०२। यज्ञे समि स्तुवः। (३-३-३१)

समेत्य स्तुवन्ति यस्मिन्देशे छन्दोगाः स देशः संस्तावः। 'यज्ञे' किम्। संस्तवः परिचयः।

३२०३। प्रे स्त्रोऽयज्ञे। (३-३-३२)

'अयज्ञे' इति छेदः। यज्ञे इति प्रकृतत्वात्। प्रस्तारः। 'अयज्ञे' किम्। बर्हिषः प्रस्तरो मुष्टिविशेषः।

३२०४। प्रथने वावशब्दे। (३-३-३३)

विपूर्वात्स्तृणातेर्घञ्स्यादशब्दविषये प्रथने। पटस्य विस्तारः। 'प्रथने' किम्। तृणविस्तरः। 'अशब्दे' किम्। ग्रन्थविस्तरः।

३२०५। छन्दोनाम्नि च। (३-३-३४)

'स्त्र' इत्यनुवर्तते। विष्टारपङ्क्तिश्छन्दः। विस्तीर्यन्तेऽस्मिन्नक्षराणीत्यधिकरणे घञ्। ततः कर्मधारयः।

३२०६। छन्दोनाम्नि च। (८-३-९४)

विपूर्वस्य स्तृणातेर्घञन्तस्य सस्य षत्वं स्याच्छन्दोनाम्नि। इति षत्वम्

३२०७। उदि ग्रहः। (३-३-३५)

उद्ग्राहः।

लुप्तपञ्चमीकम्। तदाह। कृ **इत्यस्मादिति॥ यज्ञे समि स्तुवः॥** समित्युपपदे स्तुधातोर्घञ् स्यात् यज्ञविषये प्रयोग इत्यर्थः। अधिकरणे ल्युटोऽपवादः। संस्तव इत्यस्य विवरणम्। **परिचय इति॥ प्रे स्त्रोऽयज्ञे॥ प्रकृतत्वादिति॥** यज्ञे इति तु च्छेदो न भवति। पूर्वसूत्रायज्ञग्रहणानुवृत्त्यैव सिद्धेरित्यर्थः। प्र इत्युपपदे स्तृधातोर्घञित्यर्थः। **प्रस्तार इति॥** इष्टकासन्निवेशविशेष इति याज्ञिकाः। **प्रथने वावशब्दे॥** वौ अशब्दे इति च्छेदः। तदाह। **विपूर्वादिति॥ छन्दो नाम्नि च॥** विपूर्वात् स्तृधातोर्घञ् स्यात्। अक्षरेयत्तात्मकछन्दसः संज्ञायामित्यर्थः। शब्दविषयत्वात् पूर्वेणाप्राप्ते वचनम्। **कर्मधारय इति॥** विष्टरश्चासौ पङ्क्तिश्चेति विग्रह इति भावः। ननु 'सात्पदाद्योः' इति निषेधादादेशसकाराभावाच्च कथमिह षत्वमित्यत आह। **छन्दोनाम्नीति॥** 'वृक्षासनयोर्विष्टरः' इत्युत्तरं सूत्रम्। वेदप्रसिद्धसंज्ञायां विष्टरशब्दः निपात्यते इत्यर्थः। **उदि ग्रहः॥** उदित्युपपदे ग्रहधातोः

३२०८ । समि मुष्टौ । (३-३-३६)

मल्लस्य संग्राहः । 'मुष्टौ' किम् । द्रव्यस्य संग्रहः ।

३२०९ । परिन्योर्नीणोर्द्यूताभ्रेषयोः । (३-३-३७)

परिपूर्वान्नयतेर्निपूर्वादिणश्च घञ्स्यात्क्रमेण द्यूते अभ्रेषे च विषये । परिणायेन शारान्हन्ति । समन्तान्नयनेनेत्यर्थः । एषोऽत्र न्यायः । उचितमित्यर्थः । 'द्यूताभ्रेषयोः' किम् । परिणयो विवाहः । न्ययो नाशः ।

३२१० । परावनुपात्यय इणः । (३-३-३८)

क्रमप्राप्तस्यानतिपातोऽनुपात्ययः । तव पर्यायः । 'अनुपात्यये' किम् । कालस्य पर्ययः अतिपात इत्यर्थः ।

३२११ । व्युपयोः शेतेः पर्याये । (३-३-३९)

तव विशायः । तव राजोपशायः । 'पर्याये' किम् । विशयः संशयः । उपशयः समीपशयनम् ।

३२१२ । हस्तादाने चेरस्तेये । (३-३-४०)

हस्तादान इत्यनेन प्रत्यासत्तिरादेयस्य लक्ष्यते । पुष्पप्रचायः । 'हस्तादाने' किम् । वृक्षाग्रस्थानां फलानां यष्ट्या प्रचयं करोति । 'अस्तेये' किम् । पुष्पप्रचयश्चौर्येण ।

३२१३ । निवासचितिशरीरोपसमाधानेष्वादेश्च कः । (३-३-४१)

घञित्यर्थः । 'ग्रहवृदृनिश्चिगमश्च' इत्यप्रत्ययस्य वक्ष्यमाणस्यापवादः । **समि मुष्टौ** ॥ समित्युपपदे ग्रहधातोर्घञ् स्यात् मुष्टिविषये धात्वर्थे गम्ये इत्यर्थः । **मल्लस्य सङ्ग्राह इति** ॥ दृढग्रहणं मुष्टेरित्यर्थः । **परिन्योः** ॥ **द्यूते अभ्रेषे चेति** ॥ द्यूतविषये नयने अभ्रेषविषये गमने च विद्यमानादित्यर्थः । अचोऽपवादः । शारान् अक्षान् । **एषोऽत्र न्याय इति** ॥ अभ्रेषेण वर्तनमित्यर्थः । उचितस्यार्थस्य अनपचारः अभ्रेषः । तदाह । **उचितमिति** ॥ **परावनुपात्यय इणः** ॥ परौ उपपदे इण्धातोर्घञ् अनुपात्यये गम्ये इत्यर्थः । **तव पर्याय इति** ॥ अनतिक्रमणमित्यर्थः । **कालस्य पर्यय इति** ॥ अतिक्रम इत्यर्थः । तदाह । **अतिपात इति** ॥ **व्युपयोः शेतेः** ॥ वि, उप, इत्युपपदयोः शीङ्धातोः घञ् स्यात् पर्याये गम्ये इत्यर्थः, अजपवादः । पर्यायः प्राप्तावसरता । **हस्तादाने** ॥ हस्तादाने गम्ये चिञ्धातोर्घञ् न तु स्तेये इत्यर्थः । ननु वृक्षशिखरमात्रमारुह्य पुष्पापचयं करोतीत्यत्राति-व्याप्तिमाशङ्क्य आह । **प्रत्यासत्तिरिति** ॥ आदेयस्य पुष्पादिद्रव्यस्य भूमिस्थितपुरुषीय-हस्तग्रहणयोग्यावस्थितिरित्यर्थः । **पुष्पप्रचयश्चौर्येणेति** ॥ करोतीति शेषः । **निवास** ॥

एषु चिनोतेर्घञ् स्यात् । आदेश्च ककारः । उपसमाधानं राशीकरणं तच्च धात्वर्थः । अन्ये प्रत्ययार्थस्य कारकस्योपाधिभूताः । निवासे । काशीनिकायः । चितौ । आकायमग्निं चिन्वीत । शरीरे । चीयतेऽस्मिन्नस्थ्यादिकमिति कायः । समूहे, गोमयनिकायः । 'एषु' किम् । चयः । 'चः कः' इति वक्तव्ये आदेरित्युक्तेर्यङ्लुक्यादेरेव यथा स्यादिति । गोमयानां निकेचायः । पुनःपुना राशीकरणमित्यर्थः ।

३२१४ । संघे चानौत्तराधर्ये (३-३-४२)

चेर्घञ् आदेश्च कः । भिक्षुनिकायः । प्राणिनां समूहः संघः । 'अनौत्तराधर्ये' किम् । सूकरनिचयः । स्तन्यपानादौ उत्तराधरभावेन शेरते । सङ्घे किम् । ज्ञानकर्मसमुच्चयः ।

३२१५ । कर्मव्यतिहारे णच्स्त्रियाम् । (३-३-४३)

स्त्रीलिङ्गे भावे णच् ।

३२१६ । णचः स्त्रियामञ् । (५-४-१४)

३२१७ । न कर्मव्यतिहारे । (७-३-६)

अत्र ऐञ्च स्यात् । व्यावक्रोशी । व्यावहासी ।

'अकर्तरि च कारके' इति भाव इति चानुवर्तते एव । **अन्ये इति** ॥ निवासचितिशरीरात्मका अर्था इत्यर्थः । **उपाधिभूता इति** ॥ विशेषणभूता इत्यर्थः, अजपवादः । **काशीनिकाय इति** ॥ निचीयते मोक्षोऽत्रत्यधिकरणे घञ् काशी मोक्षार्जनस्य निवास इत्यर्थः । 'चजोः कु घिण्ण्यतोः' इत्यस्य अव्यवहितयोरेव चजोः प्रवृत्तेरिह कत्ववचनम् । **आकायमिति** ॥ आचीयते इति कर्मणि घञ् । **शरीरे इति** ॥ उदाहरणसूचनमिदम् । **समूहे इति** ॥ उपसमाधानस्योदाहरणसूचनम् । निचीयते राशीक्रियते इति भावे घञ् । ननु निवासचितिशरीरोपसमाधानेषु चः क इत्येवास्तु । चकारस्य ककार इत्यर्थलाभादित्यत आह । **चः क इति वक्तव्य इति** ॥ **पुनःपुना राशीति** ॥ अत्र 'रो रि' इति लोपे 'ढ्रलोप' इति दीर्घः । **सङ्घे चानौत्तराधर्ये** ॥ चेर्घञिति शेषपूरणमिदम् । चेर्घञ् स्यात् सङ्घे वाच्ये न चौत्तराधर्ये इत्यर्थः । उत्तराधरयोर्भावः औत्तराधर्यम् । **प्राणिनां समूहः सङ्घ इति** ॥ व्याख्यानमेवात्र शरणम् । **कर्मव्यतिहारे** ॥ कर्मव्यतिहारः क्रियाविनिमयः परस्परकरणम्, तस्मिन्विषये धातोर्णिच् स्यात् स्त्रीत्वे गम्ये इत्यर्थः । अत्र अकर्तरि च कारके इति तु नानुवर्तते, व्याख्यानादिति बोध्यम् । **व्याक्रोशीति** ॥ परस्परं निन्दक इत्यर्थः । **व्यावहासीति** ॥ परस्परं हासक इत्यर्थः । उभयत्रापि 'णचः

३२१८ । अभिविधौ भाव इनुण् । (३-३-४४)

आदिवृद्धिः ।

३२१९ । अणिनुणः । (५-४-१५)

'इनण्यनपत्ये' (सू १२४५) स्वभावतः पुंलिङ्गे, सांराविणं वर्तते ।

३२२० । आक्रोशेऽवन्योर्ग्रहः । (३-३-४५)

'अव' 'नि' एतयोर्ग्रहेर्घञ्स्यात् शापे । अवग्राहस्ते भूयात् । अभिभव इत्यर्थः । निग्राहस्ते भूयात् । बाध इत्यर्थः । 'आक्रोशे' किम् । अवग्रहः पदस्य । छेदः पदस्येत्यर्थः । निग्रहश्चोरस्य । निरोधश्चोरस्येत्यर्थः ।

३२२१ । प्रे लिप्सायाम् । (३-३-४६)

पात्रप्रग्राहेण चरति भिक्षुः । अन्यत्र पात्रप्रग्रहः ।

३२२२ । परौ यज्ञे । (३-३-४७)

उत्तरः परिग्राहः । स्फ्येन वेदेः स्वीकरणम् ।

३२२३ । नौ वृ धान्ये । (३-३-४८)

स्त्रियामञ्' इति स्वार्थिकोऽञ् तद्धितः । 'टिड्ढ' इति ङीप् । **अभिविधौ** ॥ कात्स्न्येंन सम्बन्धः अभिविधिः । तस्मिन् गम्ये इनुण् स्यात् भावेऽर्थे इत्यर्थः । अणिनुण इत्यनेन सूत्रेण इनुणन्तात् अण् तद्धितः स्वार्थिक इत्यर्थः । **आदिवृद्धिरिति** ॥ तद्धितेष्वचामादेरित्यनेनेति शेषः । सांराविन् अ इति स्थिते 'नस्तद्धिते' इति टिलोपमाशङ्क्य प्रकृतिभावं स्मारयति । **इनण्यनपत्य इति** ॥ **स्वभावत इति** ॥ लोकाश्रयत्वाल्लिङ्गस्येति भावः । **आक्रोशेऽवन्योर्ग्रहः** ॥ **एतयोरिति** ॥ उपपदयोरिति शेषः । 'प्रहृवृदृनिश्चिगमश्च' इति वक्ष्यमाणस्य अप्रत्ययस्यापवादः । अवग्रह इत्यस्य विवरणम् । **छेदः पदस्येति** ॥ पुरोहितमित्यादिसमस्तपदस्य पुरः हितमित्यादि विभज्य पठनमवग्रह इत्यर्थः । अत्र शापानवगमान्न घञ् । निग्रह इत्यस्य विवरणम् । **निरोधश्चोरस्येति** ॥ **प्रे लिप्सायाम्** ॥ प्र इत्युपपदे ग्रहधातोर्घञ् स्यात् लिप्सायामित्यर्थः । 'ग्रहवृदृनिश्चिगमश्च' इत्यपोऽपवादः । **पात्रप्रग्राहेण चरति भिक्षुरिति** ॥ भिक्षालाभायेति गम्यते । **अन्यत्रेति** ॥ लिप्सायामगम्यायामित्यर्थः । **परौ यज्ञे** ॥ परि इत्युपपदे ग्रहधातोर्घञ् स्यात् यज्ञे प्रयुज्यमाने इत्यर्थः । 'ग्रहवृदृ' इत्यपोऽपवादः । **उत्तरः परिग्राह इति** ॥ "वसवस्त्वा" इत्यादिमन्त्रैः पूर्वः परिग्राहो वेदेरुक्तः । तदपेक्षया द्वितीय इत्यर्थः । **स्फ्येनेति** ॥ स्फ्यः खड्गाकृतिः दारुमयविशेषः । तेन समन्तात्लेखया वेदिदेशस्य स्वीकरणं परिग्राह इत्यर्थः । **नौ वृ धान्ये** ॥ नि

'वृ' इति लुप्तपञ्चमीकम्। नीवाराः। 'धान्ये' किम्। निवरा कन्या। क्तिन्विषयेऽपि बाहुलकादप्। प्रवरा सेना, प्रवरा गौरितिवत्। एवञ्च स्त्रीलिङ्गोऽपि।

३२२४। उदि श्रयतियौतिपूद्रुवः। (३-३-४९)

उच्छ्रायः। उद्यावः। उत्पावः। उद्द्रावः। कथं 'पतनान्ताः समुच्छ्रयाः' इति। बाहुलकात्।

३२२५। विभाषाङि रुप्लुवोः। (३-३-५०)

आरावः—आरवः। आप्लावः—आप्लवः।

३२२६। अवे ग्रहो वर्षप्रतिबन्धे। (३-३-५१)

विभाषेति वर्तते। देवस्य अवग्रहः—अवग्राहः। देवकर्तृकमवर्षणमित्यर्थः। 'वर्षप्रतिबन्धे' किम्। अवग्रहः पदस्य।

३२२७। प्रे वणिजाम्। (३-३-५२)

प्रे ग्रहेर्घञ्वा वणिजां संबन्धी चेत्प्रत्ययार्थः। तुलासूत्रमिति यावत्। तुलाप्रग्राहेण चरति। तुलाप्रग्रहेण।

३२२८। रश्मौ च। (३-३-५३)

प्रग्रहः—प्रग्राहः।

इत्युपपदे वृधातोर्घञित्यर्थः। 'ग्रहवृद' इत्यपोऽपवादः। **नीवारा इति** ॥ 'उपसर्गस्य घञ्यमनुष्ये' इति दीर्घः। **निवरा कन्येति** ॥ नितरां वरणीयेत्यर्थः। 'ग्रहवृद' इत्यप्। ननु प्रवरा कन्येत्यत्र कथमप् स्त्रियां क्तिनः प्रसङ्गात्। नह्यत्र वाऽसरूपविधिः प्रवर्तते। 'अजञ्भ्यां स्त्रीखलनाः विप्रतिषेधेन' इत्युक्तेरित्यत आह। **क्तिन्विषयेऽपीति** ॥ तत्र वृद्धप्रयोग प्रमाणयति। **प्रवरा सेना, प्रवरा गौरितिवदिति** ॥ ननु 'घञजबन्ताः पुंसि' इत्यबन्तस्य पुंस्त्वात् स्त्रीत्वं दुर्लभमित्यत आह। **एवञ्चेति** ॥ उक्तवृद्धप्रयोगादित्यर्थः। लोकाश्रयत्वाल्लिङ्गस्येति भावः। **उदि श्रयति** ॥ उत् इत्युपपदे श्रि, यु, पू, द्रु, एभ्यः घञित्यर्थः। अजपोरपवादः। **विभाषाङि रुप्लुवोः** ॥ पञ्चम्यर्थे षष्ठी। आङि उपपदे रु, प्लु, आभ्यां घञित्यर्थः। अपोऽपवादः। **अवे ग्रहो वर्ष** ॥ अव इत्युपपदे ग्रहधातोर्घञ् वा स्यात् वर्षप्रतिबन्धे इत्यर्थः। पक्षे 'ग्रहवृद' इत्यप्। **देवस्येति** ॥ पर्जन्यस्येत्यर्थः। कर्तरि षष्ठी। तदाह। **देवकर्तृकमिति** ॥ **अवग्रहः पदस्येति** ॥ समस्तस्य पदद्वयस्य विच्छिद्य पाठ इत्यर्थः। **प्रे वणिजाम्** ॥ 'ग्रहवृद' इत्यपोऽपवादः। **तुलासूत्रमिति** ॥ व्याख्यानादिति यावत्। तुला धटा। **रश्मौ च** ॥ प्रे उपपदे ग्रहधातोर्घञ् रश्मावपि वाच्ये इत्यर्थः। चशब्दः उक्तसमुच्चये।

३२२९। वृणोतेराच्छादने। (३-३-५४)

विभाषा प्र इत्येव। प्रावारः—प्रवरः।

३२३०। परौ भुवोऽवज्ञाने। (३-३-५५)

परिभावः—परिभवः। 'अवज्ञाने' किम्। सर्वतो भवनं परिभवः।

३२३१। एरच्। (३-३-५६)

चयः। जयः। 'भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम्' (वा २१९७-९८)। भयम्। वर्षम्।

३२३२। ऋदोरप्। (३-३-५७)

ऋवर्णान्तादुवर्णान्तादप्। करः। गरः। शरः। यवः। लवः। स्तवः। पवः।

३२३३। वृक्षासनयोर्विष्टरः। (८-३-९३)

अनयोर्विपूर्वस्य स्रः षत्वं निपात्यते। विष्टरो वृक्ष आसनं च। 'वृक्ष—' इति किम्। वाक्यस्य विस्तरः।

३२३४। ग्रहवृदृनिश्चिगमश्च। (३-३-५८)

अप्स्यात्। घञ्चोरपवादः। ग्रहः। वरः। दरः। निश्चयः। गमः। 'वशिरण्योरुपसंख्यानम्' (वा २२०३)। वशः। रणः। 'घञर्थे कवि-

---

वृणोतेराच्छादने ॥ प्र उपपदे वृधातोर्घञ्वा स्यादाच्छादने इत्यर्थः। पक्षे 'ग्रहवृद' इत्यप्। **प्रावार इति** ॥ पट इत्यर्थः। 'उपसर्गस्य घञि' इति दीर्घः। **परौ भुवोऽवज्ञाने** ॥ परि इत्युपपदे अवहेळनवृत्तेर्भूधातोर्घञ् स्यादित्यर्थः। **एरच्** ॥ इवर्णान्ताद्धातोः अच् स्यात् भावे अकर्तरि च कारके इत्यर्थः। घञपवादः। **भयादीनामिति** ॥ भयादीनां सिद्धये भीप्रभृतिधातुभ्यः अच्प्रत्ययस्योपसङ्ख्यानमित्यर्थः। ननु 'एरच्' इत्येव सिद्धे भयग्रहणं व्यर्थमित्यत आह। **नपुंसके क्तादिनिवृत्त्यर्थमिति** ॥ आदिना ल्युडादिसङ्ग्रहः। अन्यथा परत्वात् क्तादयः स्युः। वाऽसरूपविधिस्तु नात्र भवति। अपवादत्वाभावादिति भावः। **वर्षमिति** ॥ अत्र नपुंसके क्त्यादि बाधित्वा अच् अपूर्वो विधीयते। **ऋदोरप्** ॥ पञ्चम्यर्थे षष्ठी। ऋत्, उ, अनयोस्समाहारे सौत्रं पुंस्त्वम्। ऋदन्तादुवर्णान्ताच्च अप् स्याद्भावे अकर्तरि च कारके इत्यर्थः। घञपवादः। **ग्रहवृदृ** ॥ ग्रह, वृ, दृ, निश्चि, गम्, एषां द्वन्द्वः। अप् स्यादिति शेषः। **घञ्चोरिति** ॥ निष्पूर्वाच्चिञः अजपवादः, इतरेभ्यस्तु घञपवाद इति विवेकः। **वशिरण्योरिति** ॥ वार्तिकं घञपवादः अप्। **वश इति** ॥ 'वश कान्तौ।' भावे अप्।

धानम्' (वा २२०४) प्रस्थः । विघ्नः । 'द्वित्वप्रकरणे के कृञादीनामिति वक्तव्यम्' (वा ३४२९) । चक्रम् । चिक्लिदम् । चङ्क्रमः । (चक्रसः) ।

३२३५ । उपसर्गेऽदः । (३-३-५९)

अप्स्यात् ।

३२३६ । घञपोश्च । (२-४-३८)

अदेर्घस्य स्याद्घञ्यपि च । प्रघसः । विघसः । 'उपसर्गे' किम् । घासः ।

३२३७ । नौ ण च । (३-३-६०)

नौ उपपदे अदेर्णः स्यादप्च । न्यादः । निघसः ।

३२३८ । व्यधजपोरनुपसर्गे । (३-३-६१)

अप्स्यात् । व्यधः । जपः । उपसर्गे तु, आव्याधः । उपजापः मन्त्रभेदः ।

३२३९ । स्वनहसोर्वा । (३-३-६२)

इच्छेत्यर्थः । यद्यपि वशधातुः छान्दसः । तथापि वष्टि भागुरिरित्यादिप्रयोगात् लोकेऽपि प्रयुज्यते इति भावः । **रण इति** ॥ रणन्ति शब्दायन्ते अस्मिन्निति रणस्सङ्ग्रामः । **घञर्थे कविधानमिति** ॥ वार्तिकमिदम् । 'स्थाव्रापाव्यधिहनियुध्यर्थम्' इति वार्तिकशेषो भाष्ये पठितः । **प्रस्थ इति** ॥ प्रतिष्ठन्तेऽस्मिन् धान्यानीति प्रस्थः । 'आतो लोप इटि च' इत्याल्लोपः । प्रस्त्रान्त्यस्मिन्निति प्रस्त्रः । प्रपिबन्त्यस्यामिति प्रपा । आविध्यन्त्यस्मिन्नित्याविधम् । 'ग्रहिज्यावयिव्यधि'इति सम्प्रसारणम्, इति सिद्धवत्कृत्य आह । **विघ्न इति** ॥ विहन्त्यस्मिन्मनांसीति विघ्नः । 'गमहन' इत्युपधालोपः । 'हो हन्तेः' इति कुत्वम् । आयुध्यतेऽनेनेत्यायुधमित्यप्युदाहार्यम् । **द्वित्वप्रकरणे इति** ॥ 'एकाचो द्वे प्रथमस्य' इति द्वित्वप्रकरणे इत्यर्थः । **के कृञादीनामिति** ॥ कप्रत्यये परे कृञादीनां एकाचः प्रथमस्य द्वे स्त इत्यर्थः । **चक्रमिति** ॥ 'स्थाव्रा' इत्यस्य उपलक्षणत्वात् कृञः कः । क्रियते शत्रुवधः अनेनेति विग्रहः । किच्चान्न गुणः । द्वित्वम् । अभ्यासकार्यम् । **चिक्लिदमिति** ॥ कः द्वित्वादि । **चङ्क्रम इति** । पूर्ववत् । **उपसर्गेऽदः** ॥ अद इति छेदः । अप् स्यादिति शेषः । उपसर्गे उपपदे अदधातोः अप् स्यादित्यर्थः । घञोऽपवादः । **घञपोश्च** ॥ 'अदो जग्धि.' इत्यतः अद इति 'लुङ्सनोर्घस्लृ' इत्यतः घस्लृ इति चानुवर्तते । तदाह । **अदेरिति** ॥ **अपि चेति** ॥ अप्प्रत्यये चेत्यर्थः । **विघस इति** ॥ अतिथिशिष्टमन्नमुच्यते । **घास इति** ॥ "शष्पं बालतृणं घासः" इत्यमरः । **नौ ण च** ॥ णेति लुप्तप्रथमाकम् । **निघस इति** ॥ 'घञपोश्च' इति घस्लृभावः । **व्यधजपोः** ॥ पञ्चम्यर्थे षष्ठी । अप् स्यादिति शेषः । व्यध, जप् आभ्यां अप् स्यात्, न तूपसर्ग इत्यर्थः । **उपजापो मन्त्रभेद इति** ॥ पैशुन्यमित्यर्थः । **स्वनहसोर्वा** ॥ पञ्चम्यर्थे षष्ठी ।

अप्। पक्षे घञ्। स्वनः—स्वानः। हसः—हासः। अनुपसर्ग इत्येव। प्रस्वानः। प्रहासः।

३२४०। यमः समुपनिविषु च। (३-३-६३)

एष्वनुपसर्गे च यमेरब्वा। संयमः—संयामः। उपयमः—उपयामः। नियमः—नियामः। वियमः—वियामः। यमः—यामः।

३२४१। नौ गदनदपठस्वनः (३-३-६४)

अब्वा स्यात्। निगदः—निगादः। निनदः—निनादः। निपठः—निपाठः। निस्वनः—निस्वानः।

३२४२। क्वणो वीणायां च। (३-३-६५)

नावनुपसर्गे च वीणाविषयाच्च क्वणतेरब्वा स्यात्। वीणाग्रहणं प्राधान्यार्थम्। निक्वणः—निक्वाणः। क्वणः—क्वाणः। वीणायां तु, प्रक्वणः—प्रक्वाणः।

३२४३। नित्यं पणः परिमाणे। (३-३-६६)

अप्स्यात्। मूलकपणः। शाकपणः। व्यवहारार्थं मूलकादीनां परिमितो मुष्टिर्बध्यते सोऽस्य विषयः। 'परिमाणे' किम्। पाणः।

३२४४। मदोऽनुपसर्गे। (३-३-६७)

धनमदः। उपसर्गे तु, उन्मादः।

३२४५। प्रमदसम्मदौ हर्षे। (३-३-६८)

'हर्षे' किम्। प्रमादः। सम्मादः।

अबिति शेषः। स्वन, हस, आभ्यामब्वेत्यर्थः। **यमः समुप॥** सम्, उप, नि, वि, एषां द्वन्द्वः। चकारादनुपसर्गे इति समुच्चीयते। तदाह। **एष्वनुपसर्गे चेति॥ नौ गदनद॥** गद, नद, पठ, स्वन, एषां द्वन्द्वः। **अब्वेति॥** शेषपूरणमिदम्। **क्वणो वीणायां च॥ नाविति॥** नौ उपपदे च तदितरस्मिन्नुपसर्गे असति च वीणाविषयाच्चेत्यर्थः। ननु क्वणश्चेत्येतावता नौ उपसर्गे च क्वण अब्वेत्यर्थलाभात् वीणाविषयादपि क्वणसिद्धेः वीणायामिति व्यर्थमित्यत आह। **वीणाग्रहणं प्राधान्यार्थमिति॥** सोपसर्गार्थमित्यर्थः। **नित्यं पणः॥** अबिति शेषः। 'पण व्यवहारे' इत्यस्मान्नित्यमप् स्यात् परिमाणविशेषे गम्ये इत्यर्थः। नित्यग्रहणाद्वाग्रहणनिवृत्तम्। **व्यवहारार्थमिति॥** विक्रयार्थमित्यर्थः। पण्यते विक्रयार्थं बध्यते मुष्टिमात्रमिति कर्मण्यप्। मूलकानां पण इति विग्रहः। **मदोऽनुपसर्गे॥** अनुपसर्गे उपपदे मदेरबित्यर्थः। **प्रमदसम्मदौ॥** प्रमद, सम्मद, एतावब्न्तौ निपात्येते हर्षे

३२४६ । समुदोरजः पशुषु । (३-३-६९)

संपूर्वोऽजिः समुदाये उत्पूर्वश्च प्रेरणे तस्मात्पशुविषयकादप्स्यात् । 'अघञपोः' इत्युक्तेर्वीभावो न । समजः पशूनां संघः । उदजः पशूनां प्रेरणम् । 'पशुषु' किम् । समाजो ब्राह्मणानाम् । उदाजः क्षत्रियाणाम् ।

३२४७ । अक्षेषु ग्लहः । (३-३-७०)

अक्षशब्देन देवनं लक्ष्यते तत्र यत्पणरूपेण ग्राह्यं तत्र 'ग्लहः' इति निपात्यते । अक्षस्य ग्लहः । 'व्यात्युक्षीमभिसरणग्लहामदीव्यन्' । 'अक्षेषु' किम् । पादस्य ग्रहः ।

३२४८ । प्रजने सर्तेः । (३-३-७१)

प्रजनं प्रथमगर्भग्रहणम् । गवामुपसरः । कथम् 'अवसरः' 'प्रसरः' इति । अधिकरणे 'पुंसि संज्ञायाम्–' (सू ३२९६) इति घः ।

गम्ये इत्यर्थः । कन्यानां प्रमदः कोकिलानां सम्मदः इत्युदाहरणम् । प्रसमोर्मदो हर्ष इत्येव सिद्धे निपातनं रूढिपरिग्रहार्थम् । **समुदोरजः** ॥ समुदोः अज इति च्छेदः । सम्, उत्, अनयोः उपपदयोरित्यर्थः । **अक्षेषु ग्लहः** ॥ अक्षशब्दे उपपदे इत्यर्थे अक्षेष्विति बहुवचनानुपपत्तिरित्यत आह । **अक्षशब्देनेति** ॥ **लक्ष्यते इति** ॥ प्रत्येण देवनस्य अक्षसाध्यत्वादिति भावः । **तत्रेति** ॥ देवने इत्यर्थः । **पणरूपेणेति** ॥ देवने जितवते पराजितेन देयं द्रव्यं पणं तेन रूपेण ग्राह्यं यद्द्रव्यं तस्मिन् कर्मणि 'ग्रह उपादाने' इति धातोः 'ग्रहवृदृ' इत्यप्प्रत्ययान्तः कृतलत्वो ग्लहशब्दो निपात्यते इत्यर्थः । 'ग्रहू ग्रहणे' इत्यत्र तु 'ग्लह च' इति पठितम् । तत्र ग्लहेरप्प्रत्ययो निपात्यते । घञपवादः । **अक्षस्य ग्लह इति** ॥ अक्षक्रीडायां पणत्वेन ग्राह्यमित्यर्थः । "पणोऽक्षेषु ग्लहः" इत्यमरः । अत्र देवनत्वरूपेण देवनमक्षशब्दस्य लक्ष्यम् । न त्वक्षदेवनत्वेनेत्यभिप्रेत्योदाहरति । **व्यात्युक्षीमिति** ॥ माघकाव्यस्थमिदम् । 'दिवस्तदर्थस्य' इति करणस्य कर्मत्वात् द्वितीया । अभिसरणग्लहां अभिसरणशौर्यसुरतार्थमभिगमनम् । तदेव ग्लहः पणरूपेण ग्राह्यं द्रव्यं यस्याः तथाविधां व्यात्युक्षीम् । 'उक्ष सेचने' परस्परजलसेचनं व्यात्युक्षी तयेत्यर्थः । 'कर्मव्यतिहारे णच स्त्रियाम्' इति णच् । व्यत्युक्षशब्दात् 'णचःस्त्रियामञ्' इति स्वार्थे अञ् तद्धितः । आदिवृद्धिः । 'टिड्ढ' इति ङीप् । क्रीडायाजितवते पुंसे अभिसरणमेव पणत्वेन समयबन्धं कृत्वा प्रवृत्तेन परस्परजलसेचनेन अक्रीडन्निति यावत् । अत्र जलक्रीडायामभिसरणात्मकपणस्य अक्षसाधनकत्वाभावेऽपि ग्लहेरप् भवत्येव । सूत्रे अक्षशब्देन देवनसामान्यस्य विवक्षितत्वात् । अक्षक्रीडाया एव विवक्षितत्वे त्विह ग्लहेरप् न स्यादिति भावः । **अक्षेषु किमिति** ॥ देवने किमित्यर्थः । **पादस्य ग्रह इति** ॥ वन्दनाद्यर्थमिति भावः । अत्र ग्रहधातोः 'ग्रहवृदृ' इत्यप् । न तु लत्वम् । ग्लहेस्तु घञि पादस्य ग्लाह इत्येव । **प्रजने सर्तेः** ॥ **प्रजनं प्रथमगर्भग्रहणमिति** ॥ प्रशब्द आद्यर्थकः ।

३२४९। ह्वः संप्रसारणं च न्यभ्युपविषु। (३-३-७२)

निह्वः। अभिह्वः। उपह्वः। विह्वः। 'एषु' किम्। प्रह्वायः।

३२५०। आङि युद्धे। (३-३-७३)

आहूयन्तेऽस्मिन्नित्याह्वः। 'युद्धे' किम्। आह्वायः।

३२५१। निपानमाहावः। (३-३-७४)

आङ्पूर्वस्य ह्वयतेः संप्रसारणमब्वृद्धिश्चोदकाधारश्चेद्गाच्यः। 'आह्वस्तु निपानं स्यादुपकूपजलाशये'।

३२५२। भावेऽनुपसर्गस्य। (३-३-७५)

अनुपसर्गस्य ह्वयतेः संप्रसारणमप्च स्याद्भावे। ह्वः।

३२५३। हनश्च वधः। (३-३-७६)

अनुपसर्गाद्धन्तेर्भावे अप्स्यात्। वधादेशश्चान्तोदात्तः। 'वधेन दस्युम्'। चाद्घञ्। घातः।

३२५४। मूर्तौ घनः। (३-३-७७)

मूर्तिः काठिन्यं तस्मिन्नभिधेये हन्तेरप्स्यात्। घनश्चादेशः। अभ्रघनः। कथम् 'सैन्धवघनमानय' इति। धर्मशब्देन धर्मी लक्ष्यते।

प्रथमं जायते इति भावे घञ्। 'जनिवध्योश्च' इति नोपधावृद्धिरिति भावः। प्रजनार्थकात् सृधातोरप् स्यादिति फलितम्। **कथमिति** ॥ उपसरणं प्रसरणमित्यर्थे प्रजनाप्रतीतेरभावात् घञि उपधावृद्धिः स्यादित्याक्षेपः। समाधत्ते। **अधिकरण इति** ॥ उपसरत्यस्मिन्निति प्रसरत्यस्मिन्निति च अधिकरणकारके कालेऽर्थे 'पुंसि संज्ञायाङ्घः प्रायेण' इति घप्रत्यय इत्यर्थः। **ह्वः सम्प्रसारणञ्च** ॥ नि, अभि, उप, वि, एषु चतुर्षूपपदेषु ह्वयतेरप् स्यात् सम्प्रसारणञ्च। घञोऽपवादः। **निह्व इति** ॥ अप्। वस्य सम्प्रसारणमुकारः पूर्वरूपं तस्य गुणावादेशौ। **प्रह्वाय इति** ॥ घञि वृद्ध्यायादेशौ। **आङि युद्धे** ॥ आङि उपपदे ह्वयतेरप् सम्प्रसारणञ्च युद्धे वाच्ये इत्यर्थः। **निपानमाहावः** ॥ आहाव इति निपात्यते। निपानञ्चेद्गाच्यमित्यर्थः। फलितमाह। **आङ्पूर्वस्येति** ॥ **हनश्च वधः** ॥ चकारो व्युत्क्रमः। तदाह। **वधादेशश्चेति** ॥ **अन्तोदात्त इति** ॥ सूत्रे वध इत्यन्तोदात्तस्योच्चारणादिति भावः। यद्यपि स्वतन्त्रवधेरेव 'घञर्थे कविधानम्' इत्येव सिद्ध्यति। तथाप्यनुपसर्गादिति विशेष वक्तुमिदम्। वस्तुतो वधिः स्वतन्त्रो नास्त्येवेति शब्देन्दुशेखरे। **वधेन दस्युमिति** ॥ ऋग्वेदस्थोऽयं मन्त्रः स्वरप्रदर्शनाय पठितः। **घात इति** ॥ 'हनस्तोऽचिण्णलोः' इति तत्वम्। 'चजोः' इति कुत्वम्। **मूर्तौ घनः॥ अभ्रघन इति** ॥ अभ्रस्य काठिन्यमित्यर्थः, भाव इत्यनुवृत्तेः।

३२५५ । अन्तर्घनो देशे । (३-३-७८)

वाहीकग्रामविशेषस्य संज्ञेयम् । 'अन्तर्घणः' इति पाठान्तरम् ।

३२५६ । अगारैकदेशे प्रघणः प्रघाणश्च । (३-३-७९)

द्वारैकदेशे द्वौ प्रकोष्ठावलिन्दौ आभ्यन्तरो बाह्यश्च । तत्र बाह्ये प्रकोष्ठे निपातनमिदम् । प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति प्रघणः—प्रघाणः । कर्मण्यप् । पक्षे वृद्धिः ।

३२५७ । उद्धनोऽत्याधानम् । (३-३-८०)

अत्याधानमुपरिस्थापनम् । यस्मिन्काष्ठेऽन्यानि काष्ठानि स्थापयित्वा तक्ष्यन्ते तदुद्धनः । अधिकरणेऽप् ।

३२५८ । अपघनोऽङ्गम् । (३-३-८१)

अङ्गं शरीरावयवः । स चेह न सर्वः किं तु पाणिः पादश्चेत्याहुः । करणेऽप् । अपघातोऽन्यः ।

३२५९ । करणेऽयोविद्रुषु । (३-३-८२)

एषु हन्तेः करणेऽप्स्याद्धनादेशश्च । अयो हन्यतेऽनेनेत्ययोघनः । विघनः । द्रुघनः । 'द्रुघणः' इत्येके । 'पूर्वपदात्संज्ञायाम्—' (सू ८५७) इति णत्वम् । संज्ञैषा कुठारस्य । द्रुर्वृक्षः ।

कथमिति ॥ सैन्धवकाष्ठिन्यस्यानयनान्वयासम्भवादिति भावः । समाधत्ते । **धर्मशब्देनेति** ॥ **अन्तर्घनो देशे** ॥ देशविशेषे वाच्ये अन्तरित्युपपदे हन्तेरप् प्रकृतेर्घनादेशश्चेत्यर्थः । निपातनात् 'पूर्वपदात्संज्ञायाम्' इति णत्वाभावः । **अगारैकदेशे** ॥ अगारैकदेशशब्देन अगारैकदेशविशेषो विवक्षितः, व्याख्यानात् । तदाह । **द्वारैकदेश इत्यादि** ॥ प्रकोष्ठौ दीर्घचतुरश्रधिष्ण्यौ तौ अलिन्दनामानौ प्रवेशयोग्यौ । **उद्धनोऽत्याधानम्** ॥ अत्याधानं वाच्यश्चेत् उत्पूर्वात् हन्तेरप् । हस्य घत्वे च उद्धन इति निपात्यते इत्यर्थः । **अपघनोऽङ्गम्** ॥ अङ्गं वाच्यश्चेत् अपपूर्वाद्धन्तेरप् । हस्य घत्वे चापघन इति निपात्यते इत्यर्थः । **पाणिः पादश्चेति** ॥ अत्र व्याख्यानमेव शरणम् । **करणे इति** ॥ अपहन्यतेऽनेनेति करणव्युत्पत्तेरिति भावः । **करणेऽयोविद्रुषु** ॥ अयस्, वि, द्रु, एषां द्वन्द्वः । **द्रुघन इति** ॥ असंज्ञात्वात् 'पूर्वपदात्संज्ञायाम्' इति न णत्वमिति भावः । संज्ञात्वमते आह । **द्रुघण इति** ॥

३२६०। स्तम्बे क च। (३-३-८३)

स्तम्ब उपपदे हन्तेः करणे कः स्यादप्च पक्षे घनादेशश्च। स्तम्बघ्नः-स्तम्बघनः। करण इत्येव। स्तम्बघातः।

३२६१। परौ घः। (३-३-८४)

परौ हन्तेरप्स्यात्करणे घशब्दश्चादेशः। परिहन्यतेऽनेनेति परिघः।

३२६२। परेश्च घाङ्कयोः। (८-२-२२)

परेः रेफस्य लो वा स्याद्घशब्देऽङ्कशब्दे च। पलिघः-परिघः। पर्यङ्कः-पल्यङ्कः। इह 'तरप्तमपौ घः' (सू २००३) इति कृत्रिमस्य न ग्रहणं व्याख्यानात्।

३२६३। उपघ्न आश्रये। (३-३-८५)

उपपूर्वाद्धन्तेरप्स्यादुपधालोपश्च। आश्रयशब्देन सामीप्यं लक्ष्यते। पर्वतेनोपहन्यते सामीप्येन गम्यत इति पर्वतोपघ्नः।

३२६४। संघोद्धौ गणप्रशंसयोः। (३-३-८६)

संहननं संघः। भावेऽप्। उद्धन्यते उत्कृष्टो ज्ञायत इत्युद्धः। कर्मण्यप्। गत्यर्थानां बुद्ध्यर्थत्वाद्धन्तिर्ज्ञाने।

३२६५। निघो निमितम्। (३-३-८७)

स्तम्बे क च ॥ कर्तरि लुप्तप्रथमाकम्। **अप् च पक्षे इति** ॥ अप्सम्बद्धस्यैव घनादेशस्यानुवृत्तेरिति भावः। **स्तम्बघ्न इति** ॥ कप्रत्यये सति 'गमहन' इत्युपधालोपः। **स्तम्बघात इति** ॥ घञि 'चजोः' इति कुत्वम्। **परौ घः** ॥ करणे हन इति आवर्तते चानुवर्तते। तदाह। **परौ हन्तेरिति** ॥ **परेश्च घाङ्कयोः** ॥ **रेफस्य लो वेति** ॥ 'कृपो रो लः' इत्यतो रो ल इति 'अचि विभाषा' इत्यतो विभाषेति चानुवर्तते इति भावः। ननु 'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः' इति न्यायादिह घसंज्ञकयोः तरप्तमपोरेव ग्रहणं स्यात्। नतु घशब्दस्य 'स्वं रूपं शब्दस्य' इत्यत्र अशब्दसंज्ञेति पर्युदासाच्चेत्यत आह। **इहेति** ॥ **उपघ्न आश्रये** ॥ आश्रये गम्ये उपघ्न इति निपात्यते इत्यर्थः। फलितमाह। **उपपूर्वादिति** ॥ **लक्ष्यते इति** ॥ व्याख्यानादिति भावः। **सङ्घोद्धौ** ॥ यथासङ्ख्यमन्वयः। गणे सङ्घ इति प्रशंसायामुद्ध इति निपात्यते इत्यर्थः। सम्, उत्, अनयोरुपपदयोः हन्तेरप्प्रत्ययः टिलोपः घत्वञ्च निपात्यते इति यावत्। **संहननमिति** ॥ मेळनमित्यर्थः, उपसर्गवशात्। **गत्यर्थानामिति** ॥ 'सर्वे गत्यर्था ज्ञानार्थाः' इति न्यायादिति भावः। **निघो** ॥ निमितं वाच्यञ्चेत् निघ

समन्तान्मितं निमितम् । निर्विशेषं हन्यन्ते ज्ञायन्ते इति निघाः वृक्षाः । समारोहपरिणाहाः इत्यर्थः ।

३२६६ । ड्वितः क्त्रिः । (३-३-८८)

अयं भाव एव स्वभावात् । 'क्रेर्मन्नित्यम्' । (सू १५७०) क्त्रिप्रत्ययान्तान्मप् निर्वृत्तेऽर्थे नित्यग्रहणात्क्रेर्मन्विषयः । अत एव कृत्यन्तेन न विग्रहः । डुपचष् । पाकेन निर्वृत्तं पक्त्रिमम् । डुवप् । उप्त्रिमम् ।

३२६७ । ट्वितोऽथुच् । ३-३-८९)

अयमपि स्वभावाद्भाव एव । टुवेपृ । वेपथुः । श्वयथुः ।

इति निपात्यते इत्यर्थः । इहाप्यप् टिलोपः घत्वञ्च निपात्यते इत्यर्थः । निमितशब्दं व्याचष्टे । **समन्तान्मितन्निमितमिति** ॥ निः समन्तादित्यर्थे अव्ययानामनेकार्थत्वादिति भावः । **निर्विशेषमिति** ॥ इह नि इत्यव्ययं निर्विशेषे हन्तिर्ज्ञानार्थे इति भावः । **समेति** ॥ समौ आरोहपरिणाहौ औन्नत्यस्थौल्ये येषामिति विग्रहः । **ड्वितः क्त्रिः** ॥ डुः इत् यस्य सः ड्वित्तस्मात् क्त्रिप्रत्ययः स्यादित्यर्थः । ककार इत् । **अयं भाव एवेति** ॥ अत्र भावे इत्येवानुवर्तते, न तु 'अकर्तरि च कारके' इत्यपीति भावः । **स्वभावादिति** ॥ पाकादिना निर्वृत्तमित्यर्थे पक्त्रिममित्यादौ क्त्रिप्रत्ययान्तानां पाकादिष्वेव लोके प्रयोगदर्शनादिति भावः । **क्रेर्मन्नित्यम** ॥ चतुर्थस्य चतुर्थपादे इदं सूत्रम् । मप् नित्यमिति छेदः । **निर्वृत्ते इति** ॥ 'निर्वृत्तेऽक्षद्यूतादिभ्यः' इत्यतस्तदनुवृत्तेरिति भावः । तद्धितप्रकरणे व्याख्यातमप्येतत् इह स्मरणाय पुनर्व्याख्यातम् । नन्विह नित्यग्रहणं व्यर्थम् । न च 'समर्थानां प्रथमाद्वा' इति महाविभाषानिवृत्त्यर्थं तादिति वाच्यम् । अत्र हि निर्वृत्तग्रहणमनुवर्तते । तथा च निर्वृत्तार्थविवक्षायां क्त्रिप्रत्ययान्तात् मप्प्रत्ययस्य नित्यतया पक्त्र्यादिनिर्वृत्तामिति वाक्यनिवृत्तावपि पाकोऽस्तीत्यादिवत् पक्त्रिरस्ति भविष्यतीत्याद्यपि प्रसज्येत । तच्चानिष्टम् । क्त्रिप्रत्ययान्तस्य निर्वृत्तार्थविवक्षायामपि सर्वदा मप्प्रत्ययशिरस्कताया एवेष्टत्वादित्यत आह । **नित्यग्रहणादिति** ॥ न हि महाविभाषानिवृत्त्यर्थं नित्यग्रहणम् । 'निर्वृत्तेऽक्षद्यूतादिभ्यः क्त्रस्तु मप्' इत्येकसूत्रत्वेनैव सिद्धे पृथग्योगकरणादेव महाविभाषानिवृत्तिसिद्धेः । तथा च नित्यग्रहणसामर्थ्यान्नित्यामिति योगान्तरं विज्ञायते । तथा च निर्वृत्ते इति निवृत्तम् । तथा च क्त्रिप्रत्ययान्तः निर्वृत्तार्थयोगे तदयोगे च सर्वदा मप्प्रत्ययान्त एव स्यादिति लभ्यते । एवञ्च क्त्रिप्रत्ययो मप्प्रत्ययं विना केवलः क्वापि न प्रयुज्यते इति लभ्यते इत्यर्थः । एतच्च भाष्ये स्पष्टम् । **अत एवेति** ॥ क्त्रिप्रत्ययस्य मप्प्रत्ययं विना प्रयोगाभावात् पक्त्र्या निर्वृत्तमिति स्वपदविग्रहो नास्ति । किन्तु पाकेन निर्वृत्तमित्यस्वपदविग्रह इत्यर्थः । **उप्त्रिममिति** ॥ कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणमिति भावः । **ट्वितोऽथुच्** ॥ अथुजिति छेदः । टुः इत् यस्येति विग्रहः । **श्वयथुरिति** ॥

३२६८। यजयाचयतविच्छप्रच्छरक्षो नङ्। (३-३-९०)

यज्ञः। याच्ञा। यत्नः। विश्नः। प्रश्नः। 'प्रश्ने चासन्न–' (सू १७७७) इति ज्ञापकान्न संप्रसारणम्। ङित्त्वं तु विश्न इत्यत्र गुणनिषेधाय। रक्ष्णः।

३२६९। स्वपो नन्। (३-३-९१)

स्वप्नः।

३२७०। उपसर्गे घोः किः। (३-३-९२)

प्रधिः। अन्तर्धिः। उपाधीयतेऽनेनेत्युपाधिः।

३२७१। कर्मण्यधिकरणे च। (३-३-९३)

कर्मण्युपपदे घोः किः स्यादधिकरणेऽर्थे। जलानि धीयन्तेऽस्मिन्निति जलधिः।

३२७२। स्त्रियां क्तिन् (३-३-९४)

स्त्रीलिङ्गे भावादौ क्तिन्स्यात्। घञोऽपवादः। अजपौ तु परत्वाद्बाधते। कृतिः। चितिः। स्तुतिः। स्फायी–स्फातिः। 'स्फीतिकामः' इति तु प्रामा-

---

'टु ओ श्वि गतिवृद्ध्योः' इत्यस्य रूपम्। **यजयाच** ॥ 'अकर्तरि च कारके' इति भाव इति चानुवर्तते। **याच्ञेति** ॥ नस्य श्चुत्वेन ञः। **विश्न इति** ॥ विच्छेर्नङ्। 'च्छ्वोः' इति शः। एवं प्रच्छेर्नङि रूपम्। 'ग्रहिज्या' इति सम्प्रसारणमाशङ्क्य आह। **प्रश्ने चेति** ॥ ननु सम्प्रसारणाभावे ङित्त्वं व्यर्थमित्यत आह। **ङित्त्वं त्विति** ॥ **स्वपो नन्** ॥ नकारो नित्स्वरार्थः। **उपसर्गे घोः किः** ॥ भावे अकर्तरि च कारके। कित्त्वमातो लोपार्थम्। **प्रधिरिति** ॥ धात्वो रूपम्। **उपाधीयते इति** ॥ स्वनिष्ठधर्मः अन्यत्रासज्यते इत्यर्थः। **कर्मण्यधिकरणे च** ॥ इह कर्म उपपदं अधिकरणमर्थः व्याख्यानात्। तदाह। **कर्मण्युपपद इत्यादि** ॥ **स्त्रियां क्तिन्** ॥ 'कृत्यल्युटो बहुलम्' इत्यतः प्राक् स्त्रियामित्यधिक्रियते। **स्त्रीलिङ्ग इति** ॥ स्त्रीत्वविशिष्टे भावे अकर्तरि च कारके इत्यर्थः। धातुमात्रादयं क्तिन्। **घञोऽपवाद इति** ॥ 'हलश्च' इति वक्ष्यमाणघञोऽपवाद इत्यर्थः। एवञ्च स्त्रीत्वविशिष्टे भावादौ क्तिनेव। घञ् तु पुंस्त्वविशिष्टभावादाविति लभ्यते। वाऽसरूपविधिर्नात्र प्रवर्तते, अस्त्रियामित्युक्तेः। ननु तर्हि इकारान्तात् ऋकारान्तात् उकारान्ताच्च स्त्रीत्वविशिष्टे भावादौ 'एरच्' इति 'ऋदोरप्' इति च अजपावेव क्तिनं बाधित्वा स्याताम्। विशेषविहितत्वात्। स्त्रियां वाऽसरूपविध्यभावाच्चेत्यत आह। **अजपौ त्विति** ॥ तौ तु पुंस्त्वविशिष्टे भावादौ सावकाशाविति भावः। **स्फातिरिति** ॥ 'लोपो व्योः' इति यलोपः। 'तितुत्र' इति नेट्। **प्रामादिकमिति** ॥ 'स्फायः स्फी निष्ठायाम्' इति स्फीभावस्य

दिकम्। क्तान्ताद्धात्वर्थे णिचि 'अच इः' इति वा समाधेयम्। 'श्रुयजीषि-स्तुभ्यः करणे' (वा २२११)। श्रूयतेऽनया श्रुतिः। यजेरिषेश्च इष्टिः। स्तुतिः। ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः (वा ४८२६)। तेन नत्वम्। कीर्णिः। गीर्णिः। लूनिः। धूनिः। यूनिः। 'ह्लादः—' (सू ३०७३) इति योगविभागात्क्तिनि ह्रस्वः। प्रह्लन्निः। 'ति च' (सू ३०३७)। चूर्तिः। फुल्तिः। 'चायतेः क्तिनि चिभावो वाच्यः' (वा ४४१८)। अपचितिः। 'संपदादिभ्यः क्विप्' (वा २२३३)। संपत्। विपत्। 'क्तिन्नपीष्यते'। संपत्तिः। विपत्तिः।

३२७३। स्थागापापचो भावे। (३-३-९५)

क्तिन्स्यादङोऽपवादः। प्रस्थितिः। उपस्थितिः। संगीतिः। संपीतिः। पक्तिः। कथम् 'अवस्था' 'संस्था' इति। 'व्यवस्थायाम्' इति ज्ञापकात्।

निष्ठायामेव प्रवृत्तेरिति भावः। कथञ्चित्समाधत्ते। **क्तान्तादिति** ॥ स्फायेः क्तप्रत्यये स्फीभावे स्फीतशब्दः स्फीतस्याख्यान क्रिया वा स्फीतिः 'तत्करोति तदाचष्टे' इति णिच् अलोपः। 'अच इः' इति भावे इप्रत्ययः। स्फीतिं कामयते इति स्फीतिकाम इति वा कथञ्चित्समाधेयमिति भावः। **श्रुयजीषिस्तुभ्यः करणे** ॥ वार्तिकम्। एभ्यश्चतुर्भ्यः करणे स्त्रियां क्तिन्नित्यर्थः। श्रुधातोः स्तुधातोश्च 'एरच्' इति 'ओरप्' इति च प्राप्ते यजीष्योस्तु 'हलश्च' इति घञि च प्राप्ते वचनम्। भावे कर्तृव्यतिरिक्तकारके च सर्वत्र प्राप्ते करणग्रहणम्। **इष्टिरिति** ॥ यजेः 'वचिस्वपि' इति सम्प्रसारणम्। व्रश्चादिना षत्वम्। **ऋल्वादिभ्य इति** ॥ ऋकारान्तात्लवादिभ्यश्च पर इत्यर्थः। **तनेति** ॥ निष्ठावद्वचनेनेत्यर्थः। **नत्वमिति** ॥ 'रदाभ्यां निष्ठातः' इति नत्वस्य प्रकृतत्वादिति भावः। **कीर्णिरिति** ॥ कृधातोः क्तिनि इत्वे रपरत्वे 'हलि च' इति दीर्घः। तकारस्य नत्वम्, णत्वम्। एवं गृधातोः गीर्णिः। ल्वादिभ्यः उदाहरति। **लूनिरित्यादि** ॥ अथ प्रह्लन्निरित्यत्र उपधाह्रस्वं साधयति। **ह्लाद इतीति** ॥ 'ह्लादो निष्ठायाम्' इत्युपधाह्रस्वविधौ ह्लाद इति योगविभागात् अनिष्ठायामपि क्वचिद्ध्रस्व इति भावः। भाष्ये तु नैतदृष्टम्। अथ चरेः फलेश्च क्तिनि अकारस्य उत्वं स्मारयति। **तिचेति** ॥ चरफलोश्च, उत्परस्यातः, इत्युत्तरमिदं सूत्रम्। तादौ प्रत्यये परे चरफलोरत उकारः स्यादिति व्याख्यातं यङ्लुक्प्रकरणे। **चूर्तिरिति** ॥ चरेः क्तिनि अकारस्य उत्वे 'हलि च' इति दीर्घः। **फुल्तिरिति** ॥ फलेः क्तिनि उत्वे रूपम्। रेफवान्तत्वाभावान्न दीर्घः। उभयत्रापि 'तितुत्र' इति नेट्। **सम्पदादिभ्यः क्विप्** ॥ वार्तिकम्। भावे अकर्तरि च कारके स्त्रियाम् इति शेषः। ननु अस्त्रियामिति निषेधेन वाऽसरूपविधेरभावात् क्विपाऽनेन क्तिनो बाधात् सम्पत्तिरित्यादि कथमित्यत आह। **क्तिन्नपीष्यते इति** ॥ 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणेन सिद्धमित्याहुः। भाष्ये तु नैतदृश्यते। **स्थागापा** ॥ **क्तिन् स्यादिति** ॥ क्विप् तु अस्वरितत्वान्नानुवर्तते इति भावः। **अङ इति** ॥ स्थादिभ्यस्त्रिभ्यः 'आतश्चोपसर्गे'

३२७४। ऊतियूतिजूतिसातिहेतिकीर्तयश्च। (३-३-९७)

अवतेः 'ज्वरत्वर–' (सू २६५४) इत्यूठ्। ऊतिः। स्वरार्थं वचनम्। उदात्त इति हि वर्तते। यूतिः। जूतिः। अनयोर्दीर्घत्वं च निपात्यते। स्यतेः सातिः। 'द्यतिस्यति–' (सू ३०७४) इतीत्त्वे प्राप्ते इह इत्वाभावो निपात्यते। सनोतेर्वा 'जनसन–' (सू १५०४) इत्यात्वे कृते स्वरार्थं निपातनम्। हन्तेर्हिनोतेर्वा हेतिः। कीर्तिः।

३२७५। व्रजयजोर्भावे क्यप्। (३-३-९८)

व्रज्या। इज्या।

३२७६। संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः। (३-३-९९)

इति वक्ष्यमाणस्य, पचेस्तु 'षिद्भिदादिभ्यः' इति विहितस्याङ्प्रत्ययस्यापवाद इत्यर्थः। **प्रस्थितिरित्यादि**॥ 'द्यतिस्यतिमास्थाम्' इति इत्त्वम्। 'घुमास्थागापा' इति च ईत्वम्। **कथमिति**॥ 'स्थागापा' इति क्तिना 'आतश्चोपसर्गे' इति वक्ष्यमाणस्य अङो बाधादिति भावः। समाधत्ते। **व्यवस्थायामिति**॥ **ज्ञापकादिति**॥ **ऊतियूति**॥ एते स्त्रियां क्तिन्नन्ता निपात्यन्ते इत्यर्थः। **ऊठिति**॥ अकारवकारयोरित्यर्थः। ननु 'स्त्रियां क्तिन्' इत्येव सिद्धे किमर्थमिदमूतिग्रहणमित्यत आह। **स्वरार्थमिति**॥ कः स्वर इत्यत आह। **उदात्त इतीति**॥ 'मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः' इति पूर्वसूत्रस्थमुदात्तग्रहणमेकवचनान्ततया विपरिणतमिहानुवर्तते इत्यर्थः। तथा च क्तिन उदात्तत्वं लभ्यते। अन्यथा ञ्णित्यादिर्नित्यमिति प्रकृतेरुदात्तत्वं स्यादित्यर्थः। **अनयोरिति**॥ युधातोर्जुधातोश्चेत्यर्थः। **स्यतेरिति**॥ 'षोऽन्तकर्मणि' इत्यस्मात् क्तिनि सातिरिति रूपमित्यर्थः। 'आदेचः' इत्यात्त्वम्। तत्र 'द्यतिस्यतिमास्थामित्ति किति' इति इत्त्वमाशङ्क्य आह। **इह इत्त्वाभाव इति**॥ सनधातोर्वा सातीति निपातनमित्याह। **सनोतेर्वेति**॥ सनेर्वा क्तिनि 'जनसन' इत्यात्त्वे कृते सातीति निपातनमित्यर्थः। अत्र 'द्यतिस्यति' इतीत्त्वस्याप्रसक्तेस्तदभावो न निपात्यते इति लाघवमिति भावः। ननु सनोतेस्स्त्रियां क्तिनि सातीति रूपसिद्धेः किमर्थमिह सातीति निपातनमित्यत आह। **स्वरार्थमिति**॥ 'मन्त्रे वृष' इति पूर्वसूत्रात् उदात्तग्रहणानुवृत्तेः क्तिन उदात्तत्वं सिध्यति। अन्यथा प्रकृतेरुदात्तत्वं स्यादित्यर्थः। **हन्तेरिति**॥ हनः क्तिनि नकारस्य निपातनादित्त्वे आद्गुणे हेतिरिति रूपम्। **हिनोतेरिति**॥ हिधातोः क्तिनि तु 'क्ङिति च' इति निषेधं बाधित्वा निपातनात् गुणे रूपमित्यर्थः। **कीर्तिरिति**॥ 'कृत संशब्दने'। स्वार्थिकण्यन्तात् 'ण्यासश्रन्थो युच्' इति युचं बाधित्वा क्तिन्निपात्यते। उदात्तश्च सः। **व्रजयजोः**॥ पञ्चम्यर्थे षष्ठी। स्त्रियामित्येव। **व्रज्येति**॥ 'व्रजी वर्जने' क्यप्। 'व्रजयजोः' इति पाठे 'व्रज गतौ' इत्यस्मात् क्यप् व्रज्या। **इज्येति**॥ 'वचिस्वपि' इति सम्प्रसारणम्। **संज्ञायां समजनिषद**॥ समज, निषद, निपत, मन, विद, षुञ्,

समजादिभ्यः स्त्रियां भावादौ क्यप् स्यात्स चोदात्तः संज्ञायाम्। 'अजेः क्यपि वीभावो नेति वाच्यम्' (वा १५९६) समजन्त्यस्यामिति समज्या सभा। निषीदन्त्यस्यामिति निषद्या आपणः। निपतन्त्यस्यामिति निपत्या पिच्छिला भूमिः। मन्यतेऽनयेति मन्या गलपार्श्वसिरा। विदन्त्यनया विद्या। सुत्या अभिषवः। शय्या। भृत्या। ईयतेऽनया इत्या शिबिका।

३२७७। कृञः श च। (३-३-१००)

'कृञः' इति योगविभागः। कृञः क्यप्स्यात्। कृत्या। 'श च'। चात्क्तिन्। क्रिया। कृतिः।

३२७८। इच्छा। (३-३-१०१)

इषेर्भावे शो यगभावश्च निपात्यते। इच्छा। 'परिचर्यापरिसर्यामृगया-टाट्यानामुपसंख्यानम्' (वा २२१५)। शो यक्च निपात्यते। परिचर्या पूजा। परिसर्या परिसरणम्। अत्र गुणोऽपि। 'मृग अन्वेषणे' चुरादावदन्तः। अतो लोपाभावोऽपि। शे यकि णिलोपः। मृगया। अटतेः शे यकि ट्यशब्दस्य

शीङ्, भृञ्, इण नवानां समाहारद्वन्द्वात्पञ्चमी। 'अजेर्व्यघञपोः' इति प्राप्ते आह। **अजेः क्यपीति**॥ **समजन्तीति**॥ सङ्घीभवन्तीत्यर्थः। **समज्या सभेति**॥ सम्पूर्वादजेः क्यप्। "समज्या तु सभा गोष्ठी" इत्यमरः। **निषद्येति**॥ निपूर्वात्सदेः क्यप्। 'सदिरप्रतेः' इति षत्वम्। "आपणस्तु निषद्यायाम्" इत्यमरः। **निपत्येति**॥ निपूर्वात्पतेः क्यप्। **पिच्छिलेति**॥ निम्नोन्नता भूमिरित्यर्थः। **गलेति**॥ "पश्चाद्ग्रीवा सिरा मन्या" इत्यमरः। **विद्येति**॥ वेदशास्त्रादिरित्यर्थः। **सुत्येति**॥ सोमेज्या। षुञः क्यप्। तुक्। **इत्या शिबिकेति**॥ कोशो मृग्यः। **कृञः श च**॥ चात् क्यप्। शेति लुप्तप्रथमाकम्। कृञश्शः स्यात् क्यप् चेति प्रतीयमानार्थः। एवं सति कृतिरिति क्तिन्न स्यात्, स्त्रियां वाऽसरूपविध्यभावात्। तत्राह। **कृञ इति योगविभाग इति**॥ तत्र क्यबित्यनुवृत्तिं मत्वा आह। **कृञः क्यप् स्यादिति**॥ **कृत्येति**॥ कृञः क्यपि तुक्। श चेति द्वितीयखण्डोऽयम्। **चात्क्तिन्निति**॥ क्यपः पूर्वेणैव खण्डेन सिद्धत्वादिति भावः। **क्रियेति**॥ कृञश्शः 'रिङ्शयग्लिङ्क्षु' इति रिङ्। शित्त्वेन सार्वधातुकतया ङित्त्वान्न गुणः। इयङिति भावः। **इच्छा**॥ **भावे श इति**॥ न त्वकर्तरि कारके चेत्यर्थः, निपातनसामर्थ्यादिति भावः। **यगभावश्चेति**॥ अन्यथा शित्त्वेन सार्वधातुकत्वात् यक् स्यादिति भावः। **परिचर्येति**॥ परिपूर्वाच्चरेः भावे शः यक् च। **परिसर्येति**॥ परिपूर्वात्सृधातोश्शः। यक् च। अत्र शप्रत्ययस्य शित्त्वेन सार्वधातुकतया ङित्त्वात् गुणनिषेधमाशङ्क्य आह। **अत्र गुणोऽपीति**॥ परिसर्याशब्दे

द्वित्वं। पूर्वभागे यकारनिवृत्तिर्दीर्घश्च। अटाट्या। 'जागर्तेरकारो वा' (वा २२१६)। पक्षे शः। जागरा—जागर्या।

३२७९। अ प्रत्ययात्। (३-३-१०२)

प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारप्रत्ययः स्यात्। चिकीर्षा। पुत्रकाम्या।

३२८०। गुरोश्च हलः (३-३-१०३)

गुरुमतो हलन्तात्स्त्रियामकारः स्यात्। ईहा। ऊहा। 'गुरोः' किम्। भक्तिः। 'हलः' किम्। नीतिः। 'निष्ठायां सेट इति वक्तव्यम्' (वा २२०८) नेह। आप्तिः। 'तितुत्र—' (सू ३१६३) इति नेट्। दीप्तिः। 'तितुत्रेष्वग्रहादीनामिति वाच्यम्' (वा ४३९३)। निगृहीतिः। निपठितिः।

३२८१। षिद्भिदादिभ्योऽङ्। (३-३-१०४)

षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ्। जृष्। जरा। त्रपूष्। त्रपा। भिदा। विदारण एवायम्। भित्तिरन्या। छिदा। द्वैधीकरणे। अन्यत्र

गुणोऽपि निपातित इत्यर्थः। **द्वित्वमिति**॥ निपात्यते इति शेषः। **यकारनिवृत्तिरिति**॥ निपात्यत इति शेषः। हलादिशेषस्तु नात्र प्रवर्तते। तस्य षाष्ठद्वित्वविषयत्वादित्याहुः। यङन्तात्तु 'अ प्रत्ययात्' इति वक्ष्यमाणः अकारप्रत्ययः। तत्र अतो लोपे यलोपे च अटाटेति बोध्यम्। **जागर्तेरकारो वेति**॥ भावे वक्तव्य इति शेषः। अकारप्रत्यये उदाहरति। **जागरेति**॥ आर्धधातुकलक्षणो गुणः। शप्रत्यये उदाहरति। **जागर्येति**॥ शित्त्वेन सार्वधातुकत्वात् यक् 'जाग्रोऽविचिण्णल्ङित्सु' इति च गुणः। **अ प्रत्ययात्**॥ अ इति लुप्तप्रथमाकम्। भावे अकर्तरि च कारके इत्येव। **गुरोश्च हलः**॥ धातोरित्यनुवृत्तम् हला विशेष्यते। तदन्तविधिः। हलन्तधातोर्गुरुत्वासम्भवाद्गुरुमान् लक्ष्यते। तदाह। **गुरुमत इति**॥ भावे अकर्तरि च कारके इत्येव। **निष्ठायामिति**॥ निष्ठायां परतो यस्सेट् तस्मादेव गुरुमतो हलन्तादकारप्रत्यय इत्यर्थः। **आप्तिरिति**॥ आप्धातोर्निष्ठायां सेट्त्वाभावात् नायमकारप्रत्ययः, किन्तु क्तिनेवेति भावः। दीप्तिरित्यत्र इटमाशङ्क्य आह। **तितुत्रेति**॥ **तितुत्रेष्विति**॥ 'तितुत्रतथसु' इति सूत्रे अग्रहादीनामिति वाच्यमित्यर्थः। **निगृहीतिरिति**॥ इटि 'ग्रहोऽलिटि' इति दीर्घः। 'ग्रहिज्या' इति सम्प्रसारणम्। निगृहीतिः उपस्निहितिः निकुपितिः निपठितिः इति ग्रहादयो भाष्ये स्थिताः। **षिद्भिदादिभ्योऽङ्**॥ भावे अकर्तरि च कारके इत्येव। **जरेति**॥ ङित्वलक्षणं गुणनिषेधं बाधित्वा 'ऋदृशोऽङि' इति गुणः। **विदारण इति**॥ वार्तिकम्। विदारणं ऊर्ध्वविदलनम्। तस्मिन्नेवार्थे भिदेत्यङन्तमित्यर्थः। **छिदा द्वैधीकरण इति**॥ इदमपि वार्तिकम्। यथा कथञ्चित्तिर्यगतिर्यग्वा

छित्तिः छिद्रम् । गुहा गिर्योषध्योः । अत्र गिरेरेकदेशो गिरिशब्देन विवक्षितः । अन्यत्र गूढिः । आरा हारा कारा तारा धारा अत्र दीर्घत्वं निपात्यते । आरा शस्त्र्यमिति वक्तव्यम् । आर्तिरन्या । आङोऽर्तेश्च क्तिन् । रेखा लेखा । अत्र गुणः । चूडा । धारा प्रपात इति वक्तव्यम् । धृतिरन्या । मृजा । 'क्रपेः संप्रसारणं च' (गण ३२) । कृपा ।

३२८२ । चिन्तिपूजिकथिकुम्बिचर्चश्च । (३-३-१०५)

अङ् स्यात् । युचोऽपवादः । चिन्ता । पूजा । कथा । कुम्बा । चर्चा । चात्तुला ।

३२८३ । आतश्चोपसर्गे । (३-३-१०६)

अङ् स्यात् । क्तिनोऽपवादः । प्रदा । उपदा । 'श्रदन्तरोरुपसर्गवद्वृत्तिः' (वा ११३१–११४७) । श्रद्धा । अन्तर्धा । 'उपसर्गे घोः किः' (सू ३२७०) इत्यनेन किः । अन्तर्धिः ।

द्वैधीभावे एव छिदेत्यङन्तमित्यर्थः । छित्तिरित्यस्य विवरणम् । **छित्तिश्छिद्रमिति** ॥ 'भिदिर् विदारणे, छिदिर् द्वैधीकरणे, विद ज्ञाने, क्षिप प्रेरणे, गुह संवरणे, डुधाञ् धारणपोषणयोः, मिथृ मेथृ हिंसासंचनयोः, ऋ गतौ, हृञ् हरणे, क्षि क्षये, क्षि निवासगत्योः, तॄ प्लवनतरणयोः, धृञ् धारणे, लिख अक्षरविन्यासे, चुद प्रेरणे, पीङ अवगाहने, टुवप् बीजसन्ताने, कॄ विक्षेपे, वस निवासे, मृजू शुद्धौ, कृप कृपायाम्' इति भिदादिगणः । **गुहा गिर्योषध्योरिति** ॥ वार्तिकम् । **गूढिरिति** ॥ क्तिनि ढत्वधत्वष्टुत्वढलोपदीर्घाः । **आरा, हारा, कारा, तारा, धारा, अत्रेति** ॥ ऋ, ह, कॄ, तॄ, धृञ्, एभ्यः अङि 'ऋदृशोऽङि गुणः' इति गुणे उपधाया दीर्घत्वमित्यर्थः । **आरा शस्त्र्यमिति** ॥ वार्तिकम् । शस्त्री प्रतोदः तस्यामेव आरेत्यङन्तमित्यर्थः । ननु ऋधातोः क्तिनि ऋतिरित्येवोचितम्, नत्वार्तिरित्यत आह । **आङोऽर्तेश्चेति** ॥ आङ्पूर्वात् ऋधातोः क्तिनि 'उपसर्गादृति धातौ' इति वृद्धिरेकादेश इत्यर्थः । **रेखा लेखेति** ॥ गणसूत्रम् । **गुण इति** ॥ लिखेरङि उपधागुणः लकारस्य रेफश्चेत्यर्थः । **चूडेति** ॥ गणसूत्रम् । **धारा प्रपात इति** ॥ वार्तिकम् । द्रवद्रव्यप्रपातने इत्यर्थः । **क्रपेस्सम्प्रसारणञ्चेति** ॥ गणसूत्रम् । क्रपधातुर्घटादौ अकारमध्यः । अत्र भाष्यदृष्टानां गणसूत्रत्वं विज्ञेयम् । **चिन्तिपूजि** ॥ एते चुरादयः । तेभ्यो 'ण्यासश्रन्थो युच्' इति प्राप्ते अङ्विधिः । तदाह । **युचोऽपवाद इति** ॥ चिन्तेत्यादौ अङि णिलोपः । चकारोऽनुक्तसमुच्चयार्थः । अतस्तोलयतरपि सङ्ग्रहः । तदाह । **चात्तुलेति** ॥ **आतश्चोपसर्गे** ॥ **अङ् स्यादिति** ॥ उपसर्गे उपपदे आदन्ताद्धातोरङ् स्यात् भावे अकर्तरि च कारके इत्यर्थः । **प्रदेति** ॥ प्रपूर्वाद्दाधातोरङ् । 'आतो लोप इटि च' इत्याल्लोपः । एवमुपदा । ननु श्रदिति अन्तरिति च अव्ययपूर्वाद्धात्रः कथमङ् । तयोरुपसर्गत्वाभावादित्यत आह । **श्रदन्तरोरुपसर्गवद्वृत्तिरिति** ॥ 'श्रच्छब्दस्य अङ्विधौ उपसर्गत्वं वाच्यम्' इति 'अन्तश्शब्दस्याङ्विधिणत्वेषूपसर्गत्वं

३२८४। ण्यासश्रन्थो युच्। (३-३-१०७)

अकारस्यापवादः। कारणा। हारणा। आसना। श्रन्थना। 'घट्टिवन्दिविदिभ्यश्चेति वाच्यम्' (वा २२२२)। घट्टना। वन्दना। वेदना। 'इषेरनिच्छार्थस्य' (वा २२२३)। अन्वेषणा। 'परेर्वा' (वा २२२४)। पर्येषणा परीष्टिः।

३२८५। रोगाख्यायां ण्वुल्बहुलम्। (३-३-१०८)

प्रच्छर्दिका वामिः। प्रवाहिका ग्रहणी। विचर्चिका पाम। कचिन्न। अर्द, शिरोऽर्तिः। 'धात्वर्थनिर्देशे ण्वुल्वक्तव्यः' (वा २२२५)। आसिका। शायिका। 'इक्श्तपौ धातुनिर्देशे' (वा २२२६)। पचिः—पचतिः। 'वर्णात्कारः' (वा २२२७)। निर्देश इत्येव। अकारः। ककारः। 'रादिफः'

वाच्यम्' इति च वार्तिकात्तयोरुपसर्गत्वात्तत्पूर्वकादादन्ताद्धातोरङ्प्रत्ययात्मककृत्प्रत्ययरूपा वृत्तिरित्यर्थः। वृत्तिरिति णत्वस्याप्युपलक्षणम्। तेन अन्तर्धा—अन्तर्धिः—अन्तर्णयतीत्यादीति दिक्। **ण्यास** ॥ णि, आस, श्रन्थ्, एभ्यः स्त्रियां भावादिषु युच् स्यादित्यर्थः। **अकारस्येति** ॥ 'अ प्रत्ययात्' इति विहितस्येत्यर्थः। **घट्टिवन्दीति** ॥ अण्यन्तत्वाद्युचो विधिः। **वेदनेति** ॥ लाभार्थाद्विदेर्युच्। व्याख्यानात्। 'विद ज्ञाने' इत्यस्य तु वित्तिः। 'विद वेदनाज्ञाननिवासेषु' इति चुरादेस्तु 'ण्यासश्रन्थ' इति युचि वेदनेत्यपि। **इषेरनिच्छार्थस्येति** ॥ युज्वक्तव्य इति शेषः। **अन्वेषणेति** ॥ मार्गणे इत्यर्थः। इच्छायां तु अन्विष्टिः। **परेर्वेति** ॥ परिपूर्वकादिषेर्युज्वेत्यर्थः। **परीष्टिरिति** ॥ 'व्रश्च' इति शेषः। **रोगाख्यायां** ॥ स्त्रियामित्येव। प्रच्छर्दिकेत्यस्य विवरणम्। **वमिरिति** ॥ वमनमित्यर्थः। प्रवाहिकेत्यस्य विवरणम्। **ग्रहणीति** ॥ अतिसारविशेषः। विचर्चिकेत्यस्य विवरणम्। **पामेति** ॥ **कचिन्नेति** ॥ ण्वुलिति शेषः। बहुलग्रहणादिति भावः। **अर्देति** ॥ अर्तिशब्दस्य 'अर्द हिंसायाम्' इति प्रकृतिदर्शनमिदम्। **शिरोऽर्तिरिति** ॥ शिरःपीडेत्यर्थः। अर्देः क्तिन्। 'तितुत्र' इति नेट्। **धात्वर्थनिर्देश इति** ॥ धात्वर्थे निर्देष्टव्ये धातोः स्वार्थे ण्वुल् बहुलमित्यर्थः। स्त्रियामित्येव। **आसिका। शायिकेति** ॥ आसनं शयनमित्यर्थः। **इक्श्तपाविति** ॥ धातुस्वरूपे निर्देष्टव्ये इक्श्तपौ वक्तव्यावित्यर्थः। धातुस्वरूपमेव वाच्यमिति फलितम्। **पचिः पचतिरिति** ॥ पचधातुरित्यर्थः। शित्त्वेन सार्वधातुकत्वाच्छप्। अकर्तृवाचकत्वेऽपि 'उपसर्गात्सुनोतिसुवति' इति निर्देशात् शबादिविकरणाः। शित्त्वसामर्थ्यादिति तु प्राञ्चः। तत्र पिबतिः गायतिरित्यादौ पिबाद्यादेशप्रवृत्त्या आत्वनिवृत्त्या च शित्त्वस्य चरितार्थत्वादित्यलम्। अत्र स्त्रियामिति न सम्बध्यते। व्याख्यानात्। **वर्णात्कार इति** ॥ वार्तिकम्। **निर्देश इत्येवेति** ॥ अ, इ, उ, इत्यादिवर्णनिर्देशे कर्तव्ये वर्णानुकरणात् अ, इ, उ, इत्यादिप्रातिपदिकात्स्वार्थे कारप्रत्ययः स्यादित्यर्थः। **अकार इति** ॥ अवर्ण इत्यर्थः। इह कारप्रत्ययस्य धातोरविहितत्वेऽपि अधिकारबलात् कृत्संज्ञा। अतः प्रातिपदिकत्वात्

(वा २२२८)। रेफः। मत्वर्थाच्छः' (वा २२२९)। बहुलवचनादकारलोपः। मत्वर्थीयः। 'इणजादिभ्यः' (वा २२३०)। आजिः। आतिः। 'इञ्वपादिभ्यः' (वा २२३१)। वापिः। वासिः। स्वरे भेदः। 'इक्कृष्यादिभ्यः' (वा २२३२)। कृषिः। गिरिः।

३२८६। संज्ञायाम्। (३-३-१०९)

अत्र धातोर्ण्वुल्। उद्दालकपुष्पभञ्जिका। वरणा पूरिका अपूपविशेषः।

३२८७। विभाषाख्यानपरिप्रश्नयोरिञ्च। (३-३-११०)

परिप्रश्न आख्याने च गम्य इञ्स्यात्। चात् ण्वुल्। विभाषोक्तेर्यथाप्राप्त-

---

सुवुत्पत्तिः। ककारस्य नेत्संज्ञा, प्रयोजनाभावात्। अनार्धधातुकतया आकार इत्यादौ आतो लोपाप्रसक्तेः। अनार्धधातुकत्वादेव नेट्। बहुलग्रहणानुवृत्तेः क्वचिन्न। 'अस्य च्वौ' इत्यादौ। **ककार इति** ॥ कवर्ण इत्यर्थः। प्रकृतावकार उच्चारणार्थः। 'न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणं भवति' इति 'उच्चैरुदात्तः' इति सूत्रभाष्यात्। क्वचित्सङ्घातादपि कारप्रत्ययः, यथा एवकार इत्यादौ, वषट्कार इति सूत्रनिर्देशात् सर्वे चकाराः प्रत्याख्यायन्ते इति भाष्याच्च। **रादिफ इति** ॥ वाच्य इति शेषः। वाऽसरूपविधिना कारप्रत्ययोऽपि। अत्र स्त्रियामित्यस्य अनुवृत्तेरनभ्युपगमेन अस्त्रियामिति निषेधाभावात्। **मत्वर्थाच्छ इति** ॥ मत्वर्थशब्दात् स्वार्थे छप्रत्ययो वाच्य इत्यर्थः। ननु मत्वर्थीय इत्यत्र कथं 'यस्येति च' इत्यकारलोपः, अतद्धितपरत्वात् अभत्वाच्चेत्यत आह। **बहुलवचनादकारलोप इति** ॥ **मत्वर्थीय इति** ॥ मतोरर्थो यस्य प्रत्ययस्य स मत्वर्थः। स एव मत्वर्थीयः। 'तसौ मत्वर्थे' इत्यत्र तु बहुलग्रहणान्न। 'शैषिकान्मतुवर्थीयात्' इत्यत्र भवार्थे गहादित्वात् छो बोध्यः। **इणजादिभ्य इति** ॥ वाच्य इति शेषः। स्त्रियामित्येव। आजिरित्यत्र अजेर्वीभावमाशङ्क्य आह। **बहुलमिति** ॥ **इञ्वपादिभ्य इति** ॥ वाच्य इति शेषः। स्त्रियामित्येव। ननु इणोऽनुवृत्त्यैव सिद्धे इञ्ग्रहणमनर्थकम् इत्यत आह। **स्वरे भेद इति** ॥ 'ञ्नित्यादिर्नित्यम्' इति स्वरविशेष इञ्विधेः फलमित्यर्थः। **इक्कृष्यादिभ्य इति** ॥ वाच्य इति शेषः। **कृषिरिति** ॥ कित्त्वान्न लघूपधगुणः। **गिरिरिति** ॥ गृधातोरिक् कित्त्वान्न गुणः। 'ऋत इद्धातोः' इति इत्त्वे रपरत्वम्। **संज्ञायां** ॥ **वरणेति** ॥ वरणः वृक्षविशेषः। वारणान्यहोमार्थानीत्यादौ याज्ञिकानां प्रसिद्धः। **पूरिकेति** ॥ तस्या विवरणम्। **अपूपविशेष इति** ॥ "समितावेसनेजीरहिङ्गुमारीचयोर्जिते। घृताक्ते जलसंयुक्ते पीठस्योपरि वेल्लिते ॥ घृतेन वाथ तैलेन भर्जिता पूरिका मता" इति भोजनकौतूहले तल्लक्षणात्। **विभाषाख्यान** ॥ स्त्रियामित्येव। पूर्वं परिप्रश्नः पश्चादुक्तकथनमाख्यानम्। अल्पाच्तरत्वादाख्यानशब्दस्य पूर्वनिपातः। तदाह। **परिप्रश्न इति** ॥ वाऽसरूपविधिना सिद्धे विभाषाग्रहणं व्यर्थमित्यत आह। **विभाषोक्तेरिति** ॥ स्त्रियां वाऽसरूपविधेरप्रवृत्त्या विभाषाग्रहणाभावे इञ्ण्वुलावेव स्याताम्। न तु प्रत्ययान्तरमित्यर्थः। परिप्रश्ने उदाहरति।

मन्येऽपि, कां त्वं कारिं–कारिकां क्रियां–कृत्यां–कृतिं वा अकार्षीः । सर्वां कारिं–कारिकां–क्रियां–कृत्यां–कृतिं–वा अकार्षम् । एवं गणिं–गणिकां–गणनाम् । पाचिं–पाचिकां–पचां–पक्तिम् । इज्यां–इष्टिम् ।

३२८८ । पर्यायार्हणोत्पत्तिषु ण्वुच् । (३-३-१११)

पर्यायः परिपाटी क्रमः । अर्हणमर्हः योग्यता । पर्यायादिषु द्योत्येषु ण्वुञ्वा स्यात् । भवत आसिका । शायिका । अग्रगामिका । भवानिक्षुभक्षिकामर्हति । ऋणे । इक्षुभक्षिकां मे धारयसि । उत्पत्तौ । इक्षुभक्षिका उदपादि ।

३२८९ । आक्रोशे नञ्यनिः । (३-३-११२)

विभाषेति निवृत्तम् । नञ्युपपदेऽनिः स्यादाक्रोशे । अजीवनिस्ते शठ भूयात् । अप्रयाणिः । 'कृत्यल्युटो बहुलम्' (सू २८४१) । भावेऽकर्तरि च

कान्त्वमिति ॥ कान्त्वङ्कारिमकार्षीरित्यन्वयः । इञि रूपम् । एवं कारिकामित्यादावपि कान्त्वमित्यस्य कार्षीरित्यस्य चान्वयो बोध्यः । **कारिकामिति** ॥ ण्वुलि रूपम् । क्रियामित्यत्र 'कृञश्च' इति शः । कृत्यामित्यत्र 'कृञश्च' इति चकारात् क्यपि तुक् । कृतिमित्यत्र क्तिन् 'कृञश्च' इति चकारादित्युक्तम् । आख्याने उदाहरति । **सर्वां कारिमित्यादि** ॥ अत्रापि सर्वां कारिमित्यादिपञ्चसु सर्वामित्यस्य अकार्षमित्यस्य चान्वयः । **एवङ्गणिमिति** ॥ अत्रापि कामकार्षीः । सर्वामकार्षमिति प्रश्नप्रतिवचनानि योज्यानि । गणधातोरदन्तात् चुरादिणिजन्तादिञादि । अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः । **गणनामिति** ॥ 'ण्यासश्रन्थः' इति युच् । अत्र क्तिन् तु न, युचा बाधात् । पचामित्यत्र 'षिद्भिदादिभ्यः' इति षित्त्वादङ् । इज्यामित्यत्र 'व्रजयजोर्भावे' इति क्यप् । 'वचिस्वपि' इति सम्प्रसारणम् । इष्टिरित्यत्र यजेः क्तिन् व्रश्चेति षः । **पर्यायार्ह** ॥ पर्यायशब्दस्य विवरणम् । **परिपाटीति** ॥ तस्यापि विवरणम् । **क्रम इति** ॥ परिपूर्वात्पटेः क्रमार्थादिणजादिभ्य इति स्त्रियां भावे इण् । 'कृदिकारादक्तिनः' इति ङीष् । **अर्हणमर्ह इति** ॥ भावे घञिति भावः । **द्योत्येष्विति** ॥ भाव एवार्थे प्रत्यय इति भावः । क्रमे उदाहरति । **भवत आसिकेति** ॥ आदौ आसनं ततश्शयनं ततोऽग्रगमनमित्यर्थः । अर्हे उदाहरति । **भवानिति** ॥ 'ऋणे' इत्युदाहरणसूचनम् । इक्षुभक्षणमृणत्वेन धारयसीत्यर्थः । 'उत्पत्तौ' इत्युदाहरणसूचनम् । **उदपादीति** ॥ उत्पन्नेत्यर्थः । उत्पूर्वात्पदेः कर्तरि लुङि 'चिण् ते पदः' इति चिण् । **आक्रोशे नञ्यनिः** ॥ **निवृत्तमिति** ॥ व्याख्यानादिति भावः । **अजीवनिरिति** ॥ अजीवनमित्यर्थः । **अप्रयाणिरिति** ॥ अप्रयाणमित्यर्थः । क्तिन् तु न भवति । अनिना बाधात् । स्त्रियां वाऽसरूपविधेरभावात् । विभाषानुवृत्तौ क्वचित्क्तिन् स्यादिति भावः । **इति स्त्र्यधिकारः** ॥ **कृत्यल्युटो बहुलम्** ॥ कृत्यसंज्ञकाः प्रत्ययाः 'तयोरेव कृत्यक्तखलर्थाः' इति भावे कर्मणि च विहिताः । करणे अधिकरणे भावे च ल्युड्विहितः । ततोऽन्यत्रापि कृत्यल्युटः स्युरित्यर्थः ।

कारके संज्ञायामिति च निवृत्तम्। राज्ञा भुज्यन्ते राजभोजनाः शालयः। 'नपुंसके भावे क्तः' (सू ३०९०)।

३२९०। ल्युट् च। (३-३-११५)

हसितम्। हसनम्। योगविभाग उत्तरार्थः।

३२९१। कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम्। (३-३-११६)

येन कर्मणा स्पृश्यमानस्य कर्तुः शरीरस्य सुखमुत्पद्यते तस्मिन्कर्मण्युपपदे ल्युट् स्यात्। पूर्वेण सिद्धे नित्यसमासार्थं वचनम्। पयःपानं सुखम्। ओदनभोजनं सुखम्। अत्र पानादेव सुखम्। चन्दनानुलेपनं सुखमितिवत्। सत्यम्। यत्र संस्पर्शं विना सुखाभावस्तदर्थकः। यत्र साक्षात्परंपरया वा सुखं तत्रेति यावत्। कर्तुरिति किम्। गुरोः स्नापनं सुखम्। नेह गुरुः कर्ता, किंतु कर्म। कर्मणीति किम्। तूलिकाया उत्थानं सुखम्। अग्निकुण्डस्य सेवनं सुखम्। प्रत्युदाहरणेष्वसमासः।

स्नानीयं चूर्णम्। करणे अनीयर् इति सिद्धवत्कृत्य ल्युटि उदाहरति। **राज्ञेति** ॥ कर्मणि ल्युडिति भावः। **नपुंसके भावे क्तः** ॥ इदं सूत्रं 'निष्ठा' इति सूत्रप्रस्तावे प्रागेव प्रसङ्गाद्व्याख्यातं मूले। इह तु क्रमप्राप्तत्वात् पुनरुपन्यस्तम्। **ल्युट् च** ॥ चात् क्तः। नपुंसके भावे इत्येव। ननु 'नपुंसके भावे क्तल्युटौ' इत्येव सिद्धे योगविभागो व्यर्थ इत्यत आह। **योगेति** ॥ कर्मणि च येनेत्युत्तरसूत्रे ल्युट एवानुवृत्त्यर्थ इत्यर्थः। **कर्मणि च येन** ॥ संस्पर्शशब्दः कृदन्तः। कृद्योगे कर्तुरिति कर्मणि षष्ठी। येनेति कर्तरि तृतीया। 'उभयप्राप्तौ कर्मणि' इति नियमात्। **येन कर्मणेति** ॥ **कर्तुः शरीरस्येति** ॥ शरीरावच्छिन्नस्येत्यर्थः। अर्धर्चादित्वाच्छरीरशब्दः पुंल्लिङ्गोऽपि। तेन कर्तृण इत्येव भाव्यमिति निरस्तम्। **ल्युट् स्यादिति** ॥ भावे नपुंसके इति शेषः। **पूर्वेणेति** ॥ 'ल्युट् च' इति पूर्वसूत्रेणेत्यर्थः। **नित्येति** ॥ उपपदसमासार्थमित्यर्थः। तस्य नित्यत्वात्। **पयःपानं सुखमिति** ॥ पयसा स्पृश्यमानशरीरावच्छिन्नस्य सुखजनकमित्यर्थः। उदाहरणान्तरमाह। **ओदनभोजनं सुखमिति** ॥ शङ्कते। **अत्र पानादिति** ॥ पानादेव सुखम्, न तु संस्पर्शनेनेत्यर्थः। भोजनादित्यपि द्रष्टव्यम्। तत्र दृष्टान्तमाह। **चन्दनानुलेपनं सुखमितिवदिति** ॥ तथा च पयसा ओदनेन च स्वरूपतस्तावद्देवदत्तसुखाभावात् कथमिदं उदाहरणमिति भावः। समाधत्ते। **सत्यमिति** ॥ **यत्र संस्पर्शमिति** ॥ यत्र विषये संस्पर्शं विना स्वरूपसतैव सुखं नोत्पद्यते तादृशविषयोपलक्षणं संस्पर्शग्रहणमित्यर्थः। फलितमाह। **यत्रेति** ॥ स्पर्शेन यत्र सुखं यथा चन्दनानुलेपनं सुखमिति, यत्र संस्पर्शपूर्वकपानादेर्वा सुखम्। यथा पयःपानं सुखमित्यादौ, तत्र सर्वत्रास्य प्रवृत्तिरित्यर्थः। **तूलिकाया उत्थानं सुखमिति** ॥ अत्र

३२९२ । वा यौ । (२-४-५७)

अजेर्वी वा स्याद्यौ । प्रवयणम् । प्राजनम् ।

३२९३ । करणाधिकरणयोश्च (३-३-११७)

ल्युट् स्यात् । इध्मप्रव्रश्चनः कुठारः । गोदोहनी स्थाली । खलः प्राक्करणाधिकरणयोरित्यधिकारः ।

३२९४ । अन्तरदेशे । (८-४-२४)

अन्तःशब्दाद्धन्तेर्नस्य णः स्यात् । अन्तर्हणनम् । देशे तु अन्तर्हननो देशः । अत्पूर्वस्येत्येव । अन्तर्घ्नन्ति । 'तपरः' किम् । अन्तरघानि ।

३२९५ । अयनं च । (८-४-२५)

अयनस्य णोऽन्तःशब्दात्परस्य । अन्तरयणम् । अदेश इत्येव । अन्तरयनो देशः ।

३२९६ । पुंसि संज्ञायां घः प्रायेण । (३-३-११८)

३२९७ । छादेर्घेऽद्व्युपसर्गस्य । (६-४-९६)

द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वः स्याद्घे परे । दन्ताश्छाद्यन्तेऽनेन दन्तच्छदः । प्रच्छदः । अद्व्रीति किम् ससुपच्छादः । आकुर्वन्त्यस्मिन्नाकरः ।

३२९८ । गोचरसंचरवहव्रजव्यजापणनिगमाश्च । (३-३-११९)

न कर्मोपपदमिति भावः । **अग्निकुण्डस्येति** ॥ शीतकाल इति शेषः । अत्राग्निकुण्डेन संस्पर्शो नास्ति, दाहप्रसङ्गादिति भावः । ननु तूलिकाया उत्थानम् इत्यादिप्रत्युदाहरणेषु पूर्वसूत्रेण ल्युट् स्यादेवेति कर्मणीत्यादि व्यर्थमित्यत आह । **प्रत्युदाहरणेष्विति** ॥ **असमास इति** ॥ नित्यस्योपपदसमासस्याभाव इत्यर्थः । **करणाधिकरणयोश्च** ॥ अर्थनिर्देशोऽयं न तूपपदं व्याख्यानात् । अजपौ परत्वादयं बाधते । तदुक्तं "अजञ्भ्यां स्त्रीखलनाः स्त्रिया खलनौ विप्रतिषेधेन" इति । **इध्मप्रव्रश्चन इति** ॥ प्रव्रश्च्यतेऽनेनेत्यर्थे ल्युट् । इध्मस्य प्रव्रश्चन इति विग्रहः । **गोदोहनीति** ॥ दुह्यतेऽस्यामित्यर्थे ल्युट् । गोर्दोहनीति विग्रहः । **खलः प्रागिति** ॥ व्याख्यानादिति भावः । **पुंसि** ॥ करणाधिकरणयोरित्येव । पूर्वसूत्रापवादः । **छादेर्घे** ॥ 'अद्व्युपसर्गस्य' इति छेदः । **ह्रस्वः स्यादिति** ॥ 'खचि ह्रस्वः' इत्यतस्तदनुवृत्तेरिति भावः । णिच्प्रकृतिभूतस्य छाद उपधाया इति शेषः । 'ऊदुपधायाः' इत्यतस्तदनुवृत्तेः । एतेन णेरेव ह्रस्वः । तत्सामर्थ्यात्तस्य लोपो नेति परास्तम् । **गोचर** ॥ ननु 'पुंसि संज्ञायां घः' इत्येव सिद्धे किमर्थमिदमित्यत आह ।

घान्ता निपात्यन्ते । 'हलश्च' (सू ३३००) इति वक्ष्यमाणस्य घञोऽपवादः । गावश्चरन्त्यस्मिन्निति गोचरो देशः । संचरन्त्यनेन संचरो मार्गः । वहन्त्यनेन वहः स्कन्धः । व्रजः, व्यजस्तालवृन्तम् । निपातनाद्वीभावो न । आपणः पण्यस्थानम् । निगच्छन्त्यनेन निगमश्छन्दः । चात्कषः । निकषः ।

३२९९ । अवे तॄस्त्रोर्घञ् । (३-३-१२०)

अवतारः कूपादेः । अवस्तारो जवनिका ।

३३०० । हलश्च । (३-३-१२१)

हलन्ताद्धञ्स्यात् । घापवादः । (रमन्ते योगिनोऽस्मिन्निति रामः ।) अपमृज्यतेऽनेन व्याध्यादिरित्यपामार्गः । विमार्गः समूहनी ।

३३०१ । अध्यायन्यायोद्यावसंहाराश्च । (३-३-१२२)

अधीयतेऽस्मिन्नध्यायः । नियन्त्युद्युवन्ति संहरन्त्यनेनेति विग्रहः । 'अवहाराधारावायानामुपसंख्यानम्' (वा २२३६) ।

३३०२ । उदङ्कोऽनुदके । (३-३-१२३)

उत्पूर्वादञ्चतेर्घञ्स्यात् न तूदके । घृतमुदच्यत उद्भ्रियतेऽस्मिन्निति घृतोदङ्कश्चर्ममयं भाण्डम् । 'अनुदके' किम् । उदकोदञ्चनः ।

३३०३ । जालमानायः । (३-३-१२४)

आनीयन्ते मत्स्यादयोऽनेनेत्यानायः । 'जालम्' इति किम् । आनयः ।

३३०४ । खनो घ च । (३-३-१२५)

चाद्धञ् । आखनः—आखानः । घित्करणमन्यतोऽप्ययमिति ज्ञापनार्थम् ।

हलश्चेति वक्ष्यमाणस्येति ॥ **चात्कष इति** ॥ व्याख्यानादिति भावः । **अवे तॄस्त्रोर्घञ्** ॥ अवेत्युपसर्गे उपपदे तॄ स्तृ आभ्यां घञ् स्यात् पुंसि संज्ञायां प्रायेणेत्यर्थः । **घापवाद इति** ॥ 'पुंसि संज्ञायाम्' इति विहितस्य घस्यापवाद इत्यर्थः । **हलश्च** ॥ स्पष्टम् । **अध्याय** ॥ अधिपूर्वक इङ् निपूर्वक इण् उत्पूर्वकः युधातुः संपूर्वको हृञ् एते घञन्ता निपात्यन्ते । 'पुंसि संज्ञायाम्' इति घापवादः । **अवहारेति** ॥ अवहारः, आधारः, आवायः, एषां घञन्तानां निपातनस्योपसङ्ख्यानमित्यर्थः । **उदङ्कोऽनुदके** ॥ घस्यापवादः । **घृतोदकमिति** ॥ 'चजोः कु घिण्यतोः' इति कुत्वम् । **जालमानायः** ॥ जालं वाच्यश्चेत् आनाय इति घञन्तमित्यर्थः । **खनो घ च** ॥ घ इति छेदप्रथमाकम् । खनो घञ् स्यात्

तेन भजेः भगः पदम्। करणे घः। खल सञ्चये। अधिकरणे घः। खल इत्यादि।। 'खनेर्डडरेकेकबका वाच्याः' (वा २२३८) आखः—आखरः—आखनिकः—आखनिकबकः। एते खनित्रवचनाः।

३३०५। ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्। (३-३-१२६)

करणाधिकरणयोरिति निवृत्तम्। एषु दुःखसुखार्थेषूपपदेषु खल्स्यात्। तयोरेव—' (सू २८३३) इति भावे कर्मणि च। कृच्छ्रे, दुष्करः कटो भवता। अकृच्छ्रे। भवता ईषत्करः। सुकरः। 'निमिमीलियां खलचोरात्त्वं नेति वाच्यम्' (वा ३४८७)। ईषन्निमयः। दुष्प्रमयः। सुविलयः। निमयः। मयः। लयः।

३३०६। उपसर्गात्खल्घञोः। (७-१-६७)

उपसर्गादेव लभेर्नुम् स्यात्। ईषत्प्रलम्भः। दुष्प्रलम्भः। सुप्रलम्भः। उपालम्भः। 'उपसर्गात्' किम्। ईषल्लभः। लाभः।

३३०७। न सुदुर्भ्यां केवलाभ्याम्।। (७-१-६८)

उपसर्गान्तररहिताभ्यां सुदुर्भ्यां लभेर्नुम् न स्यात्खल्घञोः। सुलभम्।

घञेत्यर्थः। नन्वत्र धित्करणं व्यर्थम्, चजोरभावेन कुत्वस्याप्रसक्तेरित्याशङ्क्य आह। **धित्करणमिति** ॥ **भजेर्भग इति** ॥ भज्यते इति कर्मणि घः। **पदमिति** ॥ पद्यते गम्यतेऽनेनेति विग्रहः। **खनेरिति** ॥ ड, डर, इक, इकबक, एषां चतुर्णां द्वन्द्वः। **आख इति** ॥ डे रूपम्। **आखर इति** ॥ डरे रूपम्। उभयत्रापि डित्त्वसामर्थ्याट्टिलोपः। इके उदाहरति। **आखनिक इति** ॥ इकबके उदाहरति। **आखनिकबक इति** ॥ **ईषद्दुःसुषु** ॥ **निवृत्तमिति** ॥ व्याख्यानादिति भावः। तर्हि 'कर्तरि कृत्' इति कर्तरि स्यादित्यत आह। **तयोरेवेति** ॥ इह दुरिति कृच्छ्रार्थ एवान्वेति अकृच्छ्रार्थे तु ईषदिति सु इति चान्वेति। योग्यताबलात्। तदेतदाह। **कृच्छ्रे, दुष्कर इत्यादिना** ॥ **भवतेति** ॥ 'न लोक' इति षष्ठीनिषेधात् कर्तरि तृतीया। कृच्छ्रेऽादि किम्। ईषत्कार्यम्। अल्पमित्यर्थः। **निमीति** ॥ निपूर्वो मिञ् मीनातिः लीङ् एषामित्यर्थः। 'मीनातिमिनोतिदीङां ल्यपि च' 'विभाषा लीयतेः' इति प्राप्तमात्त्वं खलचोर्निषिध्यते। खलि उदाहरति। **ईषन्निमय इत्यादि** ॥ 'एरच्' इत्यचि उदाहरति। **निमय इत्यादि** ॥ **उपसर्गात्खल्घञोः** ॥ **लभेर्नुमिति** ॥ 'लभेश्च' इत्यतः 'इदितो नुम्' इत्यतश्च तदनुवृत्तेरिति भावः। **न सुदुर्भ्याम्** ॥ केवलाभ्यामित्येतद्व्याचष्टे। **उपसर्गान्तरेति** ॥ **सुप्रलम्भः। अतिदुर्लम्भ इति** ॥ अत्र सुदुरोरुपसर्गान्तरसहितत्वात् पूर्वसूत्रप्राप्तस्य निषेधः। **कथं तर्हीति** ॥ सुदुरोरुपसर्गान्तरसहितत्वेन

दुर्लभम् । 'केवलाभ्याम्' किम् । सुप्रलम्भः । अतिदुर्लम्भः । कथं तर्हि अतिसुलभमतिदुर्लभमिति । यदा स्वती कर्मप्रवचनीयौ तदा भविष्यति ।

३३०८ । कर्तृकर्मणोश्च भूकृञोः । (३-३- १२७)

कर्तृकर्मणोरीषदादिषु चोपपदेषु भूकृञोः खल्स्यात् । 'यथासंख्यं नेष्यते' । कर्तृकर्मणी च धातोरव्यवधानेन प्रयोज्ये । ईषदादयस्तु ततः प्राक् । 'कर्तृकर्मणोश्च्व्यर्थयोरिति वाच्यम्' (वा २२४१) । खित्त्वान्मुम् । अनाढ्येन दुःखेन भूयते दुराढ्यंभवम् । ईषदाढ्यंभवम् । स्वाढ्यंभवम् । ईषदाढ्यंकरः । दुराढ्यंकरः । स्वाढ्यंकरः । 'च्व्यर्थयोः' किम् । आढ्येन सुभूयते ।

३३०९ । आतो युच् । (३-३-१२८)

खलोऽपवादः । ईषत्पानः सोमो भवता । दुष्पानः । 'भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः' (वा २२४३) । दुःशासनः । दुर्योधन इत्यादि ।

नुमो निषेधादिति भावः । समाधत्ते । **यदेति** ॥ 'स्वती पूजायाम् ।' यदा पूजार्थकाविमौ कर्मप्रवचनीयौ तदा उपसर्गत्वाभावात् न सुदुरोरुपसर्गसहितत्वम् । अतो निषेधो भविष्यतीति भावः । सोः पूजार्थतया उपसर्गत्वाभावात् पूर्वसूत्रान्न तत्र प्राप्तिरित्यपि बोध्यम् । **कर्तृकर्मणोश्च** ॥ कर्तृकर्मणोरिति सप्तमी । उपपदयोरिति लभ्यते, व्याख्यानात् । चकारादीषदुस्सुष्विति समुच्चीयते । भूकृञोरिति पञ्चम्यर्थे षष्ठी । तदाह । **कर्तृकर्मणोरीषदादिषु चोपपदेष्विति** ॥ अत्र कर्तृकर्मणोरन्यतरस्मिन् ईषदुस्सूनामन्यतमे च इत्युभयस्मिन् समुच्चिते उपपद इत्यर्थो विवक्षितः । न तु प्रत्येकमुपपदत्वम्, व्याख्यानात् । भाष्ये तथैवोदाहरणाच्च । **नेष्यत इति** ॥ भूकृञोः कर्तृकर्मणोरित्यस्य च न यथासङ्ख्यमित्यर्थः । ननु कर्तृकर्मणोरन्यतरस्य ईषदादीनामन्यतमस्य च उपपदस्य प्रयोगसन्निपाते कथं पौर्वापर्यमित्यत आह । **कर्तृकर्मणी चेत्यादि** ॥ भाष्ये तथैवोदाहरणादिति भावः । **च्व्यर्थयोरिति** ॥ अभूततद्भाव इत्यर्थः । **भूयत इति** ॥ भावे लट् । **दुराढ्यंभवमिति** ॥ भावे खल् । अनाढ्यस्य दुरुपपदस्य भूधातोः प्रागव्यवधानेन प्रयोगः । दुरस्तु ततः प्राक् । **दुराढ्यंकर इति** ॥ अनाढ्यः आढ्यः दुःखेन क्रियते इत्यर्थः । अत्र आढ्यः कर्म उपपदम् । ईषदाढ्यंभवमित्याद्यप्युदाहार्यम् । अत्र ईषदुस्सूनां व्यवहितत्वात् पूर्वसूत्रेणाप्राप्ताविदमारब्धमिति बोध्यम् । **आतो युच्** ॥ कर्तृकर्मणोरिति नानुवर्तते, अस्वरितत्वात् । ईषदादिषु कृच्छ्राकृच्छ्रार्थेषूपपदेषु आदन्ताद्धातोर्युच् स्यादित्यर्थः । तयोरेवेति भावे कर्मणि च । **खलोऽपवाद इति** ॥ वाऽसरूपविधिस्तु न भवति, 'ऋल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्न' इत्युक्तेः । **दुष्पान इति** ॥ 'इदुदुपध' इति षः । **भाषायामिति** ॥ 'छन्दसि गत्यर्थेभ्यः' 'अन्येभ्योऽपि दृश्यन्ते

३३१०। षात्पदान्तात्। (८-४-३५)

नख्य णो न। निष्पानम्। सर्पिष्पानम्। 'षात्' किम्। निर्णयः। 'पदान्तात्' किम्। पुष्णाति। पदे अन्तः पदान्तः इति सप्तमीसमासोऽयम्। तेनेह न। सुसर्पिष्केण।

३३११। आवश्यकाधमर्ण्ययोर्णिनिः। (३-३-१७०)

अवश्यंकारी। शतं दायी।

३३१२। कृत्याश्च। (३-३-१७१)

आवश्यकाधमर्ण्ययोरित्येव। अवश्यं हरिः सेव्यः। शतं देयम्।

३३१३। क्तिच्क्तौ च संज्ञायाम्। (३-३-१७४)

धातोः क्तिच्क्तश्च स्यादाशिषि संज्ञायाम्। 'तितुत्र—' (सू ३१६३) इति नेट्। भवताद्भूतिः।

३३१४। न क्तिचि दीर्घश्च। (६-४-३९)

अनिटां वनतितनोत्यादीनां च दीर्घानुनासिकलोपौ न स्तः क्तिचि परे। यन्तिः। रन्तिः। वन्तिः। तन्तिः।

३३१५। सनः क्तिचि लोपश्चास्यान्यतरस्याम्। (६-४-४५)

सनोतेः क्तिच्यात्वं वा स्यात्लोपश्च वा। सनुतात्। सातिः। सतिः। सन्तिः। देवा एनं देयासुः देवदत्तः।

इत्युत्तरमिदं वार्तिकम्। ईषद्दुस्सुष्वित्येव। खलोऽपवादः। इति खलर्थाः प्रत्ययाः। **आवश्यकाधमर्ण्ययोर्णिनिः** ॥ कर्तरि कृदित्येव। **अवश्यङ्कारीति** ॥ अवश्यमित्यव्ययम्। **शतं दायीति** ॥ 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति षष्ठी न। **कृत्याश्चेत्यादि** ॥ स्पष्टम्। **क्तिच्क्तौ च** ॥ **आशिषीति** ॥ 'आशिषि लिङ्लोटौ' इत्यतस्तदनुवृत्तेरिति भावः। **भवतादिति** ॥ आशिषि लोट्। भूतिरित्यस्य विवरणमिदम्। कर्तरि क्तिच्। **न क्तिचि दीर्घश्च** ॥ **अनिटामिति** ॥ 'अनुदात्तोपदेश' इति सूत्रमिहानुवर्तते इति भावः। **रन्तिरिति** ॥ अत्र 'श्रयुकः किति' इत्यस्याप्रवृत्तेः 'तितुत्र' इत्येव नेट्। भूतिरित्यत्र तु परत्वात् 'श्रयुकः किति' इत्येवोचितम्। **सनः** ॥ **आत्त्वमिति** ॥ 'विड्वनोरनुनासिकस्यात्' इत्यतस्तदनुवृत्तेरिति भावः। **लोपश्चेति** ॥ अन्त्यस्य नकारस्येति शेषः। क्ते उदाहरिष्यन्नाह। **देवा एनं देयासुरिति** ॥ आशीर्लिङ्। **देवदत्त इति** ॥ तयोरेवेति कर्मणि क्तः। क्तिचा बाधा मा भूदिति क्तविधिः। अन्यथा अपवादेन क्तिचा क्तो बाध्येत। वाऽसरूप-

३३१६ । अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा । (३-४-१८)

प्रतिषेधार्थयोरलंखल्वोरुपपदयोः क्त्वा स्यात् । प्राचांग्रहणं पूजार्थम् । 'अमैवाव्ययेन' (सू ७८३) इति नियमान्नोपपदसमासः । 'दो दद्घोः' (सू ३०७७) अलं दत्त्वा । 'घुमास्था—' (सू २४६२) । पीत्वा खलु । 'अलंखल्वोः' किम् । मा कार्षीत् । 'प्रतिषेधयोः' किम् । अलंकारः ।

३३१७ । उदीचां माङो व्यतीहारे । (३-४-१९)

व्यतीहारेऽर्थे माङः क्त्वा स्यात् । अपूर्वकालार्थमिदम् ।

३३१८ । मयतेरिदन्यतरस्याम् । (६-४-७०)

मेङ इकारोऽन्तादेशः स्याद्वा ल्यपि । अपमित्य याचते । अपमाय । उदीचांग्रहणाद्यथाप्राप्तमपि । याचित्वा अपमयते ।

३३१९ । परावरयोगे च । (३-४-२०)

विधिस्तु 'स्त्रियां क्तिन्' इत्यतः प्रागेवेति 'प्रैषातिसर्ग' इति सूत्रे भाष्ये स्पष्टम् । **अलं खल्वोः ॥ क्त्वा स्यादिति ॥** भावार्थकोऽयम् । 'अव्ययकृतो भावे' इति वचनात् । एतच्च 'तुमर्थे सेसेन' इति सूत्रे भाष्ये स्पष्टम् । ननु 'उदीचां माङो व्यतीहारे' इत्युत्तरसूत्रे उदीचाङ्ग्रहणादस्य नित्यत्वावश्यकत्वात् प्राचाङ्ग्रहणं व्यर्थमित्यत आह । **प्राचांग्रहणं पूजार्थमिति ॥** न च वाऽसरूपविधिराशङ्क्यः । तस्य 'स्त्रियां क्तिन्' इत्यतः प्रागेव प्रवृत्तेरुक्तत्वात् । अलं रोदनेनेत्यादि तु बहुलग्रहणात्समाधेयमित्यलम् । उपपदसमासे ल्यपमाशङ्क्य आह । **अमैवाव्ययेनेति ॥ अलन्दत्वेति ॥** दानेन किञ्चिदपि साध्यन्नास्तीत्यर्थः । ईत्वं स्मारयति **घुमास्थेति ॥ पीत्वा खलिति ॥** पानेन साध्यन्नास्तीत्यर्थः । **उदीचां माङो ॥** व्यतीहारो विनिमयः 'समानकर्तृकयोः पूर्वकाले' इत्यनेन सिद्धिमाशङ्क्य आह । **अपूर्वकालार्थमिति ॥ मयतेरिदन्यतरस्याम् ॥** 'वाऽन्यस्य संयोगादेः' इत्यतो वेति 'न ल्यपि' इत्यतो ल्यपीति चानुवर्तते इति भावः । **अपमित्य याचत इति ॥** त्वया गौर्दत्ता चेत् मया महिषी दीयते इत्येवं विनिमयं कर्तुं गां याचते इत्यर्थः । इह विनिमयस्य पूर्वकालिकत्वाभावात् समानकर्तृकयोरित्यस्य न प्राप्तिः । प्रत्युत याचनाया एव पूर्वकालिकत्वात् याचेः क्त्वाप्राप्तिः । गतिसमासे क्त्वो ल्यप् इत्वन्तुक् । **अपमायेति ॥** इत्वाभावे रूपम् । 'ईद्यति' इति ईत्वन्तु न, 'न ल्यपि' इति निषेधात् । **उदीचाङ्ग्रहणादिति ॥** तेन मेङो क्त्वाप्रत्ययस्य विकल्पलाभात् तदभावे याचेः पूर्वकालक्रियावृत्तित्वात् समानकर्तृकयोरिति क्त्वेति भावः । **परावरयोगे च ॥** परावरयोर्योगे इति विग्रहः । योगशब्दस्य प्रत्येकमन्वयः । परयोगे अवरयोगे च क्त्वेति लभ्यते । परेण कस्य योग इत्याकांक्षायां अवरस्येति लभ्यते । अवरेण कस्य योग इत्याकांक्षायाम्परस्येति लभ्यते । तदाह ।

परेण पूर्वस्यावरेण परस्य योगे गम्ये धातोः क्त्वा स्यात्। अप्राप्य नदीं पर्वतः। परनदीयोगोऽत्र पर्वतस्य। अतिक्रम्य पर्वतं स्थिता नदी। अवरपर्वतयोगोऽत्र नद्याः।

३३२०। समानकर्तृकयोः पूर्वकाले। (३-४-२१)

समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्। भुक्त्वा व्रजति। द्वित्वमतन्त्रम्। स्नात्वा भुक्त्वा पीत्वा व्रजति। 'अनुदात्त–' (सू २४२८) इत्यनुनासिकलोपः। विष्णुं नत्वा स्तौति। स्वरत्यादेः 'श्रयुकः

परेण पूर्वस्येति ॥ अवरस्येत्यर्थः। परावरशब्दौ हि क्रमात् व्यवहिताव्यवहितदेशवृत्तवाचिनौ। **क्त्वा स्यादिति** ॥ 'अव्ययकृतो भावे' इति वचनादयमपि भावार्थक एव। अवरस्य परयोगे उदाहरति। **अप्राप्य नदीम्पर्वत इति** ॥ विन्ध्यपर्वताद्दक्षिणदेशे निवसतः विन्ध्यं गङ्गाञ्च नदीमधिकृत्य प्रवृत्तमिदं वाक्यम्। विन्ध्यस्योत्तरत एव हि गङ्गा। तथा च दक्षिणदेशस्थानां गङ्गोत्तरणेन विना विन्ध्यपर्वतः प्राप्यत्वेन स्थित इत्यर्थः, विन्ध्यस्य दक्षिणतो गङ्गाया अभावादिति भावः। तथा च दक्षिणदेशस्थानां विन्ध्यव्यवहिता गङ्गा। दक्षिणदेशीयापेक्षया अव्यवहितस्य विन्ध्यस्य दाक्षिणात्यापेक्षया व्यवहितया गङ्गया योगो गम्यते। तदाह। **परनदीयोगोऽत्र पर्वतस्येति** ॥ अथापरेण परस्य योगे उदाहरति। **अतिक्रम्य पर्वतं स्थिता नदीति** ॥ दाक्षिणात्यानाम् अव्यवहितविन्ध्यपर्वतातिक्रमेणैव व्यवहिता गङ्गा प्राप्यत्वेन स्थितेत्यर्थः। अत्र अव्यवहितेन विन्ध्येन दाक्षिणात्यापेक्षया व्यवहितायाः गङ्गायाः योगो गम्यते। तदाह। **अवरपर्वतयोगोऽत्र नद्या इति** ॥ इह अप्राप्तेरतिक्रमणस्य च विन्ध्यास्थितिपूर्वकालकत्वाभावात् 'समानकर्तृकयोः पूर्व' इत्यस्य न प्राप्तिः। **समानकर्तृकयोः** ॥ समानकर्तृकयोरिति निर्धारणे षष्ठी। पूर्वकाल इत्यस्य पूर्वकालके धात्वर्थे इत्यर्थः। विद्यमानादिति शेषः। **क्त्वा स्यादिति** ॥ अव्ययकृत्वाद्भावार्थकोऽयम्। **भुक्त्वा व्रजतीति** ॥ पूर्वकालिकाद्भोजनात् उत्तरकालिकं व्रजनमित्यर्थः। **द्वित्वमिति** ॥ समानकर्तृकयोरिति द्वित्वमविवक्षितमिति भावः। **स्नात्वेति** ॥ स्नानभोजनपानोत्तरकालिकं व्रजनमित्यर्थः। अत्र व्रजनापेक्षया स्नानादीनाम्बहूनाम्पूर्वकालिकत्वेऽपि क्त्वेति भावः। एतच्च भाष्ये स्पष्टम्। पूर्वम्भुङ्क्ते ततो व्रजतीत्यत्र तु पूर्वशब्देनैव पूर्वत्वस्यावगमात् 'उक्तार्थानामप्रयोगः' इति न्यायात् न क्त्वा। पूर्वम्भुक्त्वा ततो व्रजतीत्यत्र तु न क्रिययोः पौर्वापर्यं किन्तु कर्त्रोरेव। अन्येभ्यो भोक्तृभ्यः पूर्वम्भुक्त्वा पश्चाद्व्रजत्यन्येभ्यो भोक्तृभ्यः इत्यर्थः। आस्यते भोक्तुमित्यत्र तु वासरूपविधिना लट् इति भाष्यादौ विस्तरः। नमधातोः क्त्वाप्रत्यये आह। **अनुदात्तेतीति** ॥ स्वरति सूति सूयतिधूञ्भ्यः क्त्वाप्रत्ययस्य 'श्रयुकः किति' इति निषेधस्याधित्वा 'स्वरतिसूतिसूयति' इति इड्विकल्पमाशङ्क्य आह। **स्वरत्यादेरिति** ॥ 'आर्धधातुकस्येट्' इत्यादेरिड्विधिकाण्डात् प्राक् 'नड्वशिकृति' इत्यादेरिण्निषेधकाण्डस्यारम्भसामर्थ्यात् इह पूर्वविप्रतिषेधमाश्रित्य 'श्रयुकः किति' इति

किति' (सू २३८१) इति नित्यमिडभावः पूर्वविप्रतिषेधेन । स्वृत्वा । सूत्वा । धूत्वा ।

३३२१ । क्त्वि स्कन्दिस्यन्दोः । (६-४-३१)

एतयोर्नलोपो न स्यात्क्त्वि परे । स्कन्त्वा । ऊदित्त्वादिड्वा । स्यन्त्वा—स्यन्दित्वा ।

३३२२ । न क्त्वा सेट् । (१-२-१८)

सेट् क्त्वा किन्न स्यात् । शयित्वा । 'सेट् किम् । कृत्वा ।

३३२३ । मृडमृदगुधकुषक्लिशवदवसः क्त्वा । (१-२-७)

एभ्यः सेट् क्त्वा किन् । मृडित्वा । 'क्लिशः क्त्वा—' (सू ३०४९) इति वेट् । क्लिशित्वा—क्लिष्ट्वा । उदित्वा । उषित्वा । रुदविद—' (सू २६०९) इति किन्त्वम् । रुदित्वा । विदित्वा । मुषित्वा । गृहीत्वा ।

३३२४ । नोपधात्थफान्ताद्वा । (१-२-२३)

सेट् क्त्वा कित्स्याद्वा । श्रथित्वा—श्रन्थित्वा । गुफित्वा—गुम्फित्वा । 'नोपधात्' किम् । । कोथित्वा । रेफित्वा ।

इण्निषेध एव प्रवर्तते इति भावः । **क्त्वि स्कन्दिस्यन्दोः** ॥ **नलोपो नेति** ॥ 'श्नान्नलोपः' इत्यतो नलोप इति 'नाञ्चेः पूजायाम्' इत्यतो नेति चानुवर्त्तते इति भावः । **क्त्वीति** ॥ क्त्वाशब्दस्य सप्तम्येकवचनम् । आत इति योगविभागादाल्लोपः । **स्कन्त्वेति** ॥ स्कन्दिर् धातोः रूपम् । अनुदात्तोपदेशत्वान्नेट् । स्यन्दू धातोः क्त्वाप्रत्यये आह । **ऊदित्त्वादिड्वेति** ॥ **न क्त्वा सेट्** ॥ **किन्नेति** ॥ 'असंयोगाल्लिट्कित्' इत्यतः किदित्यनुवृत्तेरिति भावः । **शयित्वा इति** ॥ कित्त्वाभावात् न गुणनिषेधः । **मृडमृद** ॥ 'न क्त्वा सेट्' इति निषेधस्यापवादः । **मृडित्वेति** ॥ कित्त्वान्न लघूपधगुणः । मृदित्वेत्याद्यप्युदाहार्यम् । **क्लिश इति** ॥ 'क्लिश हिंसायाम्' दिवादौ । ततः क्त्वाप्रत्ययस्य 'क्लिशः क्त्वानिष्ठयोः' इति वेडित्यर्थः । 'क्लिशू विबाधने इत्यस्य तु ऊदित्त्वाद्वेट् । **उदित्वेति** ॥ वदधातोः क्त्वाप्रत्ययः । 'वचिस्वपि' इति सम्प्रसारणम् । **उषित्वेति** ॥ वसधातोः क्त्वा 'वसतिक्षुधोः' इति इट् सम्प्रसारणम् । 'शासिवसि' इति षः । **रुदविद इति कित्त्वमिति** ॥ 'न क्त्वा सेट्' इति निषेधस्यापवाद इति भावः । **नोपधात्थफान्ताद्वा** ॥ थफौ अन्तौ यस्येति विग्रहः । 'न क्त्वा सेट्' इति नित्यनिषेधे प्राप्ते विकल्पोऽयम् । कित्त्वे सति नलोपः । तदभावे तु नेति मत्वा आह । **श्रथित्वेत्यादि** ॥ **कोथित्वा । रेफित्वेति** ॥ कुथ पूतीभावे, रिफ कत्थनयुद्धहिंसादानेषु । इह 'रलो व्युपधात्'

३३२५। वञ्चिलुञ्च्यृतश्च। (१-२-२४)

सेट् क्त्वा किद्वा। वचित्वा–वञ्चित्वा। लुचित्वा–लुञ्चित्वा। ऋतित्वा–अर्तित्वा।

३३२६। तृषिमृषिकृषेः काश्यपस्य। (१-२-२५)

एभ्यः सेट् क्त्वा किद्वा। तृषित्वा–तर्षित्वा। मृषित्वा मर्षित्वा। कृषित्वा–कर्षित्वा[1]। 'रलो व्युपधात्–' (सू २६१७) इति वा कित्त्वम्। द्युतित्वा–द्योतित्वा। लिखित्वा–लेखित्वा। 'रलः' किम्। सेवित्वा। 'व्युपधात्' किम्। वर्तित्वा। 'हलादेः' किम्। एषित्वा। 'सेट्' किम्। भुक्त्वा। 'वसतिक्षुधोरिट्' (सू ३०४६) उषित्वा। क्षुधित्वा–क्षोधित्वा। 'अञ्चेः पूजायाम्' (सू ३०४७) इति नित्यमिट्। अञ्चित्वा। गतौ तु। अक्त्वेत्यपि। लुभित्वा–लोभित्वा। 'लुभो विमोहने' (सू ३०४८) इतीट्। अविमोहने तु लुब्ध्वा।

३३२७। जृव्रश्च्योः क्तिव। (७-२-५५)

इति विकल्पोऽपि न भवति नोपधग्रहणसामर्थ्यात्। **वञ्चिलुञ्च्यृतश्च** ॥ 'न क्त्वा सेट्' इत्यस्यापवादः। कित्त्वविकल्पान्नलोपविकल्पः। ऋतेरुदाहरति। **ऋतित्वा–अर्तित्वेति** ॥ कित्त्वविकल्पाल्लघूपधगुणनिषेधविकल्पः। ऋतिस्सौत्रो धातुः घृणायाम्। तस्यार्धधातुकविषये 'ऋतेरीयङ्' इत्यस्य विकल्पनात् तदभावे कित्त्वमिह विकल्प्यते। **तृषिमृषि** ॥ 'न क्त्वा सेट्' इत्यस्यापवादः। **रल इति** ॥ उकारोपधात् इकारोपधाच्च रलन्तात् हलादेः परः सन् क्त्वा च सेटौ वा किताविति व्याख्यातं प्राक्। रल् प्रत्याहारः। **वर्तित्वेति** ॥ 'वृतु वर्तने' इत्यस्य रूपम्। **एषित्वेति** ॥ इषधातोः रूपम्। इह हलादित्वाभावान्न कित्त्वविकल्पः। किन्तु 'न क्त्वा सेट्' इति नित्यमेव कित्त्वाभावान्न गुणनिषेधः। वसधातोः क्षुधधातोश्च अनुदात्तोपदेशत्वात् इण्निषेधे प्राप्ते तदपवादं स्मारयति। **वसतिक्षुधोरिडिति** ॥ **उषित्वेति** ॥ 'मृडमृद' इति कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणम्। 'शासिवसि' इति षः। अञ्चुधातोः क्त्वाप्रत्ययस्य 'उदितो वा' इति इड्विकल्पे प्राप्ते आह। **अञ्चेः पूजायामिति** ॥ **गतौ त्विति** ॥ तत्र 'उदितो वा' इति वेट्कत्वात्। **लुभित्वा–लोभित्वेति** ॥ व्याकुलीकृत्येत्यर्थः। 'लुभ विमोहने'। तुदादिः। विमोहनं व्याकुलीकरणमिति वृत्तिः। 'रलो व्युपधात्' इति कित्त्वविकल्पः। तत्र 'तीषसह' इति इड्विकल्पे आह। **लुभो विमोहने इतीडिति** ॥ नित्यमिति शेषः। विमोहनार्थाल्लुभः क्त्वानिष्ठयोरिट् स्यात् न तु गार्ध्य इति व्याख्यातं प्राक्। **अविमोहने त्विति** ॥ गार्ध्ये तु 'तीषसह' इति इड्विकल्पे लुभित्वेत्यपि भवति। अभिकाङ्क्षेत्यर्थः। विमोहने तु लुब्ध्वेत्यपपाठः। **जृव्रश्च्योः**

---

१. अत्र क्वचित्तालव्यान्तपाठो दृश्यते—कृशित्वा–कर्शित्वेति चोदाहृतम्।

आभ्यां परस्य क्त्व इट् स्यात् जरीत्वा–जरित्वा । ब्रश्चित्वा ।

३३२८ । उदितो वा । (७-२-५६)

उदितः परस्य क्त्व इड्वा । शमित्वा । 'अनुनासिकस्य क्वि–' (सू २६६६) इति दीर्घः । शान्त्वा । द्यूत्वा–देवित्वा ।

३३२९ । क्रमश्च क्त्वि । (६-४-१८)

क्रम उपधाया वा दीर्घः स्यात् झलादौ क्त्वि परे क्रान्त्वा–क्रन्त्वा । 'झलि' किम् । क्रमित्वा । 'पूङश्च' (सू ३०५०) इति वेट् । पवित्वा–पूत्वा ।

३३३० । जान्तनशां विभाषा । (६-४-३२)

जान्तानां नशेश्च नलोपो वा स्यात् क्त्वि परे । भक्त्वा–भङ्क्त्वा । रक्त्वा–रङ्क्त्वा । 'मस्जिनशोः–' (सू २५१७) इति नुम् । तस्य पक्षे लोपः । नंष्ट्वा नष्ट्वा । 'रधादिभ्यश्च' (सू २५१४) इतीट्पक्षे । नशित्वा । 'झलादाविति वाच्यम्' (वा ५०६६) । नेह । अञ्जित्वा । ऊदित्त्वाद्वेट् ।

क्त्वि ॥ **जरीत्वा–जरित्वेति** ॥ 'श्वयुकः किति' इति निषेधे प्राप्ते विधिः । 'वृतो वा' इति इटो दीर्घविकल्पः । **ब्रश्चित्वेति** ॥ अत्र ऊदित्वादिड्विकल्पे प्राप्ते नित्यमिट् । 'ग्रहिज्या' इति सम्प्रसारणम् । **उदितो वा** ॥ **क्त्व इति** ॥ 'जृव्रश्च्योः' इति पूर्वसूत्रात्तदनुवृत्तेरिति भावः । अप्राप्तविभाषेयम् । शमुधातोरिट्पक्षे उदाहरति । **शमित्वेति** ॥ इडभावे त्वाह । **अनुनासिकस्येति** ॥ **द्यूत्वा–देवित्वेति** ॥ दिवधातोरुदित्त्वात् क्त्वायामिड्विकल्पः । 'रलो व्युपधात्' इति कित्त्वविकल्पः । तत्र इडभावपक्षे कित्त्वपक्षे 'च्छ्वोः' इति वस्य ऊठि इकारस्य यणि द्यूत्वेति रूपम् । इट्पक्षे तु सत्यपि कित्त्वे झलादित्वाभावात् नोट् । इटि कित्त्वाभावपक्षे तु उपधागुण इति भावः । **क्रमश्च क्त्वि** ॥ 'नोपधायाः' इत्यतः उपधाया इति 'तनोतेर्विभाषा' इत्यतः विभाषेति 'ढ्रलोपे पूर्वस्य' इत्यतः दीर्घ इति 'अनुनासिकस्य क्वि' इत्यतः झल्ग्रहणञ्चानुवर्तते । तदाह । **क्रम उपधाया इत्यादि** ॥ 'अनुनासिकस्य क्वि' इति नित्ये प्राप्ते विकल्पोऽयम् । **क्रान्त्वेति** ॥ क्रमुधातोरुदित्त्वादिड्विकल्पः । दीर्घपक्षे रूपम् । **जान्तनशां** ॥ 'श्नान्नलोपः' इत्यतो नलोप इति 'क्ति स्कन्दिस्यन्दोः' इत्यतः क्तीति चानुवर्तते । तदाह । **जान्तानामित्यादि** ॥ **भक्त्वा-भङ्क्त्वेति** ॥ 'भञ्जो आमर्दने' इत्यस्य रूपम् । **रक्त्वा-रङ्क्त्वेति** ॥ 'रञ्ज रागे' इत्यस्य रूपम् । नष्ट्वा–नंष्ट्वेत्यत्राह । **मस्जि इति** ॥ **तस्येति** ॥ नशो नकारस्य 'जान्तनशाम्' इत्यनेन पाक्षिको लोप इत्यर्थः । **झलादाविति** ॥ 'जान्तनशां विभाषा' इति नलोपविकल्पः झलादावित्यर्थः । **अञ्जित्वेति** ॥

---

१. दीक्षिताङ्गीकृतमेतत् । अन्येषां तु युक्तिसिद्धम् ।

पक्षे। अक्त्वा अङ्क्त्वा। 'जनसन–' (सू २५०४) इत्यात्त्वम्। खात्वा–खनित्वा। द्यतिस्यति (सू ३०७४) इतीत्त्वम्। दित्वा। सित्वा। मित्वा। स्थित्वा। 'दधातेर्हिः' (सू ३०७६)। हित्वा।

३३३१। जहातेश्च क्त्वि। (७-४-४३)

हित्वा। हाङ्स्तु। हात्वा। 'अदो जग्धिः–' (सू ३०८०)। जग्ध्वा।

३३३२। समासेऽनञ्पूर्वे क्त्वो ल्यप्। (७-१-३७)

अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात्। तुक्। प्रकृत्य। 'अनञ्' किम्। अकृत्वा। पर्युदासाश्रयणान्नेह। परमकृत्वा।

३३३३। षत्वतुकोरसिद्धः। (६-१-८६)

षत्वे तुकि च कर्तव्ये एकादेशशास्त्रमसिद्धं स्यात्। कोऽसिचत्, इह षत्वं न। अधीत्य। प्रेत्य। 'ह्रस्वस्य–' (सू २८५८) इति तुक्।

इटि झलादित्वाभावात् 'जान्तनशाम्' इति नलोपो नेति भावः। **पक्षे इति** ॥ इट्पक्षे झलादित्वात् नलोपविकल्प इति भावः। **आत्त्वमिति** ॥ 'खनु विदारणे' उदित्त्वाद्वेट्। इडभावपक्षे झलादित्वात् 'जनसनखनाम्' इत्यात्त्वमित्यर्थः। **दित्वेति** ॥ 'दो अवखण्डने' इत्यस्य रूपम्। **सित्वेति** ॥ 'षोऽन्तकर्मणि' इत्यस्य रूपम्। **मित्वेति** ॥ माधातोः रूपम्। **स्थित्वेति** ॥ स्थाधातोः रूपम्। धाधातोः क्त्वाप्रत्यये आह। **दधातेर्हिरिति** ॥ 'ओ हाक् त्यागे' इत्यस्य क्त्वायां हिभावं स्मारयति। **जहातेश्च क्त्वि** ॥ **हित्वेति** ॥ त्यक्त्वेत्यर्थः। **हाङ्स्त्विति** ॥ 'जहातेश्च क्ति' इति हिभावविधौ जहातेरिति निर्देशात् 'ओ हाक् त्यागे' इत्यस्य ग्रहणम्, न तु 'ओ हाङ् गतौ' इत्यस्य। तस्य 'भृञामित्' इति इत्त्वे जिहातेरिति निर्देशापत्तेः। **जग्ध्वेति** ॥ जग्ध् क्त्वा इति स्थिते 'झषस्तथोर्धोऽधः' इति धः। 'झरो झरि' इति प्रकृतिधकारस्य पाक्षिको लोपः। **समासे** ॥ अनञ्पूर्व इति पर्युदासात् अव्ययपूर्वपद इति लभ्यते इति मत्वा आह। **अव्ययेत्यादि** ॥ **तुगिति** ॥ 'ह्रस्वस्य पिति' इत्यनेनेति भावः। **प्रकृत्येति** ॥ प्रशब्दः प्रकर्षे, तस्य 'कुगति' इति क्त्वान्तेन नित्यसमासः। **परमकृत्वेति** ॥ अव्ययपूर्वपदत्वाभावान्न ल्यबिति भावः। **षत्वतुकोरसिद्धः** ॥ 'एकः पूर्वपरयोः' इत्येकादेशप्रकरणात् उत्तरमिदं सूत्रम्। ततश्च असिद्ध इत्यस्य एकादेश इति शेषः। फलितं त्वाह। **एकादेशशास्त्रमिति** ॥ कार्यासिद्धत्वं निराकृत्य शास्त्रासिद्धत्वस्यैव भाष्ये सिद्धान्तितत्वादिति भावः। **कोऽसिचदिति** ॥ 'एङः पदान्तादति' इति पूर्वरूपमिहैकादेशः। तस्य 'अन्तादिवच्च' इति परादित्वे ओसिचदिति पदं। तस्य सकारस्य अपदादितया 'सात्पदाद्योः' इति निषेधाभावात् 'आदेशप्रत्यययोः' इति षत्वं प्राप्तम् एकादेशस्यासिद्धत्वान्न भवति, एकादेशस्यासिद्धत्वेन को असिचदिति स्थिते सकारस्य अकारेण व्यवधानात्

३३३४ । वा ल्यपि । (६-४-३८)

अनुदात्तोपदेशानां वनतितनोत्यादीनामनुनासिकलोपो वा स्याल्ल्यपि । व्यवस्थितविभाषेयम् । तेन मान्तानिटां वा, नान्तानिटां वनादीनां च नित्यम् । आगत्य—आगम्य । प्रणत्य—प्रणम्य । प्रहत्य । प्रमत्य । प्रवत्य । वितत्य । 'अदो जग्धिः—' (सू ३०८०) । 'अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधते' ।

इणः परत्वाभावात् । तदाह । **इह षत्वन्नेति** ॥ षत्वे एकादेशस्यासिद्धत्वे प्रासङ्गिकमुदाहृत्य प्रकृते ल्यपि तुग्विधावसिद्धत्वमुदाहरति । **अधीत्येति** ॥ 'इङ् अध्ययने' नित्यमधिपूर्वः तस्मात् क्त्वो ल्यप् । **प्रेत्येति** ॥ प्रपूर्वादिण्धातोः क्त्वो ल्यप् । इहोभयत्र सवर्णदीर्घस्य आद्गुणस्य चासिद्धत्वात् 'ह्रस्वस्य पिति' इति तुक् । एकादेशस्यासिद्धत्वाभावे तु ह्रस्वाभावात्तुक् न स्यात् । तदाह । **ह्रस्वस्येति तुगिति** ॥ **वा ल्यपि** ॥ 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपः' इत्युत्तरमिदं सूत्रम् । तदाह । **अनुदात्तेत्यादि** ॥ अनुदात्तोपदेशानां वनतितनोत्यादीनाञ्च अनुदात्तोपदेशत्युक्तो नलोपो ल्यपि वा स्यादित्यर्थः । **व्यवस्थितविभाषेति** ॥ व्याख्यानादिति भावः । **मान्तानिटां वेति** ॥ गम्, नम्, रम्, यमां पाक्षिको मलोप इत्यर्थः । **नान्तेति** ॥ नान्तेषु मन्यहनावनिटौ तयोः वनादीनाञ्च अनुदात्तोपदेशेत्यनेन नलोपो नित्यं स्यादित्यर्थः । नान्तानिटामिति बहुवचनन्तु प्रयोगबहुत्वाभिप्रायम् । मान्तानामुदाहरति । **आगत्येति** ॥ गमेरनुनासिकलोपे तुक् । **प्रणत्येति** ॥ नमेरनुनासिकलोपपक्षे तुक् । विरम्य, विरत्य, प्रयत्य, प्रयम्य, इत्यप्युदाहार्यम् । नान्तयोरुदाहरति । **प्रहत्य । प्रमत्येति** ॥ हनो मन्यतेश्च नित्यं नलोपः । **प्रवत्येति** ॥ वनेर्नित्यं नलोपः, तुक् । **वितत्येति** ॥ तनोतेर्नित्यं नलोपः, तुक् । भाष्ये तु 'वा ल्यपि' इति सूत्रन्न दृश्यते । 'अनुदात्त' इति सूत्रे 'अनुदात्तोपदेशेऽनुनासिकलोपो ल्यपि च' इति 'वामः' इति च वार्तिकं पठितम् । ल्यपि च अनुदात्तोपदेश इति नलोपो भवति । मकारान्तानां तु वेत्यर्थः । अथ प्रजग्ध्येत्युदाहरणं मनसि निधाय तत्र अदधातोः क्त्वो ल्यपि 'अदो जग्धिर्ल्यप्किति' इति जग्ध्यादेशविधिं स्मारयति । **अदो जग्धिरिति** ॥ आदेशे इकार उच्चारणार्थः । ननु विधायेत्यत्र 'दधातेर्हिः' इति हिभावः प्राप्नोति । न च तस्य तादौ किति विधानात् ल्यपि कृते कथं तत्प्राप्तिः । अलाश्रयविधौ स्थानिवत्त्वाभावादिति वाच्यम् । परस्मादपि ल्यपः प्रागेवान्तरङ्गत्वात् हिभावप्रवृत्तेर्दुर्निवारत्वात् । तथा प्रदायेत्यत्र तादौ किति विहितमित्त्वं ल्यपः प्रागेवान्तरङ्गत्वात् प्राप्नोति । तथा प्रखन्येत्यत्र 'जनसनखनां सञ्झलोः' इति झलादिलक्षणमात्वं ल्यपः प्रागेव प्राप्नोति । तथा 'द्यतिस्यतिमास्थामित्ति किति' इति इत्त्वं ल्यपः प्रागेव प्राप्नोति । तथा प्रक्रम्येत्यत्र 'क्रमश्च क्ति' इति झलादौ क्ति विहितमुपधादीर्घत्वं ल्यपः प्रागेव प्राप्नोति । तथा आपृच्छ्य प्रदीव्येत्यत्र 'च्छ्वोः' इति शूठौ झलादित्वलक्षणौ ल्यपः प्रागेव स्याताम् । तथा प्रदीव्येत्यत्र वलादिलक्षणः इट् ल्यपः प्रागेव प्राप्नोतीत्याशङ्क्य आह । **अन्तरङ्गानपीति** ॥ कुत एतदित्यत आह । **जग्धिविधाविति** ॥ 'अदो जग्धिस्ति किति' इत्येतावतैव प्रजग्ध्य

जग्धिविधौ ल्यब्ग्रहणात्। तेन हित्वदत्वात्त्वेत्वदीर्घत्वशूठिटो ल्यपि न। विधाय। प्रदाय। प्रखन्य। प्रस्थाय। प्रक्रम्य। आपृच्छ्य। प्रदीव्य।

३३३५। न ल्यपि। (६-४-६९)

ल्यपि परे घुमास्थादेरीत्त्वं न। धेट्। प्रधाय। प्रमाय। प्रगाय। प्रपाय। प्रहाय। प्रसाय। 'मीनातिमिनोति–' (सू २५०८) इत्यात्त्वम्। प्रमाय। निमाय। उपदाय। 'विभाषा लीयतेः' (सू २५०९) विलाय–विलीय। णिलोपः। उत्तार्य। विचार्य।

३३३६। ल्यपि लघुपूर्वात्। (६-४-५६)

लघुपूर्वात्परस्य णेरयादेशः स्याल्ल्यपि। विगणय्य। प्रणमय्य। प्रबेभिदय्य। 'लघुपूर्वात्' किम्। संप्रधार्य।

३३३७। विभाषाऽऽपः। (६-४-५७)

आप्नोतेर्णेरयादेशो वा स्याल्ल्यपि। प्रापय्य–प्याप्य।

३३३८। क्षियः। (६-४-५९)

क्षियो ल्यपि दीर्घः स्यात्। प्रक्षीय।

इत्यत्रापि ल्यपः प्रागेवान्तरङ्गत्वात् जग्ध्यादेशस्सिद्धः। अतो ल्यब्ग्रहणं 'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते' इति ज्ञापयति। एवञ्च अन्तरङ्गजग्ध्यादेशापेक्षया प्राबल्याल्ल्यपि कृते सति तकारादित्वलक्षणजग्धिभावस्याप्रसक्तेः जग्धिविधौ ल्यब्ग्रहणमर्थवदिति भावः। **तेनेति** ॥ हित्वं दत्वं आत्त्वम् इत्त्वं दीर्घत्वं शूठौ इट् च ल्यपि नेत्यर्थः। **न ल्यपि** ॥ 'घुमास्थागापाजहातिसाम्' इत्यनुवर्तते। 'ईयति' इत्यतः 'ईत्' इति च। तदाह। **ल्यपि परे इत्यादि** ॥ **धेडिति** ॥ प्रकृतिप्रदर्शनम्। **प्रधायेति** ॥ 'आदेचः' इत्यात्त्वम्। **प्रपायेति** ॥ निपीयेति तु 'पींङ् पाने' इत्यस्य रूपम्। **प्रसायेति** ॥ 'षोऽन्तकर्मणि' इत्यस्य रूपम्। लीङः क्त्वो ल्यपि आत्वविकल्पं स्मारयति। **विभाषा लीयतेरिति** ॥ **णिलोप इति** ॥ उत्पूर्वात् तॄधातोर्णिचि वृद्धौ रपरत्वे उत्तारि इति रूपम्। विपूर्वाच्चरधातोर्णिचि उपधावृद्धौ विचारीति रूपम्, ताभ्यां क्त्वो ल्यपि णिलोप इत्यर्थः। **ल्यपि लघुपूर्वात्** ॥ 'णेरनिटि' इत्यतो णेरिति 'अयामन्ताल्वाय्य' इत्यतः अय् इति चानुवर्तते। तदाह। **लघुपूर्वादिति** ॥ लघुः पूर्वो यस्माद्वर्णादिति विग्रहः, णिलोपापवादः। **विगणय्येति** ॥ 'गण सङ्ख्याने' चुरादिः कथादिरदन्तः। तस्माण्णिच्। अतो लोपः। क्त्वो ल्यपि णेरयादेशः। **प्रबेभिदय्येति** ॥ भिदधातोर्यङि द्वित्वम्। 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणः। जश्त्वं 'यस्य हलः' इति यकारलोपः, अतो लोपः, क्त्वो ल्यपि णेरयादेशः। **विभाषाऽऽपः** ॥ लघुपूर्वत्वाभावात् पूर्वेण अप्राप्ते विभाषेयम्। **क्षियः** ॥ 'ल्यपि लघुपूर्वात्' इत्यतो ल्यपीति 'युप्लुवोर्दीर्घः

३३३९ । ल्यपि च । (६-१-४१)

वेञो ल्यपि संप्रसारणं न स्यात् । प्रवाय ।

३३४० । ज्यश्च । (६-१-४२)

प्रज्याय ।

३३४१ । व्यश्च । (६-१-४३)

उपव्याय ।

३३४२ । विभाषा परेः । (६-१-४४)

परेर्व्येञो वा संप्रसारणं स्याल्ल्यपि । तुकं बाधित्वा परत्वात् 'हलः' (सू २५५९) इति दीर्घः । परिवीय—परिव्याय । कथम् 'मुखं व्यादाय स्वपिति' 'नेत्रे निमील्य हसति' इति । व्यादाननिमीलनोत्तरकालेऽपि स्वाप-हासयोरनुवृत्तेस्तदंशविवक्षया भविष्यति ।

३३४३ । आभीक्ष्ण्ये णमुल्च । (३-४-२२)

पौनःपुन्ये द्योत्ये पूर्वविषये णमुल्स्यात् क्त्वा च । द्वित्वम् । स्मारंस्मारं

छन्दसि' इत्यतो दीर्घ इति चानुवर्तते । तदाह । **क्षियो ल्यपीति** ॥ **ल्यपि च** ॥ 'वेञः' इति सूत्रमनुवर्तते । 'न सम्प्रसारणे सम्प्रसारणम्' इत्यतः न सम्प्रसारणमिति च । तदाह । **वेञो ल्यपीत्यादि** ॥ **प्रवायेति** ॥ 'वेञ तन्तुसन्ताने' क्त्वो ल्यप् । 'आदेच उपदेशे' इत्यात्त्वम् । इह 'ग्रहिज्यावयिव्यधिवष्टिविचति' इति सम्प्रसारणम् । **ज्यश्च** ॥ ज्याधातोर्ल्यपि सम्प्रसारणम् स्यादित्यर्थः । **प्रज्यायेति** ॥ इह 'ग्रहिज्यावयि' इति सम्प्रसारणम् । **व्यश्च** ॥ वेञो ल्यपि सम्प्रसारणमित्यर्थः । **उपव्यायेति** ॥ 'व्येञ् संवरणे' क्त्वो ल्यपि 'आदेचः' इत्यात्त्वम् । 'ग्रहिज्यावयि' इति सम्प्रसारणम् । **विभाषा परेः** ॥ 'वेञः' इति ल्यपीति सम्प्रसारणमिति चानुवर्तते । तदाह । **परेर्व्येञः इति** ॥ परिपूर्वाद्व्येञः क्त्वो ल्यपि यकारस्य सम्प्रसारणे पूर्वरूपे च कृते परि वि य इति स्थिते आह । **तुकमिति** ॥ **कथमिति** ॥ स्वापकाल एव मुखव्यादानं हासकाल एव नेत्रनिमीलनम् । एवञ्च व्यादाननेत्रनिमीलनयोः स्वापहासपूर्वकालकत्वाभावात् कथं त्वाप्रत्यय इत्याक्षेपः । समाधत्ते **व्यादानेति** ॥ यद्यपि व्यादाननिमीलनोत्पत्त्युत्तरकालके स्वापहसने, न तु तत्पूर्वकालके । तथापि व्यादानोत्पत्त्युत्तरकाले निमीलनोत्पत्त्युत्तरकालेऽपि स्वापहासौ अनुवर्तेते । तत्र स्वापो-त्पत्तिकालीनव्यादानस्य हासोत्पत्तिकालीननिमीलनस्य च तत्कालीनस्वापहासपूर्वकालकत्वाभावे-ऽपि तदुत्तरकालानुवृत्तस्वापहासापेक्षया पूर्वकालकत्वसत्वात् क्त्वाप्रत्यय इत्यर्थः । "मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" इत्यादौ तु समानकर्तृकताविघाताय स्थितस्येत्याद्याहार्यम् । **आभीक्ष्ण्ये णमुल् च** ॥ समानकर्तृकयोः पूर्वकाल इति क्त्वाविध्युत्तरमिदं सूत्रम् । तदाह । **पूर्वविषये इति** ॥ यद्यपि वाऽसरूपविधिना क्त्वा सिद्धः । स्त्र्यधिकारात्प्रागेव वाऽसरूपविधि-

नमति शिवम्। स्मृत्वास्मृत्वा। पायंपायम्। भोजंभोजम्। श्रावंश्रावम्। 'चिण्णमुलोः—' (सू २७६२) इति णमुल्परे णौ वा दीर्घः। गामंगामम्। गमंगमम्। 'विभाषा चिण्णमुलोः' (सू २७६५) इति नुम्वा। लम्भंलम्भम्। लाभंलाभम्। व्यवस्थितविभाषयोपसृष्टस्य नित्यं नुम्। प्रलम्भंप्रलम्भम्। 'जाग्रोऽविचिण्णल्—' (सू २४८०) इति गुणः। जागरंजागरम्। ण्यन्तस्याप्येवम्।

३३४४। न यद्यनाकाङ्क्षे। (३-४-२३)

यच्छब्द उपपदे पूर्वकाले यत्प्राप्तं तन्न, यत्र पूर्वोत्तरे क्रिये तद्वाक्यमपरं नाकाङ्क्षति चेत्। यदयं भुङ्क्ते ततः पठति। इह क्त्वाणमुलौ न। 'अनाकाङ्क्षे' किम्। यदयं भुक्त्वा व्रजति ततोऽधीते।

३३४५। विभाषाऽग्रेप्रथमपूर्वेषु। (३-४-२४)

आभीक्ष्ण्य इति नानुवर्तते। एषूपपदेषु समानकर्तृकयोः पूर्वकाले

पक्षेऽपि क्त्वाविधौ वाऽसरूपवचनस्य वाऽसरूपसूत्रभाष्ये प्रपञ्चितत्वात्। तथापि 'विभाषाग्रे प्रथम' इति सूत्रे उभयोर्विधानाय चकारः। तत्र हि अग्रेभोजं व्रजति देवदत्तः अग्रे भुक्त्वा इत्यादौ देवदत्तकर्तृकभोजने यज्ञदत्तादिकर्तृकभोजनापेक्षया पूर्वकालत्वमग्रादिशब्देन बोध्यते, न तु व्रजनादिक्रियापेक्षया पूर्वकालत्वम्। ततश्च 'समानकर्तृकयोः' इति क्त्वाप्रत्ययस्य तत्र न प्रसक्तिः। नापि 'विभाषाग्रे' इत्यनेन आभीक्ष्ण्ये तत्राप्राप्तविधिरिति युज्यते। आभीक्ष्ण्ये पूर्वविप्रतिषेधेन 'आभीक्ष्ण्ये णमुल् च' इत्यस्यैव प्रवृत्तेरिष्टत्वादिति शब्देन्दुशेखरे विस्तरः। **द्वित्वमिति** ॥ 'नित्यवीप्सयोः' इत्यनेनेति शेषः। **स्मृत्वास्मृत्वेति** ॥ नमति शिवम् इत्यनुषज्यते। **पायंपायमिति** ॥ 'आतो युक् चिण्कृतोः' इति युक्। **वा दीर्घ इति** ॥ गमेर्ण्यन्ताण्णमुलि 'मितां ह्रस्वः' इति ह्रस्वे कृते 'चिण्णमुलोः' इति दीर्घविकल्प इत्यर्थः। **व्यवस्थितेति** ॥ व्याख्यानादिति भावः। **उपसृष्टस्येति** ॥ उपसर्गपूर्वस्येत्यर्थः। जागृधातोर्णमुलि वृद्धिमाशङ्क्य आह। **जाग्र इति** ॥ **ण्यन्तस्याप्येवमिति** ॥ जागृधातोर्णौ वृद्धिं बाधित्वा 'जाग्रोऽविचिण्णल्डित्सु' इति गुणे णिलोपे जागरमित्येव रूपमिति भावः। **न यद्यनाकाङ्क्षे** ॥ **यत्प्राप्तमिति** ॥ क्त्वा णमुल् चेत्यर्थः। **यत्रेति** ॥ यस्मिन्वाक्ये पूर्वोत्तरकालिकक्रियापदे स्तः तद्वाक्यं वाक्यान्तरं नाकाङ्क्षति चेदित्यर्थः। पूर्वोत्तरकालिकक्रियापदद्वययुक्तं वाक्यं वाक्यान्तरं नाकाङ्क्षति चेत् इति यावत्। **यदयमिति** ॥ यदित्यव्ययम्। यदायं भुङ्क्ते ततः परं पठतीत्यर्थः। इदमेकं वाक्यं भुजिपठिक्रियापदद्वययुक्तं न वाक्यान्तरमाकाङ्क्षतीति भावः। **यदयं भुक्त्वा व्रजतीति** ॥ भुजिव्रजिक्रियापदद्वययुक्तमिदं वाक्यम् ततः अधीत इति वाक्यान्तरमाकाङ्क्षति नात्रायं निषेध इति भावः। **विभाषाग्रे** ॥ अग्रे, प्रथम, पूर्व, एषां द्वन्द्वः। अग्रे इत्यव्ययम्। एदन्तं वा निपातनात्। **नानुवर्तते इति** ॥

क्त्वाणमुलौ वा स्तः । अग्रे भोजं व्रजति । अग्रे भुक्त्वा । प्रथमं भोजम् । प्रथमं भुक्त्वा । पूर्वं भोजम्–पूर्वं भुक्त्वा । पक्षे लडादयः । अग्रे भुङ्क्ते ततो व्रजति । आभीक्ष्ण्ये तु पूर्वविप्रतिषेधेन नित्यमेव विधिः । अग्रे भोजंभोजं व्रजति । भुक्त्वाभुक्त्वा ।

३३४६ । कर्मण्याक्रोशे कृञः खमुञ् । (३-४-२५)

कर्मण्युपपदे आक्रोशे गम्ये कृञः खमुञ् स्यात् । चौरंकारमाक्रोशति । करोतिरुच्चारणे । चौरशब्दमुच्चार्येत्यर्थः ।

३३४७ । स्वादुमि णमुल् । (३-४-२६)

स्वाद्वर्थेषु कृञो णमुल्स्यादेककर्तृकयोः पूर्वकाले । स्वादुशब्दस्य मान्तत्वं निपात्यते । अस्वाद्वीं स्वाद्वीं कृत्वा भुङ्क्ते स्वादुंकारं भुङ्क्ते । संपन्नंकारम् । लवणंकारम् । संपन्नलवणशब्दौ स्वादुपर्यायौ । वाऽसरूपेण क्त्वापि । स्वादुं कृत्वा भुङ्क्ते ।

एतच्च भाष्ये स्पष्टम् । **प्रथमं भोजमिति** ॥ प्रथमामिति क्रियाविशेषणम् । **पूर्वं भोजमिति** ॥ पूर्वमिति क्रियाविशेषणम् । **पक्षे इति** ॥ क्त्वाणमुलौ तावदव्ययकृत्त्वाद्भावार्थकौ । यदा तु कर्तृविवक्षा तदा लडादय इत्यर्थः । ननु अग्रेप्रथमपूर्वपदेषूपपदेषु क्त्वाणमुलौ परत्वादाभीक्ष्ण्येऽपि स्यातामित्यत आह । **आभीक्ष्ण्ये तु पूर्वविप्रतिषेधेनेति** ॥ व्याख्यानादिति भावः । **कर्मण्याक्रोशे** ॥ कर्मण्युपपदनिर्देशः । आक्रोश इति द्योत्यार्थ इति मत्वा व्याचष्टे । **कर्मण्युपपदे आक्रोशे गम्ये कृञः खमुञिति** ॥ स्पष्टत्वान् न व्याख्येयमिति भावः । **चौरङ्कारमिति** ॥ उपपदसमासे 'अरुर्द्विषदजन्तस्य' इति मुम् । **स्वादुमि णमुल्** ॥ स्वादुमीत्यर्थग्रहणम् । व्याख्यानात् । तथा च स्वादुपर्याये उपपद इति लभ्यते । 'कर्मण्याक्रोशे' इति पूर्वसूत्रात् कृञ इत्यनुवर्तते ननु खमुञ्, अस्वरितत्वात् । ततश्च 'आभीक्ष्ण्ये णमुल् च' इत्यतः णमुलित्यनुवर्त्तते समानकर्तृकयोः 'पूर्वकाले' इति सूत्रञ्च । तदाह । **स्वाद्वर्थेष्वित्यादिना** ॥ ननु स्वादुशब्दस्य स्वादाविल्येव निर्देश उचित इत्यत आह । **स्वादुशब्दस्येति** ॥ नन्वत्र खमुञेवानुवर्तताम् । एवञ्च स्वादुमि मान्तत्वनिपातनमपि न कर्तव्यमित्याशङ्क्य स्त्रियां च्व्यन्तमुदाहरति । **अस्वाद्वीमिति** ॥ यवागूमपूपिकामित्यादि विशेष्यम् । अत्र णमुलि विवक्षिते मान्तत्वे निपातिते उदन्तत्वाभावात् 'ओतो गुणवचनात्' इति न ङीप् । खमुञि कृते 'अरुर्द्विषत्' इति मुमि तु स्वाद्विङ्कारमित्येव प्रसज्येत । किञ्च च्व्यन्तस्याव्ययत्वात् 'अरुर्द्विषत्' इति मुम् दुर्लभः, तत्र मुम्विधौ अनव्ययस्येत्यनुवृत्तेः । ततश्च अस्वादुं स्वादुं कृत्वा भुङ्क्ते स्वादुङ्कारम्भुङ्क्ते इत्यत्रापि मुम् न स्यात्, खमुञः खित्त्वस्य चोरङ्कारमित्यत्र सावकाशत्वात् । किञ्च 'च्वौ' इति दीर्घापत्तिः । अतो णमुलि स्वादुशब्दे मान्तत्वनिपातनमिति भावः । स्वादुमीत्यर्थग्रहणस्य प्रयोजनमाह । **सम्पन्नङ्कारमिति** ॥ अत्र 'अस्य च्वौ' इति ईत्त्वाभावोऽपि मान्तत्वनिपातनस्य फलं बोध्यम् । **स्वादुपर्यायाविति** ॥ वृत्त्यादिग्रन्थेषु

३३४८ । अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् । (३-४-२७)

एषु कृञो णमुल्स्यात् सिद्धोऽप्रयोगोऽस्यैवंभूतश्चेत्कृञ् । व्यर्थत्वात्प्रयोगानर्ह इत्यर्थः । अन्यथाकारम् । एवंकारम् । कथंकारम् । इत्थंकारम् भुङ्क्ते । इत्थं भुङ्क्ते इत्यर्थः । 'सिद्ध–' इति किम् । शिरोऽन्यथा कृत्वा भुङ्क्ते ।

३३४९ । यथातथयोरसूयाप्रतिवचने । (३-४-२८)

कृञः सिद्धाप्रयोग इत्येव, असूयया प्रतिवचने । यथाकारमहं भोक्ष्ये किं तवानेन ।

३३५० । कर्मणि दृशिविदोः साकल्ये । (३-४-२९)

कर्मण्युपपदे णमुल्स्यात् । कन्यादर्शं वरयति । सर्वाः कन्या इत्यर्थः । ब्राह्मणवेदं भोजयति । यं यं ब्राह्मणं जानाति लभते विचारयति वा तं सर्वं भोजयतीत्यर्थः ।

तथादर्शनादिति भावः । **वाऽसरूपेण क्त्वापीति** ॥ यद्यपि 'स्त्रियां क्तिन्' इत्यतः प्रागेव वाऽसरूपविधिरिति भाष्ये स्थितम् । तथापि तत्रैव भाष्ये 'क्त्वायां वावचनम्' इति क्त्वाप्रत्ययविषये वाऽसरूपविधिप्रवृत्तेर्विशिष्य वचनादिह क्त्वापि भवतीत्यर्थः । वाऽसरूपविधिः स्त्रियामित्यधिकारात् प्रागूर्ध्वञ्च भवतीति पक्षान्तरमपि तत्रैव भाष्ये स्थितम् । तत्पक्षे क्त्वायां वाऽसरूपप्रवृत्तिर्निर्बाधेत्यास्तान्तावत् । **अन्यथैवं** ॥ अन्यथा एवम् कथम् इत्थम् एषामव्ययानां द्वन्द्वात्सप्तमीबहुवचनम् । सिद्धः अप्रयोगः प्रयोगाभावः यस्य कृञः स सिद्धाप्रयोग इति विग्रहः । तदाह । **एषु कृञ इत्यादि** ॥ ननु कृञः अप्रयोगे कथन्तदर्थावगतिः अर्थावगत्यभावे तत्प्रयोगो वा किमर्थ इत्यत आह । **व्यर्थत्वादिति** ॥ निष्फलत्वादिति भावः । अर्थस्याविवक्षितत्वेऽपि णमुल्प्रत्ययसाधुत्वार्थं तत्प्रयोग इति भावः । तदेव दर्शयति । **इत्थं भुङ्क्ते इत्यर्थ इति** ॥ 'समानकर्तृकयोः पूर्वकाले' इत्यसम्भवान्नानुवर्तते इति भावः । **सिद्धेति किमिति** ॥ सिद्धाप्रयोगश्चेदिति किमर्थमित्यर्थः । भाष्ये अन्यथा कृत्वा चोदितामिति प्रयोगात् समानकर्तृकत्वाभावेऽपि क्त्वाप्रत्ययो बोध्यः । **यथातथयोः** ॥ **इत्येवेति** ॥ यथा तथा अनयोरुपपदयोः कृञः णमुल् स्यात्सिद्धाप्रयोगश्चेत् कृञिति फलितम् । असूयया प्रतिवचनमिति विग्रहः । 'कर्तृकरणे कृता बहुलम्' इति समासः । तदाह । **असूययेति** ॥ **कर्मणि दृशिविदोः** ॥ कर्मणीति नार्थनिर्देश इत्याह । **कर्मण्युपपदे इति** ॥ कर्मण्युपपदे तदर्थस्य धात्वर्थे प्रति कर्मभूतस्य साकल्ये गम्ये दृशिविदिभ्यां णमुल् इति फलितम् । समानकर्तृकयोः पूर्वकाले इत्यनुवर्तत एव । **वरयतीति** ॥ 'वर ईप्सायाम्' चुरादौ कथादिरदन्तः । अल्लोपस्य स्थानिवत्त्वान्नोपधावृद्धिः । विदिं विवृणोति । **जानाति लभते विचारयति वेति** ॥ "सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे । विन्दते विन्दति प्राप्तौ श्यनूलुक्श्नशेष्विदं क्रमात्" इति प्रागुक्तम् । तत्र सत्तार्थकस्य विदेरिह न ग्रहणम्

३३५१ । यावति विन्दजीवोः । (३-४-३०)

यावद्वेदं भुङ्क्ते । यावल्लभते तावदित्यर्थः । यावज्जीवमधीते ।

३३५२ । चर्मोदरयोः पूरेः । (३४-३१)

कर्मणीत्येव । चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते ।

३३५३ । वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् । (३-४-३२)

कर्मण्युपपदे पूरेर्णमुल्स्यादूकारलोपश्च वा समुदायेन वर्षप्रमाणे गम्ये । गोष्पदपूरं वृष्टो देवः । गोष्पदप्रं वृष्टो देवः । 'अस्य' इति किम् । उपपदस्य मा भूत् । मूषिकाबिलप्रम् ।

३३५४ । चेले क्नोपेः । (३-४-३३)

चेलार्थेषु कर्मसूपपदेषु क्नोपेर्णमुल्स्याद्वर्षप्रमाणे । चेलक्नोपं शब्दाययन् वृष्टो देवः । वस्त्रक्नोपम् । वसनक्नोपम् । यथा वर्षणे वस्त्रम् शब्दयते तथाऽवर्षदित्यर्थः ।

३३५५ । निमूलसमूलयोः कषः । (३-४-३४)

कर्मणीत्येव । कषादिष्वनुप्रयोगं वक्ष्यति । अत्र प्रकरणे पूर्वकाल इति न संबध्यते । निमूलकाषं कषति । समूलकाषं कषति । निमूलं समूलं कषतीत्यर्थः । एकस्यापि धात्वर्थस्य निमूलादिविशेषणसंबन्धाद्भेदः । तेन सामान्यविशेषभावेन विशेषणविशेष्यभावः ।

अकर्मकत्वादिति भावः । **यावति विन्दजीवोः** ॥ यावच्छब्दे उपपदे विन्देतेः जीवतेश्च णमुलित्यर्थः । इह पूर्वकाल इति न सम्बध्यते, अयोग्यत्वात् अप्रतीतेश्च । एवमन्यत्रापि । यावज्जीवमधीते यावन्तं कालं जीवति तावन्तङ्कालमधीते इत्यर्थः । 'अकर्मकधातुभिर्योगे' इति कर्मत्वात् यावच्छब्दाद्द्वितीया । **चर्मोदरयोः पूरेः** ॥ चर्मणि उदरे च कर्मण्युपपदे पूरयतेर्णमुलित्यर्थः । **चर्मपूरं स्तृणातीति** ॥ चर्म पूरयन् छादयतीत्यर्थः । **गोष्पदप्रमिति** ॥ पूरेर्णमुलि णिलोपे ऊलोपपक्षे च रूपम् । अत्र वृष्टेर्गोष्पदपूरणक्षमत्वादल्पत्वङ्गम्यते । **अस्येति किमिति** ॥ पूरेरित्यर्थकम् अस्येति किमर्थमित्यर्थः । **मूषिकाबिलप्रमिति** ॥ अस्येत्यनुक्तौ उपपदेऽपि ऊकारस्य लोपः स्यादिति भावः । **चेले क्नोपेः** ॥ चेल इत्यर्थग्रहणम्, व्याख्यानादिति भावः । 'क्नूयी शब्दे' इति चुरादौ । तदाह । **चेलं क्नोपमिति** ॥ क्नोपशब्दार्थं स्फोरयति । **शब्दाययन्निति** ॥ वर्षप्रमाणं स्फोरयितुमाह । **यथा वर्षण इति** ॥ **निमूलसमूलयोः कषः** ॥ निमूले समूले च कर्मण्युपपदे कषेर्णमुलित्यर्थः । **वक्ष्यतीति** ॥ 'कषादिषु यथाविध्यनुप्रयोगः' इति णमुल्प्रकृतेरनुप्रयोगं वक्ष्यतीत्यर्थः । **न सम्बध्यते इति** ॥ अयोग्यत्वादप्रतीतेश्च इति भावः । णमुल्प्रकृतेरनुप्रयुज्यमानधातोश्च

३३५६। शुष्कचूर्णरूक्षेषु पिषः। (३-४-३५)

एषु कर्मसु पिषेर्णमुल्। शुष्कपेषं पिनष्टि। शुष्कं पिनष्टीत्यर्थः। चूर्णपेषम्। रूक्षपेषम्।

३३५७। समूलाकृतजीवेषु हन्कृञ्ग्रहः। (३-४-३६)

कर्मणीत्येव। समूलघातं हन्ति। अकृतकारं करोति। जीवग्राहं गृह्णाति। जीवतीति जीवः। इगुपधलक्षणः कः। जीवन्तं गृह्णातीत्यर्थः।

३३५८। करणे हनः। (३-४-३७)

पादघातं हन्ति। पादेन हन्तीत्यर्थः। यथाविध्यनुप्रयोगार्थः सन्नित्यसमासार्थोऽयं योगः। भिन्नधातुसंबंधे तु 'हिंसार्थानां च–' (सू ३३६९) इति वक्ष्यते।

३३५९। स्नेहने पिषः। (३-४-३८)

स्निह्यते येन तस्मिन्करणे पिषेर्णमुल्। उदपेषं पिनष्टि। उदकेन पिनष्टीत्यर्थः।

पौनरुक्त्यमपरिहरति। **एकस्यापीति**॥ निमूलसमूलकषणापेक्षया केवलकषणमन्यत्। यथा इन्द्रो महेन्द्र इति भावः। **तेन सामान्येति**॥ निमूलसमूलकषणात्मकङ्कषणमिति बोधः। यथा महादेवो देव इत्यादाविति भावः। **शुष्कचूर्णरूक्षेषु पिषः॥ कर्मस्विति**॥ उपपदेष्विति शेषः। अत्र पिषधातोरनुप्रयोगः। **समूलाकृत**॥ समूल अकृत जीव एषान्द्वन्द्वः। कर्मणीत्येव। समूलादिषु कर्मसूपपदेषु हन् कृञ् ग्रह् एभ्यो णमुलित्यर्थः। यथासङ्ख्यमत्रेष्यते। जीवशब्दस्य भावघञन्तत्वे प्राणधारणं गृह्णातीत्याश्रयणे हन्तीत्यर्थः स्यात्, न तु जीवन्तङ्गृह्णातीत्यर्थः स्यादित्यत आह। **जीवतीति जीव इति**॥ ननु 'अकर्तरि कारके' इति पर्युदासात् कथङ्कर्तरि घञित्यत आह। **इगुपधेति**॥ **करणे हनः**॥ ननु हिंसार्थानां च समानकर्मकाणां इत्यनुपदं वक्ष्यमाणसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह। **यथाविधीत्यादि**॥ कषादिषु यथाविध्यनुप्रयोगसिद्ध्यर्थस्सन् 'उपपदमतिङ्' इति नित्यसमासार्थोऽयमारम्भ इत्यर्थः। अनुप्रयोगार्थो नित्यसमासार्थश्चेति यावत्। हिंसार्थानाञ्चेति सूत्रञ्च कषादिबहिर्भूतं तस्यात्र प्रवृत्तौ तु अनुप्रयोगो न स्यात्। किञ्च 'हिंसार्थानाञ्च' इति सूत्रं 'उपदंशस्तृतीयायाम्' इत्युत्तरम्पठितम्। तस्यात्र प्रवृत्तौ 'तृतीयाप्रभृतीन्यन्यतरस्याम्' इति वैकल्पिक उपपदसमासः स्यादिति भावः। भाष्ये तु अहिंसार्थन्नित्यसमासार्थश्चेति स्थितम्। तर्हि हिंसार्थानाञ्चेत्यस्य को विषय इत्यत आह। **भिन्नेति**॥ णमुल्प्रकृतिभूतहनधात्वपेक्षया धात्वन्तरयोगे तु दण्डोपघातङ्गाः कालयति दण्डेनोपघातमित्यत्र 'हिंसार्थानाञ्च' इत्यस्य प्रवृत्तिर्वक्ष्यते इत्यर्थः। **स्नेहने पिषः॥ उदपेषमिति**॥ 'पेषंवासवाहनधिषु च' इति उदकशब्दस्य

३३६०। हस्ते वर्तिग्रहोः। (३-४-३९)

हस्तार्थे करणे। हस्तवर्तं वर्तयति। करवर्तम्। हस्तेन गुलिकां करोतीत्यर्थः। हस्तग्राहं गृह्णाति। करग्राहम्। पाणिग्राहम्।

३३६१। स्वे पुषः। (३-४-४०)

करण इत्येव। स्व इत्यर्थग्रहणम्। तेन स्वरूपे पर्याये विशेषे च णमुल्। स्वपोषं पुष्णाति। धनपोषम्। गोपोषम्।

३३६२। अधिकरणे बन्धः। (३-४-४१)

चक्रबन्धं बध्नाति। चक्रे बध्नातीत्यर्थः।

३३६३। संज्ञायाम्। (३-४-४२)

बध्नातेर्णमुल्संज्ञायाम्। क्रौञ्चबन्धं बद्धः। मयूरिकाबन्धम्। अट्टालिकाबन्धम्। बन्धविशेषाणां संज्ञा एताः।

३३६४। कर्त्रोर्जीवपुरुषयोर्नशिवहोः। (३-४-४३)

जीवनाशं नश्यति। जीवो नश्यतीत्यर्थः। पुरुषवाहं वहति। पुरुषो वहतीत्यर्थः।

३३६५। ऊर्ध्वे शुषिपूरोः। (३-४-४४)

ऊर्ध्वे कर्तरि। ऊर्ध्वशोषं शुष्यति। वृक्षादिरूर्ध्व एव तिष्ठन्छुष्यतीत्यर्थः। ऊर्ध्वपूरं पूर्यते। ऊर्ध्वमुख एव घटादिर्वर्षोदकादिना पूर्णो भवतीत्यर्थः।

३३६६। उपमाने कर्मणि च। (३-४-४५)

उदादेशः। **हस्ते वर्तिग्रहोः** ॥ पञ्चम्यर्थे षष्ठी। हस्त इत्यर्थग्रहणम् व्याख्यानात्। तथा च हस्तार्थक इति लभ्यते, करण इत्यनुवर्त्तते, तदाह। **हस्तार्थे करणे इति** ॥ करणकारकीभूतहस्तपर्याये उपपदे ण्यन्तवृतुधातोर्ग्रहधातोश्च णमुलित्यर्थः। **स्वे पुषः** ॥ **अर्थग्रहणमिति** ॥ व्याख्यानादिति भावः। **तेनेति** ॥ स्वरूपे स्वशब्दे स्वपर्याये धनादिशब्दे विशेषेषु स्वविशेषवाचिगवादिशब्देषु चोपपदेषु णमुलित्यर्थः। एतच्च 'स्वं रूपम्' इति सूत्रे भाष्ये स्पष्टम्। तत्र स्वशब्दे उपपदे उदाहरति। **स्वपोषमिति** ॥ धनेन पुष्णातीत्यर्थः। पर्याये उपपदे उदाहरति। **धनपोषमिति** ॥ स्वविशेष उपपदे उदाहरति। **गोपोषमिति** ॥ **अधिकरणे** ॥ अधिकरणे उपपदे **बन्धधातोर्णमुलित्यर्थः**। **संज्ञायाम्** ॥ अनधिकरणार्थ आरम्भः। **कर्त्रोः** ॥ 'नशिवहोः' इति पञ्चम्यर्थे षष्ठी। कर्तरि जीवे उपपदे नशेः कर्तरि पुरुषे उपपदे वहधातोर्णमुलित्यर्थः। **ऊर्ध्वे शुषि** ॥ **ऊर्ध्वे कर्तरीति** ॥ उपपदे शुषेः पूरेश्च णमुलिति शेषः। **उपमाने** ॥ **चात्कर्तरीति** ॥ कर्मणि कर्तरि च उपमाने उपपदे धातोर्णमुलित्यर्थः।

चान्कर्तरि। घृतनिधायं निहितं जलम्। घृतमिव सुरक्षितमित्यर्थः। अजकनाशं नष्टः। अजक इव नष्ट इत्यर्थः।

३३६७। कषादिषु यथाविध्यनुप्रयोगः। (३-४-४६)

यस्माण्णमुलुक्तः स एवानुप्रयोक्तव्य इत्यर्थः। तथैवोदाहृतम्।

३३६८। उपदंशस्तृतीयायाम्। (३-४-४७)

इतः प्रभृति पूर्वकाल इति संबध्यते। 'तृतीयाप्रभृतीन्यन्यतरस्याम्' (सू ७८४) इति वा समासः। मूलकोपदंशं भुङ्क्ते। मूलकेनोपदंशम्। दश्यमानस्य मूलकस्य भुजिं प्रति करणत्वात्तृतीया। यद्यप्युपदंशिना सह न शाब्दस्संबन्धस्तथाप्यार्थोऽस्त्येव, कर्मत्वात्। एतावतैव सामर्थ्येन प्रत्ययः समासश्च। तृतीयायामिति वचनसामर्थ्यात्। ततश्चायमर्थः मूलकेन भुङ्क्ते इति शाब्दान्वये किंकृत्वेत्याकाङ्क्षया उपदश्येति तदेव कर्मत्वेनान्वेति।

कषादिषु ॥ **यस्मादिति** ॥ धातोरिति शेषः। **णमुलुक्त इति** ॥ 'निमूलसमूलयोः कषः' इत्यारभ्य 'उपमाने कर्मणि च' इत्यन्तैस्सूत्रैरिति शेषः। **तथैवोदाहृतमिति** ॥ निमूलकाषङ्कषर्तात्यादीति शेषः। एवञ्च पृथगिह नोदाहर्तव्यमिति भावः। **उपदंशस्तृतीयायाम्** ॥ **सम्बद्ध्यते इति** ॥ मण्डूकप्लुत्येति शेषः। तृतीयान्ते उपपदे उपपूर्वाद्दंशधातोर्णमुल् समानकर्तृकयोः पूर्वकाले इत्यर्थः। नित्यमुपपदसमासमाशङ्क्य आह। **तृतीयाप्रभृतीनीति** ॥ ननु मूलकेनोपदंशं भुङ्क्ते मूलकेनोपदंशमित्यत्र मूलकस्य उपदंशनं प्रति कर्मत्वात् कथं मूलकात् तृतीया कथं वा उपदंशात् णमुल् इत्यत आह। **दश्यमानस्येत्यादि** ॥ प्रधानक्रियानुरोधात् परत्वाच्चेति भावः। ननु मूलकस्य भुजिक्रियां प्रति करणत्वे उपदंशनेन असामर्थ्यात्समासानुपपत्तिरिति शङ्कते। **यद्यपीति** ॥ उपदंशिना सह मूलकस्य कर्मत्वेनान्वयश्शब्दगम्यो न भवति। तस्य भुजिक्रियां प्रति करणत्वेनान्वयस्योक्तत्वादित्याक्षेपः। समाधत्ते। **तथापीति** ॥ भुजिक्रियां प्रति शाब्दमर्यादया करणत्वेनान्वितस्यापि मूलकस्योपदंशनं प्रति आर्थिकः कर्मत्वान्वयोऽस्त्येव। मूलकस्योपदंशनं प्रति वस्तुतः कर्मत्वस्य सत्त्वादित्यर्थः। नन्वार्थिककर्मत्वान्वयमादाय कथं तृतीया कथं वा णमुल् कथं वा समास इत्यत आह। **एतावतैवेति** ॥ कुत एतदित्यत आह। **तृतीयायामिति वचनसामर्थ्यादिति** ॥ यदि तृतीयान्ते शाब्दान्वय एवात्र विवक्ष्येत, तदा करण इत्येवावक्ष्यत् 'करणे हनः' इतिवदिति भावः। मूलकस्य भुजिक्रियां प्रति करणत्वान्वयश्शाब्दः। उपदंशे कर्मत्वान्वयः आर्थिकः इत्येतदुपपादयति। **ततश्चायमर्थ इति** ॥ मूलकेन भुङ्क्ते इत्यन्वयश्शाब्दः। प्रधानक्रियानुरोधात्परत्वाच्च तृतीयाविभक्तेः प्रवृत्तेरिति भावः। **किंकृत्वेति** ॥ किङ्कृत्वा मूलकेन भुङ्क्ते इत्याकाङ्क्षायां उपदश्येत्यन्वेतीत्यर्थः॥

३३६९ । हिंसार्थानां च समानकर्मकाणाम् । (३-४-४८)

तृतीयान्त उपपदेऽनुप्रयोगधातुना समानकर्मकाद्धिंसार्थात् णमुल्स्यात् । दण्डोपघातङ्गाः कालयति दण्डेनोपघातम् । दण्डताडम् । 'समानकर्मकाणाम्' इति किम् । दण्डेन चोरमाहत्य गाः कालयति ।

३३७० । सप्तम्यां चोपपीडरुधकर्षः । (३-४-४९)

उपपूर्वेभ्यः पीडादिभ्यः सप्तम्यन्ते तृतीयान्ते चोपपदे णमुल्स्यात् । पार्श्वोपपीडं शेते—पार्श्वयोरुपपीडम्—पार्श्वाभ्यामुपपीडम् । व्रजोपरोधं गाः स्थापयति । व्रजेन व्रजे उपरोधं वा । पाण्युपकर्षं धानाः संगृह्णाति । पाणावुपकर्षम्—पाणिनोपकर्षम् ।

३३७१ । समासत्तौ । (३-४-५०)

तृतीयासप्तम्योर्धातोर्णमुल्स्यात्सांनिकर्षे गम्यमाने । केशग्राहं युध्यन्ते युद्धसंरम्भात् । केशेषु गृहीत्वा । हस्तग्राहम्—हस्तेन गृहीत्वा ।

३३७२ । प्रमाणे च । (३-४-५१)

तृतीयासप्तम्योरित्येव । व्यङ्गुलोत्कर्षं खण्डिकां छिनत्ति । व्यङ्गुलेन व्यङ्गुले वोत्कर्षम् ।

तदेवेति ॥ किमुपदश्येत्याकाङ्क्षायां तदेव मूलकमर्थात् कर्मत्वेनान्वेतीत्यर्थः । **हिंसार्थानाञ्च** ॥ **दण्डोपघातङ्गाः कालयतीति** ॥ 'कल विक्षेपे' चुरादिः । तत्रानुप्रयुज्यमानः कालयतेरुपहन्तेश्च गावः कर्म । अतस्समानकर्मकत्वमुपहन्तेरिति भावः । **दण्डेनोपघातमिति** ॥ तृतीयाप्रभृतीन्यन्यतरस्यामिति उपपदसमासविकल्प इति भावः । **दण्डताडमिति** ॥ 'तड आघाते' चुरादिः । **सप्तम्याश्चोपपीड** ॥ चात्तृतीयायामिति समुच्चीयते । 'कृप विलेखने' इति धातोरपि कृतलघूपधगुणस्य कर्पेति निर्देशः । अतस्तौदादिकस्य निरासः । पीड, रुध, कर्ष, एषां समाहारद्वन्द्वान्पञ्चम्यर्थे प्रथमा । पुंस्त्वञ्चार्षम् । उपपूर्वः पीडरुधकर्षः इति मध्यमपदलोपिसमासः । तदाह । **उपपूर्वेभ्य इति** ॥ 'तृतीयाप्रभृतीन्यन्यतरस्याम्' इति उपपदसमासविकल्पं मत्वा आह । **पार्श्वयोरुपपीडमिति** ॥ तौदादिकात्तु कृषेः क्त्राप्रत्यय एव न तु णमुल् । क्षेत्रे उपकृष्य बीजान्यावपति । हलेनोपकृष्येति । यद्यपि तौदादिकोऽपि विलेखनार्थक एव । तथापि क्षेत्रविषयविलेखन एव तस्य प्रवृत्तेरित्याहुः । **समासत्तौ** ॥ समासत्तिपदं विवृणोति । **सन्निकर्षे गम्यमाने इति** ॥ सन्निकर्षोऽव्यवधानेन संयोगः । **केशग्राहमिति** ॥ सन्निकर्षपरमेतत् । अत्यन्तं सन्निहिता युध्यन्ते इत्यर्थः । तदाह । **युद्धसंरम्भादिति** ॥ युद्धातिशयवशाद्योद्धारः परस्परं अत्यन्तं सन्निहिता भवन्तीत्यर्थः । **प्रमाणे च** ॥ **इत्येवेति** ॥ तृतीयान्ते सप्तम्यन्ते चोपपदे धातोर्णमुल् स्यात् प्रमाणे गम्ये इत्यर्थः । ह्रस्वः खण्डः खण्डिका । **व्यङ्गुलेनेति**

३३७३। अपादाने परीप्सायाम्। (३-४-५२)

परीप्सा त्वरा। शय्योत्थायं धावति। एवं नाम त्वरते यदवश्यकर्तव्यमपि नापेक्षते। शय्योत्थानमात्रमपेक्षते।

३३७४। द्वितीयायां च। (३-४-५३)

परीप्सायामित्येव। यष्टिग्राहं युध्यन्ते। लोष्टग्राहम्।

३३७५। अपगुरो णमुलि। (६-१-५३)

'गुरी उद्यमने' इत्यस्यैचो वा आत्स्याण्णमुलि। अस्यपगारं युध्यन्ते। अस्यपगोरम्।

३३७६। स्वाङ्गेऽध्रुवे। (३-४-५४)

द्वितीयायामित्येव। अध्रुवे स्वाङ्गे द्वितीयान्ते धातोर्णमुल्। भ्रूविक्षेपं कथयति। भ्रुवं विक्षेपम्। 'अध्रुवे' किम्। शिर उत्क्षिप्य। येनाङ्गेन विना न जीवनं तद्ध्रुवम्।

३३७७। परिक्लिश्यमाने च। (३-४-५५)

सर्वतो विबाध्यमाने स्वाङ्गे द्वितीयान्ते णमुल्स्यात्। उरःप्रतिपेषं युध्यन्ते। कृत्स्नमुरः पीडयन्त इत्यर्थः। 'उरोविदारं प्रतिचस्करे नखैः'। ध्रुवार्थमिदम्।

३३७८। विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः। (३-४-५६)

द्वितीयायामित्येव। द्वितीयान्त उपपदे विश्यादिभ्यो णमुल्स्याद्व्याप्यमाने आसेव्यमाने चार्थे गम्ये। गेहादिद्रव्याणां विश्यादिक्रियाभिः साकल्येन संबन्धो व्याप्तिः। क्रियायाः पौनःपुन्यमासेवा। 'नित्यवीप्सयोः' (सू २१४०)

'तत्पुरुषस्याङ्गुलेः' इति टजिति भावः। **अपादाने** ॥ अपादाने उपपदे धातोर्णमुल् स्यात् परीप्सायाञ्चम्यनानायामित्यर्थः। त्वरां दर्शयितुमाह। **एवन्नामेत्यादि** ॥ **द्वितीयायाञ्च** ॥ द्वितीयान्ते उपपदे धातोर्णमुलित्यर्थः। **स्वाङ्गेऽध्रुवे** ॥ अध्रुवे इति छेद इति मत्वा आह। **अध्रुवञ्च इति** ॥ ननु शिर उत्क्षिप्येति कथं प्रत्युदाहरणम्। शिरसोऽपि अध्रुवत्वादित्यत आह। **येनाङ्गेनेति** ॥ **परिक्लि** ॥ **उरोविदारमिति** ॥ कृत्स्नमुर इत्यर्थः। **प्रतिचस्कर इति** ॥ कृ विक्षेपे प्रतिपूर्वात्कर्मणि लिट्। सुट्कात्पूर्व इति अडभ्यासव्यवायेऽपीति चानुवृत्तौ किरतौ लवने हिंसायां प्रतेश्चेति सुट्। नखैः प्रतिचिक्षिपे इत्यर्थः। ननु उरःप्रतिपेषमित्यादौ स्वाङ्गत्वादेव पूर्वसूत्रेणैव सिद्धमित्यत आह। **ध्रुवार्थमिति** ॥ उरो विना जीवनाभावात् उरः ध्रुवमिति भावः। **विशिपति** ॥ **गेहादिद्रव्याणामिति** ॥ तथा च गेहानुप्रवेशमास्ते इत्यत्र सर्वाणि गेहान्यनुप्रविश्येति पुनःपुनर्गेहमनुप्रविश्येति वा अर्थः। उभयथापि न द्वित्वमित्याह

इति द्वित्वं तु न भवति। समासेनैव स्वभावतस्तयोरुक्तत्वात्। यद्यप्याभीक्ष्ण्ये णमुलुक्त एव, तथापि असति ह्यासेवार्थकणमुलि आभीक्ष्ण्यणमुलः 'तृतीयाप्रभृतीनि' इत्यत्र संग्रहाभावात् उपपदसंज्ञार्थमासेवायामिह पुनर्विधिः। गेहानुप्रवेशमास्ते। गेहं गेहमनुप्रवेशम्। गेहमनुप्रवेशमनुप्रवेशम्। एवं गेहानुप्रपातम्। गेहानुप्रपादम्। गेहानुस्कन्दम्। असमासे तु गेहस्य णमुलन्तस्य च पर्यायेण द्वित्वम्।

३३७९। अस्यतितृषोः क्रियान्तरे कालेषु। (३-४-५७)

क्रियामन्तरयति व्यवधत्त इति क्रियान्तरः। तस्मिन्धात्वर्थे वर्तमानादस्यतेस्तृष्यतेश्च कालवाचिषु द्वितीयान्तेषूपपदेषु णमुल्स्यात्। ह्यहात्यासं गाः पाययति। ह्यहमत्यासम्। ह्यहतर्षम्। ह्यहं तर्षम्। अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते। अद्य पाययित्वा ह्यहमतिक्रम्य पुनः पाययतीत्यर्थः।

३३८०। नाम्न्यादिशिग्रहोः। (३-४-५८)

द्वितीयायामित्येव। नामादेशमाचष्टे। नामग्राहमाह्वयति।

३३८१। अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ। (३-४-५९)

अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः प्रियस्य च नीचैः कथनम्।

नित्यवीप्सयोरिति द्वित्वन्तु न भवतीति ॥ कुत इत्यत आह। **समासेनैवेति** ॥ ननु समासेन कथमिह कथनं व्याप्त्यासेवयोरित्यत आह। **स्वभावत इति** ॥ ननु 'आभीक्ष्ण्ये णमुल् च' इत्यनेनैव सिद्धत्वात् इह आसेवाग्रहणं व्यर्थम्। न च क्त्वानिवृत्तिः फलमिति शङ्क्यम्। क्त्वाप्रत्ययस्यापि पक्षे इष्टत्वादिति शङ्कते। **यद्यपीति** ॥ समाधत्ते। **तथापीति** ॥ द्वितीयान्तस्योपपदसंज्ञार्थमित्यर्थः। नन्विह आसेवाग्रहणाभावे तत्रोपपदमित्युपपदसंज्ञा कुतो नेत्यत आह। **असति हीति** ॥ यद्यप्यासेवायां णमुलविधेयभावेऽपि 'आभीक्ष्ण्ये णमुल् च' इति णमुल् सिध्यति, तथापि 'आभीक्ष्ण्ये णमुल् च' इति सूत्रे द्वितीयान्तस्य सप्तम्या निर्देशेन ग्रहणाभावादुपपदसंज्ञा न स्यात्। ततश्च 'तृतीयाप्रभृतीन्यन्यतरस्याम्' इति उपपदसमासविकल्पो न स्यादिति भावः। **असमासे त्विति** ॥ व्याप्तिणमुलि गेहस्य व्याप्यमानत्वात् द्वित्वम्। आसेवायां णमुलि तु णमुलन्तस्य द्वित्वम्। क्रियापौनःपुन्यस्यैव आसेवात्वादिति भावः। **अस्यतितृषोः** ॥ **ह्यहात्यासमिति** ॥ ह्यहमतिक्रम्येत्यर्थः। अतिपूर्वादस्यतेर्णमुल्। **ह्यहतर्षमिति** ॥ ह्यहन्तृष्णावतीः कृत्वेत्यर्थः। **नाम्न्यादिशिग्रहोः** ॥ नाम्नि आदिशिग्रहोरिति छेदः। पञ्चम्यर्थे षष्ठी। द्वितीयान्ते नामन्शब्दे उपपदे आङ्पूर्वकदिशेः ग्रहधातोश्च णमुलित्यर्थः। **अव्ययेऽयथाभि** ॥ अप्रियस्य नीचैः कथनं प्रियस्योच्चैः कथनञ्च अभिप्रेतम् इष्टम्। तद्विपरीतम् अनभिप्रेतम्। तदाह। **अयथाभिप्रेताख्यानं नामेत्यादि** ॥ 'तृतीयाप्रभृतीन्य

उच्चैःकृत्य—उच्चैः कृत्वा। उच्चैःकारमप्रियमाचष्टे। नीचैःकृत्य—नीचैः कृत्वा—नीचैः-कारं प्रियं ब्रूते।

३३८२। तिर्यच्यपवर्गे। (३-४-६०)

तिर्यक्छब्द उपपदे कृञः क्त्वाणमुलौ स्तः समाप्तौ गम्यायाम्। तिर्यक्कृत्य गतः। तिर्यक्कारम्। समाप्य गत इत्यर्थः। 'अपवर्गे' किम्। तिर्यक्कृत्वा काष्ठं गतः।

३३८३। स्वाङ्गे तस्प्रत्यये कृभ्वोः। (३-४-६१)

मुखतःकृत्य गतः। मुखतः कृत्वा। मुखतः कारम्। मुखतोभूय। मुखतो भूत्वा। मुखतोभावम्।

३३८४। नाधार्थप्रत्यये च्व्यर्थे। (३-४-६२)

नाधार्थप्रत्ययान्ते च्व्यर्थविषय उपपदे कृभुवोः क्त्वाणमुलौ स्तः। अनाना नाना कृत्वा नानाकृत्य—नाना कृत्वा—नानाकारम्। विनाकृत्य—विना कृत्वा—विनाकारम्। नानाभूय—नाना भूत्वा—नानाभावम्। अनेकं द्रव्यमेकं भूत्वा एकधाभूय—एकधा भूत्वा—एकधाभावम्। एकधाकृत्य—एकधा कृत्वा—एकधाकारम्। 'प्रत्ययग्रहणम्' किम्। हिरुकृत्वा। पृथग्भूत्वा।

३३८५। तूष्णीमि भुवः। (३-४-६३)

तूष्णींशब्दे उपपदे भुवः क्त्वाणमुलौ स्तः। तूष्णींभूय—तूष्णीं भूत्वा—तूष्णींभावम्। भूग्रहणं कृञो निवृत्त्यर्थम्।

न्यतरस्याम्' इति समासविकल्पं मत्वा आह। **उच्चैःकृत्य-उच्चैः कृत्वेति** ॥ समासपक्षे ल्यबिति भावः। **उच्चैःकारमिति** ॥ अत्र समासतदभावयोर्नास्ति विशेषः। स्वरे तु विशेषः। **तिर्यच्यपवर्गे** ॥ 'तिरश्चीति भवितव्यम् सौत्रो निर्देश' इति भाष्यम्। अपवर्ग इत्यस्य विवरणम्—**समाप्ताविति** ॥ **स्वाङ्गे तस्प्रत्यये** ॥ पञ्चम्यर्थे षष्ठीद्विवचनम्। तस् प्रत्ययो यस्मादिति बहुव्रीहिः। तस्प्रत्ययान्ते स्वाङ्गे उपपदे कृञो भुवश्च क्त्वाणमुलाविति्यर्थः। इह न यथासङ्ख्यं व्याख्यानात्। **नाधार्थ** ॥ 'विनञभ्यान्नानाञौनसह' इति सूत्रे असहत्वे विनञभ्यान्नाप्रत्ययो विहितः। 'सङ्ख्याया विधार्थे धा' इति धाप्रत्ययो विहितः। तस्य अर्थः इव अर्थो यस्य सः धार्थः। नाप्रत्ययो धार्थकश्च प्रत्ययो यस्मादिति बहुव्रीहिः। तदाह। **नाधार्थप्रत्ययान्ते इति** ॥ नाप्रत्ययान्ते धार्थप्रत्ययान्ते उपपदे इत्यर्थः। अर्थग्रहणं धाप्रत्ययमात्रेऽन्वेति। तेन धमुञोऽपि ग्रहणं लभ्यते। नाप्रत्यये त्वर्थग्रहणान्नान्वेति। नाप्रत्ययान्ते धार्थप्रत्ययान्ते च्व्यन्तविषये उपपदे इत्यर्थः। अत एव भाष्ये अर्थग्रहणङ्किम्। द्विधाकृत्य—द्वैधकृत्येत्येवोक्तम्। **तूष्णीमि भुवः** ॥ ननु 'स्वाङ्गे तस्प्रत्यये कृभ्वोः' इत्यतः अनुवृत्त्यैव

३३८६ । अन्वच्यानुलोम्ये । (३-४-६४)

अन्वक्छब्दे उपपदे भुवः क्त्वाणमुलौ स्त आनुकूल्ये गम्यमाने । अन्वग्भूय आस्ते । अन्वग्भूत्वा—अन्वग्भावम् । अग्रतः पार्श्वतः पृष्ठतो वानुकूलो भूत्वा आस्त इत्यर्थः । 'आनुलोम्ये' किम् । अन्वग्भूत्वा तिष्ठति । पृष्ठतो भूत्वेत्यर्थः । इति कृदन्तप्रकरणम् ।

इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे ॥
भट्टोजिदीक्षितकृतिः सैषा सिद्धान्तकौमुदी ।
प्रीत्यै भूयाद्भगवतोर्भवानीविश्वनाथयोः ॥

इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यामुत्तरार्धं समाप्तम् ।

सिद्धे भूग्रहणं व्यर्थमित्यत आह । **कृत्रो निवृत्त्यर्थमिति** ॥ **अन्वच्यानुलोम्ये** ॥ अनूचीत्येव वक्तुमुचितं सौत्रोऽयं निर्देशः । निर्यच्यपवर्गे इतिवत् । आनुलोम्यं आनुकूल्यम् । **पृष्ठतो भूत्वेति** ॥ अग्निप्रथमाः प्रतिपद्यन्ते अन्वगध्वर्युरित्यादौ अन्वक्छब्दस्य पृष्ठभागे प्रसिद्धेरिति भावः ॥—इत्युत्तरकृदन्तप्रकरणम् ॥

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मपोडशाररथचक्राकारादिबहुगुणविराजमानप्रौढापरिमित
महाध्वरस्य श्रीशाहजी शरभजी तुक्कोजी भोसलचोलमहीमहेन्द्रामात्यधुरन्धरस्य श्रीमत
आनन्दरायविद्वत्सार्वभौमस्याध्वर्युणा पञ्चपुरुषीपोष्येण बाल्य एव तदयानिर्वर्ति-
तापरिमिताग्निविजृम्भितवाजपेयसर्वपृष्ठासोर्यामप्रमुखमखसन्तर्पितशतमख-
प्रमुखबर्हिर्मुखेन पदवाक्यप्रमाणपारावारपारीणाग्रजन्मविश्वेश्वरवाज-
पेययाजितो लब्धविद्यावैशद्येन अध्वरमीमांसाकुतूहलवृत्ति-
निर्माणप्रकटितसर्वतन्त्रस्वातन्त्र्येण बोधायनापस्तम्ब-
सत्यापाढभारद्वाजकात्यायनाश्वलायनद्राह्यायण-
णादिकल्पसूत्रतद्भाष्यपारीणमहादेववाज-
पेययाजिसुतेन अन्नपूर्णाम्बागर्भजातेन
वासुदेवदीक्षितविदुषा विरचिता-
यां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमायां उत्तरार्धम्
॥ सम्पूर्णम् ॥

॥ बालमनोरमा सम्पूर्णा ॥

॥ श्रीरस्तु ॥

॥ वैयाकरणसिद्धान्तकौमुदी ॥

अथ वैदिकप्रकरणम् ।

३३८७ । छन्दसि पुनर्वस्वोरेकवचनम् (१-२-६१) । द्वयोरेकवचनं वा स्यात् । पुनर्वसुर्नक्षत्रं पुनर्वसू वा । लोके तु द्विवचनमेव ॥ ३३८८ । विशाखयोश्च (१-२-६२) । प्राग्वत् । विशाखा नक्षत्रम् । विशाखे वा ॥ ३३८९ । षष्ठीयुक्तश्छन्दसि वा (१-४-९) । षष्ठ्यन्तेन युक्तः पतिशब्दश्छन्दसि घिसंज्ञो वा स्यात् । 'क्षेत्रस्य पतिना वयम्' । इह वेति योग विभज्य छन्दसीत्यनुवर्तते । तेन 'सर्वे विधयश्छन्दसि वैकल्पिकाः' । 'बहुल छन्दसि' (सू ३४०१) इत्यादिरत्रैव प्रपञ्चः । 'यचि भम्' (सू २३१) । 'नभोऽङ्गिरोमनुषां वत्युपसङ्ख्यानम्' (वा १०५८) नभसा तुल्यं नभस्वत् । भत्वाद्धत्वाभावः । 'अङ्गिरस्वदङ्गिरः' । 'मनुष्वदग्ने' । 'जनेरुसिः' (उणा) इति विहित उसिप्रत्ययो मनेरपि । बाहुलकात् । 'वृषण्वस्वश्वयोः' (वा १०५९) । वृष वर्षुकं वसु यस्य स वृषण्वसुः । वृषा अश्वो यस्य वृषणश्वः । इहान्तर्वर्तिनां विभक्तिमाश्रित्य पदत्वे सति नलोपः प्राप्तो भत्वाद्वार्यते । अत एव 'पदान्तस्य' (सू १९८) इति णत्वनिषेधोऽपि न । 'अल्लोपोऽनः' (सू २३४) इत्यल्लोपो न, अनङ्त्वात् । ३३९० । अयस्मयादीनि च्छन्दसि (१-४-२०) । एतानि च्छन्दसि साधूनि । भपदसंज्ञाधिकारात्र्यथायोगं संज्ञाद्वयं बोध्यम् । तथा च वार्तिकम्—'उभयसंज्ञान्यपीति वक्तव्यम्' (वा १०६०) इति 'स सुष्ठुभास ऋक्वता गणेन' । पदत्वात्कुत्वम् । भत्वाज्जश्त्वाभावः । जश्त्वविधानार्थायाः पदसंज्ञाया भत्वसामर्थ्येन बाधात् । 'नैनं हिन्वन्त्यपि वाजिनेषु' । अत्र पदत्वाज्जश्त्वम् । भत्वात्कुत्वाभावः । 'ते प्राग्धातोः' (सू २२३०) । ३३९१ । छन्दसि परेऽपि (१-४-८१) । ३३९२ । व्यवहिताश्च (१-४-८२) । 'हरिभ्यां याह्योक आ' । 'आ मन्द्रैरिन्द्र हरिभिर्याहि' । ३३९३ । इन्धिभवतिभ्यां च (१-२-६) । आभ्यां परो लिट् कित् स्यात् । 'समीधे दस्युहन्तमम्' । 'पुत्र ईधे अथर्वणः' । बभूव । इदं प्रत्याख्यातम् । 'इन्धेश्छन्दोविषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यम्' (वा ५९४) इति ॥

इति प्रथमोऽध्यायः ।

३३९४ । तृतीया च होश्छन्दसि (२-३-३) । जुहोतेः कर्मणि तृतीया स्याद्द्वितीया च । 'यवाग्वाग्निहोत्रं जुहोति' । अग्निहोत्रशब्दोऽत्र हविषि वर्तते, 'यस्याग्निहोत्रमधिश्रितममेध्यमापद्येत' इत्यादिप्रयोगदर्शनात् । अग्नये हूयत इति व्युत्पत्तेश्च । यवाग्वाख्यं हविर्देवतो-

देशेन त्यक्ता प्रक्षिपतीत्यर्थः । ३३९५ । द्वितीया ब्राह्मणे (२-३-६०) । ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया स्यात् । षष्ठ्यपवादः । 'गामस्य तदहः सभायां दीव्येयुः' । ३३९६ । चतुर्थ्यर्थे बहुलं छन्दसि (२-३-६२) । षष्ठी स्यात् । 'पुरुषमृगश्चन्द्रमसे' । 'गोधा कालका दार्वाघाटस्ते वनस्पतीनाम्' । वनस्पतिभ्य इत्यर्थः । 'षष्ठ्यर्थे चतुर्थीति वाच्यम्' (वा १५०९) । 'या खर्वेण पिबति तस्यै खर्वः' ॥ ३३९७ । यजेश्च करणे (२-३-६३) । इह छन्दसि बहुलं षष्ठी । घृतस्य घृतेन वा यजते ॥ ३३९८ । बहुलं छन्दसि (२-४-३९) अदो घस्लादेशः स्यात् । घस्तां नूनम् । लुङि 'मन्त्रे घस–' (३४०२) इति च्लेर्लुक् । अडभावः । 'सग्धिश्च मे' ॥ ३३९९ । हेमन्तशिशिरावहोरात्रे च छन्दसि (२-४-२८) । द्वन्द्वः पूर्ववल्लिङ्गः । हेमन्तश्च शिशिरश्च हेमन्तशिशिरौ । अहोरात्रे । 'अदिप्रभृतिभ्यः शपः' (सू २४२३) ॥ ३४०० । बहुलं छन्दसि (२-३-७३) । 'वृत्रं हनति वृत्रहा' । 'अहिः शयत उपपृक् पृथिकाः' । अत्र लुङ् न । अदादिभिन्नेऽपि क्वचिल्लुक् । 'त्राध्वं नो देवाः' । 'जुहोत्यादिभ्यः श्लुः' (सू २४८९) ॥ ३४०१ । बहुलं छन्दसि (२-४-७६) । 'दाति प्रियाणि चिद्वसु' । अन्यत्रापि । 'पूर्णां विवष्टि' ॥ ३४०२ । मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः (२-४-८०) । लिरिति च्लेः प्राचां संज्ञा । एभ्यो लेर्लुक्स्यान्मन्त्रे । 'अक्षन्नमी मदन्तहि' । घस्लादेशस्य 'गमहन–' (सू २३६३) इत्युपधालोपे 'शासिवसि–' (सू २४१०) इति षः । 'माह्वार्मित्रस्य' । 'धूर्तिः प्रणङ्मर्त्यस्य' । 'नशेर्वा' (सू ४३१) इति कुत्वम् । 'सुरुचो वेन आवः' । 'मा न आधक्' । आदित्याकारान्तग्रहणम् । 'आप्रा द्यावापृथिवी' । 'परावग्भीरभृद्यथा' । 'अक्रन्नुषसः' । 'त्वे रयिं जागृवांसो अनुग्मन्' । मन्त्रग्रहणं ब्राह्मणस्याप्युपलक्षणम् । 'अज्ञत तदा अस्य दन्ताः' । विभाषानुवृत्तेर्नेह । 'न ता अगृभ्णन्नजनिष्ट हि षः' ॥

इति द्वितीयोऽध्यायः ।

३४०३ । अभ्युत्सादयांप्रजनयांचिक्रयांरमयामकः पावयांक्रियाद्विदामक्रन्निति च्छन्दसि (३-१-४२) । आद्येषु चतुर्षु लुङि 'आम्' 'अकः' इत्यनुप्रयोगश्च । अभ्युत्सादयामकः । अभ्युदसीषदादिति लोके । प्रजनयामकः । प्राजीजनदित्यर्थः । चिक्रयामकः । अचैषीदित्यर्थे चिनोतेराम् द्विर्वचनं कुत्वं च । रमयामकः । अरीरमत् । पावयांक्रियात् । पाव्यादिति लोके । विदामक्रन् । अवेदिषुः ॥ ३४०४ । गुपेश्छन्दसि (३-१-५०) । च्लेश्चङ् वा । 'गृहानजूगुपतं युवम्' । अगौप्तमित्यर्थः । ३४०५ । नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः (३-१-५१) । च्लेश्चङ् न । 'मा त्वायतो जरितुः काममूनयीः' । 'मा त्वाग्निर्ध्वनयीत्' । ३४०६ । कृमृदरुहिभ्यश्छन्दसि (३-१-५९) । च्लेरङ् वा । 'इदं तेभ्योऽकरं नमः' । अमरत् । अदरत् । 'यत्सानोः सानुमारुहत्' । ३४०७ । छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाप्यपृडानि (३-१-१२३) । कृन्ततेः निस्पूर्वात्क्यपि प्राप्ते ण्यत् । आद्यन्तयोर्विपर्यासो निसः षत्वं च । 'निष्टर्क्यं चिन्वीत पशुकामः' देवशब्दे उपपदे ह्वयतेर्जुहोतेर्वा क्यप्दीर्घश्च । 'स्पर्धन्ते वा उ देवहूये' । 'प्र' 'उत्' आभ्यां नयतेः क्यप् । प्रणीयः । उन्नीयः । उत्पूर्वाच्छिषेः क्यप् । उच्छिष्यः । 'मृङ्' 'स्तृञ्' 'ध्वृ' एभ्यो यत् । मर्यः । स्तर्या । स्त्रियामेवायम् । ध्वर्यः । खनेर्यण्यतौ । खन्यः । खान्यः ।

यजेर्यः । 'शुन्धध्वं दैव्याय कर्मणे देवयज्यायै' । आङ्पूर्वात्पृच्छेः क्यप् । 'आपृच्छ्यं धरुणं वाज्यर्षति' । सीव्यतेः क्यप् षत्वं च प्रतिषीव्यः । ब्रह्माणि वदेर्ण्यत् । ब्रह्मवाद्यम् । लोके तु 'वदः सुपि क्यप् च' (सू २८५४) इति क्यब्यतौ । भवतेः स्तौतेश्च ण्यत् । भाव्यः । स्ताव्यः । उपपूर्वाच्चिनोतेर्ण्यदायादेशश्च पृड उत्तरपदे । उपचाय्यपृडम् । 'हिरण्य इति वक्तव्यम्' (वा १९४५) उपचेयपृडमेवान्यत् । 'मृड सुखने' 'पृड च' इत्यस्मादिगुपधलक्षणः कः ॥ ३४०८ । छन्दसि वनसनरक्षिमथाम् (३-२-२७) । एभ्यः कर्मण्युपपदे इन् स्यात् । 'ब्रह्मवनिं त्वा क्षत्रवनिम् उत नो गोषणिं धियम्' । 'ये पथां पथिरक्षयः' । चतुरक्षौ पथिरक्षी । 'हविर्मथीनामभि' ॥ ३४०९ । छन्दसि सहः (३-२-६३) । ण्विः स्यात् । पृतनाषाट् । ३४१० । वहश्च (३-२-६४) । प्राग्वत् । दित्यवाट् । योगविभाग उत्तरार्थः । ३४११ । कव्यपुरीषपुरीष्येषु ञ्युट् (३-२-६५) । एषु वहेर्ञ्युट् स्याच्छन्दसि । कव्यवाहनः । पुरीषवाहनः । पुरीष्यवाहनः ॥ ३४१२ । हव्येऽनन्तःपादम् (३-२-६६) । अग्निर्नो हव्यवाहनः । पादमध्ये तु 'वहश्च' इति ण्विरेव । 'हव्यवाळग्निरजरः पिता न.' ॥ ३४१३ । जनसनखनक्रमगमो विट् (३-२-६७) । 'विड्वनोः–' (सू २९८२) इत्यात्वम् । अब्जा गोजाः । 'गोषा इन्द्रो नृषा असि' । 'सनोतेरनः' (सू ३६४५) इति षत्वम् । 'इयं शुष्मेभिर्विसखा इवारुजत्' । 'आ दधिक्राः शवसा पञ्च कृष्टीः' । अग्रेगाः ॥ ३४१४ । मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् (३-२ ७१) । श्वेतवहादीनां डस्पदस्येति वक्तव्यम्' (वा २०३५–३६) यत्र पदत्वं भावि तत्र ण्विनोऽपवादो डस्वक्तव्य इत्यर्थः । श्वेतवाः । श्वेतवाहौ । श्वेतवाहः । उक्थानि उक्थैर्वा शंसति उक्थशा यजमानः । उक्थशासौ । उक्थशासः । पुरो दाश्यते दीयते पुरोडाः ॥ ३४१५ । अवे यजः (३-२-७२) । अवयाः । अवयाजौ । अवयाजः । ३४१६ । अवयाः श्वेतवाः पुरोडाश्च (८-२-६७) । एते सम्बुद्धौ कृतदीर्घा निपात्यन्ते । चादुक्थशाः ॥ ३४१७ । विजुपे छन्दसि (३-२-७३) । उपे उपपदे यजेर्विच् । उपयट् ॥ ३४१८ । आतो मनिन्क्वनिब्वनिपश्च (३-२-७४) । सुप्युपसर्गे चोपपदे आदन्तेभ्यो धातुभ्यश्छन्दसि विषये मनिनादयस्त्रयः प्रत्ययाः स्युः । चाद्विच् । सुदामा । सुधीवा । सुपीवा । भूरिदावा । घृतपावा । विच् कीलालपाः ॥ ३४१९ । बहुलं छन्दसि (३-२-८८) । उपपदान्तरेऽपि हन्तेर्बहुलं क्विप् स्यात् । मातृहा । पितृहा । 'छन्दसि लिट्' (सू ३०९३) भूतसामान्ये । 'अहं द्यावापृथिवी आततान ।' 'लिटः कानज्वा' (सू ३०९४) । 'क्वसुश्च' (सू ३०९५) । छन्दसि लिटः कानच्क्वसू वा स्तः । 'चक्राणा वृष्णिम्' । 'यो नो अग्ने अररिवां अघायुः' । 'छन्दस्यपशब्दात्परेच्छायां क्यज्वक्तव्यः' (वा १७११) । 'क्याच्छन्दसि' (सू ३१५०) । उप्रत्ययः स्यात् । अघायुः । 'एरजधिकारे जवसवौ छन्दसि वाच्यौ' (वा २२००) जवेयाभिर्यूनः । 'ऊर्वोरस्तु मे जवः' । 'देवस्य सवितुः सवे' ॥ ३४२० । मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः (३-३-९६) । वृषादिभ्यः क्तिन्स्यात् स चोदात्तः । 'वृष्टिं दिवः' । 'सुम्नमिष्टये' । 'पचत्पक्षीरुत' । 'इयं ते नव्यसी मतिः' । वित्तिः । भूतिः । 'अग्न आ याहि वीतये' । 'रातौ स्यामोभयासः' ॥ ३४२१ । छन्दसि गत्यर्थेभ्यः (३-३-१२९) । ईषदादिषूपपदेषु गत्यर्थेभ्यो धातुभ्यश्छन्दसि युच् स्यात् । खलोऽपवादः । सूपसदनोऽग्निः ॥ ३४२२ । अन्येभ्योऽपि दृश्यते (३-३-१३०) । गत्यर्थेभ्यो

येऽन्ये धातवस्तेभ्योऽपि छन्दसि युच् स्यात् । 'सुवेदनामकृणोद्ब्रह्मणे गाम्' ॥ ३४२३ । छन्दसि लुङ्लङ्लिटः (३-४-६) । धात्वर्थानां सम्बन्धे सर्वकालेष्वेते वा स्युः । पक्षे यथास्वं प्रत्ययाः । लुङि । 'देवो देवेभिरागमत्' । लोडर्थे लुङ् । 'इदं तेभ्योऽकरं नमः' । लङ् । 'अग्निमद्य होतारमवृणीतायं यजमानः' । लिट् । 'अद्याममार' । अद्य म्रियेत इत्यर्थः ॥ ३४२४ । लिङर्थे लेट् (३-४-७) । विध्यादौ हेतुहेतुमद्भावादौ च धातोर्लेट् स्याच्छन्दसि ॥ ३४२५ । सिब्बहुलं लेटि (३-१-३४) ॥ ३४२६ । इतश्च लोपः परस्मैपदेषु (३-४-९७) । लेटस्तिङामितो लोपो वा स्यात्परस्मैपदेषु ॥ ३४२७ । लेटोऽडाटौ (३-४-९४) । लेटः 'अट्' 'आट्' एतावागमौ स्तः । तौ च पितौ । 'सिब्बहुलं णिद्वक्तव्यः' (वा १७९४) । वृद्धिः । 'प्र ण आयूँषि तारिषत्' । 'सुपेशसस्करति जोषिषद्धि' । 'आ साविषदर्शसानाय शरुम्' । सिप इलोपस्य चाभावे । 'पतति विद्युत्' । 'प्रियः सूर्ये प्रियो अग्ना भवति' ॥ ३४२८ । स उत्तमस्य (३-४-९८) । लेडुत्तमसकारस्य वा लोपः स्यात् । करवाव । करवावः । टेरेत्वम् ॥ ३४२९ । आत ऐ (३-४-९५) । लेट आकारस्य ऐ स्यात् । 'सुतेभिः सुप्रयसा मादयैते' । आतामित्याकारस्य ऐकारः । विधिसामर्थ्यादाट ऐत्वं न । अन्यथा हि ऐटमेव विदध्यात् । 'यो यजाति यजात इत्' ॥ ३४३० । वैतोऽन्यत्र (३-४-९६) । लेट एकारस्य ऐ स्याद्वा । 'आत ऐ' (सू ३४२९) इत्यस्य विषयं विना । 'पशूनामीशै' । 'ग्रहा गृह्यन्ते' । 'अन्यत्र' किम् । 'सुप्रयसा मादयैते' ॥ ३४३१ । उपसंवादाशङ्कयोश्च (३-४-८) । पणवन्ध आशङ्कायां च लेट् स्यात् । 'अहमेव पशूनामीशै' । 'नेज्जिघ्रायन्तो नरकं पतामः' । 'हलः श्नः शानच्झौ' (सू २५५७) ॥ ३४३२ । छन्दसि शायजपि (३-१-८४) । अपि शब्दाच्छानच् । 'हृग्रहोर्भश्छन्दसि' (वा ४८२३) इति हस्य भः । 'गृभाय जिह्वया मधु' । 'बधान देव सवितः' । 'अनिदिताम्–' (सू ४१५) इति बध्नातेर्नलोपः । 'गृभ्णामि ते' । 'मघवा जभार' ॥ ३४३३ । व्यत्ययो बहुलम् (३-१-८५) । विकरणानां बहुलं व्यत्ययः स्याच्छन्दसि । 'आण्डा शुष्मस्य भेदति' । भिनत्तीति प्राप्ते । 'जरसा मरते पतिः' । म्रियत इति प्राप्ते । 'इन्द्रो वस्तेन नेषतु' नयतेर्लोट् शप्सिपौ द्वौ विकरणौ । 'इन्द्रेण युजा तरुषेम वृत्रम्' । तरेमेत्यर्थः । तरतेर्विध्यादौ लिङ् । उः शप् सिप् चेति त्रयो विकरणाः ॥

"सुस्निदुग्रग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयडां च ।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन ॥" [भाष्यम्]

'धुरि दक्षिणायाः' । दक्षिणस्यामिति प्राप्ते । 'चषालं ये अश्वयूपाय तक्षति' । तक्षन्तीति प्राप्ते । उपग्रहः परस्मैपदात्मनेपदे । 'ब्रह्मचारिणमिच्छते' । इच्छतीति प्राप्ते । 'प्रतीपमन्य ऊर्मिर्युध्यति' । युध्यते इति प्राप्ते । 'मधोस्तृप्ता इवासते' । मधुन इति प्राप्ते । नरः पुरुषः । 'अधा स वीरैर्दशभिर्वियूयाः' । वियूयादिति प्राप्ते । कालः कालवाची प्रत्ययः । 'श्वोऽग्नीनाधास्यमानेन' । लुटो विषये लट् । 'तमसो गा अदुक्षत्' । अधुक्षदिति प्राप्ते । 'मित्र वयं च सूरयः' । मित्रा वयमिति प्राप्ते । स्वरव्यत्ययस्तु वक्ष्यते । कर्तृशब्दः कारकमात्रपरः । तथा च तद्वाचिनां कृत्तद्धितानां व्यत्ययः । अन्नादाय । अण्विषयेऽच् । अवग्रहे विशेषः । यङो यशब्दादारभ्य 'लिङ्याशिष्यङ्' (सू ३४३४) इति इकारेण प्रत्याहारः । तेषां व्यत्ययो

भेदतीत्यादिरुक्त एव ॥ ३४३४ । लिङ्याशिष्यङ् (३-१-८६) । आशीर्लिङि परे धातोरङ् स्याच्छन्दसि । 'वच उम्' (सू २४५४) । 'मन्त्रं वोचेमाग्नये' । 'दृशेरग्वक्तव्यः' (वा १८६२) । 'पितरं च दृशेयं मातरं च' । अङि तु 'ऋदृशोऽङि–' (सू २४०६) इति गुणः स्यात् ॥ ३४३५ । छन्दस्युभयथा (३-४-११७) । धात्वधिकारे उक्तः प्रत्ययः सार्वधातुकार्धधातुकोभयसंज्ञः स्यात् । 'वर्धन्तु त्वा सुष्टुतयः' । वर्धयन्तित्यर्थः । आर्धधातुकत्वाण्णिलोपः । 'विश्पृण्विरे' । सार्वधातुकत्वात् श्नुः श्भावश्च । 'हुश्नुवोः–' (सू २३८७) इति यण् । 'आट्गमहनजनः किकिनौ लिट् च' (सू ३१५१) । आदन्ताद्वर्णान्ताद्गमादेश्च किकिनौ स्तः । तौ च लिड्वत् । 'वभ्रिर्वज्रम्' । 'पपिः सोमम्' । 'ददिर्गाः' । 'जग्मिर्युवा' । जग्मिर्वृत्रममित्रियम्' । जग्निः । लिड्वद्भावादेव सिद्धे 'ऋच्छत्यृताम्' (सू २३८३) इति गुणबाधनार्थं कित्त्वम् । 'बहुलं छन्दसि' (सू ३५७८) इत्युत्त्वम् । ततुरिः । जगुरिः ॥ ३४३६ । तुमर्थे सेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः (३-४-९) । से । 'पक्षे रायः' सेन् । 'ता वामेषे' । असे । 'शरदो जीवसे धाः' । असेन् नित्त्वादाद्युदात्तः । क्से । प्रेषे । कसेन् । 'गवामिव श्रियसे' । अध्यै । अध्यैन् । 'जठरं पृणध्यै' । पक्ष आद्युदात्तः । कध्यै । कध्यैन् । आहुवध्यै । पक्षे नित्स्वरः । शध्यै । 'राधसः सह मादयध्यै' । शध्यैन् । 'वायवे पिवध्यै' । तवै । दातवा उ । तवेङ् । सूतवे । तवेन् । कर्तवे ॥ ३४३७ । प्रियै रोहिष्यै अव्यथिष्यै (३-४-१) । एते तुमर्थे निपात्यन्ते । प्रयातुं रोढुमव्यथितुमित्यर्थः ॥ ३४३८ । दृशे विख्ये च (३-४-११) । द्रष्टुं विख्यातुमित्यर्थः ॥ ३४३९ । शकिणमुल् कमुलौ (३-४-१२) । शक्नोतावुपपदे तुमर्थ एतौ स्तः । 'विभाजं नाशकत्' । 'अपलुपं नाशकत्' । विभक्तुमपलोप्तुमित्यर्थः ॥ ३४४० । ईश्वरे तोसुन्कसुनौ (३-४-१३) । 'ईश्वरो विचरितोः' । 'ईश्वरो विलिखः' । विचरितुं विलेखितुमित्यर्थः ॥ ३४४१ । कृत्यार्थे तवैकेन्केन्यत्वनः (३-४-१४) । 'न म्लेच्छितवै' । 'अवगाहे' । 'दिदृक्षेण्यः' । 'भूर्यस्पष्ट कत्वम् । ३४४२ । अवचक्षे च (३-४-१५) । 'रिपुणा नावचक्षे' । अवख्यातव्यमित्यर्थः ॥ ३५४३ । भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् (३-४-१६) । 'आसंस्थातोः सीदन्ति' । आसमाप्तेः सीदन्तीत्यर्थः । उदेतोः । अपकर्तोः । प्रवदितोः । प्रचरितोः । होतोः । आतमितोः । 'काममाविजनितोः सम्भवाम' इति श्रुतिः ॥ ३४४४ । सृपितृदोः कसुन् (३-४-१७) । भावलक्षण इत्येव । 'पुरा क्रूरस्य विसृपो विरप्शिन्' । 'पुरा जतृभ्य आतृदः' ॥

इति तृतीयोऽध्यायः ।

३४४५ । रात्रेश्चाजसौ (४-१-३१) । रात्रिशब्दान्ङीप्स्यात् अजस्विषये छन्दसि । 'रात्री व्यख्यदायती' । लोके तु कृदिकारादिति ङीष्यन्तोदात्तः ॥ ३४४६ । नित्यं छन्दसि (४-१-४६) । वह्वादिभ्यश्छन्दसि विषये नित्यं ङीप् । 'बह्वीषु हित्वा' । नित्यग्रहणमुत्तरार्थम् ॥ ३४४७ । भुवश्च (४-१-४७) । ङीप् स्यात् छन्दसि । विभ्वी । प्रभ्वी । विप्रसंभ्य इति ड्वप्रत्ययान्तं सूत्रेऽनुक्रियते । उत इत्यनुवृत्तेः । उवङादेशस्तु सौत्रः । 'मुद्गलाच्छन्दसि लिच्च' (वा २४७६) । ङीषो लित्त्वमानुक् चागमः । लित्स्वरः । 'रथीरभून्मुद्गलानी' ॥ ३४४८ । दीर्घजिह्वी च छन्दसि (४-१-५९) । संयोगोपधत्वादप्राप्तो ङीष् विधीयते । 'आसुरी

वै दीर्घजिह्वी देवानां यज्ञवाट्' ॥ ३४४९ । कद्रुकमण्डल्वोश्छन्दसि (४-१ ७१) । ऊङ् स्यात् । 'कद्रूश्च वै कमण्डलू' । 'गुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम्' (वा २५०४) । गुग्गुलूः । मधूः । जतूः । पतयालूः । 'अव्ययात्त्यप्' (सू १३२४) । 'आविष्टचस्खोपसंख्यानं छन्दसि' (वा २७८५) । 'आविष्टयो वर्धते' ॥ ३४५० । छन्दसि ठञ् (४-३-१९) । वर्षाभ्यष्ठको-ऽपवादः । स्वरे भेदः । वार्षिकम् ॥ ३४५१ । वसन्ताच्च (४-३ २०) । ठञ् स्यात् छन्दसि । वासन्तिकम् ॥ ३४५२ । हेमन्ताच्च (४ ३-२१) । छन्दसि ठञ् । हैमन्तिकम् । योगविभाग उत्तरार्थः । 'शौनकादिभ्यश्छन्दसि' (सू १४८६) । णिनिः प्रोक्तेऽर्थे । छाणोरपवादः । शौनकेन प्रोक्तमधीयते शौनकिनः । वाजसनेयिनः । 'छन्दसि' किम् । शौनकीया शिक्षा ॥ ३४५३ । व्यचश्छन्दसि (४ ३-१५०) । विकारे मयट् स्यात् । शरमयं बर्हिः । 'यस्य पर्णमयी जुहूः' ॥ ३४५४ । नोत्वद्वर्ध्रबिल्वात् (४-३-१५१) । उत्वान् उकारवान् । मौञ्जं शिक्यम् । वर्ध्रं चर्म तस्य विकारो वार्ध्री रज्जुः । बैल्वो यूपः । 'सभाया यः' (सू १६५७) ॥ ३४५५ । ढश्छन्दसि (४-४-१०६) । 'सभेयो युवा' । ३४५६ । भवे छन्दसि (४-४-११०) । सप्तम्यन्ताद्भवार्थे यत् । 'मेध्याय च विद्युत्याय च' । यथायथं शैषिकानामणादीनां घादीनां चापवादोऽयं यत् । पक्षे तेऽपि भवन्ति । सर्वविधीनां छन्दसि वैकल्पिकत्वात् । तद्यथा मुञ्जवान्नाम पर्वतस्तत्र भवो मौञ्जवतः । 'सोमस्येव मौञ्जवतस्य भक्षः' । आचतुर्थसमाप्ते-श्छन्दोऽधिकारः । ३४५७ । पाथोनदीभ्यां ड्यण् (४-४-१११) । 'तमु त्वा पाथ्यो वृषा' । 'चनो दधीत नाद्यो गिरो मे' । पाथसि भवः पाथ्यः । नद्यां भवो नाद्यः ॥ ३४५८ । वेशन्तहिमवद्भ्यामण् (४-४-११२) । भवे । 'वैशन्तीभ्यः स्वाहा' । हैमवतीभ्यः स्वाहा' ॥ ३४५९ । स्रोतसो विभाषा ड्यड्ड्यौ (४-४-११३) । पक्षे यत् । ड्यड्ड्ययोस्तु स्वरे भेदः । स्रोतसि भवः स्रोत्यः-स्रोतस्यः ॥ ३४६० । सगर्भसयूथसनुताद्यन् (४-४-११४) । अनुभ्राता सगर्भ्यः । अनुसखा सयूथ्यः । 'यो नः सनुत्य उत वा जिगत्नुः' । नुतिर्नुतम् । 'नपुंसके भावे क्तः' (सू ३०९०) । सगर्भोदयस्त्रयोऽपि कर्मधारयाः । 'समानस्य छन्दसि-' (सू १०१२) । इति सः । ततो भवार्थे यन् । यतोऽपवादः ॥ ३४६१ । तुग्राद्धन् । (४-४-११५) । भवेऽर्थे । पक्षे यदपि । 'आ वः शम वृषभं तुग्र्यासु' इति बह्वृचाः । 'तुग्रियासु' इति शाखान्तरे । 'घनाकाशयज्ञवरिष्ठेषु तुग्रशब्दः' इति वृत्तिः ॥ ३४६२ । अग्राद्यत् (४-४-११६) ॥ ३४६३ । घच्छौ च (४-४-११७) । चाद्यत् । अग्रे भवो-ऽग्र्यः अग्रियः-अग्रीयः ॥ ३४६४ । समुद्राभ्राद्घः (४-४-११८) । 'समुद्रिया अप्सरसो मनीषिणम्' । 'नानदतो अभ्रियस्येव घोषाः' ॥ ३४६५ । बर्हिषि दत्तम् (४-४-११९) । प्राग्घिताद्यदित्येव । 'बर्हिष्येषु निधिषु प्रियेषु' ॥ ३४६६ । दूतस्य भागकर्मणी (४-४-१२०) भागोंऽशः । दूत्यम् ॥ ३४६७ । रक्षोयातूनां हननी (४-४-१२१) । 'या तेऽग्ने रक्षस्या तनूः' । यातव्या ॥ ३४६८ । रेवतीजगतीहविष्याभ्यः प्रशस्ये (४-४-१२२) । प्रशंसने यत्स्यात् । रेवत्यादीनां प्रशंसनं रेवत्यम् । जगत्यम् । हविष्यम् ॥ ३४६९ । असुरस्य स्वम् (४-४-१२३) । 'असुर्यं देवेभिर्धायि विश्वम्' ॥ ३४७० । मायायामण् (४-४-१२४) । आसुरी माया ॥ ३४७१ । तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक्च मतोः (४-४-१२५) ।

वर्चस्वानुपधानो मन्त्र आसामिष्टकानां वर्चस्याः । ऋतव्याः ॥ ३४७२ ॥ अश्विमानण् (४-४-१२६) । 'आश्विनीरुपदधाति' ॥ ३४७३ । वयस्यासु मूर्ध्नो मतुप् (४-४-१२७) । तद्वानासामिति सूत्रं सर्वमनुवर्तते । मतोरिति पदमावर्त्य पञ्चम्यन्तं बोध्यं । मतुवन्तो यो मूर्धशब्दस्ततो मतुप्स्यात् । प्रथमस्य मतोर्लुक्च । वयश्शब्दवन्मन्त्रोपधेयास्विष्टकासु । यस्मिन्मन्त्रे मूर्धवयःशब्दौ स्तः, तेनोपधेयासु 'मूर्धन्वतीरुपदधाति' इति प्रयोगः ॥ ३४७४ । मत्वर्थे मासतन्वोः (४-४-१२८)। नभोऽभ्रम् । तदस्मिन्नस्तीति नभस्यो मासः । ओजस्या तनूः ॥ ३४७५ । मधोर्ञ च (४-४ १२९)। चाद्यत् । माधवः–मध्यः ॥ ३४७६ । ओजसोऽहनि यत्खौ (४-४-१३०) । ओजस्यमहः ओजसीनं वा ॥ ३४७७। वेशोयश आदेर्भगाद्यल्खौ (४-४ १३१) । यथासङ्ख्यं नेष्यते । वेशो बलं तदेव भगः इति कर्मधारयः । वेशोभग्यः । वेशोभगीनः । यशोभग्यः । यशोभगीनः ॥ (३४७८। ख च (४-४ १३२)। योगविभाग उत्तरार्थः। क्रमनिरासार्थश्च ॥) ३४७९। पूर्वैः कृतमिनयौ च (४-४-१३३)। 'गम्भीरेभिः'। पथिभिः पूर्विणेभिः। 'येते पन्थाः सवितः पूर्व्यासः' ॥ ३४८० । अद्भिः संस्कृतम् (४-४-१३४) । 'यस्येदमप्यं हविः' ॥ ३४८१ । सहस्रेण संमितौ घः (४-४-१३५) । 'सहस्रियासोऽपां नोर्मयः' । सहस्रेण तुल्या इत्यर्थः ॥ ३४८२ । मतौ च (४-४-१३६) । सहस्रशब्दान्मत्वर्थे घः स्यात् । सहस्रमस्यास्तीति सहस्रियः ॥ ३४८३ । सोममर्हति यः (४-४-१३७) । सोम्यो ब्राह्मणः । यज्ञार्ह इत्यर्थः ॥ ३४८४ । मये च (४-४-१३८) । सोमशब्दाद्यः स्यान्मयडर्थे । सोम्यं मधु । सोममयमित्यर्थः ॥ ३४८५ । मधोः (४-४-१३९) । मधुशब्दान्मयडर्थे यत्स्यात् । मध्यः । मधुमय इत्यर्थः ॥ ३४८६ । वसोः समूहे च (४-४-१४०) । चान्मयडर्थे यत् । वसव्यः । 'अक्षरसमूहे छन्दस उपसंख्यानम्' (वा २९८०) । छन्दःशब्दादक्षरसमूहे वर्तमानात्स्वार्थे यदित्यर्थः । ओश्रावय इति चतुरक्षरम्, 'अस्तुश्रौषट्' इति चतुरक्षरम्, 'येयजामहे' इति पञ्चाक्षरम्, 'यज' इति द्व्यक्षरं द्व्यक्षरो वषट्कार एष वै सप्तदशाक्षरश्छन्दस्यः ॥ ३४८७ । नक्षत्राद्घः (४-४-१४१) । स्वार्थे । 'नक्षत्रियेभ्यः स्वाहा' ॥ ३४८८ । सर्वदेवात्तातिल् (४-४-१४२) । स्वार्थे । 'सविता नः सुवतु सर्वतातिम्' । प्रदक्षिणिर्देवतातिर्मुराणः' ॥ ३४८९ । शिवशमरिष्टस्य करे (४-४-१४३) । करोतीति करः । पचाद्यच् । शिवं करोतीति शिवतातिः । 'याभिः शन्तातौ भवथो ददाशुषे' । 'अथो अरिष्टतातये' ॥ ३४९० । भावे च (४-४-१४४) । शिवादिभ्यो भावे तातिः स्याच्छन्दसि । शिवस्य भावः शिवतातिः । शन्तातिः । अरिष्टतातिः ॥

इति चतुर्थोऽध्यायः ।

३४९१ । सप्तनोऽञ् छन्दसि (५-१-६१) । 'तदस्य परिमाणम्' (सू १७२३) इति 'वर्गे' इति च । सप्त 'साप्तान्यसृजत्' । सप्तवर्गानित्यर्थः । शञ्छतोर्डिनिश्छन्दसि तदस्य

---

१. "यथासंख्यमिति । वृत्तिकारस्तु '–यल्' 'ख च' इति सूत्रं व्यभजत्" इति मनोरमा । "वृत्तिकारस्त्विति । अत्रारुचिबीजं तु 'यथासंख्य' सूत्रस्थभाष्यविरोधः" इति शब्दरत्नम् । 'यल्खाविति भाष्यपाठे' इत्यनुपदमेव मनोरमा ।

परिमाणमित्यर्थे वाच्यः' (वा ३१३१)। पञ्चदशिनोऽर्धमासाः। त्रिंशिनो मासाः। 'विंशतेश्चेति वाच्यम्' (वा ३१३२)। विंशिनोऽङ्गिरसः। 'युष्मदस्मदोः सादृश्ये वतुब्वाच्यः' (वा ३१३८) 'त्वावतः पुरूवसो'। 'न त्वावां अन्यः'। 'यज्ञं विप्रस्य मावतः'॥ ३४९२। छन्दसि च (५-१-६७)। प्रातिपदिकमात्रात् 'तदर्हति' इत्यर्थे यत्स्याच्छन्दसि। 'सादन्यं विदथ्यम्'॥ ३४९३। वत्सरान्ताच्छश्छन्दसि (५-१-९१)। निर्वृत्तादिष्वर्थेषु। इद्वत्सरीयः॥ ३४९४। संपरिपूर्वात्ख च (५-१-९२)। चाच्छः। संवत्सरीणः–संवत्सरीयः। परिवत्सरीणः–परिवत्सरीयः॥ ३४९५। छन्दसि घस् (५-१-१०६)। ऋतुशब्दात्तदस्य प्राप्तमित्यर्थे। 'भाग ऋत्वियः॥ ३४९६। उपसर्गाच्छन्दसि धात्वर्थे (५-१-११८)। धात्वर्थविशिष्टे साधने वर्तमानात्स्वार्थे वतिः स्यात्। 'यदुद्वतो निवतः'। उद्गतान्निर्गतादित्यर्थः॥ ३४९७। थट् च च्छन्दसि (५-२-५०)। नान्तादसङ्ख्यादेः परस्य डटस्थट् स्यान्मट् च। पञ्चथम्-पञ्चमम्। 'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि' (सू १८८९)। 'पर्यवस्थाता शत्रुः'। 'अपत्यं परिपन्थिनम्'। 'मा त्वा परिपरिणौ विदन्'॥ ३४९८। बहुलं छन्दसि (५-२-१२२)। मत्वर्थे विनिः स्यात्। 'अग्निस्ते ओजस्वी'। 'छन्दोविन्प्रकरणे अष्टामेखलाद्वयोभयरुजाहृद्यानां दीर्घश्चेति वक्तव्यम्' (वा ३२११) इति दीर्घः। 'महिष्टमुभयाविनम्'। 'शुनमष्ट्राव्यचरत्'। 'छन्दसीवनिपौ च वक्तव्यौ' (वा ३२०२)। ई। 'रथीरभूत्'। 'सुमङ्गलीरियं वधूः'। 'मघवानमीमहे'॥ ३४९९। तयोर्दार्हिलौ च च्छन्दसि (५-३-२०)। इदंतदोर्यथासङ्ख्यं स्तः। 'इदा हि वे उपस्तुतिम्'। तर्हि॥ ३५००। था हेतौ च च्छन्दसि (५-३-२६) किमस्था स्याद्धेतौ प्रकारे च। 'कथा ग्रामं न पृच्छसि'। 'कथा दाशेम'॥ ३५०१। पश्च पश्चा च च्छन्दसि (५-३-३३)। अवरस्यास्तात्यर्थे निपातौ। 'पश्च हि सः'। 'नो ते पश्चा' 'तुश्छन्दसि' (सू २००७)। तृजन्तान्तृन्नन्ताच्च इष्ठन्नीयसुनौ स्तः। 'आसुतिं करिष्ठः'। दोहीयसी धेनुः॥ ३५०२। प्रत्नपूर्वविश्वेमात्थाल्छन्दसि (५-३-१११)। इवार्थे। 'तं प्रत्नथा पूर्वथा विश्वथेमथा'॥ ३५०३। अमु च च्छन्दसि (५-४-१२)। किमेत्तिङव्ययघादित्येव। 'प्रतं नय प्रतराम्'॥ ३५०४। वृकज्येष्ठाभ्यां तिल्तातिलौ च च्छन्दसि (५-४-४१)। स्वार्थे 'यो नो दुरेवो वृकतिः'। 'ज्येष्ठतातिं बर्हिषदम्'॥ ३५०५। अनसन्तान्नपुंसकाच्छन्दसि (५-४-१०३)। तत्पुरुषाट्टच्स्यात्समासान्तः। 'ब्रह्मसामं भवति'। 'देवच्छन्दसानि'॥ ३५०६। बहुप्रजाश्छन्दसि (५-४-१२३)। 'बहुप्रजा निर्ऋतिमाविवेश'॥ ३५०७। छन्दसि च (५-४-१४२) दन्तस्य दतृ स्याद्बहुव्रीहौ। 'उभयतोदतः प्रतिगृह्णाति'॥ ३५०८। ऋतश्छन्दसि (५-४-१५८)। ऋदन्ताद्बहुव्रीहेर्न कप्। हता माता यस्य हतमाता॥

इति पञ्चमोऽध्यायः।

'एकाचो द्वे प्रथमस्य' (सू २१७५)। 'छन्दसि वेति वक्तव्यम्' (वा ३४१४)। 'यो जागार' 'दाति प्रियाणि'॥ ३५०९। तुजादीनां दीर्घोऽभ्यासस्य (६-१-७)। तुजादिराकृतिगणः। 'प्रभरा तूतुजानः'। 'सूर्ये मामहानम्'। 'दाधारः यः पृथिवीम्'। 'स तूताव'॥ ३५१०। बहुलं छन्दसि (६-१-३४)। ह्वः सम्प्रसारणं स्यात्। 'इन्द्रमा हुव ऊतये'। 'ऋचि त्रेरुत्तरपदादिलोपश्च छन्दसि' (वा ३४७२)। ऋक्छन्दे परे त्रेः सम्प्रसारणमुत्तरपदादेर्लोपश्चेति

वक्तव्यम् । तृचं साम । 'छन्दसि' किम् । ऋचानि । 'रयेर्मतौ बहुलम्' (वा ३४७३) । रेवान् रयिमान्पुष्टिवर्धनः ॥ ३५११ । चायः की (६-१-३५) । चायतेर्बहुलं कीत्ययमादेशः स्याच्छन्दसि । 'न्य१न्यङ्क्युर्न निचिक्युरन्यम्' । लिटयुसि रूपम् । बहुलग्रहणानुवृत्तेर्नेह । 'अग्निं ज्योतिर्निचाय्य' ॥ ३५१२ । अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताःश्रितमाशीराशीर्ताः (६-१-३६) । एते छन्दसि निपात्यन्ते । 'इन्द्रश्च विष्णो यदपस्पृधेथाम्' । स्पर्धेर्लङ्थाथाम् । 'अर्कमानृचुः' । 'वसून्यानृहुः' । अर्चेरर्हेश्च लिटयुसि । चिच्युषे । च्युङो लिटि थासि । 'यस्तित्याज' । त्यजेर्णलि । 'श्रातास्त इन्द्र सोमाः' । 'श्रिता नो ग्रहाः' । श्रीञ् पाके निष्ठायाम् । 'नाशिरं दुहे' । 'मध्यत आशीर्तः' । श्रीञ एव क्विपि निष्ठायां च ॥ ३५१३ । खिदेश्छन्दसि (६-१-५२) । 'खिद दैन्ये' । अस्यैच आ स्यात् । चिखाद । चिखेदेत्यर्थः ॥ ३५१४ । शीर्षश्छन्दसि (६-१-६०) । शिरःशब्दस्य शीर्षन् स्यात् । 'शीर्ष्णो जगतः' ॥ ३५१५ । वा च्छन्दसि (६-१-१०६) । दीर्घाज्जसीचि च पूर्वसवर्णदीर्घौ वा स्यात् । इचि उदाहरणम् । वाराही । वाराह्यौ । 'मानुषीरीळते पिशः' । उत्तरसूत्रद्वयेऽपीदं वाक्यभेदेन संबध्यते । तेनामिपूर्वत्वं वा स्यात् । शमीं च शम्यं च । 'सूर्म्ये सुषिरामिव' । 'संप्रसारणाच्च' (सू ३३०) । इति पूर्वरूपमपि वा । इज्यमानः–यज्यमानः ॥ ३५१६ । शेश्छन्दसि बहुलम् (६-१-७०) । लोपः स्यात् । 'या ते गात्राणाम्' । 'ताता पिण्डानाम्' । 'एमन्नादिषु छन्दसि पररूपं वक्तव्यम्' (वा ३६६५) । अपां त्वेमन् । अपां त्वोद्मन् ॥ ३५१७ । भय्यप्रवय्ये च च्छन्दसि (६-१-८३) । बिभेत्यस्मादिति भय्यः । वेतेः प्रवय्या इति स्त्रियामेव निपातनम् । प्रवेयमित्यन्यत्र । 'छन्दसि' किम् । भेयम् । प्रवेयम् । 'हृदय्य आप उपसंख्यानम्' (वा ६५४५) । हृदे भवा हृदय्या आपः । भवे छन्दसि यत् । ३५१८ । प्रकृत्यान्तःपादमव्यपरे । (३-१-११५) । ऋक्पादमध्यस्थ एङ् प्रकृत्या स्यादति परे न तु वकारयकारपरेऽति । 'उपप्रयन्तो अध्वरम्' । 'सुजाते अश्वसूनृते' । 'अन्तःपादम्' किम् । 'एतास एतेऽर्चन्ति' । 'अव्यपरे' किम् । 'तेऽवदन्' । तेऽयजन् । ३५१९ । अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च (६-१-११६) । एषु व्यपरेऽप्यति एङ् प्रकृत्या । 'वसुभिर्नो अव्यात्' । 'मित्रमहो अवद्यात्' । 'मा शिवासो अवक्रमुः' । 'ते नो अव्रत' । 'शतधारो अयं मणिः' । 'ते नो अवन्तु' । 'कुशिकासो अवस्यवः' । यद्यपि बहृवृचैः 'ते नोऽवन्तु' 'रथतूः सोऽयमागात्' 'तेऽरुणेभिः' इत्यादौ प्रकृतिभावो न क्रियते । तथापि बाहुलकात्समाधेयम् । प्रातिशाख्ये तु वाचनिक एवायमर्थः ॥ ३५२० । यजुष्युरः (६-१-११७) । उरःशब्द एङन्तोऽति प्रकृत्या यजुषि । 'उरो अन्तरिक्षम्' । यजुषि पादाभावादनन्तःपादार्थं वचनम् ॥ ३५२१ । आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बेऽम्बालेऽम्बिके पूर्वे (६-१-११८) । यजुष्यति एङ् प्रकृत्या । 'आपो अस्मान्मातरः शुन्धयन्तु' । 'जुषाणो अग्निराज्यस्य' । 'वृष्णो अंशुभ्याम्' । वर्षिष्ठे अधि नाके' । 'अम्बे अम्बाले अम्बिके' । अस्मादेव वचनात् 'अम्बार्थ–' (सू २६७) इति ह्रस्वो न ॥ ३५२२ । अङ्ग इत्यादौ च (६-१-११९) । अङ्गशब्दे य एङ् तदादौ चाकारे य एङ्पूर्वः सोऽति प्रकृत्या यजुषि । 'प्राणो अङ्गे अङ्गे अदीव्यत्' । 'अङ्गे अङ्गे अशोचिषम्' ॥ ३५२३ । अनुदात्ते च कुधपरे (६-१-१२०) ।

कवर्गधकारपरे अनुदात्तेऽति परे एङ् प्रकृत्या यजुषि । 'अयं सो अग्निः' । 'अयं सो अध्वरः' । 'अनुदात्ते' किम् । 'अधोऽग्रे रुद्रे' । अग्रशब्द आद्युदात्तः । 'कुधपरे' किम् । 'सोऽयमग्निमन्तः' ॥ ३५२४ । अवपथासि च (६-१-१२१) । अनुदात्त अकारादौ अवपथाः शब्दे परे यजुषि एङ् प्रकृत्या । 'त्री रुद्रेभ्यो अवपथाः' । वपेस्थासि लङि 'तिङ्ङतिङः' (सू ३९३५) इत्यनुदात्तत्वम् । 'अनुदात्ते' किम् । 'यद्रुद्रेभ्योऽवपथाः' । 'निपातैर्यद्यदि–' (सू ३९३७) इति निघातो न ॥ ३५२५ । आङोऽनुनासिकश्छन्दसि (६-१-१२६) । आङोऽचि परेऽनुनासिकः स्यात् । स च प्रकृत्या । 'अभ्र आँ अपः' । 'गभीर आँ उग्रपुत्रे' । 'ईषा अक्षादीनां छन्दसि प्रकृतिभावो वक्तव्यः' (वा ३६८५) । 'ईषा अक्षो हिरण्ययः' । 'ज्या इयम्' । 'पूषा अविष्टु' ॥ ३५२६ । स्यश्छन्दसि बहुलम् (६-१-१३३) । स्य इत्यस्य सोर्लोपः स्याद्वलि । 'एष स्य भानुः' ॥ ३५२७ । ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे (६-१-१५१) । ह्रस्वात्परस्य चन्द्रशब्दस्योत्तरपदस्य सुडागमः स्यान्मन्त्रे । 'हरिश्चन्द्रो मरुद्गणः' । सुश्चन्द्र दस्म ॥ ३५२८ । पितरामातरा च छन्दसि (६-३-३३) । द्वन्द्वे निपातः । 'आ मा गन्तां पितरामातरा च' । चाद्विपरीतमपि । 'न मातरापितरा नू चिदिष्टौ' । 'समानस्य छन्दस्यमूर्ध-प्रभृत्युदर्केषु' (सू १०१२) । समानस्य सः स्यान्मूर्धादिभिन्न उत्तरपदे । सगर्भ्यः । 'छन्दसि स्त्रियां बहुलम्' (वा ३९९४) । विष्वग्देवयोरव्यादेशः । 'विश्वाची च घृताची च' । 'देवद्रीचीं नयथ देवयन्तः' । 'सा कद्रीची' ॥ ३५२९ । सध मादस्थयोश्छन्दसि (६-३-९६) । सहस्य सधादेशः स्यात् मादस्थयोः परतः । 'इन्द्र त्वास्मिन्सधमादे' । सोमः सधस्थम् ॥ ३५३० । पथि च च्छन्दसि (६-३-१०८) । पथिशब्द उत्तरपदे कोः कवं कादेशश्च । कवपथः–कापथः-कुपथः ॥ ३५३१ । साढ्यै साढ्वा साढेति निगमे (६-३-११३) । सहेः क्त्वाप्रत्यये आद्यं द्वयं तृनि तृतीयं निपात्यते । 'मरुद्भिरुग्रः पृतनासु साह्वान्' । अचोर्मध्यस्थस्य डस्य ळः ढस्य ह्वळश्च प्रातिशाख्ये विहितः । आह हि—

"द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो ळकारः ।
ह्वळकारतामेति स एव चास्य ढकारः सन्नूष्मणा संप्रयुक्ते ॥" इति ।

३५३२ । छन्दसि च (६-३-१२६) । अष्टन आत्वं स्यादुत्तरपदे । अष्टापदी ॥ ३५३३ । मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ (६-३-१३१) । दीर्घः स्यान्मन्त्रे । 'अश्वावतीं सोमावतीम्' । इन्द्रियावान्मदिन्तमः । 'विश्वकर्मणा विश्वदेव्यावता' ॥ ३५३४ । ओषधेश्च विभक्तावप्रथमायाम् (६-३-१३२) । दीर्घः स्यान्मन्त्रे । 'यदोषधीभ्य अदधात्योषधीषु' ॥ ३५३५ । ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् (६-३-१३३) । दीर्घः स्यात् । 'आ तू न इन्द्र' । 'नू मूर्तः' । 'उत वा घा स्यालात्' । मक्षु गोमन्तमीमहे । 'भरता जातवेदसम्' । तङितिति थादेशस्य ङित्त्वपक्षे ग्रहणम् । तेनेह न । 'शृणोत ग्रावाणः' । 'कूमनाः' । 'अत्रा ते भद्रा' । 'यत्रा नश्चक्रा' । 'उरुष्याणः' ॥ ३५३६ । इकः सुञि (६-३-१३४) । ऋचि दीर्घ इत्येव । अभी षुणः सखीनाम्' । 'सुन्वः' (सू ३६४४) इति षः । 'नश्च धातुस्थोरुषुभ्यः' (सू ३६४९) इति णः ॥ ३५३७ । ब्यचोऽतस्तिङः (६-३-१३५) । मन्त्रे दीर्घः । 'विद्मा हि त्वा चक्राजरसम्' । ३५३८ । निपातस्य च (६-३-१३६) । 'एवा हि ते' ॥ ३५३९ । अन्येषामपि दृश्यते

(६-३-१३७) । अन्येषामपि पूर्वपदस्थानां दीर्घः स्यात् । पूरुषः । दण्डादण्डि ॥ ३५४० । छन्दस्युभयथा (६-४-५) । नामि दीर्घो वा । 'धाता धातॄणाम्' इति बहवृचाः । तैत्तिरीयास्तु ह्रस्वमेव पठन्ति ॥ ३५४१ । वा षपूर्वस्य निगमे (६-४-९) । षपूर्वस्थान उपधाया वा दीर्घोऽसम्बुद्धौ सर्वनामस्थाने परे । ऋभुक्षाणम् । ऋभुक्षणम् । 'निगमे' किम् । तक्षा । तक्षाणौ । ३५४२ । जनिता मन्त्रे (६-४-५३) । इडादौ तृचि णिलोपो निपात्यते । योनः पिता जनिता ॥ ३५४३ । शमिता यज्ञे (६-४-५४) । शमयितेत्यर्थः ॥ ३५४४ । युप्लुवोर्दीर्घश्छन्दसि (६-४-५८) । ल्यपीत्यनुवर्तते । वियूय । विप्लूय । 'आडजादीनाम्' (सू २२५४) ॥ ३५४५ । छन्दस्यपि दृश्यते (६-४-७३) । अनजादीनामित्यर्थः । आनट् । आवः । 'न माङ्योगे' (सू २२२८) ॥ ३५४६ । बहुलं छन्दस्यमाङ्योगेऽपि (६-४-७५) । अडाटौ न स्तः । माङ्योगेऽपि स्तः । 'जनिष्ठा उग्रः सहसे तुरायः' । 'मा वः क्षेत्रे परबीजान्यवाप्सुः' ॥ ३५४७ । इरयो रे (६-४-७६) । 'प्रथमं गर्भं दध्रे आपः' । रेभावस्याभीयत्वेनासिद्धत्वादातोलोपः । अत्र रेशब्दस्येटि कृते पुनरपि रेभावः । तदर्थं च सूत्रे द्विवचनान्तं निर्दिष्टमिरयोरिति ॥ ३५४८ । छन्दस्युभयथा (६-४-८६) । भूसुधियोर्यण्स्यादियङुवङौ च । 'वनेषु चित्रं विभ्वम्' । विभुवं वा । 'सुध्यो हव्यमग्नेः' । सुधियो वा । 'तन्वादीनां छन्दसि बहुलम्' (वा ४११५) । 'तन्वं पुषेम' । तनुवं वा । त्र्यम्बकम्–त्रियम्बकं वा ॥ ३५४९ । तनिपत्योश्छन्दसि (६-४-९९) । एतयोरुपधालोपः क्ङिति प्रत्यये । 'वितन्निरे कवयः' । 'शकुना इव पप्तिम' । भाषायां वितेनिरे । पेतिम ॥ ३५५० । घसिभसोर्हलि च (६-४-१००) । 'सग्धिश्च मे' । 'बब्धां ते हरी धानाः' । 'हुझल्भ्यो हेर्धिः' (सू २४२५) ॥ ३५५१ । श्रुशृणुपृकृभ्यश्छन्दसि (६-४-१०२) । 'श्रुधी हवम्' । 'शृणुधी गिरः' । रायस्पूर्धि' । 'उरुणस्कृधि' । अपावृधि ॥ ३५५२ । वा छन्दसि (६-४-८८) । हिरपिद्वा ॥ ३५५३ । अङितश्च (६-४-१०३) । हेर्धिः स्यात् । रारन्धि । रमेर्व्यत्ययेन परस्मैपदम् । शपः श्लुरभ्यासदीर्घश्च । 'अस्मै प्रयन्धि' । 'युयोधि जातवेदः' । यमेः शपो लुक् । यौतेः शपः श्लुः । 'अङितः' किम् । प्रणीहि ॥ ३५५४ । मन्त्रेष्वाङ्यादेरात्मनः (६-४-१४१) । आत्मन्शब्दस्यादेर्लोपः स्यादाङि । 'त्मना देवेषु' ॥ ३५५५ । विभाषर्जोश्छन्दसि (६-४-१६२) । ऋजुशब्दस्यर्तः स्थाने रः स्याद्वा इष्टेमेयस्सु । 'त्वं रजिष्ठमनुनेषि' । ऋजिष्ठं वा ॥ ३५५६ । ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि (६-४-१७५) । ऋतौ भवमृत्व्यम् । वास्तुनि भवं वास्त्व्यम् । वास्त्वं च । मधुशब्दस्याणि स्त्रियां यणादेशो निपात्यते । 'माध्वीर्नः सन्त्वोषधीः' । हिरण्यशब्दाद्विहितस्य मयटो मशब्दस्य लोपो निपात्यते । 'हिरण्ययेन सविता रथेन' ॥

इति षष्ठोऽध्यायः ।

'शीङो रुट्' (सू २४४२) । ३५५७ । बहुलं छन्दसि (७-१-८) । रुडागमः स्यात् । 'लोपस्त आत्मनेपदेषु' (सू ३५६३) । इति पक्षे तलोपः । 'धेनवो दुहे' । 'लोपाभावे घृतं दुहते' । 'अदभ्रमस्य । 'अतो भिस ऐस्' (सू २०३) ॥ ३५५८ । बहुलं छन्दसि (७-१-१०) । 'अग्निर्देवेभिः' ॥ ३५५९ । नेतराच्छन्दसि (७-१-२६) । स्वमोरदड् न । 'वार्त्रघ्नमितरम्' । 'छन्दसि' किम् । इतरत्काष्ठम् । 'समासेऽनञ्पूर्वे क्त्वो ल्यप्'

(सू ३३३२) । ३५६० । क्त्वापि च्छन्दसि (७-१ ३८) । यजमानं परिधापयित्वा ॥ ३५६१ । सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः (७-१-३९) । 'ऋजवः सन्तु पन्थाः'। पन्थान इति प्राप्ते सुः । 'परमे व्योमन्' । 'व्योमनि' इति प्राप्ते ङेर्लुक् । धीती । मती । सुष्टुती । धीत्या मत्या सुष्टुत्येति प्राप्ते पूर्वसवर्णदीर्घः । 'या सुरथा रथीतमा दिविस्पृशा अश्विना' । 'यौ सुरथौ दिविस्पृशौ' इत्यादौ प्राप्ते आ । 'नताद्ब्राह्मणम्' । नतमिति प्राप्ते आत् । 'यादेव विद्म तात्वा' । यन्तमिति प्राप्ते । 'न युष्मे वाजबन्धवः'। 'अस्मे इन्द्रा-बृहस्पती'। युष्मास्वस्मभ्यमिति प्राप्ते शे । उरुया । धृष्णुया । उरुणा धृष्णुनेति प्राप्ते या । 'नाभा पृथिव्याः' । नाभाविति प्राप्ते डा । 'ता अनुष्ठ्योच्यावयतात्' । अनुष्ठानमनुष्ठा । व्यवस्थावदङ् । आङो ड्या । साधुया । साध्वीति प्राप्ते याच् । 'वसन्ता यजेत' । वसन्त इति प्राप्ते आल् । 'इयाडियाजीकाराणामुपसंख्यानम्' (वा ४३०८) । उर्विया । दार्विया । उरणा दारुणेति प्राप्ते इया । सुक्षेत्रिया । सुक्षेत्रिणेति प्राप्ते डियाच् । 'दर्तिं न शुष्कं सरसी शयानम्' । ङेरीकार इत्याहुः । तत्राद्युदात्ते पदे प्राप्ते व्यत्ययेनान्तोदात्तता । वस्तुतस्तु ङीषन्तान्ङेर्लुक् । ईकारादेशस्य तूदाहरणान्तरं मृग्यम् । 'आङ्याजयारामुपसंख्यानम्' (वा ४३०९) । 'प्रवाहवा सिस्रुतम्'। बाहुनेति प्राप्ते आङादेशः । 'घेर्ङिति' (सू २४५) इति गुणः । स्वप्नया । स्वप्नेनेति प्राप्तेऽयाच् । 'स नः सिन्धुमिव नावया' । नावेति प्राप्तेऽयार् । रित्स्वरः । ३५६२ । अमो मश् (७-१-४०) । मिबादेशस्यामो मश् स्यात् । अकार उच्चारणार्थः । शित्त्वात्सर्वादेशः । 'अस्तिसिचः–' (सू २२२५) । इति ईट् । 'वधीं वृत्रम्' । अवधिषमिति प्राप्ते ॥ ३५६३ । लोपस्त आत्मनेपदेषु (७ १-४१) । छन्दसि । 'देवा अदुह्रं'। अदुहतेति प्राप्ते । 'दक्षिणतः शये'। शेत इति प्राप्ते । 'आत्मने–' इति किम् । 'उत्सं दुहन्ति' ॥ ३५६४ । ध्वमो ध्वात् (७-१-४२) । ध्वमो ध्वादित्यादेशः स्याच्छन्दसि । 'अन्तरेवोष्माणं वारयध्वात्' । वारयध्वमिति प्राप्ते ॥ ३५६५ । यजध्वैनमिति च (७-१-४३)। एनमित्यस्मिन्परे ध्वमोऽन्तलोपो निपात्यते । यजध्वैनं प्रियमेधाः' । 'वकारस्य यकारो निपात्यते' इति वृत्तिकारोक्तिः प्रामादिकी ॥ ३५६६ । तस्य तात् (७ १-४४) । लोटो मध्यमपुरुषबहुवचनस्य स्थाने तात्स्यात् । 'गात्रमस्यानूनं कृणुतात्' । कृणुतेति प्राप्ते । 'सूर्यं चक्षुर्गमयतात्' गमयतेति प्राप्ते ॥ ३५६७ । तप्तनप्तनथनाश्च । (७-१-४५)। तस्येत्येव । शृणोत ग्रावाणः । शृणुतेति प्राप्ते तप् । 'सुनोतन पचत ब्रह्मवाहसे' । 'दधातन द्रविणं चित्रमस्मै' । तनप् । 'मरुतस्तज्जुजुष्टन' । जुषध्वमिति प्राप्ते व्यत्ययेन परस्मैपदं श्लुश्च । 'विश्वे देवासो मरुतो यति ष्टन' । यत्संख्याकाः स्थेत्यर्थः । यच्छब्दाच्छान्दसो डतिः । अस्तेस्तस्य थनादेशः ॥ ३५६८ । इदन्तो मसि (७-१-४६) । मसीत्यविभक्तिको निर्देशः । इकार उच्चारणार्थः । मसित्ययमिकाररूपचरमावयवविशिष्टः स्यात् । मस इगागमः स्यादिति यावत् । 'नमो भरन्त एमसि' । 'त्वमस्माकं तव स्मसि' । 'इमः' 'स्मः' इते प्राप्ते ॥ ३५६९ । क्त्वो यक् (७-१ ४७) । 'दिवं सुपर्णो गत्वाय' ॥ ३५७० । इष्ट्वीनमिति च । (७-१-४८) । क्त्वाप्रत्ययस्य ईनमन्तादेशो निपात्यते । इष्ट्वीनं देवान्' इष्ट्वेति प्राप्ते ॥ ३५६१ । स्नात्व्यादयश्च (७-१-४९) । आदिशब्दः प्रकारार्थः । आकारस्य ईकारो

निपात्यते । 'स्विन्नः स्नात्वी मलादिव' । 'पीत्वी सोमस्य वावृधे' । स्नात्वा पीत्वेति प्राप्ते ॥ ३५७२ । आज्जसेरसुक् (७-१-५०) । अवर्णान्तादङ्गात्परस्य जसोऽसुक् स्यात् । देवासः । ब्राह्मणासः ॥ ३५७३ । श्रीग्रामण्योश्छन्दसि (७-१-५६) । आमो नुट् । श्रीणामुदारो धरुणो रयीणाम्' । 'सूत ग्रामणीनाम्' ॥ ३५७४ । गोः पादान्ते (७-१-५७) । 'विद्मा हि त्वा गोपतिं शूर गोनाम्' । 'पादान्ते' किम् । 'गवां शता पृक्षयामेषु' । पादान्तेऽपि क्वचिन्न । छन्दसि सर्वेषां वैकल्पिकत्वात् । 'विराजं गोपतिं गवाम्' ॥ ३५७५ । छन्दस्यपि दृश्यते (७-१-७६) । अस्थ्यादीनामनङ् । 'इन्द्रो दधीचो अस्थभिः' ॥ ३५७६ । ई च द्विवचने (७-१-७७) । अस्थ्यादीनामित्येव । 'अक्षीभ्यां ते नासिकाभ्याम्' ॥ ३५७७ । दक्स्ववःस्वतवसां छन्दसि (७-१-८३) । एषां नुम्स्यात्सौ । 'कीदृङिन्द्रः' । स्ववान् । स्वतवान् । 'उदोष्ठ्यपूर्वस्य' (सू २४९४) ॥ ३५७८ । बहुलं छन्दसि (७-१-१०३) । ततुरिः ॥ ३५७९ । हु ह्वरेश्छन्दसि (७-२-३१) । ह्वरेर्निष्ठायां 'हु' आदेशः स्यात् । 'अहुतमसि हविर्धानम्' ॥ ३५८० । अपरिह्वृताश्च (७-२३२) । पूर्वेण प्राप्तस्यादेशस्याभावो निपात्यते । 'अपरिह्वृताः सनुयाम वाजम्' ॥ ३५८१ । सोमे ह्वरितः (७-२-३३) । इङ्गुणौ निपात्येते । 'मा नः सोमो ह्वरितः' ॥ ३५८२ । ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिवमित्यमितीति च (७-२-३४) । अष्टादश निपात्यन्ते । तत्र 'ग्रसु' 'स्कभु' 'स्तभु' एषामुदित्त्वान्निष्ठायामिट्प्रतिषेधे प्राप्त इण्निपात्यते । 'युवं शचीभिर्ग्रसिताममुञ्चतम्' । 'विष्कभिते अजरे' । 'येन स्वः स्तभितम्' । 'सत्येनोत्तभिता भूमिः' । स्तभितेत्येव सिद्धे उत्पूर्वस्य पुनर्निपातनमन्योपसर्गभूतस्य मा भूदिति । 'चते याचने' । 'कस गतौ' । आभ्यां क्तस्येडभावः । 'चत्ता इतश्चत्तामुतः' । त्रिधा ह श्यावमश्विना विकस्तम्' । 'उत्तानाया हृदयं यद्विकस्तम्' । निपातनबहुत्वापेक्षया सूत्रे बहुवचनं विकस्ता इति, तेनैकवचनान्तोऽपि प्रयोगः साधुरेव । 'शसु' 'शंसु' 'शासु' एभ्यस्तृच इडभावः । 'एकस्त्वष्टुरश्वस्याविशस्ता' । 'ग्रावग्राभ उत शंस्ता' । 'प्रशास्ता पोता' । तरतेर्वृङ्वृञोश्च तृच 'उट्' 'ऊट्' एतावागमौ निपात्येते । 'तरुतारं रथानाम्' । तरूतारम् । वरुतारम्–वरूतारम् । 'वरूत्रीभिः सुशरणो नो अस्तु' । अत्र ङीबन्तनिपातनं प्रपञ्चार्थम् । वरूतृशब्दो हि निपातितः । ततो ङीपा गतार्थत्वात् । उज्ज्वलादिभ्यश्चतुर्भ्यः शप इकारादेशो निपात्यते । 'ज्वल दीप्तौ' । 'क्षर सञ्चलने' । 'टुवमु उद्गिरणे' 'अम गत्यादिषु' । इह क्षरितीत्यस्यानन्तरं क्षमितीत्यपि केचित्पठन्ति । तत्र 'क्षमूष् सहने' इति धातुर्बोध्यः । भाषायां तु 'प्रस्तस्कब्धस्तब्धोत्तब्धचतितविकसिताः' । विशसिता–शंसिता–शासिता । तरीता–तरिता । वरीता–वरिता । उज्ज्वलति । क्षरति । पाठान्तरे क्षमति । वमति । अमति । 'बभूथाततन्थजगृम्भववर्थेति निगमे' (सू २५२७) । विद्मा तमुत्सं यत आबभूथ' । 'येनान्तरिक्षमुर्वाततन्थ' । 'जगृम्भा ते दक्षिणमिन्द्र हस्तम्' । 'त्वं ज्योतिषो वितमो ववर्थ' । भाषायां तु । बभूविथ । आतेनिथ । जगृहिम । ववरिथेति ॥ ३५८३ । सनिंससनिवांसम् (७-२-६९) । सनिमित्येतत्पूर्वात्सनतेः सनोतेर्वा क्वसोरिट् । एत्त्वाभ्यासलोपाभावश्च निपात्यते । (अजित्वाग्ने सनिंससनिवांसम्) । 'पावकादीनां छन्दसि' (वा ४५२७) प्रत्ययस्थात्कादित्वं नेति वाच्यम् ।

'हिरण्यवर्णाः शुचयः पावकाः' ॥ ३५८४ । घोर्लोपो लेटि वा । (७-३-७०) । दधद्रत्नानि दाशुषे' । 'सोमो ददद्गन्धर्वाय' । 'यदग्निरग्नये ददात्' ॥ ३५८५ । मीनातेर्निगमे (७-३-८१) शिति ह्रस्वः । 'प्रमिनन्ति व्रतानि' । लोके प्रमीणाति । 'अस्तिसिचोऽपृक्ते' (सू २२२५) ॥ ३५८६ । बहुलं छन्दसि (७-३-९७) । 'सर्वमा इदम्' । (अस्तेर्लङ् तिप् ईडभाव अपृक्तत्वा-द्धल्ङ्यादिलोपः । रुत्वविसर्गौ । संहितायां तु 'भोभगो–' (सू १६७) । इति यत्वम् । 'लोपः शाकल्यस्य' (सू ६७) इति यलोपः ।) गोभिरक्षाः । सिच इडभावश्छान्दसः । अट् । शेषं पूर्ववत् । 'ह्रस्वस्य गुणः' (सू २४२) । 'जसि च' (सू २४१) । 'जसादिषु छन्दसि वा । वचनं प्राङ् णौ चङ्युपधायाः' (वा ४५९६) । 'अथा शतक्रत्वो यूयम्' । शतक्रतवः । 'पश्वे नृभ्यो यथा गवे' । पशवे । 'नाभ्यस्तस्याचि–' (सू २५०३) इति निषेधे 'बहुलं छन्दसीति वक्तव्यम्' (वा ४५८६) । 'आनुषग्जुजोषत्' ॥ ३५८७ । नित्यं छन्दसि (७-४-८) । छन्दसि विषये णौ चङ्युपधाया ऋवर्णस्य ऋन्नित्यम् । अवीवृधत् ॥ ३५८८ । न छन्दस्यपुत्रस्य (७-४-३५) । पुत्रभिन्नस्यादन्तस्य क्यचीत्वदीर्घौ न । मित्रयुः । 'क्याच्छन्दसि' (सू ३१५०) इति उः । 'अपुत्रस्य' किम् । 'पुत्रीयन्तः' सुदानवः । 'अपुत्रादीनामिति वाच्यम्' (वा ४६१६) । 'जनीयन्तोऽन्वग्रवः' । जनमिच्छन्त इत्यर्थः ॥ ३५८९ । दुरस्युर्द्रविणस्युर्वृषण्यति-रिषण्यति (७-४-३६) । एते क्यचि निपात्यन्ते । भाषायां तु उप्रत्ययाभावादुष्टीयति । द्रविणीयति । वृषीयति । रिष्टीयति ॥ ३५९० । अश्वाघस्यात् (७-४-३७) । 'अश्व' 'अघ' एतयोः क्यच्यात्स्वाच्छन्दसि । 'अश्वायन्तो मघवन्' । 'मा त्वा वृका अघायवः' । 'न च्छन्दसि–' (सू ३५८८) इति निषेधो नेत्त्वमात्रस्य । किंतु दीर्घस्यापीति । अत्रेदमेव सूत्रं ज्ञापकम् ॥ ३५९१ । देवसुम्नयोर्यजुषि काठके (७-४-३८) । अनयोः क्यचि आत्स्याद्यजुषि कठशाखायाम् । 'देवायन्तो यजमानाः' । 'सुम्नायन्तो हवामहे' । इह यजुःशब्दो न मन्त्र-मात्रपरः किंतु वेदोपलक्षकः । तेन ऋगात्मकेऽपि मन्त्रे यजुर्वेदस्थे भवति । किं च ऋग्वेदेऽपि भवति । सचेन्मन्त्रः यजुषि कठशाखायां दृष्टः । 'यजुषि' इति किम् । 'देवां जिगाति सुम्नयुः' । बह्वृचानामप्यस्ति कठशाखा ततो भवति प्रत्युदाहरणम् इति हरदत्तः ॥ ३५९२ । कव्यध्वरपृतनस्यर्चि लोपः (७-४-३९) । 'कवि' 'अध्वर' 'पृतना' एषामन्त्यस्य लोपः स्यात्क्यचि परे ऋचि विषये । 'स पूर्वया निविदा कव्यतायोः' । 'अध्वर्यु वा मधु-पाणिम्' । 'दमयन्तं पृतन्युम्' । दधातेर्हिः' (सू ३०७६) । 'जहातेश्च क्ति' (सू ३३३१) ॥ ३५९३ । विभाषा छन्दसि (७-४-४४) । हित्वा शरीरम्' हात्वा वा ॥ ३५९४ । सुधितवसुधितनेमधितधिष्वधिषीय च (७-४-४५) । 'सु' 'वसु' 'नेम' एतत्पूर्वस्य दधातेः क्तप्रत्यये इत्त्वं निपात्यते । 'गर्भे माता सुधितं वक्षणासु' । वसुधितमग्नौ । नेमधिता न पौंस्या । 'क्तिन्यपि दृश्यते' । 'उत श्वेतं वसुधितिं निरेके' । 'धिष्व वज्रं दक्षिण इन्द्र हस्ते' । धत्स्वेति प्राप्ते । 'सुरेता रेतो धिषीय' आशीर्लिङ् । इट् । 'इटोऽत्' (सू २२५७) धासीयेति प्राप्ते । 'अपो भि' (सू ४४२) । 'मासश्छन्दसीति वक्तव्यम्' (वा ४६३३) । माद्धि–शरद्धिः–खरः । खतवसोरुषमश्चेष्यते । (वा ४६३४) । स्ववद्भिः । अवतेरसुन् । शोभनम् अवो येषां ते स्ववसः तैः । 'तु' इति सौत्रो धातुस्तस्मादसुन् । स्वं तवो

येषां तैः स्रतवद्भिः । 'समुषद्भिरजायथाः' । 'मिथुनेऽसिः' । 'वसेः किच्च' इत्यसिप्रत्यय इति हरदत्तः । पञ्चपादीरीत्या तु 'उषः कित्' इति प्राग्व्याख्यातम् । 'न कवतेर्यङि' (सू २६४१) । ३५९५ । कृषेश्छन्दसि (७-१-६४) । यङ्यभ्यासस्य चुत्वं न । करीकृष्यते । ३५९६ । दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्धरिभ्रद्-विध्वतोदविद्युतत्तरित्रतःसरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीति च (७-४-६५) । एतेऽष्टादश निपात्यन्ते । आद्यास्त्रयो धृङो धारयतेर्वा । भवतेर्यङ्लुगन्तस्य गुणाभावः । तेन भासायां गुणो लभ्यते । तिजेर्यङ्लुगन्तात्तङ् । इयर्तेर्लटि हलादिःशेषापवादो रेफस्य लत्वमित्वाभावश्च निपात्यते । 'अलर्षियुध्म खजकृत्पुरन्दरः' । सिपा निर्देशो न तन्त्रम् । 'अलर्ति दक्ष उत' । फणतेराङ्पूर्वस्य यङ्लुगन्तस्य शतर्यभ्यासस्य नीगागमो निपात्यते । 'अन्वापनीफणत्' । स्यन्देः संपूर्वस्य यङ्लुकि शतर्यभ्यासस्य निक् । धातुसकारस्य षत्वम् । करोतेर्यङलुगन्तस्याभ्यासस्य चुत्वाभावः । 'करिक्रत्' । क्रन्देर्लुङि च्लेरङ् द्विर्वचनमभ्यासस्य चुत्वाभावो निगागमश्च । 'कनिक्रदज्जनुषम्' । अक्रन्दीदित्यर्थः । बिभर्तेरभ्यासस्य जश्त्वाभावः । 'वियो भरिभ्रदोषधीषु' । ध्वरतेर्यङ्लुगन्तस्य शतर्यभ्यासस्य विगागमो धातोर्ऋकारलोपश्च । 'दविध्वतो रश्मयः सूर्यस्य' । द्युतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य संप्रसारणाभावोऽत्वं विगागमश्च । 'दविद्यतद्दीद्यच्छोशुचानः' । तरतेः शतरि श्लावभ्यासस्य रिगागमः । 'सहोर्जा तरित्रतः' ।सूपेः शतरि श्लौ द्वितीयैकवचने रीगागमोऽभ्यासस्य । वृजेः शतरि श्लावभ्यासस्य रीक् । मृजेर्लिटि णलभ्यासस्य रुक् धातोश्च युक् । गमेराङ्पूर्वस्य लटि श्लावभ्यासस्य चुत्वाभावो नीगागमश्च । 'वक्ष्यन्ती वेदा गनीगन्ति कर्णम्' ॥ ३५९७ । ससूवेति निगमे (७-४-७४) । सूतेर्लिटि परस्मैपदं वुगागमोऽभ्यासस्य चात्वं निपात्यते । 'गृष्टिः ससूव स्थविरम्' । सुषुव इति भाषायाम् ॥ ३५९८ । बहुलं छन्दसि (७-४-७८) । अभ्यासस्येकारः स्याच्छन्दसि । 'पूर्णा विवष्टि । [illegible]शेरेतद्रूपम् ॥

इति सप्तमोऽध्यायः ।

३५९९ । प्रसमुपोदः पादपूरणे (८-१-६) । एषां द्वे स्तः पादपूरणे । 'प्रप्रायमग्निः' । 'संसमिद्युवसे' । 'उपोप मे परामृश' । 'किं नोदुदु हर्षसे' ॥ ३६०० । छन्दसीरः (८-२-१५) । इवर्णान्ताद्रेफान्ताच्च परस्य मतोर्मस्य वः स्यात् । 'हरिवते हर्यश्वाय' । गीर्वान् ॥ ३६०१ । अनो नुट् (८-२-१६) । अन्नन्तान्मतोर्नुट् स्यात् । 'अक्षण्वतः कर्णवन्तः' । 'अस्थन्वन्तं यदनस्था बिभर्ति' ॥ ३६०२ । नाद्धस्य (८-२-१७) । नान्तात्परस्य धस्य नुट् । सूपथिन्तरः' । 'भूरिदान्वसुत्वाच्यः' (वा ४७९६) । 'भूरिदावत्तरो जनः' । 'ईद्रथिनः' (वा ४७९५ । 'रथीतरः' । रथीतमं रथीनाम्' ॥ ३६०३ । नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि च्छन्दसि (८-२-६१) । सदेर्नञ्पूर्वान्निपूर्वाच्च निष्ठाया नत्वाभावो निपात्यते । 'नसत्तमञ्जसा' 'निषत्तमस्य चरतः' । असन्नं निषण्णमिति प्राप्ते । उन्देर्नञ्पूर्वस्यानुत्तम् । प्रतूर्तमिति त्वरतेः । तुर्वीत्यस्य वा । सूर्तमिति 'सृ' इत्यस्य । गूर्तमिति 'गूरी' इत्यस्य ॥ ३६०४ । अन्नरूधरवरित्युभयथा छन्दसि (८-२-७०) । रुर्वा रेफो वा । अन्न एव–अन्नरेव । ऊध एव–ऊधरेव । अव एव–अवरेव ॥ ३६०५ । भुवश्च महाव्याहृतेः । (८-२-७१) । भुव

इति—भुवरिति ॥ ३६०६ । ओमभ्यादाने (८-२-८७) । ओंशब्दस्य प्लुतः स्यादारम्भे । 'ओ३म् अग्निमीळे पुरोहितम्' । 'अभ्यादाने' किम् । 'ओमित्येकाक्षरं ब्रह्म' ॥ ३६०७ । ये यज्ञकर्मणि (८-२-८८) । ये३यजामहे । 'यज्ञ—' इति किम् । ये यजामहे ॥ ३६०८ । प्रणवष्टेः (८ २-८९)। यज्ञकर्मणि टेरोमित्यादेशः स्यात् । 'अपां रेतांसि जिन्वतो३म्' 'टेः' किम् । हलन्तेऽन्त्यस्य मा भूत् ॥ ३६०९ । याज्यान्तः (८-२-९०) । ये याज्यान्ता मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि । 'जिह्वामग्ने चकृषे हव्यवाह३म्' । 'अन्तः' किम् । 'याज्यानामृचां वाक्यसमुदायरूपाणां प्रतिवाक्यं टेः स्यात् । सर्वान्त्यस्य चेष्यते ॥ ३६१० । ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः (८ २ ९१) । एषामादेः प्लुतो यज्ञकर्मणि । 'अग्नयेऽनुब्रू३हि' 'अग्नये गोमयानि प्रे३ष्य' । 'अस्तुश्रौ३षट्' । 'सोमस्याग्ने व्रीही वौ३षट्' । 'अग्निमा३वह' ॥ ३६११ । अग्नीत्प्रेषणे परस्य च (८-२-९२) । अग्नीधः प्रेषण आदेः प्लुतस्तस्मात्परस्य च । 'ओ३श्रा३वय' । नेह । 'अग्नीदग्नीन्विहर' । 'बर्हिस्तृणाहि' ॥ ३६१२ । विभाषा पृष्टप्रतिवचने हेः (८-२-९३) । प्लुतः । अकार्षीः कटम् । अकार्षं ही३ । अकार्षं हि । 'पृष्ट' इति किम् । 'कटं करिष्यति हि' । 'हेः' किम् । करोमि ननु । ३६१३ । निगृह्यानुयोगे च (८ २-८४) । अत्र यद्वाक्यं तस्य टेः प्लुतो वा । 'अद्यामावास्येत्यात्थ३' । अमावास्येत्येवंवादिनं युक्त्या स्वमतात्प्रच्याव्य एवमनुयुज्यते ॥ ३६१४ । आम्रेडितं भर्त्सने (८ २ ९५) । 'दस्योदस्यो३ घातयिष्यामि त्वाम्' । आम्रेडितग्रहणं द्विरुक्तोपलक्षणम् । 'चौर चौर३' ॥ ३६१५ । अङ्गयुक्तं तिङाकाङ्क्षम् (८-२-९६) । अङ्गेत्यनेन युक्तं तिङन्तं प्लवते । 'अङ्गकूज३ इदानीं ज्ञास्यति जाल्म' । 'तिङ्' किम् । 'अङ्ग देवदत्त मिथ्या वदसि' । 'आकाङ्क्षम्' किम् । 'अङ्ग पच' । नैतदपरमाकाङ्क्षति । भर्त्सन इत्येव । 'अङ्गाधीष्व भक्तं तव दास्यामि' ॥ ३६१६ । विचार्यमाणानाम् (८-२ ९७) । वाक्यानां टेः प्लुतः । 'होतव्यं दीक्षितस्य गृहा३इ' । 'न होतव्य३मिति' । होतव्यं न होतव्यमिति विचार्यते । प्रमाणैर्वस्तुतत्वपरीक्षणं विचारः ॥ ३६१७ । पूर्वं तु भाषायाम् (८-२-९८) । विचार्यमाणानां पूर्वमेव प्लवते । 'अहिर्नु३ रज्जुर्नु' । प्रयोगापेक्षत्वं पूर्वत्वम् । इह भाषाग्रहणात्पूर्वयोगश्छन्दसीति ज्ञायते ॥ ३६१८ । प्रतिश्रवणे च । (८ २-९९) । वाक्यस्य टेः प्लुतोऽभ्युपगमे प्रतिज्ञाने श्रवणाभिमुख्ये च । 'गां मे देहि भो३' । 'हन्त ते ददामि३' 'नित्यः शब्दो भवितुमर्हति३' । 'दत्त किमात्थ' ॥ ३६१९ । अनुदात्तं प्रश्नान्ताभिपूजितयोः (८-२-१००) । अनुदात्तः प्लुतः स्यात् । दूराद्धूतादिषु सिद्धस्य प्लुतस्यानुदात्तत्वमात्रमनेन विधीयते । अग्निभूत३इ । पट३उ । 'अग्निभूते' 'पटो' एतयोः प्रश्नान्ते टेरनुदात्तः प्लुतः । शोभनः खल्वसि माणवक३ ॥ ३६२० । चिदिति चोपमार्थे प्रयुज्यमाने (८-२-१०१) । वाक्यस्य टेरनुदात्तः प्लुतः । 'अग्निचिद्राया३त्' । अग्निरिव भायात् । 'उपमार्थे' किम् । कथंचिदाहुः । 'प्रयुज्यमाने' किम् । अग्निर्माणवको भायात् ॥ ३६२१ । उपरिस्विदासीदिति च (८ २-१०२) । टेः प्लुतोऽनुदात्तः स्यात् । 'उपरि स्विदासी३त्' । अधः स्विदासी३त्' इत्यत्र तु 'विचार्यमाणानाम्' (सू ३६१६) इत्युदात्तः प्लुतः ॥ ३६२२ । स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु (८-२-१०३) । स्वरितः प्लुतः स्यादाम्रेडिते परेऽसूयादौ गम्ये । असूयायाम् । अभिरूपक ३ अभिरूपक रिक्तं ते आभिरूप्यम् । संमतौ । अभिरूपक३

अभिरूपक शोभनोऽसि । कोपे । अविनीतक३ अविनीतक इदानीं ज्ञास्यसि जाल्म । कुत्सने । शाक्तीक३ शाक्तीक रिक्ता ते शक्तिः ॥ ३६२३ । क्षियाशीःप्रैषेषु तिङाकाङ्क्षम् (८-२-१०४) । आकाङ्क्षस्य तिङन्तस्य टेः स्वरितः प्लुतः स्यात् । आचारभेदे । स्वयं ह रथेन याति३ । उपाध्यायं पदातिं गमयति । प्रार्थनायाम् । पुत्रांश्च लप्सीष्ट३ धनं च तात । व्यापारणे । कटं कुरु३ ग्रामं गच्छ । 'आकाङ्क्षम्' किम् । दीर्घायुरसि अग्नीदग्नीन्विहर ॥ ३६२४ । अनन्त्यस्यापि प्रश्नाख्यानयोः (८-२-१०५) । अनन्त्यस्यान्त्यस्यापि पदस्य टेः स्वरितः प्लुत एतयोः । प्रश्ने । अगम३ : पूर्वा३ न्ग्रामा३ न् । सर्वपदानामयम् । आख्याने । अगम३म् पूर्वा३ न्ग्रामा३ न् ॥ ३६२५ । प्लुतावैच इदुतौ (८-२-१०६) । दूराद्धूतादिषु प्लुतो विहितः तत्रैवैचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लवेते । ऐ४तिकायन । औ४पगव । चतुर्मात्रावलैचौ सम्पद्येते ॥ ३६२६ । एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ (८-२-१०७) । अप्रगृह्यस्यैचोऽदूराद्धूते प्लुतविषये पूर्वस्यार्धस्याकारः प्लुतः स्यादुत्तरस्य त्वर्धस्य इदुतौ स्तः । 'प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवादयाज्यान्तेष्वेव' । (वा ४८८८) प्रश्नान्ते । अगम३ : पूर्वा३ न्ग्रामा३ न् । अग्निभूत३इ । अभिपूजिते । भद्रं करोषि पट३ उ । विचार्यमाणे । होतव्यं दीक्षितस्य गृहा३इ । प्रत्यभिवादे । आयुष्मानेधि अग्निभूत३इ । याज्यान्ते । स्तोमै-र्विधेमाग्नय३इ । 'परिगणनम्' किम् । विष्णुभूते३ घातयिष्यामि त्वाम् । अदूराद्धूत इति न वक्तव्यम् । पदान्तग्रहणं तु कर्तव्यम् । इह मा भूत् । भद्रं करोषि गौरिति । 'अप्रगृह्यस्य' किम् । शोभने माले३ । 'आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः' । (वा ४८८९) । अग्ना३इ पत्नी वः ॥ ३६२७ । तयोर्य्वावचि संहितायाम् (८-२-१०८) । इदुतोर्यकारवकारौ स्तोऽचि संहितायाम् । अग्न३ याशा । पट३ वाशा । अग्न३ यिन्द्रम् । पट३ वुदकम् । 'अचि' किम् । अग्ना३ वरुणौ । 'संहितायाम्' किम् । अग्न३ इ इन्द्रः । संहितायामित्यध्यायसमाप्तेरधि-कारः । इदुतोरसिद्धत्वादयमारम्भः सवर्णदीर्घत्वस्य शाकलस्य च निवृत्त्यर्थः । यवयोरसिद्ध-त्वात् 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (सू ३६५७) इत्यस्य बाधनार्थो वा ॥ ३६२८ । मतुवसो रु सम्बुद्धौ छन्दसि (८-३-१) । रु इत्यविभक्तिको निर्देशः । मत्वन्तस्य वस्वन्तस्य च रुः स्यात् । 'अलोऽन्त्यस्य' (सू ४२) इति परिभाषया नकारस्य । 'इन्द्र मरुत्व इह पाहि सोमम्' । 'हरिवो मे दिनं त्वा' । 'छन्दसीरः' (सू ३६००) इति वत्वम् ॥ ३६२९ । दाश्वान्साह्वान्मीढ्वांश्च (६-१-१२) । एते क्वस्वन्ता निपात्यन्ते । 'मीढ्वस्तोकाय तनयाय' । 'वन उपसङ्ख्यानम्' (वा ४८९०) । क्वनिब्वनिपोः सामान्यग्रहणम् । अनुबन्ध-परिभाषा तु नोपतिष्ठते । अनुबन्धस्येहानिर्देशात् । 'यस्त्वायन्तं वसुना प्रातरित्वः' । इणः क्वनिप् ॥ ३६३० । उभयथर्क्षु (८-३-८) । अम्परे छवि नकारस्य रुर्वा । पशूंस्तांश्चक्रे ॥ ३६३१ । दीर्घादटि समानपादे (८-३-९) । दीर्घान्नकारस्य रुर्वा स्यादटि तौ चेन्नाटौ एक-पादस्थौ स्याताम् । 'देवाँ अच्छा सुमती' । 'महाँ इन्द्रो य ओजसा' । उभयथेत्यनुवृत्तेर्नेह । 'आदित्यान्याचिषामहे' ॥ ३६३२ । आतोऽटि नित्यम् (८-३-३) । अटि परतो रोः पूर्वस्यातः स्थाने नित्यमनुनासिकः । 'महाँ इन्द्रः' । तैत्तिरीयास्तु अनुस्वारमधीयते । तत्र छान्दसो व्यत्यय इति प्राञ्चः । एवं च सूत्रस्य फलं चिन्त्यम् ॥ ३६३३ । स्वतवान्पायौ (८-३-११) ।

रुर्वा । 'भुवस्तस्य स्वतवाँ पायुरग्ने' ॥ ३६३४ । छन्दसि वाप्राग्रेडितयोः (८-३-४९) । विसर्गस्य सो वा स्यात्कुप्वोः प्रशब्दमाग्रेडितं च वर्जयित्वा । 'अग्ने त्रातर्ऋतस्कविः' । 'गिरिर्न विश्वतस्पृथुः' । नेह । 'वसुनः पूर्व्यः पतिः' । 'अप्र—' इत्यादि किम् । 'अग्निः प्र विद्वान्' । 'पुरुषः पुरुषः' ॥ ३६३५ । कःकरत्करतिकृधिकृतेष्वनदितेः (८-३-५०) । विसर्गस्य सः स्यात् । 'प्रदिवो अपस्कः' । 'यथा नो वस्यसस्करत्' । 'सुपे शस्करति' । 'उरुणस्कृधि' । 'सोमं न चारुं मघवत्सु नस्कृतम्' । 'अनदितेः' इति किम् । 'यथा नो अदितिः करत्' ॥ ३६३६ । पञ्चम्याः परावध्यर्थे (८-३-५१) । पञ्चमीविसर्गस्य सः स्यादुपरिभावार्थे परिशब्दे परतः । 'दिवस्परिप्रथमं जज्ञे' । 'अध्यर्थे' किम् । 'दिवस्पृथिव्याः पर्योजः' ॥ ३६३७ । पातौ च बहुलम् (८-३-५२) । पञ्चम्या इत्येव । 'सूर्यो नो दिवस्पातु' ॥ ३६३८ । षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु (८-३-५३) । 'वाचस्पतिं विश्वकर्माणम्' । 'दिवस्पुत्राय सूर्याय' । 'दिवस्पृष्टं भन्दमानः' । 'तमसस्पारमस्य' । 'पारिवीत इळस्पदे' । 'दिवस्पयो दिधिषाणाः' । रायस्पोषं यजमानेषु' ॥ ३६३९ । इडाया वा (८-३-५४) पतिपुत्रादिषु परेषु । इळायास्पुत्रः–इळायाः पुत्रः । इळायास्पदे–इळायाःपदे । 'निसस्तपतावनासेवने' (सू २४०३) । निसः सकारस्य मूर्धन्यः स्यात् । 'निष्टप्तं रक्षो निष्टप्ता अरातयः' । 'अनासेवने' किम् । निस्तपति । पुनःपुनस्तपतीत्यर्थः ॥ ३६४० । युष्मत्तत्ततक्षुष्वन्तःपादम् (८-३-१०३) । पादमध्यस्थस्य सस्य मूर्धन्यः स्यात्तकारादिष्वेषु परेषु । युष्मदादेशाः त्वंत्वातेतवाः । 'त्रिभिष्ट्वं देव सवितः' । 'तेभिष्ट्वा आभिष्टे' । 'अप्स्वग्ने सधिष्टव' । 'अग्निष्टद्विश्वम्' । 'द्यावापृथिवी निष्टतक्षुः' । 'अन्तःपादम्' किम् । 'तदग्निस्तदर्यमा' । 'यन्म आत्मनो मिन्दाभूदग्निस्तत्पुनराहार्जातवेदा विचर्षणिः' । अत्राग्निरिति पूर्वपादस्यान्तो न तु मध्यः ॥ ३६४१ यजुष्येकेषाम् (८-३-१०४) युष्मत्तत्ततक्षुषु परतः सस्य मूर्धन्यो वा । अर्चिभिष्ट्वम् । अग्निष्टे अग्रम् । अर्चीभिष्टतक्षुः । पक्षे अर्चिभिस्त्वमित्यादि ॥ ३६४२ । स्तुतस्तोमयोश्छन्दसि (८-३-१०५) । नृभिष्टुतस्य–नृभिः स्तुतस्य । गोष्टोमम्–गोस्तोमम् । पूर्वपदादित्येव सिद्धे प्रपञ्चार्थमिदम् ॥ ३६४३ । पूर्वपदात् (८-३-१०६) । पूर्वपदस्थान्निमित्तात्परस्य सस्य षो वा । यदिन्द्राग्नी दिवि ष्ठः' । 'युवं हि स्थः स्वर्पती ॥ ३६४४ । सुञः (८-३-१०७) । पूर्वपदस्थान्निमित्तात्परस्य सुञो निपातस्य सस्य षः । 'ऊर्ध्व ऊ षु णः' । 'अभीषु णः' ॥ ३६४५ । सनोतेरनः (८-३-१०८) । 'गोषा इन्दो नृषा असि' । 'अनः' किम् । गोसनिः ॥ ३६४६ । सहेः पृतनर्ताभ्यां च (८-३-१०९) । पृतनाषाहम् । ऋताषाहम् । चात् । ऋतीषाहम् ॥ ३६४७ । निव्यभिभ्योऽड्व्यवाये वा छन्दसि (८-३-११९) । सस्य मूर्धन्यः । न्यषीदत्–न्यसीदत् । व्यषीदत्–व्यसीदत् । अभ्यष्टौत्–अभ्यस्तौत् ॥ ३६४८ (८-४-२५) । छन्दस्यृदवग्रहात् । ऋकारान्तादवग्रहात्परस्य नस्य णः । नृमणाः । पितृयाणम् ॥ ३६४९ । नश्च धातुस्थोरुषुभ्यः । (८-४-२७) । धातुस्थात् । 'अग्ने रक्षा णः' । 'शिक्षा णो अस्मिन्' । 'उरु णस्कृधि' । 'अभीषु णः' । 'मो षु णः' ॥

इत्यष्टमोऽध्यायः ।

इति वैदिकप्रकरणम् ।

॥ श्रीरस्तु ॥

अथ स्वरप्रकरणम् ।

३६५० । अनुदात्तं पदमेकवर्जम् (६-१-१५८) । परिभाषेयम् स्वरविधिविषया । यस्मिन्पदे यस्योदात्तः स्वरितो वा विधीयते तमेकमचं वर्जयित्वा शेषं तत्पदमनुदात्ताच्कं स्यात् । 'गोपायतं नः' । अत्र 'सनाद्यन्ताः–' (सू २३०४) इति धातुत्वे धातुस्वरेण यकारोकार उदात्तः शिष्टमनुदात्तम् । 'सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वाच्यम्' । (वा ३७३०) तेनोक्तोदाहरणे गुपेर्धातुस्वर आयस्य प्रत्ययस्वरश्च न शिष्यते । 'अन्यत्र' इति किम् । 'यज्ञं यज्ञमभिवृद्धे गृणीतः' । अत्र सति शिष्टोऽपि 'श्ना' इत्यत्र स्वरो न शिष्यते किंतु तस एव ॥ ३६५१ । अनुदात्तस्य च यत्रोदात्तलोपः । (६-१-१६१) । यस्मिन्नुदात्ते पर उदात्तो लुप्यते तस्योदात्तः स्यात् । 'देवीं वाचम्' । अत्र ङीबुदात्तः ॥ ३६५२ । चौ (६-१-२२२) । लुमाकारेऽचतौ परे पूर्वस्यान्तोदात्तः स्यात् । उदात्तनिवृत्तिस्वरापवादः । 'देवद्रीचीं नयथ देवयन्तः' । 'अतद्धित इति वाच्यम्' (वा ३७८९) । दाधीचः । माधूचः । प्रत्ययस्वर एवात्र ॥ ३६५३ । आमन्त्रितस्य च (६-१-१९८) । आमन्त्रितविभक्त्यन्तस्यादिरुदात्तः स्यात् । 'अग्न इन्द्र वरुण मित्र देवाः' ॥ ३६५४ । आमन्त्रितस्य च (८-१-१९) पदात्परस्यापादादिस्थितस्यामन्त्रितस्य सर्वस्यानुदात्तः स्यात् । प्रागुक्तस्य षाष्ठस्यापवादोऽयमाष्टमिकः । 'इमं मे गङ्गे यमुने सरस्वति' । 'अपादादौ' किम् । 'शृतुद्रि स्तोमम्' । 'आमन्त्रितं पूर्वमविद्यमानवत्' (सू ४१२) । 'अग्न इन्द्र' अत्रेन्द्रादीनां निघातो न, पूर्वस्याविद्यमानत्वेन पदात्परत्वाभावात् । 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' (सू ४१३) । समानाधिकरण आमन्त्रिते परे विशेष्यं पूर्वमविद्यमानवन्न । 'अग्ने तेजस्विन्' । अग्ने त्रातः' । सामान्यवचनं किम् । पर्यायेषु मा भूत् । 'अघ्न्ये देवि सरस्वति' ॥ ३६५५ । सामान्यवचनं विभाषितं विशेषवचने (८-१-७४) । अत्र भाष्यकृता बहुवचनमिति पूरितम् । सामान्यवचनमिति च पूर्वसूत्रे योजितम् । आमन्त्रितान्ते विशेषणे परे पूर्वं बहुवचनान्तमविद्यमानवद्वा । 'देवीः षळुर्वीरुरु नः कृणोत' । अत्र देवीनां विशेषणं षडिति । 'देवाः शरण्याः' । इह द्वितीयस्य निघातो वैकल्पिकः ॥ ३६५६ । सुबामन्त्रिते पराङ्गवत्स्वरे (२-१-२) । सुबन्तमामन्त्रिते परे परस्याङ्गवत्स्यात्स्वरे कर्तव्ये । 'द्रवत्पाणी शुभस्पती' । शुभ इति शुभेः क्विबन्तात् षष्ठ्यन्तम् । तस्य परशरीरानुप्रवेशे षाष्ठिकमामन्त्रितायुदात्तत्वम् । न चाष्टमिको निघातः शङ्क्यः । पूर्वामन्त्रितस्याविद्यमानत्वेन पादादित्वात् । यत्ते दिवो दुहितर्मर्तभोजनम्' । इह दिवःशब्दस्याष्टमिको निघातः । परशुना वृश्चन्' । 'षष्ठ्यामन्त्रितकारकवचनम्' (वा १२२३)। षष्ठ्यन्तमामन्त्रितान्तं प्रति यत्कारकं तद्वाचकं चेति परिगणनं कर्तव्यमित्यर्थः । तेनेह न ।

'अयमग्ने जरिता' । 'एतेनाग्ने ब्रह्मणा' । समर्थानुवृत्त्या वा सिद्धम् । 'पूर्वाङ्गवचेति वक्तव्यम्' (वा १२२८) । आ ते पितर्मरुताम्' 'प्रति त्वा दुहितर्दिवः' । 'अव्ययानां न' (वा १२२९) 'उच्चैरधीयान' । 'अव्ययीभावस्य त्विष्यते' । (वा १२३०) 'उपाग्न्यधीयान' ॥ ३६५७ । उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य (८-२-४) । उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्यानुदात्तस्य स्वरितः स्यात् । अभ्यभि हि । स्वरितस्य यणः । खलप्व्याशा । अस्य स्वरितस्य त्रैपादिकत्वेनासिद्धत्वाच्छेषनिघातो न ॥ ३६५८ । एकादेश उदात्तेनोदात्तः (८-२-५) । उदात्तेन सहैकादेश उदात्तः स्यात् । 'वोऽश्वाः' । 'क्रावरं मरुतः' ॥ ३६५९ । स्वरितो वानुदात्ते पदादौ (८-२-६) । अनुदात्ते पदादौ पर उदात्तेन सहैकादेशः स्वरितो वा स्यात्, पक्षे पूर्वसूत्रेणोदात्तः । 'वी३दं ज्योतिर्हृदये' । 'अस्य श्लोको द्विवीयते' । व्यवस्थितविभाषात्वादिकारयोः स्वरितः । दीर्घप्रवेशे तूदात्तः । किं च 'एङःपदान्तात्–' (सू ८३) इति पूर्वरूपे स्वरित एव । तेऽवदन् । 'सोऽयमागात्' । उक्तं च प्रातिशाख्ये—'इकारयोश्च प्रश्लेषे क्षैप्राभिनिहतेषु च' इति ॥ ३६६० । उदात्तादनुदात्तस्य स्वरितः (८-४-६६) । उदात्तात्परस्यानुदात्तस्य स्वरितः स्यात् । 'अग्निमीळे' । अस्याप्यसिद्धत्वाच्छेषनिघातो न । 'तमीशानसः' ॥ ३६६१ । नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् (८-४-६७) । उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात् । गार्ग्यादिमते तु स्यादेव । 'प्र य आरुः' । 'वोऽश्वाः' क्रा३भीशवः' ॥ ३६६२ । एकश्रुति दूरात्सम्बुद्धौ (१-२-३३) । दूरात्संबोधने वाक्यमेकश्रुतिः स्यात् । त्रैस्वर्यापवादः । 'आगच्छ भो माणवक' ॥ ३६६३ । यज्ञकर्मण्यजपन्यूङ्खसामसु (१-२-३४) । यज्ञक्रियायां मन्त्रे एकश्रुतिः स्याज्जपादीन्वर्जयित्वा । 'अग्निर्मूर्धा दिवः ककुत्' । 'यज्ञ–' इति किम् । स्वाध्यायकाले त्रैस्वर्यमेव । 'अजप–' इति किम् । ममाग्ने वर्चो विहवेष्वस्तु' । जपो नाम उपांशुप्रयोगः । यथा जले निमग्नस्य । न्यूङ्खा नाम षोडश ओकाराः । गीतिषु सामाख्या ॥ ३६६४ । उच्चैस्तरां वा वषट्कारः (१-२-३५) । यज्ञकर्मणि वौषट्छब्द उच्चैस्तरां वा स्यादेकश्रुतिर्वा । सोमस्याग्नेवीही३वौ३षट् ॥ ३६६५ । विभाषा छन्दसि (१-२-३६) । छन्दसि विभाषा एकश्रुतिः स्यात् । व्यवस्थितविभाषेयं । संहितायां त्रैस्वर्यम् । ब्राह्मणे एकश्रुतिर्बह्वृचानाम् । अन्येषामपि यथासंप्रदायं व्यवस्था ॥ ३६६६ । न सुब्रह्मण्यायां स्वरितस्य तूदात्तः (१-२-३७) । सुब्रह्मण्याख्ये निगदे 'यज्ञकर्मणि–' (सू ३६६३) इति 'विभाषा छन्दसि' (सू ३६६५) इति च प्राप्ता एकश्रुतिर्न स्यात्स्वरितस्योदात्तश्च स्यात् । सुब्रह्मण्यो३म् । सुब्रह्मणि साधुरिति यत् । न च 'एकादेश उदात्तेनोदात्तः' (सू ३६५८) इति सिद्धे पुनरत्रेदमुदात्तविधानं व्यर्थमिति वाच्यम् । तत्रानुदात्त इत्यनुवृत्तेः । 'असाविल्यन्तः' (वा ६५१) । तस्मिन्नेव निगदे प्रथमान्तस्यान्त उदात्तः स्यात् । गार्ग्यो यजते । इत्वात्प्राप्त आद्युदात्तोऽनेन बाध्यते । 'अमुष्येल्यन्तः' (वा ६५२) । षष्ठ्यन्तस्यापि प्राग्वत् । दाक्षेः पिता यजते । 'स्यान्तस्योपोत्तमं च' (वा ६५३) । चादन्तः । तेन द्वावुदात्तौ । गार्ग्यस्य पिता यजते । वा नामधेयस्य (वा ३५४) । स्यान्तस्य नामधेयस्य उपोत्तममुदात्तं वा स्यात् । देवदत्तस्य पिता यजते ॥ ३६६७ । देवब्रह्मणोरनुदात्तः (१-२-३८) । अनयोः स्वरितस्यानुदात्तः स्यात्सुब्रह्मण्यायाम् । 'देवा ब्रह्माण आगच्छत' ॥ ३६६८ । स्वरितात्संहितायामनुदात्तानाम्

(१-२-३९) । स्वरितात्परेषामनुदात्तानां संहितायामेकश्रुतिः स्यात् । 'इमं मे गङ्गे यमुने सरस्वति' ॥ ३६६९ । उदात्तस्वरितपरस्य सन्नतरः (१-२-४०) । उदात्तस्वरितौ परौ यस्मात्तस्यानुदात्तस्यानुदात्ततरः स्यात् । 'सरस्वति श्रुतुद्रि' । 'व्यचक्षयत्स्वः' । 'तस्य परमाम्रेडितम्' (सू ८३) ॥ ३६७० । अनुदात्तं च (८-१-३) । द्विरुक्तस्य परं रूपमनुदात्तं स्यात् । 'दिवे दिवे' ॥

इति साधारणस्वराः ।

३६७१ । धातोः (६-१-१६२) । अन्त उदात्तः स्यात् । 'गोपायतं नः' । 'असि सत्यः' ॥ ३६७२ । स्वपादिहिंसामच्यनिटि (६-१-१८८) । स्वपादीनां हिंसेश्चानिट्यजादौ लसार्वधातुके परे आदिरुदात्तो वा स्यात् । स्वपादिरदाद्यन्तर्गणः । स्वपन्ति । श्वसन्ति । हिंसन्ति । पक्षे प्रत्ययस्वरेण मध्योदात्तता । 'क्ङिति च्लेर्वेष्यते' । नेह । स्वपानि । हिनसानि ॥ ३६७३ । अभ्यस्तानामादिः (६-१-१८९) । अनिट्यजादौ लसार्वधातुके परे अभ्यस्तानामादिरुदात्तः । 'ये ददति प्रिया वसु' परत्वाच्चित्स्वरमयं बाधते । 'दधाना इन्द्रे' ॥ ३६७४ । अनुदात्ते च (६-१-१९०) । अविद्यमानोदात्ते लसार्वधातुके परेऽभ्यस्तानामादिरुदात्तः । 'दधासि रत्नं द्रविणं च दाशुषे' ॥ ३६७५ । भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वे पिति (६-१-१९२) । भीप्रभृतीनामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात्पूर्वमुदात्तं स्यात् । 'योऽग्निहोत्रं जुहोति' । 'ममत्तु नः परिज्मा' । 'माता यद्वीरं दधनत्' जागर्षि त्वम्' ॥ ३६७६ । लिति (६-१-१९३) । प्रत्ययात्पूर्वमुदात्तम् । चिकीर्षकः ॥ ३६७७ । आदिर्ण-मुल्यन्यतरस्याम् (६-१-१९४) । अभ्यस्तानामादिरुदात्तो वा णमुलि परे । लोलूयं लोलूयम् । पक्षे लित्स्वरः ॥ ३६७८ । अचः कर्तृयकि (६-१-१९५) । उपदेशेऽजन्तानां कर्तृयकि पर आदिरुदात्तो वा । लूयते केदारः स्वयमेव ॥ ३६७९ । चङ्यन्यतरस्याम् (६-१-२१८) । चङन्ते धातावुपोत्तममुदात्तं वा । 'मा हि चीकरताम्' । धात्वकार उदात्तः । पक्षान्तरे चङुदात्तः ॥

इति धातुस्वराः ।

३६८० । कर्षात्वतो घञोऽन्त उदात्तः (६ १-१५९) । कर्षतेर्धातोराकारवतश्च घञन्तस्यान्त उदात्तः स्यात् । कर्षः । शपा निर्देशात्तुदादेराद्युदात्त एव । कर्षः । पाकः ॥ ३६८१ । उञ्छादीनां च (६-१-१६०) । अन्त उदात्तः स्यात् । उञ्छादिषु युगशब्दो घञन्तोऽगुणो निपात्यते कालविशेषे रथाद्यवयवे च । 'वैश्वानरः कुशिकेभिर्युगे युगे' । अन्यत्र 'योगे योगे तवस्तरम्' । भक्षशब्दो घञन्तः । 'गावः सोमस्य प्रथमस्य भक्षः' । उत्तमशश्वत्तमावपि । 'उदुत्तमं वरुण' । 'शश्वत्तममीळते' ॥ ३६८२ । चतुरः शसि (६-१-१६७) । चतुरोऽन्त उदात्तः शसि परे । 'चतुरः कल्पयन्तः' । अचि रः–' (सू २९९) इति रादेशस्य पूर्वविधौ स्थानिवत्त्वान्नेह । चतस्रः पश्य' 'चतेरुरन्' । नित्त्वादाद्युदात्तता ॥ ३६८३ । झल्युपोत्तमम् (६-१-१८०) । षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं

---

१. नैतद्भाष्ये दृष्टम्–इति शेखरकृत् ।

स्यात् । 'अध्वर्युभिः पञ्चभिः' । 'नवभिर्वाजैर्नवती च' । सप्तभ्यो जायमानः' । 'आदृश-भिर्विवस्वतः' । 'उपोत्तमम्' किम् । 'आ षड्भिर्हूयमानः' । 'विश्वैर्देवैस्त्रिभिः 'झलि' किम् । 'नवानां नवतीनाम्' ॥ ३६८४ । विभाषा भाषायाम् (६-१-१८१) । उक्तविषये ॥ ३६८५ । सर्वस्य सुपि (६-१-१९१) । सुपि परे सर्वशब्दस्यादिरुदात्तः स्यात् । 'सर्वे नन्दन्ति यशसा' ॥ ३६८६ । ञ्नित्यादिर्नित्यम् (६-१-१९७) । ञिदन्तस्य निदन्तस्य चादिरुदात्तः स्यात् । 'यस्मिन्विश्वानि पौंस्या' । पुंसः कर्मणि ब्राह्मणादित्वात्ष्यञ् । 'सुतेदधिष्व नश्चनः' । चायतेरसुन् । 'चायेरन्ने ह्रस्वश्च' (उणा) इति चकारादसुनो नुडागमश्च ॥ ३६८७ । पथिमथोः सर्वनामस्थाने (६-१-१९९) । आदिरुदात्तः स्यात् । अयं पन्थाः । 'सर्वनामस्थाने' किम् । 'ज्योतिष्मतः पथो रक्ष' । उदात्तनिवृत्तिस्वरेणान्तोदात्तं पदम् ॥ ३६८८ । अन्तश्च तवै युगपत् (६-१-२००) । तवैप्रत्ययान्तस्याद्यन्तौ युगपदाद्युदात्तौ स्तः । 'हर्षसे दातवा उ' ॥ ३६८९ । क्षयो निवासे (६-१-२०१) । आद्युदात्तः स्यात् । 'स्वे क्षेये शुचिव्रत' एरजन्तः ॥ ३६९० । जयः करणम् । (६-१-२०२) । करणवाची जयशब्दः आद्युदात्तः स्यात् । जयत्यनेन जयोऽश्वः ॥ ३६९१ । वृषादीनां च (६-१-२०३) । आदिरुदात्तः । आकृतिगणोऽयम् । 'वाजेभिर्वाजिनीवति इन्द्रं वाणीः' ॥ ३६९२ । संज्ञायामुपमानम् (६-१ २०४) । उपमानशब्दः संज्ञायामाद्युदात्तः । चञ्चेव चञ्चा कनोऽल लुप् । एतदेव ज्ञापयति 'क्वचित्स्वरविधौ प्रत्ययलक्षणं न' इति । 'संज्ञायाम्' किम् । अग्निर्माणवकः । 'उपमानम्' किम् । चैत्रः ॥ ३६९३ । निष्ठा च द्व्यजनात् । (६-१-२०५) । निष्ठान्तस्य द्व्यचः संज्ञायामादिरुदात्तो न त्वाकारः । दत्तः । 'द्व्यचः' किम् । चिन्तितः । 'अनात्' किम् । त्रातः । 'संज्ञायाम् इत्यनुवृत्तेर्नेह । कृतम् । हृतम् ॥ ३६९४ । शुष्कधृष्टौ (६-१-२०६) । एतावाद्युदात्तौ स्तः । असंज्ञार्थमिदम् । 'अतसं न शुष्कम्' ॥ ३६९५ । आशितः कर्ता (६-१-२०७) । कर्तृवाच्याशितशब्द आद्यु-दात्तः । 'कृषन्नित्फालु आशितम्' । ३६९६ । रिक्ते विभाषा (६-१-२०८) । रिक्तशब्दे वादिरुदात्तः । रिक्तः । संज्ञायां तु 'निष्ठा च द्व्यजनात्' (सू ३६९३) इति नित्यमाद्युदात्तत्वं पूर्वविप्रतिषेधेन ॥ ३६९७ । जुष्टार्पिते च च्छन्दसि (६-१ २०९) । आद्युदात्ते वा स्तः ॥ ३६९८ । नित्यं मन्त्रे (६-१-२१०) । एतत्सूत्रं शक्यमकर्तुम् । 'जुष्टो दमूनाः' । 'षळ्र आहुरार्पितम्' इत्यादेः पूर्वेणैव सिद्धेः छन्दसि पाठस्य व्यवस्थिततया विपरीतापादनायोगात् । 'अर्पिताः षष्टिर्न चलाचलासः' इत्यत्रान्तोदात्तदर्शनाच्च ॥ ३६९९ । युष्मदस्मदोर्ङसि (६-१-२११) । आदिरुदात्तः स्यात् । 'न हि षस्तव नो मम' ॥ ३७०० । ङयि च (६-१-२१२) 'तुभ्यं हिन्वानः' । 'मह्यं वातः पवताम्' ॥ ३७०१ । यतोऽनावः (६-१-२१३) । यत्प्रत्य-यान्तस्य द्व्यच आदिरुदात्तः नावं विना । 'युञ्जन्त्यस्य काम्या' । कर्मेर्णिङन्तादचो यत् । 'अनावः' किम् । 'नवतिं नाव्यानाम्' ॥ ३७०२ । ईडवन्दवृशंसदुहां ण्यतः (६-१-२१४) । एषां ण्यदन्तानामादिरुदात्तः । 'ईड्यो नूतनैरुत' । आजुह्वान ईड्यो वन्द्यश्च' । 'श्रेष्ठं नो धेहि वार्यम्' । 'उक्थमिन्द्राय शंस्यम्' ॥ ३७०३ । विभाषा वेण्विन्धानयोः (६-१-२१५) । आदि-रुदात्तो वा । 'आग्नेयोवैवेणुः' 'इन्धानो अग्निम्' ॥ ३७०४ । त्यागरागहासकुहश्वठकथानाम् (६-१-२१६) । आदिरुदात्तो वा । आद्यात्त्रयो घञन्ताः । त्रयः पचाद्यजन्ताः ॥ ३७०५ ।

मतोः पूर्वमात्सञ्ज्ञायां स्त्रियाम् (६-१-२१९) मतोः पूर्वमाकार उदात्तः स्त्रीनाम्नि । उदुम्बरावती । शरावती ॥ ३७०६ । अन्तोऽवत्याः (६-१-२२०) । अवतीशब्दस्यान्त उदात्तः । वेत्रवती । ङीपः पित्त्वादनुदात्तत्वं प्राप्तम् ॥ ३७०७ । ईवत्याः (६-१-२२१) । ईवत्यन्तस्यापि प्राग्वत् । अहीवती । मुनीवती ॥

अथ फिट्सूत्राणि ।

१. 'फिषोऽन्त उदात्तः' । प्रातिपदिकं फिट् । तस्यान्त उदात्तः स्यात् । उच्चैः ॥ २. 'पाटलापालङ्काम्बासागरार्थानाम्' । एतदर्थानामन्त उदात्तः । 'पाटला' 'फलेरुहा' 'सुरूपा' 'पाकला' इति पर्यायाः । 'लघावन्ते–' इति प्राप्ते । 'अपालङ्क' 'व्याधिघात' 'आरेवत' 'आरग्वध, इति पर्यायाः । अम्बार्थः । माता । 'उनर्वन्नन्तानाम्' इत्याद्युदात्तत्वे प्राप्ते । सागरः । समुद्रः ॥ ३. 'गेहार्थानामस्त्रियाम्' । गेहम् । 'नब्विषयस्य–' इति प्राप्ते । 'अस्त्रियाम्' किम् । शाला । आद्युदात्तोऽयम् । इहैव पर्युदासाज्ज्ञापकात् ॥ ४. 'गुदस्य च' । अन्त उदात्तः स्यान्न तु स्त्रियाम् । गुदम् । 'अस्त्रियाम्' किम् 'आन्त्रेभ्यस्ते गुदाभ्यः' । 'स्वाङ्गशिटामदन्तानाम्' इत्यन्तरङ्गमाद्युदात्तत्वम् । ततष्टाप् ॥ ५. 'ध्यपूर्वस्य स्त्रीविषयस्य' । धकारयकारपूर्वो योऽन्योऽच्स उदात्तः । अन्तर्धा । 'स्त्रीविषयवर्ण–' इति प्राप्ते । छाया । माया । जाया । 'यान्तस्यान्यात्पूर्वम्' इत्याद्युदात्तत्वे प्राप्ते । 'स्त्री' इति किम् । बाह्यम् । यञन्तत्वादाद्युदात्तत्वम् । 'विषयग्रहणम्' किम् । इभ्या । क्षत्रिया । 'यतोऽनावः' (सू ३७०१) इत्याद्युदात्त इभ्यशब्दः । क्षत्रियशब्दस्तु 'यान्तस्यान्यात्पूर्वम्' इति मध्योदात्तः । ६ 'खान्तस्यादेः' । नखम् । उखा । सुखम् । दुःखम् । नखस्य 'स्वाङ्गशिटाम्–' इत्याद्युदात्तत्वे प्राप्ते । उखा नाम भाण्डविशेषः । तस्य कृत्रिमत्वात् 'खय्युवर्णे कृत्रिमाख्या चेत्' इत्युवर्णस्योदात्तत्वे प्राप्ते । सुखदुःखयोः 'नब्विषयस्य–' इति प्राप्ते । 'अश्मादेः' किम् । शिखा । मुखम् । मुखस्य 'स्वाङ्गशिटाम्–' इति 'नब्विषयस्य' इति वा आद्युदात्तत्वम् । शिखायास्तु 'शीङः खो निङ्स्वश्च' इत्युणादिषु नित्त्वोक्तेरन्तरङ्गत्वाट्टापः प्रागेव 'स्वाङ्गशिटाम्–' इति वा बोध्यम् ॥ ७. 'बंहिष्ठवत्सरतिशत्थान्तानाम्' । एषामन्त उदात्तः स्यात् । अतिशयेन बहुलो बंहिष्ठः । नित्त्वादाद्युदात्तत्वे प्राप्ते । 'बंहिष्ठैरश्वैः सुवृता रथेन' । 'यद्बंहिष्ठं नातिविधे' इत्यादौ व्यत्ययादाद्युदात्तः । संवत्सरः । अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यत इत्याहुः । सप्ततिः । अशीतिः । 'लघावन्ते–' इति प्राप्ते । चत्वारिंशत् । इहापि प्राग्वत् । 'अभ्यूर्णवाना प्रभृथस्यायोः' । अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यत इत्याहुः । थाथादिसूत्रेण गतार्थमेतत् ॥ ८. 'दक्षिणस्य साधौ' । अन्त उदात्तः स्यात् । साधुवाचित्वाभावे तु व्यवस्थायां सर्वनामतया 'स्वाङ्गशिटाम्–' इत्याद्युदात्तः । अर्थान्तरे तु 'लघावन्ते–' इति गुरुरुदात्तः । 'दक्षिणः सरलोदारपरच्छन्दानुवर्तिषु' इति कोशः ॥ ९. 'स्वाङ्गाख्यायामादिर्वा' । इह दक्षिणस्याद्यन्तौ पर्यायेणोदात्तौ स्तः । दक्षिणो बाहुः । 'आख्याग्रहणम्' किम् । प्रत्यङ्मुखस्यासीनस्य वामपाणिर्दक्षिणो भवति ॥ १०. 'छन्दसि च' । अस्वाङ्गार्थमिदम् ।

दक्षिणः। इह पर्यायेणाद्यन्ताद्युदात्तौ ॥ ११. 'कृष्णस्यामृगाख्या चेत्'। अन्त उदात्तः। 'वर्णानां तण–' इत्याद्युदात्तत्वे प्राप्ते अन्तोदात्तो विधीयते। कृष्णानां व्रीहीणां। 'कृष्णो नोनाव वृषभः'। मृगाख्यायां तु। कृष्णो रात्र्यै ॥ १२. 'वा नामधेयस्य'। कृष्णस्येत्येव। 'अयं वां कृष्णो अश्विना'। कृष्णर्षिः ॥ १३. 'शुक्लगौरयोरादिः'। नित्यमुदात्तः स्यादित्येके। वेत्यनुवर्तत इति तु युक्तम्। 'सरो गौरो यथापि वा' इत्यन्तोदात्तदर्शनात् ॥ १४. 'अङ्गुष्ठोदकबकवशानां छन्दस्यन्तः'। अङ्गुष्ठस्य 'स्वाङ्गानामकुर्वादीनाम्' इति द्वितीयस्योदात्तत्वे प्राप्तेऽन्तोदात्तार्थ आरम्भः। वशाग्रहणं नियमार्थं छन्दस्येवेति। तेन लोक आद्युदात्ततेत्याहुः। १५. 'पृष्ठस्य च' छन्दस्यन्त उदात्तः स्याद्वा भाषायाम्। पृष्ठम्। १६. 'अर्जुनस्य तृणाख्या चेत्'। 'उनर्वन्नन्तानाम्' इत्याद्युदात्तस्यापवादः ॥ १७. 'आर्यस्य स्वाम्याख्या चेत्'। 'यान्तस्यान्त्यात्पूर्वम्' इति 'यतोऽनावः' (सू ३७०१) इति वाद्युदात्ते प्राप्ते वचनम् ॥ १८. आशाया अदिगाख्या चेत्'। दिगाख्याव्यावृत्त्यर्थमिदम्। अत एव ज्ञापकाद्दिक्पर्यायस्याद्युदात्तता। 'इन्द्र आशाभ्य-स्परि' ॥ १९। 'नक्षत्राणामब्विषयाणाम्'। अन्त उदात्तः स्यात्। आश्लेषानुराधादीनां 'लघावन्ते–' इति प्राप्ते ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नन्तत्वेनाद्युदात्ते प्राप्ते वचनम् ॥ २०. 'न कुपूर्वस्य कृत्तिकाख्या चेत्'। अन्त उदात्तो न। कृत्तिका नक्षत्रम्। केचित्तु कुपूर्वो य आप्त-द्विषयाणामिति व्याख्याय 'आर्यिका' 'बहुलिका' इत्यत्राप्यन्तोदात्तो नेत्याहुः॥ २१. घृतादीनां च'। अन्त उदात्तः। 'घृतं मिमिक्षे'। आकृतिगणोऽयम् ॥ २२. 'ज्येष्ठकनिष्ठयोर्वयसि'। अन्त उदात्तः स्यात्। 'ज्येष्ठ आह चमसा'। 'कनिष्ठ आह चतुरः'। 'वयसि' किम्। ज्येष्ठः श्रेष्ठः। कनिष्ठोऽल्पिकः। इह नित्त्वादाद्युदात्त एव ॥ २३. 'बिल्वतिष्ययोः स्वरितो वा'। अनयोरन्तः स्वरितो वा स्यात्। पक्ष उदात्तः ॥

इति फिट्सूत्रेषु प्रथमः पादः।

२४. 'अथादिः प्राक् शकटेः'। अधिकारोऽयम्। 'शकटिशकव्योः–' इति यावत्। २५. 'ह्रस्वान्तस्य स्त्रीविषयस्य'। आदिरुदात्तः स्यात्। बलिः। तनुः ॥ २६. 'नब्विषयस्या-निसन्तस्य'। 'वृने न वा यः'। इसन्तस्य तु सर्पिः। नञ्पुंसकम् ॥ २७. 'तृणधान्यानां च द्व्यषाम्'। द्व्यचामित्यर्थः। कुशाः। काशाः। माषाः। तिलाः। बह्वचां तु गोधूमाः। २८. 'न्रः सङ्ख्यायाः'। पञ्च। चत्वारः। २९. 'स्वाङ्गशिटामदन्तानाम्'। शिट् सर्वनाम। 'कर्णाभ्यां चुचुक्रादधि'। 'ओष्ठाविव मधु'। 'विश्वो विहाय'॥ ३०. 'प्राणिनां कुपूर्वम्'। कवर्गात्पूर्वं आदिरुदात्तः। काकः। बृकः। 'शुकेषु मे'। 'प्राणिनाम्' किम्। 'क्षीरं सर्पि-र्मधूदकम्'। कुपूर्वङ्किम् धनुः ॥ ३१. 'खय्युवर्णं कृत्रिमाख्या चेत्'। खयि पर उवर्णमुदात्तं स्यात्। कन्दुकः ॥ ३२. 'उनर्वन्नन्तानाम्'। उन। 'वरुणं वो रिशादसम्'। ऋ। 'स्वसारं त्वा कृणवै'। वन्। 'पीवानं मेषम्' ॥ ३३. 'वर्णानां तणतिनितान्तानाम्'। आदिरुदात्तः। एतः। हरिणः। शितिः। पृश्निः। हरित् ॥ ३४. 'ह्रस्वान्तस्य ह्रस्वमनृताच्छील्ये'। ऋद्भर्जे ह्रस्वान्तस्यादिभूतं ह्रस्वमुदात्तं स्यात्। मुनिः ॥ ३५. 'अक्षस्यादेवनस्य'। आदिरुदात्तः। 'तस्य नाक्षैः'। देवने तु। 'अक्षैर्मा दीव्यः' ॥ ३६. 'अर्धस्यासमद्योतने'। अर्धो ग्रामस्य। समेऽशके तु अर्धं पिप्पल्याः ॥ ३७. 'पीतद्रुर्थानाम्'। आदिरुदात्तः। पीतद्रुः सरलः ॥

३८. 'प्रामादीनां च' । प्रामः । सोमः । यामः ॥ ३९. 'लुबन्तस्योपमेयनामधेयस्य' । चञ्चेव चञ्चा । 'रिफगन्तस्य' इति पाठान्तरम् । स्फिगिति लुपः प्राचां संज्ञा ॥ ४०. 'न वृक्षपर्वतविशेषव्याघ्रसिंहमहिषाणाम्' । एषामुपमेयनाम्नामादिरुदात्तो न । ताल इव तालः । मेरुरिव मेरुः । व्याघ्रः । सिंहः । महिषः ॥ ४१. 'राजविशेषस्य यमन्वा चेत्' । यमन्वा वृद्धः । आङ्गमुदाहरणम् । आङ्गाः प्रत्युदाहरणम् ॥ ४२. 'लघावन्ते द्वयोश्च बह्वृषो गुरुः' । अन्ते लघौ द्वयोश्च लघ्वोः सतोर्बह्वृच्कस्य गुरुरुदात्तः । कल्याणः । कोलाहलः ॥ ४३. 'स्त्रीविषयवर्णाक्षुपूर्वाणाम्' । एषां त्रयाणामाद्युदात्तः । स्त्रीविषयम् । मल्लिका । वर्णः । श्येनी । हरिणी । अक्षुशब्दात्पूर्वोऽस्त्येषां त अक्षुपूर्वाः । तरक्षुः ॥ ४४. 'शकुनीनां च लघु पूर्वम्' । पूर्वं लघु उदात्तं स्यात् । कुक्कुटः । तित्तिरिः ॥ ४५. 'नर्तुप्राण्याख्यायाम्' । यथालक्षणं प्राप्तमुदात्तत्वं न । वसन्तः । कृकलासः ॥ ४६. 'धान्यानां च वृद्धक्षान्तानाम्' । आदिरुदात्तः । कान्तानाम् । श्यामाकाः । षान्तानाम् । राजमाषाः ॥ ४७. 'जनपदशब्दानामषान्तानाम्' । आदिरुदात्तः । केकयः । यान्तस्यान्त्यात् पूर्वमिति प्राप्ते ॥ ४८. 'हयादीनामसंयुक्तलान्तानामन्तः पूर्वं वा' । हयिति हल्संज्ञा । पललम् । शललम् । 'हयादीनाम्' किम् । एकलः । 'असंयुक्त–' इति किम् । मल्लः ॥ ४९. 'इगन्तानां च व्यषाम्' । आदिरुदात्तः । कृषिः ॥

इति फिट्सूत्रेषु द्वितीयः पादः ।

५०. 'अथ द्वितीयं प्रागीषात्' । 'ईषान्तस्य हलादेः–' इत्यतः प्राग्द्वितीयाधिकारः ॥ ५१. 'त्र्यचां प्राङ्मकरात्' । 'मकरवरूध–' इत्यतः प्राक्त्र्यचामित्यधिकारः ॥ ५२. 'स्वाङ्गानामकुर्वादीनाम्' । कवर्गरेफवकारादीनि वर्जयित्वा त्र्यचां स्वाङ्गानां द्वितीयमुदात्तम् । ललाटम् । कुर्वादीनां तु । कपोलः । रसना । वदनम् ॥ ५३. 'मादीनां च' । मलयः । मकरः ॥ ५४. 'शादीनां शाकानाम्' । शीतन्या । शतपुष्पा ॥ ५५. 'पान्तानां गुर्वादीनाम्' । पादपः । आतपः । लघ्वादीनां तु । अनूपम् । द्व्यचां तु । नीपम् ॥ ५६. 'युतान्यण्यन्तानाम्' । युत । अयुतम् । अनि । धर्मनिः । अणि । विपणिः । ५७. 'मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्टाकार्शीनामादिर्वा' । एषामादिर्द्वितीयो वोदात्तः । मकरः । वरूढ इत्यादि ॥ ५८. 'छन्दसि च' । अमकराद्यर्थ आरम्भः । लक्ष्यानुसारादादिर्द्वितीयं चोदात्तं ज्ञेयम् ॥ ५९. 'कर्दमादीनां च' । आदिर्द्वितीयो वोदात्तः ॥ ६०. 'सुगन्धितेजनस्य ते वा' । आदिर्द्वितीयः तेशब्दश्चेति त्रयः पर्यायेणोदात्ताः । सुगन्धितेजनाः ॥ ६१. 'नपः फलान्तानाम्' आदिर्द्वितीयं वोदात्तम् । राजादनफलम् ॥ ६२. 'यान्तस्यान्त्यात्पूर्वम्' । कुलायः । तलयः । वलयः ॥ ६३. 'थान्तस्य च नालघुनी' । नाशब्दो लघु च उदात्ते स्तः । सनाथा सभा ॥ ६४. 'शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूरवसां च' । अन्त्यात्पूर्वमुदात्तं द्वितीयं वा ॥ ६५. साङ्काश्यकाम्पिल्यनासिक्यदार्वाघाटानाम्' । द्वितीयमुदात्तं वा ॥ ६६. 'ईषान्तस्य हयादेरादिर्वा' हलीषा । लाङ्गलीषा ॥ ६७. 'उशीरदाशेरकपालपलालशैवालश्यामाकशारीरशरावहृदयहिरण्यारण्यापत्यदेवराणाम्' । एषामादिरुदात्तः स्यात् । ६८. 'महिष्याषाढयोर्जायेष्टकाख्या चेत्' । आदिरुदात्तः । महिषी जाया । आषाढा उपदधाति ॥

इति फिट्सूत्रेषु तृतीयः पादः ।

६९. 'शकटिशकट्योरक्षरमक्षरं पर्यायेण' । उदात्तम् । शकटिः–शकटी ॥ ७०. 'गोष्ठजस्य ब्राह्मणनामधेयस्य' । अक्षरमक्षरं पर्यायेणोदात्तम् । गोष्ठजो ब्राह्मणः । अन्यत्र गोष्ठजः पशुः । कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः ॥ ७१. 'पारावतस्योपोत्तमवर्जम्' । शेषं क्रमेणोदात्तम् । पारावतः ॥ ७२. 'धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थानाम्' । एषां चतुर्णां धूम्रभृतींश्चतुरो वर्जयित्वा शिष्टानि क्रमेणोदात्तानि । धूम्रजानुः । मुञ्जकेशः । कालवालः । स्थालीपाकः ॥ ७३. 'कपिकेशहरिकेशयोश्छन्दसि' । कपिकेशः । हरिकेशः ॥ ७४. 'न्यङ्स्वरौ स्वरितौ' । स्पष्टम् । न्यङुत्तानः । 'व्यचक्षयुत्स्वः' ॥ ७५. 'न्यर्बुदव्यल्कशयोरादिः' । स्वरितः स्यात् । न्यर्बुदाय स्वाहा । पाकदूर्वा व्यल्कशा ॥ ७६. 'तिल्यशिक्यमत्स्यकार्ष्मर्यधान्यकन्याराजन्यमनुष्याणामन्तः' । स्वरितः स्यात् । तिलानां भवनं क्षेत्रं तिल्यम् । वैश्वानर्या शिक्यमादत्ते । प्रभिन्नायमत्स्यमन्व्यास्यति । वज्रः कार्ष्मर्यावैत्रेण । 'यतोऽनावः' (सू ३७०१) इति प्राप्ते । कार्ष्मर्यमुपयाति । धान्यमसिधिनुहि । मावीरवीकन्या । राजन्यो वज्रस्य रूपम् । प्रतीचीं मनुष्याः ॥ ७७. 'बिल्वभक्ष्यवार्याणि छन्दसि' । अन्तस्वरितानि । ततो बिल्व उदतिष्ठत् । बलं विरुजवीर्यम् ॥ ७८. 'त्वत्त्वसमसिमेत्यनुच्चानि' । 'स्तरीरसि त्वत्' 'उत त्वः पश्यन्' । 'नर्भन्तामन्यके समे' । 'सिमस्मै' ॥ ७९. 'सिमस्यार्थवर्णेऽन्त उदात्तः' । अथर्वण इति प्रायिकम् । तत्र दृष्टस्येत्येवंपरं वा । तेन 'वासस्तनुते सिमस्मै' इत्यृग्वेदेऽपि भवत्येव ॥ ८०. 'निपाता आद्युदात्ताः' । स्वाहा ॥ ८१. 'उपसर्गाश्चाभिवर्जम्' ॥ ८२. 'एवादीनामन्तः' । एवमादीनामिति पाठान्तरम् । एव । एवम् । नूनम् । सह । 'सह ते पुत्र सूरिभिः' । षष्ठस्य तृतीये 'सहस्य सः–' (सू १००९) इति प्रकरणे सहशब्द आद्युदात्त इति तु प्राञ्चः । तच्चिन्त्यम् ॥ ८३. 'वाचादीनामुभावुदात्तौ' । उभौग्रहणमनुदात्तं पदमेकवर्जमित्यस्य बाधाय ॥ ८४. 'चादयोऽनुदात्ताः' । स्पष्टम् ॥ ८५. 'यथेति पादान्ते' । 'तं नेमिमृभवो यथा' । 'पादान्ते' किम् । 'यथानो अदितिः करत्' ॥ ८६. 'प्रकारादिद्विरुक्तौ' । परस्यान्त उदात्तः । पटुपटुः ॥ ८७. 'शेषं सर्वमनुदात्तम्' । शेषमित्यादिद्विरुक्तस्य परमित्यर्थः । प्रप्रायम् । दिवेदिवे ॥

इति फिट्सूत्रेषु तुरीयः पादः ।

३७०८ । आद्युदात्तश्च (३-१-३) । प्रत्यय आद्युदात्त एव स्यात् । अग्निः । कर्तव्यम् । ३७०९ । अनुदात्तौ सुप्पितौ (३-१-४) । पूर्वस्यापवादः । यज्ञस्य । न यो युच्छति । शप्तिपोरनुदात्तत्वे स्वरितप्रचयौ ॥ ३७१० । चितः (६-१-१६३) । अन्त उदात्तः स्यात् । 'चितः सप्रकृतेर्बह्वकजर्थम्' (वा ३७४९) चिति प्रत्यये सति प्रकृतिप्रत्ययसमुदायस्यान्त उदात्तो वाच्य इत्यर्थः । बहुपटुः । 'नर्भन्तामन्यके समे' । 'यके सरस्वतीम्' । 'तुकत्सुते' ॥ ३७११ । तद्धितस्य (६-१-१६४) । चितस्तद्धितस्यान्त उदात्तः । पूर्वेण सिद्धे चित्स्वरबाधनार्थमिदम् । कौञ्जायनाः ॥ ३७१२ । कितः (६-१-१६५) । कितस्तद्धितस्यान्त उदात्तः । 'यदाग्नेयः' ॥ ३७१३ । तिसृभ्यो जसः (६-१-१६६) । अन्त उदात्तः । 'तिस्रो द्यावः सवितुः' ॥ ३७१४ । सावेकाचस्तृतीयादिर्विभक्तिः (६-१-१६८) । सावितीति सप्तमीबहुवचनम् । तत्र य एकाच्ततः परा तृतीयादिर्विभक्तिरुदात्ता । 'वाचा विरूपः' । 'सौ' किम् । राज्ञेत्यादौ एकाचोऽपि

राजशब्दात्परस्य मा भूत् । 'राजो नु ते' । 'एकाचः' किम् । विधते राजनि त्वे' । 'तृतीयादिः' किम् । 'न ददर्श वाचम्' ॥ ३७१५ । अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे (६-१-१६९) । नित्याधिकारविहितसमासादन्यत्र यदुत्तरपदमन्तोदात्तमेकाच्ततः परा तृतीयादिविभक्तिरन्तोदात्ता वा स्यात् । परमवाचा ॥ ३७१६ । अञ्चेश्छन्दस्यसर्वनामस्थानम् (६-१-१७०) अञ्चेः परा विभक्तिरुदात्ता । 'इन्द्रो दधीचः' । चाविति पूर्वपदान्तोदात्तत्वं प्राप्तम् । तृतीयादिरित्यनुवर्तमानेऽसर्वनामस्थानग्रहणं शस्परिग्रहार्थम् । 'प्रतीचो बाहून्' ॥ ३७१७ । ऊडिदंपदाद्यप्पुम्रैद्युभ्यः (६-१-१७१) । 'ऊठ्' 'इदं' 'पदादि' 'अप्' 'पुम्' 'रै–' 'दिव्' इत्येभ्योऽसर्वनामस्थानविभक्तिरुदात्ता ऊठ् । प्रष्ठौहः । प्रष्ठौहा । 'ऊठ्युपधाग्रहणं कर्तव्यम्' (वा ३७५७) । इह मा भूत् । 'अक्षद्युवा' । अक्षद्युवे । इदम् । एभिर्नृभिर्नृतमः । अन्वादेशे न । 'अन्तोदात्तात्' इत्यनुवृत्तेः । न च तत्रान्तोदात्तताप्यस्तीति वाच्यम् । 'इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ' (सू ३५०) इति सूत्रेणानुदात्तस्याशो विधानात् । 'प्र ते बभ्रू' । 'माभ्यां गा अनु' । 'पद्दन्नोमास्हृन्निश् ' (सू २२८) इति पदादयः । 'पद्भ्यां भूमिः' । 'दृद्भिर्न जिह्वा' । 'जायेते मासिमासि' । 'मनश्चिन्मे हृद आ' । अप् । 'अपां फेनेन' । पुम् । 'अभ्रातेव पुंसः' । रै । 'राया वयम्' । 'रायो धर्ता' । दिव् । 'दिवे दिवे' ॥ ३७१८ । अष्टनो दीर्घात् (६-१-१७२) । शसादिर्विभक्तिरुदात्ता । 'अष्टाभिर्दशभिः ॥ ३७१९ ॥ शतुरनुमो नद्यजादी (६-१-१७३) । अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नद्यजादिश्च शसादिर्विभक्तिरुदात्ता स्यात् । 'अच्छा रवं प्रथमा जानती' । कृण्वते । 'अन्तोदात्तात्' किम् । दधती । 'अभ्यस्तानामादिः' (सू ३६७३) इत्यायुदात्तः । 'अनुमः' किम् । तुदन्ती । एकादेशोऽत्र उदात्तः । अदुपदेशात्परत्वाच्छतुः '–लसार्वधातुकम्–' (सू ३७३०) इति निघातः ॥ ३७२० । उदात्तयणो हल्पूर्वात् (६-१-१७४) । उदात्तस्थाने यो यण्हल्पूर्वस्तस्मात्परा नदी शसादिर्विभक्तिश्च उदात्ता स्यात् । 'चोदयित्री सूनृतानाम्' । 'एषां नेत्री' । 'ऋतं देवाय कृण्वते सवित्रे' ॥ ३७२१ । नोर्ध्वात्वोः (६-१ १७५) । अनयोर्यणः परे शसादय उदात्ता न स्युः । ब्रह्मवन्ध्वा । 'सित्पृश्निः सुभ्वे' ॥ ३७२२ । ह्रस्वनुड्भ्यां मतुप् (६-१-१७६) । ह्रस्वान्तादन्तोदात्तान्नुटश्च परो मतुबुदात्तः । 'यो अब्दिमाँ उदनिमाँ इयर्ति' । 'अक्षण्वन्तः कर्णवन्तः सखायः' । 'अन्तोदात्तात्' किम् । 'मा त्वा विददिषुमान्' । 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इत्येतदत्र न । 'मरुत्वं इन्द्र' । 'नियुत्वान्वा यवागहि' । 'रेशब्दाच्च' (वा ३७६३) 'रेवाँ इद्रेवतः' ॥ ३७२३ । नामन्यतरस्याम् (६-१-१७७) । मतुपि यो ह्रस्वस्तदन्तादन्तोदात्तात्परो नामुदात्तो वा । 'चेतन्ती सुमतीनाम्' ॥ ३७२४ । ङ्याश्छन्दसि बहुलम् (६-१-१७८) । ङ्याः परो नामुदात्तो वा । 'देवसेनानामभिभञ्जतीनाम्' । वेत्युक्तेर्नेह । 'जयन्तीनां मरुतो यन्तु' ॥ ३७२५ । षट्त्रिचतुर्भ्यो हलादिः (६-१-१७९) । एभ्यो हलादिर्विभक्तिरुदात्ता । 'आषड्भिर्हूयमानः' । 'त्रिभिर्ह्व देव' ॥ ३७२६ । न गोश्वन्साववर्णराडङ्कुङ्कृद्भ्यः (६-१-१८२) । एभ्यः प्रागुक्तं न । 'गवां शता' । 'गोभ्यो गातुः' । 'शुनश्चिच्छेपम्' । सौ प्रथमैकवचनेऽवर्णान्तात् । 'तेभ्यो द्युम्नम्' । 'तेषां पाहि श्रुधी हवम्' ॥ ३७२७ । दिवो झल् (६-१-१८३) । दिवः परा झलादिर्विभक्तिर्नोदात्ता ।

'द्युभिरक्तुभिः'। 'झल्' इति किम्। 'उप त्वाग्ने दिवेदिवे' ॥ ३७२८। नृ चान्यतरस्याम् (६ १ १८४)। नुः परा झलादिर्विभक्तिर्वोदात्ता। 'नृभिर्यमानः' ॥ ३७२९। तित्स्वरितम् (६-१ १८५)। निगदव्याख्यातम्। 'क्रं नूनम्' ॥ ३७३०। ताभ्यनुदात्तेन्डिददुपदेशाल्लसार्वधातुकमनुदात्तमहन्विडोः (६-१ १८६)। अस्मात्परं लसार्वधातुकमनुदात्तं स्यात्। तासि। कर्ता। कर्तारौ। कर्तारः। प्रत्ययस्वरापवादोऽयम्। अनुदात्तेत्। य आस्ते। ङितः। 'अभि चष्टे अनृतेभिः'। अदुपदेशात्। 'पुरुभुजा चनस्यतम्'। चित्स्वरोऽप्यनेन बाध्यते। 'वर्धमानं स्वे दमे'। 'तास्यादिभ्यः' किम्। 'अभि वर्धे गृणीतः'। उपदेशग्रहणान्नेह। 'हतो वृत्राण्यार्या'। 'लग्रहणम्' किम्। 'कर्तीह निघ्नानाः'। 'सार्वधातुकम्' किम्। शिश्ये। 'अहन्विडोः' किम्। हुते। यदधीते। 'विदीन्धिखिदिभ्यो नेति वक्तव्यम्' (वा ३७४२)। 'इन्धे राजा'। एतच्च 'अनुदात्तस्य च यत्र–' (सू ३६५१) इति सूत्रे भाष्ये स्थितम् ॥ ३७३१। आदिः सिचोऽन्यतरस्याम् (६ १-१८७)। सिजन्तस्यादिरुदात्तो वा 'यासिष्ट वर्तिर्यश्विनौ' ॥ ३७३२। थलि च सेटीडन्तो वा (६-१-१९६)। सेटि थलन्ते पदे इडुदात्तः अन्तो वा आदिर्वा स्यात्। यदा नैते त्रयस्तदा 'लिति' (सू ३६७६) इति प्रत्ययात्पूर्वमुदात्तम्। लुलविथ अत्र चत्वारोऽपि पर्यायेणोदात्ताः ॥ ३७३३। उपोत्तमं रिति (६-१-२१७)। रित्प्रत्ययान्तस्योपोत्तममुदात्तं स्यात्। 'यदाहनीयं' ॥

इति प्रत्ययस्वराः।

३७३४। समासस्य (६-१-२२३)। अन्त उदात्तः स्यात्। 'यज्ञश्रियम्' ॥ ३७३५। बहुव्रीहौ प्रकृत्या पूर्वपदम् (६ २-१)। उदात्तस्वरितयोगि पूर्वपदं प्रकृत्या स्यात्। 'सत्यश्चित्रश्रवस्तमः'। 'उदात्त–' इत्यादि किम्। सर्वानुदात्ते पूर्वपदे समासान्तोदात्तत्वमेव यथा स्यात्। समपादः ॥ ३७३६। तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः (६-२-२)। सप्तैते पूर्वपदभूतास्तत्पुरुषे प्रकृत्या। तुल्यश्वेतः सदृशश्वेतः– 'कृत्यतुल्याख्या अजात्या' (सू ७४९) इति तत्पुरुषः। किरिणा काणः किरिकाणः। 'पतयन्मन्दयत्सखम्'। मन्दयति मादके इन्द्रे सखेति सप्तमीतत्पुरुषः। शर्त्रायामा। 'अव्ययेऽनञ्कुनिपातानाम्' (वा ३८०८)। अयज्ञो वा एषः। 'परिगणनम्' किम्। स्नात्वाकालकः। मुहूर्तसुखम्। भोज्योष्णम् ॥ ३७३७। वर्णो वर्णेष्वनेते (६-२-३)। वर्णवाचिन्युत्तरपदे एतवर्जिते वर्णवाचि पूर्वपदं प्रकृत्या तत्पुरुषे। कृष्णसारङ्गः। लोहितकल्माषः। कृष्णशब्दो नञ्प्रत्ययान्तः। लोहितशब्द इतन्नन्तः। 'वर्णः' किम्। परमकृष्णः। 'वर्णेषु' किम्। कृष्णतिलाः। 'अनेते' किम्। कृष्णैतः ॥ ३७३८। गाधलवणयोः प्रमाणे (६-२-४)। एतयोरुत्तरपदयोः प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या स्यात्। अरित्रगाधमुदकम्। तत्प्रमाणमित्यर्थः। गोलवणम्। यावद्वचे दीयते तावदित्यर्थः। अरित्रशब्द इत्रन्नन्तो मध्योदात्तः। प्रमाणमियत्तापरिच्छेदमात्रं न पुनरायाम एव। 'प्रमाणे' किम्। परमगाधम् ॥ ३७३९। दायाद्यं दायादे (६-२-५)। तत्पुरुषे प्रकृत्या। धनदायादः। धनशब्दः क्युप्रत्ययान्तः प्रत्ययस्वरेणाद्युदात्तः। 'दायाद्यम्' किम्। परमदायादः ॥ ३७४०। प्रतिबन्धि चिरकृच्छ्रयोः (६-२-६) प्रतिबन्धवाचि पूर्वपदं प्रकृत्या एतयोः परतस्तत्पुरुषे। गमनचिरम्। व्याहरणकृच्छ्रम्।

गमनं कारणविकलतया चिरकालभावि कृच्छ्रयोगि वा प्रतिबन्धि जायते । 'प्रतिबन्धि' किम् । मूत्रकृच्छ्रम् ॥ ३७४१ । पदेऽपदेशे (६-२-७) । व्याजवाचिनि पदशब्द उत्तरपदे पूर्वपदं प्रकृत्या तत्पुरुषे । मूत्रपदेन प्रस्थितः । उच्चारपदेन । मूत्रशब्दो घञन्तः उच्चारशब्दो घञन्तः 'थाथ–' (सू ३८७८) आदिस्वरेणान्तोदात्तः । 'अपदेशे' किम् । विष्णुपदम् ॥ ३७४२ । निवाते वातत्राणे (६-२-८) । निवातशब्दे परे वातत्राणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या । कुटीनिवातम् । कुड्यनिवातम् । कुटीशब्दो गौरादिङीषन्तः । कुड्यशब्दो ड्यगन्तः । यगन्त इत्यन्ये । 'वातत्राणे' किम् । राजनिवाते वसति । निवातशब्दोऽयं रूढः पार्श्वे ॥ ३७४३ । शारदेऽनार्तवे (६-२-९) । ऋतौ भवमार्तवम् । तदन्यवाचिनि शारदशब्दे परे तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात् । रज्जुशारदमुदकम् । शारदशब्दो नूतनार्थः । तस्यास्वपदविग्रहः । 'रज्ज्वोः सद्य उद्भृतम्' । रज्जुशब्दः 'सृजेरसुन् च' (उणा १५) इत्यासुदात्तो व्युत्पादितः । 'अनार्तवे' किम् । उत्तमशारदम् ॥ ३७४४ । अध्वर्युकषाययोर्जातौ (६-२-१०) । एतयोः परतो जातिवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम् । कठाध्वर्युः । दौवारिककषायम् । कठशब्दः पचाद्यजन्तः । तस्मात् '–वैशम्पायनान्तेवासिभ्यश्च' (सू १४८४) इति णिनेः 'कठचरकाल्लुक्' (सू १४८७) । इति लुक् । द्वारि नियुक्त इति ठक्यन्तोदात्तो दौवारिकशब्दः । 'जातौ' किम् । परमाध्वर्युः ॥ ३७४५ । सदृशप्रतिरूपयोः सादृश्ये (६-२-११) । अनयोः पूर्वं प्रकृत्या । पितृसदृशः । पितृप्रतिरूपः । 'सादृश्ये' किम् । परमसदृशः । समासार्थोऽत्र पूज्यमानता न सादृश्यम् ॥ ३७४६ । द्विगौ प्रमाणे (६-२-१२) । द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम् । प्राच्यसप्तसमः । सप्त समाः प्रमाणमस्य । 'प्रमाणे लो द्विगोर्नित्यम्' (वा ३१२८–२९) इति मात्रचो लुक् । प्राच्यशब्द आद्युदात्तः । प्राच्यश्चासौ सप्तसमश्च प्राच्यसप्तसमः । 'द्विगौ' किम् । व्रीहिप्रस्थः । 'प्रमाणे' किम् । परमसप्तसमम् ॥ ३७४७ । गन्तव्यपण्यं वाणिजे । (६-२-१३) । वाणिजशब्दे परे तत्पुरुषे गन्तव्यवाचि पण्यवाचि च पूर्वपदं प्रकृतिस्वरम् । मद्रवाणिजः । गोवाणिजः । सप्तमीसमासः । मद्रशब्दो रक्प्रत्ययान्तः । 'गन्तव्य–' इति किम् । परमवाणिजः ॥ ३७४८ । मात्रोपज्ञोपक्रमच्छाये नपुंसके (६-२-१४) । मात्रादिषु परतो नपुंसकवाचिनि तत्पुरुषे तथा । भिक्षायास्तुल्यप्रमाणं भिक्षामात्रम् । भिक्षाशब्दो 'गुरोश्च हलः' (सू ३२८०) इत्यप्रत्ययान्तः । पाणिन्युपज्ञम् । पाणिनिशब्द आद्युदात्तः । नन्दोपक्रमम् । नन्दशब्दः पचाद्यजन्तः । इषुच्छायम् । इषुशब्द आद्युदात्तो नित्वात् । 'नपुंसके' किम् । कुड्यच्छाया ॥ ३७४९ । सुखप्रिययोर्हिते (६-२-१५) । एतयोः परयोर्हितवाचिनि तत्पुरुषे तथा । गमनप्रियम् । गमनसुखम् । गमनशब्दो लित्स्वरेण आद्युदात्तः । 'हिते' किम् । परमसुखम् ॥ ३७५० । प्रीतौ च (६-२-१६) । प्रीतौ गम्यायां प्रागुक्तम् । ब्राह्मणसुखं पायसम् । छात्रप्रियोऽनध्यायः । ब्राह्मणच्छात्रशब्दौ प्रत्ययस्वरेणान्तोदात्तौ । 'प्रीतौ' किम् । राजसुखम् ॥ ३७५१ । स्वं स्वामिनि (६-२-१७) । स्वामिशब्दे परे स्ववाचि पूर्वपदं तथा । गोस्वामी । 'स्वम्' किम् । परमस्वामी ॥ ३७५२ । पत्यावैश्वर्ये (६-२-१८) । 'दमूना गृहपतिर्दमे' ॥ ३७५३ । न भूवाक्चिद्दिधिषु (६-२-१९) । पतिशब्दे परे ऐश्वर्यवाचिनि तत्पुरुषे नैतानि प्रकृत्या । भुवः पतिर्भूपतिः ।

वाक्पतिः । चित्पतिः । दिधिषूपतिः ॥ ३७५४ । वा भुवनम् (६-२-२०) । उक्तविषये । भुवनपतिः । 'भूसूधूभ्रस्जिभ्यः–' (उणा०) इति क्युन्नन्तो भुवनशब्दः ॥ ३७५५ । आशङ्काबाधनेदीयस्सु संभावने (६ २-२१) । अस्तित्वाध्यवसायः संभावनम् । गमनाशङ्कमस्ति । गमनाबाधम् । गमननेदीयः । गमनमाशङ्कयत आबाध्यते निकटतरमिति वा संभाव्यते । 'संभावने' किम् । परमनेदीयः ॥ ३७५६ । पूर्वे भूतपूर्वे (३-२-२२) । आढ्यो भूतपूर्वः आढ्यपूर्वः । पूर्वशब्दो वृत्तिविषये भूतपूर्वे वर्तते । 'भूतपूर्वे' किम् । परमपूर्वः ॥ ३७५७ । सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये (६ २-२३) । एषु पूर्वं प्रकृत्या । मद्रसविधम् । गान्धारसनीडम् । काश्मीरसमर्यादम् मद्रसवेशम् । मद्रसदेशम् । 'सामीप्ये' किम् । सह मर्यादया समर्यादं क्षेत्रम् । चैत्रसमर्यादम् ॥ ३७५८ । विस्पष्टादीनि गुणवचनेषु (६-२-२४) विस्पष्टकटुकम् । विस्पष्टशब्दो 'गतिरनन्तरः' (सू ३७८३) इत्याद्युदात्तः । 'विस्पष्ट–' इति किम् । परमलवणम् । 'गुण–' इति किम् । विस्पष्टब्राह्मणः । विस्पष्ट । विचित्र । व्यक्त । संपन्न । पण्डित । कुशल । चपल । निपुण ॥ ३७५९ । श्रज्यावमकन्पापवत्सु भावे कर्मधारये । (६-२-२५) । 'श्र' 'ज्य' । 'अवम' 'कन्' इत्यादेशवति पापवाचिनि चोत्तरपदे भाववाचि पूर्वपदं प्रकृत्या । गमनश्रेष्ठम् । गमनज्यायः । गमनावमम् । गमनकनिष्ठम् । गमनपापिष्ठम् । 'श्र–' 'इत्यादि' किम् । गमनशोभनम् । 'भावे' किम् । गम्यतेऽनेनेति गमनम्, गमनं श्रेयो गमनश्रेयः । 'कर्म–' इति किम् । षष्ठीसमासे मा भूत् ॥ ३७६० । कुमारश्च (६-२-२६) । कर्मधारये । कुमारश्रमणा । कुमारशब्दोऽन्तोदात्तः ॥ ३७६१ । आदिः प्रत्येनसि । (६-२-२७) । कुमारस्यादिरुदात्तः प्रत्येनसि परे कर्मधारये । प्रतिगतमेनोऽस्य प्रत्येनाः । कुमारप्रत्येनाः ॥ ३७६२ । पूगेष्वन्यतरस्याम् (६-२-२८) । पूगा गणास्तेषूक्तं वा । कुमारचातकाः । कुमारजीमूताः । आद्युदात्तत्वाभावे 'कुमारश्च' (सू ३७६०) इत्येव भवति ॥ ३७६३ । इगन्तकालकपालभगालशरावेषु द्विगौ (६-२-२९) । एषु परेषु पूर्वं प्रकृत्या । पञ्चारत्नयः प्रमाणमस्य पञ्चारत्निः । दश मासान्भूतो दशमास्यः । पञ्च मासान्भूतः । पञ्चमास्यः । 'तमधीष्टो–' (वा १७४४) इत्यधिकारे 'द्विगोर्यप्, (वा १७४६) । पञ्चकपालः । पञ्चभगालः । पञ्चशरावः । 'त्र· संख्यायाः' (फि० २८) इति पञ्चञ्छब्दः, आद्युदात्तः । 'इगन्तादिषु' किम् । पञ्चाश्वः । 'द्विगौ' किम् । परमारत्निः ॥ ३७६४ । बह्वन्यतरस्याम् (६-२ ३०) । बहुशब्दस्तथा वा । वह्वरत्निः । बहुमास्यः । बहुकपालः । बहुशब्दोऽन्तोदात्तः । तस्य यणि सति 'उदात्तस्वरितयोः–' । (सू ३६५७) । इति भवति ॥ ३७६५ । दिष्टिवितस्त्योश्च (६-२-३१) । एतयोः परतः पूर्वपदं प्रकृत्या वा द्विगौ । पञ्चदिष्टिः । पञ्चवितस्तिः । ३७६६ । सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात् (६ २-३२) । अकालवाचि सप्तम्यन्तं प्रकृत्या सिद्धादिषु । सांकाश्यसिद्धः । सांकाश्येति ण्यान्तः । आतपशुष्कः । भ्राष्ट्रपक्वः । भ्राष्ट्रेति ष्ट्रन्नन्तः । चक्रबन्धः । चक्रशब्दोऽन्तोदात्तः । 'अकालात्' किम् । पूर्वाह्णसिद्धः । कृत्स्वरेण बाधितः सप्तमीस्वरः प्रतिप्रसूयते । ३७६७ । परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु (६-२-३३) । एते प्रकृत्या वर्ज्यमानवाचिनि चोत्तरपदे । परित्रिगर्तं वृष्टो देवः । प्रतिपूर्वाह्णम् । प्रत्यपररात्रम् । उपपूर्वरात्रम् । अपत्रिगर्तम् । उपसर्गा आद्युदात्ताः । बहुव्रीहितत्पुरुषयोः सिद्धत्वा-

दव्ययीभावार्थमिदम् । अपपर्योरेव वर्ज्यमानमुत्तरपदम् । तयोरेव वर्ज्यमानार्थत्वात् । अहोरात्रावयवा अपि वर्ज्यमाना एव तयोर्भवन्ति । 'वर्ज्य–' इति किम् । अग्निं प्रति प्रत्यग्नि । ३७६८ । राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु (६-२-३४) । राजन्यवाचिनां बहुवचनानामन्धकवृष्णिषु वर्तमाने द्वन्द्वे पूर्वपदं प्रकृत्या । श्वाफल्कचैत्रकाः । शिनिवासुदेवाः । शिनिराद्युदात्तो लक्षणया तदपत्ये वर्तते । 'राजन्य–' इति किम् । द्वैप्यभैमायनाः । द्वीपे भवा द्वैप्याः । भैमेरपत्यं युवा भैमायनः । अन्धकवृष्ण्य एते न तु राजन्याः । राजन्यग्रहणमिहाभिषिक्तवंश्यानां क्षत्त्रियाणां ग्रहणार्थम् । नैते तथा । 'बहुवचनम्' किम् । सङ्कर्षणवासुदेवौ । 'द्वन्द्वे' किम् । वृष्णीनां कुमारा वृष्णिकुमाराः । 'अन्धकवृष्णिषु' किम् । कुरुपञ्चालाः ॥ ३७६९ ॥ सङ्ख्या (६-२-३५) । संख्यावाचि पूर्वपदं प्रकृत्या द्वन्द्वे । द्वादश । त्रयोदश । त्रेस्त्रयसादेश आद्युदात्तो निपात्यते ॥ ३७७० । आचार्योपसर्जनश्चान्तेवासी (६-२-३६) । आचार्योपसर्जनान्तेवासिनां द्वन्द्वे पूर्वपदं प्रकृत्या । पाणिनीयरौढीयाः । छस्वरेण मध्योदात्तावेतौ । आचार्योपसर्जनग्रहणं द्वन्द्वविशेषणम् । सकलो द्वन्द्व आचार्योपसर्जनो यथा विज्ञायते । तेनेह न । पाणिनीयदेवदत्तौ । 'आचार्य–' इति किम् । छान्दसवैयाकरणाः । 'अन्तेवासी' किम् । आपिशलपाणिनीयेति शास्त्रे ॥ ३७७१ । कार्तकौजपादयश्च (६-२-३७) । एषां द्वन्द्वे पूर्वपदं प्रकृत्या । कार्तकौजपौ । कृतस्येदं कुजपस्येदमित्यण्णन्तावेतौ । सावर्णिमाण्डूकेयौ ॥ ३७७२ । महान्व्रीह्यपराह्णगृष्ट्यध्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु (६-२-३८) । महच्छब्दः प्रकृत्या व्रीह्यादिषु दशसु । महाव्रीहिः । महापराह्णः । महागृष्टिः । महेष्वासः । महाहैलिहिलः । महच्छब्दोऽन्तोदात्तः । 'सन्महत्–' (सू ७४०) इति प्रातिपदोक्तसमास एवायं स्वरः । नेह । महतो व्रीहिः महद्व्रीहिः ॥ ३७७३ । क्षुल्लकश्च वैश्वदेवे (६-२-३९) । चान्महान् । क्षुल्लकवैश्वदेवम् । महावैश्वदेवम् । क्षुधं लातीति क्षुल्लः । तस्मादज्ञातादिषु केऽन्तोदात्तः ॥ ३७७४ । उष्ट्रः सादिवाम्योः (६-२-४०) । उष्ट्रसादी । उष्ट्रवामी । उषेः ष्ट्रनि उष्ट्रशब्द आद्युदात्तः ॥ ३७७५ । गौः सादसादिसारथिषु (६-२-४१) । गोसादः । गोसादिः । गोसारथिः ॥ ३७७६ । कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूपण्यकम्बलो दासीभाराणां च (६-२-४२) । एषां सप्तानां समासानां दासीभारादेश्च पूर्वपदं प्रकृत्या । कुरूणां गार्हपतं कुरुगार्हपतम् । उप्रत्ययान्तः कुरुः । 'वृजेरिति वाच्यम्' (वा ३८११) । वृजिगार्हपतम् । वृजिराद्युदात्तः । रिक्तो गुरुः रिक्तगुरुः । 'रिक्ते विभाषा' (सू ३६९६) इति रिक्तशब्द आद्युदात्तः । असूता जरती असूतजरती । अश्लीला दृढरूपा अश्लीलदृढरूपा । अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः । श्रीर्यस्यास्ति तत् श्लीलम् । सिध्मादित्वाल्लच् । कपिलकादित्वाल्लत्वम् । पारे वडवेव पारेवडवा । निपातनादिवार्थे समासो विभक्त्यलोपश्च । पारशब्दो घृतादित्वादन्तोदात्तः । तैतिलानां कद्रूः तैतिलकद्रूः । तितिलिनोऽपत्यं छात्त्रो वेत्यण्णन्तः । पण्यशब्दो यदन्तत्वादाद्युदात्तः । 'पण्यकम्बलः । संज्ञायामिति वक्तव्यम्' (वा ३८२०) । अन्यत्र पणितव्ये कम्बले समासान्तोदात्तत्वमेव । प्रतिपदोक्ते समासे 'कृत्याः' (सू २८३१) इत्येष स्वरो विहितः । दास्या भारो दासीभारः । देवद्भूतिः । यस्य तत्पुरुषस्य पूर्वपदप्रकृतिस्वरत्वमिष्यते न विशिष्य वचनं विहितं स सर्वोऽपि दासीभारादिषु द्रष्टव्यः । 'स राये सपुरन्ध्र्याम्' । पुरं शरीरं ध्रियतेऽस्यामिति 'कर्मण्यधिकरणे च'

(सू ३२७१) इति किप्रत्ययः । अलुक्छान्दसः । 'नब्विषयस्य–' (फिट् २६) इत्याद्युदात्तः पुरशब्दः ॥ ३७७७ । चतुर्थी तदर्थे (६-२-४३) । चतुर्थ्यन्तार्थाय यत्तद्वाचिन्युत्तरपदे चतुर्थ्यन्तं प्रकृत्या । यूपाय दारु यूपदारु ॥ ३७७८ । अर्थे (६-२-४४) । अर्थे परे चतुर्थ्यन्तं प्रकृत्या । देवार्थम् ॥ ३७७९ । क्ते च (६-२-४५) । क्तान्ते परे चतुर्थ्यन्तं प्रकृत्या । गोहितम् ३७८० । कर्मधारयेऽनिष्ठा (६-२-४६) । क्तान्ते परे पूर्वमनिष्ठान्तं प्रकृत्या । श्रेणिकृताः । श्रेणिशब्द आद्युदात्तः । पूगकृताः । पूगशब्दोऽन्तोदात्तः । 'कर्मधारये' किम् । श्रेण्या कृतं श्रेणिकृतम् । 'अनिष्ठा' किम् । कृताकृतम् ॥ ३७८१ । अहीने द्वितीया (६-२-४७) । अहीनवाचिनि समासे क्तान्ते परे द्वितीयान्तं प्रकृत्या । कष्टश्रितः । ग्रामगतः । कष्टशब्दोऽन्तोदात्तः । ग्रामशब्दो नित्स्वरेण । 'अहीने' किम् । कान्तारातीतः । 'अनुपसर्ग इति वक्तव्यम्' (वा ३८२१) । नेह । सुखप्राप्तः । 'थाथ–' (सू ३८७८) इत्यस्यापवादोऽयम् ॥ ३७८२ । तृतीया कर्मणि (६-२-४८) । कर्मवाचके क्तान्ते परे तृतीयान्तं प्रकृत्या । 'त्वोतासः' । रुद्रहतः । महाराजहतः । रुद्रो रगन्तः । 'कर्मणि' किम् । रथेन यातो रथयातः ॥ ३७८३ । गतिरनन्तरः (६-२-४९) । कर्मार्थे क्तान्ते परेऽव्यवहितो गतिः प्रकृत्या । पुरोहितम् । 'अनन्तरः' किम् । अभ्युद्धृतः । कारकपूर्वपदस्य तु सतिशिष्टस्थाद्यादिस्वर एव । दूरादागतः । 'थाथ–' (सू ३८७८) इत्यस्यापवादः ॥ ३७८४ । तादौ च निति कृत्यतौ (६-२-५०) । तकारादौ निति तुशब्दवर्जिते कृति परेऽनन्तरो गतिः प्रकृत्या । अग्नेरायो नूतमस्य प्रभूतौ' । 'सङ्गतिं गोः' । कृत्स्वरापवादः । 'तादौ' किम् । प्रजल्पाकः । 'निति' किम् । प्रकर्ता । तृजन्तः । 'अतौ' किम् । आगन्तुः ॥ ३७८५ । तवै चान्तश्च युगपत् (६-२-५१) । तवैप्रत्ययान्तस्यान्त उदात्तो गतिश्चानन्तरः । प्रकृत्या युगपच्चैतदुभयं स्यात् । 'अर्वत्तवा उ' । कृत्स्वरापवादः ॥ ३७८६ । अनिगन्तोऽञ्चतौ वप्रत्यये (६-२-५२) । अनिगन्तो गतिर्वप्रत्ययान्तेऽञ्चतौ परे प्रकृत्या । 'ये पराञ्चस्तान्' । 'अनिगन्तः' इति किम् । प्रत्यञ्चो यन्तु । कृत्स्वरात् परत्वादयमेव । 'जहि वृष्ण्यानि कृणुही पराचः' । 'वप्रत्यये' किम् । उदञ्चनम् । ३७८७ । न्यधी च (६-२-५३) । वप्रत्ययान्तेऽञ्चतावित्यनन्तावपि न्यधी प्रकृत्या । न्यङ्ङुत्तानः । 'उदात्तस्वरितयोर्यण–' (सू ३६५७) इति अञ्चतेरकारः स्वरितः । अध्यङ् ॥ ३७८८ । ईषदन्यतरस्याम् (६-२-५४) । ईषत्कडारः । ईषदित्ययमन्तोदात्तः । ईषद्भेद इत्यादौ कृत्स्वर एव ॥ ३७८९ । हिरण्यपरिमाणं धने (६-२-५५) । सुवर्णपरिमाणवाचि पूर्वपदं वा प्रकृत्या धने । द्वे सुवर्णे परिमाणमस्येति द्विसुवर्णं तदेव धनं द्विसुवर्णधनम् । बहुव्रीहावपि परत्वाद्विकल्प एव । 'हिरण्यम्' किम् । प्रस्थधनम् । 'परिमाणम्' किम् । काञ्चनधनम् । 'धने' किम् । निष्कमाला ॥ ३७९० । प्रथमोऽचिरोपसंपत्तौ (६-२-५६) । प्रथमशब्दो वा प्रकृत्याभिनवत्वे । प्रथमवैयाकरणः । संप्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः । प्रथमशब्दः प्रथेरमजन्तः । 'अचिर–' इति किम् । प्रथमो वैयाकरणः ॥ ३७९१ । कतरकतमौ कर्मधारये (६-२-५७) । वा प्रकृत्या । कतरकठः । कर्मधारयग्रहणमुत्तरार्थम् । इह तु प्रतिपदोक्तत्वादेव सिद्धम् ॥ ३७९२ । आर्यो ब्राह्मणकुमारयोः (६-२-५८) । आर्यकुमारः । आर्यब्राह्मणः । आर्यो ण्यदन्तत्वादन्तस्वरितः । 'आर्यः' किम् । परमब्राह्मणः । 'ब्राह्मणादि–'

इति किम् । आर्यक्षत्रियः । कर्मधारय इत्येव ॥ ३७९३ । राजा च (६-२-५९) । ब्राह्मण-कुमारयोः परतो राजा वा प्रकृत्या कर्मधारये । राजब्राह्मणः । राजकुमारः । योगविभाग उत्तरार्थः ॥ ३७९४ । षष्ठी प्रत्येनसि (६-२-६०) । षष्ठ्यन्तो राजा प्रत्येनसि परे वा प्रकृत्या । राजप्रत्येनाः । 'षष्ठी' किम् । अन्यत्र न ॥ ३७९५ । क्ते नित्यार्थे (६-२-६१) । क्तान्ते परे नित्यार्थे समासे पूर्वं वा प्रकृत्या । नित्यप्रहसितः । 'कालाः' (सू ६९०) इति द्वितीयासमासोऽयम् । नित्यशब्दस्त्यबन्त आद्युदात्तः । प्रहसित इति थाथादिस्वरेणान्तोदात्तः । 'नित्यार्थे' किम् । मुहूर्त-प्रहसितः ॥ ३७९६ । ग्रामः शिल्पिनि (६-२-६२) । वा प्रकृत्या । ग्रामनापितः । ग्रामशब्द आद्युदात्तः । 'ग्रामः' किम् । परमनापितः । 'शिल्पिनि' किम् । ग्रामरथ्या ॥ ३७९७ । राजा च प्रशंसायाम् (६-२-६३) । शिल्पिवाचिनि परे प्रशंसार्थे राजपदं वा प्रकृत्या । राजना-पितः । राजकुलालः । 'प्रशंसायाम्' किम् । राजनापितः । 'शिल्पिनि' किम् । राजहस्ती ॥ ३७९८ । आदिरुदात्तः (६-२-६४) । अधिकारोऽयम् ॥ ३७९९ । सप्तमीहारिणौ धर्म्ये-ऽहरणे (६-२-६५) । सप्तम्यन्तं हारिवाचि च आद्युदात्तं धर्म्ये परे । देयं यः स्वीकरोति स हारीत्युच्यते । धर्म्यमित्याचारनियतं देयम् । मुकुटेकार्षापणम् । हलेद्विपदिका । 'संज्ञायाम्' (सू ७२१) इति सप्तमीसमासः । 'कारनाम्नि च–' (सू ९६८) इत्यलुक् । याज्ञिकाश्वः । वैयाकरणहस्ती । क्वचिदयमाचारो मुकुटादिषु कार्षापणादि दातव्यं याज्ञिकादीनां त्वश्वादिरिति । 'धर्म्ये–' इति किम् । स्तम्बेरमः । 'अहरणे' किम् । वाडवहरणम् । वडवाया अयं वाडवः । तस्य बीजनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं यदीयते तद्धरणमित्युच्यते । परोऽपि कृत्स्नरो हारिस्वरेण बाध्यते इत्यहरण इति निषेधेन ज्ञाप्यते । तेन वाडवहार्यम् इति हारिस्वरः सिध्यति ॥ ३८०० । युक्ते च (६-२-६६) । युक्तवाचिनि समासे पूर्व-माद्युदात्तम् । गोवल्लवः । 'कर्तव्ये तत्परो युक्तः' ॥ ३८०१ । विभाषाध्यक्षे (६-२-६७) । गवाध्यक्षः । ३८०२ । पापं च शिल्पिनि (६-२-६८) । पापनापितः । 'पापाणके–' (सू ७३३) इति प्रतिपदोक्तस्यैव ग्रहणात्षष्ठीसमासे न ॥ ३८०३ । गोत्रान्तेवासिमाणव-ब्राह्मणेषु क्षेपे (६-२-६९) । भार्यासौश्रुतः । सुश्रुतापत्यस्य भार्याप्रधानतया क्षेपः । अन्ते-वासी । कुमारीदाक्षाः । ओदनपाणिनीयाः । कुमार्यादिलाभकामा ये दाक्ष्यादिभिः प्रोक्तानि शास्त्राण्यधीयते त एवं क्षिप्यन्ते । भिक्षामाणवः । भिक्षां लप्स्येऽहमिति माणवः । भयब्राह्मणः । भयेन ब्राह्मणः संपद्यते । 'गोत्रादिषु' किम् । दार्साश्रोत्रियः । 'क्षेपे' किम् । परमब्राह्मणः ॥ ३८०४ । अङ्गानि मैरेये (६-२-७०) । मद्यविशेषो मैरेयः । मधुमैरेयः । मधुविकारस्य तस्य मध्वङ्गम् । 'अङ्गानि' किम् । परममैरेयः । 'मैरेये' किम् । पुष्पासवः ॥ ३८०५ । भक्ताख्यास्तदर्थेषु (६-२-७१) । भक्तमन्नम् । भिक्षाकंसः । भाजीकंसः । भिक्षादयोऽन्नवि-शेषाः । 'भक्ताख्याः' किम् । समाशशालयः । समशनं समाश इति क्रियामात्रमुच्यते । 'तदर्थेषु' किम् । भिक्षाप्रियः । बहुव्रीहिरयम् । अत्र पूर्वपदमन्तोदात्तम् । ३८०६ । गोबिडालसिंहसैन्धवेषूपमाने (६-२-७२) । धान्यगवः । गोबिडालः । तृणसिंहः । सक्तु-सैन्धवः । धान्यं गौरिवेति विग्रहः । व्याघ्रादिः । गवाकृत्या सन्निवेशितं धान्यं धान्यगवशब्दे-नोच्यते । 'उपमाने' किम् । परमसिंहः ॥ ३८०७ । अके जीविकार्थे (६-२-७३) ।

अकप्रत्ययान्त उत्तरपदे जीविकार्थवाचिनि समासे पूर्वपदमाद्युदात्तं स्यात् । दन्तलेखकः । यस्य दन्तलेखनेन जीविका । 'नित्यं क्रीड–' (सू ७११) इति समासः । 'अके' किम् । रमणीयकर्ता । जीविकार्थे' किम् । इक्षुभक्षिकां मे धारयसि ॥ ३८०८ । प्राचां क्रीडायाम् (६-२-७४) । प्राग्देशवाचिनां या क्रीडा तद्वाचिनि समासे अकप्रत्ययान्तपरे पूर्वमाद्युदात्तं स्यात् । उद्दालकपुष्पभञ्जिका । 'संज्ञायाम्' (सू ३२८६) इति ण्वुल् । 'प्राचाम्' किम् । जीवपुत्रप्रचायिका । इयमुदीचां क्रीडा । क्रीडायाम्' किम् । तव पुष्पप्रचायिका । पर्याये ण्वुल् ॥ ३८०९ अणि नियुक्ते (६-२-७५) । अण्णन्ते परे नियुक्तवाचिनि समासे पूर्वमाद्युदात्तम् । छत्रधारः । 'नियुक्ते' किम् । काण्डलावः ॥ ३८१० । शिल्पिनि चाकृञः (६-२-७६) । शिल्पिवाचिनि समासेऽण्णन्ते परे पूर्वमाद्युदात्तं स चेदण्कृञः परो न भवति । तन्तुवायः । 'शिल्पिनि' किम् । काण्डलावः । 'अकृञः' किम् । कुम्भकारः ॥ ३८११ । संज्ञायां च (६-२-७७) । अण्णन्ते परे । तन्तुवायो नाम कृमिः । 'अकृञः' इत्येव । रथकारो नाम ब्राह्मणः ॥ ३८१२ । गोतन्तियवं पाले (६-२-७८) । गोपालः । तन्तिपालः । यवपालः । अनियुक्तार्थो योगः । 'गो' इति किम् । वत्सपालः । 'पाले' इति किम् । गोरक्षः ॥ ३८१३ । णिनि (६-२-७९) । पुष्पहारी ॥ ३८१४ । उपमानं शब्दार्थप्रकृतावेव (६-२-८०) । उपमानवाचि पूर्वपदं णिन्यन्ते पर आद्युदात्तम् । उष्ट्रकोशी । श्वाङ्गरावी । उपमानग्रहणमस्य पूर्वयोगस्य च विषयविभागार्थम् । 'शब्दार्थप्रकृतौ' किम् । वृकवञ्ची । 'प्रकृतिग्रहणम्' किम् । प्रकृतिरेव यत्रोपसर्गनिरपेक्षा शब्दार्था तत्रैव यथा स्यात् । इह मा भूत् । गर्दभोच्चारी ॥ ३८१५ । युक्तारोह्यादयश्च (६-२-८१) । आद्युदात्ताः । युक्तारोही । आगतयोधी । क्षीरहोता । अत्र णिन्यन्तानां केषाञ्चित्पाठः पूर्वोत्तरपदनियमार्थः । तेनेह न । वृक्षारोही । युक्ताध्यायी ॥ ३८१६ । दीर्घकाशतुषभ्राष्ट्रवटं जे (६-२-८२) । कुटीजः । काशजः । तुषजः । भ्राष्ट्रजः । वटजः ॥ ३८१७ । अन्त्यात्पूर्वं बह्वचः (६-२-८३) । बह्वचः पूर्वस्यान्त्यात्पूर्वपदमुदात्तं ज उत्तरपदे । उपसरजः । आमलकीजः । 'बह्वचः' किम् । दग्धजानि तृणानि ॥ ३८१८ । ग्रामेऽनिवसन्तः (६-२-८४) । ग्रामे परे पूर्वपदमुदात्तम् । तच्चेन्निवसद्वाचि न । मल्लग्रामः । ग्रामशब्दोऽत्र समूहवाची । देवग्रामः । देवस्वामिकः । 'अनिवसन्तः' किम् । दाक्षिग्रामः । दाक्षिनिवासः ॥ ३८१९ । घोषादिषु च (६-२-८५) । दाक्षिघोषः । दाक्षिकटः । दाक्षिहदः ॥ ३८२० । छात्र्यादयः शालायाम् (६-२-८६) । छात्त्रिशाला । व्याडिशाला । यदापि शालान्तः समासो नपुंसकलिङ्गो भवति तदापि 'तत्पुरुषे शालायां नपुंसके' (सू ३८५७) इत्येतस्मात्पूर्वविप्रतिषेधेनायमेव स्वरः । छात्त्रिशालम् ॥ ३८२१ । प्रस्थेऽवृद्धमकर्क्यादीनाम् (६-२-८७) । प्रस्थशब्द उत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्युदात्तं स्यात् । इन्द्रप्रस्थः । 'अवृद्धम्' इति किम् । दाक्षिप्रस्थः । 'अकर्क्यादीनाम्' इति किम् । कर्कीप्रस्थः । मकरीप्रस्थः ॥ ३८२२ । मालादीनां च (६-२-८८) । वृद्धार्थमिदम् । मालाप्रस्थः । शोणाप्रस्थः ॥ ३८२३ । अमहन्नवन्नगरेऽनुदीचाम् (६-२-८९) । नगरे परे महन्नवन्वर्जितं पूर्वमाद्युदात्तं स्यात् तच्चेदुदीचां न । ब्रह्मनगरम् । 'अम–' इति किम् । महानगरम् । नवनगरम् । 'अनुदीचाम्' किम् । कार्तिनगरम् ॥ ३८२४ । अर्मे चावर्णे द्यच्त्र्यच् (६-२-९०) । अर्मे परे द्यच्त्र्यच्पूर्वमवर्णान्तमाद्युदात्तम् ।

गुप्तार्मम् । कुक्कुटार्मम् । 'अवर्णम्' किम् । बृहदर्मम् । 'घच्त्र्यच्' किम् । कपिञ्जलार्मम् । अमहन्नवन्नित्येव । महार्मम् । नवार्मम् ॥ ३८२५ । न भूताधिकसञ्जीवमद्राश्मकज्जलम् । (६-२-९१) । अर्मे परे नैतान्याद्युदात्तानि । भूतार्मम् । अधिकार्मम् । सञ्जीवार्मम् । मद्राश्मग्रहणं सङ्घातविगृहीतार्थम । मद्रार्मम् । अश्मार्मम् । मद्राश्मार्मम् । कज्जलार्मम् । 'आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसङ्ख्यानम्' (वा ३८४०) । 'दिवोदासाय द्राशुषे' ॥ ३८२६ । अन्तः (६-२-९२) । अधिकारोऽयम् । प्रागुत्तरपदादिग्रहणात् ॥ ३८२७ । सर्वं गुणकात्स्न्र्ये (६-२-९३) । सर्वशब्दः पूर्वपदमन्तोदात्तम् । सर्वश्वेतः । सर्वमहान् । 'सर्वम्' किम् । परमश्वेतः । आश्रयव्याप्त्या परमत्वं श्वेतत्वेति गुणकात्स्न्र्ये वर्तते । 'गुण–' इति किम् । सर्वसौवर्णः । 'कात्स्न्र्ये' किम् । सर्वेषां श्वेततरः सर्वश्वेतः ॥ ३८२८ । संज्ञायां गिरिनिकाययोः (६-२-९४) । एतयोः परतः पूर्वमन्तोदात्तम् । अञ्जनागिरिः । मौण्डनिकायः । 'संज्ञायां' किम् । परमगिरिः । ब्राह्मणनिकायः ॥ ३८२९ । कुमार्यां वयसि (६-२-९५) । पूर्वपदमन्तोदात्तम् । वृद्धकुमारी । कुमारीशब्दः पुंसा सहासंप्रयोगमात्रं प्रवृत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिः समानाधिकरणः । तच्च वय इह गृह्यते न कुमारत्वमेव । 'वयसि' किम् । परमकुमारी ॥ ३८३० । उदकेऽकेवले (६-२-९६) । अकेवलं मिश्रं तद्वाचिनि समास उदके परे पूर्वमन्तोदात्तम् । गुडोदकम् । स्वरे कृतेऽत्र एकादेशः । 'स्वरितो वानुदात्ते पदादौ' (सू ३६५९) । इति पक्षे स्वरितः । 'अकेवले' किम् । शीतोदकम् ॥ ३८३१ । द्विगौ क्रतौ (६-२-९७) । द्विगावुत्तरपदे क्रतुवाचिनि समासे पूर्वमन्तोदात्तम् । गर्गत्रिरात्रः । 'द्विगौ' किम् । अतिरात्रः । 'क्रतौ' किम् । बिल्वहोमस्य सप्तरात्रो बिल्वसप्तरात्रः ॥ ३८३२ । सभायां नपुंसके (६-२-९८) । सभायां परतो नपुंसकलिङ्गे समासे पूर्वमन्तोदात्तम् । गोपालसभम् । स्त्रीसभम् । 'सभायाम्' किम् । ब्राह्मणसेनम् । 'नपुंसके' किम् । राजसभा । प्रतिपदोक्तनपुंसकग्रहणान्नेह । रमणीयसभम् ब्राह्मणकुलम् ॥ ३८३३ । पुरे प्राचाम् । (६-२-९९) । देवदत्तपुरम् । नान्दीपुरम् । 'प्राचाम्' किम् । शिवपुरम् ॥ ३८३४ । अरिष्टगौडपूर्वे च (६-२-१००) । पुरे परेऽरिष्टगौडपूर्वे समासे पूर्वमन्तोदात्तम् । अरिष्टपुरम् । गौडपुरम । 'पूर्व' ग्रहणं किम् । इहापि यथा स्यात् । अरिष्टाश्रितपुरम् । गौडभृत्यपुरम् ॥ ३८३५ । न हास्तिनफलकमार्देयाः (६-२-१०१) । पुरे परे नैतान्यन्तोदात्तानि । हास्तिनपुरम् । फलकपुरम् । मार्देयपुरम् । मृदेरपत्यमिति शुभ्रादित्वात् ढक् ॥ ३८३६ । कुसूलकूपकुम्भशालं बिले (६-२-१०२) । एतान्यन्तोदात्तानि बिले परे । कुसूलबिलम् । कूपबिलम् । कुम्भबिलम । शालबिलम् । 'कुसूलादि' किम् । सर्पाबिलम् । 'बिल' इति किम् । कुसूलस्वामी ॥ ३८३७ । दिक्छब्दा ग्रामजनपदाख्यानचानराटेषु (६-२-१०३) । दिक्छब्दा अन्तोदात्ता भवन्त्येषु । पूर्वेषुकामशमी । अपरकृष्णमृत्तिका । जनपदे । पूर्वपञ्चालाः । आख्याने । पूर्वयायातम् । पूर्वचानराटम् । शब्दग्रहणं कालवाचिदिक्छब्दस्य परिग्रहार्थम् ॥ ३८३८ । आचार्योपसर्जनश्चान्तेवासिनि (६-२-१०४) । आचार्योपसर्जनान्तेवासिनि परे दिक्छब्दा अन्तोदात्ता भवन्ति । पूर्वपाणिनीयाः । 'आचार्य–' इति किम् । पूर्वान्तेवासी । 'अन्तेवासिनि' किम् । पूर्वपाणिनीयं शास्त्रम् ॥ ३८३९ । उत्तरपदवृद्धौ सर्वं च (६-२-१०५) । उत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता

तद्वृत्युत्तरपदे परे सर्वशब्दो दिक्छब्दाश्चान्तोदात्ता भवन्ति । सर्वपाञ्चालकः । अपरपाञ्चालकः । 'अधिकारग्रहणं' किम् । सर्वगासः । सर्वकारकः ॥ ३८४० । बहुव्रीहौ विश्वं संज्ञायाम् (६-२-१०६) । बहुव्रीहौ विश्वशब्दः पूर्वपदभूतः संज्ञायामन्तोदात्तः स्यात् । पूर्वपदप्रकृतिस्वरेण प्राप्तस्याद्युदात्तस्यापवादः । 'विश्वधर्मा विश्वदेवः' । 'आविश्वेदवं सप्तिम्' । 'बहुव्रीहौ' किम्। विश्वे च ते देवाश्च विश्वेदेवाः। 'संज्ञायाम्' किम् । विश्वदेवाः । प्रागव्ययीभावाद्बहुव्रीह्यधिकारः॥ ३८४१ । उदराश्वेषुषु (६-२-१०७) । संज्ञायामिति वर्तते । वृकोदरः । हर्यश्वः । महेषुः ॥ ३८४२ । क्षेपे (६-२-१०८) । उदराश्वेषुषु पूर्वमन्तोदात्तं बहुव्रीहौ निन्दायाम् । असंज्ञार्थ-मारम्भः । घटोदरः । कन्दुकाश्वः । चलाचलेषुः । अनुदर इत्यत्र 'नञ्सुभ्याम्–' (सू ३९०६) इति भवति पूर्वविप्रतिषेधेन ॥ ३८४३ । नदी बन्धुनि (६-२-१०९) । बन्धुशब्दे परे नद्यन्तं पूर्वमन्तोदात्तं बहुव्रीहौ । गार्गीबन्धुः। 'नदी' किम् । ब्रह्मबन्धुः। ब्रह्मशब्द आद्युदात्तः । 'बन्धुनि' किम् । गार्गीप्रियः ॥ ३८४४ । निष्ठोपसर्गपूर्वमन्यतरस्याम् । (६-२-११०) । निष्ठान्तं पूर्वपदमन्तोदात्तं वा । प्रधौतपादः । 'निष्ठा' किम् । प्रसेवकमुखः । 'उपसर्गपूर्वम्' किम् । शुष्कमुखः ॥ ३८४५ । उत्तरपदादिः (६-२-१११) । उत्तरपदाधिकार आपादान्तम् । आद्य-धिकारस्तु 'प्रकृत्या भगालम्' (सू ३८७१) इत्यवधिकः ॥ ३८४६ । कर्णो वर्णलक्षणात् (६-२-११२) । वर्णवाचिनो लक्षणवाचिनश्च परः कर्णशब्द आद्युदात्तो बहुव्रीहौ । शुक्लकर्णः । शङ्कुकर्णः । 'कर्णः' किम् । श्वेतपादः । 'वर्णलक्षणात्' किम् । शोभनकर्णः ॥ ३८४७ । संज्ञौपम्ययोश्च (६-२-११३) । कर्ण आद्युदात्तः । मणिकर्णः । औपम्ये । गोकर्णः । ३८४८ । कण्ठपृष्ठग्रीवाजङ्घं च (६-२-११४) । संज्ञौपम्ययोर्बहुव्रीहौ । शितिकण्ठः । काण्डपृष्ठः । सुग्रीवः । नाडीजङ्घः । औपम्ये । खरकण्ठः । गोपृष्ठः । अश्वग्रीवः । गोजङ्घः ॥ ३८४९ । शृङ्गमवस्थायां च (६-२-११५) । शृङ्गशब्दोऽवस्थायां संज्ञौपम्ययोश्चाद्युदात्तो बहुव्रीहौ । उद्गतशृङ्गः । द्व्यङ्गुलशृङ्गः । अत्र शृङ्गोद्गमनादिकृतो गवादेर्वयोविशेषोऽवस्था । संज्ञायाम् । ऋष्यशृङ्गः । उपमायाम् । मेषशृङ्गः । 'अवस्था–' इति किम् । स्थूलशृङ्गः ॥ ३८५० । नञो जरमरमित्र-मृताः (६-२-११६) । नञः पर एते आद्युदात्ता बहुव्रीहौ । 'ता मे जराय्वजरम्' । अमरम् । 'अमित्रमर्दय' । 'श्रवो देवेष्वमृतम्' । 'नञः' किम् । ब्राह्मणमित्रः । 'ज–' इति किम् । अशत्रुः ॥ ३८५१ । सोर्मनसी अलोमोषसी (६-२-११७) । सोः परं लोमोषसी वर्जयित्वा मनन्तमसन्तं चाद्युदात्तं स्यात् । 'नञ्सुभ्याम्' । (सू ३९०६) इत्यस्यापवादः । 'सुकर्माणः सुयुजः' । 'स नो वक्षदनिमानः सुवत्रा सुब्रह्मा । 'शिवा पशुभ्यः सुमनाः सुवर्चाः' । 'सुपेश-सस्करति' । 'सोः' किम् । कृतकर्मा । 'मनसी' किम् । सुराजा । 'अलोमोषसी' किम् । सुलोमा । सूषाः। कपि तु परत्वात् । 'कपि पूर्वम्' (सू ३९०७) इति भवति । सुकर्मकः । 'सुस्रोतस्कः' ॥ ३८५२ । क्त्वादयश्च (६-२-११८) । सोः पर आद्युदात्ताः स्युः । 'साम्रा-ज्याय सुकृतुः' । 'सुप्रतीकः' । 'सुहव्यः' । 'सुप्रतूर्तिमनेहसम्' ॥ ३८५३ । आद्युदात्तं द्यच्छन्दसि (६-२-११९) । यदाद्युदात्तं द्यच्तत्सोरुत्तरं बहुव्रीह्यावाद्युदात्तम् । 'अधा स्वर्धाः' । 'सुरथाँ आतिथिग्वे' । नित्स्वरेणाश्वरथाधाद्युदात्तौ । 'आद्युदात्तम्' किम् । 'यासुबाहुः' । 'द्यच्' किम् । 'सुगुरसत्सुहिरण्यः' । हिरण्यशब्दस्त्यच् ॥ ३८५४। वीरवीर्यौ च (६-२-१२०)

सोः परौ बहुव्रीहौ छन्दस्याद्युदात्तौ । 'सुवीरेण रयिणा' । 'सुवीर्यस्य गोमतः' । वीर्यशब्दो यत्प्रत्ययान्तः । तत्र 'यतोऽनावः' (सू ३७०१) इत्याद्युदात्तत्वं नेति वीर्यग्रहणं ज्ञापकम् । तत्र हि सति पूर्वेणैव सिद्धं स्यात् ॥ ३८५५ । कूलतीरतूलमूलशालाक्षसममव्ययीभावे (६-२-१२१) । उपकूलम् । उपतीरम् । उपतूलम् । उपमूलम् । उपशालम् । उपाक्षम् । सुषमम् । निःषमम् । तिष्ठद्गुप्रभृतिष्वेते । 'कूलादि' ग्रहणं किम् । उपकुम्भम् । 'अव्ययीभावे' किम् । परमकूलम् ॥ ३८५६ । कंसमन्थशूर्पपाय्यकाण्डं द्विगौ (६-२-१२२) । द्विकंसः । द्विमन्थः । द्विशूर्पः । द्विपाय्यम् । द्विकाण्डम् । 'द्विगौ' किम् । परमकंसः ॥ ३८५७ । तत्पुरुषे शालायां नपुसके (६-२-१२३) । शालाशब्दान्ते तत्पुरुषे नपुंसकलिङ्ग उत्तरपदमाद्युदात्तम् । ब्राह्मणशालम् । 'तत्पुरुषे' किम् । दृढशालम् । ब्राह्मणकुलम् । 'शालायाम्' किम् । ब्राह्मणसेनम् । 'नपुंसके' किम् । ब्राह्मणशाला ॥ ३८५८ । कन्था च (६-२-१२४) । तत्पुरुषे नपुंसकलिङ्गे कन्थाशब्द उत्तरपदमाद्युदात्तम् । सौशमिकन्थम् । आह्वरकन्थम् । 'नपुंसके' किम् । दाक्षिकन्था ॥ ३८५९ । आदिश्चिहणादीनाम् (६-२-१२५) कन्थान्ते तत्पुरुषे नपुंसकलिङ्गे चिहणादीनामादिरुदात्तः । चिहणकन्थम् । मदुरकन्थम् । आदिरिति वर्तमाने पुनर्ग्रहणं पूर्वपदस्याद्युदात्तार्थम् ॥ ३८६० । चेलखेटकटुककाण्डं गर्हायाम् (६-२-१२६) । चेलादीन्युत्तरपदान्याद्युदात्तानि । पुत्रचेलम् । नगरखेटम् । दधिकटुकम् । प्रजाकाण्डम् । चेलादिसादृश्येन पुत्त्रादीनां गर्हा । व्याघ्रादित्वात्समासः । 'गर्हायाम्' किम् । परमचेलम् ॥ ३८६१ । चीरमुपमानम् (६-२-१२७) । वस्त्रं चीरमिव वस्त्रचीरं । कम्बलचीरम् । 'उपमानं' किम् । परमचीरम् ॥ ३८६२ । पललसूपशाकं मिश्रे (६-२-१२८) । घृतपललम् । घृतसूपः । घृतशाकम् । 'भक्ष्येण मिश्रीकरणम्' (सू ६९७) इति समासः । 'मिश्रे' किम् । परमपललम् ॥ ३८६३ । कूलसूदस्थलकर्षाः संज्ञायाम् (६-२-१२९) । आद्युदात्तास्तत्पुरुषे । दाक्षिकूलम् । शाण्डिसूदम् । दाण्डायनस्थलम् । दाक्षिकर्षः । ग्रामसंज्ञा एताः । 'संज्ञायाम्' किम् । परमकूलम् ॥ ३८६४ । अकर्मधारये राज्यम् (६-२-१३०) । कर्मधारयवर्जिते तत्पुरुषे राज्यमुत्तरपदमाद्युदात्तम् । ब्राह्मणराज्यम् । 'अक–' इति किम् । परमराज्यम् । 'चेलराज्यादिस्वरादव्ययस्वरः पूर्वविप्रतिषेधेन' (वा ३८४७) कुचेलम् । कुराज्यम् ॥ ३८६५ । वर्ग्यादयश्च (६-२-१३१) । अर्जुनवर्ग्यः । वासुदेवपक्ष्यः । अकर्मधारय इत्येव । परमवर्ग्यः । वर्ग्यादिर्दिगाद्यन्तर्गणः ॥ ३८६६ । पुत्रः पुम्भ्यः (६ २-१३२) । पुम्शब्देभ्यः परः पुत्रशब्द आद्युदात्तस्तत्पुरुषे । दाशकिपुत्रः । माहिषपुत्रः । 'पुत्रः' किम् । कौनटिमातुलः । 'पुम्भ्यः' किम् । दाक्षीपुत्रः ॥ ३८६७ । नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः (६-२-१३३) । एभ्यः पुत्रो नाद्युदात्तः । आख्याग्रहणात्पर्यायाणां तद्विशेषाणां च ग्रहणम् । आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । ईश्वरपुत्रः । नन्दपुत्रः । ऋत्विक्पुत्रः । याजकपुत्रः । होतुःपुत्रः । संयुक्ताः संबन्धिनः । श्यालपुत्रः । ज्ञातयो मातापितृसंबन्धेन बान्धवाः । ज्ञातिपुत्रः । भ्रातुःपुत्रः ॥ ३८६८ । चूर्णादीन्यप्राणिषष्ठ्याः (६-२-१३४) । एतानि प्राणिभिन्नषष्ठ्यन्तात्पराण्याद्युदात्तानि तत्पुरुषे । मुद्गचूर्णम् । 'अप्रा–' इति किम् । मत्स्यचूर्णम् ॥ ३८६९ । षट् च काण्डादीनि (६-२-१३५) । अप्राणिषष्ठ्या आद्युदात्तानि । दर्भकाण्डम् ।

दर्भचीरम्। तिलपललम्। मुद्गसूपः। मूलकशाकम्। नदीकूलम्। 'षट्' किम्। राजसूदः। 'अप्रा–' इति किम्। दत्तकाण्डम्॥ ३८७०। कुण्डं वनम् (६-२-१३६)। कुण्डमाद्युदात्तं वनवाचिनि तत्पुरुषे। दर्भकुण्डम्। कुण्डशब्दोऽत्र सादृश्ये। 'वनम्' किम्। मृत्कुण्डम्॥ ३८७१। प्रकृत्या भगालम् (६-२-१३७)। भगालवाच्युत्तरपदं तत्पुरुषे प्रकृत्या। कुम्भीभगालम्। कुम्भीनदालम्। कुम्भीकपालम्। मध्योदात्ता एते। 'प्रकृत्या' इत्यधिकृतम् 'अन्तः' (सू ३८७७) इति यावत्॥ ३८७२। शितेर्निल्याबह्वज्बहुव्रीहावभसत् (६-२-१३८)। शितेः परं निल्याबह्वच्कं प्रकृत्या। शितिपादः। शिल्यंसः। पादशब्दो वृषादित्वादाद्युदात्तः। अंसशब्दः प्रत्ययस्य नित्त्वात्। 'शितेः' किम्। दर्शनीयपादः। निल्येति किम्। शितिककुत्। अवस्थायां लोपः। अन्यत्र शितिककुद इति बह्वजुत्तरपदम्। 'अभसत्' किम्। शितिभसत्। शितिरादुदात्तः। पूर्वपदप्रकृतिस्वरापवादोऽयं योगः॥ ३८७३। गतिकारकोपपदात्कृत् (६-२-१३९)। एभ्यः कृदन्तं प्रकृतिस्वरं स्यात्तत्पुरुषे। प्रकारकः। प्रहरणम्। 'शोर्णा' धृष्णू नृवाहसा'। इध्मप्रव्रश्चनः। उपपदात्। उच्चैःकारम्। ईषत्करः। 'गति' इति किम्। देवस्य कारकः। शेषे षष्ठी। कृद्ग्रहणं स्पष्टार्थम्। प्रपचतितरामित्यत्र तरबाद्यन्तेन समासे कृत आम्। तत्र सतिशिष्टत्वादाम्स्वरो भवतीत्येके। प्रपचतिदेऽयार्थं तु कृद्ग्रहणमित्यन्ये॥ ३८७४। उभे वनस्पत्यादिषु युगपत् (६-२-१४०)। एषु पूर्वोत्तरपदे युगपत्प्रकृत्या। 'वनस्पतिं वन आ'। 'बृहस्पतिं यः' बृहच्छब्दोऽन्नाद्युदात्तो निपात्यते। 'हर्षया शचीपतिम्'। शार्ङ्गरवादित्वादाद्युदात्तः शचीशब्दः 'शचीभिर्न' इति दर्शनात्। 'तनूनपादुच्यते'। 'नराशंसं वाजिनम्'। निपातनाद्दीर्घः। 'शुनःशेपम्'॥ ३८७५। देवताद्वन्द्वे च (६-२ १४१)। उभे युगपत्प्रकृत्या स्तः। 'आय इन्द्रावरुणौ'। 'इन्द्राबृहस्पती वयम्'। 'देवता' किम्। क्षन्यग्नीषोमौ। 'द्वन्द्वे' किम्। अग्निष्टोमः'॥ ३८७६। नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु। (६-२-१४२)। पृथिव्यादिवर्जितेऽनुदात्तादावुत्तरपदे प्रागुक्तं न। 'इन्द्राग्निभ्यां कं वृषणः'। 'अपृथिव्यादौ' किम्। 'द्यावापृथिवी जनयन्'। आद्युदात्तौ द्यावा निपात्यते। पृथिवीत्यन्तोदात्तः। रुद्रसोमौ। 'रोदेर्णिलुक्च' (उणा०) इति रगन्तो रुद्रशब्दः। 'इन्द्रा पूषणौ'। श्वन्नुक्षन्पूषन्–' (उणा०) इति पूषा अन्तोदात्तो निपात्यते। शुक्रामन्थिनौ। मन्थिनिन्नन्तत्वादन्तोदात्तः। उत्तरपदग्रहणमुदात्तादावित्युत्तरपदविशेषणं यथा स्याद्बन्द्वविशेषणं मा भूत्। अनुदात्तादाविति विधिप्रतिषेधयोर्विषयविभागार्थम्॥ ३८७७। अन्तः (६-२-१४३)। अधिकारोऽयम्॥ ३८७८। थाथघञ्क्ताजबित्रकाणाम् (६-२-१४४)। 'थ' 'अथ' 'घञ्' 'क्त' 'अच्' 'अप्' 'इत्र' 'क' एतदन्तानां गतिकारकोपपदात्परेषामन्त उदात्तः। 'प्रभृथस्यायोः'। आवसथः। घञ्। प्रभेदः। क्तः। 'धर्ता वज्री पुरुष्टुतः'। पुरुषु बहुप्रदेशेषु स्तुत इति विग्रहः। अच्। प्रक्षयः। अप् प्रलवः। इत्र। प्रलवित्रम्। क। गोवृषः। मूलविभुजादित्वात्कः। गतिकारकोपपदादित्येव। सुस्तुतं भवता॥ ३८७९। सूपमानात्क्तः (६-२-१४५)। सोरुपमानाच्च परं क्तान्तमन्तोदात्तम्। 'ऋतस्य योनौ सुकृतस्य'। शशप्लुतः॥ ३८८०। संज्ञायामनाचितादीनाम् (६-२-१४६)। गतिकारकोपपदात्क्तान्तमन्तोदात्तमाचितादीन्वर्जयित्वा। उपहूतः शाकल्यः। परिजग्धः। कौण्डिन्यः। 'अन–' इति किम्।

आचितम्। आस्थापितम् ॥ ३८८१ । प्रवृद्धादीनां च (६-२-१४७)। एषां क्तान्तमुत्तरपद-मन्तोदात्तम् । प्रवृद्धः । प्रयुक्तः । असंज्ञार्थोऽयमारम्भः । आकृतिगणोऽयम् ॥ ३८८२ । कारकादुत्तश्रुतयोरेवाशिषि (६-२-१४८) । संज्ञायामन्त उदात्तः । देवदत्तः । विष्णुश्रुतः । 'कारकात्' किम् । संभूतो रामायणः । 'दत्तश्रुतयोः' किम् । देवपालितः । अस्मान्नियमादत्र 'संज्ञायामन–' (सू ३८८०) इति न । 'तृतीयाकर्मणि' (सू ३७८२) इति तु भवति । 'एव' किम् । 'कारकावधारणं' यथा स्यादुत्तश्रुतावधारणं मा भूत् । अकारकादपि दत्तश्रुत-योरन्त उदात्तो भवति । संश्रुतः । 'आशिषि' किम् । देवैः खाता देवखाता । आशिष्ये-वेत्येवमत्रेष्टो नियमः । तेनानाहृतो नदति देवदत्त इत्यत्र न । शङ्खविशेषस्य संज्ञेयम् । 'तृतीया कर्मणि' (सू ३७८२) इति पूर्वपदप्रकृतिस्वरत्वमेव भवति ॥ ३८८३ । इत्थंभूतेन कृतमिति च (६-२-१४९) । इत्थंभूतेन कृतमित्येतस्मिन्नर्थे यः समासस्तत्र क्तान्तमुत्तरपद-मन्तोदात्तं स्यात् । सुप्तप्रलपितम् । प्रमत्तगीतम् । कृतमिति क्रियासामान्ये करोतिर्नाभूतप्रा-दुर्भाव एव । तेन प्रलपिताद्यपि कृतं भवति । 'तृतीया कर्मणि' (सू ३७८२) इत्यस्या-पवादः । ३८८४ । अनो भावकर्मवचनः (६-२-१५०) । कारकात्परमनप्रत्ययान्तं भाववचनं कर्मवचनं चान्तोदात्तम् । पयःपानं सुखम् । राजभोजनाः शालयः । 'अनः' किम् । हस्ता-दायः । 'भा–' इति किम् । दन्तधावनम् । करणे ल्युट् । 'कारकात्' किम् । निदर्शनम् । ३८८५ । मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः (६-२-१५१) । कारकात्पराण्येता-न्युत्तरपदान्यन्तोदात्तानि तत्पुरुषे । कृत्स्वरापवादः । रथवर्त्म । पाणिनिकृतिः । छन्दोव्याख्या-नम् । राजशयनम् । राजासनम् । अश्वस्थानम् । ब्राह्मणयाजकः । गोक्रीतः। 'कारकात्' किम्। 'प्रभूतौ सङ्गतिम्' । अत्र 'तादौ चानिति–' (सू ३७८४) इति स्वरः ॥ ३८८६ । सप्तम्याः पुण्यम् (६-२-१५२) । अन्तोदात्तम् । अध्ययनपुण्यम् । 'तत्पुरुषे तुल्यार्थ–' (सू ३७३६) इति प्राप्तम् । 'सप्तम्याः' किम् । वेदेन पुण्यं वेदपुण्यम् ॥ ३८८७ । ऊनार्थकलहं तृतीयायाः। (६-२-१५३) । माषोनम् । माषविकलम् । वाक्कलहः । तृतीयापूर्वपदप्रकृतिस्वरापवादोऽयम् । अत्र केचिदर्थेति स्वरूपग्रहणमिच्छन्ति । धान्यार्थः । ऊनशब्देन त्वर्थनिर्देशार्थेन तदर्थानां ग्रहणमिति प्रतिपदोक्तत्वादेव सिद्धे तृतीयाग्रहणं स्पष्टार्थम् ॥ ३८८८ । मिश्रं चानुपसर्गम-सन्धौ (६-२-१५४) । पणबन्धेनैकार्थ्यं संधिः । तिलमिश्राः । सर्पिर्मिश्राः । 'मिश्रम्' किम् । गुडधानाः । 'अनुपसर्गम्' किम् । तिलसंमिश्राः । 'मिश्रग्रहणे सोपसर्गग्रहणस्य' इदमेव ज्ञापकम् । 'असंधौ' किम् । ब्राह्मणमिश्रो राजा । ब्राह्मणैः सह संहित ऐकार्थ्यमापन्नः ॥ ३८८९। नञो गुण-प्रतिषेधे संपाद्यर्हहितालमर्थास्तद्धिताः (६-२-१५५) । संपाद्याद्यर्थतद्धितान्तान्नञो गुणप्रतिषेधे वर्तमानात्परेऽन्तोदात्ताः। कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकं, न कार्णवेष्टकिकमकार्णवेष्टकिकम्। छेदमर्हति छैदिकः । न छैदिकोऽच्छैदिकः । न वत्सेभ्यो हितोऽवत्सीयः । न सन्तापाय प्रभवति असन्तापिकः । 'नञः' किम् । गर्दभरथमर्हति गार्दभरथिकः । विगार्दभरथिकः । 'गुणप्रतिषेधे किम् । गार्दभरथिकादन्योऽगार्दभरथिकः । गुणो हि तद्धितार्थे प्रवृत्तिनिमित्तं संपादितत्वाद्युच्यते तत्प्रतिषेधो यत्रोच्यते तत्रायं विधिः । कर्णवेष्टकाभ्यां न संपादि मुखमिति । 'संपादि–' इति किम् । पाणिनीयमधीते पाणिनीयः । न पाणिनीयः अपाणिनीयः। 'तद्धिताः' किम् । वोढुमर्हति

वोढा । न वोढा अवोढा ॥ ३८९० । यतोश्चातदर्थे (६-२-१५६)। यतौ यौ तद्धितौ तदन्तस्योत्तरपदस्य नञो गुणप्रतिषेधविषयात्परस्यान्त उदात्तः स्यात् । पाशानां समूहः पाश्या । न पाश्या अपाश्या । अदन्त्यम् । 'अतदर्थे' किम् । अपाद्यम् । 'तद्धितः' किम् । अदेयम् । 'गुणप्रतिषेधे' किम् । दन्त्यादन्यददन्त्यम् । 'तदनुबन्धग्रहणे नातदनुबन्धकस्य' इति नेह । अवामदेव्यम् ॥ ३८९१ । अच्कावशक्तौ (६-२-१५७) । अजन्तं कान्तं च नञः परमन्तोदात्तमशक्तौ गम्यायाम् । अपचः पक्तुमशक्तः । अविलिखः । 'अशक्तौ' किम् । अपचो दीक्षितः । गुणप्रतिषेध इत्येव । अन्योऽयं पचादपचः ॥ ३८९२ । आक्रोशे च (६-२-१५८) । नञः परावच्कावन्तोदात्तावाक्रोशे । अपचो जाल्मः । पक्तुं न शक्नोतीत्येवमाक्रोश्यते । अविक्षिपः ॥ ३८९३ । संज्ञायाम् (६-२-१५९) । नञः परमन्तोदात्तं संज्ञायामाक्रोशे । अदेवदत्तः । ३८९४ । कृत्योकेष्णुच्चार्वादयश्च (६-२-१६०) । नञः परेऽन्तोदात्ताः स्युः । अकर्तव्यः । उक् । अनागामुकः । इष्णुच् । अनलंकरिष्णुः । इष्णुज्ग्रहणे खिष्णुचोर्ग्रहणमिकारादेर्विधानसामर्थ्यात् । अनाढ्यंभविष्णुः । चार्वादिः । अचारुः । असाधुः । 'राजाह्नोश्छन्दसि' (गण १६१) । अराजा । अनहः । 'भाषायाम्' नञः स्वर एव ॥ ३८९५ । विभाषा तृन्नन्नतीक्ष्णशुचिषु (६-२-१६१) । तृन् अकर्ता । अन्न । अनन्नम् । अतीक्ष्णम् । अशुचि । पक्षेऽव्ययस्वरः ॥ ३८९६ । बहुव्रीह्याविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने (६-२-१६२) । एभ्योऽनयोरन्त उदात्तः । इदं प्रथममस्य स इदंप्रथमः । एतद्द्वितीयः । तत्पञ्चमः । 'बहुव्रीहौ' किम् । अनेन प्रथम इदंप्रथमः । 'तृतीया–' (सू ६९२) इति योगविभागात्समासः । 'इदमेतत्तद्भ्यः' किम् । यत्प्रथमः । 'प्रथमपूरणयोः' किम् । तानि बहून्यस्य तद्बहुः । 'क्रियागणने' किम् । अयं प्रथमः प्रधानं येषां त इदंप्रथमाः । द्रव्यगणनमिदम् । 'गणने' किम् । अयं प्रथम एषां त इदंप्रथमाः । इदंप्रधाना इत्यर्थः । उत्तरपदस्य कार्यित्वात्कपि पूर्वमन्तोदात्तम् । इदंप्रथमकाः । बहुव्रीहावित्यधिकारो 'वनं समासे' (सू ३९१२) इत्यतः प्राग्वेदितव्यः ॥ ३८९७ । सङ्ख्यायाः स्तनः (६-२-१६३) । बहुव्रीहावन्तोदात्तः । द्विस्तना । चतुःस्तना । 'संख्यायाः' किम् । दर्शनीयस्तना । 'स्तनः' किम् । द्विशिराः ॥ ३८९८ । विभाषा छन्दसि (६-२-१६४) । 'द्विस्तनां करोति' । ३८९९ । 'संज्ञायां मित्राजिनयोः' (६-२-१६५) । देवमित्रः । कृष्णाजिनम् । 'संज्ञायाम्' किम् । प्रियमित्रः । 'ऋषिप्रतिषेधोऽत्र मित्रे' (वा ३८५७) । विश्वामित्रर्षिः ॥ ३९०० । व्यवायिनोऽन्तरम् (६-२-१६६) । व्यवधानवाचकात्परमन्तरमन्तोदात्तम् । वस्त्रमन्तरं व्यवधायकं यस्य स वस्त्रान्तरः । 'व्यवायिनः' किम् । आत्मान्तरः । अन्यस्वभाव इत्यर्थः । ३९०१ । मुखं स्वाङ्गम् (६-२-१६७) । गौरमुखः । 'स्वाङ्गम्' किम् । दीर्घमुखा शाला ॥ ३९०२ । नाव्ययदिक्छब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः (६-२-१६८) । उच्चैर्मुखः । प्राङ्मुखः । गोमुखः । महामुखः । स्थूलमुखः । मुष्टिमुखः । पृथुमुखः । वत्समुखः । पूर्वपदप्रकृतिस्वरोऽत्र । गोमुष्टिवत्सपूर्वपदस्योपमानलक्षणोऽपि विकल्पोऽनेन बाध्यते ॥ ३९०३ । निष्ठोपमानादन्यतरस्याम् (६-२-१६९) । निष्ठान्तादुपमानवाचिनश्च परं मुखं स्वाङ्गं वान्तोदात्तं बहुव्रीहौ । प्रक्षालितमुखः । पक्षे 'निष्ठोपसर्ग–' (सू ३८४४) इति पूर्वपदान्तोदात्तत्वम् । पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरोऽपि भवति ।

उपमानम् । सिंहमुखः ॥ ३९०४ । जातिकालसुखादिभ्योऽनाच्छादनात्क्तोऽकृतमितप्रतिपन्नाः । (६-२-१७०) । सारङ्गजग्धः । मासजातः । सुखजातः । दुःखजातः । 'जातिकाल–' इति किम् । पुत्रजातः । 'अनाच्छादनात्' किम् । वस्त्रच्छन्नः । 'अकृत–' इति किम् । कुण्डकृतः । कुण्डमितः । कुण्डप्रतिपन्नः । अस्माज्ज्ञापकान्निष्ठान्तस्य परनिपातः ॥ ३९०५ । वा जाते (६-२-१७१) । जातिकालसुखादिभ्यः परो जातशब्दो वान्तोदात्तः । दन्तजातः । मासजातः ॥ ३९०६ । नञ्सुभ्याम् (६-२-१७२) । बहुव्रीहावुत्तरपदमन्तोदात्तम् । अव्रीहिः । सुमाषः ॥ ३९०७ । कपि पूर्वम् (६-२-१७३) । नञ्सुभ्यां परं यदुत्तरपदं तदन्तस्य समासस्य पूर्वमुदात्तं कपि परे । अब्रह्मबन्धुकः । सुकुमारीकः ॥ ३९०८ । ह्रस्वान्तेऽन्त्यात्पूर्वम् (६-२-१७४) ह्रस्वान्त उत्तरपदे समासे चान्त्यात्पूर्वमुदात्तं कपि नञ्सुभ्यां परं बहुव्रीहौ । अव्रीहिकः । सुमाषकः । पूर्वमित्यनुवर्तमाने पुनः पूर्वग्रहणं प्रवृत्तिभेदेन नियमार्थम् । ह्रस्वान्तेऽन्त्यादेव पूर्वपदमुदात्तं न कपि पूर्वमिति । अङ्गकः । कबन्तस्यैवान्तोदात्तत्वम् ॥ ३९०९ । बह्वोर्नञ्वदुत्तरपदभूम्नि (६-२-१७५) । उत्तरपदार्थबहुत्ववाचिनो बहोः परस्य पदस्य नञः परस्येव स्वरः स्यात् । बहुव्रीहिकः । बहुमित्रकः । 'उत्तरपद–' इति किम् । बहुषु मानोऽस्य स बहुमानः ॥ ३९१० । न गुणादयोऽवयवाः (६-२-१७६) । अवयववाचिनो बहोः परे गुणादयो नान्तोदात्ता बहुव्रीहौ । बहुगुणा रज्जुः । बह्वक्षरं पदम् । बह्वध्यायः ग्रन्थः । गुणादिराकृतिगणः । 'अवयवाः' किम् । बहुगुणो द्विजः । अध्ययनश्रुतसदाचारादयो गुणाः ॥ ३९११ । उपसर्गात्स्वाङ्गं ध्रुवमपर्शु (६-२-१७७) । प्रपृष्ठः । प्रललाटः । ध्रुवमेकरूपम् । 'उपसर्गात्' किम् । दर्शनीयपृष्ठः । 'स्वाङ्गम्' किम् । प्रशाखो वृक्षः । 'ध्रुवम्' किम् । उद्बाहुः । 'अपर्शु' किम् । विपर्शुः ॥ ३९१२ । वनं समासे (६-२-१७८) । समासमात्र उपसर्गादुत्तरपदं वनमन्तोदात्तम् । तस्येदमे प्रवणे ॥ ३९१३ । अन्तः (६-२-१७९) । अस्मात्परं वनमन्तोदात्तम् । अन्तर्वणो देशः । अनुपसर्गार्थमिदम् ॥ ३९१४ । अन्तश्च (६-२-१८०) । उपसर्गादन्तःशब्दोऽन्तोदात्तः । पर्यन्तः । समन्तः ॥ ३९१५ । न निविभ्याम् (६-२-१८१) । न्यन्तः । व्यन्तः । पूर्वपदप्रकृतिस्वरे यणि च कृते 'उदात्तस्वरितयोर्यणः–' (सू ३६५७) इति स्वरितः ॥ ३९१६ । परेरभितोभावि मण्डलम् (६-२-१८२) । परेः परमभित उभयतो भावो यस्यास्ति तत्कूलादि मण्डलं चान्तोदात्तम् । परिकूलम् । परिमण्डलम् ॥ ३९१७ । प्रादस्वाङ्गं संज्ञायाम् (६-२-१८३) । प्रगृहम् । 'अस्वाङ्गम्' किम् । प्रपदम् ॥ ३९१८ । निरुदकादीनि च (६-२-१८४) । अन्तोदात्तानि । निरुदकम् । निरुपलम् ॥ ३९१९ । अभेर्मुखम् (६-२-१८५) । अभिमुखम् । 'उपसर्गात्स्वाङ्गम्–' (सू ३९११) इति सिद्धे अबहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थं च । अभिमुखा शाला ॥ ३९२० । अपाच्च (६-२-१८६) । अपमुखम् । योगविभाग उत्तरार्थः ॥ ३९२१ । स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च (६-२-१८७) । अपादिमान्यन्तोदात्तानि । अपस्फिगम् । अपपूतम् । अपवीणम् । अञ्जस् । अपाञ्जः । अध्वन् । अपाध्वा । 'उपसर्गादध्वनः' (सू ९५३) इत्यस्याभाव इदम् । एतदेव च ज्ञापकं समासान्तानित्यत्वे । अपकुक्षि । सीरनाम । अपसीरम् । अपहलम् । नाम । अपनाम । स्फिगपूतवीणाकुक्षिग्रहणमबहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थं च ॥ ३९२२ । अधेरुपरिस्थम् (६-२-१८८) । अध्यारूढो दन्तोऽधिदन्तः । दन्तस्योपरिजातो

दन्तः । 'उपरिस्थम्' किम् । अधिकरणम् ॥ ३९२३ । अनोरप्रधानकनीयसी (६-२-१८९) । अनोः परमप्रधानवाचि कनीयश्चान्तोदात्तम् । अनुगतो ज्येष्ठमनुज्येष्ठः । पूर्वपदार्थप्रधानः प्रादिसमासः । अनुगतः कनीयाननुकनीयान् । उत्तरपदार्थप्रधानः । प्रधानार्थं च कनीयोग्रहणम् । 'अप्र–' इति किम् । अनुगतो ज्येष्ठोऽनुज्येष्ठः ॥ ३९२४ । पुरुषश्चान्वादिष्टः (६-२-१९०) । अनोः परोऽन्वादिष्टवाची पुरुषोऽन्तोदात्तः । अन्वादिष्टः पुरुषोऽनुपुरुषः । 'अन्वादिष्टः' किम् । अनुगतः पुरुषोऽनुपुरुषः ॥ ३९२५ । अतेरकृत्पदे (६-२-१९१) । अतेः परमकृदन्तं पदशब्दश्चान्तोदात्तः । अत्यङ्कुशो नागः । अतिपदा गायत्री । 'अकृत्पदे–' किम् । अतिकारकः । 'अतेर्धातुलोप इति वाच्यम्' (वा ३८६३) । इह मा भूत् । शोभनो गार्ग्योऽतिगार्ग्यः । इह च स्यात् । अतिक्रान्तः कारुमतिकारुकः ॥ ३९२६ । नेरनिधाने (६-२-१९२) निधानमप्रकाशता । ततोऽन्यदनिधानं प्रकाशनमित्यर्थः । निश्चितं मूलं निर्मूलम् । न्यक्षम् । 'अनिधाने' किम् । निहितो दण्डो निदण्डः ॥ ३९२७ । प्रतेरंश्वादयस्तत्पुरुषे (६-२-१९३) । प्रतेः परेऽश्वादयोऽन्तोदात्ताः । प्रतिगतोंऽशुः प्रत्यंशुः । प्रतिजनः । प्रतिराजा । समासान्तस्यानित्यत्वान्न टच् ॥ ३९२८ । उपाद्द्व्यजजिनमगौरादयः (६-२-१९४) । उपात्परं यद्द्व्यच्कमजिनं चान्तोदात्तं तत्पुरुषे गौरादीन्वर्जयित्वा । उपदेवः । उपेन्द्रः । उपाजिनम् । 'अगौरादयः' किम् । उपगौरः । उपतैषः । 'तत्पुरुषे' किम् । उपगतः सोमोऽस्य स उपसोमः ॥ ३९२९ । सोरवक्षेपणे (६-२-१९५) । सुप्रत्यवसितः । सुरत्र पूजायामेव वाक्यार्थस्त्वत्र निन्दा असूयया तथाभिधानात् । 'सोः' किम् । कुब्राह्मणः । 'अवक्षेपणे' किम् । सुब्रह्मणम् ॥ ३९३० । विभाषोत्पुच्छे (६-२-१९६) । तत्पुरुषे । उत्क्रान्तः पुच्छादुत्पुच्छः । यदा तु पुच्छमुदस्यति उत्पुच्छयतेः 'एरच्' (सू ३२३१) उत्पुच्छः, तदा थाथादिस्वरेण नित्यमन्तोदात्तत्वे प्राप्ते विकल्पोऽयम् । सेयमुभयत्र विभाषा । 'तत्पुरुषे' किम् । उदस्तं पुच्छं येन स उत्पुच्छः ॥ ३९३१ । द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ (६-२-१९७) । आभ्यां परेष्वेष्वन्तोदात्तो वा । 'द्विपाच्चतुष्पाच्च रथाय' । 'त्रिपाद्ऊर्ध्वः' । द्विदन् । 'त्रिमूर्धानं सप्तरश्मिम्' । मूर्धन्नित्यकृतसमासान्त एव मूर्धशब्दः । तस्यैतत्प्रयोजनमसत्यपि समासान्तेऽन्तोदात्तत्वं यथा स्यात् । एतदेव ज्ञापकम् 'अनित्यः सामासान्तो भवति' इति । यद्यपि च समासान्तः क्रियते तथापि बहुव्रीहिकार्यत्वात्तदेकदेशत्वाच्च समासान्तोदात्तत्वं पक्षे भवत्येव । द्विमूर्धः । त्रिमूर्धः । 'द्वित्रिभ्याम्' किम् । कल्याणमूर्धा । 'बहुव्रीहौ' किम् । द्वयोर्मूर्धा द्विमूर्धा ॥ ३९३२ । सक्थं चाक्रान्तात् (६-२-१९८) । गौरसक्थः । श्लक्ष्णसक्थः । 'आक्रान्तात्' किम् । चक्रसक्थः । समासान्तस्य षचश्चित्त्वान्नित्यमेवान्तोदात्तत्वं भवति ॥ ३९३३ । परादिश्छन्दसि बहुलम् (६-२-१९९) । छन्दसि परस्य सक्थशब्दस्यादिरुदात्तो वा । 'अजिसक्थमालभेत' । अत्र वार्तिकम्—

'परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते ।
पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः' ॥ (वा ३८६८–६९)

इति । परादिः । 'तुविजाता उरुक्षया' । परान्तः । 'नियेनं मुष्टिहत्यया' । 'यन्निचक्रः' पूर्वान्तः । 'विश्वायुर्धेहि' ॥—**इति समासस्वराः ।**

३९३४ । तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः (८-१-२७) । तिङन्तात्पदाद्गो त्रादीन्यनुदात्तान्येतयोः । पचति गोत्रम् । पचतिपचति गोत्रम् । एवं प्रवचनप्रहसनप्रकथन-प्रत्यायनादयः । कुत्सनाभीक्ष्ण्यग्रहणम् पाठविशेषणम् । तेनान्यत्रापि गोत्रादिग्रहणे कुत्सना-दावेव कार्यं ज्ञेयम् । 'गोत्रादीनि–' इति किम् । पचति पापम् । 'कुत्स–' इति किम् । खनति गोत्रं समेत्य कूपम् ॥ ३९३५ । तिङ्डतिङः (८-१-२८) । अतिङन्तात्पदात्परं तिङन्तं निहन्यते । 'अग्निमीळे' । ३९३६ । न लुट् (८-१-२९) । लुङन्तं न निहन्यते । श्वःकर्ता ॥ ३९३७ । निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् (८-१-३०) । एतैर्निपातैर्युक्तं न निह-न्यते । 'यदग्ने स्यामहत्वम्' । 'युवा यदी कृथः' । 'कुविदङ्ग आसन्' । 'अचित्तिभिश्चकृमा कच्चित्' । 'पुत्रासो यत्र पितरो भवन्ति' ॥ ३९३८ । नह प्रत्यारम्भे (८-१-३१) । नह्येत्यनेन युक्तं तिङन्तं नानुदात्तम् । प्रतिषेधयुक्त आरम्भः प्रत्यारम्भः । 'नह भोक्ष्यसे' । 'प्रत्यारम्भे' किम् । 'नह वैतस्मिँल्लोके दक्षिणमिच्छन्ति' ॥ ३९३९ । सत्यं प्रश्ने (८-१-३२) । सत्ययुक्तं तिङन्तं नानुदात्तं प्रश्ने । सत्यं भोक्ष्यसे । 'प्रश्ने' किम् । 'सत्य-मिद्वा उ त वयमिन्द्र स्तवाम' ॥ ३९४० । अङ्गाप्रातिलोम्ये (८-१-३३) । अङ्गेत्यनेन युक्तं तिङन्तं नानुदात्तम् । अङ्ग कुरु । 'अप्रातिलोम्ये' किम् । 'अङ्ग कूजसि वृषल इदानीं ज्ञास्यसि जाल्म' । अनभिप्रेतमसौ कुर्वन्प्रतिलोमो भवति ॥ ३९४१ । हि च (८-१-३४) । हियुक्तं तिङन्तं नानुदात्तम् । 'आ हि ष्मा याति' । आ हि रुहन्तम्' ॥ ३९४२ । छन्दस्यनेकमपि साकाङ्क्षम् (८-१-३५) । हीत्यनेन युक्तं साकाङ्क्षमनेकमपि नानुदात्तम् । 'अनृतं हि मत्तो वदति' । 'पाप्मा न चैनं पुनाति' । तिङन्तद्वयमपि न निहन्यते ॥ ३०४३ । यावद्यथाभ्याम् (८-१-३६) । आभ्यां योगे तिङन्तं नानुदात्तम् । यावद्भुङ्क्ते 'यथा चित्कण्व-मावतम्' ॥ ३९४४ । पूजायां नानन्तरम् (८-१-३७) । यावद्यथाभ्यां युक्तमनन्तरं तिङन्तं पूजायां नानुदात्तम् । यावत्पचति शोभनम् । यथा पचति शोभनम् । 'पूजायाम्' किम् । यावद्भुङ्क्ते । 'अनन्तरम्' किम् । यावद्देवदत्तः पचति शोभनम् । पूर्वेणात्र निघातः प्रतिषि-ध्यते ॥ ३९४५ । उपसर्गव्यपेतं च (८-१-३८) । पूर्वेणानन्तरमित्युक्तम् । उपसर्गव्यवधा-नार्थं वचनम् । यावत्प्रपचति शोभनम् । अनन्तरमित्येव । यावद्देवदत्तः प्रपचति शोभनम् ॥ ३९४६ । तुपश्यपश्यताहैः पूजायाम् (८-१-३९) । एभिर्युक्तं तिङन्तं न निहन्यते पूजायाम् । 'आदह स्वधामनु पुनर्गर्भत्वमेरिरे' ॥ ३९४७ । अहो च (८-१-४०) । एतद्योगे नानुदात्तं पूजायाम् । अहो देवदत्तः पचति शोभनम् ॥ ३९४८ । शेषे विभाषा (८-१-४१) । अहो इत्यनेन युक्तं तिङन्तं वानुदात्तं पूजायाम् । अहो कटं करिष्यति ॥ ३९४९ । पुरा च परीप्सायाम् (८-१-४२) । पुरेत्यनेन युक्तं वानुदात्तं त्वरायाम् । अधीष्व माणवक पुरा विद्योतते विद्युत् । निकटागामिन्यत्र पुराशब्दः । 'परीप्सायाम्' किम् । न ते स्म पुराधीयते । चिरातीतेऽत्र पुरा ॥ ३९५० । नन्वित्यनुज्ञैषणायाम् (८-१-४३) । नन्वित्यनेन युक्तं तिङन्तं नानुदात्तमनुज्ञाविषयप्रार्थनायाम् । ननु गच्छामि भोः । अनुजानीहि मां गच्छन्तमित्यर्थः । 'अनु–' इति किम् । अकार्षीः कटं त्वम् । ननु करोमि । पृष्टप्रतिवचनमेतम् ॥ ३९५१ । किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् (८-१-४४) । क्रियाप्रश्ने वर्तमानेन किंशब्देन युक्तं तिङन्तं

नानुदात्तम् । किं द्विजः पचत्याहोस्विद्भुञ्जीत । 'क्रिया–' इति किम् । साधनप्रश्ने मा भूत् । भक्तं पचत्यपूपान्वा । 'प्रश्ने' किम् । किं पठति । 'क्षेपोऽयम् । 'अनुपसर्गम्' किम् । किं प्रपचति उत प्रकरोति । 'अप्रतिषिद्धम्' किम् । किं किं द्विजो न पचति ॥ ३९५२ । लोपे विभाषा (८-१-४५) । किमोऽप्रयोग उक्तं वा । देवदत्तः पचत्याहोस्वित्पठति ॥ ३९५३ । एहिमन्ये प्रहासे लट् (८-१-४६ । एहिमन्य इत्यनेन युक्तं लडन्तं नानुदात्तं क्रीडायाम् । एहि मन्ये भक्तं भोक्ष्यसे नहिभोक्ष्यसे भुक्तं तत्त्वतिथिभिः । 'प्रहासे' किम् । एहि मन्यसे ओदनं भोक्ष्य इति सुष्ठु मन्यसे । गत्यर्थलोटा लट्–' (सू ३९५८) इत्यनेनैव सिद्धे नियमार्थोऽयमारम्भः । एहिमन्येयुक्ते प्रहास एव नान्यत्र । 'एहि मन्यसे ओदनं भोक्ष्ये' ॥ ३९५४ । जात्वपूर्वम् (८-१-४७) । अविद्यमानपूर्वं यज्जातु तेन युक्तं तिङन्तं नानुदात्तम् । जातु भोक्ष्यसे । 'अपूर्वम्' किम् । कटं जातु करिष्यसि ॥ ३९५५ । किंवृत्तं च चिदुत्तरम् (८-१-४८) । अविद्यमानपूर्वे चिदुत्तरं यत्किंवृत्तं तेन युक्तं तिङन्तं नानुदात्तम् । विभक्त्यन्तं डतरडतमान्तं किमो रूपं किंवृत्तम् । कश्चिद्भुङ्क्ते । कतरश्चित् । कतमश्चिद्वा । 'चिदुत्तरम्' किम् । को भुङ्क्ते । अपूर्वमित्येव । रामः किंचित्पठति ॥ ३९५६ । आहो उताहो चानन्तरम् (८-१-४९) । आहो उताहो इत्याभ्यां अपूर्वाभ्याम् युक्तं तिङन्तं नानुदात्तम् । आहो उताहो वा भुङ्क्ते । अनन्तरमित्येव । शेषे विभाषां वक्ष्यति । 'अपूर्व–' इति किम् । दिव आहो भुङ्क्ते ॥ ३९५७ । शेषे विभाषा (८-१-५०) । आभ्यां युक्तं व्यवहितं तिङन्तं वानुदात्तम् । आहो देवः पचति ॥ ३९५८ । गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् (८-१-५१) । गत्यर्थानां लोटा युक्तं तिङन्तं नानुदात्तम् । यत्रैव कारके लोट् तत्रैव लृडपि चेत् । आगच्छ देव ग्रामं द्रक्ष्यसि । उह्यन्तां देवदत्तेन शालयः । रामेण भोक्ष्यन्ते । 'गत्यर्थ–' किम् । पच देव ओदनं भोक्ष्यसेऽन्नम् । 'लोटा' किम् । आगच्छेर्दैव ग्रामं द्रक्ष्यस्येनम् । 'लृट्' किम् । आगच्छ देव देव ग्रामं पश्यस्येनम् । 'न चेत्' इति किम् । आगच्छ देव ग्रामं पिता ते ओदनं भोक्ष्यते । 'सर्वम्' किम् । आगच्छ देव ग्रामं त्वं चाहं च द्रक्ष्याव एनमित्यत्रापि निघातनिषेधो यथा स्यात् । यल्लोडन्तस्य कारकं तच्चान्यच्च लृडन्तेनोच्यते ॥ ३९५९ । लोट् च (८-१-५२) । लोडन्तं गत्यर्थलोटा युक्तं नानुदात्तम् । आगच्छ देव ग्रामं पश्य । 'गत्यर्थ–' इति किम् । पच देवौदनं भुङ्क्ष्वैनम् । 'लोट्' किम् । आगच्छ देव ग्रामं पश्यसि । न चेत्कारकं सर्वान्यदित्येव । आगच्छ देव ग्रामं पश्यत्वेनं रामः । सर्वग्रहणात्त्विह स्यादेव । आगच्छ देव ग्रामं त्वं चाहं च पश्याव । योगविभाग उत्तरार्थः ॥ ३९६० । विभाषितं सोपसर्गमनुत्तमम् (८-१-५३) । लोडन्तं गत्यर्थलोटा युक्तं तिङन्तं वानुदात्तम् । आगच्छ देव ग्रामं प्रविश । 'सोपसर्गम्' किम् । आगच्छ देव ग्रामं पश्य । 'अनुत्तमम्' किम् । आगच्छानि देव ग्रामं प्रविशानि ॥ ३९६१ । हन्त च (८-१-५४) । हन्तेत्येनेन युक्तमनुत्तमं लोडन्तं वानुदात्तम् । हन्त प्रविश । सोपसर्गमित्येव । हन्त कुरु । 'निपातैर्यद्यदि–' (सू ३९३७) इति निघातप्रतिषेधः । 'अनुत्तमम्' किम् । हन्त प्रभुञ्जावहै ॥ ३९६२ । आम एकान्तरमामन्त्रितमनन्तिके (८-१-५५) । आमः परमेकपदान्तरितमामन्त्रितं नानुदात्तम् । आम् पचसि देवदत्त ३ । 'एकान्तरम्' किम् । आम्प्रपचसि देवदत्त ३ । 'आमन्त्रितम्' किम् । आम्पचति देवदत्तः । 'अनन्तिके' किम् । आम्पचसि देवदत्त ॥

३९६३ । यद्धितुपरं छन्दसि (८-१-५६) । तिङन्तं नानुदात्तम् । 'उदसृजो यदङ्गिरः' । उशन्ति हि' । आख्यास्यामि तु ते । 'निपातैर्यत्–' (सू ३९३७) इति 'हि च' (सू ३९४१) इति 'तुपश्य–' (सू ३९४६) इति च सिद्धे नियमार्थमिदम् । एतेरेव परभूतैर्योगे नान्यैरिति । जाये स्वारोहावैहि । एहीति गत्यर्थलोटा युक्तस्य लोहावेति लोङन्तस्य निघातो भवति ॥ ३९६४ । चनचिदिवगोत्रादित्तद्धिताम्रेडितेष्वगतेः (८-१-५७) । एषु षट्सु परतस्तिङन्तं नानुदात्तम् । देवः पचति चन । देवः पचति चित् । देवः पचतीव । देवः पचति गोत्रम् । देवः पचतिकल्पम् । देवः पचतिपचति । 'अगतेः' किम् । देवः प्रपचति चन ॥ ३९६५ । चादिषु च (८-१-५८) । चवाहाहैवेषु परेषु तिङन्तं नानुदात्तम् । देवः पचति च खादति च । अगतेरित्येव । देवः प्रपचति च प्रखादति च । प्रथमस्य 'चवायोगे–' (सू ३९६६) इति निघातः प्रतिषिध्यते द्वितीयं तु निहन्यत एव ॥ ३९६६ । चवायोगे प्रथमा (८-१-५९) । चवेत्याभ्यां योगे प्रथमा तिङ्भिक्तिर्नानुदात्ता । गाश्च चारयति वीणां वा वादयति । 'इतो वा सातिमीमहे' । उत्तरवाक्ययोरनुषञ्जनीयतिङन्तापेक्षयेयं प्राथमिकी । 'योगे' किम् । पूर्वभूतयोरपि योगेऽनिघातार्थम् । प्रथमाग्रहणं द्वितीयादेस्तिङन्तस्य मा भूत् ॥ ३९६७ । हेति क्षियायाम् (८-१-६०) । हयुक्ता प्रथमा तिङ्भिक्तिर्नानुदात्ता धर्मव्यतिक्रमे । स्वयं ह रथेन याति ३ । उपाध्यायं पदातिं गमयति । 'क्षियाशी–' (सू ३६२३) इति प्लुतः ॥ ३९६८ । अहेति विनियोगे च (८-१-६१) । अहयुक्ता प्रथमा तिङ्भिक्तिर्नानुदात्ता नानाप्रयोजने नियोगे क्षियायां च । त्वमह ग्रामं गच्छ । त्वमह रथेनारण्यं गच्छ । क्षियायां स्वयमह रथेन यातिः३ । उपाध्यायं पदातिं नयति ॥ ३९६९ । चाहलोप एवेत्यवधारणम् (८-१-६२) । 'च' 'अह' एतयोर्लोपे प्रथमा तिङ्भिक्तिर्नानुदात्ता । देव एव ग्राम गच्छतु । देव एवारण्यं गच्छतु । ग्राममरण्यं च गच्छत्वित्यर्थः । देव एव ग्रामं गच्छतु । राम एवारण्यं गच्छतु । ग्रामं केवलमरण्यं केवलं गच्छत्वित्यर्थः । इहाहलोपः स च केवलार्थः । 'अवधारणम्' किम् । देव केव भोक्ष्यसे । न क्वचिदित्यर्थः । अनवक्लृप्तावेवकारः ॥ ३९७० । चादिलोपे विभाषा (८-१-६३) चवाहाहैवानां लोपे प्रथमा तिङ्भिक्तिर्नानुदात्ता । चलोपे । 'इन्द्र वाजेषु नोऽव' । शुक्ला व्रीहयो भवन्ति । श्वेता गा आज्याय दुहन्ति । वालोपे । व्रीहिभिर्यजेत । यवैर्यजेत ॥ ३९७१ । वैवावेति च छन्दसि (८-१-६४) । 'अहवै देवानामासीत्' । 'अयं वाव हस्त आसीत्' ॥ ३९७२ । एकान्याभ्यां समर्थाभ्याम् (८-१-६५) । आभ्यां युक्ता प्रथमा तिङ्भिक्तिर्नानुदात्ता छन्दसि । 'अजामेकां जिन्वति' । 'प्रजामेकां रक्षति' । तयोरन्यः पिप्पलं स्वाद्वत्ति' । 'समर्थाभ्याम्' किम् । एको देवानुपातिष्ठत् । एक इति सङ्ख्यापरं नान्यार्थम् ॥ ३९७३ । यद्वृत्तान्नित्यम् (८-१-६६) । यद्वृत्तात् परं तिङन्तं नानुदात्तम् । यत्र पदे यच्छब्दः तद्यद्वृत्तं यो भुङ्क्ते । यदद्यद्वायुर्वाति । अत्र 'व्यवहिते कार्यमिष्यते' ॥ ३९७४ । पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः (८-१-६७) । पूजनेभ्यः काष्ठादिभ्यः पूजितवचनमनुदात्तम् । काष्ठाध्यापकः 'मलोपश्च वक्तव्यः' (वा ४७३५) । दारुणाध्यापकः । अज्ञाताध्यापकः । समासान्तोदात्तत्वापवादः । 'एतत्समास इष्यते' । नेह । दारुणमध्यापक इति वृत्तिमतम् । पूजनादित्येव पूजितग्रहणे सिद्धे पूजितग्रहणमनन्तरपूजितलाभार्थम् । एतदेव ज्ञापकम् 'अत्र प्रकरणे पञ्चमी-

निर्देशेऽपि नानन्तर्यमाश्रीयते' इति ॥ ३९७५। सगतिरपि तिङ् (८-१-६८)। पूजनेभ्यः काष्ठादिभ्यस्तिङन्तं पूजितमनुदात्तम्। यत्काष्ठं प्रपचति। 'तिङ्ङतिङः' (सू ३९३५) इति निघातस्य 'निपातैर्यत्' (सू ३९३७) इति निषेधे प्राप्ते विधिरयम्। सगतिग्रहणाच्च गतिरपि निहन्यते। 'गतिग्रहणं उपसर्गग्रहणमिष्यते' (वा ४७३२)। नेह। यत्काष्ठं शुष्कीकरोति॥ ३९७६। कुत्सने च सुप्यगोत्रादौ (८-१-६९)। कुत्सने च सुबन्ते परे सगतिरगतिरपि तिङनुदात्तः। पचति पूति। प्रपचति पूति। पचति मिथ्या। 'कुत्सने' किम्। प्रपचति शोभनम्। 'सुपि' किम्। पचति क्लिश्नाति। 'अगोत्रादौ' किम्। पचति गोत्रम्। 'क्रियाकुत्सन इति वाच्यम्' (वा ४७३९)। कर्तुः कुत्सने मा भूत्। पचति पूतिर्दैवदत्तः। 'पूतिश्चानुबन्ध इति वाच्यम्' (वा ४७४१)। तेनायं चकारानुबन्धत्वादन्तोदात्तः। 'वा बह्वर्थमनुदात्तमिति वाच्यम्' (वा ४७४२)। पचन्तिपूति॥ ३९७७। गतिर्गतौ (८-१-७०)। अनुदात्तः। अभ्युद्धरति। 'गतिः' किम्। दत्तः पचति। 'गतौ' किम्। 'आमन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः'॥ ३९७८। तिङि चोदात्तवति (८-१-७१)। गतिरनुदात्तः। यत्प्रपचति। तिङ्ग्रहणमुदात्तवतः परिमाणार्थम्। अन्यथा हि यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गतिस्तत्र धातावेवोदात्तवति स्यात्प्रत्यये न स्यात्। 'उदात्तवति' किम्। प्रपचति॥

इति तिङन्तस्वराः।

अथ वैदिकवाक्येषु स्वरसञ्चारप्रकारः कथ्यते—'अग्निमीळे' इति प्रथमर्क्। तत्राग्निशब्दोऽव्युत्पत्तिपक्षे 'किषि-' (फिट् १) इत्यन्तोदात्त इति माधवः। वस्तुतस्तु घृतादित्वात्। व्युत्पत्तौ तु निप्रत्ययस्वरेण। अग्मुप्त्वादनुदात्तः। 'अमि पूर्वः' (सू १९४) इत्येकादेशस्तु 'एकादेश उदात्तेन-' (सू ३६५८) इत्युदात्तः। ईळे। 'तिङ्ङतिङः' (सू ३९३५) इति निघातः। संहितायां तु 'उदात्तादनुदात्तस्य-' (सू ३६६०) इतीकारः स्वरितः। 'स्वरितात्संहितायाम्-' (सू ३६६८) इति 'ळे' इत्यस्य प्रचयापरपर्याया एकश्रुतिः। पुरःशब्दोऽन्तोदात्तः 'पूर्वाधरावराणाम्-' (१९७५) इत्यसिप्रत्ययस्वरात्। हितशब्दोऽपि धात्वो निष्ठायाम् 'दधातेर्हिः' (सू ३०७६) इति ह्यादेशे प्रत्ययस्वरेणान्तोदात्तः। 'पुरोऽव्ययम्' (सू ७६८) इति गतिसंज्ञायां 'कुगति-' (सू ७६१) इति समासे समासान्तोदात्ते 'तत्पुरुषे तुल्यार्थ-' (सू ३७३६) इत्यव्ययपूर्वपदप्रकृतिस्वरे 'गतिकारकोपपदात्कृत्' (सू ३८७३) इति कृदुत्तरपदप्रकृतिस्वरे थाथादिस्वरे च पूर्वपूर्वौपमर्दैन प्राप्ते 'गतिरनन्तरः' (सू ३७८३) इति पूर्वपदप्रकृतिस्वरः। पुरःशब्दोकारस्य संहितायां प्रचये प्राप्ते 'उदात्तस्वरितपरस्य सन्नतरः' (सू ३६६९) इत्यनुदात्ततरः। यज्ञस्य। नडः प्रत्ययस्वरः। विभक्तेः सुप्त्वादनुदात्तत्वे स्वरितत्वम्। देवम्। पचाद्यच्। फिट्स्वरेण प्रत्ययस्वरेण चित्स्वरेण वान्तोदात्तः। ऋत्विक्छब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। होतृशब्दस्तृन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः। रत्नशब्दो 'नञ्विषयस्य' (फिट् २६) इत्याद्युदात्तः। रत्नानि दधातीति रत्नधाः। समासस्वरेण कृदुत्तरपदप्रकृतिस्वरेण वान्तोदात्तः। तमपः पित्त्वादनुदात्तत्वे स्वरितप्रचयावित्यादि यथाशास्त्रमुन्नेयम्॥ **इति स्वरप्रकरणम्॥**

इत्थं वैदिकशब्दानां दिङ्मात्रमिह दर्शितम्।
तदस्तु प्रीतये श्रीमद्भवानीविश्वनाथयोः॥

॥ श्रीरस्तु ॥

॥ वैयाकरणसिद्धान्तकौमुदी ॥

अथ लिङ्गानुशासनप्रकरणम् ।

१. 'लिङ्गम्' ॥ २. 'स्त्री' । अधिकारसूत्रे एते ॥ ३. 'ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः' । ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः । स्वस्रादिपञ्चकस्यैव ङीन्निषेधेन कर्त्रीत्यादेर्ङीपेकारान्तत्वात् । तिसृचतसृभ्यस्तु स्त्रियामादेशतया विधानेऽपि प्रकृत्योस्त्रिचतुरोर्ऋदन्तत्वाभावात् ॥ ४. 'अन्यूप्रत्ययान्तो धातुः' । अनिप्रत्ययान्त ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । अवनिः । चमूः । 'प्रत्ययग्रहणम्' किम् । देवयतेः क्विप् ऊठ् द्यूः । विशेष्यलिङ्गः ॥ ५. 'अशनिभरण्यरणयः पुंसि च' । इयमयं वाशनिः ॥ ६. 'मिन्यन्तः' । मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । भूमिः । ग्लानिः ॥ ७. 'वह्निवृष्ण्यग्नयः पुंसि' । पूर्वस्यापवादः ॥ ८. 'श्रोणियोन्यूर्मयः पुंसि च' । इयमयं वा श्रोणिः ॥ ९. 'क्तिन्नन्तः' । स्पष्टम् । कृतिरित्यादि ॥ १०. 'ईकारान्तश्च' । ईप्रत्ययान्तः स्त्री स्यात् । लक्ष्मीः । ईबन्तश्च स्त्रियां स्यात् देवी कुरुचरीत्यादि ॥ ११. 'ऊङाबन्तश्च' । कुरूः । विद्या ॥ १२. 'य्वन्तमेकाक्षरम्' । श्रीः । भूः । 'एकाक्षरम्' किम् । पृथुश्रीः ॥ १३. 'विंशत्यादिरानवतेः' । इयं विंशतिः । त्रिंशत् । चत्वारिंशत् । पञ्चाशत् । षष्टिः । सप्ततिः । अशीतिः । नवतिः ॥ १४. 'दुन्दुभिरक्षेषु' । इयं दुन्दुभिः । 'अक्षेषु' किम् । अयं दुन्दुभिर्वाद्यविशेषोऽसुरो वेत्यर्थः ॥ १५. 'नाभिरक्षत्रिये' । इयं नाभिः ॥ १६. 'उभावप्यन्यत्र पुंसि' । दुन्दुभिर्नाभिश्चोक्तविषयादन्यत्र पुंसि स्तः । नाभिः क्षत्रियः । कथं तर्हि 'समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्युपनीविनाभिभिः' इति भारविः । उच्यते । दृढभक्तिरित्यादाविव कोमलैरिति सामान्ये नपुंसकं बोध्यम् । वस्तुतस्तु 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति भाष्यात्पुंस्त्वमपीह साधु । अत एव 'नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान्' । 'द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामदे' इति मेदिनी । रभसोऽप्याह—'मुख्यराट्क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे' इति । एवमेवंविधेऽन्यत्रापि बोध्यम् ॥ १७. 'तलन्तः' । अयं स्त्रियां स्यात् । शुक्लस्य भावः शुक्लता । ब्राह्मणस्य कर्म ब्राह्मणता । ग्रामस्य समूहो ग्रामता । देव एव देवता ॥ १८. 'भूमिविद्युत्सरिल्लतावनिताभिधानानि' । भूमिर्भूः । विद्युत्सौदामिनी । सरिन्निम्नगा । लता वल्ली । वनिता योषित् । १९. 'यादो नपुंसकम्' । यादःशब्दः सरिद्वाचकोऽपि क्लीबं स्यात् ॥ २०. 'भाःस्रुक्स्रग्दृग्घृणिगुपानहः' । एते स्त्रियां स्युः ।

इयं भाः इत्यादि ॥ २१. 'स्थूणोर्णे नपुंसके च'। एते स्त्रियां क्लीबे च स्तः। स्थूणा–स्थूणम्। ऊर्णा–ऊर्णम्। तत्र स्थूणा काष्ठमयी द्विकर्णिका। ऊर्णा तु मेषादिलोम ॥ २२. 'गृहशशाभ्यां क्लीबे'। नियमार्थमिदम्। गृहशशपूर्वे स्थूणोर्णे यथासङ्ख्यं नपुंसके स्तः। गृहस्थूणम्। 'शशोर्णे शशलोमनि' इत्यमरः ॥ २३. 'प्रावृट्विप्रुट्रुट्तृट्विट्त्विषः'। एते स्त्रियां स्युः ॥ २४. 'दर्विविदिवेदिखनिशान्त्यश्रिवेशिकृष्योषधिकट्यङ्कुलयः'। एते स्त्रियां स्युः। पक्षे ङीप्। दर्वी–दर्विरित्यादि ॥ २५. 'तिथिनाडिरुचिर्वीचिनालिधूलिकेकिकेलिच्छविनीविराज्यादयः'। एते प्राग्वत्। इयं तिथिरित्यादि। अमरस्त्वाह—'तिथयो द्वयोः' इति। तथा च भारविः—'तस्य भुवि बहुतिथोस्तिथयः' इति। स्त्रीत्वे हि बहुतिथ्य इति स्यात्। श्रीहर्षश्च—'निखिलां निशि पौर्णिमातिथीन्' इति ॥ २६. 'शष्कुलिराजिकुट्यशनिवर्तिभ्रुकुटित्रुटिवलिपङ्क्तयः'। एतेऽपि स्त्रियां स्युः। इयं शष्कुलिः ॥ २७. 'प्रतिपदापद्विपत्संपच्छरत्संसत्परिषदुषःसंवित्क्षुत्पुन्मुत्समिधः'। इयं प्रतिपदित्यादि। उषा उच्छन्ती। उषाः प्रातरधिष्ठात्री देवता ॥ २८. आशीर्धूःपूर्गीर्द्वारः'। इयमाशीरित्यादि ॥ २९. 'अप्सुमनस्समासिकतावर्षाणां बहुत्वं च'। अबादीनां पञ्चानां स्त्रीत्वं स्याद्बहुत्वं च। आप इमाः। 'स्त्रियः सुमनसः पुष्पम्'। 'सुमना मालती जातिः' देववाची तु पुंस्येव। 'सुपर्वाणः सुमनसः'। बहुत्वं प्रायिकम्। 'एका च सिकता तैलदानेऽसमर्था' इत्यर्थवत्सूत्रे भाष्यप्रयोगात्। 'समांसमां विजायते' (सू १८१३) इत्यत्र 'समायां समायाम्' इति भाष्याच्च। 'विभाषा घ्राधेट्' (सू २३७६) इति सूत्रे 'आघ्रासातां सुमनसौ' इति वृत्तिव्याख्यायां हरदत्तोऽप्येवम् ॥ ३०. 'स्रक्त्वग्ज्योग्वाग्यवागूनौस्फिचः'। इयं स्रक्त्वक्ज्योक्वाक्यवागूः नौ स्फिक् ॥ ३१. 'तृटिसीमासम्बध्याः'। इयं तृटिः सीमासंबध्या ॥ ३२. चुल्लिवेणिखार्यश्च'। स्पष्टम् ॥ ३३. 'तारोराज्योत्स्नादयश्च'। 'शलाका स्त्रियां नित्यम्'। नित्यग्रहणमन्येषां क्वचिद्व्यभिचारं ज्ञापयति ॥ इति स्त्र्यधिकारः ॥

३४. 'पुमान्'। अधिकारोऽयम् ॥ ३५. 'घञबन्तः'। पाकः। त्यागः। करः। गरः। भावार्थ एवेदम्। नपुंसकत्वविशिष्टे भावे क्तल्युड्भ्यां स्त्रीत्वविशिष्टे तु क्तिन्नादिभिर्बाधेन परिशेषात्। कर्मादौ तु घञाद्यन्तमपि विशेष्यलिङ्गम्। तथा च भाष्यम्—'सम्बन्धमनुवर्तिष्यते' इति ॥ ३६. 'घाजन्तश्च'। विस्तरः। गोचरः। चयः। जयः इत्यादि ॥ ३७. 'भयलिङ्गभगपदानि नपुंसके'। एतानि नपुंसके स्युः। भयम्। लिङ्गम्। भगम्। पदम्। ३८. 'नङन्तः'। नङ्प्रत्ययान्तः पुंसि स्यात्। यज्ञः। यत्नः ॥ ३९. 'याच्ञा स्त्रियाम्'। पूर्वस्यापवादः ॥ ४०. 'क्यन्तो घुः'। किप्रत्ययान्तो घुः पुंसि स्यात्। आधिः। निधिः। उदधिः। 'क्यन्तः' किम्। दानम्। 'घुः' किम्। जञ्जिर्बीजम् ॥ ४१. 'इषुधिः स्त्री च'। इषुधिशब्दः स्त्रियां पुंसि च। पूर्वस्यापवादः ॥ ४२. 'देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि'। एतानि पुंसि स्युः। देवाः सुराः। असुरा दैत्याः। आत्मा क्षेत्रज्ञः। स्वर्गो नाकः। गिरिः पर्वतः। समुद्रोऽब्धिः। नखः कररुहः। केशः शिरोरुहः। दन्तो दशनः। स्तनः कुचः। भुजो दोः। कण्ठो गळः। खड्गः करवालः। शरो मार्गणः। पङ्कः कर्दम इत्यादि ॥ ४३. 'त्रिविष्टपत्रिभुवने नपुंसके'। स्पष्टम्। तृतीयं विष्टपं त्रिविष्टपम्। स्वर्गाभिधानतया पुंस्त्वे प्राप्तेऽयमारम्भः ॥ ४४. 'द्यौः स्त्रियाम्'। द्योदिवोः

तन्त्रेणोपादानमिदम् ॥ ४५. 'इषुबाहू स्त्रियां च' । चात्पुंसि ॥ ४६. 'बाणकाण्डौ नपुंसके च' । चात्पुंसि । त्रिविष्टपेत्यादिचतुःसूत्री देवासुरेत्यस्यापवादः ॥ ४७. 'नन्तः' । अयं पुंसि । राजा । तक्षा । न च चर्मवर्मादिष्वतिव्याप्तिः । 'मन्ब्यच्कोऽकर्तरि' इति नपुंसकप्रकरणे वक्ष्यमाणत्वात् । ४८. 'क्रतुपुरुषकपोलगुल्फमेघाभिधानानि' । क्रतुरध्वरः । पुरुषो नरः । कपोलो गण्डः । गुल्फः प्रपदः । मेघो नीरदः ॥ ४९. 'अभ्रं नपुंसकम्' । पूर्वस्यापवादः ॥ ५०. 'उकारान्तः' । अयं पुंसि स्यात् । प्रभुः । इक्षुः । 'हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम् । द्वयोः कपोलावयवे' इति मेदिनी । 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः । एवंजातीयकविशेषवचनानाक्रान्तस्तु प्रकृतसूत्रस्य विषयः । उक्तं च—'लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः' इति । एवमन्यत्रापि ॥ ५१. धेनुरज्जुकुहुसरयुतनुरेणुप्रियङ्गवः स्त्रियाम्' ॥ ५२. 'समासे रज्जुः पुंसि च' । कर्कटरज्ज्वा–कर्कटरज्जुना ॥ ५३. 'श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके' ॥ ५४. 'वसु चार्थवाचि' । 'अर्थवाचि' इति किम् । 'वसुर्मयूखाग्निधनाधिपेषु' ॥ ५५. 'मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च' । चात्पुंसि । अयं मद्गुः । इदं मद्गु ॥ ५६. 'रुत्वन्तः' । मेरुः । सेतुः ॥ ५७. 'दारुकसेरुजतुवस्तुमस्तूनि नपुंसके' । रुत्वन्त इति पुंस्त्वस्यापवादः । इदं दारु ॥ ५८. 'सक्तुर्नपुंसके च' । चात्पुंसि । सक्तुः–सक्तु । ५९. 'प्राग्रश्मेरकारान्तः' । 'रश्मिदिवसाभिधानानि' इति वक्ष्यति ततः प्राक् एतस्मादकारान्त इत्यधिक्रियते ॥ ६०. 'कोपधः' । कोपधोऽकारान्तः पुंसि स्यात् । स्तबकः । कल्कः ॥ ६१. 'चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके' । पूर्वसूत्रापवादः ॥ ६२. 'कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च' । चात्पुंसि । अयं कण्टकः । इदं कण्टकमित्यादि ॥ ६३. 'टोपधः' । टोपधोऽकारान्तः पुंसि स्यात् । घटः । पटः ॥ ६४. 'किरीटमुकुटललाटवटविटशृङ्गाटकराटलोष्टानि नपुंसके' । किरीटमित्यादि ॥ ६५. 'कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च' । चात्पुंसि । कुटः । कुटमित्यादि ॥ ६६. 'णोपधः' । णोपधोऽकारान्तः पुंसि स्यात् । गुणः । गणः । पाषाणः ॥ ६७. 'ऋणलवणपर्णतोरणरणोष्णानि नपुंसके' । पूर्वसूत्रापवादः ॥ ६८. 'कार्षापणस्वर्णसुवर्णव्रणचरणवृषणविषाणचूर्णतृणानि नपुंसके च' । चात्पुंसि ॥ ६९. 'थोपधः' । रथः ॥ ७०. 'काष्ठपृष्ठसिक्थोक्थानि नपुंसके' । इदं काष्ठमित्यादि । 'काष्ठा दिगर्था स्त्रियाम्' । इमाः काष्ठाः ॥ ७१. 'तीर्थप्रोथयूथगाथानि नपुंसके च' । चात्पुंसि । अयं तीर्थः । इदं तीर्थम् ॥ ७२. 'नोपधः' । अदन्तः पुंसि । इनः । फेनः ॥ ७३. 'जघनाजिनतुहिनकाननवनव्रजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नाने नपुंसके' । पूर्वस्यापवादः ॥ ७४. 'मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनालानसम्मानभवनवसनसम्भावनविभावनविमानानि नपुंसके च' । चात्पुंसि । अयं मानः । इदं मानम् । ७५. 'पोपधः' । अदन्तः पुंसि । यूपः । दीपः । सर्पः ॥ ७६. 'पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके' । इदं पापमित्यादि ॥ ७७. 'शूर्पकुतपकुणपट्टीपविटपानि नपुंसके च' । अयं शूर्पः । इदं शूर्पमित्यादि ॥ ७८. 'भोपधः' । स्तम्भः । कुम्भः ॥ ७९. 'तलमं नपुंसकम्' । पूर्वस्यापवादः ॥ ८०. 'जृम्भं नपुंसके च' ।

जृम्भम्–जृम्भः ॥ ८१. 'मोपधः' । सोमः । भीमः ॥ ८२. 'रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके' । इदं रुक्ममित्यादि ॥ ८३. 'सङ्ग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च' । चात्पुंसि । अयं सङ्ग्रामः । इदं सङ्ग्रामम् ॥ ८४. 'योपधः' । समयः । हयः ॥ ८५. 'किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके' । स्पष्टम् ॥ ८६. 'गोमयकषायमलयान्वयाव्ययानि नपुंसके च' । गोमयः–गोमयम् ॥ ८७. 'रोपधः' । क्षुरः । अङ्कुरः ॥ ८८. 'द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनारतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रभीरगभीरक्रूरविचित्रकेयूरकेदारोदराजस्रशरीरकन्दरमन्दारपञ्जरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रनक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्कुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्त्रपात्रक्षत्त्राणि नपुंसके' । इदं द्वारमित्यादि ॥ ८९. 'शुक्रमदेवतायाम्' । इदं शुक्रं रेतः ॥ ९०. 'चक्रवक्त्रान्धकारसारावारपारक्षीरतोमरभृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च' । चात्पुंसि । चक्रः–चक्रमित्यादि ॥ ९१. 'षोपधः' । वृषः । वृक्षः ॥ ९२. 'शिरीषशीर्षाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके' ॥ ९३. 'यूषकरीषामिषविषवर्षाणि नपुंसके च' । चात्पुंसि । अयं यूषः । इदं यूषमित्यादि ॥ ९४. 'सोपधः' । वत्सः । वायसः । महानसः । ९५. 'पनसबिसबुससाहसानि नपुंसके' ॥ ९६. 'चमसांसरसनिर्यासोपवासकार्पासवासभासकासकांसमांसानि नपुंसके च' । इदं चमसम् । अयं चमस इत्यादि ॥ ९७. 'कंसं चाप्राणिनि' । 'कंसोऽस्त्री पानभाजनम्' । प्राणिनि तु कंसो नाम कश्चिद्राजा ॥ ९८. 'रश्मिदिवसाभिधानानि' । एतानि पुंसि स्युः । रश्मिर्मयूखः । दिवसो घस्रः ॥ ९९. 'दीधितिः स्त्रियाम्' पूर्वस्यापवादः ॥ १००. 'दिनाहनी नपुंसके' । अयमप्यपवादः ॥ १०१. 'मानाभिधानानि' । एतानि पुंसि स्युः । कुडवः । प्रस्थः ॥ १०२. 'द्रोणाढकौ नपुंसके च' । इदं द्रोणम् । अयं द्रोणः ॥ १०३. 'खारीमानिके स्त्रियाम्' । इयं खारी । इयं मानिका ॥ १०४. 'दाराक्षतलाजासूनां बहुत्वं च' । इमे दाराः ॥ १०५. 'नाड्यपजनोपपदानि व्रणाङ्गपदानि' । यथासङ्ख्यं नाड्याद्युपपदानि व्रणादीनि पुंसि स्युः । अयं नाडीव्रणः । अपाङ्गः । जनपदः । व्रणादीनामुभयलिङ्गत्वेऽपि क्लीबत्वनिवृत्त्यर्थं सूत्रम् ॥ १०६. 'मरुद्गुरुत्तरदत्विजः' । अयं मरुत् ॥ १०७. 'ऋषिराशिदतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः' । एते पुंसि स्युः । अयमृषिः । १०८. 'ध्वजगजमुञ्जपुञ्जाः' । एते पुंसि ॥ १०९. 'हस्तकुन्तान्तव्रातवातदूतधूर्तसूतचूतमुहूर्ताः' । एते पुंसि । अमरस्तु 'मुहूर्तोऽस्त्रियाम्' इत्याह ॥ ११०. 'षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः' । अयं षण्डः ॥ १११. 'वंशांशपुरोडाशाः' । अयं वंशः । पुरो दाश्यते पुरोडाशः । कर्मणि घञ् । भावव्याख्यानयोः प्रकरणे 'पौरोडाशपुरोडाशात्ष्टन्' (सू १४४९) इति, विकारप्रकरणे 'व्रीहेः पुरोडाशे' (सू १५२८) इति च निपातनात्प्रकृतसूत्र एव निपातनाद्वा दस्य डत्वम् । 'पुरोडाशभुजामिष्टम्' इति माघः ॥ ११२. 'हृदकन्दकुन्दबुद्बुदशब्दाः' । अयं हृदः ॥ ११३. 'अर्घपथिमथ्यभुक्षिस्तम्बनितम्बपूगाः' । अयमर्घः ॥ ११४. 'पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धस्कन्धमृदङ्गसङ्गसमुद्रपुङ्गाः' । अयं पल्लव इत्यादि ॥ ११५. 'सारथ्यतिथिकुक्षिवस्तिपाण्यञ्जलयः' । एते पुंसि । अयं सारथिः ॥

इति पुंल्लिङ्गाधिकारः ।

११६. 'नपुंसकम्' । अधिकारोऽयम् ॥ ११७. 'भावे ल्युडन्तः' । हसनम् । 'भावे' किम् । पचनोऽग्निः । इध्मव्रश्चनः कुठारः ॥ ११८. 'निष्ठा च' । भावे या निष्ठा तदन्तं क्लीबं स्यात् । हसितम् । गीतम् ॥ ११९. 'त्वष्यञौ तद्धितौ' । शुक्लत्वम्–शौक्ल्यम् । ष्यञः षित्त्वसामर्थ्यात्पक्षे स्त्रीत्वम् । चातुर्यम्–चातुरी । सामग्र्यम्–सामग्री । औचित्यम्–औचिती ॥ १२०. 'कर्मणि च ब्राह्मणादिगुणवचनेभ्यः' । ब्राह्मणस्य कर्म ब्राह्मण्यम् ॥ १२१. 'यद्यढग्यगञ्यक्वुञ्छाश्च भावकर्मणि' । एतदन्तानि क्लीबानि । 'स्तेनाद्यन्नलोपश्च' (सू १७९०) स्तेयम् । 'सख्युर्यः' (सू १७९१) । सख्यम् । 'कपिज्ञात्योर्ढक्' (सू १७९२) । कापेयम् । 'पत्यन्तपुरोहितादिभ्यो यक्' (सू १७९३) । आधिपत्यम् । 'प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्' (सू १७९४) । औष्ट्रम् । 'हायनान्तयुवादिभ्योऽण्' (सू १७९५) । द्वैहायनम् । द्वन्द्वमनोज्ञादिभ्यो वुञ् । पितापुत्रकम् । 'होत्राभ्यश्छः' (सू १८००) । अच्छावाकीयम् । 'अव्ययीभावः–' (सू ६५९) । अधिस्त्रि ॥ १२२. 'द्वन्द्वैकत्वम्' । पाणिपादम् ॥ १२३. 'अभाषायां हेमन्तशिशिरावहोरात्रे च' । स्पष्टम् ॥ १२४. 'अनञ्कर्मधारयस्तत्पुरुषः' । अधिकारोऽयम् ॥ १२५. 'अनल्पे छाया' । शरच्छायम् ॥ १२६. 'राजामनुष्यपूर्वा सभा' । इनसभमित्यादि ॥ १२७. 'सुरासेनाच्छायाशालानिशा स्त्रियां च' ॥ १२८. 'परवत्' । अन्यस्तत्पुरुषः परवल्लिङ्गः स्यात् । 'रात्राह्नाहाः पुंसि' (सू ८१४) ॥ १२९. 'अपथपुण्याहे नपुंसके' ॥ १३०. 'सङ्ख्यापूर्वा रात्रिः' । त्रिरात्रम् । 'सङ्ख्यापूर्वा' इति किम् । सर्वरात्रः । १३१. 'द्विगुः स्त्रियां च' । व्यवस्थया । पञ्चफली । त्रिभुवनम् ॥ १३२. 'इषुसन्तः' । हविः । धनुः ॥ १३३. 'अर्चिः स्त्रियां च' । इसन्तत्वेऽप्यर्चिः स्त्रियां नपुंसके च स्यात् । इयमिदं वार्चिः ॥ १३४. 'छदिः स्त्रियामेव' । इयं छदिः । छाद्यतेऽनेनेति छदेश्चुरादिण्यन्तात् 'अर्चिशुचि–' इत्यादिना इस् । 'इस्मन्' इत्यादिना ह्रस्वः । 'पटलं छदिः' इत्यमरः । तत्र पटलसाहचर्याच्छदिषः क्लीबतां वदन्तोऽमरव्याख्यातार उपेक्ष्याः ॥ १३५. 'मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि' । एतेषामभिधायकानि क्लीबे स्युः । मुखमाननम् । नयनं लोचनम् । लोहं कालम् । वनं गहनम् । मांसमामिषम् । रुधिरं रक्तम् । कार्मुकं शरासनम् । विवरं बिलम् । जलं वारि । हलं लाङ्गलम् । धनं द्रविणम् । अन्नमशनम् । अस्यापवादानाह त्रिसूत्र्या ॥ १३६. 'सीरार्थोदनाः पुंसि' ॥ १३७. वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च' । वक्त्रो वक्त्रम् । नेत्रो नेत्रम् । अरण्योऽरण्यम् । गाण्डीवो गाण्डीवम् ॥ १३८. 'अटवी स्त्रियाम्' ॥ १३९. 'लोपधः' । कुलम्–कूलम् । स्थलम् ॥ १४०. 'तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि' । अयं तूलः ॥ १४१. 'शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवालबालनिगलपलालविडालखिलशूलाः पुंसि च' । चात्क्लीबे । इदं शीलमित्यादि ॥ १४२. 'शतादिः सङ्ख्या' । शतम् । सहस्रम् । 'शतादिः' इति किम् । एको द्वौ बहवः । 'सङ्ख्या' इति किम् । शतशृङ्गो नाम पर्वतः ॥ १४३. 'शतायुतप्रयुताः पुंसि च' । अयं शतः । इदं शतमित्यादि ॥ १४४. 'लक्षा कोटिः स्त्रियाम्' । इयं लक्षा । इयं कोटिः । 'वा लक्षा नियुतं च तत्' इत्यमरात्क्लीबेऽपि लक्षम् । १४५. 'शङ्कुः पुंसि' । सहस्रः क्वचित् । अयं सहस्रः । इदं सहस्रम् ॥ १४६. 'मन्ब्यच्कोऽकर्तरि' । मन्प्रत्ययान्तो ब्यच्कः क्लीबः स्यान्न तु

कर्तरि । वर्म । चर्म । 'द्यच्कः' किम् । अणिमा । महिमा । 'अकर्तरि' किम् । ददाति इति दामा ॥ १४७. 'ब्रह्मन्पुंसि च' । अयं ब्रह्मा । इदं ब्रह्म ॥ १४८. 'नामरोमणी नपुंसके' । 'मन्द्यच्कः–' इत्यस्यायं प्रपञ्चः ॥ १४९. 'असन्तो द्यच्कः' । यशः । मनः । तपः । 'द्यच्कः' किम् । चन्द्रमाः ॥ १५०. 'अप्सराः स्त्रियाम्' । एता अप्सरसः । प्रायेणायं बहुवचनान्तः ॥ १५१. 'त्रान्तः' । पत्त्रम् । छत्त्रम् ॥ १५२. 'यात्रामात्राभस्त्रादंष्ट्रावस्त्राः स्त्रियामेव' ॥ १५३. 'भृत्रामित्रछात्त्रपुत्रमन्त्रवृत्रमेद्रोष्ट्राः पुंसि' । अयं भृत्रः । न मित्रममित्रः । 'तस्य मित्राण्यमित्रास्ते' इति माघः । 'ख्यातामित्रौ मित्रे च' इति च । यत्तु 'द्विषोऽमित्रे' (सू ३१११) इति सूत्रे हरदत्तेनोक्तम्—'अमेर्द्विषदित्यौणादिक इत्रच् । अमैरमित्रं मित्रस्य व्यथयेत्' इत्यादौ मध्योदात्तस्तु चिन्त्यः । नञ्समासेऽप्येवम् । परवल्लिङ्गतापि स्यादिति तु तत्र दोषान्तरम्' इति, तत्प्रकृतसूत्रापर्यालोचनमूलकम् । स्वरदोषोद्भावनमपि 'नञो जरमरमित्रमृताः' (सू ३८५०) इति षाष्ठसूत्रास्मरणमूलकमिति दिक् ॥ १५४. 'पत्त्रपात्रपवित्रसूत्रच्छत्राः पुंसि च' ॥ १५५. 'बलकुसुमशुल्बयुद्धपत्तनरणाभिधानानि' । बलं वीर्यम् ॥ १५६. 'पद्मकमलोत्पलानि पुंसि च' । पद्मादयः शब्दाः कुसुमाभिधायित्वेऽपि द्विलिङ्गाः स्युः । अमरोऽप्याह—'वा पुंसि पद्मं नलिनम्' इति । एवं च 'अर्धर्चादिसूत्रे तु जलजे पद्मं नपुंसकमेव' इति वृत्तिग्रन्थो मतान्तरेण ज्ञेयः ॥ १५७. 'आहवसङ्ग्रामौ पुंसि' ॥ १५८. 'आजिः स्त्रियामेव' ॥ १५९. 'फलजातिः' । फलजातिवाचिशब्दो नपुंसकं स्यात् । आमलकम् । आम्रम् ॥ १६०. 'वृक्षजातिः' । स्त्रियामेव क्वचिदेवेदम् । हरीतकी ॥ १६१. 'वियज्जगत्सकृत्शकन्पृषच्छकृच्छकृदुदश्चितः' । एते क्लीबाः स्युः ॥ १६२. 'नवनीतावतानृतामृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि' ॥ १६३. 'श्राद्धकुलिशदैवपीठकुण्डाङ्गदधिसक्थ्यक्ष्यस्थ्यास्पदाकाशकण्वबीजानि' । एतानि क्लीबे स्युः ॥ १६४. 'दैवं पुंसि च' । दैवम्–दैवः ॥ १६५. 'धान्याज्यसस्यरूप्यपण्यवर्ण्यधृष्यहव्यकव्यकाव्यसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतूर्यसैन्यानि' । इदं धान्यमित्यादि ॥ १६६. 'द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचवरशरबृन्दारकाणि' ॥ १६७. 'अक्षमिन्द्रिये' 'इन्द्रिये' किम् । रथाङ्गादौ मा भूत् ॥

इति नपुंसकाधिकारः ।

१६८. 'स्त्रीपुंसयोः' । अधिकारोऽयम् ॥ १६९. 'गोमणिर्यष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिर्मसिमरीचयः' । इयमयं वा गौः ॥ १७०. 'मृत्युर्साधुकर्कन्धुकिष्कुकण्डुरेणवः' । इयमयं वा मृत्युः ॥ १७१. 'गुणवचनमुकारान्तं नपुंसकं च' । त्रिलिङ्गमित्यर्थः । पटु–पटुः–पट्वी ॥ १७२. 'अपत्यार्थतद्धिते' । औपगवः–औपगवी ॥

इति स्त्रीपुंसाधिकारः ।

१७३. 'पुंनपुंसकयोः' । अधिकारोऽयम् ॥ १७४. 'घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः' । अयं घृतः । इदं घृतम् ॥ १७५. 'शृङ्गार्घनिदाघोद्यमशल्यदृढाः' । अयं शृङ्गः । इदं शृङ्गम् ॥ १७६. 'व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्मार्धर्चदर्भपुच्छाः' । अयं व्रजः । इदं व्रजम् ॥ १७७. 'कबन्धौषधायुधान्ताः' । स्पष्टम् ॥ १७८. 'दण्डमण्डखण्डशवसैन्धवपार्श्वाकाशकुशकाशाङ्कुशकुलिशाः' । एते पुंनपुंसकयोः स्युः । 'कुशो रामसुते दर्भे योक्रे द्वीपे कुशं

जले' इति विश्वः । शलाकावाची तु स्त्रियाम् । तथा च 'जानपद–' (सू ५००) आदिसूत्रेणायोविकारे ङीषि । कुशी । दारुणि तु टाप् 'कुशा वानस्पत्याः स्थ ता मा यात' इति श्रुतिः । 'अतः कृकमि–' (सू १६०) इति सूत्रे 'कुशाकर्णीषु' इति प्रयोगश्च । व्याससूत्रे च—'हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दः' इति । तत्र शारीरकभाष्येऽप्येवम् । एवं च श्रुतिसूत्रभाष्यानामेकवाक्यत्वे स्थित आच्छन्द इत्याङ्प्रश्लेषादिपरो भामतीग्रन्थः प्रौढिवादमात्रपर इति विभावनीयं बहुश्रुतैः ॥ १७९. 'गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च' ॥

इति पुंनपुंसकाधिकारः ।

१८०. 'अवशिष्टलिङ्गम्' ॥ १८१. 'अव्ययं कतियुष्मदस्मदः' ॥ १८२. 'ष्णान्ता सङ्ख्या' । शिष्टा परवत् एकः पुरुषः । एका स्त्री । एकं कुलम् ॥ १८३. 'गुणवचनं च' । शुक्लः पटः । शुक्ला पटी । शुक्लं वस्त्रम् ॥ १८४. 'कृत्याश्च' ॥ १८५. 'करणाधिकरणयोर्ल्युट्' । १८६. 'सर्वादीनि सर्वनामानि' । स्पष्टार्थेयं त्रिसूत्री ॥

इति लिङ्गानुशासनप्रकरणम् ।

॥ इति श्रीभट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी समाप्ता ॥



॥ श्रीरस्तु ॥

॥ अकाराद्यनुक्रमेण कौमुद्युत्तरार्धगतसूत्रसूचिकाः ॥

सूत्रम्		पार्श्वम्
	अ	
३१८६	अकर्तरि च कारके०(३-३-१९)	६६८
२६९३	अकर्मकाच्च (१-३-२६)	४०२
२७०८	अकर्मकाच्च (१-३-३५)	४०७
२७१८	अकर्मकाच्च (१-३-४५)	४१०
३८६४	अकर्मधारये० (६-२-१३०)	७५७
२२९८	अकृत्सार्वधातुक० (७-४-२५)	७६
३८०७	अके जीविकार्थे (६-२-७३)	७५३
३२४७	अक्षेषु ग्लहः (३-३-७०)	६८०
२३३८	अक्षोऽन्यतरस्याम् (३-१-७५)	१०७
३२५६	अगारैकदेशे प्रघणः०(३-३-७९)	६८२
३६११	अग्नीत्प्रेषणे परस्य च(८-२-९२)	७३६
३००१	अग्नौ चेः (३-२-९१)	५३०
२८९२	अग्नौ परिचाय्योप०(३-१-१३१)	४९३
३४६२	अग्राद्यत् (४-४-११६)	७२६
३५५३	अङितश्च (६-४-१०३)	७३१
३५२२	अङ्ग इत्यादौ च (६-१-११९)	७२९
३६१५	अङ्गयुक्तं तिङाकाङ्क्षम्(८-२-९६)	७३६
३८०४	अङ्गानि मैरेये (६-२-७०)	७५३
३९४०	अङ्गाप्रातिलोम्ये (८-१-३३)	७६३
३०७८	अच उपसर्गात्तः (७-४-४७)	५५०
३६७८	अचः कर्तृयकि (६-१-१९५)	७४१
२७६८	अचः कर्मकर्तरि (३-१-६२)	४४८
२२९४	अचस्तास्वत्थल्य० (७-२-६१)	७३
२५४१	अचि विभाषा (८-२-२१)	२६३
२८४२	अचो यत् (३-१-९७)	४७९
३८९१	अच्कावशक्तौ (६-२-१५७)	७६०
२८५३	अजर्यं सङ्गतम् (३-१-१०५)	४८२
२१७६	अजादेर्द्वितीयस्य (६-१-२)	१०
२८७६	अजिव्रज्योश्च (७-३-६०)	४८९
२२९२	अजेर्व्यघञपोः (२-४-५६)	७१
२६१४	अज्झनगमां सनि (६-४-१६)	३२९
३०४७	अञ्चेः पूजायाम् (७-२-५३)	५४०
३७१६	अञ्चेश्छन्दस्यसर्व०(६-१-१७०)	७४७
३०२४	अञ्चोऽनपादाने (८-२-४८)	५३५
२५४६	अञ्जेः सिचि (७-२-७१)	२७१
२४७६	अञ्जिक्रीड्यगालवयोः (७-३-९९)	२०९
२७५४	अणावकर्मकाच्चित्त०(१-३-८८)	४२७
३८०९	अणि नियुक्ते (६-२-७५)	७५४
३१८१	अण्कर्मणि च (३-३-१२)	६६६
३२१९	अणिनुणः (५-४-१५)	६७५
२२४८	अत आदेः (७-४-७०)	४०
२४६७	अत उत्सार्वधातुके(६-४-११०)	२०६
२२८२	अत उपधायाः (७-२-११६)	६०
२२६०	अत एकहल्मध्ये (६-४-१२०)	४९
३९२५	अतेरकृत्पदे (६-२-१९१)	७६२
२१७०	अतो दीर्घो यञि (७-३-१०१)	८
२२१२	अतो येयः (७-२-८०)	२४
२३०८	अतो लोपः (६ ४-४८)	८५
२३३०	अतो ल्रान्तस्य (७-२-२)	९९
२१८४	अतो हलादेर्लघोः (७-२-७)	६०
२२०२	अतो हेः (६-४-१०५)	२०
२६२०	अत्र लोपोऽभ्यासस्य(७-४-५८)	३३२
२५६६	अत्स्मृदृत्वरप्रथ० (७-४-९५)	२८७
२४२६	अदः सर्वेषाम् (७-३-१००)	१८१
२४७९	अदभ्यस्तात् (७-१-४)	२१२

सूत्रम्		पार्श्वम्
२४२३	अदिप्रभृतिभ्यः शपः (२-४-७२)	१८०
३०८०	अदो जग्धिर्ल्यप्ति० (२-४-३६)	५५१
२९७७	अदोऽनन्ने (३-२-६८)	५२२
३४८०	अद्भिः संस्कृतम् (४-४-१३४)	७२७
३३६२	अधिकरणे बन्धः (३-४-४१)	७१४
२९२९	अधिकरणे शेतेः (३-२-१५)	५०९
२८२०	अधीष्टे च (३-३-१६६)	४६८
२७०६	अधेः प्रसहने (१-३-३३)	४०७
३९२२	अधेरुपरिस्थम् (६-२-१८८)	७६१
३३०१	अध्यायन्यायो० (३-३-१२२)	६९६
३७४४	अध्वर्युकषाययोर्जातौ(६-२ १०)	७४९
२२०५	अनद्यतने लङ् (३-२-१११)	२०
२१८५	अनद्यतने लुट् (३-३-१५)	१४
३६२४	अनन्त्यस्यापि० (८-२-१०५)	७३७
२८०२	अनवक्लृप्त्यमर्ष०(३-३ १४५)	४६३
३५०५	अनसन्तान्नपुंस० (५-४-१०३)	७२८
३७८६	अनिगन्तोऽञ्चतौ० (६-२-५२)	७५२
२४७८	अनितेः (८-४-१९)	२११
२१५७	अनुदात्तङित० (१-३-१२)	५
३६७०	अनुदात्तं च (८-१-३)	७४१
३६५०	अनुदात्तं पदमेक०(६-१-१५८)	७३९
३६१९	अनुदात्तं प्रश्ना० (८-२-१००)	७३६
३६५१	अनुदात्तस्य च० (६-१-१६१)	७३९
२४०२	अनुदात्तस्य चर्दु० (६-१-५९)	१६४
३६७४	अनुदात्ते च (६-१-१९०)	७४१
३५२३	अनुदात्ते च कुध०(६-१-१२०)	७२९
३१२९	अनुदात्तेतश्च० (३-२-१४९)	५६४
२४२८	अनुदात्तोपदेश० (६-४-३७)	१८२
३७०९	अनुदात्तौ सुप्पितौ (३-१-४)	७४६
२६६६	अनुनासिकस्य क्वि०(६-४-१५)	३७७
२७४५	अनुपराभ्यां कृञः (१-३-७९)	४२४
२७४३	अनुपसर्गाज्ज्ञः (१-३-७६)	४२२
३०३५	अनुपसर्गात्फुल्ल० (८-२-५५)	५३७
२७१६	अनुपसर्गाद्वा (१-३-४३)	४१०
२९००	अनुपसर्गाल्लिँप०(३-१-१३८)	५००
२३४९	अनुविपर्यभिनिभ्यः०(८-३-७२)	११६
३६०१	अनो नुट् (८-२-१६)	७३५
३८८४	अनो भावकर्म० (६-२-१५०)	७५९
२७२२	अनोरकर्मकात् (१-३-४९)	४१२
३९२३	अनोरप्रधानक० (६-२-१८९)	७६२
३०१०	अनौ कर्मणि (३-२-१००)	५३१
३८२६	अन्तः (६-६-९२)	७५५
३८७७	अन्तः (६-२ १४३)	७५८
३९१३	अन्तः (६-२-१७९)	७६१
२९८४	अन्तः (८-४-२०)	५२३
३२९४	अन्तरदेशे (८-४-२४)	६९५
३२५५	अन्तर्घनो देशे (३-३-७८)	६८२
३९१४	अन्तश्च (६-२-१८०)	७६१
३६८८	अन्तश्च तवै० (६-१-२००)	७४२
२९६५	अन्तात्यन्ताध्वदूर०(३-२-४८)	५१८
३७१५	अन्तोदात्तादुत्तर०(६-१ १६९)	७४७
३७०६	अन्तोऽवत्याः (६ १-२२०)	७४३
३८१७	अन्त्यात्पूर्वं बह्वचः (६-२-८३)	७५४
३३४८	अन्यथैवंकथ० (३-४-२७)	७११
३१५८	अन्येभ्योऽपि० (३ २-१७८)	५७१
३४२२	अन्येभ्योऽपि० (३-३-१३०)	७२३
२९८०	अन्येभ्योऽपि० (३-२-७५)	५२३
३५३९	अन्येषामपि दृश्यते(६-३-१३७)	७३०
३०११	अन्येष्वपि दृश्यते(३-२-१०१)	५३१
३३८६	अन्वच्यानुलोम्ये (३-४-६४)	७२०
३३७५	अपगुरो णमुलि (६-१-५३)	७१७
३२५८	अपघनोऽङ्गम् (३-३-८१)	६८२
३०७१	अपचितश्च (७-२-३०)	५४८
३५८०	अपरिह्वृताश्च (७-२-३२)	७३३
२७७९	अपरोक्षे च (३-२-११९)	४५६
३५१२	अपस्पृधेथामानृ० (६-१-३६)	७२९
२७१७	अपह्नवे ज्ञः (१-३-४४)	४१०
३९२०	अपाच्च (६-२-१८६)	७६१
२६८८	अपाच्चतुष्पाच्छकु०(६-१-१४२)	४००
३३७३	अपादाने परी० (३-४-५२)	७१७

सूत्रम्		पार्श्वम्
२७४१	अपाद्वदः (१-३-७३)	४२२
२९६७	अपे क्लेशतमसोः (३-२-५०)	५१९
३१२४	अपे च लषः (३ २-१४४)	५६३
३२७९	अ प्रत्ययात् (३-३-१०२)	६८९
२७७३	अभिज्ञावचने लृट् (३-२-१११)	४५४
३१९३	अभिनिसः स्तनः० (८-३-८६)	६७०
२७४६	अभिप्रत्यतिभ्यः० (१-३-८०)	४२५
३२१८	अभिविधौ भाव० (३-३-४४)	६७५
३९१९	अभेर्मुखम् (६-२-१८५)	७६१
३०६५	अभेश्चाविदूर्ये (७-२-२५)	५४६
२४१७	अभ्यस्तस्य च (६·१ ३३)	१७६
३६७३	अभ्यस्तानामादिः (६ १ १८९)	७४१
२२९०	अभ्यासस्यासवर्णे (६-४-७८)	६६
२४३०	अभ्यासाच्च (७-३-५५)	१८३
२१८२	अभ्यासे चर्च (८·४-५४)	१२
३४०३	अभ्युत्सादयां० (३-१ ४२)	७२२
२९७०	अमनुष्यकर्तृके च (३·२ ५३)	५१९
३८२३	अमहन्नवं नगरे० (६-२-८९)	७५४
२८७४	अमावस्यदन्यतर०(३-१-१२२)	४८८
३५०३	अमु च च्छन्दसि (५-४-१२)	७२८
३५६२	अमो मश् (७-१-४०)	७३२
३६०४	अम्नरूधरवरि० (८-२-७०)	७३५
२९१८	अम्बाम्बगोभूमि० (८ ३-९७)	५०६
२६४९	अयङ्यि क्ङिति (७·४·२२)	३४८
३२९५	अयनं च (८-४ २५)	६९५
३३९०	अयस्मयादीनि० (१-४·२०)	७२१
२३११	अयामन्ताल्वाय्ये० (६-४ ५५)	८८
३८३४	अरिष्टगौडपूर्वे च (६-२-१००)	७५५
२९४२	अरुर्द्विषदजन्तस्य० (६·३-६७)	५१३
२४९३	अर्तिपिपर्त्योश्च (७ ४-७७)	२२२
३१६५	अर्तिलूधूसूखन० (३-२-१८४)	५७३
२५७०	अर्तिह्रीळ्लीरी० (७-३-३६)	२९१
३७७८	अर्थे (६-२-४४)	७५२
३०६४	अर्देः संनिविभ्यः (७-२-२४)	५४६
३८२४	अर्मे चावर्ण० (६-२-९०)	७५४

सूत्रम्		पार्श्वम्
२८५१	अर्यः स्वामि० (३-१-१०३)	४८२
२९२६	अर्हः (३-२-१२)	५०८
३११३	अर्हः प्रशंसायाम् (३·२-१३३)	५६०
२८२२	अर्हे कृत्यतृचश्च (३-३-१६९)	४६९
३११६	अलंकृञ्निराकृञ्०(३-२-१३६)	५६०
३३१६	अलंखल्वोः प्रति० (३-४-१८)	७००
३४४२	अवचक्षे च (३·४·१५)	७२५
२८४९	अवद्यपण्यवर्या० (३-१-१०१)	४८१
३५२४	अवपथासि च (६-१-१२१)	७३०
३४१६	अवयाः श्वेतवाः० (८-२-६७)	७२३
२२७३	अवाच्चालम्बना० (८-३-६८)	५७
२७२४	अवाङ्गः (१-३-५१)	४१२
३२२६	अवे प्रहो वर्षप्रति०(३-३ ५१)	६७६
३२९९	अवे तॄस्रोर्घञ् (३-३-१२०)	६९६
३४१५	अवे यजः (३-२-७२)	७२३
३१८९	अवोदैधौद्मप्रश्रथ० (६·४-२९)	६६८
३१९७	अवोदोर्नियः (३·३-२६)	६७१
३३८१	अव्ययेऽयथाभिप्रे०(३-४-५९)	७१८
३५१९	अव्यादवद्यादव०(६·१-११६)	७२९
२६६१	अशनायोदन्य० (७-४-३४)	३७०
२५३३	अश्नोतेश्च (७ ४-७२)	२५४
२६६२	अश्वक्षीरवृषलवणा०(७-१-५१)	३७१
३५९०	अश्वाघस्यात् (७-४-३७)	७३४
३४७२	अश्विमानण् (४-४-१२६)	७२७
३७१८	अष्टनो दीर्घात् (६-१ १७२)	७४७
२२४२	असंयोगाल्लिट्कित् (१-२-५)	३६
२१८३	असिद्धवदत्राभात् (६-४-२२)	१३
३४६९	असुरस्य स्वम् (४-४-१२३)	७२६
२९५१	असूर्यललाटयोर्दे० (३-२-३६)	५१५
२२२५	अस्तिसिचोऽपृक्ते (७-३-९६)	२८
२४७०	अस्तेर्भूः (२-४-५२)	२०७
२१६४	अस्मद्युत्तमः (१-४-१०७)	७
३३७९	अस्यतितृषोः० (३-४-५७)	७१८
२४३८	अस्यतिवक्ति० (३-१-५२)	१८८
२५२०	अस्येतिस्थुक् (७-४-१७)	२४६

सूत्रम्		पार्श्वम्
३७८१	अहीने द्वितीया (६-२-४७)	७५२
३९६८	अहेति विनियोगे च (८-१-६१)	७६५
३९४७	अहो च (८-१-४०)	७६३
	आ	
३८९२	आक्रोशे च (६-२-१५८)	७६०
३२८९	आक्रोशे नञ्यनिः (३-३-११२)	६९३
३२२०	आक्रोशेऽवन्योः (३-३-४५)	६७५
३११४	आक्रेस्तच्छीलत०(३-२-१३४)	५६०
२७१३	आङ उद्गमने (१-३-४०)	४१०
२९२५	आङि ताच्छील्ये (३-२-११)	५०८
३२५०	आङि युद्धे (३-३-७३)	६८१
२६८६	आङो दोऽनास्य० (१-३-२०)	३९९
३५२५	आङोऽनुनासिक०(६-१-१२६)	७३०
२६९५	आङो यमहनः (१-३ २८)	४०३
२८४५	आङो यि (७-१-६५)	४८०
२४९९	आ च हौ (६-४-११७)	२२५
३८३८	आचार्योपसर्जन०(६-२-१०४)	७५५
३७७०	आचार्योपसर्जन० (६-२ ३६)	७५१
३५७२	आज्ञसेरसुक् (७-१-५०)	७३३
२२५४	आडजादीनाम् (६-४-७२)	४२
२२०४	आडुत्तमस्य पिच्च (३-४-९२)	२०
२९७३	आड्यसुभगस्थूल० (३-२-५६)	५२०
३४२९	आत ऐ (३-४-९५)	७२४
२३७१	आत औ णलः (७-१-३४)	१४१
२२२७	आतः (३-४-११०)	२९
२८९८	आतश्चोपसर्गे (३-१-१३६)	४९९
३२८३	आतश्चोपसर्गे (३-३-१०६)	६९०
२२३५	आतो ङितः (७ २-८१)	३३
३६३२	आतोऽटि नित्यम् (८-३-३)	७३७
२९१५	आतोऽनुपसर्गे कः (३-२ ३)	५०५
३४१८	आतो मनिन्क्वनि० (३-२-७४)	७२३
२७६१	आतो युक्चिण्कृतोः(७-३-३३)	४३५
३३०९	आतो युच् (३-३-१२८)	६९८
२३७२	आतो लोप इटि च (६-४-६४)	१४१
२२५८	आत्मनेपदेष्वनतः (७-१-५)	४४

सूत्रम्		पार्श्वम्
२६९६	आत्मनेपदेष्वन्य० (२-४ ४४)	४०३
२४१९	आत्मनेपदेष्वन्य० (३-१ ५४)	१७६
२९९३	आत्ममाने खश्च (३-२-८३)	५२७
३७६१	आदिः प्रत्येनसि (६-२-२७)	७५०
३७३१	आदिः सिचोऽन्य०(६-१-१८७)	७४८
३०५३	आदिकर्मणि क्तः० (३-४-७१)	५४२
३०३६	आदितश्च (७-२-१६)	५३८
३७९८	आदिरुदात्तः (६-२-६४)	७५३
२२८९	आदिर्ञिटुडवः (१-३-५)	६३
३६७७	आदिर्णमुल्यन्य० (६-१-१९४)	७४१
३८५९	आदिश्चिहणादी०(६-२-१२५)	७५७
३१५१	आदृगमहनजनः (३-२-१७१)	५६८
२३७०	आदेच उपदेशे० (६-१-४५)	१४१
३८५३	आद्युदात्तं० (६-२-११९)	७५६
३७०८	आद्युदात्तश्च (३-१-३)	७४६
२८८८	आनाय्योऽनित्ये (३-१-१२७)	४९१
२२३१	आनि लोट् (८-४-१६)	३१
३१०१	आने मुक् (७-२-८२)	५५७
३५२१	आपो जुषाणो० (६-१-११८)	७२९
२६१९	आप्ज्ञप्यृधामीत् (७-४-५५)	३३२
३३४३	आभीक्ष्ण्ये णमुल्च (३-४-२२)	७०८
३९६२	आम एकान्तर० (८-१-५५)	७६४
२२३८	आमः (२-४-८१)	३४
३६५३	आमन्त्रितस्य च (६-१-१९८)	७३९
३६५४	आमन्त्रितस्य च (८-१-१९)	७३९
२२५१	आमेतः (३-४-९०)	४२
२२४०	आम्प्रत्ययवत्क्रञो० (१-३-६३)	३५
३६१४	आम्रेडितं भर्त्सने (८-२-९५)	७३६
२३०५	आयादय आर्ध० (३-१-३१)	८४
२१८७	आर्धधातुकं शेषः (३-४-११४)	१५
२१८४	आर्धधातुकस्येड्वला०(७-२ ३५)	१४
२४३२	आर्धधातुके (२-४-३५)	१८३
२३०७	आर्धधातुके (६-४-४६)	८५
३७९२	आर्यो ब्राह्मण० (६-२-५८)	७५२
३३११	आवश्यकाध० (३-३-१७०)	६९९

सूत्रम्		पार्श्वम्
२७९०	आशंसायां० (३-३ १३२)	४५९
२७९२	आशंसावचने लिङ्(३-३ १३४)	४६०
३७५५	आशँङ्काबाध० (६-२-२१)	७५०
३६९५	आशितः कर्ता (६-१-२०७)	७४२
२९६२	आशिते भुवः० (३-२-४५)	५१७
२९१२	आशिषि च (३-१-१५०)	५०४
२१९५	आशिषि लिङ्लोटौ(३-३-१७३)	१७
२९६६	आशिषि हनः (३-२-४९)	५१९
२८८७	आसुयुवपिरपि० (३-१-१२६)	४९१
२४५१	आहस्थः (८-२-३५)	१९६
३९५६	आहो उताहो० (८-१-४९)	७६४
	इ	
३५३६	इकः सुञि (६-३-१३४)	७३०
२६१२	इको झल् (१-२-९)	३२८
३७६३	इगन्तकालक० (६-२ २९)	७५०
२८९७	इगुपधज्ञाप्रीकिरः०(३-१-१३५)	४९९
२६१६	इङश्च (२-४-४८)	३३०
३१९१	इङश्च (३-३ २१)	६७०
३११०	इङ्धार्योः शत्रकृ०(३-२-१३०)	५५९
२९९४	इच एकाचोऽ० (६-३-६८)	५२७
३२७८	इच्छा (३-३-१०१)	६८८
२८१६	इच्छार्थेभ्यो वि० (३-३ १६०)	४६७
२८१४	इच्छार्थेषु लिङ्० (३-३-१५७)	४६७
२८३८	इजादेः सनुमः (८ ४-३२)	४७८
२२३७	इजादेश्च गुरुमतो० (३ १-३६)	३३
२२६६	इट ईटि (८-२-२८)	५५
२२५७	इटोऽत् (३-४-१०६)	४३
२६२५	इट् सनि वा (७-२-४१)	३३६
२३८४	इडत्यर्तिव्यय० (७-२-६६)	१४९
३६३९	इडाया वा (८-३-५४)	७३८
२२४७	इणः षीध्वंलुङ्० (८-३ ७८)	४०
२४५८	इणो गा लुङि (२-४ ४५)	१९८
२४५५	इणो यण् (६-४-८१)	१९७
३१४३	इण्नशिजिसर्ति० (३-२-१६३)	५६७
३०४५	इण्निष्ठायाम् (७-२-४७)	५४०

सूत्रम्		पार्श्वम्
२६८२	इतरेतरान्योन्यो० (१-३-१६)	३९८
२२०७	इतश्च (३-४-१००)	२१
३४२६	इतश्च लोपः० (३-४-९७)	७२४
३८८३	इत्थंभूतेन कृत० (६-२-१४९)	७५९
३५६८	इदन्तो मसि (७-१-४६)	७३२
२२६२	इदितो नुम्धातोः (७-१-५८)	५१
२४८२	इद्दरिद्रस्य (६-४-११४)	२१३
३३९३	इन्धिभवतिभ्यां च (१-२-६)	७२१
३५४७	इरयो रे (६-४-७६)	७३१
२२६९	इरितो वा (३-१-५७)	५६
२४००	इषुगमियमां छः (७-३-७७)	१६३
३५७०	इष्ट्रीनामिति च (७-१-४८)	७३२
२९८५	इस्मन्त्रन्क्विषु च (६-४-९७)	५२४
	ई	
२६४८	ई घ्राध्मोः (७-४-३१)	३४८
२८६०	ई च खनः (३-१-१११)	४८५
२५७३	ई च गणः (७-४-९७)	३०१
३५७६	ई च द्विवचने (७-१-७७)	७३३
२४४०	ईडजनोर्ध्वे च (७-२-७८)	१८८
३७०२	ईडवन्दवृशंस० (६-१-२१४)	७४२
३१०४	ईदासः (७-२-८३)	५५८
२८४३	ईद्यति (६-४-६५)	४७९
३७०७	ईवत्याः (६-१-२२१)	७४३
२४३९	ईशः से (७-२-७७)	१८८
३४४०	ईश्वरे तोसुन्कसुनौ (३-४-१३)	७२५
३७८८	ईषदन्यतरस्याम् (६-२-५४)	७५२
३३०५	ईषद्दुःसुषु कृच्छ्रा०(३-३-१२६)	६९७
२४९७	ई हल्यघोः (६-४-११३)	२२४
	उ	
२९५२	उग्रंपश्येरंमद० (३-२-३७)	५१५
३६६४	उच्चैस्तरां वा० (१-२-३५)	७४०
३६८१	उञ्छादीनां च (६-१-१६०)	७४१
३१६९	उणादयो बहुलम् (३-३-१)	६६३
२३३४	उतश्च प्रत्ययाः० (६-४-१०६)	१०३
२८०९	उताप्योः समर्थ०(३-३-१५२)	४६५

सूत्रम्		पार्श्वम्
२४४३	उतो वृद्धिर्लुकि० (७-३-८९)	१९१
३८३९	उत्तरपदवृद्धौ० (६-२-१०५)	७५५
३८४५	उत्तरपदादिः (६-२-१११)	७५६
२६३७	उत्परस्यातः (७-४-८८)	३४४
३८३०	उदकेऽकेवले (६-२-९६)	७५५
३३०२	उदङ्कोऽनुदके (३ ३-१२३)	६९६
३८४१	उदराश्वेषुषु (६-२-१०७)	७५६
२७२६	उदश्वरः सकर्मकात्(१-३-५३)	४१३
३७२०	उदात्तयणो ह० (६-१-१७४)	७४७
३६६९	उदात्तस्वरित० (१-२-४०)	७४१
३६५७	उदात्तस्वरितयो० (८-२-४)	७४०
३६६०	उदात्तादनुदात्तस्य०(८-४-६६)	७४०
२९४६	उदि कूले रुजिवहोः(३-२-३१)	५१४
३२०७	उदि ग्रहः (३-३-३५)	६७२
३३२८	उदितो वा (७-२-५६)	७०४
३२२४	उदि श्रयति० (३-३-४९)	६७६
३३१७	उदीचां माङो० (३-४-१९)	७००
३०५६	उदुपधाद्भावादि० (१ २-२१)	५४२
२६९१	उदोऽनूर्ध्वकर्मणि (१-३ २४)	४०१
२४९४	उदोष्ठ्यपूर्वस्य (७-१-१०२)	२२२
३२५७	उद्धनोऽत्याधानम् (३-३-८०)	६८२
२६९४	उद्विभ्यां तपः (१-३-२७)	४०२
३२००	उन्योर्ग्रः (३-३-२९)	६७१
३२६३	उपन्न आश्रये (३-३-८५)	६८३
३३६८	उपदंशस्तृतीयायाम्(३-४-४७)	७१५
२२९५	उपदेशेऽत्वतः (७-२-६२)	७३
२२६५	उपधायां च (८-२-७८)	५२
२५७१	उपधायाश्च (७-१-१०१)	२९२
२७१२	उपपराभ्याम् (१-३-३९)	४०९
३८१४	उपमानं शब्दार्थ० (६-२-८०)	७५४
२६६४	उपमानादाचारे (३-१-१०)	३७२
३३६६	उपमाने कर्मणि च (३-४-४५)	७१४
३६२१*	उपरिस्विदासी० (८-२-१०२)	७३६
३४३१	उपसंवादाशङ्कयोश्च (३-४-८)	७२४
२४७२	उपसर्गप्रादुर्भ्यां० (८-३-८७)	२०७

सूत्रम्		पार्श्वम्
३९४५	उपसर्गव्यपेतं च (८-१-३८)	७६३
२३२६	उपसर्गस्यायतौ (८-२-१९)	९७
३४९६	उपसर्गाच्छन्दसि०(५-१-११८)	७२८
३३०६	उपसर्गात्खल्घञोः (७-१-६७)	६९७
२२७०	उपसर्गात्सुनोति० (८-३-६५)	५७
३९११	उपसर्गात्स्वाङ्गं० (६-२-१७७)	७६१
२२८७	उपसर्गादसमासे० (८-४-१४)	६२
२७०२	उपसर्गाद्रुख ऊहतेः(७ ४ २३)	४०६
३२७०	उपसर्गे घोः किः (३-३-९२)	६८५
३००९	उपसर्गे च संज्ञायाम् (३-२-९९)	५३१
३२३५	उपसर्गेऽदः (३-३-५९)	६७८
३१९२	उपसर्गे रुवः (३-३ २२)	६७०
२८५२	उपसर्या काल्या० (३-१ १०४)	४८२
२७५०	उपाच्च (१-३-८४)	४२५
२५५२	उपात्प्रतियत्नवै० (६-१ १३९)	२७४
२८४६	उपात्प्रशंसायाम् (७-१-६६)	४८०
३९२८	उपाद्द्वयजजिन० (६-२-१९४)	७६२
२७२९	उपाद्यमः स्वकरणे (१-३-५६)	४१४
२६९२	उपान्मन्त्रकरणे (१-३-२५)	४०२
३०९८	उपेयिवाननाश्वा०(३-२-१०९)	५५६
३७३३	उपोत्तमं रिति (६-१ २१७)	७४८
३६३०	उभयथर्क्षु (८-३-८)	७३७
३८७४	उभे वनस्पत्यादि०(६ २-१४०)	७५८
२६०६	उभौ साभ्यासस्य (८-४-२१)	३२४
२२४४	उरत् (७-४ ६६)	३७
२५६७	उर्ऋत् (७ ४ ७)	२८७
२३६८	उश्च (१-२-१२)	१४०
२३४१	उषविदजागृभ्यो० (३-१ ३८)	११०
३७७४	उष्टूः सादिवाम्योः (६-२-४०)	७५१
२२१४	उखपदान्तात् (६-१-९६)	२५

ऊ

३७१७	ऊडिदंपदाद्यप्पु० (६-१-१७१)	७४७
३२७४	ऊतियूतिजूति० (३-३-९७)	६८७
२३६४	ऊदुपधाया गोहः (६-४-८९)	१३७
३८८७	ऊनार्थकलहं० (६-२-१५३)	७५९

सूत्रम्		पार्श्वम्
२४४९	ऊर्णोतेर्विभाषा (७-२-६)	१९४
२४४५	ऊर्णोतेर्विभाषा (७-३-९०)	१९३
३३६५	ऊर्ध्वे शुषिपूरोः (३-४-४४)	७१४
	ऋ	
३५३५	ऋचि तुनुघमक्षु० (६-३-१३३)	७३०
२३८३	ऋच्छत्यृताम् (७-४-११)	१४९
३०४३	ऋणमाधमर्ण्ये (८-२-६०)	५४०
२६५३	ऋतश्च (७-४-९२)	३५९
२५२६	ऋतश्च संयोगादेः (७-२-४३)	२५१
२३७९	ऋतश्च संयोगादेर्गुणः (७-४-१०)	१४६
३५०८	ऋतश्छन्दसि (५-४-१५८)	७२८
२४२२	ऋतेरीयङ् (३-१-२९)	१७८
१२९६	ऋतो भारद्वाजस्य (७-२-६३)	७३
३५५६	ऋत्व्यवास्त्व्यवा० (६-४-१७५)	७३१
२८५९	ऋदुपधाच्चाक्लृ० (३-१-११०)	४८४
२४०६	ऋदशोऽडि गुणः (७-४-१६)	१६६
२३६६	ऋद्धनोः स्ये (७-२-७०)	१३९
२८७२	ऋहलोर्ण्यत् (३-१-१२४)	४८८
	ॠ	
२३९०	ॠत इद्धातोः (७-१-१००)	१५६
३२३२	ॠदोरप् (३-३-५७)	६७७
	ए	
३६६२	एकश्रुति दूरात्संबुद्धौ (१-२-३३)	७४०
२२४६	एकाच उपदेशे० (७-२-१०)	३८
२१७५	एकाचो द्वे प्रथमस्य (६-१-१)	१०
३६५८	एकादेश उदात्तेनोदात्त (८-२-५)	७४०
३९७२	एकान्याभ्यां० (८-१-६५)	७६५
३६२६	एचोऽप्रगृह्यस्या० (८-२-१०७)	७३७
२९४१	एजेः खश् (३-२-२८)	५१२
२२५३	एत ऐ (३-४-९३)	४२
२८५७	एतिस्तुशास्वृद० (३-१-१०९)	४८३
२४५७	एतेर्लिङि (७-४-२४)	१९८
३२३१	एरच् (३-३-५६)	६७७
२१९६	एरुः (३-४-८६)	१७
२३७४	एर्लिङि (६-४-६७)	१४२

सूत्रम्		पार्श्वम्
३९५३	एहिमन्ये प्रहासे० (८-१-४६)	७६४
	ओ	
२५७७	ओः पुयण्ज्यपरे (७-४-८०)	३१२
२८८०	ओक उचः के (७-३-६४)	४९०
३४७६	ओजसोऽहनि० (४-४-१३०)	७२७
२५१०	ओतः श्यनि (७-३-७१)	२३५
३०१९	ओदितश्च (८-२-४५)	५३४
३६०६	ओमभ्यादाने (८-२-८७)	७३६
२८८६	ओरावश्यके (३-१-१२५)	४९१
३५३४	ओषधेश्च विभक्ता० (६-३-१३२)	७३०
	क	
३६३५	कः करत्करति० (८-३-५०)	७३८
३८५६	कंसमन्थशूर्प० (६-२-१२२)	७५७
३८४८	कण्ठपृष्ठग्रीवा० (६-२-११४)	७५६
२६७८	कण्ड्वादिभ्यो यक् (३-१-२७)	३९३
३७९१	कतरकतमौ० (६-२-५७)	७५२
३४४९	कडुकमण्डल्वो० (४-१-७१)	७२६
३८५८	कन्था च (६-२-१२४)	७५७
३९०७	कपि पूर्वम् (६-२-१७३)	७६१
३०८४	कपिष्ठलो गोत्रे (८-३-९१)	५५२
२३१०	कर्मणिङ् (३-१-३०)	८८
३२९३	करणाधिकरणयोश्च (३-३-११७)	६९५
२९९६	करणे यजः (३-२-८५)	५२९
३२५९	करणेऽयोविद्रुषु (३-३-८२)	६८२
३३५८	करणे हनः (३-४-३७)	७१३
३८४६	कर्णो वर्णलक्षणात् (६-२-११२)	७५६
२६८०	कर्तरि कर्मव्यतिहारे (१-३-१४)	३९७
२८३२	कर्तरि कृत् (३-४-६७)	४७६
३१६७	कर्तरि चर्षि० (३-२-१८६)	५७३
२९७४	कर्तरि भुवः० (३-२-५७)	५२१
२१६७	कर्तरि शप् (३-१-६८)	७
२९८९	कर्तर्युपमाने (३-२-७९)	५२६
२६६५	कर्तुः क्यङ्० (३-१-११)	३७२
३३०८	कर्तृकर्मणोश्च० (३-३-१२७)	६९८
२७१०	कर्तृस्थे चाशरीरे (१-३-३७)	४०९

सूत्रम्		पार्श्वम्
३३६४	कर्त्रोर्जीवपुरुषयो० (३-४-४३)	७१४
३२९१	कर्मणि च० (३-३-११६)	६९४
३३५०	कर्मणि दृशिविदोः०(३-४-२९)	७११
२९३६	कर्मणि भृतौ (३-२-२२)	५११
२९९७	कर्मणि हनः (३-२-८६)	५२९
३००३	कर्मणीनिविक्रियः (३-२-९३)	५३०
२६७१	कर्मणो रोमन्थ० (३-१-१५)	३८२
३००२	कर्मण्यग्न्याख्यायाम्(३-२-९२)	५२०
२९१३	कर्मण्यण् (३-२-१)	५०४
३२७१	कर्मण्याधिकरणे च (३-३-९३)	६८५
३३४६	कर्मण्याक्रोशे० (३-४-२५)	७१०
३७८०	कर्मधारयेऽनिष्ठा (६-२-४६)	७५२
२७६६	कर्मवत्कर्मणा० (३-१-८७)	४४४
३२१५	कर्मव्यतिहारे० (३-३-४३)	६७४
३६८०	कर्षाऽऽत्वतो घ०(६-१ १५९)	७४१
३५९२	कव्यध्वरपृतनस्यर्चि०(७-४-३९)	७३४
३४११	कव्यपुरीषपु० (३-२-६५)	७२३
३३६७	कषादिषु यथावि० (३-४-४६)	७१५
२६७०	कष्टाय क्रमणे (३-१-१४)	३८२
२८१०	कामप्रवेदनेऽक० (३-३-१५३)	४६६
२६६३	काम्यच्च (३-१-९)	३७१
३८८२	कारकाद्दत्तश्रुतयो०(६-२-१४८)	७५९
३७७१	कार्तकौजपादयश्च (६-२-३७)	७५१
२७९५	कालविभागे चान०(३-३-१३७)	४६१
३१७९	कालसमयवेलासु०(३-३-१६७)	६६५
२३०६	कास्प्रत्ययादाम० (३-१-३५)	८४
३९५५	किंवृत्तं च चि० (८-१-४८)	७६४
२८०१	किंवृत्ते लिङ्लुटौ (३-३-१४४)	४६३
२७८५	किंवृत्ते लिप्सायाम् (३-३-६)	४५८
२८०३	किंकिलास्त्यर्थेषु० (३-३-१४६)	४६४
३९५१	किं क्रियाप्रश्ने० (८-१-४४)	७६३
३७१२	कितः (६-१-१६५)	७४६
२२१६	किदाशिषि (३-४-१०४)	२६
२५३९	किरतौ लवने (६-१-१४०)	२६३
२६११	किरश्च पञ्चभ्यः (७-२-७५)	३२७

सूत्रम्		पार्श्वम्
३८७०	कुण्डं वनम् (६-२-१३६)	७५८
३९७६	कुत्सने च सुप्य० (८-१-६९)	७६६
२९६८	कुमारशीर्षयोर्णिनिः(३-२-५१)	५१९
३७६०	कुमारश्च (६-२-२६)	७५०
३८२९	कुमार्यां वयसि (६-२-९५)	७५५
३७७६	कुरुगार्हपत० (६-२-४२)	७५१
२७७२	कुषिरञ्जोः प्राचां० (३-१-९०)	४५३
३८३६	कुसूलकूपकुम्भ० (६-२-१०२)	७५५
२२४५	कुहोश्चुः (७-४ ६२)	३७
३८५५	कूलतीरतूल० (६-२-१२१)	७५७
३८६३	कूलसूदस्थल० (६ २-१२९)	७५७
३०६२	कृच्छ्रगहनयोः० (७-२-२२)	५४६
३२७७	कृत्रः श च (३-३-१००)	६८८
२९३४	कृत्रो हेतुताच्छी० (३-२-२०)	५१०
२२३९	कृत्यानुप्रयुज्यते० (३-१-४०)	३४
२८३५	कृत्यचः (८-४-२९)	४७७
२८४१	कृत्यल्युटो बहुलम् (३-३-११३)	४७९
२८३१	कृत्याः (३-१-९५)	४७६
३४४१	कृत्यार्थे तवैकै० (३-४-१४)	७२५
३३१२	कृत्याश्च (३-३-१७१)	६९९
३८९४	कृन्योर्केष्णुच्चा० (६-२-१६०)	७६०
२३५०	कृपो रो लः (८-२-१८)	११७
३४०३	कृमृदरुहिभ्य० (३-१ ५९)	७२२
३५९५	कृपेरछन्दसि (७-४-३४)	७३५
२२९३	कृसृभृवृस्तुद्रुसु० (७-२-१३)	७२
३२०१	कॄ धान्ये (३-३-३०)	६७१
२२१७	क्ङिति च (१-१-५)	२६
३०१२	क्तक्तवतू निष्ठा (१-१-२६)	५३२
३३१३	क्तिच्क्तौ च सं० (३-३-१७४)	६९९
३७७९	क्ते च (६-२-४५)	७५२
३७९५	क्तेन नित्यार्थे (६-२-६१)	७५३
३०८७	क्तोऽधिकरणे च० (३-४-७६)	५५३
३५६०	क्त्वापि च्छन्दसि (७-१-३८)	७३२
३३२१	क्त्वि स्कन्दिस्यन्दोः (६-४-३१)	७०२
३५६९	क्त्वो यक् (७-१-४७)	७३२

सूत्रम्		पार्श्वम्
२६५८	क्यचि च (७-४-३३)	३६८
२६६०	क्यस्य विभाषा (६-४-५०)	३७०
३१५०	क्याच्छन्दसि (३-२-१७०)	५६८
२८९१	क्रतौ कुण्डपाय० (३-१-१३०)	४९२
३८५२	क्त्वादयश्च (६-२-११८)	७५६
२३२२	क्रमः परस्मैपदेषु (७-३-७६)	९६
३३२९	क्रमश्च क्ति (६-४-१८)	७०४
२९७८	क्रव्ये च (३-२-६९)	५२२
२८२५	क्रियासमभिहारे० (३-४-२)	४७०
२६००	क्रीङ्जीनां णौ (६-१-४८)	३२१
२६८७	क्रीडोऽनुसंपरिभ्यश्च (१-३-२१)	३९९
३१३१	क्रुधमण्डार्थेभ्यश्च (३-२-१५१)	५६४
२५५४	क्र्यादिभ्यः श्ना (३-१-८१)	२७७
३०४९	क्लिशः क्त्वानिष्ठयोः (७-२-५०)	५४१
३२४२	क्वणो वीणायां च (३-३-६५)	६७९
३०९५	क्वसुश्च (३-२-१०७)	५५५
२९८३	क्विप् च (३-२-७६)	५२३
३६८९	क्षयो निवासे (६-१-२०१)	७४२
३०३२	क्षायो मः (८-२-५३)	५३७
२७९१	क्षिप्रवचने लृट् (३-३-१३३)	४६०
३३३८	क्षियः (६-४-५९)	७०७
३६२३	क्षियाशीःप्रैषेषु० (८-२-१०४)	७३७
३०१५	क्षियो दीर्घात् (८-२-४६)	५३२
३०५८	क्षुब्धस्वान्त० (७-२-१८)	५४४
३७७३	क्षुल्लकश्च वैश्वदेवे (६-२-३९)	७५१
३८४२	क्षेपे (६-२-१०८)	७५६
२९६१	क्षेमप्रियमद्रेऽण्च (३-२-४४)	५१७
२३३७	क्सस्याचि (७-३-७२)	१०६

ख

३४७८	ख च (४-४-१३२)	७२७
३९५५	खचि ह्रस्वः (६-४-९४)	५१६
३३०४	खनो घ च (३-३-१२५)	६९६
२९४३	खित्यनव्ययस्य (६-३-६६)	५१३
३५१३	खिदेश्छन्दसि (६-१-५२)	७२९

ग

३८७३	गतिकारकोप० (६-२-१३९)	७५८
३७८३	गतिरनन्तरः (६-२-४९)	७५२
३९७७	गतिर्गतौ (८-१-७०)	७६६
३९५८	गत्यर्थलोटा लृण्न०(८ १-५१)	७६४
३०८६	गत्यर्थाकर्मक० (३-४-७२)	५५२
३१४४	गत्वरश्च (३-२-१६४)	५६७
२८४८	गदमदचर० (३-१-१००)	४८१
३७४७	गन्तव्यपण्यं वाणिजे(६-२-१३)	७४९
२७०५	गन्धनावक्षेपण० (१-३-३२)	४०६
२९८६	गमः क्वौ (६-४-४०)	५२५
२९६४	गमश्च (३-२-४७)	५१८
२३६३	गमहनजनखन० (६-४-९८)	१३७
२४०१	गमेरिट् परस्मै० (७ २-५८)	१६३
२७९९	गर्हायां लडपि० (३-३-१४२)	४६२
२८०६	गर्हायां च (३-३-१४९)	४६५
२९०८	गस्थकन् (३-१-१४६)	५०३
२४६१	गाङ्कुटादिभ्यो० (१-२-१)	२००
२४५९	गाङ् लिटि (२-४-४९)	१९९
२२२३	गातिस्थाघुपाभूभ्यः०(२-४-७७)	२८
३७३८	गाधलवणयोः प्रमाणे(६-२-४)	७४८
२९२२	गापोष्टक् (३-२-८)	५०७
२४४८	गुणोऽपृक्ते (७-३-९१)	१९४
२६३०	गुणो यङ्लुकोः (७-४-८२)	३४१
२३८०	गुणोऽर्तिसंयोगाद्योः(७-४-२९)	१४७
२३०३	गुपूधूपविच्छि० (३-१-२८)	८४
३४०४	गुपेश्छन्दसि (३-१-५०)	७२२
२३९३	गुप्तिज्किद्भ्यः सन् (३-१-५)	१५८
३२८०	गुरोश्च हलः (३-३-१०३)	६८९
२७३९	गृधिवञ्चोः० (१-३-६९)	४२१
२९०६	गेहे कः (३-१-१४४)	५०३
३५७४	गोः पादान्ते (७-१-५७)	७३३
३२९८	गोचरसञ्चर० (३-३-११९)	६९५
३८१२	गोतन्तियवं पाले (६-२-७८)	७५४
३८०३	गोत्रान्तेवासि० (६-२-६९)	७५३

सूत्रम्		पार्श्वम्
३८०६	गोबिडालसिंह० (६-२-७२)	७५३
३७७५	गौः सादसादि० (६-२-४१)	७५१
३५८२	ग्रसितस्कभित० (७-२-३४)	७३३
३२३४	ग्रहवृदृनिश्चिगमश्च (३-३-५८)	६७७
२४१२	ग्रहिज्यावयि० (६-१-१६)	१७३
२५६२	ग्रहोऽलिटि दीर्घः (७-२-३७)	२८३
३७९६	ग्रामः शिल्पिनि (६-२-६२)	७५३
३८१८	ग्रामेऽनिवसन्तः (६-२-८४)	७५४
२६३९	ग्रो यङि (८-२-२०)	३४५
३११९	ग्लाजिस्थश्च ग्स्नुः(३-२-१३९)	५६१
	घ	
३४६३	घच्छौ च (४-४-११७)	७२६
३२३६	घञपोश्च (२-४-३८)	६७८
३१८७	घञि च भावकरणयोः(६-४-२७)	६६८
३५५०	घसिभसोर्हलि च (६-४-१००)	७३१
२४६२	घुमास्थागापाज० (६-४-६६)	२०१
३०६३	घुषिरविशब्दने (७-२-२३)	५४६
३५८४	घोर्लोपो लेटि वा (७-३-७०)	७३४
३८१९	घोषादिषु च (६-२-८५)	७५४
२४७१	ध्वसोरेद्धाव० (६-४-११९)	२०७
	ङ	
३७००	ङयि च (६-१-२१२)	७४२
३७२४	ङ्याश्छन्दसि० (६-१-१७८)	७४७
	च	
२४३६	चक्षिङः ख्याञ् (२-४-५४)	१८७
२३१५	चङि (६-१-११)	९०
३६७७	चङ्यन्यतरस्याम् (६-१-२१८)	७४१
२८६३	चजोः कु घिण्यतोः (७-३-५२)	४८६
३६८२	चतुरः शसि (६-१-१६७)	७४१
३७७७	चतुर्थी तदर्थे (६-२-४३)	७५२
३३९६	चतुर्थ्यर्थे बहुलं० (२-३-६२)	७२२
३९६४	चनचिदिवगोत्रादि०(८-१-५७)	७६५
२६३६	चरफलोश्च (७-४-८७)	३४४
२९३०	चरेष्टः (३-२-१६)	५०९
३३५२	चर्मोदरयोः पूरेः (३-४-३१)	७१२

सूत्रम्		पार्श्वम्
३१२८	चलनशब्दार्थो० (३-२-१४८)	५६४
३९६६	चवायोगे प्रथमा (८-१-५९)	७६५
३९७०	चादिलोपे विभाषा (८-१-६३)	७६५
३९६५	चादिषु च (८-१-५८)	७६५
२६४७	चायः की (६-१-२१)	३४७
३५११	चायः की (६-१-३५)	७२९
३९६९	चाहलोप एवे० (८-१-६२)	७६५
२३२९	चिणो लुक् (६-४-१०४)	९८
२७६२	चिण्णमुलोर्दीर्घो० (६-४-९३)	४३८
२५१३	चिण्ते पदः (३-१-६०)	२३७
२७५८	चिण्भावकर्मणोः (३-१-६६)	४३२
३७१०	चितः (६-१-१६३)	७४६
२८९३	चित्याग्निचित्ये च (३-१-१३२)	४९३
२८०७	चित्रीकरणे च (३-३-१५०)	४६५
३६२०	चिदिति चोप० (८-२-१०१)	७३६
३२८२	चिन्तिपूजिक० (३-३-१०५)	६९०
२५६९	चिस्फुरोर्णौ (६-१-५४)	२९१
३८६१	चीरमुपमानम् (६-२-१२७)	७५७
३८६८	चूर्णादीन्यप्रा० (६-२-१३४)	७५७
३८६०	चेलखेटकटु० (६-१-१२६)	७५७
३३५४	चेले क्नोपेः (३-४-३३)	७१२
३६५२	चौ (६-२-२२)	७३९
२५६१	च्छ्वोः शूडनुना० (६-४-१९)	२८२
२२२१	च्लि लुङि (३-१-४३)	२८
२२२२	च्लेः सिच् (३-१-४४)	२८
	छ	
३४२१	छन्दसि गत्यर्थेभ्यः(३-३-१२९)	७२३
३४९५	छन्दसि घस् (५-१-१०६)	७२८
३४९२	छन्दसि च (५-१-६७)	७२८
३५०७	छन्दसि च (५-४-१४२)	७२८
३५३२	छन्दसि च (६-३-१२६)	७३०
३४५०	छन्दसि ठञ् (४-३-१९)	७२६
३४०७	छन्दसि निष्टर्क्य० (३-१-१२३)	७२२
३३९१	छन्दसि परेऽपि (१-४-८१)	७२१
३३८७	छन्दसि पुनर्वस्वो०(१-२-६१)	७२१

सूत्रम्		पार्श्वम्
३०९३	छन्दसि लिट् (३-२-१०५)	५५५
३४२३	छन्दसि लुङ्लङ्० (३-४-६)	७२४
३४०८	छन्दसि वनसन० (३-२-२७)	७२३
३६३४	छन्दसि वाप्राम्रे० (८-३-४९)	७३८
३४३२	छन्दसि शायजपि (३-१-८४)	७२४
३४०९	छन्दसि सहः (३-२-६३)	७२३
३६००	छन्दसीरः (८-२-१५)	७३५
३९४२	छन्दस्यनेकम० (८-१-३५)	७६३
३५४५	छन्दस्यपि दृश्यते (६-४-७३)	७३१
३५७५	छन्दस्यपि दृश्यते (७-१-७६)	७३३
३४३५	छन्दस्युभयथा (३-४-११७)	७२५
३५४०	छन्दस्युभयथा (६-४-५)	७३१
३५४८	छन्दस्युभयथा (६-४-८६)	७३१
३६४८	छन्दस्यृदवग्रहात् (८-४-२६)	७३८
३२०५	छन्दोनाम्नि च (३-३-३४)	६७२
३२०६	छन्दोनाम्नि च (८-३-९४)	६७२
३८२०	छात्र्यादयः० (६-२-८६)	७५४
३२९७	छादेर्घेऽद्व्युप० (६-४-९६)	६९५
	ज	
३४१३	जनसनखन० (३-२-६७)	७२३
२५०४	जनसनखनां० (६-४-४२)	२३०
३५४२	जनिता मन्त्रे (६-४-५३)	७३१
२५१२	जनिवध्योश्च (७-३-३५)	२३६
२६३८	जपजभदहदशभ० (७-४-८६)	३४४
३६९०	जयः करणम् (६-१ २०२)	७४२
३१३५	जल्पभिक्षकुट्ट० (३-२-१५५)	५६५
२४९८	जहातेश्च (६-४-११६)	२२५
३३३१	जहातेश्च क्ति (७-४-४३)	७०५
३१४५	जागरूकः (३-२-१६५)	५६७
२४८०	जाग्रोऽविचिण्० (७ ३-८५)	२१२
३९०४	जातिकालसुखा० (६-२-१७०)	७६१
२८०४	जातुयदोर्लिङ् (३-३-१४७)	४६४
३९५४	जात्वपूर्वम् (८-१-४७)	७६४
३३३०	जान्तनशां विभाषा (६-४-३२)	७०४
३३०३	जालमानायः (३-३-१२४)	६९६

सूत्रम्		पार्श्वम्
२५८९	जिघ्रतेर्वा (७-४-६)	३१८
३१३७	जिदक्षिविश्री० (३-२-१५७)	५६६
३०९२	जीर्यतेरतृन् (३-२-१०४)	५५४
३१३०	जुचङ्क्रम्य० (३-२-१५०)	५६४
३६९७	जुष्टार्पिते च० (६-१-२०९)	७४२
२४८१	जुसि च (७-३-८३)	२१३
२४८९	जुहोत्यादिभ्यःश्लुः (२-४-७५)	२२०
३३२७	जृव्रश्च्योः क्ति (७-२-५५)	७०३
२२९१	जृस्तम्भु० (३ १-५८)	६९
२५११	ज्ञाजनोर्जा (७-३-७९)	२३६
२७३१	ज्ञाश्रुस्मृदृशां सनः (१ ३-५७)	४१४
३३४०	ज्यश्च (६-१-४२)	७०८
२६५४	ज्वरत्वरास्रि० (६-४-२०)	३६५
२९०२	ज्वलितिकसन्ते० (३-१-१४०)	५०१
	झ	
२२८१	झलो झलि (८-२ २६)	६०
३६८३	झल्युपोत्तमम् (६-१-१८०)	७४१
२२८०	झषस्तथोर्धोऽधः (८-२-४०)	५९
२२५६	झस्य रन् (३-४-१०५)	४३
२२१३	झेर्जुस् (३-४-१०८)	२५
२१६९	झोऽन्तः (७ १-३)	८
	ञ	
३०८८	ञीतः क्तः (३-२-१८७)	५५४
३६८६	ञ्नित्यादिर्नित्यम् (६-१-१९७)	७४२
	ट	
२२३३	टित आत्मनेपदानां०(३-४-७९)	३२
३२६७	ट्वितोऽथुच् (३-३-८९)	६८४
	ड	
३२६६	ड्वितः क्तिः (३-३-८८)	६८४
	ढ	
३४५५	ढश्छन्दसि (४-४-१०६)	७२६
२३३५	ढो ढे लोपः (८-३-१३)	१०५
	ण	
३२१६	णचः स्त्रियामञ् (५-४-१४)	६७४
२२८३	णलुत्तमो वा (७ १-९१)	६०

सूत्रम्		पार्श्वम्
२५६४	णिचश्च (१-३-७४)	२८४
३८१३	णिनि (६-२-७९)	७५४
२३१२	णिश्रिद्रुस्रुभ्यः० (३-१-४८)	८९
२७३८	णेरणौ यत्कर्म० (१-३-६७)	४१६
३०६६	णेरध्ययने वृत्तम् (७-२-२६)	५४७
२३१३	णेरनिटि (६-४-५१)	८९
२८३६	णेर्विभाषा (८-४-३०)	४७७
३११७	णेश्छन्दसि (३-२-१३७)	५६०
२२८६	णो नः (६-१-६५)	६१
२६०७	णौ गमिरबोधने (२-४-४६)	३२४
२३१४	णौ चङ्युपधाया० (७-४-१)	९०
२५७९	णौ च संश्चङोः (६-१-३१)	३१३
२६०१	णौ च संश्चङोः (२-४-५१)	३२२
२८८१	ण्य आवश्यके (७-३-६५)	४९०
३२८४	ण्यासश्रन्थो युच् (३-३-१०७)	६९१
२९०९	ण्युट् च (३-१-१४७)	५०३
२८९५	ण्वुल्तृचौ (३-१-१३३)	४९५
	त	
२१५६	तङानावात्मनेपदम्(१-४-१००)	४
३७३६	तत्पुरुषे तुल्यार्थ० (६-२-२)	७४८
३८५७	तत्पुरुषे शालायां०(६-२-१२३)	७५७
२५७५	तत्प्रयोजको हेतुश्च (१-४-५५)	३११
३७११	तद्धितस्य (६-१-१६४)	७४६
३४७१	तद्धानामासामुप० (४-४-१२५)	७२६
२४६६	तनादिकृञ्भ्य उः (३-१-७९)	२०५
२५४७	तनादिभ्यस्तथासोः (२-४-७९)	२७२
३५४९	तनिपत्योश्छन्दसि (६-४-९९)	७३१
२३३९	तनूकरणे तक्षः (३-१-७६)	१०८
२७५९	तनोतेर्यकि (६-४-४४)	४३४
२६२२	तनोतेर्विभाषा (६-४-१७)	३३४
२७७१	तपस्तपःकर्मकस्यैव (३-१-८८)	४५०
२७६०	तपोऽनुतापे च (३-१-६५)	४३४
३५६७	तप्तनप्तनथनाश्च (७-१-४५)	७३२
२८३३	तयोरेव कृत्यक्त० (३-४-७०)	४७६
३४९९	तयोर्दार्हिलौ च० (५ ३-२०)	७२८

सूत्रम्		पार्श्वम्
३६२७	तयोर्य्वावचि सं०(८-२-१०८)	७३७
३७८५	तवै चान्तश्च० (६-२-५१)	७५२
२८३४	तव्यत्तव्यानीयरः (३-१-९६)	४७६
२१९९	तस्थस्थमिपां० (३-४-१०१)	१९
२२८८	तस्मान्नुड् द्विहलः (७-४ ७१)	६२
३५६६	तस्य तात् (७-१-४४)	७३२
३१०९	ताच्छील्यवयो० (३-२-१२९)	५५९
३७८४	तादौ च निति० (६-२-५०)	७५२
२१६१	तान्येकवचनद्वि० (१-४-१०२)	६
३१७४	ताभ्यामन्यत्रोणादयः(३-४-७५)	६६४
२१९१	तासस्त्योर्लोपः (७-४-५०)	१६
२३५२	तासि च क्लृपः (७-२-६०)	११८
३७३०	तास्यनुदात्तेन्ङि० (६-१-१८६)	७४८
२१६०	तिङस्त्रीणि० (१-४-१०१)	६
३९७८	तिङि चोदात्तवति (८-१-७१)	७६६
३९३४	तिङो गोत्रादीनि० (८-१-२७)	७६३
३९३५	तिङ्ङतिङः (८ १-२८)	७६३
२१६६	तिङ्शित्सार्व० (३-४-११३)	७
३०३७	ति च (७ ४-८९)	५३८
३१६३	तितुत्रतथसि० (७-२-९)	५७२
३७२९	तित्स्वरितम् (६-१-१८५)	७४८
२१५४	तिप्तस्झिसिप्थ० (३-४-७८)	४
२४८४	तिप्यनस्तेः (८-२-७३)	२१५
३३८२	तिर्यच्यपवर्गे (३-४-६०)	७१९
२५८८	तिष्ठतेरित् (७-४-५)	३१८
३७१३	तिसृभ्यो जसः (६-१-१६६)	७४६
२३४०	तीषसहलुभ० (७ २-४८)	११०
३४६१	तुम्राच्चून् (४-४-११५)	७२६
३५०९	तुजादीनां दीर्घो० (६-१-७)	७२८
२५३४	तुदादिभ्यः शः (३-१-७७)	२५५
२९१९	तुन्दशोकयोः० (३-२-५)	५०७
३९४६	तुपश्यपश्यताहै० (८-१-३९)	७६३
३४३६	तुमर्थे सेसेनसेऽस० (३-४-९)	७२५
३१७५	तुमुन्ण्वुलौ क्रिया०(३-३-१०)	६६४
२४४४	तुरुस्तुशम्यमः सा०(७-३-९५)	१९२

सूत्रम्		पार्श्वम्
३१९७	तुह्योस्तातङ्ङाशि० (७-१-३५)	१८
३३८५	तूष्णीमि भुवः (३-४-६३)	७१९
२५४५	तृणह इम् (७-३ ९२)	२७०
३७८२	तृतीया कर्मणि (६-२-४८)	७५२
३३९४	तृतीया च हो० (२-३-३)	७२१
३११५	तृन् (३-२-१३५)	५६०
३३२६	तृषिमृषिकृषेः० (१-२-२५)	७०३
२३०१	तृफलभजत्रपश्च (६-४-१२२)	८२
२२३०	ते प्राग्धातोः (१-४-८०)	३१
३१०६	तौ सत् (३-२-१२७)	५५८
३७०४	त्यागरागहास० (६-१-२१६)	७४२
३१२०	त्रसिगृधिधृषि० (३-२-१४०)	५६१
	थ	
३४९७	थट् च च्छन्दसि (५-२-५०)	७२८
२२६१	थलि च सेटि (६-४-१२१)	५०
३७३२	थलि च सेटी० (६-१-१९६)	७४८
३८७८	थाथघञ्क्ताज० (६-२-१४४)	७५८
२२३६	थासः से (३-४-८०)	३३
३५००	था हेतौ च० (५-३-२६)	७२८
	द	
२३९६	दंशसञ्जस्वञ्जां शपि(६-४-२५)	१६०
२९०१	ददातिदधात्यो० (३-१-१३९)	५०१
२५०१	दधस्तथोश्च (८-२-३८)	२२६
३०७६	दधातेर्हिः (७-४-४२)	५४९
२६२१	दम्भ इच्च (७-४-५६)	३३२
२३८८	दयतेर्दिगि लिटि (७-४-९)	१५५
२३२४	दयायासश्च (३-१-३७)	९६
२४६८	दश्च (८-२-७५)	२०६
३०७९	दस्ति (६-३-१२४)	५५१
२७२८	दाणश्च सा चे० (१-३-५५)	४१३
३५९६	दाधर्तिदर्धर्ति० (७-४-६५)	७३५
२३७३	दाधा घ्वदाप् (१-१-२०)	१४२
३१३९	दाधेट्सिशदस० (३-२-१५९)	५६६
३१६२	दाम्नीशसयुयुज० (३-२-१८२)	५७२
३७३९	दायाद्यं दायादे (६-२-५)	७४८

सूत्रम्		पार्श्वम्
३१७२	दाशगोघ्नौ संप्र० (३-४ ७३)	६६३
३६२९	दाश्वान्साह्वान्मी० (६-१-१२)	७३७
३८३७	दिक्छब्दा ग्राम०(६-२-१०३)	७५५
२५०५	दिवादिभ्यः श्यन् (३-१-६९)	२३२
२९३५	दिवाविभानिशा० (३-२-२१)	५१०
३७२७	दिवो झल् (६-१-१८३)	७४७
३०२८	दिवोऽविजिगीषा० (८-२-४९)	५३६
३७६५	दिष्टिवितस्त्योश्च (६-२-३१)	७५०
२५०७	दीङो युडचि० (६-४-६३)	२३४
२१९०	दीधीवेवीटाम् (१-१-६)	१६
२३२८	दीपजनबुध० (३-१-६१)	९८
२४५६	दीर्घ इणः किति (७-४-६९)	१९७
३८१६	दीर्घकाशतुष०(६-२-८२)	७५४
३४४८	दीर्घजिह्वी च० (४-१-५९)	७२५
३६३१	दीर्घादटि समानपादे (८ ३-९)	७३७
२६३२	दीर्घोऽकितः (७-४-८३)	३४३
२३१८	दीर्घो लघोः (७-४-९४)	९२
२९०४	दुन्योरनुपसर्गे (३-१-१४२)	५०२
३५८९	दुरस्युर्द्रविण० (७-४-३६)	७३४
२९७९	दुहः कब्घश्च (३-२-७०)	५२२
२७६९	दुहश्च (३-१-६३)	४४८
३४६६	दूतस्य भागकर्मणी(४-४ १२०)	७२६
३५७७	दक्स्ववः स्वव० (७-१ ८३)	७३३
३०६०	दृढः स्थूलबलयोः (७-२-२०)	५४५
३००४	दृशेः क्विप् (३-२-९४)	५३०
३४३८	दृशे विख्ये च (३-४-११)	७२५
३८७५	देवताद्वन्द्वे च (६-२-१४१)	७५८
३६६७	देवब्रह्मणोरनुदात्तः (१-२-३८)	७४०
३५९१	देवसुम्नयोर्यजुषि० (७ ४-३८)	७३४
३१२७	देविक्रुशोश्चोपसर्गे (३-२-१४७)	५६३
३०७७	दो दद्धोः (७-४-४६)	५५०
२६०४	दोषो णौ (६-४-९०)	३२३
३०७४	द्यतिस्यतिमास्था० (७-४-४०)	५४९
२३४४	द्युतिस्वाप्योः संप्र०(७-४-६७)	११३
२३४५	द्युद्भ्यो लुङि (१-३-९१)	११३

सूत्रम्	पार्श्वम्
३०२० द्रवमूर्तिस्पर्शयोः श्यः(६-१-२४)	५३४
२८३१ द्विगौ क्रतौ (६-२-९७)	७५५
३७४६ द्विगौ प्रमाणे (६-२-१२)	७४९
३३९५ द्वितीया ब्राह्मणे (२-३-६०)	७२२
३३७४ द्वितीयायां च (३-४-५३)	७१७
३९३१ द्वित्रिभ्यां पाद० (६-२-१९७)	७६२
२२४३ द्विर्वचनेऽचि (१-१-५९)	३६
२९५४ द्विषत्परयोस्तापेः (३-२-३९)	५१६
२४३५ द्विषश्च (३-४-११२)	१८४
३१११ द्विषोऽमित्रे (३-२-१३१)	५५९
३४५३ ब्यचश्छन्दसि (४-३-१५०)	७२६
३५३७ ब्यचोऽतस्तिङः (६-३-१३५)	७३०

ध

३१६१ धः कर्मणि ष्ट्रन् (३-२-१८१)	५७२
२८२४ धातुसम्बन्धे प्रत्ययाः(३-४-१)	४६९
२८२९ धातोः (३-१-९१)	५७५
३६७१ धातोः (६-१-१६२)	७४१
२६०८ धातोः कर्मणः० (३-१-७)	३२६
२६२९ धातोरेकाचो० (३-१-२२)	३४१
२२६४ धात्वादेः षः सः (६-१-६४)	५२
२२४९ धि च (८-२-२५)	४१
२३३२ धिन्विकृण्व्योर च (३-१-८०)	१०२
३०५९ धृषिशसी वैयात्ये (७-२-१९)	५४५
३५६४ ध्वमो ध्वात् (७-१-४२)	७३२

न

२६५९ नः क्ये (१-४-१५)	३६९
३२१७ न कर्मव्यतिहारे (७-३-६)	६७४
२६४१ न कवतेर्यङि (७-४-६३)	३४५
३३१४ न क्तिचि दीर्घश्च (६-४-३९)	६९९
३३२२ न क्त्वा सेट् (१-२-१८)	७०२
२८७५ न क्त्वादेः (७-३-५९)	४८९
३४८७ नक्षत्राद्धः (४-४-१४१)	७२७
२६८१ न गतिहिंसार्थेभ्यः(१-३-१५)	३९८
३९१० न गुणादयोऽ० (६-२-१७६)	७६१
३७२६ न गोश्वन्साववर्ण०(६-१-१८२)	७४७
३५८८ न च्छन्दस्यपुत्रस्य (७-४-३५)	७३४
३८८९ नञो गुणप्रति० (६-२-१५५)	७५९
३८५० नञो जरमर० (६-२-११६)	७५६
३९०६ नञ्सुभ्याम् (६-२-१७२)	७६१
३८४३ नदी बन्धुनि (६-२-१०९)	७५६
२७६७ न दुहस्नुनमां० (३-१-८९)	४४७
२४०७ न दृशः (३-१-४७)	१६६
२६५६ न धातुलोप० (१-१-४)	३६६
३०४० न ध्याख्यापृ० (८-२-५७)	५३९
३९१५ न निविभ्याम् (६-२-१८१)	७६१
२७८० ननौ पृष्टप्रतिवचने(३-२-१२०)	४५६
२८९६ नन्दिग्रहिपचादि०(३-१-१३४)	४९७
२४४६ नन्द्राः संयोगादयः (६-१-३)	१९३
३९५० नन्विल्यनुज्ञैषणायाम् (८-१-४३)	७६३
२७८१ नन्वोर्विभाषा (३-२-१२१)	४५६
२७५५ न पादम्याङ्यः० (१-३-८९)	४२७
३०९० नपुंसके भावे क्तः(३-३-११४)	५५४
२८४० न भाभूपूकमि० (८-४-३४)	४७८
३८२५ न भूताधिकसंजीव०(६-२-९२)	७५५
३७५३ न भूवाक्चिद्दिधिषु (६-२ १९)	७४९
२२२८ न माङ्योगे (६-४-७४)	३०
३१४७ नमिकम्पिस्म्य० (३-२-१६७)	५६७
२६७५ नमोवरिवश्चित्रङः (३-१-१९)	३८४
३१३२ न यः (३-२-१५२)	५६५
२७७४ न यदि (३-२ ११३)	४५५
३३४४ न यद्यनाकाङ्क्षे (३-४-२३)	७०९
३१६८ न रपरसृपिसृजि०(८-३-११०)	५९८
२७७० न रुधः (३-१-६४)	४५०
२५२९ न लिङि (७-२-३९)	२५२
३९३६ न लुट् (८-१-२९)	७६३
३३३५ न ल्यपि (६-४-६९)	७०७
२६४६ न वशः (६-१-२०)	३४७
२३४८ न वृद्भ्यश्चतुर्भ्यः (७-२-५९)	११५
२४१६ न व्यो लिटि (६-१-४६)	१७५
२९३७ न शब्दश्लोककलह०(३-२-२३)	५१२

सूत्रम्		पार्श्वम्
२२६३	न शसददवादि०(६-४-१२६)	५२
२५१८	नशेः षान्तस्य (८-४ ३६)	२४३
३६४९	नश्च धातुस्थो० (८ ४ २७)	७३८
३६०३	नसत्तनिषत्ता० (८ २-६१)	७३५
३३०७	न सुदुर्भ्यां के० (७-१-६८)	६९७
३६६६	न सुब्रह्मण्यायां० (१-२-३७)	७४०
३९३८	नह प्रत्यारम्भे (८-१-३१)	७६३
३८३५	न हास्तिनफलक०(६-२-१०१)	७५५
२५७२	नाग्लोपिशास्वृ० (७-४-२)	२९७
३८६७	नाचार्यराजर्त्वि० (६-२-१३३)	७५७
२९४५	नाडीमुष्ट्योश्च (३-२-३०)	५१४
३६०२	नाद्धस्य (८-२१७)	७३५
३३८४	नाधार्थप्रत्यये च्व्यर्थे(३-४ ६२)	७१९
२७९३	नानद्यतनव० (३-३-१३५)	४६०
२७३२	नानोर्ज्ञः (१-३-५८)	४१४
२५०३	नाभ्यस्तस्याचि० (७-३-८७)	२२७
३७२३	नामन्यतरस्याम् (६-१-१७७)	७४७
३३८०	नाम्न्यादिशिग्रहोः (३ ४ ५८)	७१८
३९०२	नाव्ययदिक्छब्द०(६ २-१६८)	७६०
२९४४	नासिकास्तनयोः (३ २ २९)	५१३
२७५३	निगरणचलनार्थे० (१ ३ ८७)	४२६
३६१३	निगृह्यानुयोगे च (८ २-९४)	७३६
३२६५	निघो निमितम् (३-३-८७)	६८३
२५०२	निजां त्रयाणां० (७-४-७५)	२२७
२५९६	नित्यं स्मयतेः (६-१-५७)	३२०
२५४८	नित्यं करोतेः (६-४-१०८)	२७३
२६३४	नित्यं कौटिल्ये० (३ १-२३)	३४३
२२००	नित्यं ङितः (३ ४-९९)	१९
३४४६	नित्यं छन्दसि (४-१-४६)	७२५
३५८७	नित्यं छन्दसि (७ ४-८)	७३४
३२४३	नित्यं पणः० (३-३-६६)	६७९
३६९८	नित्यं मन्त्रे (६-१-२१०)	७४२
३०८२	निनदीभ्यां स्नातेः०(८-३-८९)	५५२
३१२६	निन्दहिंसक्लिश० (३-२-१४६)	५६३
३५३८	निपातस्य च (६-३-१३६)	७३०

सूत्रम्		पार्श्वम्
३९३७	निपातैर्यद्यदि० (८-१-३०)	७६३
३२५१	निपानमाहावः (३-३-७४)	६८१
३३५५	निमूलसमूलयोः कषः(३-४-३४)	७१२
२५६०	निरः कुषः (७-२-४६)	२८१
३१९९	निरभ्योः पूल्वोः (३-३-२८)	६७१
३९१८	निरुदकादीनि च (६-२-१८४)	७६१
३०२९	निर्बाणोऽवाते (८ २-५०)	५३६
३७४२	निवाते वातत्राणे (६-२-८)	७४९
३२१३	निवासचितिशरी० (३-३-४१)	६७३
३६४७	निव्यविभ्यो० (८-३-११९)	७३८
३०१३	निष्ठा (३-२-१०२)	५३२
३६९३	निष्ठा च द्यजनात् (६-१ २०५)	७४२
३०५७	निष्ठायां सेटि (६-४-५२)	५४३
३०१४	निष्ठायामण्यदर्थे (६-४-६०)	५३२
३०५२	निष्ठा शीङ्स्विदि० (१-२-१९)	५४१
३९०३	निष्ठोपमानादन्य०(६ २-१६९)	७६०
३८४४	निष्ठोपसर्गपूर्व० (६-२ ११०)	७५६
२७०३	निसमुपविभ्यो ह्वः (१ ३-३०)	४०६
२४०३	निसस्तपतावना०(८-३-१०२)	१६४
२६४२	नीग्वञ्चुस्रंसु० (७ ४-८४)	३४६
२६४३	नुगतोऽनुनासि० (७ ४-८५)	३४६
३०३८	नुदविदोन्दत्रा० (८-२-५६)	५३८
३७२८	नृ चान्यतरस्याम् (६-१-१८४)	७४८
२२६८	नेटि (७ २-४)	५५
२५१६	नेर्व्यलिटि रधेः (७-१-६२)	२४३
२९८१	नेड्वशि कृति (७-२-८)	५२३
३५५९	नेतराच्छन्दसि (७-१-२६)	७३१
३९२६	नेरनिधाने (६-२-१९२)	७६२
२२८५	नेर्गदनदपतपद० (८-४-१७)	६१
२६८३	नेर्विशः (१-३-१७)	३९८
३७२१	नोङ्धात्वोः (६-१-१७५)	७४७
३८७६	नोत्तरपदेऽनु० (६-२-१४२)	७५८
३४५४	नोत्वद्वुर्ध्रबिल्वात् (४-३-१५१)	७२६
३६६१	नोदात्तस्वरितोदय०(८-४-६७)	७४०
२७६३	नोदात्तोपदेशस्य० (७-३-३४)	४४०

सूत्रम्		पार्श्वम्
३४०५	नोनयतिध्वनय० (३-१-५१)	७२२
३३२४	नोपधात्थफान्ताद्वा (१·२ २३)	७०२
३२४१	नौ गदनदपठस्वनः(३-३-६४)	६७९
३२३७	नौ ण च (३-३-६०)	६७८
३२२३	नौ वृ धान्ये (३-३·४८)	६७५
२८६४	न्यङ्क्वादीनां च (७-३-५३)	४८६
३७८७	न्यधी च (६-२-५३)	७५२
	प	
३०३१	पचो वः (८-२-५२)	५३७
३६३६	पञ्चम्याः परावध्यर्थे (८-३ ५१)	७३८
३००८	पञ्चम्यामजातौ (३-२-९८)	५३१
२३५५	पतः पुम् (७-४-१९)	१३२
३५३०	पथि च च्छन्दसि (६-३-१०८)	७३०
३६८७	पथिमथोः सर्व० (६·१·१९९)	७४२
३१८२	पदरुजविश० (३-३-१६)	६६७
२८७०	पदास्वैरिबाह्या० (३-१-११९)	४८८
३७४१	पदेऽपदेशे (६·२·७)	७४९
२७९६	परस्मिन्विभाषा (३-३-१३८)	४६२
२१७३	परस्मैपदानां णल०(३-४-८२)	१०
३९३३	परादिश्छन्दसि०(६-२-१९९)	७६२
३२१०	परावनुपात्यय इणः (३ ३-३८)	६७३
३३१९	परावरयोगे च (३-४-२०)	७००
३३७७	परिक्रिश्यमाने च (३-४-५५)	७१७
२२७५	परिनिविभ्यः सेव०(८-३-७०)	५८
३२०९	परिन्योर्नीणोर्द्यूता०(३-३-३७)	६७३
३७६७	परिप्रत्युपापा० (६-२-३३)	७५०
३१९०	परिमाणाख्यायां०(३-३-२०)	६६९
२९४८	परिमाणे पचः (३-२-३३)	५१४
२६८४	परिव्ययेभ्यः क्रियः (१ ३·१८)	३९८
३०२६	परिस्कन्दः प्राच्य०(८ ३-७५)	५३६
३९१६	परेरभितोभावि० (६-२-१८२)	७६१
२७४८	परेर्मृषः (१-३-८२)	४२५
२३९९	परेश्च (८·३-७४)	१६२
३२६२	परेश्च घाङ्कयोः (८-२·२२)	६८३
२१७१	परोक्षे लिट् (३-२-११५)	९
३२६१	परौ घः (३-३-८४)	६८३
३२३०	परौ भुवोऽवज्ञाने (३-३-५५)	६७७
३२२२	परौ यज्ञे (३-३-४७)	६७५
३१७८	पर्याप्तिवचनेष्व० (३ ४-६६)	६६५
३२८८	पर्यायार्हणो० (३-३-१११)	६९३
३८६२	पललसूपशाकं० (६-२-१२८)	७५७
३५०१	पश्च पश्चा च० (५-३-३३)	७२८
२८९९	पाघ्राध्माधेट्० (३-१-१३७)	५००
२३६०	पाघ्राध्मास्था० (७-३-७८)	१३४
२९७२	पाणिघताडघौ०(३-२-५५)	५२०
३६३७	पार्तौ च बहुलम् (८-३ ५२)	७३८
३४५७	पाथोनदीभ्यां० (४·४-१११)	७२६
३८०२	पापं च शिल्पिनि (६·२-६८)	७५३
२८९०	पाय्यसांनाय्य० (३-१-१२९)	४९२
३५२८	पितरामातरा च०(६ ३·३३)	७३०
३२९६	पुंसि संज्ञायां घः (३-३-११८)	६९५
२१८९	पुगन्तलघूपधस्य च(७-३-८६)	१५
२६७६	पुच्छभाण्डचीवरा०(३-१-२०)	३८४
३८६६	पुत्रः पुम्भ्यः (६-२-१३२)	७५७
३९४९	पुरा च परीप्सायाम् (८-१-४२)	७६३
२७८२	पुरि लुङ् चास्मे (३-२-१२२)	४५७
३९२४	पुरुषश्चान्वादिष्टः (६-२-१९०)	७६२
३८३३	पुरे प्राचाम् (६-२-९९)	७५५
२९३२	पुरोऽग्रतोऽग्रेषु० (३-२-१८)	५१०
३१६६	पुवः संज्ञायाम् (३-२-१८५)	५७३
२३४३	पुषादिद्युताद्यृलृ० (३-१-५५)	११२
२८६७	पुष्यसिद्ध्यौ नक्षत्रे(३-१-११६)	४८७
२९५८	पूःसर्वयोर्दारिसहोः(३-२-४१)	५१६
३७६२	पूगेष्वन्यतरस्याम् (६-२-२८)	७५०
३०५१	पूङः क्वा च (१-२-२२)	५४१
३०५०	पूङश्च (७-१-५१)	५४१
३१०८	पूङ्यजोः शानन् (३-२-१२८)	५५९
३९७४	पूजनात्पूजितम० (८-१-६७)	७६५
३९४४	पूजायां नानन्तरम्(८-१-३७)	७६३
३६१७	पूर्वं तु भाषायाम् (८-२-९८)	७३६

सूत्रम्		पार्श्वम्
३६४३	पूर्वपदात् (८-३-१०६)	७३८
२७३४	पूर्ववत्सनः (१-३-६२)	४१५
२९३३	पूर्वे कर्तरि (३-२-१९)	५१०
३७५६	पूर्वे भूतपूर्वे (६-२-२२)	७५०
३४७९	पूर्वैः कृतमिनयौ च(४-४-१३३)	७२७
२१७८	पूर्वोऽभ्यासः (६-१-४)	११
२८४४	पोरदुपधात् (३-१-९८)	४८०
३०७२	प्यायः पी (६-१-२८)	५४९
२६९०	प्रकाशनस्थेयाख्य०(१-३-२३)	४०१
३५१८	प्रकृत्यान्तःपाद० (६ १-११५)	७२९
३८७१	प्रकृत्या भगालम् (६-२-१३७)	७५८
२६०३	प्रजने वीयतेः (६-१-५५)	३२२
३२४८	प्रजने सर्तेः (३-३-७१)	६८०
३१३६	प्रजोरिनिः (३-२-१५६)	५६५
३६०८	प्रणवष्टेः (८-२-८९)	७३६
२८८९	प्रणाय्योऽसम्मतौ (३-१-१२८)	४९२
३७४०	प्रतिबन्धि चिर० (६-२-६)	७४८
३६१८	प्रतिश्रवणे च (८-२-९९)	७३६
३०२७	प्रतिस्तब्धनिस्त०(८ ३-११४)	५३६
३९२७	प्रतेरंश्वादय० (६-२-१९३)	७६२
३०२२	प्रतेश्च (६-१-२५)	५३५
३५०२	प्रत्नपूर्वविश्वे० (५-३१११)	७२८
२८६९	प्रत्यपिभ्यां ग्रहेः (३-१-११८)	४८७
२७३३	प्रत्याङ्भ्यां श्रुवः (१-३-५९)	४१५
३२०४	प्रथने वावशब्दे (३-३-३३)	६७२
३७९०	प्रथमोऽचिरोप० (६-२-५६)	७५२
३०६१	प्रभौ परिवृढः (७-२-२१)	५४६
३२४५	प्रमदसम्मदौ हर्षे (३-३-६८)	६७९
३३७२	प्रमाणे च (३-४-५१)	७१६
२८७८	प्रयाजानुयाजौ० (७-३-६२)	४८९
३४३७	प्रयै रोहिष्यै० (३-४-१०)	७२५
२८८४	प्रयोज्यनियोज्यौ० (७-३-६८)	४९०
३८८१	प्रवृद्धादीनां च (६-२-१४७)	७५९
२७७७	प्रश्ने चासन्नकाले (३-२-११७)	४५६
२९१७	प्रष्ठोऽग्रगामिनि (८-३-९२)	५०६
३५९९	प्रसमुपोदः पादपूरणे (८-१-६)	७३५
३०३४	प्रस्त्योऽन्यतरस्याम्(८-२ ५४)	५३७
३८२१	प्रस्थेऽवृद्धमकर्क्या०(६-२-८७)	७५४
२१६३	प्रहासे च मन्यो०(१-४-१०६)	६
२२७६	प्राक्सितादड्व्य०(८-३-६३)	५८
३८०८	प्राचां क्रीडायाम् (६-२-७४)	७५४
३९१७	प्रादस्वाङ्गं० (६-२-१८३)	७६१
२७४७	प्राद्वहः (१-३-८१)	४२५
२९५३	प्रियवशे वदः खश् (३-२-३८)	५१५
३७५०	प्रीतौ च (६-२-१६)	७४९
२९११	प्रुसृल्वः समभि० (३-१-१४९)	५०४
२९२०	प्रे दाज्ञः (३-२-६)	५०७
३१९८	प्रे द्रुस्रुस्रुवः (३-३-२७)	६७१
३२२७	प्रे वणिजाम् (३-३-५२)	६७६
३१२५	प्रे लपस्रुद्रुमथ० (३-२-१४५)	५६३
३२२१	प्रे लिप्सायाम् (३-३-४६)	६७५
३२०३	प्रे स्रोऽयज्ञे (३-३ ३२)	६७२
२८१७	प्रैषातिसर्ग० (३-३-१६३)	४६८
२७३५	प्रोपाभ्यां युजे० (१-३-६४)	४१६
२७१५	प्रोपाभ्यां सम० (१-३-४२)	४१०
३६२५	प्लुतावैच इदुतौ (८-२-१०६)	७३७
२५५८	प्वादीनां ह्रस्वः (७-३-८०)	२७८

फ

२३५४	फणां च सप्तानाम् (६-४-१२५)	१३१
२९४०	फलेग्रहिरात्मं० (३-२-२६)	५१२

ब

२५२७	बभूथाततन्थ० (७-२-६४)	२५२
३४६५	बर्हिषि दत्तम् (४-४-११९)	७२६
३५०६	बहुप्रजाश्छन्दसि (५-४-१२३)	७२८
३३९८	बहुलं छन्दसि (२-४-३९)	७२२
३४००	बहुलं छन्दसि (२-४-७३)	७२२
३४०१	बहुलं छन्दसि (२-४-७६)	७२२
३४१९	बहुलं छन्दसि (३-२-८८)	७२३
३४९८	बहुलं छन्दसि (५-२-१२२)	७२८
३५१०	बहुलं छन्दसि (६-१-३४)	७२८

सूत्रम्		पार्श्वम्
३५५७	बहुलं छन्दसि (७ १-८)	७३१
३५५८	बहुलं छन्दसि (७-१-१०)	७३१
३५७८	बहुल छन्दसि (७-१-१०३)	७३३
३५८६	बहुलं छन्दसि (७-३-९७)	७३४
३५९८	बहुलं छन्दसि (७-४-७८)	७३५
३५४६	बहुलं छन्दस्य० (६-४-७५)	७३१
२९९१	बहुलमाभीक्ष्ण्ये (३-२-८१)	५२७
३८९६	बहुव्रीहावि० (६-२-१६२)	७६०
३७३५	बहुव्रीहौ प्रकृत्या० (६-२-१)	७४८
३८४०	बहुव्रीहौ विश्वं० (६-२-१०६)	७५६
३९०९	बहोर्नञ्वदुत्तर० (६-२-१७५)	७६१
३७६४	बह्वन्यतरस्याम् (६-२-३०)	७५०
२६७२	बाष्पोष्मभ्या० (३-१-१६)	३८३
२५९३	बिभेतेर्हेतुभये (६-१-५६)	३१९
२७५२	बुधयुधनशजने० (१-३-८६)	४२६
२९९८	ब्रह्मभ्रूणवृत्रेषु क्विप् (३-२-८७)	५२९
२४५२	ब्रुव ईट् (७-३-९३)	१९६
२४५०	ब्रुवः पञ्चाना० (३-४-८४)	१९५
२४५३	ब्रुवो वचिः (२-४-५३)	१९६
३६१०	ब्रूहिप्रेष्यश्रौष० (८-२-९१)	७३६
	भ	
३८०५	भक्ताख्यास्तदर्थेषु (६-२-७१)	७५३
२९७६	भजो ण्विः (३-२-६२)	५२२
३१४१	भञ्जभासमिदो० (३-२-१६१)	५६६
२७६४	भञ्जेश्च चिणि (६-४-३३)	४४०
३५१७	भव्यप्रवव्ये च० (६-१-८३)	७२९
२१८१	भवतेरः (७-४-७३)	१२
३१७१	भविष्यति गम्यादयः (३-३-३)	६६३
२७९४	भविष्यति मर्या० (३-३-१३६)	४६१
३४५६	भवे छन्दसि (४-४-११०)	७२६
२८९४	भव्यगेयप्रवच० (३-४-६८)	४९४
२६७९	भावकर्मणोः (१-३-१३)	३९७
३४४३	भावलक्षणे स्थेण्कृ० (३-४-१६)	७२५
३१८९	भाववचनाश्च (३-३-११)	६६६
३१८४	भावे (३-३-१८)	६६७

सूत्रम्		पार्श्वम्
३४९०	भावे च (४-४-१४४)	७२७
३२५२	भावेऽनुपसर्गस्य (३-३-७५)	६८१
३५९७	भाषायां सद० (३-२-१०८)	५५६
२७२०	भासनोपसम्भाषा (१-३-४७)	४११
२९३१	भिक्षासेनादायेषु च (३-२-१७)	५०९
३०४२	भित्तं शकलम् (८-२-५९)	५३९
२८६६	भियोर्ञौ नदे (३-१-११५)	४८७
३१५४	भियः क्रुक्लुकनौ (३-२-१७४)	५६९
२४९२	भियोऽन्यतरस्याम् (६-४ ११५)	२२१
२५९५	भियो हेतुभये० (७-३-४०)	३२०
३१७३	भीमादयोऽपादाने (३-४-७४)	६६४
२५९८	भीस्म्योर्हेतुभये (१-३-६८)	३१९
३६७५	भीह्रीभृहुमद० (६-१-१९२)	७४१
२४९१	भीह्रीभृहुवां० (३-१-३९)	२२०
२८७७	भृञन्युब्जौ पाण्यु० (७-३-६१)	४८९
२७३७	भुजोऽनवने (१-३-६६)	४१६
३१५९	भुवः संज्ञान्तरयोः (३-२-१७९)	५७१
३११८	भुवश्च (३-२-१३८)	५६१
३४४७	भुवश्च (४-१-४७)	७२५
३६०५	भुवश्च महाव्याहृतेः (८ २-७१)	७३५
२८५५	भुवो भावे (३-१-१०७)	४८३
२१७४	भुवो वुग्लुङ्लिटोः (६-४-८८)	१०
२९९५	भूते (३ २-८४)	५२८
२७९७	भूते च (३-३-१४०)	४६२
३१७०	भूतेऽपि दृश्यन्ते (३-३-२)	६६३
२२२४	भूसुवोस्तिङि (७-३-८८)	२८
२४९६	भृञामित् (७ ४-७६)	२२३
२८६१	भृञोऽसंज्ञायाम् (३-१-११२)	४८५
२६६७	भृशादिभ्यो भु० (३-१-१२)	३७८
२८८५	भोज्यं भक्ष्ये (७-३-६९)	४९१
२५३५	भ्रस्जो रोपधयो० (६-४-४७)	२५६
३१५७	भ्राजभासधु० (३-२-१७७)	५७०
२५६५	भ्राजभासभाष० (७ ४-३)	२८६
	म	
३०८९	मतिबुद्धिपूजा० (३-२-१८८)	५५४

सूत्रम्		पार्श्वम्
३६२८	मतुवसो रु० (८-३-१)	७३७
३७०५	मतोः पूर्वमात्संज्ञा०(६-१ २१९)	७४२
३४८२	मतौ च (४-४-१३६)	७२७
३४७४	मत्वर्थे मासतन्वोः(४-४-१२८)	७२७
३२४४	मदोऽनुपसर्गे (३-३-६७)	६७९
३४८५	मधोः (४-४-१३९)	७२७
३४७५	मधोर्ञ च (४-४-१२९)	७२७
२९९२	मनः (३-२-८२)	५२७
३८८५	मन्क्तिन्व्याख्यान०(६-२-१५१)	७५९
३४०२	मन्ते घसह्वरण० (२-४-८०)	७२२
३४२०	मन्त्रे वृषेषपच० (३-३-९६)	७२३
३४१४	मन्त्रे श्वेतवहोक्थ०(३-२-७१)	७२३
३५५४	मन्त्रेष्वाङ्यादे० (६-४-१४१)	७३१
३५३३	मन्त्रे सोमाश्वे० (६-३-१३१)	७३०
३३१८	मयतेरिदन्य० (६-४-७०)	७००
३४८४	मये च (४-४-१३८)	७२७
२५१७	मस्जिनशोर्झलि (७-१-६०)	२४३
३७७२	महान्व्रीह्य० (६-२-३८)	७५१
२२१९	मांङि लुङ् (३-३-१७५)	२७
३७४८	मात्रोपज्ञोपक्रम० (६-२-१४)	७४९
२३९४	मान्बधदान्शा० (३-१-६)	१५८
३४७०	मायायामण् (४-४-१२४)	७२६
३८२२	मालादीनां च (६-२-८८)	७५४
२९४९	मितनखे च (३-२-३४)	५१४
२५६८	मितां ह्रस्वः (६-४-९२)	२९०
२७४०	मिथ्योपपदात्० (१-३-७१)	४२२
२३४६	मिदेर्गुणः (७-३-८२)	११३
३८८८	मिश्रं चानुपस० (६-२-१५४)	७५९
२५०८	मीनातिमिनोति० (६-१-५०)	२३४
३५८५	मीनातेर्निगमे (७-३-८१)	७३४
३९०१	मुखं स्वाङ्गम् (६-२-१६७)	७६०
२६२४	मुचोऽकर्मकस्य० (७-४-५७)	३३६
२६७७	मुण्डमिश्र० (३-१-२१)	३८५
३२५४	मूर्तौ घनः (३-३-७७)	६८१
२८६२	मृजेर्विभाषा (३-१-११३)	४८६
२४७३	मृजेर्वृद्धिः (७-२-११४)	२०८
३३२३	मृडमृदगुध० (१-२-७)	७०२
३०५५	मृषस्तितिक्षायाम् (१-२-२०)	५४२
२९६०	मेघर्तिभयेषु कृञः (३-२ ४३)	५१७
२२०३	मेर्निः (३-४-८९)	२०
२५३८	म्रियतेर्लुङ्लिङोश्च (१-३-६१)	२६२
२३०९	म्वोश्च (८-२-६५)	८८
	य	
२६३३	यङि च (७-४-३०)	३४३
२६५०	यङोऽचि च (२-४-७४)	३४९
२६५१	यङो वा (७-३-९४)	३५१
२८०५	यच्चयत्रयोः (३-३-१४८)	४६४
३१४६	यजजपदशां यङः(३-२-१६६)	५६७
३५६५	यजध्वैनमिति च (७-१-४३)	७३२
३२६८	यजयाचयत० (३-३-९०)	६८५
२८८२	यजयाचरुच० (७-३-६६)	४९०
३५२०	यजुष्युरः (६-१-११७)	७६९
३६४१	यजुष्येकेषाम् (८-३-१०४)	७३८
३३९७	यजेश्च करणे (२-३ ६३)	७२२
३६६३	यज्ञकर्मण्य० (१-२-३४)	७४०
३२०२	यज्ञे समि स्तुवः (३-३-३१)	६७२
३७०१	यतोऽनावः (६-१-२१३)	७४२
३३४९	यथातथयोरसूया० (३ ४-२८)	७११
२८२७	यथाविध्यनुप्रयोगः० (३-४-४)	४७२
३९६३	यद्धितुपरं छन्दसि (८-१-५६)	७६५
३९७३	यद्वृत्तान्नित्यम् (८-१-६६)	७६५
३२४०	यमः समुपनिविषु च(३-३-६३)	६७९
२३७७	यमरमनमातां सक्च(७ २-७३)	१४३
२६९८	यमो गन्धने (१ २-१५)	४०४
३८९०	ययतोश्चातदर्थे (६-२ १५६)	७६०
३१५६	यश्च यङः (३-२-१७६)	५६९
२५२१	यसोऽनुपसर्गात् (३-१ ७१)	२४६
३०२५	यस्य विभाषा (७-२-१५)	५३५
२६३१	यस्य हलः (६-४-४९)	३४२
३६०९	याज्यान्तः (८-२-९०)	७३६

सूत्रम्		पार्श्वम्
३३५१	यावति विन्दजीवोः(३-४-३०)	७१२
२७८३	यावत्पुरा० (३-३-४)	४५७
३९४३	यावद्यथाभ्याम् (८-१-३६)	७६३
२२०९	यासुट् परस्मैपदे०(३-४-१०३)	२२
२४८८	यीवर्णयोर्दी० (७-४-५३)	२१७
३८१५	युक्तारोह्यादयश्च (६-२-८१)	७५४
३८००	युक्ते च (६-२-६६)	७५३
२८७३	युग्यं च पत्रे (३-१-१२१)	४८८
३५४४	युप्लुवोर्दीर्घश्छन्दसि(६-४-५८)	७३१
३६४०	युष्मत्तत्ततक्षु० (८-३-१०३)	७३८
३६९९	युष्मदस्मदोर्ङसि (६-१-२११)	७४२
२१६२	युष्मद्युपपदे समा०(१-४-१०५)	६
२५४९	ये च (६-४-१०९)	२७४
३६०७	ये यज्ञकर्मणि (८-२-८८)	७३६
२३१९	ये विभाषा (६-४-४३)	९५
	र	
३४६७	रक्षोयातूनां० (४-४-१२१)	७२६
२३९७	रञ्जेश्च (६-४-२६)	१६०
३०१६	रदाभ्यां निष्ठातो० (८-२-४२)	५३३
२५१५	रधादिभ्यश्च (७-२-४५)	२४३
२३०२	रधिजभोरचि (७-१-६१)	८३
२५८१	रभेरशब्लिटोः (७-१-६३)	३१५
२६१७	रलो व्युपधाद्धला० (१-२-२६)	३३०
३२२८	रश्मौ च (३-३-५३)	६७६
३००५	राजनि युधिकृञः (३-२-९५)	५३१
३७६८	राजन्यबहुवचन० (६-२-३४)	७५१
२८६५	राजसूयसूर्य० (३-१-११४)	४८६
३७९३	राजा च (६-२-५९)	७५३
३७९७	राजा च प्रशं० (६-२-६३)	७५३
३४४५	रात्रेश्चाजसौ (४-१-३१)	७२५
२५३२	राधो हिंसायाम् (६-४ १२३)	२५३
२६५५	राल्लोपः (६-४-२१)	३६६
३६९६	रिक्ते विभाषा (६-१-२०८)	७४२
२३६७	रिङ्शयग्लिङ्क्षु (७-४-२८)	१३९
२१९२	रि च (७-४-५१)	१६
२६४४	रीगृदुपधस्य च (७-४-९०)	३४६
२६५२	रुग्रिकौ च लुकि (७-४-९१)	३५९
२६०९	रुदविदमुष० (१-२-८)	३२७
२४७५	रुदश्च पञ्चभ्यः (७-३-९८)	२०९
२४७४	रुदादिभ्यः सार्व० (७-२-७६)	२०९
२५४३	रुधादिभ्यः श्नम् (३-१-७८)	२६७
३०६९	रुष्यमत्वर० (७-२-२८)	५४८
२५९९	रुहः पोऽन्यतर० (७-३-४३)	३२१
३४६८	रेवतीजगती० (४-४-१२२)	७२६
३२८५	रोगाख्यायां ण्वु० (३-३-१०८)	६९१
	ल	
२१५२	लः कर्मणि च० (३-४-६९)	३
२१५५	लः परस्मैपदम् (१-४-९९)	४
३१०३	लक्षणहेत्वोः० (३-२-१२६)	५५८
२९६९	लक्षणे जाया० (३-२-५२)	५१९
२४६३	लङः शाकटायन०(३-४-१११)	२०२
३१००	लटः शतृशान० (३-२-१२४)	५५७
२७७८	लट् स्मे (३-२-११८)	४५६
२५८२	लभेश्च (७-१-६४)	३१५
३१३४	लषपतपदस्था० (३-२-१५४)	५६५
२१५३	लस्य (३-४-७७)	४
२२११	लिङः सलोपोऽ० (७-२-७९)	२३
२२५५	लिङः सीयुट् (३-४-१०२)	४३
३४२४	लिङर्थे लेट् (३-४-७)	७२४
२२१५	लिङाशिषि (३-४-११६)	२६
२८१५	लिङ् च (३-३-१५९)	४६७
२७८८	लिङ् चोर्ध्व० (३-३-९)	४५८
२८१८	लिङ् चोर्ध्वमौ० (३-३-१६९)	४६८
२२२९	लिङ्निमित्ते० (३-३-१३९)	३०
२८२१	लिङर्थदि (३-३-१६८)	४६९
३४३४	लिङर्थाशिष्यङ् (३-१-८६)	७२५
२३००	लिङ्सिचावात्मने०(१-२-११)	८१
२५२८	लिङ्सिचोरात्मने० (७-२-४२)	२५२
३०९४	लिटः कानज्वा (३-२-१०६)	५५५
२२४१	लिटस्तझयोरेशिरेच् (३-४-८१)	३६

सूत्रम्		पार्श्वम्
२१७७	लिटि धातो० (६-१-८)	११
२४१३	लिटि वयो यः (६-१-३८)	१७३
२१७२	लिट् च (३-४-११५)	९
२४२४	लिव्यन्यतरस्याम् (२-४-४०)	१८०
२४०८	लिव्यभ्याससं० (६-१-१७)	१७०
२३२७	लिव्यडोश्च (६-१-२९)	९८
३६७६	लिति (६-१-१९३)	७४१
२४१८	लिपिसिचिह्नश्च (३-१-५३)	१७६
२७८६	लिप्स्यमानसिद्धौ च (३-३-७)	४५८
२५९२	लियः संमानन० (१-३-७०)	३१९
२५९१	लीलोर्नुग्लुकाः० (७-३-३९)	३१९
२३६५	लुग्वा दुहदिह० (७-३-७३)	१३८
२२१८	लुङ् (३-२-११०)	२७
२४३४	लुङि च (२-४-४३)	१८३
२२०६	लुङ्लङ्लुङ्० (६-४-७१)	२१
२४२७	लुङ्सनोर्घस्लृ (२-४-३७)	१८१
२१८८	लुटः प्रथमस्य० (२-४-८५)	१५
२३५१	लुटि च क्लृपः (१-३-९३)	११७
२६३५	लुपसदचरजप० (३-१-२४)	३४४
३०४८	लुभो विमोहने (७-२-५४)	५४०
३१०७	लृटः सद्वा (३-३-१४)	५५८
२१९३	लृट् शेषे च (३-३-१३)	१७
३४२७	लेटोऽडाटौ (३-४-९४)	७२४
२१९८	लोटो लङ्वत् (३-४ ८५)	१९
२१९४	लोट् च (३-३-१६२)	१७
३९५९	लोट् च (८-१-५२)	७६४
२७८७	लोडर्थलक्षणे च (३-३-८)	४५८
२५८७	लोपः पिबतेरी० (७-४-४)	३१७
२३३३	लोपश्चास्यान्य० (६-४-१०७)	१०३
३५६३	लोपस्त आत्मने० (७-१-४१)	७३२
३९५२	लोपे विभाषा (८-१-४५)	७६४
२५००	लोपो यि (६-४-११८)	२२५
२६६८	लोहितादिडाज्भ्यः (३-१-१३)	३८१
३३३९	ल्यपि च (६-१-४१)	७०८
३३३६	ल्यपि लघुपूर्वात् (६-४-५६)	७०७

सूत्रम्		पार्श्वम्
३२९०	ल्युट् च (३-३-११५)	६९४
३०१८	ल्वादिभ्यः (८-२-४४)	५३३
	व	
२४५४	वच उम् (७-४-२०)	१९७
२४०९	वचिस्वपि० (६-१-१५)	१७०
२८८३	वचोऽशब्द० (७-३-६७)	४९०
३३२५	वञ्चिलुञ्च्यृतश्च (१-२-२४)	७०३
२८७९	वञ्चेर्गतौ (७-३-६३)	४८९
३४९३	वत्सरान्ताच्छ० (५-१-९१)	७२८
२८५४	वदः सुपि क्यप्च (३-१-१०६)	४८३
२२६७	वदव्रजहलन्तस्याचः (७-२-३)	५५
३९१२	वनं समासे (६-२-१७८)	७६१
२४२९	वमोर्वा (८-४-२३)	१८२
२९२४	वयसि च (३-२-१०)	५०८
३४७३	वयस्यासु मूर्धो० (४-४-१२७)	७२७
३८६५	वर्ग्यादयश्च (६-२-१३१)	७५७
३७३७	वर्णो वर्णेष्वनेते (६-२-३)	७४८
२७८९	वर्तमानसामीप्ये० (३-३-१३१)	४५९
२१५१	वर्तमाने लट् (३-२-१२३)	३
३३५३	वर्षप्रमाण ऊलोप० (३-४-३२)	७१२
२४१४	वश्वास्यान्यतर० (६-१-३९)	१७३
३०४६	वसतिक्षुधोरिट् (७-२-५२)	५४०
३४५१	वसन्ताच्च (४-३-२०)	७२६
३४८६	वसोः समूहे च (४-४-१४०)	७२७
३०९६	वस्वेकाजाद्धसाम् (७-२-६७)	५५५
३४१०	वहश्च (३-२-६४)	७२३
२९४७	वहाभ्रे लिहः (३-२-३२)	५१४
२८५०	वह्यं करणम् (३-१-१०२)	४८२
२६६९	वा क्यषः (१-३-९०)	३८१
३०८१	वा क्रोशदैन्ययोः (६-४-६१)	५५१
२७००	वा गमः (१-२-१३)	४०४
२९५७	वाचंयमपुरन्दरौ च (६-३-६९)	५१६
२६०५	वा चित्तविरागे (६-४-९१)	३२३
२९५६	वाचि यमो व्रते (३-२-४०)	५१६
३५५२	वा छन्दसि (३-४-८८)	७३१

सूत्रम्		पार्श्वम्
३५१५	वा छन्दसि (६-१-१०६)	७२९
३९०५	वा जाते (६-२-१७१)	७६१
२३५६	वा जृभ्रमुत्रसाम् (६-४-१२४)	१३३
३०६८	वा दान्तशान्त० (७-२-२७)	५४७
२८३९	वा निंसनिंक्षनिन्दाम्(८-४-३३)	४७८
२३७८	वाऽन्यस्य संयोगादेः(६-४-६८)	१४३
३७५४	वा भुवनम् (६-२-२०)	७५०
२३२१	वा भ्राशम्लाश० (३-१-७०)	९६
३२९२	वायौ (२-४-५७)	६९५
२४३७	वा लिटि (२-४-५५)	१८७
३३३४	वा ल्यपि (६-४-३८)	७०६
३५४१	वा षपूर्वस्य निगमे (६-४-९)	७३१
२८३०	वाऽसरूपोऽस्त्रियाम् (३-१-९४)	४७५
३०८५	विकुशमिपरिभ्यः०(८-३-९६)	५५२
३६१६	विचार्यमाणानाम् (८-२-९७)	७३६
२५३६	विज इट् (१-२-२)	२५८
३४१७	विजुपे छन्दसि (३-२-७३)	७२३
२९८२	विड्वनोरनुनासिक० (६-४-४१)	५२३
३०४१	वित्तो भोगप्रत्यययोः(८-२-५८)	५३९
२४६५	विदांकुर्वन्त्वि० (३-१-४१)	२०५
३१४२	विदिभिदिच्छिदेः (३-२-१६२)	५६७
३१०५	विदेः शतुर्वसुः (७-१-३६)	५५८
२४६४	विदो लटो वा (३-४-८३)	२०४
२२०८	विधिनिमन्त्रणा०(३-३-१६१)	२१
२९५०	विध्वरुषोस्तुदः (३-२-३५)	५१४
३१४९	विन्दुरिच्छुः (३-२-१६९)	५६८
२६८५	विपराभ्यां जेः (१-३-१९)	३९८
२८६८	विपूयविनीय० (३-१-११७)	४८७
३१६०	विप्रसंभ्यो ड्वसंज्ञा०(३-२-१८०)	५७२
३५५५	विभाषर्जोश्छन्दसि(६-४-१६२)	७३१
२८००	विभाषा कथ० (३-३-१४३)	४६३
२७८४	विभाषा कदाकर्ह्योः (३-३-५)	४५७
२७५१	विभाषाऽकर्मकात् (१-३-८५)	४२६
२८७१	विभाषा कृवृषोः (३-१-१२०)	४८८
३२८७	विभाषाख्यान० (३-३-११०)	६९२
३०९९	विभाषा गमहन० (७-२-६८)	५५७
२९०५	विभाषा ग्रहः (३-१-१४३)	५०२
३३४५	विभाषाग्रेप्रथम० (३-४-२४)	७०९
२३७६	विभाषा घ्राधेट्० (२-४-७८)	१४२
३२२५	विभाषाङि रुग्लुवोः (३-३-५०)	६७६
२७६५	विभाषा चिण्णमुलोः(७-१-६९)	४४०
२५२५	विभाषा चेः (७-३-५८)	२५१
३६६५	विभाषा छन्दसि (१-२-३६)	७४०
३८९८	विभाषा छन्दसि (६-२-१६४)	७६०
३५९३	विभाषा छन्दसि (७-४-४४)	७३४
३८९५	विभाषा तृन्नन्नतीo(६-२-१६१)	७६०
२८१२	विभाषा धातौ० (३-३-१५५)	४६६
२३७५	विभाषा धेट्श्व्यो (३-१-४९)	१४२
३८०१	विभाषाध्यक्षे (६-२-६७)	७५३
३३३७	विभाषाऽऽपः (६-४-५७)	७०७
३३४२	विभाषा परेः (६-१-४४)	७०८
३६१२	विभाषा पृष्टप्रति० (८-२-९३)	७३६
३०५४	विभाषा भावादि० (७-२-१७)	५४२
३६८४	विभाषा भाषायाम् (६-१-१८१)	७४२
३०२३	विभाषाभ्यव० (६-१-२६)	५३५
२५०९	विभाषा लीयतेः (६-१-५१)	२३४
२४६०	विभाषा लुदित्लृटोः(२-४-५०)	२००
२७२३	विभाषा विप्रलापे (१-३-५०)	४१२
३७०३	विभाषा वेण्विन्धा०(६-१-२१५)	७४२
२५८३	विभाषा वेष्टिचेष्ट्योः(७-४-९६)	३१४
२४२०	विभाषा श्वेः (६-१ ३०)	१७७
२७७५	विभाषा साकाङ्क्षे (३-२-११४)	४५५
२४०४	विभाषा सृजिदृशोः(७-२-६५)	१६५
३६५५	विभाषितं विशेष०(८-१-७४)	७३९
३९६०	विभाषितं सोपसर्ग०(८-१-५३)	७६४
२३२५	विभाषेटः (८-३-७९)	९७
३९३०	विभाषोत्पुच्छे (६-२-१९६)	७६२
२७४४	विभाषोपपदेन० (१-३ ७७)	४२३
२७३०	विभाषोपयमने (१-२-१६)	४१४
२४४७	विभाषोर्णोः (१-२-३)	१९४

सूत्रम्		पार्श्वम्
३३८८	विशाखयोश्च (१-२-६२)	७२१
३३७८	विशिपतिपदि० (३-४-५६)	७१७
३७५८	विस्पष्टादीनि० (६-२-२४)	७५०
३८५४	वीरवीर्यौ च (६-२-१२०)	७५६
३५०४	वृकज्येष्ठाभ्यां० (५-४-४१)	७२८
३२३३	वृक्षासनयोर्विष्टरः (८-३-९३)	६७७
३२२९	वृणोतेराच्छादने (३-३-५४)	६७७
२७११	वृत्तिसर्गतायनेषु० (१-३-३८)	४०९
२३४७	वृद्भ्यः स्यसनोः (१-३-९२)	११५
३६९१	वृषादीनां च (६-१-२०३)	७४२
२३९१	वृतो वा (७-२-३८)	१५७
२७१४	वेः पादविहरणे (१-३-४१)	४१०
२७०७	वेः शब्दकर्मणः (१-३-३४)	४०७
२३९८	वेः स्कन्देरनिष्ठायाम्(७-३-७३)	१६२
२५५६	वेः स्कभ्नातेर्नित्यम् (८-३-७७)	२७८
२४१५	वेञः (६-१-४०)	१७४
२४११	वेञो वयिः (२-४-४१)	१७३
२७०१	वेत्तेर्विभाषा (७-१-७)	४०४
३४५८	वेशन्तहिमवद्भ्या०(४-४-११२)	७२६
३४७७	वेशोयशआदेः (४-४-१३१)	७२७
२२७४	वेश्च स्वनो भोजने (८-३-६९)	५८
३४३०	वैतोऽन्यत्र (३-४-९६)	७२४
३९७१	वैवावेति च च्छन्दसि(८-१-६४)	७६५
२७९८	वोताप्योः (३-३-१४१)	४०६
२५९०	वो विधूनने जुक् (७ ३-३८)	३१८
३१२३	वौ कषलसकत्थ०(३-२-१४३)	५६२
३१९६	वौ क्षुश्रुवः (३-३-२५)	६७१
२७२१	व्यक्तवाचांसमुच्चारणे(१-३-४८)	४१२
३४३३	व्यत्ययो बहुलम् (३-१-८५)	७२४
२३५३	व्यथो लिटि (७-४-६८)	१२०
३२३८	व्यधजपोरनुपसर्गे (३ ३-६१)	६७८
३३९२	व्यवहिताश्च (१-४-८२)	७२१
३९००	व्यवायिनोऽ० (६ २-१६६)	७६०
३३४१	व्यश्च (६-१-४३)	७०८
२७४९	व्याङ्परिभ्यो रमः (१-३-८३)	४२५
३२११	व्युपयोः शेतेः० (३ ३-३९)	६७३
३२७५	व्रजयजोर्भावे० (३-३-९८)	६८७
२९९०	व्रते (३-२-८०)	५२६

श

३१७७	शकधृषज्ञा० (३-४-६५)	६६५
३४३९	शकि णमुल्कमुलौ (३-४-१२)	७२५
२८२३	शकि लिङ् च (३-३-१७२)	४६९
२८४७	शकिसहोश्च (३-१-९९)	४८०
२९७१	शक्तौ हस्तिकवाटयोः(३-२-५४)	५२०
३७१९	शतुरनुमो नद्य० (६-१-१७३)	७४७
२३६२	शदेः शितः (१-३-६०)	१३५
२५९८	शदेरगतौ (७-३-४२)	३२१
२६७३	शब्दवैरकलहा० (३-१-१७)	३८३
२५१९	शमामष्टानां० (७-३-७४)	२४५
३५४३	शमिता यज्ञे (६-४-५४)	७३१
३१२१	शमित्यष्टाभ्यो० (३-२-१४१)	५६१
२९२८	शमि धातोः० (३-२-१४)	५०९
२२५९	शर्पूर्वाः खयः (७ ४-६१)	४८
२३३६	शल इगुपधा० (३-१-४५)	१०६
२५८५	शाच्छासाह्वा० (७ ३-३७	३१७
३०७५	शाच्छोरन्य० (७-४-४१)	५४९
३७४३	शारदेऽनार्तवे (६-२-९)	६२९
२४८६	शास इदङ्हलोः (६-४-३४)	२१६
२४१०	शासिवसि० (८-३-६०)	३७२
२४८७	शा हौ (६-४-३५)	२१६
३८७२	शितेर्निभा० (६-२ १३८)	७५८
३८१०	शिल्पिनि चाकृञः (६-२-७६)	७५४
२९०७	शिल्पिनि ष्वुन् (३-१-१४५)	५०३
३४८९	शिवशमरिष्टस्य० (४-४-१४३)	७२७
२४४१	शीङः सार्वधातुके०(७-४-२१)	१९१
२४४२	शीङो रुट् (७ १-६)	१९१
३५१४	शीर्षश्छन्दसि (६-१-६०)	७२९
३०३०	शुषः कः (८-२-५१)	५३७
३३५६	शुष्कचूर्णरूक्षेषु० (३-४-३५)	७१३
३६९४	शुष्कधृष्टौ (६-१-२०६)	७४२

सूत्रम्		पार्श्वम्
३८४९	शृङ्गमवस्थायां च (६-२-११५)	७५६
३०६७	शृतं पाके (६-१-२७)	५४७
२४९५	शृदप्रां ह्रस्वो वा (७-४-१२)	२२२
३१५३	शृन्द्योरारुः (३-२-१७३)	५६९
२५४२	शे मुचादीनाम् (७-१-५९)	२६६
३५१६	शेश्छन्दसि० (६-१-७०)	७२९
२१५९	शेषात्कर्तरि० (१-३-७८)	५
२१६५	शेषे प्रथमः (१-४-१०८)	७
२८०८	शेषे लृङ्यदौ (३-३-१५१)	४६५
३९४८	शेषे विभाषा (८-१-४१)	७६३
३९५७	शेषे विभाषा (८-१-५०)	७६४
२२३२	शेषे विभाषाऽक० (८-४-१८)	३१
२४६९	श्नसोरल्लोपः (६-४-१११)	२०६
२५४४	श्नान्नलोपः (६-४-२३)	२६८
२४८३	श्नाभ्यस्तयोरातः (६-४-११२)	२१४
२९०३	श्याद्व्यधासु० (३-१-१४१)	५०२
३०२१	श्योऽस्पर्शे (८-२-४७)	५३४
३७५९	श्रज्यावमकन्पा० (६-२-२५)	७५०
३१९५	श्रिणी भुवोऽनुपसर्गे (३-३-२४)	६७१
३५७३	श्रीग्रामण्योश्छन्दसि (७-१-५६)	७३३
२३८६	श्रुवः शृ च (३-१-७४)	१५१
३५५१	श्रुशृणुपॄकृवृभ्य० (६-४-१०२)	७३१
२३८१	श्रुशृकः किति (७-२-११)	१४७
२५१४	श्लिष आलिङ्गने (३-१-४६)	२४०
२४९०	श्लौ (६-१-१०)	२२०
२४२१	श्वयतेः (७-४-१८)	१७८
३०३९	श्वीदितो निष्ठायाम् (७-२-१४)	५३९

ष

३८६९	षट् च काण्डादीनि (६-२-१३५)	७५७
३७२५	षट्त्रिचतुर्भ्यो० (६-१-१७९)	७४७
३३३३	षत्वतुकोरसिद्धः (६-१-८६)	७०५
३७९४	षष्ठी प्रत्येनसि (६-२-६०)	७५३
३३८९	षष्ठीयुक्तश्छन्दसि वा (१-४-९)	७२१
३६३८	षष्ठ्याः पतिपुत्र० (८-३-५३)	७३८
३३१०	षात्पदान्तात् (८-४-३५)	६९९

सूत्रम्		पार्श्वम्
३२८१	षिद्भिदादिभ्यो० (३-३-१०४)	६८९
२३२०	ष्ठिवुक्लमुचमां शिति (७-३-७५)	९५

स

३४२८	स उत्तमस्य (३-४-९८)	७२४
२३४२	सः स्यार्धधातुके (७-४-४९)	१११
२६२८	सः स्विदि० (८-३-६२)	३४०
२५२२	संयसश्च (३-१-७२)	२४६
३०१७	संयोगादेरातो० (८-२-४३)	५३३
३९३२	सक्थं चाकान्तात् (६-२-१९८)	७६२
३९७५	सगतिरपि तिङ् (८-१-६८)	७६६
३४६०	सगर्भसयूथ० (४-४-११४)	७२६
३७६९	संख्या (६-२-३५)	७५१
३८९७	संख्यायाः स्तनः (६-२-१६३)	७६०
३२१४	संघे चानौत्तराधर्ये (३-३-४२)	६७४
३२६४	संघोद्धौ गण० (३-३-८६)	६८३
३२८६	संज्ञायाम् (३-३-१०९)	६९२
३३६३	संज्ञायाम् (३-४-४२)	७१४
३८९३	संज्ञायाम् (६-२-१५९)	७६०
३२७६	संज्ञायां समज० (३-३-९९)	६८७
३८२८	संज्ञायां गिरि० (६-२-९४)	७५५
३८११	संज्ञायां च (६-२-७७)	७५४
३८८०	संज्ञायामना० (६-२-१४६)	७५८
३६९२	संज्ञायामुपमानम् (६-१-२०४)	७४२
२९६३	संज्ञायां भृत्० (३-२-४६)	५१७
३८९९	संज्ञायां मित्रा० (६-२-१६५)	७६०
३८४७	संज्ञौपम्ययोश्च (६-२-११३)	७५६
३९३९	सत्यं प्रश्ने (८-१-३२)	७६३
२५६३	सत्यापपाश० (३-१-२५)	२८४
२९७५	सत्सूद्विषद्रुहदुह० (३-२-६१)	५२१
२२७१	सदिरप्रतेः (८-३-६६)	५७
३७४५	सदृशप्रतिरूपयोः० (६-२-११)	७४९
२३६१	सदेः परस्य लिटि (८-३-११८)	१३५
३५२९	सध मादस्थयो० (६-३-९६)	७३०
३३१५	सनः क्तिचि लो० (६-४-४५)	६९९
२३०४	सनाद्यन्ता धातवः (३-१-३२)	८४

सूत्रम्		पार्श्वम्
३१४८	सनाशंसभिक्ष उः (३-२-१६८)	५६८
३५८३	सनिंससनिवांसम् (७-२-६९)	७३३
२६१०	सनि ग्रहगुहोश्च (७-२-१२)	३२७
२६१५	सनि च (२-४-४७)	३२९
२६२३	सनि मीमाघुर० (७-४-५४)	३३५
२६१८	सनीवन्तर्ध० (७-२-४९)	३३१
३६४५	सनोतेरनः (८-३-१०८)	७३८
२३९५	सन्यङोः (६-१-९)	१५८
२३१७	सन्यतः (७-४-७९)	९१
२३३१	सन्लिटोर्जेः (७-३-५७)	१०१
२३१६	सन्वल्लघुनि चङ्० (७-४-९३)	९१
३४९१	सप्तनोऽञ्छन्दसि (५-१-६१)	७२७
३७६६	सप्तमी सिद्धशुष्क०(६-२-३२)	७५०
३७९९	सप्तमीहारिणौ० (६-२-६५)	७५३
३८८६	सप्तम्याः पुण्यम् (६-२-१५२)	७५९
३३७०	सप्तम्यां चोपपीड०(३-४-४९)	७१६
३००७	सप्तम्यां जनेर्डः (३-२-९७)	५३१
३८३२	सभायां नपुंसके (६-२-९८)	७५५
२७३६	समः क्ष्णुवः (१-३-६५)	४१६
२७२५	समः प्रतिज्ञाने (१-३-५२)	४१३
२६८९	समवप्रविभ्यः स्थः(१-३-२२)	४०१
२५५१	समवाये च (६-१-१३८)	२७४
२७२७	समस्तृतीययुक्तात् (१-३-५४)	४१३
३३२०	समानकर्तृकयोः० (३-४-२१)	७०१
३१७६	समानकर्तृकेषु० (३-३-१५८)	६६४
३३७१	समासत्तौ (३-४-५०)	७१६
३७३४	समासस्य (६-१-२२३)	७४८
३३३२	समासेऽनञ्पूर्वे० (७-१ ३७)	७०५
२९२१	समि ख्यः (३-२-७)	५०७
३२०८	समि मुष्टौ (३ ३-३६)	६७३
३१९४	समि युद्रुदुवः (३-३-२३)	६७१
२८२६	समुच्चयेऽन्य० (३-४-३)	४७१
२८२८	समुच्चये सामान्य० (३-४-५)	४७२
२७४२	समुदाङ्भ्यो० (१-३-७५)	४२२
३२४६	समुदोरजः पशुषु (३-३-६९)	६८०
३४६४	समुद्राभ्राद्धः (४-४-११८)	७२६
३३५७	समूलाकृतजीवेषु०(३-४-३६)	७१३
२६९९	समो गम्यृच्छिभ्याम्(१-३-२९)	४०४
३४९४	संपरिपूर्वात्ख च (५-१-९२)	७२८
२५५०	संपरिभ्यां करोतौ (६ १-१३७)	२७४
३१२२	संपृचानुरुधा० (३ २-१४२)	५६२
२७१९	संप्रतिभ्यामनाध्याने(१-३ ४६)	४११
३१०२	संबोधने च (३-२-१२५)	५५७
२८११	संभावनेऽलमिति०(३ ३-१५४)	४६६
२७०९	संमाननोत्संज० (१-३ ३६)	४०८
२३८२	सर्तिशास्त्यर्ति० (३-१-५६)	१४८
२९५९	सर्वकूलाभ्रकरी० (३-२-४२)	५१७
३८२७	सर्वे गुणकात्स्न्र्ये (६-२-९३)	७५५
३४८८	सर्वदेवात्तातिल् (४-४ १४२)	७२७
३६८५	सर्वस्य सुपि (६-१-१९१)	७४२
२२५२	सवाभ्यां वामौ (३-४-९१)	४२
३७५७	सविधसनीड० (६-२-२३)	७५०
३५९७	ससूवेति निगमे (७ ४-७४)	७३५
३४८१	सहस्रेण संमितौ घः(४-४-१३५)	७२७
२३५७	सहिवहोरोद० (६-३-११२)	१३३
३६४६	सहेः पृतनर्ता० (८-३-१०९)	७३८
३००६	सहे च (३-२-९६)	५३१
३५३१	साढ्यै साढ्वा० (६-३-११३)	७३०
३६५५	सामान्यवचनं० (८-१-७४)	७३९
२२३४	सार्वधातुकमपित् (१-२-४)	३३
२१६८	सार्वधातुकार्ध० (७-३-८४)	८
२७५६	सार्वधातुके यक (३-१ ६७)	४२९
३७१४	सावेकाचस्तृतीया०(६-१-१६८)	७४६
२३९२	सिचि च पर० (७-२-४०)	१५७
२२९७	सिचि वृद्धिः पर० (७-२-१)	७५
२६४०	सिचो यङि (८-३-११२)	३४५
२२२६	सिजभ्यस्तविदि०(३-४-१०९)	२९
२६०२	सिद्ध्यतेरपारलौकिके(६-१-४९)	३२२
२४८५	सिपि धातो रुर्वा (८-२-७४)	२१६
३४२५	सिब्बहुलं लेटि (३-१-३४)	७२४

सूत्रम्		पार्श्वम्
२३५९	सिवादीनां वाड्० (८-३-७१)	१३४
२९९९	सुकर्मपापमन्त्र० (३-२-८९)	५२९
३७४९	सुखप्रिययोर्हिते (६-२-१५)	७४९
२६७४	सुखादिभ्यः कर्तृ० (३-१-१८)	३८४
३६४४	सुञः (८-३-१०७)	७३८
३११२	सुञो यज्ञसंयोगे (३-२-१३२)	५५९
२५५३	सुट्कात्पूर्वः (६-१-१३५)	२७५
२२१०	सुट् तिथोः (३-४-१०७)	२३
३५९४	सुधितवसुधित० (७-४-४५)	७३४
२५२४	सुनोतेः स्यसनोः (८-३-११७)	२५०
२६५७	सुप आत्मनः क्यच् (३-१-८)	३६८
३५६१	सुपां सुलुक्पूर्व० (७-१-३९)	७३२
२९१६	सुपि स्थः (३-२-४)	५०५
२९८८	सुप्यजातौ० (३-२-७८)	५२५
३६५६	सुबामन्त्रिते परा० (२-१-२)	७३९
३०९१	सुयजोर्ङ्वनिप् (३-२-१०३)	५५४
२४७७	सुविनिर्दुर्भ्यः० (८-३-८८)	२१०
३०८३	सूत्रं प्रतिष्णातम् (८-३-९०)	५५२
३१३३	सूददीपदीक्षश्च (३-२-१५३)	५६५
३८७९	सूपमानात्क्तः (६-२-१४५)	७५८
३१४०	सृघस्यदः क्मरच् (३-२-१६०)	५६६
२४०५	सृजिदृशोर्झल्यम० (६-१-५८)	१६५
३४४४	सृपितृदोः कसुन् (३-४-१७)	७२५
३१८३	सृ स्थिरे (३-३-१७)	६६७
२२७८	सेघतेर्गतौ (८-३-११३)	५९
२२०१	सेर्ह्यपिच्च (३-४-८७)	१९
२५०६	सेऽसिचि कृत० (७-२-५७)	२३३
२३५८	सोढः (८-३-११५)	१३४
३४८३	सोममर्हति यः (४-४-१३७)	७२७
३०००	सोमे सुञः (३-२-९०)	५३०
३५८१	सोमे ह्वरितः (७-२-३३)	७३३
३९२९	सोरवक्षेपणे (६-२-१९५)	७६२
३८५१	सोर्मनसी अलो० (६-२-११७)	७५६
२५५५	स्तन्भुस्तुन्भु० (३-१-८२)	२७८
२९२७	स्तम्बकर्णयो० (३-२-१३)	५०८
२९३८	स्तम्बशकृतोरिन् (३-२-२४)	५१२
३२६०	स्तम्बे क च (३-३-८३)	६८३
२५८०	स्तम्भुसिवुसहां० (८-३-११६)	३१४
२२७२	स्तन्भेः (८-३-६७)	५७
३६४२	स्तुतस्तोमयो० (८-३-१०५)	७३८
२३८५	स्तुसुधूञ्भ्यः० (७ २-७२)	१५१
२६२७	स्तौतिण्योरेव षण्य० (८-३-६१)	३३९
३०३३	स्त्यः प्रपूर्वस्य (६-१-२३)	५३७
३२७२	स्त्रियां क्तिन् (३-३-९४)	६८५
२९८७	स्थः क च (३-२-७७)	५२५
३२७३	स्थागापापचो० (३-३-९५)	६८६
२३८९	स्थाघ्वोरिच्च (१-२-१७)	१५६
२२७७	स्थादिष्वभ्यासेन० (८-३-६४)	५८
३१५५	स्थेशभासपिस० (३-२-१७५)	५६९
३५७१	स्नात्व्यादयश्च (७-१-४९)	७३२
२३२३	स्नुक्रमोरनात्मने० (७-२-३६)	९६
३३५९	स्नेहने पिपः (३-४ ३८)	७१३
२७०४	स्पर्धायामाङः (१-३-३१)	४०६
३१३८	स्पृहिगृहिपति० (३-२-१५८)	५६६
३०४४	स्फायः स्फी० (६-१-२२)	५४०
२५९७	स्फायो वः (७-३-४१)	३२१
३९२१	स्फिगपूत० (६-२-१८७)	७६१
३१८५	स्फुरतिस्फुलत्योः (६-१-४७)	६६७
२५३७	स्फुरतिस्फुलत्योर्नि०(८-३-७६)	२६२
२६२६	स्मिपूङ्रञ्ज्वशां० (७-२-७४)	३३६
२८१९	स्मे लोट् (३-३-१६५)	४६८
२२२०	स्मोत्तरे लङ् च (३-३-१७६)	२८
२१८६	स्यतासी लृलुटोः (३-१-३३)	१४
३१८८	स्यदो जवे (६-४-२८)	६६८
३५२६	स्यश्छन्दसि० (६-१-१३३)	७३०
२७५७	स्यसिच्सीयुट्० (६-४-६२)	४३१
२५७८	स्रवतिश्रृणोति० (७ ४ ८१)	३१२
३४५९	स्रोतसो विभाषा (४-४-११३)	७२६
३७५१	स्वं स्वामिनि (६-२-१७)	७४९
३६३३	स्वतवान्पायौ (८-३-११)	७३७

सूत्रम्		पार्श्वम्
३२३९	स्वनहसोर्वा (३-३-६२)	६७८
३६७२	स्वपादिहिंसा० (६-१-१८८)	७४१
३१५२	स्वपितृषोर्नजिङ् (३-२-१७२)	५६९
२६४५	स्वपिस्यमिव्येबां० (६-१-१९)	३४७
३२६९	स्वपो नन् (३-३-९१)	६८५
२२७९	स्वरतिसूति० (७-२-४४)	५९
२१५८	स्वरितञितः कर्त्रभि० (१-३-७२)	५
३६२२	स्वरितमात्रेडिते०(८-२-१०३)	७३६
३६६८	स्वरितात्संहिता० (१-२-३९)	७४०
३६५९	स्वरितो वानुदात्ते० (८-२-६)	७४०
३३८३	स्वाङ्गे तस्प्रत्ययेभा० (३-४-६१)	७१९
३३८६	स्वाङ्गेऽध्रुवे (३-४-५४)	७१७
२५२३	स्वादिभ्यः श्नुः (३-१-७३)	२४९
३३४७	स्वादुमि णमुल् (३-४-२६)	७१०
२५८४	स्वापेश्चङि (६-१-१८)	३१६
३३६१	स्वे पुषः (३-४-४०)	७१४

ह

२२५०	ह एति (७-४-५२)	४१
२६९७	हनः सिच् (१-२-१४)	४०४
३२५३	हनश्च वधः (३-३-७६)	६८१
२८५६	हनस्त च (३-१-१०८)	४८३
२५७४	हनस्तोऽचिण्णलोः (७-३-३२)	३०७
२४३३	हनो वध लिङि (२-४-४२)	१८३
३९६१	हन्त च (८-१-५४)	७६४
२४३१	हन्तेर्जः (६-४-३६)	१८३
२९२३	हरतेरनुद्यमनेऽच् (३-२-९)	५०८
२९३९	हरतेर्दृतिनाथयोः० (३-२-२५)	५१२
२५५९	हलः (६-४-२)	२८०
२५५७	हलः श्नः० (३-१-८३)	२७८
२६१३	हलन्ताच्च (१-२-१०)	३२८
३३००	हलश्च (३-३-१२१)	६९६
२८३७	हलश्चेजुपधात् (८-४-३१)	४७८
३१६४	हलसूकरयोः पुवः (३-२-१८३)	५७३
२१७९	हलादिः शेषः (७-४-६०)	१२
३४१२	हव्येऽनन्तः पादम् (३-२-६६)	७२३
२७७६	हशश्वतोर्लिङ् च (३-२-११६)	४५६
२९१०	हश्च व्रीहि० (३-१-१४८)	५०३
३२१२	हस्तादाने चेरः० (३-३-४०)	६७३
३३६०	हस्ते वर्तिग्रहोः (३-४-३९)	७१४
२५४०	हिंसायां प्रतेश्च (६-१-१४१)	२६३
३३६९	हिंसार्थानां च० (३-४-४८)	७१६
३९४१	हि च (८-१-३४)	७६३
२५३०	हिनुमीना (८-४-१५)	२५३
३७८९	हिरण्यपरिमाणं धने(६-२-५५)	७५२
२४२५	हुझल्भ्यो हेर्धिः (६-४-१०१)	१८१
२३८७	हुश्नुवोः सार्वधातुके(६-४-८७)	१५१
३०७०	हृषेर्लोमसु (७-२-२९)	५४८
३९६७	हेति क्षियायाम् (८-१-६०)	७६५
२५७६	हेतुमति च (३-१-२६)	३११
२८१३	हेतुहेतुमतोर्लिङ् (३-३-१५६)	४६७
३३९९	हेमन्तशिशिरा० (२-४-२८)	७२२
३४५२	हेमन्ताच्च (४-३-२१)	७२६
२५३१	हेरचङि (७-३-५६)	२५३
२२९९	ह्मयन्तक्षणश्वस० (७-२-५)	७८
२१८०	ह्रस्वः (७-४-५९)	१२
३७२२	ह्रस्वनुड्भ्यां मतुप् (६-१-१७६)	७४७
२८५८	ह्रस्वस्य पिति० (६-१-७१)	४८४
३५२७	ह्रस्वाच्चन्द्रोत्तर० (६-१-१५१)	७३०
२३६९	ह्रस्वादङ्गात् (८-२-२७)	१४०
३९०८	ह्रस्वान्तेऽन्त्या० (६-२-१७४)	७६१
३५७९	ह्रुह्वरेश्छन्दसि (७-२-३१)	७३३
३०७३	ह्वादो निष्ठायाम् (६-४-९५)	५४९
२५८६	ह्वः सम्प्रसारणम् (६-१-३२)	३१७
३२४९	ह्वः सम्प्रसारणं च०(३-३-७२)	६८१
२९१४	ह्वावामश्च (३-२-२)	५०५

॥ श्रीरस्तु ॥

॥ अकाराद्यनुक्रमेण कौमुद्युत्तरार्धगतवार्तिकसूचिकाः ॥

वार्तिकम्		सूत्रम्
	अ	
२९८३	अक्षरसमूहे छन्दस०	३४८६
१५९६	अजेः क्यपि वीभा०	३२७६
३६९८-९	अडभ्यासव्यवा०	२५५३
३७८९	अतद्धित इति०	३६५२
३८६३	अतेर्धातुलोप इ०	३९२५
२०८४	अत्यन्तापह्नवे०	२७७५
९५९	अदेः प्रतिषेधः	२७५३
१७१७	अधिकरणाच्चेति व०	२६६४
४५१८	अनाचमिकमिव०	२७६३
५०६४	अग्रग्रामाभ्यां नयते०	२९७५
१२३०	अनव्ययीभावस्य०	३६५६
३८२१	अनुपसर्गं०	३७८१
११४१	अन्तशब्दस्याङ्गि०	२२३१
२०१८	अन्यत्रापि दृ०	२९६५
२१८४	अपादाने स्त्रि०	३१९१
६५२	अमुष्येत्यन्तः	३६६६
९२६	अर्तिश्रुदृशिभ्य०	२७०१
१७५८	अर्थवेदयोर०	२६७७
२२३६	अवहाराधारा०	३३०१
१२२९	अव्ययानां न	३६५६
३८०८	अव्यये नञ्कु०	३७३६
४३०९	अश्ववृषयोर्मै०	२६६२
६५१	असावित्यन्तः	३६६६
४०६७	असि अकेऽने च०	२९०७
	आ	
१७६६	आख्यानात्कृत०	२५७३
९०५	आगमेः क्षमा०	२६८७
४३०९	आङ्याजयारामु०	३५६१
९१२	आङः प्रतिज्ञाया०	२६८९
४५६२	आङ्चिम इति०	२३२०
९०९	आङि नु प्रच्छयोः	२६८८
३४६१	आङ्पूर्वस्या०	३०७२
१९२५	आङ्पूर्वादज्ञः०	२८५८
१७२१	आचारेऽवगल्भ०	२६६५
२०५१	आदिकर्मणि०	३०५२
११०९	आदिखाद्योर्न	२७५३
३८४०	आद्युदात्त०	३८२५
(४६९२	आनुपूर्व्ये द्वे वा० (पूर्वा)	२१४७)
४८८९	आमन्त्रिते छन्दसि०	३६२६
२७८५	आविष्छ्यस्योप०	३४४९
१७०७	आशङ्कायां सन्व०	२६२२
४०७०	आशासः क्वौ०	२९८४
९१०	आशिषि नाथ०	२२५९, २६८७
	इ	
२२३२	इक्कृष्यादिभ्यः	३२८५
२२२६	इक्तितपौ धातुनि०	३२८५
२२३१	इञ्वपादिभ्यः	३२८५
४३७३	इत्वोत्वा०	२३९०
५९४	इन्धेश्छन्दोविषयत्वा०	३३९३
२२३०	इणजादिभ्यः	३२८५
१५७७	इण्वदिकः २४६२, २६०७,	२६१५
८३५	इर इत्संज्ञा वा०	२२६८
२२२३	इषेरनिच्छार्थ०	३२८४
४४३५	इषेस्त०	२५६०
	ई	
१९८१	ईक्षिक्षमिभ्या०	२९१३
४७९५	ईद्रथिनः	३६०२

वार्तिकम्		सूत्रम्
४३०८	ईयाडीयाजीकारा०	३५६१
३४०३	ईर्ष्यतेस्तृतीय०	२६०७, २६०८
३६८५	ईषा अक्षादीनां०	३५२५
९१३	ईहायामेव	२६९१
	उ	
४८०	उत्तरपदत्वे चा० (पूर्वार्धम्)	२६३
१९९८	उत्तानादिषु	२९२९
४८४३	उत्फुल्लसंफुल्ल०	३०३७
९२०	उपसर्गादस्य०	२७०१
९१४	उपाद्देवपूजा०	२६९२
१०६०	उभयसंज्ञान्य०	३३९०
२०१५	उरसो लोपश्च	२९६५
३६३६	उस्योमाङ्ख्वाट:०	२६६७
	ऊ	
४०७३ / ४०७४	ऊङ् च गमा०	२९८६
३७५७	ऊठ्गुपधाग्रहणं०	३७१७
१८०२	ऊर्णोतेरान्नेति०	२४४५
१७५१	ऊर्णोतेर्णुवद्भा०	३०१५
	ऋ	
३४७२	ऋचित्रेरुत्तरपदा०	३५१०
५९३	ऋदुपधेभ्यो लिट०	२२८९, २३३५
४८२६	ऋल्वादिभ्य:०	३२७२
३८५७	ऋषिप्रतिषेधो०	३८९९
	ए	
३६३५	एमन्नादिषु छन्द०	३५१६
२२००	एरजधिकारे०	३४१९
	ओ	
१७१९ / १७२०	ओजसोऽप्सरसो०	२६६५
	क	
३४०४	कण्ड्वादेस्तृतीय०	
१९८९	कप्रकरणे मूल०	२९१९
१८३९	कमेश्चलेश्चङ्वक्तव्य:	२३१८
२२४१	कर्तृकर्मणोश्च्व्यर्थ०	३३०८

वार्तिकम्		सूत्रम्
२०२१	कर्मणि समि च	२९६६
१९८४	कविधौ सर्वत्र०	२११५
४६१३	काण्यादीनां चे०	२५८३
१६८९	कितेर्ज्यधि०	२३९४
९०७	किरतेर्हर्षजी०	२६८७
२००२	किंयत्तद्बहुषु०	२९३५
२०४७	कुत्सितग्रहणं०	३००३
४४०१	कृञो०	२५५३
१९१९	केलिमरउप०	२८३४
४०७८	क्ङिति०	२५३५
५०५७	क्ङित्य०	२४७३
४४२२ / ४४२३	क्रमे: कर्तर्या०	२८९५
४६९५	क्रियासमभिहारे०	२८२८
२१४७ / २१४८	क्विब्वचिप्रच्छयो०	३१५८
१५८४	क्शाञ: शस्य०	२८४०
४३१५	क्षीरलवणयो०	२६६२
२०३०	क्सोऽपि वाच्य:	२९७४
	ख	
२०११	खच् डिद्वा वा०	२९५३
२२३८	खनेर्डडरे०	३३०४
	ग	
४७३२	गतिग्रहणे०	३९७५
४०७६	गमादीनामि०	२९८६
२००९	गमे: सुपि वा०	२९५३
१२४७	गम्यादीनामुपसंख्यानम् (पू०)	६८६
१९६९	गवादिषु विन्दे:०	२९००
१९९९	गिरौ डश्छन्दसि०	२९२९
२५०४	गुग्गुलुमधु०	३४४९
१६८७	गुपेर्निन्दायाम्	२३९४
	घ	
२२०४	घञर्थे क०	३२३४
२००८	घटीखारीखरी०	२९४५
२२२२	घट्टिवन्दिविदि०	३२८४

वार्तिकम्		सूत्रम्
१९६७	घ्रः संज्ञायां न	२८९९
	च	
५०२३	चयो द्वितीयाः०	२४३७
३४३०	चरिचलिपतिव०	२८९६
१९२५	चरेराङि चा०	२८४८
४४१८	चायतेः क्तिनि०	३२७२
२०२०	चारौ वा	२९६६
३७४९	चितः सप्रकृते०	३७१०
१७४५	चीवरादार्जने०	२६७६
३८४७	चेलराज्य०	३८६४
	छ	
३९९४	छन्दसि स्त्रियां०	३५२८
१९४४	छन्दसीति व०	२८६९
३२०२	छन्दसीवनिपौ०	३४९८
१७११	छन्दस्यघश०	३४१९
३२११	छन्दोविन्प्र०	३४९८
	ज	
४५९६	जसादिषु छन्दसि वा	३५८६
२२१६	जागर्तेरकारो०	३२७८
२१४९	जुहोतेर्दी०	३१५८
९२१	ज्योतिरुद्गमन०	२७१३
	झ	
५०६६	झलादाविति०	३३३०
	ङ	
२०१२	ङेच विहायसो०	२९६५
	ण	
१८८२	णिश्रन्थिग्रन्थि०	२७७१
४५५८	ण्यत्प्रकरणे त्यजे०	२८८२
१९५८	ण्यत्प्रकरणे ल०	२८८५
५०१२	ण्यन्तभादीनामु०	२८४०
४०८०	ण्यल्लोपावियङ्	२३१३
	त	
१९२२	तकिशसिचति०	२८४३
१९३०	तत्र न भवेद्वि०	२८४८
५०५९	तनिपतिदरिद्रा०	२६२१
१९७०	तनोतेरुपसं०	२९०२

वार्तिकम्		सूत्रम्
४११५	तन्वादीनां छन्दसि	३५४८
१७३३	तपसः परस्मै०	२६७१
१७४४	तमधीष्टो०	३७६३
१६८८	तिजेः क्षमायाम्	२३९४
४३९३	तितुत्रेष्वग्रहादी०	३२८०
४५५८	त्यजेश्च	२८८२
	द	
४१५३	दम्भे०	२५३३
४१४६	दरिद्रा०	२४८३
२१२९	दंशेश्छन्दस्युप०	३११९
१६९४	दाने रा०	२३९४
२१८२	दारजारौ कर्तृ०	३१९०
४८३२	दुरुवोर्दीर्घश्च	३०१८
११३८	दुरः षत्वणत्वयो०	२२३१
१८७६	दुहिपच्योर्बहुलं	२७६६
४४५२	दृशेश्च	३०९९
२१४९	द्युतिगमिजु०	३१५८
१७४६	द्विर्गोर्यप्	३७६३
३४२९	द्वित्वप्रकरणे०	३२३४
	ध	
२२२५	धात्वर्थानिर्देशे०	३२८५
४५१९	धृञ्श्री०	२५७२
९६२	धेट उपसङ्ख्यानम्	२७५५
२१५१	ध्यायतेः संप्र०	३१५८
	न	
१०५८	नभोऽङ्गिरो मनुषां०	३३८९
३४८७	निमिमीलियां	३३०५
५००४	निर्विण्णस्योप०	२८३५
४७७३	निष्ठादेशः प०	३०२५
४५५१	निष्ठायामनिट०	२८६३
२२०८	निष्ठायां सेट०	३२८०
१९७१	नृतिखनिरञ्जि०	२९०७
१९६८	नौ लिम्पेर्वाच्यः	२९००
	प	
३८२०	पण्यकम्बलः	३७७६
९००	परस्परोपप०	२६८२

वार्तिकम्	सूत्रम्
९०३ पराङ्गकर्मका०	२६८६
३८६८ ३८६९ परादिश्च परा०	३९३३
२२१५ परिचर्यापरि०	३२७८
२२२४ परेर्वा	३२८४
३४३२ पाटेर्णिलुक्च०	२८९६
२४८० पाणिगृहीती भार्यायाम्	.....
१९४६ पार्णो सृजेर्ण्य०	२८७४
४५२० पातेर्णौ लुग्व०	२५८९
१९९६ पार्श्वादिषूप०	२९२९
४५२७ पावकादीनां छ०	३५८३
१९९० पिबतेः सुराशी०	२९२२
१७४६ पुच्छादुदसने०	२६७६
५०११ पूज्ञ एवेह०	२८४०
४८३३ पूञो विनाशे	३०१८
४७४१ पूतिश्चानुबन्ध०	३९७६
१२२८ पूर्वाङ्गदचेति व०	३६५६
८९८ प्रतिषेधे हसादीना०	२६८१
३१२८ ३१२९ प्रमाणे लो०	३७४६
३४८३ प्रलम्भनाभि०	२५९१
४८८८ प्रश्नान्ताभिपूजित०	३६२६
फ	
१७३४ फेनाच्चेति	२६७२
ब	
४५८६ बहुलं छन्दसीति०	३५८६
४७९८ बालमूललघ्व०	३१६७
२०३९ ब्रह्मणि वदः	२९८८
भ	
२०१३ भगे च दारेः	२९५८
२१९७ २१९८ भयादीनामु०	३२३१
२२७५ भविष्यत्येवेष्यते	२८१३
१७४४ भाण्डात्समाच०	२६७६
२१४४ भाषायां धाञ्कृ०	३१५१
२२४३ भाषायां शासि०	३३०९

वार्तिकम्	सूत्रम्
४७९६ भूरिदात्रः स्तुट्०	३६०२
१८८० भूषाकर्मकिरा०	२७६९
म	
४७३५ मलोपश्च०	३९७४
३२१ मस्जे रन्त्यात्पूर्वो०	२५४१
२१०९ माङ्याङ्कोशे०	३१०१
१६९२ मानेर्जिज्ञासा०	२३९४
१७१४ मान्तप्रकृतिक०	२६६०
४६३३ मासश्छन्दसीति०	३५९४
२१५२ मितद्वादिभ्य०	३१६०
२४७६ मुद्गलाच्छन्दसि०	३४४७
य	
२२७२ यदायद्योरुपसं०	२८०४
३१३८ युष्मदस्मदोः०	३४९१
र	
४०६७ रज्ञेर्णौ मृगरमणे०	२६०५
३४७३ रयेर्मतौ बहुलम्	३५१०
२०२२ राजघ उप०	२९७२
२२२८ रादिफः	३२८५
४६३५ राधो हिंसायां०	२६२३
४६६२ रीगृत्वत इति०	२६४४
ल	
४१४२ लुङि वा	२४८३
१७२९ १७३० लोहितडाज्भ्यः०	२६६९
व	
१६९३ वधेश्चित्तविकारे	२३९४
४८९० वन उपसंख्यानम्	३६२९
१५९२ वर्जने०	२४३८
२२२७ वर्णोत्कारः	३२८५
१५९७ वलादावार्धधा०	२२९२
२२०३ वशिरण्योरु०	३२३४
१९२० वसेस्तव्यत्कर्तरि०	२८३४
५०६१ वस्त्रात्समा०	२६७७
२००५ वातशुनीतिल०	२९४२
६५४ वा नामधेयस्य	३६६६

वार्तिकम्		सूत्रम्
४७४२	वा बह्वर्थमनु०	३८७६
९१९	वा लिप्सायामिति०	२६९२
९१८	विदिप्रच्छिस्वरती०	२७००
३७४२	विधीन्धिखिदि०	३७३०
३१३२	विंशतेश्चेति०	३४९१
४४१७	विस्मितप्रति०	३०७०
२०१०	विहायसो विह०	२९५३
४०६२	वुग्युटावुवङ्य०	२१८३, २५०७
३८११	वृजेरिति०	३७७६
१०५९	वृष्यण्वस्वश्वयो:	३३८९
२१७४	व्याधिमत्स्यबलेषु०	३१८३
५०६०	व्रताद्भोजनतन्निवृत्त्यो:	२६७७
२००३	व्रीहिवत्सयोरि०	२९३८
	श	
१९९२	शक्तिलाङ्गला०	२९२३
३१४१	शतसहस्रयो० (पूर्वा०)	१८४६
९११	शप उपालम्भे	२६८८
६२६	शब्विकरणे०	३०५६
१८३५	शंसिदुहिगुहि०	२८५८
१५८६	शस्य यो वा	२४३७
१६९५	शानेर्निशाने	२३९४
९०५	शेक्षेर्जिज्ञासा०	२६८७
२१४०	शीङो वाच्य:	३१३८
१९८०	शीलिकामिभ०	२९१३
२१८५	शृवायुवर्ण०	३१९१
११३१ ११४७	श्रदन्तरोरुप०	३२८३
२२११	श्रूयजीषि०	३२७२
३४६२	श्वयते०	२४२०
२०३५ २०३६	श्वेतवहादीनां०	३४१४
	ष	
१५०९	षष्ठ्यर्थे चतु०	३३९६
१२२३	षष्ठ्यामन्त्रित०	३६५६
	स	
३०३७	सन्निपाताच्चेति०	२७०४

वार्तिकम्		सूत्रम्
२२३३	संपदादिभ्य:०	३२७२
१८७३	सकर्मकाणां प्र०	२७६६
३७३०	सतिशिष्टस्वर०	३६५०
१७३१	सत्तकक्षकष्टकृच्छ्रे०	२६७०
१९४७	समपूर्वाच्च	२८७४
१९४०	समश्च बहुलम्	२८६१
२०२९	समानान्ययोश्चे०	२९७४
९०४	समोऽकूजने	२६८७
२०१४	सर्वत्रपन्नयोरुप०	२९६५
१७२२	सर्वप्रातिपदिके०	२६६५
४३१६ ४३१७	सर्वप्रातिपदि०	२६६२
१५९१	सस्थानत्वं नम:	२४६३
२०३८	साधुकारिण्यु०	२९८८
२१४४	सासहिवावहि०	३१५१
४७७१	सिज्लोप एकादेशे०	२२६६
४८३४	सिनोतेर्प्रासक०	३०१८
३७०६	सुडपि हर्षा०	२६८८
१७३६ १७३७	सुदिनदुर्दिन०	२६७३
२०१६	सुदुरोरधिकर०	२९६५
३२८४	सुबन्तस्य टे:० (पूर्वा०)	२०२८
३४९९	सुब्धातुष्टिषु०	२२८९
१७५१	सूचिसूत्रिमूत्र्य०	२६३०
१९९३	सूत्रे च धार्य०	२९२३
१८१७	सृजियज्यो: श्यंस्तु०	२७६९
५०५४	सृजे: श्रद्धोपपत्ते०	२७६९
५०६५	सोपसर्गस्य न	३०७२
२००६ २००७	स्तने धेटो०	२९४४
१८२६	स्पृशमृश०	२४०७
६५३	स्यान्तस्योपोत्तमं च	३६६६
४९६८	स्वञ्जेरुपसं०	२३९७
४३१	स्वर दीर्घयलोपे०	२२९२
९३९	स्वराद्यन्तोपसर्गा०	२७३५

वार्तिकम्	सूत्रम्	वार्तिकम्	सूत्रम्
४६३४ स्ववः स्वतवसो०	३५९४	९०८ हरतेर्गतिता०	२६८७
९१६ स्वाङ्गकर्मकाच्चे०	२६९४	१७४७ हलिकल्योर०	२६७७
ह		५०६२ हल्यादिभ्यो०	२६७७
१७३२ हनुचलन इति०	२६७१	१९९४ हस्तिसूचकयो०	२९२७
१९२३ हनोवायद्वध०	२८४३	१९४५ हिरण्य इति०	३४०७
३४३१ हन्तेर्घ०	२८९६	१८८१ हेतुमण्णिश्रि०	२७७१
४६२१ हन्तेर्हिंसायां०	२६४३	४८२३ ह्यग्रहोर्भश्छ०	३४३२
८९९ हरतेरप्रति०	२६८१	३५४५ हृदय्या आप उप०	३५१७

॥ कौमुद्युत्तरार्धगतपरिभाषासूचिकाः ॥

९३ अङ्गवृत्ते पु०
९७ अनुदात्ते० २३२६, २४३५, २५१३
४ अनेकान्ता अनु०
१२३ अनिर्दिष्टा०
५८ अन्तरङ्गादपि०
५५ अन्तरङ्गान०
६६ अपवादो यद्यन्यत्र०
६७ अभ्यासविका०
११८ अभेदका गुणाः
१३४ अर्धमात्रालाघवं०
१०७ अवयवप्रसिद्धेः
९५ आगमशास्त्र०
९९ आतिदेशिकम०
२३ उणादयो व्युत्पन्ना०
६५ उपसंजनिष्य०
१० उभयगतिरिह०
७१ उभयनिर्देशे०
३८ एकदेशविकृत० २४४०
१८ एकयोगनिर्दि०
१९ एकयोगनिर्दिष्टा०
१२८ एकास्याआकृते०
५ एकान्ताः
१३१ औपदेशिक०
३ कार्यकालं संज्ञा०
११ कार्यमनुभवन्हि० २६२१
४३ कृताकृतप्रस०
९ कृत्रिमाकृत्रिमयोः०
६९ क्त्वल्युट्तुमुन्०
४७ क्वचित्कृताकृत०
५९ क्वचिदपवा०
१३० क्वचिद्विकृतिः०
११७ क्वचित्समुदा०
८४ क्वचित्स्वार्थिकाः
९६ गणकार्यम०
११५ गामादाग्रहणे०
१६ गौणमुख्ययोर्मु०
३२ ग्रहणवताप्रा०
७९ चानुकृष्टं नोत्तर०
१२६ ज्ञापकसिद्धं न०
८३ तदनुबन्धक०

९० तन्मध्यपतित०
८८ ताच्छीलिके णेऽण्०
८९ धातोः कार्यमुच्च०
७५ नञिवयुक्तम०
९८ नञ्घटितम०
५२ नाजानन्तर्ये०
७ नानुबन्धकृतम०
८ नानुबन्धकृ०
८२ निरनुबन्धक०
१२२ निषेधाश्च बली०
१३३ पदगौरवाद्योग०
१२० पर्जन्यवल्लक्षण०
१२५ पर्यायशब्दानां०
४० पुनः प्रसङ्गविज्ञा०
१२७ पूर्वत्रासिद्धीय० २४४६, २४७७
(३९ पूर्वपरनित्यान्त०)
६३ पूर्वं ह्यपवादा०
५४ पूर्वोत्तरपदनि०
६४ प्रकल्प्य वापवा०
१०१ प्रकृतिग्रहणे० २६५१
९२ प्रकृतिग्रहणे०
१११ प्रत्ययाप्रत्ययय्योः०
२५ प्रत्ययग्रहणे चा०
११६ प्रत्येकं वाक्य०
१०६ प्रधानाप्रधान०
७८ बहुव्रीहौ तद्गुण०
११९ बाधकान्येव०
२० भाव्यमानेन स०
२१ भाव्यमानोऽप्यु०
६१ मध्येऽपवादाः
२ यथोद्देशं संज्ञा०
१२ यदागमास्तद्गुणी०
३४ यस्मिन्विधिस्त०
४८ यस्य च लक्षणा०
४९ यस्य च लक्षणा०
५८ येन नाप्राप्ते यो०
१२४ योगविभा०
११४ लक्षण० २३५३
४६ लक्षणान्तरेण०
१२१ लक्ष्ये लक्षणं०
७० लादेशेषु वासरू०
९१ लुग्विकरणाल्लु०
२२ वर्णाश्रये नास्ति०
५६ वार्णादाङ्गं बलीयः २२९०, २३८७
४२ विकरणेभ्यो निय०
१०९ विधिनियमसंभवे०
१०२ विधौ परिभाषो०
७३ विभक्तौ लिङ्गवि०
३१ व्यपदेशिवदे०
३३ व्यपदेशिवद्भावो०
१०८ व्यवस्थितविभाष०
१ व्याख्यानतो विशेष०
४४ शब्दान्तरस्य०
४५ शब्दान्तरात्प्रा०
१३२ शितपाशपा० २२४६, २६५०, २६५१
११३ श्रुतानुभितयोः०
९४ संज्ञापूर्वको वि० २५४७
४१ सकृद्गतौ० २४७१
१२९ संप्रसारणं त० २५७९
८५ समासान्तविधि०
१०० सर्वविधिभ्यो०
३६ सर्वे विधयश्छ०
३५ सर्वो द्वन्द्वो विभा०
११२ सहचरितासह०
७७ सांप्रतिकाभावे०
११० सामान्यातिदेशे०
७४ सूत्रे लिङ्गवचन०
५० स्वरभिन्नस्य च०
८० स्वरविधौ व्य०
८१ हल्स्वरप्राप्तौ०

॥ श्रीरस्तु ॥

॥ अथोणादिसूत्रसूचिकाः ॥

सूत्रम्		पार्श्वम्
	अ	
७६	अगारे णिच्च	५८५
५५१	अग्नयादयश्च	६४१
६७५	अङ्गतेरसिरिरु०	६५५
४१४	अङ्गिमदिमन्दिभ्य०	६२६
४९०	अङ्गेर्नलोपश्च	६३४
५७८	अच इः	६४६
७०९	अच् तस्य जङ्गच्	६५८
३४१	अजियमिशीङ्भ्यश्च	६१७
३२७	अजियुधुनीभ्यो०	६१६
५६	अजिरशिशिरशिथिल०	५८२
३१८	अजिवृरीभ्यो निच्च	६१४
२०६	अजेरज च	६०२
५७०	अज्यतिभ्यां च	६४५
५०१	अञ्चेः को वा	६३५
६५५	अञ्चयञ्जियुजि०	६५४
३६९	अञ्जिघसिभ्यः क्तः	६२१
८	अणश्च	५७६
८६	अणोऽश्च	५८६
१२६	अण्डन्कृसृभृवृञः	५९२
३९७	अत्यविचमितमि०	६२४
६७९	अदिभुवो डुतच्	६५६
५०५	अदिशदिभूशुभि०	६३६
५५५	अदेर्घ च	६४२
२६२	अदेर्मुट् च	६०९
१७५	अर्देर्दीर्घश्च	५९९
५०८	अदेस्त्रिनिश्च	६३६

सूत्रम्		पार्श्वम्
६४५	अदेर्नुम्धौ च	६५३
४५७	अनिहृषिभ्यां किच्च	६३०
३३२	अनुङ् नदेश्च	६१६
९३	अन्दूहम्भूजम्बूकफेलू०	५८६
६४४	अन्ने च	६५३
५४५	अन्येभ्योऽपि दृश्यन्ते	६४०
२५	अपदुःसुषु स्थः	५७८
५३८	अब्दादयश्च	३३९
३८५	अमिनक्षियजिवधि०	६२३
६०३	अमिचमिदिशि०	६४९
६५२	अमेर्हुक्च	६५३
७३८	अमेस्तुट् च	६६०
६९९	अमेः सन्	६५७
४६	अमेर्दीर्घश्च	५८१
६१३	अमेर्द्वेषति चित्	६५०
१७३	अमितम्योर्दीर्घश्च	५९९
४९९	अमेरतिः	३३५
४६९	अम्बरीषः	६३२
२६५	अर्चिशुचिहुसृ०	६०९
२७	अर्जिदृशिकम्यमि०	५७८
४६८	अर्जेर्नुक् च	६३१
३३८	अर्जेर्णिलुक् च	६१७
२७४	अर्तिपृवपियजी	६०९
२५९	अर्तिसृधृधम्य०	६०८
१३७	अर्तिस्तुसुहु०	५९२
४३२	अर्तिगृभ्यां मन्	६२७
२०९	अर्तेः किदिच्च	६०३

सूत्रम्		पार्श्वम्
४१२	अर्तिकमिभ्रमि०	६२६
३८२	अर्तेर्निच्च	६२२
२४५	अर्तेर्गुणः शुट् च	६०६
४८४	अर्तेरुच्च	६३३
१६५	अर्तेर्निरि	५९७
३४०	अर्तेश्च	६१७
७१	अर्तेश्च तुः	५८४
६८५	अर्तेश्च	६५६
६९५	अर्तेः क्युरुच्च	६५७
६३४	अर्तेरुच्च	६५२
५१९	अर्तेररुः	६३७
७३१	अर्भकपृथुक०	६६०
३४५	अर्शेर्देवने	६१८
४६५	अलीकादयश्च	६३१
१३९	अवतेष्टिलोपश्च	५९३
७३२	अवद्यावमाधमा०	६६०
४५	अविमद्योष्टिषच्	५८१
१४१	अविसिविसिशु०	५९३
४३८	अवितृस्तृतन्त्रिभ्य ईः	६२८
१६०	अवे भृञः	५९७
६१२	अशित्रादिभ्य इत्रोत्रौ	६५०
५८६	अशिशकिभ्यां०	६४७
५७२	अशिपणाय्योरुडा०	६४५
१४९	अशूप्रुषिलटिकणि०	५९४
३३७	अशेर्लशश्च	६१७
५२	अशेर्णित्	५८२
२३३	अशेरश च	६०५
३५०	अशेः सरः	६१८
४३६	अशेर्नित्	६२८
६३०	अशेर्देवने युट् च	६५१
७३५	अश्नोतेराशु०	६६०
४८६	अश्नोतेरश्च	६३३
७०७	अश्वादयश्च	६५८
४३४	असिसञ्जिभ्यां क्थिन्	६२७
४९	असेरुरन्	५८१

सूत्रम्		पार्श्वम्
	आ	
३३	आङ्परयोः खनि०	५७९
५७७	आङि श्रिहनिभ्यां०	६४६
२६०	आङिशुषेः सनश्छन्दसि	६०८
२०३	आङिपणिपनि०	६०२
४४७	आङि णित्	६२९
३६३	आणको लूधू०	६२०
८०	आतृकन्यृद्धिश्च	५८५
३६२	आनकः शीङ्भियः	६२०
६४७	आपः कर्माख्यायाम्	६५३
२१६	आप्रोतेर्ह्रस्वश्च	६०३
६१४	आसमिण् निकषिभ्याम्	६५०
	इ	
५५९	इगुपधात् कित्	६४३
६५१	इण आगोऽपराधे च	६५३
६३७	इण आगसि	६५२
६६१	इण आसि	६५४
४३३	इणः कित्	६२७
४२९	इणस्तशन्तशसुनौ	६२७
२८२	इण्सञ्जिदीङुष्य०	६११
३२३	इण्भीकापाश०	६१५
१५०	इण्शीभ्यां वण्	५९४
५९६	इन्देः कमिनलोपश्च	६४८
५१	इषिमदिमुदिखिदि०	५८२
१४२	इषियुधीन्धिदसि०	५९३
४३७	इषेः क्सुः	६२८
४२८	इष्यशिभ्यां तकन्	६२७
	ई	
४६१	ईषेः किद्ध्रस्वश्च	६३१
१३	ईषेः किच्च	५७७
	उ	
१९७	उदकं च	६०२
६४९	उदके नुम्भौ च	६५५
६४३	उदके थुट् च	६५३
६३६	उदके नुट् च	६५२

	सूत्रम्	पार्श्वम्
६९०	उदि चेर्डैसिः	६५७
६९७	उदि इणातेर०	६५७
५२८	उद्यतेश्चित्	६३८
३४८	उन्दिभ्रुथिकुथिभ्यश्च	६१८
१२	उन्देरिच्चादेः	५७७
२३४	उन्देर्नलोपश्च	६०५
३९६	उपसर्गे वसेः	६२४
६३१	उब्जेर्बले बलोपश्च	६५१
४८१	उलूकादयश्च	६३३
३६४	उल्मुकदर्विहोमिनः	६२०
५३५	उल्वादयश्च	६३९
६०१	उषिखनिभ्यां कित्	६४८
१६१	उषिकुषिगार्ति०	५९७
४२२	उषिकुटिदलिकचि०	६२७
६७३	उषः कित्	६५५
	ऊ	
७१८	ऊर्जिइणाते०	६५९
७२५	ऊर्णोतेर्डः	६५९
३०	ऊर्णोतेर्नुलोपश्च	५७९
	ऋ	
४११	ऋच्छेररः	६२६
४६२	ऋजेश्च	६३१
७२९	ऋजेः कीकन्	६६०
१८६	ऋज्रेन्द्राग्रवज्र	६००
२४४	ऋञ्जिवृधिमन्दि०	६०६
४४२	ऋतन्यञ्जिवन्यञ्ज्य०	६२८
९२	ऋतेरम्च	५८६
३४७	ऋषेर्जातौ	६१८
४०३	ऋषिवृषिभ्यां कित्	६२५
५१३	ऋहनिभ्यामूषन्	६३६
	ए	
७८	एधिवह्योश्चतुः	५८५
२७५	एतेर्णिच्च	६१०
१३०	एतेस्तुट् च	५९२

	सूत्रम्	पार्श्वम्
	क	
४१७	कञ्जिमृजिभ्यां चित्	६२६
३५७	कठिकुषिभ्यां काकुः	६१९
६४	कठिचकिभ्यामोरन्	५८४
१०३	कणेष्ठः	५८८
५२३	कदेर्नित्पक्षिणि हि	६३७
१५४	कनिन्युवृषितक्षि०	५९५
३३१	कन्युच्क्षिपेश्च	६१६
४२४	कपश्चाक्रवर्मणस्य	६२७
६६	कपिगडिगण्डिकटि०	५८४
६२	कबेरोतच्पश्च	५८३
७२	कमिमनिजनिगा०	५८५
४१८	कमेः किदुच्चोपधायाः	६२६
५५	कमेः पश्च	५८३
१००	कमेरठः	५८८
५२४	कलिकर्योरमः	६३८
४४५	कलंश्च	६२९
१०४	कलस्तृपश्च	५८८
७०४	कलिगलिभ्यां०	६५७
४७२	कशेर्मुट् च	६३२
४५६	कषिदूषिभ्यामीकन्	६३०
८४	कषेश्छश्च	५८६
५९७	कायतेर्डिमिः	६४८
५०	किलेर्बुक् च	५८२
६५	किशोरादयश्च	५८४
४	किंजरयोः श्रिणः	५७५
५२०	कुटः किच्च	६३७
६२६	कुटिकुषिभ्यां०	६५१
५८३	कुडिकम्प्योर्नलोपश्च	६४७
५२५	कुणितुल्योः किन्दच्	६३८
५२६	कुपेर्वा वश्च	६३८
५९	कुम्बेर्नलोपश्च	५८३
३०७	कुयुभ्यां च	६१३
२२	कुर्भ्रश्च	५७८
५३१	कुवश्चट्दीर्घश्च	६३९

सूत्रम्		पार्श्वम्
४१३	कुवः करन्	६२६
६२७	कुषेर्लश्च	६५१
५४६	कुसेरुम्भोमेदेलाः	६४०
५२२	कृकदिकडिकटि०	६३७
६	कृके वचः कश्च	५७५
२४	कृग्रोरुच्च	५७८
४७३	कृञ उच्च	६३२
५६८	कृञ उदीचां कारुषु	६४४
७१३	कृञादिभ्यः संज्ञायां वुन्	६५८
७७	कृञः कतुः	५८५
७२३	कृञः पासः	६५९
४२७	कृतिभिदिलतिभ्यः किन्	६२७
१७८	कृतेरिच्छः कृ च	५९९
४९६	कृविघृष्विच्छवि०	६३५
१६	कृतेराद्यन्तविपर्य०	५७७
३८९	कृतेर्नुम् च	६२३
२९७	कृत्यशुभ्यां क्मन्नः	६१३
७१९	कृदरादयश्च	६५९
३२०	कृदाधारार्चिकलि०	६१५
३५३	कृधूमादिभ्यः किन्	६१९
१	कृवापाजिमिस्वादि०	५७४
४९६	कृविघृष्विछ०	६३५
८१	कृषिचमितनिधनि०	५८५
२६१	कृषेरादेश्च चः	६०८
२८४	कृषेर्वर्णे	६११
१९६	कृषेर्वृद्धिश्चोदीचाम्	६०२
५६६	कृषेर्वृद्धिश्छन्दसि	६४४
३१०	कृहनिभ्यां क्त्नुः	६१४
१५८	कृहृभ्यामेणुः	५९६
५८२	कॄगृशॄपॄकुटि०	६४६
१५३	कॄगृशदृभ्यो वः	५९५
२७९	कॄगृशॄवृङ्भ्यातिभ्यः	६१०
६२४	कॄतॄकृपिभ्यः कीटन्	६५१
४६६	कॄतॄभ्यामीषन्	६३१
२३९	कॄपॄवृजिमन्दि०	६०५

सूत्रम्		पार्श्वम्
३३३	कॄवृदारिभ्य उनन्	६१६
२९०	कॄवृजॄसिदुपन्यनि०	६१२
४७०	कॄशॄपॄकटिपटिशौटि०	६३२
४०२	कॄशॄशालिकलिगर्दि०	६२५
८८	केश एरङ् चास्य	६५६
५९४	कोररन्	६४८
७२१	क्रमिगमिक्षमि०	६५९
५६१	क्रमितमिशतिस्त०	६४३
२०२	क्रिय इकन्	६०२
७११	क्रिशेरन्लो लोपश्च	६५८
७३४	क्रिशेरीचोप०	६६०
४२३	क्रृणः संप्रसारणं च	६२७
११२	क्लादिभ्यः किन्	५९०
२१५	क्विब्वचिप्रच्छि०	६०३
१९०	क्ष्वुन्शिल्पिसंज्ञ०	६०१
७४३	क्षमेरुपधालोपश्च	६६१
२६४	क्षिपेः किच्च	६०९
३३५	क्षुधिपिशिमिथि०	६१७

ख

४५३	खजेराकः	६३०
५७९	खनिकष्यञ्जमि०	६४६
३६	खरुशकुर्पीयु०	५८०
५३०	खर्जिपिञ्जादिभ्य०	६३८
३९२	खलतिः	६२३
३०८	खष्पशिल्पशष्प०	६१३

ग

५१८	गडेश्च	६३७
३८६	गडेरादेश्च कः	६२३
४१५	गडेः कड च	६२६
१२४	गण्शकुनौ	५९७
६६६	गतिकारकोप०	६५५
४७५	गभीरगम्भीरौ	६३२
१२०	गन्गम्यद्योः	५९१
२३५	गमेर्गश्च	६०५
६०८	गमेरा च	६४९

सूत्रम्		पार्श्वम्
२२५	गमेर्डो:	६०४
३११	गमेः सन्वच्च	६१४
४४६	गमेरिनिः	६२९
२१२	गर्वेरत उच्च	६०३
१६७	गश्वोदि	५९७
२९६	गादाभ्यामिण्णुच्	६१२
५९५	गिर उडच्	६४८
६०६	गृधृवीपचिवचिय०	६४९
६८०	गुधेरूमः	६५६
५६	गुपादिभ्यः कित्	५८३
३४९	गृधिपण्योर्दकौ च	६१८
१४०	ग्रसेरा च	५९३
७४५	ग्रहेरनिः	६६१
१४७	ग्रीष्मः	५९४
९५	ग्रो मुट् च	५८७
२२२	ग्लानुदिभ्यां डौः	६०४
	घ	
१४६	घर्मः	५९४
४७४	घसेः किच्च	६३२
४९२	घृणिपृश्निपार्ष्णि०	६३४
	च	
१७१	चकिरम्योरुचो०	५९९
२७६	चक्षेः शिच्च	६१०
६७२	चक्षेर्बहुलं शिच्च	६५५
४५८	चङ्कणः कङ्कणश्च	६३०
७३६	चतेरुरन्	६६०
६५८	चन्देरादेश्च छः	६५४
६६७	चन्द्रे मो डित्	६५५
६११	चरेर्वृत्ते	६४९
७४७	चरेश्च	६६१
६३९	चायतेरन्ते ह्रस्वश्च	६५२
७३	चायः किः	५८५
२२०	चिक् च	६०४
६१५	चितेः कणः कश्च	६५०
७१४	चीकयतेराद्य०	६५९

सूत्रम्		पार्श्वम्
१०८	चुपेरचोपधायाः	५८९
३०४	च्युवः किच्च	६१३
२२३	च्विरव्ययम्	६०४
	छ	
२४३	छन्दस्यसानच् शु०	६०६
२	छन्दसीणः	५७५
१२१	छापूखडिभ्यः कित्	५९१
२८१	छित्वरछत्वरधीवर०	६१०
११०	छो गुरुग्रस्वश्च	५८९
	ज	
५४२	जञ्वादयश्च	६३९
५४४	जनिदाच्युसृवृभदिष०	६४०
५८८	जनिमृङ्भ्यामिमनिन्	६४७
५६९	जनिघसिभ्यामिण्	६४४
२७२	जनेरुसिः	६०९
५५०	जनेर्यक्	६४१
७२४	जनेस्तु रश्च	६५९
७१६	जनेररष्ट च	६५९
७०८	जनेष्टन् लोपश्च	६५८
२३१	जसिसहोरुरिन्	६०४
३१६	जहातेर्ढेऽन्तलो०	६१४
१९२	जहातेर्ढे च	६०१
१३८	जहातेः सन्वदा०	५९३
७२७	जीर्यतेः क्रिन्नश्च वः	६५९
७९	जीवेरातुः	५८५
४०६	जृविशिभ्यां झच्	६२५
१६३	जृवृभ्यामूथन्	५९७
४९४	जृशृस्तृजागृभ्यः क्विन्	६३४
३७१	जेर्मूट् चोदात्तः	६२१
१८१	जोरी च	६००
	ञ	
१११	ञमन्ताङ्ः	५८९
	ड	
६९८	डित्खनेर्मुट् स०	६५७
८५	णित्कसिपद्यर्तेः	५८६

सूत्रम्		पार्श्वम्
	त	
३६८	तनिमृङ्भ्यां किच्च	६२१
२२१	तनोतेरनश्च वः	६०४
७३०	तनोतेर्ड उः सन्वच्च	६६०
३५५	तन्यृषिभ्यां क्वसरन्	६१९
११५	तमिविशिविडिमृणि०	५९०
७४४	तरतेर्डिः	६६१
११७	तरत्यादिभ्यश्च	५९१
२११	तलिपुलिभ्यां च	६०३
४८	तवेर्णिद्वा	५८२
९८	ताडेर्णिलुक्च	५८७
२९८	तिजेर्दीर्घश्च	६१३
१६९	तिथपृष्ठगूथयूथ०	५९८
४१९	तुषारादयश्च	६२६
३३९	तृणाख्यायां चित्	६१७
२५०	तृन्तृचौ शंसि क्षदा०	६०७
२९२	तृषि शुषिरसि०	६१२
६८६	तृहेः क्रो हलोपश्च	६५६
४०८	तृभूवहिवसिभासि०	६२५
१२९	त्यजितनियजिभ्यो०	५९२
५	त्रो रश्च लः	५७५
८९	त्रो दुट् च	५८६
३३४	त्रो रश्च लो वा	६१७
	द	
६७४	देमरुनासिः	६५५
७२६	दधातेर्यन्नुट् च	६५९
२२७	दमेर्डोसिः	६०४
९०	दरिद्रातेर्यालोपश्च	५८६
४८७	दल्मिः	६३३
६८९	दंशेश्च	६५७
६८८	दंसेष्टनौ०	६५६
७३९	दहेर्गो लोपो०	६६१
६०९	दादिभ्यश्छन्दसि	६४९
३१२	दाभाभ्यां नुः	६१४
३७७	दिधिषाद्यः	६२२
२५६	दिवेर्कः	६०८
४०१	दिवः कित्	६२५
६००	दिवेर्द्यु च	६४८
४९५	दिवो द्वे दीर्घश्चा०	६३४
४२०	दीङो नुट् च	६२७
३७०	दुतनिभ्यां दीर्घश्च	६२१
१७७	दुरीणो लोपश्च	५९९
६२३	दृणातेर्ह्रस्वश्च	६५०
१२८	दृणातेः पुगह्रस्वश्च	५९२
४३१	दृदलिभ्यां भः	६२७
३	दृसनिजनिचरि०	५७५
६५४	देशेह च	६५३
२६७	द्युतेरिसिन्नादेश्च जः	६०९
२०८	द्रुदक्षिभ्यामिनन्	६०३
	ध	
९	धान्ये नित्	५७६
२८६	धापृवस्यज्यतिभ्यो०	६११
३१४	धेट इच्च	६१४
२४०	धृषेर्धिषृ च सं०	६०६
२९१	धेट इच्च	६१२
१९३	ध्मौ धम च	६०१
५५४	ध्याय्योः संप्रसारणं च	६४२
	न	
४९	नञि व्यथेः	५८२
२५५	नञि च नन्देः	६०८
८७	नञि लम्बेर्नलोपश्च	५८६
१५६	नञि जहातेः	५९५
६६३	नञि हन एह च	६५४
२५२	नप्तृनेष्टृत्वष्टृहोतृ०	६०७
२५७	नयतेर्डिच्च	६०८
६५०	नहेर्दिविभश्च	६५३
७०१	नहेर्ईलोपश्च	६५७
५६५	नहो भश्च	६४४
५९०	नामन्सीमन्व्यो०	६४७
१७	नावश्चेः	५७७

सूत्रम्		पार्श्वम्
१७४	निन्देर्नलोपश्च	५९९
४८३	नियो मिः	६३३
१६६	निशीथगोपीथा०	५९७
६६५	नुवो धुट् च	६५५
९१	नृतिश्रृध्योः कूः	५८६
३६७	नैज्याप् इट् च	६२१
६९१	नौर्दीर्घश्च	६५७
५७५	नौ व्यो यलोपः पू०	६४५
५२७	नौ षञ्जेर्घथिन्	६३८
३२५	नौ सदेर्डिच्च	६१६
२८०	नौ सदेः	६१०
३२४	नौ हृः	६१६
	प	
७०	पः किच्च	५८४
६५९	पचिवचिभ्यां सुट् च	६५४
४७७	पच एलिमच्	६३२
१८८	पचिनशोर्णुकन्क०	६०१
७१५	पचिमच्योरिच्चो०	६५९
२२८	पणेरिज्यादेश्च वः	६०४
४५२	पतस्थ च	६२९
५८	पतिकठिकुठिगडि०	५८३
११४	पतिचण्डिभ्यामालञ्	५९०
११६	पतेरङ्गच्पक्षिणि	५९१
३५४	पतेरश्च लः	६१९
५०९	पतेरत्रिन्	६३६
६२२	पदिप्रथिभ्यां नित्	६३७
६६९	पयसि च	६५५
४५०	परमे कित्	६२९
२१७	परौ व्रजेः षः पदान्ते	६०३
३८३	पर्जन्यः	६२२
३६०	पर्देर्नित्संप्रसार०	६२०
४६०	पर्फरीकादयश्च	६३०
६१७	पातेर्डुम्सुन्	६५०
६८३	पातेरतिः	६५६
६४२	पातेर्बले जुट् च	६५२

सूत्रम्		पार्श्वम्
४९७	पातेर्डतिः	६३५
१६४	पातृतुदिवदिरिचि०	५९७
५७१	पादे च	६४५
३०३	पानीविषिभ्यः पः	६१३
१३३	पारयतेरजिः	५९२
४५५	पिनाकादयश्च	६३०
२७१	पिबतेस्थुक्	६०९
३७५	पिशेः किच्च	६२२
५१६	पीयोरूषन्	६३७
३५६	पीयुक्तणिभ्यां०	६१९
५१४	पुरः कुषन्	६३७
६७०	पुरसि च	६५५
६७१	पुरूरवाः	६५५
६०४	पुवो ह्रस्वश्च	६४९
४४४	पुषः कित्	६२९
६९३	पूञो यण्णुग्ह्रस्वश्च	६५७
३९१	पृषिरञ्जिभ्यां कित्	६२३
५१५	पृनहिकलिभ्य०	६३७
२३	पृभिदिव्यधिगृधि०	५७८
५५६	प्र ईर शदोस्तुट् च	६४२
२८	प्रथिम्रदिभ्रस्जां०	५७९
७४६	प्रथेरमच्	६६१
१३४	प्रथः कित्संप्रसारणं च	५९२
१४८	प्रथेः षिवन्संप्र०	५९४
१९९	प्राड्पणिकषः	६०२
७३७	प्रा (प्रे) ततेरन्	६६०
४४९	प्रे स्थः	६२९
५७४	प्रे हरतेः कूपे	६४५
४३५	प्लुषिकुषिः सुषिभ्यः०	६२७
३४३	प्लुषेरचोपधायाः	६१८
	फ	
१८	फलिपाटिनमिमनि०	५७७
७१२	फलेरितजादेश्च पः	६५८
३३६	फलेर्गुक् च	६१७
२८३	फेनमीनौ	६११

सूत्रम्		पार्श्वम्
	व	
२८५	वन्धेर्वृधिवुधी च	५८१
४५४	वलाकादयश्च	६४३
२७८	वहुलमन्यत्रापि	६०९
१८०	वहुलमन्यत्रापि०	६१८
१९५	वहुलमन्यत्रापि	६६१
२०७	वहुलमन्यत्रापि	६२९
२३६	वहुलमन्यत्रापि	५८०
२५१	वहुलमन्यत्रापि	६५९
११८	विडादिभ्यः कित्	६५६
५८५	वृहेर्नोऽच	५८१
२६६	वृहेर्नलोपश्च	६३७
	भ	५७९
४१०	भन्देर्नलोपश्च	६०३
६३	भातेर्डवतुः	६५७
१३५	भिय पुग्रह्वश्च	६४१
१४५	भियः पुग्वा	५८३
१८९	भियः कुकन्	६४८
३०१	भुजिमृदृभ्यां०	६५४
५८१	भुजेः किच्च	६३९
३३०	भुवो ऽञ्चुच्	५८४
४४८	भुवश्च	५८१
२६९	भुवः कित्	५९२
४८५	भुवः कित्	६०२
६५६	भूरञ्जिभ्यां कित्	६१०
६१०	भूवादिगृभ्यो०	६५७
२३०	भृञ ऊच्च	५८३
१२२	भृञः कन्नुट् च	६४१
३९४	भृजश्चित्	६३६
७	भृमृशीतृचरितृ०	५८०
३९०	भृमृदृशियजिपर्विप०	५८७
२२६	भ्रमेश्चङ्गः	५८५
५६०	भ्रमेः संप्रसारणं च	५८९
२३८	भ्रसूधूभ्रस्जिभ्य०	६३१
५९९	भ्रस्जिगमिनमिहनि०	६३३

सूत्रम्		पार्श्वम्
	म	
६११	४१ मद्गुरादयश्च	५८१
६३०	५६२ मनेरुच्च	६४३
६१०	२७३ मनेर्धश्छन्दसि	६०९
५९९	३४४ मनेर्दीर्घश्च	६१८
६०२	४४८ मन्नेरलच्	६६१
६०३	४५१ मन्थः	६२९
६०५	३८ मन्दिवाशिमथिच०	५८०
६०७	७२८ मव्यतेर्यलोपो०	६५९
५९१	६८१ मसेरच्च	६५६
६४७	४३ मसेश्च	५८१
६०९	५११ मस्जेर्नुम् च	६३७
	३१ महति ह्रस्वश्च	५७९
६२६	२१४ महेरिनच्च	६०३
५८४	७०३ माङ ऊसौ मयि च	६५७
५९२	५४९ मीलोशामिन्यौ यः	६४१
५९४	५० मिथिलादयश्च	५८३
६०१	५९१ मिथुने मनिः	६४८
६१३	६६२ मिथुनेऽनि०	६५४
६४६	५४१ मिषीमृगां रुः	६३९
६१६	६७ मीनातेरच्च	५८४
६२९	४० मुकुरदर्दुरौ	५८१
६०९	१२५ मुदिमोर्गश्च	५९२
६३३	२०० मुषेर्दीर्घश्च	६०२
६५४	२७७ मुहेः किच्च	६१०
६४९	७०० मुहेः स्वे मूर्च०	६५७
६०४	६१ मूलेरादयः	५८३
५९१	५४८ मृशक्यविभ्यः क्तः	६४१
६२४	५१० मृकृणिभ्यार्मीचिः	६३६
५७६	३७ मृगय्वादयश्च	५८०
६२३	९४ मृघ्रोरुतिः	५८७
६०४	८२ मृजेर्गुणश्च	५८५
६४३	१०७ मृजेष्टिलोपश्च	५८९
६०५	४६४ मृडः कीकन् कॄर्णो	६३१
६४८	४७९ मृकृणिभ्यामूको०	६३३

सूत्रम्		पार्श्वम्
	य	
३००	यजिमनिशुन्धि०	६१३
२५४	यतेर्वृद्धिश्च	६०८
४३९	यापोः किद्वे च	६२८
१४३	युजिरुचितिजां०	५९४
२४७	युधिबुधिदृशि०	६०७
१३६	युष्मसिभ्यां मदिक्	५९२
२१	यो द्वे च	५७८
	र	
२३७	रज्जेः क्युन्	६०५
६२९	रपेरत एच्च	६५१
२६	ररेरिच्चोपधायाः	५७८
१०१	रमेर्वृद्धिश्च	५८८
१९१	रमे रश्च लो वा	६०१
२९४	रमेस्त च	६१२
५०३	रमेर्नित्	६३५
६५३	रमेश्च	६५३
३८०	राजेरन्यः	६२२
२२४	रातेर्डैः	६०४
५०७	राशदिभ्यां त्रिप्	६३६
४०५	रासिवल्लिभ्यां च	६२५
२९५	रास्नासास्नास्थूणा०	६१२
६३८	रिचेर्धने घिच्च	६५२
६१८	रुचिभुजिभ्यां०	६५०
६२५	रुचिवचिकुचि०	६५१
३९५	रुदिविदिभ्यां ङित्	६२४
५४३	रुशातिभ्यां कुन्	६४०
४०४	रुषोर्निल्लुष् च	६२५
४०७	रुहिनन्दिजीवि०	६२५
४७	रुहेर्वृद्धिश्च	५८१
२१३	रुहेश्च	६०३
३७४	रुहेरश्च लो वा	६२२
६४८	रूपे जुट् च	६५३
१७९	रोदेर्णिलुक् च	५९९

सूत्रम्		पार्श्वम्
	ल	
२८७	लक्षेरट् च	६११
२९	लङ्बिबंहघोर्नलोपश्च	५७९
१३२	लङ्नेर्नलोपश्च	५९२
७३३	लीरीडोर्ह्रस्वः०	६६०
३७२	लोष्टपलितौ	६२१
	व	
५०६	वङ्क्यादयश्च	६३६
७१७	वचिमनिभ्यां चिच्च	६५९
३१३	वचेर्गश्च	६१४
३८४	वदेरान्यः	६२२
२८८	वनेरिच्चोपधायाः	६१२
४००	वयश्च	६२५
६६८	वयसि धाञः	६५५
५६३	वर्णेर्बलिश्चाहिरण्ये	६४४
२४१	वर्तमाने पृषद्बृ०	६०६
५३९	वलिमलितनिभ्यः०	६३९
४८०	वलेरूकः	६३३
१९	वलेर्गुक्च	५७८
६७८	वशेः कनसिः	६५६
४७१	वशेः कित्	६३२
२२९	वशेः कित्	६०४
५६४	वसिवपियजिराजि०	६४४
६५७	वसेर्णित्	६५४
६१९	वसेस्तिः	६५०
३५१	वसेश्च	६१८
७५	वसेस्नुन्	५८५
२६८	वसौ रुचेः संज्ञायाम्	६०९
३९९	वहियुभ्यां णित्	६२५
५००	वहिवस्यर्तिभ्यश्चित्	६३५
४९१	वहिश्रिश्रुयुद्रुस्रु०	६३४
६६०	वहिहाधाञ्भ्य०	६५४
८३	वहो धश्च	५८५
४४१	वातप्रमीः	६२८
५७३	वातेर्डिच्च	६४५

सूत्रम्	पार्श्वम्
६८४ वातेर्नित्	६५६
१८४ वाविन्धेः	६००
४२५ विटपपिष्टपविशिपोलपाः	६२७
११८ विडादिभ्यः कित्	५९१
६७७ विदिभुजिभ्यां विश्वे	६५६
६६४ विधाञो वेध च	६५४
४७६ विषाविहा	६३२
३१९ विषेः किच्च	६१५
४८८ वीज्वाज्वरिभ्यो निः	६३४
४३० वीपतिभ्यां तकन्	६२७
६४० वृङ्शीङ्भ्यां०	६५२
२०५ वृजेः किच्च	६०२
३७८ वृञ एण्यः	६२२
३८७ वृञश्चित्	६२३
६८७ वृञ्लुटितनि०	६५६
३५९ वृतेर्वृद्धिश्च	६१९
५८० वृतेश्छन्दसि	६४६
४२६ वृतेस्तिकन्	६२७
२६३ वृतेश्च	६०९
४९३ वृदृभ्यां विन्	६३४
१८५ वृधिवपिभ्यां रन्	६००
१९८ वृश्चिकृषोः किकन्	६०२
१०६ वृषादिभ्यश्चित्	५८८
५४० वृल्लेः पुग्दुकौ च	६३९
३४२ वृतृवदिहनिकमि०	६१७
२१० वेपितुभ्योर्हस्वश्च	६०३
३९८ वेञस्तुट् च	६२४
५१२ वेञो डिच्च	६३६
५८९ वेञः सर्वत्र	६४७
१७२ वौ कसेः	५९९
६२१ वौ तसेः	६५०
३९ व्यथेः संप्रसारणं किच्च	५८०
७४१ व्याडिः प्रातेश्च०	६६१
६३५ व्याधौ शुट् च	६५२

सूत्रम्	पार्श्वम्
श	
५२१ शकादिभ्योऽटन्	६३७
१०९ शाकिशम्योर्नित्	५८९
३२९ शकेरुनोन्तोन्त्यु०	६१६
४९८ शकेर्कृतिन्	६३५
३५ शते च	५७९
६० शदेस्त च	५८३
१०५ शपेर्बश्च	५८८
९९ शमेर्डः	५८७
५३४ शमेर्वन्	६३९
१०२ शमेः खः	५८८
४८२ शलिमण्डिभ्या०	६३३
४४ शावशेराशौ	५८१
५३७ शाशपिभ्यां ददनौ	६३९
४७८ शीङो भुक्रुकल०	६३२
७०२ शीङो ह्रस्वश्च	६५७
५५३ शीङ्कुशिरुहि०	६४२
३९३ शीङ्शपिरुगमिव०	६२४
३२२ शुकवल्कोल्काः	६१५
१७६ शुचेर्दश्च	५९९
१८३ शुसिचिमीनां दीर्घश्च	६००
४१६ श्टक्रारभृक्रारौ	६२६
१२३ श्टणातेर्ह्रस्वश्च	५९२
१० श्टम्बुनिहित्र्यप्यसिव०	५७७
१२७ शृदृभसोऽदिः	५९२
४६७ शृपॄभ्यां किच्च	६३१
४५९ शृपॄवृञां द्वे०	६३०
३८१ शॄरम्योश्च	६२२
१५२ शेवयह्वजिह्वा०	५९५
२० शेः कित्सन्वच्च	५७८
७०६ श्मनिश्रयते०	६५८
२०४ श्यास्त्याह्लम०	६०२
६३३ श्रयतेः स्वाङ्गे०	६५२
३७६ श्रुदक्षिस्पृहिगृहिभ्य०	६२२
४४३ श्रः करन्	६२९

सूत्रम्		पार्श्वम्
५६७	श्रः शकुनौ	६४४
२९९	श्लिषेरच्चोपधायाः	६१३
३२	श्लिषेः कश्च	५७९
१५७	श्वन्नुक्षन्पूषन्०	५९५
५११	श्वयतेश्चित्	६३६
२४९	श्वितेर्दश्च	६०७
६३२	श्वेः संप्रसारणं च	६५१
	स	
३५२	संपूर्वाच्चित्	६१९
१५५	सप्यशूभ्यां तुट् च	५९५
५३२	समीणः	६३९
१८७	ससि कस उकन्	६०१
२४६	सम्यानच्स्तुवः	६०६
१६८	समीणः	५९७
५७६	समाने ख्यः स चोदात्तः	६४५
१६२	सर्तेर्णित्	५९७
६७६	सर्तेरप्पूर्वादसिः	६५५
१३१	सर्तेरटिः	५९२
३०२	सर्तेरयुः	६१३
३५८	सर्तेर्दुक्च	६१९
४२१	सर्तेरपः षुक्च	६२७
४६३	सर्तेर्नुम्च	६३१
५२९	सर्तेर्णिच्च	६३८
५९८	सर्वधातुभ्यः ष्ट्रन्	६४८
५५७	सर्वधातुभ्य इन्	६४२
५८४	सर्वधातुभ्यो मनिन्	६४७
६२८	सर्वधातुभ्योऽसुन्	६५१
१५१	सर्वनीघृष्वरि०	५९४
५४	सलिकल्यनिमहिभडिभण्डि०	५८३
२५८	सव्ये स्थश्छन्दसि	६०८
२४२	संश्वत्तृपद्वेहत्	६०६
२७०	सहो धश्च	६०९
५९२	सातिभ्यामनिन्०	६४८
५४७	सानसिवर्णसिपर्ण०	६४०
६२०	सावसेः	६५०

सूत्रम्		पार्श्वम्
७४०	सिचेः संज्ञायाम्०	६६१
६९	सितनिगमिमसि०	५८४
६०२	सिविमुच्योष्टेरूच्च०	६४९
२८९	सिवेष्टेर्यूं च	६१२
५३३	सिवेष्टेरूच्च	६३९
२९३	सुञो दीर्घश्च	६१२
२५३	सुञ्यसेर्क्रन्	६०८
२३२	सुयुरुवृञो युच्	६०५
३८८	सुविदेः कत्रः	६२३
३१५	सुवः कित्	६१४
२१९	सुवः कः	६०४
३०६	सुशृभ्यां निच्च	६१३
१८२	सुसूधागृधिभ्यः क्रन्	६००
५०४	सूङः क्रिः	६३५
६१६	सूचेः स्मन्	६५०
१५	सृजेरसुम्च	५७७
३६१	सृयुवचिभ्यो०	६२०
११९	सृवृभ्योर्वृद्धिश्च	५९१
४८९	सृवृषिभ्यां कित्	६३४
३२१	सृवृभूशुषि०	६१५
६९२	सौ रमेः क्तो दमे	६५७
१४	स्कन्देः सलोपश्च	५७७
६४६	स्कन्देश्च स्वाङ्गे	६५३
३०९	स्तनिह्रषिषुषिगदि०	६१४
३०५	स्तुवो दीर्घश्च	६१३
३७९	स्तुवः क्सेय्यश्छन्दसि	६२२
६०५	स्थायतेर्ट्रट्	६४९
६८२	स्थः किच्च	६५६
११३	स्थाचतिमृजेराल०	५९०
३१७	स्थो णुः	६१४
५३६	स्थः स्तोऽम्बजबकौ	६३९
५५२	स्नामदिपद्यर्ति०	६४२
३४६	स्नुत्रश्चिकृत्यृषिः	६१८
७०५	स्पृशेः शण्सुनौ०	६५८
१७०	स्फायितञ्चिवञ्चिशकि०	५९८

सूत्रम्	पार्श्वम्	सूत्रम्	पार्श्वम्
६८ स्यन्देः संप्रसारणं च	५८४	७१० हन्तेः शरीरावयवे०	६५८
११ स्यन्देः संप्रसारणं०	५७७	३४ हरिमितयोर्द्रवः	५७९
३२६ स्यमेरीट् च	६१६	७२२ हर्यतेः कन्यान्हे०	६५९
२०१ स्यमेः संप्रसारणं च	६०२	३६६ हसिमृग्रिण्वामि०	६२०
६९४ स्रंसेः शि कुट्	६५७	६९६ हिंसैरीरन्नीरचौ	६५७
६४१ स्नुरीभ्यां तुट् च	६५२	६०७ हुयामाश्रुभसिभ्य०	६४९
ह		२४८ हुछेः सनो लुक्०	६९७
१५९ हनिकुषिनीरमि०	५९६	२१८ हुवः श्लुवच्च	६०४
५९३ हनिमाशिभ्यां सिकन्	६४८	५५८ हृषिपिरुहिवृति०	६४३
१९४ हनो वध च	६०२	५८७ हृभृधृसृस्तृशृभ्य०	६४७
१४४ हन्तेर्हि च	५९४	९६ हृषेरलच्	५८७
७४२ हन्तेरन् घुरन्	६६१	३०३ हृग्यभिभ्यामितन्	६२२
५०२ हन्तेरंह च	६३५	९७ हसृरुहियुषिभ्य०	५८७
४०९ हन्तेर्मुट् हि च	६२५	३२८ ह्रियो रश्च लो वा	६१६
७२० हन्तेर्युनाद्य०	६५९	३६५ ह्रियः कुप्रश्च लो वा	६२०

॥ अथ फिट्सूत्रसूचिकाः ॥

सूत्रम्	पार्श्वम्	सूत्रम्	पार्श्वम्
३५ अक्षस्यादेवन०	७४४	३२ उनर्वघ्नन्तानाम्	७४४
१४ अङ्गुष्ठोदकबक०	७४४	८१ उपसर्गाश्चा०	७४६
५० अथ द्वितीयं०	७४५	६७ उशीरदाशेर०	७४५
२४ अथादिः प्राक्श०	७४४	८२ एवादीनामन्तः	७४६
१६ अर्जुनस्य तृ०	७४४	७३ कपिकेशहरि०	७४६
३६ अर्धस्यासम०	७४४	५९ कर्दमादीनां च	७४५
१७ आर्वस्य स्वा०	७४४	११ कृष्णस्यामृगास्या चेत्	७४४
१८ आशाया अदि०	७४४	३१ खय्युवर्णे कृति०	७४४
४९ इगन्तानां च०	७४५	६ खान्तस्याश्मादेः	७४३
६६ ईषान्तस्य ह०	७४५	४ गुदस्य च	७४३

सूत्रम्	पार्श्वम्
३ गेहार्थानामस्त्रि०	७४३
७० गोष्ठजस्य ब्रा०	७४६
३८ ग्रामादीनां च	७४५
२१ घृतादीनां च	७४४
८४ **च**ादयोऽनुदात्ताः	७४६
५८ **छ**न्दसि च	७४५
१० छन्दसि च	७४३
४७ **ज**नपदशब्दा०	७४५
२२ ज्येष्ठकनिष्ठ०	७४४
७६ **ति**ल्यशिक्यम०	७४६
२७ तृणधान्यानां०	७४४
५१ त्र्यचां प्राक्०	७४५
७८ त्वत्वसमसिमे०	७४६
६३ **थ**ान्तस्य च०	७४५
८ **द**क्षिणस्य साधौ	७४३
४६ **ध**ान्यानां च०	७४५
७२ धूम्रजानु०	७४६
५ ध्यपूर्वस्य स्त्री०	७४३
२० **न** कुपूर्वस्य०	७४४
१९ नक्षत्राणामाश्वि०	७४४
६१ नपः फलान्तानाम्	७४५
२६ नश्विषयस्या०	७४४
८० निपाता आद्युदा०	७४६
४५ नर्तुप्राण्याख्या०	७४५
४० न वृक्षपर्वत०	७४५
७४ न्यङ्स्वरौस्व०	७४६
७५ न्यर्बुदव्यल्क०	७४६
२८ **प्र**ः संख्यायाः	७४४
२ **पा**टला पालङ्का०	७४३
५५ पान्तानां गुर्वा०	७४५
७१ पारावतस्योपो०	७४६
३७ पीतद्रुर्थानाम्	७४४
१५ पृष्ठस्य च	७४४
८६ प्रकारादिद्विरुक्तौ	७४६

सूत्रम्	पार्श्वम्
३० प्राणिनां कुपूर्वम्	७४४
१ **फि**षोऽन्त उदात्तः	७४३
७ **ब**हिष्ठवत्सर०	७४३
२३ बिल्वतिष्ययोः०	७४४
७७ बिल्वभक्ष्यवी०	७४६
५७ **म**करवरूढ०	७४५
६८ महिष्याषाढयो०	७४५
५३ मादीनां च	७४५
८५ **य**थेति पादान्ते	७४६
६२ यान्तस्यान्त्या०	७४५
५६ युतान्यण्यन्ता०	७४५
४१ **रा**जविशेषस्य०	७४५
४२ **ल**घावन्ते द्व०	७४५
३९ लुबन्तस्योपमे०	७४५
३३ **व**र्णानां तणति०	७४४
८३ वाचादीनामु०	७४६
१२ वा नामधेयस्य०	७४४
६९ **श**कटिशकट्यो०	७४६
४४ शकुनीनां च०	७४५
५४ शादीनां शा०	७४५
६४ शिशुमारोदु०	७४५
१३ शुक्लगौरयोरादिः	७४४
८७ शेषं सर्वमनुदात्तम्	७४६
६५ **सां**काश्यकाम्पि०	७४४
७९ सिमस्यार्थवर्णे०	७४६
६० सुगन्धितेज०	७४५
४३ स्त्रीविषयवर्णा०	७४५
२९ स्वाङ्गशिटाम०	७४४
९ स्वाङ्गाख्याया०	७४३
५२ स्वाङ्गानामकु०	७४५
४८ ह्यादीनामसंयु०	७४५
२५ ह्रस्वान्तस्य स्त्री०	७४४
३४ ह्रस्वान्तस्य ह्र०	७४४

॥ श्रीरस्तु ॥

॥ अकाराद्यनुक्रमेण कौमुद्युत्तरार्धगतधातुसूचिकाः ॥



धातुः					धातुः				
		अ			१८८	अन्चु	(भ्वा.	प.	से)
७९२	अक	(भ्वा.	प.	से.)	८६२	अन्चु	(,,	उ.	,,)
८७	अकि	(,,	आ.	,,)	१७३९	अन्चु	(चु.	,,	,,)
६५४	अक्षू	(,,	प.	वे.)	१४५९	अन्जू	(रु.	प.	,,)
७९३	अग	(,,	,,	से.)	१९२६	अन्ध	(चु.	उ.	,,)
१४६	अगि	(,,	,,	,,)	३७८	अवि	(भ्वा.	आ.	,,)
१०९	अधि	(,,	आ	,,)	५५६	अश्र	(,,	प.	,,)
१९२८	अङ्क	(चु.	उ.	,,)	३८५	अभि (पा.)	(,,	आ.	,,)
१९२९	अङ्ग	(,,	,,	,,)	३८५	अभी (पा.)	(,,	,,	,,)
८६२	अचि (पा.)	(भ्वा.	,,	,,)	४६५	अम	(,,	प.	,,)
८६२	अचु (पा.)	(,,	,,	,,)	१७२१	अम	(चु.	उ.	,,)
२३०	अज	(,,	प.	,,)	४७४	अय	(भ्वा.	आ.	,,)
१७८६	अजि	(चु.	उ.	,,)	१६४४	अर्क	(चु.	उ.	,,)
२९५	अट	(भ्वा.	प.	,,)	२०४	अर्च	(भ्वा.	प.	,,)
२५४	अट्ट	(,,	आ.	,,)	१८०९	अर्च	(चु.	उ.	,,)
१५६२	अट्ट	(चु.	उ.	,,)	२२४	अर्ज	(भ्वा.	प.	,,)
२६१	अठि	(भ्वा.	आ.	,,)	१७२६	अर्ज	(चु.	उ.	,,)
३५८	अड	(,,	प.	,,)	१९०६	अर्थ	(,,	आ.	,,)
३४८	अड्ड	(,,	,,	,,)	५५	अर्द	(भ्वा.	प.	,,)
४४४	अण	(,,	,,	,,)	१८२९	अर्द	(चु.	उ.	,,)
११७६	अण	(दि.	आ.	,,)	४१५	अर्ब	(भ्वा.	प.	,,)
३८	अत	(भ्वा.	प.	,,)	५८४	अर्व	(,,	,,	,,)
६१	अति	(,,	,,	,,)	७४०	अर्ह	(,,	,,	,,)
१०११	अद	(अ.	,,	अ.)	१७३२	अर्ह	(चु.	उ.	,,)
६२	अदि	(भ्वा.	,,	से.)	१८३१	अर्ह	(,,	,,	,,)
१०७०	अन	(अ.	,,	,,)	५१५	अल	(भ्वा.	प.	,,)
११७६	अन (पा.)	(दि.	आ.	,,)	६००	अव	(,,	,,	,,)

धातुः				
१५२४	अश	(क्रया.	प.	से.)
१२६५	अशू	(स्वा.	आ.	,,)
८८६	अष (पा.)	(भ्वा.	उ.	,,)
८८६	अस	(,,	,,	,,)
१०६५	अस	(अ.	प.	,,)
१९१९	अंस	(चु.	उ.	,,)
१२१०	असु	(दि.	प.	,,)
१२७३	अह	(स्वा.	,,	,,)
६३५	अहि	(भ्वा.	आ.	,,)
१७९८	अहि	(चु	उ.	,,)
		आ		
१७२८	आङः क्रन्द	(चु.	उ.	,,)
२०९	आछि	(भ्वा.	प.	,,)
१२६१	आप्लृ	(स्वा.	,,	अ.)
१८४०	आप्लृ	(चु.	उ.	,,)
१०२१	आस	(अ.	आ.	,,)
		इ		
१०४७	इक्	(अ.	प.	,,)
१४०	इख	(भ्वा.	,,	से.)
१४१	इखि	(,,	,,	,,)
१५३	इगि	(,,	,,	,,)
१०४६	इङ्	(अ.	आ.	अ.)
३१८	इट	(भ्वा.	प.	से.)
१०४५	इण्	(अ.	,,	अ.)
६३	इदि	(भ्वा.	,,	से.)
१४४९	(जि) इन्धी	(रु.	आ.	,,)
१३५८	इल	(तु.	प.	,,)
१६६१	इल	(चु.	उ.	,,)
५८७	इवि	(भ्वा.	प.	,,)
११२७	इष	(दि.	,,	,,)
१३५२	इष	(तु.	,,	,,)
१५२६	इष	(क्रया.	,,	,,)
		ई		
६१०	ईक्ष	(भ्वा.	आ.	,,)
१४२	ईखि	(,,	प.	,,)

धातुः				
११४३	ईङ्	(दि.	आ.	अ.)
१८२	ईज	(भ्वा.	,,	से.)
१०१९	ईड	(अ.	,,	,,)
१६६८	ईड	(चु.	उ.	,,)
१०१८	ईर	(अ.	आ.	,,)
१८११	ईर	(चु.	उ.	,,)
५१०	ईर्ष्य	(भ्वा.	प.	,,)
५११	ईर्ष्य	(,,	,,	,,)
१०२०	ईश	(अ.	आ.	,,)
६११	ईष	(भ्वा.	प.	,,)
६८४	ईष	(,,	,,	,,)
६३२	ईह	(,,	आ.	,,)
		उ		
६५७	उक्ष	(भ्वा.	प.	से.)
१२८	उख	(,,	,,	,,)
१२९	उखि	(,,	,,	,,)
९५३	उङ्	(,,	आ.	अ.)
१२२४	उच	(दि.	प.	से.)
२१५	उछि	(भ्वा.	,,	,,)
१२९५	उछि	(तु.	,,	,,)
२१६	उछी	(भ्वा.	,,	,,)
१२९६	उछी	(तु.	,,	,,)
१३०५	उज्झ	(,,	,,	,,)
३३८	उठ	(भ्वा.	,,	,,)
१४५८	उन्दी	(रु.	,,	,,)
१३२१	उन्भ	(तु.	,,	,,)
१३०४	उब्ज	(,,	,,	,,)
१३२०	उभ	(,,	,,	,,)
२०	उर्द	(भ्वा.	आ.	,,)
५६९	उर्वी	(,,	प.	,,)
६९६	उष	(,,	,,	,,)
७३९	उहिर्	(,,	,,	,,)
		ऊ		
३३८	ऊठ (पा.)	(,,	,,	,,)
१८८९	ऊन	(चु.	उ.	,,)

धातुः				धातुः			
४८३	ऊयी	(भ्वा.	आ.	से.)	७९१ कगे	(भ्वा.	प.	से.)
१५५०	ऊर्ज	(चु.	प.	,,)	१६८ कच	(,,	आ.	,,)
१०३९	ऊर्णुञ्	(अ.	उ.	,,)	१६९ कचि	(,,	,,	,,)
६८३	ऊष	(भ्वा.	प.	,,)	३२० कटी	(भ्वा.	प.	,,)
६४८	ऊह	(,,	आ.	,,)	२९४ कट	(,,	,,	,,)
		ऋ			३३३ कठ	(,,	,,	,,)
९३६	ऋ	(भ्वा.	प.	अ.)	२६४ कठि	(,,	आ.	,,)
१०९८	ऋ	(जु.	,,	,,)	१८४८ कठि	(चु.	उ.	,,)
१३०३	ऋच	(तु.	,,	से.)	३६० कड	(भ्वा.	प.	,,)
१२९७	ऋछ	(,,	,,	,,)	१३८१ कड	(तु.	,,	,,)
१७६	ऋज	(भ्वा.	आ.	,,)	३४९ कड	(भ्वा.	,,	,,)
१७७	ऋजि	(,,	,,	,,)	२८२ कडि	(,,	आ.	,,)
१४६८	ऋण	(तु.	उ.	,,)	३६० कडि (पा.)	(,,	प.	,,)
१२४६	ऋधु	(दि.	प.	,,)	१५८३ कडि	(चु.	उ.	,,)
१२७२	ऋधु	(स्वा.	,,	,,)	४४९ कण	(भ्वा.	प.	,,)
१३१७	ऋन्फ	(तु.	,,	,,)	७९४ कण	(,,	,,	,,)
१३१६	ऋफ	(,,	,,	,,)	१७१६ कण	(चु.	उ.	,,)
१२८८	ऋषी	(,,	,,	,,)	३७ कन्थ	(भ्वा.	आ.	,,)
		ॠ			१९१६ कत्र	(चु.	उ.	,,)
१४९८	ॠ	(क्या.	,,	,,)	१८५२ कथ	(,,	,,	,,)
		ए			७० कदि	(भ्वा.	प.	,,)
१७९	एजृ	(भ्वा.	आ.	,,)	७७२ कदि	(,,	आ.	,,)
२३४	एजृ	(,,	प.	,,)	४६० कनी	(,,	प.	,,)
२६७	एठ	(,,	आ.	,,)	३७५ कपि	(,,	आ.	,,)
२	एध	(,,	,,	,,)	४४३ कमु	(,,	,,	,,)
६१८	एषृ	(,,	,,	,,)	२२८ कर्ज	(,,	प.	,,)
		ओ			१९२५ कर्ण (पा.)	(चु.	उ.	,,)
१२१	ओखृ	(भ्वा.	प.	,,)	१९१६ कर्त (पा.)	(,,	,,	,,)
४५४	ओणृ	(,,	,,	,,)	५९ कर्द	(भ्वा.	प.	,,)
१०१०	(ट्टु) ओ श्वि	(,,	,,	,,)	४२० कर्ब	(,,	,,	,,)
		क			५८१ कर्ब	(,,	,,	,,)
९०	कक	(भ्वा.	आ.	,,)	४९७ कल	(,,	आ.	,,)
९४	ककि	(,,	,,	,,)	१६०५ कल	(चु.	उ.	,,)
१२०	कख	(,,	प.	,,)	१८६६ कल	(,,	,,	,,)
७८४	कखे	(,,	,,	,,)	४९८ कल्ल	(भ्वा.	आ.	से.)

धातुः				
३८०	कवृ	(भ्वा.	आ.	से.)
१०२४	कश (पा.)	(अ.	,,	,,)
६८५	कष	(भ्वा.	प.	,,)
८६०	कस	(,,	,,	,,)
१०२४	कस (पा.)	(अ.	आ.	,,)
१०२४	कसि	(,,	,,	,,)
६६७	काक्षि	(भ्वा.	प.	,,)
१७०	काचि	(,,	आ.	,,)
१८८१	काल (पा.)	(चु.	उ.	,,)
६४७	काशृ	(भ्वा.	आ.	,,)
११६२	काश्ट	(दि.	,,	,,)
६२३	कासृ	(भ्वा.	,,	,,)
११०१	कि	(जु.	प.	अ.)
३०१	किट	(भ्वा.	,,	से.)
३१९	किट	(,,	,,	,,)
९९३	कित	(,,	,,	,,)
१३५४	किल	(तु.	,,	,,)
१६४१	कीट	(चु.	उ.	,,)
५२४	कील	(भ्वा.	प.	,,)
१०४२	कु	(अ.	,,	अ.)
९१	कुक	(भ्वा.	आ.	से.)
९५१	कुङ	(,,	,,	अ.)
१४०२	कुङ्	(तु	,,	,,)
१८४	कुच	(भ्वा.	प.	से.)
८५७	कुच	(,,	,,	,,)
१३६९	कुच	(तु.	,,	,,)
१९९	कुजु	(भ्वा.	,,	,,)
१३६७	कुट	(तु.	,,	,,)
१६९९	कुट (पा.)	(चु.	आ.	,,)
१५५९	कुट्ट	(,,	उ.	,,)
१७०३	कुट्ट	(,,	आ.	,,)
३४२	कुठि	(भ्वा.	प.	,,)
१५८५	कुठि (पा.)	(चु.	उ.	,,)
१३८४	कुड	(तु.	प.	,,)
३२२	कुडि	(भ्वा.	,,	,,)

धातुः				
१५८४	कुडि	(चु.	उ.	से.)
२७०	कुडि	(भ्वा.	आ.	,,)
१३३६	कुण	(तु.	प.	,,)
१८९४	कुण	(चु.	उ.	,,)
(१८९७	कुण	,,	,,	,,)
१५४०	कुद्रि	(,,	,,	,,)
१६९८	कुत्स	(,,	आ.	,,)
१११८	कुथ	(दि.	प.	,,)
१५१५	कुथ (पा.)	(कथा.	,,	,,)
४३	कुथि	(भ्वा.	,,	,,)
१८५	कुञ्च	(,,	,,	,,)
१५१५	कुन्थ	(कथा.	,,	,,)
१२३४	कुप	(दि.	,,	,,)
१७८०	कुप	(चु.	उ.	,,)
४२६	कुबि	(भ्वा.	प.	,,)
१६५६	कुबि	(चु.	उ.	,,)
१६५६	कुभि (पा.)	(,,	,,	,,)
१८७८	कुमार	(,,	,,	,,)
१३४२	कुर	(तु.	प.	,,)
२१	कुर्द	(भ्वा.	आ.	,,)
८४२	कुल	(,,	प.	,,)
१७६६	कुशि	(चु.	उ.	,,)
१५१९	कुष	(कथा.	प.	,,)
१२१९	कुस	(दि.	,,	,,)
१७६४	कुसि	(चु.	उ.	,,)
१७१२	कुस्म	(,,	आ.	,,)
१९०२	कुह	(,,	,,	,,)
२२३	कूज	(भ्वा.	प.	,,)
१७०२	कूट	(चु.	आ.	,,)
१८९१	कूढ	(,,	उ.	,,)
१६८९	कूण	(,,	आ.	,,)
५२५	कूल	(भ्वा.	प.	,,)
१२५४	कॄञ्	(स्वा.	उ.	अ.)
१४७३	(ङु) कॄञ्	(त.	,,	,,)
१३८३	कृड	(तु.	प.	से.)

धातुः				धातुः			
१४३६	कृती	(तु.	प. से.)	७२	क्रदि	(भ्वा.	प. से.)
१४४८	कृती	(रु.	,, ,,)	७७४	क्रदि	("	आ. ")
१८७०	कृप	(चु.	उ. ,,)	१६५९	क्रप	(चु.	उ. ")
७६२	कृपू	(भ्वा.	आ. वे.)	१२०८	क्रमु	(दि.	प. ")
१७४९	कृप्	(चु.	उ. से.)	१५	क्रिदि	(भ्वा.	आ. ")
५९८	कृवि	(भ्वा.	प. ,,)	७३	क्रिदि	("	प. ")
१२२८	कृश	(दि.	,, ,,)	१२४३	क्रिद्	(दि.	" वे.)
९९०	कृष	(भ्वा.	,, अ.)	११६१	क्रिश	("	आ. से.)
१२८७	कृष	(तु.	उ. अ.)	१५२३	क्रिश्	(क्रया.	प. ")
१४१०	कॄ	(,,	प. से.)	३८१	क्लीब्	(भ्वा.	आ. ")
१४९७	कॄ	(क्रया.	,, ,,)	९५८	क्लुड् (पा.)	("	" अ.)
१४८६	कॄञ्	(,,	उ. ,,)	६०७	क्लेश	("	" से.)
१६५४	कॄत	(चु.	,, ,,)	५०३	क्लॄ (पा.)	("	" ")
१८९६	केत	(,,	आ. ,,)	४५०	कण	("	प. ")
३६४	केपृ	(भ्वा.	,, ,,)	८४६	कथे	("	" ")
५३७	केल्	(,,	प. ,,)	७६९	क्षजि	("	आ. ")
९१६	कै	(,,	,, ,,)	१४६६	क्षणु	(त.	उ. ")
१११३	क्रमु	(दि.	,, ,,)	१९४२	क्षप	(चु.	" ")
१४८१	क्नूञ्	(क्रया.	उ. ,,)	८१६	क्षपिः (पा.)	(भ्वा.	प. ")
४८५	क्नूयी	(भ्वा.	आ. ,,)	१६२१	क्षपि	(चु.	उ. ")
५५५	क्मर	(भ्वा.	प. ,,)	१२०७	क्षमू	(दि.	प. वे.)
८०१	क्रथ	(,,	,, ,,)	४४२	क्षमूष्	(भ्वा.	आ. ")
७७३	क्रद (पा.)	("	आ. ")	८५१	क्षर	("	प. से.)
७१	क्रदि	("	प. ")	१५९८	क्षल	(चु.	उ. ")
७७३	क्रदि	("	आ. ")	२३६	क्षि	(भ्वा.	प. अ.)
७७१	क्रप	("	" ")	१२७७	क्षि	(स्वा.	" ")
४७३	क्रमु	("	प. ")	१४०८	क्षि	(तु.	" ")
१४७४	(डु) क्रीञ्	(क्रया.	उ. अ.)	१४६७	क्षिणु	(त.	उ. से.)
३५०	क्रीडृ	(भ्वा.	प. से.)	११२१	क्षिप	(दि.	प. अ.)
१३९५	क्रुड	(तु.	" ")	१२८६	क्षिप	(तु.	उ. ")
११९०	क्रुध	(दि.	" अ.)	२३७	क्षीज	(भ्वा.	प. से.)
१८६	क्रुन्व	(भ्वा.	" से.)	३८२	क्षीब्	("	आ. ")
८५६	क्रुश	("	" ")	५६७	क्षीबु	("	प. ")
८०२	क्रुथ	("	" ")	१५०७	क्षीष्	(क्रया.	" ")
७७३	क्लद (पा.)	("	आ. ")	१४४४	क्षुदिर्	(रु.	उ. अ.)

धातुः				
१०३६	(टु) क्षु	(अ.	प.	से.)
११९१	क्षुध	(दि.	”	अ.)
७५१	क्षुभ	(भ्वा.	आ.	से.)
१२४०	क्षुभ	(दि.	प.	”)
१५२०	क्षुभ	(कथा	”	”)
१३४५	क्षुर	(तु.	”	”)
५६८	क्षेतु	(भ्वा.	”	”)
९१३	क्षै	(”	”	”)
१८७६	क्षोट	(चु.	उ.	”)
१०३७	क्ष्णु	(अ.	प.	”)
४८६	क्ष्मार्या	(भ्वा.	आ.	”)
५२०	क्ष्मील	(”	प.	”)
७४४	(त्रि) ष्विदा	(पा.) (भ्वा.	आ.	”)
१२४५	” ष्विदा	(दि.	प.	”)
५३९	ष्वेल्ट	(भ्वा.	प.	”)
	ख			
१५३२	खच	(कथा.	प.	से.)
२३२	खज	(भ्वा.	”	”)
२३३	खजि	(”	”	”)
३०९	खट	(”	”	”)
१६३३	खट्ट	(चु.	उ.	”)
१५८१	खड	(”	”	”)
२८३	खडि	(भ्वा.	आ.	”)
१५८२	खडि	(चु.	उ.	”)
५०	खद	(भ्वा.	प.	”)
८७८	खनु	(”	उ.	”)
२२९	खर्ज	(”	प.	”)
६०	खर्द	(”	”	”)
४२१	खर्ब	(”	”	”)
५८२	खर्व	(”	”	”)
१५३२	खव (पा.)	(कथा.	”	”)
५४५	खल	(भ्वा.	”	”)
६८६	खष	(”	”	”)
४९	खाद	(”	”	”)
३०२	खिट	(”	”	”)

धातुः				
११७१	खिद	(दि.	आ.	अ.)
१४३७	खिद	(तु.	उ.	”)
१४५०	खिद	(रु.	आ.	”)
९५४	खुङ् (पा.)	(भ्वा.	”	”)
२००	खुजु	(”	प.	से.)
१३८९	खुड (पा.)	(तु.	”	”)
१५८६	खुडि	(चु.	उ.	”)
१३४३	खुर	(तु.	प.	”)
२२	खुर्द	(भ्वा.	आ.	”)
१८७५	खेट	(चु.	उ.	”)
५३८	खेल्	(भ्वा.	प.	”)
५०६	खेवृ (पा.)	(”	आ.	”)
९१२	खै	(”	प.	अ.)
१८७५	खोट (पा.)	(चु.	उ.	से.)
५५२	खोर्च्छ	(भ्वा.	प.	”)
५५१	खोल्	(”	”	”)
२०६०	ख्या	(अ.	”	अ.)
	ग			
२४६	गज	(भ्वा.	”	से.)
१६४८	गज	(चु.	उ.	”)
२४७	गजि	(भ्वा.	प.	”)
७७७	गड	(”	”	”)
६५	गडि	(”	”	”)
३६१	गडि	(”	”	”)
१८५४	गण	(चु.	उ.	”)
१८८३	गति (पा.)	(”	”	”)
५२	गद	(भ्वा.	प.	”)
१८६१	गदी	(चु.	उ.	”)
१६८५	गन्ध	(चु.	आ.	”)
९८२	गम्लृ	(भ्वा.	प.	अ.)
२२६	गर्ज	(”	”	से.)
१६६५	गर्ज (पा.)	(चु.	उ.	”)
५७	गर्द	(भ्वा.	प.	”)
१६६५	गर्द (पा.)	(चु.	उ.	”)
१६६५	गर्ध (पा.)	(”	”	”)

धातुः				धातुः			
४२२ गर्ब	(भ्वा.	प.	से.)	८९६ गुहू	(भ्वा.	उ.	वे.)
५८३ गर्व	("	"	")	१६९५ गूर	(चु.	आ.	से.)
१९०८ गर्व	(चु.	आ.	")	११५४ गूरी	(दि.	"	")
६३६ गर्ह	(भ्वा.	आ.	")	९३७ गृ	(भ्वा.	प.	अ.)
१८४६ गर्ह	(चु.	उ.	")	१७०८ गृ	(चु.	आ.	से.)
५४६ गल	(भ्वा.	प.	")	२४८ गृज	(भ्वा.	प.	")
१७०० गल	(चु.	आ.	")	२४९ गृजि	("	"	")
३९२ गल्भ	(भ्वा.	"	")	१२४७ गृधु	(दि.	"	")
६३७ गल्ह्	("	"	")	१९०० गृह	(चु.	आ.	")
१८८४ गवेष	(चु.	उ.	")	६५० गृह्	(भ्वा.	आ.	वे.)
११०६ गा	(जु.	प.	अ.)	१४११ गॄ	(तु.	प.	से.)
९५० गाङ्	(भ्वा.	आ.	")	१४९९ गॄ	(क्रया.	"	")
४ गाधृ	("	"	से.)	३६४ गेपृ	(भ्वा.	आ.	")
६४९ गाह्	("	"	वे.)	५०२ गेवृ	("	"	")
१४०० गु	(तु.	प.	अ.)	६१४ गेष्	("	"	")
९४९ गुङ्	(भ्वा.	आ.	अ.)	९१७ गै	(भ्वा.	प.	अ.)
१३७० गुज	(तु.	प.	से.)	१८७७ गोम	(चु.	उ.	से.)
२०३ गुजि	(भ्वा.	"	")	२५७ गोष्ट	(भ्वा.	आ.	")
१५८५ गुठि (पा.)	(चु.	उ.	")	३६ ग्रथि	("	"	")
१३७१ गुड	(तु.	प.	")	१५१४ ग्रन्थ	(क्रया.	प.	")
१५८५ गुडि	(चु.	उ.	")	१८२६ ग्रन्थ	(चु.	उ.	")
१८९५ गुण	("	"	")	१८३९ ग्रन्थ	("	"	")
२४ गुद	(भ्वा.	आ.	")	१७५० ग्रस	("	"	")
११२० गुध	(दि.	प.	")	६३० ग्रसु	(भ्वा.	आ.	")
१५१८ गुध	(क्रया.	"	")	१५३४ ग्रह	(क्रया.	उ.	")
१३१९ गुन्फ	(तु.	"	")	१८९३ ग्राम	(चु.	"	")
९७० गुप	(भ्वा.	आ.	")	१९७ ग्लुचु	(भ्वा.	प.	")
१२३५ गुप	(दि.	प.	")	६३१ ग्लसु	("	आ.	")
१७७२ गुप	(चु.	उ.	से.)	६५१ ग्लह	("	"	")
३९५ गुपू	(भ्वा.	प.	वे.)	१९८ ग्लुचु	("	प.	")
१३१८ गुफ	(तु.	"	से.)	२०१ ग्लुन्चु	("	"	")
१३९७ गुरी	("	आ.	")	३६६ ग्लेपृ	("	आ.	")
२३ गुर्द	(भ्वा.	"	")	५०३ ग्लेवृ	("	"	")
१६६६ गुर्द	(चु.	उ.	")	३७० ग्लेवृ	("	"	")
५७४ गुर्वी	(भ्वा.	प.	")	६१४ ग्लेषृ (पा.)	("	"	")

धातुः				धातुः			
९०३	ग्लै	(भ्वा.	प. अ.)	७८३	चक	(भ्वा.	प. से.)
	घ			१०७४	चकास्	(अ.	" ")
१५९	घघ	("	" से.)	१५९६	चक्क	(चु.	उ. ")
७६३	घट	("	आ. ")	१०१७	चक्षिङ्	(अ.	आ. ")
१७२४	घट	(चु.	उ. ")	१७२२	चट	(चु.	उ. ")
१७६७	घट	("	" ")	२९४	चेट (पा.)	(भ्वा.	प. ")
१७६८	घटि	("	" ")	२७८	चडि	("	आ. ")
२५९	घट्ट	(भ्वा.	आ. ")	७९६	चण	("	प. ")
१६३१	घट्ट	(चु.	उ. ")	८६५	चते	("	" ")
६५२	घप (पा.)	(भ्वा.	आ. ")	६८	चदि	("	" ")
७१५	घस्लृ	("	प. अ.)	८६६	चदे	("	उ. ")
४३४	घिणि	("	आ. से.)	१८४१	चन (पा.)	(चु.	" ")
९५२	घुङ्	("	" अ.)	१९०	चन्चु	(भ्वा.	प. ")
७४६	घुट	("	" से.)	३९९	चप	("	" ")
१३८६	घुट	(तु.	प. ")	१६२७	चप (पा.)	(चु.	उ. ")
४३७	घुण	(भ्वा.	आ. ")	१६२०	चपि	("	" ")
१३३९	घुण	(तु.	प. ")	४६९	चमु	(भ्वा.	प. ")
४३५	घुणि	(भ्वा.	आ. ")	१२७५	चमु	(खा.	" ")
१३४६	घुर	(तु.	प. ")	४७८	चय	(भ्वा.	आ. ")
६५२	घुषि	(भ्वा.	आ. ")	५५९	चर	("	प. ")
६५३	घुषिर्	("	प. ")	१७४६	चर	(चु.	उ. ")
१७२७	घुषिर्	(चु.	उ. ")	१०८१	चर्करीत	(अ.	आ. ")
४३८	घूर्ण	(भ्वा.	आ. ")	७१७	चर्च	(भ्वा.	प. ")
१३४०	घूर्ण	(तु.	प. ")	१७१३	चर्च	(चु.	उ. ")
११५५	घूरी	(दि.	आ. ")	१३००	चर्च	(तु.	प. ")
१६५१	घृ	(चु.	उ. ")	४२५	चर्ब	(भ्वा.	" ")
१०९६	घृ	(जु.	प. अ.)	५७९	चर्व	("	" ")
४३६	घृणि	(भ्वा.	आ. से.)	८३२	चल	("	" ")
१४७०	घृणु	(त.	उ. ")	१३५७	चल	(तु.	प. ")
७०८	घृषु	(भ्वा.	प. ")	१६०९	चल	(चु.	उ. ")
९२६	घ्रा.	("	" अ.)	८१२	चलिः	(भ्वा.	प. ")
	ङ			८८९	चष	("	उ. ")
९५४	ङुङ्	("	आ. ")	७२९	चह	("	प. ")
	च			१६२७	चह	(चु.	उ. ")
९३	चक	("	" से.)	१८६७	चह	("	" ")

धातुः					धातुः				
८८०	चायृ	(भ्वा.	उ.	से.)	१६४२	चूर्ण	(चु.	उ.	से.)
१७९५	चि	(चु.	,,	,,)	६७३	चूष	(भ्वा.	प.	,,)
१६३०	चित्र	(,,	,,	,,)	१३२५	चृती	(तु.	,,	,,)
१२५२	चित्र	(स्वा.	,,	अ.)	१८२१	चृप (पा.)	(चु.	उ.	,,)
३१५	चिट	(भ्वा.	प.	से.)	५३६	चेल्	(भ्वा.	प.	,,)
१६७४	चित	(चु.	आ.	,,)	२५६	चेष्ट	(,,	आ.	,,)
१५३६	चिति	(,,	उ.	,,)	१७४७	च्यु	(चु.	उ.	,,)
३९	चिती	(भ्वा.	प.	,,)	९५५	च्युद्	(भ्वा.	आ.	,,)
१९१८	चित्र	(चु.	उ.	,,)	४०	च्युतिर्	(,,	प.	,,)
१२७८	चिरि	(स्वा.	प.	,,)			छ		
१३५६	चिल	(तु.	,,	,,)	१६२२	छंज	(चु.	उ.	,,)
५३३	चिल्ल	(भ्वा.	,,	,,)	१८३४	छद	(,,	,,	,,)
१८२८	चीक	(चु.	उ.	,,)	१९३६	छद	(,,	,,	,,)
३८४	चीभृ	(भ्वा.	आ.	,,)	८१३	छंदिर्	(भ्वा.	प.	,,)
१७७५	चीव	(चु.	उ.	,,)	१५७८	छंद	(चु.	उ.	,,)
८७९	चीव्र	(भ्वा.	प.	,,)	४७०	छमु	(भ्वा.	प.	,,)
१५७९	चुक्क	(चु.	उ.	,,)	१५९०	छर्द	(चु.	उ.	,,)
५१३	चुच्य (पा.)	(भ्वा.	प.	,,)	८९०	छष	(भ्वा.	,,	,,)
१६१४	चुट	(चु.	उ.	,,)	१४४१	छिदिर्	(रु.	,,	अ.)
१३७८	चुट	(तु.	प.	,,)	१९२५	छिद्र	(चु.	,,	से.)
१५६१	चुट्ट	(चु.	उ.	,,)	१३७९	छुट	(तु.	प.	,,)
१६६०	चुटि	(,,	,,	,,)	१३८९	छुड (पा.)	(,,	,,	,,)
१३९३	चुड	(तु.	प.	,,)	१४१९	छुप	(,,	,,	अ.)
३२५	चुडि	(भ्वा.	,,	,,)	१३७३	छुर	(,,	,,	से.)
३४७	चुट्ट	(,,	,,	,,)	१८२१	छृप (पा.)	(चु.	उ.	,,)
१५९३	चुद	(चु.	उ.	,,)	१४४६	(उ) छृदिर	(रु.	,,	,,)
४०३	चुप	(भ्वा.	प.	,,)	१८२१	छृदी	(चु.	,,	,,)
४२९	चुबि	(,,	,,	,,)	१९३५	छेद	(,,	,,	,,)
१६३६	चुबि	(चु.	उ.	,,)	११४६	छो	(दि.	प.	अ.)
१५३५	चुर	(,,	,,	,,)			ज		
११५८	चुरी	(दि.	आ.	,,)	१०७१	जक्ष	(अ.	प.	से.)
१६३६	चुर्ब	(चु.	उ.	,,)	२४२	जज	(भ्वा.	,,	,,)
१६०३	चुल	(,,	,,	,,)	२४३	जजि	(,,	,,	,,)
५३१	चुल्ल	(भ्वा.	प.	,,)	३०५	जट	(,,	,,	,,)
१५५३	चूर्ण	(चु.	उ.	,,)	११०५	जन	(जु.	आ.	,,)

धातुः				धातुः			
११४९ जनी	(दि.	आ.	से.)	१८१५ जृ	(चु.	उ.	,,)
३९७ जप	(भ्वा.	प.	,,)	११३० जृष्	(दि.	प.	,,)
१७१७ जभि	(चु.	उ.	,,)	६४४ जेह	(भ्वा.	आ.	,,)
३८८ जभि	(भ्वा.	आ.	,,)	६१६ जेषृ	(,,	,,	,,)
४७१ जसु	(,,	प.	,,)	९१४ जै	(,,	प.	अ.)
७१६ जर्ज	(,,	,,	,,)	१६२५ ज्ञप	(चु.	उ.	से.)
१२९९ जर्ज	(तु.	,,	,,)	८११ ज्ञा	(भ्वा.	प.	अ.)
१५४४ जल	(भ्वा.	,,	,,)	१५०८ ज्ञा	(क्रया.	,,	,,)
८३३ जल	(चु.	उ.	,,)	१७३३ ज्ञा	(चु.	उ.	से.)
३९८ जल्प	(भ्वा.	प.	,,)	१५०० ज्या	(क्रया.	प.	अ.)
६८८ जष	(,,	,,	,,)	९५६ ज्युङ्	(भ्वा.	आ.	,,)
१६६७ जसि	(चु.	उ.	,,)	९४७ ज्रि	(,,	,,	,,)
१६६९ जसु	(,,	,,	,,)	१८१६ ज्रि	(चु.	उ.	से.)
१७१९ जसु	(,,	,,	,,)	७७६ ज्वर	(भ्वा.	प.	,,)
१२१२ जसु	(दि.	प.	,,)	८०४ ज्वल	(,,	,,	,,)
१०७२ जागृ	(अ.	,,	,,)	८३१ ज्वल	(,,	,,	,,)
५६१ जि	(भ्वा.	,,	अ.)		ञ		
९४६ जि	(,,	,,	,,)	३०६ झट	(,,	,,	,,)
१७९४ जि	(चु.	उ.	से.)	४७२ झमु	(,,	,,	,,)
५९४ जिवि	(भ्वा.	प.	,,)	१३०१ झर्झ	(तु.	,,	,,)
१२७९ जिरि	(स्वा.	,,	,,)	७१८ झर्झ	(भ्वा.	,,	,,)
६९७ जिषु	(भ्वा.	,,	,,)	६८९ झष	(,,	,,	,,)
५६२ जीव	(,,	,,	,,)	८९१ झष	(,,	उ.	,,)
१५७ जुगि	(,,	,,	से.)	१४९५ झृ (पा.)	(क्रया.	प.	,,)
१३८० जुट	(तु.	,,	,,)	११३१ झृष्	(दि.	,,	,,)
१३२७ जुड	(,,	,,	,,)		ट		
१६४७ जुड	(चु.	उ.	,,)	१६३९ टकि	(चु.	उ.	,,)
३२ जुतृ	(भ्वा.	आ.	,,)	८३४ टल	(भ्वा.	प.	,,)
१३२७ जुन (पा.)	(तु.	प.	,,)	१०३ टिक्ङ	(,,	आ.	,,)
१८३५ जुष	(चु.	उ.	,,)	१०४ टीक्ङ	(,,	,,	,,)
१२८९ जुषी	(तु.	आ.	,,)	८३५ टुल	(,,	प.	,,)
११५६ जूरी	(दि.	,,	,,)		ड		
६८१ जूष	(भ्वा.	प.	,,)	१६७७ डप	(चु.	आ.	,,)
३८९ जृभि	(,,	आ.	,,)	१६७२ डिप	(,,	,,	,,)
१४९५ जॄ	(क्रया.	प.	,,)	१६७८ डिप	(,,	,,	,,)

धातुः				धातुः			
१३७२	डिप	(तु.	प. से.)	१०३५	णु	(अ.	प. से.)
१२३३	डिप	(दि.	प. ,,)	१२८३	णुद	(तु.	उ. अ.)
९६८	डींङ्	(भ्वा.	आ. ,,)	१४२७	णुद	(,,	प. ,,)
११३५	डीङ्	(दि.	,, ,,)	१३९८	णू	(,,	,, से.)
	ढ			८७२	णेद	(भ्वा.	उ. ,,)
९८	ढौक्	(भ्वा.	,, ,,)	६१७	णेषृ	(,,	,, ,,)
	ण				त		
६६२	णक्ष	(,,	प. ,,)	११७	तक	(,,	प. ,,)
१३४	णख	(,,	,, ,,)	११८	तकि	(,,	,, ,,)
१३५	णखि	(,,	,, ,,)	६६५	तक्ष	(,,	,, ,,)
३१०	णट	(,,	,, ,,)	६५५	तक्षू	(,,	,, वे.)
७८१	णट	(,,	,, ,,)	१४९	तगि	(,,	,, से.)
५४	णद	(,,	,, ,,)	३०८	तट	(,,	,, ,,)
१७७९	णद	(चु.	उ. ,,)	१५८०	तड	(चु.	उ. ,,)
१५२१	णभ	(क्रया.	प. ,,)	१८०२	तड	(,,	,, ,,)
७५२	णभ	(भ्वा.	आ. ,,)	२८०	तडि	(भ्वा.	आ. ,,)
१२४१	णभ	(दि.	प. ,,)	१६७९	तत्रि	(चु.	,, ,,)
९८१	णम	(भ्वा.	,, अ.)	१४६४	तनु	(त.	उ. ,,)
४८०	णय	(,,	आ. से.)	१८४१	तनु	(चु.	,, ,,)
८३८	णल	(,,	प. ,,)	१९१	तन्चु	(भ्वा.	प. ,,)
११९५	णश	(दि.	,, ,,)	१४६०	तन्चु	(रु.	,, ,,)
६२७	णस	(भ्वा.	आ. ,,)	११५९	तप	(दि.	आ. अ.)
११६७	णह	(दि.	उ. अ.)	९८५	तप	(भ्वा.	प. ,,)
६२५	णासृ	(भ्वा.	आ. से.)	१८१९	तप	(चु.	उ. से.)
६५९	णेक्ष	(,,	प. ,,)	१२०३	तमु	(दि.	प. ,,)
१०२६	णिजि	(अ.	आ. ,,)	४७९	तय	(भ्वा.	आ. ,,)
१०९३	णिजिर्	(जु.	उ. अ)	१७८१	तर्क	(चु.	उ. ,,)
६६	णिदि	(भ्वा.	प. से.)	२२७	तर्ज	(भ्वा.	प. ,,)
८७१	णिद	(,,	उ. ,,)	१६८२	तर्ज	(चु.	आ. ,,)
५९०	णिवि	(,,	प. ,,)	५८	तर्द	(भ्वा.	प. ,,)
१३६१	णिल	(तु.	,, ,,)	१५९९	तल	(चु.	उ. ,,)
७२२	णिश	(भ्वा.	,, ,,)	१७३०	तसि	(,,	,, ,,)
१०२५	णिसि	(अ.	आ. ,,)	१२१३	तसु	(दि.	प. ,,)
९०१	णीञ्	(भ्वा.	उ. अ.)	४८९	तायृ	(भ्वा.	आ. ,,)
५६६	णीव	(,,	प. से.)	१२६७	तिक	(स्वा.	प. ,,)

धातुः				
१०५	तिक्क	(भ्वा.	आ.	से.)
१२६८	तिग	(स्वा.	प.	,,)
९७१	तिज	(भ्वा.	आ.	,,)
१६५३	तिज	(चु.	उ.	,,)
३६२	तिप्ल	(भ्वा.	आ.	अ.)
११२३	तिम	(दि.	प.	से.)
५३४	तिल	(भ्वा.	,,	,,)
१३५५	तिल	(तु.	,,	,,)
१६०८	तिल	(चु.	उ.	,,)
५३४	तिल्ल (पा.)	(भ्वा.	प.	,,)
१०६	तीक्क	(,,	आ.	,,)
१९१३	तीर	(चु.	उ.	,,)
५६५	तीव	(भ्वा.	प.	,,)
२४४	तुज	(,,	,,	,,)
१५६७	तुज (पा.)	(चु.	उ.	,,)
२४५	तुजि	(भ्वा.	प.	,,)
१५६७	तुजि	(चु.	उ.	,,)
१७५६	तुजि	(,,	,,	,,)
१३७७	तुट	(तु.	प.	,,)
१३८७	तुड	(,,	,,	,,)
२७६	तुडि	(भ्वा.	आ.	,,)
३५१	तुड्	(,,	प.	,,)
१३३३	तुण	(तु.	,,	,,)
१९४४	तुत्थ	(चु.	उ.	,,)
१२८२	तुद	(तु.	,,	अ.)
४०५	तुन्प	(भ्वा.	प.	से.)
१३११	तुन्प	(तु.	,,	,,)
४०९	तुन्फ	(भ्वा.	,,	,,)
१३१३	तुन्फ	(तु.	,,	,,)
४०४	तुप	(भ्वा.	,,	,,)
१३१०	तुप	(तु.	,,	,,)
४०८	तुफ	(भ्वा.	,,	,,)
१३१२	तुफ	(तु.	,,	,,)
१६५८	तुबि	(चु.	उ.	,,)
४२८	तुबि	(भ्वा.	प.	,,)

धातुः				
७५३	तुभ	(भ्वा.	आ.	से.)
१५२२	तुभ	(क्रया.	प.	,,)
१२४२	तुभ	(दि.	,,	,,)
११०२	तुर	(तु.	,,	,,)
५७०	तुर्वी	(भ्वा.	,,	,,)
१६००	तुल	(चु.	उ.	,,)
११८५	तुष	(दि.	प.	,,)
७१०	तुस	(भ्वा.	,,	,,)
७३७	तुहिर्	(,,	,,	,,)
३५१	तूड् (पा.)	(,,	,,	,,)
१६९०	तूण	(चु.	आ.	,,)
११५२	तूरी	(दि.	,,	,,)
५२७	तूल	(भ्वा.	प.	,,)
६७४	तूष	(,,	,,	,,)
१४६९	तृणु	(त.	उ.	,,)
१४४७	(उ) तृदिर्	(रु.	,,	,,)
१३०९	तृन्फ	(तु.	प.	,,)
११९६	तृप	(दि.	,,	,,)
१२७२	तृप (पा.)	(स्वा.	,,	,,)
१८२०	तृप	(चु.	उ.	,,)
१३०८	तृप	(तु.	प.	,,)
१३०८	तृफ (पा.)	(,,	,,	,,)
१२२९	(जि) तृषा	(दि.	,,	,,)
१४५६	तृह	(रु.	,,	,,)
१३४९	तृह	(तु.	,,	,,)
१३५१	तृन्ह	(,,	,,	वे.)
९६९	तृ	(भ्वा.	,,	से.)
२३१	तेज	(,,	,,	,,)
३६३	तेप्	(,,	आ.	,,)
४९९	तेव्	(,,	,,	,,)
९८६	त्यज	(,,	प.	अ.)
६६०	त्रक्ष	(,,	,,	से.)
९७	त्रकि	(,,	आ.	,,)
१५५	त्रख (पा.)	(,,	प.	,,)
६९	त्रदि	(,,	,,	,,)

धातुः				धातुः			
८१६ त्रपि (पा.)	(भ्वा.	प.	से.)	१०७३ दरिद्रा	(अ.	प.	से.)
३७४ त्रपूष	("	आ.	वे.)	१७५२ दल	(चु.	उ.	")
१७४२ त्रस	(चु.	उ.	मे.)	५४८ दल	(भ्वा.	प.	")
१७६२ त्रसि	("	"	")	८१६ दलि (पा.)	("	"	")
१११७ त्रसी	(दि.	प.	")	१६७५ दशि	(चु.	आ.	")
१५५ त्रिखि (पा.)	(भ्वा.	"	")	१७६५ दशि	("	उ.	")
१३७६ त्रुट	(तु.	"	")	१६७६ दंस (पा.)	("	आ.	")
१६९९ त्रुट	(चु.	आ.	")	१६७६ दंसि	("	"	")
४०७ त्रुन्प	(भ्वा.	प.	")	१७८७ दंसि	("	उ.	")
४११ त्रुन्फ	("	"	")	१२१४ दसु	(दि.	प.	")
४०६ त्रुप	("	"	")	९९१ दह	(भ्वा.	"	अ.)
४१० त्रुफ	("	"	")	१०९१ (दु) दाञ्	(जु.	उ.	")
९६५ त्रैङ्	("	आ.	अ.)	९३० दाण	(भ्वा.	प.	")
९९ त्रोक्	("	"	मे.)	९९४ दान	("	उ.	से.)
६५६ त्वक्ष	("	प.	वे.)	१०५९ दाप	(अ.	प.	अ.)
१५० त्वंग	("	"	मे.)	१२८० दाश	(स्वा.	प.	से.)
१३०२ त्वच	(तु.	"	")	८८२ दाश	(भ्वा.	उ.	")
१९२ त्वन्चु	(भ्वा.	"	")	८९४ दास्	("	"	")
७७५ (त्रि) त्वरा	("	आ.	")	५९२ दिवि	("	प.	")
१००१ त्विष	("	उ.	अ.)	११०७ दिवु	(दि.	"	")
५५४ त्सर	("	प.	मे.)	१७०७ दिवु	(चु.	आ.	")
	थ			१७२५ दिवु	("	उ.	")
१३८८ थुड	(तु.	"	")	१२८४ दिश	(तु.	"	अ.)
५७१ थुर्वी	(भ्वा.	"	")	१०९५ दिह	(अ.	"	")
	द			६०९ दीक्ष	(भ्वा.	आ.	से.)
६०८ दक्ष	("	आ.	")	११३४ दीङ्	(दि.	आ.	अ.)
७७० दक्ष	("	"	")	१०७६ दीर्घाङ्	(अ.	"	से.)
१२७४ दघ	(स्वा.	प.	")	११५० दीर्घी	(दि.	"	")
१९२७ दण्ड	(चु.	उ.	")	९४४ दु	(भ्वा.	प.	अ.)
१७ दद	(भ्वा.	आ.	")	१२५७ (दु) दु	(स्वा.	"	")
८ दध	("	"	")	१९३१ दुःख	(चु.	उ.	से.)
१२७१ दन्भु	(स्वा.	प.	")	१६०१ दुल	("	"	")
९८९ दन्श	(भ्वा.	"	अ.)	५७२ दुर्वी	(भ्वा.	प.	")
१२०४ दसु	(दि.	"	से.)	११८६ दुष	(दि.	"	अ.)
४८१ दय	(भ्वा.	आ.	")	१०१४ दुह	(अ.	उ.	")

धातुः				
७३८	दुहिर	(भ्वा.	प.	से.)
११३३	दूङ्	(दि.	आ.	,,)
१२८१	दृ	(स्वा.	,,	अ.)
१४१२	दृङ्	(तु.	,,	,,)
१३१५	दृन्फ	(,,	प.	से.)
११९७	दृप	(दि.	,,	अ)
१८२१	दृप (पा.)	(चु.	उ.	से.)
१३१४	दृप	(तु.	प.	,,)
१८२३	दृभ	(चु.	उ.	,,)
१३२४	दृभी	(तु.	प.	,,)
१८२२	दृभी	(चु.	उ.	,,)
९८८	दृशिर्	(भ्वा.	प.	अ.)
७३३	दृह	(,,	,,	से.)
७३४	दृहि	(,,	,,	,,)
८०८	दृ	(,,	,,	,,)
१४९४	दृ	(क्रया.	,,	,,)
९६२	देङ्	(,,	,,	अ.)
५००	देव्	(,,	,,	से.)
९२४	दैप्	(,,	प.	अ.)
११४८	दो	(दि.	प.	अ.)
१०४०	द्यु	(अ.	,,	,,)
७४१	द्युत	(भ्वा.	आ.	से.)
९०५	द्यै	(,,	प.	अ.)
४६६	द्रम	(,,	,,	से.)
१०५४	द्रा	(अ.	प.	अ.)
६७०	द्राक्षि	(भ्वा.	,,	से.)
१२४	द्राख्	(,,	,,	,,)
११४	द्राघ्	(,,	आ.	,,)
२८७	द्राड्	(,,	,,	,,)
६४६	द्राह्	(,,	,,	,,)
९४५	द्रु	(,,	प.	अ.)
१३३८	द्रुण	(तु.	,,	से.)
११९८	द्रुह	(दि.	,,	,,)
१४८२	द्रूञ्	(क्रया.	उ.	,,)
७८	द्रेक्	(भ्वा.	आ.	,,)

धातुः				
९०६	द्रै	(भ्वा.	प.	अ.)
१०१३	द्विष	(अ.	उ.	,,)
	ध			
१५९५	धक्क	(चु.	,,	से.)
४५३	धणि (पा.)	(भ्वा.	प.	,,)
११०४	धन	(जु.	,,	,,)
५९७	धवि	(भ्वा.	,,	,,)
१०९२	(डु) धाञ्	(जु.	उ.	अ.)
६०१	धावु	(भ्वा.	,,	से.)
१४०७	धि	(तु.	प.	अ.)
६०३	धिक्ष	(भ्वा.	आ.	से.)
५९३	धिवि	(,,	प.	,,)
११०३	धिष	(जु.	,,	,,)
११३६	धीङ्	(दि.	आ.	अ.)
६०२	धुक्ष	(भ्वा.	,,	से.)
१२५६	धुञ्	(स्वा.	उ.	अ.)
५७३	धुर्वी	(भ्वा.	प.	से.)
१३९९	धू	(तु.	,,	,,)
१२५६	धूञ् (पा.)	(स्वा.	उ.	,,)
१४८८	धूञ्	(क्रया.	,,	,,)
१८३६	धूञ्	(चु.	,,	,,)
३९६	धूप	(भ्वा.	प.	,,)
१७७३	धूप	(चु.	उ.	,,)
११५३	धूरी	(दि.	आ.	,,)
१६४०	धूश (पा.)	(चु.	उ.	,,)
१६४०	धूष (पा.)	(,,	,,	,,)
१६४०	धूस	(,,	,,	,,)
९३८	धृ	(भ्वा.	प.	,,)
९६०	धृङ्	(,,	आ.	अ.)
१४१३	धृङ्	(तु.	,,	,,)
२१९	धृज	(भ्वा.	प.	से.)
२२०	धृजि	(,,	,,	,,)
९००	धृञ्	(,,	उ.	अ.)
१८५१	धृष	(चु.	,,	से.)
१२७०	(ञि) धृषा	(स्वा.	प.	,,)

धातुः				धातुः			
१४९५ धृ (पा)	(क्रया.	प.	से.)	५६ नर्द	(भ्वा.	प.	से.)
१९१५ धेक	(चु.	उ.	")	१८०३ नल	(चु.	उ.	")
९०२ धेट्	(भ्वा.	प.	अ.)	६ नाथृ	(भ्वा.	आ.	")
५५३ धोर्ङ्	("	"	से.)	७ नाधृ	("	"	")
९२७ ध्मा	("	"	अ.)	१८८६ निवास	(चु.	उ.	")
९०८ ध्यै	("	"	")	६८७ निष्क	("	आ.	")
२१७ ध्रज	("	"	से.)	५२२ नील	(भ्वा.	प.	")
२१८ ध्रजि	("	"	")	१११६ नृती	(दि.	"	")
४५९ ध्रण	("	"	")	८०९ नृ	(भ्वा.	"	")
१५२५ (उ) ध्रस	(क्रया.	"	")	१४९६ नृ	(क्रया.	"	")
१७४३ (उ) ध्रस	(चु.	उ.	")		प		
६७१ ध्राक्षि	(भ्वा.	प.	")	१५५१ पक्ष	(चु.	उ.	")
१२५ ध्रास्व	("	"	")	२९६ पट	(भ्वा.	प.	")
२८८ ध्राड्	("	आ.	")	१७५३ पट	(चु.	उ.	")
११४ ध्राधृ (पा.)	("	"	")	१८५७ पट	("	"	")
९४३ ध्रु	("	प.	अ.)	३३० पठ	(भ्वा.	प.	")
१४०१ ध्रु	(तु.	"	")	२८१ पडि	("	आ.	")
१४०१ ध्रुव (पा.)	("	"	से.)	१६१६ पडि	(चु.	उ.	")
७९ ध्रेक्	(भ्वा.	आ.	")	९९६ (टु) पचष्	(भ्वा.	"	अ.)
९०७ ध्रै	("	प.	अ.)	१७४ पच्चि	("	आ.	से.)
२२१ ध्वज	("	"	से.)	१६५२ पचि	(चु.	उ.	")
२२२ ध्वजि	("	"	")	१५७७ पछि	("	"	")
४५३ ध्वण	("	"	")	४३९ पण	(भ्वा.	आ.	")
८१६ ध्वन	("	"	")	१८६२ पत	(चु.	उ.	,,)
८२८ ध्वन	("	"	")	८४५ पत्लृ	(भ्वा.	प.	,,)
१८९० ध्वन	(चु.	उ.	")	१५५५ पथ (पा.)	(चु.	उ.	,,)
८१६ ध्वनि (पा.)	(भ्वा.	प.	")	१५७६ पथि	(,,	,,	,,)
७५५ ध्वन्सु	(,,	आ.	")	८४७ पथे	(भ्वा.	प.	,,)
६७२ ध्वाक्षि	(,,	प.	")	११७० पद	(दि.	आ.	अ.)
९३९ ध्वृ	("	"	अ.)	१८९९ पद	(चु.	,,	से.)
	न			४४० पन	(भ्वा.	,,	,,)
१५९४ नक्क	(चु.	उ.	से.)	४७६ पय	(,,	,,	,,)
१५४६ नट	("	"	")	१९४० पर्ण	(चु.	उ.	,,)
१७९२ नट	("	"	")	२९ पर्द	(भ्वा.	आ.	,,)
६७ (टु) नदि	(भ्वा.	प.	")	४१२ पर्प	(,,	प.	,,)

धातुः				धातुः			
४१६ पर्ब	(भ्वा.	प.	से.)	१५६० पुट्ट	(चु.	उ.	से.)
५७७ पर्व	(,,	,,	,,)	१३८५ पुड	(तु.	प.	,,)
८३९ पल	(,,	,,	,,)	३२६ पुडि [पा.]	(भ्वा.	,,	,,)
१८८२ पल्पूल	(चु.	उ.	,,)	१३३४ पुण	(तु.	,,	,,)
१७२० पश	(,,	,,	,,)	१६३७ पुण [पा.]	(चु.	उ.	,,)
१८६३ पष	(,,	,,	,,)	१११९ पुथ	(दि.	प.	,,)
१६१७ पसि	(,,	,,	,,)	१७७६ पुथ	(चु.	उ.	,,)
९२५ पा	(भ्वा.	प.	अ.)	४४ पुथि	(भ्वा.	प.	,,)
१०५६ पा	(अ.	,,	,,)	१३४७ पुर	(तु.	,,	,,)
१९१२ पार	(चु.	उ.	से.)	५७६ पुर्व	(भ्वा.	,,	,,)
१६१० पाल	(,,	,,	,,)	८४१ पुल	(,,	,,	,,)
१४०६ पि	(तु.	प.	अ.)	१६०२ पुल	(चु.	उ.	,,)
१५७७ पिच्छ	(चु.	उ.	से.)	१६३७ पुल	(,,	,,	,,)
१५६८ पिज [पा.]	(,,	,,	,,)	७०० पुष	(भ्वा.	प.	,,)
१०२८ पिजि	(अ.	आ.	,,)	११८३ पुष	(दि.	,,	अ.)
१५६८ पिजि	(चु.	उ.	,,)	१५३० पुष	(क्रया.	,,	से.)
१७५८ पिजि	(,,	,,	,,)	१७५१ पुष	(चु.	उ.	,,)
३११ पिट	(भ्वा.	प.	,,)	११२२ पुष्प	(दि.	प.	,,)
३३९ पिठ	(,,	,,	,,)	१६३८ पुंस	(चु.	उ.	,,)
२७४ पिडि	(,,	आ.	,,)	१५९१ पुस्त	(,,	,,	,,)
१६७० पिडि	(चु.	उ.	,,)	९६६ पूङ्	(भ्वा.	आ.	,,)
५८८ पिवि	(भ्वा.	प.	,,)	१६४३ पूज	(चु.	उ.	,,)
१४३८ पिशि	(तु.	,,	,,)	१४८३ पूञ्	(क्रया.	,,	,,)
१४५३ पिष्लृ	(रु.	,,	अ.)	४८४ पूयी	(भ्वा.	आ.	,,)
१५६९ पिस	(चु.	उ.	से.)	११५१ पूरी	(दि.	,,	,,)
१७६३ पिसि	(,,	,,	,,)	१८०४ पूरी	(चु.	उ.	,,)
७१९ पिसृ	(भ्वा.	प.	,,)	१६३७ पूर्ण [पा.]	(,,	,,	,,)
११४१ पीङ्	(दि.	आ.	अ.)	५२८ पूल	(भ्वा.	प.	,,)
१५४५ पीड	(चु.	उ.	से.)	६७५ पूष	(,,	,,	,,)
५२१ पील	भ्वा.	प.	,, ,,	१०८६ पॄ [पा.]	(जु.	,,	अ.)
५६३ पीव	(,,	,,	,,)	१२५९ पॄ	(स्वा.	,,	,,)
१३६८ पुट	(तु.	,,	,,)	१४०३ पृङ्	(तु.	आ.	,,)
१७५४ पुट	(चु.	उ.	,,)	१८०८ पृच	(चु.	उ.	से.)
१९१४ पुट	(,,	,,	,,)	१०३० पृची	(अ.	आ.	,,)
१७९३ पुटि	(,,	,,	,,)	१४६३ पृची	(रु.	प.	,,)

धातुः				
१०२८	पृजि (पा.)	(अ.	आ.	से.)
१३२९	पृड	(तु.	प.	")
१३३०	पृण	("	"	")
१५५५	पृथ	(चु.	उ.	")
७०५	पृषु	(भ्वा.	"	")
१०८६	पॄ	(जु.	प.	")
१४९०	पॄ	(क्रया.	"	")
१५४९	पॄ	(चु.	उ.	")
४४१	पेलृ	(भ्वा.	प.	")
५०४	पेवृ	("	आ.	")
६१५	पेषृ	("	"	")
७२०	पेसृ	("	प.	")
९२०	पै	("	"	अ.)
४५८	पैणृ	("	"	से.)
४८८	(ओ) प्यायी	("	आ.	")
९६४	प्यैङ्	("	"	")
१४१४	प्रच्छ	(तु.	प.	अ.)
७६५	प्रथ	(भ्वा.	आ.	से.)
१५५४	प्रथ	(चु.	उ.	")
७६६	प्रस	(भ्वा.	आ.	")
१०६१	प्रा	(अ.	प.	अ.)
११४४	प्रीङ्	(दि.	आ.	")
१४७५	प्रीञ्	(क्रया.	उ.	अ.)
१८३७	प्रीञ्	(चु.	उ.	से.)
९५७	प्रुङ्	(भ्वा.	आ.	अ.)
३२४	प्रुड	("	प.	से.)
१५२८	प्लुष	(क्रया.	"	")
७०३	प्लुषु	(भ्वा.	"	")
६१९	प्लेषृ	("	आ.	")
८६७	प्लोथृ	("	उ.	")
६४२	ष्लिह	("	आ.	")
१५०४	ष्ली	(क्रया.	प.	अ.)
९५८	प्लुङ्	(भ्वा.	आ.	")
११११५	प्लुष	(दि.	प.	से.)
१२१७	प्लुष	("	"	")

धातुः				
१५२९	प्लुष	(क्रया.	प.	से.)
७०४	प्लुषु	(भ्वा.	"	")
१०५५	प्सा	(अ.	"	अ.)
	फ			
११६	फक्क	(भ्वा.	"	से.)
८२१	फण	("	"	")
५३०	फल	("	"	")
५१६	(नि) फला	("	"	")
१३९१	फुल	(तु.	"	")
५३२	फुल्ल	(भ्वा.	"	")
५४२	फेलृ	("	"	")
	ब			
४५९	बण (पा.)	("	"	")
५१	बद	("	"	")
९७३	बध	("	आ.	")
१५४८	बध	(चु.	उ.	")
१५४८	बन्ध (पा.)	("	"	")
१५०९	बन्ध	(क्रया.	प.	अ.)
४१८	बर्ब	(भ्वा.	"	से.)
६३८	बर्ह	("	आ.	")
१६६५	बर्ह	(चु.	उ.	")
१७७०	बर्ह	("	"	")
८४०	बल	(भ्वा.	प.	")
१६२९	बल	(चु.	उ.	")
६३९	बल्ह	(भ्वा.	आ.	")
१७७१	बल्ह	(चु.	उ.	")
२८६	बाड्	(भ्वा.	आ.	")
५	बाधृ	("	"	")
६४५	बाह	("	"	")
३१६	बिट	("	प.	")
६४	बिदि	("	"	")
१३६०	बिल	(तु.	"	")
१६०७	बिल	(चु.	उ.	")
११९	बुक्क	(भ्वा.	प.	")
१७१४	बुक्क	(चु.	उ.	")

धातुः				धातुः			
८५८ बुध	(भ्वा.	प.	से.)	६२४ भास्	(भ्वा.	आ.	से.)
११७३ बुध	(दि.	आ.	अ.)	६०६ भिक्ष	(,,	,,	,,)
८७५ बुधिर्	(भ्वा.	उ.	से.)	६४ भिदि (पा.)	(,,	प.	,,)
१५९२ बुस्त	(चु.	प.	,,)	१४४० भिदिर्	(रु.	उ.	अ.)
७३५ बृह	(भ्वा.	,,	,,)	१०८४ (जि) भी	(जु.	प.	,,)
७३६ बृहि	(,,	,,	,,)	१४५५ भुज	(रु.	,,	से.)
१७६९ बृहि	(चु.	उ.	,,)	१४१८ भुजो	(तु.	,,	,,)
७३६ बृहिर् (पा.)	(भ्वा.	प.	,,)	१७४८ भुवः	(चु.	उ.	,,)
१३४८ बृहू (पा.)	(तु.	,,	,,)	१ भू	(भ्वा.	प.	,,)
१०४४ ब्रूञ्	(अ.	उ.	,,)	१८४५ भू	(चु.	आ.	,,)
१६६४ ब्रूस	(चु.	,,	,,)	६८२ भूष	(भ्वा.	प.	,,)
	भ			१७३१ भूष	(चु.	उ.	,,)
१५५८ भक्ष	(,,	,,	,,)	१७८ भृजी	(भ्वा.	आ.	,,)
९९८ भज	(भ्वा.	,,	अ.)	८९८ भृञ्	(,,	उ.	अ.)
१७३४ भज	(चु.	,,	से.)	१०८७ (डु) भृञ्	(जु.	,,	,,)
१७६० भजि	(,,	,,	,,)	१३९६ भृड	(तु.	प.	से.)
३०७ भट	(भ्वा.	प.	,,)	१७८८ भृशि	(चु.	उ.	,,)
७८० भट	(,,	,,	,,)	१२२५ भृशु	(दि.	प.	,,)
२७३ भडि	(,,	आ.	,,)	१४९२ भृ	(क्रया.	,,	,,)
१५८९ भडि	(चु.	उ.	,,)	८८३ भेषृ	(भ्वा.	उ.	,,)
४४७ भण	(भ्वा.	प.	,,)	६२८ भ्यस	(,,	आ.	,,)
१२ भदि	(,,	आ.	,,)	८९२ भ्रक्ष	(,,	उ.	,,)
१४५४ भन्जो	(रु.	प.	,,)	४५२ भ्रण	(,,	प.	,,)
१६८३ भर्त्स	(चु.	आ.	,,)	७५६ भ्रन्शु (पा.)	(,,	आ.	,,)
५८० भर्व	(भ्वा.	प.	,,)	१२२६ भ्रन्शु	(दि.	प.	,,)
४९५ भल	(,,	आ.	,,)	७५६ भ्रन्सु	(भ्वा.	आ.	,,)
१७०१ भल	(चु.	,,	,,)	८५० भ्रमु	(,,	प.	,,)
४९६ भल्ल	(भ्वा.	,,	,,)	१२०६ भ्रमु	(दि.	,,	,,)
६९५ भष	(,,	प.	,,)	१२८५ भ्रस्ज	(तु.	उ.	अ.)
११०० भस	(जु.	,,	,,)	१८१ भ्राजृ	(भ्वा.	आ.	से.)
१०५१ भा	(अ.	प.	अ.)	८२३ (टु) भ्राजृ	(,,	,,	,,)
१८८७ भाज	(चु.	उ.	से.)	८२४ (टु) भ्राश्च	(,,	,,	,,)
४४१ भाम	(भ्वा.	आ.	,,)	१५०६ भ्री	(क्रया.	प.	अ.)
१८७३ भाम	(चु.	उ.	,,)	१६९१ भ्रूण	(चु.	आ.	से.)
६१२ भाष	(भ्वा.	आ.	,,)	१८० भ्रेजृ	(भ्वा.	आ.	,,)

धातुः				धातुः			
८८४ भ्रेषृ	(भ्वा.	उ.	से.)	४९३ मल	(भ्वा.	आ.	से.)
८९३ भ्लक्ष	(,,	,,	,,)	४९४ मल्ल	(,,	,,	,,)
८२५ [टु] भ्लाश्ट	(,,	आ.	,,)	५९९ मव	(,,	प.	,,)
८८५ भ्लेषृ	(,,	उ.	,,)	५०८ मव्य	(,,	,,	,,)
	म			७२४ मश	(,,	,,	,,)
८९ मकि	(,,	आ.	,,)	६९२ मष	(,,	,,	,,)
१३२ मख	(,,	प.	,,)	१२२२ मसी	(दि.	,,	,,)
१३३ मखि	(,,	,,	,,)	१०२ मस्क	(भ्वा.	आ.	,,)
१४८ मगि	(,,	,,	,,)	१४१६ (टु) मस्जो	(तु.	प.	अ.)
१११ मघि	(,,	आ.	,,)	७३० मह	(भ्वा.	,,	से.)
१६० मघि	(,,	प.	,,)	१८९८ मह	(चु.	उ.	,,)
१७१ मच	(,,	आ.	,,)	६३४ महि	(भ्वा.	आ.	,,)
१७३ मचि	(,,	,,	,,)	१८०० महि	(चु.	उ.	,,)
३३२ मठ	(,,	प.	,,)	१०६२ मा	(अ.	प.	अ.)
२६३ मठि	(,,	आ.	,,)	६६९ माक्षि	(भ्वा.	,,	से.)
२७२ मडि	(,,	,,	,,)	१०८८ माङ्	(जु.	आ.	अ.)
३२१ मडि	(,,	प.	,,)	११४२ माङ्	(दि.	,,	,,)
१५८८ माडे	(चु.	उ.	,,)	९७२ मान	(भ्वा.	,,	से.)
४४८ मण	(भ्वा.	प.	,,)	१७१० मान	(चु.	आ.	,,)
१६८० मत्रि	(चु.	आ.	,,)	१८४४ मान	(,,	उ.	,,)
४६ मथि	(भ्वा.	प.	,,)	१८४७ मार्ग	(,,	,,	,,)
८४८ मथे	(,,	,,	,,)	१६४९ मार्ज	(,,	,,	,,)
१७०६ मद	(चु.	आ.	,,)	८९५ माह	(भ्वा.	,,	,,)
१३ मदि	(भ्वा.	,,	,,)	१२९८ मिछ	(तु.	प.	,,)
८१५ मदी	(,,	प.	,,)	१७५७ मिजि	(चु.	उ.	,,)
१२०९ मदी	(दि.	,,	,,)	१२५१ (डु) मिञ्	(स्वा.	,,	अ.)
११७७ मन	(दि.	आ.	अ.)	८६८ मिधृ [पा.]	(भ्वा.	,,	से.)
१४७२ मनु	(त.	,,	से.)	७४३ (श्नि) मिदा	(,,	आ.	,,)
४२ मन्थ	(भ्वा.	प.	,,)	१२४४ (श्नि) मिदा	(दि.	प.	,,)
१५१२ मन्थ	(क्रया.	आ.	,,)	१५४२ मिदि	(चु.	उ.	,,)
५५८ मभ्र	(भ्वा.	प.	,,)	८६८ मिद्द	(भ्वा.	,,	,,)
४७७ मय	(,,	आ.	,,)	८६८ मिधृ [पा.]	(,,	,,	,,)
१६५० मर्च	(चु.	उ.	,,)	१३६५ मिल	(तु.	प.	,,)
४१९ मर्ब	(भ्वा.	प.	,,)	१४३० मिल	(रु.	उ.	,,)
५७८ मर्व	(,,	,,	,,)	५८९ मिवि	(भ्वा.	प.	,,)

धातुः					धातुः				
७२३	मिश	(भ्वा.	प.	से.)	१६०४	मूल	(चु.	उ.	से.)
१९२२	मिश्र	(चु.	उ.	,,)	६७६	मूष	(भ्वा.	प.	,,)
१३५३	मिष	(तु.	प.	,,)	६६४	मृक्ष	(,,	,,	,,)
६९९	मिषु	(भ्वा.	,,	,,)	१९०१	मृग	(चु.	आ.	,,)
९९२	मिह	(,,	,,	अ.)	१४०४	मृङ्	(तु.	,,	अ.)
१८२५	मी	(चु.	उ.	से.)	१८४९	मृजू	(चु.	उ.	से.)
११३७	मीङ्	(दि.	आ.	अ.)	१०६६	मृजू	(अ.	प.	वे.)
१४७७	मीञ्	(क्रया.	उ.	,,)	१३२८	मृड	(तु.	,,	से.)
४६८	मीमृ	(भ्वा.	प.	से.)	१५१७	मृड	(क्रया.	,,	,,)
५१७	मील	(,,	,,	,,)	१३३२	मृण	(तु.	,,	,,)
५६४	मीव	(,,	,,	,,)	१५१६	मृद	(क्रया.	,,	,,)
१७४४	मुच	(चु.	उ.	,,)	८७४	मृधु	(भ्वा.	उ.	,,)
१७२	मुचि	(भ्वा.	आ.	,,)	१४२६	मृश	(तु.	प.	अ.)
१४३१	मुच्लृ	(तु.	उ.	अ.)	११६४	मृष	(दि.	उ.	से.)
२५०	मुज	(भ्वा.	प.	से.)	१८५०	मृष	(चु.	,,	,,)
२५१	मुजि	(,,	,,	,,)	७०७	मृषु	(भ्वा.	प.	,,)
१३७५	मुट	(तु.	,,	,,)	१४९३	मृ	(क्रया.	,,	,,)
१६१५	मुट	(चु.	उ.	,,)	९६१	मेङ्	(भ्वा.	आ.	,,)
२६५	मुठि	(भ्वा.	आ.	,,)	८६९	मेथृ (पा.)	(,,	उ.	,,)
३२३	मुड	(,,	प.	,,)	८६९	मेद	(,,	,,	,,)
२७५	मुडि	(,,	आ.	,,)	८७०	मेधृ	(,,	,,	,,)
३२६	मुडि	(,,	प.	,,)	८६९	मेधृ (पा.)	(,,	,,	,,)
१३३५	मुण	(तु.	,,	,,)	३७१	मेपृ	(,,	आ.	,,)
१६	मुद	(भ्वा.	आ.	,,)	५०५	मेवृ	(,,	,,	,,)
१७४१	मुद	(चु.	उ.	,,)	९२९	म्ना	(,,	प.	अ.)
१३४४	मुर	(तु.	प.	,,)	६६४	म्रक्ष (पा.)	(,,	,,	से.)
२१२	मुर्छा	(भ्वा.	,,	,,)	१६६२	म्रक्ष	(चु.	उ.	,,)
५७५	मुर्वी	(,,	,,	,,)	७६७	म्रद	(भ्वा.	आ.	,,)
१५३१	मुष	(क्रया.	,,	,,)	१९५	म्रुचु	(,,	प.	,,)
१२२१	मुस	(दि.	,,	,,)	१९३	म्रुन्चु	(,,	,,	,,)
१६३२	मुस्त	(चु.	उ.	,,)	२९३	म्रेडृ	(,,	,,	,,)
११९९	मुह	(दि.	प.	वे.)	१९६	म्लुचु	(,,	,,	,,)
९६७	मूङ्	(भ्वा.	आ.	से.)	१९४	म्लुन्चु	(,,	,,	,,)
१९१०	मूत्र	(चु.	उ.	,,)	२०५	म्लेच्छ	(,,	,,	,,)
५२९	मूल	(भ्वा.	प.	,,)	१६६३	म्लेच्छ	(चु.	उ.	,,)

धातुः				धातुः			
२९२ म्लेटृ	(भ्वा.	प.	से.)	१७३८ रग (पा.)	(चु.	उ.	से.)
५०६ म्लेच्छ	(,,	आ.	,,)	१४४ रगि	(भ्वा.	प.	,,)
९०४ म्लै	(,,	प.	अ.)	७८५ रगे	(,,	,,	,,)
	य			१७३८ रघ (पा.)	(चु.	उ.	,,)
१६९३ यक्ष	(चु.	आ.	से.)	१०७ रघि	(भ्वा.	आ.	,,)
१००२ यज	(भ्वा.	उ.	अ.)	१७९६ रघि	(चु.	उ.	,,)
१७३६ यत	(चु.	,,	से.)	१८६५ रच	(,,	,,	,,)
३० यती	(भ्वा.	आ.	,,)	२९७ रट	(भ्वा.	प.	,,)
१५३७ यत्रि	(चु.	उ.	,,)	३३४ रट	(,,	,,	,,)
९८० यभ	(भ्वा.	प.	अ.)	३३४ रठ (पा.)	(,,	,,	,,)
९८४ यम	(,,	,,	,,)	४४५ रण	(,,	,,	,,)
८१९ यमः	(,,	,,	से.)	७९५ रण	(,,	,,	,,)
१६२६ यम	(चु.	उ.	,,)	८१६ रणि (पा.)	(,,	,,	,,)
१२११ यसु	(दि.	प.	से.)	५३ रद	(,,	,,	,,)
१०४९ या	(अ.	,,	अ.)	११९४ रध	(दि.	,,	वे.)
८६३ (टु) याचृ	(भ्वा.	उ.	से.)	९९९ रञ्ज	(भ्वा.	उ.	अ.)
१०३३ यु	(अ.	प.	,,)	११६८ रन्ज	(दि.	,,	,,)
१७११ यु	(चु.	आ.	,,)	४०१ रप	(भ्वा.	प.	से.)
१५६ युगि	(भ्वा.	प.	,,)	४१३ रफ	(,,	,,	,,)
२१४ युछ	(,,	,,	,,)	४१४ रफि	(,,	,,	,,)
११७८ युज	(दि.	आ.	अ.)	३७६ रबि	(,,	आ.	,,)
१८०७ युज	(चु.	उ.	से.)	९७४ रभ	(,,	आ.	अ.)
१४४५ युजिर्	(रु.	,,	अ.)	३८५ रभि (पा.)	(,,	,,	से.)
१४८० युज्	(क्रया.	,,	,,)	८५३ रमु	(,,	,,	अ.)
३१ युतृ	(भ्वा.	आ.	से.)	४८२ रय	(,,	,,	से.)
११७४ युध	(दि.	,,	अ.)	५९६ रवि	(,,	प.	,,)
१२३६ युप	(,,	प.	से.)	७१३ रस	(,,	प.	,,)
१२१६ युस (पा.)	(,,	,,	,,)	१९३२ रस	(चु.	उ.	,,)
६८० यूष	(भ्वा.	,,	,,)	७३१ रह	(भ्वा.	प.	,,)
२९१ यौटृ	(,,	,,	,,)	१६२८ रह	(चु.	उ.	,,)
	र			१८५९ रह	(,,	,,	,,)
१७३७ रक	(चु.	उ.	,,)	७३२ रहि	(भ्वा.	प.	,,)
६५८ रक्ष	(भ्वा.	प.	,,)	१७९९ रहि	(चु.	उ.	,,)
१३६ रख	(,,	,,	,,)	१०५७ रा	(अ.	प.	अ.)
१३७ रखि	(,,	,,	,,)	१२२ राखृ	(भ्वा.	,,	से.)

धातुः				धातुः			
११२ राधृ	(भ्वा.	आ.	से.)	१२३७ रुप	(दि.	प.	से.)
८२२ राजृ	("	उ.	")	१४२० रुश	(तु.	"	अ.)
११८१ राधः	(दि.	प.	अ.)	१७८९ रुशि	(चु.	उ.	से.)
१२६३ राध	(स्वा.	"	")	६९३ रुष	(भ्वा.	प.	")
६२६ रास्	(भ्वा.	आ.	")	१२३१ रुष	(दि.	"	")
१४०५ रि	(तु.	प.	अ.)	१६७१ रुष	(चु.	उ.	")
१२७६ रि	(स्वा.	"	")	१७९१ रुसि	("	"	")
१५५ रिख (पा.)	(भ्वा.	"	से.)	८५९ रुह	(भ्वा.	प.	अ.)
१५४ रिगि	("	"	")	१९११ रूक्ष	(चु.	उ.	से.)
१८१७ रिच	(चु.	उ.	")	१९३४ रूप	("	"	")
१४४२ रिचिर्	(रु.	"	अ.)	६७८ रूष	(भ्वा.	प.	")
१३०७ रिफ	(तु.	प.	से.)	८० रेकृ	("	आ.	")
५९५ रिवि	(भ्वा.	"	")	८६४ रेटृ	("	उ.	")
१४२१ रिश	(तु.	"	अ.)	३७२ रेपृ	("	आ.	")
६९४ रिष	(भ्वा.	"	से.)	३८५ रेभृ	("	"	")
१२३२ रिष	(दि.	"	")	५०७ रेवृ	("	"	")
१३०७ रिह (पा.)	(तु.	"	")	६२० रेषृ	("	"	")
१५०१ री	(क्रया.	"	अ.)	९०९ रै	("	प.	अ.)
११३८ रीङ्	(दि.	आ.	")	३५६ रोडृ	("	"	से.)
१०३४ रु	(अ.	प.	से.)	३५५ रौडृ	("	"	")
९५९ रुङ्	(भ्वा.	आ.	")	ल			
७४५ रुच	("	"	")	१६९७ लक्ष	(चु.	आ.	")
१८०५ रुज	(चु.	उ.	")	१५३९ लक्ष	("	उ.	")
१४१७ रुजो	(तु.	प.	अ.)	१३८ लख	(भ्वा.	प.	")
७४७ रुट	(भ्वा.	आ.	से.)	१३९ लखि	("	"	")
१६७१ रुट (पा.)	(चु.	उ.	")	१७३८ लग	(चु.	उ.	")
१७८४ रुट	("	"	")	१४५ लगि	(भ्वा.	प.	")
३२७ रुटि	(भ्वा.	प.	")	७८६ लगे	("	"	")
३३६ रुठ	("	"	")	१०८ लघि	("	आ.	")
३२७ रुठि (पा.)	("	"	")	१७६१ लघि	(चु.	उ.	")
३४५ रुठि	("	"	")	१७९७ लघि	("	"	")
३२७ रुडि (पा.)	("	"	")	२०६ लछ	(भ्वा.	प.	")
१०६७ रुदिर्	(अ.	"	")	२३८ लज	("	"	")
११७५ (अनो) रुध	(दि.	आ.	अ.)	१५४४ लज (पा.)	(चु.	उ.	")
१४३९ रुधिर्	(रु.	उ.	")	१९२१ लज	("	"	")

धातुः					धातुः				
२३९	लजि	(भ्वा.	प.	से.)	१०१६	लिह	(अ.	उ.	अ.)
१५६७	लजि (पा.)	(चु.	उ.	,,)	१८१२	ली	(चु.	,,	,,)
१७८५	लजि	(,,	,,	,,)	१५०२	ली	(क्रया.	प.	,,)
१९२१	लजि (पा.)	(,,	,,	,,)	११३९	लीङ्	(दि.	आ.	,,)
१२९१	(ओ) लजी	(तु.	आ.	,,)	१५६८	लुजि (पा.)	(चु.	उ.	से.)
२९८	लट	(भ्वा.	प.	,,)	१७५९	लुजि	(,,	,,	,,)
३५९	लड	(,,	,,	,,)	३१४	लुट	(भ्वा.	प.	,,)
१५४१	लड	(चु.	उ.	,,)	७४८	लुट	(,,	आ.	,,)
८१४	लडि	(भ्वा.	प.	,,)	१३८२	लुट	(तु.	प.	,,)
१८०१	लडि	(चु.	उ.	,,)	१७५५	लुट	(चु.	उ.	,,)
१५४३	(ओ) लडि	(,,	,,	,,)	३२८	लुटि	(भ्वा.	प.	,,)
४०२	लप	(भ्वा.	प.	,,)	३३७	लुठ	(,,	,,	,,)
३७७	लबि	(,,	आ.	,,)	७४९	लुठ	(,,	आ.	,,)
३७९	लबि	(,,	,,	,,)	१२२३	लुठ	(दि.	प.	,,)
९७५	(डु) लभष्	(,,	,,	अ.)	३२८	लुठि (पा.)	(भ्वा.	,,	,,)
४१७	लर्ब	(,,	प.	से.)	३४३	लुठि	(,,	,,	,,)
३५९	लल (पा.)	(,,	,,	,,)	३४६	लुठि	(,,	,,	,,)
१६८८	लल	(चु.	आ.	,,)	३१४	लुड (पा.)	(,,	,,	,,)
८८८	लष	(भ्वा.	उ.	,,)	३२८	लुडि (पा.)	(,,	,,	,,)
७१४	लस	(,,	प.	,,)	१५६४	लुण्ठ	(चु.	उ.	,,)
१७२९	लस	(चु.	उ.	,,)	४५	लुथि	(भ्वा.	प.	,,)
१२९२	(ओ) लस्जी	(तु.	आ.	,)	१८७	लुन्च	(,,	,,	,,)
१०५८	ला	(अ.	प.	अ.)	१२३८	लुप	(दि.	,,	,,)
१२३	लाखृ	(भ्वा.	,,	से.)	१४३२	लु	(तु.	उ.	अ.)
११३	लाधृ	(,,	आ.	,,)	४२७	लुबि	(भ्वा.	प.	से.)
२०७	लाछ	(,,	प.	,,)	१६५७	लुबि	(चु.	उ.	,,)
२४०	लाज	(,,	,,	,,)	१२३९	लुभ	(दि.	प.	,,)
२४१	लाजि	(,,	,,	,,)	१३०६	लुभ	(तु.	,,	,,)
१९३७	लाभ	(चु.	उ.	,,)	१४८४	लूञ्	(क्रया.	उ.	,,)
१३६६	लिख	(तु.	प.	,,)	६७७	लूष	(भ्वा.	प.	,,)
१५५	लिगि	(भ्वा.	,,	,,)	१६११	लूष	(चु.	उ.	,,)
१७४०	लिगि	(चु.	उ.	,,)	३७३	लेपृ	(भ्वा.	आ.	,,)
१४३४	लिप	(तु.	,,	अ.)	७६	लोकृ	(,,	,,	,,)
११८०	लिश	(दि.	आ.	,,)	१७७७	लोकृ	(चु.	उ.	,,)
१४२२	लिश	(तु.	प.	,,)	१६४	लोचृ	(भ्वा.	आ.	,,)

धातुः					धातुः				
१७७८	लोचृ	(चु.	उ.	से.)	१७०४	वन्चु	(चु.	आ.	से.)
३५७	लोडृ	(भ्वा.	प.	")	१००३	(डु) वप्	(भ्वा.	उ.	अ.)
२५८	लोष्ट	("	आ.	")	५५७	वभ्र	("	प.	से.)
		व			८४९	(ढु) वम्	("	"	")
६६३	वक्ष	("	प.	")	४७५	वय	("	आ.	")
८८	वकि	("	आ.	")	१८५३	वर	(चु.	उ.	")
९५	वकि	("	"	")	१६२	वर्च	(भ्वा.	आ.	")
१३०	वख	("	प.	")	१५५२	वर्ण	(चु.	उ.	")
१३१	वखि	("	"	")	१९३९	वर्ण	("	"	")
१४७	वगि	("	"	")	१६५५	वर्ध	("	"	")
११०	वधि	("	आ.	")	६१३	वर्ष	(भ्वा.	आ.	")
१०६३	वच	(अ.	प.	अ.)	६४०	वर्ह	("	"	")
१८४३	वच	(चु.	उ.	से.)	४९१	वल	("	"	")
२५२	वज	(भ्वा.	प.	")	८१६	वलि (पा.)	("	प.	")
१६१८	वज	(चु.	उ.	")	१५७२	वल्क	(चु.	उ.	")
७७९	वट	(भ्वा.	प.	")	१९१७	वल्क	("	"	")
१८५८	वट	(चु.	उ.	")	१४३	वल्ग	(भ्वा.	प.	")
१९२०	वट	("	"	")	३९१	वल्भ	("	आ.	")
३००	वट	(भ्वा.	आ.	")	४९२	वल्ल	("	"	")
१५८७	वटि	(चु.	उ.	")	६४१	वल्ह	("	"	")
१९२०	वटि (पा.)	("	"	")	१०८०	वश	(अ.	प.	")
३३१	वठ	(भ्वा.	प.	")	६९१	वष	(भ्वा.	"	")
२६२	वठि	("	आ.	")	१००५	वस	("	"	अ.)
२७१	वडि	("	"	")	१०२३	वस	(अ.	आ.	")
१५८७	वडि (पा.)	(चु.	उ.	")	१७४५	वस	(चु.	उ.	से.)
४४६	वण	(भ्वा.	प.	")	१९४३	वस	("	"	अ.)
१००९	वद	("	"	")	१२१५	वसु	(दि.	प.	से.)
१८४२	वद	(चु.	उ.	")	१०१	वस्क	(भ्वा.	आ.	")
११	वदि	(भ्वा.	आ.	")	१६८४	वस्त	(चु.	"	")
४६२	वन	("	प.	")	१००४	वह	(भ्वा.	उ.	अ.)
४६३	वन	("	"	")	६३३	वहि	("	आ.	")
८०३	वन	("	"	")	१०५०	वा	(अ.	प.	")
८०३	वनु (पा.)	("	"	")	६६८	वाक्षि	(भ्वा.	"	से.)
१४७१	वनु	(त.	आ.	")	२०८	वाछि	("	"	")
१८९	वन्चु	(भ्वा.	प.	")	१८८३	वात	(चु.	उ.	")

धातुः				धातुः			
११६३	वाश्ट	(दि.	आ. से.)	१४६२	वृजी	(रु.	प. से.)
१८८५	वास	(चु.	उ. ”)	१८१३	वृजी	(चु.	उ. ”)
१४२४	विच्छ	(तु.	प. ”)	१२५५	वृञ्	(स्वा.	” ”)
१७७४	विच्छ	(चु.	उ. ”)	१८१४	वृञ्	(चु.	उ. ”)
१४४३	विचिर्	(रु.	” अ.)	१३३१	वृण	(तु.	प. ”)
१०९४	विजिर्	(जु.	” ”)	७५८	वृतु	(भ्वा.	आ. से.)
१२९०	(ओ) विजी	(तु.	आ. से.)	११६०	वृतु	(दि.	” ”)
१४६१	(ओ) विजी	(रु.	प. ”)	१७८२	वृतु	(चु.	उ. ”)
३१७	विट	(भ्वा.	” ”)	७५९	वृधु	(भ्वा.	आ. ”)
३३	विथृ	(”	आ. ”)	१७८३	वृधु	(चु.	उ. ”)
१०६४	विद	(अ.	प. ”)	१२२७	वृश	(दि.	प. ”)
११७२	विद	(दि.	आ. अ.)	१७०५	वृष	(चु.	आ. ”)
१४५१	विद	(रु.	” ”)	७०६	वृषु	(भ्वा.	प. ”)
१७०९	विद	(चु.	” से.)	१३४८	वृह्	(तु.	” ”)
१४३३	विद्लृ	(तु.	उ. ”)	१४९१	वृ	(क्रया.	” ”)
१३२६	विध	(”	प. ”)	१४८७	वृञ्	(”	उ. ”)
१३५९	विल	(”	” ”)	१००६	वेञ्	(भ्वा.	” अ.)
१६०६	विल	(चु.	उ. ”)	८७७	वेणृ	(”	” से.)
१४२५	विश	(तु.	प. अ.)	३४	वेथृ	(”	आ. ”)
१५२७	विष	(क्रया.	” ”)	८७७	वेनृ (पा.)	(”	उ. ”)
६९८	विषु	(भ्वा.	” ”)	३६७	(टु) वेपृ	(भ्वा.	आ. ”)
१६८६	विष्क	(चु.	आ. से.)	१८८१	वेल	(चु.	उ. ”)
१९४१	विष्क	(”	उ. ”)	५३५	वेल्ल	(भ्वा.	प. ”)
१०९५	विष्लृ	(जु.	” अ.)	५४०	वेल्ल	(”	” ”)
१२१८	विस	(दि.	प. से.)	१०७७	वेवीङ्	(अ.	आ. ”)
१०४८	वी	(अ.	” अ.)	२५५	वेष्ट	(भ्वा.	आ. ञे.)
१९०४	वीर	(चु.	आ. से.)	६४३	वेह्	(”	” ”)
१५८	वुगि	(भ्वा.	प. ”)	९२१	(ओ) वै	(”	प. अ.)
८७८	(उ) वुन्दिर्	(”	उ. ”)	१२९४	व्यच	(तु.	” से.)
१२२०	वुस	(दि.	प. ”)	७६४	व्यथ	(भ्वा.	आ. ”)
९२	वृक	(भ्वा.	आ. ”)	११८२	व्यध	(दि.	प. अ.)
६०४	वृक्ष	(”	” ”)	८८१	व्यय	(भ्वा.	उ. से.)
१५१०	वृङ्	(क्रया.	आ. ”)	१९३३	व्यय	(चु.	” ”)
१०२९	वृजि (पा.)	(अ.	” ”)	११९४	व्युष	(दि.	प. ”)
१०२९	वृजी	(”	” ”)	१२१६	व्युष	(”	” ”)

धातुः					धातुः				
१२१६	व्युस (पा.)	(दि.	प.	से.)	८४३	शल	(भ्वा.	प.	से.)
१००७	व्येञ्	(भ्वा.	उ.	अ.)	३९०	शल्भ	(”	आ.	”)
२५३	व्रज	(”	प.	से.)	७२५	शव	(”	प.	”)
४५१	व्रण	(”	”	”)	७२६	शश	(”	”	”)
१९३८	व्रण	(चु.	उ.	”)	६९०	शष	(”	”	”)
१२९३	(ओ) व्रश्चू	(तु.	प.	”)	६२९	(आङ्) शसि	(”	आ.	”)
१५०५	व्री	(क्रया.	”	अ.)	७२७	शसु	(”	प.	”)
११२६	व्रीङ्	(दि.	आ.	अ.)	७२८	शंसु	(”	”	”)
११४०	व्रीड	(”	प.	से.)	१२६	शाखृ	(”	”	”)
१३९४	व्रुड	(तु.	”	”)	२८९	शाङृ	(”	आ.	”)
१५०३	व्ली	(क्रया.	”	अ.)	९९५	शान	(”	उ.	”)
		श			१०२२	(आङ्) शासु	(अ.	आ.	”)
११८८	शक	(दि.	”	”)	१०७५	शासु	(”	प.	”)
८६	शकि	(भ्वा.	आ.	से.)	६०५	शिक्ष	(भ्वा.	”	”)
१२६२	शक्लृ	(स्वा.	प.	अ.)	१५५	शिखि (पा.)	(”	प.	”)
१६५	शच	(भ्वा.	आ.	से.)	१६१	शिघि	(,,	,,	,,)
२९९	शट	(”	प.	”)	१०२७	शिजि	(अ.	आ.	,,)
३४०	शठ	(”	”	”)	१२५०	शिञ्	(स्वा.	उ.	अ.)
१५६५	शठ	(चु.	उ.	”)	३०३	शिट	(भ्वा.	प.	से.)
१६९२	शठ	(”	आ.	”)	१३६३	शिल	(तु.	,,	,,)
१८५५	शठ	(”	उ.	”)	६८७	शिष	(भ्वा.	,,	अ.)
२७९	शडि	(भ्वा.	आ.	”)	१८१८	शिष	(चु.	उ.	से.)
७९७	शण	(”	प.	”)	१४५२	शिष्लृ	(रु.	प.	अ.)
८५५	शद्लृ	(”	”	अ.)	१७९०	शीक	(चु.	उ.	से.)
१४२९	शद्लृ	(तु.	”	से.)	१८२७	शीक	(,,	,,	,,)
१०००	शप	(भ्वा.	उ.	अ.)	७५	शीकृ	(भ्वा.	आ.	,,)
११६९	शप	(दि.	”	”)	१०३२	शीङ्	(अ.	,,	,,)
१७१५	शब्द	(चु.	”	से.)	३८३	शीभृ	(भ्वा.	,,	,,)
८१८	शमो	(भ्वा.	प.	”)	५२३	शील	(,,	प.	,,)
१६९६	शम	(चु.	आ.	”)	१८७९	शील	(चु.	उ.	,,)
१२०२	शमु	(दि.	प.	”)	१८३	शुच	(भ्वा.	प.	,,)
१५५७	शम्ब	(चु.	उ.	”)	११६५	शुचिर्	(दि.	उ.	,,)
४२३	शर्ब	(भ्वा.	प.	”)	५१३	शुच्य	(भ्वा.	प.	,,)
५८५	शर्व	(”	”	”)	३४१	शुठ	(,,	,,	,,)
४९०	शल	(”	आ.	”)	१६४५	शुठ	(चु.	उ.	,,)

धातुः					धातुः				
३४१	शुठि	(भ्वा.	प.	से.)	७९८	श्रण	(भ्वा.	प.	से.)
३४४	शुठि [पा.]	(,,	,,	,,)	१५७९	श्रण	(चु.	उ.	,,)
१६४६	शुठि	(चु.	उ.	,,)	७९९	श्रथ	(भ्वा.	प.	,,)
११९२	शुध	(दि.	प.	अ.)	१५४७	श्रथ	(चु.	उ.	,,)
१३३७	शुन	(तु.	,,	से.)	१८२४	श्रथ	(,,	,,	,,)
७४	शुन्ध	(भ्वा.	,,	,,)	१८७१	श्रथ	(,,	,,	,,)
१८३३	शुन्ध	(चु.	उ.	,,)	३५	श्रथि	(भ्वा.	आ.	,,)
४३३	शुन्भ	(भ्वा.	प.	,,)	१५११	श्रन्थ	(क्रया.	प.	,,)
१३२३	शुन्भ	(तु.	,,	,,)	१५१३	श्रन्थ	(,,	,,	,,)
४३२	शुभ	(भ्वा.	,,	,,)	१८३८	श्रन्थ	(चु.	उ.	,,)
७५०	शुभ	(,,	आ.	,,)	३९३	श्रन्भु	(भ्वा.	आ.	,,)
१३२२	शुभ	(तु.	,,	,,)	१६२४	श्रभ्र	(चु.	उ.	,,)
१६१९	शुल्क	(चु.	उ.	,,)	१२०५	श्रमु	(दि.	प.	,,)
१६१२	शुल्ब	(,,	,,	,,)	८१०	श्रा	(भ्वा.	,,	अ.)
११८४	शुष	(दि.	प.	अ.)	१०५३	श्रा	(अ.	,,	,,)
१९०३	शूर	(चु.	आ.	से.)	८९७	श्रिञ्	(भ्वा.	उ.	से.)
११५७	शूरी	(दि.	,,	,,)	७०१	श्रिषु	(,,	प.	,,)
१६१३	शूर्प	(चु.	उ.	,,)	१४७६	श्रीञ्	(क्रया.	उ.	अ.)
५२६	शूल	(भ्वा.	प.	,,)	९४२	श्रु	(भ्वा.	प.	,,)
६७९	शूष	(,,	,,	,,)	९१९	श्रै	(,,	,,	,,)
७६०	शृधु	(,,	आ.	,,)	४५६	श्रोणृ	(,,	,,	,,)
८७३	शृधु	(,,	उ.	,,)	८५	श्लकि	(,,	आ.	,,)
१७३५	शृधु	(चु.	,,	,,)	१५२	श्लगि	(,,	प.	,,)
१४८९	शॄ	(क्रया.	प.	,,)	८००	श्लथ [क्रथ]	(,,	,,	,,)
५४३	शेल्ल	(भ्वा.	,,	,,)	१२७	श्लाखृ	(,,	,,	,,)
५०१	शेवृ [पा.]	(,,	आ.	,,)	११५	श्लाघृ	(,,	आ.	,,)
९१८	शै	(,,	प.	अ.)	११८७	श्लिष	(दि.	प.	अ.)
११४५	शो	(दि.	,,	,,)	१५७५	श्लिष	(चु.	उ.	,,)
४५५	शोणृ	(भ्वा.	,,	,,)	७०२	श्लिषु	(भ्वा.	प.	से.)
२९०	शौटृ	(,,	,,	,,)	७७	श्लोकृ	(,,	आ.	,,)
४१	श्च्युतिर्	(,,	,,	,,)	४५७	श्लोणृ	(,,	प.	,,)
५१८	श्मील	(,,	,,	,,)	९६	श्वकि	(,,	आ.	,,)
९६३	श्यैङ्	(,,	आ.	अ.)	१६६	श्वच	(,,	,,	,,)
८४	श्रकि	(,,	,,	,,)	१६७	श्वचि	(,,	,,	,,)
१५१	श्रगि	(,,	प.	,,)	१५६६	श्वठ	(चु.	उ.	,,)

धातुः				
१८५६	श्वठ	(चु.	उ.	से.)
१५६६	श्वठि (पा.)	(,,	,,	,,)
१६२४	श्वभ्र	(,,	,,	,,)
१६२३	श्वर्त	(,,	,,	,,)
५४९	श्वल	(भ्वा.	प.	,,)
१५७१	श्वल्क	(चु.	उ.	,,)
५५०	श्वल्ल	(भ्वा.	प.	,,)
१०६९	श्वस	(अ.	,,	,,)
१०१०	(टुओ) श्वि	(भ्वा.	,,	,,)
७४२	श्विता	(,,	आ.	,,)
१०	श्विदि	(,,	,,	,,)
		ष		
७८९	षगे	(,,	प.	,,)
१२६९	षघ	(स्वा.	,,	,,)
१६३	षच	(भ्वा.	आ.	,,)
९९७	षच	(,,	उ.	,,)
३१३	षट	(,,	प.	,,)
४६४	षण	(,,	,,	,,)
१६३४	षट्ट	(चु.	उ.	,,)
१४६५	षणु	(त.	,,	,,)
१८३२	(आङः) षद	(चु.	,,	,,)
८५४	षद्लृ	(भ्वा.	प.	अ.)
१४२८	षद्लृ	(तु.	,,	,,)
९८७	षन्ज	(भ्वा.	,,	,,)
४००	षप	(,,	,,	से.)
८२९	षम	(,,	,,	,,)
१५५६	षम्ब	(चु.	उ.	,,)
२२५	षर्ज	(भ्वा.	प.	,,)
४२४	षर्ब	(,,	,,	,,)
५८६	षर्व	(,,	,,	,,)
५४७	षल	(,,	,,	,,)
२०२	षस्ज	(,,	,,	,,)
१०७८	षस	(अ.	,,	,,)
८५२	षह	(भ्वा.	आ.	से.)
११२८	षह	(दि.	प.	,,)

धातुः				
१८१०	षह	(चु.	उ.	से.)
१५७०	षान्त्व	(,,	,,	,,)
१४३५	षिच	(तु.	,,	,,)
१२४९	षिञ्	(स्वा.	,,	अ.)
१४७८	षिञ्	(क्रया.	,,	,,)
३०४	षिट	(भ्वा.	प.	से.)
४७	षिध	(,,	,,	,,)
११९३	षिधु	(दि.	,,	,,)
४८	षिधू	(भ्वा.	,,	,,)
४३१	षिभि (पा.)	(,,	,,	,,)
४३०	षिभु (पा.)	(,,	,,	,,)
१३६४	षिल	(तु.	,,	,,)
११०८	षिवु	(दि.	,,	,,)
९४१	षु	(भ्वा.	,,	अ.)
१०४१	षु	(अ.	,,	,,)
१२४८	षुञ्	(स्वा.	उ.	,,)
१५६३	षुट्ट	(चु.	उ.	से.)
१३४१	षुर	(तु.	प.	,,)
११२९	षुह	(दि.	,,	,,)
१४०९	षू	(तु.	,,	,,)
१०३१	षूङ्	(अ.	आ.	,,)
११३२	षूङ्	(दि.	,,	,,)
२५	षूद	(भ्वा.	आ.	से.)
१७१८	षूद	(चु.	उ.	,,)
४३१	षृन्भु	(भ्वा.	प.	,,)
४३०	षृभु	(,,	,,	,,)
५४३	षेल्लृ (पा.)	(,,	,,	,,)
५०१	षेवृ	(,,	आ.	,,)
९१५	षै	(,,	प.	अ.)
११४७	षो	(दि.	,,	,,)
७८२	ष्टक	(भ्वा.	,,	से.)
७९०	ष्टगे	(,,	,,	,,)
४६१	ष्टन	(,,	,,	,,)
३८६	ष्टभि	(,,	आ.	,,)
८३०	ष्टम	(,,	प.	,,)

धातुः				धातुः			
१२६६	ष्टिघ	(स्वा.	आ. से.)	१९२३	सङ्ग्राम	(चु.	उ. से.)
३६४	ष्टिपृ	(भ्वा.	" ")	१९०७	सत्र	("	आ. ")
११२४	ष्टिम	(दि.	प. ")	१८८८	सभाज	("	उ. ")
११२५	ष्टीम	("	" ")	१२२२	समी (पा.)	(दि.	प. ")
१७५	ष्टुच	(भ्वा.	आ. ")	१०७९	सस्ति	(अ.	" ")
१०४३	ष्टुञ्	(अ.	प. अ.)	१२६४	साध	(स्वा.	" अ.)
१६७३	ष्टुप	(चु.	उ. से.)	१८८०	साम	(चु.	उ. से.)
३९४	ष्टुभु	(भ्वा.	आ. ")	१५५७	साम्ब (पा.)	("	" ")
३६५	ष्टेपृ	("	" ")	१८६९	सार	("	" ")
९२२	ष्टै	("	प. अ.)	१९३०	सुख	("	" ")
९११	ष्ठ्यै	("	" ")	१८७४	सूच	("	" ")
६६१	ष्ठूक्ष	("	" से.)	१९०९	सूत्र	("	" ")
९२८	ष्ठा	("	" अ.)	६६६	सूर्क्ष	(भ्वा.	प. ")
५६०	ष्ठिवु	("	" से.)	५०९	सूर्क्ष्य	("	" ")
१११०	ष्ठिवु	(दि.	" ")	९३५	सृ	("	" अ.)
१११२	ष्णसु	("	" ")	१०९९	सृ	(जु.	" ")
१०५२	ष्णा	(अ.	" अ.)	११७९	सृज	(दि.	आ. ")
१२०१	ष्णिह	(दि.	" से.)	१४१५	सृज	(तु.	प. ")
१५७३	ष्णिह	(चु.	उ. ")	९८३	सृप्लृ	(भ्वा.	" से.)
१०३८	ष्णु	(अ.	प. ")	८१	सेकृ	("	आ. ")
१११९	ष्णुसु	(दि.	" ")	९७९	स्कन्दिर्	("	प. ")
१२००	ष्णुह	("	" ")	३८७	स्कभि	("	आ. ")
९२३	ष्णै	(भ्वा.	" अ.)	१४७९	स्कुञ्	(क्रया.	उ. अ.)
९४८	ष्मिङ्	("	आ. से.)	९	स्कुदि	(भ्वा.	आ. से.)
१५७४	ष्मिङ् (पा.)	(चु.	उ. ")	७६८	स्खद	("	" ")
९७६	ष्वन्ज	(भ्वा.	आ. अ.)	८२०	स्खदिर्	("	प. ")
१८	ष्वद	("	" से.)	५४४	स्खल	("	" ")
१८०६	ष्वद	(चु.	उ. ")	८१६	स्खलि (पा.)	("	" ")
१०६८	(अ) ष्वप्	(अ.	प. अ.)	१२५३	स्तृञ्	(स्वा.	उ. अ.)
१००	ष्वष्क	(भ्वा.	आ. से.)	१३५०	स्तृहू	(तु.	प. वे.)
७४४	(अ) ष्विदा	("	" ")	१४८५	स्तृञ्	(क्रया.	उ. ")
९७८	(अ) ष्विदा	("	प. ")	१८६०	स्तन	(चु.	" ")
११८९	ष्विदा	(दि.	" अ.)	१८९८	स्तेन	("	" ")
		स		९१०	स्त्यै	(भ्वा.	प. अ.)
१८९२	सङ्केत	(चु.	उ. से.)	१९२४	स्तोम	(चु.	उ. से.)

धातुः				
८३६	स्थल (ष्ठल)	(भ्वा.	प.	से.)
१३८९	स्थुड	(तु.	"	")
१९०५	स्थूल	(चु.	आ.	")
३	स्पर्ध	(भ्वा.	"	")
१४	स्पदि	("	"	")
८८७	स्पश	("	उ.	")
१६८१	स्पश	(चु.	आ.	")
१२६०	स्पृ	(स्वा.	प.	अ.)
१४२३	स्पृश	(तु.	"	")
१८७२	स्पृहं	(चु.	उ.	से.)
१३९०	स्फर (पा.)	(तु.	प.	")
४८७	स्फायी	(भ्वा.	आ.	")
१५७३	स्फिट (पा.)	(चु.	उ.	")
१६३५	स्फिट्ट	("	"	")
२६०	स्फुट	(भ्वा.	आ.	")
१३७४	स्फुट	(तु.	प.	")
१७२३	स्फुट	(चु.	उ.	")
३२९	स्फुटि (पा.)	(भ्वा.	प.	")
३२९	स्फुटिर्	("	"	")
१३९२	स्फुड	(तु.	"	")
१५३८	स्फुडि	(चु.	उ.	")
१३९०	स्फुर	(तु.	प.	")
२१३	स्फुर्छा	(भ्वा.	"	")
१३९०	स्फुल (पा.)	(तु.	"	")
२३५	(टुओ)स्फूर्जा	(भ्वा.	"	")
१५७४	स्मिट	(चु.	उ.	")
५१९	स्मील	(भ्वा.	प.	")
८०७	स्मृ	("	"	अ.)
९३३	स्मृ	("	"	")
१२६०	स्मृ (पा.)	(स्वा.	"	")
७६१	स्यन्दृ	(भ्वा.	आ.	से.)
१६९४	स्यम	(चु.	"	")
८२६	स्यमु	(भ्वा.	प.	")
८३	स्रकि	("	आ.	")
७५७	स्रन्भु	("	"	")

धातुः				
७५४	स्रंसु	(भ्वा.	आ.	से.)
११०९	स्रिवु	(दि.	प.	")
९४०	स्रु	(भ्वा.	"	अ.)
८२	स्रेकृ	("	आ.	से.)
८१७	स्वन	("	प.	")
८२७	स्वन	("	"	")
१८६४	स्वर	(चु.	उ.	")
१९	स्वर्द	(भ्वा.	आ.	")
२८	स्वाद	("	"	")
१८०६	स्वाद (पा.)	(चु.	उ.	")
९३२	स्वृ	(भ्वा.	प.	अ.)
	ह			
३१२	हट	("	"	से.)
३३५	हठ	("	"	")
९७७	हद	("	आ.	अ.)
१०१२	हन	(अ.	प.	")
४६७	हम्म	(भ्वा.	"	से.)
५१२	हय	("	"	")
५१४	हर्य	("	"	")
८३७	हल	("	"	")
७२१	हसे	("	"	")
१०९०	(ओ) हाक्	(जु.	"	अ.)
१०८९	(ओ) हाङ्	("	आ.	")
१२५८	हि	(स्वा.	प.	")
८६१	हिक्क	(भ्वा.	उ.	से.)
३१७	हिट (पा.)	("	प.	")
२६८	हिडि	("	आ.	")
१३६२	हिल	(तु.	प.	")
५९१	हिवि	(भ्वा.	"	")
१६८६	हिष्क (पा.)	(चु.	आ.	")
१४५७	हिसि	(रु.	प.	")
१८३०	हिसि	(चु.	उ.	")
१०८३	हु	(जु.	प.	अ.)
२६९	हुडि	(भ्वा.	आ.	से.)
२७७	हुडि	("	"	")

धातुः				धातुः			
३५२ हुड़ृ	(भ्वा.	प.	से.)	८०६ ह्वल	(भ्वा.	प.	से.)
२११ हुर्छा	(”	”	”)	७८७ ह्वगे	(”	”	”)
८४४ हुल	(”	”	”)	७११ ह्वस	(”	”	”)
३५३ हूड़ृ	(”	”	”)	२६ ह्वाद	(”	आ.	”)
१०९७ हृ	(जु.	”	अ.)	१०८५ ह्वी	(जु.	प.	अ.)
८९९ हृञ्	(भ्वा.	उ.	”)	२१० ह्वीच्छ	(भ्वा.	”	से.)
१२३० हृष	(दि.	प.	से.)	६२२ ह्वेषृ	(”	आ.	”)
७०९ हृषु	(भ्वा.	”	”)	७८८ ह्वगे	(”	प.	”)
१५३३ हेठ	(कथा.	”	”)	१६५९ ह्वप	(चु.	उ.	”)
२६६ हेठ	(भ्वा.	आ.	”)	७१२ ह्वस	(भ्वा.	प.	”)
७७८ हेड	(”	प.	”)	२७ ह्वादी	(”	आ.	”)
२८४ हेड़ृ	(”	आ.	”)	८०५ ह्वल	(”	प.	”)
६२१ हेषृ	(”	”	”)	९३१ ह्वृ	(”	”	अ.)
२८५ होड़ृ	(”	”	”)	९३४ ह्वृ	(”	”	”)
३५४ होड़ृ	(”	प.	”)	१००८ ह्वृञ्	(”	उ.	”)
१०८२ ह्रुङ्	(अ.	आ.	अ.)				

॥ सौत्रधातवः ॥

सूत्रम्		पार्श्वम्	सूत्रम्		पार्श्वम्
२४२२	ऋतिः (३-१-२९)	१७८	३५६	पीयुः (३-७६ उ०)	६१९
४१७	कञ्जिः (३-१-३७ उ०)	६२६	५४	भडः (१-५४ उ०)	५८३
५२२	कडिः (४-८२ उ०)	६३७	९७	युषः (१-९७ उ०)	५८७
५२२	कदिः (४-८२ उ०)	६३७	५६३	वर्णिः (४-१२३ उ०)	६४४
२५०	क्षदिः (२-९२ उ०)	६०७	१८३	शुः (२-२५ उ०)	६००
३१३०	जुः (३-२-१५०)	५६४	२९००	सातिः (३-१-१३८)	५००
५०६	तदिः (४-६६ उ०)	६३६	२५५५	स्कम्भुः (३-१-८२)	२७८
४८	तव (१-४८ उ०)	५८२	„	स्कुम्भुः („)	„
२४४४	तुः (७-३-९५)	१९२	„	स्तन्भुः („)	„
	दभिः (वा)		„	स्तुम्भुः („)	„

